पदपाठसहिता

ऋग्वेद-संहिता

सायणाचार्यकृत-भाष्यसंवलिता
सैव
हिन्दीभाषामन्त्रानुवादसमन्विता

अनुवादक
पण्डित रामगोविन्द त्रिवेदी

।।श्रीः।।

विद्याभवन प्राच्यविद्या ग्रन्थमाला
३५

पदपाठसहिता

ऋग्वेद-संहिता

सायणाचार्यकृत-भाष्यसंवलिता

सैव

हिन्दीभाषामन्त्रानुवादसमन्विता

अनुवादक

पण्डित रामगोविन्द त्रिवेदी

प्रथमोऽष्टकः

चौखम्बा विद्याभवन
वाराणसी

प्रकाशक

चौखम्बा विद्याभवन

(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)

चौक (बैंक ऑफ बड़ोदा भवन के पीछे)

पो. बा. नं. 1069, वाराणसी 221001

दूरभाष : 2420404

ई-मेल : cvbhawan@yahoo.co.in

पुर्नमुद्रित संस्करण २००७

१-९ भाग (सम्पूर्ण)

मूल्य : ३५००.००

अन्य प्राप्तिस्थान

चौखम्बा पब्लिशिंग हाउस

4697/2, भू-तल (ग्राउण्ड फ्लोर)

गली नं. 21-ए, अंसारी रोड

दरियागंज, नई दिल्ली 110002

दूरभाष : 23286537

❖

चौखम्बा संस्कृत प्रतिष्ठान

38 यू. ए. बंगलो रोड, जवाहर नगर

पो. बा. नं. 2113

दिल्ली 110007

दूरभाष : 23856391

❖

चौखम्बा सुरभारती प्रकाशन

के. 37/117 गोपालमन्दिर लेन

पो. बा. नं. 1129, वाराणसी 221001

दूरभाष : 2335263

THE
VIDYABHAWAN PRACHYAVIDYA GRANTHAMALA
35

ṚG-VEDA-SAṀHITĀ

Together with

PADAPĀṬHA
&
SĀYAṆABHĀṢYA

Hindi Translation
by

Pt. Ram Govind Trivedi

FIRST AṢṬAKA

CHOWKHAMBA VIDYABHAWAN
VARANASI

Publishers :
CHOWKHAMBA VIDYABHAWAN
(Oriental Publishers & Distributors)
Chowk (Behind Bank of Baroda Building)
Post Box No. 1069
Varanasi 221001
Tel. : 2420404
E-mail : cvbhawan@yahoo.co.in

Edition : 2007
Price : 3500.00

Also can be had from :
CHAUKHAMBA PUBLISHING HOUSE
4697/2, Ground Floor
Gali No. 21-A, Ansari Road
Daryaganj, New Delhi 110002
Tel. : 23286537

CHAUKHAMBA SANSKRIT PRATISHTHAN
38 U.A. Bungalow Road, Jawahar Nagar
Post Box No. 2113
Delhi 110007
Tel. : 23856391

CHAUKHAMBA SURBHARATI PRAKASHAN
K. 37/117, Gopal Mandir Lane
Post Box No. 1129
Varanasi 221001

ॐ

ऋक्संहिता

सभाष्या, पदपाठसहिताच.

उपोद्घातप्रकरणम्

श्रीगणेशायनमः श्रीसरस्वत्यैनमः वागीशाद्याःसुमनसःसर्वार्थानामुपक्रमे । यंनत्वाकृतकृत्याःस्युस्तंनमामिगजाननम्.॥ १ ॥ यस्यनिःश्वसितंवेदायोवेदेभ्योऽखिलंजगत्. । निर्ममेतमहंवन्दे विद्यातीर्थमहेश्वरम्.॥ २ ॥ यत्कटाक्षेणतद्रूपंदधद्बुक्कमहीपतिः । आदिशन्माधवाचार्यंवेदार्थस्य प्रकाशने ॥ ३ ॥ येपूर्वोत्तरमीमांसेतेव्याख्यायातिसङ्ग्रहात्. । कृपालुर्माधवाचार्योवेदार्थंवक्तुमुद्यतः ॥४॥ आध्वर्यवस्यंयज्ञेषुप्राधान्याद्व्याकृतःपुरा । यजुर्वेदोथहौत्रार्थंऋग्वेदोव्याकरिष्यते॥५॥एतस्मिन्प्रथमाध्यायःश्रोतव्यःसम्प्रदायतः । व्युत्पन्नस्तावतासर्वंबोद्धुंशक्नोतिबुद्धिमान्. ॥६॥ अत्र केचिदाहुः—ऋग्वेदस्यप्राथम्येनसर्वत्राम्नातत्वात्. अभ्यर्हितंपूर्वमितिन्यायेनाभ्यर्हितत्वात्. तद्व्याख्यानमादौयुक्तम्. प्राथम्यंचपुरुषसूक्तेविस्पष्टम्—तस्माद्यज्ञात्सर्वहुतऋचःसामानिजज्ञिरे। छन्दांसिजज्ञिरेतस्माद्यजुस्तस्मादजायतेति । सहस्रशीर्षापुरुषइत्युक्तत्वात्. परमेश्वराद्यज्ञाद्यजनीयात्पूजनीयात्सर्वहुतःसर्वैर्हूयमानात्. । यद्यपीन्द्रादयस्तत्रतत्रहूयन्ते तथापिपरमेश्वरस्यैवेन्द्रादिरूपेणावस्थानादविरोधः । तथाचमन्त्रवर्णः—इन्द्रंमित्रंवरुणमग्निमाहुरथोदिव्यःससुपर्णोगरुत्मान्. ।

---

१ सप्राहनृपतिंराजन्सायणार्योममानुजः । सर्वंवेत्त्येषवेदानांव्याख्यातृत्वेनियुज्यताम्. ४ इत्युक्तोमाधवार्येणवीरबुक्कमहीपतिः । अन्वगात्सायणाचार्यंवेदार्थस्यप्रकाशने इत्यधिकमेकस्मिन्पुस्तके । २ ऋक्संहिता अष्टमाष्टकः (८) चतुर्थाध्यायः (४) अष्टादशोवर्गः (१८) । ३ ऋक्संहितायांअष्टमाष्टके चतुर्थाध्यायस्यसप्तदशोवर्गे (८. ४. १७.) । ४ ऋ. सं. २. ३. २२. ।

एकंसद्विप्राबहुधावदन्त्यग्निंयमंमातरिश्वानमाहुरिति । वाजसनेयिनश्चामनन्ति—तद्यदिदमाहुरमुं यजामुंयजेत्येकैकंदेवमेतस्यैवसाविसृष्टिरेषउह्येवसर्वेदेवाइति । तस्मात्सर्वैरपिपरमेश्वरएवहूयते नकेवलमृचांपाठप्राथम्येनांभ्यर्हितत्वम् किन्तु यज्ञाङ्गदार्ढ्यहेतुत्वादपि तथाचतैत्तिरीयाआमनन्ति—यद्वैयज्ञस्यसाम्नायजुषाक्रियतेशिथिलंतद्यदृचातद्दृढमिति । तथाचसर्ववेदगतानिब्राह्मणानिस्वाभिहितेऽर्थेविश्वासदार्ढ्याय तदेतदृचाभ्युक्तमित्यृचमेवोदाहरन्ति।मन्त्रकाण्डेष्वपियजुर्वेदगतेषु तत्रतत्राध्वर्युणाप्रयोज्याऋचोबहवआम्नाताः । साम्नांतुसर्वेषामृगाश्रितत्वंप्रसिद्धम् । आथर्वणिकैरपि स्वकीयसंहितायामृचएवबाहुल्येनाधीयन्ते अतोऽन्यैःसर्वै र्वेदैरादृतत्वात् अभ्यर्हितत्वम् । छन्दोगास्तुप्राथम्येनसनत्कुमारंप्रति नारदवाक्यमेवमामनन्ति—ऋग्वेदंभगवोऽध्येमियजुर्वेदंसामवेदमाथर्वणंचेति । मुण्डकोपनिषद्यप्येवमाम्नायते—ऋग्वेदोयजुर्वेदःसामवेदोऽथर्वणइति । तापनीयोपनिषद्यपिमन्त्रराजपादेषुक्रमेणाध्ययनमेवमामनन्ति— ऋग्यजुःसामाथर्वाणश्चत्वारोवेदाः साङ्गाःसशाखाश्चत्वारःपादाभवन्तीति । एवंसर्वत्रोदाहरणीयम् तस्मात् ऋग्वेदस्याभ्यर्हितस्यादौव्याख्यानमुचितमिति । तान्प्रत्येतदुच्यते—अस्त्वेवंसर्ववेदाध्ययनतत्पारायणब्रह्मयज्ञजपादौ ऋग्वेदस्यैवप्राथम्यम् अर्थज्ञानस्यतु यज्ञानुष्ठानार्थत्वात् तत्रतुयजुर्वेदस्यैवप्रधानत्वात् तद्व्याख्यानमेवादौयुक्तम् । तत्प्राधान्यंचकाचिदृगेवाह—ऋचांत्वःपोषमास्तेपुपुष्वान्गायत्रंत्वोगायतिशक्करीषु । ब्रह्मात्वोवदतिजातविद्यांयज्ञस्यमात्रांविमिमीतउत्वइति । एतस्याऋचस्तात्पर्यंनिरुक्तकारोयास्कःसंक्षिप्यदर्शयति—इत्यृत्विक्कर्मणांविनियोगमाचष्टेइति पुनरपिसएवप्रथमंपादंविवृणोति—ऋचामेकःपोषमास्तेपुपुष्वान्होतर्गर्चनीति । अस्यायमर्थः—त्वशब्दएकशब्दपर्यायोहोतृविशेषणम् होतृनामकएकऋत्विग्यज्ञकालेस्वकीयवेदगतानामृचांपुष्टिंकुर्वन्नास्ते भिन्नप्रदेशेष्वाम्नातानामृचांसंघमेकत्रसम्पाद्यैतावदिदंशस्त्रमितिकुर्ष्टिंकरोति सेयंपुष्टिः । अर्चनीत्यमुमर्थंमृक्शब्दआचष्टे अर्च्यतेप्रशस्यतेऽनयादेवविशेषःक्रियाविशेषस्तत्साधनविशेषोवेत्यृक्शब्दव्युत्पत्तेरिति । अथद्वितीयंपादंविवृणोति—गायत्रमेकोगायतिशक्करीषूद्गातागायत्रंगायतेःस्तुतिकर्मणःशक्वर्यऋचःशक्नोतेस्तद्यदाभिर्वृत्रमशकद्धन्तुंतच्छक्करीणांशक्करीत्वमितिविज्ञायतइति । अस्यायमर्थः—उद्गातृनामकएकऋत्विग्गायत्रशब्दाभिधेयंस्तोत्रंशक्करीशब्दाभिधेयास्वृक्षुगायति धातूनामनेकार्थत्वेन स्तुतिक्रियावाचिनोगायतिधातोरुत्पन्नोगायत्रशब्दः शक्करीशब्दस्तुशक्नोतिधातोरुत्पन्नः वृत्रंशत्रुंहन्तुंशक्नोत्याभिरृग्भिरित्येषाव्युत्पत्तिःकस्मिंश्चिद्ब्राह्मणेविज्ञायतेइति । अथतृतीयं पादंविवृणोति—ब्रह्मैकोजातेजातेविद्यांवदतिब्रह्मासर्वविदिति । अस्यायमर्थः—ब्रह्मनामकएकऋ-

---

१ तैत्तिरीयसंहितायांषष्ठकाण्डेपञ्चमप्रपाठकेदशमेनुवाके (६. ५. १०) । २ ऋ. सं. ८. २. २४. । ३ नि० १. ८. । ४ नि० १. ८ ।

नामकएकऋत्विग्जातेजातेतदातदोत्पन्नेप्रस्तुतेप्रणयनादिकर्मणिविद्यामनुज्ञावदति ब्रह्मन्नपः प्रणेष्यामी त्येवं सम्बोधितः सन् ओम्प्रणयेत्यनुजानाति सचब्रह्मावेदत्रयोक्तसर्वकर्माभिज्ञः तस्माद्योग्यतांदृष्ट्वा तत्तदनुज्ञातुंसतिप्रमादेसमाधातुंचसमर्थइति। तच्चसामर्थ्यंछन्दोगाआमनन्ति—एषएवयज्ञस्तस्य मनश्चवा-क्चवर्तनीतयोरन्यतरांमनसासंस्करोतिब्रह्मावाचाहोताध्वर्युरुद्गातान्यतरामिति । कृत्स्नोयज्ञःप्रमादराहि-त्यायमनसासम्यगनुसन्धेयः वाचाचवेदत्रयोक्तमन्त्राः पठनीयाः तत्रहोत्रादयस्त्रयोमिलित्वावाग्रूपंयज्ञ-मार्गंसंस्कुर्वन्ति ब्रह्मात्वेकएवमनोरूपंयज्ञमार्गंकृत्स्नमपिसंस्करोति तस्मादस्यास्तिसामर्थ्यमिति । अथ-चतुर्थपादंविवृणोति—यज्ञस्यमात्रांविमिमीतउत्वइति।एकोध्वर्युरध्वरयुरध्वरयुरध्वरंयुनक्त्यध्वरस्यनेतेति। अस्यायमर्थः-अध्वर्युनामकएकऋत्विग्यज्ञस्यमात्रांस्वरूपंविमिमीतेविशेषेणनिष्पादयति मीयतेनिर्मीयते-इतिमात्राःस्वरूपं तन्निष्पादकत्वंचाध्वर्योर्नामनिर्वचनादवगम्यते अध्वर्युरित्यत्रछान्दस्याप्रक्रिययालुप्तम-कारंपुनःप्रक्षिप्याध्वरयुरितिनामसम्पादनीयम् अध्वरंयुनक्तीत्यवयवार्थः अध्वरस्यनेतेतितात्पर्यार्थइति। एतदेवाभिप्रेत्याध्वर्युवेदस्ययागनिष्पादकत्वद्योतकंनिर्वचनंयास्कोदर्शयति—मन्त्रामननात् छन्दांसिछाद-नात् स्तोमःस्तवनात् यजुर्यजतेरिति[1] । एवंसत्यध्वर्युसम्बन्धियजुर्वेदेनिष्पन्नंयज्ञशरीरमुपजीव्य तद-पेक्षितौस्तोत्रशस्त्ररूपाववयवावितरेणवेदद्वयेनपूर्यते इत्युपजीव्यस्ययजुर्वेदस्यप्रथमतोव्याख्यानंयुक्तम् ततऊर्ध्वंसाम्नामृगाश्रितत्वात् उभयोर्मध्येप्रथमतऋग्व्याख्यानंयुक्तमित्यृग्वेदइदानींव्याख्यायते । ननु वेदएवतावन्नास्ति कुतस्तदवान्तरविशेषऋग्वेदः तथाहि—कोयंवेदोनाम नहितत्रलक्षणंप्रमाणंचास्ति नचतदुभयव्यतिरेकेणकिञ्चिद्वस्तुप्रासिध्यति लक्षणप्रमाणाभ्यांहिवस्तुसिद्धिरितिन्यायविदांमतम् प्रत्य-क्षानुमानोपमानागमेषुप्रमाणविशेषेष्वन्तिमोवेदइतितल्लक्षणमितिचेत् न मन्वादिस्मृतिष्वतिव्याप्तेः सम-यबलेनसम्यक्परोक्षानुभवसाधनमित्येतस्यागमलक्षणस्यतास्वपिसद्भावात् अपौरुषेयत्वेसतीतिविशेषणा-ददोषइतिचेत् न वेदस्यापिपरमेश्वरनिर्मितत्वेनपौरुषेयत्वात् शरीरधारिजीवपुरुषनिर्मितत्वाभावादपौरु-षेयत्वमितिचेत् न सहस्रशीर्षापुरुषइत्यादिश्रुतिभिरीश्वरस्यापिशरीरित्वात् कर्मफलरूपशरीरधारिजीव-निर्मितत्वाभावमात्रेणापौरुषेयत्वंविवक्षितमितिचेत् न जीवविशेषैरग्निवाय्वादित्यैर्वेदानामुत्पादितत्वात् ऋग्वेदएवाग्नेरजायतयजुर्वेदोवायोःसामवेदआदित्यादितिश्रुतेः । ईश्वरस्याग्न्यादिप्रेरकत्वेननिर्मातृत्वं द्रष्टव्यम् । मन्त्रब्राह्मणात्मकःशब्दराशिर्वेदइतिचेत् न ईदृशोमन्त्रईदृशंब्राह्मणमित्यनयोरद्याप्यनिर्णी-तत्वात् । तस्मान्नास्तिकिञ्चिद्वेदस्यलक्षणम् नापितत्सद्भावेप्रमाणंपश्यामः ऋग्वेदंभगवोध्येमियजुर्वेदं-सामवेदमाथर्वणंचतुर्थमित्यादिवाक्यंप्रमाणमितिचेत् न तस्यापिवाक्यस्यवेदान्तःपातित्वेनात्माश्रयत्वप्रस

---

१ नि० ७. १२. ।   २ ऐतरेयब्राह्मणेपञ्चमपंचिकायांद्वात्रिंशेखण्डे (५-३२.) ।

ङ्गात् नखलुनिपुणोपिस्वस्कंधमारोढुंप्रभवेदिति। वेदएवद्विजातीनांनिःश्रेयसकरः परइत्यादिस्मृतिवाक्यं- प्रमाणमितिचेत् न तस्याप्युक्तश्रुतिमूलत्वेननिराकृतत्वात् । प्रत्यक्षादिकंशङ्कितुमप्ययोग्यम् । वेद- विषयातुलोकप्रसिद्धिःसार्वजनीनापि नीलंनभइत्यादिवद्भ्रान्ता । तस्माल्लक्षणप्रमाणरहितस्यवेदस्यसद्भा- वोनाङ्गीकर्तुंशक्यतइतिपूर्वःपक्षः । अत्रोच्यते—मन्त्रब्राह्मणात्मकत्वंतावददुष्टंलक्षणम् अतएवापस्त- म्बोयज्ञपरिभाषायामेवमाह—मन्त्रब्राह्मणयोर्वेदनामधेयमिति । तयोस्तुस्वरूपमुपरिष्टान्निर्णेष्यते अपौरु- षेयवाक्यत्वमिदमपिथादृशमस्माभिर्विवक्षितं तादृशमुत्तरत्र स्पष्टीभविष्यति प्रमाणान्यपियथोक्तश्रुति- स्मृतिलोकप्रसिद्धिरूपाणिवेदसद्भावेद्रष्टव्यानि यथा घटपट्यादिद्रव्याणांस्वप्रकाशकत्वाभावेऽपिसूर्यच- न्द्रादीनांस्वप्रकाशकत्वमविरुद्धम् तथामनुष्यादीनांस्वस्कन्धारोहासंभवेऽप्यकुण्ठितशक्तेर्वेदस्येतरव- स्तुप्रतिपादकत्ववत्स्वप्रतिपादकत्वमप्यस्तु । अतएवसंप्रदायविदोऽकुण्ठितांशक्तिंवेदस्यदर्शयन्ति—चो- दनाहिभूतंभवन्तंभविष्यन्तंसूक्ष्मंव्यवहितंविप्रकृष्टमित्येवंजातीयकमर्थंशक्नोत्यवगमयितुमिति । तथासति वेदमूलायाःस्मृतेस्तदुभयमूलायालोकप्रसिद्धेश्चप्रामाण्यंदुर्वारम् तस्माल्लक्षणप्रमाणसिद्धोवेदोनकेनापि- चार्वाकादिनाऽपोढुंशक्यइतिस्थितम् । ननु अस्तुनामवेदाख्यःकश्चित्पदार्थः तथापिनासौव्याख्यान- मर्हति अप्रमाणत्वेनानुपयुक्तत्वात् नहिवेदःप्रमाणम् तल्लक्षणस्यतत्रदुःसंपादत्वात् तथाहि सम्यगनुभ- वसाधनंप्रमाणमितिकेचिल्लक्षणमाहुः अपरेत्वनधिगतार्थगन्तृप्रमाणमित्याचक्षते नचैतदुभयंवेदेसंभवति मन्त्रब्राह्मणात्मकोहिवेदः तत्रमन्त्राःकेचिदबोधकाः अम्यक्सातइन्द्रऋष्टिरस्मेइत्येकोमन्त्रः । याद‍ृश्मि- न्धायितमपस्ययाविददित्यन्यः । सृण्येवजर्भरीतुर्फरीतूइत्यपरः । एवं आपान्तमन्युस्तृपलप्रभर्मेत्यादय उदाहार्याः । नह्येतैर्मन्त्रैःकश्चिदप्यर्थोवबुध्यते एतेष्वनुभवएवयदानास्ति तदातत्सम्यक्त्वं तदी- यसाधनत्वंचदूरापेतम् । अधःस्विदासी ३ दुपरिस्विदासी ३ दितिमन्त्रस्यबोधकत्वेपिस्थाणुर्वा पुरुषोवेत्यादिवाक्यवत्सन्दिग्धार्थबोधकत्वान्नास्तिप्रामाण्यम् । ओषधेत्रायस्वैनमितिमन्त्रोदर्भविषयः । स्व- धितेमैनंहिंसीरितिक्षुरविषयः । शृणोतग्रावाणइतिपाषाणविषयः । एतेष्वचेतनानांदर्भक्षुरपाषाणानांचेत- नवत्सम्बोधनंश्रूयते ततोद्वौचन्द्रमसावितिवाक्यवद्विपरीतार्थबोधकत्वादप्रामाण्यम् एकएवरुद्रोनद्वितीयोवतस्थे । सहस्राणिसहस्रशोयेरुद्राअधिभूम्यामित्येतयोस्तुमन्त्रयोर्यावज्जीवमहंमौनीतिवाक्यवद्व्या- घातबोधकत्वाद् अप्रामाण्यम् आपउन्दन्त्वितिमन्त्रोयजमानस्यक्षौरकालेजलेनशिरसःक्लेदनंब्रूते ।

---

१ याज्ञवल्क्यस्मृतौआचाराध्यायेश्लो. (४०) । २ आपस्तंबसूत्रेप्रथमाध्याये । ३ शाबर- रभाष्ये चोदनालक्षणोधर्मइति सू० १।१।२.।४ ऋ० सं. २.४.८.।५ ऋ० सं. ४-२-२४।६ ऋ. सं. ८-६-२.। ७ ऋ. सं. ८.४.१४.। ८ ऋ. सं. ८.७.१७ । ९ तैत्तिरीयसं. प्र. कां. द्वि. प्रपा. प्रथमा नुवाके (१-२-१-)। १० तै. सं. १-३.१३.। ११ तै. सं. ४-५-११.। १२ तै. सं. १-२-१.।

शुंभिकेशिरआरोहशोभयन्तीमुखंममेतिमन्त्रोविवाहकाले मङ्गलाचरणार्थपुष्पनिर्मितायाःशुभिकायावरवध्वोःशिरस्यवस्थानंब्रूते । तयोश्चमन्त्रयोर्लोकप्रसिद्धार्थानुवादित्वात् अनधिगतार्थगन्तृत्वंनास्ति तस्मान्मन्त्रभागोनप्रमाणम् । अत्रोच्यते—अम्यगादिमन्त्राणामर्थोयास्केननिरुक्तग्रन्थेऽवबोधितः तत्परिचयरहितानामबोधोनमन्त्राणांदोषमावहति । अतएवात्रलौकिकन्यायमुदाहरन्ति—नैषस्थाणोरपराधोयदेनमन्धोनपश्यतिपुरुषापराधःसभवतीति । अधःस्विदासीदितिमन्त्रश्चनसन्देहबोधनायप्रवृत्तः किंतर्हिजगत्कारणस्यपरवस्तुनोतिगमीरत्वंनिश्चेतुमेवप्रवृत्तः तदर्थमेवहिगुरुशास्त्रसंप्रदायरहितैर्दुर्बोधत्वमधःस्विदित्यनयावचोभङ्ग्योपन्यस्यति सएवाभिप्रायउपरितनेषु कोअद्धावेदेत्यादिमन्त्रेषुस्पष्टीकृतः । ओषध्यादिमन्त्रेष्वपिचेतनाएवतत्तदभिमानिदेवतास्तेनतेननाम्नासम्बोध्यन्ते ताश्चदेवताभगवता बादरायणेनाभिमानिव्यपदेशस्त्वितिसूत्रेसूत्रिताः । एकस्यापिरुद्रस्य स्वमहिम्नासहस्रमूर्तिस्वीकारात् नास्तिपरस्परव्याघातः । जलादिद्रव्येणशिरःच्छेदनादेर्लोकप्रसिद्धत्वेऽपि तदभिमानिदेवतानुग्रहस्याप्रसिद्धत्वात् तद्विषयत्वेनाज्ञातार्थज्ञापकत्वम् ततोलक्षणसद्भावादस्तिमन्त्रभागस्य प्रामाण्यम् । एतदेवाभिप्रेत्यभगवान्जैमिनिर्मन्त्राधिकरणेमन्त्राणांविवक्षितार्थत्वमसूत्रयत् तानिचसूत्राणिक्रमेणोदाहृत्यव्याख्यास्यामः तत्रपूर्वपक्षंसूत्रयति—तदर्थशास्त्रादिति १ यस्यार्थस्याभिधानेसमर्थोमन्त्रः सएवाभिधेयोयस्यशास्त्रस्य ब्राह्मणवाक्यस्यतदिदंवाक्यंतदर्थशास्त्रम् तस्माच्छास्त्रादविवक्षितार्थोमन्त्रइत्यवगम्यते तथाहि उरुंप्रथस्वेतिमन्त्रेणपुरोडाशप्रथनमभिधीयते पुरोडाशंप्रथयतीतिब्राह्मणेनापितदेवाभिधीयते तथासतिमन्त्रेणैवप्रतीतत्वात् तदर्थबोधनायप्रवृत्तंब्राह्मणवाक्यमनर्थकंस्यात् मन्त्रस्याविवक्षितार्थत्वेतुविनियोगबोधनायब्राह्मणमुपयुक्तम् तस्मान्मन्त्राउच्चारणेनैवानुष्ठानमुपकुर्वन्ति । ननूच्चारणार्थत्वेसत्यदृष्टंप्रयोजनंपरिकल्प्येत अर्थाभिधायकत्वेतुदृष्टंलभ्येत तस्माद्ब्राह्मणस्यानुवादत्वमभ्युपेत्यापिमन्त्रस्याभिधानार्थत्वमेवेत्याशंक्य उत्तरंसूत्रयति—वाक्यनियमादिति २ अग्निर्मूर्धादिवःककुदित्येवमेववाक्यं पठितव्यमिति मन्त्रेनियमउपलभ्यते अर्थप्रत्यायनंतुमूर्धाग्निरित्येवंव्युत्क्रमपाठेपिभवत्येव तस्मान्नियतपाठक्रमसाफल्याय उच्चारणमेवमन्त्रप्रयोजनम् । ननुपाठक्रमनियममात्रस्यादृष्टार्थत्वेपिमन्त्रपाठोऽर्थबोधनार्थएवेत्याशंक्यतत्रदोषान्तरंसूत्रयति—बुद्धशास्त्रादिति ३ अग्नीदग्नीन्विहरेति प्रैषमन्त्रःप्रयोगकालेपठ्यते तच्चाग्निविहरणादिकर्माग्नीध्रेणाध्ययनकालेएवस्वकर्तव्यत्वेनबुद्धम् तस्यचबुद्धस्यार्थस्यपुनर्मन्त्रोच्चारणेनशासनमनर्थकम् नहिसोपानत्केपादेपुनरप्युपानहंप्रतिमुञ्चन्ति । ननुबुद्धस्यार्थस्यप्रामादिकविस्मरणपरि-

---

१ बौधायनसूत्रे. । २ ऋ० सं० ८.७.१७. । ३ ब्रह्मसूत्रेतृतीया ० । ४ जैमिनिसूत्रे प्रथमाध्याये । ५ तै. सं० १. १.८.।६ ऋ० सं० ६.३.३९. । ७ तै० सं० ६.३.१ ।

हारायमन्त्रेणस्मारणमस्त्वित्याशंक्यान्यंदोषंसूत्रयति—अविद्यमानवचनादिति ४ चत्वारिशृङ्गात्रयोअ-
स्यपादाद्वेशीर्षेसप्तहस्तासोअस्येतिमन्त्रआम्नायते नखलुचतुःशृङ्गत्वाद्युपेतंकिञ्चिद्यज्ञसाधनंविद्यते यन्म-
न्त्रपाठेनानुस्मर्यते । नन्वीदृशी काचिद्देवतास्यादित्याशङ्क्यान्यंदोषंसूत्रयति—अचेतनेअर्थबन्धनादिति
५ ओषधेत्रायस्वैनं शृणोतग्रावाणइत्यादावचेतनेद्रव्येचेतनोचितंरक्षणश्रवणाद्यर्थंबध्नाति सचायुक्तः
नन्वभिमानिव्यपदेशइतिवैयासिकशास्त्रेसूत्रितत्वात् ओषध्याद्यभिमानिचेतनदेवतात्रविवक्ष्यतामित्याश-
ङ्क्य दोषान्तरंसूत्रयति—अर्थविप्रतिषेधादिति ६ अदितिर्द्यौरदितिरन्तरिक्षमितिमन्त्रआम्नायते । यदे-
वद्यौस्तदेवान्तरिक्षमित्ययमर्थोविप्रतिषिद्धः एकएवरुद्रः सहस्राणिसहस्रशोयेरुद्राइत्यादिकमप्युदाहर्त-
व्यम् । ननुत्वमेवमाताचपितात्वमेवेत्यादिवदन्तरिक्षादिरूपत्वेनादितिःस्तूयते एवमेकस्यापिरुद्रस्ययो-
गसामर्थ्याद्बहुरूपस्वीकारोऽस्तु ततोनार्थविप्रतिषेधइत्याशङ्क्यदोषान्तरंसूत्रयति—स्वाध्यायवदवचना-
दिति ७ पूर्णिकानामकाचिद्योषिदवघातंकरोति तत्समीपेमाणवकःस्वाध्यायग्रहणार्थंकदाचिदवघात-
मन्त्रमधीते नचतस्यार्थप्रकाशनविवक्षास्ति प्रतिमुसलप्रहारंतस्य मन्त्रस्यापठ्यमानत्वात् अक्षरग्र-
हणायैवतंमन्त्रमन्यांश्चमन्त्रानभ्यस्यति तत्रस्वाध्यायकालेपठितोऽप्यवघातमन्त्रोयथापूर्णिकांप्रतिस्वार्थं-
नब्रूते तथाकर्मकालेऽपिस्वार्थंनवक्ष्यति । ननुतत्रमाणवकस्यार्थविवक्षानास्ति पूर्णिकाप्यवबो-
द्धुमक्षमाकर्मणित्वध्वर्योरर्थविवक्षाविद्यते बोधश्चसंभवतीत्याशङ्क्यदोषान्तरंसूत्रयति—अविज्ञेयादिति
८ केषांचिन्मन्त्राणांअर्थोविज्ञातुंनशक्यते तद्यथा अम्यक्सातइन्द्रऋष्टिरस्मेइत्येकोमन्त्रः । सृण्ये-
वजर्भरीतुर्फरीतूइत्यपरोमन्त्रः । ननु ईदृशमन्त्रार्थबोधायैवनिगमनिघण्टुनिरुक्तव्याकरणानिप्रवृत्तानी-
त्याशङ्क्यदोषान्तरंसूत्रयति—अनित्यसंयोगान्मन्त्रानर्थक्यमिति ९ किन्तेकृण्वन्तिकीकटेष्विति-
मन्त्रेकीकटोनामजनपदआम्नातः । तथानैचाशाखं नामनगरं प्रमगन्दोराजेत्येतेअर्थाअनि-
त्याआम्नाताः । तथासतिप्राक्प्रमगन्दान्नायंमन्त्रोभूतपूर्वइति गम्यते । तदेवमेतैस्तदर्थ-
शास्त्रादिभिर्हेतुभिर्मन्त्राणामर्थप्रत्यायनार्थत्वंनास्ति किन्तूच्चारणादहृष्टार्थाएवेतिपूर्वःपक्षः । तत्रसिद्धान्तं-
सूत्रयति—अविशिष्टस्तुवाक्यार्थइति १० तुशब्देनमन्त्राणामदृष्टार्थमुच्चारणमात्रंवारयति क्रियाकारक-
संबन्धेनप्रतीयमानोवाक्यार्थोलोकवेदयोरविशिष्टः । तथासति यथालोकेऽर्थप्रत्यायनायैववाक्यमुच्चा-
र्यते तथावैदिकेयागप्रयोगेऽपिद्रष्टव्यम् मन्त्रेणप्रकाशितस्त्वर्थोऽनुष्ठातुंशक्यते नत्वप्रकाशितः तस्मा-
न्मन्त्रोच्चारणस्यार्थप्रकाशनरूपंदृष्टमेवप्रयोजनम् । ननु—अग्निरसिनारिरसीत्यारभ्यत्रैष्टुभेनत्वाछन्दसाद-

१ ऋ० सं० ३.८.१० । २ ऋ० सं० १.६.१६. । ३ ऋ० सं० ३.३.२१. ।
४ किंतेकृण्वन्तीतिमन्त्रेएव. । ५ तै० सं० ४.१.१. ।

दइतिमन्त्रआम्नातः तेनैवमन्त्रेणप्रतीतेप्यभ्र्यादाने पुनर्ब्राह्मणेनतां चतुर्भिरभ्रिमादत्ते इतिविधीयते । तदेतद्विधानंत्वत्पक्षेव्यर्थंस्यात् इत्याशङ्क्योत्तरंसूत्रयति—गुणार्थेनपुनःश्रुतिरिति ११ मन्त्रेणप्रतीतस्यैवार्थस्यब्राह्मणेयत्पुनःश्रवणंतदेतच्चतुःसंख्यालक्षणगुणविधानार्थत्वेनोपयुज्यते एतस्यविधानस्याभावे

---

१ तै० सं० ९. १. १. तैत्तिरीयशाखायांसंहिताकतिपयब्राह्मणभागमिश्रिता ब्राह्मणमपिकतिपयमंत्रभागमिश्रितं तत्सारस्वतपाठानुसारेणेतिज्ञातव्यम् । अमिश्रितपाठस्तुसंहिताब्राह्मणयोःसत्याषाढगृह्योक्तकांडानुक्रमानुसारेणबोद्धव्यः । तदुक्तंसंस्काररत्नमालायाम्कांडानांसंकीर्णत्वेनयथाकांडमिदं ब्रह्मध्ययनासंभवात्कांडानुक्रमणिकायांसारस्वतपाठस्याप्यभ्यनुज्ञातत्वाच्च सारस्वतपाठेनैवेदानीमध्ययनमस्ति सारस्वतकथाचेतिहासपुराणादौप्रसिद्धा साकांडनिरूपणावसरेसंस्काररत्नमालायामुपन्यस्ता—यथाब्रह्मसभायांदुर्वासाःसामगायन्नास । तंखलुतेजसाक्रूरंदृष्ट्वासभामध्येसरस्वत्यस्मयत् । ततःक्रुद्धोमुनिःसरस्वतींशशाप मर्त्येयोनौप्रजायस्वेति । ततस्तंदेवीप्रसादयामास भगवन्विप्रगृहेप्रजायेयमिति । ततःसमुनिस्तथेत्युक्त्वाजगाम । ततोदेव्यात्रेयगृहेजायत । ततोवेदविदंभर्तारंप्राप्यविद्यानिधिंपुत्रं कृतोपनयनंपितासारस्वतंवेदमध्यापयामासयथावृद्धक्रमेण ॥ ततस्तं बालत्वादल्पमेधसंपिताताडयामासपृष्ठेवेणुदलेन । ततःसोरोदीत् सापितंदृष्ट्वापुत्रमालिंग्यातिदुःखिताबभूव । अश्रुपूर्णतंवागीशानिवार्यचपुनःततःसाचिंतयामासयस्याःकस्याःसुतोनहि । प्राप्यमां ताड्यतेबालोममप्राणप्रियःसुतः । ततश्चतुःषष्टिकलाः सर्वान्वेदान्त्सांगान्ब्रह्मविद्यापर्यंतान्त्सारस्वतायसरस्वत्युपादिशत् । क्षुत्पिपासानिवर्त्यवायुधारणंचोपादिशत् । ततःसंपूर्णविद्योसौकुरुक्षेत्रेवसन्मुनिः । तपस्तेपेमहाभागोदेवैरपिसुदुष्करम् ॥ ततःकालेनमहताह्यनावृष्टिरभूत्किल । कुरुक्षेत्रेसारस्वतंत्वदृष्टंपुष्टमंतर्वायुंधार्यमाणंतमृषिंददृशुः । तमूचुर्मुनयःसर्वेशाकंदेहीतिनःप्रभो । अलंशाकेनमोविप्रायदिशाकंभवेद्भुवि । सारस्वतोमुनिःप्राहतेभ्योदेहीतिचंडिकाम् । सुतशाकंप्रदास्यामियदिशाकेनतेह्यलं । शाकंभरीतिमुनिनाप्रसन्नाकारिवैतदा । शाकाहारास्ततःसर्वेमुनयःकृतजीविताः । दुर्भिक्षेविनिवृत्तेप्यध्ययनंनास्मरंस्तदा । अन्योन्यमभिजग्मुस्तउच्चरंन्तोनकंचन । ततोविस्मृतवेदास्तेबभूवुर्मुनयोभृशम् । ततोतिदुःखितेषुमुनिषुनारदेनोक्तम् । सारस्वतंकृतसर्ववेदाध्ययनंगत्वा अध्ययनंकुरुध्वमिति । ततस्तेसारस्वतंप्रार्थयामासुः । अध्यापनंकुरुष्वभगवन्निति । ततःसारस्वतःप्रार्थितश्चतुःषष्टिमुनिगणसहस्रेभ्यश्चतुःषष्टिसहस्रवेदानध्यापयामास । ततस्तान्वेदांस्तच्छाखिनःसाकल्येनाधीतवंतः । तैत्तिरीयशाखिनस्तु साकल्येनाध्ययनंकृत्वासर्ववेदविलक्षणांतैत्तिरीयशाखांदृष्ट्वान्योन्यमूचुःअहो अतीवविस्मयोस्माकंसर्वविलक्षणांशाखामध्यापयतिस्मास्मान्मूढान्कृत्वानिर्मिताम् ततःसर्वेतैत्तिरीयशाखिनःसंभूयसारस्वतमूचुः नायंवेदस्त्वयाध्यापितःसर्ववेदविलक्षणत्वादिति । ततःसारस्वतःसर्वान्श्रेष्ठान्मुनीन्प्राहवचःयद्ययंनभवेद्वेदःप्रतिज्ञांतुकरोम्यहम् । अग्निप्रवेशनंकुर्यांभवंतोवाचमीरिताम् । तमूचुर्मुनयःत्वेवचनंयत्त्वयोदितम् । यदिवेदक्रमंविप्रप्रतिज्ञांकुर्महेवयम् । ततःसारस्वतेनसहिताःसर्वेमुनयःतत्रतत्र-

चतुर्णांमन्त्राणांमध्येयेनकेनाप्येकेनाभ्रिरादीयेत । ननु इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त-इत्यत्रमन्त्रसामर्थ्यादेवप्राप्तस्यरशनादानस्यपुनर्ब्राह्मणवाक्यंविनियोजकमाम्नायते तदेतत्स्वन्मतेव्यर्थमि-त्याशङ्क्योत्तरंसूत्रयति—परिसंख्येति १२ गर्दभाभिधानींनादत्तइतिनिषेधःपरिसंख्या तदर्थमिदंब्राह्मण-वाक्यम् । ननुपरिसंख्यायांत्रयोदोषाःप्राप्नुयुः आदत्तइतिशब्दः रशनादानलक्षणंस्वार्थंजह्यात् तन्निषे-धलक्षणःपरार्थोस्यशब्दस्यकल्प्येत रशनात्वसामान्येनचप्राप्तंगर्दभरशनाया आदानंबाध्येतेतित्रयोदोषाः। मैवं गर्दभरशनायाअप्राप्तत्वात् तथाहि त्वत्पक्षेप्रकरणपाठान्यथानुपपत्त्यामन्त्रेणानेनादानंकुर्यादिति वाक्यंपरिकल्प्यते तेनचवाक्येनमन्त्रादानयोःसम्बन्धेसिद्धेसति पश्चात्किंविषयमादानमितिवीक्षायांलि-ङ्गाद्रशनामात्रस्यादानमुपेत्यगर्दभरशनायाःप्राप्तिर्वक्तव्या साचविलम्ब्यते इत्यश्वाभिधानीमितिप्रत्यक्षे-णवाक्येनमन्त्रादानयोःसंबन्धेसतिलिङ्गाद्रशनामात्रेप्राप्तमादानमश्वाभिधानीमितिश्रुत्याविशेषेव्यवस्थाप्यते ततोमन्त्रस्यनिराकाङ्क्षत्वात् गर्दभरशनायाअप्राप्तत्वान्नास्तिप्राप्तबाधः अतएवनिषेधार्थोनकल्प्यते विध्यर्थश्चनत्यज्यते तत्रकुतोदोषत्रयम् ईदृशमप्राप्तिरूपमेवगर्दभरशनायानिवारणमभिप्रेत्यपरिसंख्ये-तिसूत्रितम् । ननु उरुप्रथस्वेतिप्रथयतीतिब्राह्मणवैयर्थ्यंतदवस्थमेवेत्याशङ्क्योत्तरंसूत्रयति—अर्थवादो वेति १३ वाशब्दोवैयर्थ्यं वारयति अस्त्यत्रार्थवादः यज्ञपतिमेवतत्प्रथयतीति तेनार्थवादेनसंबन्धाय ब्राह्मणेविधिःपठ्यते । ननु प्रथयतीत्यनेनैवविधिशब्देनप्रथनमनूद्ययज्ञपतिमेवेत्यादिनार्थवादेनस्तोत-व्यंतदेवतुप्रथनंकुतःप्राप्तमित्याशङ्क्योत्तरंसूत्रयति—मन्त्राभिधानादिति १४ अध्वर्युःपुरोडाशमुद्दिश्य मन्त्रेप्रथस्वेत्येवमभिधत्ते तस्मादभिधानादध्वर्युकर्तृकंप्रथनंप्राप्तम् यथालोकेयःकुर्वितिब्रूतेसकारयत्येव तथात्रापियःप्रथस्वेतिब्रूतेसप्रथयत्येव यदुक्तम् अग्निर्मूर्धादिवइतिपाठक्रमनियमाद् अदृष्टार्थोऽत्रइति तत्रोत्तरंसूत्रयति—अविरुद्धंपरमिति १५ परंद्वितीयसूत्रोक्तमस्मत्पक्षेऽप्यविरुद्धम् नहिवयंपाठक्रम-नियमाददृष्टंनिवारयामः किंतर्हिमन्त्रोच्चारणेनजायमानमर्थप्रत्यायनं दृष्टप्रयोजनत्वात् नोपेक्षितव्यमि-

---

मुनीन्गत्वानिर्णेतुंनशक्नुमइतितैरुक्ताब्रह्माणंजग्मुर्यथायथंप्रतिज्ञानिवेदिता । ब्रह्मापिमुनिंसारस्वतमाह—सत्यंप्रतिज्ञातंतत्रभवतासारस्वतेन सारस्वतोवेदपाठःसारस्वतोक्तक्रमेणैवाध्येतव्यः अन्यथाध्ययनफलंना-स्तीति ततइतरान्मुनीन्प्राह सत्यंनपाठक्रमेणार्थानुष्ठानक्रमोभवतीति तस्मात्सर्वैर्जितं नाग्निप्रवेशनंकर्तव्य-मितीतिहासः ।

१ तै० सं० ४.१.२. इमामगृभ्णन्रशनामृतस्येत्यादिश्चतुर्थकाण्डेप्रथमाध्यायेद्वितीयानुवाके-मन्त्रः पठितःतस्यैवइमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्तेइतिपंचमकाण्डेप्रथमप्रपाठकेद्वितीयानुवाके-ब्राह्मणम्. । २ तै० ब्रा० ३. २. ८. ।

त्येतावदेवब्रूमः । ननुप्रोक्षणीरासादयेतिमन्त्रोबुद्धमेवार्थंशास्ति तदयुक्तम् सोपानत्कस्यपादस्योपानदन्तरासंभवादित्युक्तमितिचेत् तस्यपरिहारंसूत्रयति—सम्प्रैषकर्मणोगर्हानुपलम्भःसंस्कारत्वादिति १६ सम्प्रैषकर्मणोगर्हात्तदुक्तदोषोनोपलभ्यते बुद्धस्याप्यर्थस्यमन्त्रेणैवानुस्मरणेसतिनियमात् दृष्टलक्षणस्य संस्कारस्यसद्भावात् । यच्चोक्तम् चत्वारिशृङ्गेतिमन्त्रोऽसन्तमेवार्थमभिधत्तइति तस्योत्तरंसूत्रयति—अभिधानेऽर्थवादइति १७ असतोऽर्थस्याभिधायकेवाक्येगौणस्यार्थस्योक्तिर्द्रष्टव्या तद्यथा चत्वारो होत्रध्वर्यूद्गातृब्रह्माणोस्यकर्मणःशृङ्गाणि प्रातःसवनादयस्त्रयःपादाः पत्नीयजमानौद्वेशीर्षे गायत्र्यादीनि सप्तछन्दांसिहस्ताः ऋग्वेदादिभिस्त्रिभिर्वेदैस्त्रेधाबन्धनं कामान्वर्षतीतिवृषभः रोरवीतिस्तोत्रशस्त्रादिशब्दान्पुनःपुनःकरोति महोदेवःसोयंप्रौढोयज्ञरूपोदेवोमर्त्यानाविवेशेति । मनुष्याएवात्राधिकारिणः । लोकेप्येवंगौणप्रयोगाद्दृश्यन्ते चक्रवाकस्तनी हंसदन्तावलीकाशनखा शैवलकेशिनीत्येवंनद्याःस्तूयमानत्वात् । एवमोषधेत्रायस्व श्रृणोतग्रावाणइत्याद्यचेतनसम्बोधनानिस्तुतिपरत्वेनयोजनीयानि यस्मिन्वपनेओषधिरपित्रायतेतत्रवपनकर्तात्रायतइतिकिमुवक्तव्यम् । तथा ग्रावाणोपिप्रातरनुवाकंशृण्वन्ति किमुतविद्वांसोब्राह्मणाइत्यादिमन्त्राणामभिप्रायः । योप्यदितिर्द्यौरदितिरन्तरिक्षमितिविप्रतिषेधउक्तः तस्योत्तरंसूत्रयति—गुणादविप्रतिषेधःस्यादिति १८ यथात्वमेवपितात्वमेवमातेत्यत्रगौणप्रयोगादविरोधः तद्वत् । एवमेकरुद्रदेवत्येकर्मण्येकोरुद्रः शतरुद्रदेवत्येशतंरुद्राइत्यविरोधः । यदप्युक्तम् स्वाध्यायमधीयानोमाणवकःपूर्णिकायाअवहतिं नप्रकाशयितुमिच्छति । तत्रोत्तरंसूत्रयति—विद्यावचनमसंयोगादिति १९ वेदविद्याग्रहणकालेऽर्थस्ययदवचनंतदयज्ञसंयोगादुपपद्यते नहिपूर्णिकाया अवघातोयज्ञसंयुक्तः नापिमाणवकोयज्ञमनुतिष्ठति अतोयज्ञानुपकारान्नतत्रार्थविवक्षा । यदप्युक्तम् अम्यक्सातइन्द्र सृण्येवजर्भरीतुर्फरीतूइत्यादौअर्थस्यज्ञातुमशक्यत्वान्नास्त्येवार्थइति तत्रोत्तरंसूत्रयति-सतःपरमविज्ञानमिति २० विद्यमानएवार्थःप्रमादालस्यादिभिर्नज्ञायतेतेषांनिगमनिरुक्तव्याकरणवशेनधातुतोऽर्थःपरिकल्पयितव्यः तद्यथा जर्भरीतुर्फरीतूइत्येवमादीन्यश्विनोरभिधानानि तेषुहिद्विवचनान्तत्वंलक्ष्यते आश्विनंचेदंसूक्तम् अश्विनोःकाममप्राइतिदर्शनात् एतदेवाभिप्रेत्यनिरुक्तकारोव्याचष्टे—जर्भरीभर्तारावित्यर्थः तुर्फरीतूहन्तारावित्यर्थइति एवमम्यक्सातइत्यादावप्युन्नेयम् । यदप्युक्तम् प्रमगन्दाद्यनित्यार्थसंयोगान्मन्त्रस्यानादित्वंनस्यादिति तत्रोत्तरंसूत्रयति—उक्तश्चानित्यसंयोगइति २१ प्रथमपादस्यान्तिमाधिकरणे सोयमनित्यसंयोगदोषउक्तःपरिहृतः तथाहि तत्र पूर्वपक्षेवेदानांपौरुषेय-

---

१ तै० ब्रा० ३. २. ९. । २ ऋ० सं. ३. ८ १०. । ३ सृण्येवजर्भरीइतिमन्त्रोयस्मिन्सूक्तेवर्ततेतत् (ऋ० सं० ८. ६. २.) । ४ नि० १३. ९. ।

त्ववक्तुं काठकंकालापकमित्यादिपुरुषसंबन्धाभिधानंहेतूकृत्यानित्यदर्शनाच्चेतिहेत्वन्तरंसूत्रितम्। तस्याऽयमर्थः—बबरःप्रावाहणिरकामयतेत्यनित्यानांबबरादीनामर्थानांदर्शनात् ततःपूर्वमसत्त्वात्पौरुषेयोवेदइति तस्योत्तरमेवंसूत्रितम्—परंतुश्रुतिसामान्यमात्रमिति। तस्यायमर्थः—यत्काठकादिसमाख्यानंतत्प्रवचननिमित्तम् यत्तुपरंबबराद्यनित्यदर्शनं तच्छब्दसामान्यमात्रं नतुतत्रानित्योबबराख्यःकश्चित्पुरुषोविवक्षितः किन्तु बबरइतिशब्दानुकृतिः तथासतिबबरइतिशब्दंकुर्वन्वायुरभिधीयते सचप्रावाहणिः प्रकर्षेणवहनशीलः। एवमन्यत्राप्यूहनीयम्। तदेवंकस्यचिदपिदोषस्यासंभवात् विवक्षितार्थामन्त्राःस्वार्थप्रकाशनायैवप्रयोक्तव्याः। नन्वर्थप्रकाशनार्थत्वेसतिदृष्टंप्रयोजनंलभ्यतइतियुक्तिमात्रमिदमुच्यते नत्वेतदुपोद्बलकंकिंचित्श्रौतंलिङ्गंपश्यामइत्याशङ्क्योत्तरंसूत्रयति—लिङ्गोपदेशश्चतदर्थवदिति २२ आग्नेय्याग्नीध्रमुपतिष्ठेतइतिश्रूयते। तस्यायमर्थः—अग्निर्देवतायस्याऋचः सेयमाग्नेयी तयाग्नीध्रस्थानमुपतिष्ठेतेति अत्रह्युपस्थानमुपदिशद्ब्राह्मणं अग्नेनयेत्यनयोपतिष्ठेतेतिमन्त्रप्रतीकंपठित्वानोपदिशति किंत्वाग्नेयीत्वलिङ्गेनोपदिशति। यदातस्यामृच्यग्निःप्राधान्येनप्रतिपाद्यते तदातस्याऋचोऽग्निर्देवताभवति तथासत्याग्नेय्येतिदेवतावाचितद्धितान्तनिर्देशउपपद्यते तस्मादयमुपदेशस्तन्मन्त्रवाक्यमर्थवदितिबोधयति अतो विवक्षितार्थत्वात् अर्थप्रत्यायनार्थंप्रयोगकालेमन्त्रोच्चारणम्। तस्मिन्नेवविवक्षितार्थत्वेलिङ्गान्तरंसूत्रयति—ऊहइति २३ प्रकृतावाम्नातस्यमन्त्रस्यविकृतौसमवेतार्थत्वायतदुचितपदान्तरस्यप्रक्षेपेणपाठऊहः। तद्यथा अन्वेनंमातामन्यतामनुपितानुभ्रातेति प्राकृतपशुविषयोमन्त्रपाठः तस्यचमन्त्रस्यविकृतौपशुद्वयेसति अन्वेनौमातामन्यतामित्यूहः पशुबहुत्वेसति अन्वेनान्मातामन्यतामित्यूहःकर्तव्यः। एतन्मन्त्रव्याख्यानरूपंब्राह्मणमेवमाम्नायतेनमातावर्धतेनपितेति। तत्रेदंचिन्तनीयम्। किमत्रशरीरवृद्धिर्निषिध्यतेआहोस्विच्छब्दवृद्धिरिति। एकवचनान्तस्यमातृशब्दस्य मातराविति द्विवचनान्तत्वेनवा मातरइतिबहुवचनान्तत्वेनवाप्रयोगः शब्दवृद्धिः। तत्रनतावच्छरीरवृद्धिर्निषेद्धुंशक्यते बाल्यकौमारयौवनादिवयोनुसारेणतद्वृद्धेःप्रत्यक्षत्वात् अतःशब्दवृद्धिनिषेधएवपरिशिष्यते मातृशब्दपितृशब्दयोर्विशेषाकारेणवृद्धिनिषेधात् इतरस्यैनमितिशब्दस्यार्थानुसारिणीवृद्धिःसूचिताभवति तत्रयद्यर्थोनविवक्ष्येत तदापशुद्वित्वेद्विवचनम् पशुबहुत्वेबहुवचनंचकथमूह्येत तस्माद्विवक्षितार्थामन्त्राः। तस्मिन्नेवार्थेलिङ्गान्तरंसूत्रयति—विधिशब्दाश्चेति २४ मन्त्रव्याख्यानरूपोब्राह्मणगतःशब्दोविधिशब्दइत्युच्यते सचैवमाम्नायते-शतंहिमाःशतंवर्षाणिजीव्यासमेत्यवैतदाहेति। तत्रशतंहिमाइत्येतद्व्याख्येयमन्त्रस्यप्रतीकम् अवशिष्टंतुतस्यतात्पर्यव्याख्यानम् मन्त्रस्याविवक्षितार्थत्वेतुकिन्नामतात्पर्यंमन्त्रेव्याख्यायते तस्माद्विवक्षितार्थामन्त्राः प्रयोगकालेस्वार्थप्रका-

१ तै० सं० १. २. ४.

शनायैवोच्चारयितव्याः। तत्रसङ्ग्रहश्लोकौ—मन्त्रा उरुप्रथस्वेतिकिमदृष्टैकहेतवः। यागेघृतपुरोडाशप्रथनादेश्चभासकाः १। ब्राह्मणेनापितद्धानान्मन्त्राःपुण्यैकहेतवः। नतद्धानस्यदृष्टत्वाद्दृष्टंवरमदृष्टतः २। ननु अस्तुमन्त्रभागस्यप्रामाण्यम् ब्राह्मणभागस्यतुनतद्युज्यते। तथाहि। द्विविधंब्राह्मणम् विधिरर्थवादश्चेति। तथाचापस्तम्बः—कर्मचोदनाब्राह्मणानिब्राह्मणशेषोऽर्थवादइति। विधिरपिद्विविधः अप्रवृत्तप्रवर्तनमज्ञातज्ञापनंचेति आग्नावैष्णवंपुरोडाशंनिर्वपन्तिदीक्षणीयायामित्याद्याःकर्मकाण्डगताविधयोऽप्रवृत्तप्रवर्तकाः आत्मावाइदमेकएवाग्रआसीदित्यादयोब्रह्मकाण्डगताविधयोऽज्ञातज्ञापकाः तत्रकर्मकाण्डगतानां जर्तिलयवाग्वावाजुहुयाद्गवीधुकयवाग्वावेत्यादिविधीनांनास्तिप्रामाण्यम् प्रवृत्त्ययोग्यद्रव्यविधानेनसम्यगनुभवसाधनत्वाभावात् अयोग्यत्वंचवाक्यशेषेसमाम्नातम्—अनाहुतिर्वैजर्तिलाश्चगवीधुकाश्चेति। तत्रह्यारण्यतिलानांआरण्यगोधूमानांचाहुतिद्रव्यत्वंनिषिद्धम् तस्माद्बाधितोजर्तिलादिविधिरप्रमाणम्। एवमैतरेयतैत्तिरीयादिब्राह्मणेषुतत्तन्नोदत्यं तत्तथानकार्यमितिवाक्याभ्यांबहवोविधयोनिषिद्धाः अपिचैतरेयब्राह्मणेअनुदितहोमंबहुधानिन्दित्वातस्मादुदितेहोतव्यमित्यसकृन्निगमितम् तैत्तिरीयाश्चतथैवामनन्ति—यदनुदितेसूर्येप्रातर्जुहुयादुभयमेवाग्नेयं स्यात्। उदितेसूर्येप्रातर्जुहोतीति। पुनरपितएवोदितहोमेदोषमामनन्ति—यदुदितेसूर्येप्रातर्जुहुयात् यथातिथयेप्रद्रुतायशून्यायावसथायाहार्यंहरन्तितादृगेवतदिति। तथैवातिरात्रेषोडशिनंगृह्णातीतिविधिः नातिरात्रेषोडशिनंगृह्णातीतिनिषेधेनबाध्यते ज्योतिष्टोमादिष्वप्यनुष्ठानानन्तरमेवस्वर्गादिफलं नोपलभ्यते नहिभोजनानन्तरंतृप्तेरनुपलम्भोस्ति तस्मात्कर्मविधिषुप्रामाण्यंदुःसंपादनीयम्। अज्ञातज्ञापकेषुब्रह्मविधिष्वपिपरस्परविरोधान्नास्तिप्रामाण्यम् आत्मावाइदमेकएवाग्रआसीदित्यैतरेयिणआमनन्ति। असद्वाइदमग्रआसीदितितैत्तिरीयाः। सोयंविरोधः। तस्माद्वेदेविधिभागः सर्वोप्यप्रमाणमितिप्राप्तेब्रूमः—अस्त्वेवंजर्तिलादिविधेरप्रामाण्यम् तदर्थस्याननुष्ठेयत्वात् अनुष्ठेयंस्त्वर्थउपरितनेऽजाक्षीरेणजुहोतिइतिवाक्येविधीयते तत्प्रशंसार्थमत्रजर्तिलादिकमनूद्यनिन्द्यते यथागवामश्वानांचप्रशंसार्थमपशवोवाअन्येगोअश्वेभ्यइतिवाक्येनार्थवादरूपेणाजादीनांपशुत्वंनिन्द्यते तद्वत् एवंतर्हिअजादेर्यथावस्तुतःपशुत्वमस्ति तथाजर्तिलादिविधिस्त्रिन्द्यमानोपि क्वचिच्छाखान्तरेभवेदितिचेत् भवतुनाम प्रामाण्यमपितच्छाखाध्यायिनंप्रतिभविष्यति

---

१ आपस्तम्बधर्मसूत्रे। २ ऐतरेयब्राह्मणेप्रथमपञ्चिकायाःप्रथमखण्डे १. १.। ३. ऐतरेयोपनिषदिप्रथमाध्याये। ४ तै० सं० ५. ४. ३.। ५ तै० सं० ५. ४. ३.। ६ ऐ० ब्रा० २. २३.। ७ तै. ब्रा. १-१.८.। ८ ऐ. ब्रा. ५-३१.। ९ तै. ब्रा. २-१-२.। १० तै. ब्रा. २-१-२। ११ ऐ० आरण्यके.।

यथा गृहस्थाश्रमेनिषिद्धमपिपरान्नभोजनमाश्रमान्तरेषुप्रामाणिकम् तद्वत् । अनेनन्यायेनसर्वत्रपरस्पर-
विरुद्धौविधिनिषेधौपुरुषभेदेनव्यवस्थापनीयौ यथामन्त्रेषुपाठभेदःशाखाभेदेनव्यवस्थितत्वात् । तैत्तिरीयाः-
वाग्रवस्थोपायवस्येतिमन्त्रमामनन्ति । वाजसनेयिनस्तूपायवस्थेत्येनंभागंनामनन्ति । प्रत्युतशतपथब्राह्मणे
सभागोनूद्यनिराकृतः तथासूक्तवाकमन्त्रेशाखान्तरपाठंनिराकृत्यपाठान्तरंतैत्तिरीयाआमनन्ति यद्ब्रूया-
त्सूपावसानाचस्वध्यवसानाचेतिप्रमायुकोयजमानःस्याद् इतिनिराकरणंसूपचरणाचस्वधिचरणाचेत्येव
ब्रूयादितिपाठान्तरोपदेशः । तत्रानुष्ठातृपुरुषभेदेनव्यवस्था तद्विधिषुद्रष्टव्या । षोडशिग्रहणादिदूषणंतु
अश्रुतमीमांसावृत्तान्तस्यतवैवशोभते पूर्वमीमांसायां दशमाध्यायस्याष्टमपादेषोडशिनोग्रहणाग्रहण-
विकल्पोनिर्णीतः द्वितीयस्याध्यायस्य प्रथमपादेकालान्तरभाविफलसिद्ध्यर्थमपूर्वंनिर्णीतम् तद्वदुत्तर-
मीमांसायांप्रथमाध्यायस्यचतुर्थपादेकारणत्वेनचाकाशादिषुयथाव्यपदिष्टोक्तेरित्यस्मिन्सूत्रेजगत्कारणेप-
रमात्मनिश्रुतिविप्रतिपत्तिर्निराकृता द्वितीयस्याध्यायस्यप्रथमेपादेआरम्भणाधिकरणेत्वसद्व्यपदेशान्नेति
चेत् नधर्मान्तरेणवाक्यशेषादितिसूत्रेतैत्तिरीयवाक्यगतस्यासच्छब्दस्यनशून्यपरत्वम् किन्त्वव्यक्ता-
वस्थापरत्वमितिनिर्णीतम् तथा जैमिनिश्चोदनासूत्रेविधिवाक्यंधर्मेप्रमाणमितिप्रतिज्ञायौत्पत्तिकसूत्रेतत्प्रा-
माण्यंसमर्थयामास । व्यासोपिशास्त्रयोनित्वादितिसूत्रेवेदान्तानांब्रह्मणिप्रामाण्यंप्रतिज्ञाय तत्तुसमन्वया-
दिसूत्रैःसमर्थयामास । तस्मादमीमांसकस्यतवपूर्वोक्तस्थानेएवंविधन्यायोदुष्परिहरः । अतोविधिभागस्य-
प्रामाण्यंसुस्थितम् । अर्थवादभागस्यप्रामाण्यंमहताप्रयत्नेनजैमिनिःसमर्थयामास । तत्सूत्राणिव्याख्या-
स्यन्ते । तत्रपूर्वपक्षंसूत्रयति—आम्नायस्यक्रियार्थत्वादानर्थक्यमतदर्थानांतस्मादनित्यमुच्यतइति १ आ-
म्नायस्यसर्वस्यक्रियाप्रतिपादनायप्रवृत्तत्वात् अक्रियाप्रतिपादकानामर्थवादानांनास्तिकश्चिद्विवक्षितः
स्वार्थः । तेचार्थवादाएवमाम्नायन्ते—सोरोदीद्यदरोदीत्तद्रुद्रस्यरुद्रत्वम् । सआत्मनोवपामुदक्खिदत् ।
देवावैदेवयजनमध्यवसायदिशोनप्राजानन्निति । यस्मादीदृशस्यवाक्यस्यविवक्षितोऽर्थःकश्चिदपिनास्ति
तस्मादिदंवाक्यमनित्यमुच्यते । यद्यप्यनादित्वात्स्वरूपेणानित्यत्वंनास्ति । तथापिधर्मावबोधनलक्षणस्य
नित्यकार्यस्याभावात् अनित्यैःकाव्यालापैःसमानत्वादप्रमाणमित्यर्थः । ननूदाहृतानामर्थवादानाम-
नुष्ठेयेधर्मेप्रामाण्याभावेऽपिस्वार्थेप्रामाण्यमस्तु तत्प्रत्यायकत्वेनस्वतःप्रामाण्यस्यापवदितुमशक्यत्वाद्
इत्याशंक्यान्येषुकेषुचिदर्थवादेषुमानान्तरविरोधदर्शनादप्रामाण्येसतितद्दृष्टान्तेनसर्वेषामप्यर्थवादानामप्रा-
माण्यमित्यभिप्रेत्यसूत्रयति—शास्त्रदृष्टविरोधाच्चेति २ शास्त्रविरोधोदृष्टविरोधःशास्त्रदृष्टविरोधइति

---

१ जैमितिसूत्रेप्रथमाध्यायस्यद्वितीयपादेएतदादिअष्टादशसूत्राणि । २ तै. सं. १.५.१. ।
३ तै. सं. २-१-१. । ४ तै. सं. ६-१-५. ।

त्रिविधोविरोधोऽर्थवादेषूपलभ्यते। तथाहि। स्तेनंमनोनृतवादिनीवागित्यत्रश्रूयमाणंमानसंचौर्यंवाचिकमनृतवदनंचप्रतिषेधशास्त्रेणविरुद्धम्। तस्माद्धूम एवाग्नेर्दिवाददृशेनार्चिस्तस्मादर्चिरेवाग्नेर्नक्तंददृशेनधूमइत्यत्रदृष्टविरोधः तथानचैतद्विद्मोवयंब्राह्मणावास्मोऽब्राह्मणावेत्यत्रापिप्रत्यक्षविरोधः। कोहितद्वेदयदमुष्मिँल्लोकेस्तिवानवेत्यत्रशास्त्रदृष्टेनविरोधः। स्वर्गकामोयजेतेत्यादिशास्त्रेह्यामुष्मिकंफलंदृश्यते। तस्माद्विरोधादर्थवादानामप्रामाण्यम्। ननु सोरोदीदित्यादीनांनिष्प्रयोजनत्वात् स्तेनंमनइत्यादीनांचविरोधात् अप्रामाण्येपिफलप्रतिपादकानामर्थवादानांतदुभयवैलक्षण्यादस्तुप्रामाण्यमित्याशङ्क्योत्तरंसूत्रयति-तथाफलाभावादिति ३ यथामानान्तरविरुद्धमर्थवादैरुक्तम् तथाफलमप्यविद्यमानमेवतैरुच्यते। तथाहि। गर्गत्रिरात्रंप्रकृत्यश्रूयते-शोभतेस्यमुखं यएवंवेदेति दर्शपूर्णमासयोर्वेदाभिमर्शनंप्रकृत्य श्रूयते-आस्यप्रजायांवाजीजायते यएवंवेदेति नचवयंवेदितॄणांतत्फलमुपलभामहे। ननु वैहिकफलवाक्यानांविसंवादादप्रामाण्येपि आमुष्मिकफलवाक्यानामस्तुप्रामाण्यमित्याशङ्क्योत्तरंसूत्रयति-अन्यानर्थक्यादिति ४ एवंहिश्रूयते पूर्णाहुत्यासर्वान्कामानवाप्नोति पशुबन्धयाजीसर्वाँल्लोकानभिजयति तरतिमृत्युंतरति पाप्मानंतरतिब्रह्महत्यांयोऽश्वमेधेनयजते यउचैनमेवंवेदेति। तत्राग्न्याधेयगतयापूर्णाहुत्यासर्वकामप्राप्तेरन्यान्यग्निहोत्रादीन्युत्तरकालीनानि अनर्थकानिस्युः। तथानिरूढपशुबन्धानुष्ठानेनसर्वल्लोकाभिजयात् ज्योतिष्टोमादीनामानर्थक्यम्। अध्ययनकालीनेनैवाश्वमेधवेदनेनब्रह्महत्यादितरणात् तदनुष्ठानंचव्यर्थं स्यात्। तस्मादामुष्मिकफलवाक्यानामप्यप्रामाण्यम्। ननु माभूत्फलवाक्यानांप्रामाण्यम् तथापिनिषेधवाक्येषुविरोधानुपलम्भाद् अस्तु प्रामाण्यमित्याशङ्क्योत्तरंसूत्रयति-अभागिप्रतिषेधादिति ५ नपृथिव्यामग्निश्चेतव्योनान्तरिक्षेनदिवीत्यत्रान्तरिक्षस्यचदिवश्चप्रतिषेधभागित्वंनास्ति तत्रचयनप्रसङ्गस्यैवाभावात्। माभूत्तर्हि निषेधानांप्रामाण्यम् बबरःप्रावाहणिरकामयतेत्यादीनांपूर्वपुरुषवृत्तान्ताभिधायिनांविरोधानुपलम्भाद् अस्तुप्रामाण्यमित्याशङ्क्योत्तरंसूत्रयति-अनित्यसंयोगादिति ६ बबरादिस्वरूपेणानित्येनार्थेनसंयोगेसत्यस्यवाक्यस्यततःपूर्वमभावात् कालिदासादिवाक्यवत् पौरुषेयत्वंप्रसज्येत। किंबहुना। सर्वथापिनास्त्येवार्थवादानांप्रामाण्यमितिपूर्वपक्षः। सिद्धान्तंसूत्रयति-विधिनात्वेकवाक्यत्वात् स्तुत्यर्थेनविधीनांस्युरिति ७ तुशब्दोऽर्थवादानामप्रामाण्यंवारयति वायुर्वैक्षेपिष्ठेत्येवमादीनामर्थवादानां वायव्यंश्वेतमालभेतेत्यादिनाविधिनासहैकवाक्यत्वाद् अस्तिधर्मेप्रामाण्यम्। नचविधिवाक्यस्यार्थवादैरपेक्ष्येणपदान्वयसम्पूर्तेस्तत्रार्थवादानांनास्त्युपयोगइतिशङ्कनीयम्। ते ह्यर्थवादाःपुरुषप्रवृत्तिमाकांक्षतांविधीनांस्तुत्यर्थत्वेनोपयुक्ताःस्युः स्तुत्याचप्रलोभितःपुरुषस्तत्र प्रवर्तते। ननुअर्थवादानां-

---

१ तै. सं. १.७.४।

प्रमादपठितत्वेनोपेक्षणीयत्वात् किमनेनैकवाक्यताप्रयासेनेत्याशङ्क्याह–तुल्यंचसाम्प्रदायिकमिति ८ अनध्यायवर्जनादिनियमपुरःसरंगुरुसम्प्रदायादध्ययनंयत्तत्सांप्रदायिकम्। तच्चविधीनामर्थवादानांचसमानम्। तस्माद्विधिवदेतेषामपिप्रमादपाठोनभवति। ननुशास्त्रदृष्टविरोधाच्चेत्येवमर्थवादेष्वनुपपत्तिरुक्तेत्याशङ्क्याह–अप्राप्ताचानुपपत्तिःप्रयोगेहिविरोधःस्याच्छब्दार्थस्त्वप्रयोगभूतस्तस्मादुपपद्यतेइति ९ तन्त्रवार्तिकेत्वेतत्सूत्रमध्याहृत्यत्रिधाव्याख्यातम्-अप्राप्तांचानुपपत्तिम् अप्राप्ताचानुपपत्तिः अप्राप्तंचानुपपत्तिमिति। स्तेनंमनइत्यादौशास्त्रविरोधाद्यनुपपत्तिरप्राप्ता प्रयोगस्यानुक्तत्वात्। प्रयोगेहिस्तेयादीनामुच्यमानेशास्त्रविरोधःस्यात्। नचात्रस्तेयंकर्तव्यमितिप्रयोगउच्यते किन्तु स्तेयशब्दार्थउच्यते। नचस्तेयशब्दार्थःप्रयोगभूतः। तस्माच्छब्दार्थवचनमात्रेणशास्त्रविरोधाभावाद् अयमर्थवादउपपन्नएव। ननु स्तुत्यर्थेनविधीनांस्युरितियदुक्तम् तदसत् वैयधिकरण्यात् वेतसशाखयाचावकाभिश्चविकर्षत्यापोवैशान्ताइत्यत्रवेतसावकेविधीयते आपश्चस्तूयन्ते इतिवैयधिकरण्यमित्याशङ्क्याह–गुणवादस्त्विति १० तुशब्दोवैयधिकरण्यदोषंवारयति। गुणवादोह्यत्रविवक्षितः। यथालोकेकाश्मीराभिजनोदेवदत्तः काश्मीरदेशेषुस्तूयमानेषुस्तुतमात्मानंमन्यते एवमत्रापि अद्भ्योजातेवेतसावकेअप्सुस्तुतासु तेएवस्तुतेभवतः शान्ताभ्योऽद्भ्योजातत्वात् वेतसावकेस्वयमपिशान्तेसत्यौयजमानस्यानिष्टंशमयतइत्येतादृशस्यगुणस्य वादोत्राभिप्रेतः। सोरोदीदित्यत्रापिरजतस्यपतिताश्रुरूपत्वात् रजतदाने गृहेऽपिरोदनप्रसङ्गात् बर्हिषिरजतंनदेयमितितन्निषेधेनविधेयेनार्थवादस्यैकवाक्यत्वम् तत्ररजतदानाभावेरोदनाभावरूपोगुणोऽत्रविवक्षितः तेनचगुणेनरजतदाननिवारणरूपोविधिःस्तूयते। यद्यपिरजतस्याश्रुप्रभवत्वमत्यन्तमसत्। तथापियथोक्तरीत्याविधेःस्तुतिःसम्पद्यते। यःप्रजाकामः पशुकामःस्यात् सएतंप्राजापत्यमजंतूपरमालभेतेत्ययंविधिः प्रजापतिवपोत्खेदेनस्तूयते। यस्मात्प्रजापतिः स्ववपामप्युत्खिद्याग्नौप्रहृत्यततोजातंतूपरमजमात्मार्थमालभ्यप्रजाःपशूंश्चलब्धवान्। तस्मात्प्रजादिसंपादकोयंतूपरइतितूपरगुणस्यवादोऽत्रविवक्षितः। आदित्यःप्रायणीयश्चरुरित्येषविधिर्दिशोनैप्राजानन्नित्यनेनदिङ्मोहेनस्तूयते यथेयमदितिर्देवतादिङ्मोहमप्यपनीयदिग्विशेषंज्ञापयति तथाबहुविधकर्मसमुदायरूपे सोमयागे अनुष्ठानविषयंभ्रममपनयतीतिकिमुवक्तव्यमित्येवमदितिदेवतागतस्यगुणस्यवादोत्रविवक्षितः।स्वकीयवपोत्खेदोदेवयजनाध्यवसानमात्रेणदिङ्मोहश्चेत्युभयमस्तुवामावा।सर्वथापिस्तुतिपरत्वमभ्युपगतवतामस्माकंनकिञ्चिद्धीयते।शिखातेवर्धतेव-

१ तै. सं. ६.४.४.। २ तै. सं. २.१.१.। ३ तै. सं. ६.१.७.। ४ तै. सं. ६.१.६.४.

त्सगुह्वचींश्रद्धयापिबेत्यादावविद्यमानेनाप्यर्थेनलोकेस्तुतिदर्शनात् । अथपूर्वपक्षिणा शास्त्रविरोधंदर्शयितुंयदुदाहृतं स्तेनंमनोनृतवादिनीवागिति तत्रोत्तरंसूत्रयति—रूपात्प्रायादिति ११ हिरण्यंहस्तेभवत्यथगृह्णातीत्येतंविधिंस्तोतुमयमर्थवादउच्यते । यथा लोकेपि किमृषिणादेवदत्तएवपूजयितव्यइत्यत्रदेवदत्तपूजांस्तोतुमेवौदासीन्यमृषावुपन्यस्यते नतुपूज्यत्वमृषेर्वारयितुम् एवमत्रापिहस्तेहिरण्यग्रहणंप्रशंसितुं मनसःस्तेनरूपत्वंवाचोनृतवादित्वंचोपन्यस्यते तत्रगुणवादेनशब्दार्थोयोजनीयः । यथास्तेनाःप्रच्छन्नरूपाएवंमनोपीतिप्रच्छन्नरूपत्वमत्रगुणः प्रायेण वागनृतंवक्तीतिप्रायिकत्वंतत्रगुणः हस्तस्तुनप्रच्छन्नः नाप्यनृतबहुलःअतोहस्तेहिरण्यधारणं प्रशस्तमितिस्तूयते । यदपिदृष्टविरोधायधूमएवाग्नेर्दिवाददृशेइत्यादिकमुदाहृतम् । तत्रोत्तरंसूत्रयति—दूरभूयस्त्वादिति १२ अग्निर्ज्योतिर्ज्योतिरग्निःस्वाहेतिसायंजुहोति सूर्योज्योतिर्ज्योतिःसूर्यःस्वाहेतिप्रातरिति एतौविधीस्तोतुंसोऽर्थवादः यस्मादर्चिर्दिवानदृश्यते तस्मात्सूर्यमन्त्रएवप्रातःप्रयोक्तव्यः यस्माद्रात्रावर्चिरेवदृश्यतेतस्मादग्निमन्त्रोरात्रौप्रयोक्तव्यःसूर्यमन्त्रश्च दिवाइत्येवंतयोर्मन्त्रयोःस्तुतिः धूमार्चिषोरदर्शनोपन्यासस्तु दूरभूयस्त्वगुणनिमित्तः । भूयसि हिदूरेपर्वताग्रेवृक्षादयोऽपिनविस्पष्टंदृश्यन्ते किंतुतृणसादृश्येनतेषांदर्शनाभासएव तद्वदत्रापि । यदप्यन्यदृष्टविरोधायैवोदाहृतम् नचैतद्विद्मोवयंब्राह्मणावास्मोऽब्राह्मणावेति तत्रोत्तरंसूत्रयति—स्वयपराधात्कर्तुश्चपुत्रदर्शनादिति १३ प्रवरेप्रन्निगमाणेब्रूयाद्देवाःपितरइत्यस्यविधेस्तावकोऽयमर्थवादः यदियजमानोदेवाःपितरइत्यादिमन्त्रेणप्रवरमनुमन्त्रयेत् तदानीमब्राह्मणोऽपिब्राह्मणोभवेदित्यनुमन्त्रस्यस्तुतिः । नचैतद्विद्मइत्येतदज्ञानवचनंदुर्ज्ञानत्वगुणेनतत्रप्रयुज्यते यत्रस्त्रियाअपराधोभवति । तत्रकर्तुरुत्पादयितुर्जारस्यापिपुत्रोदृश्यते । अतः पत्युपपत्योरुभयोःपुत्रदर्शनात् स्वकीयंजन्मकीदृशमितिदुर्ज्ञानम् । अनेनाभिप्रायेणप्रयुक्तत्वात नास्तितत्रदृष्टविरोधः नहितत्रदृश्यमानंस्वब्राह्मण्यमपवदितुंनचैतद्विद्मइत्युपन्यस्तम् । यदपिशास्त्रीयदर्शनविरोधायोदाहृतम् कोहितद्वेदयद्यमुष्मिँल्लोकेऽस्तिवानवेति तत्रोत्तरंसूत्रयति—आकालिकेप्सेति १४ दिक्ष्वतीकाशान्करोतीतिप्राचीनवंशस्यद्वारविधिः तस्यशेषोऽयंकोहितद्वेदेतिधूमाद्युपद्रवपरिहारेणप्रत्यक्षेणफलेनद्वारविधिःस्तूयते । स्वर्गप्राप्तिरूपंतुफलमाकालिकम् । अकालेभवमाकालिकम् विप्रकृष्टकालिकंनत्विदानींतनमित्यर्थः तस्येप्सातस्यप्राप्तुमिच्छा साच कोहितद्वेदेत्यनिश्चयोपन्यासेकारणम् यथाभाविकालीनःपौत्रप्रपौत्रादिवृत्तान्तोनिश्चेतुंनशक्यते तद्वत्स्वर्गप्राप्तिर्भाविकालिकीतिगुणयोगादनिश्चयोपन्यासः धूमादिपरिहारस्तुप्रत्यक्षत्वान्निश्चितइत्यभिप्रायः । यदप्यन्यदृष्टविरोधायोदाहृतम् शोभतेऽ-

१ ऐ. ब्रा. ९-३१. ।

स्यमुखंयएवंवेदेति तत्रोत्तरंसूत्रयति—विद्याप्रशंसेति १९ सोऽयंगर्गत्रिरात्रविधेःशेषः तद्विषयंवेदनम- पिमुखशोभाहेतुः किमुतानुष्ठानमितिस्तूयते यथाकर्णाभरणादिनामुखंशोभितंभवति एवंवेदितुरुत्सा- हेनविकसितंवदनंशोभितमिवशिष्यैरुद्वीक्ष्यते अतःशोभासादृश्यगुणयोगाच्छोभतइत्युच्यते। यदपि अन्यान्दिरोधायोदाहृतम् आस्यप्रजायांवाजीजायते यएवंवेदेति सोऽपिवेदानुमन्त्रणविधेःशेषः। अत्रापि कैमुतिकन्यायेनस्तुतिःपूर्ववद्योजनीया वेदितुःपुत्रःपितृशिक्षयास्वयमपिविद्वान्भवति। ततःप्रतिग्रहेणान्नं प्राप्नोति तस्मादीदृशंगुणमभिप्रेत्यवाजीजायतइत्युक्तम्। यदप्यन्यानर्थक्यायोदाहृतम् पूर्णाहुत्यासर्वा- न्कामानवाप्नोतीति तत्रोत्तरंसूत्रयति—सर्वत्वमाधिकारिकमिति १६ पूर्णाहुतिंजुहुयादित्यस्यविधेःशे- षोऽयम् सर्वकामावाप्तिहेतुत्वात् प्रशस्तेयमाहुतिरितिस्तूयते यथा सर्वेब्राह्मणाभोजयितव्याइत्यत्रसर्वत्वं स्वगृहागतब्राह्मणविषयम् एवंपूर्णाहुत्याकर्मसाङ्गत्वम् यत्फलंतस्मिन्नधिकारेप्रस्तावेसंभावितंतद्विषयमेव सर्वत्वंद्रष्टव्यम् पूर्णाहुतेरभावेसत्याधानरूपंकर्माङ्गविफलंभवति तच्चवैकल्यंपूर्णाहुत्यासमाधीयतेइत्येकः कामः तस्मिन्समाहितेसतिआहवनीयाद्यग्नयोग्निहोत्रादिकर्मसुयोग्याभवन्तीत्ययमन्यःकामः तैश्चकर्मभि- स्तत्तत्फलंप्राप्यतेइतिकामान्तरम् ईदृशीसर्वकामावाप्तिराहुत्यन्तरेष्वपिविद्यतइतिचेत्। विद्यतांनाम किन्न- श्छिन्नम् नखल्वेतावतापूर्णाहुतिस्तुतेः काचिद्धानिरस्ति। ननुपूर्णाहुतेरङ्गस्वभावत्वात् तदीयफलश्रुतेरर्थ- वादत्वेनस्तावकत्वंभवतु द्रव्यसंस्कारकर्मसुपरार्थत्वाद् फलश्रुतिरर्थवादइतिसूत्रेणनिर्णीतत्वात् पशुब- न्धवाक्यस्यतुकर्मविधायकत्वात्सर्वेलोकाभिजयस्यमुख्यफलत्वाद् अन्यानर्थक्यंदुर्वारमित्याशंक्योत्तरं- सूत्रयति—फलस्यकर्मनिष्पत्तेस्तेषांलोकवत्परिमाणतःसारतोवाफलविशेषःस्यादिति १७ पृथिव्यन्तरि- क्षद्युलोकेष्वन्यतमलोकाभिजयरूपंफलंपशुबन्धकर्मणानिष्पद्यते तेषांचपृथिव्यादीनांफलानांकर्मान्तरेणप- रिमाणाधिक्यंसारत्वंवासंपद्यते ततःफलविशेषःस्यादिति नास्त्यानर्थक्यंलोकवदित्युक्तार्थेदृष्टान्तः—य- थालोकेनिष्केणखारीपरिमितान्व्रीहीन्विक्रीयनिष्कान्तरेणपुनःक्रयेसतिपरिमाणाधिक्यंभवति। यथावा निष्केणवस्त्रमात्रंलभ्यते निष्कद्वयेनतुसारभूतंदुकूलम् तथाभोगाधिक्यंभोगसारत्वंवाकर्मान्तरेणद्रष्टव्यम्। ब्रह्महत्यायाअपिमानस्याःस्वल्पायावेदनमात्रेणतरणम् कायिक्यास्तुमहत्याअश्वमेधेनेतिनास्त्यानर्थ- क्यम्। योऽपिनान्तरिक्षेनदिवीत्यप्रसक्तप्रतिषेधउदाहृतः तथा बबरःप्रावाहणिरित्यनित्यसंयोगउदा हृतः तत्रोभयत्रोत्तरंसूत्रयति—अन्त्ययोर्यथोक्तमिति १८ अन्त्ययोरनयोरुदाहरणयोरुत्तरंपूर्वोक्तमेवद्र- ष्टव्यम्। अन्तरिक्षादौचयननिन्दारूपोऽर्थवादोहिरण्यंनिधायचेतव्यमित्यस्यविधेःशेषः। अतोत्रस्तुत्यर्थेन विधीनांस्युरित्युक्तमेवोत्तरम्। अन्तरिक्षेचयनप्रसक्त्यभावात् तन्निन्दानित्यानुवादोऽस्तु तेनापिविधिः स्तोतुं शक्यते नित्यसिद्धार्थानुवादिनावायोःक्षेपिष्ठत्वेनपशुविधेःस्तुतत्वात्। बबरःप्रावाहणिरकामयते-

त्यत्रापिबबरनामकःकश्चिदनित्यःपुरुषोमनुष्योनविवक्षितः किन्तु बबरध्वनियुक्तःप्रकर्षेणवहनशीलो-वायुर्व्यवहारदशायांनित्यएवार्थोविवक्षितइत्येतदुत्तरंप्रथमपादस्यान्तिमाधिकरणेप्रोक्तम् ॥ तस्मात्सं-भावितदोषाणांपरिहृतत्वादर्थवादानामस्तिप्रामाण्यम् । तत्रसङ्ग्रहश्लोकाः—वायुर्वाइत्येवमादेरर्थवाद-स्यमानता । नविधेयेऽस्तिधर्मेकिंकिंवासौतत्रविद्यते १ । विध्यर्थवादशब्दानांमिथोऽपेक्षापरिक्षयात् । नास्त्येकवाक्यताधर्मेप्रामाण्यंसंभवेत्कुतः २ । विध्यर्थवादौसाकांक्षौप्राशस्त्यपुरुषार्थयोः । तेनैकवा-क्यतातस्माद्वादानांधर्ममानता ३ इति । तदेवंवेदेविद्यमानानांत्रयाणांमन्त्रविध्यर्थवादभागानामप्रामाण्ये-कारणाभावात् बोधकानांतेषांप्रामाण्यस्यस्वतस्त्वाङ्गीकाराच्च कृत्स्नस्यापिवेदस्यप्रामाण्यंसिद्धम् । नन्वेवमपिवेदस्यपौरुषेयत्वेनविप्रलम्भकवाक्यवदप्रामाण्यंस्यात् । पौरुषेयत्वंचप्रथमपादेपूर्वपक्षत्वेन-जैमिनिःसूत्रयामास—वेदांश्चैकेसंनिकर्षंपुरुषाख्येति १ । एकेवादिनोवेदान्प्रतिसंनिकर्षमन्यन्ते कालि-दासादिभिर्निर्मितानांरघुवंशादिग्रन्थानाम् । समुच्चयार्थश्चकारः तेह्यत्रदृष्टान्ततयासमुचीयन्ते यथारघुवं-शादयइदानींतनास्तथावेदाअपि नतुवेदाअनादयःअतएववेदकर्तृत्वेनपुरुषाआख्यायन्ते वैयासिकंमा-रतं वाल्मीकीयंरामायणमित्यत्रयथाभारतादिकर्तृत्वेनव्यासादयआख्यायन्ते तथा काठकंकौथुमं तैत्तिरीयमित्येवंतत्तद्वेदशाखाकर्तृत्वेनकठादीनामाख्यातत्वात् वेदाःपौरुषेयाः । ननुनित्यानामेवसतां-वेदानामुपाध्यायवत्संप्रदायप्रवर्तकत्वेनकाठकादिसमाख्यास्यादित्याशङ्क्ययुक्त्यन्तरंसूत्रयति-अनित्य-दर्शनाच्चेति-२ । अनित्याजननमरणवन्तोबबरादयोवेदार्थेश्रूयन्ते बबरःप्रावाहणिरकामयत कुसुरुविन्द-औद्दालकिरकामयतेति । तथासतिबबरादिभ्यःपूर्वमभावादनित्यावेदाः । विमतंवेदवाक्यंपौरुषेयं वाक्यत्वात् कालिदासादिवाक्यवदित्याद्यनुमानसमुच्चयार्थश्चकारः । सिद्धान्तंसूत्रयति—उक्तंतुशब्द-पूर्वत्वमिति ३ । तुशब्दोवेदानामनित्यत्वंवारयति शब्दस्यवेदरूपस्यकठादिपुरुषेभ्यःपूर्वत्वमनादित्वं-प्राचीनैरेवसूत्रैरुक्तम् औत्पत्तिकस्तुशब्दस्यार्थेनसंबन्धइत्यस्मिन्सूत्रेऔत्पत्तिकशब्देनसर्वेषांशब्दानांवे-दानांतदर्थानांतदुभयसंबन्धानांचनित्यत्वंप्रतिज्ञायोत्तराभ्यांशब्दाधिकरणवाक्याधिकरणाभ्यामुपपादित-त्वात् । कातर्हिकाठकाद्याख्यायिकायागतिरित्याशङ्क्य सम्प्रदायप्रवर्तनात्सेयमुपपद्यतेइत्युत्तरंसूत्रय-ति—आख्याप्रवचनादिति ४ । अस्त्वियमाख्यायिकायागतिः ततःपरंबबराद्यनित्यदर्शनंयदुक्तं तस्य-किमुत्तरमित्याशङ्क्योत्तरंसूत्रयति—परंश्रुतिसामान्यमात्रमिति ५ । यत्परंबबरादिकंतच्छब्दसामान्यमेव नतुमनुष्योबबरनामकोत्रविवक्षितः बबरध्वनियुक्तस्यप्रवहणस्वभावस्यवायोरत्रवक्तुंशक्यत्वात् । ननुवे-देक्वचिदेवंश्रूयते वनस्पतयःसत्रमासत—सर्पाःसत्रमासतेति—तत्रवनस्पतीनामचेतनत्वात् सर्पाणां-

१ तैः सं. ७. २. २ ।

चेतनत्वेपिविचाररहितत्वात् नतदनुष्ठानंसंभवति अतोजरद्गवोगायतिमद्रकाणीत्याद्युन्मत्तवाल्यवा-
क्यसदृशत्वात् केनचित्कृतोवेदइत्याशङ्क्योत्तरंसूत्रयति—कृतेचाविनियोगःस्यात्कर्मणःसमत्वादिति
१। यदिज्योतिष्टोमादिवाक्यंकेनचित्पुरुषेणक्रियेत तदानींकृतेतस्मिन्वाक्येस्वर्गसाधनत्वेनज्योतिष्टोम-
स्यविनियोगोनस्यात् साध्यसाधनभावस्य पुरुषेणज्ञातुमशक्यत्वात् श्रूयतेतुविनियोगः ज्योतिष्टोमेन-
स्वर्गकामोयजेतेति नचैतदुन्मत्तवाक्यसदृशंलौकिकविधिवाक्यवद्भाव्यकरणेतिकर्तव्यतारूपैस्त्रिभिरंशैरु-
रुपेतायाभावनायाअवगमात् लोकेहिब्राह्मणान्भोजयेदितिविधौकिंकेनकथमित्याकाङ्क्षायां तृप्तिमुद्दि-
श्यौदनेनद्रव्येण शाकसूपादिपरिवेषणप्रकारेणेतियथोच्यते ज्योतिष्टोमविधावपिस्वर्गमुद्दिश्यसोमेन-
द्रव्येण दीक्षणीयाद्युपकारप्रकारेणेत्युक्ते कथमुन्मत्तवाक्यसदृशंभवेदिति । वनस्पत्यादिसत्रवाक्य-
मपिनतत्सदृशम् तस्यसत्रकर्मणोज्योतिष्टोमादिनासमत्वात् यत्परोहिशब्दः सशब्दार्थइतिन्यायविद-
आहुः। ज्योतिष्टोमादिवाक्यस्यविधायकत्वाद् अनुष्ठानेतात्पर्यम् । वनस्पत्यादिसत्रवाक्यस्यार्थ-
वादत्वात् प्रशंसायांतात्पर्यम् । साचाविद्यमानेनापिकर्तुंशक्यते अचेतनाअविद्वांसोऽपिसत्रमनु-
ष्ठितवन्तःकिंपुनश्चेतनाविद्वांसोब्राह्मणाइतिसत्रस्तुतिः । चकारःपूर्वपक्षोक्तस्यवाक्यत्वहेतोः कर्त्रनुप-
लम्भेनपराहतिंसमुच्चिनोति। तस्मान्नास्तिवेदस्यपौरुषेयत्वम् । अत्रैतौसंग्रहश्लोकौ—पौरुषेयंनवावेद-
वाक्यंस्यात्पौरुषेयता । काठकादिसमाख्यानाद्वाक्यत्वाच्चान्यवाक्यवत् १ । समाख्यानंप्रवचनाद्वा-
क्यत्वंतु पराहतम् । तत्कर्त्रनुपलम्भेनस्यात्ततोऽपौरुषेयता २ । ननुभगवताबादरायणेनवेदस्यब्रह्म-
कार्यत्वं सूत्रितम्—शास्त्रयोनित्वादिति। ऋग्वेदादिशास्त्रकारणत्वात् ब्रह्मसर्वज्ञमितिसूत्रार्थः ।
बाढम्। नैतावतापौरुषेयत्वंभवति मनुष्यनिर्मितत्वाभावात् ईदृशमपौरुषेयत्वमभिप्रेत्यव्यवहारदशा-
यामाकाशादिवन्नित्यत्वंबादरायणेनैवदेवताधिकरणेसूत्रितम्—अतएवचनित्यत्वमिति । श्रुतिस्मृती-
चात्र भवतः—वाचाविरूपनित्ययेतिश्रुतिः । अनादिनिधनानित्यावागुत्सृष्टास्वयम्भुवेतिस्मृतिः।
तस्मात्कर्तृदोषशङ्कायाअनुदयान्मन्त्रब्राह्मणात्मकस्यवेदस्यनिर्विघ्नंप्रामाण्यंसिद्धम् । ननुमन्त्रब्राह्म
णात्मकत्वंवेदस्यनयुक्तम् तयोःस्वरूपस्यनिर्णेतुमशक्यत्वात्। मैवम्। द्वितीयाध्यायस्यप्रथमपादे-
सप्तमाष्टमयोरधिकरणयोर्निर्णीतत्वात् । सप्तमाधिकरणमारचयति—अहेबुध्नियमन्त्रंमइतिमन्त्रस्यलक्ष-
णम् । नास्त्यस्तिवास्यनास्त्येतदव्याप्त्यादेरवारणात् १ । याज्ञिकानांसमाख्यानंलक्षणंदोषवर्जि-
तम्। तेनुष्ठानस्मारकादौमन्त्रशब्दंप्रयुञ्जते २ । आधानइदमाम्नायते—अहेबुध्नियमन्त्रंमेगोपायेति ।
तत्रमन्त्रस्यलक्षणंनास्ति अव्याप्त्यतिव्याप्त्योर्वारयितुमशक्यत्वात् । विहितार्थाभिधायकोमन्त्रइत्यु-

१ जरद्गवःकम्बलपादुकाभ्यांद्वारिस्थितोगायतिमद्रकाणि । तंब्राह्मणीपृच्छतिपुत्रकामा राजन्रुमायां-
लशुनस्यकोर्थः। २ तै. सं. २.६.११। ३ तै. ब्रा. १.२.१।

केवसन्तायकपिञ्जलानालभतेइत्यस्यमन्त्रस्यविधिरूपत्वादव्याप्तिः । मन्त्रहेतुर्मन्त्रइत्युक्तेब्राह्मणेष्वति-व्याप्तिः । एवमाशीरन्तोमन्त्रउत्तमपुरुषान्तोमन्त्रइत्यादिलक्षणानांपरस्परमव्याप्तिरितिचेत् । मैवम् । याज्ञिकसमाख्यानस्यनिर्दोषलक्षणत्वात् तच्चसमाख्यानमनुष्ठानस्मारकादीनांमन्त्रत्वंगमयति उरुप्र-थस्वेत्यादयोऽनुष्ठानस्मारकाः अग्निमीळेपुरोहितमित्यादयःस्तुतिरूपाः इषेत्वोर्जेत्वेत्यादयस्त्वान्ताः अग्न-आयाहिवीतयइत्यादयआमन्त्रणोपेताः अग्नीदग्नीन्विहरेत्यादयःप्रैषरूपाः अधःस्विदासीदुपरिस्विदा-सीदित्यादयोविचाररूपाः अम्बेअम्बाल्यम्बिकेनमानयतिकश्चनेत्यादयः परिदेवनरूपाः पृच्छामित्वा-परमन्तंपृथिव्याइत्यादयःप्रश्नरूपाः वेदिमाहुःपरमन्तंपृथिव्याइत्यादयउत्तररूपाः । एवमन्यदप्युदा-हार्यम् । ईदृशेष्वत्यन्तविजातीयेषुसमाख्यानमन्तरेणनान्यःकश्चिदनुगतोधर्मोऽस्ति यस्यलक्षणत्व-मुच्येत । लक्षणस्यचोपयोगःपूर्वाचार्यैर्दर्शितः—ऋषयोऽपिपदार्थानांनान्तंयान्तिपृथक्त्वशः १ । लक्षणेन-तुसिद्धानामन्तंयान्तिविपश्चितइति । तस्मादभियुक्तानांमन्त्रोऽयमितिसमाख्यानंलक्षणम् । अत्रमा-धिकरणमारचयति—नास्त्येतद्ब्राह्मणेत्यत्रलक्षणंविद्यतेऽथवा । नास्तीयन्तोवेदभागाइतिक्लृप्तेरभावतः १ । मन्त्रश्चब्राह्मणंचेतिद्वौभागौतेनमन्त्रतः । अन्यद्ब्राह्मणमित्येतद्भवेद्ब्राह्मणलक्षणम् २ । चातुर्मास्येष्विद-माम्नायते—एतद्ब्राह्मणान्येवपञ्चहवींषीति । तत्रब्राह्मणस्यलक्षणंनास्ति । कुतः । वेदभागानामियत्तानव-धारणेनब्राह्मणभागेष्वन्यभागेषुचलक्षणस्याव्याप्त्यतिव्याप्त्योःशोधयितुमशक्यत्वात् । पूर्वोक्तोमन्त्रभाग-एकः भागान्तराणिचकानिचित्पूर्वैरुदाहर्तुंसंगृहीतानि—हेतुर्निर्वचनंनिन्दाप्रशंसासंशयोविधिः । पर-क्रियापुराकल्पोव्यवधारणकल्पनेति १ । तेनह्यान्नंक्रियतइतिहेतुः । तदध्नोदधित्वमितिनिर्वचनम् । अमे-ध्यावैमाषाइतिनिन्दा । वायुर्वैक्षेपिष्ठादेवतेतिप्रशंसा । तद्व्यचिकित्सज्जुहवानी३माहौषा३मितिसंशयः । यजमानेनसंमितौदुम्बरीभवतीतिविधिः । माषानेवमह्यंपचन्तीतिपरकृतिः । पुराब्राह्मणाअभैषुरिति पुरा-कल्पः । यावतोऽश्वान्प्रतिगृह्णीयात्तावतोवारुणांश्चतुष्कपालान्निर्वपेदितिविशेषावधारणकल्पना । एवमन्य-दप्युदाहार्यम् । नचहेत्वादीनामन्यतमंब्राह्मणमितिलक्षणम् । मन्त्रेष्वपिहेत्वादिसद्भावात् । इन्दवोवा-मुशन्तिहीतिहेतुः । उदानिषुर्महीरितितस्मादुदकमुच्यतइतिनिर्वचनम् । मोघमन्नं विन्दतेअप्रचेता-

---

१ तै. सं. १.१.८ । २ तै. ब्रा. ३.९.२ । ३ तै. सं. ६.३.१ । ४ तै. ब्रा. २.८.९ । ५ तै. सं. ७.४.१८ । ६ तै. सं. ७.४.१७ । ७ तै. सं. ७.४.१७. इयं-वेदिःपरोअन्तःपृथिव्याःइत्यपिपाठः । ८ तै. ब्रा. १.७.१ । ९ तै. सं. २.९.३ । १० तै. सं. ९.१.८ । ११ तै. ब्रा. २.१.२ । १२ तै. सं. ६.२.१० । १३ तै. सं. १.९.७ । १४ तै. सं. २. ५. १२ । १५ ऋ. सं. १. १. ३ । १६ तै. सं. ५. ६. १ । १७ ऋ. सं. ८. ६. २५. ।

इतिनिन्दा । अग्निर्मूर्धादिवइतिप्रशंसा । अधःस्विदासी[१]दुपरिस्विदासी[२]दितिसंशयः । वसन्तायक-पिञ्जलानालभतइतिविधिः । सहस्रमयुताददिदितिपरकृतिः । यज्ञेनयज्ञमयजन्तदेवाइति पुराकल्पः । इतिकरणबहुलंब्राह्मणमितिचेत् । न । इत्यवदाइत्यब्रवादित्यपचइतिब्राह्मणोगायेदित्यस्मिन्ब्राह्मणेन-गातव्येमन्त्रेतिव्याप्तेः । इत्याहेत्यनेनवाक्येनोपनिबद्धंब्राह्मणमितिचेन्न । राजोचित्यंप्रवंभक्षीत्याह बोनारेक्षाःशुचिरस्मीत्याह इत्यनयोर्मन्त्रयोरतिव्याप्तेः । आख्यायिकारूपं ब्राह्मणमितिचेन्न । यमयमी-संवादसूक्तादावतिव्याप्तेः । तस्मान्नास्तिब्राह्मणस्यलक्षणमितिप्राप्ते ब्रूमः—मन्त्रब्राह्मणरूपौद्वावेववेद-भागावित्यङ्गीकारात् । मन्त्रलक्षणस्यपूर्वमभिहितत्वाद् अवशिष्टोवेदभागोब्राह्मणमित्येतल्लक्षणंभवि-ष्यति । तदेतल्लक्षणद्वयंजैमिनिःसूत्रयामास—तच्चोदकेषुमन्त्राख्या-शेषेब्राह्मणशब्दइति । तस्मिन्वेदेकेषु-चिदभिधायकेषुवाक्येषुमन्त्रइतिसमाख्यासम्प्रदायविद्भिर्व्यवहियते मन्त्रानधीमहइतिमन्त्रव्यतिरिक्त-भागेतुब्राह्मणशब्दस्तैर्व्यवहृतइत्यर्थः । ननुब्रह्मयज्ञप्रकरणेमन्त्रब्राह्मणव्यतिरिक्ताइतिहासादयोभागाः अम्नायन्ते यद्ब्राह्मणानीतिहासपुराणानिकल्पान्गाथानाराशंसीरिति । मैवम् । विप्रपरिव्राजकन्यायेन-ब्राह्मणाद्यवान्तरभेदानामेवेतिहासादीनांपृथगभिधानात् । देवासुराःसंयत्ताआसन्नित्यादयइतिहासाः । इदं-वाअग्रेनैवकिञ्चनासीदित्यादिकंजगतःप्रागवस्थामुपक्रम्यसर्गप्रतिपादकंवाक्यजातंपुराणम् । कल्पस्त्वारु-णकेतुकचयनप्रकरणेसमाम्नायतेइतिमन्त्राःकल्पः । अतऊर्ध्वंयदिवर्लिहरेदितिअग्निचयनेयमगाथाभिः परिगायतीतिविहितामन्त्रविशेषागाथाः । मनुष्यवृत्तान्तप्रतिपादिकाऋचोनाराशंस्यः । तस्मान्मन्त्रब्रा-ह्मणव्यतिरिक्तभागाभावात् मन्त्रब्राह्मणस्वरूपस्यचलक्षितत्वात् उभयात्मकत्वंवेदस्यसुस्थितम् । मन्त्रावान्तरविशेषश्चतस्मिन्नेवपादेइत्थंविचारितः—नर्क्सामयजुषांलक्ष्मसाङ्कर्यादितिशङ्किते । पादस्य गीतिःप्रश्लिष्टपाठइत्यस्त्यसङ्करः । इदमाम्नायते—अहेबुध्नियमन्त्रंमेगोपाय यमृषयस्त्रैविदाविदुः-ऋचःसामानियजूंषीति । त्रीन्वेदान्विदन्तीतित्रिविदः त्रिविदांसम्बन्धिनोध्येतारस्त्रैविदाः तेचयंमन्त्र-भागमृगादिरूपेणत्रिविधमाहुः तंगोपायेतियोजना । तत्रत्रिविधानामृक्सामयजुषांव्यवस्थितंल-क्षणंनास्ति । कुतः । सांकर्यस्यदुष्परिहरत्वात् अध्यापकप्रसिद्धेषुऋग्वेदादिषुपठितोमन्त्रइतिहिलक्षणं

---

१ ऋ. सं. ६. २. १९ । २ ऋ. सं. ८. १७ । ३ ऋ. सं. ८. ४. १९ । ४ ऋ. सं. ९.४.८ । ५ ऋ. सं. ९. ७. ८ । ६ ओचित्सखायमित्यादिचतुर्दशर्चंसूक्तंयम-यमीसंवादरूपम् । ऋ. सं. ७.६.६ । ७ तै. आरण्यकेद्वितीयाध्याये । ८ तै. ब्रा. २.२.९ । ९ योस्यकौष्ठ्यजगतःपार्थिवस्यैकइद्वशीइत्याद्यायमगाथाः अरण्यकाण्डेपितृमेधप्रपाठकेसमाम्नाताः । १० इदंजनाउपश्रुतइत्यादयस्तिस्रः कुंतापेउक्ताः । ११ तै. ब्रा. १. २. १ ।

वक्तव्यम् । तच्चसंकीर्णम् । देवोवैःसवितोत्पुनात्वच्छिद्रेणपवित्रेणवसोःसूर्यस्यरश्मिभिरित्ययंमन्त्रोयजुर्वेदेसम्प्रतिपन्नयजुषांमध्येपठितः । नचतस्ययजुष्ट्वमस्ति । तद्ब्राह्मणेसावित्र्यर्चेत्यृक्त्वेनव्यवहृतत्वात् । एतत्सामगायन्नास्तइतिप्रतिज्ञायकिञ्चित्सामयजुर्वेदेगीतम् अक्षितमस्यच्युतमसिप्राणसंशितमसीतित्रीणियजूंषिसामवेदेसमाम्नातानि यथागीयमानस्यसाम्नआश्रयभूताऋचः सामवेदेसमाम्नाताः । तस्मान्नास्तिलक्षणमितिचेन्न ! पादादीनामसंकीर्णलक्षणत्वात् पादेनार्धर्चेनचोपेतावृत्तबद्धामन्त्राऋचः गीतिरूपामन्त्राःसामानि वृत्तगीतिवर्जितत्वेनप्रश्लिष्टपठितामन्त्रायजूंषीत्युक्ते न क्वापिसंकरः । तदेतद्विविधंजैमिनिनासूत्रत्रयेणलक्षितम्—तेषामृग्यत्रार्थवशेनपादव्यवस्था गीतिषुसामाख्या शेषेयजुःशब्दइति । एतमेवमन्त्रावान्तरविशेषमुपजीव्यवेदानामृग्वेदोयजुर्वेदःसामवेदइतित्रैविध्यंसम्पन्नम् । तेषांचवेदानांसर्वेषामन्यतमस्यवास्वप्रज्ञानुसारेणाध्ययनमुपनीतेनकर्तव्यम् । तथाचयाज्ञवल्क्यःस्मरति—वेदानधीत्यवेदौवावेदंवापियथाक्रममिति । एकवेदपक्षे पितृपितामहादिपरंपराप्राप्तएववेदोध्येतव्यइत्यभिप्रेत्यस्वाध्यायोध्येतव्यइतिस्वशब्दआम्नातः । तच्चाध्ययनंनकाम्यं किन्तु नित्यम् । अतएवपुरुषार्थानुशासनेसूत्रितम्—वेदस्याध्ययनंनित्यमनध्ययनेपातत्वादिति । पातित्यंचैवमाम्नायते—अपहतपाप्मास्वाध्यायोदेवपवित्रंवाएतत्तंयोऽनुत्सृजत्यभागोवाचिभवत्यभागोनाके । तदेषाभ्युक्ता—यस्तित्याजसचिविदंसखायंनतस्यवाच्यपिभागोअस्ति । यदींशृणोत्यलकंशृणोतिनहिप्रवेदसुकृतस्यपन्थामिति । तस्मात्स्वाध्यायोध्येतव्यइति अध्येतारंपुरुषंतदीयप्रयासाभिज्ञानेनसखिवत्पालयतीतिसचिविद्वेदः । बहुद्रव्यप्रयाससाध्यक्रतुफलस्याध्ययनमात्रेणसम्पादनंतत्पालनम् । तदप्याम्नायते यंयंक्रतुमधीतेतेनतेनहास्यक्रतुनेष्टंभवत्यग्नेर्वायोरादित्यस्यसायुज्यंगच्छतीति । यद्यप्येतद्ब्रह्मयज्ञस्वाध्यायफलम् । तथापिग्रहणार्थाध्ययनमन्तरेण ब्रह्मयज्ञासंभवात् तदीयफलमपिसम्भवते ईदृशंसखिविदंवेदरूपंसखायंयःपुमानध्ययनमकृत्वा परित्यजति तस्यवाच्यपिभाग्यंनास्ति फलेभाग्यंनास्तीतिकिमुवक्तव्यम् सकलदेवतानां धर्मस्यपरब्रह्मतत्त्वस्यचप्रतिपादकंवेदमनुच्चार्यपरनिन्दानृतकलहहेतुंलौकिकींवार्तांसर्वत्रोच्चारयतः स्पष्टएववाचिभाग्याभावः । अतएवाम्नायते—नानुध्यायाद्बहूञ्छब्दान्वाचोविग्लापनंहितदिति । यद्यप्यसौकाव्यंनाटकंशृणोति । तथापिनिरर्थकमेवतच्छ्रवणम् । तेनसुकृतमार्गज्ञानाभावादित्यर्थः । स्मृतिरपि—योऽनधीत्यद्विजोवेदानन्यत्रकुरुतेश्रमम् । सजीवन्नेवशूद्रत्वमाशुगच्छति सान्वयइति ।

---

१ तै. सं. १. १. ५ । २ तै. आ. सप्तमाध्याये । ३ याज्ञवल्क्यःस्मरतीत्युक्तेपिसंप्रतीदंवचनंमनुस्मृतावेवोपलभ्यते (म. स्मृ. अ. ३ श्लो. २) नयाज्ञवल्क्यस्मृतौ । ४ तै. आ. द्वितीयाध्याये । ५ ऋ.सं.८.२.२४ । ६ तै. आ. द्वितीयाध्याये । ७ मनुस्मृतौ द्वितीयाध्याये श्लो.१६८ ।

एवमन्यान्यपिबहूनिवचनान्यत्रोदाहर्तव्यानि । नन्वधीतेवेदेपश्चादध्ययनविध्यर्थज्ञानं ज्ञानेसतिपश्चाद-
ध्ययनप्रवृत्तिरित्यन्योन्याश्रयइतिचेत् । बाढम् । अतएवगुरुमतानुसारिणआचार्यकर्तृकाध्यापनेनप्रवृ-
त्त्ययनप्रवृत्तिरित्यन्योन्याश्रयइतिचेत् । बाढम् । अतएवगुरुमतानुसारिणआचार्यकर्तृकाध्यापनेनप्रवृ-
त्तियुक्तिमाणवकाध्ययनस्यमहताप्रयासेनसम्पादयन्ति । मतान्तरानुसारिणस्तुप्रकाशात्मादयोध्ययना-
त्प्रागेवसन्ध्यावन्दनादिविधिज्ञानवत्पित्रादिभ्योध्ययनविधिज्ञानंवर्णयन्ति । यद्यप्यध्यापनविधिप्रयुक्तिः
क्वचिदास्वविधिप्रयुक्तिःसर्वथाप्युपनीतैरध्येतव्यएववेदः । तस्य चाध्ययनस्यादृष्टार्थत्वमक्षरग्रहणान्तत्वं-
चपुरुषार्थानुशासनेसूत्रितम्—तानिसूत्राणितद्वृत्तिंचोदाहरामः । अध्ययनस्यादृष्टार्थत्वंसाधयितुंपूर्वपक्ष-
यति—अदृष्टार्थोत्वधीतिविहितत्वादिति १ । दृष्टफलसाधनेभोजनादौविध्यदर्शनाद्विहितमध्ययनमदृष्टा-
र्थमवगन्तव्यम् । अदृष्टविशेषोनश्रुतइतिचेत्तत्राह—घृतकुल्याद्यतिदेशःस्वर्गकल्पनंवेति २ । ब्रह्मयज्ञ-
रूपाध्ययनार्थवादंनित्याध्ययनेतिदिश्यतत्रत्यंघृतकुल्यादिकंरात्रिसत्रन्यायेनफलत्वेनकल्पनीयम् । येत्व-
र्थवादातिदेशंनेच्छन्ति तैर्विश्वजिन्न्यायेनस्वर्गःकल्पनीयः । दृष्टफलयोःसंस्कारप्राप्त्योः सम्भवेकथ-
मदृष्टकल्पनेत्यतआह—अयुक्तेसंस्कारप्राप्तीइति ३ । संस्कृतस्वाध्यायस्यक्वचित्क्रतौविनियोगादर्शना-
त्प्राप्तेःस्वयमपुरुषार्थत्वाच्चेत्यर्थः । स्वाध्यायप्राप्तिरर्थप्रमितिहेतुतयापुरुषार्थइत्याशङ्क्याविधिनिर्देशादि-
कार्यविनियुक्तमप्यवदध्ययनाङ्गतयाविनियुक्तानांज्योतिष्टोमादिवाक्यानांनस्वार्थेप्रामाण्यमित्याह—अ-
भ्यासं नार्थप्रमापकमिति ४ । अध्ययनविधायकंतुवाक्यंस्वविहिताध्ययनस्यैवाङ्गमितिकृत्वास्वार्थेप्र-
माणमित्याह—अध्ययनवाक्यमनन्याङ्गमिति ५ । नन्वेवमदृष्टार्थत्वेकर्मकारकभूतस्वाध्यायगतफलाभा-
वाद् अध्येतव्यइतिकर्मवाचीतव्यप्रत्ययोविरुध्यतेइत्यतआह-सक्तुवत्करणपरिणामइति ६। सक्तूञ्जुहो-
तीत्यत्रकर्मत्वेनप्रधानभूतान्सक्तूनुद्दिश्यहोमसंस्कारविधानेप्रतीयमानेऽपिहोमसंस्कृतानांभस्मीभूताना-
सक्तूनामन्यत्रविनियोगाभावात् कर्मप्राधान्यंहित्वासक्तुभिर्जुहोतीतिकरणपरिणामःकृतःएवमत्रापि-
कर्मगतयोःसंस्कारप्राप्त्योरसंभवात् स्वाध्यायेनाधीयीतेतिवाक्यपरिणामःकर्तव्यः । इदानींदृष्टफलेस-
त्यदृष्टफलंनकल्प्यमितिसिद्धान्तयति—दृष्टेतुनादृष्टमिति ७। किंतद्दृष्टंफलमितितदाह—दृष्टौप्राप्तिसंस्कारा-
विति ८। अक्षरप्राप्तेःपरंपरयापुरुषार्थत्वमाह प्राप्त्यार्थबोधइति ९ । जायतइतिशेषः।नचभोजनादिवदन्व-
यव्यतिरेकसिद्धत्वाद्विधिवैयर्थ्यमितिशङ्कनीयम् । अवघातादिवन्नियमादृष्टायाविध्युपपत्तेरित्याह—विधि-

१ यत्रविधिवाक्येफलंनश्रूयतेतत्रार्थवादवाक्योक्तंफलमतिदिश्यतेइत्यर्थवादातिदेशः । अयमेवरात्रि-
सत्रन्यायस्यविषयः । २ यत्रार्थवादवाक्येपिफलंनश्रूयतेतत्रस्वर्गःकल्प्यते यथाविश्वजिति (तत्रहि-
विधिवाक्येऽर्थवादवाक्येवाफलंनश्रूयते तस्मात्तत्रप्रकृतावुक्तंसाधारणंस्वर्गफलंकल्प्यते) । अयमेवविश्व-
जिन्न्यायः ।

निष्पत्त्याइति १०। यत्तूक्तंसंस्कृतत्वस्यस्वाध्यायस्यविनियोगादर्शनात् नसंस्कारइति तत्राह-संस्कारसिद्धिः क्रत्वध्ययनविधिद्वयोपादानादिति ११। क्रतुविधयोविधयावबोधमपेक्षमाणास्तदवबोधेस्वाध्यायं विनियुञ्जते। अध्ययनविधिश्चलिखितपाठादिव्यावृत्त्याध्ययनसंस्कृतत्वंस्वाध्यायस्यगमयति। अतउभयोपादानात्तत्सिद्धिः। ननुसंस्कारोनामादृष्टातिशयः सचनस्वाध्यायगतः तव्यप्रत्ययेनस्वपदोपात्तप्रकृत्यर्थभूताध्ययनोपरक्तायाभावनायाअपूर्वोविधानात्। ततः कथंस्वाध्यायस्यसंस्कृतत्वमितितत्राह—तव्यःकर्मगादृष्टवाचीति १२। अत्रतव्यप्रत्ययस्यकर्माभिधायितयाकर्मकारकस्यस्वाध्यायस्यतव्यप्रत्ययंप्रतिप्रकृत्यर्थादध्ययनादपिप्रत्यासन्नत्वात् स्वाध्यायगतमेवापूर्वंतव्यप्रत्ययोवक्ति अपूर्वस्यधात्वर्थमन्यत्वनियमेऽपितदुपरक्तत्वानियमादिति भावः। यच्चोक्तमन्याङ्गंनार्थप्रमापकमित्यदृष्टान्तरं-तदसत्। यतोमन्त्राणांस्वतन्त्राऽदृष्टशेषाणांतथात्वंयुज्यते इहतुस्वाध्यायाश्रितमदृष्टं तस्यचस्वाध्यायगताक्षरसामर्थ्येसिद्धार्थावबोधेफलेसतिफलान्तरकल्पनायोगात् प्रामाण्यस्योपबृंहकमेवादृष्टं नतुप्रतिबन्धकमित्याह—स्वतन्त्रादृष्टाशेषत्वान्नस्यार्थप्रमाप्रतिबध्यतइति १३। सक्तुन्यायेनकर्मकारकप्राधान्येपरित्यक्तेस्वतन्त्रादृष्टमेवात्रापिस्यादित्यत आह—यथाश्रुतोपपत्तेर्नसक्तुन्यायइति १४। सक्तुषुगत्यभावात् श्रुतं परित्यज्याश्रुतंकल्प्यतांनाम नेहतद्युक्तंप्रदर्शितत्वादित्यर्थः। इत्थमध्ययनविधेर्दृष्टार्थत्वंप्रसाध्यार्थावबोधपर्यन्ततांनिराकर्तुंपूर्वपक्षयति—वैधधर्मनिर्णयंभट्टगुरूविधेःपुमर्थावसानादिति १। सर्वत्रविधेःपुरुषार्थपर्यवसायित्वनियमादत्रापिपुरुषार्थभूतंफलवदर्थनिश्चयमध्ययनविधिप्रयुक्तं भट्टगुरूमन्येते। ननुसकृदध्ययनादावृत्तिसहिताद्वार्थनिश्चयोनोपलभ्यतइत्याशङ्क्य तथासतितत्सिद्धयेसोऽध्ययनविधिरर्थनिश्चयहेतुंविचारंकल्पयिष्यतीत्याह—सविचारमाक्षिपेदिति २। ननुस्वविधेयतदुपकारिणोरेवविधिः प्रयोजकइतिसर्वत्रनियमः तथासत्येतादृशीकथमत्राध्ययनविधिराक्षेप्स्यतीत्यत आह—अविधेयानुपकार्याक्षेपोवघातावृत्तिवदिति ३। व्रीहीनवहन्तीत्यत्रावघातमात्रंविधेयंनतुतदावृत्तिः तस्याअधात्वर्थत्वात् नापिसाविधेयोपकारिणी अन्तरेणावृत्तिंसकृन्मुसलघातमात्रादवघातसिद्धेः। तथापितण्डुलनिष्पत्तिफलसिद्धयेसाविधिराक्षिपत्यावृत्तिंयद्वदाचिक्षेप तद्वत्प्रकृतेप्यवगन्तव्यम्। ननुवेदमात्राध्यायिनोऽर्थावबोधानुदयेऽपिव्याकरणाद्यङ्गसहितवेदाध्यायिनस्तदुदयसद्भावात्तंप्रतिव्यर्थंविचारंविधिर्नकल्पयेदित्याशङ्क्यार्थगतविरोधपरिहारायापेक्षितएवविचारइत्याह—साङ्गाध्ययनात्तद्भावेविचारोऽर्थेविरोधापनुदिति ४। [illegible]—प्राप्तेःस्तुणवादिवत्पुमर्थत्वाद्विधिस्तदन्तइति ५। यथाफलभूतस्यक्षीरादेर्हेतवोगवादयोऽपिपुरुषैरर्थ्यन्ते तथा-

---

१ भट्टः कुमारिलभट्टपादः। गुरुः प्रभाकरगुरुः।

फलवदर्थावबोधहेतोरक्षरप्राप्तेरपिपुरुषार्थत्वाद् अध्ययनविधिरक्षरप्राप्त्यवसानोभवत्वत्र: । नन्वक्षर-
प्राप्ते:पुरुषार्थत्वंफलवदर्थावबोधप्रयुक्तंचेत्तर्हितद्बोधस्यमुख्यपुरुषार्थत्वात् बोधान्तएवविधि:किंनस्यादि-
त्यतआह—फलवद्बोधान्तत्वेअध्ययनाकात्स्न्र्यंविति ६ । बोधस्यहिफलंकर्मानुष्ठानं तथासतियस्या-
ब्राह्मणादेर्यस्मिन्बृहस्पतिसवादावधिकारस्तस्यतद्वाक्यमात्राध्ययनंस्यात् नतुराजसूयादिवाक्याध्ययनं
तत्रप्रवृत्त्यादिफलाभावात् । स्वपक्षेतुनायंदोषइत्याह—कृत्स्नप्राप्तिर्गपार्थेति ७ । नचावोधकत्वेऽर्थावबो-
धएवनसिध्येदितिशङ्कनीयम् प्रमाणस्यप्रमेयबोधकत्वस्वाभाव्यात् लौकिकाप्तवाक्यानामन्तरेणैवविधिं-
बोधकत्वदर्शनादित्याह—लोकवन्नैजोबोधइति ८ । ननुबोधस्यविधिफलत्वेबोधकाममुद्दिश्यविधातुंश-
क्यत्वात् सुलभोधिकारीस्यादित्याशङ्क्यप्राप्तिपक्षेऽपि प्राप्तिकामउपनीताष्टवर्षब्राह्मणोऽधिकारीसुल-
भएवेतिपरिहारंस्पष्टत्वादुपेक्ष्यबोधस्यकाम्यत्वंदूषयति—सोऽकाम्य: प्राग्बोध्यमानाभानयोरिति ९ ।
बोध्यस्याग्निहोत्रादिलक्षणवेदार्थस्याध्ययनात्प्राक्सन्ध्योपासनादिवत्पित्राद्युपदेशतएवमानेसिद्धत्वादे-
वसोऽर्थबोधोनकाम्य: अमानेकामयितुमशक्य: ज्ञातएवविषयेकामनानियमात् । ननु सामान्यतोज्ञाते-
विशेषतोबुभुत्सासंभवति यद्वा विशेषतोऽपि पित्राद्युपदेशादवगतेसत्यौपदेशिकज्ञानस्यप्रामाण्यनिर्ण-
यायपुनर्बोधकामनायुक्तैवेत्याशङ्क्यैवमप्यर्थावबोधमुद्दिश्याध्ययनविधानंनसम्भवतीत्याह—उद्देशायोगा-
दिति १० । अग्निहोत्रादिविशेषज्ञानानांनतावदेकबुद्ध्याविशेषाकारेणोद्देश:संभवति अनन्तत्वात्सा-
मान्याकारेणोद्देशेसामान्यमेवविधिफलंस्यान्नतुज्ञानविशेष: ततोनोद्देशोयुक्त: । नन्वर्थावबोधमुद्दिश्यो-
च्चारणाभावेवेदस्यस्वार्थेतात्पर्यंनस्यादित्याशङ्क्य उपक्रमादिलिङ्गगम्यंतात्पर्यंशब्दबलादेवसिद्ध्यती-
त्याह—तात्पर्यंशब्दादिति ११ । तर्ह्यर्थज्ञानमुद्दिश्यशब्दोच्चारणंलोकेव्यर्थंस्यादितिचेन्न । पुरुषसम्बन्ध-
कृतदोषाख्यप्रतिबन्धपरिहारार्थत्वादित्याह—उद्दिश्योच्चारणंदोषघ्नंलोकइति १२ । नन्वध्ययनविधेर्बो-
धान्तत्वाभावेविचारशास्त्रंनप्रवर्तेत प्रयोजकाभावादित्याशङ्क्याह—विचारउत्तरविधिप्रयुक्तउपपद्यत-
इति १३ । क्रतुबोधविषय: साङ्गवेदाध्ययनादापातत:प्रतिपन्ना: विरोधपरिहारेणप्रतिष्ठितंनिर्णयज्ञान-
मन्तरेणानुष्ठापयितुमशक्नुवन्तस्तन्निर्णयायक्रतुविचारंप्रयोजयन्ति । श्रवणविधिस्तुसाक्षादेवब्रह्मविचारं-
विधत्ते । एवंचसतिश्रवणविधे: स्वविधेयप्रयोजकत्वंक्रतुविधीनांचविधेयोपकारिप्रयोजकत्वमित्युपपद्यते-
तराम् । अध्ययनविधिप्रयुक्तिपक्षेतु तद्विधे:क्रतुद्वारास्वर्गसिद्धिपर्यन्तत्वात् क्रत्वनुष्ठानस्यापितत्प्र-
युक्तौक्रतुविधिवैयर्थ्यमापद्येत । नन्वध्ययनविधेस्त्रैवर्णिकमात्रंप्रतिनित्यत्वात्तत्प्रयुक्तौविचारस्यापितद्ल-
भ्येतनान्यथेतिचेत्—क्रतुविचारस्यत्रैवर्णिकमात्रेऽपिनित्यत्वसिद्धे:. किंवाब्रह्मविचारस्य तत्रा-

घोऽस्यन्मतेऽपिसमइत्याह—अतोनित्यःक्रतुविचारस्त्रैवर्णिकमात्रस्येति १४ यतोऽकरणेमत्य-वायश्रवणात् क्रतवस्त्रैवर्णिकानांनित्याअतइत्यर्थः । द्वितीयोऽनिष्टइत्याह—ब्रह्मविचारःपुनः परमहंसस्यैवेति १५ नित्योनुषज्जइति ननूकरीत्याध्ययनस्याक्षरग्रहणान्तत्वेऽर्थ-ज्ञानमविहितंस्यात् मैवम् वाक्यान्तरेणतद्विधानात् ब्राह्मणेननिष्कारणोधर्मःषडङ्गो-वेदोध्येयोज्ञेयश्चेतितद्विधिः तत्रनिष्कारणशब्देनाध्ययनज्ञानयोःकाम्यत्वंनिवार्यते अर्थज्ञाने पुरुषप्रवृत्तिकरंवचनद्वयंशाखान्तरगतंनिरुक्तकारोयास्कएवमुदाजहार—अथापिज्ञानप्रशंसाभव-त्यज्ञाननिन्दाच स्थाणुरयंभारहारःकिलाभूदधीत्यवेदंनविजानातियोर्थम् । योऽर्थज्ञइत्सक-लंभद्रमश्नुतेनाकमेतिज्ञानविधूतपाप्मा । यद्गृहीतमविज्ञातंनिगदेनैवशब्द्यते । अनग्नाविव शुष्कैधोनतज्ज्वलतिकर्हिचिदिति । अस्मिन्मन्त्रद्वयेयोऽर्थज्ञइत्यनेनैवार्धेनवेदार्थज्ञानंप्रश-स्यते इतरेणार्धत्रयेणज्ञानराहित्यंनिन्द्यते योवेदार्थंजानातिसोऽयमिहलोकेसकलंश्रेयःप्राप्नो-ति तथावेनज्ञानेनपापक्षयेसतिमृतःस्वर्गंप्राप्नोति तदेतदैहिकमामुष्मिकंचज्ञानफलंतैत्तिरीयाम-न्त्रोदाहरणेनतदीयतात्पर्याभिधायिब्राह्मणेनचस्पष्टीचक्रुः—तदेषाभ्युक्ता येअर्वाङुतवापुराणेवे-दंविद्वांसमभितोवदन्त्यादित्यमेवतेपरिवदन्तिसर्वेअग्निंद्वितीयंतृतीयंचहंसमिति । यावतीर्वै-देवतास्ताःसर्वावेदविदिब्राह्मणेवसन्तितस्माद्ब्राह्मणेभ्योवेदविद्भ्योदिवेदिवेनमस्कुर्यान्नाश्लीलंकी-र्तयेदेताएवदेवताःप्रीणातीति । वेदंविद्वानर्थाभिज्ञःपुरुषः सचद्विविधः अर्वाचीनकालेसमुत्प-न्नश्चतुर्दशविद्यास्थानकुशलःकश्चिदुपाध्यायः पुरातनकालेसमुत्पन्नोव्यासादिश्च तमेतमुभय-विधंविद्वांसंविद्यामदधनमदकुलमदोपेताःपण्डितंमन्यायेपुरुषाअभितोविद्यादिषुदूषयन्ति तेसर्वे-प्यादित्यमेवप्रथमंदूषयन्ति आदित्यापेक्षयाद्वितीयमग्निंदूषयन्ति तदुभयापेक्षयातृतीयंहंसंदूष-यन्ति हन्तिसदागच्छतीतिहंसोवायुः अग्न्यादिरूपत्वंचवेदविदआम्नातम्—अग्नेर्वायोरादित्यस्य सायुज्यंगच्छतीति । नकेवलमेतद्देवतात्रयं किन्तु सर्वाअपिदेवतावेदविदिवसन्ति ब्राह्मणान्वेद-विदोदृष्ट्वास्तुत्वावाप्रतिदिनंनमस्कुर्यात् नतुतस्मिन्विद्यमानमपिदोषंकीर्तयेत् एवंसतितत्रप्रत्यार्थ-भूताःसर्वाअपिदेवतावेदार्थविदास्मर्यमाणतयातदीयहृदयेवस्थिताअयंनमस्कर्तातोषयति नचै-तदध्ययनस्यैवफलमितिशङ्कनीयम् विद्वांसमित्याम्नातत्वात् अन्यथावेदमधीयानमित्याम्नायेत । तस्मात्सर्वदेवतावुद्ध्याप्राणिभिःपूज्यस्यवेदार्थविदोलोकद्वयेऽपिश्रेयःप्राप्तिरुपपद्यते यस्तुवेदमधी-त्यार्थंनविजानातिसोऽयंपुमान्भारमेवहरतिधारयति स्थाणुरितिदृष्टान्तः छिन्नशाखंशुष्कंवृ-क्षमूलंस्थाणुशब्देनोच्यते सचयथेन्धनार्थमेवोपयुज्यते नतुपुष्पफलार्थम् तथाकेवलपाठक-

१ नि० १. १८. । २ तै० आ० द्वितीयाध्याये. । ३ तै० आ० द्वितीयाध्याये. ।

स्यमात्यत्वंनभवतीत्येतावदेव नत्वनुष्ठानंस्वर्गादिफलसिद्धिर्वास्ति किलेत्यनेनलोकप्रसिद्धिर्द्यो-
त्यते लोकेपिपाठकस्ययावतीधनादिपूजाततोऽप्यधिकाविदुषिदृश्यते किञ्च यद्वेदवाक्यमाचार्या-
द्गृहीतमर्थज्ञानरहितंपाठरूपेणैवपुनःपुनरुच्चार्यते तत्कदाचिदपिनज्वलतिस्वार्थंनप्रकाशयति य-
थाग्निरहितप्रदेशेप्रक्षिप्तंशुष्ककाष्ठंनज्वलतितद्वत् तथासति तस्यवाक्यस्यवेदत्वमेवमुख्यंनस्यात्
अलौकिकपुरुषार्थोपायंवेत्त्यनेनेतिवेदशब्दनिर्वचनम्। तथाचोक्तम्—प्रत्यक्षेणानुमित्यावायस्तूपा-
योनबुध्यते। एनंविदन्तिवेदेनतस्माद्वेदस्यवेदतेति १ अतोमुख्यवेदत्वसिद्धयेज्ञातव्यएवतदर्थः।
किञ्चात्रयास्केनकाचिदन्याप्यृगुदाहृता—उतत्वःपश्यन्नददर्शवाचमुतत्वःशृण्वन्नशृणोत्येनाम्।
उतोत्वस्मैतन्वंविसस्रेजायेवपत्यउशतीसुवासाइति। तत्रपूर्वार्धस्यतात्पर्यंसएवदर्शयति—अप्येकः
पश्यन्नपश्यतिवाचमपिचशृण्वन्नशृणोत्येनामित्यविद्वांसमाहार्धमिति। अस्यायमर्थः—यःपुमान-
र्थंनवेत्तितंप्रतिपूर्वार्धेनमन्त्रोब्रूते एकःपुरुषःपाठमात्रपर्यवसितोवेदरूपांवाचंपश्यन्नपिनसम्यक्पश्य-
ति एकवचनबहुवचनादिविवेकाभावेपाठशुद्धेरपिकर्तुमशक्यत्वात् वायुमेवस्वेनभागधेयेनोप-
धावतिसएवैनंभूतिंगमयति। आदित्यानेवस्वेनभागधेयेनोपधावति तएवैनंभूतिंगमयन्तीत्यादाव-
व्युत्पन्नःकथंपाठंनिश्चिनुयात् अन्यःकश्चिदर्थज्ञानायव्याकरणाद्यङ्गानिशृण्वन्नपिमीमांसाराहि-
त्यादेनांवेदरूपांवाचंनसम्यक्शृणोति यावतोश्वान्प्रतिगृह्णीयात्तावतोवारुणांश्चतुष्कपालान्निर्व-
पेदिति। अत्रव्याकरणमात्रेणप्रतिग्रहीतुरिष्टिःप्रतीयते मीमांसायांतुन्यायेनदातुरितिनिर्णीतम्।
तस्मादुभयविधमप्यविद्वांसंप्रत्येवमाहेति। तृतीयंपादतात्पर्यंदर्शयति—अप्येकस्मैतन्वंविसस्रइ-
तिस्वमात्मानंविवृणुतेज्ञानंप्रकाशनमर्थस्याहानयावाचाइति। अस्यायमर्थः—अपिशब्दपर्या-
यउतोशब्दः सचपूर्वोक्तानभिज्ञवैलक्षण्यायात्रप्रयुक्तः निपातानामनेकार्थत्वात् यःपुमान्व्याक-
रणाद्यङ्गैःस्वशब्दार्थमीमांसयातात्पर्यंचशोधयितुंप्रवृत्तस्तस्माएकस्मैवेदःस्वकीयांतनुंविसस्रेस्व-
मित्यादिकंपदव्याख्यानंज्ञानमित्यादिकंतात्पर्यव्याख्यानम् वेदार्थप्रकाशनक्षमंसम्यग्ज्ञान-
मनयातृतीयपादरूपयावाचामन्त्रआहेति। चतुर्थंपादतात्पर्यंदर्शयति—उपमोत्तमयावाचा-
जायेवपत्येकामयमानासुवासाऋतुकालेषुसुवासाःकल्याणवासाःकामयमानाऋतुकालेषुयथास-
एनांपश्यतिसशृणोतीत्यर्थज्ञप्रशंसेति। अस्यायमर्थः—उत्तमयाचतुर्थपादरूपयावाचातृतीयपा-
दार्थस्योपमोच्यते उशतीत्येतस्यव्याख्यानंकामयमानेति यद्यप्यन्हिगृहकृत्यवेलायांमलिनवासा-
स्तथापिसंभोगकालेषुकल्याणवासाभवति तत्रहेतुः कामयमानाऋतुकालेष्विति यथासपतिरे-
नांजायांसाकल्येनादरयुक्तःपश्यति किञ्च तयोक्तमर्थंहितबुद्ध्याशृणोति तथाऽयंचतुर्दशविद्या-

१ ऋ. सं. ८. २. २३। २ नि० १. १९। ३ तै. सं. २. १. १। ४ तै० सं. २. ३ १.। ५ तै. सं. २. ३. १२। ६ नि० १. १९। ७ नि० १. १९।

स्थानपरिशीलनोपेतः पुरुषो वेदार्थरहस्यं सम्यक्पश्यति वेदोक्तं च धर्मं ब्रह्मरूपमर्थं हितबुद्ध्या स्वीकरोति, सेयमुक्ता वेदार्थाभिज्ञस्य प्रशंसेति पुनरप्यृगन्तरं यास्क उदाजहार—तस्योत्तरा भूयसे निर्वचनाय—उत त्वं सख्ये स्थिरपीतमाहुर्नैनं हिन्वन्त्यपि वाजिनेषु । अधेन्वा चरति माययैष वाचं शुश्रुवाँ अफलामपुष्पामिति । अयमर्थः पूर्वोदाहृताया उत त्वः पश्यन्नित्यादिकाया ऋचोऽनन्तरमेषाम्नाता काचिदृक्तस्य पूर्वोक्तमन्त्रस्यार्थस्य भूयसे निर्वचनाय सम्पद्यते तमर्थमतिशयेन प्रतिपादयितुं प्रभवति कथमिति चेत्तदुच्यते—अपि चैकं चतुर्दशविद्यास्थानकुशलं पुरुषं वेदरूपाया वाचः सख्ये स्थित्वा स्थैर्येण वेदोक्तार्थामृतपानयुक्तमाहुः अभिज्ञाः कथयन्ति सखिविदं सखायमिति मन्त्रे वेदस्य सखित्वमुदाहृतम्. यद्वा स्वर्गलोके वेदानां सख्ये स्थित्वा अतिशयेन पीतामृतमाहुः वाचामिना ईश्वराः सभासु प्रगल्भावावाजिनाः तेषु मध्ये प्येनं वेदार्थकुशलं चोदयितुं न हिन्वन्ति न केऽपि प्राप्नुवन्ति तेन सह विवदितुमसमर्थत्वात् यस्त्वन्यः पाठमात्रपरः पुष्पफलरहितां वाचं शुश्रुवान्भवति पूर्वकाण्डोक्तस्य धर्मस्य ज्ञानं पुष्पम् उत्तरकाण्डोक्तस्य ब्रह्मणो ज्ञानं फलम्. यथा लोके पुष्पं फलस्योत्पादकं तथा वेदानुवचनादिधर्मज्ञानमनुष्ठानद्वारा फलात्मकब्रह्मज्ञानेच्छां जनयति तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेनेति श्रुतेः । यथा च फलं तृप्तिहेतुस्तथा ब्रह्मज्ञानं कृतकृत्यत्वहेतुः यत्पूर्णानन्दैकबोधः तद्ब्रह्माहमस्मीति कृतकृत्यो भवतीति श्रुतेः । तादृशपुष्पफलरहितवेदपाठकः स एष पुमान धेन्वा मायया सह चरति नवप्रसूतिका क्षीरस्य दोग्ध्री गौः प्रीतिहेतुत्वाद्धिनोतीति व्युत्पत्त्या धेनुरित्युच्यते पाठमात्रपरं प्रति वेदरूपा वाक् धर्मब्रह्मज्ञानरूपं क्षीरं न दोग्धीत्यधेनुः अत एवासौ मायाकपटरूपा ऐन्द्रजालिकनिर्मितगोसदृशगोरूपत्वात् तया माययासह चरन्नयं परमपुरुषार्थं न लभत इत्यर्थः । इत्थं यास्केन ज्ञानस्तुत्यज्ञाननिन्दोदाहरणस्य प्रपञ्चितत्वात् यच्चस्तूयते तद्विधीयत इति न्यायेनाध्ययनवदर्थज्ञानस्यापि विधिरभ्युपगन्तव्यः । किञ्च नक्षत्रेष्टिकाण्डे प्रतीष्टिफलवाक्यं यागवद्वेदनयोः समानमेवाम्नायते—यथा ह वा अग्निर्देवानामन्नादः एवं ह वा एष मनुष्याणां भवति य एतेन हविषा यजते य उचैनदेवं वेदेति । अतो यागवत्फलाय स्ववेदनमपि विधीयते अनेनन्यायेन सर्वेष्वपि ब्राह्मणेषु वेदनविधयो द्रष्टव्याः । ननु विद्याप्रशंसेति सूत्रे वेदनफलानां प्रशंसारूपत्वं जैमिनिना सूत्रितमिति चेत् अस्तु नाम विद्यमानेनापि फलेन प्रशंसितुं शक्यत्वात् दर्शयागस्य पूर्णमासयागस्य चातिपाते सति प्रायश्चित्तरूपं वैश्वानरेष्टिं विधातुं विद्यमानेनैव स्वर्गफलेन स्तुतिः क्रियते—सुवर्गाय हि लोकाय दर्शपूर्णमासाविज्येते इति । एतच्चाचार्यैर्ब्रह्मज्ञानफलवाक्यस्य स्वार्थेऽपि तात्पर्यं दर्शयितुमुदाहृतम्—इच्छाम्येवार्थवादत्वं वचसोऽन्यपरत्वतः । य-

१ ऋ० सं. ८. २. २३. । २ ऋ. सं. ८. २. २४. । ३ तै० ब्रा० ३. १. ४. ।
४ तै. सं. २. २. ५. ।

थवस्त्वभिधायित्वाच्चत्वभूतार्थवादता १ इज्येतेस्वर्गंलोकायदर्शौदर्शौयथातथा । नत्वभूतार्थ-
प्रदत्वंपापश्लोकश्रुतिर्यथेति २ नचवेदनमात्रेणफलसिद्धावनुष्ठानवैयर्थ्यमितिशङ्कनीयम् फ-
लभूयस्त्वेनपरिहृतत्वात् उदाहृतंचात्रजैमिनिसूत्रम्—फलस्यकर्मनिष्पत्तेस्तेषांलोकवत्परिमाणतः
सारतोवाफलविशेषःस्यादिति एतच्चास्माभिः तरतिब्रह्महत्यांयोऽश्वमेधेनयजते यउचैनमेवंवेदे-
त्युदाहरणेनव्याख्यातम् । छन्दोगाश्चकेवलादनुष्ठानाद्विद्यासहितेनुष्ठानेफलातिशयमामनन्ति-ते-
नोभौकुरुतोयश्चैतदेवंवेदयश्चनवेदनानातुविद्याचाविद्याचयदेवविद्ययाकरोतिश्रद्धयोपनिषदात-
देववीर्यवत्तरंभवतीति । यद्यप्यङ्गावबद्धोपास्तिरत्रविद्याशब्देनविवक्षिता तथापिन्यायःसर्वास्व-
पिविद्यासुसमानः । कुतस्तवैतावतीवेदनेभक्तिरितिचेत् कुतोवातवैषोऽत्रप्रद्वेषः । प्रशंसात्वस्माभि-
र्भूयसीदर्शिता निन्दांतुनकाप्युपलभामहे किन्तुकर्मजन्यमपूर्वंयथामरणादूर्ध्वंजीवेनसहगच्छति
तथाविद्याजन्यमप्यपूर्वंगच्छति तथाचवाजसनेयिनआमनन्ति—तंविद्याकर्मणीसमन्वारभेतेपूर्व-
प्रज्ञाचेति तस्मादध्ययनवदर्थज्ञानस्यापिविहितत्वात् अर्थज्ञानायवेदोव्याख्यातव्यः विषय-
प्रयोजनसम्बन्धाधिकारिज्ञानमन्तरेणश्रोतृप्रवृत्त्यभावात् विषयादयोनिरूप्यन्ते—व्याख्यान-
स्यव्याख्येयोवेदोविषयः तदर्थज्ञानंप्रयोजनम् व्याख्यानव्याख्येयभावःसम्बन्धः ज्ञानार्थी
चाधिकारी । यद्यप्येतावत्प्रसिद्धम् तथापिवेदस्यविषयाद्यभावेव्याख्यानस्यापिपरम्परविषयादि-
कंनस्यात् अतोवेदस्यचतुष्टयमुच्यते—वेदेपूर्वोत्तरकाण्डयोःक्रमेणधर्मब्रह्मणीविषयः तयोरन-
न्यलभ्यत्वात् तथाचपुरुषार्थानुशासनेसूत्रितम्—धर्मब्रह्मणीवेदैकवेद्येइति । जैमिनीयेचद्वितीय-
सूत्रेचोदनैवधर्मेप्रमाणम् चोदनाप्रमाणमेवेतिनियमद्वयंसंप्रदायविद्भिरभिहितम् चोदनैवेत्यमु-
मर्थमुपपादयितुंचतुर्थसूत्रेप्रत्यक्षविषयत्वंधर्मस्यनिराकृतम् प्रत्यक्षमनिमित्तंविद्यमानोपलम्भ-
नत्वादिति अनुष्ठानादूर्ध्वमुत्पत्स्यमानस्यधर्मस्यपूर्वमविद्यमानत्वात् नप्रत्यक्षयोग्यतास्ति उत्तर-
कालेऽपिरूपादिराहित्याचेन्द्रियैरवगम्यते अतएवादृष्टमितिसर्वैरभिधीयते लिङ्गराहित्याच्चा-
नुमानविषयत्वमप्यस्ति सुखदुःखेधर्माधर्मयोर्लिङ्गमितिचेत् बाढम् अयमपिलिङ्गलिङ्गिभा-
वोवेदेनैवगम्यते तस्माच्चोदनैवधर्मेप्रमाणम् वैयासिकस्यतृतीयसूत्रस्यद्वितीयवर्णकेब्रह्मणःसि-
द्धवस्तुनोऽपिशास्त्रैकविषयत्वंभाष्यकृद्भिर्व्याख्यातम्—शास्त्रादेवप्रमाणाज्जगतोजन्मादिकारणंब्र-
ह्माधिगम्यतइत्यभिप्रायइति । श्रुतिश्चभवति—नावेदविन्मनुतेतंबृहन्तमिति । तत्रोपपत्तिःपूर्वा-
चार्यैरेवमुदीरिता रूपलिङ्गादिराहित्यान्नास्यमानान्तरयोग्यतेति तस्मादनन्यलभ्यत्वात् अ-
स्तिधर्मब्रह्मणोर्वेदविषयत्वम् तदुभयज्ञानंवेदस्यसाक्षात्प्रयोजनम् नचतस्यज्ञानस्यसप्तद्वीपावसु-
मतीराजासौगच्छतीत्यादिज्ञानवदपुरुषार्थपर्यवसायित्वंशङ्कनीयम् धर्मप्रयुक्तस्यपुरुषार्थस्य

१ तै० सं. ५. ३. १२. । २ तै० ब्रा० ३. १२. ९. ।

स्तूयमानत्वात् धर्मोविश्वस्यजगतःप्रतिष्ठालोकेधर्मिष्ठंप्रजाउपसर्पन्ति धर्मेणपापमपनुदतिधर्मे सर्वंप्रतिष्ठितम् तस्माद्धर्मंपरमंवदन्तीति उद्दण्डस्यराज्ञोनियामकत्वात् विवदमानयोःपुरुषयोर्मध्येदुर्बलस्यापिराजसाहाय्यवज्जयहेतुत्वाच्चधर्मःपुरुषार्थः तथाचवाजसनेयिनःसृष्टिप्रकरणे समामनन्ति—तच्छ्रेयोरूपमत्यसृजतधर्मंतदेतत्क्षत्रस्यक्षत्रंयद्धर्मस्तस्माद्धर्मात्परंनास्त्यथोअबलीयान्बलीयांसमाशंसते धर्मेणयथैवराज्ञैवमिति। ब्रह्मविदाप्नोतिपरं। ब्रह्मवेदब्रह्मैवभवति। तरविशोकमात्मविदित्यादिश्रुतिषुब्रह्मज्ञानमयुक्तःपुरुषार्थःप्रसिद्धः तदुभयज्ञानार्थीवेदेऽधिकारी सचत्रैवर्णिकःपुरुषः। स्त्रीशूद्रयोस्तुसत्यामपिज्ञानापेक्षायामुपनयनाभावेनाध्ययनराहित्यात् वेदेधिकारःप्रतिषिद्धः धर्मंब्रह्मज्ञानंतुपुराणादिमुखेनोत्पाद्यते तस्मात्त्रैवर्णिकपुरुषाणांवेदमुखेनार्थज्ञानेऽधिकारः। सम्बन्धस्तुवेदस्यधर्मब्रह्मभ्यांसहप्रतिपाद्यप्रतिपादकभावः तदीयज्ञानेनसहजन्यजनकभावः त्रैवर्णिकपुरुषैःसहोपकार्योपकारकभावः। तदेवंविषयाद्यनुबन्धचतुष्टयमवगत्यसमाहितधियःश्रोतारोवेदव्याख्यानेप्रवर्तन्ताम्॥ अतिगम्भीरस्यवेदस्यार्थमवबोधयितुंशिक्षादीनि षडङ्गानिप्रवृत्तानि अतएवतेषामपरविद्यारूपत्वंमुण्डकोपनिषद्याथर्वणिकाआमनन्ति—द्वेविद्येवेदितव्येइतिहस्मयद्ब्रह्मविदोवदन्तिपराचैवापराच तत्रापराऋग्वेदोयजुर्वेदःसामवेदोथर्ववेदःशिक्षाकल्पोव्याकरणंनिरुक्तंछन्दोज्योतिषमिति। अथपरा ययातदक्षरमधिगम्यतइति साधनभूतधर्मज्ञानहेतुत्वात् षडङ्गसहितानांकर्मकाण्डानामपरविद्यात्वम्। परमपुरुषार्थभूतब्रह्मज्ञानहेतुत्वात् उपनिषदांपरविद्यात्वम् वर्णस्वराद्युच्चारणप्रकारोयत्रोपदिश्यतेसाशिक्षा। तथाचतैत्तिरीयाउपनिषदारम्भेसमामनन्ति—शीक्षांव्याख्यास्यामः वर्णःस्वरः मात्राबलं सामसन्तानः इत्युक्तःशीक्षाध्यायइति। वर्णोऽकारादिः सचाङ्गभूतशिक्षाग्रन्थेस्पष्टमुदीरितः। त्रिषष्टिश्चतुःषष्टिर्वावर्णाःसंभवतोमताः। प्राकृतेसंस्कृतेचापिस्वयंप्रोक्ताःस्वयंभुवेत्यादिना। स्वरउदात्तादिः सोऽपितत्रोक्तः—उदात्तश्चानुदात्तश्चस्वरितश्चस्वरास्त्रयइति। मात्राह्रस्वादिःसापितत्रोक्ता—ह्रस्वोदीर्घःप्लुतइतिकालतोनियमाअचीति। बलंस्थानप्रयत्नौ तत्रअष्टौस्थानानिवर्णानामित्यादिनास्थानमुक्तम्। अचोऽस्पृष्टायणस्त्वीषदित्यादिनाप्रयत्नउक्तः। सामशब्देनसाम्यमुक्तम् अतिद्रुतातिविलम्बितगीत्यादिदोषराहित्येनमाधुर्यादिगुणयुक्तत्वेनोच्चारणंसाम्यम् गीतीशीघ्रीशिरःकम्पीत्यादिना उपांशुदष्टंत्वरितमित्यादिनाचदोषाउक्ताः। माधुर्यमक्षरव्यक्तिरित्यादिनागुणाउक्ताः। सन्तानःसंहिता वायवायाहीत्यत्रावादेशः। इन्द्राग्नीआगतमित्यत्रप्रकृतिभावः। एतच्चव्याकरणे

---

१ तै० आ० दशमप्रपाठके। २ तै. आ० अष्टमप्रपाठके। ३ तै० आ० सप्तमप्रपाठके। ४ 'शंभुमतेमताः', अयमेवप्रचुरःपाठः। ५ ऋ. सं० १. १. २.। ६ ऋ० सं० ३. १. १०.।

ऽभिहितत्वात् शिक्षायामुपेक्षितम् शिक्ष्यमाणवर्णादिवैकल्येबाधस्तत्रोदाहृतः—मन्त्रोहीनः स्वरतोवर्णतोवामिथ्याप्रयुक्तोनतमर्थमाह । सवाग्वज्रोयजमानंहिनस्तियथेन्द्रशत्रुःस्वरतोऽपराधादिति । इन्द्रशत्रुर्वर्धस्वेत्यस्मिन्मन्त्रेइन्द्रस्यशत्रुर्घातकइत्यस्मिन्विवक्षितेऽर्थेतत्पुरुषसमासेसमासस्येतिसूत्रेणतत्पुरुषत्वात् अन्तोदात्तेनभवितव्यम् आद्युदात्तस्तुप्रयुक्तः तथासति पूर्वपदप्रकृतिस्वरत्वेनबहुव्रीहित्वात् इन्द्रोघातकोयस्येत्यर्थःसम्पन्नः तस्मात्स्वरवर्णाद्यपराधपरिहारायशिक्षाग्रन्थोपेक्षितः। कल्पस्त्वाश्वलायनापस्तम्बबौधायनादिसूत्रम् कल्प्यतेसमर्थ्यतेयागप्रयोगोऽत्रेतिव्युत्पत्तेः नन्वाश्वलायनः किंमन्त्रकाण्डमनुसृत्यप्रवृत्तःकिंवाब्राह्मणमनुसृत्य। नाद्यः दर्शपूर्णमासौतुपूर्वंव्याख्यास्यामइत्येवंतेनोपक्रान्तत्वात् नह्यग्निमीळइत्यादयोमन्त्रादर्शपूर्णमासयोःक्वचिद्विनियुक्ताः। नद्वितीयः आग्नावैष्णवमेकादशकपालंपुरोडाशंनिर्वपन्तिदीक्षणीयायामित्येवंदीक्षणीयेष्टेर्ब्राह्मणेप्रक्रान्तत्वात् । अत्रोच्यते—मन्त्रकाण्डोब्रह्मयज्ञादिजपक्रमेणप्रवृत्तोनतुयागानुष्ठानक्रमेण ब्रह्मयज्ञश्चैवंविहितः यत्स्वाध्यायमधीयीतैकामप्यृचंयजुःसामवातद्ब्रह्मयज्ञइति सोयंब्रह्मयज्ञजपोग्निमीळइत्याम्नायक्रमेणैवानुष्ठेयः तथासर्वाऋचःसर्वाणियजूंषिसर्वाणिसामानिवाचस्तोमेपारिप्लवंशंसतीतिविधीयन्ते तथाश्विनेसंपत्स्यमानेसूर्योनोदियादपिसर्वादाशतयीरनुब्रूयादितिविधीयते तथारिच्यतइववाएषप्रेवरिच्यते योयाजयतिप्रतिवागृह्णाति याजयित्वाप्रतिगृह्यवानश्नंस्त्रिःस्वाध्यायंवेदमधीयीतेतित्रिरात्रायश्चित्तरूपंवेदपारायणंविहितम् । इत्यादिषुकृत्स्नमन्त्रकाण्डविनियोगेषुसम्प्रदायपारम्पर्यागतएवक्रमआदरणीयः । विशेषविनियोगस्तुमन्त्रविशेषाणांश्रुतिलिङ्गवाक्यादिप्रमाणान्युपजीव्याश्वलायनोदर्शयति अतोमन्त्रकाण्डक्रमाभावेऽपिनकश्चिद्विरोधः । इषेत्वोर्जेत्यादिमन्त्रास्तुक्रत्वनुष्ठानक्रमेणैवाम्नाताइत्यापस्तम्बादयस्तेनैवक्रमेणसूत्रनिर्माणेप्रवृत्ताः । आम्नातत्वादेवजपादिष्वपिसएवक्रमः । यद्यपिब्राह्मणेदीक्षणीयेष्टिरुपक्रान्ता तथापितस्याइष्टेर्दर्शपूर्णमासविकृतित्वेनतदपेक्षत्वात् आश्वलायनस्यादौतद्व्याख्यानंयुक्तम् अतः कल्पसूत्रंमन्त्रविनियोगेनक्रत्वनुष्ठानमुपदिश्योपकरोति तर्हि प्रवोवाजाइत्यादीनांसामिधेनीनामृचामेवविनियोगमाश्वलायनोब्रवीतु नमःप्रवक्त्रइत्यादयस्त्वनाम्नाताःकुतोविनियुज्यन्तेइतिचेत् नायंदोषः शाखान्तरसमाम्नातानांब्राह्मणान्तरसिद्धस्यविनियोगस्यचगुणोपसंहारन्यायेनात्रवक्तव्यत्वात् सर्वशाखाप्रत्ययमेकंकर्मेतिन्यायविदः तस्माच्छिक्षेवकल्पोपेक्षितः। व्याकरणमपिप्रकृतिप्रत्ययाद्युपदेशेनपदस्वरूपतदर्थनिश्चयायोपयुज्यते तथाचैन्द्रवायवग्रहब्राह्मणेसमाम्नायते—वाग्वैपराच्यव्या-

---

१ ऐ० ब्रा० १. १. । २ तै. आ० द्वितीयप्रपाठके. । ३ तै० आ० द्वितीयप्रपाठके. । ४ ऋ. सं. ३. १. २८. । ५. समाम्नातस्येत्यपिपाठः । ६ तै. सं. ६. ४. ७. ।

कृतावदत्तेदेवाइन्द्रमब्रुवन्निमान्नोवाचंव्याकुर्विति सोऽब्रवीद्वरंवृणैमह्यंचैवैषवायवेचसहगृह्यातामिति तस्मादैन्द्रवायवःसहगृह्यतेतामिन्द्रोमध्यतोऽवक्रम्यव्याकरोत् तस्मादियंव्याकृतावागुद्यतेइति अग्निमीळेपुरोहितमित्यादिवाक्पूर्वस्मिन्कालेपराचीसमुद्रादिध्वनिवदेकात्मिकासतीअव्याकृता प्रकृतिःप्रत्ययःपदंवाक्यमित्यादिविभागकारिग्रन्थसंचरहितासीत् तदानीं देवैःप्रार्थितइन्द्रएकस्मिन्नेवपात्रेवायोःस्वस्यचसोमरसग्रहणरूपेणवरेणतुष्टस्तामखण्डांवाचंमध्येविच्छिद्यप्रकृतिप्रत्ययादिविभागंसर्वत्राकरोत् तस्मादियंवागिदानीमपिपाणिन्यादिमहर्षिभिर्व्याकृतासर्वैःपठ्यतइत्यर्थः तस्यैतस्यव्याकरणस्यप्रयोजनविशेषोवररुचिनावार्तिकेदर्शितः । रक्षोहागमलघ्वसंदेहाःप्रयोजनमिति । एतानिरक्षादिप्रयोजनानिप्रयोजनान्तराणिचमहाभाष्येपतञ्जलिनास्पष्टीकृतानि रक्षार्थं वेदानामध्येयंव्याकरणम् लोपागमवर्णविकारज्ञोहिसम्यग्वेदान्परिपालयिष्यति वेदार्थंचाध्यवस्यति ऊहःखल्वपिनसर्वैर्लिङ्गैर्नसर्वाभिर्विभक्तिभिर्वेदमन्त्रानिगदिताः तेचावश्यंयज्ञगतेनयथायथंविपरिणमयितव्याः तान्नावैयाकरणःशक्नोतिविपरिणमयितुम् तस्मादध्येयं व्याकरणम् आगमःखल्वपिब्राह्मणेननिष्कारणोधर्मःषडङ्गोवेदोध्येयोज्ञेयश्च प्रधानंचषट्स्वङ्गेषु व्याकरणम् प्रधानेचकृतोयत्नःफलवान्भवति । लघ्वर्थंचाध्येयंव्याकरणम् बृहस्पतिरिन्द्रायदिव्यंवर्षसहस्रंप्रतिपदविहितानांशब्दानांशब्दपारायणंप्रोवाचनान्तंजगाम बृहस्पतिश्चवक्ताइन्द्रश्चाध्येतादिव्यंवर्षसहस्रमध्ययनकालःअन्तंचनजगाम । अद्यतुपुनर्यदिपरमायुर्भवति सवर्षशतंजीवति तत्रकुतःप्रतिपदपाठेनसकलपदावगमः कुतस्तरांप्रयोगेण । असन्देहार्थंचाध्येयंव्याकरणम् याज्ञिकाःपठन्ति—स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेतेति । तत्रनज्ञायतेकिंस्थूलानिपृषन्तियस्याःसास्थूलपृषती किंवास्थूलाचासौपृषतीस्थूलपृषतीति तांनावैयाकरणःस्वरतोऽध्यवस्यति यदिसमासान्तोदात्तत्वंतदाकर्मधारयः अथपूर्वपदप्रकृतिस्वरत्वंततोबहुव्रीहिरिति । इमानिचभूयःशब्दानुशासनस्यप्रयोजनानि । तेसुराः दुष्टःशब्दः यदधीतं यस्तुप्रयुङ्क्ते अविद्वांसोविभक्तिंकुर्वन्ति योवाइमां चत्वारि उतत्वः सक्तुमिव सारस्वतीं दशम्यांपुत्रस्य सुदेवोअसिवरुण ॥ तेसुराः तेसुराहेलयोहेलयइतिकुर्वन्तःपराबभूवुः तस्माद्ब्राह्मणेननम्लेच्छितवैनापभाषितवै म्लेच्छोहवाएषयदपशब्दः म्लेच्छामाभूमेत्यध्येयंव्याकरणम् । दुष्टःशब्दः दुष्टःशब्दःस्वरतोवर्णतोवामिथ्याप्रयुक्तोनतमर्थमाह । सवाग्वज्रोयजमानंहिनस्तियथेन्द्रशत्रुःस्वरतोपराधादिति दुष्टाञ्छब्दान्माप्रयुंक्ष्महीत्यध्येयंव्याकरणम् । यदधीतं यदगृहीतमविज्ञातंनिगदेनैवशब्द्यते । अनग्नाविवशुष्कैधोनतज्ज्वलतिकर्हिचित् । अविज्ञातार्थकंमाध्यगीष्महीत्यध्येयंव्याकरणम् । यस्तुप्रयुंक्ते । यस्तुप्रयुङ्क्तेकुशलोविशेषेशब्दान्यथावद्व्यवहारकाले । सोऽनन्तमाप्नोतिजयंपरत्रवा-

---

१ पातञ्जलभाष्येपस्पशाह्निके. । २ नि० १. १८. ।

ग्योगविद्दुष्यति चापशब्दैः । कः वाग्योगविदेव योहिशब्दाञ्जानातिअपशब्दानप्यसौजानाति यथैवशब्दज्ञानेधर्मएवमपशब्दज्ञानेऽप्यधर्मःप्राप्नोति अथवाभूयानधर्मःप्राप्नोति भूयांसोह्यपशब्दाअल्पीयांसःशब्दाएकैकस्यहिशब्दस्यबहवोपभ्रंशायथागौरित्येतस्यशब्दस्यगावीगोणीगोपोतलिकेत्येवमादयः । अथयःअवाग्योगवित् अज्ञानंतस्यशरणम् विषमउपन्यासः नात्यन्तायाज्ञानंशरणंभवितुमर्हति योह्यजानन्ब्राह्मणंहन्यात् सुरांवापिबेत् सोऽपिमन्ये पतितःस्यात् एवंतर्हिकः अवाग्योगविदेव अथयः वाग्योगवित् ज्ञानंतस्यशरणं । अविद्वांसः अविद्वांसःप्रत्यभिवादेनाम्नोयेनप्लुतिंविदुः । कामंतेषुतुविप्रोष्यस्त्रीष्विवायमहंवदेदिति । स्त्रीवन्माभूमेत्यध्येयंव्याकरणं विभक्तिंकुर्वन्ति याज्ञिकाःपठन्ति प्रयाजाःसविभक्तिकाःकर्तव्याइति नचान्तरेणव्याकरणं प्रयाजाः सविभक्तिकाः शक्याःकर्तुम् तस्मादध्येयंव्याकरणम् । योवाइमां योवाइमांपदशःस्वरशोवर्णशोऽक्षरशोवावाचंविदधाति सआर्त्विजीनोभवति आर्त्विजीनाः स्यामेत्यध्येयंव्याकरणम् । चत्वारिशृङ्गा चत्वारिशृङ्गात्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य । त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्यांआविवेश । चत्वारिशृङ्गा चत्वारिपदजातानि नामाख्यातोपसर्गनिपाताश्च त्रयोअस्यपादाः त्रयःकालाः द्वेशीर्षेसुप्तिङश्च सप्तहस्तासःसप्तविभक्तयः त्रिधाबद्धः त्रिषुस्थानेषुबद्धः उरसिकण्ठेशिरसि वृषभोवर्षणात्कामानांरोरवीति रौतिः शब्दकर्मा महोदेवोमर्त्यांआविवेश महतादेवेननस्तादात्म्यंयथास्यादित्यध्येयंव्याकरणम् । अथवा चत्वारि चत्वारिवाक्परिमितापदानितानिविदुर्ब्राह्मणायेमनीषिणः । गुहात्रीणिनिहितानेङ्गयन्तितुरीयंवाचोमनुष्यावदन्ति येमनीषिणः मनसईषिणोमनीषिणःगुहायांत्रीणिनिहितानिनेङ्गयन्ति नचेष्टन्ते ननिमिषन्तितुरीयंवाचोमनुष्यावदन्ति तुरीयंहवाएतद्वाचोयन्मनुष्येषुवर्तते । उतत्वः पश्यन्नददर्शवाचमुतत्वःशृण्वन्नशृणोत्येनाम् । उतोत्वस्मैतन्वं विसस्रेजायेवपत्यउशतीसुवासाः । अपिखल्वेकःपश्यन्नपिनपश्यति शृण्वन्नपिनशृणोत्येनां विद्वांसमाहार्धंत्वस्मैअन्यस्मैतन्वं विसस्रेतनुंविवृणुते जायेवपत्यउशतीसुवासाःयथाजायापत्येकामयमानासुवासाःस्वमात्मानंविवृणुते एवंवाक्विदेस्वमात्मानंविवृणुते वाक्स्वंनोविवृणुयादित्यध्येयंव्याकरणम् । सक्तुमिवतितउनापुनन्तोयत्रधीरामनसावाचमक्रत । अत्रासखायःसख्यानिजानतेभद्रैषांलक्ष्मीर्निहिताधिवाचि सक्तुःसचतेर्दुर्धावोभवतिकसतेर्वास्याद्विपरीतस्यविकसितोभवति तितउपरिपवनंभवति ततवद्वातुन्नवद्वाधीराःप्रज्ञावन्तोध्यानवन्तोमनसाप्रज्ञानेनवाचमक्रत वाचमकृषत सख्यानिसंजानते कएवदुर्गमोमार्गः एकगम्योवाग्विषयः केपुनस्ते वैयाकरणाः कुतएतत् भद्रात्येषांलक्ष्मीर्निहि-

---

१ ऋ० सं. २-३. २२. । २ ऋ० सं. ८. २. २३. । ३ ऋ० सं० ८. २. २३. ।

ताधिवाचि एषांवाचिभद्रालक्ष्मीर्निहिताभवति सारस्वतीं आहिताग्निरपशब्दंप्रयुञ्जानःप्राय-श्चित्तीयांसारस्वतीमिष्टिंनिर्वपेदितिप्रायश्चित्तीयामाभूमेत्यध्येयंव्याकरणम् । दशम्यांपुत्रस्य द-शम्यांपुत्रस्यजातस्यनामविदध्यात् घोषवदाद्यन्तरंतस्थमभिनिष्ठानान्तंद्व्यक्षरंचतुरक्षरंवाकृतंना-मकुर्यात् नतद्धितान्तमिति नचान्तरेणव्याकरणंकृतस्तद्धितावाशक्याविज्ञातुम् तस्मादध्ये-यंव्याकरणम् । सुदेवोअसि सुदेवोअसिवरुणयस्यतेसप्तसिन्धवः । अनुक्षरन्तिकाकुदंसूर्म्यं सुषिरामिव ।[1]सप्तसिन्धवः सप्तविभक्तयः ककुत्जिह्वासास्मिन्विद्यतेइतिकाकुदंतालु ऊर्मिःसूर्मिः स्थूणालोहप्रतिमेति एवंसिद्धेशब्दार्थसम्बन्धइत्यादिवार्तिकोक्तान्यत्रापिप्रयोजनान्यनुसन्धेया-नि । अथनिरुक्तप्रयोजनमुच्यते—अर्थावबोधेनिरपेक्षतयापदजातंयत्रोक्तंतन्निरुक्तम् गौः ग्मा ज्मा क्ष्मा क्षा क्षमेत्यारभ्य वसवःवाजिनःदेवपत्न्योदेवपत्न्यइत्यन्तोयःपदानांसमाम्नायःसमाम्नात-स्तस्मिन्ग्रन्थेपदार्थावबोधायपरापेक्षानविद्यते एतावन्तिपृथिवीनामान्येतावन्तिहिरण्यनामानीत्ये-वं तत्रतत्रविस्पष्टमभिहितत्वात् तदेतन्निरुक्तंत्रिकाण्डं तच्चानुक्रमणिकाभाष्येदर्शितम् आद्यंनैघ-ण्टुकंकाण्डंद्वितीयंनैगमंतथा । तृतीयंदैवतंचेतिसमाम्नायस्त्रिधास्थितः । गौराद्यपारपर्यन्तमाद्यंनै-घण्टुकंमतम् । जहाद्युल्बमृबीसान्तंनैगमंसम्प्रचक्षते । अग्न्यादिदेवपत्न्यन्तंदेवताकाण्डमुच्यते । अग्न्यादिदेवीऊर्जाहुत्यन्तःक्षितिगतोगणः । वाय्वादयोभगान्ताःस्युरन्तरिक्षस्थदेवताः । सूर्यादिदेवपत्न्यन्ताद्युस्थानादेवताइति । गवादिदेवपत्न्यन्तंसमाम्नायमधीयतेइति । एकार्थवा-चिनांपर्यायशब्दानांसंघोयत्रप्रायेणोपदिश्यतेतत्रनिघण्टुशब्दःप्रसिद्धः तादृशेष्वमरसिंहवैजय-न्तीहलायुधादिषुदशनिघण्टवइतिव्यवहारात् एवमत्रापिपर्यायशब्दसङ्घोपदेशात् आद्यकाण्ड-स्यनैघण्टुकत्वम् तस्मिन्काण्डेत्रयोऽध्यायाः तेषुप्रथमेपृथिव्यादिलोकदिक्कालादिद्रव्यविषया-णिनामानि । द्वितीयेमनुष्यतदवयवादिद्रव्यविषयाणि तृतीयेतदुभयद्रव्यगततनुबहुत्वह्रस्वत्वा-दिधर्मविषयाणि निगमशब्दोवेदवाची यास्केनतत्रतत्रापिनिगमोभवतीत्येवंवेदवाक्यानामवता-रितत्वात् तस्मिन्निगमेएवप्रायेणवर्तमानानांशब्दानांचतुर्थाध्यायरूपेद्वितीयस्मिन्काण्डेउपदिष्ट-त्वात् तस्यकाण्डस्यनैगमत्वम् । पञ्चमाध्यायरूपस्यतृतीयकाण्डस्यदैवतत्वंविस्पष्टम् पञ्चाध्याय-रूपकाण्डत्रयात्मकेएतस्मिन्ग्रन्थेपरनिरपेक्षतयापदार्थस्योक्तत्वात् तस्यग्रन्थस्यनिरुक्तत्वम् ।तद्व्या-ख्यानंच समाम्नायःसमाम्नातइत्यारभ्यतस्यास्तस्यास्ताद्भाव्यमनुभवत्यनुभवतीत्यन्तैर्द्वादशभि-रध्यायैर्यास्कोनिर्ममे तदपिनिरुक्तमित्युच्यते एकैकस्यपदस्यसम्भाविताअवयवार्थास्तत्रनिः-शेषेणोच्यन्तइतिव्युत्पत्तेः । तत्रहिचत्वारिपदजातानि नामाख्यातेचोपसर्गनिपाताश्चेतिप्रतिज्ञायो-

१ आश्वलायनगृह्यसूत्रेप्रथमाध्याये , पातञ्जलभाष्येपस्पशाह्निकेच।

च्चावचेष्वर्थेषुनिपतन्तीतिनिपातस्वरूपंनिरुच्यैवमुदाहृतम् नेतिप्रतिषेधार्थीयोभाषायामुभयम-न्वध्यायंनेन्द्रंदेवममंसतेतिप्रतिषेधार्थीयइति दुर्मदासोनसुरायामित्युपमार्थीयइतिच तच्चलो-केकेवलप्रतिषेधार्थीयस्यापिनकारस्यवेदेप्रतिषेधोपमालक्षणोभयार्थोदाहरणमस्मिन्ग्रन्थेवगम्य-ते एवंग्रन्थकारेणोक्तास्तत्तत्पदनिर्वचनविशेषास्तत्तन्मन्त्रव्याख्यानावसरेएवास्माभिरुदाहरि-ष्यन्ते नचनिर्वचनानांनिर्मूलत्वंशङ्कनीयम् एतद्व्युत्पत्त्यर्थमेवब्राह्मणेषुपदनिर्वचनानांकेषांचि-दुक्तत्वात् तदाहुतीनामाहुतित्वमिति तमिंदन्द्रंसन्तमिन्द्रइत्याचक्षतइति यदप्रथयत्तत्पृ-थिव्याःपृथिवीत्वमितिच ग्रन्थकारोऽपितत्रतत्रस्वोक्तनिर्वचनमूलभूतब्राह्मणान्युदाहरिष्यति केषांचिन्निर्वचनानांव्याकरणबलेनसिद्धावपिनसर्वेषांसिद्धिरस्ति अतएवग्रन्थकारआह तदि-दंविद्यास्थानंव्याकरणस्यकार्त्स्न्यंस्वार्थसाधकंचेति तस्माद्वेदार्थावबोधायोपयुक्तंनिरुक्तम्। त-थाछन्दोग्रन्थोऽप्युपयुज्यते छन्दोविशेषाणांतत्रतत्रविहितत्वात् तस्मात्सप्तचतुरुत्तराणिछन्दां-सिप्रातरनुवाकेनूच्यन्तइतिविज्ञातम् गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगतीत्येतानिसप्तच्छन्दां-सि चतुर्विंशत्यक्षरागायत्री ततोऽपिचतुर्भिरक्षरैरधिकाष्टाविंशत्यक्षरोष्णिक् एवमुत्तरोत्तरा-धिकाअनुष्टुबादयोऽवगन्तव्याः तथान्यत्रापिश्रूयते—गायत्रीभिर्ब्राह्मणस्यादध्यात् त्रिष्टुब्भीरा-जन्यस्य जगतीभिर्वैश्यस्येति। तत्रमगणयगणादिसाध्योगायत्र्यादिविवेकश्छन्दोग्रन्थमन्तरेण नशक्यविज्ञेयः किञ्चयोहवाअविदितार्षेयच्छन्दोदैवतब्राह्मणेनमन्त्रेणयाजयतिवाध्यापयतिवास्था-णुंवर्च्छतिगर्तेवापात्यतेप्रमीयतेवापापीयान्भवति तस्मादेतानिमन्त्रेमन्त्रेविद्यादितिश्रूयते तस्मा-त्तद्वेदनायछन्दोग्रन्थउपयुज्यते। ज्योतिषस्यप्रयोजनंतस्मिन्नेवग्रन्थेऽभिहितम् यज्ञकालार्थ-सिद्धयइति कालविशेषविधयश्चश्रूयन्ते संवत्सरमेतद्व्रतंचरेत्। संवत्सरमुख्यंभृत्वे-त्येवमादयःसंवत्सरविधयः वसन्तेब्राह्मणोऽग्निमादधीत ग्रीष्मेराजन्यआदधीत शर-दिवैश्यआदधीतेत्याद्याऋतुविधयः मासिमासिसत्रपृष्ठान्युपयन्तिमासिमास्यतिग्राह्यागृह्यन्तइ-त्याद्यामासविधयः यंकामयेतवसीयान्स्यादितितंपूर्वपक्षेयाजयेदित्याद्याःपक्षविधयः एकाष्ट-कायांदीक्षेरन्फल्गुनीपूर्णमासेदीक्षेरन्नित्याद्यास्तिथिविधयः प्रातर्जुहोतिसायंजुहोतीत्याद्याःप्रातः-कालादिविधयः कृत्तिकास्वग्निमादधीतेत्याद्यानक्षत्रविधयः अतःकालविशेषानवगमयितुंज्यो-तिषमुपयुज्यते। एतेषांचवेदार्थोपकारिणांषण्णांग्रन्थानांवेदाङ्गत्वंशिक्षायामेवमुदीरितम्—छन्दः पादौतुवेदस्यहस्तौकल्पोऽथपठ्यते। ज्योतिषामयनंचक्षुर्निरुक्तंश्रोत्रमुच्यते। शिक्षाघ्राणं तुवेदस्यमुखंव्याकरणंस्मृतम्। तस्मात्साङ्गमधीत्यैवब्रह्मलोकेमहीयतेइति षडङ्गवत्पुराणादीना-

१ ऐ० आ० चतुर्थाध्यायस्यतृतीयखण्डे.। २ तै० ब्रा० १.३.३.। ३ तै० ब्रा० १.१.९.।
४ तै. आ० प्रथमप्रपाठके.। ५ तै. सं. ५.६.५.। ६ तै. ब्रा० १.१.२.।

मपिवेदार्थज्ञानोपयोगोयाज्ञवल्क्येनैवंस्मर्यते—पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः । वेदाः स्थानानिविद्यानांधर्मस्यचचतुर्दशेति । इतिहासपुराणाभ्यांवेदंसमुपबृंहयेत् । बिभेत्यल्पश्रुताद्वेदोमामयंप्रहरेदिति । अन्यत्रापिस्मर्यते ऐतरेयतैत्तिरीयकाठकादिशाखासूक्तानिहरिश्चन्द्रनाचिकेताद्युपाख्यानानिधर्मब्रह्मावबोधोपयुक्तानि तेषुतेष्वितिहासग्रन्थेषुस्पष्टीकृतानि उपनिषदुक्ताश्चसृष्टिस्थितिलयादयोब्राह्मपाद्मवैष्णवादिपुराणेषुस्पष्टीकृताः सर्गश्चप्रतिसर्गश्चवंशोमन्वन्तराणिच । वंशानुचरितंचेतिपुराणंपञ्चलक्षणमिति । सृष्ट्यादेःपुराणप्रतिपाद्यत्वावगमनात् न्यायशास्त्रेप्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तादीनांषोडशपदार्थानांनिरूपणात् तदनुसारेणेदंवाक्यमस्मिन्नर्थेप्रमाणंभवतिनेतरदितिनिर्णयःकर्तुंशक्यते पूर्वोत्तरमीमांसयोर्वेदार्थोपयोगोऽतिस्पष्टएव। मन्वत्रिविष्णुहारीतादिप्रोक्तासुस्मृतिषुवेदोक्तसन्ध्यावन्दनादिविधयःप्रपञ्चिताः तंदुहवाएतेब्रह्मवादिनःपूर्वाभिमुखाःसन्ध्यायांगायत्रियाभिमन्त्रिताअपऊर्ध्वंविक्षिपन्तीत्यादिकःसन्ध्यावन्दनविधिः पञ्चवाएतेमहायज्ञाःसततंप्रतायन्तइत्यादिकोमहायज्ञविधिः एवंविध्यन्तराणिद्रष्टव्यानि उक्तप्रकारेणपुराणादीनांवेदार्थज्ञानोपयोगाद्विद्यास्थानत्वंयुक्तम् एतैःपुराणादिभिश्चतुर्दशविद्यास्थानैरुपबृंहितायाविद्यायाग्रहणेधिकारिविशेषः शाखान्तरगतैश्चतुर्भिर्मन्त्रैरुपदर्शितः तांश्चमन्त्रान्यास्क-उदाजहार तत्रायंप्रथमोमन्त्रः—विद्याहवैब्राह्मणमाजगामगोपायमाशेवधिष्टेहमस्मि । असूयकायानृजवेयतायनमाब्रूयावीर्यवतीतथास्यामिति॥१॥विद्याभिमानिनीदेवताब्राह्मणमुपदेष्टारमाचार्यमागत्यैवंप्रार्थयामास हेब्राह्मणमांअनधिकारिणेनुपदिश्यपालय तवाहंनिधिवत्पुरुषार्थहेतुरस्मि तादृश्यांमयिमदुपदेष्टरित्वयिचयोऽसूयांकरोति यश्चार्जवेनविद्यांनाभ्यस्यति योऽपिस्नानाचमनाद्याचारनियतोनभवति तादृशेभ्यःशिष्याभासेभ्योमांनब्रूयाः तथा सतित्वद्धृदयेस्थित्वाफलप्रदाभवेयम् । अथद्वितीयोमन्त्रः—यआतृणत्त्यवितथेनकर्णावदुःखंकुर्वन्नमृतंसंप्रयच्छन् । तंमन्येत पितरंमातरंचतस्मैनद्रुह्येत्कतमच्चनाह॥२॥ पूर्वस्मिन्मन्त्रेआचार्यस्यनियममभिधायास्मिन्मन्त्रेशिष्यस्यनियमोऽभिधीयते वितथमनृतमपुरुषार्थभूतंलौकिकंवाक्यंतद्विपरीतंसत्यंवेदवाक्यंअवितथम् तादृशेनवाक्येनयआचार्यःशिष्यस्यकर्णावातृणत्तिसर्वतस्तर्दनंपूरणंकरोति उपसर्गवशादौचित्याच्चतृणत्तिधातोरर्थान्तरेवृत्तिः सर्वदावेदंयःश्रावयतीत्यर्थः किंकुर्वन्अदुःखंकुर्वन्मन्दप्रज्ञस्यमाणवकस्यादावर्धर्चंमृचंवाग्रहीतुमशक्तस्ययथादुःखंनभवति तथा पादंपादैकदेशंवाग्राहयन् किञ्चअमृतंसंप्रयच्छन्नमृतत्वस्यदेवत्वजन्मनोमोक्षस्यवाप्रापकत्वात् अमृतंवेदार्थस्तस्यदानंकुर्वन् तंतादृशमाचार्यंसच्छिष्योमुख्यंमातापितृरूपंमन्येत पूर्वसिद्धौतुमातापितरावधमस्यमनुष्यशरीरस्यप्रदानादमुख्यौ तस्मैमुख्यमातापितृरूपायाचार्यायैकमपिद्रोहंनकुर्यात् । अथतृतीयो-

---

१ याज्ञवल्क्यस्मृतौ अ० १. श्लो० ३. । २ तै. आ. द्वितीयप्रपाठके । ३ नि०२.४.।

मन्त्रः—अध्यापितायेगुरुंनाद्रियन्तेविप्रावाचामनसाकर्मणावा । यथैवतेनगुरोर्भोजनीयास्तथैवतान्नभुनक्तिश्रुतंतदिति ॥३॥येत्वधमाविप्रागुरुणाध्यापिताःसन्तोविनयोक्त्यातदीयहितचिन्तनेनशुश्रूषयावागुरुंनाद्रियन्तेआदररहितास्तेशिष्याभासागुरोर्नभोजनीयाः अनुभवयोग्यान भवन्ति नहितेषुगुरुःकृपांकरोति । यथैवगुरुणातेनपालनीयाः तथैवतानधमाञ्छिष्यान्तच्छ्रुतंगुरूपदिष्टंवेदवाक्यंनपालयतिफलप्रदंनभवतीत्यर्थः । अथचतुर्थोमन्त्रः—यमेवविद्याःशुचिमप्रमत्तंमेधाविनंब्रह्मचर्योपपन्नम्।यस्तेनद्रुह्येत्कतमच्चनाहतस्मैमाब्रूयानिंधिपायब्रह्मन्निति॥४॥ हेआचार्ययमेवमुख्यशिष्यंशुचित्वादिगुणोपेतंजानीयाः किञ्चयोमुख्यशिष्यस्तुभ्यंकदाचिदपिनद्रुह्येत्तस्मैतुमुख्यशिष्यायत्वदीयनिधिपालकायहेब्रह्मन्वेदरूपांमांविद्यांब्रूयाः इत्थंविद्यादेवतयाप्रार्थितत्वात् आचार्येणमुख्यशिष्यायवेदविद्योपदेष्टव्या । तदर्थमृग्वेदोस्माभिःषडङ्गानुसारेणव्याख्यायते ।

१ निधिः शेवधिः ।

इत्युपोद्घातप्रकरणम्.

प्रस्तावना.

अस्यग्रंथस्यांकनक्रमः—प्रथमं स्थूलाक्षराऋक्सस्वरा । ततोधः किंचित्स्वल्पाक्षरस्तस्याऋचःपदपाठः । ततोधस्तेभ्योपिलघ्वक्षरं सायणाचार्यविरचितंभाष्यम् । एवंसर्वत्रक्रमः॥ प्रतिपृष्ठमधोभागेभाष्येअन्यग्रंथेभ्योगृहीतप्रमाणानां तत्रतत्रागतानां तत्तच्छाखांतर्गतानां ब्राह्मणादिवाक्यानामंकन्यासःटिप्पण्यांकृतोष्टकवर्गादीनां । किंच भाष्येप्रक्रियायामागतानां पाणिन्युणादिफिट्सूत्राणां शीघ्रोपस्थानार्थं वर्णानुक्रमेणसूचीचदत्ताद्वितीयाष्टकांते । तथाप्रतिपृष्ठोपरिभागे अध्यायवर्गमंडलानुवाकसूक्तानामंकाविन्यस्ताः । एवंसुबोधीकरणार्थमत्रपुस्तकेक्रमोंगीकृतः ।

॥ श्रीः ॥

ऋक्संहिता

सभाष्या पदपाठसहिताच.

मन्त्रब्राह्मणात्मकेवेदेब्राह्मणस्यमन्त्रव्याख्यानोपयोगित्वात् आदौब्राह्मणमारण्यकाण्डसहितंव्याख्यातम् अथतत्रतत्रब्राह्मणोदाहरणेनमन्त्रात्मकःसंहिताग्रन्थोव्याख्यातव्यः सचाग्निमीळइत्यारभ्ययथावःसुसहासतीत्यन्तोष्टकाण्डैर्दशमण्डलैश्चतुःषष्टयध्यायैः ईषदधिकसहस्रसूक्तैरीषदधिकद्विसहस्रवर्गैरीषदधिकाभिर्दशसहस्रसंख्याभिर्ऋग्भिश्चोपेतः। तस्यचग्रन्थस्यकृत्स्नस्याप्याम्नातक्रमेणैवसामान्यविनियोगोब्रह्मयज्ञजपादौपूर्वमेवाभिहितः विशेषविनियोगस्तुतत्तत्क्रतौसूत्रकारेणप्रदर्शितः सचत्रिविधः सूक्तविनियोगस्तृचादिविनियोगएकैकस्याऋचोविनियोगश्चेति तत्राग्निमीळइतिसूक्तंप्रातरनुवाकेआग्नेयेक्रतौविनियुक्तम् सविनियोगआश्वलायनेनचतुर्थाध्यायस्यत्रयोदशेखण्डेसूत्रितः—अवानोअग्नइतिषडग्निमीळेग्निंदूतमिति । तत्रहीनपादग्रहणात् सूक्तनिश्चयः सूक्तंसूक्तादौहीनेपादेइतिपरिभाषितत्वात् तस्मिन्सूक्तेप्रथमायाऋचोद्वितीयस्यां पवमानेष्टौस्विष्टकृतोयाज्यात्वेनविनियोगः सचद्वितीयाध्यायस्यप्रथमखण्डेसूत्रितः—साह्वान्विश्वाअभियुजोऽग्निमीळेपुरोहितमितिसंयाज्येइति । तत्रकृत्स्नपादग्रहणात् ऋगित्यवगम्यते । ऋचंपादग्रहणेइतिपरिभाषितत्वात् । तथासंयाज्येइत्युक्तेसौविष्टकृतीप्रतीयादितिपरिभाषितत्वात्स्विष्टकृत्संबन्धनिश्चयः तत्रापिद्वितीयमन्त्रत्वेनोदाहृतत्वाद्याज्यात्वम् यद्यपिसाह्वानित्यनयापुरोनुवाक्ययैवदेवतायाअनुस्मरणरूपःसंस्कारःसिद्धः तथापियाज्यानुवाक्ययोःसमुच्चयोद्वादशाध्यायेचतुर्थपादेमीमांसितः—पुरोनुवाक्ययायाज्याविकल्प्यावासमुच्चिता। विकल्प्यान्यतरेणैवदेवतायाःप्रकाशनात्। पुरोनुवाक्यासमाख्यानाद्वचनाच्चसमुच्चयः। देवताप्रकाशनकार्यस्यैकत्वात् युग्मयोर्यथाविकल्पस्तथैवैकयुग्मगतयोरितिचेत् मैवम् पुरोनुवाक्येतिसमाख्यायाउत्तरकालीन-

---

१ सप्तदशाधिकैरित्यर्थः (खिलवर्जम्)। २ षडधिकैरित्यर्थः। ३ द्विसप्तत्यधिकचतुःशताधिकाभिरित्यर्थः (वालखिल्यवर्जम्)।

याज्यामन्तरेणानुपपत्तेः किञ्चपुरोनुवाक्यामनूच्ययाज्ययायजतीतिप्रत्यक्षवचनेनदेवतोपलक्षण-
हविःप्रदानकार्यभेदोक्तिपुरःसरंसाहित्यंविधीयते तस्मात्समुच्चयइति ॥

एतच्चाग्निमित्यादिसूक्तंनवर्चम् अग्निंनवमधुच्छन्दावैश्वामित्रइत्यनुक्रमणिकायामुक्तत्वा-
त् विश्वामित्रपुत्रोमधुच्छन्दोनामकः तस्यसूक्तस्यद्रष्टृत्वात् तदीयऋषिः ऋषीगताविति धातुः
सर्वधातुभ्यइन् इगुपधात्किव् वेदमाख्यर्थं तपोनुतिष्ठतःपुरुषान्स्वयंभूर्वेदपुरुषःप्रामोत् तथाचश्रूय-
ते—अजान्हवैपृश्नींस्तपस्यमानान्ब्रह्मस्वयंभ्वभ्यानर्षत्तदृषयोभवन्निति । तथाअतीन्द्रियस्यवेद-
स्यपरमेश्वरानुग्रहेणप्रथमतोदर्शनात् ऋषित्वमित्यभिप्रेत्यस्मर्यते—युगान्तेन्तर्हितान्वेदान्सेतिहा-
सान्महर्षयः । लेभिरेतपसापूर्वमनुज्ञाताःस्वयंभुवेति ऋष्यादिज्ञानाभावेप्रत्यवायःस्मर्यते—अवि-
दित्वाऋषिंछन्दोदैवतंयोगमेवच । योध्यापयेज्जपेद्वापिपापीयाञ्जायतेतुसः । ऋषिच्छन्दोदैवतानि
ब्राह्मणार्थंस्वराद्यपि । अविदित्वाप्रयुञ्जानोमन्त्रकण्टकउच्यतइति । वेदनविधिश्चस्मर्यते—स्वरोव-
र्णोक्षरंमात्राविनियोगोर्थएवच । मन्त्रंजिज्ञासमानेनवेदितव्यंपदेपदइति । अग्निमित्यादिसूक्तस्यछ-
न्दःअनुक्रमणिकायांयद्यप्यत्रनोक्तंतथापिपरिभाषायामेवमुक्तम्—आदौगायत्रंप्राग्घैरण्यस्तूपादि
तिहिरण्यस्तूपाख्यऋषिःयेषांमन्त्राणांवक्ष्यते ततःप्राचीनेषुमन्त्रेषुसामान्येनगायत्रंछन्दइत्यर्थः । पुरु-
षस्यपापसंबन्धंवारयितुमाच्छादकत्वात् छन्दइत्युच्यते तच्चारण्यकाण्डेसमाम्नायते—छादयन्ति
हवाएनंछन्दांसिपापात्कर्मणइति । अथवाचीयमानाग्निसन्तापस्याच्छादकत्वात्छन्दः तच्चतैत्ति-
रीयाआमनन्ति—प्रजापतिरग्निमचिनुतसक्षुरपविर्भूत्वातिष्ठत्तंदेवाबिभ्यतोनोपायन्तेछन्दोभिरा-
त्मानंछादयित्वोपायन्तच्छन्दसांछन्दस्त्वमिति । यद्वा अपमृत्युंवारयितुमाच्छादयतीतिछन्दः तद-
पिछान्दोग्योपनिषद्याम्नातम्—देवावैमृत्योर्बिभ्यतस्त्रयींविद्यांप्राविशन्तेछन्दोभिरात्मानमाच्छादय-
न्यदेभिराच्छादयंस्तच्छन्दसांछन्दस्त्वमिति । तथाद्योतनार्थेदीव्यतिधातुनिमित्तोदेवशब्दः एतदा-
म्नायते—दिवावैनोभूदिति तद्देवानांदेवत्वमिति । अतोदीव्यवेइतिदेवः मन्त्रेणद्योत्यतेइत्यर्थः ।
प्रथममण्डलेप्रथमानुवाकेत्रीणिसूक्तानि तत्राद्यंनवर्चंसूक्तम् अस्मिन्सूक्तेस्तूयमानत्वादग्निर्देवः
तथाचानुक्रमणिकायामुक्तम्—मण्डलादिष्वाग्नेयमैन्द्रादिति । अग्निंनवमधुच्छन्दावैश्वामित्रः ।

तस्यसूक्तस्यप्रथमामृचंभगवान्वेदपुरुषआह—

ओम् अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजम् । होतारंरत्नधातमम् ॥१॥

अग्निम् । ईळे । पुरःऽहितम् । यज्ञस्य । देवम् । ऋत्विजम् ।
होतारम् । रत्नऽधातमम् ॥ १ ॥

---

१ तै० आ० द्वितीयाध्यायेअष्टमखण्डे. । २ योगोविनियोगः । ३ तै० सं० ५.६.६. ।
४ तै० ब्रा० २.२.८. ।

अग्निनामकं देवमीळेस्तौमि ईडस्तुताविति धातुः डकारस्यळकारोबह्वृचाध्येतृसंप्रदायमाप्तः। अज्मध्यस्थडकारस्यळकारंबह्वृचाजगुः। अज्मध्यस्थढकारस्यळ्हकारंवैयथाक्रममिति। मन्त्रस्यहोत्रामयोज्यत्वात् अहंहोतास्तौमीतिलभ्यते कीदृशमग्निंयज्ञस्यपुरोहितम् यथाराज्ञःपुरोहितः तदभीष्टंसंपादयतितथाग्निरपियज्ञस्यापेक्षितंहोमंसंपादयति यद्वा यज्ञस्यसम्बन्धिनिपूर्वभागेआहवनीयरूपेणावस्थितम् पुनःकीदृशं देवंदानादिगुणयुक्तम् होतारमृत्विजं देवानांयज्ञेषु होतृनामकऋत्विगग्निरेव तथाचश्रूयते—अग्निर्वै देवानांहोतेति। पुनरपिकीदृशम् रत्नधातमम् यागफलरूपाणांरत्नानामतिशयेनधारयितारंपोषयितारंवा। अत्राग्निशब्दस्ययास्कोबहुधानिर्वचनंदर्शयति—अथातोऽनुक्रमिष्यामोऽग्निःपृथिवीस्थानस्तंप्रथमंव्याख्यास्यामोऽग्निःकस्मादग्रणीर्भवत्यग्रंयज्ञेषुप्रणीयतेऽङ्गंनयतिसंनममानोऽक्नोपनोभवतीतिस्थौलाष्ठीविर्नक्नोपयतिनस्नेहयतित्रिभ्यआख्यातेभ्योजायतइतिशाकपूणिरितादक्ताद्दग्धाद्वानीतात्सखल्वेतेरकारमादत्तेगकारमनक्तेर्वादहतेर्वानीःपरस्तस्यैषाभवतीति। अग्निमीळइति अस्यायमर्थः—सामान्येनसर्वदेवतानांलक्षणस्याभिहितत्वात् अनन्तरंयतःप्रतिपदंविशेषेणवक्तव्यत्वमाकांक्षितमतोऽनुक्रमेणवक्ष्यामः तत्रपृथिवीलोकेस्थितोऽग्निःप्रथमंव्याख्यास्यते—कस्मात्प्रवृत्तिनिमित्तादग्निशब्देनदेवताभिधीयते इतिप्रश्नस्याग्रणीरित्यादिकमुत्तरम् देवसेनामग्रेस्वयंनयतीत्यग्रणीः एतदेकमग्निशब्दस्यप्रवृत्तिनिमित्तम् तथाचब्राह्मणान्तरम्—अग्निर्देवानांसेनानीरिति। एतदेवाभिप्रेत्यबह्वृचामन्त्रब्राह्मणे आमनन्ति—अग्निर्मुखंप्रथमोदेवतानामितिमन्त्रः। अग्निर्वैदेवानामवमइतिब्राह्मणम्। तथाचतैत्तिरीयाआमनन्ति—अग्निरग्रेप्रथमोदेवतानामिति। अग्निरवमोदेवतानामितिच। वाजसनेयिनस्त्वेवमामनन्ति—सवाएषोऽग्रेदेवतानामजायततस्मादग्निर्नामेति। यज्ञेष्वग्निहोत्रेष्टिपशुसोमरूपेष्वग्रंपूर्वदिग्वर्त्याहवनीयदेशंप्रतिगार्हपत्यात्प्रणीयतइतिद्वितीयंप्रवृत्तिनिमित्तम् सन्नयमानःसम्यक्स्वयमेवप्रह्वीभवन्नङ्गंस्वकीयंशरीरंनयतिकाष्ठदाहेहविःपाकेचप्रेरयतीतितृतीयंप्रवृत्तिनिमित्तम्। स्थूलाष्ठीविनामकस्यमहर्षेःपुत्रोनिरुक्तकारःकश्चिदक्नोपनइत्यग्निशब्दंनिर्वक्ति—तत्रनक्नोपयतीत्युक्तेनस्नेहयति किन्तुकाष्ठादिकंरूक्षयतीत्युक्तंभवति। शाकपूणिनामकोनिरुक्तकारोधातुत्रयादग्निशब्दनिष्पत्तिंमन्यते—इत इण्गताविति धातुः अक्तःअञ्जूव्यक्तिम्रक्षणकान्तिगतिष्विति धातुः दग्धोदहभस्मीकरणेइति धातुः नीतोणीञ्प्रापणेइति धातुः अग्निशब्दोऽग्रकारगकारनिशब्दानपेक्षमाणएतिधातोरुत्पन्नादयनशब्दादकारमादत्ते अनक्तिधातुगतस्यककारस्यगकारादेशंकृत्वातमादत्ते यद्वा दहतिधातुजन्याद्दग्धशब्दाद्गकारमादत्ते नीरितिनयतिधातुः सचह्रस्वो-

---

१ तै० सं. २. ५. ९.। २नि०.७.१४. ३ ऐ० ब्रा० १: ४.। ४ ऐतरेयब्राह्मणे१. १. ५ तै० ब्रा० २. ४. ३.। ६ तै० सं. ५. ५. १.।

भूत्वापरोभवति ततोधातुत्रयंमिलित्वाग्निशब्दोभवति यज्ञभूमिंगत्वास्वकीयमङ्गंनयति काष्ठदाहे हविःपाकेचप्रेरयतीतिसमुदायार्थः तस्याग्निशब्दार्थस्यदेवताविशेषस्यप्राधान्येनस्तुतिप्रदर्शनायैषाग्निमीळइतिऋग्भवतीति। तामेतामृचंयास्कएवंव्याख्यातवान्[1]—अग्निमीळेऽग्निंयाचामीळिरध्येषणाकर्मापूजाकर्मावापुरोहितोव्याख्यातोयज्ञश्च देवोदानाद्वादीपनाद्वाद्योतनाद्वाद्युस्थानोभवतीतिवायोदेवःसादेवताहोतारंह्वातारंजुहोतेर्होतेत्यौर्णवाभोरत्नधातमंरमणीयानांधनानांदातृतममिति[2]। अस्यायमर्थः-ईडतिधातोःस्तुत्यर्थत्वंप्रसिद्धम् धातूनामनेकार्थत्वमितिन्यायमाश्रित्य याच्ञाऽध्येषणापूजाअप्यत्रोचितत्वात् तदर्थतयाव्याख्याताः। पुरोहितशब्दोद्वितीयेऽध्याये यद्देवापिःशन्तनवेपुरोहितइत्येतामृचमुदाहृत्यपुरएनंदधतीतिव्याख्यातः। तैत्तिरीयाश्चपौरोहित्येस्पर्धमानस्यपश्वनुष्ठानंविधायतत्फलत्वेनपुरएनंदधतइत्यामनन्ति[3]। देवशब्दोदानदीपनद्योतनानामन्यतममर्थमाचष्टे यज्ञस्यदातादीपयिताद्योतयितायमग्निरित्युक्तंभवति दीपनद्योतनयोरेकार्थत्वेऽप्यस्तिधातुभेदः यद्यप्यग्निःपृथिवीस्थानस्तथापिदेवान्प्रतिहविर्वहनात् द्युस्थानोभवति देवशब्ददेवताशब्दयोः पर्यायत्वान्मन्त्रप्रतिपाद्याकाचिदग्निव्यतिरिक्तादेवतानान्वेषणीया होतृशब्दस्यह्वयतिधातोरुत्पन्नत्वेनदेवानामाह्वातारमिति और्णवाभनामकस्तुमुनिर्जुहोतिधातोरुत्पन्नोहोतृशब्दइतिमन्यते अग्नेश्चहोतृत्वंहोमाधिकरणत्वेनद्रष्टव्यम्। रत्नशब्दोद्वितीयाध्यायेमघमित्यादिष्वष्टाविंशतौधननामसुपठितः रमणीयत्वाद्रत्नत्वम् दधातिधातुरत्रदानार्थवाचीति तदिदंनिरुक्तकारस्ययास्कस्यमन्त्रव्याख्यानम्॥ अथव्याकरणप्रक्रियोच्यते—अगिधातोर्गत्यर्थादङ्गेर्नलोपश्चेत्युणादिसूत्रेणनिप्रत्ययः इदित्वान्नुमागमेनप्राप्तस्यनकारस्यलोपश्चभवति अङ्गतिस्वर्गंगच्छतिहविर्नेतुमित्यग्निः तत्रधातोरित्यकारउदात्तः आद्युदात्तश्चेतिप्रत्ययगतइकारोऽप्युदात्तः अनुदात्तंपदमेकवर्जमितिद्वयोरन्यतरमुदात्तमवशेष्येतरस्यानुदात्तत्वंप्राप्तम् तत्रधातुस्वरेप्रथमतोऽवस्थितेसतिपश्चादुपदिश्यमानःप्रत्ययस्वरोऽवशिष्यते सतिशिष्टःस्वरोबलीयानितिहिन्यायः ततोऽन्तोदात्तमग्निप्रातिपदिकम् अनुदात्तौसुप्पितावित्यमित्येतद्द्वितीयैकवचनमनुदात्तम् तस्यामिपूर्वइतियत्पूर्वरूपंतदुदात्तम् एकादेशउदात्तेनोदात्तइतिसूत्रितत्वात् अग्निशब्दोधातुजन्माइतिमतेसेयंप्रक्रियासर्वापिद्रष्टव्या। मतद्वयंयास्केनप्रदर्शितम्—नामान्याख्यातजानीतिशाकटायनोनैरुक्तसमयश्चनसर्वाणीतिगार्ग्योवैयाकरणानांचैकेइति[4]। गार्ग्यस्यमतेऽग्निशब्दस्याखण्डप्रातिपदिकत्वात् फिषोऽन्तउदात्तइत्यन्तोदात्तत्वम्। पूर्वोक्तेष्वग्रणीरित्यादिनिर्वचनेषुप्रकृतिप्रत्ययाद्यशेषप्रक्रियायथोचितंकल्पनीया एतदेवाभिप्रेत्ययास्कआह—अथनिर्वच-

---

१ नि० ७. १५। २ नि० २. १२। ३ तै० सं० २. १. २। ४ नि० १. १२।

नंतर्येषुपदेषुस्वरसंस्कारौसमर्थौप्रादेशिकेनगुणेनान्वितौस्याताम् तथातानिनिर्ब्रूयादथानन्विते-ऽर्थेप्रादेशिकेविकारेऽर्थनित्यःपरीक्षेत केनचिद्वृत्तिसामान्येनाविद्यमानेसामान्येप्यक्षरवर्णसा-मान्यान्निर्ब्रूयान्नत्वेवननिर्ब्रूयादिति[1] । अस्यायमर्थः—तत्रनिर्वचनीयपदसमूहमध्ये येष्वग्न्यादि पदेषुपूर्वोक्तरीत्यास्वरसंस्कारौसमर्थौव्याकरणसिद्धौस्याताम् स्वरउदात्तादिः संस्कारोनिप्रत्यया-दिः किञ्च तौस्वरसंस्कारौसमर्थौप्रादेशिकेनगुणेनान्वितौस्याताम्शब्दस्यैकदेशःपूर्वोक्तोऽगिधातुः प्रदेशः तत्रभवोगुणोगतिरूपोऽर्थः तेनान्वितौ तान्यग्न्यादिपदानितथाव्याकरणानुसारेणनिर्ब्रूयात् तच्चनिर्वचनमस्माभिःप्रदर्शितम् अथपूर्वोक्तवैलक्षण्येनकश्चित्स्वेनविवक्षितोऽर्थोनान्वितस्तस्मि-न्शब्देऽनुगतोनभवेत् तस्यैवव्याख्यानमप्रादेशिकेविकारेइति अग्रंनयनादिरूपःक्रियाविशेषोवि-कारः सचप्रदेशेनाग्निशब्दैकदेशेनांनाभिधीयतइत्यप्रादेशिकः एवंसतियःपुमानर्थनित्यः स्वविव-क्षितेऽर्थेनियतोनिर्बन्धवान्ब्राह्मणानुसारेणवादेवतान्तरविशेषणत्वेनयोजयितुंवासनिर्बन्धः तदा-नींसपुमान्केनचिद्वृत्तिसाम्येनस्वविवक्षितमर्थंपरीक्षेत तस्मिञ्छब्देयोजयेत् वृत्तिःक्रियातद्रूपेणसा-मान्यंसादृश्यम् अस्माभिश्चाग्रनयनादिरूपंक्रियात्वसाम्यमुपजीव्याग्रणीत्वाद्यर्थोयोजितः तदिदं यास्काभिमतंनिर्वचनम् स्थौलाष्ठीविरक्षरसाम्यान्निर्वक्ति—अक्नोपनशब्दस्यादौनिषेधार्थमकार-रूपमक्षरंविद्यते अग्निशब्दस्याप्यादावकारोऽस्ति तदिदमक्षरसाम्यम् । शाकपूणिस्तुवर्णसाम्या-न्निर्ब्रूते—दग्धशब्दाग्निशब्दयोर्गकारेणवर्णेनसाम्यम् सर्वथापिनिर्वचनंनत्याज्यमिति । ईळइत्ये-तत्पदंकृत्स्नमप्यनुदात्तम् तिङ्ङतिङइतिअतिङन्तादग्निशब्दात्परस्यतिङन्तस्यनिघातविधानात्प-दद्वयसंहिताकालेत्वीकारस्यधातुगतस्योदात्तादनुदात्तस्यस्वरितइतिस्वरितत्वम् तस्मादूर्ध्वभा-विनएकारस्यतिङ्प्रत्ययरूपस्यस्वरितात्संहितायामनुदात्तानामित्यैकश्रुत्यंप्रचयनामकंभवति । पुरःशब्दोऽन्तोदात्तः अयंपुरोभुवइत्यत्रतथैवाम्नातत्वात् पूर्वाधरावराणामसिपुरधवश्चैषामिति पूर्वशब्दादस्प्रत्ययःपुरादेशश्च ततोऽत्रप्रत्ययस्वरः धाञोनिष्ठायांदधातेर्हिरित्यादेशेसतिप्रत्य-यस्वरेणान्तोदात्तोहितशब्दः तत्रसमासान्तोदात्तत्वेप्राप्तेतदपवादत्वेनतत्पुरुषेतुल्यार्थेत्यादिनाव्य-यपूर्वपदप्रकृतिस्वरत्वम् यद्वा पुरोव्ययमितिगतिसंज्ञायांगतिरनन्तरइतिपूर्वपदप्रकृतिस्वरत्वम् तत्रौकारउदात्तः अवशिष्टानामनुदात्तस्वरितप्रचयाःपूर्ववद्द्रष्टव्याः आद्याक्षरस्यसंहितायां प्रचयप्राप्तावुदात्तस्वरितपरस्यसन्नतरइत्यतिनीचोनुदात्तः[3] । यजयाचेत्यादिनायजतेर्नङ्प्रत्यये-

---

१ नि०२.१. । २ तै०सं४.३२. । ३क्वचित्पुस्तकेनीचोनुदात्तइत्यग्रे 'यद्यपिपदकालेहितश-ब्दान्तर्गतस्यैकारस्यस्वरितत्वंदुर्लभं उदात्तपरत्वाभावात् मात्राह्रस्वस्तावदवग्रहान्तरमिति प्रा तिशाख्येवसानविधानात् तैत्तिरीयाअनुदात्तमेवाभिदधति तथापियथासंधीयमानानामनेकी-भवतांस्वरः उपदिष्टस्तथाविद्यादक्षराणामवग्रहेइतिप्रातिशाख्येऽभिदेशाद्दिष्टसिद्धिरस्त्यधिकम्

सत्यन्तोदात्तोयज्ञशब्दः विभक्तेःसुप्स्वरेणानुदात्तत्वेसतिपश्चात्स्वरितत्वम् । देवशब्दःपचाद्यज-न्तः सचफिट्स्वरेणप्रत्ययस्वरेणचित्स्वरेणवान्तोदात्तः । ऋत्विक्शब्दः ऋतौयजतीतिविग्रहेस-तिऋत्विग्दधृगितिनिपातितः गतिकारकोपपदात्कृदितिकृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः विभ-क्तिस्वरःपूर्ववत् । होतृशब्दस्तृन्प्रत्ययान्तोनित्स्वरेणाद्युदात्तः ञ्नित्यादिर्नित्यमितिस्वरितप्र-चयौपूर्ववत् । रत्नशब्दोनविषयस्यानिसन्तस्येत्याद्युदात्तः तथाचाम्नायते—रत्नंधत्तेति । रत्नानि-दधातीतिविग्रहः समासत्वादन्तोदात्तोरत्नधाशब्दः यद्वा कृदुत्तरपदप्रकृतिस्वरः तमप्प्रत्ययस्य पि-त्स्वरेणानुदात्तत्वेसतिस्वरितप्रचितौ संहितायामाद्याक्षरस्यप्रचयः द्वितीयाक्षरस्यसन्नतरत्वम् ॥ १ ॥

वेदावतारआद्यायाऋचोऽर्थश्चप्रपञ्चितः । विज्ञातंवेदगांभीर्यमथसङ्क्षिप्यवर्ण्यते ॥

१. यज्ञ के पुरोहित, दीप्तिमान्, देवों को बुलानेवाले ऋत्विक् और रत्नधारी अग्नि की मैं स्तुति करता हूँ।

आग्नेयसूक्तस्यद्वितीयामृचमाह—

अ॒ग्निः पूर्वे॑भि॒र्ऋषि॑भि॒रीड्यो॒ नूत॑नैरु॒त । स दे॒वाँ एह व॑क्षति ॥ २ ॥

अ॒ग्निः । पूर्वे॑भिः । ऋषि॑ऽभिः । ईड्यः॑ । नूत॑नैः । उ॒त । सः ।

दे॒वान् । आ । इ॒ह । व॒क्ष॒ति॒ ॥ २ ॥

अयमग्निः पूर्वेभिःपुरातनैर्भृग्वङ्गिरःप्रभृतिभिर्ऋषिभिरीड्यःस्तुत्यःनूतनैरुत इदानींतनै-रस्माभिरपिस्तुत्यः सोऽग्निःस्तुतःसन्निहयज्ञेदेवान्हविर्भुजआवक्षति वहप्रापणेइतिधातुः आवह-त्वित्यर्थः ॥ पूर्वेभिरित्यत्रबहुलंछन्दसीतिभिसऐसादेशाभावः पुर्वपर्वमर्वपूरणेइतिधातुः पूर्वविधातो-रन्प्रत्ययऔणादिकः । इन्प्रत्ययान्तऋषिशब्दः ऋष्यन्धकेतिनिपातनात्लघूपधगुणाभावः किन्प्र-त्ययोवात्रज्ञेयः तौशब्दौनित्स्वरेणाद्युदात्तौ । ईड्यशब्दस्यण्यत्प्रत्ययान्तत्वात्तित्स्वरितमितिस्वरिते शेषानुदात्तत्वेचप्राप्तेतदपवादत्वेनईडवन्देत्यादिनाआद्युदात्तत्वम् । नवशब्दस्यनूइत्यादेशस्तनन्प्र-त्ययश्चमहावार्तिकेविहितः ततोनित्स्वरेणाद्युदात्तः । अवशिष्टस्वराअग्न्यादिषुनूतनान्तेषुपूर्व-वदुन्नेयाः । उतशब्दोयद्यपिविकल्पार्थेप्रसिद्धः तथापिनिपातत्वेनानेकार्थत्वादौचित्येनात्रसमु-च्चयार्थोद्रष्टव्यः उच्चावचेष्वर्थेषुनिपतन्तीतिनिपातत्वम् । तर्हिनिपाताआद्युदात्ताइत्युकारस्योदात्तः प्राप्तइतिचेत्न प्रातःशब्दवदन्तोदात्तत्वात् यथाप्रातःशब्दोऽन्तोदात्तत्वेनैवस्वरादिषुपठितः एवमु-तशब्दस्यापिपाठोद्रष्टव्यः स्वरादेराकृतिगणत्वात् यद्वा एवादीनामन्तइत्यन्तोदात्तत्वम् सइत्य-त्रफिट्स्वरः । देवशब्दःपूर्ववत् देवानित्यस्यनकारस्यसंहितायांदीर्घादटीतिरुत्वम् अत्रानुना-सिकइत्यनुवृत्तौआतोटिनित्यमित्याकारःसानुनासिकः भोभगोइतिरोर्यकारः सचलोपःशा-कल्यस्येतिलुप्यते तदसिद्धत्वान्नपुनःसन्धिकार्यम् । आङोनिपातत्वादाद्युदात्तत्वम् । इदमो-

१ नि० १. ४.

ह्मत्ययेसतिनिष्पन्नत्वादिहशब्देप्रत्ययस्वरः । वहतिधातोर्लेडर्थेछान्दसोलट् तस्यप्रत्ययगत-स्ययकारस्यलोपोऽपिछान्दसः यद्वा लेटि सिब्बहुलमितिसिप्प्रत्ययः लेटोडाटावित्यडागमश्च ततोवक्षतीतिसंपद्यते तस्यतिङ्ङतिङइतितिङन्तत्वान्निघातः संहितास्वराःपूर्ववत् ॥ २ ॥

'आधानेतृतीयेऽष्टेभथमाज्यभागस्यानुवाक्यासूक्तगतातृतीया ।

२. प्राचीन ऋषियों ने जिसकी स्तुति की थी, आधुनिक ऋषि जिसकी स्तुति करते हैं, वह अग्नि देवों को इस यज्ञ में बुलावे।

अ॒ग्निना॑ र॒यिम॑श्नव॒त्पोष॑मे॒व दि॒वेदि॑वे । य॒शसं॑ वी॒रव॑त्तमम् ॥ ३ ॥

अ॒ग्निना॑ । र॒यिम् । अ॒श्न॒व॒त् । पोष॑म् । ए॒व । दि॒वेऽदि॑वे ।
य॒शस॑म् । वी॒रव॑त्ऽतमम् ॥ ३ ॥

योऽयंहोत्रास्तुत्योग्निः तेनाग्निनानिमित्तभूतेनयजमानोरयिंधनमश्नवत्प्राप्नोति कीदृशंरयिं दिवेदिवेपोषमेव प्रतिदिनंपुष्यमाणतयावर्धमानमेव नतुकदाचिदपिक्षीयमाणं यशसं दानादिना यशोयुक्तम् वीरवत्तमंअतिशयेनपुत्रभृत्यादिवीरपुरुषोपेतम् सतिहिधनेपुरुषाःसम्पद्यन्ते ॥ रयिश-ब्दोमघमित्यादिधननामसुपठितः तत्रफिट्स्वरः । अश्नोतेर्धातोर्लेटिव्यत्ययेनतिप् इतश्चलोपइती-कारलोपः लेटोडाटावित्यडागमः ततोऽश्नवदितिभवति तस्यनिघातः । घञन्तत्वात्पोषशब्द-आद्युदात्तः । एवशब्दस्यनिपातत्वेऽप्येवादीनामन्तइत्यन्तोदात्तत्वम् । वकारान्ताद्दिवृश-ब्दात्परस्याःसप्तम्याःसुपांसुलुगित्यादिनाशेभावेसतिसावेकाचइत्यादिनोडिदंपदादीत्यादिनावात-स्योदात्तत्वम् नित्यवीप्सयोरितिद्विर्भावेसत्युत्तरभागस्यानुदात्तंचेत्यनुदात्तत्वम् । यशोस्यास्तीति विग्रहेसत्यर्शआदिभ्योजित्यच्प्रत्ययः चित्स्वरंव्यत्ययेनबाधित्वामध्योदात्तत्वम् । फिट्स्वरेणान्तो-दात्ताद्वीरशब्दादुत्तरयोर्मतुप्तमपोःपित्वादनुदात्तत्वम् ह्रस्वनुड्भ्यामितिवतुन सावर्णान्तत्वान्नगो-श्वन्चितिप्रतिषेधः ॥ ३ ॥

अभिप्लवषडहस्यमध्यवर्तिषूक्थ्येषुतृतीयसवनेमैत्रावरुणस्याग्नेयंयज्ञमित्यादिकोवैकल्पि-कोऽनुरूपस्तृचः एतच्चसप्तमाध्यायेएह्यूष्वित्यादिखण्डेसूत्रितम्—अग्निंवोवृधन्तमग्नेयंयज्ञमध्व-रमिति । तस्मिंस्तृचेयामथमासासूक्तेचतुर्थी ॥

३. अग्नि के अनुग्रह से यजमान को धन मिलता है और वह धन अनुदिन बढ़ता और कीर्त्तिकर होता है तथा उससे अनेक वीर पुरुषों की नियुक्ति की जाती है।

अग्ने॒ यं य॒ज्ञम॑ध्व॒रं वि॒श्वतः॑ परि॒भूरसि॑ । स इद्दे॒वेषु॑ गच्छति ॥ ४ ॥

अग्ने । यम् । यज्ञम् । अध्वरम् । विश्वतः । परिऽभूः । असि ।
सः । इत् । देवेषु । गच्छति ॥ ४ ॥

हेअग्ने त्वंयंयज्ञंविश्वतः सर्वासुदिक्षुपरिभूःपरितःप्राप्तवानसि सइत्सएवयज्ञोदेवेषुतृप्तिंज-नयितुंस्वर्गेगच्छति प्राच्यादिचतुर्दिगन्तेष्वाहवनीयमार्जालीयगार्हपत्याग्नीध्रीयस्थानेष्वग्निरस्ति परिशब्देनहोत्रीयादिधिष्ण्यव्याप्तिर्विवक्षिता कीदृशंयज्ञं अध्वरं हिंसारहितम् नह्यग्निना सर्वतःपालितंयज्ञंराक्षसादयोहिंसितुंप्रभवन्ति ॥ अग्निशब्दस्यषाष्ठिकमामन्त्रिताद्युदात्तत्वम् । न-विद्यतेऽध्वरोस्येतिबहुव्रीहौ नञ्सुभ्यामित्यन्तोदात्तत्वम् । विश्वतइत्यत्रतसिलःप्रत्ययस्वरत्वं बाधित्वापूर्ववर्णस्यलितीत्युदात्तत्वम् । परिभूरित्यत्राव्ययपूर्वपदप्रकृतिस्वरत्वेप्राप्ते तदपवादत्वेन कृदुत्तरपदप्रकृतिस्वरत्वम् । असीतितिङन्तस्ययद्वृत्तान्नित्यमितिनिघाताभावः ॥ ४ ॥

४. हे अग्निदेव! जिस यज्ञ को तुम चारों ओर से घेरे रहते हो, उसमें राक्षसादि-द्वारा हिंसा-कर्म सम्भव नहीं है और वही यज्ञ देवों को तृप्ति देने स्वर्ग जाता है या देवताओं का सामीप्य प्राप्त करता है।

अग्निर्होताकविक्रतुःसत्यश्चित्रश्रवस्तमः । देवोदेवेभिरागमत् ॥५॥१॥

अग्निः । होता । कविऽक्रतुः । सत्यः । चित्रश्रवःऽतमः । देवः ।
देवेभिः । आ । गमत् ॥ ५ ॥ १ ॥

अयमग्निर्देवोन्यैर्देवेभिर्देवैर्हविर्भोजिभिःसहागमत् अस्मिन्यज्ञेसमागच्छतु कीदृशोग्निः हो-ताहोमनिष्पादकः कविक्रतुः कविशब्दोऽत्रक्रान्तवचनोनतुमेधाविनाम क्रतुः प्रज्ञानस्यकर्मणोवा नाम ततः क्रान्तप्रज्ञःक्रान्तकर्मावा सत्यः अनृतरहितःफलमवश्यंप्रयच्छतीत्यर्थः चित्रश्रवस्तमः श्रूयतइतिश्रवःकीर्तिः अतिशयेनचित्रकीर्तियुक्तः ॥ कविक्रतुः चित्रश्रवस्तमइत्यत्रोभयत्रब-हुव्रीहित्वात्पूर्वपदप्रकृतिस्वरत्वम् । सत्सुसाधुःसत्यः सत्यादशपथेइत्यत्रान्तोदात्तोहरदत्तेननिपा-तितः । लोडन्तस्यगच्छत्वितिशब्दस्यछत्वाभावउकारलोपश्चछान्दसः ततोरूपंगमदितिभवति । स्पष्टमन्यत् ॥ ५ ॥

इत्यृक्संहितायांविदार्थप्रकाशेप्रथमकाण्डस्यप्रथमाध्यायस्यप्रथमोवर्गः ॥ १ ॥

५. हे अग्नि! तुम होता, अशेषबुद्धिसम्पन्न या सिद्धकर्मा, सत्य-परायण, अतिशय कीर्त्ति से युक्त और दीप्तिमान् हो। देवों के साथ इस यज्ञ में आओ।

यदङ्गदाशुषेत्वमग्नेभद्रंकरिष्यसि । तवेत्तत्सत्यमङ्गिरः ॥ ६ ॥

यत् । अङ्ग । दाशुषे । त्वम् । अग्ने । भद्रम् । करिष्यसि ।
तव । इत् । तत् । सत्यम् । अङ्गिरः ॥ ६ ॥

अङ्गेत्यभिमुखीकरणार्थोनिपातः अङ्गाग्नेहेअग्ने त्वंदाशुषेहविर्दत्तवतेयजमानायत्वमी-त्यर्थंयद्भद्रंवित्तगृहप्रजापशुरूपंकल्याणंकरिष्यसितद्भद्रंतवेव तवैवसुखहेतुरितिशेषः हेअङ्गि-रोऽग्ने एतच्चसत्यं नत्वत्रविसंवादोऽस्ति यजमानस्यवित्तादिसम्पत्तौसत्यामुत्तरक्रत्वनुष्ठानेनाग्नेरे-वसुखंभवति भद्रशब्दार्थंशाट्यायनिनःसमामनन्ति—यद्वैपुरुषस्यवित्तंतद्भद्रंगृहाभद्रंप्रजाभद्रं पशवोभद्रमिति ॥ अङ्गशब्दस्यनिपातत्वेप्यभ्यादित्वादन्तोदात्तत्वम् । दाशुषेदाश्वान्साह्वानिति-सूत्रेणदाशृदानेइतिधातोःक्वसुप्रत्ययोनिपातितः तत्रप्रत्ययस्वरः । आमन्त्रितस्याग्निशब्दस्यपदा-त्परत्वेनाष्टमिकानुदात्तत्वंनशङ्कनीयम् अपादादाविति पर्युदस्तत्वात् ततःषाष्ठिकमाद्युदात्तत्वमेव । भद्रशब्दस्यनविषयत्वेनाद्युदात्तत्वमसक्तावपिभदिकल्याणेइतिधातोरुपरिरक्प्रत्ययेननिपातनाद-न्तोदात्तत्वम् । अस्मिन्वाक्येयच्छब्दप्रयोगान्निपातैर्यद्यदिहन्तेतिनिघातेप्रतिषिद्धेऽस्यप्रत्यय-स्वरेणसतिशिष्टेनकरिष्यसिशब्दउपान्त्योदात्तः । तवेत्यत्रयुष्मदस्मदोर्ङसीत्याद्युदात्तत्वम् । अ-ङ्गिराअङ्गाराइतियास्कः । ऐतरेयिणोऽपिप्रजापतिदुहितृध्यानोपाख्यानेसमामनन्ति—येऽङ्गाराआ-संस्तेऽङ्गिरसोभवन्निति । तस्मादङ्गिरोनामकमुनिकारणत्वादङ्गाररूपस्याग्नेरङ्गिरस्त्वम् अत्रपदा-त्परत्वेनाष्टमिकानुदात्तत्वम् ॥ ६ ॥

अग्नीषोमप्रणयनेउपत्वाग्नइत्यादिकोऽनुवचनीयस्तृचः एतच्चब्राह्मणेसमाम्नातम्—उपत्वा-ग्नेदिवेदिवउपप्रियंपनिप्नतमितितिस्रश्चैकांचान्वाहेति । तस्मिंस्तृचेयाप्रथमासासूक्तेसप्तमी ।

६. हे अग्नि! तुम जो हविष्य देनेवाले यजमान का कल्याण-साधन करते हो, वह कल्याण, हे अङ्गिरः! वास्तव में तुम्हारा ही प्रीति-साधक है।

उप॑त्वाग्नेदि॒वेदि॑वे॒दोषा॑वस्तर्धि॒याव॒यम् । नमो॒भर॑न्त॒एम॑सि ॥७॥

उप॑ । त्वा॒ । अ॒ग्ने॒ । दि॒वेऽदि॑वे । दोषा॑ऽवस्तः । धि॒या । व॒यम् । नम॑ः । भर॑न्तः । आ । इ॒म॒सि॒ ॥ ७ ॥

हेअग्नेवयमनुष्ठातारोदिवेदिवेप्रतिदिनंदोषावस्तः रात्रावहनिर्च धियाबुद्ध्यानमोभरन्तः न-मस्कारंसंपादयन्तः उपसमीपेत्वाएमसि त्वामागच्छामः ॥ उपशब्दस्यनिपातस्वरः । त्वा-मौद्वितीयायाइतियुष्मच्छब्दस्यानुदात्तस्त्वादेशः । दोषाशब्दोरात्रिवाची वस्तइत्यहर्वाची द्वन्द्वसमासे कार्तकौजपादित्वादाद्युदात्तः सावेकाचइतिधियोविभक्तिरुदात्ता । नमइतिनिपातः । भरन्तइत्यत्रशपःपित्वाच्छतुर्लसार्वधातुकत्वाच्चानुदात्तत्वेसतिधातुस्वरःशिष्यते । इमसीत्यत्रेदन्तो-मसिरितिमसिरित्यादेशोनिघातश्च ॥ ७ ॥

७. हे अग्नि! हम अनुदिन, दिन-रात, अन्तस्तल के साथ तुम्हें नमस्कार करते-करते तुम्हारे पास आते हैं।

अष्टमीमृचमाह–

राजन्तमध्वराणांगोपामृतस्यदीदिविम्। वर्धमानंस्वेदमे ॥ ८ ॥

राजन्तम्। अध्वराणाम्। गोपाम्। ऋतस्य। दीदिविम्।
वर्धमानम्। स्वे। दमे ॥ ८ ॥

पूर्वमन्त्रेत्वामुपैमसिइत्यग्निमुद्दिश्योक्तम् कीदृशंत्वां राजन्तंदीप्यमानम् अध्वराणां राक्षसकृतहिंसारहितानांयज्ञानांगोपांरक्षकं ऋतस्यसत्यस्यावश्यंभाविनःकर्मफलस्यदीदिविंपौनःपुन्येनभृशंवाद्योतकम् आहुत्याधारमग्निंदृष्ट्वाशास्त्रप्रसिद्धंकर्मफलंस्मर्यते स्वेदमेस्वकीयगृहेयज्ञशालायांहविर्भिर्वर्धमानम् ॥ राजन्तं वर्धमानमित्यत्रोभयत्रपूर्ववद्धातुस्वरःशिष्यते । दीदिविशब्दस्याभ्यस्तानामादिरित्याद्युदात्तत्वम् । दमशब्दोवृषादित्वादाद्युदात्तः ॥ ८ ॥

८. हे अग्नि! तुम प्रकाशमान, यज्ञ-रक्षक, कर्मफल के द्योतक और यज्ञशाला में वर्द्धनशाली हो।

सनःपितेवसूनवेऽग्नेसूपायनोभव। सचस्वानःस्वस्तये ॥ ९ ॥ २ ॥

सः। नः। पिताऽइव। सूनवे। अग्ने। सुऽउपायनः। भव।
सचस्व। नः। स्वस्तये ॥ ९ ॥ २ ॥

हेअग्नेसत्वंनोऽस्मदर्थंसूपायनः शोभनप्राप्तियुक्तोभव तथानोस्माकंस्वस्तयेविनाशराहित्यार्थंसचस्व समवेतोभव तत्रोभयत्रदृष्टान्तः–यथासूनवेपुत्रार्थंपितासुप्रापःप्रायेणसमवेतोभवति तद्वत् ॥ अस्मच्छब्दादेशस्यनइत्येतस्यानुदात्तंसर्वमित्यनुदात्तत्वम्। चादयोऽनुदात्ताइतीवशब्दोऽनुदात्तः इवेननित्यसमासःपूर्वपदप्रकृतिस्वरत्वंचवक्तव्यमितिसमस्तःपितेवेतिशब्दोमध्योदात्तः । शोभनमुपायनंयस्येतिबहुव्रीहौ नञ्सुभ्यामित्यन्तोदात्तत्वम्। सचस्वेत्यत्रपदात्परत्वंनास्तीतिननिघातः लसार्वधातुकानुदात्तत्वेसतिधातुस्वरावशेषः ॥ ९ ॥

९. जिस तरह पुत्र पिता को आसानी से पा जाता है, उसी तरह हम भी तुम्हें पा सकें या तुम हमारे अनायास-लभ्य बनो और हमारा मंगल करने के लिए हमारे पास निवास करो।

अग्निमीळइत्यादिसूक्तमग्निष्टोमस्यप्रातरनुवाकेयथाविनियुक्तम् तथावायवायाहीत्यादयस्तृचाः प्रउगशस्त्रेविनियुक्ताः तत्रेदंचिन्त्यते शस्त्रंकिं देवतास्मरणरूपसंस्कारकर्म किंवाप्रधानकर्मेति[1] । तत्रपूर्वपक्षंजैमिनिःसूत्रयामास–स्तुतशस्त्रयोस्तुसंस्कारोयाज्यावद्देवताभिधानत्वादिति ॥ १ ॥ आज्यैःस्तुवतेपृष्ठैःस्तुवते प्रउगंशंसतिनिष्केवल्यंशंसतीतिश्रूयते । तत्रस्तु-

[1] किंवादृष्टफलंप्रधानकर्मेतिपाठःकस्मिंश्चित्पुस्तके. ।

तिःशंसनंचगुणिनिष्ठगुणाभिधानम् इन्द्रंस्यनुवीर्याणिमवोचमित्यत्रदृष्टत्वात् एवंसतियाज्यान्यायेनगुणिन्यादेवतायाअभिधायकत्वेनस्तुतशस्त्रयोःसंस्काररूपत्वमभ्युपेयम् । याज्यायास्तद्रूपत्वंदशमाध्यायस्यचतुर्थपादेदृष्टार्थलाभेननिर्णीतम् तद्वदत्रापि तुशब्दःप्रधानकर्मत्वंव्यावर्तयति । सिद्धान्तीतंपक्षंदूषयति—अर्थेनत्वपकृष्येतदेवतानामश्चोदनार्थस्यगुणभूतत्वादिति ॥ २ ॥ तुशब्देनसंस्कारत्वंवारयति संस्कारपक्षेप्रयोजनवशेनमन्त्रःस्वस्थानादपकृष्येत कुतःमन्त्रगतंदेवतावाचकंयदिन्द्रादिनामास्ति तच्चोदनयामन्त्ररूपयाप्रतिपाद्यस्यदेवतारूपस्यगुणभूतम् तस्माद्यत्रप्रधानभूतदेवतास्ति तत्रगुणभूतोमन्त्रोनेतव्यः तद्यथा माहेन्द्रग्रहसन्निधौ अभित्वा शूरेत्ययंप्रगाथआम्नातः । सचेन्द्रंप्रकाशयति नतुमहेन्द्रं ततोयत्रैन्द्रंकर्मतत्रायंप्रगाथोपकर्षणीयः तथासतिक्रमसन्निधीबाध्येयाताम् । तदेतत्सिद्धान्तिनाभिहितंदूषणंपूर्वपक्षीसमाधत्ते—वशावद्वागुणार्थंस्यादिति ॥ ३ ॥ वाशब्दःप्रगाथस्यान्यत्रनयनंवारयति मन्त्रेयदेतदिन्द्रशब्दाभिधानंतदेतन्महत्त्वगुणोपलक्षणार्थंस्यात् यथा सौवाएषासर्वदेवत्यायदजावशावायव्यामालभेतेत्यत्राजावशाशब्देनचोदितेकर्मणिछागशब्देनकेवलेनयुक्तानिगमाः वशात्वगुणमप्युपलक्षयन्ति तद्वत् तस्मान्महत्वगुणयुक्तेचोदितेकर्मणिनिर्गुणेनेन्द्रशब्देनाभिधानमविरुद्धम लोकेऽपिमहाराजेकेवलराजशब्दप्रयोगमपिपश्यामः। तदेतत्समाधानंसिद्धान्तीदूषयति—नश्रुतिसमवायित्वादिति ॥ ४ ॥ यदुक्तंवशान्यायेनराजन्यायेनवास्यग्रहस्येन्द्रोदेवतायुज्यतेइति तन्न देवतात्वस्यतद्धितश्रुतिसमवायित्वात् माहेन्द्रग्रहइत्यत्रसास्यदेवतेत्यस्मिन्नर्थेमहेन्द्राद्घाणौचेतिमहेन्द्रशब्दादण्प्रत्ययोविहितः तस्मान्महेन्द्रएवदेवतानत्विन्द्रः । विपक्षेबाधमाह—गुणश्चानर्थकइति ॥ ५ ॥ यदीन्द्रोदेवतास्यात्तदानीमैन्द्रग्रहइत्येतावतैवार्थावगतौ माहेन्द्रइतिमहत्त्वगुणोऽनर्थकःस्यात् चकारःपूर्वहेतुनासमुच्चयार्थः । हेत्वन्तरमाह—तथायाज्यापुरोरुचोरिति ॥ ६ ॥ इन्द्रमहेन्द्रयोर्देवतयोर्भेदे यथामहत्त्वगुणःसार्थकस्तथायाज्यापुरोऽनुवाक्ययोर्भेदोप्यस्मिन्नेवपक्षेउपपद्यते एन्द्रसानसिमित्यादिकेइन्द्रस्ययाज्यापुरोऽनुवाक्ये महाँइन्द्रोयओजसेत्यादिकेमहेन्द्रस्य । पूर्वपक्षिणोक्तेवशादृष्टान्तेवैषम्यमाह—वशायामर्थसमवायादिति ॥ ७॥ यावशाविधिवाक्येश्रुता तस्याएवनिगमेषुछागशब्देनव्यवहारोनविरुद्धः छागत्वलक्षणस्यार्थस्यवशायांसमवेतत्वात् तच्चप्रत्यक्षेणोपलभ्यते इन्द्रमहेन्द्रयोस्तुभेदउपपादितः तस्माद्विषमोदृष्टान्तः । एवंसंस्कारपक्षेप्रगाथस्यैन्द्रकर्मण्यपकर्षप्रसङ्गाच्चद्वारयितुंस्तोत्रशस्त्रयोःप्रधानकर्मत्वमितिसिद्धांतिनोमतम् । पुनरपिपूर्वपक्षीतदेतन्मतंनिराचष्टे—यत्रेतिवार्थवत्त्वा-

---

१ ऋ०सं० १. २. ३६. । २ ऋ० सं० ५. ३. २१. । ३ तै०सं० ३. ४. ३. । ४ ऋ० सं० १. १. १६. । ५ ऋ० सं० ५ ८. ९. ।

त्स्यादिति॥८॥वाशब्दः सिद्धान्तिमतव्यावृत्त्यर्थः यथैन्द्रंकर्मतत्रप्रगाथोनेतव्यः इत्ययमेवपक्षः स्या त् कुतः अर्थवत्त्वात् ऐन्द्रोमन्त्रइन्द्रंप्रकाशयितुंसमर्थइत्यर्थवान्स्यात् माहेन्द्रंतुप्रकाशयितुमसमर्थ- त्वादानर्थक्यंप्रगाथस्यप्रसज्येत तस्माद्देवताप्रकाशनरूपसंस्कारकर्मत्वमेवस्तोत्रशस्त्रयोर्युक्तमिति स्थितःपूर्वपक्षः। अथसिद्धान्तमाह—अपिवाश्रुतिसंयोगात्प्रकरणेस्तौतिशंसतीक्रियोत्पत्तिंविद- ध्यातामिति ॥ ९॥ अपिवेत्यनेनसंस्कारकर्मत्वंव्यावर्त्यते स्तौतिधातुःशंसतिधातुश्चेत्येतावुभा- वपिस्वप्रकरणेएवकस्याश्चित्प्रधानक्रियायाउत्पत्तिंविदध्याताम् कुतः श्रुतिसंयोगात् तयोर्धात्वो- र्वाच्योऽर्थःश्रुतिरित्युच्यते तत्संयोगःप्रधानकर्मत्वेसिध्यति तथाहिगुणिनमुपसर्जनीकृत्यतन्निष्ठानांगुणानांप्राधान्येनकथनंस्तुतिः योदेवदत्तः सचतुर्वेदाभिज्ञइत्युक्ते सर्वेजनाःस्तुतिंप्रत्यभिजानन्ति गुणस्योपसर्जनत्वेतुनस्तुतिःप्रतीयेत यश्चतुर्वेदाभिज्ञस्तमाकारयेत्युक्ते स्तुतिंनमन्यन्ते किंत्वाह्वानप्राधान्यमेवबुध्यन्ते एवं मन्त्रेष्वपियादेवतासेयमीदृशैर्गुणैरुपेतेतिगुणप्राधान्यंविवक्षायां मुख्यःस्तौतिधात्वर्थोविधीयते। त्वत्पक्षेतुयेयमीदृग्गुणयुक्तासेयंदेवतेतिदेवतास्मरणस्यप्राधान्यादियंस्तुतिर्नस्यात् ततः श्रुतिवशादेतेप्रधानकर्मणी। तथासतिदेवताप्रकाशनेतात्पर्याभावादैन्द्रोऽपिप्रगाथःस्वप्रकरणगतेमाहेन्द्रकर्मण्येवावतिष्ठते यद्दिदेवतानुस्मरणरूपंदृष्टप्रयोजनंनलभ्येत तर्ह्यदृष्टमस्तु प्रधानकर्मत्वेहेत्वन्तरमाह—शब्दपृथक्त्वाच्चेति ॥ १० ॥ द्वादशाग्निष्टोमस्यस्तोत्राणिद्वादशशस्त्राणि इत्यत्रद्वादशशब्देनस्तोत्राणांपृथक्त्वमवगम्यते देवताप्रकाशनपक्षेसर्वैरपिमन्त्रसङ्घैः कृतस्यप्रकाशनस्यैकत्वेनद्वादशसंख्यानस्यात् प्रधानकर्मणांत्वाज्यस्तोत्रपृष्ठस्तोत्रादिनामकानांभिन्नत्वात् द्वादशत्वसंख्योपपद्यते एवंशस्त्रवाक्येऽपियोज्यम्। विपक्षेबाधमाह—अनर्थकंचतद्वचनमिति ॥ ११॥ अग्निष्टुतिःश्रूयते आग्नेयाग्रहाभवन्तीति तत्रैवपुनरप्यन्यदुच्यते आग्नेयीषुस्तुवतेआग्नेयीःशंसन्तीतित्वत्पक्षेतद्वचनमनर्थकंस्यात् चोदकप्राप्तेषु स्तोत्रशस्त्रमन्त्रेष्वाग्नेयग्रहानुसारेणदेवतापदस्योहेसत्याग्नेयत्वसिद्धेः प्रधानकर्मपक्षेतुदेवताप्रकाशनरूपत्वाभावेनोहाभावात् आग्नेयमन्त्रान्तरविधिर्वचनमर्थवद्भवति पुनरपिहेत्वन्तरमाह—अन्यश्चार्थःप्रतीयतइति ॥ १२ ॥ संबद्धैस्तोत्रशस्त्रैरितिहाम्नातम् संबन्धश्चद्वयोर्भवतिनत्वेकस्य तस्मात्स्तोत्रशस्त्रयोरर्थभेदःप्रतीयते सचसंस्कारपक्षेनसंभवति देवताप्रकाशनरूपस्यार्थस्यैकत्वात् प्रधानकर्मपक्षेतुस्तोत्रकर्मशस्त्रकर्मचेत्यर्थभेदउपपद्यते यद्यपिष्टुञ्स्तुतौ शंसुस्तुतावित्येकार्थौ तथापि प्रगीतमन्त्रसाध्यंस्तोत्रम् अप्रगीतमन्त्रसाध्यंशस्त्रमितितयोर्भेदः। हेत्वन्तरमाह—अभिधानंचकर्मवदिति ॥ १३ ॥ यथाप्रधानकर्माग्निहोत्रंजुहोतीतिद्वितीयासंयोगेनाभिहितम् तथाप्रउगंशंसतीत्यभिधीयते अतस्तत्साम्यात्प्रधानकर्मत्वम्। हेत्वन्तरमाह—फलनिर्वृत्तिश्चेति ॥ १४ ॥ स्तुतस्यस्तुतमसीतिस्तोत्रानुमन्त्रणमाम्नायवाक्य-

शेषेस्तोत्रफलमेवाम्नातम् इन्द्रियावन्तोवनेमहिभक्षीमहिप्रजामिषमिति नतुदेवताप्रयुक्तंफल-माम्नातम् अतोनदेवतासंस्कारः किन्तु प्रधानकर्मेतिस्थितम् । अनेनतुनिर्णयेनप्रयो-जनंविकृतिषूहाभावः । संस्कारपक्षेतुयस्यांविकृतौदेवतान्तरं तत्रतद्वाचकंपदमूहनीयंस्यात् तन्माभूदितिप्रधानकर्मत्वमुक्तम् । एतच्चदशमाध्यायेसूत्रितम्—ग्रहाणांदेवतान्यत्वेस्तुतश-स्त्रयोःकर्मत्वादविकारःस्यादिति । अत्रसङ्ग्रहश्लोकौ—प्रउगंशंसतीत्यादौगुणतोनप्रधान-ता । दृष्टादेवस्मृतिस्तेनगुणतास्तोत्रशस्त्रयोः ॥ १ ॥ स्मृत्यर्थत्वेस्तौतिशंस्योर्धात्वोःश्रौ-तार्थबाधनम् । तेनादृष्टमुपेत्यापिप्राधान्यंश्रुतयेमतमिति ॥ २ ॥ अग्निष्टोमेसुत्यादिनेसूर्योदयात्पू-र्वंप्रेषितोहोताप्रातरनुवाकमनुब्रूयात् एतच्चैतरेयब्राह्मणेप्रपञ्चितम्—देवेभ्यःप्रातर्यावभ्योहोतरनु-ब्रूहीत्याहाध्वर्युरित्यादिब्राह्मणम् । तस्मिंश्चप्रातरनुवाकेऽग्निमीळइत्यादिसूक्तमन्तर्भूतम् तच्च-व्याख्यातम् । प्रातःसवने वैश्वदेवग्रहणादूर्ध्वंप्रउगशस्त्रंहोत्राशंसनीयम् तच्चशस्त्रंवायवाया-हीत्यादिसप्ततृचात्मकम् एतच्चब्राह्मणेग्रहोक्थमित्यादिखण्डेप्रपञ्चितम् । तथापञ्चमाध्यायेस्तो-त्रमग्रेशस्त्रादित्यादिखण्डेसूत्रितंच । अत्रेयमनुक्रमणिका—वायोवायव्यैन्द्रवायवमैत्रावरुणास्तृचाः अश्विनाद्वादशाश्विनैन्द्रवैश्वदेवसारस्वतास्तृचाःसप्तैताःप्रउगदेवताइति । अस्यायमर्थः—वायवायाहीत्यादिकंनवर्चंसूक्तम् अग्निंनवेत्यतोनवशब्दस्यानुवृत्तेः तत्राद्यस्तृचोवायुदेवता-कः द्वितीयऐन्द्रवायवदेवताकः तृतीयोमित्रावरुणदेवताकः अश्विनेत्यादिकंद्वादशर्चंसूक्तम् तत्राद्यस्तृचआश्विनः द्वितीयऐन्द्रः तृतीयोवैश्वदेवः चतुर्थःसारस्वतः तेषुतृचेषुप्रतिपाद्यावा-य्वादयःसरस्वत्यन्ताःसप्तसंख्याकाःप्रउगशस्त्रस्यदेवताइति । मधुच्छन्दसोऽनुवर्तनात्सएव ऋषिः तथैवानुवृत्त्यागायत्रंछन्दः वायव्येतृचेप्रथमाग्रहस्यैन्द्रवायवस्यैकापुरोनुवाक्या एतच्च ब्राह्मणेसमाम्नातम्—वायव्यापूर्वापुरोनुवाक्यैन्द्रवायव्युत्तरेति । तथासूत्रितंच—वायवायाहिदर्श-तेन्द्रवायूइमेसुताइत्यनुवाक्येइति ।

वायव्यतृचेप्रथमामृचमाह—

वायवायाहिदर्शतेमेसोमाअरंकृताः । तेषांपाहिश्रुधीहवम् ॥ १ ॥

वायो इति । आ । याहि । दर्शत । इमे । सोमाः । अरम्ऽकृताः ।

तेषाम् । पाहि । श्रुधि । हवम् ॥ १ ॥

दर्शतहेदर्शनीयवायो कर्मण्येतस्मिन्नायाहि आगच्छ त्वदर्थमिमेसोमाअरंकृताः अलं-

---

१ जैमिनीयसूत्रेद्वितीयाध्यायस्यप्रथमपादेपंचमाधिकरणे (२. १. ५.) ।
२ ऐ० ब्रा० २. १५. । ३ ऐ० ब्रा० ३. १. । ४ ऐ० ब्रा० २. २६. ।
४

कृताः अभिषवादिसंस्कारोऽलङ्कारस्तेषांतान्सोमान् यद्वा तेषामेकदेशमित्यध्याहारः पाहिस्व-कीयंभागंपिबेत्यर्थः तत्पानार्थंहवमस्मदीयमाह्वानंश्रुधिश्रृणु । अत्रयास्कः—वायवायाहिद-र्शनीयेमेसोमाअरङ्कृताअलङ्कृतास्तेषांपिबश्रृणुनोह्वानमिति[1] ॥ दर्शतेत्यत्र भृमृदृशीत्यादिसूत्रे-णातच्प्रत्ययऔणादिकः चित्त्वादन्तोदात्तस्यामन्त्रितानुदात्तत्वम् । अर्तिस्तुसुइत्यादिनामन्प्रत्य-यान्तस्यसोमशब्दस्यनित्स्वरः । अलमित्यत्रछान्दसोरेफादेशः अरङ्कृतशब्देसमासान्तोदात्तत्वं बाधित्वाऽव्ययपूर्वपदप्रकृतिस्वरमाप्तौभूषणेऽलमित्यलंशब्दस्यगतिसंज्ञायांगतिकारकेत्यादिनाकृ-दुत्तरपदप्रकृतिस्वरत्वेप्राप्ते तदपवादत्वेनगतिरनन्तरइतिपूर्वपदप्रकृतिस्वरत्वम् निपातत्वादलं-शब्दआद्युदात्तः । पाहीत्यत्रपिबादेशाभावश्छान्दसः । श्रुधीत्यत्रश्रुश्रृणित्यादिनाहेर्धिभावः तिङ्न्तादुत्तरस्यनिघातोनास्ति सेर्ह्यपिच्चेतिपित्त्वनिषेधात् अनुदात्तेनिवारितेप्रत्ययस्वरः । हवमित्यत्रह्वयतिधातोर्बहुलंछन्दसीतिसंप्रसारणेसत्युकारान्तत्वात् ऋदोरबित्यप्प्रत्ययः तस्यपि-त्त्वादनुदात्तेसतिधातुस्वरःशिष्यते । संहितायांश्रुधिइत्यस्यान्येषामपिदृश्यतेइतिदीर्घः ॥ १ ॥

१. हे प्रियदर्शन वायु! आओ। सोमरस तैयार है। इसे पान करो और पान के लिए हमारा आह्वान सुनो।

द्वितीयामृचमाह—

वायउक्थेभिर्जरन्तेत्वामच्छाजरितारः । सुतसोमाअहर्विदः ॥ २ ॥

वायो इति । उक्थेभिः । जरन्ते । त्वाम् । अच्छ । जरितारः । सुतऽसोमाः । अहःऽविदः ॥ २ ॥

हेवायोजरितारःस्तोतारः ऋत्विग्यजमानास्त्वामच्छत्वामभिलक्ष्य उक्थेभिराज्यप्रउ-गादिशस्त्रैर्जरन्तेस्तुवन्ति कीदृशाःसुतसोमाः अभिषुतेनसोमेनोपेताः अहर्विदः अहःशब्द-एकेनाह्नानिष्पाद्येष्वग्निष्टोमादिक्रतौवैदिकव्यवहारेणप्रसिद्धः क्रत्वभिज्ञाइत्यर्थः अर्चतिगायती-त्यादिषुचतुश्चत्वारिंशत्स्वर्चतिकर्मसुधातुषु जरते ह्वयतीतिपठितम् स्तुतेरप्यर्चनाविशेषत्वादौचि-त्येनात्रस्तुत्यर्थोजरतिधातुः ॥ अच्छशब्दस्यसंहितायांनिपातस्यचेतिदीर्घः । सुतसोमाइत्यत्रबहु-व्रीहित्वात्पूर्वपदप्रकृतिस्वरः । अहर्विदइत्यत्रसमासस्वरंबाधित्वातत्पुरुषेतुल्यार्थेतिद्वितीयापूर्वप-दप्रकृतिस्वरेप्राप्ते तदपवादत्वेनगतिकारकेतिकृदुत्तरपदप्रकृतिस्वरः ॥ २ ॥

२. हे वायुदेव! यज्ञज्ञाता स्तोता लोग अभिषुत या अभिषवादि संस्कार-रूप प्रक्रिया-विशेष-द्वारा परिशोधित सोमरस के साथ तुम्हारे उद्देश्य से स्तुति-वचन कहकर तुम्हारा स्तव करते हैं।

वायोतवप्रपृञ्चतीधेनाजिगातिदाशुषे । उरूचीसोमपीतये ॥ ३ ॥

वायो इति । तव । प्रऽपृञ्चती । धेना । जिगाति । दाशुषे । उरूची । सोमऽपीतये ॥ ३ ॥

[1] नि० १०.२०।

हेवायोतवधेनावाक्सोमपीतयेसोमपानार्थंदाशुषेदाश्वांसंदत्तवन्तंयजमानंजिगातिगच्छति हेयजमान त्वयादत्तंसोमंपास्यामीत्येवंवायुर्ब्रूतइत्यर्थः कीदृशीधेना प्रपृञ्चती प्रकर्षेणसोमसंपर्ककुर्वन्ती सोमगुणंवर्णयन्तीत्यर्थः उरूचीउरूनबहून्यजमानान्गच्छन्ती येयेसोमयाजिनस्तान्सर्वान्वर्णयन्तीत्यर्थः ॥ प्रपृञ्चतीत्यत्रशतुरनुमइतिङीबुदात्तः श्लोकःधारेत्यादिषुसप्तपञ्चाशत्सुवाङ्नामसु गणः धेना प्राइतिपठितम् । वर्तते अयतेइत्यादिषुद्वाविंशाधिकशतसंख्येषुगतिकर्मसु गातिजिगातीतिपठितम् । दाशुषइत्यत्रगत्यर्थकर्मणीतिचतुर्थी । उरूचीइत्यत्रगौरादित्वेनङीषिकृतेप्रत्ययस्वरः । सोमपीतयइत्यत्रबहुव्रीहित्वाभावेऽपिव्यत्ययेनपूर्वपदप्रकृतिस्वरः ॥ ३ ॥

३. हे वायु ! तुम्हारा सोमगुण-प्रकाशक वाक्य सोमरस पीने के लिए हव्यदाता यजमान और अनेक लोगों के निकट जाता है।

इन्द्रवायूइमेसुताउपप्रयोभिरागतम् । इन्दवोवामुशन्तिहि ॥ ४ ॥

इन्द्रवायू इति । इमे । सुताः । उप । प्रयःऽभिः । आ । गतम् । इन्दवः । वाम् । उशन्ति । हि ॥ ४ ॥

एतस्याऋचऐन्द्रवायवग्रहेद्वितीयापुरोऽनुवाक्यारूपेणविशेषविनियोगःपूर्वमेवोक्तः हेइन्द्रवायू भवदर्थमिमेसोमाःसुताअभिषुताः तस्माद्युवांप्रयोभिरन्नैरस्मभ्यंदातव्यैःसहउपागतम् अस्मत्समीपंप्रत्यागच्छतम् हियस्मादिन्दवःसोमावांयुवामुशन्ति कामयन्ते तस्मादागमनमुचितम् ॥ इन्द्रवायूशब्दस्यामन्त्रिताद्युदात्तत्वम् । प्रीणयन्तिभोक्तृनितिप्रयांस्यन्नानि प्रीञ्धातोरन्तर्भावितण्यर्थादसुन्प्रत्ययेसतिनित्स्वरः गमिधातोर्लोण्मध्यमपुरुषद्विवचनेबहुलंछन्दसीतिशपोलुकिसत्यनुदात्तोपदेशेत्यादिनामकारलोपः ततोगतमितिभवति । उन्दीक्लेदनेइतिधातोरुन्देरिच्चादेरित्युन्प्रत्ययः आद्याक्षरस्येकारादेशः ततइन्दुशब्दस्यनित्स्वरः सोमरसस्यद्रवत्वात्क्लेदनंसंभवति । युष्मच्छब्दादेशस्यवामित्येतस्यअनुदात्तंसर्वमपादादावित्यनुदात्तः । उशन्तीत्यस्यनिघाते हिचेतिसूत्रेणप्रतिषिद्धेसतिप्रत्ययस्वरः । हिशब्दस्यनिपातस्वरः॥४॥

४. हे इन्द्र और वायु ! दोनों अन्न लेकर आओ; सोमरस तैयार है; यह तुम दोनों की अभिलाषा करता है।

वायविन्द्रश्चचेतथःसुतानांवाजिनीवसू । तावायातमुपद्रवत् ॥ ५॥३॥

वायो इति । इन्द्रः । च । चेतथः । सुतानाम् । वाजिनीवसू इति वाजिनीऽवसू । तौ । आ । यातम् । उप । द्रवत् ॥ ५ ॥ ३ ॥

अत्रचकारेणान्यःसमुच्चीयते सन्निहितत्वाद्वायुरेव हेवायो त्वमिन्द्रश्चयुवामुभौसुतानामभिषुतान्सोमान्चेतथोजानीथः यद्वा अभिषुतानांसोमानांविशेषमित्यध्याहारः कीदृशौयुवांवाजिनीवसू वाजिनीशब्दोयद्यप्युषोनामसुपठितः तथाप्यत्रासंभवान्नगृह्यते वाजोऽ-

ष्णंतद्यस्यांहविःसन्ततावस्तिसावाजिनी तस्यांवसतइतिवौवाजिनीवसू आमन्त्रितत्वादनुदात्तः तौतथाविधौयुवांद्रवत्क्षिप्रमुपसमीपेआयातमागच्छतम् ॥ षड्विंशतिसंख्याकेषुक्षिप्रनामसुनुक्षिप्रंमक्षुद्रवदितिपठितम् तत्रफिट्स्वरः ॥ ५ ॥

५. हे वायु और इन्द्र ! तुम सोमरस तैयार जानो। तुम अन्नसहित हव्य में रहनेवाले हो। शीघ्र यज्ञ-क्षेत्र में आओ।

वायविन्द्रश्चसुन्वतआयातमुपनिष्कृतम्। मक्ष्वि१त्थाधियानरा ॥६॥

वायो इति। इन्द्रः। च। सुन्वतः। आ। यातम्। उप। निःऽकृतम्। मक्षु। इत्था। धिया। नरा ॥ ६ ॥

हेवायो त्वमिन्द्रश्च सुन्वतःसोमाभिषवंकुर्वतोयजमानस्यनिष्कृतंसंस्कर्तारं सोमंउपायातंआगच्छतम् नराहेनरौपुरुषौ पौरुषेणसामर्थ्येनोपेतौयुवयोरागतयोश्चसतोर्धियाअमुनाकर्मणामक्षुत्वरयासंस्कारःसंपत्स्यते इत्थासत्यम् ॥ वायोइत्यस्यामन्त्रितस्येतिषाष्ठिकमाद्युदात्तत्वम् । इन्द्रशब्दोऋज्रेन्द्रेत्यादिनारन्प्रत्ययान्तत्वेननिपातितोञ्नित्यादिर्नित्यमित्याद्युदात्तः । चशब्दश्चादयोऽनुदात्ताइत्यनुदात्तः । सुन्वतइत्यत्रशतुरनुमोनद्यजादीइतिविभक्तेरुदात्तत्वम् । निरित्येषसमित्येतस्यस्थानइवियास्कः। कृतशब्देआदिकर्मणिक्तर्तरिक्तः संस्कर्तुंप्रवृत्तइत्यर्थः कुगतिप्रादयइतिसमासे अव्ययपूर्वपदप्रकृतिस्वरत्वेप्राप्ते थाथघञ्क्ताजवित्रकाणामित्यन्तोदात्तः गतिरनन्तरइवितुनिसउदात्तत्वंनभवति तद्धिकर्मणिक्तेविहितम् निष्करोतीतिंनिष्कृदिति क्विबन्तव्याख्यानेतु गतिकारकोपपदात्कृदितिऋकारउदात्तःस्यात् । धिया सावेकाचस्तृतीयादिरितिविभक्तिरुदात्ता। नरा सुपांसुलुगित्यादिनासंबोधनद्विवचनस्यडादेशः पदात्परत्वादामन्त्रितस्येत्याष्टमिकोनिघातः ॥ ६ ॥

मित्रंहुवेइतिमैत्रावरुणस्तृचोगवामयनेआरंभणीयेचतुर्विंशेहनिप्रातःसवनेमैत्रावरुणस्यस्तोत्रियः तत्रैवाभिप्लवषडहेऽपिविनियुक्तः तथाचाश्वलायनेनचतुर्विंशेहोताजनिष्टेत्यादिखण्डे मित्रंवयंहवामहेमित्रंहुवेपूतदक्षमित्यादिसूत्रितम् तथाचाभिप्लवपृष्ठ्याहानीतिखण्डे—परिशिष्टानावापानुवृत्यमित्रंवयंहवामहेमित्रंहुवेपूतदक्षमितिच ।

६. हे वायु और इन्द्र ! सोमरस के दाता यजमान के सुसंस्कृत सोमरस के पास आओ। हे देवद्वय ! तुम्हारे आगमन से यह कर्म शीघ्र सम्पन्न होगा।

मित्रंहुवेपूतदक्षंवरुणंचरिशादसम्। धियंघृताचींसाधन्ता ॥ ७ ॥

मित्रम् ॥ हुवे। पूतऽदक्षम्। वरुणम्। च। रिशादसम्। धियम्। घृताचीम्। साधन्ता ॥ ७ ॥

१नि०१२.७.।

अहमस्मिन्कर्मणिहविःप्रदानायपूतदक्षंपवित्रबलंमित्रंहुवे तथारिशादसंरिशानांहिंसकानामदसमत्तारंवरुणंचहुवे आह्वयामि कीदृशौमित्रावरुणौ घृतमुदकमञ्चतिभूमिंप्रापयतियाधीर्वर्षणकर्मतां घृताचींधियं साधन्तासाधयन्तौकुर्वन्तौ ॥ मित्रशब्दःपुँल्लिङ्गः प्रातिपदिकस्वरेणान्तोदात्तः । हुवइतिह्वयतेर्बहुलंछन्दसीतिशपोलुकिसविह्वःसंप्रसारणमित्यनुवृत्तौबहुलंछन्दसीतिसंप्रसारणेउवङादेशः तिङ्ङतिङइतिनिघातः । पूतशब्दःप्रत्ययस्वरेणान्तोदात्तः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । वरुणशब्दः कृवृदारिभ्यउनन्नित्युनन्प्रत्ययान्तोनित्त्वादाद्युदात्तः। रिशन्तिहिंसन्तीतिरिशाःशत्रवः इगुपधज्ञाप्रीकिरःकइतिकः प्रत्ययस्वरेणोदात्तः तानत्तीतिरिशादाः तं सर्वधातुभ्योसुन्नित्यसुन्प्रत्ययेनित्स्वरेणोत्तरपदमाद्युदात्तम् कृदुत्तरपदप्रकृतिस्वरेण सएवावशिष्यते शेषनिघातेसतिएकादेशउदात्तेनोदात्तइतिसवर्णदीर्घोप्युदात्तएव । धीरितिश्रयइत्यादिषड्विंशतिकर्मनामसुपठितः प्रातिपदिकस्वरेणान्तोदात्तः । घृतमञ्चतीतिघृताची ऋत्विग्दधृगित्यादिना क्विनि अनिदितामितिनकारलोपः अञ्चतेश्चोपसंख्यानमितिङीप् अचइत्यकारलोपेचावितिदीर्घत्वम् । घृतशब्दोनब्विषयस्यानिसन्तस्येत्याद्युदात्तत्वंबाधित्वाघृतादीनांचेत्यन्तोदात्तः समासस्येत्यन्तोदात्तस्यापवादकं तत्पुरुषेतुल्यार्थेतिपूर्वपदप्रकृतिस्वरंबाधित्वा गतिकारकोपपदादित्युत्तरपदप्रकृतिस्वरेणान्तोदात्तस्यधात्वकारस्यलोपेसति अनुदात्तस्यचयत्रोदात्तलोपइतिङीपउदात्तत्वेप्राप्ते चावितिपूर्वपदान्तोदात्तत्वम् । साधन्ता राधसाधसंसिद्धावित्यस्मादन्तर्भावितण्यर्थाल्लटःशत्रादेशे श्नुंबाधित्वाव्यत्ययेनशप् अदुपदेशत्वादुपरिशत्प्रत्ययस्यलसार्वधातुकानुदात्तत्वम् द्विवीयाद्विवचनस्यशपश्चानुदात्तौसुप्पितावित्यनुदात्तत्वेधातोरितिधातुस्वरएवशिष्यते सुपांसुलुगित्यादिनाविभक्तेराकारादेशः ॥ ७ ॥

७. मैं पवित्र-बल मित्र और हिंसक-रिपु-विनाशक वरुण को यज्ञ में बुलाता हूँ। वे दोनों घृताहुति-दान-स्वरूप कर्म करते हैं।

ऋतेनमित्रावरुणावृतावृधावृतस्पृशा । क्रतुंबृहन्तमाशाथे ॥ ८ ॥

ऋतेन । मित्रावरुणौ । ऋतऽवृधौ । ऋतऽस्पृशा । क्रतुम् ।
बृहन्तम् । आशाथे इति ॥ ८ ॥

हेमित्रावरुणौयुवांक्रतुंप्रवर्तमानमिमंसोमयागंआशाथे आनशाथे व्याप्तवन्तौ केननिमित्तेनऋतेनअवश्यंभावितयासत्येनफलेनास्मभ्यंफलंदातुमित्यर्थः कीदृशौयुवांऋतावृधौ ऋतमित्युदकनाम[1] सत्यंवायज्ञंवेतियास्कः । उदकादीनामन्यतमस्यवर्धयितारौ अतएवऋतस्पृशाउदकादीन्स्पृशन्तौकीदृशंक्रतुंबृहन्तंअङ्गैरुपाङ्गैश्चातिप्रौढम् ॥ ऋतशब्दोघृतादित्वादन्तोदात्तः मित्रावरुणावित्यत्रमित्रश्चवरुणश्चेतिमित्रावरुणौ देवताद्वन्द्वेचेतिपूर्वपदस्यानङादेशः । ऋतस्यवर्धयितारा-

---

[1] नि० ४. १९.

वित्यर्थैन्तर्भाविण्यर्थाद्वृधेःक्विप् नहिवृतीत्यादिनापूर्वपदस्यदीर्घः । ऋतस्पृशा सुपांसुलुगिति
डादेशः मित्रावरुणावित्याद्यामन्त्रितत्रयस्यस्वस्वपूर्वपदात्परत्वादामन्त्रितस्येत्याष्टमिकोनिघातः।
ननुऋतेनेत्येतस्यसुबामन्त्रितेपराङ्गवत्स्वरेइतिपराङ्गवद्भावेनामन्त्रितानुप्रवेशात्पादादित्वेनपदादपर-
त्वेनवाष्टमिकनिघाताभावात् आमन्त्रितस्यचेत्याद्युदात्तेनभवितव्यमितिचेत् न पराङ्गवद्भाव-
स्यसुबामन्त्रिताश्रयत्वेनपदविधित्वात्समर्थःपदविधिरितिनियमात् इहचऋतेनमित्रावरुणावित्ये-
तयोराशाथेइत्याख्यातेनैवान्वयेनपरस्परमसामर्थ्यात् । यत्रपुनःपरस्परान्वयेनसामर्थ्यं त-
त्रपराङ्गवद्भावात्पादादेराद्युदात्तत्वंभवत्येव । यथामरुतांपितस्तदहंगृणामीति पृश्नोरुतिरित्यु-
तिप्रत्ययान्तत्वेनपृश्नियैवैपयसोमरुवोजाताइत्यादावन्तोदात्तोऽपिहिमरुच्छब्दोमरुतांपितरित्यत्र
सामर्थ्यात्पराङ्गवद्भावादेवाद्युदात्तोजातः । प्रकृतेतु ऋतेनेत्यस्यासामर्थ्यादेवनपराङ्गवद्भावइति
ऋतावृधावित्यत्रद्वितीयामन्त्रितस्यनिघातेकर्तव्येआमन्त्रितंपूर्वमविद्यमानवदितिप्रथमामन्त्रितेना -
विद्यमानवद्भवितव्यमितिचेत् भवतु अतएवतस्याव्यवधायकत्वादतेनेतिप्रथमपदात्परत्वेनैवद्वि-
तीयामन्त्रितंनिहन्यते यथाइमंमेगङ्गेयमुनेइत्यादौगङ्गेशब्दस्याविद्यमानवद्भावेऽपितस्याव्य-
वधायकत्वादेव मेइत्येतदेवपदमुपजीव्ययमुनेशब्दस्यनिघातः किञ्चप्रकृतेमित्रावरुणावित्याम-
न्त्रितंसामान्यवचनम् तस्यविशेषणतयाविशेषवचनमृतावृधाविति अतोनामन्त्रितेसमानाधि-
करणेसामान्यवचनमितिपूर्वस्याविद्यमानवद्भावप्रतिषेधादपिनिरन्तरायोद्वितीयस्यनिघातः ।
नन्वेवमप्यपादादावित्यनुवृत्तेः ऋतावृधेत्यस्यद्वितीयपादादित्वान्नभवितव्यंनिघातेन अतएव
हीमंमेगङ्गे इत्यत्रशुतुद्रिपदस्यपदात्परस्यामन्त्रितस्यापिपादादित्वादेवानिघातादाद्युदात्तत्वंजातम्
तद्वदत्रापिभवितव्यम् वक्तव्योवाविशेषइति । उच्यते—मित्रावरुणपदस्यसुबामन्त्रितइतिपराङ्ग-
वद्भावेनपरानुप्रवेशादेवऋतावृधेत्यस्यनपादादित्वम् शुतुद्रिपदमपितर्ह्येवमेवपूर्वस्यसरस्वतिपद-
स्यपराङ्गवद्भावेननपादादिरितिनिहन्येतेतिचेत् पराङ्गवद्भावस्तावत्सुबन्तमामन्त्रितंचाश्रित्यप्रवृत्तेः
पदविधिः अवस्तयोःसत्येवपरस्परान्वयेपराङ्गवद्भावेनभवितव्यम् समर्थःपदविधिरिति
नियमात् शुतुद्रिसरस्वतिपदयोश्चनपरस्परेणान्वयः किन्तुसचतेत्यनेनेत्यसामर्थ्यान्नपरा-
ङ्गवद्भावः प्रकृतेतु मित्रावरुणावृतावृधाइतिद्वयोरपिसामानाधिकरण्येनपरस्परान्वयादस्तिसा-
मर्थ्यमितिभवितव्यंपराङ्गवद्भावेन यथामरुतांपितरित्यत्रेतिविशेषः । नन्वतएवतर्हिमित्रा-
वरुणपदस्यपराङ्गवद्भावेनपादादित्वादपादादावितिपर्युदासादामन्त्रितनिघातोनस्यादितिचेत् न
पूर्वंसुबन्तंपरंचामन्त्रितमाश्रित्यायःस्वरःप्रवर्ततेतत्रसुबामन्त्रितइतिपराङ्गवद्भावः भवतिचैवंऋ-
तावृधपदनिघातइति तत्रपूर्वस्यपराङ्गवद्भावेनापादादित्वात्समवर्तते मित्रावरुणपदनिघातस्तु
पूर्वमेवपदमुपजीवति नपरमामन्त्रितमितिनपराङ्गवद्भावः । ननुपराङ्गवद्भाववन्निघातोऽपिपदवि-

धिरितिक्तेनेत्यनेनासामर्थ्यात् ततःपदात्परस्यमित्रावरुणपदस्यनस्यादितिचेत् न समानवाक्येनिघातयुष्मदस्मदादेशावक्तव्याइति निघातेपदविधावपिसमानवाक्यत्वमेवपर्याप्तम् न पराङ्गवद्भावत्परस्परान्वयोऽपीत्यलम् । क्रतुं कृञःकतुः प्रत्ययस्वरेणादिरुदात्तः । आशाथे आनशाथे छन्दसिलुङ्लङ्लिटइतिवर्तमानेलिट् नुडभावश्छान्दसः ॥ ८ ॥

८. हे यज्ञ-वर्द्धक और यज्ञ-स्पर्शी मित्र और वरुण ! तुम लोग, यज्ञ-फल देने के लिए, इस विशाल यज्ञ को व्याप्त किये हुए हो।

कवीनोमित्रावरुणातुविजातानाउरुक्षयां । दक्षंदधातेअपसम् ॥ ९ ॥ ४ ॥

कवी इति । नः । मित्रावरुणा । तुविऽजातौ । उरुऽक्षयां ।
दक्षम् । दधाते इति । अपसम् ॥ ९ ॥ ४ ॥

मित्रावरुणावेतौदेवौनोऽस्माकंदक्षंबलं अपसंकर्मच दधातेपोषयतः कीदृशौ कवी मेधाविनौ तुविजातौबहूनामुपकारकतयासमुत्पन्नौ उरुक्षयाबहुनिवासौ विप्रोधीरइत्यादिषुचतुर्विंशतिसंख्याकेषुमेधाविनामसुकविर्मनीषीतिपठितम् उरुतुवीत्येतौशब्दौद्वादशसुबहुनामसुपठितौ ओजःपाजइत्यादिषुअष्टाविंशतिसंख्याकेषुबलनामसुदक्षोवीड्वितिपठितम् अपसशब्दःषड्विंशतिसंख्याकेषुकर्मनामसुपठितः ॥ मित्रावरुणा मित्रशब्दःप्रातिपदिकस्वरेणान्तोदात्तः वरुणशब्दोनित्स्वरेणाद्युदात्तः द्वन्द्वे देवताद्वन्द्वेचेत्युभावप्यवशिष्येते । तुविजातौ बहूनामुपकारकतयातत्संबन्धित्वेनजातावितिषष्ठीसमासेसमासान्तोदात्तत्वम् चतुर्थीसमासेहि क्तेचेतिपूर्वपदप्रकृतिस्वरःस्यात् उरूणां बहूनांक्षयावुरुक्षयौ क्षिनिवासगत्योरितिधातोःक्षियंत्यस्मिन्नितिक्षयःइत्यधिकरणेएरजित्यच् प्रत्ययान्तस्यचितइत्यन्तोदात्तत्वेप्राप्तेक्षयोनिवासेइत्याद्युदात्तत्वंविहितम् समासेतु समासस्येत्यन्तोदात्तत्वंबाधित्वाकृदुत्तरपदप्रकृतिस्वरेणप्राप्तमुत्तरपदाद्युदात्तत्वम् यद्यपिथाथादिस्वरेणान्तोदात्तेनबाध्यते तथापिपरादिश्छन्दसिबहुलमितिउत्तरपदाद्युदात्तत्वंद्रष्टव्यम् । दक्षोदक्षतेरुत्साहकर्मणः घञ् ञित्त्वादाद्युदात्तः आप्यतेफलमनेनेत्यपःकर्म आपःकर्माख्यायांह्रस्वोनुट्चेत्यसुन्नन्तस्यापसस्पोरइत्यादौनित्त्वादाद्युदात्तस्याप्यपसुशब्दस्यात्रव्यत्ययेनप्रत्ययाद्युदात्तत्वम् ॥ ९ ॥

९. इन्द्र और वरुण बुद्धिसम्पन्न, जनहितकारी और विविध-लोकाश्रय हैं। वे हमारे बल और कर्म की रक्षा करें।

इतिप्रथमस्यप्रथमेचतुर्थोवर्गः ॥ ४ ॥

आश्विनस्तृचः प्रातरनुवाकस्यआश्विनेक्रतौविनियुक्तः तथाचसूत्रितम्—अथाश्विनएषोउषाःप्रातर्युजेतिचतस्रोऽश्विनायज्वरीरिषइति ।

अश्विनायज्वरीरिषोद्रवत्पाणीशुभस्पती । पुरुभुजाचनस्यतम् ॥१॥

अश्विना । यज्वरीः । इषः । द्रवत्पाणी इति द्रवत्ऽपाणी । शुभः । पती इति । पुरुऽभुजा । चनस्यतम् ॥ १॥

हेअश्विनाअश्विनौ युवामिषोहविर्लक्षणान्यन्नानिचनस्यतंइच्छतम् भुआथामित्यर्थः यद्यपिचनःशब्दोऽन्नवाची तथापि इषइत्यनेनसहनास्तिपुनरुक्तिदोषः इच्छामुपलक्षयितुं प्रयुक्तत्वात् वक्तव्यमुवाच स शुल्कापंकषतीत्यादौयथापुनरुक्त्यभावस्तद्वत् कीदृशीरिषःयज्वरीः यागनिष्पादिकाः कीदृशावश्विनौ द्रवत्पाणीहविर्ग्रहणायद्रवद्भ्यांधावद्भ्यांपाणिभ्यामुपेतौ शुभस्पतीशोभनस्यकर्मणःपालकौ पुरुभुजाविस्तीर्णभुजौबहुभोजिनौवा ॥ अश्विना आमंत्रितस्येतिषाष्ठिकमाद्युदात्तत्वम् । यज्वरीः यागकरणानामप्यन्नानांअसिञ्छनत्तीतिवत्स्वव्यापारेकर्तृत्वविवक्षया सुयजोर्ङ्वनिबितिङ्वनिप्प्रत्ययः वनोरचेतिङीप् तत्सन्नियोगेनरेफादेशःप्रत्ययद्वयस्यानुदात्तौसुप्पिताविन्यनुदात्तत्वात् धातुस्वरएवावशिष्यते । इषशब्देशसोऽनुदात्तत्वात्प्रातिपदिकस्वरएवावशिष्यते । द्रवन्तौधावन्तौपाणीययोः तयोःसंबोधनंद्रवत्पाणीइति तस्यामन्त्रिताद्युदात्तत्वम् नपुनराष्टमिकोनिघातः अपादादावितिप्रतिषेधात् इषइतिपूर्वपदस्यसुबामन्त्रितेइतिपराङ्गवद्भावेनमित्रावरुणावृतावृधावितिवदपादादित्वमितिचेत् न तत्रसामानाधिकरण्येनपरस्परान्वयात् इहत्विषोद्रवत्पाणीइत्यनयोः सरस्वतिशुतुद्रिपदवदसामर्थ्येनप्रयुक्तत्वात् । शुभइति शुभशुंभदीप्तावित्यस्यसम्पदादित्वाद्भावेक्विबन्तस्यषष्ठ्येकवचनम् षष्ठ्याःपतिपुत्रेतिविसर्जनीयस्यसत्वम् तस्यपतीइत्यामन्त्रितेपरतःपराङ्गवद्भावादामन्त्रिताद्युदात्तत्वम् नपुनराष्टमिकोनिघातः तस्मिन्कर्तव्येद्रवत्पाणीइतिपूर्वस्यामन्त्रितस्यामन्त्रितंपूर्वमविद्यमानवदित्यविद्यमानवद्भावेनपादादित्वादपादादावितिप्रतिषेधात् । ननुमित्रावरुणावृतावृधावितिवन्नामन्त्रितेसमानाधिकरणे इत्यविद्यमानवद्भावप्रतिषेधेनभवितव्यमितिचेत् न मित्रावरुणपदंहिसामान्यवचनमितियुक्तस्तस्याविद्यमानवत्त्वप्रतिषेधः द्रवत्पाणीपदंतुनतथेतिवैषम्यात् । पुरूविस्तीर्णौभुजौययोस्तौ आमन्त्रिताद्युदात्तत्वम् सुपांसुलुगितिडादेशः पुरुबहुभुजातेइतिवा । चनस्यतमित्यत्र चायतेरन्नेह्रस्वश्चेति चायृपूजानिशामनयोरित्यस्यासुन्प्रत्ययेआकारस्यह्रस्वेचानुकृष्टेनुडागमेचलोपोव्योर्वलीति यकारलोपेचनस्शब्दोऽन्ननामसुपठितः तदात्मनइच्छतीतिसुपआत्मनःक्यच् सनाद्यन्तेतिधातुत्वाल्लोण्मध्यमद्विवचनम् । क्यचःप्रत्ययस्वरेणान्तोदात्तत्वम् शपाएकादेशेकृतेएकादेशउदात्तेनोदात्तइत्युदात्तः उपर्याख्यातस्यलसार्वधातुकानुदात्तत्वेस्वरितत्वम् नचतिङ्ङतिङइतिनिघातःपूर्वस्यामन्त्रितस्याविद्यमानवद्भावेनपदात्परत्वात्पादादित्वाद्भावदप्राप्तेः ॥ १ ॥

१. हे क्षिप्रबाहु, सुकर्मपालक और विस्तीर्ण-भुज-संयुक्त अश्विद्वय ! तुम लोग यज्ञीय अन्न को ग्रहण करो ।

द्वितीयामृचमाह—

अश्विना पुरुदंससा नरा शवीरया धिया । धिष्ण्या वनतं गिरः ॥ २ ॥

अश्विना । पुरुऽदंससा । नरा । शवीरया । धिया । धिष्ण्या । वनतम् । गिरः ॥ २ ॥

अश्विनाहेअश्विनौयुवांगिरोऽस्मदीयाः स्तुतीर्धियाआदरयुक्तयाबुद्ध्यावनतंसंभजतम् स्वीकुरुतं कीदृशावश्विनौपुरुदंससाबहुकर्माणौ षड्विंशतिसंख्याकेषुकर्मनामसुदंसइतिपठितम् नरानेतारौ धिष्ण्याधाष्टर्च्ययुक्तौबुद्धिमन्तौवा कीदृश्याधिया शवीरयागतियुक्तयाअप्रतिहतप्रसरयेत्यर्थः ॥ अश्विनेत्याद्यामन्त्रितचतुष्टयस्यषाष्ठिकमामन्त्रिताद्युदात्तत्वंपादादित्वान्नाष्टमिकोनिघातः पुरुदंससेत्यपिहिपादादिरेवआमन्त्रितंपूर्वमविद्यमानवदितिपूर्वस्याविद्यमानवत्त्वात् नामन्त्रितेसमानाधिकरणेइतिपूर्वस्यसामान्यवचनत्वेननाविद्यमानवत्त्वमितिचेत् न अश्विशब्दवत्पुरुदंसस्शब्दस्याप्यश्विनोरेवरूढ्याप्रयुज्यमानतयासामान्यशब्दत्वात् सामान्यवचनंनाविद्यमानवदित्युक्ते अर्थात्परस्यविशेषवचनत्वावगमात् उभयोःसामान्यवचनत्वेपर्यायत्वेनपौनरुक्त्यात्सहाप्रयोगइतिचेत् न गुणविशेषसंकीर्तनवत्प्रसिद्धानेकनामविशेषसंबन्धसंकीर्तनस्यापिस्तुत्युपयोगेनसप्रयोजनत्वान्निष्प्रयोजनपुनर्वचनस्यैवपुनरुक्तत्वात् अश्विपुरुदंसस्शब्दयोरेकार्थवृत्तित्वेऽपिपर्यायत्वादेवप्रवृत्तिनिमित्तभेदाभावेनासामानाधिकरण्यादपिनाविद्यमानवत्त्वप्रतिषेधः भिन्नप्रवृत्तिनिमित्तानामेवह्येकस्मिन्नर्थेवृत्तिःसामानाधिकरण्यम् अश्विशब्दस्याश्वसंबन्धोनिमित्तम् पुरुदंसस्शब्दस्यतुबहुकर्मसंबन्धइतिप्रवृत्तिनिमित्तभेदइतिचेत् न तद्विद्वयंव्युत्पत्तिमात्रनिमित्तं नप्रवृत्तिनिमित्तम् व्युत्पत्तिनिमित्तभेदमात्रेणापिसामानाधिकरण्याभिधानेवृक्षमहीरुहशब्दयोरपितथात्वप्रसङ्गः अतएवहीडेरन्तेदितेसरस्वतिप्रियेप्रेयसिमहिविश्रुत्येतानितेऽघ्न्येनामानीत्यत्र सहस्रतमीप्रशंसोपयोगित्वेनेडादिशब्दानामेतानितेअघ्न्येनामानीतिवचनेनपर्यायाणामप्यनेकविशिष्टनामसंबन्धनिबन्धनस्तुत्यर्थत्वेनैवसहप्रयोगः स्तुत्युपयोगेनैवव्युत्पत्तिनिमित्तभेदविवक्षायामपिपर्यायत्वेनासामानाधिकरण्यादेवनामन्त्रितइतिनिषेधाभावादामन्त्रितंपूर्वमविद्यमानवदिति पूर्वंपूर्वस्याविद्यमानवत्त्वात्सर्वेषांषाष्ठिकमाद्युदात्तत्वम् तद्वन्नरेत्यत्रापि । कॄशॄपॄकटिपटिशौटिभ्यईरन्नित्यतईरन्नित्यनुवृत्तौबहुलवचनादन्यत्रापीत्यनेनशुश्रुगताविति धातोरीरन्प्रत्ययेकृतेसतिनित्त्वाच्छवीरयाशब्दआद्युदात्तः । धियेत्यत्रसावेकाचइतिविभक्तिरुदात्ता । वनतमित्यत्र शपःपित्त्वाल्लोण्मध्यमद्विवचनस्यलसार्वधातुकत्वाच्चवनषणसंभक्तावितिधातूदात्तत्वमेवशिष्यते नचविङ्कवि-

ङइतिनिघातः पूर्वामन्त्रितस्याविद्यमानवत्त्वेनपादादित्वात्। गिरः सुपोऽनुदात्तत्वेनप्रातिपदिकस्वरःशिष्यते ॥ २ ॥ तृतीयामृचमाह—

२. हे विविधकर्मा, नेता और पराक्रमशाली अश्विद्वय! आदर-युक्त बुद्धि के साथ हमारी स्तुति सुनो।

दस्रा॑युवाक॑वः सु॒ता नास॑त्या वृ॒क्तब॑र्हिषः। आया॑तंरुद्रवर्तनी ॥ ३ ॥

दस्रा॑। युवाक॑वः। सु॒ताः। नास॑त्या। वृ॒क्तऽब॑र्हिषः। आ। या॒त॒म्। रु॒द्र॒व॒र्त॒नी॒ इति॑ रुद्रऽवर्तनी ॥ ३ ॥

अत्राश्विनेत्यनुवर्तते हेअश्विनौआयातं अस्मिन्कर्मण्यागच्छतम् किमर्थमितितदुच्यते सुताः युष्मदर्थंसोमाः अभिषुताः तान्स्वीकर्तुमितिशेषः कीदृशावश्विनौदस्राशत्रूणामुपक्षपयितारौ यद्वा देववैद्यत्वेनरोगाणामुपक्षयितारौ अश्विनौवैदेवानांभिषजावितिश्रुतेः। नासत्या असत्यंअनृतभाषणंतद्रहितौ अत्रयास्कः—सत्यावेवनासत्यावित्यौर्णवाभः सत्यस्यप्रणेतारावित्याग्रायणइति। रुद्रवर्तनी रुद्रशब्दस्यरोदनंप्रवृत्तिनिमित्तम् यदरोदीत्तद्रुद्रस्यरुद्रत्वमितितैत्तिरीयाः। तद्यद्रोदयन्तितस्माद्रुद्राइतिवाजसनेयिनः। रुद्राणांशत्रुरोदनकारिणांशूरभटानांवर्तनिर्मार्गोघाटीरूपोययोस्तौरुद्रवर्तनी यथाशूराघाटीमुखेनशत्रून्रोदयन्ति तद्वद्देतावित्यर्थः युवाकवइत्यभिषुतसोमानांविशेषणम् वसतीवरीभिरेकधनाभिश्चाद्भिर्मिश्रिताइत्यर्थः वृक्तानिमूलैर्वर्जितानिबर्हींष्यास्तरणरूपाणियेषां सोमानांतेवृक्तबर्हिषः यद्वा भरताइत्यादिष्वष्टस्वृत्विङ्नामसुवृक्तबर्हिषइति तदानींतृतीयार्थेप्रथमा ऋत्विग्भिरभिषुताइत्यन्वयः॥ दस्रा आमन्त्रितस्येत्याद्युदात्तः। युवाकवः युमिश्रणे युवन्तिमिश्रीभवन्तिवसतीवरीप्रभृतिभिःश्रयणद्रव्यैरितियुवाकवः कटिकष्यादिष्वगणितस्यापियौतेर्बहुलग्रहणात्काकुप्रत्ययः तस्यकित्त्वेनगुणाभावादुवङादेशः प्रत्ययस्वरेणआकारउदात्तः नविद्यतेअसत्यमनयोरितिनासत्यौ नभ्राण्नपान्नवेदानासत्येत्यादिनाप्रकृतिवद्भावान्नञोनलोपाभावः पादादित्वेनानिघातादामन्त्रिताद्युदात्तत्वम्। वृक्तबर्हिषः वृक्तं मूलैर्वर्जितंबर्हिरास्तीर्णंयेषांसोमानांतेवृक्तबर्हिषः पूर्वपदप्रकृतिस्वरेणक्तप्रत्ययस्वरएवशिष्यते। आइत्यत्रोपसर्गाश्चाभिवर्जमित्युदात्तः। रुद्रवर्तनी आमन्त्रितस्यचेत्यामन्त्रितनिघातः॥ ३ ॥

३. हे शत्रुनाशन, सत्यभाषी और शत्रुदमनकारी अश्विद्वय! सोमरस तैयार कर छिन्न कुशों पर रक्खा हुआ है; तुम आओ।

इन्द्रायाहिचित्रभानोसु॒ताइ॒मेत्वा॒यवः। अण्वी॑भिस्तना॑पू॒तास॑ः ॥ ४ ॥

इन्द्र॑। आ। या॒हि॒। चि॒त्र॒भा॒नो॒ इति॑ चित्रऽभानो। सु॒ताः। इ॒मे। त्वा॒ऽयवः। अण्वी॑भिः। तना॑। पू॒तास॑ः ॥ ४ ॥

---

१ तै० सं० २.३.११.। २ नि० ६.१३.। ३ तै० सं० १.५.१.।

चित्रभानोचित्रदीप्तेहेइन्द्रअस्मिन्कर्मण्यायाहि आगच्छ सुताअभिषुताइमेसोमाः त्वायवः त्वांकामयमानावर्तन्ते अण्वीभिःअग्रुवइत्यादिषुद्वाविंशतिसंख्याकेष्वङ्गुलिनामसुअण्व्यइतिपठितम् ऋत्विजामङ्गुलिभिः सुताइत्यन्वयः किञ्च एतेसोमाः तनानित्यंपूतासःपूताःशुद्धाःदशापवित्रेणशोधितत्वात् इन्द्रशब्दंयास्कोबहुधानिर्वक्ति—इन्द्रइरांदृणातीतिवेरांददातीतिवेरांदधातीतिवेरांदारयतइति वेरान्धारयतइति वेन्दवेद्रवतइति वेन्दौरमतइति वेन्धेभूतानीतिवातद्यदेनंप्राणैःसमैन्धंस्तदिन्द्रस्येन्द्रत्वमिति विज्ञायतइदंकरणादित्याग्रायणइदंदर्शनादित्यौपमन्यवइन्दतेर्वैश्वर्यकर्मणइञ्छत्रूणांदारयितावाद्रावयितावादरयितावाचयज्वनामिर्ति । अस्यायमर्थः—दृविदारणेइतिधातुः इरामन्नमुद्दिश्यतन्निष्पादकजलसिध्यर्थंदृणातिमेघंविदीर्णंकरोतीतीन्द्रः । डुदाञ्दानेइतिधातुः इरामन्नंवृष्टिनिष्पादनेनददातीतीन्द्रः । धाञ्पोषणार्थः इरामन्नंतृप्तिकारणंसस्यंदधातिजलप्रदानेनपुष्णातीतीन्द्रः । इरामुत्पादयितुंकर्षकमुखेनभूमिंविदारयतीतीन्द्रः । पूर्वोक्तपोषणमुखेनेरांधारयतिविनाशराहित्येनस्थापयतीतीन्द्रः । इन्दुःसोमोवल्लीरसः तदर्थं यागभूमौद्रवतिधावतीतीन्द्रः । इन्दौयथोक्तेसोमेरमतेक्रीडतीतीन्द्रः । ञिइन्धीदीप्ताविति धातुः । भूतानिप्राणिदेहान्इन्धेजीवचैतन्यरूपेणान्तःप्रविश्यदीपयतीतीन्द्रः । एतदेवाभिप्रेत्यवाजसनेयिनआमनन्ति—इन्धोहवैनामैषयोऽयंदक्षिणेऽक्षन्पुरुषस्तंवाएतमिन्धंसन्तमिन्द्रइत्याचक्षतेपरोक्षेणपरोक्षप्रियाइवहिदेवाःप्रत्यक्षद्विषइति । तद्यदित्यादिकंब्राह्मणान्तरवाक्यम् । तत्रेन्द्रविषयेनिर्वचनमुच्यतेइतिशेषः यद्यस्मात्कारणादेनंपरमात्मरूपमिन्द्रंदेवं प्राणैर्वाक्चक्षुरादीन्द्रियैःप्राणापानादिवायुभिश्चसहितंसमैन्धन् उपासकाःध्यानेनसम्यक्प्रकाशितवन्तः तत्तस्मात्कारणादिन्द्रनामसंपन्नम् अस्मिन्पक्षेइध्यतेदीप्यतेइतिकर्मणिन्युत्पत्तिः । आग्रायणनामकोमुनिरिदंकरणादिन्द्रइतिनिर्वचनंमन्यते इन्द्रोहिपरमात्मरूपेणेदंजगत्करोति औपमन्यवनामकोमुनिरिदंदर्शनादिन्द्रइतिनिर्वचनमाह इदमित्यापरोक्ष्यमुच्यते विवेकेनहिपरमात्मानमापरोक्ष्येणपश्यति एतदेवाभिप्रेत्यारण्यकाण्डेसमाम्नायते—सएतमेवपुरुषंब्रह्मततमपश्यदिदमदर्शमिती[3] तस्मादिदन्द्रोनामेदन्द्रोहवैनामतमिदंद्रंसन्तमिन्द्रइत्याचक्षतेपरोक्षेणपरोक्षप्रियाइवहिदेवाइति । इदिपरमैश्वर्येइतिधातुः स्वमाययाजगद्रूपत्वंपरमैश्वर्यंतद्योगादिन्द्रः अनेनाभिप्रायेणश्रूयते—इन्द्रोमायाभिःपुरुरूपइति । इनशब्दस्येश्वरवाचकस्याकारलोपेसति नकारान्तमिनितिपदंभवति ञिभीभयेइतिधातुः सचपरमेश्वरःशत्रूणांदारयिताभीषयितेतीन्द्रः द्रुगताविति धातुः शत्रूणांद्रावयितापलायनंप्रापयितेतीन्द्रः यज्वनायागानुष्ठायिनामादरयिता भयस्यपरिहर्ताएवमेतानिनिर्वचनानिद्रष्टव्यानीति ॥ इन्द्रेत्यत्रामन्त्रिताद्युदात्तत्वम् ।

---

१ इरांदारयतीतिवेरांधारयतीतिवापाठः। २ नि० १०.८.। ३ ऋ०सं० ४.७.२३.।

आइत्यत्रनिपातत्वेनाद्युदात्तत्वम् । चित्रभानो पदात्परत्वादामन्त्रितनिघातः । त्वामि-च्छन्तीत्यर्थेयुष्मच्छब्दात्सुपआत्मनःक्यच् प्रत्ययोत्तरपदयोश्चेतिमपर्यन्तस्यत्वादेशः क्या-च्छन्दसीतिक्यजन्तादुप्रत्ययः त्वत् यवइतिमाप्तौयुष्मदस्मदोरनादेशेइत्यविभक्तावपिहल्लादौव्य-त्ययेनात्वम् उकारःप्रत्ययस्वरेणाद्युदात्तः । अणुशब्दःसौक्ष्म्यवाचकः तद्योगात्प्रकृतेअङ्गुली-षुवर्तते वोतोगुणवचनादितिङीषिमाप्तेव्यत्ययेनङीन् नित्वादाद्युदात्तः । तना इत्ययंनिपा-तोनित्यमित्यर्थे निपातत्वादाद्युदात्तः । पूतासः आज्जसेरसुगित्यसुक् ॥

४. हे विचित्र-दीप्ति-शाली इन्द्र! अँगुलियों से बनाया हुआ नित्य-शुद्ध यह सोमरस तुम्हें चाहता है; तुम आओ।

इन्द्रायाहिधियेषितोविप्रंजूतःसुतावंतः । उपब्रह्मांणिवाघतः ॥ ५ ॥

इन्द्रं । आ । याहि । धिया । इषितः । विप्रंऽजूतः । सुतऽवंतः ।
उपं । ब्रह्मांणि । वाघतः ॥ ५ ॥

हे इन्द्र त्वमायाहि अस्मिन्कर्मण्यागच्छ किमर्थं वाघतऋत्विजोब्रह्माणिवेदरूपाणिस्तो-त्राण्युपैतुं कीदृशस्त्वं धियास्मदीययाप्रज्ञयाइषितःप्राप्तःअस्मद्भक्त्याप्रेरितइत्यर्थः विप्रजूतः यथायजमानभक्त्याप्रेरितस्तथान्यैरपिविप्रैर्मेधाविभिर्ऋत्विग्भिःप्रेरितः कीदृशस्यवाघतःसुतावतः अभिषुतसोमयुक्तस्य केतइत्यादिषुएकादशसुप्रज्ञानामसुधीरितिपठितम् चतुर्विंशतिसंख्याकेषुमे-धाविनामसुविप्रोधीरइतिपठितम् भरताइत्यादिष्वष्टस्वृत्विङ्नामसुवाघतइतिपठितम् ॥ इषितइत्य-त्रेषगताविस्यस्मान्निष्ठायामिडागमः आगमाअनुदात्ताः इतीटोनुदात्तत्वात् क्तस्वरःशिष्यते। विप्रजूतः डुवबीजतन्तुसन्तानेइतिधातोः ऋज्रेन्द्राग्रवज्रविप्रेत्यादिनारन्प्रत्ययान्तोविप्रशब्दोनिपा-तितः निपातनादुपधायाइकारोलघूपधगुणाभावश्च नित्त्वादाद्युदात्तः तैर्जूतःप्राप्तःजूइतिसौत्रोधा-तुर्गत्यर्थः श्र्युकःकितीतीट्प्रतिषेधःतृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरत्वम्। सुतावतः छान्दसंदी-र्घत्वम् मतुपोऽनुदात्तत्वात् क्तप्रत्ययस्वरएवशिष्यते । ब्रह्माणि नब्विषयस्यानिसन्तस्येत्याद्यु-दात्तः । वाघतशब्दऋत्विङ्नामसुपठितः प्रातिपदिकस्वरः ॥

---

५. हे इन्द्र! हमारी भक्ति से आकृष्ट होकर और ब्राह्मणों-द्वारा आहूत होकर सोम-संयुक्त वाघत् नाम के पुरोहित की प्रार्थना ग्रहण करने आओ।

इन्द्रायाहितूतुंजानउपब्रह्मांणिहरिवः । सुतेदंधिष्वनश्चनंः ॥ ६ ॥

इन्द्रं । आ । याहि । तूतुंजानः । उपं । ब्रह्मांणि । हरिऽवः । सुते ।
दधिष्व । नः । चनंः ॥ ६ ॥ ५ ॥

हरिशब्दइन्द्रसंबन्धिनोरश्वयोर्नामधेयम् हरीइन्द्रस्यरोहितोऽग्नेरितितदीयाश्वनामत्वेनपठितत्वात् हेहरिवः अश्वयुक्तेन्द्र त्वं ब्रह्माण्युपैतुमायाहि कीदृशस्त्वंतूतुजानः त्वरमाणः आगत्यचास्मिन्सुतेसोमाभिषवयुक्तेकर्मणिनोस्मदीयंचनोऽन्नंहविर्लक्षणंदधिष्वधारय स्वीकुर्वित्यर्थः ॥ तूतुजानःतुजेर्लिटि लिटःकानज्वेतिकानजादेशः तुजादीनांदीर्घोभ्यासस्येत्यभ्यासस्यदीर्घत्वम् । अभ्यस्तानामादिरित्याद्युदात्तत्वम् । हरिवइत्यत्रहरयोऽस्यसन्तीतिमतुपिछन्दसीरइतिमकारस्यवत्वम् संबुद्धौउगिदचामितिनुम् संयोगान्तलोपेनकारस्यमतुवसोरुसंबुद्धौछन्दसीतिरुत्वम् आष्टमिकोनिघातः । ब्रह्माणीत्यस्यहरिवइत्यनेनासामर्थ्यात्समर्थःपदविधिरितिनियमात्सुबामन्त्रितेइतिपराङ्गवद्भावाभावेनामन्त्रितनिघाताभावादाद्युदात्तत्वेसत्युपेत्यकारस्यसन्नतरः। दधिष्वेत्यत्रदधातेर्लोटिथास् थासःसे सवाभ्यांवामावित्येकारस्यवादेशः छन्दस्युभयथेति सार्वधातुकार्धधातुकसंज्ञयोःसत्योः सार्वधातुकत्वेनशपितस्यश्लौचद्विर्भावः आर्धधातुकत्वेनेडागमश्च आतोलोपइटिचेत्याकारलोपः । चनः चायतेरन्नेह्रस्वश्चेत्यसुन्नन्तःचकारान्नुडागमेयलोपः ॥ ६ ॥

६. हे अश्वशाली इन्द्र! हमारी प्रार्थना सुनने शीघ्र आओ। सोमरस-संयुक्त यज्ञ में हमारा अन्न धारण करो।

ओमा॑सश्चर्षणीधृतो॒विश्वे॑देवास॒आग॑त । दा॒श्वांसो॑दा॒शुष॑ःसुतम् ॥ ७ ॥

ओमा॑सः । च॒र्ष॒णि॒ऽधृ॒तः । विश्वे॑ । दे॒वा॒स॒ः । आ । ग॒त ।
दा॒श्वांस॑ः । दा॒शुष॑ः । सु॒तम् ॥ ७ ॥

हेविश्वेदेवासः एतन्नामकादेवविशेषाः दाशुषोहविर्दत्तवतोयजमानस्यसुतमभिषुतंसोमं प्रतिआगत आगच्छत तेचदेवाः ओमासोरक्षकाः चर्षणीधृतोमनुष्याणांधारकाः दाश्वांसः फलस्यदातारः मनुष्याइत्यादिषुपञ्चविंशतिसंख्याकेषुमनुष्यनामसु चर्षणिशब्दःपठितः अश्विनावित्यादिष्वेकत्रिंशत्संख्याकेषुदेवविशेषनामसु विश्वेदेवाःसाध्याइतिपठितम् एतामृचंयास्कएवंव्याख्यातवान्—अवितारोवावनीयावामनुष्यधृतःसर्वेचदेवाइहागच्छतदत्तवन्तोदत्तवतःसुतमितितदेतदेकमेववैश्वदेवंगायत्रंतृचंदशतयीषुविद्यतेयत्तुकिंचिद्बहुदैवतंतद्वैश्वदेवानांस्थानेयुज्यतेयदेवविश्वलिङ्गमितिशाकपूणिरिति[1] ॥ अत्रविश्वशब्दःसर्वशब्दपर्यायइतियास्कस्यमतम् देवविशेषस्यैवासाधारणंलिङ्गमितिशाकपूणेर्मतम् अवन्तीत्योमासोदेवाः मन्नित्यनुवृत्तौ अविसिविशुषिभ्यःकिदितिमन्प्रत्ययः ज्वरत्वरस्रिव्यविमवामुपधायाश्चेत्यूठ् मनःकित्त्वेपिबाहुलकाद्गु-

१ नि० १२. ४० ।

णः आज्जसेरसुगितिजसेरसुगागमः आमन्त्रितायुदात्तत्वम् । चर्षणयोमनुष्याः तान्वृष्टिदा-
नादिनाधारयन्तीतिचर्षणीधृतोदेवाः पूर्वंस्यामन्त्रितस्यसामान्यवचनस्यविभाषितंविशेषवचनेब-
हुवचनमित्यविद्यमानवत्त्वप्रतिषेधादपादादित्वेननिघातः नन्वतएवविद्यमानवत्त्वात्सुबामन्त्रिते-
इतिपराङ्गवत्त्वेनैकपदीभावात्पदादपरत्वेनकथंनिघातइतिचेत् न तत्करणंस्वाश्रयमपियथास्या-
दितिवचनात्पदभेदप्रयुक्तस्यनिघातस्याप्युपपत्तेः ऐकपद्येप्याद्युदात्तत्वेऽनुदात्तंपदमेकवर्जमिति
सुतरामेवनिघातोभविष्यति इत्थमेवतर्हिद्रवत्पाणीशुभस्पतीइत्यत्रापिपराङ्गवत्त्वेनैकपद्यादुत्तर-
स्यशेषनिघातप्रसङ्गइतिचेत् न तत्रपराङ्गवद्भावस्यपरेणामन्त्रितंपूर्वमविद्यमानवदित्यविद्यमान-
वद्भावेनबाधितत्वात् इहपुनर्विभाषितंविशेषवचनेबहुवचनमित्यविद्यमानत्वस्यनिषेधात्पूर्वस्या-
प्यामन्त्रितस्यविद्यमानवत्त्वात्पराङ्गवत्त्वंस्वीकृतमितिवैषम्यम् । विश्वे पादादित्वादाद्युदात्तः
गणदेवतावचनश्चात्रविश्वशब्दोनसर्वशब्दपर्यायइतिविशेष्यपरतयासामान्यवचनत्वादोमासइत्य-
नेनासामानाधिकरण्यम् सामानाधिकरण्येहिपूर्वस्यपादस्यपराङ्गवद्भावेसतिमित्रावरुणावृतावृ-
धावित्यादाविवात्राप्यामन्त्रितायुदात्ततानस्यात् विश्वेइत्यस्यविशेषणंदेवासइति दीव्यन्तीतिदेवाः
प्रकाशवन्तः नन्ववयवप्रसिद्धेःसमुदायप्रसिद्धिर्बलीयसीतिरूढएवार्थोदेवशब्दस्यग्राह्योनयौगिकः
यौगिकत्वेह्यवयवार्थानुसन्धानव्यवधानेनप्रतिपत्तिर्विक्षिप्तास्यात् समुदायप्रसिद्धौतुनविक्षेपइति
चेत् न समुदायप्रसिद्धौहिदेवशब्दस्यसामान्यपरतयाविशेषवचनत्वाभावाद्विभाषितंविशेषव-
चनेबहुवचनं इत्यनेनानिषिद्धत्वाद्विश्वेइत्यस्याविद्यमानवत्त्वेनशुभस्पतीइतिवद्देवासइत्य-
स्याप्युदात्तत्वंस्यात् स्वरानुसारेणचरूढित्यागेनापिदेवशब्दस्ययोगस्वीकारोयुक्तएव । आगत
आगच्छत बहुलंछन्दसीतिशपोलुक्सतिअनुदात्तोपदेशेत्यादिनामकारलोपः आङः पदात्परत्वे-
ननिघातः । दाश्वांसः दाशृदानेइत्यस्यक्वसौ दाश्वान्साह्वान्मीढ्वांश्चेतिनिपातनात्क्रादिनियम-
प्राप्तइडागमोद्विर्वचनंचनभवति प्रत्ययस्वरेणक्वसोरुदात्तत्वम् । दाशुषइत्यत्रवसोःसंप्रसारणमि-
तिसंप्रसारणम् संप्रसारणाच्चेतिपूर्वरूपत्वम् शासिवसिघसीनांचेतिषत्वम् ॥ ७ ॥

७. हे विश्वेदेवगण! तुम रक्षक हो तथा मनुष्यों के पालक हो। तुम हव्यदाता यजमान के प्रस्तुत सोमरस के लिए आओ। तुम यज्ञ-फल-दाता हो।

विश्वे॑दे॒वासो॑अ॒प्तुरः॑सु॒तमाग॑न्त॒तूर्ण॑यः । उ॒स्राइ॑व॒स्वस॑राणि ॥ ८ ॥

विश्वे॑ । दे॒वासः॑ । अ॒प्ऽतुरः॑ । सु॒तम् । आ । ग॒न्त॒ । तूर्ण॑यः ।
उ॒स्राःऽइ॑व । स्वस॑राणि ॥ ८ ॥

विश्वेदेवासः एतन्नामकागणरूपादेवविशेषाः सुतंसोममागन्त आगच्छन्त आगच्छन्तु
कीदृशाः अप्तुरः तत्तत्कालेवृष्टिप्रदाइत्यर्थः तूर्णयः त्वरायुक्ताः यजमानमनुग्रहीतुमालस्यर-

हिताइत्यर्थः विश्वेषांदेवानां सोमंप्रत्यागमनेउस्राइत्यादिर्दृष्टान्तः उस्राः सूर्यरश्मयः स्वसरा-ण्यहानिप्रत्यालस्यरहितायथासमागच्छन्तितद्वत् खेदयइत्यादिषुपञ्चदशसुरश्मिनामसुउस्राः वसवइतिपठितम् वस्तोरित्यादिषुद्वादशस्वहर्नामसुस्वसराणिघ्रंसःघर्मइतिपठितम् तच्चपदं यास्केनव्याख्यातम्—स्वसराण्यहानिभवन्तिस्वयंसारीण्यपिवास्वरादित्योभवतिसएनानिसारय-तिउस्राइवस्वसराणीत्यपिनिगमोभवतीति ॥ देवासः पचाद्यजन्तश्चित्त्वादन्तोदात्तः । अप्तुरः तुरत्वरणे श्लुविकरणीतुतुरतित्वरयन्तीत्यर्थेक्विप्चेतिक्विप् गतिकारकोपपदात्कृदित्युत्तरपदप्रकृ-तिस्वरत्वम् । आगन्त आगच्छन्त्वित्यर्थेव्यत्ययेनमध्यमपुरुषबहुवचनं बहुलंछन्दसीतिशपोलुक् तस्यतप्तनप्तनथनाश्चेतितबादेशे अपिदितिप्रतिषेधादङित्त्वादनुनासिकलोपाभावः तिङ्ङतिङइति निघातः । ञित्वरासंभ्रमेइतिधातोस्त्वरन्तेइतितूर्णयः निदित्यनुवृत्तौ वहिश्रिश्रुयुद्रुग्लाहात्वरि-भ्योनिदितिनित्प्रत्ययः नित्त्वादाद्युदात्तः उस्राइवेत्यत्रइवेननित्यसमासोविभक्त्यलोपः पूर्वपदप्र-कृतिस्वरत्वंचेतिसमासेपूर्वपदप्रकृतिस्वरत्वम् । नित्यंसरतीतिसरःसूर्यः पचाद्यच् स्वः सरोये-षांतानिस्वसराणि अहानि बहुव्रीहौप्रकृत्यापूर्वपदमितिस्वशब्दआद्युदात्तः ॥ ८ ॥

८. जिस तरह सूर्य की किरणें दिन में आती हैं, उसी तरह वृष्टिदाता विश्वेदेव शीघ्र प्रस्तुत सोमरस के लिए आगमन करें ।

विश्वे॑दे॒वासो॑अ॒स्रिध॒एहि॑मायासोअ॒द्रुह॑ः । मेधं॑जुषन्त॒वह्न॑यः ॥ ९ ॥

विश्वे॑ । दे॒वास॑ः । अ॒स्रिध॑ः । एहि॑ऽमायासः । अ॒द्रुह॑ः । मेध॑म् । जु॒ष॒न्त॒ । वह्न॑यः ॥ ९ ॥

विश्वेदेवासएतन्नामकादेवविशेषाः मेधंहविर्यज्ञसंबन्धिजुषन्तसेवन्ताम् कीदृशाः अ-स्रिधः क्षयरहिताः शोषरहितावा एहिमायासः सर्वतोव्याप्तप्रज्ञाः यद्वा सौचीकमग्निमप्सुप्र-विष्टमेहिमायासीरितियदवोचन्तदनुकरणहेतुकोयंविश्वेषांदेवानांव्यपदेशएहिमायासइति अद्रु-होद्रोहरहिताः वह्नयोवोढारःधनानांप्रापयितारः स्रिधेःक्षयार्थस्यशोषणार्थस्यवासंपदादिभ्यो-भावेक्विपिनञ्बहुव्रीहिः पूर्वपदप्रकृतिस्वरंबाधित्वानञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । ए-हिमायासः ईहचेष्टायां आसमन्तादीहतेइत्येहिः इन्नितिसर्वधातुसाधारणइन्प्रत्ययोनित्त्वादा-द्युदात्तः एहिर्मायाप्रज्ञायेषामितिबहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् अथवा आङउदात्तादुत्तर-स्यइहीतिलोण्मध्यमैकवचनस्य तिङ्ङतिङइतिनिघातेएकादेशउदात्तेनोदात्तइत्येकारउदात्तः ए-हीत्येतत्पदयुक्तंमायासीरित्यत्रमायेत्यक्षरद्वयंयेषांतेएहिमायासः पूर्वपदप्रकृतिस्वरः । अद्रुहः

---

१ नि० ५. ५. ।

द्रुहजिघांसायां संपदादित्वाद्भावेक्विपिबहुव्रीहौनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्। मेधं मेधृसङ्गमेच मेध्यतेदेवैः संगम्यते इति मेधंहविः कर्मणिघञ् ञित्त्वादाद्युदात्तः। जुषन्तसेवन्तामित्यर्थे छन्दसिलुङ्लङ्लिटइतिधातुसंबन्धेलङ् यतउक्तरूपाविश्वेदेवाः अतोजुषन्तेतिद्रुहादिधात्वर्थैःसंबन्धात् बहुलंछन्दस्यमाङ्योगेपीत्यडागमाभावः। वह्नयः निरित्यनुवृत्तौवहिश्रीत्यादिनाविहितस्यनिप्रत्ययस्यनित्त्वादाद्युदात्तत्वम्॥ ९॥

९. विश्वेदेवगण अक्षय, प्रत्युत्पन्नमति, निर्वैर और धन-वाहक हैं। वे इस यज्ञ में पधारें।

सारस्वतेतृचेयाप्रथमासाऽन्वारंभणीयेष्टौसरस्वत्याःपुरोऽनुवाक्या तथादर्शपूर्णमासावारप्स्यमानइत्यस्मिन्खण्डे—पावकानःसरस्वतीपावीरवीतिसूत्रितम्।

तामेतामृचमाह—

पा॒व॒का नः॒ सर॑स्वती॒ वाजे॑भिर्वा॒जिनी॑वती। य॒ज्ञं व॑ष्टु धि॒याव॑सुः॥ १०॥

पा॒व॒का। नः॒। सर॑स्वती। वाजे॑भिः। वा॒जिनी॑ऽवती। य॒ज्ञम्। व॒ष्टु। धि॒याऽव॑सुः॥ १०॥

सरस्वतीदेवीवाजेभिर्हविर्लक्षणैरन्नैर्निमित्तभूतैः यद्वा यजमानेभ्योदातव्यैरन्नैर्निमित्तभूतैर्नोऽस्मदीयंयज्ञंवष्टुकामयताम् कामयित्वाचनिर्वहत्वित्यर्थः तथाचारण्यकाण्डेश्रुत्यैवव्याख्यातम्—यज्ञंवष्ट्वितियदाहयज्ञंवहत्वित्येवतदाहेति। कीदृशीसरस्वती पावकाशोधयित्री वाजिनीवतीअन्नवत्क्रियावती धियावसुः कर्मप्राप्यधननिमित्तभूता वाग्देवतायास्तथाविधंधननिमित्तत्वमारण्यककाण्डेश्रुत्याव्याख्यातम्—यज्ञंवष्टुधियावसुरितिवाग्वैधियावसुरिति। श्येनःसोमइत्यादिषुपंचत्रिंशत्संख्याकेषुदेवताविशेषवाचिषुपदेषुसरमासरस्वतीतिपठितम्। एतामृचंयास्कएवं व्याचष्टे—पावकानःसरस्वत्यन्नैरन्नवतीयज्ञंवष्टुधियावसुःकर्मवसुरिति[1]। पवनंपावःशुद्धिः पावं कायतिइतिपावका कैगैरैशब्दे आतोऽनुपसर्गेकः कृदुत्तरपदप्रकृतिस्वरत्वेनान्तोदात्तत्वम् यद्वा पुनातीत्यर्थेण्वुलि प्रत्ययस्थात्कात्पूर्वस्यातइदाप्यसुपइतीत्त्वस्याभावोऽन्तोदात्तत्वंचछान्दसंद्रष्टव्यम्[2]। सरःशब्दःसर्तेरसुन्नन्तत्वादाद्युदात्तः मतुब्ङीपोःपित्त्वादनुदात्तत्वम्। वाजेभिः वाजशब्दोवृषादित्वादाद्युदात्तः समवृत्तत्वादाकृतिगणः वाजोन्नमास्वितिवाजिन्यःक्रियाः अतइनिठनावितिइनिप्रत्ययः ताःक्रियायस्याः सन्तिसासरस्वतीवाजिनीवती छन्दसीरइतिमतुपोवत्त्वंमतुब्ङीपोःपित्त्वेनानुदात्तत्वात् इनेःप्रत्ययाद्युदात्तत्वमेवशिष्यते। यज्ञं यजयाचेत्यादिनानङ् प्रत्ययस्वरेणान्तोदात्तः। वष्टुवशकान्तौ कान्तिरभिलाषः अदिप्रभृतिभ्यःशपइतिशपोलुक् निघातः धि-

---

1 नि० ११.२६.। 2 वस्तुतस्तुइत्वंतुपावकादीनांछन्दसीतिनिषिद्धम्।

याकर्मणावसुयस्याःसकाशाद्भवतिसाधियावसुः सावेकाचइतिविभक्तिरुदात्ता बहुव्रीहौप्रकृत्यापूर्वपदमितिविभक्तिस्वरएवशिष्यते छान्दसस्तृतीयायाअलुक् ॥ १० ॥

१०. पतितपावनी, अन्न-युक्त और धनदात्री सरस्वती धन के साथ हमारे यज्ञ की कामना करें।

चोदयित्रीसूनृतानांचेतन्तीसुमतीनाम्। यज्ञंदधेसरस्वती ॥११॥

चोदयित्री। सूनृतानाम्। चेतन्ती। सुऽमतीनाम्। यज्ञम्। दधे। सरस्वती ॥ ११ ॥

यासरस्वतीसेयमिमंयज्ञंदधेधारितवती कीदृशीसूनृतानांप्रियाणांसत्यवाक्यानांचोदयित्री-प्रेरयित्री सुमतीनांशोभनबुद्धियुक्तानामनुष्ठातॄणांचेतन्ती तदीयमनुष्ठेयंज्ञापयन्ती ॥ चोदयित्री चुदप्रेरणेण्यन्तात्तृच् चित्त्वादन्तोदात्तः ऋन्नेभ्योङीबितिङीप् तस्योदात्तयणोहल्पूर्वादित्युदात्तत्वम्। सूनृतानां ऊनपरिहाणेइत्यतः क्विप्चेतिक्विपि सुतरामूनयत्यप्रियमितिसूनृइतिप्रियमुच्यते तच्चतदृतंसत्यंचेतिसूनृतम् परादिश्छन्दसिबहुलमित्युत्तरपदाद्युदात्तत्वम्। चेतन्ती चितीसंज्ञाने अत्रशपोङीपश्चपित्त्वादनुदात्तत्वम् शतुश्चादुपदेशाल्लसार्वधातुकस्वरेणानुदात्तत्वम् धात्वन्तस्वरएवशिष्यते। सुमतिशब्दस्यमतुपिह्रस्वत्वान्नामन्यतरस्यामितिविभक्तेरुदात्तत्वम् ॥ ११ ॥

११. सत्य की प्रेरणा करनेवाली, सुबुद्धि पुरुषों को शिक्षा देनेवाली सरस्वती हमारा यज्ञ ग्रहण कर चुकी हैं।

तृतीयामृचमाह—

महोअर्णःसरस्वतीप्रचेतयतिकेतुना। धियोविश्वाविराजति ॥ १२ ॥

महः। अर्णः। सरस्वती। प्र। चेतयति। केतुना। धियः। विश्वाः। वि। राजति ॥ १२ ॥ ६ ॥

द्विविधाहिसरस्वतीविग्रहवद्देवतानदीरूपाच तत्रपूर्वाभ्यामृग्भ्यांविग्रहवतीप्रतिपादिता अनयातुनदीरूपाप्रतिपाद्यते तादृशीसरस्वतीकेतुनाकर्मणाप्रवाहरूपेणमहोअर्णः प्रभूतमुदकंप्रचेतयतिप्रकर्षेणज्ञापयति किंच स्वकीयेनदेवतारूपेणविश्वाधियः सर्वाण्यनुष्ठातृप्रज्ञानानि विराजतिविशेषेणदीपयति अनुष्ठानविषयाबुद्धीः सर्वदोत्पादयतीत्यर्थः सरस्वत्याद्विरूपत्वंयास्कोदर्शयति—तत्रसरस्वतीत्येतस्यनदीवद्देवतावच्चनिगमाभवन्तीति[१]। एकशतसंख्याकेषूदकनामस्वर्णःक्षोदइतिपठितम्। एतामृचंयास्कोव्याचष्टे—महदर्णःसरस्वतीप्रचेतयतिप्रज्ञापयति

१ नि० २. २३.

केतुनाकर्मणाप्रज्ञयावेमानिचसर्वाणिप्रज्ञानान्यभिविराजतीति॑ ॥ महोअर्णः महदितितकारस्य व्यत्ययेनसकारः तस्यरुत्वोत्वगुणाः प्रातिपदिकस्वरेणान्तोदात्तः एङःपदान्तादतीतिपूर्वरूपेप्रा- प्तेप्रकृत्यान्तःपादमव्यपरेइतिप्रकृतिभावः अत्तीत्यर्णः उदकेनुट्चेत्यसुन्प्रत्ययोनुडागमश्च । केतुना प्रातिपदिकस्वरेणान्तोदात्तः । विश्वाः विश्वशब्दःक्वन्प्रत्ययान्तआद्युदात्तः ॥ १२ ॥

१२. प्रवाहित होकर सरस्वती ने जलराशि उत्पन्न की है और इसके सिवा समस्त ज्ञानों का भी जागरण किया है।

इतिप्रथमस्यप्रथमेषष्ठोवर्गः ॥ ६ ॥

इतिप्रथमेमण्डलेप्रथमोऽनुवाकः ॥ १ ॥

द्वितीयानुवाकेचत्वारिसूक्तानि तेषुसुरूपेत्यादिकंदशर्चंसूक्तम् सुरूपकृत्नुंदशेत्यनुक्रान्त- त्वात् पूर्ववन्मधुच्छन्दसोगायत्रस्यचानुवृत्तेः तेएवऋषिच्छन्दसी इन्द्रंपृच्छेतिचतुर्थ्यांमृ- चिलिङ्गदर्शनादिन्द्रोदेवता अभिप्लवषडहेब्राह्मणाच्छंसिनःप्रातःसवनेस्तोमवृद्धावावापार्थानि सुरूपकृत्नुमूतयेइत्यादीनिषट्सूक्तानि सूत्रितंचअभिप्लवपृष्ठ्याहानीतिखण्डे—ब्राह्मणाच्छंसि- नःसुरूपकृत्नुमूतयइतिषट्सूक्तानीति आद्यानित्रीणिसूक्तानिमहाव्रतेनिष्केवल्येऔष्णिहतृचा- शीतौशस्तव्यानि उक्तंचशौनकेन—सुरूपकृत्नुमूतयइतित्रीण्येन्द्रसानासिंरयिमितिसूक्तेइति चतुर्विंशेहनिमाध्यन्दिनेसवनेब्राह्मणाच्छंसिनःसुरूपकृत्नुमूतयइतिवैकल्पिकःस्तोनियस्तृचः हो- त्रकाणामितिखण्डेमदेमदेहिनोददिःसुरूपकृत्नुमूतयइतिसूत्रितत्वात् अग्निष्टोमेवैश्वदेवशस्त्रे सुरू- पकृत्नुमूतयइतिधाय्या सुरूपकृत्नुमूतयेतक्षन्नथमितिसूत्रितत्वात् ।

तामेतांसूक्तगतांप्रथमामृचमाह—

सु॒रू॒प॒कृ॒त्नुमू॒तये॑सु॒दुघा॑मिवगो॒दुहे॑। जु॒हू॒मसि॒द्यवि॑द्यवि ॥ १ ॥

सु॒रू॒प॒कृ॒त्नुम् । ऊ॒तये॑ । सु॒दुघा॑म्ऽइव । गो॒ऽदुहे॑ । जु॒हू॒मसि॑ । द्यवि॑ऽद्यवि ॥ १ ॥

सुरूपकृत्नुंशोभनरूपोपेतस्यकर्मणःकर्तारमिन्द्रंऊतयेऽस्मद्रक्षार्थं द्यविद्यविप्रतिदिनं जु- हूमसि आह्वयामः आह्वानेदृष्टान्तः—गोदुहेगोधुगर्थंसुदुघामिव सुष्ठुदोग्ध्रींगामिव यथालो- के गोर्दोग्धातदर्थं तस्याभिमुख्येनदोहनीयांगामाह्वयतितद्वत् वस्तोरित्यादिषुद्वादशस्वह- र्नामसु द्यविद्यवीतिपठितम् ॥ सुरूपकृत्नुं करोतीतिकृत्नुःकृहनिभ्यांक्त्नुःकित्त्वाद्गुणाभावः तका- रोपजनश्छान्दसः समासान्तोदात्तः । ऊतये अवतेर्धातोरुदात्तइत्यनुवृत्तावूतियूतिजूतिसाति- हेतिकीर्तयश्चेतिक्तिन्नुदात्तोनिपातितः । सुष्ठुदुग्धइतिसुदुघा दुहःकब्घश्चेतिकप्प्रत्ययोहकारस्य

चचकारः किस्वाद्गुणाभावः कपःपिस्वादनुदात्तत्वेधातुस्वरेणउकारउदात्तः सुशब्देनगतिसमासेकृदुत्तरपदप्रकृतिस्वरत्वेनसएवस्वरः इवेनविभक्त्यलोपःपूर्वपदप्रकृतिस्वरत्वंचेतीवसमासेसएव। गांदोग्धीतिगोधुक् सत्सूद्विषेत्यादिनाक्विप् कृदुत्तरपदप्रकृतिस्वरत्वम्। जुहूमसि ह्वयतेर्लडुत्तमपुरुषबहुवचनेबहुलंछन्दसीतिशपःश्लुः अभ्यस्तस्यचेत्यभ्यस्तकारणस्यह्वयतेः प्रागेवद्विर्वचनात्संप्रसारणंसंप्रसारणाच्चेतिपरपूर्वत्वं हलइतिदीर्घः ततःश्लाविवितिद्विर्वचनम् अभ्यासस्यह्रस्वः श्रुत्वजश्त्वे इदन्तोमसिरितिइकारागमः प्रत्ययस्वरेणमकारस्यउदात्तत्वम्। द्यविद्यवि द्योशब्दःप्रातिपदिकस्वरेणान्तोदात्तः नित्यवीप्सयोरितिद्विर्भावः तस्यपरमाम्रेडितं अनुदात्तंचेतिद्वितीयस्यानुदात्तत्वम्॥ १ ॥

१. जिस तरह दूध दुहनेवाला दोहन के लिए गाय को बुलाता है, उसी प्रकार अपनी रक्षा के लिए हम भी सत्कर्मशील इन्द्र को प्रतिदिन बुलाते हैं।

उप॑नः॒सव॑ना॒ग॑हि॒सोम॑स्यसोमपाः पिब। गो॒दाइद्रे॒वतो॒मदः॑ ॥ २ ॥

उप॑। नः॒। सव॑ना। आ। ग॒हि॒। सोम॑स्य। सो॒म॒ऽपाः॒। पि॒ब॒।
गो॒ऽदाः। इत्। रे॒वतः॑। मदः॑॥ २ ॥

हेसोमपाः सोमस्यपातरिन्द्रसोमंपातुंनोऽस्मदीयानिसवना त्रीणिसवनानिप्रत्युपसमीपे आगहिआगच्छ आगत्यचसोमस्यसोमंपिब रेवतोधनवतस्तवमदोहर्षोगोदाइव् गोप्रदएव त्वयिहृष्टेसत्यस्माभिर्गावोलभ्यन्तइत्यर्थः॥उप निपातत्वादाद्युदात्तः। सवना सूयतेसोमएष्वितिसवनानि सुपोडादेशष्टिलोपश्च ल्तिीतिप्रत्ययात्पूर्वस्याकारस्योदात्तत्वम्। गहि गमेर्लोट् तस्यसेर्हिः बहुलंछन्दसीतिशपोलुक् हेर्ङित्त्वादनुदात्तोपदेशेत्यादिनामकारलोपः अतोहेरित्याभाच्छास्त्रीयेलुक्किकर्तव्ये असिद्धवदत्राभादित्याभाच्छास्त्रीयोमकारलोपोऽसिद्धवद्भवति। सोमपाः आमन्त्रितस्यचेतिनिघातः तस्याविद्यमानवत्त्वेऽपिपूर्वापेक्षयातिङ्ङतिङइतिपिबेत्यस्यनिघातः नचपूर्वस्यापिपराङ्गवद्भावेनाविद्यमानवत्त्वम् असामर्थ्येनतदभावात्। गांददातीतिगोदाः क्विप्चेतिक्विपंपरमपिसरूपंबाधित्वा प्रतिपदविधित्वादातोमनिन्क्वनिब्वनिपश्चेतिविच् क्विपिहिघुमास्थेत्यादिनाधातोराकारस्यईत्वंस्यात्। रेवान् रयिर्धनमस्यास्तीतिमतुप् ह्रस्वनुड्भ्यांमतुबितिमतुबुदात्तः छन्दसीरइतिवत्वम् रयेर्मतौबहुलंछन्दसीतिसंप्रसारणपरपूर्वत्वेगुणश्च। मदः मदोनुपसर्गेइत्यप् पित्वादनुदात्तः॥ २ ॥

२. हे सोमपानकर्त्ता इन्द्र! सोमरस पीने के लिए हमारे त्रिषवण-यज्ञ के निकट आओ। तुम धनशाली हो; प्रसन्न होने पर गाय देते हो।

अथा॑ते॒अन्त॑मानांवि॒द्याम॑सुमती॒नाम्। मानो॒अति॑ख्य॒आग॑हि ॥ ३ ॥

अर्थ । ते । अन्तमानाम् । विद्याम । सुऽमतीनाम् । मा । नः ।
अति । ख्यः । आ । गहि ॥ ३ ॥

अथसोमपानानन्तरं हेइन्द्र तेतवान्तमानांअन्तिकतमानामतिशयेनसमीपवर्तिनांसुमतीनांशोभनमतियुक्तानांपुरुषाणांमध्येस्थित्वाविद्याम वयंत्वांजानीयाम यद्वा सुमतीनांशोभनबुद्धीनांकर्मानुष्ठानविषयाणांलाभार्थमित्यध्याहारः बुद्धिलाभायत्वांस्मरेमेत्यर्थः त्वमपिनोतिमाख्यः अस्मानतिक्रम्यान्येषांत्वत्स्वरूपंमाकथय किंत्वागहि अस्मानेवागच्छ ॥ अथेतिनिपातआद्युदात्तः निपातस्यचेतिदीर्घत्वम् । अन्तमानां अतिशयेनान्तिकाइत्यविशायिनेतमप् तमेवादेश्चेतितादिलोपः अन्तोऽस्यास्तीत्यन्तिकःसमीपः अतइनिठनावितिठन् नित्त्वादाद्युदात्तः दूरोत्कर्षस्यह्यवसानंनास्ति सामीप्योत्कर्षस्यपुनर्योयस्यसमीपःसएवतस्यान्तइत्यन्तवत्त्वात्समीपमन्तिकमुच्यते । विद्याम वेत्तेर्लिङि यासुट्परस्मैपदेषूदात्तोङिच्चेतियासुट्उदात्तः पादादित्वात्तिङ्ङतिङइतिननिघातः । सुमतीनां मतिशब्देक्तिन्नन्तेपि मन्त्रेवृषेषपचमनविदभूवीराउदात्तइतीकारउदात्तः शोभनामतिर्येषांते सुमतयइतिबहुव्रीहौपूर्वपदप्रकृतिस्वरापवादोनञ्सुभ्यामितिउत्तरपदान्तोदात्तः शोभनामतयःसुमतयइतिकर्मधारयेप्यव्ययपूर्वपदप्रकृतिस्वरापवादः कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तत्वैव अतोमतुपिह्रस्वादन्तोदात्ताच्चसुमतिशब्दात्परस्यनामोनामन्यतरस्यामित्युदात्तत्वम् । ख्यः ख्याप्रकथनेइत्यस्यलुङिसिपि अस्यतिवक्तिख्यातिभ्योङितिच्लेरङादेशः आतोलोपइटिचेत्याकारलोपः इतश्चेतीकारलोपोरुत्वविसर्गौ नमाङ्योगेइत्यडभावः । गहि गमेर्बहुलंछन्दसीतिशपोलुकिहेर्ङित्त्वादनुदात्तोपदेशेतिमकारलोपस्यासिद्धवदत्राभादत्यसिद्धत्वादतोहेरितिलुग्नभवति ॥ ३ ॥

३. हम तुम्हारे पास रहनेवाले बुद्धिशाली लोगों के बीच पड़कर तुम्हें जानें। हमारी उपेक्षा कर दूसरों में प्रकाशित न होना। हमारे पास आओ।

परेहि विग्रमस्तृतमिन्द्रंपृच्छाविपश्चितम् । यस्तेसखिभ्यआवरम् ॥ ४ ॥

परा । इहि । विग्रम् । अस्तृतम् । इन्द्रम् । पृच्छ । विपःऽचितम् ।
यः । ते । सखिऽभ्यः । आ । वरम् ॥ ४ ॥

अत्रयजमानंप्रतिहोतान्रूते हेयजमान त्वंइन्द्रंपरेहि इन्द्रस्यसमीपेगच्छ गत्वाचावपश्चितंमेधाविनं होतारंमांपृच्छ असौहोतासम्यक्स्तुतवान्नवेत्येवंप्रश्नंकुरु यइन्द्रस्तेतवयजमानस्यसखिभ्यऋत्विग्भ्योवरंश्रेष्ठंधनपुत्रादिकमासमन्तात्प्रयच्छतीतिशेषः तादृशमिन्द्रमितिपूर्वत्रान्वयः

पुनरपिकीदृशं विप्रंमेधाविनं अस्तृतंअहिंसितं विप्रइत्यादिषुचतुर्विंशतिसंख्याकेषुमेधाविनामसु विप्रविपश्चिच्छब्दौपठितौ ॥ विप्रं वृषादित्वादाद्युदात्तः । अस्तृतं अव्ययपूर्वपदप्रकृतिस्वरत्वम् । इन्द्रशब्दे ऋज्रेन्द्राग्रेत्यादिनारन् नित्त्वादाद्युदात्तः । सखिभ्यः समानेख्यश्चोदात्तइतिसमानेउपपदेख्यातेरिण् डिदित्यनुवृत्तेः तस्यडित्त्वाट्टिलोपश्च तत्सन्नियोगेनयलोपः उपपदस्योदात्तत्वम् समानस्यछन्दस्यमूर्धप्रभृत्युदर्केष्वितिसभावः अतःसखिशब्दआद्युदात्तः । वियवेइतिवरः अहवृदृनिश्चिगमश्चेत्यप् तस्यपित्त्वाद्धातुस्वरएव ॥ ४ ॥

४. हिंसा-द्वेष-रहित और प्रतिभाशाली इन्द्र के पास जाओ और मुझ मेधावी की कथा जानने की चेष्टा करो। वही तुम्हारे बन्धुओं को उत्तम धन देते हैं।

उतब्रुवन्तुनोनिदोनिरन्यतश्चिदारत । दधानाइन्द्रइद्दुवः ॥ ५ ॥७॥

उत । ब्रुवन्तु । नः । निदः । निः । अन्यतः । चित् । आरत ।
दधानाः । इन्द्रे । इत् । दुवः[१] ५ ॥ ७ ॥

नोऽस्माकंसंवन्धिनः ऋत्विजइतिशेषः तेब्रुवन्तुइन्द्रंस्तुवन्तु उतअपिच हेनिदः निन्दितारः पुरुषाः निरारतइतोदेशान्निर्गच्छत अन्यतश्चित् अन्यस्मादपिदेशान्निर्गच्छत कीदृशाः ऋत्विजः इन्द्रेदुवः परिचर्यांदधानाःकुर्वाणाः इच्छब्दोवधारणे सर्वदापरिचर्यांकुर्वन्तएवब्रुवितिष्ठन्त्वित्यर्थः ॥ निन्दन्तीतिनिदः णिदिकुत्सायांक्विप् नुमभावश्छान्दसः सुपोऽनुदात्तत्वाद्धातुस्वरः आमन्त्रितत्वेपिवाक्यान्तरत्वेनस्ववाक्यगतपदादपरत्वान्ननिघातइत्याद्युदात्तत्वमेव । अन्यतः लितीतिप्रत्ययात्पूर्वस्योदात्तत्वम् । चिदित्यपिशब्दार्थे तेननकेवलमितः इतोनिर्गत्यान्यतोऽपिनिर्गच्छेतिगम्यते सएवधात्वर्थयोःसंबन्धआरतेतिलुङाद्योत्यते सहिधातुसंबन्धाधिकारेविधीयते । आरत अर्तेश्छन्दसिलुङ्लङ्लिटइतिलोडर्थेलुङ् मध्यमबहुवचनस्यतादेशः सर्तिशास्त्यर्तिभ्यश्चेतिच्लेरङादेशः ऋदृशोङिगुणइतिगुणः आडागमः । दधानाः शानचश्चित्त्वात्प्राप्तमन्तोदात्तत्वंबाधित्वा परत्वादभ्यस्तानामादिरित्याद्युदात्तत्वम् । दुवः नब्विषयस्यानिसन्तस्येत्याद्युदात्तः ॥ ५ ॥

५. सदा इन्द्र-सेवक हमारे सम्बन्धी पुरोहित लोग इन्द्र की स्तुति करें और इन्द्र के निन्दक इस देश और अन्य देशों से भी दूर हो जायें।

॥ इतिप्रथमस्यप्रथमेसप्तमोवर्गः ॥ ७ ॥

सुरूपेतिसूक्तेषष्ठीमृचमाह—

उतनःसुभगाँअरिर्वोचेयुर्दस्मकृष्टयः । स्यामेदिन्द्रस्यशर्मणि ॥ ६ ॥

१नब्योयलोपइतिपर्तमसावादत्तवृत्तिः ।

उत । नः । सुऽभगान् । अरिः । वोचेयुः । दस्म । कृष्टयः ।
स्याम । इत् । इन्द्रस्य । शर्मणि ॥ ६ ॥

हेदस्मशत्रूणामुपक्षयितरिन्द्र त्वदनुग्रहात्अरिरुतशत्रवोऽपिनोऽस्मान्सुभगान् शोभनधनोपेतान्वोचेयुः उच्यासुः कृष्टयोमनुष्याः अस्मन्मित्रभूतावदन्तीतिकिमुवक्तव्यमितिशेषः ततोधनसंपन्नावयमिन्द्रस्यशर्मणि इन्द्रप्रसादलब्धेसुखेस्यामेव् भवेमैव मघमित्यादिष्वष्टाविंशतिसंख्याकेषुधननामसु रयिः क्षत्रं भगइतिपठितम् मनुष्याइत्यादिषुपञ्चविंशतिसंख्याकेषुमनुष्यनामसुकृष्टयइतिपठितम् ॥ उत एवादीनामन्तइत्यन्तोदात्तः । सुभगान् भगशब्दस्यक्रत्वादिषुपाठात् नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वंबाधित्वाक्रत्वादयश्चेत्युत्तरपदाद्युदात्तत्वम् संहितायांदीर्घादटिसमानपादेइतिनकारस्यरुत्वम् भोभगोइतियत्वं लोपःशाकल्यस्येतियलोपः तस्यासिद्धत्वान्नपुनःसन्धिकार्यम् आतोटिनित्यमित्याकारस्य सानुनासिकता । अरिः वचनव्यत्ययः अचइरितिइप्रत्ययान्तः प्रत्ययस्वरेणान्तोदात्तः । वोचेयुः उच्यासुः वचपरिभाषणेइत्यस्मादाशीर्लिङि झेर्जुसादेशोलिङ्याशिष्यङित्यङ्प्रत्यये वचउमित्युमागमः गुणः किदाशिषीतियासुट् छन्दस्युभयथेतिलिङादेशस्यसार्वधातुकत्वात् लिङःसलोपोऽनन्त्यस्येतिसकारलोपः अतोयेयः आद्गुणः अङोऽदुपदेशत्वाल्लसार्वधातुकस्वरेणलिङोऽनुदात्तत्वम् अङ्प्रत्ययस्वरएवशिष्यते तेनसह इकारस्यगुणःएकादेशउदात्तेनोदात्तइत्याद्युदात्तः । दस्म दसुउपक्षयेइत्यस्मादन्तर्भावितण्यर्थादिषियुधींधिदसिश्याधूसूभ्योमक् पदात्परत्वादामन्त्रितनिघातः । कृष्टयः क्तिच्क्तौचसंज्ञायामितिक्तिचिमनुष्यनामत्वाच्चितइत्यन्तोदात्तः । स्याम असभुवि श्नसोरल्लोपः यासुटउदात्तत्वम् पादादित्वादनिघातः । शर्मणि शॄहिंसायां हिनस्तिदुःखमितिशर्म अन्येभ्योऽपिदृश्यन्तेइतिमनिन् नेड्वशिकृतीतीट्प्रतिषेधःनित्त्वादाद्युदात्तत्वम् ॥ ६ ॥

६. हे रिपुमर्दन इन्द्र! तुम्हारी कृपा से शत्रु और मित्र—दोनों हमें सौभाग्यशाली कहते हैं। हम इन्द्र के प्रसाद-प्राप्त सुख में निवास करें।

एमाशुमाशवे भर यज्ञश्रियं नृमादनम्। पतयन्मन्दयत्सखम् ॥ ७ ॥

आ । ईम् । आशुम् । आशवे । भर । यज्ञऽश्रियम् । नृऽमादनम् ।
पतयत् । मन्दयत्ऽसखम् ॥ ७ ॥

ईमितिनिपातइदंशब्दार्थेवर्तते हेयजमान आशवेकृत्स्नसोमयागव्याप्तायेन्द्रायईमाभरइमंसोममाहर कीदृशंसोमं आशुं सवनत्रयव्याप्तम् यज्ञश्रियंयज्ञस्यसंपद्रूपं नृमादनं नृणामृत्वि-

ग्यजमानानांहर्षहेतुं पतयत् पतयन्तम् कर्मणिप्राप्नुवन्तं मन्दयत्सखं यइन्द्रोमन्दयति यजमानान्हर्षयति तस्मिन्निन्द्रेसखिभूतोऽयंसोमःतत्प्रीतिहेतुत्वात् तृप्तिहेतुत्वाद्वा ॥ आशुं कृवापाजिमिस्वदिसाध्यशूभ्यउणितिउण् प्रत्ययस्वरः । आशवे पूर्ववत् । यज्ञश्रियंसमासस्येत्यन्तोदात्तः । माद्यन्त्यनेनेतिमादनः करणाधिकरणयोश्चेतिल्युट् तस्यलित्त्वात्पूर्वआकारउदात्तः गतिकारकोपपदात्कृदितिसएवशिष्यते । पतयत् पतेरदन्तस्यचौरादिकोणिच् अतोलोपः तस्यस्थानिवत्त्वादुपधायावृद्ध्यभावः लटःशत्रादेशः तस्यछन्दस्युभयथेत्यार्धधातुकत्वेनशबभावाददुपदेशादितिनिघाताभावेनप्रत्ययस्याद्युदात्तत्वमेवभवति आर्धधातुकत्वेऽपिसर्वेविधयश्छन्दसिविकल्प्यन्तेइतिणेरनिटीतिणिलोपाभावः सुपांसुलुगित्यमोलुक् नलुमतेतिप्रत्ययलक्षणनिषेधादुगिदचामितिनुम् । एवं मन्दयच्छब्दोऽन्तोदात्तः मन्दयतीन्द्रेसखा सप्तमीतियोगविभागात्समासः तत्पुरुषेतुल्यार्थेतिसप्तमी पूर्वपदप्रकृतिस्वरत्वम् ॥ ७ ॥

७. यह सोमरस शीघ्र मादक और यज्ञ का सम्पत्स्वरूप है। यह मनुष्य को प्रफुल्लकर्त्ता, कार्य-साधनकर्त्ता और हर्ष-प्रदाता इन्द्र का मित्र है। यज्ञ-व्यापी इन्द्र को इसे दो ।

अस्यपीत्वाशतक्रतोघनोवृत्राणामभवः । प्रावोवाजेषुवाजिनम् ॥८॥

अस्य । पीत्वा । शतक्रतो इति शतऽक्रतो । घनः । वृत्राणाम् । अभवः । प्र । आवः । वाजेषु । वाजिनम् ॥ ८ ॥

हे शतक्रतो बहुकर्मयुक्तेन्द्र त्वमस्यसोमस्यसंबन्धिनमंशंपीत्वा वृत्राणांवृत्रनामकासुरप्रमुखानांशत्रूणांघनोभवः हन्ताभूः ततोवाजेषुसङ्ग्रामेषुवाजिनंसङ्ग्रामवन्तं स्वभक्तंप्रावः प्रकर्षेणरक्षितवानसि ॥ अस्येतीदम्शब्देनप्रयोगसमयेपुरोदेशस्थःसोमोनिर्दिश्यते नतुपूर्वप्रकृतःसोमः परामृश्यते अतोऽनन्वादेशत्वान्नात्रेदमोऽन्वादेशेऽशनुदात्तस्तृतीयादावित्यशादेशः अतोनसर्वानुदात्तत्वम् किन्तु त्यदाद्यत्वेहलिलोपे अकारःप्रातिपदिकस्वरेणोदात्तइत्यन्तोदात्तः इत्यन्तोदात्तादित्यनुवृत्तावूडिदंपदाद्यप्पुम्रैद्युभ्यइतिविभक्तिरुदात्ता । पीत्वा पिबतेःक्त्वाप्रत्यये घुमास्थादिना ईत्वम् प्रत्ययस्वरेणान्तोदात्तःअसामर्थ्यान्नपरामन्त्रिताङ्गवद्भावः । घनः मूर्तौघनइति हन्तेर्धातोःकाठिन्येअप्प्रत्ययः तदस्यास्तीत्यर्शआदित्वादजन्तः चित्त्वादन्तोदात्तः । वाजेषु वृषादित्वादाद्युदात्तः । वाजिनं इनिप्रत्ययस्वरः ॥ ८ ॥

८. हे शतयज्ञकर्त्ता इन्द्र! इसी सोमरस का पान कर तुमने वृत्र आदि शत्रुओं का विनाश किया था और रणाङ्गण में अपने योद्धाओं की रक्षा की थी।

तंत्वावाजेषुवाजिनंवाजयामःशतक्रतो । धनानामिन्द्रसातये ॥ ९ ॥

तम् । त्वा । वाजेषु । वाजिनम् । वाजयामः । शतक्रतो इति शतऽक्रतो । धनानाम् । इन्द्र । सातये ॥ ९ ॥

हेशतक्रतो बहुकर्मयुक्त यद्वा बहुप्रज्ञानयुक्तेन्द्र धनानांसातयेसंभजनार्थं वाजेषुयुद्धेषु वाजिनंबलवन्तंत्वा पूर्वमन्त्रोक्तगुणयुक्तंत्वां वाजयामः अन्नवन्तंकुर्मः रणइत्यादिषुषट्चत्वारिंशत्सु संग्रामनामसु पौंस्येमहाधनेवाजेअज्मन्निति पठितम् अष्टाविंशतिसंख्याकेष्वन्ननामसु अन्धःवाजः पाजइतिपठितम् उरुतुवीत्यादिषुद्वादशसुबहुनामसु शतंसहस्रमितिपठितम् अपःअप्नइत्यादिषुष-ड्विंशतिसंख्याकेषुकर्मनामसु शक्मक्रतुरितिपठितम् केतःकेतुरित्यादिषुएकादशसुप्रज्ञानामसु क्र-तुःअसुरितिपठितम् ॥ त्वा अनुदात्तंसर्वमित्यनुवृत्तौत्वामौद्वितीयायाइतित्वादेशः । वाजेषु वजव्र-जगतौ वाजयतिगमयतिशरीरनिर्वाहमनेनेतिवाजोबलमन्नंवा ण्यन्तात्करणेघञ् तत्रञित्स्वर-स्यापवादे कर्षात्वतइत्यन्तोदात्तत्वेप्राप्तेतस्याप्यपवादत्वेन वृषादीनांचेत्याद्युदात्तः । वाजयामः वा-जोस्यास्तीतिवाजवान् तंकुर्मइत्यर्थे तत्करोतितदाचष्टेइतिणिच् इष्ठवण्णौप्रातिपदिकस्येतित-स्मिन्परतइष्ठवद्भावाद्विन्मतोर्लुगितिमतुपोलुक् टेरित्यकारलोपः णिचश्चित्त्वादन्तोदात्त्वम् शपः पित्त्वेनानुदात्तत्वम् लसार्वधातुकस्वरेणाख्यातस्याप्यनुदात्तत्वम् पादादित्वात्तिङ्ङतिङइतिननि-घातः । शतक्रतो आमन्त्रितनिघातः । धनानां नविषयस्यानिसन्तस्येत्याद्युदात्तः । सातये उदात्तइत्यनुवृत्तौ ऊतियूतिजूतिसातिहेतिकीर्तयश्चेतिक्तिन्नुदात्तः ॥ ९ ॥

९. हे शतक्रतु इन्द्र! तुम संग्राम में वही योद्धा हो। इन्द्र! धन-प्राप्ति के लिए हम तुम्हें हविष्य देते हैं।

योरायोऽवनिर्महान्त्सुपारः सुन्वतः सखा। तस्माइन्द्राय गायत ॥ १० ॥ ८ ॥

यः। रायः। अवनिः। महान्। सुऽपारः। सुन्वतः ॥ सखा। तस्मै। इन्द्राय। गायत ॥ १० ॥ ८ ॥

यइन्द्रोरायोधनस्यावनिः रक्षकः स्वामीवा तस्माइन्द्रायगायत हेऋत्विजस्तत्प्रीत्यर्थं स्तुतिं कुरुत कीदृशइन्द्रःमहान् गुणैरधिकः सुपारःसुष्ठुकर्मणःपूरयिता सुन्वतोयजमानस्यसखा सखिवत्प्रि-यः॥ रायः ऊडिदंपदाद्यप्पुम्रैद्युभ्यइतिविभक्तेरुदात्तत्वम्। अवनिः अवरक्षणगतिकान्तिप्रीतितृप्त्यव-गमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिंगनहिंसादानभागवृद्धिषु इत्यस्मादर्तिसृ-धृधम्यम्यश्यवितॄभ्योऽनिरित्यनिःप्रत्ययाद्युदात्तत्वम्। सुपारः पॄपालनपूरणयोरित्यस्माण्णिजन्ता-त्कर्तरीत्यनुवृत्तौपचाद्यच् चितइत्यन्तोदात्तः । सुन्वतः शतुरनुमोनद्यजादीइतिविभक्तिरुदात्ता । सखा समानेख्यःसचोदात्तइतीण्प्रत्ययान्तस्तत्सन्नियोगेनयलोपःसशब्दस्यचोदात्तः डित्त्वाट्टिलोपः तस्मै अद्रिरित्यनुवृत्तौ त्यजितनियजिभ्योडिदितितनोतेरदिप्रत्ययः डित्त्वाट्टिलोपेप्रत्ययस्वरेणत-च्छब्दउदात्तः त्यदाद्यत्वम् एकादेशउदात्तेनोदात्तइत्युदात्तः सावेकाचस्तृतीयादिर्विभक्तिरिति विभक्तेरुदात्तत्वेप्राप्ते प्रथमैकवचनेअवर्णान्तत्वान्नगोश्वन्त्सावर्णेतिनिषेधः । इन्द्राय इन्द्रशब्दो-

रन्मत्ययान्तोनिपातितःनित्त्वादाद्युदात्तः कर्मणायमभिप्रैतिससंप्रदानमित्यत्रक्रियाग्रहणंकर्तव्य-मितिवचनाद्दानक्रिययांप्राप्यत्वात्संप्रदानत्वेनचतुर्थी ॥ १०॥

१०. जो धन के त्राता और महापुरुष हैं, जो सत्कर्म-पालक और भक्तों के मित्र हैं, उन इन्द्र को लक्ष्य कर गाओ।

॥ इतिप्रथमस्यप्रथमेऽष्टमोवर्गः ॥ ८ ॥

आत्वेतिसूक्तंदशर्चम् सुरूपकृत्नुंदशेत्यनुवृत्तत्वात्तुयुञ्जन्तीत्येवमनुक्रान्तत्वात् ऋषिच्छ-न्दोदेवताविनियोगाः पूर्ववत् विशेषविनियोगस्तु अतिरात्रेतृतीयपर्यायेमैत्रावरुणशस्त्रेस्तोत्रियो-ऽयंतृचः अतिरात्रेपर्यायाणामितिखण्डे—आत्वेतानिषीदतेत्युक्तत्वात्।

तत्रप्रथमामृचमाह—

आत्वेतानिषीदतेन्द्रमभिप्रगायत। सखायःस्तोमवाहसः ॥ १ ॥

आ। तु। आ। इत। नि। सीदत। इन्द्रम्। अभि। प्र। गायत। सखायः। स्तोमऽवाहसः ॥ १ ॥

तुशब्दःक्षिप्रार्थोनिपातः द्वाभ्यामाङ्भ्यामन्वेतुमितशब्दोऽभ्यसनीयः हेसखायऋत्विजः क्षिप्रमस्मिन्कर्मणि इतेतआगच्छतागच्छत आदरार्थोऽभ्यासः आगत्यच निषीदतोपविशत उप-विश्यचेन्द्रमभिप्रगायत सर्वतःप्रकर्षेणस्तुत कीदृशाः सखायः स्तोमवाहसः त्रिवृत्पंचदशैकविं-शादिस्तोमानस्मिन्कर्मणि वहन्तिप्रापयन्ति ॥ आ तु आ निपातत्वादाद्युदात्ताः। इत इण्गतौ द्व्यचोतस्तिङइतिसंहितायांदीर्घत्वम्। नि निपातत्वादाद्युदात्तः। सीदत पाघ्राध्मेत्यादिनासदेःसी-दादेशः सदिरप्रतेरितिसंहितायांषत्वम्। अभि उपसर्गाश्चाभिवर्जमितिवचनात्प्रातिपदिकान्तो-दात्तत्वम्। स्तोमवाहसः अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिणीभ्योमन्निति स्तौतेर्मन्प्रत्यया-न्तःस्तोमशब्दोनित्त्वादाद्युदात्तः स्तोमंवहन्तीतिस्तोमवाहसः वहिहाधाञ्भ्यश्छन्दसीत्यसुन्प्रत्य-यः तत्र णिदित्यनुवृत्तेरतउपधायाइत्युपधायावृद्धिः कृदुत्तरपदप्रकृतिस्वरत्वेप्राप्तेगतिकारकयोर-पिपूर्वपदप्रकृतिस्वरत्वंचेत्यौणादिकसूत्रात्समासआद्युदात्तः ॥ १ ॥

१. हे स्तुतिकारक सखा लोग! शीघ्र आओ और बैठो तथा इन्द्र को लक्ष्य कर गाओ।

पुरूतमंपुरूणामीशानंवार्याणाम्। इन्द्रंसोमेसचासुते ॥ २ ॥

पुरुऽतमम्। पुरूणाम्। ईशानम्। वार्याणाम्। इन्द्रम्। सोमे। सचा। सुते ॥ २ ॥

सखायोऽभिप्रगायतेतिपदद्वयमत्रानुवर्तते हेसखायऋत्विजः यूयंसचा सर्वैःसह यद्वा सचापरस्परसमवायेनसुते अभिषुतेसोमेप्रवृत्तेसति इन्द्रमभिप्रगायत कीदृशमिन्द्रंपुरुतमं पुरून्बहून्छत्रून् तामयतिग्लापयतीतिपुरुतमः पुरूणां बहूनांवार्याणांवरणीयानांधनानांईशानंस्वामिनम् ॥ पुरुतमं तमुग्लानावितिधातोरन्तर्भावितण्यर्थात्पचाद्यचिचित्त्वादन्तोदात्तेऽपिकृदुत्तरपदप्रकृतिस्वरंबाधित्वा परादिश्छन्दसिबहुलमित्युत्तरपदाद्युदात्तत्वम् । पुरूणां पॄपालनपूरणयोरित्यस्मात्कुरित्यनुवृत्तौ पॄभिदिव्यधिगृधिधृषिदृशिभ्यश्चेति कुप्रत्ययः किच्त्वाद्गुणनिषेधे उदोष्ठ्यपूर्वस्येत्युकारः उरण्रपरः प्रत्ययस्वरेणान्तोदात्तःपुरुशब्दः अतोमतुपिह्रस्वादन्तोदात्तात्पुरुशब्दात्परस्यनामोनामन्यतरस्यामित्यन्तोदात्तत्वम् । ईशानं ईशऐश्वर्येइतिधातोरनुदात्तेत्त्वात् परस्य शानचोलसार्वधातुकानुदात्तत्वम् । वार्याणां वृङ्संभक्तावित्यस्माद्दहलोर्ण्यत् क्यविधौहि वृञएवग्रहणंनवृङः तित्स्वरितमितिप्रत्ययस्वरितंबाधित्वा ईडवंदवृशंसदुहांण्यतइतिण्यदन्तस्याद्युदात्तत्वम् यतोनावइत्यत्रतुण्यतोग्रहणंनभवति तस्यह्यनुबन्धकत्वात् एकानुबन्धकग्रहणेनद्व्यनुबन्धकस्येतिनियमात् । सचा षचसमवाये धात्वादेःषःसः संपदादित्वाद्भावे क्विबितिक्विप् तृतीयैकवचनं धातुस्वरेणाद्युदात्तः सर्वेविधयश्छन्दसिविकल्प्यन्तेइतिन्यायेनसावेकाचइतिसूत्रंनप्रवर्तते सचेत्यस्यनिपातत्वपक्षेस्पष्टमाद्युदात्तत्वम् ॥ २ ॥

---

२. सोमरस के तैयार हो जाने पर सब लोग एकत्र होकर बहु-शत्रु-विध्वंसक और श्रेष्ठ धन के धनपति इन्द्र को लक्ष्य कर गाओ।

स घा नो योग आ भुवत्स राये स पुरंध्याम् । गमद्वाजेभिरा स नः ॥ ३ ॥

सः । घ । नः । योगे । आ । भुवत् । सः । राये । सः । पुरम्ऽध्याम् । गमत् । वाजेभिः । आ । सः । नः ॥ ३ ॥

घशब्दोवधारणार्थोनिपातः सर्वैस्तच्छब्दैःसंबध्यते सघ सएवेन्द्रःपूर्वोक्तगुणविशिष्टोनोऽस्माकंयोगेपूर्वमप्राप्तस्यपुरुषार्थस्य संबन्धे आभुवत् आभवतु पुरुषार्थंसाधयत्वित्यर्थः सएवरायेधनार्थंआभुवत्आभवतु सएवपुरंध्यांयोषित्याभुवत् यद्वा बहुविधायां बुद्धावाभुवत् पुरन्धिर्बहुधीरितियास्कः । सएववाजेभिर्देयैरन्नैःसहनोऽस्मानआगमदागच्छतु ॥ घ चादयोऽनुदात्ताइत्यनुदात्तः संहितायां ऋचितुनुघमक्षुतङ्कुत्रोरुष्याणामितिदीर्घः । योगे घञोञित्त्वादाद्युदात्तत्वम् । भुवत् भूयात् भवतेराशीर्लिङ्परतोलिङ्याशिष्यङित्यङ्प्रत्ययः तस्यङित्त्वेनगुणाभावादुवङादेशः किदाशिषीतियासुण्नभवति अनित्यमागमशासनमितिवचनात्तिङ्ङतिङइतिनिघातः ऊडिदंपदाद्यप्पुम्रैद्युभ्यइतिरायेइत्येतस्याविभक्तेरुदात्तत्वम् । पुरंध्यां पुरन्धिः पु-

---

१ नि० ६. १३.

रुधीः पृषोदरादित्वादुकारस्यअमादेशः इकारस्यह्रस्वश्च आद्युदात्तप्रकरणेदिवोदासादीनांछन्दस्युपसंख्यानमित्याद्युदात्तत्वं अथवा पुरंशरीरंधीयतेऽस्यामितिकर्मण्यधिकरणेचेतिकिःप्रत्ययः अलुक्छान्दसः नविषयस्यानिसन्तस्येतिपुरशब्दआद्युदात्तः दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वम्। गमत् गमेर्लेटस्तिप् इतश्चलोपःपरस्मैपदेष्वितीकारलोपः बहुलंछन्दसीतिशपोलुक् लेटोडाटावित्यडागमः आगमाअनुदात्ताइतितस्यानुदात्तत्वेधातुस्वरएवशिष्यते । वाजेभिः वृषादित्वादाद्युदात्तः ॥ ३ ॥

३. अनन्तगुण-सम्पन्न वे ही इन्द्र हमारे उद्देश्यों का साधन करें, धन दें, बहुविध बुद्धि प्रदान करें और अन्न को साथ लेकर हमारे पास आगमन करें।

यस्यंसंस्थेनवृण्वतेहरीसमत्सुशत्रवः। तस्माइन्द्रायगायत ॥ ४ ॥

यस्यं। सम्ऽस्थे। न। वृण्वतें। हरी इति। सुमत्ऽसु। शत्रवः।
तस्मैं। इन्द्राय। गायत ॥ ४ ॥

समत्सुयुद्धेषुयस्येन्द्रस्यसंस्थेरथेयुक्तौहरीद्वावश्वौ शत्रवोनवृण्वतेनसंभजन्ते रथमश्वौचदृष्ट्वापलायन्तइत्यर्थः तस्माइन्द्रायतत्सन्तोषार्थं हेऋत्विजोगायत स्तुतिंकुरुत रणइत्यादिषुषट्चत्वारिंशत्सुसंग्रामनामसुसमत्सुसमरणइतिपठितम् ॥ संस्थे सम्यक्तिष्ठतीतिसंस्थोरथः आतश्चोपसर्गेइतिकप्रत्ययः कृदुत्तरपदप्रकृतिस्वरत्वम् । वृण्वते प्रत्ययस्वरेणाकारउदात्तः सतिशिष्टस्वरबलीयस्त्वमन्यत्रविकरणेभ्यः तिङ्ङतिङइतिनिघातोनभवति यद्वृत्तान्नित्यमितिप्रतिषेधात् पञ्चमीनिर्देशेऽप्यत्रव्यवहितेऽपिकार्यमिष्यते । हरतोरथमितिहरीअश्वौ इञित्यनुवृत्तौ हृपिषिरुहिवृतिविदिछिदिकीर्तिभ्यश्चेतीन्प्रत्ययः नित्त्वादाद्युदात्तत्वम्। शत्रवः शतिः सौत्रोधातुर्हिंसार्थः रुशातिभ्यांकुन् नित्त्वादाद्युदात्तत्वम्। तस्मै सावेकाचइतिविभक्त्युदात्तस्य नगोश्वन्सावर्णेतिप्रतिषेधात्प्रातिपदिकस्वरएव ॥ ४ ॥

४. युद्ध के समय में जिन देवता के रथ-युक्त अश्वों के सामने शत्रु नहीं आते, उन्हीं इन्द्र को लक्ष्य कर गाओ।

सुतपाव्नेसुताइमेशुचयोयन्तिवीतये। सोमासोदध्याशिरः ॥ ५ ॥ १ ॥

सुतऽपाव्ने। सुताः। इमे। शुचयः। यन्ति। वीतये। सोमासः।
दधिऽआशिरः ॥ ५ ॥ १ ॥

---

१ कुरुगार्हपतेतिसूत्रे (पा० ६. २. ४२.)। २सम्पूर्वादस्तेः क्विप् कृदुत्तरपदप्रकृतिस्वरत्वंसंभक्षयन्तियोद्धृणामायूंषितिसमदः।

इमेसोमासः अस्मिन्कर्मणिसंपादिताःसोमाः सुतपान्नेअभिषुतस्यसोमस्यपानकर्त्रे षष्ठ्यर्थेचतुर्थी तस्यपातुर्वीतयेभक्षणार्थंयन्तितमेवप्राप्नुवन्ति कीदृशाःसोमाः सुताःअभिषुताः शुचयः दशापवित्रेणशोधितत्वाच्छुद्धाः दध्याशिरः अवनीयमानंदधिआशीर्दोषघातकंयेषांसोमानांते दध्याशिरः ॥ सुतपान्ने सुतंपिबतीतिसुतपावा वनिपःपित्त्वाद्धातुस्वरएवशिष्यते समासेद्वितीयापूर्वपदप्रकृतिस्वरंबाधित्वाकृदुत्तरपदप्रकृतिस्वरत्वम् । शुचयः शुचदीप्तौ इन्नित्यनुवृत्तौ इगुपधात्किदितीनःकित्त्वाल्लघूपधगुणाभावः नित्त्वादाद्युदात्तत्वम् । वीतये वीगतिव्याप्तिप्रजनकान्त्यसनखादनेष्वित्यस्मान्मन्त्रेवृषेषपचमनविदभूवीराउदात्तइतिक्तिन्नुदात्तः सोमासः षुञ्अभिषवे अर्तिस्तुसुहुसृधृक्षीत्यादिनामन् नित्त्वादाद्युदात्तः आज्जसेरसुगित्यसुगागमः । दध्याशिरः दधातिपुष्णातीतिदधि डुधाञ्धारणपोषणयोः आदृगमहनजनःकिकिनौलिट्चेतिकिन् लिड्वद्भावाद्द्विर्भावः कित्त्वादाकारलोपः नित्त्वादाद्युदात्तत्वम् शॄहिंसायां शृणाति हिनस्ति सोमेअवनीयमानंसत् सोमस्यस्वाभाविकंरसं ऋजीषत्वमयुक्तं नीरसंदोषंवाइत्याशीः क्विपि ऋतइद्धातोरितीत्वम् रपरत्वंच दध्येवआशीर्येषांसोमानांतेदध्याशिरः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् ॥ ५ ॥

५. यह पवित्र, स्नेहगुण-संयुक्त और विशुद्ध सोमरस सोमपान करनेवाले के पानार्थ उसके पास आप ही जाता है।

त्वंसुतस्यपीतयेसद्योवृद्धोअजायथाः । इन्द्रज्यैष्ठ्यायसुक्रतो ॥ ६ ॥

त्वम् । सुतस्य । पीतये । सद्यः । वृद्धः । अजायथाः । इन्द्र । ज्यैष्ठ्याय । सुक्रतो इति सुऽक्रतो ॥ ६ ॥

सुक्रतोशोभनकर्मन्शोभनप्रज्ञवाहेइन्द्र त्वंसुतस्याभिषुतस्यसोमस्यपीतयेपानार्थंज्यैष्ठ्यायदेवेषुज्येष्ठत्वार्थंचसद्यस्तस्मिन्नेवक्षणेवृद्धःअजायथाः अभिवृद्ध्याउत्साहेनयुक्तोभूः ॥ पीतये पापानेइत्यस्मात्स्थागापापचोभावइतिक्तिन् घुमास्थेत्यादिनाईत्वम् तस्यनित्त्वेपिव्यत्ययेनप्रत्ययोदात्तत्वम् उत्तरसूत्रगतमुदात्तपदमत्रापिवायोजनीयम् । सद्यः सद्यःपरुत्परारीतिसूत्रेणसमानेहनीत्यर्थेसमानस्यसभावोद्यश्चप्रत्ययोनिपात्यते प्रत्ययस्वरेणोदात्तः । वृद्धः वृधुवृद्धौ ऊदितोवेतिक्त्वाप्रत्ययेइटोविकल्पितत्वाद्यस्यविभाषेतिनिष्ठायामिट्प्रतिषेधः प्रत्ययस्वरेणोदात्तः । ज्यैष्ठ्याय ज्येष्ठस्यभावोज्यैष्ठ्यम् गुणवचनब्राह्मणादिभ्यःकर्मणिचेतिष्यञ् ञित्त्वादाद्युदात्तः ॥ ६ ॥

६. हे शोभनकर्मा इन्द्र ! सोमपान के लिए, सदा से ज्येष्ठ होने के कारण, तुम सबके आगे रहते हो।

सप्तमीमृचमाह—

आत्वाविशन्त्वाशवःसोमासइन्द्रगिर्वणः । शन्तेसन्तुप्रचेतसे ॥ ७ ॥

आ । त्वा । विशन्तु । आशवः । सोमासः । इन्द्र । गिर्वणः ।
शम् । ते । सन्तु । प्रऽचेतसे ॥ ७ ॥

हेइन्द्र त्वात्वांसोमासः सोमाआविशन्तु आभिमुख्येनप्रविशन्तु कीदृशाःसोमाः आशवः सवनत्रयेप्रकृतिविकृत्योर्वाव्याप्तिमन्तः कीदृशेन्द्र गिर्वणः गीर्भिःस्तुतिभिः संभजनीय देवविशेष गिर्वणादेवोभवतिगीर्भिरेनंवनयन्तीतियास्कः । तथाविधहेइन्द्र तेतुभ्यंप्रचेतसेप्रकृष्टज्ञानाय शंसुखरूपाः सोमाः सन्तु ॥ गिर्वणः गृणन्तीतिगिरः स्तुतयः गृशब्दे क्विपि ऋतइद्धातोरितीत्वंरपरत्वंच गीर्भिर्वन्यतेसेव्यतेइतिगिर्वणाः वनषणसंभक्तौ संभक्तिःसेवा सर्वधातुभ्योऽसुन्नित्यसुन्प्रत्ययः । प्रचेतसे बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् ॥ ७ ॥

७. हे स्तुति-पात्र इन्द्र ! सवनत्रय-व्याप्त सोमरस तुम्हें प्राप्त हो और उच्च ज्ञान की प्राप्ति में तुम्हारा मंगलकारी हो।

त्वांस्तोमाअवीवृधन्त्वामुक्थाशतक्रतो । त्वांवर्धन्तुनोगिरः ॥ ८ ॥

त्वाम् । स्तोमाः । अवीवृधन् । त्वाम् । उक्था । शतक्रतो इति शतऽक्रतो । त्वाम् । वर्धन्तु । नः । गिरः ॥ ८ ॥

हेशतक्रतोबहुकर्मन् बहुप्रज्ञवेन्द्र त्वांस्तोमाः सामगानांस्तोत्राणि अवीवृधन् वर्धितवन्ति तथाबह्वृचानामुक्था शस्त्राणित्वामवीवृधन् यस्मात्पूर्वमेवभासीत् तस्मादिदानीमपिनोऽस्माकंगिरःस्तुतयस्त्वांवर्धन्तु वर्धयन्तु अतिवृद्धंकुर्वन्तु ॥ स्तोमाः मनोनित्त्वादाद्युदात्तः । अवीवृधन् वृधुवृद्धौ ण्यन्ताल्लुङिचङिउर्ऋदितिवृधेरुपधायाऋकारस्यऋकारविधानादन्तरङ्गोऽपिगुणोबाध्यते द्विर्भावहलादिशेषसन्वद्भावेत्वदीर्घत्वाडागमाः । उक्था उक्थानिं पातृतुदिवचिरिचिसिचिभ्यस्थगितिवचेः थक्प्रत्ययः तस्यकित्त्वात्संप्रसारणम् शेश्छन्दसिबहुलमितिशिलोपः नलोपश्च प्रत्ययस्वरेणान्तोदात्तः असामर्थ्यादामन्त्रितपरस्यापिनपराङ्गवद्भावइति नानुदात्तत्वम् । वर्धन्तु अन्तर्भावितण्यर्थाद्वृधेर्व्यत्ययेनपरस्मैपदम् ॥ ८ ॥

८. हे सौ यज्ञों के करनेवाले इन्द्र ! तुमको सोममंत्र और ऋक्-मंत्र—दोनों प्रतिष्ठित कर चुके हैं। हमारी स्तुति भी तुमको प्रतिष्ठित या संवर्द्धित करे।

अक्षितोतिःसनेदिमंवाजमिन्द्रःसहस्रिणम् । यस्मिन्विश्वानिपौंस्या ॥ ९ ॥

---

१ नि० ६, १४. । २ नाद्युदात्तत्वमित्यपिपाठः ।

अक्षितऽऊतिः । सनेत् । इमम् । वाजम् । इन्द्रः । सहस्रिणम् ।
यस्मिन् । विश्वानि । पौंस्या ॥ ९ ॥

इन्द्रः इमंवाजं सोमरूपमन्नं सनेत् संभजेत् कीदृशइन्द्रः अक्षितोतिः अहिंसितरक्षणः कदाचिदपिरक्षांनमुञ्चतीत्यर्थः कीदृशंवाजं सहस्रिणं प्रकृतौविकृतिषुचप्रवर्तमानत्वेनसहस्रसंख्यायुक्तम् यस्मिन्वाजेविश्वानिसर्वाणिपौंस्या पौंस्यानि पुंस्त्वानिबलानिवर्तन्तेतादृशंवाजमितिपूर्वत्रान्वयः ॥ अक्षितोतिः ननु क्षिक्षयेइत्ययंधातुरकर्मकः तस्यचकर्माभावादधिकरणेभावेकर्तरिवाक्तप्रत्ययेनभवितव्यम् तदिहयदिकर्तर्यधिकरणेवास्यात्तदातयोरर्थयोर्ण्यत्प्रत्ययस्याविधानात् क्षियइत्यनुवृत्तौनिष्ठायामण्यदर्थेइतिदीर्घेणभवितव्यम् तथाचक्षियोदीर्घादितिनिष्ठानत्वेअक्षीणेतिस्यात् नत्वक्षितेति अथनपुंसकेभावेक्तइतिभावपरःक्षितशब्दोगृह्यते तदातस्यण्यदर्थत्वेनाण्यदर्थेइतिनिषेधाद्दीर्घनत्वयोरभावात् क्षितमितिसिध्यति तदापुनञ्तत्पुरुषः प्रकृतेनान्वेतीति नविद्यतेक्षितमत्रेति बहुव्रीहिणैवभवितव्यम् तथाचनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वंस्यात् पुनरूतिशब्देनबहुव्रीहौपूर्वपदप्रकृतिस्वरत्वेनसएवस्वरस्तिष्ठेदित्यभिमतमाद्युदात्तत्वंनसिध्येदिति । सत्यं अतएवात्रक्षिधातुरन्तर्भावितण्यर्थोगृह्यते तेनसकर्मकत्वात्कर्मण्येषानिष्ठा ततश्चाण्यदर्थेइतिनिषेधाद्दीर्घोनिष्ठानत्वंचनभविष्यति तथाचनञ्तत्पुरुषेनक्षिताअक्षिताअक्षयितेत्यर्थः तत्रचाव्ययपूर्वपदप्रकृतिस्वरत्वेननञउदात्तत्वम् पुनरूतिपदेनबहुव्रीहौसएवस्वरःस्थास्यतीतिनकोपिदोषः रिक्षिचिरिजिरिदाशृदहिंसायांइतिक्षिणोतेर्हिंसार्थस्यवाकर्मणिनिष्ठा तथाचाहिंसितोतिरित्यर्थेउक्तक्रमेणस्वरःसिध्यतीतिनदोषः । सनेत् वनषणसंभक्तौ भौवादिकः । वाजं वृषादित्वादाद्युदात्तः । इन्द्रः रनोनित्त्वादाद्युदात्तः । सहस्रिणं सहस्रमस्यास्ति अतइनिठनौ प्रत्ययस्वरः । विश्वा विशेः क्वन् नित्त्वादाद्युदात्तः । पुंसःकर्माणिपौंस्यानि ब्राह्मणादेराकृतिगणत्वाद्गुणवचनब्राह्मणादिभ्यःकर्मणिचेतिष्यञ् ञित्त्वादाद्युदात्तः प्रथमाबहुवचनस्यसुपांसुलुगित्यादिनाडादेशः ननु स्त्रीपुंसाभ्यांनञ्स्नञौभवनादित्यनेनधान्यानांभवनेक्षेत्रेखञित्येतत्पर्यन्तेष्वपत्याद्यर्थेषुनञ्स्नञोर्विधानाद्यथापुंसोपत्यंपौंस्नः पुंसआगतः पौंस्नइत्यादि तद्वत्पुंसोभावःकर्मवेत्यस्मिन्नर्थेष्यञंबाधित्वा पौंस्नानीत्येवभवितव्यम् कथमुच्यतेपौंस्यानीति । उच्यते—आचत्वादितिसूत्रे त्वात् इत्यवधिनिर्देशात् ब्राह्मणस्त्वइत्येतत्पर्यन्तैरिमनिजादिभिःप्रत्ययैःसह त्वतलोःसमावेशः एवंतत्रैवचशब्दान्नञ्स्नञोरपिष्यञादिभिःसमावेशएवनबाध्यबाधकभावः ॥ ९ ॥

---

९. इन्द्र रक्षा में सदा तत्पर रहकर यह सहस्र-संख्यक अन्न ग्रहण करें। इसी अन्न या सोमरस में पौरुष रहता है।

दशमीमृचमाह—

मानोमर्ताअभिद्रुहन्तनूनामिन्द्रगिर्वणः।ईशानोयवयावधम्॥१०॥१०॥

मा। नः। मर्ताः। अभि। द्रुहन्। तनूनाम्। इन्द्र। गिर्वणः।
ईशानः। यवय। वधम् ॥ १० ॥ १० ॥

हेगिर्वणइन्द्र मर्ताः विरोधिनोमनुष्याः नोऽस्मदीयानांतनूनांशरीराणांमाभिद्रुहन् अभितोद्रोहंमाकुर्युः ईशानःसमर्थस्त्वं वधं वैरिभिःसंपाद्यमानंयवयास्मत्तःपृथक्कुरु मनुष्याइत्यादिपञ्चविंशतिसंख्याकेषुमनुष्यनामसुमर्ताव्राताइतिपठितम्॥ मर्ताः असिहसिमृग्रिण्वामिदमिलूपूधुर्विभ्यस्तन्नितितन् नित्त्वादाद्युदात्तत्वम्। अभि एवमादीनामन्तः। द्रुहन् द्रुहजिघांसायां लिङर्थेलेडितिमार्थनायांलेट् तस्यझि झोन्तः इतश्चलोपःपरस्मैपदेष्वितीकारलोपः शपोलुक् सार्वधातुकमपिदितिङित्त्वाल्लघूपधगुणाभावः। तनूनां असामर्थ्यान्नपराङ्गवद्भावः। इन्द्र गिर्वणः गतम्। ईशानः धातोरनुदात्तेत्त्वाच्छपोलुकि लसार्वधातुकत्वानुदात्तत्वेधातुस्वरएवशिष्यते। यवय यौतेर्णिचि संज्ञापूर्वकोविधिरनित्यइतिवृद्धिर्नक्रियते अथवा यौतीतियवः पचाद्यच् यवंकरोतीत्यर्थेतत्करोतितदाचष्टइतिणिच् इष्ठवद्भावाट्टिलोपः तस्यस्थानिवद्भावाद्वृद्ध्यभावः। वधं हनश्चवधइतिभावेअप् तत्संनियोगशिष्टस्यानिवद्भावेमान्तोदात्तोवधादेशः उदात्तनिवृत्तिस्वरेणापउदात्तत्वम्॥ १० ॥

१०. हे स्तवनीय इन्द्र! तुम सामर्थ्यवान् हो। ऐसा करना कि विरोधी हमारे शरीर पर आघात न कर सकें। हमारा वध न होने देना।

सुरूपेत्यादिषुषट्सूक्तेषुतृतीयस्ययुञ्जन्तीतिसूक्तस्यमन्त्रसंख्याऋषिच्छन्दोदैवतानिविनियोगश्चेत्येतेपूर्ववदवगन्तव्याः दशर्चेएतस्मिन्सूक्तेआद्यास्तिस्रोन्तिमाचेत्येताश्चतस्रऐन्द्र्यः आदहेत्येवांचतुर्थीमारभ्यषळ्चोमारुत्यः तासुमध्येवीळुचिदिन्द्रेणेत्येतेद्वेऋचौमारुत्यैसत्यावैन्द्र्यावपिभवतः तदेतत्सर्वमनुक्रमणिकायामुक्तम्—सुरूपकृत्नुंदशैन्द्रमातुयुञ्जन्त्यादहेत्येवाःषण्मारुत्योवीळुचिदिन्द्रेणेत्यैन्द्र्यौचेति एतस्मिन्सूक्ते युञ्जन्तीत्यसौतृचस्तृतीयेरात्रिपर्यायेब्राह्मणाच्छंसिनोऽनुरूपः तथाचातिरात्रेपर्यायाणामितिखण्डेयोगेयोगेतवस्तरंयुञ्जन्तिब्रध्नमरुषमितिसूत्रितम्।

तत्रप्रथमामृचमाह—

युञ्जन्तिब्रध्नमरुषंचरन्तंपरितस्थुषः। रोचन्तेरोचनादिवि॥ १ ॥

युञ्जन्ति। ब्रध्नम्। अरुषम्। चरन्तम्। परि। तस्थुषः। रोचन्ते।
रोचना। दिवि॥ १ ॥

इन्द्रोहिपरमैश्वर्ययुक्तः परमैश्वर्यंचाग्निवाय्वादित्यनक्षत्ररूपेणावस्थानादुपपद्यते ब्रध्न-मादित्यरूपेणावस्थितम् अरुषंहिंसकरहिताग्निरूपेणावस्थितम् चरन्तं वायुरूपेणसर्वतःप्रस-रन्तमिन्द्रं परितस्थुषःपरितोवस्थिताः लोकत्रयवर्तिनः प्राणिनोयुञ्जन्ति स्वकीयेकर्मणिदेवतात्वे-नसंबद्धंकुर्वन्ति तस्यैवेन्द्रस्यमूर्तिविशेषभूतारोचनानक्षत्राणिदिविद्युलोकेरोचन्ते प्रकाशन्ते । अस्यमन्त्रस्योक्तार्थपरत्वंब्राह्मणान्तरेव्याख्यातम्—युंजन्तिब्रध्नमित्याह । असौवाआदित्योब्र-ध्नः । आदित्यमेवास्मैयुनक्ति । अरुषमित्याह । अग्निर्वाअरुषः । अग्निमेवास्मैयुनक्ति । चरन्त-मित्याह । वायुर्वैचरन् । वायुमेवास्मैयुनक्ति । परितस्थुषइत्याह । इमेवैलोकाःपरितस्थुषः । इमानेवास्मैलोकान्युनक्ति । रोचन्तेरोचनादिवीत्याह । नक्षत्राणिवैरोचनादिवि । नक्षत्राण्येवास्मै-रोचयन्तीति । पञ्चविंशतिसंख्याकेषु महन्नामसु महः ब्रध्नइतिपठितम् आदित्यस्यापिमहत्त्वा-देवब्रध्नत्वम् ॥ युञ्जन्ति अन्तेःप्रत्ययस्वरेणाद्युदात्तत्वम् । ब्रध्नं प्रातिपदिकान्तोदात्तः । अ-रुषं रुषरिषहिंसार्थाः रोषन्तीतिरुषाहिंसकाः इगुपधज्ञाप्रीकिरःकइतिकः प्रत्ययस्वरेणा-न्तोदात्तः नसन्तिरुषायस्यासावरुषः नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् अमिपूर्वइतिपूर्वरूपे एकादेशउदात्तेनोदात्तइत्युदात्तत्वम् । चरन्तं शपःपित्त्वादनुदात्तत्वम् शतुश्चलसार्वधातु-कस्वरेणधातुस्वरएवशिष्यते । तस्थुषः तिष्ठतेर्लिटःक्वसुरादेशः वस्वेकाजाद्घसामितीटमन्त-रंगमपिबाधित्वा संप्रसारणंसंप्रसारणाश्रयंचबलीयइतिशसिपरतोभत्वाद्वसोःसंप्रसारणंपूरपूर्व-त्वम् आदेशप्रत्ययोरितिषत्वं वसोःप्रत्ययस्वरेणोदात्तत्वम् । रोचन्ते तिङोलसार्वधातु-कानुदात्तत्वम् शपःपित्त्वादनुदात्तत्वं धातुस्वरएव । रोचना अनुदात्तेतश्चहलादेरितियुच् युवोरनाकावित्यनादेशः चितइत्यन्तोदात्तत्वम् । दिवि ऊडिदमित्यादिनाविभक्तेरुदात्तत्वम् ॥ १ ॥

१. जो प्रतापान्वित सूर्य-रूप से, हिंसा-शून्य अग्नि-रूप से और विहरण-कर्त्ता वायु-रूप से अवस्थित हैं, उन्हीं इन्द्र से सब लोकों में रहनेवाले मनुष्य सम्बन्ध स्थापित करते हैं।

युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे । शोणा धृष्णू नृवाहसा ॥ २ ॥

युञ्जन्ति । अस्य । काम्या । हरी इति । विऽपक्षसा । रथे ।
शोणा । धृष्णू इति । नृऽवाहसा ॥ २ ॥

अस्यब्रध्नादिप्रतिपाद्यस्यादित्यादिमूर्तिभिस्तत्रतत्रावस्थितस्येन्द्रस्यरथेहरीएतन्नामानौ द्वौअश्वौसारथयोयुञ्जन्ति इन्द्रसंबन्धिनोरश्वयोर्हरिनामत्वम् हरीइन्द्रस्यरोहितोऽग्नेरितिपठि-तत्वात् कीदृशौहरी काम्या कामयितव्यौ विपक्षसाविविधेपक्षसीरथस्यपार्श्वौययोरश्वयोस्तौ विपक्षसौरथस्यद्वयोःपार्श्वयोर्योजितावित्यर्थः शोणारक्तवर्णौ धृष्णू प्रगल्भौ नृवाहसानृणां

१ तै०ब्रा०३. ९. ४. ।

पुरुषाणामिन्द्रतत्सारथिप्रमुखानांवोढारौ ॥ अस्य ब्रध्नमित्युक्तस्यपरामर्शादिदमोन्वादेशेऽश-नुदात्तस्तृतीयादावित्यश्च शित्त्वात्सर्वादेशेऽनुदात्तः विभक्तिरनुदात्तैवेतिसर्वानुदात्तत्वम् । का-म्या कमुकान्तौ कमेर्णिङ् कामयतेरचोयत् तित्स्वरितापवादत्वेनयतोनावइत्याद्युदात्तत्वम् सु-पांसुलुगितिद्विवचनस्यडादेशः । हरतोरथमितिहरी हृपिषीत्यादिनाइन् नित्त्वादाद्युदात्तः । विपक्षसा पचिवचिभ्यांसुट्चेतिपचेरसुन्सुडागमः विभिन्नेपक्षसीपार्श्वौययोस्तौ विशब्दोनि-पातत्वादुदात्तः पूर्वपदप्रकृतिस्वरेणसएवशिष्यते द्विवचनस्यडादेशः । रथे रमन्तेऽस्मिन्निति रथः रमुक्रीडायां हनिकुषिनीरमिकाशिभ्यःक्थन्नितिक्थन् कित्त्वादनुदात्तोपदेशेत्यादिना मकारलोपः नित्स्वरेणाद्युदात्तः । शोणा शोणृवर्णगत्योः गमनकरणत्वात्करणेघञ् ञित्त्वादा-द्युदात्तः सुपांसुलुगितिडादेशः । धृष्णू ञिधृषाप्रागल्भ्ये त्रसिगृधिधृषिक्षिपेःक्नुः कित्त्वाद्गुणा-भावः प्रत्ययस्वरः । नृवाहसा नॄन्वहतइतिवहेर्वहिहाधाञ्भ्यश्छन्दसीत्यसुन् णिदित्यनुवृत्तेर्वृ-द्धिः नित्त्वादाद्युदात्तः कृदुत्तरपदप्रकृतिस्वरत्वेनसएवशिष्यते ॥ २ ॥

२. वे मनुष्य इन्द्र के रथ में सुन्दर, तेजस्वी, लाल और पुरुष-वाहक हरि नाम के घोड़ों को संयोजित करते हैं।

केतुंकृण्वन्नकेतवेपेशोमर्याअपेशसे । समुषद्भिरजायथाः ॥ ३ ॥

केतुम् । कृण्वन् । अकेतवे । पेशः । मर्याः । अपेशसे । सम् । उषत्ऽभिः । अजायथाः ॥ ३ ॥

हेमर्यामनुष्याइदमाश्चर्यंपश्यतेत्यध्याहारः किमाश्चर्यमितितदुच्यते आदित्यरूपोऽयमि-न्द्रउषद्भिर्दाहकैः रश्मिभिःप्रतिदिनमुषःकालेर्वासंभूयाजायथाः उदपद्यत अथवासूर्यस्यैवा-स्तमयेमरणमुपचर्यव्यत्ययेनबहुवचनंकृत्वासंबोधनंक्रियते हेमर्य प्रतिदिनंत्वमजायथाइतियो-ज्यम् किंकुर्वन् अकेतवे रात्रौनिद्राभिभूतत्वेनप्रज्ञानरहितायप्राणिनेकेतुंकृण्वन्प्रातःप्रज्ञानंकु-र्वन् अपेशसे रात्रावन्धकारावृतत्वेनानभिव्यक्तत्वाद्रूपरहितायपदार्थायप्रातरन्धकारनिवारणे-नपेशोरूपमभिव्यज्यमानंकुर्वन् पेशइतिरूपनाम पिंशतेरितियास्कः । अकेतवेऽपेशसेइतिचतु-र्थ्यौषष्ठ्यर्थेद्रष्टव्यौ ॥ केतुं प्रातिपदिकस्वरः । कृण्वन् कृविहिंसाकरणयोश्च लटःशत्रादेशः इदि-तोनुम्धातोरितिनुमागमः कर्तरिशपिप्राप्ते धिन्विकृण्व्योरचेतिउप्रत्ययः तत्सन्नियोगेनवकारस्य चाकारः अतोलोपइत्यकारलोपः तस्यस्थानिवद्भावात्पूर्वस्यलघूपधगुणोनभवति अकारस्यप्र-त्ययस्वरेणोदात्तत्वम् । अकेतवे बहुव्रीहौनञोसुभ्यामित्युत्तरपदान्तोदात्तत्वम् । पेशः नवि-षयस्यानिसन्तस्येत्याद्युदात्तः । मर्याः छन्दसिनिष्टर्क्येत्यादौम्रियतेर्निपातितः आमन्त्रितनिघा-

१ नि० ८. ११.।

तः असामर्थ्यात्पूर्वस्यनपराङ्गवद्भावः । अपेशसे नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् सम् निपातआद्युदात्तः। उषद्भिः उषप्लुषदाहे ज्वलद्भिः रश्मिभिः लटःशत्रादेशेशपिप्राप्तेव्यत्ययेन शः सार्वधातुकमपिदितितस्यङित्त्वाल्लघूपधगुणोनभवति शस्यप्रत्ययस्वरेणोदात्तत्वम् उपरिशतुरदुपदेशाल्लसार्वधातुकानुदात्तत्वम् एकादेशउदात्तेनोदात्तः । अजायथाः अजायतेत्यर्थेपुरुषव्यत्ययेनिपातः ॥ ३ ॥

३. हे मनुष्यो ! सूर्यात्मा इन्द्र बेहोश को होश में करके और रूप-विरहित को रूप-दान करके प्रचंड किरणों के साथ उग रहे हैं।

आदह॑ स्व॒धामनु॒ पुन॑र्गर्भ॒त्वमे॑रि॒रे । दधा॑ना॒ नाम॑ य॒ज्ञिय॑म् ॥ ४ ॥

आत् । अह॑ । स्व॒धाम् । अनु॑ । पुन॑ः । ग॒र्भ॒ऽत्वम् । आ॒ऽई॒रि॒रे । दधा॑नाः । नाम॑ । य॒ज्ञिय॑म् ॥ ४ ॥

अत्रास्तिविशेषविनियोगः चतुर्विंशेहनिप्रातःसवनेब्राह्मणाच्छंसिशस्त्रेआदहस्वधामन्वितिद्वेऋचौइन्द्रेणसंहिदृक्षसइत्येका अयंतृचःषळहस्तोत्रियसंज्ञकः तथाचसूत्रितंचतुर्विंशेहोताजनिष्टेतिखण्डे—इन्द्रेणसंहिदृक्षसआदहस्वधामन्वित्येकाद्वेचेति । यद्यप्येतदैन्द्रंसूक्तम् तथाप्यादहेत्यादिषुषट्सुमरुतोवर्ण्यन्ते प्रायेणैन्द्रेमरुतइत्यनुक्रमणिकायामुक्तत्वात् आदित्ययमानन्तर्यार्थेनिपातः अहेत्यवधारणार्थः आदहवर्षर्तोरनन्तरमेवस्वधामनु इतःपरंजनिष्यमाणमन्नमुदकंवानुपलक्ष्यमरुतोदेवागर्भत्वमेरिरे मेघमध्येजलस्यगर्भाकारंप्रेरितवन्तः जलस्यकर्तारंपर्जन्यंप्रेरितवन्तः प्रतिसंवत्सरमेवंकुर्वन्तीतिदर्शयितुंपुनःशब्दःप्रयुक्तः कीदृशामरुतः यज्ञियंयज्ञार्हंनामदधानाःधारयन्तः सप्तसुगणेषुमरुतामीदृङ्चान्यादृङ्चेत्यादीनियज्ञयोग्यानिनामान्यन्यत्राम्नातानि अन्धइत्यादिष्वष्टाविंशतिसंख्याकेषुअन्ननामसुऊर्क्रसःस्वधेति पठितम् अर्णइत्यादिष्वेकशतसंख्याकेषूदकनामसु तेजःस्वधाअक्षरमितिपठितम् ॥ आत् अह निपातावाद्युदात्तौ । स्वधां स्वंलोकंदधातिपुष्णातीतिस्वधा आतोऽनुपसर्गेकः कृदुत्तरपदप्रकृतिस्वरत्वम्। अनुपुनःशब्दौनिपातावाद्युदात्तौ । गर्भस्यभावोगर्भत्वम् प्रत्ययस्वरः। ईरिरे अन्तर्भावितण्यर्थादीरगतावित्यस्मादनुदात्तेतःपरस्यलिटोझस्यइरेच् चित्त्वादन्तोदात्तः सहसुपेत्यत्रसुपेतियोगविभागादाङःसहतिङ्समासेऽपिसमासस्येत्यन्तोदात्तत्वम् इजादेश्चगुरुमतोनृच्छइत्याम्नभवति मन्त्रत्वात् अहशब्दयोगान्निघाताभावः तुपश्यपश्यताहैःपूजायामितिनिषेधात्। दधानाःशानचश्चित्त्वादन्तोदात्तत्वेप्राप्ते अभ्यस्तानामादिरित्याद्युदात्तत्वम् । यज्ञमर्हतियज्ञियम् यज्ञर्त्विग्भ्यांघखञाविति घप्रत्ययः आयनेयीनीयियःफढखछघांप्रत्ययादीनामितीयादेशः प्रत्ययस्वरेणइकारउदात्तः॥ ४ ॥

४. इसके अनन्तर मरुद्गण ने यज्ञोपयोगी नाम धारण करके अपने स्वभाव के अनुकूल, बादल के मध्य जल की गर्भाकार रचना की।

पञ्चमीमृचमाह—

वी॒ळु चि॑दारु॒ज॒त्नुभि॒र्गुहा॑ चिदिन्द्र॒ वह्नि॑भिः । अवि॑न्द उ॒स्रिया॒ अनु॑ ॥५॥

वी॒ळु । चि॒त् । आ॒रु॒ज॒त्नुऽभिः॑ । गुहा॑ । चि॒त् । इ॒न्द्र॒ ।
वह्नि॑ऽभिः । अवि॑न्दः । उ॒स्रियाः॑ । अनु॑ ॥ ५ ॥ ११ ॥

अस्तिकिंचिदुपाख्यानं पणिभिर्देवलोकाद्गावोपहताअन्धकारेमक्षिप्ताः ताश्चेन्द्रोमरुद्भिःसहाजयदिति एतच्चानुक्रमणिकायांसूत्रितम्—पणिभिरसुरैर्निगूढागाअन्वेष्टुंसरमांदेवशुनीमिन्द्रेणप्रहितामयुग्भिःपणयोमित्रीयन्तःप्रोचुरिति । मन्त्रान्तरेचदृष्टान्ततयासूचितम्—निरुद्धाआपःपणिनेवगावइति । तदेतदुपाख्यानमभिप्रेत्योच्यते—हेइन्द्र वीळुचित् दृढमपिदुर्गमस्थानं आरुजत्नुभिर्भञ्जद्भिर्वह्निभिर्वोढृभिरन्यत्रनेतुंसमर्थैर्मरुद्भिःसहितस्त्वं गुहाचित् गुहायामपिस्थापिताः उस्रियागाअन्वविन्दः अन्विष्यलब्धवानसि ओजःपाजइत्यादिष्वष्टाविंशतिसंख्याकेषुबलनामसु दक्षःवीळुच्यौत्नमितिपठितम् नवसंख्याकेषुगोनामस्वघ्न्याउस्राउस्रियाइति पठितम् ॥ वीळु प्रातिपदिकस्वरः । चित् चादिरनुदात्तः । आरुजत्नुभिः रुजोभङ्गेइत्यौणादिकःकत्नुच्प्रत्ययः कित्त्वाद्गुणाभावः चित्त्वादन्तोदात्तत्वम् समासेकृदुत्तरपदप्रकृतिस्वरत्वम् । गुहा सप्तम्याडादेशः ग्रामादीनांचेत्याद्युदात्तः । वह्निभिः वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्योनिदितिवहेर्निप्रत्ययः नित्त्वादाद्युदात्तः । अविन्दः शेमुचादीनामितिनुमागमः लुङ्लङ्लृङ्क्ष्वडुदात्तः । वसन्तीत्युस्रियाः वसेःकर्तरिरियक्प्रत्ययः षत्वाभावश्चबाहुलकादूहनीयः उक्तं हि—यत्नपदार्थविशेषसमुत्थंप्रत्ययतःप्रकृतेश्चतदूह्यमिति इकारःप्रत्ययस्वरेणोदात्तः ॥ ५ ॥

५. इन्द्र ! विकट स्थान को भी भेदन करनेवाले और प्रवहमान मरुद्गण के साथ तुमने गुफा में छिपी हुई गायों को खोजकर उनका उद्धार किया था।

दे॒व॒यन्तो॒ यथा॑ म॒तिमच्छा॑ वि॒दद्व॑सुं॒ गिरः॑ । म॒हाम॑नूषत श्रु॒तम् ॥ ६ ॥

दे॒व॒ऽयन्तः॑ । यथा॑ । म॒तिम् । अच्छ॑ । वि॒दत्ऽव॑सुम् ।
गिरः॑ । म॒हाम् । अ॒नू॒ष॒त॒ । श्रु॒तम् ॥ ६ ॥

देवयन्तःमरुत्संज्ञकान्देवानिच्छन्तोगिरःस्तोतारऋत्विजः महांप्रौढं मरुद्गणमच्छप्राप्तुमनूषत स्तुतवन्तः कीदृशंमरुद्गणं विदद्वसुं वेदयद्भिःस्वमहिमप्रख्यापकैःवसुभिर्धनैर्युक्तम् श्रुतं विख्यातं

१ ऋ० सं. १. २, ३८. ।

मरुद्गणस्यदृष्टान्तः यथामतिं मन्तारमिंद्रंयथास्तुवन्तितथेत्यर्थः ॥ देवयन्तःदेवानात्मनइच्छन्तः सुपआत्मनःक्यच् क्यचिचेतीत्वम् अकृत्सार्वधातुकयोर्दीर्घइतिदीर्घत्वंचनभवति नच्छन्दस्यपुत्रस्येत्यनेनक्यचियत्प्राप्तमीत्वंदीर्घत्वंवा तस्यसर्वस्यप्रतिषेधात् यद्यपीत्वमेवप्रकृतं तथापिव्यवहितस्यापिदीर्घत्वस्यसप्रतिषेधइतिविज्ञायते अश्वायन्तइत्यादावश्वाघस्येत्यात्वविधानादितिबुक्तम् क्यजन्ताच्छतृप्रत्ययः क्यचश्चित्त्वाच्चितइत्यन्तोदात्तत्वम् शपःपित्त्वेनशतुश्चलसार्वधातुकस्वरेणानुदात्तत्वे एकादेशउदात्तेनोदात्तइत्युदात्तः । यथा प्रकारवचनेथाल् लितीतिप्रत्ययात्पूर्वमुदात्तत्वम् । मतिं मन्त्रेवृषेषपचमनेत्यादिनाक्तिन्नुदात्तः मतिशब्दोज्ञानपरोप्युपचारात् ज्ञातरीन्द्रेवर्तते अथवा पदान्तरेविशेष्यानुपादानादिन्द्रस्यैवैषासंज्ञा ततश्च क्तिच्कौचसंज्ञायामितिमन्यतेःकर्तरिक्तिच् तस्योपदेशेऽनुदात्तत्वादिट्प्रतिषेधः चित्त्वादन्तोदात्तत्वम् । अच्छ अध्याहृतगच्छत्यर्थयोगादच्छगत्यर्थवदेष्वितिगतिसंज्ञयासहनिपातसंज्ञायाअपिसमावेशान्निपाताआद्युदात्ताइत्याद्युदात्तत्वम् । विदद्वसुं विदज्ञानेइत्यस्मादन्तर्भावितण्यर्थाच्छतृप्रत्यये विदन्त्यौदार्यातिशयवत्तयाज्ञापयन्तिवसूनिधनानियंसविदद्वसुः विदेःशतृप्रत्ययेअदिप्रभृतिभ्यःशपइतिशपोलुकि प्रत्ययस्वरेणशतुरुदात्तत्वम् बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वेनतदेवशिष्यते । गृणन्तिस्तुवन्तीतिगिरः गृणातेःक्विपि ऋतइद्धातोरितीत्वंरपरत्वं धातुस्वरेणोदात्तत्वम् । महां महान्तं नकारतकारयोर्लोपश्छान्दसः प्रातिपदिकस्वरेणोदात्तत्वम् । अनूषत णुस्तुतौव्यत्ययेनात्मनेपदं लुङि झस्यअदादेशः सिचि कुटादित्वेनङित्त्वाद्गुणाभावः इडभावउकारदीर्घत्वंचछान्दसं निघातः । श्रुतं प्रत्ययस्वरः ॥ ६ ॥

६. स्तुति करनेवाले देव-भाव की प्राप्ति के लिए धन-सम्पन्न, महान् और विख्यात मरुद्गण को लक्ष्य कर इन्द्र की तरह स्तुति करते हैं।

इन्द्रे॑ण॒ सं हि दृक्ष॑से संज॒ग्मा॒नो अबि॑भ्युषा । म॒न्दू स॑मा॒नव॑र्चसा ॥ ७ ॥

इन्द्रे॑ण । सम् । हि । दृक्ष॑से । स॒म्ऽज॒ग्मा॒नः । अबि॑भ्युषा ।
म॒न्दू इति॑ । स॒मा॒नऽव॑र्चसा ॥ ७ ॥

हेमरुद्गण त्वंइन्द्रेणसजग्मानः संगच्छमानः संदृक्षसेहि सम्यग्दृश्येथाःखलु अवश्यमस्माभिर्द्रष्टव्यइत्यर्थः कीदृशेनेन्द्रेण अबिभ्युषाभीतिरहितेन कीदृशाविन्द्रमरुद्गणौ मन्दू नित्यममुदितौ समानवर्चसातुल्यदीप्ती पुराकदाचिद्वृत्रवधदशायांइन्द्रस्यसखायः सर्वेदेवावृत्रश्वासेनापसारिताः तदानीमिन्द्रस्यवृत्रसंबन्धिसकलसेनाजयार्थंमरुद्भिःसंगमोभूत् सोऽयमर्थोवृत्रस्यत्वाश्वसथादितिमन्त्रेसंगृहीतः । इन्द्रोवैवृत्रंहनिष्यन्नितिब्राह्मणेप्यभिहितश्च । इन्द्रशब्दःपरमै-

१ ऋ० सं. ६. ६. ३३. । २ ऐ० ब्रा० ३. २० ।

श्वर्यवन्तंमरुद्गणंचाभिधत्ते तदानीमिन्द्रस्यसंबोधनंबहिरेवाध्याहर्तव्यम् तथाचेयमृग्यास्केनव्याख्याता—इन्द्रेणहिसंदृश्यसेसंगच्छमानोऽबिभ्युषागणेनमन्दूमदिष्णूयुवांस्थोऽपिवामन्दुनावेनेति स्यात्समानवर्चसेत्येतेनव्याख्यातमिति॥ संदक्षसे संपश्येथाः दृशेश्चेतिवक्तव्यमित्यात्मनेपदं दृशेर्लिङर्थेलेडितिमार्थनायांलेट् थासःसे लेटोडाटावित्यडागमः सिब्बहुलंलेटीतिसिप् संज्ञापूर्वकोविधिरनित्यइतिगुणाभावः व्रश्चादिनाषत्वम् षढोःकःसीतिकत्वम् आदेशप्रत्यययोरितिसिपः षत्वम् बहुलग्रहणात्सिपःपरस्ताच्छबपिभवति सिपाव्यवधानात्पश्यादेशोनभवति शपःपित्त्वादनुदात्तत्वं उत्तरस्यलसार्वधातुकानुदात्तत्वं धातुस्वरएवशिष्यते हिशब्दयोगात्तिङ्ङतिङइतिनिघातोनभवति हिचेतिप्रतिषेधाव। संजग्मानः गमेःसंपूर्वाच्छन्दसिलुङ्लङ्लिटइतिवर्तमानेलिट् समोगम्यृच्छीत्यात्मनेपदविधानाल्लिटःकानजादेशः द्विर्भावोहलादिशेषोऽभ्यासस्यचुत्वं गमहनेत्युपधालोपः कानचश्चित्त्वादन्तोदात्तत्वं गतिसमासेकृदुत्तरपदप्रकृतिस्वरत्वम्। अविभ्युषा ञिभीभये पूर्ववल्लिट् शेषात्कर्तरिपरस्मैपदमितिपरस्मैपदम् क्वसुश्चेतिलिटःक्वसुरादेशः तस्यकित्त्वाद्गुणाभावः द्विर्भावः अभ्यासस्यह्रस्वजश्त्वे क्रादिनियमात्प्राप्तइट् वस्वेकाजाद्घसामितिनियमान्निवर्तते नञ्समासेतृतीयैकवचनेभत्वाद्वसोःसंप्रसारणमितिवकारस्यउकारः संप्रसारणाच्चेतिपूर्वरूपत्वं शासिवसीतिषत्वं इयङादेशंबाधित्वाएरनेकाचइतियणादेशः अव्ययपूर्वपदप्रकृतिस्वरत्वं पूर्वेण सहसंहितायामोकारस्य एङःपदान्तादतीतिपरपूर्वरूपत्वेप्राप्ते प्रकृत्यान्तःपादमव्यपरेइतिप्रकृतिभावः। मन्दू मदिस्तुतिमोदमदस्वप्नकान्तिगतिषु इदितोनुम्धातोरितिनुमागमः कुरित्यनुवृत्तौ स्वरुशंकुपीयुनीलंगुलिग्विव्यत्राविभक्तिकनिर्देशान्मन्तेर्हिगुरितिवध्धात्वन्तरादपिकुरित्युक्तम् प्रत्यस्वरेणान्तोदात्तः द्विवचनमौ प्रथमयोःपूर्वसवर्णः तृतीयैकवचनेचेव सुपांसुलुगित्यादिनापूर्वसवर्णदीर्घत्वम्। समानवर्चसा समानंवर्चोययोरितिवायस्येतिवाबहुव्रीहिः द्विवचनेसुपांसुलुगित्यादिनाआकारादेशः समानपदस्यप्रातिपदिकान्तोदात्तत्वं बहुव्रीहौपूर्वपदप्रकृतिस्वरेण तदेवावशिष्यते ॥ ७ ॥

७. हे मरुद्गण ! तुम लोगों की इन्द्र से संकोच-रहित अभिन्नता देखी जाती है। तुम लोग सदा प्रसन्न और समान-प्रकाश हो।

अनवद्यैरभिद्युभिर्मखःसहस्वदर्चति। गणैरिन्द्रस्यकाम्यैः ॥ ८ ॥

अनवद्यैः। अभिद्युऽभिः। मखः। सहस्वत्। अर्चति। गणैः। इन्द्रस्य। काम्यैः ॥ ८ ॥

मखःप्रवर्तमानोयंयज्ञः अनवद्यैर्दोषरहितैरभिद्युभिः द्युलोकमभिगतैः काम्यैः फलप्रदत्वेनकामयितव्यैर्गणैःमरुत्समूहैःसहितमिन्द्रस्येन्द्रं सहस्वव बलोपेतं यथाभवतितथार्चतिपूज-

१ नि० ४.१२।

यति अयंयज्ञोमरुतइन्द्रंचातिशयेनप्रीणयतीत्यर्थः यज्ञइत्यादिषुपञ्चदशसुयज्ञनामसु मखः विष्णुरितिपठितम् चतुश्चत्वारिंशत्स्वर्चतिकर्मसुअर्चतिगायतीतिपठितम् ॥ नविद्यतेअवद्यंयेषांते-अनवद्याः नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । अभिगताद्यौर्यैस्तेअभिद्यवः तैः अभिद्युभिः अभिशब्दः प्रातिपदिकस्वरेणान्तोदात्तः बहुव्रीहौपूर्वपदप्रकृतिस्वरेणसएवशिष्यते । मखः प्रातिपदिकस्वरः । सहोबलमस्मिन्नर्चनकर्मण्यस्तीतिसहस्वत् तसौमत्वर्थेइतिभसंज्ञयापदसंज्ञाया-बाधितत्वात्सकारस्यरुत्वाभावः मादुपधायाश्चमतोर्वोयवादिभ्यइतिमतुपोमस्यवत्वं सहस्शब्दो-नविषयस्यानिसन्तस्येत्याद्युदात्तः मतुपःपित्त्वात्सएवशिष्यते । काम्यैः कमेर्णिङ् अतउपधा-याइतिवृद्धिः जनीजॄष्क्नसुरञ्जोमन्ताश्चेत्यमन्तत्वेनप्राप्तस्यमित्त्वस्य नकम्यमिचमामितिप्रतिषेधा-न्मितांह्रस्वइत्युपधायाह्रस्वत्वंनभवति ण्यन्तादचोयत् णिलोपःतित्स्वरितमितिप्राप्तेयतोनावइत्या-द्युदात्तत्वम् ॥ ८ ॥

८. निर्दोष, सुरलोकाभिगत और कामना के विषयीभूत मरुद्गण के साथ इन्द्र को बलिष्ठ समझकर यह यज्ञ पूजा करता है।

अतः꣡परि꣢ज्मन्ना꣡ग꣢हि दि꣣वो꣡वा꣢रोच꣣ना꣡दधि꣢ । सम꣢स्मि꣡न्नृ꣢ञ्जते꣣गिरः꣢ ॥ ९ ॥

अतः꣡ । प꣢रि꣣ऽज्म꣡न् । आ । ग꣢हि꣣ । दि꣡वः꣢ । वा꣣ । रो꣢च꣣ना꣡त् । अधि꣢ ।
सम् । अ꣣स्मि꣡न् । ऋ꣢ञ्ज꣣ते꣡ । गिरः꣢ ॥ ९ ॥

हेपरिज्मन्परितोव्यापिन् मरुद्गण अतोऽस्मान्मरुद्गणस्थानादन्तरिक्षादागहिअस्मिन्कर्म-ण्यागच्छ दिवोवाद्युलोकाद्वा समागच्छ रोचनादधिदीप्यमानादादित्यमण्डलाद्वासमागच्छ अ-स्मदीयकर्मकालेयत्रयत्रतिष्ठसि ततःसर्वस्मादागच्छेत्यर्थः किमर्थमागमनमितितदुच्यते अस्मि-न्कर्मणिवर्तमानऋत्विग्गिरःस्तुतीः समृञ्जतेसम्यक्प्रसाधयति ऋञ्जतिः प्रसाधनकर्मेतियास्कः[1]। एताः स्तुतीःश्रोतुमागच्छेत्यर्थः यद्यप्यृत्विजामत्रस्यप्रयुज्यमानत्वात्ऋञ्जतिधातोरुत्तमपुरुषेणभ-वितव्यम् तथापिपरोक्षकृतत्वेननिर्देशात्प्रथमपुरुषप्रयोगः परोक्षकृतलक्षणंचयास्कआह—तास्त्रि-विधाऋचःपरोक्षकृताःप्रत्यक्षकृताआध्यात्मिक्यश्च तत्रपरोक्षकृताःसर्वाभिर्नामविभक्तिभिर्यु-ज्यन्तेप्रथमपुरुषैश्चाख्यातस्येति[2] ॥ अतः पञ्चम्यास्तसिल् एतदोऽश् शित्त्वात्सर्वादेशः लि-तीतिप्रत्ययात्पूर्वस्योदात्तत्वम् । परिज्मन् अजगतिक्षेपणयोः अन्येभ्योऽपिदृश्यन्तेइतिमनिन् अकारलोपश्छान्दसः आमन्त्रितनिघातः । गहि गमेर्बहुलंछन्दसीतिशपोलुक् हेर्ङित्त्वादनुदा-त्तोपदेशेत्यादिनामलोपः अतोहेरितिहिलोपोनभवति तस्मिन्कर्तव्ये असिद्धवदत्राभादितिमलो-पस्यासिद्धत्वेनअनकारान्तत्वात् । दिवःऊडिदमित्यादिनाविभक्तेरुदात्तत्वम् । वा चादयोऽनुदात्ता-

१ नि० ६. २१. । २ नि० ७. १. ३ वृत्त्यभिप्रायेणायंपाठः

इत्यनुदात्तः। रोचनात् रुचदीप्तौ अनुदात्तेतश्चहलादेरितियुच् युवोरनाकावित्यनादेशः चिदित्यन्तोदात्तः। अधि अधिपरीअनर्थकावितिकर्मप्रवचनीयत्वेनसन्निपातसंज्ञायाःसमावेशान्निपाताआद्युदात्ताइत्याद्युदात्तः। अस्मिन् परिज्मन्नित्यादिष्टस्यैवान्वादेशादिदमोन्वादेशेशनुदात्तस्तृतीयादावित्यश्अनुदात्तः शित्वात्सर्वादेशः विभक्तिः अनुदात्तौसुप्पितावित्यनुदात्तेविसर्वानुदात्तत्वम् ।ऋअते ऋजिभृजीवर्जने समित्युपसर्गयोगात्प्रसाधनेवर्तते निघातः। गिरः प्रातिपदिकस्वरः॥ ९॥

९. सर्वदिशा-व्यापक मरुद्गण! अन्तरिक्ष, आकाश या ज्वलन्त सूर्यमंडल से आओ। इस यज्ञ में पुरोहित लोग तुम लोगों की भली भाँति स्तुति करते हैं।

इतोवासातिमीमहेदिवोवापार्थिवादधि। इन्द्रंमहोवारजसः॥१०॥१२॥

इतः। वा। सातिम्। ईमहे। दिवः। वा। पार्थिवात्। अधि। इन्द्रम्। महः। वा। रजसः॥ १०॥ १२॥

इन्द्रंदेवंप्रति सातिंधनदानंअधीमहे आधिक्येनयाचामहे कस्माल्लोकादितितदुच्यते इतोऽस्मादभिदृश्यमानात्पार्थिवात्पृथिवीलोकाद्वादिवोवाद्युलोकाद्वा महोमहतःप्रौढाद्रजसोवापक्ष्यादीनांरञ्जकादन्तरिक्षलोकाद्वायमिन्द्रोयतःकुतश्चिदानीयास्मभ्यंधनंप्रयच्छत्वित्यर्थः सप्तदशसुयाञ्चाकर्मस्वीमहेयामीतिपठितम्॥इतः इदम्शब्दात्पञ्चम्यास्तसिल् इदमइशितीश् शित्वात्सर्वादेशः अत्रऊडिदमित्यस्यावकाशः आभ्यांएभिःलितीत्यस्यावकाशः पचनंपाचकः उभावपिनित्यौ तत्रपरत्वाद्विप्रतिषेधेपरंकार्यमितिलितीतिइकारस्योदात्तत्वम् पश्चात्तसेःप्राग्दिशोविभक्तिरितिविभक्तिसंज्ञकत्वादूडिदमित्यादिना असर्वनामस्थानविभक्तेरुच्यमानमुदात्तत्वंभवति सकृद्गतौविप्रतिषेधेयद्बाधितंतद्बाधितमेवेत्यूडिदमित्यस्यपुनरप्रवृत्तिरेवेतिचेत् न लक्ष्यानुरोधेनपुनःप्रसंगविज्ञानंचेति स्वीकारात् नन्वेवंयतस्ततइत्यादावपिपरेणबाधितमपिसावेकाचइतितसिलउदात्तत्वंस्यादितिचेत् न यत्तच्छब्दयोः सावर्णान्तत्वेन नगोश्वन्सावर्णेतिनिषेधात् नचपुनःप्रसंगविज्ञानंचेत्येतत्सार्वत्रिकं लक्ष्यानुरोधेनक्वचिदेवतदाश्रयणादिति।सातिं षणुदाने धात्वादेःषःसः भावेक्तिन् जनसनखनांसञ्झलोरितिनकारस्यात्वं तितुत्रतथसिसुसरकसेषुचेतिनिषेधादिण्नभवति नित्स्वरेप्राप्ते उदात्तइत्यनुवृत्तौ ऊतियूतिजूतिसातिहेतिकीर्तयश्चेतिनिपातनादन्तोदात्तत्वम्। ईमहे ईङ्गतौ श्यनोऽपिबहुलंछन्दसीतिलुक् अस्यधातोर्ङित्वात्तास्यनुदात्तेन्ङिददुपदेशादितिलसार्वधातुकस्यानुदात्तत्वेधातुस्वरएवशिष्यते नचतिङ्ङतिङइतिनिघातः चवायोगेप्रथमेतिनिषेधादुत्तरवाक्ययोरपिहिवाशब्दयोगादन्यथावाक्यापरिपूर्तेस्तिङ्विभक्तेरवश्यमध्याहारात्तदपेक्षयैवप्राथम्यमातिङ्वि-

भक्तिरिति। दिवः ऊडिदमित्यादिनाविभक्तेरुदात्तत्वम्। पार्थिवात् प्रथमख्याने प्रथेतेइतिपृथिवी प्रथेःषिवन्संप्रसारणंचेतिषिवन्प्रत्ययः षिद्गौरादिभ्यश्चेतिङीष् प्रत्ययस्वरेणोदात्तः शेषनिघाते-नानुदात्तादिःपृथिवीशब्दः पृथिव्याविकारइत्यर्थे ओरञ्इत्यनुवृत्तावनुदात्तादेश्चेत्यञ् यस्येति-चेतीकारलोपः तद्धितेष्वचामादेरित्यादिवृद्धीरपरत्वम् ञ्नित्यादिर्नित्यमित्याद्युदात्तः । अधि निपातत्वादाद्युदात्तः । इन्द्रं रन्प्रत्ययान्तआद्युदात्तः । महः महतइत्यस्यअकारतकारयोर्लोप-श्छान्दसः सावेकाचइतिविभक्तेरुदात्तत्वम्।रजसः नब्विषयस्यानिसन्तस्येत्याद्युदात्तत्वम्॥१०॥

१०. हम इन इन्द्र के निकट इसलिए याचना करते हैं कि ये पृथिवी, आकाश और महान् वायु-मण्डल (अन्तरिक्ष) से हमें धन-दान दें।

इन्द्रमित्यादिकंदशर्चंयत्सूक्तंतत्सुरूपकृत्नुमित्यादिषुचतुर्थम्। ऋषिच्छन्दोदेवताविनियोगश्च पूर्ववत् विशेषविनियोगस्तूच्यते—महाव्रतेनिष्केवल्यशस्त्रेइन्द्रमिद्गाथिनइतिसूक्तम् तथाचपञ्च-मारण्यकेसूत्रितम्—शिरोगायत्रमिन्द्रमिद्गाथिनइति । तथाचतुर्विंशेहनिब्राह्मणाच्छंसिनःश-स्त्रे इन्द्रमिद्गाथिनइतिषळहस्तोत्रियस्तृचः चतुर्विंशेहोताजनिष्टेत्युपक्रम्यायाहिसुषुमाहितइन्द्र-मिद्गाथिनोबृहदितिसूत्रितत्वात् अतिरात्रेप्रथमेपर्यायेऽच्छावाकशस्त्रेऽयमेवतृचोऽनुरूपः सूत्रि-तंच— इन्द्रायमद्वनेसुतमिन्द्रमिद्गाथिनोबृहदिति।

तत्रप्रथमामृचमाह—

इन्द्रमिद्गाथिनो॑बृहदिन्द्र॑मर्केभि॑रर्किणः॑। इन्द्रं॒वाणी॑रनूषत ॥ १ ॥

इन्द्र॑म्। इत्। गा॒थिनः॑। बृ॒हत्। इन्द्र॑म्। अ॒र्केभिः॑। अ॒र्किणः॑। इन्द्र॑म्। वाणीः॑। अ॒नू॒ष॒त ॥ १ ॥

गाथिनः गीयमानसामयुक्ताउद्गातारः इन्द्रमित् इन्द्रमेव बृहत् त्वामिद्धिहवामहेइत्यस्या-मृचिउत्पन्नेनबृहन्नामकेनसाम्नाअनूषतस्तुतवन्तः अर्किणः अर्चनहेतुमन्त्रोपेताहोतारः अर्केभिः ऋग्रूपैर्मन्त्रैः इन्द्रमेवानूषतस्तुतवन्तः येत्ववशिष्टाअध्वर्य्वादयस्तेवाणीर्वाग्भिर्यजूरूपाभिरिन्द्रम-नूषत अर्कशब्दस्यमन्त्रपरत्वंयास्केनोक्तम्—अर्कोमन्त्रोभवतियदनेनार्चंतीति[1]। श्लोकइत्यादिषुस-प्तपञ्चाशत्सुवाङ्नामसुवाशीवाणीतिपठितम्[2] ॥ गाथिनः उषिकुषिगार्तिभ्यस्थन्नितिगायतेस्थ-न्प्रत्ययः नित्त्वादाद्युदात्तः गाथाएषांसन्तीतिगाथिनः व्रीह्यादिभ्यश्चेतीनिः प्रत्ययस्वरेणइका-रउदात्तः सच सतिशिष्टः। बृहत् बृहता तृतीयैकवचनस्यसुपांसुलुगितिलुक् प्रुषद्बृहन्महज्जग-च्छतृवच्चेत्यन्तोदात्तोनिपातितः । अर्केभिः अर्चपूजायां अर्च्यन्तेएभिरित्यर्कामन्त्राः पुंसिसं-

1 ऋ० सं० ४.७.२७.। 2 नि० ५.४.।

ज्ञायांघःप्रायेणेतिघः चजोःकुघिण्यतोरितिकुत्वं प्रत्ययस्वरेणान्तोदात्तः बहुलंछन्दसीतिभिस-ऐसादेशोनभवति।अर्काःस्तुतिसाधनभूतामन्त्राएषांसन्तीत्यर्किणः।वाणीः वृषादीनांचेत्याद्युदात्तः दीर्घाज्जसिचेतिपूर्वसवर्णदीर्घनिषेधस्य वाछन्दसीतिविकल्पितत्वाद्दीर्घत्वम् तृतीयार्थेप्रथमा। अनूषत णुस्तुतौ णोनइतिनत्वं लुङि व्यत्ययेनात्मनेपदं झस्यअदादेशः सिचइडभावः उकार-स्यदीर्घत्वंचछान्दसं धातोः कुटादित्वात्सिचोङित्त्वेनगुणाभावः ॥ १ ॥

१. सामवेदियों ने साम-गान-द्वारा, ऋग्वेदियों ने वाणी-द्वारा और यजुर्वेदियों ने वाणी-द्वारा इन्द्र की स्तुति की है।

इन्द्रइद्धर्योःसचासम्मिश्लआवचोयुजा । इन्द्रोवज्रीहिरण्ययः ॥२॥

इन्द्रः । इत् । हर्योः । सचा । सम्ऽमिश्लः । आ । वचःऽयुजा ।
इन्द्रः । वज्री । हिरण्ययः ॥ २ ॥

इन्द्रइवइन्द्रएवहर्योः हरिनामकयोरश्वयोः सचासहयुगपत् आसंमिश्लः सर्वतः स-म्यक्मिश्रयिता कीदृशयोर्हर्योः वचोयुजाइन्द्रस्यवचनमात्रेणरथेयुज्यमानयोःसुशिक्षितयोरि-त्यर्थः अयमिन्द्रोवज्रीवज्रयुक्तः हिरण्ययः हिरण्मयः सर्वाभरणभूषितइत्यर्थः ॥ हर्योः हरतइ-तिहरी इन् नित्त्वादाद्युदात्तः । सचासहेत्युक्तम् । मिश्रणंमिश्रः मिश्रयतेर्घञ् सम्यक्मिश्रोय-स्यासौसंमिश्रः लत्वंछान्दसम् सम्यक्मिश्रयितेत्यर्थः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । वचसा युज्येतेइतिवचोयुजौ तयोःषष्ठीद्विवचनस्यसुपांसुलुगित्याकारादेशः युजूशब्दोधातुस्वरेणान्तो-दात्तः कृदुत्तरपदप्रकृतिस्वरेणसएवशिष्यते । वज्री वज्रमस्यास्ति अतइनिठनौ प्रत्ययस्वरः। हिरण्ययः ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानिच्छन्दसीति हिरण्यमयशब्दस्यमकारलोपोनि-पात्यते अकारः प्रत्ययस्वरेणोदात्तः पूर्वेणानुदात्तेनसहैकादेशउदात्तेनोदात्तइत्युदात्तः ॥ २ ॥

२. इन्द्र अपने दोनों घोड़ों को बात की बात में जोतकर सबके साथ मिलते हैं। इन्द्र वज्रयुक्त और हिरण्मय हैं।

इन्द्रोदीर्घायचक्षसआसूर्यंरोहयद्दिवि । विगोभिरद्रिमैरयत् ॥ ३ ॥

इन्द्रः । दीर्घाय । चक्षसे । आ । सूर्यम् । रोहयत् । दिवि । वि ।
गोभिः । अद्रिम् । ऐरयत् ॥ ३ ॥

अयंइन्द्रोदीर्घायप्रौढायनिरन्तरायचक्षसेदर्शनायदिविद्युलोकेसूर्यमारोहयत् पुरावृत्रा-सुरेणजगतियदापादितंतमस्तन्निवारणेनप्राणिनांदृष्टिसिद्ध्यर्थं ...दिस्द्युलोकेस्थापितवानि-

त्यर्थः सचसूर्योगोभिःस्वकीयरश्मिभिरद्रिंपर्वतप्रमुखंसर्वंजगव्ध्यैरयव विशेषेणदर्शनार्थंप्रेरितवान् प्रकाशितवानित्यर्थः अथवा इन्द्रएवगोभिर्जलैर्निमित्तभूतैरद्रिंमेघंव्यैरयद्विशेषेणप्रेरितवान् पञ्चदशसंख्याकेषुरश्मिनामसुखेदयः किरणाः गावइतिपठितम् त्रिंशत्संख्याकेषुमेघनामसुअद्रिः ग्रावेतिपठितम्॥ दीर्घाय प्रातिपदिकस्वरेणान्तोदात्तः। चक्षसे चक्षेः सर्वधातुभ्योऽसुन्नित्यसुन् बहुलग्रहणात् ख्याञादेशाभावः नित्त्वादाद्युदात्तः। सूर्यं सुवतिप्रेरयतीतिसूर्यः षूप्रेरणे धात्वादेःषःसः राजसूयसूर्येत्यादिनाक्यप्प्रत्ययः तस्यरुडागमश्चनिपात्यते क्यपः कित्त्वाद्गुणाभावः पित्त्वादनुदात्तत्वं धातुस्वरएवशिष्यते। रोहयत् रुहेर्ण्यन्ताल्लङि बहुलंछन्दस्यमाङ्योगेपीत्यडभावोनिघातश्च । दिवि ऊडिदमित्यादिनाविभक्तेरुदात्तत्वम्। अद्रिं अदिशदिभूशुभिभ्यःक्रिन्नितिक्रिन्प्रत्ययः अदन्तिपशवस्तृणादिकमत्रेत्यद्रिः नित्त्वादाद्युदात्तत्वम्। ऐरयत् ईरगतौ ण्यन्ताल्लङ् निघातः॥ ३ ॥

३. दूरस्थ मनुष्यों को देखने के लिए ही इन्द्र ने सूर्य को आकाश में रक्खा है। सूर्य अपनी किरणों-द्वारा पर्वतों को आलोकित किये हुए हैं।

इन्द्रवाजेषुनोवसहस्रप्रधनेषुच। उग्रउग्राभिरूतिभिः ॥ ४ ॥

इन्द्र। वाजेषु। नः। अव। सहस्रऽप्रधनेषु। च। उग्रः। उग्राभिः। ऊतिऽभिः॥४॥

हेइन्द्र उग्रः शत्रुभिरप्रधृष्यस्त्वं उग्राभिरप्रधृष्याभिरूतिभिरस्मद्विषयरक्षाभिर्वाजेषुयुद्धेषुनोऽस्मानवरक्ष तथा सहस्रप्रधनेषुच सहस्रसंख्याकगजाश्वादिलाभयुक्तेषुमहायुद्धेष्वपि रक्ष॥वाजेषु वृषादीनांचेत्याद्युदात्तत्वम्। नसःसकारस्यरुत्वोत्वगुणेषुप्रकृत्यान्तःपादमितिप्रकृतिभावोनभवति अव्यपरे इतिनिषेधात्। अव अवरक्षणे तिङ्ङतिङइतिनिघातः यद्यपिसहस्रप्रधनेषुचावेत्यध्याहृतांक्रियामपेक्ष्यप्रथमायाःश्रूयमाणायाःअवेतिक्रियायाश्चवायोगेप्रथमेति निघातनिषेधःप्राप्तः तथापिवाजेष्वित्यत्रचकारस्यलुप्तत्वाच्चादिलोपेविभाषेतिनिषेधस्यविकल्पितत्वादत्रनिघातःप्रवर्तते। सहस्रशब्दःकर्दमादीनांचेतिमध्योदात्तः । सहस्रप्रधनेषुवाजेषु बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्। उग्रः उचसमवाये चस्यगः ऋज्रेन्द्रेतिरन् व्यत्ययेनान्तोदात्तः। ऊतिभिः ऊतियूतीत्यादिनाक्तिन्नुदात्तः॥ ४ ॥

४. उग्र इन्द्र! अपनी अप्रतिहत रक्षण-शक्ति-द्वारा युद्ध और लाभकारी महासमर में हमारी रक्षा करो।

इन्द्रंवयंमहाधनइन्द्रमर्भेहवामहे। युजंवृत्रेषुवज्रिणम्॥ ५॥ १३॥

इन्द्रम्। वयम्। महाऽधने। इन्द्रम्। अर्भे। हवामहे। युजम्। वृत्रेषु। वज्रिणम्। ५॥ १३॥

वयमनुष्ठातारः महाधनेप्रभूतधननिमित्तमिन्द्रं हवामहे आह्वयामः अर्भेअर्भके स्वल्पेपिधनेनिमित्तभूतेसतिइन्द्रंहवामहे कीदृशमिन्द्रं युजंसहकारिणं समाहितंवा वृत्रेषुशत्रुषुधनलाभविरोधिषुप्राप्तेषु तन्निवारणाय वज्रिणं वज्रोपेतम् महाधनशब्दोयद्यपिसंग्रामनामसुपठितः तथापि महाधनवचनमत्रसंग्रामइतिबहुव्रीहित्वेसत्यन्तोदात्तत्वासिद्धेर्नात्रतद्गृहीतम् ॥ महाधने महच्चतद्धनंचेतिसमासस्येत्यन्तोदात्तः। अर्भे आर्तिगृभ्यांभन् नित्त्वादाद्युदात्तः। हवामहे ह्वेञ्स्पर्धायांशब्देच ञित्त्वात्कर्त्रभिप्रायेआत्मनेपदं लटःस्थानेमहिङ् टितआत्मनेपदानामितिटेरेत्वम् कर्तरिशप् ह्वःसंप्रसारणमित्यनुवृत्तौबहुलंछन्दसीतिसंप्रसारणम् वकारस्यउकारः परपूर्वत्वं गुणावादेशौ अतोदीर्घोयञीतिदीर्घत्वम् तिङ्ङतिङइतिनिघातः । युजं युजसमाधावित्यस्यक्विप् युजेरसमासेइतिनुम्नभवति सहियुजेरितिनिर्देशादिकाररहितस्यनभवतिअनित्यमागमशासनमितिवायुजिर्योगेइत्यस्यापिनुम्नभवति । वृत्रेषु वृतुवर्तने प्रतिकूलतयावर्तन्तेइतिवृत्राणिशत्रुकुलानि स्फायितञ्चीत्यादिनारक्प्रत्ययः कित्त्वाद्गुणाभावः प्रत्ययस्वरः । वज्रिणं अतइनिठनावितीनिः प्रत्ययस्वरः ॥ ५ ॥

५. इन्द्र हमारे सहायक और शत्रुओं के लिए वज्रधर हैं; इसलिए हम धन और महाधन के लिए इन्द्र का आह्वान करते हैं।

स नो॑ वृषन्न॒मुं च॒रुं सत्रा॑दाव॒न्नपा॑ वृधि । अ॒स्मभ्य॒मप्र॑तिष्कुतः ॥ ६ ॥

सः । नः॒ । वृ॒ष॒न् । अ॒मुम् । च॒रुम् । सत्रा॑ऽदावन् । अप॑ । वृ॒धि॒ । अ॒स्मभ्य॑म् । अप्र॑तिऽस्कुतः ॥ ६ ॥

हेसत्रादावन् अस्मदभीष्टानांसर्वेषांफलानांसहप्रदातः अतोव्रीह्यादिनिष्पत्त्यर्थं हेवृषन् वृष्टिप्रदेन्द्र नोऽस्मदर्थं अमुंदृश्यमानंचरुंमेघमपावृधिउत्पाटय तथैवास्मभ्यमस्मदर्थंअप्रतिष्कुतः प्रतिशब्दरहितः यद्यदस्माभिर्याच्यतेतत्सर्वत्रनेतिप्रतिशब्दंनोच्चारयति अतोऽस्मद्विषयेकदाचिदप्यप्रतिस्खलितः एतदेवाभिप्रेत्ययास्कआह—अप्रतिष्कुतोप्रतिष्कृतोप्रतिस्खलितोवेति[1] ॥ वृषन् आमन्त्रितनिघातः। अमुं प्रातिपदिकस्वरेणान्तोदात्तः। चरुं चरतीतिचरुः भृमृशीङ्तृचरित्सरितनिधनिमिमस्जिभ्यउरित्युप्रत्ययः प्रत्ययस्वरेणान्तोदात्तः । सत्रादावन् सत्राशब्दःसहार्थे अभिमतफलजातंसकलंसहददातीतिसत्रादावा आतोमनिन्क्वनिब्वनिपश्चेतिवनिप् आमन्त्रितस्यचेत्याद्युदात्तत्वम् पादादित्वान्ननिघातः । अप निपातस्यचेतिदीर्घः निपातआद्युदात्तः ।

---

1 नि० ६. १६.।

वृधि वृञ्वरणे लोटःसिप् तस्यसेर्ह्यपिच्चेतिहिः स्वादिभ्यःश्नुः तस्यबहुलंछन्दसीतिलुक् श्रुशृणु-पॄकृवृभ्यश्छन्दसीतिहेर्धिरादेशः तस्यङित्वात्पूर्वस्यगुणाभावः निघातः । अस्मभ्यं अस्म-च्छब्दाद्भ्यसोभ्यमितिभ्यमादेशः शेषेलोपइतिदकारलोपः बहुवचनेझल्येदित्येत्वंनभवति अ-ङ्गवृत्तेपुनर्वृत्तावविधिर्निष्ठितस्येत्युक्तम् प्रातिपदिकस्वरेणस्मेत्यकारउदात्तः भ्यसोभ्यमिति भ्यमादेशपक्षेशेषेलोपइतिमपर्यन्तशेषस्यादृशब्दस्यलोपः तदाउदात्तनिवृत्तिस्वरेण अभ्यमादे-रकारस्योदात्तत्वम् । अप्रतिष्कुतः केनचिदप्रतिशब्दितः कुङ्शब्दे निष्ठेतिकर्मणिक्तप्रत्ययः प्र-तेःप्राक्प्रयोगः पारस्करादेराकृतिगणत्वात्सुडागमः सुषामादेराकृतिगणत्वात्षत्वम् नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥ ६ ॥

६. अभीष्ट-फलदाता और वृष्टिप्रद इन्द्र! तुम हमारे लिए इस मेघ को भेदन करो। तुमने कभी भी हमारी प्रार्थना अस्वीकार नहीं की।

तु॒ञ्जेतु॑ञ्जे॒यउत्त॑रे॒स्तोमा॒इन्द्र॑स्यव॒ज्रिणः॑ । नवि॑न्धेअ॒स्यसु॑ष्टु॒तिम् ॥ ७ ॥

तु॒ञ्जेऽतु॑ञ्जे । ये । उत्ऽत॑रे । स्तोमाः॑ । इन्द्र॑स्य । व॒ज्रिणः॑ । न । वि॒न्धे॒ । अ॒स्य । सु॒ऽस्तु॒तिम् ॥ ७ ॥

तुञ्जेतुञ्जेतस्मिंस्तस्मिन्फलदातरिदेवान्तरेयेस्तोमाःस्तोत्रविशेषाः उत्तरेउत्कृष्टाःसन्तितैःस्तो-मैः सर्वैरपिवज्रिणोवज्रयुक्तस्यास्येन्द्रस्यसुष्टुतिंयोग्यांशोभनस्तुतिंनविन्धेनविंदामि इन्द्रस्यात्य-न्तगुणबाहुल्येनदेवान्तरेषूत्तमत्वेनप्रसिद्धान्यपिस्तोत्राणिनपर्याप्तानीत्यर्थः एतामृचंयास्कएवंव्या-चष्टे—तुंजस्तुञ्जतेर्दानकर्मणः दानेदानेयउत्तरेस्तोमाइन्द्रस्यवज्रिणोनास्यतैर्विंदामिसमाप्तिंस्तुते-रिति॥ तुञ्जेतुञ्जे तुञ्जतिर्दानकर्मेत्युक्तम् ततःकर्तरिपचाद्यच् चितइत्यन्तोदात्तत्वम् नित्यवीप्सयो-रितिद्विर्भावः तस्यपरमाम्रेडितमितिद्वितीयस्याम्रेडितसंज्ञा अनुदात्तंचेत्यनुदात्तत्वं दातरिदातरी-त्यर्थः निरुक्तेतुदानेदानेइत्यर्थतोव्याख्यानम् ।उत्तरे तॄप्लवनतरणयोः भावेऋदोरप् उच्छब्दउ-त्कृष्टवचनः उत्कृष्टस्तरोयस्येतिबहुव्रीहिः उच्छब्दोनिपाताआद्युदात्ताइत्याद्युदात्तः बहुव्रीहौ पूर्व-पदप्रकृतिस्वरत्वम् । स्तोमाः अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्योमन्नित्यादिनास्तोमशब्दोमन्नन्तोनित्त्वादाद्युदात्तः । विन्धे वि-दॢलाभे लट् स्वरितेत्वादात्मनेपदं उत्तमैकवचनमिट् तुदादिभ्यःशः शेमुचादीनामितिनुम् दकारस्य व्यत्ययेनधकारः अस्यप्रकृतस्येन्द्रस्यपरामर्शादन्वादेशेइदमोऽश् शित्वात्सर्वादेशोऽनुदात्तः। सु-ष्टुतिं ष्टुञ्स्तुतौ धात्वादेःषःसइतिसत्वं स्त्रियांक्तिन्निभावेक्तिन् सुइत्युदात्तेनोपसर्गेणप्रादिसमा-सःउपसर्गात्सुनोतीत्यादिनाषत्वम् अत्राव्ययपूर्वपदप्रकृतिस्वरत्वेनसोःप्राप्तमुदात्तत्वंबाधित्वा ग-

१ नि० ६, १८ ।

विकारकोपपदात्क्तदित्युत्तरपदप्रकृतिस्वरत्वेनधातोरुदात्तत्वेप्राप्तेतदपवादेनतादौचनितिकृत्यतौ-
वित्यनन्तरस्यगतिसंज्ञकस्यसोरेवोदात्तत्वेनभवितव्यम् तत्तुमन्क्तिन्व्याख्यानशयनासनस्थान-
याजकादिक्रीताइत्युत्तरपदान्तोदात्तेनबाध्यते तथाचसुहवांसुष्टुतीहुवे वृष्णेचोदस्वसुष्टुतिं यास्ते-
राकेसुमतयइत्यादावन्तोदात्तत्वमित्याहुः यथातुमन्क्तिन्नित्यादौवृत्तावुक्तंतथैवतन्नघटतइतिल-
क्ष्यते तत्रहिकारकाद्दत्तश्रुतयोरेवाशिषीत्यतः कारकादित्यनुवृत्तेःपाणिनिकृतिरित्यादावेवमन्क्ति-
न्नित्यादिसूत्रमित्युक्तम् कारकादित्येवप्रकृतिःप्रहृतिरितिचप्रत्युदाहृतम् स्यादेतत् स्तूयतेऽ-
नयेतिस्तुतिरितिक्तिनाकरणभूताऋगभिधीयते सुशब्देनचकरणमेवविशेष्यतेनधात्वर्थः तथाच-
सुष्टुतिरित्यत्रसुशब्दः कारकपरएवभविष्यति प्रकृतिःप्रहृतिरित्यादौतुप्रशब्दोधात्वर्थविशेषण-
मेवेतितत्प्रत्युदाहरणोपपत्तिरिति न एवंसतिसुशब्दस्यक्रियायोगाभावात् उपसर्गाःक्रियायो-
गेइत्युक्ताउपसर्गसंज्ञानस्यात् तथाचउपसर्गात्सुनोतिसुवतीत्यादिनाषत्वंनस्यात् ननुक्तिनाकर-
णमभिधीयते क्रियासाधनंचकरणं तथाचकरणविशेषणस्यापिसुशब्दस्यकरणान्तर्गतक्रिया-
योगादुपसर्गताभविष्यतीति न तथासति यत्क्रियायुक्तास्तंप्रत्युपसर्गसंज्ञकाइतिकरोत्यर्थमेव
प्रतिसोरुपसर्गता नतुस्तुधात्वर्थंप्रतीत्यस्यषत्वंनस्यादेव ननुस्तुधात्वर्थद्वारैवतत्करणस्यसुश-
ब्दोविशेषणंभविष्यति याहिशोभनास्तुतिस्तत्करणमपिशोभनमेवेति एवंचस्तुधात्वर्थसंबन्धा-
त्तंप्रत्युपसर्गत्वेनषत्वमपिभविष्यति तद्वाराकरणविशेषणत्वात्कारकवचनोऽपिसुशब्दोभविष्य-
तीतिवृत्त्यविरोधेनैवमन्क्तिन्नादिसूत्रस्यसुष्टुतिशब्दोविषयोभविष्यति प्रकृतिःप्रहृतिरित्यत्रभा-
वेक्तिन्प्रत्युदाहृतेतिनतत्रप्रशब्दस्यकरणपरत्वम् करणेक्तिन्उदाहरणेऽपिधात्वर्थमात्रविशेषणतै-
वविवक्षितानतद्वाराप्रत्ययार्थविशेषणतापीतितत्प्रत्युदाहरणतोपपत्तिरिति सुष्टुतिरित्यत्रपुनः
क्तिन्नभिधेयकरणपर्यन्तंसुशब्दस्यव्यापारइत्युदाहरणतैवनप्रत्युदाहरणतेति न किमत्रसुशब्दः
श्रुत्यैवप्रकृतिप्रत्ययार्थोभयविशेषणपरः उतश्रुत्यैकंविशिनष्टि अर्थादितरदिति यदाप्युभय-
परत्वंतदापिकिंयौगपद्येनउतक्रमेणेति आद्ये प्रतिविशेष्यंविशेषणपदावृत्तिरितिप्रसंगः द्वितीये
विरम्यव्यापारापातः नचशब्दबुद्धिकर्मणांविरम्यव्यापारःकथंचिद्दृष्टइष्टोवा अतोनश्रुत्योभय-
परत्वं अथैकत्रश्रुत्यातात्पर्यम् अपरत्रत्वर्थादिति तत्रधात्वर्थसंबन्धस्यार्थिकत्वेषत्वासिद्धिः
प्रत्ययार्थसंबन्धस्यार्थिकत्वेमन्क्तिन्नित्यादिस्वरासिद्धिः आर्थिकेनापिकारकसंबन्धेनोदाहरण-
त्वाभिधानेप्रकृतिःप्रहृतिरित्यादिप्रत्युदाहरणंनस्यात् श्रुत्याधात्वर्थमात्रसंबन्धस्यापिप्रशब्दस्या-
र्थात्तत्करणसंबन्धःकेनवारयितुंशक्यतइत्येषादिक् अतइहप्रत्ययार्थमात्रसंबन्धपरत्वांगीकारे-
णस्वरःसिद्ध्यतु षत्वंतुछान्दसमस्तु शोभनास्तुतिर्यस्यामितिबहुव्रीहिर्वाभवतु एवंचनत्रुसु-

---

१ ऋ० सं० २. ७. १५. । २ ऋ० सं० ६. ५. २५. । ३ ऋ० सं० २. ७. १५. ।

ष्यामित्यन्तोदात्तत्वंभविष्यति अथवासुष्टुस्तुवन्तीति सुष्टुतयइतिकरणभूताऋचः स्तुतिशब्दे-नोच्यन्ते क्तिच्क्तौचसंज्ञायामितिक्तिच्प्रत्ययेसतिचित्त्वादन्तोदात्तताभविष्यति नचकरणीभूतानामृचांकर्तृप्रत्ययेनक्तिचाकथमभिधानमितिवाच्यम् काष्ठानिपचन्तीतिवत्तासामपिस्वव्यापारेप्राधान्यविवक्षयाकरणत्वोपपत्तेरिति ॥ ७ ॥

७. जो विविध स्तुति-वाक्य विभिन्न देवताओं के लिए प्रयुक्त होते हैं, सो सब वज्रधारी इन्द्र के हैं। इन्द्र की योग्य स्तुति मैं नहीं जानता।

वृषायूथेववंसगःकृष्टीरियर्त्योजसा। ईशानोअप्रतिष्कुतः ॥ ८ ॥

वृषा। यूथाऽइव। वंसगः। कृष्टीः। इयर्ति। ओजसा।
ईशानः। अप्रतिऽस्कुतः ॥ ८ ॥

वृषाकामानांवर्षितेन्द्रओजसास्वकीयबलेनानुग्रहीतुंकृष्टीर्मनुष्यानियर्तिप्राप्नोति कीदृश-इन्द्रः ईशानः समर्थः अप्रतिष्कुतः प्रतिशब्दरहितः याच्यमानंनपरिहरतीत्यर्थः इन्द्रस्य दृष्टान्तः—वंसगोवननीयगतिर्वृषभोयूथेव गोयूथानियथाप्राप्नोतितद्वत् ॥ वृषा कनिन्युवृषितक्षिधन्विराजिद्युप्रतिदिवइतिवर्षतेःकनिन्प्रत्ययः कित्त्वाद्गुणाभावः नित्त्वादाद्युदात्तः । यूथाइव युवन्तिमिश्रीभवन्तीतियूथानि युमिश्रणामिश्रणयोः तिथपृष्ठगूथयूथप्रोथाइतिथक्प्रत्ययान्तो-निपातितः निपातनाद्दीर्घत्वं प्रत्ययस्वरेण अकारउदात्तः शेश्छन्दसिबहुलमितिलुक् इवेनेनित्यसमासोविभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वंचवक्तव्यमितिसमासेपिसएवस्वरः। वंसगः पृषोदरादित्वादभिमतरूपस्वरसिद्धिः कर्षन्तीतिकृष्टयः क्तिच्क्तौचसंज्ञायामितिक्तिच् चित्त्वादन्तोदात्तः। इयर्ति ऋगतौ तिप् शपःश्लुः श्लाविति द्विर्भावः अभ्यासस्यउरदत्वहलादिशेषौ अर्तिपिपर्त्योश्चेत्यकारस्यइकारः अभ्यासस्यासवर्णेइतीयङादेशः अङ्गस्यगुणोरपरत्वम्। ओजसा उब्जेर्बलेबलोपश्चेत्यसुन् तत्सन्नियोगेनबकारलोपः लघूपधगुणः नित्त्वादाद्युदात्तः। ईशानः ईशऐश्वर्ये लटःशानच् अदिप्रभृतिभ्यःशपइतिशपोलुक् चितइत्यन्तोदात्तंबाधित्वा अनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वेनधातुस्वरएवशिष्यते। अप्रतिष्कुतः अप्रतिशब्दितः कुशब्देकर्मणिक्तः पारस्करादेराकृतिगणत्वात्सुडागमः सुषामादित्वात्षत्वम् नञ्समासः अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥८॥

८. जिस तरह विशिष्ट-गतिवाला बैल अपने गो-दल को बलवान् करता है, उसी प्रकार इच्छित-वितरण-कर्त्ता इन्द्र मनुष्य को बलशाली करते हैं। इन्द्र शक्ति-सम्पन्न हैं और किसी की याचना को अग्राह्य नहीं करते।

यएकश्चर्षणीनांवसूनामिरज्यति। इन्द्रःपञ्चक्षितीनाम् ॥ ९ ॥

यः। एकः। चर्षणीनाम्। वसूनाम्। इरज्यति। इन्द्रः। पञ्च।
क्षितीनाम् ॥ ९ ॥

यइन्द्रः स्वयमेकएव चर्षणीनांमनुष्याणांइरज्यति ईष्टे तथावसूनां धनानांइरज्यति सइन्द्रः पञ्च निषादपञ्चमानांक्षितीनांनिवासार्हाणांवर्णानां अनुग्रहीतेतिशेषः॥एकः इण्गतौ इण्भीकापाशल्यतिमर्चिभ्यःकन्नितिकन् बाहुलकात्कलोपाभावः नित्त्वादाद्युदात्तत्वम्। चर्षणीनां प्रातिपदिकस्वरेणान्तोदात्तः अन्तोदात्तादित्यनुवृत्तौनामन्यतरस्यामितिविभक्तेरुदात्तत्वम्। वसूनाम् निदित्यनुवृत्तौ शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्चेत्युप्रत्ययः नित्त्वादाद्युदात्तः। इरज्यति कण्ड्वादिषु ईरजईर्ष्यायां अनैश्वर्यार्थः कण्ड्वादिभ्योयक् प्रत्ययस्वरेणान्तोदात्तः।पञ्च पचिव्यक्तीकरणे पचेश्चेतिकनिन् नित्त्वादाद्युदात्तः। क्षितीनाम् प्रातिपदिकस्वरेणान्तोदात्तः नामन्यतरस्यामितिविभक्तेरुदात्तत्वम्॥ ९॥

९. जो इन्द्र मनुष्यों, धन और पञ्चक्षिति के ऊपर शासन करनेवाले हैं।

आश्विनंशंसिष्यन्निन्द्रंवोविश्वतस्परीतिजुहुयात् संस्थितेष्वाश्विनायस्तुवतइतिखण्डेवण्महांअसीतिद्वाभ्यामिन्द्रंवोविश्वतस्परीतिसूत्रितम् चतुर्विंशेहनिप्रातःसवनेब्राह्मणाच्छंसिनइन्द्रंवोविश्वतस्परीत्यारंभणीया चतुर्विंशइत्युपक्रम्य ऋजुनीतीनोवरुणइन्द्रंवोविश्वतस्परीतिसूत्रितम्।

तामेतांदशमीमृचमाह—

इन्द्रं॑वो वि॒श्वत॒स्परि॒हवा॑महे॒जने॑भ्यः।अ॒स्माक॑मस्तु॒केव॑लः॥१०॥१४॥

इन्द्र॑म्। वः॒। वि॒श्वतः॑। परि॑। हवा॑महे। जने॑भ्यः। अ॒स्माक॑म्। अ॒स्तु॒। केव॑लः॥ १०॥ १४॥

हेऋत्विग्यजमानाः विश्वतः सर्वेभ्योजनेभ्यः परिउपर्यवस्थितमिन्द्रं वोयुष्मदर्थंहवामहेआह्वयामः अतःसइन्द्रोस्माकंकेवलोसाधारणोस्तु इतरेभ्योप्यधिकमनुग्रहमस्मासुकरोत्वित्यर्थः॥ इन्द्रं रन्प्रत्ययान्तोनित्त्वादाद्युदात्तः। वः अनुदात्तंसर्वमित्यनुवृत्तौबहुवचनस्यवस्नसाविविवस्। विश्वतः त्रितीतिप्रत्ययात्पूर्वमुदात्तम्। परि निपातत्वादाद्युदात्तः संहितायांपञ्चम्याः परावध्यर्थेइतिविसर्जनीयस्यसत्वम्। हवामहे ह्वेञःशपि बहुलंछन्दसीतिसंप्रसारणपरपूर्वत्वे गुणावादेशौ। जनेभ्यः जन्यन्तेइतिजनाःजनयतेःकर्मणिघञ् जनिवध्योश्चेत्युपधायावृद्ध्यभावः ञित्त्वादाद्युदात्तत्वम्। अस्माकं अस्मच्छब्दोन्तोदात्तः शेषेलोपइत्यन्त्यलोपपक्षेसामआकमित्याकारेणएकादेशउदात्तः टिलोपपक्षेउदात्तनिवृत्तिस्वरेणआकारउदात्तः। केवलः वृषादेराकृतिगणत्वादाद्युदात्तः॥ १०॥

१०. सबके अग्रणी इन्द्र को तुम लोगों के लिए हम आह्वान करते हैं। इन्द्र हमारे ही हैं।

अथसूक्तचतुष्टयात्मकेतृतीयानुवाके एन्द्रसानसिमित्यादिकंदशर्चंसूक्तम् सुरूपकृत्नुमित्यादिषुषट्सुपञ्चमम् ऋष्यादयस्तुपूर्ववत् विशेषविनियोगस्तुमहाव्रतेनिष्केवल्ये औष्णिहतृचाशीतावेन्द्रसानसिंरयिमित्यादिकेद्वेसूक्ते पञ्चमारण्यके औष्णिहीतृचाशीतिरितिखण्डेशौनकेनसूत्रितम्—सुरूपकृत्नुमूतयइतित्रीण्येन्द्रसानसिंरयिमितिद्वेइति । अतिरात्रेप्रथमपर्यायेच्छावकाशस्त्रेएन्द्रसानसिमितिसूक्तम् सूत्रितंच—इन्द्रमिद्गाथिनोबृहदेन्द्रसानसिमिति दर्शयागेइन्द्रयाजिनःसान्नाय्यस्यानुवाक्याएन्द्रसानसिमिति उक्तादेवताइत्यस्मिन्खण्डेएन्द्रसानसिंप्रससाहिषेपुरुहूतशत्रूनितिसूत्रितम् ॥

तस्मिन्सूक्तेतामेतांप्रथमामृचमाह—

एन्द्रंसानसिंरयिंसजित्वांनंसदासहम् । वर्षिष्ठमूतयेंभर ॥ १ ॥

आ । इन्द्र । सानसिम् । रयिम् । सऽजित्वानम् । सदाऽसहम् ।
वर्षिष्ठम् । ऊतये । भर ॥ १ ॥

हेइन्द्र ऊतयेअस्मद्रक्षार्थंरयिंधनमाभर आहर कीदृशंरयिं सानसिंसंभजनीयंसजित्वानं समानशत्रुजयशीलं धनेनहिशूरान्भृत्यान्संपाद्यशत्रवोजीयन्ते सदासहं सर्वदाशत्रूणामभिभवहेतुम् वर्षिष्ठमतिशयेनवृद्धंप्रभूतमित्यर्थः॥ सानसिं वनषणसंभक्तावित्यस्मादसिप्रत्ययोवृद्धिरन्तोदात्तत्वंच सानसिधर्णसीत्यादिनानिपात्यते । रयिं प्रातिपदिकस्वरेणान्तोदात्तः । सजित्वानं समानानरीन्जेतुंशीलमस्य अन्येभ्योपिदृश्यन्तइतिक्वनिप् उपपदसमासः समानस्यछन्दस्यमूर्धप्रभृत्युदर्केष्वितिसमानस्यसभावः कृदुत्तरपदप्रकृतिस्वरेणधातुस्वरएवशिष्यते । वर्षिष्ठं वृद्धशब्दादतिशायनेतमबिष्ठनावितिइष्ठन् प्रियस्थिरेत्यादिनावृद्धशब्दस्यवर्षादेशः इष्ठनोनित्त्वादाद्युदात्तत्वम् । ऊतये उदात्तइत्यनुवृत्तावूतियूतिजूतिसातीत्यादिनाक्तिन्नुदात्तोनिपातितः । भर हृग्रहोर्भश्छन्दसीतिहकारस्यभकारः तेप्राग्धातोरितिधातोःप्राक्प्रयोक्तव्यस्याङोव्यवहिताश्चेतिछन्दसिव्यवहितप्रयोगः ॥ १ ॥

१. इन्द्र ! हमारी रक्षा के लिए भोग के योग्य, विजयी और शत्रु-जयी यथेष्ट धन दो।

द्वितीयामृचमाह—

नियेनंमुष्टिहत्ययानिवृत्रारुणधामहै । त्वोतासोन्यर्वता ॥ २ ॥

नि । येन । मुष्टिऽहत्यया । नि । वृत्रा । रुणधामहै । त्वाऽऊतासः । नि । अर्वता ॥ २ ॥

येनधनेनसंपादितानांभटानांनिमुष्टिहत्ययानितरांमुष्टिप्रहारेणवृत्राशत्रून् निरुणधामहैनिरुद्धान्करवाम तादृशंधनमाहरेत्यर्थः त्वोतासः त्वयारक्षितावयं अर्वताअस्मदीयेनाश्वेननिरुणधामहाइत्यनुषङ्गः पदातियुद्धेनाश्वयुद्धेनचशत्रून्विनाशयामेत्यर्थः ॥ मुष्टिहत्यया हनस्तचेतिसुबन्तेउपपदेक्यप् तत्सन्नियोगेननकारस्यतकारः कृदुत्तरपदप्रकृतिस्वरेप्राप्ते परादिश्छन्दसिबहुलमितिबहुलग्रहणेनत्रिचक्रादीनांछन्दस्यन्तोदात्तत्वाभिधानादन्तोदात्तत्वम् । नि आख्यातसंबद्धस्यापिनेरुपसर्गस्यव्यवहिताश्चेतिव्यवहितप्रयोगः । वृत्रा शेश्छन्दसिबहुलमितिशेर्लोपः नलोपः । रुणधामहै आट्संयोगेनपित्त्वात् श्नसोरल्लोपइत्यकारलोपोनभवति पित्त्वादेवचाख्यातस्यानुदात्तत्वेनविकरणस्यश्नमएवोदात्तत्वंशिष्यते ननुतिङ्ङतिङइतिनिघातेनभवितव्यम् न द्वेह्यत्रतिङ् विभक्ती निविडयामुष्ट्यानिरुणधामहाइत्यत्रमुख्याश्रुतैका अर्वतानिरुणधामहाइत्यत्रापिनिरुणधामहाइत्यनुषक्ताद्वितीया तयोःसमुच्चयार्थश्चकारोलुप्यते तेन चादिलोपेविभाषेतिप्रथमेयंतिङ्विभक्तिर्ननिहन्यते यथानात्मनांतृप्यति नान्यस्मैददावीत्यत्रहिसमुच्चयार्थस्यचशब्दस्य लोपात्तृप्यतीतिप्रथमातिङ्विभक्तिर्ननिहन्यते ददातीतिद्वितीयातुनिहन्यतएव ननु तत्रद्वेतिङ्विभक्तीश्रूयेते इहपुनरेकैवश्रुतासैवोत्तरत्रानुषज्यतेनान्याश्रूयतइतिद्वितीयाभावात्कथमियंप्रथमा न अनुषङ्गलब्धद्वितीयापेक्षमपिप्राथम्यमुपजीव्यनिघातनिषेधदर्शनात्पुरोडाशंचाधिश्रयत्याज्यंच प्रोक्षणीश्चासादयत्याज्यंचेत्यत्रह्यधिश्रयत्यासादयतीत्याख्यातयोःप्रथमवाक्यद्वयश्रुतयोरुत्तरवाक्यद्वयेऽनुषङ्गमपेक्ष्यैवप्राथम्यस्वीकारेणचवायोगेप्रथमेतिनिघातनिषेधोदृष्टइति । त्वयाऊतारक्षितास्त्वोतासः प्रत्ययोत्तरपदयोश्चेतिमपर्यन्तस्यत्वादेशेदकारलोपश्छान्दसः अवतेर्निष्ठायामिडभावश्च ज्वरत्वरस्रिव्यविमवामुपधायाश्चेत्यूठ् एत्येधत्यूठ्स्विवृद्ध्यभावश्छान्दसः तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरेणआकारउदात्तः एकादेशउदात्तेनोदात्तइत्युदात्तः । अर्वता अर्वतिगच्छतीत्यर्वा अर्वगतौ अन्येभ्योऽपिदृश्यन्तइतिवनिप्प्रत्ययः नेड्वशिकृतीतीट्प्रतिषेधः लोपोव्योर्वलीतिवकारलोपः अर्वणस्त्रसावनञइतितकारः वनिपःपित्त्वाद्धातुस्वरएव ॥ २ ॥

२. उस धन के बल से सदा-सर्वदा मुष्टिकाघात करके हम शत्रु को दूर करेंगे या तुम्हारे द्वारा संरक्षित होकर हम घोड़ों से शत्रु को दूर करेंगे।

इन्द्र॒त्वोता॑स॒आव॒यंवज्रं॑घ॒नाद॑दीमहि । जये॑म॒संयु॒धिस्पृधः॑ ॥ ३ ॥

इन्द्र॑ । त्वाऽऊ॑तासः । आ । व॒यम् । वज्र॑म् । घ॒ना । द॒दी॒म॒हि॒ ।
जये॑म । सम् । यु॒धि । स्पृधः॑ ॥ ३ ॥

---

१ तै० सं. २. ५. ४. । २ तै० सं. १. ६. ९. ।

हेइन्द्रत्वोतासस्त्वयापालितावयंघनाघनंशत्रुप्रहरणायात्यन्तदृढं वज्रमायुधमाददीमहिस्वीकुर्मः तेनचवज्रेणयुधियुद्धेस्पृधः स्पर्धमानान्शत्रून्संजयेमसम्यक्जयेम ॥ त्वोतासः उक्तम् । वज्रं वजव्रजगतौ ऋज्रेन्द्राग्रेत्यादिनावज्रशब्दोरन्प्रत्ययान्तोनिपातितः । घना घनःकाठिन्यंतदस्यास्तीति अर्शआदित्वादच् चित्त्वादन्तोदात्तः सुपांसुलुगितिडादेशः । ददीमहि डुदाञ्दाने प्रार्थनायांलिङ् क्रियाफलस्यकर्तृगामित्वात्स्वरितञितइत्यात्मनेपदोत्तमपुरुषबहुवचनं ददीमहिजुहोत्यादित्वाच्छपःश्लुः श्लाविति द्विर्भावः लिङःसलोपोऽनन्त्यस्येतिसलोपः श्नाभ्यस्तयोरातइत्याकारलोपः । जयेम जिजये शपःपित्त्वादनुदात्तत्वम् तिङश्चलसार्वधातुकस्वरात् धातुस्वरएवशिष्यते छन्दसिपरेपीतिसमःपरप्रयोगः । युधि युधसंप्रहारे संपदादित्वाद्भावेक्विप् सावेकाचइतिविभक्तेरुदात्तत्वम् । स्पर्धन्तइतिस्पृधः स्पर्धसंघर्षे क्विप्चेतिक्विप् बहुलंछन्दसीतिरेफस्य संप्रसारणमृकारः अकारलोपश्च ॥ ३ ॥

३. इन्द्र ! तुम्हारे द्वारा रक्षित होकर हम कठिन अस्त्र धारण करके बाह करनेवाले शत्रु को पराजित करेंगे।

चतुर्थीमृचमाह—

वयंशूरेभिरस्तृभिरिन्द्रत्वयायुजावयम् । सासह्यामपृतन्यतः ॥ ४ ॥

वयम् । शूरेभिः । अस्तृऽभिः । इन्द्र । त्वया । युजा । वयम् । ससह्याम । पृतन्यतः ॥ ४ ॥

वयंकर्मानुष्ठातारः शूरेभिःशौर्ययुक्तैः अस्तृभिरायुधानांप्रक्षेप्तृभिर्भटैःसंयुज्येमहीतिशेषः हेइन्द्र तादृशाभटसहितावयंयुजासहायभूतेनत्वयापृतन्यतः सेनामिच्छतः शत्रून्सासह्याम अतिशयेनाभिभवेम ॥ शूरेभिः शुश्रुगतौ क्रन्नित्यनुवृत्तौशुषिचित्रिमीनांदीर्घश्चेतिक्रन् क्रित्वाद्गुणाभावः नित्त्वादाद्युदात्तत्वम् बहुलंछन्दसीत्यैसोनिषिद्धत्वाद्बहुवचनेझल्येदित्येत्वं सहयोगेतृतीयाबलाद्वयमित्यस्मत्पदसमभिव्याहाराच्चवयंसंयुज्येमहीतिगम्यम् विनापिसहशब्देनवृद्धोयूनेतिनिपातनादितिसुक्तम् । अस्तृभिः शस्त्रास्त्रप्रक्षेपणशीलैः तद्धर्मभिस्तत्साधुकारिभिर्वा असुक्षेपणे तृन्नितिताच्छील्यादिषुतृन् नित्त्वादाद्युदात्तः रथादिभ्यश्चेतिविकल्पविधानादयं इडभावः वस्तुतस्तु रधादावभावात्तृन्तृचौशंसिक्षदादिभ्यइत्यनेनअनिट्तृन् । त्वया युष्यसिभ्यांमदिक् किक्त्वाद्गुणाभावः युष्मद् प्रत्ययस्वरेणअकारउदात्तः तृतीयैकवचनंटा त्वमावेकवचनेइतिमपर्यन्तस्यत्वादेशः अतोगुणेइतिपररूपत्वम् एकादेशउदात्तेनोदात्तइत्युदात्तः । युजा अश्रुयुजिक्रुञ्चांचेतिक्विन् सावेकाचइतिविभक्तेरुदात्तत्वम् । सासह्याम भृशंपुनःपुनःसहेमहि षहमर्षणे

1 पदकालेङ्लश्छान्दसः ।

धात्वादेःषःसः धातोरेकाचोहलादेःक्रियासमभिहारेयङ् यङोचिचेतिलुक् सन्यङोरितिद्विर्भावः हलादिशेषः दीर्घोंकितइतिदीर्घः प्रार्थनायांलिङ् चर्करीतंपरस्मैपदमदादिवच्चद्रष्टव्यमितिपरस्मैपदोत्तमपुरुषवहुवचनंमस् कर्तरिशप् अदादिवद्भावाल्लुक् नित्यंङितइत्यन्त्यसकारलोपः यासुट्परस्मैपदेषूदात्तोङिच्चेतियासुट् लिङःसलोपोऽनन्त्यस्येतिसकारलोपः सतिशिष्टत्वाद्यासुटएवोदात्तत्वंशिष्यते पादादित्वान्ननिघातः । पृतन्यतः योद्धुंपृतनामात्मनइच्छतः सुपआत्मनःक्यच् इतिक्यच् सनाद्यन्ताधातवइतिधातुसंज्ञायां सुपोधातुप्रातिपदिकयोरितिसुपोलुक् क्यचिचेत्यनुवृत्तौ कव्यध्वरपृतनस्यर्चिलोपइत्याकारलोपः पृतन्यधातुश्चित्त्वादन्तोदात्तः उपरिलटःशत्रादेशः कर्तरिशप् पित्त्वादनुदात्तत्वम् शतुश्चलसार्वधातुकस्वरेणउदात्तेनसहैकादेशउदात्तेनोदात्तइतिपृतन्यच्छब्दोन्तोदात्तः शसःसुप्स्वरेणानुदात्तस्यान्तोदात्तादित्यनुवृत्तौ शतुरनुमोनद्यजादीइत्युदात्तत्वम् ॥ ४ ॥

४. इन्द्र! तुम्हारी सहायता से हम हथियारबन्द लड़ाकों की सुसज्जित सेनावाले शत्रु को भी जीत सकेंगे।

पञ्चमीमृचमाह—

म॒हाँइन्द्रः॑प॒रश्च॒नुर्म॑हि॒त्वम॑स्तुव॒ज्रिणे॑ । द्यौर्नप्र॑थि॒नाशवः॑ ॥ ५ ॥ १५ ॥

म॒हान् । इन्द्रः॑ । प॒रः । च॒ । नु । म॒हि॒ऽत्वम् । अ॒स्तु॒ । व॒ज्रिणे॑ ।
द्यौः । न । प्र॒थि॒ना । शवः॑ ॥ ५ ॥ १५ ॥

अयमिन्द्रोमहान् शरीरेणप्रौढः परश्चगुणैरुत्कृष्टोपि नु किञ्च वज्रिणेवज्रयुक्तायेन्द्रायमहित्वंपूर्वोक्तंद्विविधमाधिक्यंसर्वदास्तु स्वभावसिद्धस्यापिभक्त्याप्रार्थनमेतत् किञ्च द्यौर्न द्युलोकइव शवोबलमिन्द्रस्यसेनारूपंप्रथिनाप्रथिम्नापृथुत्वेनयुज्यतामितिशेषः यथाद्युलोकःप्रभूतः एवमस्यसेनाप्रभूता नुशब्दोयद्यपिक्षिप्रनामसु नुमक्ष्वितिपठितः तथाप्यत्रतस्यान्वयाभावान्निपातत्वेनानेकार्थत्वसंभवाच्चसमुच्चयार्थोऽत्रगृहीतः नशब्दोलोकेप्रतिषेधार्थएव स्वाध्यायेतुप्रतिषेधार्थउपमानार्थश्चेतिद्विविधः येनपदेनान्वीयतेतस्मात्पूर्वंप्रयुज्यमानः प्रतिषेधार्थः उपरिष्टात्प्रयुज्यमानउपमानार्थः तथाचयास्कउदाहरति—उभयमन्वध्यायंनेन्द्रंदेवममंसतेतिंप्रतिषेधार्थीयःपुरस्तादुपचारः तस्ययत्प्रतिषेधति दुर्मदासोनसुरायामित्युपमार्थीयउपरिष्टादुपाचारस्तस्ययेनोपमिमीतइतिं । अत्रोपमेयवाचिनोद्युशब्दस्यापिप्रयुक्तत्वादुपमार्थःस्वीकृतः अष्टाविंशतिसंख्याकेषुबलनामस्वोजःपाजःशवइतिपठितम् ॥ महानितिनकारस्यसंहितायां दीर्घादटिसमानपादेइतिरुत्वम् आतोटिनित्यमितिपूर्वस्याकारस्यानुनासिकः भोभगोअघोअपूर्वस्ययोशीतियकारः तस्यलोपः तस्यासिद्धत्वात्स्वरसंधिर्नभवति महेरिन्नित्यौणादिकइन् महेर्भा-

नि० ११. २७. ।

वोमहित्वं त्वइतिप्रत्ययस्वरेणोदात्तः सएवशिष्यते वज्रिणइकारःप्रत्ययस्वरेणोदात्तः द्यौः द्यो- शब्दःप्रातिपदिकस्वरेणान्तोदात्तः गोतोणिदितिविभक्तेर्णित्त्वादचोञ्णितीतिवृद्धिरान्तरतम्या- दुदात्तैवभवति। प्रथिना प्रथिम्ना पृथोर्भावइत्यर्थेपृथ्व्यादिभ्यइमनिज्वेतीमनिच् रऋतोहला- देर्लघोरितिऋकारस्यरभावः तुरिष्ठेमेयःस्वित्यनुवृत्तौटेरितिटिलोपः प्रथिमन्शब्दश्चित्त्वाद- न्तोदात्तः तृतीयैकवचनेभत्वादल्लोपोनइत्यकारलोपश्च छान्दसोमकारलोपः अनुदात्तस्यचय- त्रोदात्तइतिविभक्तेरुदात्तत्वम्। शवः नब्विषयस्यानिसन्तस्येत्याद्युदात्तत्वम्॥ ५॥

५. इन्द्रदेव महान् सर्वोच्च हैं। वज्रवाही इन्द्र को महत्त्व आश्रय करे। इन्द्र की सेना आकाश के समान विशाल है।

सुमोहेवायआशतनरस्तोकस्यसनितौ। विप्रासोवाधियायवः॥६॥

सम्ऽओहे। वा। ये। आशत। नरः। तोकस्य। सनितौ। विप्रासः। वा। धियाऽयवः॥ ६॥

येनरः पुरुषाः समोहेसंग्रामे तोकस्यापत्यस्यसनितौवालाभेवा आशतव्याप्तवन्तः इन्द्रं स्तुत्वेतिशेषः वाअथवा विप्रासोमेधाविनः धियायवः प्रज्ञाकामाः सन्तआशततेसर्वेलभन्तइत्य- ध्याहारः रणइत्यादिषुषट्चत्वारिंशत्संग्रामनामसु समोहेसमिथःइतिपठितम्. पञ्चदशस्वपत्यनाम- सु तुक्तोकमितिपठितम्॥ समोहेप्रातिपदिकान्तोदात्तत्वम्। वा चादयोनुदात्ताइत्यनुदात्तः। आशत अशूव्याप्तौ छान्दसः च्लेर्लोपः आडागमउदात्तः सतिशिष्टत्वेनसएवशिष्यते। नरः प्रा- तिपदिकस्वरः। सनितौ स्त्रियांक्तिन् तितुत्रेष्वग्रहादीनामितिवचनाद्ग्रिगृहीतिर्निपठितिरिति- वदिडागमः। विप्रासः ऋज्रेन्द्रेत्यादिनाविप्रशब्दोरन्प्रत्ययान्तोनिपातितः। धियायवः धीधारणे धीयते धार्यते अवबुध्यते श्रुतमर्थजातमनयेतिधियाप्रज्ञा तामात्मनइच्छन्तीतिक्यच् क्या- च्छन्दसीत्युप्रत्ययः अतोलोपः प्रत्ययस्वरेणोदात्तः॥ ६॥

६. जो पुरुष रण-स्थली में जानेवाले हैं, पुत्र-प्राप्ति के इच्छुक हैं अथवा जो विशेषज्ञ ज्ञानाकाङ्क्षा में तत्पर हैं, वे सब इन्द्र की स्तुति-द्वारा सिद्धि प्राप्त करते हैं।

यःकुक्षिःसोमपातमःसमुद्रइवपिन्वते। उर्वीरापोनकाकुदः॥ ७॥

यः। कुक्षिः। सोमऽपातमः। समुद्रःऽइव। पिन्वते। उर्वीः। आपः। न। काकुदः॥ ७॥

यः कुक्षिरस्येन्द्रस्यउदरप्रदेशः सोमपातमः अतिशयेनसोमस्यपाता सकुक्षिः समुद्रइवपिन्वतेवर्धते सेचनार्थोधातुरौचित्येनवृद्धिंलक्षयति काकुदोमुखसंबन्धिन्यउर्वीर्बह्वचः आपोन जलानीवजिह्वासंबद्धमास्योदकंयथाकदाचिदपिनशुष्यति तथेन्द्रस्यकुक्षिःसोमपूरितोनशुष्यतीत्यर्थः यद्यपिश्लोकइत्यादिषुसप्तपञ्चाशत्सुवाङ्नामसुकाकुज्जिह्वेतिपठितम् तथाप्युदकसंबन्धसिद्ध्यर्थमत्रकाकुच्छब्देनमुखमुपलक्षितम् संबन्धवाचिनस्तद्धितस्यात्रछान्दसोलोपोद्रष्टव्यः॥ सोमपातमः सोमंपिबतीतिसोमपाः आकारोधातुस्वरेणोदात्तः कृदुत्तरपदप्रकृतिस्वरेणसएवशिष्यते तमपःपित्त्वादनुदात्तत्वम्। समुद्रशब्दःप्रातिपदिकत्वादन्तोदात्तः इवेनविभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वंचेति। पिन्वते पिविसेचने इदितोनुम्धातोरितिनुमागमः शपःपित्त्वेनानुदात्तत्वं तिङश्चलसार्वधातुकस्वरेणधातुस्वरएवशिष्यते । उर्वीःउरुशब्दोऽन्तोदात्तः वोतोगुणवचनादितिङीष् यणादेशःउदात्तयणोहल्पूर्वादितीकारउदात्तः जसासहएकादेशउदात्तेनोदात्तइत्येकादेशउदात्तः। आपः प्रातिपदिकस्वरः। काकुदः प्रातिपदिकस्वरेणान्तोदात्तः॥ ७॥

७. इन्द्र का जो उदरदेश सोमरस-पान के लिए तत्पर रहता है, वह सागर की तरह विशाल है। वह उदर जीभ के जल की तरह कभी नहीं सूखता।

अभिप्लवषडहगतेषूक्थ्येषुतृतीयसवनेब्राह्मणाच्छंसिनएवाह्यस्यसूनृतेत्यनुरूपस्तृचः एह्युषुब्रवाणितइतिखण्डे—अथब्राह्मणाच्छंसिनइत्युपक्रम्यएवाह्यसिवीरयुरेवाह्यस्यसूनृतेतिसूत्रितम्।

तस्मिंस्तृचेप्रथमांसूक्तेऽष्टमीमृचमाह—

एवाह्यस्यसूनृताविरप्शीगोमतीमही। पक्वाशाखानदाशुषे॥ ८॥

एव। हि। अस्य। सूनृता। विऽरप्शी। गोऽमती। मही। पक्वा। शाखा। न। दाशुषे॥ ८॥

अस्येन्द्रस्यसूनृताप्रियसत्यरूपावाक्दाशुषेहविर्दत्तवतेयजमानायतदर्थंएवाहिएवंखलु अनन्तरपदवक्ष्यमाणगुणोपेताभवतीत्यर्थः कीदृशीविरप्शीविविधरपणोपेतवाक्ययुक्ता बहुविधोपचारवादिनीत्यर्थः गोमती बह्वीभिर्गोभिरुपेतागोप्रदेत्यर्थः अतएवमहीमहतीपूज्या यथोक्तवाचोदृष्टान्तः—पक्वाशाखान यथाबहुभिःपक्वैःफलैरुपेतापनसवृक्षादिशाखास्वामीतिहेतुस्तद्वत् यद्यपिमहन्नामसुन्नावंविरप्शीतिपठितम् तथाप्यत्रमहीत्यनेनपुनरुक्तिप्रसंगादवयवार्थोगृहीतः॥ एव एवमादीनामन्तइत्यन्तोदात्तः संहितायांनिपातस्यचेतिदीर्घः। हि निपातआद्युदात्तः। अस्य प्रकृतस्येन्द्रस्यपरामर्शादिदमोन्वादेशेइत्यादिनाअशादेशोनुदात्तइतिसर्वानुदात्तः। ऊनपरिहाणे सुतरामूनयत्यप्रियमितिसूनृत् साचासावृतासत्याचेतिसूनृताप्रियसत्यावाक् परादिश्छन्दसिबहुलमितिऋकारउदात्तः। विरप्शी विविधंरपणंविरप् रपलपव्यक्तायांवाचि संपदादित्वाद्भावेक्विप् त-

देषामस्तीतिविरप्शानिवाक्यानितानियस्यांवाचिसन्तिसावाक्विरप्शिनी अतइनिठनावितीनिः यस्येतिचेत्यकारलोपः ऋन्नेभ्योङीबितिङीप् इकारःप्रत्ययस्वरेणोदात्तः नकारलोपश्छान्दसः सवर्णदीर्घएकादेशउदात्तेनोदात्तइत्यनुदात्तः। गावःअस्यांसन्तीतिगोमती मतुम्ङीपौपित्त्वादनुदात्तौप्रातिपदिकस्वरएवशिष्यते। मही महती उगितश्चेतिङीप् तस्यपित्त्वादनुदात्तत्वेप्राप्तेशतुरनुमोनद्यजादीइत्यत्रबृहन्महतोरुपसंख्यानमित्युदात्तत्वं अच्छब्दलोपश्छान्दसः। पक्वा डुपचष्पाके निष्ठेतिक्तप्रत्ययः पचोवइतिवत्वं चोःकुरितिकुत्वं प्रत्ययस्वरेणान्तोदात्तः टापासवर्णदीर्घएकादेशउदात्तेनोदात्तइत्याद्युदात्तः। शाखा शाखृश्लाखृव्याप्तौ पचाद्यच् चित्त्वादन्तोदात्तेप्राप्ते वृषादेराकृतिगणत्वाद्वृषादित्वादाद्युदात्तत्वम्। दाशुषे दाशृदाने दाश्वान्साह्वान्मीढ्वांश्चेतिनिपातनात्क्वसौइडभावोद्विर्वचनाभावश्च चतुर्थ्येकवचनेयचिभमितिभसंज्ञायांवसोःसंप्रसारणमितिसंप्रसारणंवकारस्यउकारः परपूर्वत्वं शासिवसिघसीनांचेतिषत्वम् प्रत्ययस्वरेणोकारउदात्तः ॥ ८ ॥

८. इन्द्र के मुख से निकला हुआ वाक्य सत्य, वैचित्र्य-विशिष्ट, महान् और गो-प्रदाता है और हव्यदाता यजमान के पक्ष में तो वह वाक्य पके हुए फलों से संयुक्त वृक्ष-शाखा के समान है।

एवाहितेविभूतयऊतयइन्द्रमावते। सद्यश्चित्सन्तिदाशुषे ॥ ९ ॥

एव। हि। ते। विऽभूतयः। ऊतयः। इन्द्र। माऽवते। सद्यः। चित्। सन्ति। दाशुषे ॥ ९ ॥

हेइन्द्र तेतवविभूतयऐश्वर्यविशेषाः एवाहिएवंविधाःखलु किंविधाइतितदुच्यते मावते मत्सदृशायदाशुषेहविर्दत्तवतेयजमानायऊतयस्त्वदीयरक्षारूपाः सद्यश्चित्सन्ति यदाकर्मानुष्ठितं तदैवभवन्ति॥ मावते मत्सदृशाय वतुप्प्रकरणेयुष्मदस्मद्भ्यांछन्दसिसादृश्यउपसंख्यानमित्यस्मच्छब्दान्मतुप् मपर्यन्तस्यप्रत्ययोत्तरपदयोश्चेतिमादेशः अद्शब्देनसहअतोगुणेइतिपररूपत्वं दृग्दृशवतुष्वितिअनुवृत्तावासर्वनाम्नइतिदकारस्याकारः सवर्णदीर्घत्वं वतुपःपित्त्वात्प्रातिपदिकस्वरएवशिष्यते। सद्यः समानेद्यवीत्यर्थेसद्यःपरुत्परार्यैषमइत्यादिनानिपातितम् प्रत्ययस्वरेणान्तोदात्तत्वम्। चित् चादयोनुदात्ताइत्यनुदात्तः। सन्ति असभुवि लटःस्थानेझि झोऽन्तः अदिप्रभृतिभ्यःशपइतिशपोलुक् तिङ्प्रत्ययाद्युदात्तत्वं प्रत्ययलोपेप्रत्ययलक्षणमिति शबकारमाश्रित्यलसार्वधातुकानुदात्तत्वंनभवति वर्णाश्रयविधौप्रत्ययलक्षणंनास्तीतिनिषेधात्। दाशुषे गतमन्त्रेगतम्॥ ९ ॥

९. इन्द्र! तुम्हारा ऐश्वर्य ही ऐसा है। वह हमारे जैसे हव्यदाता का रक्षक और शीघ्र फलदायी है।

दशमीमृचमाह—

एवाह्यस्यकाम्यास्तोमउक्थंचशंस्या। इन्द्रायसोमपीतये॥१०॥१६॥

एव। हि। अस्य। काम्या। स्तोमः। उक्थम्। च। शंस्या।
इन्द्राय। सोमऽपीतये॥ १०॥ १६॥

अस्येन्द्रस्यस्तोमः सामसाध्यंस्तोत्रं उक्थंचऋक्साध्यंशस्त्रमपिएवाहि एतेउभेएवंविधे खलु किंविधेइतितदुच्यते काम्याकामयितव्ये शंस्या ऋत्विग्भिःशंसनीये किमर्थंशंसनमितितदुच्यते इन्द्रायसोमपीतये इन्द्रस्यसोमपानार्थम्॥ एवाह्यस्यव्यवहितमन्त्रेगतम्। काम्या कमेर्णिङन्तादचोयत् णेरनिटीतिणिलोपः तित्स्वरितमितिस्वरितेप्राप्तेयतोनावइत्याद्युदात्तत्वं सुपोडादेशः। स्तोमः अर्तिस्तुसुस्वित्यादिनामन्प्रत्ययः। उक्थं वचपरिभाषणे पातृतुदिवचिरिचिसिचिभ्यस्थगितिथक् किच्वात्संप्रसारणंपरपूर्वत्वगुणाभावौ। शंस्या शंसुस्तुतौ ण्यन्तादचोयत् यतोनावइत्याद्युदात्तत्वम् सुपोडादेशः। सोमस्यपीतिःसोमपीतिः कृदुत्तरपदप्रकृतिस्वरे प्राप्तेव्यत्ययेनाद्युदात्तत्वं अथवा सोमस्यपीतिर्यस्येन्द्रस्येतिसोमपीतिरिन्द्रः बहुव्रीहौप्रकृत्यापूर्वपदमितिपूर्वपदप्रकृतिस्वरत्वम्॥ १०॥

१०. इन्द्र के सामवेदीय और ऋग्वेदीय मंत्र इन्द्र को अभिलषित हैं और इन्द्र के सोमपान के लिए वक्तव्य हैं।

इन्द्रेहीत्यादिकंदशर्चंसुरूपकृत्नुमित्यादिषुषष्ठं ऋष्यादयस्त्वस्यपूर्ववत् विशेषस्तुअतिरात्रेद्वितीयपर्यायेअच्छावाकशस्त्रे इन्द्रेहीत्यनुरूपस्तृचः अतिरात्रेपर्यायाणामितिखण्डे—इदंवसोसुतमन्धइन्द्रेहिमत्स्यन्धसइतिसूत्रितम्।

तस्मिन्सूक्तेप्रथमामृचमाह—

इन्द्रेहिमत्स्यन्धसोविश्वेभिःसोमपर्वभिः। महाँअभिष्टिरोजसा॥१॥

इन्द्र। आ। इहि। मत्सि। अन्धसः। विश्वेभिः। सोमपर्वऽभिः।
महान्। अभिष्टिः। ओजसा॥ १॥

हेइन्द्र एहिअस्मिन्कर्मणिआगच्छआगत्यच विश्वेभिः सर्वैः सोमपर्वभिः सोमरसरूपैः अन्धसः अन्धोभिरन्नैः मत्सिमाद्यहृष्टोभव ततऊर्ध्वंओजसाबलेनमहान्भूत्वा अभिष्टिःशत्रूणामभिभविताभवेतिशेषः अष्टाविंशतिसंख्याकेषुबलनामस्वोजःपाजइतिपठितम्॥आइहि आद्गुणः

इन्द्रएहि योह्युभयोःस्थानेलभतेऽसावन्यतरव्यपदेशमितिआङ्माङोरेकादेशस्याङ्व्यपदेशा-दोमाङोश्चेतिपररूपम् । मत्सि माद्य मदीहर्षग्लेपनयोः लोटःसिप् सर्वेविधयश्छन्दसि-विकल्प्यन्तइतिसेर्हिरादेशोनभवति दिवादिभ्यःश्यन्नितिश्यन् बहुलंछन्दसीतिश्यनोलुक् नलुमताङ्गस्येतिप्रत्ययलक्षणप्रतिषेधात् शमामष्टानांदीर्घःश्यनीत्युपधादीर्घोनभवति सिपःपि-त्वाद्धातुस्वरएव । अन्धसः अदेर्नुमधश्चेत्यसुन् व्यत्ययेनतृतीयाबहुवचनंकर्तव्यम् नित्त्वादाद्यु-दात्तः । विश्वेभिः अशूप्रुषीत्यादिनाक्वन् नित्त्वादाद्युदात्तत्वम् ऐसादेशोबहुलंछन्दसीतिनभवति। सोमपर्वभिः लतारूपंसोमंपृणन्तिपूरयन्तीतिसोमपर्वाणः सोमरसाः पॄपालनपूरणयोः अन्ये-भ्योऽपिदृश्यन्तेइतिवनिप्गुणोरपरत्वम् वनिपःपित्त्वाद्धातुस्वरएव उपपदसमासे कृदुत्तरपदप्रकृ-तिस्वरेणपुनःसएवभवति । अभिष्टिरभिगन्ता इषगतौ मन्त्रेवृषेत्यादिनाक्तिन्नुदात्तः सहिभावपरो-ऽपिभवितारंलक्षयति कित्त्वाल्लघूपधगुणाभावः तितुत्रतथसिसुसरकसेषुचेति इडागमोनभव-ति अभिशब्दस्यइकारे एमन्नादिषुपररूपत्वंवक्तव्यमितिपररूपत्वं प्रादिसमासे कृदुत्तरपदप्रकृ-तिस्वरत्वम् । ओजसा उब्जेर्बलोपश्चेत्यसुन् नित्त्वादाद्युदात्तः ॥ १ ॥

१. इन्द्र! आओ । सोमरस-रूप खाद्यों से हृष्ट बनो । महाबल-शाली होकर शत्रुओं में विजयी बनो

द्वितीयामृचमाह—

एमेनंसृजतासुतेमन्दिमिन्द्रायमन्दिने । चक्रिंविश्वानिचक्रये ॥ २ ॥

आ । ईम् । एनम् । सृजत । सुते । मन्दिम् । इन्द्राय । मन्दिने ।
चक्रिम् । विश्वानि । चक्रये ॥ २ ॥

ईमित्यनर्थकः पादपूरणायप्रयुक्तः हेअध्वर्यवः सुतेअभिषुतेचमसस्थेसोमेएनंसोममिन्द्रा-य इन्द्रार्थंआसृजत पुनरभ्युन्नयतशुक्रामन्थिचमसगणेपुनरभ्युन्नयनमापस्तंबेनोक्तम् होत्र-काणांचमसाध्वर्यवःसकृत्सकृद्धुत्वाशुक्रस्याभ्युन्नीयोपावर्तध्वमितीति कीदृशमेनं मन्दिं हर्षहे-तुं चक्रिंसाधुकरणशीलं कीदृशायेन्द्रायमन्दिनेहर्षयुक्ताय विश्वानिसर्वाणिकर्माणिचक्रयेकृतवते सर्वकर्मनिष्पादनशीलायेत्यर्थः ईमित्यस्यपदपूरणार्थंयास्कआह—अथयेप्रवृत्तेऽर्थेमिताक्षरेषु ग्रन्थेषुवाक्यपूरणाआगच्छन्तिपदपूरणास्तेमिताक्षरेष्वनर्थकाःकमीमिद्विति । अस्यायमर्थः अन्यैरेवपदैर्विवक्षितेऽर्थेसमाप्तेसतियेशब्दाअमिताक्षरेषुछन्दोराहित्येनपरिमिताक्षररहितेषुब्राह्म-णादिवाक्येषुवाक्यपूरणार्थाद्रष्टव्याः मिताक्षरेषुछन्दोयुक्तेषुग्रन्थेषुपदपूरणार्थाः तेचकमी-मित्यादयइति । ईमित्यस्यशब्दस्यानर्थक्यायैतामृचमुदाजहार—एमेनंसृजतासुतेआसृजतैनं

१ आपस्तंबसूत्रेअग्निष्टोमप्रकरणे ।

सुतइति। एनंइदमोद्वितीयायांद्वितीयाटौस्वेनइतिएनादेशोऽनुदात्तइत्यनुवृत्तेः सर्वानुदात्तः। सूजत संहितायामन्येषामपिदृश्यतइतिदीर्घः। मन्दिम् प्रमोदहेतुं मदिस्तुतिमोदमदस्वप्नकान्तिगतिषु इदितोनुम् धातोरितिनुम् मन्दमानं प्रयुंक्तइत्यर्थे हेतुमतिचेतिणिच् ण्यन्तस्यअजन्तत्वादचइरितिइकारप्रत्ययः णेरनिटीतिणिलोपः प्रत्ययस्वरेणान्तोदात्तत्वम्। मन्दिने मन्देःपूर्ववच्चतुर्थ्येकवचने-अनपुंसकस्यापिव्यत्ययेननुमागमः। चक्रिं डुकृञ्करणे आदृगमहनजनःकिकिनौलिट्चेति तच्छीलतद्धर्मतत्साधुकारिषुकर्तृषुकिन्प्रत्ययः तस्यकित्त्वाद्गुणाभावः यणादेशः लिड्वद्भावाद्द्विर्वचनं द्विर्वचनेचीतियणादेशस्यस्थानिवद्भावात्कृशब्दोद्विरुच्यते अभ्यासस्यउरत्वरपरत्वश्चुत्वहलादिशेषाः किनोनित्त्वादाद्युदात्तः। विश्वानि विशेःक्वन् नित्त्वादाद्युदात्तः। अस्यचक्रयेइतिकृदन्तेनयोगेऽपिकर्तृकर्मणोः कृतीतिषष्ठीनभवति किकिनौलिट्चेतिकिकिनोर्लिड्वद्भावेन नलोकाव्ययनिष्ठाखलर्थतृनामितिनिषेधात्॥ २॥

२. यदि प्रसन्नतादायक और कार्य-सम्पादन में उत्तेजक सोमरस तैयार हो तो, हर्ष-युक्त और सकल-कर्म-साधक इन्द्र को उत्सर्ग करो।

मत्स्वासुशिप्रमन्दिभिःस्तोमेभिर्विश्वचर्षणे। सचैषुसवनेष्वा॥ ३॥

मत्स्व। सुऽशिप्र। मन्दिऽभिः। स्तोमेभिः। विश्वऽचर्षणे। सचा। एषु। सवनेषु। आ॥ ३॥

सुशिप्र हेशोभनहनो शोभननासिकवा शिप्रेहनूनासिकेवेतियास्केनोक्तत्वात् तादृशहे-इन्द्र मन्दिभिःहर्षहेतुभिःस्तोमेभिःस्तोमैःस्तोत्रैः मत्स्वहृष्टोभव हेविश्वचर्षणेसर्वमनुष्ययुक्त सर्वैर्यजमानैःपूज्येत्यर्थः तादृशइन्द्र त्वंएषुयागगतेषुत्रिषुसवनेषुसचादेवैरन्यैः सहआगच्छेतिशेषः॥ मदिस्तुतीत्यस्यलोटिअनित्यमागमशासनमितिकृत्वाइदितोनुमंधातोरितिनुमन्नभवति अनुदात्तेत्त्वात्तास्यनुदात्तेन्ङिद्दुपदेशादितिलसार्वधातुकानुदात्तत्वम् धातुस्वरएव संहितायांद्व्यचोतस्तिङइतिदीर्घत्वम्। सुशिप्रेत्यामन्त्रितनिघातः। मन्दिभिः गतमन्त्रेव्याख्यातम्। स्तोमेभिः मन्प्रत्ययस्यनित्त्वादाद्युदात्तत्वम् बहुलंछन्दसीतिभिसऐसादेशोनभवति। विश्वचर्षणे निघातः। सचा उक्तः। एषु ऊडिदमित्यादिनाविभक्तेरुदात्तत्वम्॥ ३॥

३. हे सुन्दर नासिकावाले और सबके अधीश्वर इन्द्र! प्रसन्नताकारक स्तुतियों से प्रसन्न हो और देवों के साथ इस सवन-यज्ञ में पधारो।

चतुर्थीमृचमाह—

असृग्रमिन्द्रतेगिरःप्रतित्वामुदहासत। अजोषावृषभंपतिम्॥ ४॥

अस्रग्रम् । इन्द्र । ते । गिरः । प्रति । त्वाम् । उत् । अहासत ।

अजोषाः । वृषभम् । पतिम् ॥ ४ ॥

हेइन्द्र गिरस्त्वदीयाःस्तुतीरस्रग्रंसृष्टवानस्मि ताश्चगिरःस्वर्गेवस्थितंत्वांप्रतिउदहासत उद्गत्यप्रापुवन् तादृशीर्गिरस्त्वं अजोषाः सेवितवानसि कीदृशंत्वांवृषभं कामानांवर्षितारं पतिं सोमस्यपातारंयजमानानांपालयितारंवा पातावापालयितावेतियास्केनोक्तत्वात् । अस्रग्रं असृजं सृजविसर्गे लङोमिप् तुदादिभ्यःशः बहुलंछन्दसीति अत्रविकरणस्यरुडागमः जकारस्यगकारः लुङ्लङ्लृङ्क्ष्वडुदात्तइत्यडागमउदात्तः सतिशिष्टत्वात्सएवशिष्यते । गिरः प्रातिपदिकस्वरः । अहासत ओहाङ्गतौ लुङ्झस्यअदादेशः च्लेःसिच्अडागमःनिघातश्च । अजोषाःजुषीप्रीतिसेवनयोः लङ्स्थास् तुदादिभ्यःशः तस्यछन्दस्युभयथेतिआर्धधातुकत्वेनङित्त्वाभावाल्लघूपधगुणः थासस्थकारलोपश्छान्दसः सवर्णदीर्घः अडागमःसतिशिष्टत्वादुदात्तः शिष्यते । वृषभं वृषुवृषुमृषुसेचने अभजित्यनुवृत्तौ ऋषिवृषिभ्यांकिदित्यभच्प्रत्ययः कित्त्वाद्गुणाभावः चित्त्वादन्तोदात्तः । पतिं पारक्षणे पातेर्डतिः डित्त्वाट्टिलोपः प्रत्ययाद्युदात्तत्वम् ॥४॥

४. इन्द्र! मैंने तुम्हारी स्तुति की है। तुम इच्छित-वर्षक और पालन-कर्त्ता हो। मेरी स्तुति तुम्हें प्राप्त हुई है; तुमने उसे ग्रहण कर लिया है।

संचोदयचित्रमर्वाग्राधइन्द्रवरेण्यम् । असदित्तेविभुप्रभु ॥ ५॥१७॥

सम् । चोदय । चित्रम् । अर्वाक् । राधः । इन्द्र । वरेण्यम् । असत् ।

इत् । ते । विऽभु । प्रऽभु । ५ ॥ १७ ॥

हेइन्द्र वरेण्यंश्रेष्ठं राधोधनं चित्रं मणिमुक्तादिरूपेणबहुविधं अर्वागस्मदभिमुखंयथाभवतितथासंचोदय सम्यक्प्रेरय भोगाययावत्पर्याप्तंतावद्विभुशब्देनोच्यते ततोऽप्यधिकंप्रभुशब्देन तादृशंधनंतेतवैवअसदित्अस्त्येव तस्मादस्मभ्यंप्रयच्छेत्यर्थः मघमित्यादिषुअष्टाविंशतिधननामसु रायःराधइतिपठितम् ॥चोदय चुदप्रेरणे ण्यन्ताल्लोट् तिङ्ङतिङइतिनिघातः। राधःराध्नुवन्त्यनेनेतिराधोधनं सर्वधातुभ्योऽसुन् नित्त्वादाद्युदात्तः । वरेण्यं वृञएण्यः वृषादित्वादाद्युदात्तः । असत् असभुवि लेट् तिप् इतश्चलोपइतीकारलोपः लेटोडाटावित्यडागमः अदिप्रभृतिभ्यःशपइतिशपोलुक् आगमाअनुदात्ताइतिअटोऽनुदात्तत्वाद्धातुस्वरएव । विभु विभवतीतिविभु भुवइत्यनुवृत्तौ विप्रसंभ्योड्वसंज्ञायामितिडुप्रत्ययः डित्त्वाट्टिलोपः प्रत्ययस्वरेणोकारउदात्तः कृदुत्तरपदप्रकृतिस्वरेणसएवशिष्यते । एवंप्रभु ॥ ५ ॥

५. इन्द्रदेव! उत्तम और नानाविध सम्पत्ति हमारे सामने भेजो। पर्याप्त और प्रचुर धन तुम्हारे पास ही है।

---

१ नि० ८. ३.।

इन्द्रेहीतिसूक्तेषष्ठीमृचमाह—

अस्मान्त्सुतत्रचोदयेन्द्ररायेरभस्वतः । तुविद्युम्नयशस्वतः ॥ ६ ॥

अस्मान् । सु । तत्र । चोदय । इन्द्र । राये । रभस्वतः । तुविऽद्युम्न । यशस्वतः ॥ ६ ॥

हेतुविद्युम्न प्रभूतधनेन्द्र रायेधनसिद्ध्यर्थमस्माननुष्ठातॄन्तत्रकर्मणिसुचोदयसुष्ठुप्रेरय कीदृशानस्मान् रभस्वतः उद्योगवतःयशस्वतः कीर्तिमतः॥तत्र तच्छब्दात्सप्तम्यास्त्रल् लितीतिप्रत्ययात्पूर्वस्योदात्तत्वम्।इन्द्र आमन्त्रितायुदात्तत्वम् पादादित्वान्ननिघातः । राये ऊडिदमित्यादिनाविभक्तेरुदात्तत्वम् । रभस्वतः रभराभस्ये राभस्यंकार्योपक्रमः सर्वधातुभ्योऽसुन् नित्त्वादाद्युदात्तः मतुपःपित्त्वादनुदात्तत्वम् स्वादिष्वसर्वनामस्थानेइतिनपदत्वम् तसौमत्वर्थेइतिभसंज्ञयाबाधितत्वात् आकडारादेकासंज्ञेतिनियमात् । तुविबहुद्युम्नंधनंयस्य षाष्ठिकमामन्त्रितायुदात्तत्वम् । यशस्वतः यशोस्यास्तीतिमतुप् अस्मायामेधास्रजोविनिरितिविनिनानबाध्यते मतुपःसर्वत्रसमुच्चयात् यशस्शब्दोनविषयस्यानिसन्तस्येत्याद्युदात्तः मतुपःपित्त्वात्सएवशिष्यते ॥ ६ ॥

६. अनन्त-सम्पत्तिशाली इन्द्र ! धन-सिद्धि के लिए हमें इस कर्म में संयुक्त करो। हम उद्योगी और यशस्वी हैं।

सप्तमीमृचमाह—

संगोमदिन्द्रवाजवदस्मेपृथुश्रवोबृहत् । विश्वायुर्धेह्यक्षितम् ॥ ७ ॥

सम् । गोऽमत् । इन्द्र । वाजऽवत् । अस्मेइति । पृथु । श्रवः । बृहत् । विश्वऽआयुः । धेहि । अक्षितम् ॥ ७ ॥

हेइन्द्र श्रवोधनं अस्मेसंधेहि अस्मभ्यंसम्यक्प्रयच्छ कीदृशंश्रवः गोमत् बह्वीभिर्गोभिरुपेतं वाजवत् प्रभूतेनान्नेनोपेतं[1] पृथु परिमाणेनाधिकं बृहत् गुणैरधिकं विश्वायुः कृत्स्नायुष्यकारणं अक्षितं विनाशरहितम् ॥ गोमत् वाजवत् उभयत्रमतुपोऽनुदात्तत्वात्प्रातिपदिकस्वरएव वाजशब्दोवृषादिरायुदात्तः । अस्मे अस्मच्छब्दाच्चतुर्थीबहुवचनस्यसुपांसुलुगित्यादिनाशेआदेशः शित्त्वात्सर्वादेशः प्रातिपदिकस्वरेणान्तोदात्तत्वम् शेषेलोपष्टिलोपइतिपक्षेउदात्तनिवृत्तिस्वरेणविभक्तेरुदात्तत्वम् अन्त्यलोपपक्षेअतोगुणेइतिपररूपे एकादेशउदात्तेनोदात्तइतिउदात्तत्वम् । पृथु प्रथप्रख्याने प्रथिम्रदिभ्रस्जांसंप्रसारणंसलोपश्चेतिकुप्रत्ययः रेफस्यसं-

1 प्रभूतेनधनेनोपेतमितिपाठः ।

प्रसारणस्वकारः परपूर्वत्वं कोःकित्त्वान्नलघूपधगुणः। श्रूयतइतिश्रवोधनं असुन्प्रत्ययः नित्त्वादाद्युदात्तः। बृहत् प्रातिपदिकस्वरः। विश्वायुः विश्वमायुर्यस्मिन्धने विश्वशब्दःक्वन्प्रत्ययान्तः तस्यबहुव्रीहौपूर्वपदप्रकृतिस्वरत्वेप्राप्ते परादिश्छन्दसिबहुलमितिपूर्वपदान्तोदात्तत्वम् एकादेशउदात्तेनोदात्तइत्युदात्तः। अक्षितं क्षिक्षयेइत्यस्मादन्तर्भावितण्यर्थात्कर्मणिनिष्ठा तेन ण्यदर्थत्वान्निष्ठायामण्यदर्थे इतिनदीर्घत्वम् अतएवक्षियोदीर्घादितिननिष्ठानत्वम् नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम्॥ ७॥

७. इन्द्रदेव! गौ और अन्न से युक्त, प्रचुर और विस्तृत, सारी आयु चलने योग्य और अक्षय धन हमें दो।

अ॒स्मे धे॑हि॒ श्रवो॑ बृ॒हद्द्यु॒म्नं स॑ह॒स्र॒सात॑मम्। इन्द्र॒ ता र॒थिनी॒रिषः॑॥ ८॥

अ॒स्मे इति॑। धे॒हि॒। श्रवः॑। बृ॒हत्। द्यु॒म्नम्। स॒ह॒स्र॒ऽसात॑मम्।
इन्द्र॑। ताः। र॒थिनीः॑। इषः॑॥ ८॥

हेइन्द्रबृहत्श्रवः महतींकीर्तिम् अस्मेधेहि अस्मभ्यंप्रयच्छ तथा सहस्रसातमं अतिशयेनसहस्रसंख्यादानोपेतं द्युम्नंधनमस्मेधेहि तथा ताः व्रीहियवादिरूपेण प्रसिद्धाः रथिनीर्बहुरथोपेताः इषोन्नान्यस्मेधेहि॥ अस्मे सुपांसुलुगित्यादिनाशेआदेशः। धेहि घ्वसोरेद्धावभ्यासलोपश्चेत्येत्वाभ्यासलोपौ। श्रूयतइतिश्रवः असुनोनित्त्वादाद्युदात्तत्वम् सहस्रंसनुतेददातीतिसहस्रसाः षणुदाने जनसनखनक्रमगमोविट् विड्वनोरनुनासिकस्यादित्याकारादेशः धातुस्वरेणान्तोदात्तः पुनःकृदुत्तरपदप्रकृतिस्वरेणसएवशिष्यते। रथाआसांसन्तीतिरथिन्यइतिप्रत्ययस्याद्युदात्तत्वम् ऋन्नेभ्योङीप् सचपित्त्वादनुदात्तः। इषः यौगिकत्वेधातुस्वरः रूढत्वेप्रातिपदिकस्वरः॥ ८॥

८. इन्द्र! हमें महती कीर्ति, बहुदान-सामर्थ्ययुत धन और अनेक-रथपूर्ण अन्न दान करो।

वसो॒रिन्द्रं॒ वसु॑पतिं गी॒र्भिर्गृ॒णन्त॑ ऋ॒ग्मिय॑म्। होम॒ गन्ता॑रमू॒तये॑॥ ९॥

वसोः॑। इन्द्र॑म्। वसु॑ऽपतिम्। गी॒ःऽभिः। गृ॒णन्तः॑। ऋ॒ग्मिय॑म्।
होम॑। गन्ता॑रम्। ऊ॒तये॑॥ ९॥

वसोर्वसुनोऽस्मदीयस्यधनस्योवयेरक्षार्थं इन्द्रंहोम वयमाह्वयामः किंकुर्वन्तः गीर्भिःस्तुतिभिर्गृणन्तः स्तुवन्तः कीदृशमिन्द्रं वसुपतिंधनपालकं ऋग्मियंऋचांमातारंगन्तारंयागदेशेगमन-

शीलम् ॥ वसोः वसनिवासे शृस्वृस्निहीत्यादिनाउन्प्रत्ययः निदित्यनुवृत्तेर्नित्त्वादाद्युदात्तः । व-सुपतिं समासान्तोदात्तत्वेप्राप्ते पत्यावैश्वर्येइतिपूर्वपदप्रकृतिस्वरत्वम् । गीर्भिः सावेकाचइतिवि-भक्तेरुदात्तत्वम्। गृणन्तः गृशब्दे-लटःशतृ क्र्यादिभ्यःश्ना शतुः सार्वधातुकमपिदितिङित्त्वा-त् श्नाभ्यस्तयोरातइत्याकारलोपः शतुरकारस्यप्रत्ययस्वरेणोदात्तत्वम् । ऋग्मियं ऋचोमिमी-तइतिऋग्मीः तंऋग्मियं माङ्मानेशब्देच क्विप्चेतिक्विप् घुमास्थेत्यादिनाईत्वम् चकारस्यचोः कुः झलांजशोन्तेइतिजश्त्वंगकारः द्वितीयैकवचनेअचिश्नुधात्वित्यादिनाइयङादेशः एरनेका-चइतियणादेशः सर्वेविधयश्छन्दसिविकल्प्यन्तइतिनभवति कृदुत्तरपदप्रकृतिस्वरेणइकार-उदात्तः । होम आह्वयामः ह्वेञ्स्पर्धायांशब्देच लट् तस्यअस्मदोवहुत्वेपिव्यत्ययेनमिप् इ-कारस्यव्यत्ययेनाकारः शपोबहुलंछन्दसीतिलुक् बहुलंछन्दसीतिह्वःसंप्रसारणं परपूर्वत्वं गुणः धातोरित्योकारउदात्तः मिपःपित्स्वरेणानुदात्तत्वम् । गन्तारं गम्लृगतौ ताच्छील्येतृन् नित्त्वा-दाद्युदात्तः । ऊतये ऊतियूतिजूतीत्यादिनाक्तिन्नुदात्तोनिपातितः ॥ ९ ॥

९. धन की रक्षा के लिए हम स्तुति करके इन्द्र को बुलाते हैं। इन्द्र धन रक्षक, ऋचा-प्रिय और यज्ञ-गमन-कर्त्ता हैं।

सुतेसुते न्योकसे बृहद्बृहत एदरिः । इन्द्राय शूषमर्चति ॥ १० ॥ १८ ॥

सुतेऽसुते । निऽओकसे । बृहत् । बृहते । आ । इत् । अरिः ।
इन्द्राय । शूषम् । अर्चति ॥ १० ॥ १८ ॥

आकारइच्छब्दश्चपादपूरणौ यद्वा व्याप्तिवचनआकारः आईषदर्थेभिव्याप्तावित्यभिधा-नात् इच्छब्दोपिशब्दार्थः इयर्तिगच्छत्यनुष्ठेयंकर्मप्राप्नोतीत्यरिर्यजमानःएदरिःसर्वोपियजमानः इन्द्रायसुतेसुतेइन्द्रार्थमभिषुतेतत्तत्सोमेशूषंबलंअर्चतिस्तौति इन्द्रस्यपराक्रमंप्रशंसतीत्यर्थः की-दृशंशूषं बृहत्प्रौढं कीदृशायेन्द्राय न्योकसेनियतस्थानायबृहतेप्रौढाय ॥ सुतेसुते षुञ्अभि-षवे क्तप्रत्ययः प्रत्ययस्वरेणोदात्तः नित्यवीप्सयोरितिवीप्सायांद्विर्भावः तस्यपरमाम्रेडितमितिद्वितीयस्याम्रेडितत्वेनानुदात्तंचेत्यनुदात्तत्वम्। न्योकसे नियतमोकोयस्यतस्मै निशब्दोनिपाता-आद्युदात्ताइत्याद्युदात्तः । तस्ययणादेशेउदात्तस्वरितयोर्यणःस्वरितोनुदात्तस्येत्योकारःस्व-रितः। बृहते बृहन्महतोरुपसंख्यानमितिअजादिविभक्तेरुदात्तत्वम् । अरिः ऋगतौ अचइरितिइ-कारप्रत्ययः गुणोरपरत्वंप्रत्ययस्वरेणइकारउदात्तः । इन्द्राय ऋज्रेन्द्रेत्यादिनारन्प्रत्ययेइकार-उदात्तः । शूषं प्रातिपदिकस्वरः । अर्चति निघातस्वरः ॥ १० ॥

१०. प्रत्येक यज्ञ में यजमान लोग सदाधिवासी और प्रौढ़ इन्द्र के महान् पराक्रम की प्रशंसा करते हैं।

गायन्तीतिसूक्तस्यमन्त्रसंख्याछन्दोविशेषश्चैवमनुक्रम्यते— गायन्त्विद्वादशानुष्टुभंत्विति

त्वृहिहवाइत्यादिपरिभाषायांतुशब्दस्यसूक्तद्वयेपरिभाषितत्वात् अस्यसूक्तस्यवक्ष्यमाणस्यचानुष्टुभत्वंद्रष्टव्यम् ऋषिदेवतेपूर्ववत् अभिप्लवषडहस्योक्थ्येतृतीयसवनेच्छावाकस्यगायन्तीतिस्तोत्रियस्तृचः एह्यूष्विति खण्डे—गायन्तित्वागायत्रिणआत्वागिरोरथीरिवेतिसूत्रितम् ।

गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः । ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे ॥ १ ॥

गायन्ति । त्वा । गायत्रिणः । अर्चन्ति । अर्कम् । अर्किणः । ब्रह्माणः । त्वा । शतक्रतोइतिशतऽक्रतो । उत् । वंशम्ऽइव । येमिरे ॥ १ ॥

हेशतक्रतो बहुकर्मन् बहुप्रज्ञवेन्द्रत्वा त्वांगायत्रिणः उद्गातारोगायन्तिस्तुवन्ति अर्किणोर्चनहेतुमन्त्रयुक्ताहोतारः अर्कमर्चनीयमिन्द्रमर्चन्तिशस्त्रगतैर्मन्त्रैःप्रशंसन्ति ब्रह्माणोब्रह्मप्रभृतयइतरेब्राह्मणास्त्वात्वामुद्येमिरे उन्नतिंप्रापयन्ति तत्रदृष्टान्तः—वंशमिव यथावंशाग्रेनृत्यन्तः शिल्पिनः प्रौढंवंशं उन्नतंकुर्वन्ति यथावासन्मार्गवर्तिनः स्वकीयंकुलमुन्नतंकुर्वन्ति तद्वत् एतामृचंयास्कएवंव्याचष्टे—गायन्तित्वागायत्रिणःप्रार्चन्तितेऽर्कमर्किणोब्राह्मणास्त्वाशतक्रतउद्येमिरेवंशमिववंशोवनशयोभवतिवननाच्छ्रूयतइतिवेति[1] ॥ अर्कशब्दंचबहुधाव्याचष्टे—अर्कोदेवोभवतियदेनमर्चन्त्यर्कोमन्त्रोभवतियदनेनार्चन्त्यर्कमन्नंभवत्यर्चतिभूतान्यर्कोवृक्षोभवतिसवृतःकटुकिम्नेति[2] ॥ गायन्ति शप्तिपौपित्त्वाल्लसार्वधातुकत्वाच्चानुदात्तौ धातुरुदात्तः । गायत्रिणः गायत्रंसामयेषामुद्गातॄणामस्तितेअतइनिठनौ प्रत्ययस्वरेणइकारउदात्तः । अर्चन्ति अर्चपूजायां भौवादिकः शप्तिपावनुदात्तौ धातुस्वरएव पादादित्वान्ननिघातः । अर्कं अर्चन्त्येभिरित्यर्कामन्त्राः तैरर्चनीयतया तदात्मकइन्द्रोपिलक्षणयाऽर्कः पुंसिसंज्ञायांघःप्रायेणेतिकरणेघः चजोःकुघिण्ण्यतोरितिचकारस्यकुत्वंककारः प्रत्ययस्वरेणान्तोदात्तः अर्कामन्त्रायेषांसन्तीत्यर्किणोहोतारः एकाक्षरात्कृतोजातेःसप्तम्यांचनतौस्मृतावितिकृदन्तादिनिठनौयद्यपिप्रतिषिद्धौतथाप्यत्रव्यत्ययादिनिः प्रत्ययस्वरेणेकारउदात्तः । ब्रह्माणःप्रातिपदिकस्वरेणान्तोदात्तः । शतक्रतो निघातः संहितायामवादेशे लोपःशाकल्यस्येतिवकारलोपः । वंशशब्दःप्रातिपदिकस्वरेणान्तोदात्तः इवेनसमासोविभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वंचेति सएवशिष्यते । येमिरे यमउपरमे लिङ्क्तिङ्ङितिनिघातः ॥ १ ॥

१. शतक्रतु इन्द्र ! गायक तुम्हारे उद्देश्य से गान करते हैं। पूजक पूजनीय इन्द्र की अर्चना करते हैं। जिस प्रकार नर्त्तक वंश-खण्ड को उन्नत करते हैं, उसी प्रकार स्तुति करनेवाले ब्राह्मण तुम्हें ऊँचा उठाते हैं।

---

[1] नि० ५.५। [2] नि० ५.४। [3] शप् तिपावनुदात्तौ इत्यत्र "शप् अन्ति" अनुदात्तौइतिपाठः । अयंमेवयुक्तः अर्चन्तीतिबहुवचनेतिप्त्वाभावात् ।

द्वितीयामृचमाह—

यत्सानोःसानुमारुहद्भूर्यस्पष्टकर्त्वम् । तदिन्द्रोऽअर्थंचेततियूथेनं वृष्णिरेजति ॥ २ ॥

यत् । सानोः । सानुम् । आ । अरुहत् । भूरि । अस्पष्ट । कर्त्वम् ।
तत् । इन्द्रः । अर्थम् । चेतति । यूथेन । वृष्णिः । एजति ॥ २ ॥

यद्यदासानोःसानुमारुहत् यजमानः सोमवल्लीसमिदाद्याहरणायएकस्मात्पर्वतभागादपरंपर्वतभागमारूढवान् तथाभूरिप्रभूतं कर्त्वंकर्मसोमयागरूपं अस्पष्ट स्पृष्टवानुपक्रान्तवानित्यर्थः तत्तदानीमिन्द्रः अर्थंयजमानस्यप्रयोजनंचेततिजानाति ज्ञात्वाचवृष्णिः कामानांवर्षितासन्यूथेनमरुद्गणेनसहएजति कंपतेस्वस्थानात् यज्ञभूमिमागन्तुमुद्युक्तइत्यर्थः॥ सानोः षणुदाने सनोतिददाति निवसतामवकाशमितिसानुः दृसनिजनिचरिचटिरहिभ्योञुण् णित्त्वादुपधावृद्धिः ञित्त्वादाद्युदात्तत्वंच । अरुहत् रुहेर्लुङिति पिशापिसंज्ञापूर्वकोविधिरनित्यइति लघूपधगुणोनभवति लुङ्लङ्लृङ्क्ष्वडुदात्तः सतिशिष्टत्वात्सएवशिष्यते निपातैर्यद्यदिहन्तेतिनिषेधान्निघातोनभवति । भूरि अदिशदिभूशुभिभ्यःक्रिन् कित्त्वाद्गुणाभावः नित्त्वादाद्युदात्तः । अस्पष्ट स्पशबाधनस्पर्शनयोः स्वरितञितआत्मनेपदं लङःप्रथमपुरुषैकवचनम् बहुलंछन्दसीतिशपोलुक् व्रश्चादिषत्वंष्टुत्वं लुङ्लङ्लृङ्क्ष्वडुदात्तइत्यडागमउदात्तः सएवशिष्यते अनुषङ्गेणयच्छब्दयोगान्निघाताभावः । कर्त्वं डुकृञ्करणे अन्येभ्योऽपिदृश्यन्तइतिविच् गुणोरपरत्वम् विचःसर्वापहारीलोपः करोभावःकर्त्वम् । अर्थं अर्तेः उषिकुषिगार्तिभ्यस्थन् नित्त्वादाद्युदात्तः । यूथेन तिथपृष्ठगूथयूथप्रोथाइतिथक्प्रत्ययान्तोनिपातितः । वृष्णिःनिरित्यनुवृत्तौ सृवृषिभ्यां किदितिनिप्रत्ययान्तः कित्त्वाद्गुणाभावः प्रत्ययस्वरेणान्तोदात्तः । एजति एजृकंपने तिङ्ङतिङइतिनिघातः ॥ २ ॥

२. जब सोमलता के लिए एक पर्वत-मार्ग से दूसरे पर्वत-प्रदेश को यजमान जाता और अनेक कर्म सिर पर उठाता है, तब इन्द्र यजमान का मनोरथ जानते और इच्छित-वर्षण के लिए उत्सुक होकर मरुद्-बल के साथ यज्ञ-स्थल में आने को प्रस्तुत होते हैं।

युक्ष्वाहिकेशिनाहरीवृषणाकक्ष्यप्रा । अथानइन्द्रसोमपा गिरामुपश्रुतिंचर ॥ ३ ॥

युक्ष्व । हि । केशिना । हरीइति । वृषणा । कक्ष्यऽप्रा । अथ ।
नः । इन्द्र । सोमऽपाः । गिराम् । उपऽश्रुतिम् । चर ॥ ३ ॥

हेसोमपाः सोमपानयुक्तेन्द्रहरीत्वदीयावश्वौ युक्ष्वाहिसर्वथासंयोजय अथानन्तरंनोऽस्म दीयानांगिरांस्तुतीनांउपश्रुतिंसमीपेश्रवणमुद्दिश्यचर तत्प्रदेशंगच्छ कीदृशौहरी केशिनास्कन्धप्रदेशेलम्बमानकेशयुक्तौ वृषणासेचनसमर्थौ युवानौ कक्ष्यप्रा अश्वस्योदरबन्धनरज्जुः कक्ष्या तस्याः पूरकौ पुष्टाङ्गावित्यर्थः ॥ युक्ष्व श्नमोल्लोपश्छान्दसः सतिशिष्टत्वेनप्रत्ययस्वरःशिष्यते द्व्यचोतस्तिङइतिसंहितायांदीर्घत्वम् । केशिना प्रशस्ताःकेशाःअनयोःसन्तीतिमत्वर्थीयइनिः प्रत्ययस्वरः सुपांसुलुगित्यादिनाद्विवचनस्याकारादेशः । वृषणा वृषुवृषुमृषुसेचने कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवइतिकनिन् ञ्नित्यादिर्नित्यमित्याद्युदात्तः वाषपूर्वस्यनिगमेइत्युपधायाः पक्षेदीर्घाभावः पूर्ववदाकारः । कक्ष्यप्रा कक्षयोर्भवंकक्ष्यंसूत्रं तत्प्रातः पूरयतःपुष्टत्वादितिकक्ष्यप्रौ प्रापूरणे आतोनुपसर्गेकइतिकःप्रत्ययः कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तत्वं आकारःपूर्ववत् । अथ निपातस्येतिसंहितायांदीर्घः । नः अनुदात्तंसर्वमपादादावित्यनुवृत्तौबहुवचनस्यवस्नसावितिनसादेशोऽनुदात्तः । इन्द्रसोमपाइत्युभौआमन्त्रितस्यचेतिसर्वानुदात्तौ । गिरां सावेकाचस्तृतीयादिर्विभक्तिरितिविभक्तिरुदात्ता । उपशब्दोनिपातत्वादाद्युदात्तः श्रुतिशब्देनप्रादिसमासेकृदुत्तरपदप्रकृतिस्वरत्वेप्राप्ते तादौचनितिकृत्यतावितितुवर्जिततादिपरत्वाद्गतेःप्रकृतिस्वरः । चर निघातः ॥ ३ ॥

३. अपने केशर-संयुक्त, पराक्रमी और पुष्टांग दोनों घोड़ों को रथ में जोड़ो। इसके बाद हमारी स्तुति सुनने के लिए आओ।

विशेषविनियोगस्तुयत्रश्रौतोनसूत्रितः स्मार्तंतत्रविजानीयादृग्विधानादिसूत्रतः ॥एहिस्तोमानित्यृगेषासूत्रेविशेषाकारेणनविनियुक्ता साधारणविनियोगस्तु ब्रह्मयज्ञादौसर्वत्रानुसंधेयः ।

तामेतांसूक्तगतांचतुर्थीमृचमाह—

एहिस्तोमाँअभिस्वराभिगृणीह्यारुव । ब्रह्मचनोवसोसचेन्द्रयज्ञंचवर्धय ॥ ४

आ । इहि । स्तोमान् । अभि । स्वर । अभि । गृणीहि । आ । रुव ।
ब्रह्म । च । नः । वसोइति । सचा । इन्द्र । यज्ञम् । च । वर्धय ॥ ४ ॥

हेवसोनिवासकारणभूतेन्द्र एहिअस्मिन्कर्मण्यागच्छ आगत्यचस्तोमानुद्गातृप्रयुक्तानि स्तोत्राणि अभिस्वरअभिलक्ष्यप्रशंसारूपंशब्दंकुरु तथाध्वर्यवमभिलक्ष्यगृणीहिशब्दंकुरु तथाहोतृप्रयुक्तानिशस्त्राण्यालक्ष्य रुव शब्दंकुरु परितोषेणसर्वानृत्विजः प्रशंसेत्यर्थः ततऊर्ध्वंनोऽस्माकं ब्रह्मचान्नंचयज्ञंचानुष्ठीयमानंकर्मच सचासहवर्धयसांगत्वसंपादनेनयज्ञंवर्धयित्वातत्फलमन्नंचप्रवृद्धंकुरु अन्धइत्यादिष्वष्टाविंशत्यन्ननामसुब्रह्मवर्चइतिपठितम् ॥ इहि इण्गतौ सेर्हिः हेरपित्त्वेनङित्त्वाद्गुणाभावः निघातः आङ्सहगुणेएकादेशउदात्तेनोदात्तइत्युदात्तः ।

स्तोमान् अर्तिस्तुस्वित्यादिनामन् नित्त्वादाद्युदात्तः उत्तरपदेनसंहितायांनकारस्यदीर्घादटिसमानपादेइतिरुत्वं आतोटिनित्यमित्याकारस्यानुनासिकः भोभगोअघोअपूर्वस्ययोशीतियत्वम् तस्यलोपःशाकल्यस्येतिलोपः तस्यासिद्धत्वात्स्वरसन्धिर्नभवति । अभि एवमादीनामन्तइत्यन्तोदात्तः । स्वर स्वृशब्दोपतापयोः निघातः । अभि गतम् । गृणीहि गृशब्दे सेर्ह्यपिच्चेतिहिः क्र्यादिभ्यःश्ना ईहल्यघोरितीत्वम् प्वादीनांह्रस्वइति ऋकारस्यऋकारः ऋवर्णाच्चेतिवक्तव्यमितिणत्वम् तिङ्ङतिङइतिनिघातः । रुव रुशब्दे सेर्ह्यपिच्च शपिप्राप्ते व्यत्ययेनशः तस्य ङित्त्वेनगुणाभावादुवङादेशः अतोहेरितिहेर्लुक् तिङ्ङतिङइतिनिघातः ।ब्रह्म वृहिवृहिवृद्धौ मनिन्नित्यनुवृत्तौ बृंहेरम्नलोपश्चेतिमनिन् तत्सन्नियोगेननलोपः अमागमश्च मिदचोन्त्यात्परइतिऋकारात्परः यणादेशः मनिनोनित्त्वादाद्युदात्तत्वम् । वसो आमन्त्रितनिघातः । यज्ञं यजयाचेत्यादिनानङ् प्रत्ययस्वरः । वर्धय निघातः अत्रचकारद्वयश्रवणादियमेवतिङ्विभक्तिः पूर्ववाक्येष्वनुषज्यते अतःअनुषक्तैवमप्रथमानश्रुतेत्यश्रुतायाश्चवायोगेप्रथमेतिनिघातनिषेधोनभवति ॥४॥

४. हे जनाश्रय इन्द्र ! आओ । हमारी स्तुति की प्रशंसा करो; समर्थन करो और शब्दों से आनन्द प्रकाश करो। इसके सिवा हमारा अन्न और यज्ञ एक साथ ही बढ़ाओ ।

अभिप्लवषडहगतोक्थ्येषुअच्छावाकस्यतृतीयसवनेउक्थमिन्द्रायशंस्यमित्यनुरूपस्तृचः एह्यूष्विविति खण्डे—इन्द्रंविश्वाअवीवृधन्नुक्थमिन्द्रायशंस्यमितिसूत्रितम् ।

तस्मिंस्तृचेप्रथमांसूक्तेपञ्चमीमृचमाह—

उक्थमिन्द्रायशंस्यंवर्धनंपुरुनिष्षिधे । शक्रोयथासुतेषुणो रारणत्सख्येषुच ॥ ५ ॥

उक्थम् । इन्द्राय । शंस्यम् । वर्धनम् । पुरुनिःऽसिधे । शक्रः । यथा । सुतेषु । नः । ररणत् । सख्येषु । च ॥ ५ ॥

इन्द्रायेन्द्रार्थंवर्धनंवृद्धिसाधनमुक्थंशस्त्रंशंस्यमस्माभिःशंसनीयं कीदृशायेन्द्राय पुरुनिष्षिधेबहूनांशत्रूणांनिषेधकारिणे शक्रः शक्तइन्द्रोनोऽस्मदीयेषुसुतेषुपुत्रेषुसख्येषुचसखित्वेष्वपि यथायेनप्रकारेणरारणत् अतिशयेनशब्दंकुर्यात् तथाशंस्यमितिपूर्वत्रान्वयः अस्मदीयेनशस्त्रेण परितुष्टइन्द्रोऽस्माकंपुत्रानस्मत्सख्यानिचबहुधाप्रशंसत्वित्यर्थः ॥ उक्थं वचेस्थक्प्रत्ययउक्तः प्रत्ययस्वरः । शंस्यं शंसुस्तुतौ ण्यन्तादचोयत् णेरनिटीतिणिलोपः तित्स्वरितेप्राप्ते यतोनावइत्याद्युदात्तत्वम् । वर्धनं करणाधिकरणयोश्चेतिकरणेल्युट् लितीतिप्रत्ययात्पूर्वपदस्योदात्तत्वम् । पुरुनिष्षिधे बहूनांशत्रूणांनिषेधकाय षिधगत्यां धात्वादेःषःसः निरित्युपसर्गस्यनिशब्दसमानार्थस्यप्राक्प्रयोगः क्विप्चेतिक्विप् क्विपःसर्वापहारीलोपः कुगतिप्रादयइतिसमासः निसः

सकारेणइणोव्यवधानंछान्दसत्वादनादृत्यउपसर्गात्सुनोतीत्यादिनाधातुसकारस्यषत्वम् निसः सकारस्यष्टुनाष्टुरितिषत्वम् पुरुशब्देनकर्मणिषष्ठ्यन्त्येनसमासः षिधोधातुस्वरेणोदात्तत्वम् निष्षिधइतिमादिसमासेकृदुत्तरपदप्रकृतिस्वरत्वम् कृद्ग्रहणेगतिकारकपूर्वस्यापिग्रहणात्पुनःकारकसमासेऽपिसएवस्वरः । शक्नोतीतिशक्रः स्फायितञ्चिवञ्चिशकीत्यादिनारक् प्रत्ययस्वरः । यथा प्रकारवचनेथाल् लित्स्वरेणप्रत्ययात्पूर्वोकारउदात्तः । सुतेषु क्तः प्रत्ययस्वरेणोदात्तः । नः नसोनकारस्यनश्चधातुस्थोरुषुभ्यइतिसंहितायांणत्वम् । रारणत् रणशब्दार्थः धातोरेकाचइति यङ् यङोऽचिचेतिलुक् प्रत्ययलक्षणेनद्विर्भावोहलादिशेषः दीर्घोकितइतिदीर्घः प्रत्ययलक्षणेनसनाद्यन्ताधातवइतिधातुसंज्ञायांलिङर्थेलेडितिहेतुहेतुमद्भावलक्षणेलिङर्थेलेट् अत्रहीन्द्रकर्तृकंरारणनमुक्थशंसनस्यकर्त्तव्यत्वेहेतुः लेटस्तिप् इतश्चलोपःपरस्मैपदेष्वितीकारलोपः लेटोडाटावित्यडागमः कर्त्तरिशप् वस्यचर्करीतंपरस्मैपदमदादिवच्चद्रष्टव्यमित्यदादिवद्भावादद्मिप्रभृतिभ्यःशपइतिमाप्तोलुग्बहुलंछन्दसीतिनिषिध्यते शपोनुदात्तत्वाद्धातोरन्तोदात्तएवशिष्यते शपोलसार्वधातुकस्यव्यवधानात्तत्रपरत्वोविधीयमानमभ्यस्तानामादिरित्याद्युदात्तत्वंनभवति नचतिङ्ङतिङइतिनिघातः अत्रयथाशब्दयोगेन यावद्यथाभ्यामितिनिषेधात् चवायोगेप्रथमेतिवानिघातोनभविष्यति अत्रह्युत्तरवाक्येषुसख्येषुचेतिचानुकृष्टविभक्त्यपेक्षयेयंप्रथमातिङ्विभक्तिः । सख्येषु सख्युःकर्माणिसख्यानितेषु कर्मणिचेत्यनुवृत्तौ सख्युर्यइतिसखिशब्दाद्यप्रत्ययः तत्रभसंज्ञायां यस्येतिचेतीकारलोपः प्रत्ययस्वरः ॥ ५ ॥

५. अनन्त-शत्रु-निवारक इन्द्र के उद्देश्य से ऋग्वेद के गीत परिवर्द्धमान हैं, जिनसे शक्तिशाली इन्द्र हम लोगों के पुत्रों और बन्धुओं के बीच महानाद करें।

षष्ठीमृचमाह—

तमित्सखित्वईमहेतंरायेतंसुवीर्यें । सशक्रउतनःशकदिन्द्रो वसुदयमानः ॥ ६ ॥ १९ ॥

तम् । इत् । सखिऽत्वे । ईमहे । तम् । राये । तम् । सुऽवीर्यें । सः । शक्रः । उत । नः । शकत् । इन्द्रः । वसु । दयमानः ॥ ६ ॥ १९ ॥

सखित्वेनिमित्तभूतेसति तमित् तमेवेन्द्रमीमहे यामुमः तथारायेधनार्थं तमीमहे तथा सुवीर्येशोभनसामर्थ्यनिमित्तंतमीमहे उतअपिच शक्रः शक्तिमान्सइन्द्रोनोऽस्मभ्यंवसुधनं दयमानः प्रयच्छन् शकत् अस्मदीयरक्षणेशक्तोऽभूत् सप्तदशयाञ्चाकर्मस्वीमहेयामीतिपठितम् तदनुसारेणेन्द्रंयाचामहइतिव्याख्येयम् ॥ सख्युर्भावःसखित्वं तस्यभावस्त्वतलावितित्वः

१ अत्रपदकालेह्लश्छान्दसः ।

प्रत्ययस्वरेणोदात्तः । ईमहे ईङ्गतौ ङित्वादात्मनेपदं दिवादिभ्यःश्यन् बहुलंछन्दसीतिश्यनोलुक् तिङ्ङतिङइतिनिघातः । राये ऊडिदमितिविभक्तेरुदात्तत्वम् । सुवीर्ये शोभनंवीर्यंयस्यासौसुवीर्यः भवितृवाचिनानेनभावोलक्ष्यते सुवीर्यत्वेइत्यर्थः बहुव्रीहावित्यनुवृत्तौ वीरवीर्यौचेत्युत्तरपदाद्युदात्तत्वम् । शक्नोतीतिशक्रः स्फायितञ्चिवञ्चिशकीत्यादिनारक् प्रत्ययस्वरः । शकव शकॢशक्तौ धातुसंबन्धाधिकारे छन्दसिलुङ्लङ्लिटइतिलुङ् यतःशक्नोति अतस्तमीमहइविधावुसंबन्धः लुङस्तिप् पुषादिद्युताद्यॢदितःपरस्मैपदेष्वितिच्लेरङादेशः बहुलंछन्दसीत्यडागमाभावः तिङ्ङतिङइतिनिघातः । वसु निदित्यनुवृत्तौ वसेरुप्रत्ययः नित्त्वादाद्युदात्तत्वम् । दयमानः दयदानगतिरक्षणहिंसादानेषु अनुदात्तेत्वादात्मनेपदम् लटःशानजादेशः शपः पित्त्वादनुदात्तत्वम् शानचश्चितइत्यन्तोदात्तत्वंबाधित्वा अदुपदेशाच्छपउत्तरत्वेनपरत्वाल्लसार्वधातुकत्वानुदात्तत्वम् धातुस्वरएवशिष्यते ॥ ६ ॥

६. हम लोग मैत्री, धन और शक्ति के लिए इन्द्र के पास जाते हैं और शक्तिशाली इन्द्र हमें धन देकर हमारी रक्षा करते हैं।

॥ इतिप्रथमस्यप्रथमेएकोनविंशोवर्गः ॥ १९ ॥

गायन्तीतिसूक्तेसप्तमीमृचमाह–

सुविवृतंसुनिरजमिन्द्रत्वादातमिद्यशः । गवामपव्रजंवृधि कृणुष्वराधोअद्रिवः ॥ ७ ॥

सुऽविवृतम् । सुनिःऽअजम् । इन्द्र । त्वाऽदातम् । इत् । यशः । गवाम् । अप । व्रजम् । वृधि । कृणुष्व । राधः । अद्रिऽवः ॥ ७ ॥

हेइन्द्र यशोन्नंकर्मफलभूतं सुविवृतं सुष्ठुसर्वत्रप्रसृतं सुनिरजंसुखेननिःशेषंप्राप्तुंशक्यं त्वादातमिव त्वयाशोधितंचसंपन्नमितिशेषः इतःपरंक्षीरादिरसलाभार्थंगवांव्रजं निवासस्थानं अपवृधि अपवृतमुद्घाटितद्वारंकुरु हेअद्रिवः पर्वतोपलक्षितवज्रयुक्तेन्द्र राधोधनंकृणुष्व संपादय ॥ सुविवृतं वृञ्वरणे कर्मणिक्तप्रत्ययः विशब्देनप्रादिसमासः विवृतमित्यत्र कृदुत्तरपदप्रकृतिस्वरंबाधित्वाकर्मवाचिनिक्तान्तेपरतोगतिरनन्तरइतिपूर्वपदप्रकृतिस्वरेप्राप्ते परादिश्छन्दसिबहुलमितिककारउदात्तः पुनः सुशब्देनसमासेकृदुत्तरपदप्रकृतिस्वरेणसएवककारउदात्तः । ननुवृतमित्येवकृदन्तंनतुविवृतमिति प्रत्ययग्रहणेयस्मात्सविहितस्तदादेस्तदन्तस्यग्रहणमितिवचनात् सुविवृतमित्यत्रच समासेवृतमित्येतावन्मात्रंनोत्तरपदं किंतु विवृतमिति कथंकृदुत्तरपदप्रकृतिस्वरत्वमितिचेत् उच्यते–प्रत्ययग्रहणपरिभाषापवादेनकृद्ग्रहणेगतिकारकपूर्वस्यापि-

ग्रहणमित्यनेनविवृतमित्यस्यापिकृदन्तव्यपदेशोपपत्तेः ननुविवृतमित्यस्य यथाकृदन्तव्यपदेशः एवंक्तान्तव्यपदेशोप्यस्तितयैवपरिभाषया तथाच ,कर्मणिक्तान्तेउत्तरपदेपरतोगतिरनन्तरइति सुशब्दस्यप्रकृतिस्वरःप्राप्नोति नचात्रापिपरादिश्छन्दसिबहुलमित्येवंनास्तिविस्तरः तथाहिसति सुविवृतमित्यत्रविवृतमित्येवोत्तरपदमितितदादिरिकारएवोदात्तःस्यात् विवृतमितिसमासेयद्यपिऋकारःपदादिर्भवति तथापिसुविवृतमितिसमासस्यसतिशिष्टत्वेनबलीयस्त्वात्तत्त्येएवोत्तरपदादौइकारेएवोदात्तस्वरेणभवितव्यमिति उच्यते—गतिरनन्तरइत्यत्रक्तानुवृत्तेःक्तग्रहणेकृद्ग्रहणपरिभाषानाश्रीयते तदाश्रयणेव्यवहितगतावपि प्रकृतिस्वरेसत्यनन्तरग्रहणमनर्थकंस्यात् अनेनैवचाभिप्रायेणानन्तरग्रहणस्यप्रयोजनमभ्युद्धृतमित्यत्रव्यवहितस्याभिशब्दस्य माभूदितिमत्युदाहृतम् तस्मात्सुविवृतमितिऋकारएवोदात्तःइतिस्थितम् । सुनिरजं अनायासेन निरवशेषमाप्यम् अजगतिक्षेपणयोः सुनिसोरुपसर्गयोःप्राक्प्रयोगः ईषद्दुःसुषुकृच्छ्राकृच्छ्रार्थेषुखल् नचात्रसुशब्दस्यनिसाव्यवधानंशंकनीयम् सुशब्दस्यह्युपपदमात्रंखलोनिमित्तंनानन्तर्यं अतएवहिसुपरिहरं दुष्परिहरमित्यादयःप्रयोगाइति पूर्ववद्गतिसमासेलितिमत्ययात्पूर्वमुदात्तमितिधात्वकारउदात्तः निसासमासेकृदुत्तरपदप्रकृतिस्वरेणसएवशिष्यते पुनःसुशब्देनसमासे कृद्ग्रहणेगतिकारकपूर्वस्यापिग्रहणमितिपरिभाषयाकृदुत्तरपदप्रकृतिस्वरेणसएवशिष्यते। त्वादातं त्वयाशोधनेनविशदीकृतं दैप्शोधने आदेचउपदेशेशितीत्यात्वं सत्यपिहिपकारेनानुबन्धकृतमनेजन्तत्वमित्येजन्तएवायं निष्ठेतिकर्मणिक्तः दाधाघ्वदाबित्यत्रादावितिप्रतिषेधेनघुसंज्ञाया- अभावाद्दोदद्घोरितिदादेशोनभवति ननु दाप्लवनेइतिप्रतिपदोक्तस्यैवदापस्तत्रादाविति निषेधः नपुनर्लाक्षणिकस्यदैपः लक्षणप्रतिपदोक्तयोःप्रतिपदोक्तस्यैवग्रहणंनतुलाक्षणिकस्येतिनियमादितिचेत् न गामादाग्रहणेष्वविशेषइतिप्रतिप्रसवात् युष्मच्छब्दात्तृतीयैकवचनस्यसुपांसुलुगितिडादेशः त्वमावेकवचनेइतिमपर्यन्तस्यत्वादेशः अतोगुणेइतिपररूपत्वं भसंज्ञायांटेरित्यद्शब्दस्यलोपे उदात्तनिवृत्तिस्वरेणआकारउदात्तः कर्तृकरणेकृताबहुलमितितृतीयायाःसमासः तत्पुरुषेकृतिबहुलमितितृतीयायाअप्यलुक् कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरत्वम् । यशः अशूव्याप्तौ अशेर्युट्चेत्यसुन् तत्सन्नियोगेनधातोर्युडागमः नित्त्वादाद्युदात्तत्वम् । गवां प्रातिपदिकस्वरः सावेकाचइतिविभक्तेरुदात्तत्वंप्राप्तं नगोश्वन्त्साववर्णेतिनिषिध्यते । वृधि वृञ्वरणे श्रुशृणुपृकृवृभ्यश्छन्दसीति हेर्धिरादेशः बहुलंछन्दसीतिश्नोरपिलुक् निघातः। कृणुष्व कृविहिंसाकरणयोश्च इदितोनुम् व्यत्ययेनात्मनेपदं लोटस्थास् थासस्से सवाभ्यांवामौ कर्तरिशपिप्राप्ते धिन्विकृण्व्योरचेतिउप्रत्ययः तत्सन्नियोगेनवकारस्यचअकारः तस्यअतोलोपइतिलोपः अचःपरस्मिन्पूर्वविधा-

वित्यकारलोपस्यस्थानिवद्भावाल्लघूपधगुणोनभवति अत्रसतिशिष्टस्वरबलीयस्त्वमन्यत्रविकरणेभ्यइतिसतिशिष्टमपिविकरणस्वरंबाधित्वातिङएवमत्ययाद्युदात्तत्वम् । राधः असुन्नन्तोनित्वादाद्युदात्तः । अद्रिर्वज्रंतदस्यास्तीतिमतुप् छन्दसीरइतिवत्वम् संबुद्धौ उगिदचामितिनुम् हल्ङ्याब्भ्यादिसंयोगान्तलोपौ मतुवसोरुसंबुद्धौछन्दसिइतिरुत्वं विसर्जनीयः आमन्त्रितस्यच निघातः ॥ ७ ॥

७. इन्द्र! तुम्हारा दिया हुआ धन सर्वत्र फैला हुआ और सुखप्राप्य है। हे वज्रधारक इन्द्र! गौ का वसति-द्वार उद्घाटन करो और धन सम्पादन करो।

अष्टमीमृचमाह—

नहित्वारोदसीउभेऋघायमाणमिन्वतः । जेषःस्वर्वतीरपः संगाअस्मभ्यंधूनुहि ॥ ८ ॥

नहि । त्वा । रोदसी इति । उभे इति । ऋघायमाणम् । इन्वतः । जेषः । स्वःऽवतीः । अपः । सम् । गाः । अस्मभ्यम् । धूनुहि ॥ ८ ॥

हेइन्द्र ऋघायमाणंशत्रुवधंकुर्वाणं त्वात्वां रोदसीद्यावापृथिव्यावपि त्वदीयंमहिमानंनहिइन्वतः व्याप्तुंनसमर्थेइत्यर्थः तादृशस्त्वंस्वर्वतीः स्वर्लोकयुक्ताअपोवृष्टिरूपाः जेषः जयेः प्रेरयेत्यर्थः अपांस्वर्गसंबन्धश्चान्यत्रादिवोवृष्टिंच्यावयतीतिश्रुतं किञ्च वृष्टिप्रदानादन्नसंपत्तेरूर्ध्वंअस्मभ्यंक्षीरादिरसप्रदागाः संधूनुहि सम्यक्प्रेरय ॥ नहि नञोहिशब्देनसह सुप्सुपेतिसमासः समासत्वादन्तोदात्तत्वम् । त्वा अनुदात्तंसर्वमित्यनुवृत्तौ त्वामौद्वितीयायाइतित्वादेशः । रोदसी रुदेरसुन् नित्वादाद्युदात्तः उगितश्चेतिङीप् । उभे प्रातिपदिकस्वरेणान्तोदात्तः शपासहैकादेशउदात्तः । ऋघायमाणं नॄन्हन्तीतिःऋघा अन्येभ्योऽपिदृश्यन्तइतिविच् दृशिग्रहणस्यविध्यन्तरोपसंग्रहणार्थत्वान्नकारलोपोहकारस्यचघकारः अनृघाऋघाभवतीत्यभूततद्भावेलोहितादिडाज्भ्यःक्यषितिक्यष्प्रत्ययोभवति सहाकृतिगणः लोपश्चहलइत्यनुवृत्तेर्नकारलोपश्च वाक्यषइत्यात्मनेपदं लटःशानच् शपःअदुपदेशात्पराच्छानचोलसार्वधातुकानुदात्तत्वम् शपः पित्वादनुदात्तत्वम् क्यषःप्रत्ययस्वरः एकादेशस्योदात्तत्वम् । इन्वतः इविव्याप्तौ इदितोनुम्धातोरितिनुम् शपःपित्वादनुदात्तत्वम् लडादेशस्यतसश्चलसार्वधातुकस्वरेणधातुस्वरएवशिष्यते हिचेतिनिषेधात् तिङ्ङतिङइतिनिघातोनभवति ।जेषः जयेः प्रार्थनायांलिङर्थेलेट् तस्यमध्यमपुरुषैकवचनंसिप् इतश्चलोपःपरस्मैपदेष्वितीकारलोपः कर्तरिशपिप्राप्ते तदपवादः सिब्बहुलंलेटीतिसिप् अडागमस्यानुदात्तत्वात् धातुस्वरएवशिष्यते । स्वरआसामस्तीतिस्व-

र्वत्यः न्यङ्स्वरौस्वरिताविति स्वरशब्दः स्वरितः मतुमङीपौपित्त्वादनुदात्तौ संहितायां स्वरितात्संहितायामनुदात्तानामित्येकश्रुतिः स्वरितएवशिष्यते । अपः ऊडिदमित्यादिनाविभक्तेरुदात्तत्वम् । धूञ्कंपने लोट् सेर्ह्यपिच्च स्वादिभ्यःश्नुः उतश्चप्रत्ययादसंयोगपूर्वादितिप्राप्तस्यलुकः छान्दसत्वादभावः ॥ ८ ॥

८. इन्द्रदेव ! शत्रु-वध के समय में स्वर्ग और मर्त्य दोनों ही तुम्हारी महिमा को धारण नहीं कर सकते। स्वर्गीय जल-वृष्टि करो और हमें गौ दो।

अभिप्लवषडहस्योक्थ्येषुतृतीयसवनेच्छावाकस्यषट्स्तोत्रियानुरूपयुगलेषु द्वितीयस्मिन्युगलेआश्रुत्कर्णेतितृचोनुरूपः एह्यूष्विति खण्डे-श्रुधीहवंतिरश्च्याआश्रुत्कर्णश्रुधीहवमितिसूत्रितम्।

आश्रु॑त्कर्ण॒श्रु॒धीहव॒ंनूचि॑द्दधिष्वमे॒गिरः॑ । इन्द्र॒स्तोम॑मि॒मंम मंकृ॒ष्वायु॒जश्चि॒दन्त॑रम् ॥ ९ ॥

आश्रु॑त्ऽकर्ण । श्रु॒धि । हव॑म् । नु । चि॒त् । द॒धि॒ष्व॒ । मे॒ । गिरः॑ । इन्द्र॑ । स्तोम॑म् । इ॒मम् । मम॑ । कृ॒ष्व । यु॒जः । चि॒त् । अन्त॑रम् ॥ ९ ॥

हेआश्रुत्कर्ण सर्वतःश्रोतारौकर्णौयस्यतादृगिन्द्रहवमस्मदीयमाह्वानंनुक्षिप्रं श्रुधिशृणु मे ममह्वोतुर्गिरश्चित्स्तुतीरपिदधिष्वचित्तेधारय किञ्चममदीयमिमंस्तोमंस्तोत्ररूपंवाक्समूहंयुजश्चिव स्वकीयसख्युरपिअन्तरंकृष्वआसन्नंकुरु यथावचनंतस्यत्वंमियंमन्यसेतद्वदस्मदीयस्तुतिष्वपि प्रीतिंकुर्वित्यर्थः ॥ आश्रुत्कर्ण आसमन्ताच्छृणुतइत्याश्रुत् क्विप् ह्रस्वस्यतुक् तादृशौकर्णौयस्य आमन्त्रितस्यचेत्याद्युदात्तत्वम् । श्रुधि श्रुश्रवणे लोटोहिः श्रुवःशृचेतिविहितश्नोर्बहुलंछन्दसीतिलुक् तत्सन्नियोगशिष्टत्वादृश्भावोपिनिवर्तते श्रुश्रृणुपृकृवृभ्यश्छन्दसीतिहेर्धिरादेशः सतिशिष्टत्वात्प्रत्ययस्वरः आमन्त्रितंपूर्वमविद्यमानवदित्यविद्यमानवत्त्वेनपदादपरत्वात्तिङ्ङतिङ इतिनिघातोनभवति संहितायामन्येषामपिदृश्यतइतिदीर्घः । हवं ह्वेञ्स्पर्धायांशब्देच बहुलंछन्दसीत्यनैमित्तिकेसंप्रसारणेकृतेपश्चादुकारान्तत्वेनऋदोरबित्यप्प्रत्ययः अपःपित्त्वाद्धातुस्वरः । नु संहितायां ऋचितुनुघमक्षुतङ्कुत्रोरुष्याणामितिदीर्घः । चित् चादिरनुदात्तः । दधिष्व दधातेर्लोट् थासस्से सवाभ्यांवामौ शपःश्लुः अभ्यासस्यहस्वत्वम् यदि छन्दस्युभयथेत्यार्धधातुकस्यापिस्वीकारादिडागमः आकारलोपः निघातः । मम तवममौङसीत्यनेनमपर्यन्तस्यममादेशः प्रातिपदिकस्वरेणान्तोदात्तत्वेप्राप्ते युष्मदस्मदोर्ङसीत्याद्युदात्तत्वम् । कृष्व डुकृञ्करणे लोट् थासःसे सवाभ्यांवामौ शपोबहुलंछन्दसीतिलुक् सतिशिष्टत्वात्प्रत्ययस्वरः पादादित्वान्ननिघातः । युजः सावेकाचइतिविभक्तेरुदात्तत्वम् अन्तरं वृषादित्वादाद्युदात्तः ॥ ९ ॥

९. इन्द्र ! तुम्हारे कान चारों तरफ़ सुन सकते हैं; इसलिए हमारा आह्वान शीघ्र सुनो। हमारी स्तुति धारण करो। हमारा यह स्तोत्र और हमारे मित्र का स्तोत्र अपने पास रक्खो।

दशमीमृचमाह—

विद्मा हि त्वा वृषन्तमं वाजेषु हवनश्रुतम्। वृषन्तमस्य हूमह ऊतिं सहस्रसातमाम् ॥ १० ॥

विद्म। हि। त्वा। वृषन्ऽतमम्। वाजेषु। हवनऽश्रुतम्। वृषन्ऽतमस्य। हूमहे। ऊतिम्। सहस्रऽसातमाम् ॥ १० ॥

हेइन्द्र त्वा त्वां विद्मजानीमः हिःपूरणः कीदृशंत्वांवृषन्तमं कामानामतिशयेनवर्षितारं वाजेषुसंग्रामेषु हवनश्रुतं अस्मदीयस्याह्वानस्यश्रोतारं वृषन्तमस्यअतिशयेनकामादीनांवर्षितुस्तवऊतिंरक्षामस्मद्विषयामुद्दिश्यहूमहे त्वामाह्वयामः कीदृशीमूर्तिं सहस्रसातमां अतिशयेनधनसहस्राणांदात्रीम्॥ विद्म विदोलटोवेतिमसोमादेशः प्रत्ययस्वरेणान्तोदात्तः द्व्यचोतस्तिङइतिसंहितायांदीर्घः। वृषन्तमं वृषुवृषुमृषुसेचने कनिन्युवृषितक्षिराजिधन्विद्युमतिदिवइतिकनिन् नित्त्वादाद्युदात्तः तमपःपित्त्वात्सएवशिष्यते अयस्मयादीनिच्छन्दसीतिभत्वेनपदत्वाभावान्नलोपाभावः पदत्वाच्चटिलोपः। वाजेषु वाजशब्दोवृषादित्वादाद्युदात्तः। हवनश्रुतं ह्वइत्यनुवृत्तौ बहुलंछन्दसीतिल्युटिसंप्रसारणं हवनंशृणोतीति क्विप् तुगागमः। वृषन्तमस्यउक्तम्। हूमहे बहुलं छन्दसीतिसंप्रसारणं शपइत्यनुवृत्तौबहुलंछन्दसीतिशपोलुक्। ऊतिं ऊतियूतिजूतीत्यादिनान्तोदात्तोनिपातितः। सहस्रंसनोतीतिसहस्रसाः षणुदाने जनसनखनक्रमगमोविट् विड्वनोरनुनासिकस्यादित्याकारादेशःकृदुत्तरपदप्रकृतिस्वरत्वं तमपःपित्त्वात्तदेवशिष्यते ॥ १० ॥

१०. इन्द्र! हम तुम्हें जानते हैं। तुम यथेप्सित वर्षा करते हो। लड़ाई के मैदान में तुम हमारी पुकार सुनते हो। इष्ट-साधक तुमको अशेष-सुख-साधक रक्षण के लिए हम बुलाते हैं।

एकादशीमृचमाह—

आ तू न इन्द्र कौशिक मन्दसानः सुतं पिब। नव्यमायुः प्र सू तिर कृधी सहस्रसामृषिम् ॥ ११ ॥

आ। तु। नः। इन्द्र। कौशिक। मन्दसानः। सुतम्। पिब। नव्यम्। आयुः। प्र। सु। तिर। कृधि। सहस्रऽसाम्। ऋषिम् ॥ ११ ॥

हेइन्द्र तु क्षिप्रंनोऽस्मान्प्रत्यागच्छेतिशेषः हेकौशिककुशिकस्यपुत्रेन्द्र मन्दसानः हृष्टोभूत्वात्वमभिषुतंसोमंपिब यद्यपिविश्वामित्रः कुशिकस्यपुत्रः तथापितद्रूपेणेन्द्रस्यैवोत्पन्नत्वात्कुशिकपुत्रत्वमविरुद्धम् अयंवृत्तान्तोनुक्रमणिकायामुक्तःकुशिकस्त्वैषीरथिरिन्द्रतुल्यंपुत्रमिच्छन्

ब्रह्मचर्यंचचार तस्येन्द्रएवगाथीपुत्रोजज्ञइति हेइन्द्र नव्यंसर्वैःदेवैः स्तुत्यंकर्मानुष्ठानपरंआयुर्जीवितम् प्रस्तुतिरमकर्षेणसुष्ठुवर्धय ततोमांसहस्रसांसहस्रसंख्याकलाभोपेतं ऋषिंअतीन्द्रियद्रष्टारंकृधि कुरु ॥ तु संहितायां ऋचितुनुघमक्षुतङ्कुत्रोरुष्याणामितिदीर्घः । नः संहितायांउदात्तादनुदात्तस्य स्वरितइतिस्वरितत्वम् । इन्द्र आमन्त्रितनिघातः । कौशिक निघातः । मन्दसानः हृष्यन्-मदिस्तुतिमोदमदस्वमकान्तिगतिषु असानजित्यनुवृत्तौऋञ्जिवृधिमन्दिसहिभ्यःकिदित्यसानचूप्रत्ययः चित्त्वादन्तोदात्तः । सुतं प्रत्ययस्वरः। नव्यं णुस्तुतौ अचोयत गुणः वान्तोयिप्रत्यये इत्यवादेशः यतोनावइत्याद्युदात्तत्वम् । आयुः उसि निदित्यनुवृत्तौ एतेर्णिच्चेत्युसिप्रत्ययः णित्त्वाद्वृद्ध्यायादेशौ नित्त्वादाद्युदात्तत्वम् । सु निपातस्यचेतिसंहितायांदीर्घत्वम्। तिर तरतेर्व्यत्ययेनशः ऋतइद्धातोरितित्वं अतोहेरितिहेर्लुक्।कृधि कृञ्करणे बहुलंछन्दसीतिशपोलुक् श्रुशृणुपॄकृवृभ्यश्छन्दसीतिहेर्धिरादेशः। सहस्रसां उक्तम्। ऋषिं ऋषीगतौ इगित्यनुवृत्तौ-इगुपधात्किच्च किच्त्वाद्गुणाभावः नित्त्वादाद्युदात्तत्वम् ॥ ११ ॥

११. इन्द्र! शीघ्र हमारे पास आओ। हे कुशिक ऋषि के पुत्र! प्रसन्न होकर सोमरस पान करो। कार्यकारी शक्ति बढ़ाओ। इस ऋषि को सहस्र-धन-सम्पन्न करो।

प्रवर्ग्येपरित्वेत्यभिष्टुयात् स्पृष्ट्वोदकमितिखण्डे—परित्वागिर्वणोगिरोधिद्वयोरदधाउक्थं वचइतिसूत्रितम् तथाहविर्धानप्रवर्तनेसेयंपरिधानीया हविर्धानेप्रवर्तयन्तीतिखण्डे—परित्वागिर्वणइतिपरिदध्यादितिसूत्रितम् तथाब्राह्मणंच—परित्वागिर्वणोगिरइत्युत्तमयापरिदधातीति ॥

तामेतांद्वादशीमृचमाह—

परि॑त्वागिर्वणो॒गिर॑इ॒माभ॑वन्तुवि॒श्वतः॑। वृ॒द्धायु॒मनु॒वृद्ध॑यो॒जुष्टा॑भवन्तु॒जुष्ट॑यः॥ १२॥ २०॥

परि॑। त्वा॒। गि॒र्व॒णः॒। गिरः॑। इ॒माः। भ॒व॒न्तु॒। वि॒श्वतः॑।
वृ॒द्धऽआ॑युम्। अनु॑। वृद्ध॑यः। जुष्टाः॑। भ॒व॒न्तु॒। जुष्ट॑यः॥१२॥२०॥

हेगिर्वणःअस्मदीयस्तुतिभागिन्द्र विश्वतः सर्वेषुकर्मसुप्रयुज्यमानाइमागिरः अस्मदीयाः स्तुतयस्त्वात्वां परिभवन्तु सर्वतः प्राप्नुवन्तु कीदृश्योगिरः वृद्धायुमनु प्रवृद्धेणायुष्येणोपेतं त्वामनुसृत्यवृद्धयोवर्धमानाः किंचैतागिरः जुष्टास्त्वयासेविताःसत्योजुष्टयोऽस्माकंप्रीतिहेतवोभवन्तु ॥ गिर्वणः गीर्भिर्वन्यतइतिगिर्वणः वनषणसंभक्तौ सर्वधातुभ्योऽसुन् गिरउपधायादीर्घाभावश्छान्दसः आमन्त्रितनिघातः। विश्वतः लितीतिप्रत्ययात्पूर्वस्योदात्तत्वम्। वृद्धायुं वृधुवृद्धौ क्तप्रत्ययः उदितोवेतीटःक्त्वाप्रत्ययेविकल्पितत्वाद्यस्यविभाषेतिनिष्ठायामिडभावः प्रत्ययस्वरः इण्गतौ छन्दसीणइतिउण् णित्वाद्वृद्धिःआयादेशश्च वृद्धमायुर्यस्य बहुव्रीहिपूर्वपदप्र-

क्तिस्वरत्वम्। वृद्धयः वृधेःक्तिनि तितुत्रतथसिसुसरकसेषुचेतिइडभावः नित्त्वादाद्युदात्तत्वम जुष्टाः श्वीदितोनिष्ठायामितीड्भावः जुष्टार्पितइत्यनुवृत्तौ नित्यंमन्त्रेइत्याद्युदात्तत्वम् । जुष्टयः जुषीप्रीतिसेवनयोः क्तिन् तितुत्रेतीडभावः नित्त्वादाद्युदात्तः ॥ १२ ॥

१२. हे स्तवनीय इन्द्र! चारों ओर से यह स्तुति तुम्हारे पास पहुँचे। तुम चिरायु हो; तुम्हारा अनुगमन करके यह स्तुति बढ़ती पावे। तुम्हारा संतोष-साधन करके यह स्तुति हमारे लिए प्रीतिकर हो।

इन्द्रंविश्वाइत्यष्टर्चस्यसूक्तस्यमधुच्छन्दसःपुत्रोजेतृनामकऋषिः तथाचानुक्रान्तम्—इन्द्रम- ष्टौजेतामाधुच्छन्दसइति छन्दस्त्वानुष्टुभमितिपूर्वसूक्तोक्तम् इन्द्रोदेवतानुवर्तते विनियोगस्तुमहा- व्रतेनिष्केवल्येक्रत्स्नंसूक्तंशंसनीयम् उरूइतिखण्डेशौनकेनसूत्रितम्—इन्द्रंविश्वाअवीवृधन्नित्या- नुष्टुभम् तस्यप्रथमायाःपूर्वमर्धर्चंशस्त्वोत्तरेणार्धर्चेनोत्तरस्याःपूर्वमर्धर्चंव्यतिषजतिपादैःपादाननुष्टुप् कारंप्रागुत्तमायाइति ब्राह्मणंचप्रथमारण्यकेपठ्यतेप्रवोमहइतिखण्डे—इन्द्रंविश्वाअवीवृधन्नि- तिपदानुषङ्गाइति तथापृष्ठ्यस्यपञ्चमेहनिनिष्केवल्येशस्त्रेइन्द्रंविश्वाअवीवृधन्नित्यनुरूपस्तृचः स्तोमेवर्धमानइतिखण्डेसूत्रितम्—उपनोहरिभिःसुतमिन्द्रंविश्वाअवीवृधन्निति ।

अस्मिन्सूक्तेप्रथमामृचमाह—

इन्द्रंविश्वाअवीवृधन्त्समुद्रव्यंचसंगिरः। रथीतमंरथीनांवा जानांसत्पतिंपतिम् ॥ १ ॥

इन्द्रम्। विश्वाः। अवीवृधन्। समुद्रऽव्यचसम्। गिरः। रथिऽतमम्। रथिनाम्। वाजानाम्। सत्ऽपतिम्। पतिम् ॥ १ ॥

विश्वाःसर्वागिरोऽस्मदीयाःस्तुतयःइन्द्रमवीवृधन् वर्धितवत्यः कीदृशमिन्द्रं समुद्रव्यचसं समुद्रवद्व्याप्तवन्तं रथीनांरथयुक्तानांयोद्धृणांमध्येरथीतमंअतिशयेनरथयुक्तं वाजानामन्नानांप- तिंस्वामिनं सत्पतिंसतांसन्मार्गवर्तिनांपालकम्॥ विश्वाः विशेःक्वन् नित्स्वरः।अवीवृधन् वृधेर्णि- चिचङि उर्ऋदित्यनुवृत्तौ नित्यंछन्दसीतिऋकारस्यऋकारविधानाल्लघूपधगुणाभावः निघातस्वरः। समुद्रव्यचसं व्यचेरसुन् गाङ्कुटादिभ्योञ्णिन्ङिदितिप्राप्तस्यङित्त्वस्यव्यचेःकुटादित्वमनसीतिअ- सिनिषेधात् ग्रहिज्येत्यादिनाङितिविधीयमानंसंप्रसारणंनभवति समुद्रव्यचइवव्यचोयस्य बहुव्री- हौपूर्वपदप्रकृतिस्वरत्वम् ।रथीतमं रथीनां रथशब्दादुत्पन्नस्येनश्छान्दसंदीर्घत्वं प्रत्ययस्वरेणोदा- त्तत्वंच । वाजानां वृषादित्वादाद्युदात्तत्वम् । सत्पतिं पत्यावैश्वर्येइतिपूर्वपदप्रकृतिस्वरत्वम् ॥१॥

१. सागर की तरह व्यापक, रथि-श्रेष्ठ, अन्नपति और साधु-रक्षक इन्द्र को हमारी सारी स्तुतियाँ परिवर्द्धित कर चुकी हैं।

द्वितीयामृचमाह—

सख्ये त इन्द्र वाजिनो मा भेम शवसस्पते । त्वामभि प्र णोनुमो जेतारमपराजितम् ॥ २॥

सख्ये । ते । इन्द्र । वाजिनः । मा । भेम । शवसः । पते । त्वाम् । अभि । प्र । नोनुमः । जेतारम् । अपराऽजितम् ॥ २ ॥

हेशवसस्पते बलस्यपालकेन्द्र तेतवसख्ये अनुग्रहप्रयुक्ते सखित्वे वर्तमानावयंवाजिनोऽन्नवन्तोभूत्वामाभेमशत्रुभ्योभीतिंमाप्राप्ताभूम अवस्त्वामभयहेतुं अभिप्रणोनुमः सर्वतः प्रकर्षेणस्तुमः कीदृशंत्वां जेतारं युद्धेषुजयशीलं अपराजितं क्वापिपराजयरहितम् ॥ सख्ये सख्युःकर्मसख्यं सख्युर्यः प्रत्ययस्वरः । वाजिनः वाजोऽन्नमेषामस्तीतिवाजिनः प्रत्ययस्वरः । भेम ञिभीभये लुङुत्तमबहुवचनंमस्नित्यंङितइतिसलोपः बहुलंछन्दसीतिच्लेर्लुक् छन्दस्युभयथेतितिङआर्धधातुकत्वेनङित्त्वाभावाद्गुणः नमाङ्योगइत्यडागमप्रतिषेधः । शवसः षष्ठ्याःपतिपुत्रपृष्ठपारपदपयस्पोषेष्वितिविसर्जनीयस्यसंहितायांसत्वं सुबामन्त्रितइतिपराङ्गवद्भावेनपदद्वयनिघातः । नोनुमः णुस्तुतौ णोनइतिनत्वं यङोलुक् प्रत्ययलक्षणेनसन्यङोरिति द्विर्भावः गुणोयङ्लुकोरित्यभ्यासस्यगुणः प्रत्ययलक्षणेनधातुसंज्ञायांलटोमस् अदादिवद्भावाच्छपोलुक् उपसर्गादसमासेऽपिणोपदेशस्येतिसंहितायांणत्वम् जेतारं जिजये । ताच्छील्यादितृन् ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वम् । अपराजितं अव्ययपूर्वपदप्रकृतिस्वरत्वेननञउदात्तत्वम् ॥ २ ॥

२. बलपति इन्द्र ! तुम्हारी मित्रता से हम ऐसे शक्तिशाली हों कि, हमें भय न मालूम पड़े। इन्द्र ! तुम जयशील और अपराजेय हो। हम तुम्हारी स्तुति करते हैं।

पूर्वीरिन्द्रस्य रातयो न वि दस्यन्त्यूतयः । यदी वाजस्य गोमतः स्तोतृभ्यो मंहते मघम् ॥ ३ ॥

पूर्वीः । इन्द्रस्य । रातयः । न । वि । दस्यन्ति । ऊतयः । यदि । वाजस्य । गोऽमतः । स्तोतृऽभ्यः । मंहते । मघम् ॥ ३ ॥

इन्द्रस्यसंबन्धिन्योरातयोधनदानानि पूर्वीःअनादिकालसिद्धाः प्रभूतावाअस्येन्द्रस्यसर्वदायद्भ्योधनदानमेवस्वभावइत्यर्थः एवंसतिइदानींतनोऽपियजमानः स्तोतृभ्यऋत्विग्भ्योगोमतोगोसहितस्यवाजस्यान्नस्यपर्याप्तंमघंधनंयदिमंहते दक्षिणारूपेणददाति तदानींऊतयो-

बहुधनदानपूर्वकाणीन्द्रस्यास्मद्विषयाणिरक्षणानिनविदस्यन्ति विशेषेणनोपक्षीयन्ते मघं रेक्णइत्यादिष्वष्टाविंशतिसंख्याकेषुधननामसु मघशब्दःपठितः दातिदाशतीत्यादिषु दशसु दानकर्मसु मंहतइतिपठितम् ॥ पूर्वीः पुरुशब्दस्यवोतोगुणवचनादितिङीष् आद्यस्योकारस्यदीर्घश्छान्दसः जसि दीर्घाज्जसिचेतिनिषेधंबाधित्वा वाछन्दसीतिपूर्वसवर्णदीर्घत्वम् ङीषःप्रत्ययस्वरेणोदात्तत्वम् । रातयः मन्त्रेवृषेषपचमनविदभूवीराउदात्तइतिक्तिनउदात्तत्वम् । दस्यन्ति दसुउपक्षये दिवादिभ्यःश्यन् निघातः । ऊतयः ऊतियूतीत्यादिनाक्तिन्नुदात्तः । यदि निपातत्वादाद्युदात्तः संहितायांनिपातस्यचेतिदीर्घत्वम् । स्तोतृभ्यः ष्टुञ्स्तुतौ धात्वादेःषःसः तृचश्चित्त्वादन्तोदात्तत्वम् । मंहते शपःपित्त्वादनुदात्तत्वम् तिङश्चलसार्वधातुकस्वरेणविङ्क्तिङइतिनिघातोनभवति निपातैर्यद्यदिहन्तेतिनिषेधात् ॥ ३ ॥

३. इन्द्र का धन-दान चिर प्रसिद्ध है। यदि इन्द्र प्रार्थी लोगों को गो-संयुक्त और सामर्थ्य-सम्पन्न धन-दान करें तो प्राणियों की चिर रक्षा होगी।

अभिप्लवषडहस्योक्थ्येषुतृतीयसवनेच्छावाकस्यपुरांभिन्दुर्युवाकविरितिस्तोत्रियस्तृचः तथाचसूत्रितम्—एबूष्वित्युपक्रम्य पुरांभिन्दुर्युवाकविर्वृषाह्यसिराधसइति।

तस्मिंस्तृचेप्रथमांसूक्तेचतुर्थीमृचमाह—

पुरांभिन्दुर्युवाकविरमितौजाअजायत। इन्द्रोविश्वस्यकर्मणोधर्तावज्रीपुरुष्टुतः ॥ ४ ॥

पुराम्। भिन्दुः। युवा। कविः। अमितऽओजाः। अजायत। इन्द्रः। विश्वस्य। कर्मणः। धर्ता। वज्री। पुरुऽस्तुतः ॥ ४ ॥

अयमिन्द्रउच्यमानगुणयुक्तोऽजायतसंपन्नः कीदृग्गुणकइतितदुच्यते पुरामसुरपुराणां भिन्दुर्भेत्ता युवाकदाचिदपिवलीपलितादिवार्धकरहितः कविर्मेधावी अमितौजाः प्रभूतबलः विश्वस्यकर्मणः कृत्स्नस्यज्योतिष्टोमादेर्धर्ता पोषकर्ता वज्री यजमानरक्षणार्थंसर्वदावज्रयुक्तः पुरुष्टुतः बहुविधेतत्तत्कर्मणिस्तुतः ॥ भिन्दुः भिदिर्विदारणे कुरित्यनुवृत्तौ पृभिदिव्यधिगृधिधृषिहृषिभ्यइतिकुप्रत्ययः तस्यछन्दस्युभयथेतिसार्वधातुकसंज्ञायां रुधादिभ्यःश्नम् मित्त्वादन्त्यादचःपरोभवति श्नसोरल्लोपः अनुस्वारपरसवर्णौ अचःपरस्मिन्पूर्वविधावितिप्राप्तस्यस्थानिवद्भावस्यनपदान्तेत्यादिनानिषेधः। युवा युमिश्रणामिश्रणयोः कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवइतिकनिन् नित्त्वादाद्युदात्तः। कविः कुशब्दे अचइरितिइः प्रत्ययस्वरः। अमितौजाः अमितशब्दस्याव्ययपूर्वपदप्रकृतिस्वरत्वम् बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वेनतदेवशिष्यते। विश्वस्य अशूप्रुषीत्यादिनाक्वन् नित्त्वादाद्युदात्तः। कर्मणः अन्येभ्योऽपिदृश्यन्तइतिमनिन् नित्स्वरः।

धर्ता तृच् चित्त्वादन्तोदात्तः। वज्री मत्वर्थीयइनिः प्रत्ययस्वरः। पुरुष्टुतः स्तुतस्तोमयोश्छन्दसीतिषत्वम् बहुषुप्रदेशेषुस्तुतः थाथघञ्क्ताजबित्रकाणामित्यन्तोदात्तत्वम् तृतीयासमासेहि थाथादिस्वरापवादः तृतीयाकर्मणीति पूर्वपदप्रकृतिस्वरःस्यात् ॥ ४ ॥

४. युवा, मेधावी, प्रभूत-बलशाली, सब कर्मों के परिपोषक, वज्रधारी और सर्व-स्तुत इन्द्र ने असुरों के नगर-विदारक रूप से जन्म ग्रहण किया था।

त्वंवलस्यगोमतोपावरद्रिवोबिलम् । त्वांदेवाअबिभ्युषस्तुज्यमानासआविषुः ॥ ५ ॥

त्वम् । वलस्य । गोऽमतः । अप । अवः । अद्रिऽवः । बिलम् । त्वाम् । देवाः । अबिभ्युषः । तुज्यमानासः । आविषुः ॥ ५ ॥

वलनामकःकश्चिदसुरोदेवसंबन्धिनीर्गाअपहृत्यकस्मिंश्चिद्बिलेगोपितवान् तदानीमिन्द्रस्तद्बिलंस्वसैन्येनसमावृत्यतस्माद्बिलाद्गाः निःसारयामास तदिदमुपाख्यानं—इंद्रोवलस्यबिलमापौर्णोदित्यादिब्राह्मणेषुमन्त्रान्तरेषुचप्रसिद्धम्। तदेतद्धृदिनिधायायंमन्त्रःप्रवर्तते हेअद्रिवः वज्रयुक्तेन्द्र त्वंगोमतोवलस्यगोभिर्युक्तस्यवलनामकस्यासुरस्यसंबन्धिबिलंअपावः स्वसैन्यमुखेनापावृतवानसि तदानींतुज्यमानासोवलेनहिंस्यमानादेवाअबिभ्युषः त्वदीयरक्षयावलादभीताः सन्तः त्वामाविषुः प्राप्तवन्तः॥ अप निपातत्वादाद्युदात्तः। अवः वृञ्वरणे लङ्सिप् इतश्चलोपः स्वादिभ्यःश्नुः तस्यबहुलंछन्दसीतिलुक् गुणोरपरत्वं हल्ङ्याब्भ्यादिलोपः विसर्जनीयः अडागमः। अद्रिवः अद्रिरस्यास्तीतिमतुप् छन्दसीरइतिवत्वम् संबोधने उगिदचामितिनुम् हल्ङ्यादिसंयोगान्तलोपौ मतुवसोरुसंबुद्धौछन्दसीतिरुत्वम्। बिलं नब्विषयस्यानिसन्तस्येत्याद्युदात्तत्वम्। अबिभ्युषः ञिभीभये लिट् द्विर्भावः अभ्यासस्यह्रस्वजश्त्वे क्वसुश्चेतिलिटःक्वसुरादेशः क्रादिनियमात्प्राप्तइट् वस्वेकाजाद्घसामितिनियमान्निवर्तते जसि सर्वनामस्थानेपिव्यत्ययेन भत्वाद्वसोःसंप्रसारणंपरपूर्वत्वं शासिवसिघसीनांचेतिषत्वम् अचिश्नुधात्वित्यादिनाप्राप्तमियङादेशंबाधित्वा एरनेकाचइतियणादेशः नञ्समासः अव्ययपूर्वपदप्रकृतिस्वरत्वम्। तुज्यमानासः तुजेर्हिंसार्थात्परस्यकर्मणिलटःस्थानेशानच् सार्वधातुकेयगितियक् तस्माददुपदेशादुत्तरस्यलसार्वधातुकस्यानुदात्तत्वम् यकएवप्रत्ययस्वरःशिष्यते। आविषुः अवरक्षणादिषु अस्माद्गत्यर्थाल्लुङोझिः तस्य सिजभ्यस्तविदिभ्यश्चेतिजुस् सिच् इडागमः आडजादीनामित्याडागमः आदेशप्रत्ययोरितिषत्वम् ॥ ५ ॥

५. वज्र-युक्त इन्द्र! तुमने गो-हरण-कर्त्ता बल नाम के असुर की गुहा उद्घाटित की थी। उस समय बलासुर के निपीड़ित होने पर देव लोगों ने निर्भय होकर तुम्हें प्राप्त किया था।

---

१ तै० सं० २.१.५.।

षष्ठीमृचमाह—

तवाहंशूररातिभिःप्रत्यायंसिन्धुमावदन् । उपातिष्ठन्तगिर्वणोविदुष्टेतस्यकारवः ॥ ६ ॥

तव । अहम् । शूर । रातिऽभिः । प्रति । आयम् । सिन्धुम् । आऽवदन् । उप । अतिष्ठन्त । गिर्वणः । विदुः । ते । तस्य । कारवः ॥ ६ ॥

हेशूर संग्रामेशौर्ययुक्तेन्द्र तवरातिभिः कर्मसु त्वद्दीयैर्धनदानैर्निमित्तभूतैः अहंहोतामत्यायं त्वांपुनरागतोऽस्मि पुराबहुषुकर्मसुत्वत्तोधनस्यलब्धत्वादस्मिन्कर्मणिप्रत्यागमनमित्युच्यते किंकुर्वन् सिन्धुंस्यन्दमानं सोममावदन् सर्वतःकथयन् अस्मिन्सोमयागेत्वदीयांधनदानकीर्तिंप्रकटयन्नित्यर्थः हेगिर्वणः गीर्भिर्वननीयेन्द्र कारवःकर्तारः ऋत्विग्यजमानाः उपातिष्ठन्त पुराधनलाभार्थंत्वामुपस्थितवन्तः उपस्थायचतस्यतादृशस्यौदार्योपेतस्यतेतवधनदानंविदुर्जानन्ति गिर्वणस्शब्दंयास्कइत्थंनिर्ब्रूते—गिर्वणादेवोभवतिगीर्भिरेनंवनयन्तीति रेभोजरितेत्यादिषुत्रयोदशसुस्तोतृनामसु कारुशब्दःपठितः ॥ तव युष्मदस्मदोर्ङसीत्याद्युदात्तत्वम् । रातिभिः मन्त्रेवृषेत्यादिनाक्तिन्नुदात्तः । आयं इणोलङ् तस्थस्थमिपामित्यमादेशः अदिप्रभृतिभ्यःशपइतिशपोलुक् आडागमःवृद्ध्यायादेशौ तिङ्ङतिङइतिनिघातः । सिन्धुं स्यन्दूप्रस्रवणे निदित्यनुवृत्तौ स्यन्देःसंप्रसारणंधश्चेत्युप्रत्ययोधकारश्चान्तादेशः नित्त्वादाद्युदात्तः । आवदन् वदव्यक्तायांवाचि लटःशतृ शपःपित्त्वादनुदात्तत्वम् शतुश्चलसार्वधातुकस्वरेणधातुस्वरएवशिष्यते आङ्गसहकुगतिप्रादयइतिसमासः कृदुत्तरपदप्रकृतिस्वरत्वम् । अतिष्ठन्त उपान्मन्त्रकरणेइत्यात्मनेपदम् । गिर्वणः वनषणसंभक्तौ असुन् आमन्त्रितस्यचेतिनिघातः । विदुः विदज्ञाने लट् अदिप्रभृतिभ्यःशपइतिशपोलुक् विदोलटोवेतिझेरुस् पादादित्वान्ननिघातः संहितायांयुष्मत्ततक्षुष्वन्तःपादमितिषत्वम् ष्टुनाष्टुरित्युत्तरस्यतकारस्यष्टुत्वम् तस्यसावेकाचइतिविभक्तेरुदात्तत्वंप्राप्तं नगोश्वन्त्सावर्णेतिनिषिध्यते । कारवः कृवापाजीत्यादिनाउण् प्रत्ययस्वरः ॥६॥

६. वीर इन्द्र ! मैं चूते हुए सोमरस का गुण सर्वत्र व्यक्त करके और तुम्हारे धन-प्रदान से आकृष्ट होकर लौटा हूँ। स्तवनीय इन्द्र ! यज्ञ-कर्त्ता तुम्हारे पास आते थे और तुम्हारी सत्पुरुषता जानते थे।

सप्तमीमृचमाह—

मायाभिरिन्द्रमायिनंत्वंशुष्णमवातिरः । विदुष्टेतस्यमेधिरास्तेषांश्रवांस्युत्तिर ॥ ७ ॥

मा॒याभि॑ः । इ॒न्द्र॒ । मा॒यिन॑म् । त्वम् । शुष्ण॑म् । अव॑ । अ॒ति॒र॒ः ।
वि॒दुः । ते॒ । तस्य॑ । मेधि॑राः । तेषा॑म् । श्रवां॑सि । उत् । ति॒र॒ ॥ ७ ॥

हेइन्द्र त्वंमायिनंनानाविधकपटोपेतंशुष्णंभूतानांशोषणहेतुमेतन्नामकमसुरं मायाभिः तत्प्रतिकूलैःकपटविशेषैः यद्वा तद्वधोपायगोचरप्रज्ञाभिः अवातिरः हिंसितवानसि एतच्चयास्केनोक्तम्—इन्द्रःशुष्णंजघानेति[1] । शुष्णंपिप्रुमित्यादिमन्त्रेचायमर्थोविस्पष्टः[2] ॥ मेधिराः मेधावन्तोनुष्ठातारः तस्यतादृशस्यते तव महिमानं विदुर्जानन्ति तेषांजानतामनुष्ठातॄणां श्रवांस्यन्नानि उत्तिर वर्धय केतः केतुरित्यादिष्वेकादशसुप्रज्ञानामसु मायावयुनमितिपठितम् श्रवःशब्दं यास्कोनिर्वक्ति—श्रवइत्यन्ननामश्रूयतइतिसतइति[3] ॥ मायाभिः माङ्माने माछायाससिसूभ्योयइतियप्रत्ययः प्रत्ययस्वरः । मायिनं मायाअस्यास्तीतिमायी व्रीह्यादित्वादिनिप्रत्ययः प्रत्ययस्वरः । शुष्णं शुषशोषणे अस्मादन्तर्भावितण्यर्थाच्चिदित्यनुवृत्तौ तृषिशुषिरसिभ्यः किच्चेतिनप्रत्ययः नित्त्वादाद्युदात्तः । अतिरः तरतेर्लङिव्यत्ययेनशः तस्यङित्त्वेनगुणाभावाव ऋतइद्धातोरितिइत्वम् रपरत्वम् । विदुष्टेतस्य गतमन्त्रेगतम् । मेधिराः मिधृमेधृमेधाहिंसनयोः औणादिकइरन् नित्त्वादाद्युदात्तः । श्रवांसि न्विषयत्वादाद्युदात्तः ॥ ७ ॥

७. इन्द्र ! तुमने मायावी शुष्ण का माया-द्वारा वध किया था। तुम्हारी महिमा मेधावी लोग जानते हैं। उन्हें शक्ति प्रदान करो।

अष्टमीमृचमाह—

इन्द्र॒मीशा॑न॒मोज॑सा॒भि स्तोमा॑ अनूषत । स॒हस्रं॒ यस्य॑ रा॒तय॑ उ॒त वा॒ सन्ति॒ भूय॑सीः ॥ ८ ॥ २१ ॥

इन्द्र॑म् । ईशा॑नम् । ओज॑सा । अ॒भि । स्तोमा॑ः । अ॒नू॒ष॒त॒ । स॒हस्र॑म् ।
यस्य॑ । रा॒तय॑ः । उ॒त । वा॒ । सन्ति॑ । भूय॑सीः ॥ ८ ॥ २१ ॥

स्तोमाः स्तोतारऋत्विजः ओजसाबलेनईशानंजगतोनियामकमिन्द्रं अभ्यनूषत सर्वतः स्तुवन्तः यस्येन्द्रस्यरातयोधनदानानि सहस्रंसहस्रसंख्योपेतानिसन्ति उतवा अथवा भूयसीः सहस्रसंख्यायाअप्यधिकाःसन्ति तमिन्द्रमितिपूर्वत्रान्वयः ॥ इन्द्रं ऋज्रेन्द्रेत्यादिनारन् नित्त्वादाद्युदात्तः । ईशानं लटःशानच् अदिप्रभृतिभ्यःशपइतिशपोलुक् धातोरनुदात्तेत्त्वाद तास्यनुदात्तेदित्यादिनाशानचोनुदात्तत्वम् । ओजसा न्विषयत्वादाद्युदात्तः । स्तोमाः अर्तिस्तुस्वित्यादिना मन्प्रत्ययः नित्त्वादाद्युदात्तः । अनूषत णुस्तुतौ णोनः लुङ् व्यत्ययेनझस्य

१ नि० ३. ११. । २ ऋ० सं० १. ७. १७. । ३ नि० १०. ३. ।

अदादेशःच्लेःसिच् अस्यधातोः कुटादित्वेनसिचोङित्त्वाद्गुणाभावः इडभावश्छान्दसः दीर्घत्वंच अडागमः। सहस्रं कर्दमादीनांचेतिद्वितीयाक्षरमुदात्तम्। रातयः मन्त्रेवृषेत्यादिनाक्तिनुदात्तः। उत प्रातिपदिकस्वरः। वा चादिरनुदात्तः। सन्ति प्रत्ययाद्युदात्तत्वम् तिङ्ङतिङइति निघातोनभवति यद्वृत्तान्नित्यमितिनिषेधात् सहि व्यवहितेऽपिभवतीत्युक्तम्। भूयसीः सहस्रादतिशयेनबह्व्यःभूयस्यः अत्रविभक्तव्यस्यसहस्रस्यसंनिधिबलादुपपदत्वप्रतीतेः द्विवचनविभज्योपपदेतरबीयसुनावितिबहुशब्दादीयसुन् बहोर्लोपोभूचबहोरितीकारलोपः प्रकृतेर्भूरित्यादेशश्च ईयसुनोनित्त्वादाद्युदात्तत्वम् उगितश्चेतिङीप् ॥ ८ ॥

८. अपने बल के प्रभाव से जगत् के नियन्ता इन्द्र को प्रार्थियों ने स्तुत किया था। इन्द्र का धन-दान हज़ारों या हज़ारों से भी अधिक तरीक़ों से होता है।

॥ इतिप्रथमस्यप्रथमेएकविंशोवर्गः ॥ २१ ॥

इतितृतीयोनुवाकः ॥ ३ ॥

अथसूक्तषट्कात्मकेचतुर्थानुवाके अग्निंदूतमित्यादिकस्यद्वादशर्चस्यसूक्तस्य कण्वपुत्रोमेधातिथिर्ऋषिः अपवादाभावादनुवर्तमानं प्राग्घिरण्यस्तूपादित्युक्तंगायत्रमेवछन्दः अग्निदेवताकत्वंविस्पष्टं अतएवानुक्रम्यते—अग्निंद्वादशमेधातिथिःकाण्वआग्नेयमग्निनेतिपादोऽग्निदैवतोनिर्मन्थ्यआहवनीयश्चेति विनियोगस्तु प्रातरनुवाकेआग्नेयेक्रतौगायत्रेछन्दस्यग्निंदूतमिति सूक्तम् अथैतस्याराग्नेर्विवासकालेइतिखण्डे—अग्निमीळेग्निंदूतमितिसूत्रितम् तथापृष्ठ्यषडहस्य द्वितीयेहनिइदमेवसूक्तमाज्यशस्त्रं पृष्ठ्यस्याभिप्लवेनोक्तेअहनीइतिखण्डेसूत्रितम्—अग्निंदूतमितिद्वितीयइति दर्शपूर्णमासयोः सामिधेनीष्वग्निंदूतमित्येका नमःप्रवक्त्रेइतिखण्डेसूत्रितम्—ईळेन्योनमस्यस्तिरोग्निंदूतंवृणीमहइति।

अस्मिन्सूक्तेप्रथमामृचमाह—

अ॒ग्निं दू॒तं वृ॑णीमहे॒ होता॑रं वि॒श्ववे॑दसम् । अ॒स्य य॒ज्ञस्य॑ सु॒क्रतु॑म् ॥ १ ॥

अ॒ग्निम् । दू॒तम् । वृ॒णी॒म॒हे॒ । होता॑रम् । वि॒श्वऽवे॑दसम् । अ॒स्य । य॒ज्ञस्य॑ । सु॒ऽक्रतु॑म् ॥ १ ॥

अग्नेर्दूतत्वमेतन्मन्त्रव्याख्यानेतैत्तिरीयब्राह्मणेसमाम्नायते—अग्निर्देवानांदूतआसीदुशनाःकाव्योऽसुराणामिति[1]। तादृशंदेवदूतमग्निं अस्मिन्कर्मणिवृणीमहे संभजामः कीदृशं होतारं देवा-

---

१ तै० सं० २. ५. ८. १

नामाह्वातारं विश्ववेदसं सर्वधनोपेतं अस्यप्रवर्तमानस्ययज्ञस्यनिष्पादकत्वेन सुक्रतुंशोभनकर्माणं शोभनप्रज्ञंवा मघमित्यादिष्वष्टाविंशतिसंख्याकेषुधननामसु वेदसशब्दःपठितः ॥ होतारं ह्वेञ्स्पर्धायांशब्देच ताच्छील्यादिषुतृन् बहुलंछन्दसीतिसंप्रसारणपरपूर्वत्वे गुणः नित्त्वादाद्युदात्तः। विश्ववेदसं बहुव्रीहौविश्वंसंज्ञायामिति पूर्वपदान्तोदात्तत्वम्। अस्य ऊडिदमित्यादिनाविभक्तेरुदात्तत्वम्। सुक्रतुं क्रत्वादयश्चेत्याद्युदात्तत्वम्॥ १ ॥

१. देवदूत, देवाह्वानकारी, निखिल-सम्पत्संयुक्त और इस यज्ञ के सुसम्पादक अग्नि को हम भजते हैं।

अ॒ग्निम॑ग्निं॒ हवी॑मभिः॒ सदा॑ हवन्त वि॒श्पति॑म्। ह॒व्य॒वाहं॑ पुरुप्रि॒यम् ॥ २ ॥

अ॒ग्निम्ऽअ॑ग्निम्। हवी॑मऽभिः। सदा॑। ह॒व॒न्त॒। वि॒श्पति॑म्। ह॒व्य॒ऽवाह॑म्। पु॒रु॒ऽप्रि॒यम् ॥ २ ॥

यद्यप्यग्निःस्वरूपेणैकएव तथापिप्रयोगभेदादाहवनीयादिस्थानभेदात्पावकादिविशेषणभेदाद्वा बहुविधत्वमभिप्रेत्याग्निमग्निमितिवीप्सा तं हवीमभिः आह्वानकरणैर्मन्त्रैःसदाहवन्त निरन्तरमनुष्ठातारआह्वयन्ति कीदृशं विश्पतिं विशांप्रजानांहोत्रादीनां पालकम् हव्यवाहं यजमानसमर्पितस्यहविषोदेवान्प्रतिवोढारं अतएवपुरुप्रियं बहूनांप्रीत्यास्पदम् ॥ अग्निमग्निं नित्यवीप्सयोरितिवीप्सायांद्विर्भावः तस्यपरमाम्रेडितमित्युत्तरस्याम्रेडितसंज्ञायां अनुदात्तंचेत्यनुदात्तत्वम्। हवीमभिः ह्वेञ्स्पर्धायांशब्देच आह्वानकरणभूतेषुमन्त्रेषुस्वव्यापारस्वातन्त्र्यात्कर्तृत्वविवक्षया अन्येभ्योऽपिदृश्यन्तइतिकर्तरिमनिन् तस्यछान्दसईडागमः बहुलंछन्दसीतिधातोः संप्रसारणंपरपूर्वत्वम् गुणावादेशौ नित्त्वादाद्युदात्तत्वम्। सदा सर्वैकान्येत्यादिनासर्वशब्दाद् दाप्रत्ययः सर्वस्यसोन्यतरस्यांदीतिसभावः व्यत्ययेनाद्युदात्तत्वम्। हवन्त ह्वेञोलट् झस्यान्तादेशः टेरेत्वाभावश्छान्दसः शपि बहुलंछन्दसीतिसंप्रसारणं तिङ्ङतिङइतिनिघातः। विश्पतिं पत्यावैश्वर्येइतिपूर्वपदप्रकृतिस्वरेप्राप्ते परादिश्छन्दसिबहुलमिति उत्तरपदाद्युदात्तत्वम्। हव्यवाहं वहप्रापणे वहश्चेतिण्विप्रत्ययः कृदुत्तरपदप्रकृतिस्वरत्वम्। पुरूणांप्रियं समासान्तोदात्तत्वम्॥२॥

२. प्रजा-रक्षक, हव्यवाहक और बहुलोक-प्रिय अग्नि को यज्ञकर्त्ता आवाहक मंत्रों-द्वारा निरन्तर आह्वान करते हैं।

तृतीयामृचमाह—

अग्ने॑ दे॒वाँ इ॒हा व॑ह जज्ञा॒नो वृ॒क्तब॑र्हिषे। असि॒ होता॑ न॒ ईड्यः॑ ॥ ३ ॥

अग्ने॑। दे॒वान्। इ॒ह। आ। व॒ह॒। ज॒ज्ञा॒नः। वृ॒क्तऽब॑र्हिषे। असि॑। होता॑। नः॒। ईड्यः॑ ॥ ३ ॥

हेअग्ने जज्ञानः अरण्योरुत्पन्नस्त्वंवृक्तबर्हिषेआस्तरणार्थं छिन्नेनबर्हिषायुक्तायतंयजमानमनुग्रहीतुमिहकर्मणिहविर्भुजोदेवानावह नोऽस्मदर्थंहोता देवानामाह्वाता त्वमीड्यःस्तुत्योऽसि ॥ देवान्नित्यत्रसंहितायां दीर्घादटिसमानपादेइतिरुत्वम् आतोटिनित्यमित्यनुनासिकभावः। जज्ञानः जनीप्रादुर्भावे लिटःकानच् गमहनेत्युपधालोपः द्विर्वचनेचीतितस्यस्थानिवद्भावाद्द्विर्वचनम् चित्त्वादन्तोदात्तः। वृक्तबर्हिषे ओव्रश्चूछेदने निष्ठेतिक्तप्रत्ययः यस्यविभाषेतीट्प्रतिषेधः वृक्तंबर्हिर्यजमानाय येनवाऋत्विजा बहुव्रीहौपूर्वपदप्रकृतिस्वरः। असि अस्तेः सिप् अदिप्रभृतिभ्यःशपइतिशपोलुक् तासस्त्योर्लोपइतिसकारस्यलोपः पादादित्वान्ननिघातः। होता ह्वयतेस्ताच्छील्यादिषुतृन् बहुलंछन्दसीतिसंप्रसारणम् नित्त्वादाद्युदात्तः। ईड्यः ईडस्तुतौ ऋहलोर्ण्यत् तित्स्वरितेप्राप्ते ईडवंदवृशंसदुहांण्यतइत्याद्युदात्तत्वम् ॥ ३ ॥

३. हे काष्ठोत्पन्न अग्नि! छिन्न-कुशोंवाले यज्ञ में देवों को बुलाओ। तुम हमारे स्तोत्र-पात्र और देवों को बुलानेवाले हो।

ताँउ॑श॒तोवि॒बो॑धय॒यद॑ग्ने॒यासि॑दू॒त्य॑म्। दे॒वैरास॑त्सि॒ब॒र्हिषि॑ ॥ ४ ॥

तान्। उ॒श॒तः। वि। बो॒ध॒य॒। यत्। अ॒ग्ने॒। यासि॑। दू॒त्य॑म्। दे॒वैः। आ। स॒त्सि॒। ब॒र्हिषि॑ ॥ ४ ॥

हेअग्नेयद्यस्मात्कारणात् दूत्यंयासि देवानांदूतकर्मप्राप्नोषि तस्मात्कारणादुशतोहविः कामयमानान्तान्देवान् हविःस्वीकारार्थं विबोधय विबोध्यच बर्हिष्यस्मिन्कर्मणिदेवैः सह आसत्सि आसीदआगत्योपविश ॥ तान् दीर्घादटिसमानपादेइतिसंहितायांरुत्वम् आतोटिनित्यमित्यनुनासिकभावः। उशतः वशकान्तौ लटःशतृ अदिप्रभृतिभ्यःशपइतिशपोलुक् ग्रहिज्येत्यादिनासंप्रसारणम् शतुरनुमोनद्यजादीइतिविभक्तेरुदात्तत्वम्। यासि यद्वृत्तान्नित्यमितिनिघातप्रतिषेधः। दूतस्यभागःकर्मवादूत्यं दूतस्यभागकर्मणीइतियत् तस्यतित्स्वरितापवादत्वेन यतोनावइतिप्राप्तमाद्युदात्तत्वम् सर्वेविधयश्छन्दसिविकल्प्यन्तइतिनिवर्तते अतस्तित्स्वरितमित्येवभवति शेषनिघातः। सत्सि सीदसि षद्लृविशरणगत्यवसादनेषु लटःसिपि शपोबहुलंछन्दसीतिलुक् नलुमताङ्गस्येतिप्रत्ययलक्षणप्रतिषेधात् पाघ्रेत्यादिनासीदादेशोनभवति। बर्हिषि बृहवृहिवृद्धौ बृंहेर्नलोपश्चेतिइस्प्रत्ययः प्रत्ययस्वरेणइकारउदात्तः ॥ ४ ॥

४. अग्निदेव! चूंकि देवताओं का दूत-कर्म तुम्हें प्राप्त हो चुका है; इसलिए हव्याकांक्षी देवों को जगाओ। देवों के साथ इस कुश-युक्त यज्ञ में बैठो।

घृता॑हवनदीदिवः॒प्रति॑ष्म॒रिष॑तोदह। अग्ने॒त्वंर॑क्ष॒स्विनः॑ ॥ ५ ॥

घृत॑ऽआहवन । दीदि॑ऽवः । प्रति॑ । स्म॒ । रिष॑तः । द॒ह॒ । अग्ने॑ ।
त्वम् । र॒क्ष॒स्विनः॑ ॥ ५ ॥

हेघृताहवन घृतेनाहूयमानदीदिवोदीप्यमानाग्ने त्वंरक्षस्विनोरक्षोयुक्तान् रिषतोहिंसकान्शत्रून्प्रतिअस्म ऽप्रतिकूलान् दहस्म सर्वथाभस्मीकुरु ॥ घृतेनआहूयतेऽस्मिन्नितिकरणाधिकरणयोश्चेत्यधिकरणेल्युट् अत्रजुहोतेरविवक्षितकर्मत्वेनाकर्मकत्वात् घृतस्यकरणत्वमेवनतुकर्मत्वम् अतोनैषा तृतीयाचहोश्छन्दसीतिकर्मणितृतीया किंतु कर्तृकरणयोस्तृतीयेतिकरणवाचिन्येव अतः कर्तृकरणेकृताबहुलमितिसमासः तत्रपूर्वपदप्रकृतिस्वरापवादे कृदुत्तरपदप्रकृतिस्वरेप्रातिपदिकावस्थायामेवकृतेसति पश्चाद्विभक्त्युत्पन्नायामामन्त्रितस्यचेत्याद्युदात्तत्वम् । दीदिवः दीव्यतेर्लिटःक्वसुः तस्य वस्वेकाजाद्घसामितिनियमादिडभावः द्विर्वचनं हलादिशेषः उत्तरवकारस्य लोपोव्योर्वलीतिलोपः क्वसुः किंत्वाद्गुणाभावः तुजादीनांदीर्घोऽभ्यासस्येतिदीर्घत्वमभ्यासस्यासंबुद्धौउगिदचामितिनुम् संयोगान्तस्यलोपइतिसकारलोपे नकारस्यमतुवसोरुसंबुद्धौछन्दसीतिरुत्वम् विसर्गः पदात्परत्वादामन्त्रितनिघातः ननुपूर्वामन्त्रितस्याविद्यमानत्वात् पादादित्वेननिघातोपपत्तिः नचनामन्त्रितेसमानाधिकरणेसामान्यवचनमित्यविद्यमानत्वप्रतिषेधः उभयोरग्निपदविशेषणत्वेनविशेषवचनत्वात् अतएवपरस्परमनन्वयेनासामर्थ्यात्समर्थःपदविधिरितिचनियमात्पूर्वस्यनपराङ्गवद्भावः येनैकपद्येननिघातःस्यादतएवहीडेरन्तेदिवेसरस्वतीत्यादौपृथक्पृथगाद्युदात्तत्वमिति । उच्यते—अत्रदीदिवइतिनाग्निपदस्य विशेषणं किन्तु घृताहवनपदस्यैवद्योतनार्थं घृताहवनइतिविशेष्यत्वेनविवक्षितत्वात् विशिष्टस्य तु पश्चादग्निविशेषणता तत्रदीदिवःपदंप्रतिघृताहवनपदस्यविशेष्यत्वान्नामन्त्रितेसमानाधिकरणेइत्यविद्यमानवत्वप्रतिषेधान्निघातोपपत्तिः अतएवपरस्परविशेषणविशेष्यभावेनसामर्थ्यात्सुबामन्त्रितेइतिपराङ्गवद्भावेशेषनिघातेनापिस्वरोपपत्तिरिति ईडेरन्तइत्यादौतुनैवंपरस्परान्वयइतिवैषम्यम् । रिषतः रुषरिषहिंसार्थाइतिभौवादिकस्यलटःशत्रादेशे शपि छान्दसोगुणाभावः तौदादिकस्यवारुशरिशाहिंसायामित्यस्यछान्दसंषत्वम् विकरणस्यशस्यङित्त्वाद्गुणाभावः । रक्षस्शब्दादस्मायामेधास्रजोविनिरितिमत्वर्थीयोविनिः तस्यप्रत्ययाद्युदात्तत्वम् ॥ ५ ॥

५. हे अग्नि! तुम घी से बुलाये गये और प्रकाशमान हो। हमारे द्रोही लोग राक्षसों से मिल गये हैं। उन्हें तुम जला दो।

अग्निमन्थने अग्निनाग्निःसमिध्यतइत्येषानुवचनीया प्रातर्वैश्वदेव्यांप्रेषितइतिखण्डेसूत्रितम्—अग्निनाग्निःसमिध्यतेत्वंह्यग्नेअग्निनेति एषैवाग्निमतइत्यस्यानुवाक्या अथाग्नेय्यइतिखण्ड अग्नावग्निप्रणयनइत्युपक्रम्यसूत्रितम्—यद्वोवयंप्रमिनामव्रतान्यग्निनाग्निःसमिध्यतइति ।

तामेतांषष्ठीमृचमाह—

अ॒ग्निना॒ग्निः समि॑ध्यते क॒विर्गृ॒हप॑ति॒र्युवा॑ । ह॒व्य॒वाड्जु॒ह्वा॑स्यः ॥ ६ ॥ २२ ॥

अ॒ग्निना॑ । अ॒ग्निः । सम् । इ॒ध्य॒ते॒ । क॒विः । गृ॒हऽप॑तिः । युवा॑ ।

ह॒व्य॒ऽवाट् । जु॒हुऽआ॑स्यः ॥ ६ ॥ २२ ॥

अग्निराहवनीयाख्यःस्वस्मिन्प्रक्षिप्यमाणेनाग्निनानिर्मथ्येनप्रणीतेनवासहसमिध्यते सम्यग्दीप्यते कीदृशोग्निः कविर्मेधावी गृहपतिर्यजमानगृहस्यपालकः युवा नित्यतरुणः हव्यवाट् हविषोवोढा जुह्वास्यः जुहूरूपेणमुखेनयुक्तः ॥ गृहपतिः पत्यावैश्वर्येइतिपूर्वपदप्रकृतिस्वरत्वम् । युव युमिश्रणे कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवइतिकनिन् नित्त्वादाद्युदात्तः । हव्यंवहतीतिहव्यवाट् वहश्चेतिण्विप्रत्ययः णित्त्वादुपधावृद्धिः गतिकारकोपपदात्कृदुत्तरपदप्रकृतिस्वरत्वम् । जुह्वास्यः हूयतेऽनयेतिजुहूः हुवःश्लुवच्चेतिक्विप् तत्सन्नियोगादीर्घश्च श्लुवद्भावाद्द्विर्भावः श्रुत्वजश्त्वे प्रातिपदिकस्वरेणान्तोदात्तः । जुहूरास्यंयस्येतिबहुव्रीहौपूर्वपदप्रकृतिस्वरत्वेनसएवशिष्यते शेषनिघातः यणादेशउदात्तस्वरितयोर्यणःस्वरितोऽनुदात्तस्येत्याकारःस्वरितः ॥ ६ ॥

६. अग्नि अग्नि से ही प्रज्वलित होती है। अग्नि मेधावी, गृहरक्षक, हव्यवाहक और जुहू-(घृतपात्र)-मुख हैं।

क॒विम॒ग्निमुप॑ स्तुहि स॒त्यध॑र्माणमध्व॒रे । दे॒वम॑मीव॒चात॑नम् ॥ ७ ॥

क॒विम् । अ॒ग्निम् । उप॑ । स्तु॒हि॒ । स॒त्यऽध॑र्माणम् । अ॒ध्व॒रे ।

दे॒वम् । अ॒मी॒व॒ऽचात॑नम् ॥ ७ ॥

हेस्तोतृसंघ अध्वरेक्रतौ अग्निमुपस्तुहि उपेत्यस्तुतिंकुरु कीदृशं कविंमेधाविनं सत्यधर्माणंसत्यवदनरूपेणधर्मेणोपेतं देवं द्योतमानं अमीवचातनं अमीवानांहिंसकानांशत्रूणां रोगाणां वाघातकम् ॥ सत्यंधर्मोयस्येतिसत्यधर्मा धर्मादनिच्केवलादित्यनिच्समासान्तः अन्तःपदेनवस्यसत्वासत्वाभिधानात् बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वेशेषनिघातेनानुदात्तत्वम् । अमीवशब्दः अमरोगेइत्यस्मादशेषयह्वजिह्वाग्रीवाअपामीवाइति वन्प्रत्ययेईडागमेचनिपातोनित्त्वादाद्युदात्तः चतेचदेयाचनेचेत्यस्माद्धिंसार्थाण्णिजन्तान्नन्द्यादित्वाल्ल्युः योरनादेशः णेरनिटीतिणेर्लोपः लिवीसिधातोरकारस्योदात्तत्वम् नचस्वरेकर्तव्येणिलोपस्यस्थानिवद्भावः नपदान्तद्विर्वचनेत्यादिनाप्रतिषेधात् अमीवानांचातनइतिसमासे कृदुत्तरपदप्रकृतिस्वरेणसएवशिष्यते ॥ ७ ॥

७. मेधावी, सत्यधर्मा और शत्रुनाशक देव अग्नि के पास आकर यज्ञ-कार्य में उसकी स्तुति करो।

अष्टमीमृचमाह—

यस्त्वामंग्नेहविष्पंतिर्दूतंदेवसपर्यति । तस्यंस्मप्राविताभव ॥ ८ ॥

यः । त्वाम् । अग्ने । हविःऽपतिः । दूतम् । देव । सपर्यति ।
तस्य । स्म । प्रऽअविता । भव ॥ ८ ॥

हेअग्नेदेव योहविष्पतिर्यजमानः देवदूतंत्वांसपर्यति परिचरति तस्ययजमानस्य प्राविता भवस्म अवश्यंरक्षकोभव ॥ हूयतइतिहविः अर्चिशुचीत्यादिनाइसिः प्रत्ययस्वरेणइकार-उदात्तः हविषःपतिः हविष्पतिः नित्यंसमासेनुत्तरपदस्थस्येतिषत्वम् पत्यावैश्वर्येइतिपूर्व-पदप्रकृतिस्वरत्वम् । सपर्शब्दात्कण्ड्वादिभ्योयगितियक् धातुप्रकरणात् गुणप्रतिषेधाद्यर्था-यकःकित्वाच्चसपर्शब्दस्यधातुत्वात्ततोविहितस्ययकआर्धधातुकत्वेसति अतोलोपइत्यल्लोपः सनाद्यन्ताधातवइतिधातुसंज्ञायांतिप् कर्तरिशप् तस्मिन्पूर्वस्यातोगुणेइतिपररूपत्वम् यकःप्रत्यय-स्वरेणोदात्तत्वं शपासहएकादेशस्यएकादेशउदात्तेनोदात्तइत्युदात्तत्वम् तिङ्ङतिङइतिनिघातो-नभवति यद्वृत्तान्नित्यमितिप्रतिषेधात् ॥ ८ ॥

८. अग्निदेव ! तुम देवदूत हो। जो हव्यदाता तुम्हारी परिचर्या करता है, उसकी तुम भली भाँति रक्षा करो।

गार्हपत्याहवनीययोः परस्परसंसर्गेविहितस्यहविषोयाज्या योअग्निंदेववीतयइत्येषा अथाग्नेय्यइष्टयइतिखण्डेसूत्रितम्—योअग्निंदेववीतयेकुवित्सुनोगविष्टयइति ।

तामेतांयाज्यांसूक्तगतांनवमीमृचमाह—

योअग्निंदेववीतयेहविष्माँआविवासति । तस्मैपावकमृळय ॥ ९ ॥

यः । अग्निम् । देवऽवीतये । हविष्मान् । आऽविवासति ।
तस्मै । पावक । मृळय ॥ ९ ॥

हविष्मान्हविर्युक्तोयोयजमानोदेववीतये देवानांहविर्भक्षणहेतुयागार्थं अग्निमाविवास-ति अग्नेः समीपेविशेषेणागत्यपरिचर्यांकरोति हेपावकाग्ने तस्मैमृळय तंयजमानंसुखय॥ देववी-तये वीगतिप्रजनकान्त्यसनखादनेषु इत्यस्मादसनार्थाद्वक्तिन् देवानांवीतिर्यस्मिन्यागेसदेववीतिः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । नविषयस्यानिसन्तस्येतिपर्युदासाद्धविःशब्दोन्तोदात्तः म-तुपःसर्वानुदात्तत्वात्सएवशिष्यते । आविवासति वागतिगन्धनयोः अस्मादन्तर्भावितण्य-र्थादागमयितुमिच्छतीत्यर्थेसन् आह्वानेच्छापरिचर्यायांपर्यवस्यतीतिविवासतिशब्दःपरिच-

र्यार्थेनिघंटौपठितः द्विर्भावः अभ्यासस्यह्रस्वः सन्यतइतिइत्वम् ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वम् तिङ्ङतिङइतिनिघातोनभवति यद्वृत्तान्नित्यमितिप्रतिषेधात् तिङिचोदात्तवतीत्याङोनिघातः सहसुपेत्यत्रसहेतियोगविभागादाङस्तिङासहसमासे समासान्तोदात्तत्वेप्राप्ते परादिश्छन्दसिबहुलमित्युत्तरपदान्तोदात्तत्वम्। तस्मै क्रियाग्रहणंकर्तव्यमितिसंप्रदानेचतुर्थी॥ ९॥

९. जो हव्यदाता देवों के हव्य-भक्षण के लिए अग्नि के पास आकर भली भाँति परिचर्या करता है, उसको तुम हे पावक! सुखी करो।

पवमानेष्टावग्नेःपावकस्यानुवाक्यासनःपावकदीदिवइति पौर्णमासेनेष्टिपशुसोमाउपदिष्टाइतिखण्डेसूत्रितम्—सनःपावकदीदिवोग्नेपावकरोचिषेति ।

तामेतामनुवाक्यांसूक्तगतांदशमीमृचमाह—

सर्नःपावकदीदिवोग्नेदेवाँइहावह। उपयज्ञंहविश्चनः॥ १०॥

सः। नः। पावक। दीदिऽवः। अग्ने। देवान्। इह। आ। वह। उप। यज्ञम्। हविः। च। नः॥ १०॥

हेदीदिवोदीप्यमानपावक शोधकाग्नेसत्वंनोऽस्मदर्थइहदेवयजनदेशेदेवानावह ततोनोऽस्मदीयंयज्ञंतत्रत्यंहविश्चउप देवसमीपेप्रापयेतिशेषः॥ दीदिवः दिवुक्रीडादौ छन्दसिलुङ्लङ्लिटइतिवर्तमानेलिट् क्वसुः द्विर्भावःहलादिशेषःतुजादीनांदीर्घोभ्यासस्येत्यभ्यासस्यदीर्घत्वम् वस्वेकाजाद्धसामितिनियमाद्वसोरिट्प्रतिषेधः उत्तरवकारस्यलोपोव्योर्वलीतिवकारलोपः कित्त्वाद्गुणाभावः संबुद्धौउगिदचामितिनुम् हल्ङ्यादिलोपः संयोगान्तलोपः मतुवसोरितिरुत्वंविसर्गः।अग्ने पादादित्वान्नानिघातः।देवान् इहेत्यत्र दीर्घादटिसमानपादेइतिरुत्वम् आतोटिनित्यमित्याकारस्यानुनासिकः भोभगोअघोअपूर्वस्ययोशीतिरोर्यकारः लोपःशाकल्यस्येतियकारलोपः तस्यासिद्धत्वाद्गुणोनभवति।इह इदमोहइतिसप्तम्यन्ताद्धप्रत्ययः इदमइश् तद्धितान्तत्वात्प्रातिपदिकत्वे सुपोधातुप्रातिपदिकयोरितिसप्तम्यालुक् तद्धितश्चासर्वविभक्तिरित्यव्ययसंज्ञायां अव्ययादाप्सुपइत्युत्तरस्याःसप्तम्यालुक् अकारः प्रत्ययस्वरेणोदात्तः॥ १०॥

१०. हे ज्वलन्त पावक! हमारे लिए तुम देवों को यहाँ ले आओ और हमारा यज्ञ और हव्य देवों के पास ले जाओ।

सनःस्तवानआभरगायत्रेणनवीयसा। रयिंवीरवतीमिषम्॥ ११॥

सः। नः। स्तवानः। आ। भर। गायत्रेण। नवीयसा। रयिम्। वीरऽवतीम्। इषम्॥ ११॥

हेअग्ने नवीयसानवतरेणपूर्वकैरप्यसंपादितेनगायत्रेणगायत्रीछन्दस्केनानेनसूक्तेनस्तवानः स्तूयमानः सत्वंनोऽस्मदर्थं रयिंधनं वीरवतीं शूरपुत्रभृत्यपत्ययुक्तां इषमन्नंच आभर संपादय ॥ स्तवानः ष्टुञ्स्तुतौ धात्वादेःषःसः स्वरितञितइत्यात्मनेपदम् लटःशानच् कर्तरिशप् बहुलंछन्दसीतिलुग्भावः गुणावादेशौ आनेमुगितिमुग्नभवति अनित्यमागमशासनमित्यागमानुशासनस्यानित्यत्वात् शपःपित्त्वादनुदात्तत्वम् शानचश्चित्त्वादन्तोदात्तस्यअदुपदेशाच्छपः परत्वाल्लसार्वधातुकानुदात्तत्वम् धातुस्वरएवशिष्यते । भर हृग्रहोर्भश्छन्दसीतिभत्वम् । गायत्रेण गायत्र्याःसंबन्धिगायत्रं तस्येदमित्यण् प्रत्ययस्वरः । नवीयसा नवशब्दादातिशायनिकईयसुन्प्रत्ययः नित्त्वादाद्युदात्तः । वीरवतीं मतुब्ङीपोः पित्त्वादनुदात्तत्वम् अकारःप्रातिपदिकस्वरेणोदात्तः ॥ ११ ॥

११. अग्निदेव ! नये गायत्री-छन्दों से स्तुत होकर हमारे लिए धन और वीर्यशाली अन्न प्रदान करो ।

अग्ने॑शु॒क्रेण॑शो॒चिषा॒विश्वा॑भिर्दे॒वहू॑तिभिः । इ॒मंस्तोमं॑ जु॒षस्व॑नः ॥ १२ ॥ २३ ॥

अग्ने॑ । शु॒क्रेण॑ । शो॒चिषा॑ । विश्वा॑भिः । दे॒वहू॑तिऽभिः । इ॒मम् । स्तोम॑म् । जु॒षस्व॑ । नः॒ ॥ १२ ॥ २३ ॥

हेअग्ने शुक्रेणशोचिषात्वदीयश्वेतवर्णदीप्त्या विश्वाभिर्देवहूतिभिः त्वत्कृतसर्वदेवताह्वानसाधनस्तोत्रैश्चयुक्तस्त्वंनोऽस्मदीयमिमंस्तोमंस्तोत्रविशेषंजुषस्वसेवस्व ॥ विश्वशब्दोविशेःक्वन्तोनित्त्वादाद्युदात्तः । देवहूतिभिः देवशब्दःपचाद्यजन्तः चित्त्वादन्तोदात्तः देवानांहूतयआह्वानान्यासुस्तुतिष्विति देवहूतयःस्तुतयः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । स्तूयतेऽनेनेतिस्तोमः अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्योमन् इत्यादिनामन् नित्त्वादाद्युदात्तः ॥ १२ ॥

१२. अग्नि ! तुम शुभ्र-प्रकाश-स्वरूप और देवों को बुलाने में समर्थ स्तोत्रों से युक्त हो। तुम हमारा यह स्तोत्र ग्रहण करो।

॥ इतिप्रथमस्यप्रथमेत्रयोविंशोवर्गः ॥ २३ ॥

सुसमिद्धइत्यादिकंद्वादशर्चमाप्रीसूक्तम् तस्यकाण्वोमेधातिथिर्ऋषिः गायत्रंछन्दः प्रत्यृचंप्रतीयमानाःसुसमिद्धतनूनपादादिकाद्वादशदेवताः तथाचानुक्रमणिकायामृक्संख्याऋषिछन्दश्चानुवृत्तिबलात्तिसिद्धवत्कृत्य देवताउदाहृताः सुसमिद्धइतीध्मः समिद्धोवाग्निस्तनूनपान्नराशंसइळोबर्हिर्देवीर्द्वारउषासानक्तादैव्यौहोतारौप्रचेतसौतिस्रोदेव्यःस्वरस्वतीळाभारत्यस्त्वष्टावनस्पतिःस्वाहाकृतयइतिप्रत्यृचंदेवताएतदाप्रीसूक्तमिति । विनियोगस्तु—पशौसुसमिद्धोनआवहेतिकाण्वमाप्रीसूक्तम् एकादशप्रयाजाइतिखण्डेसूत्रितम्—समिद्धोअद्येतिसर्वेषांयथर्षिवेति ।

तस्मिन्सूक्तेप्रथमामृचमाह—

सुसंमिद्धोनआवहदेवाँअग्नेहविष्मते । होतःपावकयक्षिच ॥ १ ॥

सुऽसंमिद्धः । नः । आ । वह । देवान् । अग्ने । हविष्मते ।
होतरिति । पावक । यक्षि । च ॥ १ ॥

हेअग्ने सुसमिद्धोनामकस्त्वंनोऽस्मदीयायहविष्मतेयजमानायतदनुग्रहार्थंदेवानावह हे-पावकशोधक होतःहोमनिष्पादकाग्ने यक्षिच यजच॥ सुसमिद्धः समःक्रियाविशेषणत्वेनगतिसं-ज्ञकत्वात्प्रादिसमासः शोभनवाचिनःसुशब्दस्यतु विशेषणंविशेष्येणबहुलमितिसमिद्धपदेन कर्मधारयःसमासः सुशब्दःप्रातिपदिकस्वरेणोदात्तः कर्मधारयेनिष्ठेतिपूर्वपदप्रकृतिस्वरत्वम् क्रियाविशेषणत्वेहिसुशब्दस्यगतित्वात्प्रादिसमासेगतिरनन्तरइतिसमोप्युदात्तत्वम् तदेवकृदु-त्तरपदप्रकृतिस्वरत्वेनस्थास्यतीतिसुशब्दोऽनुदात्तःस्यात् । देवान्अग्ने पूर्ववद्रुत्वानुनासिके । हविष्मते हविरस्यास्तीतिमतुप् तसौमत्वर्थेइतिभत्वेनपदत्वस्यबाधितत्वान्नरुत्वम् । होतःपा-वकशब्दयोरामन्त्रितयोःपृथक्पृथगेवक्रियान्वयेपरस्परमसामर्थ्यात्पराङ्गवद्भावाभावात्तन्निबन्धनमै-कस्वर्यम् नचद्वितीयस्यामन्त्रितस्याष्टमिकनिघातेनैकस्वर्यम् आमन्त्रितंपूर्वमविद्यमानवदि-तिपूर्वस्याविद्यमानवत्त्वेनपदात्परत्वाभावात्पादादित्वाच्चपरस्परसामानाधिकरण्येऽपि होतरित्यस्य विशेषणत्वेसमानमेवाविद्यमानवत्त्वम् अतएवाविद्यमानवत्त्वात्सामर्थ्येऽपिनपराङ्गवद्भावइतिनै-कस्वर्यसिद्धिः अतोहोतरितिविशेष्यम् अतःपुनातीतिपावकइत्यवयवप्रसिद्धिस्वीकारेण विशेषणत्वाद्धोतरितिविशेष्यम् तच्चसामान्यवचनमितिनामन्त्रितेसमानाधिकरणेइत्यविद्यमानव-त्त्वप्रतिषेधात् पदात्परत्वादपादादित्वाच्च द्वितीयामन्त्रितस्याष्टमिकनिघातेनवा पराङ्गवद्भावेसति शेषनिघातेनवासर्वानुदात्तत्वसिद्धिः। यक्षि यजेर्लोटःसिपि बहुलंछन्दसीतिशपोलुक् व्रश्चादिनाष-त्वम् षढोःकःसीतिकत्वम् सेर्हिरादेशश्छान्दसत्वान्नभवति सिपःपित्त्वेनानुदात्तत्वाद्धातुस्वरएव शिष्यते नचतिङ्ङतिङइतिनिघातः पूर्वस्यपावकेत्यामन्त्रितस्याविद्यमानवत्त्वेनपदादपरत्वात् अत-एवतस्याव्यवधायकत्वेनहोतरित्यपेक्ष्यइतिनिघातःस्यादितिचेत् न यक्षिपदापेक्षयाहोतरित्यस्या-पिपूर्वत्वेनाविद्यमानत्वात् ननुनामन्त्रितेसमानाधिकरणेइतितस्यनिषिद्धमविद्यमानवत्त्वम् नचपा-वकपदस्याविद्यमानवत्त्वेनसमानाधिकरणपरत्वाभावः यक्षिपदस्यैवहिकार्यंप्रति पावकपदंपूर्व-त्वादविद्यमानवत्स्यात् होतःपदकार्यंप्रतिविद्यमानवत्त्वप्रतिषेधंप्रतितुपरत्वाद्विद्यमानवदेवेतिभवत्ये-

वहोतरित्यस्याविद्यमानवत्त्वप्रतिषेधः अतस्तस्यविद्यमानवत्त्वात्तदपेक्षयायक्षीत्यस्यनिघातःप्रा- मोत्येव सत्यम् अत्रयक्षीत्यस्यचशब्दपरत्वाच्चादिषुचेतिनिघातप्रतिषेधोभविष्यतीत्यदोषः॥१॥

१. हे सुखमिद्ध नामक अग्नि! हमारे यजमान के पास देवताओं को ले आओ। पावक! देवाह्वानकारी! यज्ञ सम्पादन करो।

मधुमन्तंतनूनपाद्यज्ञंदेवेषुनःकवे। अद्याकृणुहिवीतये ॥ २ ॥

मधुऽमन्तम्। तनूऽनपात्। यज्ञम्। देवेषु। नः। कवे। अद्य।
कृणुहि। वीतये॥ २ ॥

हेकवे मेधाविन् अग्नेतनूनपादेतन्नामकत्वंअद्यास्मिन्दिनेनोऽस्मदीयंमधुमन्तंरसवन्तं यज्ञंहविः वीतयेभक्षणार्थं देवेषु कृणुहि कुरु प्रापयेत्यर्थः॥ मधुमन्तं फलिपाटिनमि- मनिजनांगुक्पटिनाकिधतश्चेति मन्यतेरुप्रत्ययोधकारश्चान्तादेशः निदित्यनुवृत्तेः प्रत्यय- स्यनित्त्वादाद्युदात्तोमधुशब्दः। तनूनपात् आमन्त्रितनिघातः। अद्य सद्यःपरुत्परारीत्यादिना अस्मिन्कालेइत्यर्थेद्यप्रत्ययान्तोनिपातितःप्रत्ययस्वरेणान्तोदात्तः तद्धितश्चासर्वविभक्तिरित्यव्य- यत्वादव्ययादाप्सुपइत्युपरिसप्तम्यालुक् संहितायामन्येषामपिदृश्यतइतिदीर्घत्वम् कृणुहि कृ- विहिंसाकरणयोश्च इदितोनुम्धातोरितिनुम् लोटःसेर्हिरादेशः धिन्विकृण्व्योरचेतिशपोपवा- दोविकरणउप्रत्ययः तत्सन्नियोगेनचवकारस्यअकारः तस्यातोलोपइतिलोपः तस्यस्थानि- वद्भावाल्लघूपधगुणोनभवति उतश्चप्रत्ययादसंयोगपूर्वादितिहेर्लुग्नभवति उतश्चप्रत्ययाच्छन्दो- वावचनमितिवचनात् तिङ्ङतिङइतिनिघातः। वीतये मन्त्रेवृषेषपचमनविदभूवीराउदात्तइति क्तिन्नुदात्तः॥ २ ॥

२. हे मेधावी तनूनपात् नामक अग्नि! हमारे रसस यज्ञ को आज उपभोग के लिए देवों के पास ले जाओ।

नराशंसमिहप्रियमस्मिन्यज्ञउपह्वये। मधुजिह्वंहविष्कृतम् ॥ ३ ॥

नराशंसम्। इह। प्रियम्। अस्मिन्। यज्ञे। उप। ह्वये।
मधुऽजिह्वम्। हविःऽकृतम्॥ ३ ॥

इहदेवयजनदेशेअस्मिन्प्रवर्तमानेयज्ञेनराशंसमेतन्नामकमग्निं उपह्वयेआह्वयामि की- दृशंप्रियंदेवानांप्रीतिहेतुं मधुजिह्वं मधुरभाषिजिह्वोपेतं माधुर्यरसास्वादकजिह्वोपेतंवा हविष्कृतं हविषोनिष्पादकम् ॥ नरशब्दोनॄनयेइत्यस्मादबन्तः प्रत्ययस्यपित्त्वाद्धातुस्वरएवशिष्यते शंसु- स्तुतावित्यस्मिन्नितिशंसः हलश्चेत्यधिकरणेघञ् नराणांशंसइतिसमासे कृदुत्तरपदप्रकृतिस्वरत्वेप्राप्ते

उभेवनस्पत्यादिषुयुगपदितिपूर्वोत्तरपदेप्रकृतिस्वरेभवतः अतएववनस्पत्यादिषुपाठान्नरशब्दस्यदीर्घत्वम् । इह इदमोहइतिहप्रत्ययः इदमइशितीशादेशः प्रत्ययस्वरः । प्रियम् प्रीणातीतिप्रियः इगुपधज्ञाप्रीकिरःकइतिकः प्रत्ययस्वरः । अस्मिन् ऊडिदमित्यादिनाविभक्तेरुदात्तत्वम्। ह्वये निघातः। मधुशब्दस्यआद्युदात्तत्वमुक्तम् बहुव्रीहौपूर्वपदप्रकृतिस्वरेणसएवशिष्यते । हविष्कृतं हविःकरोतीतिहविष्कृत् क्विपिह्रस्वस्यतुक् नित्यंसमासेनुत्तरपदस्थस्येतिषत्वम् कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ ३ ॥

३. इस यजन-देश में, इस यज्ञ में प्रिय, मधुजिह्व और हव्य-सम्पादक नराशंस नामक अग्नि को हम आह्वान करते हैं।

अग्ने॑सु॒खत॑मे॒रथे॑दे॒वाँई॑ळि॒तआव॑ह । असि॒होता॒मनु॑र्हितः ॥ ४ ॥

अग्ने॑ । सु॒खऽत॑मे । रथे॑ । दे॒वान् । ई॒ळि॒तः । आ । व॒ह॒ । असि॑ होता॑ । मनु॑ःऽहितः ॥ ४ ॥

इट्शब्दाभिधेयहेअग्ने ईळितोऽस्माभिःस्तुतःसन् सुखतमेअतिशयेनसुखहेतौ कस्मिंश्चिद्रथे देवान्स्थापयित्वाकर्मभूमावावह इट्शब्दाभिधेयत्वमत्रसूचयितुंईडितइतिविशेषणम् मनुर्हितः मनुनामत्रेणमनुष्येणवायजमानादिरूपेणहितोत्रस्थापितः त्वंहोतादेवानामाह्वातासि सुखतमेसुखमस्मिन्नस्तीतिमतुप् तस्यगुणवचनेभ्योमतुपोलुग्वक्तव्यइतिलुक् अतिशयेनसुखःसुखतमः तमपोनुदात्तत्वात्प्रातिपदिकस्वरः । रथे रमुक्रीडायां रमन्तेऽस्मिन्नितिरथः हनिकुषिनीरमिकाशिभ्यः क्थन्नितिक्थन् एकाचउपदेशेऽनुदात्ताव इतीट्प्रतिषेधः अनुदात्तोपदेशेत्यादिनामकारलोपः नित्त्वादाद्युदात्तत्वम्।ईडितः ईडस्तुतौ निष्ठेतिक्तः इडागमः तस्य आगमाअनुदात्ताइत्यनुदात्तः प्रत्ययस्वरः । देवानितिनकारस्यसंहितायांदीर्घादटिसमानपादेइतिरुत्वम् आतोटिनित्यमित्याकारस्यानुनासिकभावः भोभगोअघोइत्यादिनारोर्यत्वम् तस्य लोपःशाकल्यस्येति यलोपः तस्यासिद्धत्वादाद्गुणोनभवति । आ निपातत्वादाद्युदात्तः। असि असभुवि लटःसिप् अदिप्रभृतिभ्यःशपइतिशपोलुक् तासस्त्योर्लोपइतिसकारस्यलोपः। होता ताच्छील्येतृन् सौ ऋदुशनइत्यादिनाअनङ् ङित्त्वादन्तादेशः अप्तृन्नित्यादिनाउपधादीर्घः हल्ङ्यादिलोपौ नित्त्वादाद्युदात्तः । मनुर्हितः मन्यतइतिमनुः मनज्ञाने शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्चेत्युप्रत्ययः तत्रनिदित्यनुवृत्तेर्नित्त्वादाद्युदात्तः हितः दधातेर्धातोर्निष्ठेतिकर्मणिक्तः दधातेर्हिरितिहिरादेशः मनुनाहितइतिसमासे तृतीयायाःस्थानेसुपांसुलुगित्यादिनासुइत्यादेशः तस्य रुत्वं लुगभावश्छान्दसः तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरत्वम् ॥ ४ ॥

४. हे इलित (इला) अग्नि! सुखकारी रथ पर देवों को ले आओ। मनुष्यों-द्वारा तुम देवों को बुलानेवाले समझे जाते हो।

पञ्चमीमृचमाह—

स्तृणीतबर्हिरानुषग्घृतपृष्ठंमनीषिणः । यत्रामृतस्यचक्षणम् ॥ ५ ॥

स्तृणीत । बर्हिः । आनुषक् । घृतऽपृष्ठम् । मनीषिणः । यत्र ।
अमृतस्य । चक्षणम् ॥ ५ ॥

हेमनीषिणोबुद्धिमन्तऋत्विजः बर्हिर्दर्भं स्तृणीत वेदेरुपर्याच्छादयत अत्रापिबर्हिर्नामकोऽग्निःसूच्यते कीदृशं बर्हिरास्तरणीयम् आनुषक् अनुक्रमेणसक्तं परस्परसंबद्धम् घृतपृष्ठं घृतपूर्णानांस्रुचांबर्हिष्यासादितत्वाद्घृतं पृष्ठे उपरिभागेयस्यबर्हिषः तद्घृतपृष्ठं यत्रयस्मिन्बर्हिषि अमृतस्यामृतसमानस्यघृतस्यचक्षणंदर्शनंभवति यद्वा मरणरहितस्यदेवस्य बर्हिर्नामकस्याग्नेर्दर्शनंभवति तद्बर्हिःस्तृणीतेतिपूर्वत्रान्वयः ॥ स्तृणीत स्तृञ्आच्छादने लोण्मध्यमपुरुषस्यबहुवचनं लोटोलङ्वत् तस्थस्थमिपामितिथस्यतादेशः क्र्यादिभ्यःश्ना ईहल्यघोरितीत्वम् ऋवर्णाच्चेतिवक्तव्यमितिणत्वम् प्वादीनांह्रस्वइतिधातोर्ह्रस्वत्वम् सतिशिष्टस्वरबलीयस्त्वमन्यत्रविकरणेभ्यः अतस्तिङएवप्रत्ययस्वरेणोदात्तत्वम् । बर्हिः बृंहेर्नलोपश्चेतीन्प्रत्ययनलोपौ प्रत्ययस्वरः । आसमन्तादनुषजतीत्यानुषक् षंजसंगे धात्वादेःषःसः क्विप्चेतिक्विप् अनिदितामितिनलोपः आङ्न्वोरुपसर्गयोःप्राक्प्रयोगः गतिसमासः उपसर्गात्सुनोतीत्यादिनाषत्वम् । घृतपृष्ठं घृक्षरणदीप्त्योः निष्ठेतिक्तः प्रत्ययस्वरेणोदात्तः घृतयुक्तं पृष्ठमस्येतिबहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । मनीषिणः आमन्त्रितनिघातः । अमृतस्य नविद्यतेमृतंमरणमस्मिन्नित्यमृतम् बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वंबाधित्वा नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वेप्राप्ते नञोजरमरमित्रमृताइत्युत्तरपदाद्युदात्तत्वम् । चक्षणं चक्षिङ्व्यक्तायांवाचि वागभिव्यक्तिवाचीधातुरिहाभिव्यक्तिमात्रंलक्षयतिल्युट्चेतिभावेल्युट् योरनादेशः तस्यार्धधातुकत्वात् चक्षिङःख्याञिति ख्याञादेशेप्राप्ते अनसोश्चेतिप्रतिषेधः ॥ ५ ॥

५. बुद्धिशाली ऋत्विक्! परस्पर-संबद्ध और घी से आच्छादित बर्हिः-(अग्नि)-कुश विस्तार करो। कुश के ऊपर घी दिखाई देता है।

षष्ठीमृचमाह—

विश्रयन्तामृतावृधोद्वारोदेवीरसश्चतः । अद्यानूनंचयष्टवे ॥ ६ ॥ २४ ॥

वि । श्रयन्ताम् । ऋतऽवृधः । द्वारः । देवीः । असश्चतः ।
अद्य । नूनम् । च । यष्टवे ॥ ६ ॥ २४ ॥

द्वारोयज्ञस्यशालाद्वाराणि विश्रयन्तां कपाटोद्घाटनेनविश्रियन्तां कीदृश्यः ऋतावृधः ऋतस्यसत्यस्य यज्ञस्यवा वर्धयित्र्यः देवीर्द्योतमानाः असश्चतः असश्चन्त्यउद्घाटनेनप्रवेष्टुपुरुषसंगर-

हिताः यद्वा असश्चतः प्रविष्टपुरुषरहितान्यज्ञगृहान् तत्पुरुषप्रवेशायद्वाराभिमानिन्यएतत्संज्ञकाअग्निविशेषमूर्तयोविश्रयन्तां विशेषेणसेवन्ताम् द्वारसेवयातत्रपुरुषप्रवेशेनवाकिंप्रयोजनमितिवदुच्यते अद्यास्मिन्दिनेनूनमवश्यं यष्टवे यष्टुं चकारादिनान्तरेष्वपीतिद्रष्टव्यम् ॥ ऋतावृधः ऋतं वर्धयन्तीत्यर्थे वृधेरन्तर्भावितण्यर्थात्क्विप्चेतिक्विप् उपपदसमासः अन्येषामपिदृश्यतइतिपूर्वपदस्यदीर्घत्वम् वृधिर्धातुस्वरेणोदात्तः समासेकृदुत्तरपदप्रकृतिस्वरत्वेनसएवशिष्यते । देवीः वाछन्दसीतिपूर्वसवर्णदीर्घत्वम् देवशब्दात्पचाद्यजन्तात्पुंयोगादाख्यायामितिङीष् प्रत्ययस्वरेणोदात्तः विभक्त्यासहैकादेशउदात्तेनोदात्तइत्युदात्तः । असश्चतः ष्वञ्जसञ्जगतौ जकारस्यव्यत्ययेनचकारः लटःशत्रादेशः द्वाराभावे नविद्यन्ते सश्चन्तोगच्छन्तोयेषुप्राग्वंशादिषुतान् असश्चतः । अद्य सद्यःपरुदित्यादिनाद्यप्रत्ययान्तोनिपातितः तद्धितश्चासर्वविभक्तिरित्यव्ययसंज्ञकत्वात्परस्याविभक्तेर्लुक् प्रत्ययस्वरेणान्तोदात्तः संहितायामन्येषामपिदृश्यतइतिदीर्घत्वम् । नूनं एवमादीनामन्तइत्यन्तोदात्तत्वम । यष्टवे यजेस्तुमर्थेसेसेनित्यादिनातवेन्प्रत्ययः व्रश्चादिनाषत्वम् नित्त्वादाद्युदात्तः ॥ ६ ॥

६. यज्ञशाला का द्वार खोला जाय। वह द्वार यज्ञ का परिवर्द्धक है। द्वार प्रकाशमान और जन-रहित था। आज अवश्य यज्ञ सम्पादन करना होगा।

सूक्तेसप्तमीमृचमाह—

नक्तोषासासुपेशसास्मिन्यज्ञउपह्वये । इदंनोबर्हिरासदे ॥ ७ ॥

नक्तोषसा । सुऽपेशसा । अस्मिन् । यज्ञे । उप । ह्वये । इदम् । नः । बर्हिः । आऽसदे ॥ ७ ॥

नक्तशब्दउषःशब्दश्चलोकेकालविशेषवाचिनौ इहतुतत्कालाभिमानिवह्निमूर्तिद्वयेप्रयुज्येते नक्तोषासा नक्तोषोनामिकेवह्निमूर्ती अस्मिन्प्रवर्तमानेयज्ञकर्मणि उपह्वये आह्वयामि किमर्थं नोऽस्मदीयमिदंवेद्यामास्तीर्णंबर्हिर्दर्भं आसदे आसत्तुंप्राप्तुं कीदृश्यौ सुपेशसा शोभनरूपयुक्ते ॥ नक्तंचउषाश्चनक्तोषासा द्वितीयाद्विवचनस्यसुपांसुलुगित्याकारः मलोपउपधादीर्घश्चछान्दसौ देवताद्वन्द्वेचेतिपूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम् । सुपेशसा शोभनंपेशोरूपंययोस्ते पूर्ववदाकारः । पेशःशब्दोनविषयत्वादाद्युदात्तः बहुव्रीहौनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वस्यापवादत्वेन आद्युदात्तंद्व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वम् । अस्मिन् ऊडिदमित्यादिनाविभक्तिरुदात्ता ।आसदे षद्लृविशरणगत्यवसादनेषु धात्वादेःषःसः आङ्पूर्वादस्मात्संपदादिःभावेक्विप् प्रादिसमासः कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ ७ ॥

७. सौंदर्यशाली रात्रि और उषा (अग्नि) को अपने इन कुशों पर बैठने के लिए इस यज्ञ में हम बुलाते हैं।

अष्टमीमृचमाह—

तासुजिह्वाउपह्वयेहोतारादैव्याकवी। यज्ञंनोयक्षतामिमम्॥ ८॥

ता। सुऽजिह्वौ। उप। ह्वये। होतारा। दैव्या। कवी इति।
यज्ञम्। नः। यक्षताम्। इमम्॥ ८॥

तच्छब्दोऽत्रसर्वनामत्वात्प्रसिद्धार्थवाची ता तौ याज्ञिकानांप्रसिद्धौद्वावग्नीउपह्वये आह्वयामि नोऽस्मदीयमिमंयज्ञं यक्षतां तावुभौयजतामनुतिष्ठताम् कीदृशौ सुजिह्वौ शोभनजिह्वोपेतौ प्रियवचनौशोभनज्वालौवेत्यर्थः होतारा होमनिष्पादकौ दैव्या दैव्यौ देवसंबन्धिनौ अतएवेमावग्नी दैव्यहोतृनामकौ कवी मेधाविनौ॥ता तौ द्वितीयाद्विवचनस्यसुपांसुलुगित्याकारः एकादेशउदात्तेनोदात्तइत्युदात्तः। सुजिह्वौ शोभनाजिह्वाययोस्तौ नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् पूर्ववदेकादेशस्वरः संहितायामावादेशः तस्य लोपःशाकल्यस्येतिलोपः। होतारा जुहोतेस्तृन् द्विवचनेऋतोङीतिगुणः अप्तृन्नित्युपधादीर्घः पूर्ववदाकारः नित्त्वादाद्युदात्तः। दैव्या देवानामिमौ देवाद्यञञावितियञ् यस्येतिचेत्यकारलोपः ञ्नित्यादिर्नित्यमित्याद्युदात्तः पूर्ववदाकारः। यक्षतां यजतां लोटिशपिपरतःसिब्बहुलंलेटीतिबहुलग्रहणात्सिप् कुत्वचर्त्वषत्वानि॥ ८॥

८. सुजिह्व, मेधावी और आह्वानकारी देव-द्वय (अग्नि) को बुलाता हूँ। वे हमारा यह यज्ञ सम्पादन करें।

नवमीमृचमाह—

इळासरस्वतीमहीतिस्रोदेवीर्मयोभुवः। बर्हिःसीदन्त्वस्रिधः॥ ९॥

इळा। सरस्वती। मही। तिस्रः। देवीः। मयःऽभुवः। बर्हिः।
सीदन्तु। अस्रिधः॥ ९॥

अत्रमहीशब्दोमहत्वगुणयुक्तांभारतीमाचष्टे अन्येष्वाप्रीसूक्तेषुसदृशेष्विळासरस्वतीभारतीत्याम्नातत्वादिळादिशब्दाभिधेयावह्निमूर्तयस्तिस्रोदेवीर्दीप्यमानाबर्हिर्वेद्यामास्तीर्णं सीदन्तुप्राप्नुवन्तु कीदृश्यः मयोभुवः सुखोत्पादिकाः अस्रिधः शोषणक्षयेणवारहिताः॥ इळा ईडस्तुतौ छान्दसंह्रस्वत्वम् क्विप् धातुस्वरः टापंचैवहलन्तानांयथावाचानिशादिशेतिटाप्। सरस्वती सरः असुन्नन्तोनित्त्वादाद्युदात्तः तदस्यास्तीतिमतुप् अदुपधत्वाद्वत्वं तसौमत्वर्थेइतिभत्वेनपदत्वस्यबाधितत्वात् रुत्वाद्यभावः उगितश्चेतिङीप् मतुप्ङीपौपित्त्वादनुदात्तौ। मही महतीशब्देतकारलोपश्छान्दसः यस्येतिचेत्यकारलोपः उदात्तनिवृत्तिस्वरेणङीपउदात्तत्वम्

तिस्रः त्रिशब्दाज्जसि त्रिचतुरोःस्त्रियांतिसृचतसृइतितिसृआदेशः अचिरऋतइतिरेफादेशः। तिसृभ्योजसइतिजसउदात्तत्वम्। देवीः देवानांपत्न्योदेव्यः पुंयोगादाख्यायामितिङीष् यस्येतिचेत्यकारलोपः प्रत्ययस्वरेणङीषउदात्तत्वम् जसि दीर्घाज्जसिचेतिनिषिद्धंदीर्घत्वं वाछन्दसीतिपक्षेऽभ्यनुज्ञायते। मयोभुवः मीञ्हिंसायां हिनस्तिदुःखमितिसुखंमयस्तद्भावयन्तीतिमयोभुवः अन्तर्भावितण्यर्थाद्भुवःक्विप् कृदुत्तरपदप्रकृतिस्वरत्वम्।बर्हिः बृंहेर्नलोपश्चेतिइसिप्रत्ययः प्रत्ययस्वरः। सीदन्तु षद्लृविशरणादौ पाघ्रेत्यादिनासीदादेशः। अस्रिधः स्रिधेर्हिंसार्थस्यशोषणार्थस्यवासंपदादिभ्योभावेक्विपिनञ्बहुव्रीहिः पूर्वपदप्रकृतिस्वरंबाधित्वानञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्॥ ९॥

९. सुखदात्री और अविनाशिनी इला, सरस्वती और मही आदि तीनों देवियाँ (अग्नि) इन कुशों पर विराजें।

पत्नीसंयाजेत्वष्टुःपुरोनुवाक्या इहत्वष्टारमग्रियमिति शंयुवाकायसंप्रेषितइतिखण्डेसूत्रितम्—सन्त्वेपयांसिसमुयन्तुवाजाइहत्वष्टारमग्रियमिति।

तामेतांपुरोनुवाक्यांसूक्तेदशमीमृचमाह—

इहत्वष्टारमग्रियंविश्वरूपमुपह्वये। अस्माकमस्तुकेवलः॥ १०॥

इह। त्वष्टारम्। अग्रियम्। विश्वऽरूपम्। उप। ह्वये।
अस्माकम्। अस्तु। केवलः॥ १०॥

त्वष्टारंत्वष्टृनामकमग्निंइहकर्मण्युपह्वये कीदृशं अग्रियं श्रेष्ठं विश्वरूपं बहुविधरूपोपेतं सोऽस्माकंकेवलोसाधारणोऽस्तु इतरयजमानेभ्योऽप्यधिकमनुग्रहंकरोत्वित्यर्थः॥ त्वष्टारं तक्षूत्वक्षूतनूकरणे तृन् स्वरतिसूतिसूयतिधूञूदितोवेतीडभावपक्षे स्कोःसंयोगाद्योरन्तेचेतिककारलोपः ष्टुत्वं द्वितीयैकवचने ऋतोङिसर्वनामस्थानयोरितिगुणे अप्तृन्नित्यादिनाउपधायादीर्घः तृनोनित्त्वादाद्युदात्तत्वम्। अग्रियं अग्रादित्यनुवृत्तौ घच्छौचेतिघच् आयनेयीत्यादिनाघकारस्यइयादेशः यस्येतिचेत्यलोपः आयन्नादिषूपदेशिवचनंस्वरसिद्ध्यर्थमितिउपदेशिवद्भावात् प्रत्ययाद्युदात्तत्वात् घचश्चित्त्वादन्तोदात्तत्वम्। विश्वरूपं विश्वानिरूपाणि त्वष्टृत्वेनयस्य त्वष्टावैपशूनांमिथुनानांरूपकृदितिश्रुतेः[1]॥ विश्वशब्दस्याद्युदात्तत्वात् पूर्वपदप्रकृतिस्वरत्वेप्राप्ते बहुव्रीहौविश्वंसंज्ञायामितिपूर्वपदान्तोदात्तत्वम्। अस्माकं असुक्षेपणे युष्यसिभ्यांमदिक् प्रत्ययस्वरेणान्तोदात्तः षष्ठीबहुवचनमाम् अत्रपरमपियोऽचीतियत्वंबाधित्वानित्यत्वात्प्रतिपदविधित्वाच्च सामआकमादेशेकृते अनादेशइति निषेधेनयत्वाभावाच्छेषेलोपइतिदकारलोपेअकरा-

---

१ तै० सं. ६.३.६.

न्तत्वेनपश्चात्प्राप्तस्यापिसुटः सामइतिनिर्देशोस्थानिन्यन्तर्भावेननिवृत्तिः एवमर्थएवसामइतिसस्रु-ट्कनिर्देशः। केवलः वृषादेराकृतिगणत्वादाद्युदात्तः ॥ १० ॥

१०. उत्तम और नाना-रूपधारी त्वष्टा (अग्नि) को इस यज्ञ में बुलाते हैं। त्वष्टा केवल हमारे पक्ष में ही रहें।

अवसृजावनस्पतेदेवदेवेभ्योहविः। प्रदातुरस्तुचेतनम् ॥ ११ ॥

अव। सृज। वनस्पते। देव। देवेभ्यः। हविः। प्र। दातुः।
अस्तु। चेतनम् ॥ ११ ॥

हेवनस्पते एतन्नामकाग्नेदेव हविर्भुग्भ्योदेवेभ्योस्मदीयंहविरवसृज समर्पयेत्यर्थः प्रदातुर्यजमानस्यचेतनंपरलोकविषयंविज्ञानं त्वत्प्रसादादस्तु ॥ वनस्पते आमन्त्रितनिघातः ॥ देव पादादित्वान्ननिघातः षाष्ठिकमामन्त्रिताद्युदात्तत्वम्। हविः इसःप्रत्ययस्वरः। दातुः ददातेस्तृच् चितइत्यन्तोदात्तः ङसि ऋतउदित्युत्वम् रपरत्वंच रात्संस्येतिसलोपः एकादेशस्वरेणोकारउदात्तः। चेतनं चितीसंज्ञाने करणेल्युट् योरनादेशः लघूपधगुणः लितीतिप्रत्ययात्पूर्वस्योदात्तत्वम् ॥ ११ ॥

११. हे देव वनस्पति! देवों को हव्य समर्पण करो, जिससे हव्यदाता को परम ज्ञान उत्पन्न हो।

स्वाहायज्ञंकृणोतनेन्द्राययज्वनोगृहे। तत्रदेवाँउपह्वये ॥ १२ ॥ २५ ॥

स्वाहा। यज्ञम्। कृणोतन। इन्द्राय। यज्वनः। गृहे।
तत्र। देवान्। उप। ह्वये ॥ १२ ॥ २५ ॥

स्वाहाशब्दोहविःप्रदानवाचीसन् एतन्नामकमग्निविशेषंलक्षयति तदग्निसंपादितंयज्ञं इन्द्रायइन्द्रतुष्ट्यर्थं यज्वनोयजमानस्यगृहे ऋत्विजः कृणोतन कुरुत तत्रयज्ञे देवानुपह्वये ॥ कृणोतन कृविहिंसाकरणयोश्च इदित्त्वान्नुम् लोण्मध्यमबहुवचनस्य तस्थस्थमिपामितितादेशः तप्तनप्तनथनाश्चेतितनबादेशः शपिप्राप्तेधिन्विकृण्व्योरचेतिउप्रत्ययः तत्सन्नियोगेनवकारस्यचअकारस्तस्यातोलोपइतिलोपस्तस्यअचःपरस्मिन्निितिस्थानिवद्भावादृकारस्यलघूपधगुणोनभवति तनपःपित्त्वेनङित्त्वादुकारस्यगुणः। इन्द्राय ऋजेन्द्रेत्यादिनारन् नित्त्वादाद्युदात्तः। यज्वनः यजदेवपूजासंगतिकरणदानेषु सुयजोर्ङ्वनिप् ङसि भसंज्ञायामल्लोपेप्राप्ते नसंयोगाद्वमन्तादिति निषेधः वनिपःपित्त्वेनधातुस्वरएवशिष्यते गृहे ग्रहउपादाने गेहेकइतिकप्रत्ययः ग्रहिज्येत्यादिनासंप्रसारणं परपूर्वत्वं प्रत्ययस्वरः। तत्रत्रल् लितीतिप्रत्ययात्पूर्वस्योदात्तत्वम्। देवाँ

उपेत्यत्रसंहितायां दीर्घादटीतिनकारस्यरुत्वम् आतोऽटिनित्यमित्याकारस्यानुनासिकादेशः भो-भगोइतियत्वम् तस्य लोपःशाकल्यस्येतिलोपः ॥ १२ ॥

१२. इन्द्र के लिए यजमान के घर में स्वाहा-द्वारा यज्ञ सम्पन्न करो। उसी यज्ञ में हम देवों को बुलाते हैं।

इतिप्रथमस्यप्रथमेपञ्चविंशोवर्गः ॥ २५ ॥

ऐभिरग्नेइत्यादिकस्यद्वादशर्चस्यसूक्तस्य ऋषिच्छन्दसीपूर्ववत् तच्चसूक्तंबहुदेवताकं अत-एवानुक्रम्यते ऐभिर्वैश्वदेवमिति विनियोगः व्यूढद्वादशाहस्यप्रथमेछन्दोमेतृतीयसवनेवैश्वदेव-शस्त्रे—ऐभिरग्नेदुवोगिरइतिसूक्तं　तथाचसूत्रितम्—अथछन्दोमाःसमुद्रादूर्मिरित्युपक्रम्यैभिरग्ने-दुवोगिरइतिवैश्वदेवम् ।

प्रथमामृचमाह—

ऐभिरग्नेदुवोगिरोविश्वेभिःसोमपीतये। देवेभिर्याहियक्षिच ॥ १ ॥

आ। एभिः। अग्ने। दुवः। गिरः। विश्वेभिः। सोमऽपीतये।
देवेभिः। याहि। यक्षि। च ॥ १ ॥

हेअग्नेएभिरस्मिन्यज्ञेसंभावितैः　विश्वेभिर्देवैःसहसोमपीतये　सोमपानोपेतयागार्थंदुवोऽस्मदीयांपरिचर्यां गिरोऽस्मदीयाःस्तुतीश्चप्रति आयाहिआगच्छ यक्षिआगत्ययजच॥एभिःपूर्व-निर्दिष्टानदेवानामिदमापरामर्शादिदमोऽन्वादेशेशनुदात्तस्तृतीयादावित्यशनुदात्तः शित्वात्सर्वा-देशः नेदमदसोरकोरितिभिसऐसादेशाभावः　विभक्तिरनुदात्तैव नचऊडिदमित्यादिनाविभक्ते-रुदात्तत्वम् तत्रान्तोदात्तादित्यधिकारात् । दुवः नब्विषयस्यानिसन्तस्येत्याद्युदात्तत्वम् । वि-श्वेभिः विश्वशब्दोविशेःक्वन्तोनित्त्वादाद्युदात्तः बहुलंछन्दसीतिभिसऐस्नभवति बहुवचनेझ-ल्येदित्येत्वम्। सोमपीतये सोमशब्दः अर्तिस्तुस्वित्यादिनामन्नन्तोनित्त्वादाद्युदात्तः सोमस्य पीतिर्यस्मिन्यागेससोमपीतिः। तस्मै तादर्थ्येचतुर्थी। देवेभिः बहुलंछन्दसीतिभिसऐसादेशाभावः बहुवचनेझल्येदित्येत्वम् । यक्षि यजेर्लोटःसिप् बहुलंछन्दसीतिशपोलुक् व्रश्चादिनाषत्वम् षढोःकःसीतिकत्वं सेर्हिरादेशश्छान्दसत्वान्नभवति सिपःपित्त्वेनानुदात्तत्वाद्धातुस्वरएव ॥ १ ॥

१. अग्निदेव! इन विश्वदेवों के साथ सोमरस पीने के लिए हमारी परिचर्या और हमारी स्तुति ग्रहण करने पधारो। हमारे यज्ञ का सम्पादन करो।

आत्वाकण्वाअहूषतगृणन्तिविप्रतेधियः। देवेभिरग्नआगहि ॥ २ ॥

आ। त्वा। कण्वाः। अहूषत। गृणन्ति। विप्र। ते। धियः।
देवेभिः। अग्ने। आ। गहि ॥ २ ॥

हेविप्र मेधाविन्नग्ने कण्वामेधाविनः ऋत्विजः त्वा यज्ञनिष्पादकंत्वामहूषत आह्वयन्ति तथा तेधियस्त्वदीयानिकर्माणि गृणन्ति कथयन्ति ततोहेअग्नेदेवेभिर्देवैः सहआगहिआगच्छ विप्रइत्यादिषुचतुर्विंशतिसंख्याकेषुमेधाविनामसुकण्वऋभुरितिपठितम् ॥ त्वा त्वामौद्वितीयाया-इतित्वादेशःसर्वानुदात्तः। कण्वाः कणशब्दार्थः अशिप्रुलटिकणीषीत्यादिनाक्वन् नित्त्वादा-द्युदात्तः। अहूषत ह्वेञ्स्पर्धायांशब्देच छन्दसिलुङ्लङ्लिटइतिवर्तमानेलुङ् ङित्त्वादात्मनेपदं तस्यआत्मनेपदेष्वनतइत्यदादेशः च्लेःसिच् एकाचइतीट्प्रतिषेधः बहुलंछन्दसीतिसंप्रसारणं परपूर्वत्वं हलइतिदीर्घत्वं आदेशप्रत्यययोरितिषत्वं छान्दसत्वादूकारस्यनगुणः अडागमः। गृ-णन्ति गृशब्दे लट् झि झोन्तः क्र्यादिभ्यःश्ना प्वादीनांह्रस्वइतिधातोर्ह्रस्वत्वं श्नाभ्यस्तयोरा-तइत्याकारलोपः ऋवर्णाच्चेतिवक्तव्यमितिणत्वं तिङ्स्वरएवशिष्यते । विप्र आमन्त्रितनिघा-तः। ते अनुदात्तमित्यनुवृत्तौ तेमयावेकवचनस्येतिषष्ठ्याः तेइत्यादेशः। देवेभिः छान्दसऐसो-भावः। गहि गम्लृसृप्लृगतौ लोटःसिप् सेर्ह्यपिच्च कर्तरिशप् तस्यबहुलंछन्दसीतिलुक् अनुदा-त्तोपदेशेत्यादिनामकारलोपः तस्यासिद्धवदत्राभादित्यसिद्धत्वादतोहेरितिहेर्लुग्नभवति ॥ २ ॥

२. हे मेधावी अग्नि! कण्व-पुत्र तुम्हें बुला रहे हैं, साथ ही तुम्हारे कर्मों की प्रशंसा भी कर रहे हैं। देवों के साथ आओ।

इन्द्रवायूबृहस्पतिंमित्राग्निंपूषणंभगम् । आदित्यान्मारुतंगणम् ॥३॥

इन्द्रवायू इति । बृहस्पतिम् । मित्रा । अग्निम् । पूषणम् । भगम् ।
आदित्यान् । मारुतम् । गणम् ॥ ३ ॥

इन्द्रादिदेवान्मारुतंमरुतांवायूनांसंबन्धिनंगणंच हेअग्ने यक्षीतिपदद्वयमनुवर्तते ॥ इन्द्र-श्चवायुश्चइन्द्रवायू देवताद्वन्द्वेचेतिप्राप्तस्यानङउभयत्रवायोःप्रतिषेधोवक्तव्यइतिप्रतिषेधः दे-वताद्वन्द्वेचेतिप्राप्तस्योभयपदप्रकृतिस्वरस्य नोत्तरपदेनुदात्तादावितिनिषेधः समासान्तोदात्तत्वमे-व। बृहस्पतिं तद्बृहतोःकरपत्योश्चोरदेवतयोरभिधेययोःसुट्तलोपोवक्तव्यइतितलोपः सुडाग-मश्च बृहच्छब्दमाद्युदात्तंकेचिद्वर्णयन्तीतिवामनः पारक्षणे पातीतिपतिः पातेर्डतिः प्रत्ययस्वरेणा-द्युदात्तः समासे उभेवनस्पत्यादिषुयुगपदितिउभयपदप्रकृतिस्वरत्वम्। मित्रा द्वितीयायाःसुपां-सुलुगित्यादिनाविभक्तेराजादेशः। आदित्यान् अदितेरपत्यानिआदित्याः दित्यदित्यादित्यप-त्युत्तरपदाण्ण्यः प्रत्ययस्वरः। मारुतं मरुतांविकारः अनुदात्तादेरञ् ञित्त्वादाद्युदात्तः॥ ३ ॥

३. इन्द्र, वायु, बृहस्पति, मित्र, अग्नि, पूषा, भग, आदित्य और मरुद्गण को यज्ञ-भाग दान करो।

चतुर्थीमृचमाह—

प्रवोंभ्रियन्तइन्दंवोमत्सरामादयिष्णवंः। द्रप्सामध्वंश्चमूषदंः ॥ ४ ॥

प्र । वः । भ्रियन्ते । इन्दवः । मत्सराः । मादयिष्णवः । द्रप्साः ।
मध्वः । चमूऽसदः ॥ ४ ॥

हेइन्द्रादिदेवाः वोयुष्मदर्थमिन्दवः सोमाः प्रभ्रियन्ते प्रकर्षेणसंपाद्यन्ते कीदृशाः मत्सरास्तृप्तिकराः मत्सरःसोमोमन्दतेस्तृप्तिकर्मणइतियास्कः । मादयिष्णवः हर्षहेतवः द्रप्साः बिन्दुरूपाः मध्वः मधुराः चमूषदः चमूषु चमसादिपात्रेष्ववस्थिताः ॥ प्र व्यवहिताश्चेतिव्यवहितप्रयोगः । भ्रियन्ते भ्रिञोयकि रिङ्शयग्लिङ्क्षुइतिरिङादेशः हञोवा हग्रहोर्भश्छन्दसीतिहकारस्यभकारः । इन्दवः उन्दीक्लेदने उन्दन्तिपात्राणीति निदित्यनुवृत्तौ उन्देरिच्चादेरितिउप्रत्ययः आदेरिकारश्च नित्त्वादाद्युदात्तत्वम् । मत्सराः मदतृप्तियोगे चिदित्यनुवृत्तौ कृधूमादिभ्यःकिदितिसरप्रत्ययः तितुत्रतथसिसुसरकसेषुचेतीट्प्रतिषेधः चित्त्वादन्तोदात्तः । मादयिष्णवः मदीहर्षग्लेपनयोः मदेर्ण्यन्तात् णेश्छन्दसीतिइष्णुच् णेरनिटीतिणिलोपेप्राप्ते अयामन्ताल्वाय्येत्न्विष्णुष्विति अयादेशः चित्त्वादन्तोदात्तः । मध्वः मधुशब्दआद्युदात्तउक्तः मधुशब्दस्यव्यत्ययेनपुंल्लिंगत्वम् संज्ञापूर्वकोविधिरनित्यइति जसिचेतिगुणोनभवति । चमूषदः चमुछमुजमुझमुअदने चम्यते भक्ष्यतेयेषुचमसेषु ते चम्वः कृषिचमीत्यादिनाऊः तत्रसीदन्तीतिचमूषदः सत्सूद्विषेत्यादिनाक्विप् सुषामादेराकृतिगणत्वात्षत्वम् कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ ४ ॥

४. तुम लोगों के लिए तृप्तिकर, प्रसन्नता-वाहक, विन्दु-रूप, मधुर और पात्र-स्थित सोमरस तैयार हो रहा है।

पञ्चमीमृचमाह—

ईळतेत्वामवस्यवःकण्वासोवृक्तबर्हिषः । हविष्मन्तोअरंकृतः ॥ ५ ॥

ईळते । त्वाम् । अवस्यवः । कण्वासः । वृक्तऽबर्हिषः ।
हविष्मन्तः । अरम्ऽकृतः ॥ ५ ॥

हेअग्ने त्वां ईळते ऋत्विजःस्तुवन्ति कीदृशाः अवस्यवः अवनंरक्षणं तद्धेतून् देवानिच्छन्तः कण्वासोमेधाविनः वृक्तबर्हिषः आस्तरणार्थंछिन्नदर्भाः हविष्मन्तोहविर्युक्ताः अरंकृतः अलंकर्तारः ॥ ईळते ईडस्तुतौ अनुदात्तेत्त्वात्लटोझ अदिप्रभृतिभ्यःशपइतिशपोलुक् झस्यान्तादेशः टेरेत्वं तास्यनुदात्तेत्यादिनालसार्वधातुकस्यानुदात्तत्वात् धातुस्वरःशिष्यते । अवस्यवः अवन्तीत्यवादेवाः तानतिशयेनेच्छन्ति सुपआत्मनःक्यच् क्यचिचेतिईत्वंनभवति नच्छन्दस्यपुत्रस्येतिनिषेधात्सर्वप्रातिपदिकेभ्योलालसायांसुग्वक्तव्यइतिसुक् क्याच्छन्दसीत्युप-

१ नि० ११. २७.।

त्ययः अतोलोपः प्रत्ययस्वरेणान्तोदात्तत्वम् । कण्वासः कणशब्दार्थः कणन्तिध्वनन्तिस्तोत्रा-दिपाठेनेतिकण्वाऋत्विजः असिपृषीत्यादिनाकन् निच्वादाद्युदात्तः आज्जसेरसुगित्यसुक् । वृ-क्तबर्हिषः वृक्तमुक्तम् बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । हविष्मन्तः हविरेषामस्तीतिहविष्मन्तः तसौमत्वर्थेइतिभत्वेन अपदत्वान्नरुत्वम् । अरंकृतः अलंकुर्वन्तीति अरंकृतः क्विप्चेतिक्विप् ह्रस्यस्यतुक् कपिलादीनांसंज्ञाछन्दसोर्वालोरत्वमापद्यतेइतिलकारस्यरेफादेशः ॥ ५ ॥

५. अग्निदेव! हव्य-संयुक्त और विभूषित कण्व-पुत्र कुश तोड़कर तुमसे रक्षा पाने की अभिलाषा से तुम्हारी स्तुति कर रहे हैं।

घृतपृष्ठामनोयुजोयेत्वावहन्तिवह्नयः । आदेवान्त्सोमपीतये ॥६॥२६

घृतऽपृष्ठाः । मनःऽयुजः । ये । त्वा । वहन्ति । वह्नयः । आ ।
देवान् । सोमऽपीतये ॥ ६ ॥ २६ ॥

हेअग्नेत्वात्वां ये अश्वाः रथेनवहन्ति कीदृशाः घृतपृष्ठाः पुष्टाङ्गत्वेनदीप्तपृष्ठाः मनोयुजःम-नःसंकल्पमात्रेणरथेयुज्यमानाः वह्नयोवोढारः तैरश्वैः सोमपानहेतुयागार्थंदेवानावहेतिशे-षः ॥ घृतपृष्ठाः घृक्षरणदीप्त्योः घृतंदीप्तंपृष्ठं येषांतेघृतपृष्ठाः घृतशब्दःप्रत्ययस्वरेणान्तोदात्तः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । मनसायुंजतइतिमनोयुजः ऋत्विग्दधृगित्यादिनाक्विन् कृ-दुत्तरपदप्रकृतिस्वरत्वम् । त्वा त्वामौद्वितीयायाइत्यनुदात्तस्त्वादेशः। वहन्ति शप्तिपोरनुदात्त-त्वाद्धातुस्वरः यद्वृत्तयोगान्निघाताभावः वह्नयः निरित्यनुवृत्तौ वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो-निर्दिति निप्रत्ययः तस्यनिच्वादाद्युदात्तत्वम् । सोमपीतये उक्तम् सकारेपरतोनकारस्य संहि-यां नश्चेतिधुडागमः खरिचेतिचर्त्वं चयोद्वितीयाःशरिपौष्करसादेरितिद्वितीयस्थकारः ॥ ६ ॥

६. अग्नि! संकल्पमात्र से ही तुम्हारे रथ में जो जुटनेवाले दीप्त पृष्ठवाहक तुम्हें ढोते हैं, उनके द्वारा ही देवों को सोमरस-पान करने के लिए बुलाओ।

सूक्तेसप्तमीमृचमाह—

तान्यजत्राँऋतावृधोग्नेपत्नीवतस्कृधि । मध्वःसुजिह्वपायय ॥ ७ ॥

तान् । यजत्रान् । ऋतऽवृधः । अग्ने । पत्नीऽवतः । कृधि ।
मध्वः । सुऽजिह्व । पायय ॥ ७ ॥

हेअग्ने तानिन्द्रादीन्देवान्यजत्रान्यजनीयान् ऋतावृधः सत्यस्य यज्ञस्य वा वर्धकान् प-त्नीवतः पत्नीयुक्तान् कृधिकुरु हेसुजिह्वशोभनजिह्वोपेत मध्वोमधुरस्यसोमस्यभागंदेवान्पाय-

य ॥ यजत्रान् अमिनक्षियजिवन्धिपतिभ्योऽत्रन्निति यजेरत्रन्प्रत्ययः । ऋतावृधः वृधुवृद्धौ अन्तर्भावितण्यर्थात्क्विप्चेतिक्विप् अन्येषामपिदृश्यतइतिपूर्वपदस्यदीर्घत्वम् वृधेर्धातुस्वरः समासेकृदुत्तरपदप्रकृतिस्वरत्वम् । अग्ने पादादित्वान्नामन्त्रितनिघातः षाष्ठिकमाद्युदात्तत्वम् । पत्नीवतः पत्युर्नोयज्ञसंयोगेइतिङीप् इकारस्यचनकारः ताएषांसन्तीतिमतुप् छन्दसीरइतिवत्वं पतिशब्दोडतिप्रत्ययान्तत्वादाद्युदात्तः ङीबूमतुपोरनुदात्तत्वात्सएवशिष्यते । कृधि कृञोलोटःसिपःसेर्ह्यपिच्चेतिहिः बहुलंछन्दसीतिविकरणलुक् श्रुशृणुपृकृवृभ्यश्छन्दसीतिहेर्धिरादेशः ञित्त्वाद्गुणाभावः । मध्वउक्तः । सुजिह्व आमन्त्रितनिघातः । पायय पापाने पिबन्तंप्रयुंक्तेइति हेतुमतिचेतिणिच् शाच्छासाह्वाव्यावेपांयुगितियुक् पूर्वस्यामन्त्रितस्याविद्यमानवत्त्वे अतएवाव्यवधायकत्वान्मध्वइत्यपेक्ष्य तिङ्ङतिङइतिनिघातः ॥ ७ ॥

७. अग्नि! पूजनीय और यज्ञ-वर्द्धक देवों को पत्नी-युक्त करो। सुजिह्व! देवों को मधुर सोमरस पान कराओ।

अष्टमीमृचमाह—

येयजंत्रायईड्यास्तेतेंपिबन्तुजिह्वया । मधोरग्नेवषट्कृति ॥ ८ ॥

ये । यजंत्राः । ये । ईड्याः । ते । ते । पिबन्तु । जिह्वया ।
मधोः । अग्ने । वषट्ऽकृति ॥ ८ ॥

येदेवायजत्राः यष्टव्याः तथायेदेवाईड्याः स्तुत्याः तेसर्वेपि वषट्कृतिवषट्कारकालेवषट्कारयुक्ते यागेवा हेअग्ने तेत्वदीययाजिह्वयामधोःमधुरस्यसोमस्यभागंपिबन्तु ॥ ये यजत्राः गतम् । ईड्याः ईडस्तुतौ ऋहलोर्ण्यत् तित्स्वरितेप्राप्ते ईडवंदवृशंसदुहांण्यतइत्याद्युदात्तत्वम् द्वितीयस्य तेशब्दस्ययुष्मदादेशस्यसर्वानुदात्तत्वम् । मधोः प्रत्ययस्यनित्त्वादाद्युदात्तत्वमुक्तम् । अग्नेआमन्त्रितनिघातः । वषट्कृति करोतेःसंपदादिभ्योभावेक्विप् वषडित्यस्यकरणंयस्मिन्यागेइतिबहुव्रीहिः वषडित्यस्यनिपातनादाद्युदात्तत्वम् बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् ॥ ८ ॥

८. जो देव यजनीय और स्तुति-पात्र हैं, अग्नि! वे वषट्कार-काल में तुम्हारी रसना-द्वारा सोमरस पान करें।

आकींसूर्यस्यरोचनाद्विश्वान्देवाँउषर्बुधः । विप्रोहोतेहवक्षति ॥ ९ ॥

आकीम् । सूर्यस्य । रोचनात् । विश्वान् । देवान् । उषःऽबुधः ।
विप्रः । होता । इह । वक्षति ॥ ९ ॥

विप्रोमेधावीहोता होमनिष्पादकोऽग्निः उषर्बुधःउषःकालेयागगमनायप्रबुध्यमानान्विश्वान्देवान्सूर्यस्यसंबन्धिनोरोचनात्स्वर्गलोकादिहकर्मणि आकीं वक्षति आवहतु ॥ आकीं

निपातआद्युदात्तः । सूर्यस्य सूर्यशब्दोराजसूयसूर्येत्यादिनाक्यप्प्रत्ययान्तोनिपातितः क्यपः पित्त्वाद्धातुस्वरेणाद्युदात्तः । रोचनात् रोचमानात् रुचदीप्तौ अनुदात्तेतश्चहलादेरितिकर्तरियुच् चितइत्यन्तोदात्तत्वम् । विश्वान् विशेः क्वन्नन्तोनित्त्वादाद्युदात्तः। उषर्बुधः उषर्बुध्यन्तइत्युषर्बुधः क्विप्चेतिक्विप् धातुस्वरेणउकारउदात्तः समासेकृदुत्तरपदप्रकृतिस्वरत्वम् ।विप्रः ऋज्रेन्द्रेत्यादिना रन् नित्त्वादाद्युदात्तः । होता ह्वयतेस्ताच्छील्येतृन् बहुलंछन्दसीतिसंप्रसारणं परपूर्वत्वं गुणः नित्त्वादाद्युदात्तः । इह इदमोहइतिहप्रत्ययः इदमइशितिइश् शित्वात्सर्वादेशः प्रत्ययस्वरः । वक्षति वहेःप्रार्थनायांलिङर्थेलेट् तस्यतिप् कर्तरिशप् शपिपरतः सिब्बहुलंलेटीतिसिप् ढत्वकत्वषत्वानि तिङ्ङतिङइतिनिघातः ॥ ९ ॥

९. मेधावी और देवों को बुलानेवाले अग्नि प्रातःकाल जागे हुए सारे देवों को सूर्य-प्रकाशित स्वर्गलोक से इस स्थान में निश्चय ले आवें।

अग्निष्टोमेप्रउगशस्त्रस्ययाज्याविश्वेभिःसोम्यंमध्विति स्तोत्रमग्नेशस्त्रादितिखण्डेसूत्रितम्-विश्वेभिःसोम्यंमध्वितियाज्येति ।

तामेतांयाज्यांसूक्तेदशमीमृचमाह—

विश्वेभिःसोम्यंमध्वग्नइन्द्रेणवायुना । पिबामित्रस्यधामभिः ॥ १० ॥

विश्वेभिः । सोम्यम् । मधु । अग्ने । इन्द्रेण । वायुना । पिब । मित्रस्य । धामऽभिः ॥ १० ॥

हेअग्नेत्वंविश्वेभिःसर्वैःपूषभगादिभिःदेवैरिन्द्रेणवायुनामित्रस्यसंबन्धिभिर्धामभिस्तेजोभि-र्मूर्तिविशेषरूपैश्चसहसोम्यंसोमसंबन्धिमधुमधुरंभागंपिब ॥ विश्वेभिःबहुलंछन्दसीतिभिसऐसादे-शाभावः।सोम्यं सोममर्हतियइत्यनुवृत्तौमयेचेतियप्रत्ययः सोमस्यविकारइत्यर्थेयस्येतिचेतिलोपः प्रत्ययस्वरः । मधु फलिपाटिनमिमनीत्यादिनाउप्रत्ययः निदित्यनुवृत्तेर्नित्त्वादाद्युदात्तः । वायुना कृवापाजीत्यादिनाउण् आतोयुक्चिण्कृतोरितियुक् प्रत्ययस्वरः । पिब पापाने लोटःसे-र्हिरादेशः शपिपाघ्रेत्यादिनापिबादेशः अतोहेरितिहेर्लुक् शपःपित्त्वाद्धातुस्वरः पादादित्वान्ननिघा-तः द्व्यचोतस्तिङइतिसंहितायांदीर्घः । धामभिः धाञ्आतोमनिन्निति मनिन् नित्स्वरः॥ १० ॥

१०. अग्निदेव! तुम सब देवों, इन्द्र, वायु और मित्र के तेजः-पुञ्ज के साथ सोम-मधु पान करो।

त्वंहोतामनुर्हितोग्नेयज्ञेषुसीदसि । सेमंनोअध्वरंयज ॥ ११ ॥

त्वम् । होता । मनुःऽहितः । अग्ने । यज्ञेषु । सीदसि । सः । इमम् । नः । अध्वरम् । यज ॥ ११ ॥

हेअग्ने मनुर्हितः मनुषाहोत्रादिरूपेणमनुष्येणहितः संपादितोहोता होमनिष्पादकोय-स्त्वंयज्ञेषुसीदसि तिष्ठसि सत्वंनोऽस्मदीयमिममध्वरंयज्ञंयजनिष्पादय ॥ मनुर्हितः मन्यतेइति मनुः जनेरुसिरित्यनुवृत्तौ बहुलमन्यत्रापीत्युस् अर्तिपृवपीत्यादिनानिदित्यनुवृत्तौ नित्त्वा-दाद्युदात्तः । हितः धाञोनिष्ठेतिक्तप्रत्ययः दधातेर्हिरितिहिरादेशः मनुषाहितोमनुर्हितः कर्तृ-करणेकृताबहुलमितिसमासः कृत्स्वरापवादेनतृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरत्वम् । सीदसि षद्लृविशरणगत्यवसादनेषु लटःशप् शपिपाघ्राध्मेत्यादिनासीदादेशः निघातः । सेममित्यत्र संहितायां सोचिलोपेचेत्पादपूरणमितिसोर्लोपेगुणः । अध्वरं नविद्यतेध्वरोयस्मिन्सोध्वरः नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वं नोअध्वरमित्यत्रसंहितायामेङःपदान्तादतीतिपूर्वरूपंप्राप्तं प्र-कृत्यान्तःपादमव्यपरेइतिप्रकृतिभावान्निवर्तते ॥ ११ ॥

११. अग्नि! मनुष्य-सञ्चालित और देवों को बुलानेवाले यज्ञ में बैठो। तुम हमारा यज्ञ सम्पादन करो।

युक्ष्वाह्यरुषीरथेहरितोदेवरोहितः । ताभिर्देवाँइहावह ॥ १२ ॥ २७ ॥

युक्ष्व । हि । अरुषीः । रथे । हरितः । देव । रोहितः । ताभिः । देवान् । इह । आ । वह ॥ १२ ॥ २७ ॥

हेदेवाग्ने रोहितःरोहिच्छब्दाभिधेयास्त्वदीयावडवाःरथेयुक्ष्व युज योजय हिशब्दः पाद-पूरणार्थः कीदृशीःअरुषीः गतिमतीः हरितः हर्तुंरथारूढान्पुरुषान्नेतुंसमर्थाः ताभिर्वडवाभिरि-हास्मिन्कर्मणिदेवानावह ॥ युक्ष्व युजिर्योगे लोट् स्वरितेत्त्वादात्मनेपदं थासःसे सवाभ्यांवामौ रुधादिभ्यःश्नम् तस्यबाहुलकाल्लुक् कुत्वषत्वे प्रत्ययस्वरेणान्तउदात्तः संहितायांद्व्यचोतस्तिङ-इतिदीर्घः । अरुषीः ऋगतौ रन्तिगच्छन्तीत्यरुष्योवडवाः ऋहनिभ्यामुषन् धातोर्गुणोरपरत्वम् नित्त्वादाद्युदात्तोरुषुशब्दः तस्मात्स्त्रियांछान्दसोङीप् शसि प्रथमयोःपूर्वसवर्णइतिदीर्घः । रथे रमेरौणादिकःक्थन्प्रत्ययः नित्त्वादाद्युदात्तः । हरितः हसृरुहियुषिभ्यइतिरितिहरतेरिति-प्रत्ययः इकारःप्रत्ययस्वरेणोदात्तः । रोहितः रुहेरपितेनैवसूत्रेणइतिः इकारःप्रत्ययस्व-रेणोदात्तः । ताभिः सावेकाचइतिविभक्तेःप्राप्तमुदात्तत्वं सावर्णेतिनिषिध्यते । देवानित्यत्रपू-र्ववद्रुत्वानुनासिकौ ॥ १२ ॥

१२. अग्निदेव! रोहित नाम के गति-शील और वहन-समर्थ घोड़ों को रथ में जोतो और उनसे देवों को इस यज्ञ में ले आओ।

॥ इतिप्रथमस्यप्रथमेसप्तविंशोवर्गः ॥ २७ ॥

इन्द्रसोममित्यादिकस्यद्वादशर्चस्यसूक्तस्य ऋषिच्छन्दसीपूर्ववत् यद्यप्येतत्सूक्तं कृत्स्न-मृतुदेवताकंतथापि प्रत्यृचमिन्द्रादिदेवतान्तराणिमिलितानि तथाचानुक्रम्यते—इन्द्रसोममृतव्यं

तत्रैन्द्रीमारुतीत्वाष्ट्र्याग्नेय्यैन्द्रीमैत्रावरुणीचतस्रोद्रविणोदसआश्विन्याग्नेय्यृतुदेवताःसर्वत्रेति । विनियोगस्तुस्मार्तोद्रष्टव्यः।

तस्मिन्सूक्तेप्रथमामृचमाह—

इन्द्रसोमंपिबंऋतुनात्वाविशन्त्विन्दंवः । मत्सरासस्तदोंकसः ॥ १ ॥

इन्द्रं । सोमम् । पिबं । ऋतुनां । आ । त्वा । विशन्तु । इन्दंवः । मत्सरासः । तत्ऽओंकसः ॥ १ ॥

हेइन्द्र ऋतुनासह सोमंपिब इन्दवःपीयमानाःसोमाः त्वा त्वांआविशन्तुकीदृशाः मत्सरासः तृप्तिकराः तदोकसस्तन्निवासाः सर्वदात्वदुदरस्थायिनइत्यर्थः ॥ इन्द्र षाष्ठिकमामन्त्रिताद्युदात्तत्वम् । सोमं अर्तिस्तुस्वित्यादिनामन् निच्चादाद्युदात्तः । पिब पिबामित्रस्येत्यत्रोक्तम् आत्वाविशंत्वित्युत्तरवाक्यगताख्यातार्थेनसहसमुच्चयार्थश्चशब्दोलुप्तः अतश्चादिलोपेविभाषेतीयंप्रथमातिङ्विभक्तिर्ननिहन्यते । विशन्त्वितिचलोपसाम्येऽपिद्वितीयत्वान्निहन्यतएव संहितायामाद्गुणइतिप्राप्तस्यगुणस्यऋत्यकइतिशाकल्यमतेप्रकृतिभावादभावः । इन्दवः प्रवोभ्रियन्तइत्यत्रोक्तम् । मत्सरासः तत्रैवोक्तं आज्जसेरसुगित्यसुक् । तदेवओकःस्थानंयेषांतेतथोक्ताः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् ॥ १ ॥

१. इन्द्र ! ऋतु के साथ सोमरस पान करो । तृप्तिकर और आश्रययोग्य सोमरस तुमको प्राप्त हो ।

द्वितीयामृचमाह—

मरुंतःपिबंतऋतुनांपोत्राद्यज्ञंपुंनीतन । यूयंहिष्ठासुंदानवः ॥ २ ॥

मरुंतः । पिबंत । ऋतुनां । पोत्रात् । यज्ञम् । पुनीतन । यूयम् । हि । स्थ । सुऽदानवः ॥ २ ॥

हेमरुतः ऋतुनासह पोत्रात्पोतृनामकस्यऋत्विजः पात्रात्सोमंपिबत नोऽस्मदीयंयज्ञं पुनीतनशोधयत हेसुदानवः शोभनदातारोमरुतः हियस्माद्यूयंस्थ युष्माकंशोधयितृत्वंप्रसिद्धम् तस्माच्छोधयतेत्यर्थः॥ पिबत अत्रतिङोदुपदेशाच्छपःपरत्वाल्लसार्वधातुकानुदात्तत्वं धातुस्वरःपूर्वामन्त्रितस्याविद्यमानवत्त्वेनपदादपरत्वान्निघाताभावः पूर्ववत्प्रकृतिभावः। पोत्रात् पोतुःसंबन्धिपात्रं पोत्रं तस्येदमित्यण् तद्धितेष्वचामादेरितिप्राप्तावृद्धिः सर्वेविधयश्छन्दसिविकल्प्यन्तइतिनभवति नन्वेवमन्त्यस्यऋकारस्याचोञ्णितीतिवृद्धिःप्राप्नोति त्वाष्ट्रोजागतइत्यत्रहि विप्रतिषेधेपरंकार्यमितिपरयाआदिवृद्ध्याअन्त्योपधलक्षणावृद्धिर्बाध्यतेइत्युक्तं इहतुपरस्याआदिवृद्धेश्छान्द-

सत्वेननिवर्त्यत्वादन्त्यवृद्धिःप्राप्नोत्येवेति एवंतर्हित्राप्यादिवृद्धिरौकारःक्रियतां तस्यतु छान्दस-ओकारोभविष्यति।पुनीतन पूञ्पवने लोट् लोटोलङ्वदितिलङ्वद्भावात्तस्य तस्थस्थमिपामितिता-देशः क्र्यादिभ्यःश्ना ईहल्यघोरितीकारः तप्तनप्तनथनाश्चेतितनादेशः प्वादीनांह्रस्वइतिह्र-स्वः प्रत्ययद्वयस्यापिसार्वधातुकमपिदितिङित्त्वात्त्वस्वपूर्वयोरिकोर्गुणाभावः । यूयं युष्मदः परस्यजसोङेप्रथमयोरमित्यमादेशः नविभक्तौतुस्माइतिमकारस्येत्संज्ञाप्रतिषेधः यूयवयौजसी-तिमपर्यन्तस्ययूयादेशः शेषेलोपः अत्रयूयादेशात्प्रागेवान्तरङ्गत्वात्प्रातिपदिकस्यान्तोदात्तत्वम् शेषनिघातः ततोयूयादेशः स्थानेन्तरतमइतिसर्वानुदात्तः तत्रशेषेलोपोऽन्त्यलोपइतिपक्षेपूर्वस-वर्णदीर्घत्वंबाधित्वायोयममिपूर्वइतिप्रातिपदिकान्तेनउदात्तेनसहअनुदात्तस्यसुपएकादेशः सए-कादेशउदात्तेनोदात्तइत्युदात्तः टिलोपपक्षेतुउदात्तनिवृत्तिस्वरेणविभक्तेरुदात्तत्वम्।स्थ अस्भुवि लटोमध्यमबहुवचनं थ अदिप्रभृतिभ्यःशपइतिशपोलुक् श्नसोरल्लोपइत्यकारलोपः व्यत्ययेन षत्वं हिचेतिनिषेधात्तिङ्ङतिङइतिनिघातोनभवति संहितायामन्येषामपिदृश्यतइतिदीर्घत्वम् अत्रहेसुदानवोयूयंहिस्थेतिविवक्षितम् । सुदानवःदाभाभ्यांनुः सोःप्रादिसमासः आमन्त्रित-निघातः अत्रयूयमित्युद्दिश्य सुदानवःस्थेतिनविधीयते येन अनामन्त्रितत्वान्निघातोनस्यात् किन्तुसुदानवइति सिद्धवद्दातृत्वेनसंबोध्यान्येषुतेषुमारुतसूक्तेषुमरुतांप्रसिद्धात्प्रभावातिशयात् यूयंस्थेतियुष्मच्छब्देनमतिनिर्दिश्यपुनीतनेतिप्रार्थनेपवनेतेषांहितुत्वंहिशब्देनोच्यते ॥ २ ॥

२. मरुद्गण ! ऋतु के साथ पोत्र नाम के ऋत्विक् के पात्र से सोम पीओ। हमारा यज्ञ पवित्र करो। सचमुच तुम दान-परायण हो।

तृतीयामृचमाह—

अ॒भि य॒ज्ञं गृ॑णीहि नो॒ ग्नावो॒ नेष्टः॒ पिब॑ ऋ॒तुना॑। त्वं हि र॑त्न॒धा असि॑ ॥ ३ ॥

अ॒भि । य॒ज्ञम् । गृ॒णी॒हि॒ । नः॒ । ग्नाव॑ः । नेष्टः॑ । पिब॑ ।
ऋ॒तुना॑ । त्वम् । हि । र॒त्न॒ऽधाः । असि॑ ॥ ३ ॥

ग्नाशब्दःस्त्रीवाची तथाचयास्कआह—मेनाग्नाइतिस्त्रीणांमेनामानयंत्येनाग्नागच्छन्त्ये-नाइति । ग्नाः अस्यसन्तीतिग्नावान् नेष्टृशब्दोत्रत्वष्टारंदेवमाह कस्मिंश्चिद्देवसत्रेनेष्टृत्वेन त्वष्टुर्वृतत्वात् हेग्नावः पत्नीयुक्तनेष्टस्त्वष्टः नोऽस्मदीयंयज्ञमभिगृणीहि अभितोदेवानांसमीपे स्तुहि ऋतुनासहत्वंसोमंपिब हियस्मात्त्वं रत्नधाअसि रत्नानांदाताभवसि तस्मात्सोमंपातुमर्ह-सीत्यर्थः॥ अभि उपसर्गाश्चाभिवर्जमितिपर्युदासादभेरन्तोदात्तत्वम् । गृणीहि गॄशब्दे लोटि सिपोहिः क्र्यादिभ्यःश्ना हेर्ङित्त्वादीहल्यघोरितीत्वम् श्नाप्रत्ययस्यङित्त्वाद्गुणाभावः प्वादीनां

---

१ नि० ३. २१।

ह्रस्वः तिङ्ङतिङइतिनिघातः । आअस्यसन्तीतिमतुप् व्यत्ययेनवत्वम् संबुद्धौमतुवसोरुरितिरु-त्वं विसर्गः पादादित्वेनामन्त्रितनिघाताभावात्षाष्ठिकामन्त्रिताद्युदात्तत्वम् आवइत्यस्यविशेषण-तयाविशेषवचनत्वान्नामन्त्रितेसमानाधिकरणेइतिनिषेधाभावादविद्यमानवत्त्वेनोत्तरस्यनेष्टृशब्द-स्यषाष्ठिकमाद्युदात्तत्वम् । पिब शपःपित्त्वाद्धातुस्वरः पूर्वयोरामन्त्रितयोरविद्यमानवत्त्वे-ननिघाताभावः । रत्नानिदधातीतिरत्नधाः क्विप्चेतिक्विप् धातुस्वरः समासेकृदुत्तरपदप्रकृ-तिस्वरत्वेनसएवशिष्यते । असि सिपः पित्त्वाद्धातुस्वरः तिङ्ङतिङइतिनिघातोनभवति हि-चेतिप्रतिषेधात् ॥ ३ ॥

३. पत्नीयुक्त नेष्टा या त्वष्टा! देवों के पास हमारे यज्ञ की प्रशंसा करो। ऋतु के साथ सोमरस पान करो; क्योंकि तुम रत्न-धाता हो।

अग्नेदेवाँइहावहसादयायोनिषुत्रिषु । परिभूषपिबऋतुना ॥ ४ ॥

अग्ने । देवान् । इह । आ । वह । सादय । योनिषु । त्रिषु ।
परि । भूष । पिब । ऋतुना ॥ ४ ॥

हेअग्ने देवानिहास्मिन्कर्मण्यावह ततोयोनिषुस्थानेषुत्रिषुसवनेषुसादयदेवानुपवेशय त-तस्तान्परिभूष अलंकुरु ऋतुनासह त्वंसोमंपिब ॥ अग्नेदेवानित्ययंपादोगतः । योनिषु युमिश्रणे वहिश्रीत्यादिनानिप्रत्ययः नित्त्वादाद्युदात्तः । त्रिषु षट्त्रिचतुर्भ्योहलादिरिति विभक्तेरुदात्त-त्वम् । भूष भूषअलङ्कारे तिङ्ङतिङइतिनिघातः । पिब ऋतुना गतौ ॥ ४ ॥

४. अग्नि! देवों को यहाँ बुलाओ। तीन यज्ञ-स्थानों में उन्हें बैठाओ। उन्हें अलंकृत करो और तुम ऋतु के साथ सोमपान करो।

पञ्चमीमृचमाह—

ब्राह्मणादिन्द्रराधसःपिबासोमंमृतूँरनु ॥ तवेद्धिसख्यमस्तृतम् ॥ ५ ॥

ब्राह्मणात् । इन्द्र । राधसः । पिब । सोमम् । ऋतून् । अनु ।
तव । इत् । हि । सख्यम् । अस्तृतम् ॥ ५ ॥

हेइन्द्र ब्राह्मणात् ब्राह्मणाच्छंसिसंबद्धात् राधसोधनभूतात्पात्रात् सोमंपिब । किंकृत्वाऋतून् अनु ऋतुदेवाननुसृत्य ऋतवोपिपिबन्त्वित्यर्थः हियस्मात्तवेत् तवसख्यंअस्तृतमृतूनामविच्छि-न्नं तस्मादृतुभिःसहपानंयुक्तम् ॥ ब्राह्मणात् ब्रह्मशब्देनात्रब्रह्मवर्गेद्वितीयोब्राह्मणाच्छंसीकथ्यते सचपुंलिङ्गेशेषनिघातेनानुदात्तादिः तस्यसंबन्धीउच्छिष्टश्चमसः सच तस्यैवावयववन्नियतइत्यव-यवविवक्षायामनुदात्तादेरञ् तेनञित्त्वादाद्युदात्तश्चमसपरोऽत्रब्राह्मणशब्दः । राधसः सर्वधातुभ्यो-सुन् नित्त्वादाद्युदात्तः । पिब पादादित्वादाद्युदात्तत्वम् द्व्यचोतस्तिङइतिदीर्घत्वम् ऋतूँरन्नित्यत्र

दीर्घादटिसमानपादेइतिनकारस्यरुत्वम् अत्रानुनासिकःपूर्वस्यतुवेत्यूकारस्यानुनासिकत्वम्। तव युष्मदस्मद्भ्यांङसोश् शित्वात्सर्वादेशः तवममौङसीतितवादेशः युष्मदस्मदोर्ङसीत्याद्युदात्तत्वम्। सख्यं सख्युःकर्मसख्यं सख्युर्यः यस्येतिलोपः प्रत्ययस्वरः। अस्तृतं स्तृणोतेर्हिंसार्थस्यक्तः नञ्समासः अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥ ५ ॥

५. ब्राह्मणाच्छंसी पुरोहित के धनोपेत पात्र से, ऋतुओं के पश्चात्, तुम सोम पान करो; क्योंकि तुम्हारी मित्रता अटूट है।

युवंदक्षंधृतव्रतमित्रावरुणदूळभम्। ऋतुनायज्ञमाशाथे ॥ ६ ॥ २८ ॥

युवम्। दक्षम्। धृतऽव्रता। मित्रावरुणा। दुःऽदभम्। ऋतुना। यज्ञम्। आशाथे इति ॥ ६ ॥ २८ ॥

हेधृतव्रता स्वीकृतकर्माणौ मित्रावरुणाहेमित्रावरुणौ हेमित्रनामकवरुणनामकौदेवौ युवंउभौयुवां ऋतुनासह अस्मदीयंयज्ञमाशाथेव्याप्नुथः कीदृशंयज्ञं दक्षं प्रवृद्धं दूडभंदुर्दहंशत्रुभिर्दग्धुंविनाशयितुमशक्यमित्यर्थः ॥ युवं प्रथमाद्विवचनस्यङेप्रथमयोरमित्यमादेशः युवावौद्विवचनेइतिमपर्यन्तस्ययुवादेशः शेषेलोपइतिटिलोपोन्त्यलोपोवा अमिपूर्वत्वंभाषायामेवब्लात्वं टिलोपपक्षेउदात्तनिवृत्तिस्वरेण अमउदात्तत्वम् अन्त्यलोपपक्षेएकादेशउदात्तेनोदात्तः इत्युदात्तत्वम्। दक्षं दक्षवृद्धौ दक्षंत्यनेनेतिकरणेघञ् एवंहिपुंलिङ्गत्वनियमः अन्यस्यानियमइतिनपुंसकत्वम्। धृतव्रता मित्रावरुणा धृतानिव्रतानियाभ्यांतौधृतव्रतौ मित्रश्चवरुणश्चमित्रावरुणौ उभयत्र सुपांसुलुगित्यादिनाविभक्तेराकारः मित्रशब्दस्यदेवताद्वन्द्वेचेत्यानङादेशः प्रथमस्यामन्त्रितनिघातः द्वितीयस्यपादादित्वादाद्युदात्तत्वं संहितायांछान्दसंह्रस्वत्वम्। दूडभं दहभस्मीकरणे दुःखेन दह्यतइतिदुर्दहं ईषद्दुःसुष्वित्यादिनादुरित्युपपदेदग्धेःखल् व्यत्ययोबहुलमितिउशब्दस्यऊकारोरेफस्यलोपः दकारस्यडकारोहकारस्यचभकारः लितीतिप्रत्ययात्पूर्वमुदात्तत्वं कृदुत्तरपदत्वेनसएवशिष्यते। आशाथे अशूव्याप्तौ छन्दसिलुङ्लङ्लिटइतिवर्तमानेलिट् मध्यमद्विवचनमाथां टेरेत्वं अतआदेरित्यभ्यासस्यदीर्घः अश्नोतेश्चेतिप्राप्तोनुडागमः अनित्यमागमशासनमिति निवर्तते ॥ ६ ॥

६. धृत-व्रत मित्र और वरुण! तुम लोग ऋतु के साथ हमारे इस प्रवृद्ध और शत्रुओं-द्वारा अदहनीय यज्ञ में व्याप्त हो।

इतिप्रथमस्यप्रथमेष्टाविंशोवर्गः ॥ २८ ॥

सूक्तेसप्तमीमृचमाह—

द्रविणोदाद्रविणसोग्रावहस्तासोअध्वरे। यज्ञेषुदेवमीळते ॥ ७ ॥

द्रविणःऽदाः । द्रविणसः । ग्रावंऽहस्तासः । अध्वरे । यज्ञेषु । देवम् । ईळते ॥ ७ ॥

अध्वरेग्निष्टोमेप्रकृतिस्वरूपे यज्ञेषुविकृतिरूपेषु उक्थादिषुचदेवमग्निमीळतेऋत्विजः स्तुवन्ति कीदृशाऋत्विजः द्रविणसोधनार्थिनः ग्रावहस्तासः अभिषवसाधनपाषाणधारिणः कीदृशंदेवं द्रविणोदाः धनप्रदं यद्वा धनप्रदोऽग्निः सोमंपिबत्वितिशेषः । तमेतंमत्रंयास्कएवंनिर्वक्ति—द्रविणोदाःकस्माद्धनंद्रविणमुच्यते यदेनदभिद्रवन्तिबलंवाद्रविणंयदेनेनाभिद्रवन्ति तस्य दाताद्रविणोदास्तस्यैषाभवति द्रविणोदाद्रविणसइत्यादि[1] । सोयंयास्कोक्तोनिर्वचनप्रपञ्चः तस्मिन्नेवग्रन्थेवगन्तव्यः ॥ द्रविणोदाः द्रुदक्षिभ्यामिनन् नित्त्वादाद्युदात्तोद्रविणशब्दः तद्ददातीति द्रविणोदाः क्विप्चेतिक्विप् पूर्वपदस्यसकारोपजनश्छान्दसः रुत्वोत्वे कृदुत्तरपदप्रकृतिस्वरत्वम् देवविशेषणत्वेनैकवाक्यतापक्षेद्वितीयायाःसुआदेशः अथवाद्रविणमात्मनइच्छन्तिद्रविणस्यन्ति सुपआत्मनःक्यच् सर्वप्रातिपदिकेभ्योलालसायांसुग्वक्तव्यइतिक्यचिपरतःसुगागमः द्रविणस्यतेः संपदादित्वाद्भावेक्विप् अतोलोपः कौलुप्तंनस्थानिवद्भवतीतितस्यस्थानिवत्त्वप्रतिषेधाद्यलोपः एवंद्रविणस्शब्दोधनेच्छावचनः द्रविणेच्छांदस्यतियथेष्टधनप्रदानेनोपक्षयतीत्यर्थे दसुउपक्षयेइत्यस्मादन्तर्भावितण्यर्थात्क्विप्चेतिक्विप् एवंद्रविणोदःशब्दःसकारान्तोभवति तथाच—द्राविणोदसाःप्रवादाभवन्तीर्ति[2] नैरुक्तोव्यवहारउपपद्यते अतोद्रविणोदस्शब्दः भिन्नवाक्यत्वेस्वार्थे प्रथमा एकवाक्यत्वेतुव्यत्ययेनद्वितीयार्थोभवति द्रविणसइत्यत्रापिवाक्यभेदपक्षे द्रविणसः सोमस्येत्यर्थे सकारोपजनश्छान्दसः आद्युदात्तत्वंतुनियमेनस्थितम् ऋत्विग्विशेषणत्वेनैकवाक्यत्वपक्षेतुक्यजन्तात्क्विप् अतोलोपादिपूर्ववत् अत्रतुपक्षेक्यचश्चित्त्वेनान्तोदात्तत्वेप्राप्तेव्यत्ययेनाद्युदात्तत्वम् । ग्रावयुक्ताहस्तायेषांतेग्रावहस्तासः आज्जसेरसुक् ग्रावशब्दोवृषादित्वादाद्युदात्तः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । अध्वरे नविद्यतेध्वरोहिंसायस्मिन् नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । ईळते अनुदात्तेत्त्वादात्मनेपदं अदिप्रभृतिभ्यइतिशपोलुक् झस्य अदादेशः ॥ ७ ॥

७. नानाविध यज्ञों में धनाभिलाषी पुरोहित सोमरस तैयार करने के लिए हाथ में पत्थर लेकर द्रविणोदा या धनप्रद अग्नि की स्तुति करते हैं।

अष्टमीमृचमाह—

द्रविणोदादंदातुनोवसूंनियानिंशृण्विरे । देवेषुतावंनामहे ॥ ८ ॥

द्रविणःऽदाः । ददातु । नः । वसूंनि । यानि । शृण्विरे । देवेषु । ता । वनामहे ॥ ८ ॥

---

1 नि० ८.१. । 2 नि० ८.२. ।

द्रविणोदादेवोनोऽस्मभ्यंवसूनिधनानिददातु यानिधनानिश्रृण्विरे हविरुपयुक्तत्वेनश्रूयन्ते ता तानिसर्वाणिधनानि देवेषुनिमित्तभूतेषुवनामहेसंभजामः धनैर्देवान्यष्टुं तानिस्वीकुर्मइत्यर्थः ॥ द्रविणोदाः गतम् । वसूनि शृस्वृस्निहीत्यादिनाउप्रत्ययः निदित्यनुवृत्तेराद्युदात्तः । श्रृण्विरे श्रुश्रवणे छन्दसिलुङ्लङ्लिटइतिवर्तमानेलिट् झ इरेच् छन्दस्युभयथेतिसार्वधातुकत्वेव्यत्ययेनश्नुः तत्सन्नियोगेनशृभावश्च उवङिप्राप्ते हुश्नुवोः सार्वधातुकइतियणादेशः चितइत्यन्तोदात्तत्वं यद्वृत्तान्नित्यमितिनिघातप्रतिषेधः शेश्छन्दसिबहुलमितिशेर्लोपः नलोपःप्रातिपदिकान्तस्येतिनलोपः । वनामहे वनषणसंभक्तौ व्यत्ययेनात्मनेपदम् ॥ ८ ॥

८. जिन सब सम्पत्तियों की कथा सुनी जाती है, द्रविणोदा (अग्नि) हमें वह सब सम्पत्ति दें और वह सम्पत्ति देवयज्ञ के लिए हम ग्रहण करेंगे।

द्रविणोदाःपिपीषतिजुहोतप्रचतिष्ठत । नेष्ट्रादृतुभिरिष्यत ॥ ९ ॥

द्रविणःऽदाः । पिपीषति । जुहोत । प्र । च । तिष्ठत । नेष्ट्रात् । ऋतुऽभिः । इष्यत ॥ ९ ॥

द्रविणोदाः देव ऋतुभिःसहनेष्ट्राव नेष्टृसंबन्धिपात्राव् पिपीषति सोमं पातुमिच्छति ततोहेऋत्विजः इष्यत होमस्थानेगच्छत गत्वाच जुहोत होमंकुरुत हुत्वाप्रतिष्ठतच होमस्थानात्स्थानान्तरंप्रविप्रस्थानमपिकुरुत ॥ द्रविणोदाः गतः । पिपीषति पापाने पातुमिच्छतीतिसन् छान्दसईकारः तिङ्ङतिङइतिनिघातः । जुहोत लोण्मध्यमबहुवचनं तस्यलङ्वद्भावात्तादेशः तस्य तप्तनप्तनथनाश्चेतितबादेशः तस्यपित्त्वाद्गुणः अभ्यस्तानामादिरित्यनुवृत्तौ अनुदात्तेचेत्यनुदात्तत्वेप्राप्ते भीह्रीभृहुमदजनधनदरिद्राजागरांप्रत्ययात्पूर्वंपितीत्योकारउदात्तः । तिष्ठत ष्ठागतिनिवृत्तौ लोट् मध्यमबहुवचनस्यथस्यलङ्वद्भावात्तादेशः शपिपाघ्राध्मेत्यादिनातिष्ठादेशः समवप्रविभ्यःस्थइत्यात्मनेपदंनभवति तत्रानुवृत्तस्यनिर्दिष्टग्रहणस्यानन्तर्यार्थत्वाव् अत्रचशब्देनव्यवधानाव तेप्राग्धातोरित्युपसर्गत्वेनप्राक्प्रयोक्तव्यस्यापिप्रशब्दस्य व्यवहिताश्चेति छन्दसिव्यवहितप्रयोगः अत्रचशब्दोजुहोतेतिपूर्वेणसहसमुच्चयार्थः नपुनरिष्यतेत्युत्तरेण तेनाप्रथ मत्वाच्चवायोगेप्रथमेतिनिषेधाभावात्तिङ्ङतिङइतिनिघातः । नेष्ट्राव पोत्राद्यज्ञंपुनीवनेत्यत्र पोत्रशब्दे यदुक्तं तदत्रद्रष्टव्यम् । इष्यत इषगतौ लोण्मध्यंमबहुवचनम् ॥ ९ ॥

९. द्रविणोदा, ऋतुओं के साथ, त्वष्टा के पात्र से सोम पान करना चाहते हैं। ऋत्विक् लोग ! यज्ञ में आओ, होम करो; अनन्तर प्रस्थान करो।

यत्त्वातुरीयमृतुभिर्द्रविणोदोयजामहे । अधस्मानोददिर्भव ॥ १० ॥

यत् । त्वा । तुरीयम् । ऋतुऽभिः । द्रविणःऽदः । यजामहे ।
अर्ध । स्म । नः । दुदिः । भव ॥ १० ॥

हेद्रविणोदोदेव यद्यस्मात्कारणादृतुभिःसहतुरीयंचतुर्णांपूरणं त्वा त्वांयजामहे अधेत्ययं निपातस्तच्छब्दार्थः तस्मात्कारणान्नोऽस्मभ्यं ददिर्धनस्यदाताभवस्म अवश्यंभव ॥ तुरीयं चतुर्णांपूरणं चतुरश्छयतावाद्यक्षरलोपश्चेतिछप्रत्ययः तस्यप्रत्ययस्वरेणोदात्तात्प्रागेव आयनेयीनीत्यादिनाईयादेशः आयन्नादिषूपदेशिवद्वचनंस्वरसिद्ध्यर्थमितिवचनात् छनेआदेशे प्रत्ययस्वरेणइकारउदात्तः । द्रविणोदः उक्तम् पादादित्वादामन्त्रिताद्युदात्तत्वम् । यजामहे अत्रशपः पित्त्वेनतिङश्चलसार्वधातुकस्वरेणधातुस्वरएव पूर्वस्यामन्त्रितस्याप्यविद्यमानवत्त्वात् यद्वृत्तयोगाद्वाननिघातः व्यवहितयोगेऽपिहिसनिषेधइत्युक्तम् । अध छान्दसोधकारः । स्म चादिरनुदात्तः संहितायांनिपातस्यचेतिदीर्घः । ददिः डुदाञ्दाने आदृगमहनजनःकिकिनौलिट्चेतिकिप्रत्ययः लिड्वद्भावाद्द्विर्वचनादि आतोलोपइटिचेत्याकारलोपः प्रत्ययस्वरः ॥ १० ॥

१०. हे द्रविणोदा ! चूँकि ऋतुओं के साथ तुम्हें चौथी बार पूजता हूँ; इसलिए अवश्य ही तुम हमें धनवान करो।

एकादशीमृचमाह—

अश्विनापिबतंमधुदीद्यग्नीशुचिव्रता । ऋतुनायज्ञवाहसा ॥ ११ ॥

अश्विना । पिबतम् । मधु । दीद्यग्नी इति दीदिऽअग्नी ।
शुचिऽव्रता । ऋतुना । यज्ञऽवाहसा ॥ ११ ॥

हेअश्विनौ मधुमाधुर्योपेतं सोमंपिबतं कीदृशौदीद्यग्नी द्योतमानाहवनीयाद्यग्नियुक्तौ शुचिव्रताशुद्धकर्माणौ ऋतुनाऋतुदेवतयासहयज्ञवाहसायज्ञस्यनिर्वाहकौ ॥ अश्विना संबोधनद्विवचनस्यसुपांसुलुगित्याकारः आमन्त्रिताद्युदात्तः । पिबतं शपःपित्त्वादनुदात्तत्वम् तिङश्चलसार्वधातुकस्वरेणधातुस्वरएवशिष्यते । मधु फलिपाटीत्यादिनाउप्रत्ययः नित्त्यनुवृत्तेर्नित्त्वादाद्युदात्तः । दीद्यग्नी दिवुक्रीडादौ अन्येभ्योऽपिदृश्यन्तइतिक्विप् वेरपृक्तलोपाद्वलिलोपोबलीयानितिप्रथमवकारस्यलोपः प्रथमंप्रत्ययलोपेहिवर्णाश्रयविधौप्रत्ययलक्षणंनास्तीतिनिषेधाद्वलिलोपोनस्यात् छान्दसंद्विर्वचनं तुजादित्वादभ्यासदीर्घत्वम् यङ्लुगन्तादृासंज्ञापूर्वकोविधिरनित्यइत्यभ्यासस्यगुणाभावः दीदिरग्निर्ययोस्तौदीद्यग्नी आमन्त्रिताद्युदात्तत्वम् पादादित्वान्ननिघातः। शुचिव्रता शुचिव्रतंययोस्तौसुपांसुलुगित्याकारः दीद्यग्निशब्दस्यसामान्यवचनत्वेननामन्त्रितइत्यविद्यमानवत्त्वप्रतिषेधादाष्टमिकनिघातत्वम् पूर्वस्यपराङ्गवद्भावात् ऐकस्वर्यम् । यज्ञवाहसा वहप्रापणे यज्ञंवहतइतियज्ञवाहसौ वहिहाधाञ्भ्यश्छन्दसीत्यसुन् तत्रहिणिविकारकयो-

रपिपूर्वपदप्रकृतिस्वरत्वंचेतिवचनात्सोपपदानामपिभवतीत्युक्तम् णिदित्यनुवृत्तेरुपधावृद्धिः सुपांसुलुगित्यादिनाविभक्तेराकारः आमन्त्रितनिघातः असामर्थ्यात्पूर्वस्यनपराङ्गवद्भावः ॥ ११ ॥

११. प्रकाशमान अग्नि से संयुक्त और विशुद्ध-कर्मा अश्विनीकुमार-द्वय! मधु, सोम पान करो। तुम्हीं ऋतुओं के साथ यज्ञ के निर्वाहक हो।

गार्हपत्येनसन्त्यऋतुनायज्ञनीरसि। देवान्देवयतेयज ॥ १२ ॥२९॥

गार्हऽपत्येन। सन्त्य। ऋतुना। यज्ञऽनीः। असि। देवान्। देवऽयते। यज ॥ १२ ॥ २९ ॥

हेसन्त्य फलप्रदाग्निदेव गार्हपत्येनगृहपतिसंबन्धिनारूपेणयुक्तःसन् ऋतुना ऋतुदेवेनसह यज्ञनीः यज्ञस्यनिर्वाहकोसि तस्मात्त्वंदेवयते देवविषयकामनायुक्ताययजमानायदेवान्यज ॥ गार्हपत्येन गृहपतिनासंयुक्तेञ्यः यस्येतिलोपः ञित्त्वादादिवृद्धिराद्युदात्तत्वंच गृहपतित्वमित्यर्थे पत्यन्तपुरोहितादिभ्यइतियकित्वन्तोदात्तत्वंस्यात्। सन्त्य सननेभव षणुदाने क्तिच्क्तौचेतिक्तिच् नक्तिचिदीर्घश्चेतिदीर्घनलोपाभावः भवेछन्दसीतियत् तत्रसाधुरितिवानिघातः। यज्ञंनयतीतियज्ञनीः सत्सूद्विषेत्यादिनाक्विप् कृदुत्तरपदप्रकृतिस्वरः। देवयते देवानात्मनइच्छतीतिदेवयन् तस्मै क्यचिचेतीत्वंनभवति नच्छन्दस्यपुत्रस्येतिनिषेधात् अश्वाघस्येत्यात्वविधानादात्वनिषेधेप्राप्तस्यदीर्घस्याप्येषनिषेधइत्युक्तम् शतुरनुमोनद्यजादीइतिविभक्तेरुदात्तत्वम् अत्रक्यचश्चित्त्वादन्तोदात्तत्वं शपःपित्त्वादनुदात्तत्वं शतुश्चलसार्वधातुकस्वरेण उभयोःक्यचासहैकादेशेएकादेशउदात्तेनोदात्तइत्युदात्तः तस्मादन्तोदात्तत्वात्परस्याविभक्तेः शतुरनुमोनद्यजादीइतिविभक्तेरुदात्तत्वम् ॥ १ ॥

१२. गृहपति, सुन्दर और फलप्रद अग्निदेव! तुम ऋतु के साथ यज्ञ के निर्वाहक हो। देवाभिलाषी यजमान के लिए देवों की अर्चना करो।

चतुर्थेनुवाके आत्वावहन्त्वितिनवर्चंसूक्तम् ऋषिच्छन्दसीपूर्ववदनुवर्तेते विशेषादेशाभावादिन्द्रोदेवता विनियोगस्तुमातःसवनेमैत्रावरुणस्योन्नीयमानेसूक्तम् आत्वावहन्तुहरयइति तथाच द्विदेवत्यैश्चरन्तीतिखण्डेसूत्रितम्—उन्नीयमानेभ्योन्वाहात्वावहन्त्विति तथाषोडशिनिशस्त्रेआत्वावहन्तुहरयइतितिस्रः तथाचसूत्रितम् अथषोडशीतिखण्डे—आत्वावहन्तुहरयइतितिस्रोगायत्र्यइति।

तस्मिन्सूक्तेप्रथमामृचमाह—

आत्वावहन्तुहरयोवृषणंसोमपीतये। इन्द्रंत्वासूरचक्षसः ॥ १ ॥

आ । त्वा । वहन्तु । हर॑यः । वृषणम् । सोम॑ऽपीतये । इन्द्र॑ ।
त्वा । सूर॑ऽचक्षसः ॥ १ ॥

हेइन्द्र वृषणंकामानांवर्षितारंत्वात्वांसोमपीतयेसोमपानार्थं हरयस्त्वदीयाअश्वावहन्तु अस्मिन्कर्मण्यानयन्तु तथासूरचक्षसः सूर्यसमानप्रकाशयुक्ताऋत्विजस्त्वांमन्त्रैःप्रकाशयन्त्वितिशेषः ॥ हरन्तीविहरयः अचइः इन्सर्वधातुभ्यइतीन् नित्त्वादाद्युदात्तः । वृषणं कनिन्युवृषितक्षिराजीत्यादिनाकनिन् कित्त्वाल्लघूपधगुणाभावः वाषपूर्वस्यनिगमेइतिविकल्पितमुपधादीर्घत्वम् । सोमपीतये ऐभिरग्नइत्यत्रोक्तम् । सूरचक्षसः चक्षिङ्व्यक्तायांवाचि सर्वधातुभ्योऽसुन् चक्षिङःख्याञ् इतिनभवति अनसोःप्रतिषेधोवक्तव्यइतिनिषेधात् षूप्रेरणे सुवतीतिसूरः सुसूधाञ्गृधिभ्यःक्रन्निति क्रन् कित्त्वाद्गुणाभावः नित्त्वादाद्युदात्तः सूरवत् चक्षः ख्यानं प्रकाशोयेषां बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् ॥१॥

१. यथेप्सित-वर्षक इन्द्र! तुम्हारे घोड़े, तुम्हें सोम-पान कराने के लिए, यहाँ ले आवें। सूर्य की तरह प्रकाश-युक्त पुरोहित मंत्रों-द्वारा तुम्हें प्रकाशित करें।

इमाधानाघृतस्नुवोहरीइहोपवक्षतः । इन्द्रंसुखतमेरथे ॥ २ ॥

इमाः । धानाः । घृतऽस्नुवः । हरी इति । इह । उप । वक्षतः ।
इन्द्रम् । सुखऽतमे । रथे ॥ २ ॥

हरिशब्दइन्द्ररथस्यवोढारावश्वावाचष्टे तथाचश्रुत्यन्तरम्—हर्योःस्थातेति[1] हरिभ्यांत्वेन्द्रोदेवतांगमयत्विति च एतदेवाभिप्रेत्यनिघण्टुकारआह हरीइन्द्रस्येति तादृशौहरीइमायागार्थं वेद्यामासादितत्वेनपुरोवर्तिनीर्धानाः भ्रष्टयवतण्डुलानुदिश्य सुखतमेरथे इन्द्रमवस्थाप्य इहास्मिन्कर्मणिउपवक्षतः वेदिसमीपेवहतां कीदृशीर्धानाः घृतस्नुवः अलंकरणोपस्तरणाभिघारणेनघृतस्राविणीः ॥ धीयन्तइतिधानाः धापृवस्यज्यतिभ्योनइतिनः प्रत्ययस्वरः । घृतस्नुवः घृतं स्नुवन्तीतिघृतस्नुवः क्विपि तुगभावश्छान्दसः धातुस्वरः समासेकृदुत्तरपदप्रकृतिस्वरत्वम् स्नोःसंयोगपूर्वत्वेनयणभावादुवङादेशः । हरी हञ्हरणे सर्वधातुभ्यइन् नित्त्वादाद्युदात्तः प्रगृह्यत्वात्संहितायांप्रकृतिभावः । वक्षतः प्रार्थनाख्येलिङर्थेलेट् तस्यप्रथमपुरुषद्विवचनंतस् लेटोडाटावित्यडागमः शपिप्राप्ते सिब्बहुलंलेटीतिसिप् ढत्वकत्वषत्वानि तिङ्ङतिङइतिनिघातः । सुखतमे गतम् ॥ २ ॥

२. हरि नाम के दोनों घोड़े घृतस्यन्दी धान्य के पास, सुखकारी रथ से, इन्द्र को ले आवें।

इन्द्रंप्रातर्हवामहइन्द्रंप्रयत्यध्वरे । इन्द्रंसोमस्यपीतये ॥ ३ ॥

---

[1] तै० सं० १. ४. २८. । [2] तै० सं० १, ६, ४. ।

इन्द्र॑म् । प्रा॒तः । ह॒वा॒म॒हे॒ । इन्द्र॑म् । प्र॒ऽय॒ति । अ॒ध्व॒रे । इन्द्र॑म् । सोम॑स्य । पी॒तये॑ ॥ ३ ॥

प्रातः कर्मारंभेप्रातःसवने इन्द्रंहवामहे आह्वयामः तथैवाध्वरेसोमयागे प्रयतिप्रगच्छति प्रारभ्यवर्तमानेसति माध्यंदिनेसवनेतमिन्द्रंहवामहे तथायज्ञसमाप्त्यवसरे तृतीयसवनेसोमस्य पीतयेसोमपानार्थंहवामहे ॥ प्रातः स्वरादिष्वन्तोदात्तोनिपातितः । हवामहे ह्वेञोलटिशपिपरतोह्वः संप्रसारणमित्यनुवृत्तौ बहुलंछन्दसीतिसंप्रसारणं परपूर्वत्वं गुणावादेशौ । प्रयति इण् गतौ लटःशतृ अदिप्रभृतिभ्यःशपइतिशपोलुक् शतुर्ङित्त्वाद्गुणाभावः प्रादिसमासः कृद्ग्रहणेगतिकारकपूर्वस्यापिग्रहणमितिवचनात्प्रत्ययग्रहणइतिनियमाभावात् शतुरनुमोनद्यजादीइतिविभक्तेरुदात्तत्वम् । अध्वरे उक्तं संहितायांउदात्तस्वरितयोर्यणःस्वरितोनुदात्तस्येति अकारस्य स्वरितत्वम् । पीतये पापाने क्तिनि छान्दसमन्तोदात्तत्वम् ॥ ३ ॥

३. मैं प्रातःकाल इन्द्र को बुलाता हूँ, यज्ञ-सम्पादन-काल में इन्द्र को बुलाता हूँ और यज्ञ-समाप्ति-समय में, सोमपान के लिए, इन्द्र को बुलाता हूँ।

उप॑नः सु॒तमा ग॑हि॒ हरि॑भिरिन्द्र के॒शिभिः॑ । सु॒ते हि त्वा॒ हवा॑महे ॥ ४ ॥

उप॑ । नः॒ । सु॒तम् । आ । ग॒हि॒ । हरि॑ऽभिः । इ॒न्द्र॒ । के॒शिऽभिः॑ । सु॒ते । हि । त्वा॒ । हवा॑महे ॥ ४ ॥

हेइन्द्र केशिभिःकेसरयुक्तैर्हरिभिरश्वैस्त्वंनोऽस्मदीयंसुतमभिषुतंसोमंप्रतिउपसमीपेआगहि आगच्छ सुते अभिषुतेसोमेनिमित्तभूतेसति हियस्मात्कारणात्त्वाहवामहेत्वामाह्वयामः तस्मादागच्छेतिपूर्वत्रान्वयः ॥ गहि गमेर्लोटःसेर्हिः शपइत्यनुवृत्तौवहुलंछन्दसीतिशपोलुक् इषुगमियमांछइतिछत्वंनभवति नलुमतांगस्येतिप्रतिषेधात् अनुदात्तोपदेशेत्यादिनाअनुनासिकलोपः तस्यासिद्धवदत्राभादित्यसिद्धत्वादतोहेरितिहेर्लुग्नभवति । केशिभिः क्लिशेरन् लोलोपश्चेतिअन् मत्वर्थीयइनिः प्रत्ययस्वरः । हवामहे ह्वइत्यनुवृत्तौ बहुलंछन्दसीतिसंप्रसारणं शपःपित्त्वादनुदात्तत्वं तिङ्श्चलसार्वधातुकस्वरेणधातुस्वरएव तिङ्ङतिङइतिननिघातः हिचेतिप्रतिषेधात् ॥ ४ ॥

४. इन्द्रदेव! केशर-युक्त अश्वों के साथ तुम हमारे संस्कृत सोमरस के निकट आओ। सोमरस तैयार होने पर हम तुम्हें बुलाते हैं।

सेमं नः॒ स्तोम॒मा ग॒ह्युपे॒दं सव॑नं सु॒तम् । गौ॒रो न तृ॑षि॒तः पि॑ब ॥ ५ ॥ ३० ॥

सः । इ॒मम् । नः॒ । स्तोम॑म् । आ । ग॒हि॒ । उप॑ । इ॒दम् । सव॑नम् । सु॒तम् । गौ॒रः । न । तृ॒षि॒तः । पि॒ब॒ ॥ ५ ॥ ३० ॥

हेइन्द्र सत्वंनोऽस्मदीयमिमंस्तोमंस्तुतिं प्रतिआगहिआगच्छ आगमनेहेतुरुच्यते उप देवयजनसमीपे सुतमभिषुतसोमयुक्तमिदमिदानीमनुष्ठीयमानंसवनं प्रातःसवनादिरूपंकर्मवर्तते तस्माद्गौरोन गौरमृगइवतृषितःसन्निमंसोमंपिब ॥ सः इममित्यत्रसंहितायांसोचिलोपेचेत्पादपूरणमितिसुलोपः । गहि गतम् । सवनं सूयतेस्मिन्सोमइत्यधिकरणेल्युट् लितीतिप्रत्ययात्पूर्वस्योदात्तत्वं ल्युडन्तात्सप्तम्याः सुपांसुपोभवन्तीतिवक्तव्यमितिवचनात् द्वितीया अभिषुतसोमयुक्तमिदंसवनमितिकर्मण्येववाद्वितीया तदास्तुतशब्दादर्शआदित्वादच् । तृषितः ञितृषापिपासायां निष्ठा निष्ठेतिक्तः प्रत्ययस्वरेणोदात्तः पश्चादिट् आगमाअनुदात्ताइत्यनुदात्तत्वम् ॥ ५ ॥

५. इन्द्र ! तुम हमारी यह स्तुति ग्रहण करने आओ; क्योंकि यज्ञ॰ सवन (सोमरस) तैयार है। तृषित गोरे हरिणों की तरह आओ।

इमेसोमासइन्दवःसुतासोअधिबर्हिषि । ताँइन्द्रसहसेपिब ॥ ६ ॥

इमे । सोमासः । इन्दवः । सुतासः । अधि । बर्हिषि । तान् ।

इन्द्र । सहसे । पिब ॥ ५ ॥

इन्दुशब्दः उन्दीक्लेदनेइतिधातोरुत्पन्नः इन्दवः क्लेदनयुक्ताइमेवेद्यामवस्थिताः सोमासः तत्तत्पात्रगताःसोमाबर्हिषियज्ञे अधिआधिक्येनसुतासः अभिषुताः हेइन्द्र सहसे बलार्थं तान्सोमान् पिब ॥ सोमासः आज्जसेरसुगिति जसोऽसुगागमः । इन्दवः उक्तम् । सुतासः पूर्ववदसुक् संहितायांप्रकृत्यान्तःपादमव्यपरेइतिप्रकृतिभावात्परपूर्वत्वंनभवति । बर्हिषि बृंहेर्नलोपश्चेतिइस् प्रत्ययस्वरः । ताँइन्द्रेत्यत्रदीर्घादटिसमानपादेइतिरुत्वं यत्वयलोपौ अनुनासिकः । सहसे षहमर्षणे असुन्नन्तोनित्त्वादाद्युदात्तः ॥ ६ ॥

६. यह तरल सोमरस बिछाये हुए कुशों पर पर्याप्त अभिषुत (संस्कृत) है; इन्द्र ! बल के लिए इस सोम का पान करो।

सप्तमीमृचमाह—

अयंतेस्तोमोअग्रियोहृदिस्पृगस्तुशन्तमः । अथासोमंसुतंपिब ॥ ७ ॥

अयम् । ते । स्तोमः । अग्रियः । हृदिऽस्पृक् । अस्तु । शम्ऽतमः ।

अथ । सोमम् । सुतम् । पिब ॥ ६ ॥

हेइन्द्रअयमस्माभिःक्रियमाणःस्तोमः स्तोत्रविशेषः अग्रियः श्रेष्ठःसन् तेतव हृदिस्पृक् मनस्यंगीकृतः शन्तमः सुखवमोऽस्तु अथस्तुतेरनन्तरं सुतमभिषुतंसोमंपिब ॥ अग्रियः अग्रादित्यनुवृत्तौ घच्छौचेतिघच् चित्त्वादन्तोदात्तः । हृदिस्पृशतीतिहृदिस्पृक् स्पृशोनु-

दकेक्विन् तत्पुरुषेकृतिबहुलमित्यलुक् क्विन्प्रत्ययस्यकुरितिशकारस्यकुत्वं कृदुत्तरपदप्रकृतिस्वरत्वम्। शन्तमः सुखकरद्रव्यवचनोऽत्रशम्शब्दः ततस्तमप् अत्रसुखप्रकर्षस्यगुणद्वारागुणनिष्ठद्रव्येसंक्रान्तत्वाददद्रव्यप्रकर्षइतिनिषेधात्किमेत्तिङव्ययेत्यादिनाआम्नभवति द्रव्यस्यस्वतःप्रकर्षाभावात् ईदृगर्थएवहिसनिषेधः। अथासोमं संहितायांनिपातस्यचेतिदीर्घः॥ ७॥

७. इन्द्र! यह स्तुति श्रेष्ठ है; यह तुम्हारे लिए हृदयस्पर्शी और सुखकर हो। अनन्तर संस्कृत सोम पीओ।

विश्वमित्सवनंसुतमिन्द्रोमदायगच्छति। वृत्रहासोमपीतये॥ ८॥

विश्वम्। इत्। सवनम्। सुतम्। इन्द्रः। मदाय। गच्छति।
वृत्रऽहा। सोमऽपीतये॥ ७॥

वृत्रहाशत्रुघातकइन्द्रः सोमपीतयेसोमपानायमदायतत्पानजन्यहर्षायच विश्वमित्सर्वमपिसुतमभिषुतसोमयुक्तंसवनं प्रातःसवनादिरूपंकर्मगच्छति॥ विश्वं असिपृषीत्यादिनाक्वन् नित्त्वादाद्युदात्तः। सवनं सुतं पूर्ववत्। मदाय मदोनुपसर्गेइत्यप्प्रत्ययः पित्त्वाद्धातुस्वरः। गच्छति इषुगमियमांछः। वृत्रहा वृत्रंहतवान् ब्रह्मभ्रूणवृत्रेषुक्विप् इन्हन्पूषन्नित्यादिनानिवृत्तंदीर्घत्वं सौचेतिप्रतिप्रसवाद्भवति कृदुत्तरपदप्रकृतिस्वरत्वम्। सोमपीतये व्यधिकरणबहुव्रीहिरित्युक्तम्. तत्पुरुषेवा दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वम्॥ ८॥

८. वृत्रासुर का वध करनेवाले इन्द्र सोमपान और प्रसन्नता के लिए सारे सोमरस-संयुक्त यज्ञों में जाते हैं।

नवमीमृचमाह—

सेमन्नःकाममापृणगोभिरश्वैःशतक्रतो। स्तवामत्वास्वाध्यः॥९॥२१॥

सः। इमम्। नः। कामम्। आ। पृण। गोभिः। अश्वैः।
शतक्रतो इति शतऽक्रतो। स्तवाम। त्वा। सुऽआध्यः॥ ८॥२१॥

हेशतक्रतो सत्वंनोस्मदीयमिमंकामंकाम्यमानंफलंगोभिरश्वैश्चसह आपृणसर्वतःपूरय वयमपिस्वाध्यः सुष्ठुसर्वतोध्यानयुक्ताःसन्तस्त्वात्वांस्तवाम॥ सेमं संहितायां सोचिलोपेचेत्पादपूरणमितिसुलोपः। कामं कमेर्घञि कर्षात्वतोघञोन्तउदात्तइत्यन्तोदात्तत्वेप्राप्ते वृषादिषुपाठादाद्युदात्तत्वम्। पृण पृणप्रीणने लोटःसेर्हिः तुदादिभ्यःशः तस्यङित्वाद्गुणाभावः अतोहेरितिहेर्लुक्। गोभिः सावेकाचइतिप्राप्तंविभक्तेरुदात्तत्वंनगोश्वन्त्साववर्णेतिप्रतिषिध्यते। अश्वैः क्वन्नन्तइत्युक्तं असामर्थ्यान्नपराङ्गवद्भावः। स्तवाम ष्टुञ्स्तुतौ धात्वादेःषःसः लोडुत्तमबहुवचनस्यलो-

टोलङ्वदितिलङ्वद्भावात् नित्यंङित इतिसकारस्यलोपः आडुत्तमस्यपिच्चेत्याडागमः प्रत्ययस्यपित्त्वादनुदात्तत्वं धातुस्वरएव । स्वाध्यः ध्यैचिन्तायां स्वाङोरुपसर्गयोःप्राक्प्रयोगः अन्येभ्योऽपिदृश्यन्तइतिक्विप् दृशिग्रहणस्यविध्यन्तरोपसंग्रहणार्थत्वादत्रसंप्रसारणेसतिपरपूर्वत्वं हलइति दीर्घः जसिएरनेकाचइतियणादेशः गतिकारकोपपदात्कृदित्युत्तरपदप्रकृतिस्वरत्वं उदात्तयणोहल्पूर्वादितिजसउदात्तत्वंनभवति तत्रासर्वनामस्थानमित्यनुवृत्तेः अतउदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्येतिस्वरितत्वमेवभवति ॥ ९ ॥

९. सौ यज्ञ करनेवाले इन्द्र ! गायों और घोड़ों से तुम हमारी सारी अभिलाषायें भली भाँति पूर्ण करो। हम ध्यानस्थ होकर तुम्हारी स्तुति करते हैं।

इन्द्रावरुणयोरित्यादिकंनवर्चंसूक्तं अतएवनवशब्दानुवृत्तावनुक्रम्यते—इन्द्रावरुणयोरैन्द्रावरुणंयुवाकुपादनिचृताविति अत्रदेवताविस्पष्टा ऋषिच्छन्दसीपूर्ववदनुवर्तेते अयंतुविशेषः युवाकुहीत्यादिकेद्वेऋचौपादनिचृन्नामकच्छन्दोयुक्ते विनियोगस्तुस्मार्तोलैंगिकोवाकश्चिदवगन्तव्यः।

तस्मिन्सूक्तेप्रथमामृचमाह—

इन्द्रावरुणयोरहंसम्राजोरवआवृणे। तानोमृळातईदृशे ॥ १ ॥

इन्द्रावरुणयोः। अहम्। सम्ऽराजोः। अवः। आ। वृणे। ता। नः। मृळातः। ईदृशे ॥ १ ॥

अहमनुष्ठातासम्राजोः समीचीनराज्योपेतयोः सम्यग्दीप्यमानयोर्वा इन्द्रावरुणयोर्देवयोःसंबन्धि अवोरक्षणंआवृणेसर्वतःप्रार्थये ता तौदेवौ ईदृशेएवंविधेऽस्मदीयवरणेनिमित्तभूतेसतिमृळातः अस्मान्सुखयतः ॥ इन्द्रशब्दोरन्प्रत्ययान्तः वरुणशब्दउनन्प्रत्ययान्तः उभौनित्त्वादाद्युदात्तौ समासे देवताद्वन्द्वेचेतिपूर्वपदस्यानङादेशः उभेयुगपदित्यनुवृत्तेर्देवताद्वन्द्वेचेतियुगपदुभयपदप्रकृतिस्वरत्वम्। सम्राजोः राजृदीप्तौ सत्सूद्विषेत्यादिनाक्विप् समोमोऽनुस्वारइत्यनुस्वारेप्राप्ते मोराजिसमःक्वावितिमकारादेशः कृदुत्तरपदप्रकृतिस्वरत्वं कर्तृकर्मणोःकृतीतिकर्तरिषष्ठी। अवरक्षणादिषुभावेअसुन् नित्त्वादाद्युदात्तः । ता सुपांसुलुगित्यादिनाद्विवचनस्याडादेशः टिलोपे विभक्तेरुदात्तनिवृत्तिस्वरः। मृळातः मृडसुखने प्रार्थनायांलिङर्थेलेट् द्विवचनं तस्य तस् लेटोडाटावित्याडागमः तुदादिभ्यःशः ङित्त्वाल्लघूपधगुणाभावः । ईदृशे त्यदादिषुदृशोनालोचनेकञ्चेतिइदम्शब्देउपपदेदृशेःकञ् उपपदसमासे इदंकिमोरीश्कीइतीदमईश् शित्त्वात्सर्वादेशः कञः कित्त्वाद्गुणाभावः ञित्त्वादुत्तरपदस्याद्युदात्तत्वम् उपपदसमासेकृदुत्तरपदप्रकृतिस्वरत्वेनतदेवशिष्यते ॥ १ ॥

१. मैं सम्राट् इन्द्र और वरुण से, अपनी रक्षा के लिए, याचना करता हूँ। ऐसी याचना करने पर ये दोनों हमें सुखी करेंगे।

द्वितीयामृचमाह—

गन्तारा हि स्थोऽवसे हवं विप्रस्य मावतः । धर्तारा चर्षणीनाम् ॥ २ ॥

गन्तारा । हि । स्थः । अवसे । हवम् । विप्रस्य । माऽवतः ।
धर्तारा । चर्षणीनाम् ॥ २ ॥

हेइन्द्रावरुणौ अवसे अवितुमनुष्ठातारं रक्षितुं मावतोमद्विधस्यविप्रस्य ब्राह्मणर्त्विजो-हवमाह्वानंगन्तारौस्थोहि मास्तशीलौभवथःखलु कीदृशौ चर्षणीनांमनुष्याणांधर्तारौ योग-क्षेमसंपादनेनधारयितारौ ॥ गन्तारा गमेस्ताच्छील्येतृन् द्विवचनस्यसुपांसुलुगित्यादिनाआ-कारादेशः ऋदृशोऽङिगुणः अप्तृन्नित्यादिनोपधादीर्घत्वं तृनोनित्त्वादाद्युदात्तत्वम् । स्थः अस् भुवि लट्मध्यमपुरुषद्विवचनंथस् अदिप्रभृतिभ्यःशपइतिशपोलुक् हिचेतिनिघातप्रतिषेधः।अव-से अवरक्षणे तुमर्थेसेसेनित्यसेन् नित्त्वादाद्युदात्तः । हवं ह्वेञोबहुलंछन्दसीत्यनैमित्तिकेसंप्र-सारणेपरपूर्वत्वेच ऋदोरबित्यप् गुणावादेशौ अपःपित्त्वादनुदात्तत्वं धातुस्वरएव । विप्रस्य टुव-पबीजसंताने अस्यऋज्रेन्द्रेत्यादिनारन्निपातितोनित्त्वादाद्युदात्तः । मावतः वतुप्प्रकरणे यु-ष्मदस्मद्भ्यांछन्दसिसादृश्यउपसंख्यानं वतुप् प्रत्ययोत्तरपदयोरस्मदोमपर्यन्तस्यमादेशः आसर्व-नाम्नइतिदकारस्यआकारः सवर्णदीर्घः मतुपःपित्त्वादनुदात्तत्वम् प्रातिपदिकान्तोदात्तत्वे सएवशिष्यते । धर्तारा धृञ्धारणे ण्वुल्तृचावितितृच् एकाचउपदेशेइतीट्प्रतिषेधः गुणोरपर-त्वं अप्तृन्नित्यादिनाउपधादीर्घः सुपांसुलुगित्याकारः तृचश्चित्त्वादन्तोदात्तत्वम् । चर्षणीनां कृषेरादेश्चचइतिअनिप्रत्ययः तत्सन्नियोगेनककारस्यचकारः प्रत्ययाद्युदात्तत्वंबाधित्वा छा-न्दसमन्तोदात्तत्वम् अतएवनामन्यतरस्यामितिविभक्तेरुदात्तत्वम् तन्नहि मतुपि योह्रस्वान्तः अन्तोदान्तःतत्रउत्तरस्यनाम्नउदात्तत्वमितिव्याख्यातम् ॥ २ ॥

२. तुम मेरे जैसे पुरोहितों की रक्षा के लिए मेरा आह्वान ग्रहण करो। तुम मनुष्यों के स्वामी हो।

तृतीयामृचमाह—

अनुकामं तर्पयेथामिन्द्रावरुण राय आ । ता वां नेदिष्ठमीमहे ॥ ३ ॥

अनुऽकामम् । तर्पयेथाम् । इन्द्रावरुणा । रायः । आ । ता ।
वाम् । नेदिष्ठम् । ईमहे ॥ ३ ॥

इन्द्रावरुणा हेइन्द्रावरुणौ अनुकामं अस्मदीयाभिलाषमनुरायोधनस्यप्रदानेन आतर्प-येथां सर्वतोस्मांस्तृप्तान्कुरुतं वयंयदायदाधनंकामयामहेतदातदाप्रयच्छतमित्यर्थः ता वां

तादृशौयुवांनेदिष्ठंअतिशयेनसामीप्यंयथाभवतितथा ईमहेयाचामहे कालविलंबमन्तरेणधनं दातव्यमित्यर्थः सप्तदशसुयाञ्चाकर्मसु ईमहेइतिपठितम् ॥ अनुकामं कामस्यपश्चादनुकामं अथवा कामंअनु अनुकामं अनुरिहपश्चादर्थे अथवावीप्सालक्षणेयथार्थे योग्यतावीप्सापदार्थानतिवृत्तिःसादृश्यंचेतिचत्वारोहियथार्थागृहीताः अव्ययंविभक्तीत्यादिनाअव्ययीभावसमासः अव्ययीभावश्चेत्यव्ययसंज्ञायां अव्ययादाप्सुपइतिप्राप्तस्यलुकोपवादोनाव्ययीभावादतोम्त्वपञ्चम्याइतिविभक्तेरमादेशः समासस्येत्यन्तोदात्तत्वम् । तर्पयेथां तृपेर्ण्यन्ताल्लोटोणिचश्चआत्मनेपदम् मध्यमद्विवचनमाथां टेरेत्वेआमेतइत्यामादेशः शपिसत्यतोयेयइत्यनुवृत्तौआतोङित्इत्याकारस्यइयादेशः आद्गुणोयलोपश्च । इन्द्रावरुणा सुपांसुलुगिति द्विवचनस्यआकारः आमन्त्रिताद्युदात्तत्वं संहितायामाकारस्यह्रस्वत्वम् ।रायः ऊडिदमित्यादिनाविभक्तेरुदात्तत्वम् । वा सुपांसुलुगितिविभक्तेराकारः पदात्परत्वाद्युवामित्यस्यवामादेशोऽनुदात्तः । नेदिष्ठं अतिशयेनान्तिकं अतिशायनेइष्ठन् अन्तिकबाढयोर्नेदसाधावितिनेदादेशः यस्येतिलोपः इष्ठनोनित्त्वादाद्युदात्तत्वम् । ईमहे ईङ्गतौ ङित्त्वादात्मनेपदम् बहुलंछन्दसीतिश्यनोलुक् निघातः ॥ ३ ॥

३. इन्द्र और वरुण ! हमारे मनोरथ के अनुसार, धन देकर हमें तृप्त करो। हमारी यही इच्छा है कि तुम हमारे पास रहो।

चतुर्थीमृचमाह—

युवाकुहिशचीनांयुवाकुंसुमतीनाम् । भूयामवाजदान्नाम् ॥ ४ ॥

युवाकु । हि । शचीनाम् । युवाकु । सुऽमतीनाम् । भूयाम । वाजऽदान्नाम् ॥ ४ ॥

हियस्मात्कारणात् शचीनामस्मदीयकर्मणां संबन्धिसोमरूपंहविर्युवाकुवसतीवर्येकधनात्मकैरुदकैःपयःसक्त्वादिद्रव्यान्तरैश्चमिश्रितं तथा सुमतीनां शोभनबुद्धियुक्तानामृत्विजां स्तोत्ररूपंवचनमपि युवाकु नानाविधैःस्तुत्यगुणैर्मिश्रितं तस्मात्कारणात् हेइन्द्रावरुणौ तथाविधंहविः स्वीकुर्वतोर्युवयोःप्रसादाद्वयंवाजदान्नांअन्नप्रदानांपुरुषाणांमध्येमुख्याभूयामभवेम अपःअमइत्यादिषुषड्विंशतिसंख्याकेषुकर्मनामसुशचीशमीइतिपठितम् ॥ युवाकु युमिश्रणे कठिकुषिभ्यांकाकुरित्यत्रबाहुलकाद्यौतेरपिकाकुःप्रत्ययः कित्त्वेनगुणाभावादुकारस्योवङादेशः प्रत्ययस्वरेण मध्योदात्तत्वम् । शचीशब्दःकेषांचिन्मतेशार्ङ्गरवादिःङीनन्तोनित्त्वादाद्युदात्तइत्युभेवनस्पत्यादिषुयुगपदित्यत्रवृत्तिकृतोक्तम् । सुमतीनां विद्यामसुमतीनामित्यत्रोक्तम् । भूयाम प्रार्थनायां लिङ् उत्तमबहुवचनेनित्यंङित्इतिसकारलोपः यासुट्परस्मैपदेषूदात्तोङिच्चेत्युदात्तोयासुडागमः लिङःसलोपोऽनन्त्यस्येतिसकारलोपः बहुलंछन्दसीतिशपोलुक् सतिशिष्टत्वाद्यासुडुदात्तएव

शिष्यते । वाजदावां वाजंददातीतिवाजदावानः आतोमनिन्क्वनिबित्यादिनावनिप् तस्यपित्त्वाद्धातु-स्वरएवशिष्यते समासे कृदुत्तरपदप्रकृतिस्वरत्वेनसएवशिष्यते आमिअल्लोपोनइत्यकारलोपः तस्याचःपरस्मिन्निितिस्थानिवद्भावाल्लोपोव्योर्वलीतिवकारलोपोनभवति ॥ ४ ॥

४. हमारे यज्ञ में हव्य मिला हुआ है और इसमें पुरोहितों का स्तोत्र भी सम्मिलित हो गया है; इसलिए हम अन्नदाताओं में अग्रणी हों।

इन्द्रः॑सहस्र॒दाव्नां॒वरु॑णः॒शंस्या॑नाम् ॥ क्रतु॑र्भव॒त्युक्थ्यः॑ ॥ ५ ॥३२॥

इन्द्रः॑ । स॒ह॒स्र॒ऽदाव्ना॑म् । वरु॑णः । शंस्या॑नाम् । क्रतुः॑ । भ॒व॒ति॒ । उ॒क्थ्यः॑ ॥ ५ ॥

अयमिन्द्रः सहस्रदाव्नां सहस्रसंख्याकधनप्रदानांमध्ये क्रतुःधनदानस्यकर्ताभवति प्रभूतं ददातीत्यर्थः तथा वरुणःशंस्यानांस्तुत्यानांमध्ये उक्थ्यःस्तुत्योभवति अतिशयेनस्तुत्यइत्यर्थः॥ वरुणः उनन्प्रत्ययोनित्त्वादाद्युदात्तः ।शंस्यानां शंसुस्तुतौ ऋहलोर्ण्यत् तित्स्वरितमितिप्राप्ते ईड-वंदवृशंसदुहांण्यतइत्याद्युदात्तः। क्रतुः कृञःकतुरितिकतुः कित्त्वाद्गुणाभावेयणादेशः प्रत्ययस्वरे-णाद्युदात्तः । उक्थ्यः उक्थंशस्त्रं तेनस्तुत्यत्वेनतत्रभवउक्थ्यः भवेछन्दसीतियत् यस्येति लोपः अत्रतित्स्वरितमित्येतद्बाधित्वातीर्थ्यायकूप्यायेत्यादिवद्व्यचुत्वात् यतोनावइतिप्राप्तमाद्यु-दात्तत्वम् सर्वेविधयश्छन्दसिविकल्प्यन्तइतिनक्रियते ननुयस्येतिलोपात्प्रागेवतित्स्वरितत्वमस्तु नहितदायतोनावइत्येतदस्ति द्व्यचुत्वाभावात् अतएवद्यूर्म्यायचसूर्म्यायचेत्यादौस्वरितत्वं दृश्यते नचपरत्वान्नित्यत्वाच्च यस्येतिलोपेनप्रथमतोभाव्यमितिवाच्यम् प्रकृतिप्रत्ययाश्रयाद्ब-हिरङ्गाद्यस्येतिलोपात्प्रत्ययमात्राश्रयतयाअन्तरङ्गत्वेनतित्स्वरितमित्येतस्यप्राबल्यात् अतऊ-र्म्यायेत्यादिवत् उक्थ्यइत्यत्रापिलक्षणतएवस्वरितत्वंभविष्यतीतिकिंछान्दस्येन यत्रहिलोप-मन्तरेणद्व्यचुत्वं तत्रयतोनावइत्येतद्भवति यथाचेयंजेयमितिलोपनिबन्धनद्व्यचुत्वप्रदेशेषुतु स्वरि-तेनैवभवितव्यमिति एवंतर्हितीर्थ्यायकूप्यायेत्यादौयदाद्युदात्तत्वं तदेवच्छान्दसमस्तु अथ अत्रतु वार्णादाङ्गंबलीयइत्यन्तरङ्गत्वेऽपिस्वरितत्वंबाधित्वालोपएवभविष्यति तर्ह्युक्थ्येऊर्म्यायसूर्म्याये-त्यादौचछान्दस्यमस्तु सर्वथैकत्रछान्दस्यात्वमुच्यते ॥ ५ ॥

५. असंख्य धनदाताओं में इन्द्र धन के दाता और स्तवनीय देवों में वरुण स्तुति-पात्र हैं।

इतिप्रथमस्यप्रथमेद्वात्रिंशोवर्गः ॥ ३२ ॥

---

०१ वीरवीर्यौचेत्यत्रवीर्यग्रहणाद्यतोनावइत्यनित्यमितिज्ञापितत्वात्तित्स्वरितमितिस्वरित त्वम्। २ आदूत्यंभृगवाणः (ऋ० सं० १. ५. १५.) इत्यत्रवेदभाष्यम्।

सूक्ते षष्ठीमृचमाह—

तयोरिदवसा वयं सनेम नि च धीमहि । स्यादुत प्ररेचनम् ॥ ६ ॥

तयोः । इत् । अवसा । वयम् । सनेम । नि । च । धीमहि ।

स्यात् । उत । प्रऽरेचनम् ॥ ६ ॥

तयोरित्पूर्वोक्तयोरिन्द्रावरुणयोरेव अवसा रक्षणेन वयमनुष्ठातारः सनेम संभजेम धनमितिशेषः निधीमहिच प्राप्ते धनेयावदपेक्षितं तावद्भुक्त्वा ततोवशिष्टं धनं क्वचिन्निधिरूपेणस्थापयामश्च उतअपिचप्ररेचनं भुक्तान्निहिताच्च प्रकर्षेणाधिकंधनं स्यात् संपद्यताम् ॥ अवसा असुन् नित्त्वादाद्युदात्तः वयं यूयंहिस्थेत्यत्रयदुक्तंतदत्रद्रष्टव्यम् । सनेम आशिषिलिङ् तस्यमस् नित्यंङितइतिसकारलोपः किदाशिषीतियासुट् छन्दस्युभयथेतिसार्वधातुकमप्यस्तीति लिङःसलोपोनन्त्यस्येतिसकारलोपः अतोयेयइतिइयादेशः लोपोव्योर्वलीतियलोपः लिङ्याशिष्यङित्यङ् आद्गुणः पादादित्वान्ननिघातः । धीमहि डुधाञ्धारणपोषणयोः आशिषि लिङोमहिङ् तस्यछन्दस्युभयथेतिसार्वधातुकार्धधातुकसंज्ञे तत्रसार्वधातुकत्वेनलिङःसलोपोऽनंत्यस्येतिसकारलोपः सार्वधातुकमपिदितिङित्त्वम् शप्च बहुलंछन्दसीतिजुहोत्यादेरपिशपोलुक् आर्धधातुकत्वादातोलोपइटिचेत्याकारलोपः निघातः सनेमेत्यपेक्षयाद्वितीयत्वादत्रचवायोगेप्रथमेतिननिषेधः । स्यात् अस्तेःप्रार्थनायांलिङ् तिप् इतश्चेतीकारलोपः यासुट्परस्मैपदेषूदात्तोङिच्चेति यासुट्ङित्त्वे अदिप्रभृतिभ्यःशपइतिशपोलुक् श्नसोरल्लोपइत्यकारलोपः पादादित्वान्ननिघातः ।उत एवमादीनामन्तइत्यन्तोदात्तः।प्ररेचनं रिचिर्विरेचने भावेल्युट् योरनादेशः लितीतिप्रत्ययात्पूर्वस्योदात्तत्वम् प्रादिसमासः कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ ६ ॥

६. उनके रक्षण से हम धन का उपयोग और संचय करते हैं। इसके अतिरिक्त हमारे पास यथेष्ट धन हो।

सप्तमीमृचमाह—

इन्द्रावरुण वामहं हुवे चित्राय राधसे । अस्मान्त्सु जिग्युषस्कृतम् ॥ ७ ॥

इन्द्रावरुणा । वाम् । अहम् । हुवे । चित्राय । राधसे । अस्मान् ।

सु । जिग्युषः । कृतम् ॥ ७ ॥

इन्द्रावरुणा हेइन्द्रावरुणौ वांयुवामुभौ अहं हुवे आह्वयामि किमर्थं चित्रायमणिमुक्तादिरूपेणविविधायराधसेधनाय तदाहूतौ युवांअस्माननुष्ठातॄन् सुजिग्युषः शत्रुविषयेसुष्ठुजययुक्तान् कृतं कुरुतम् ॥ इन्द्रावरुणा सुपांसुलुगित्यादिना संबोधनस्यआकारः देवताद्वन्द्वेचेति

पूर्वपदस्यानङ् आमन्त्रिताद्युदात्तत्वम् संहितायांछान्दसंह्रस्वत्वम्। हुवे ह्वयतेर्लट्उत्तमैकवचनं इट् शपइत्यनुवृत्तौबहुलंछन्दसीतिलुक् ह्वइत्यनुवृत्तौबहुलंछन्दसीतिसंप्रसारणं परपूर्वत्वं अचिश्नुधात्वित्यादिनाउवङ् नचहुश्नुवोरित्यादिनायणादेशः जुहोतेरेवह्निमतिपदोकस्यतवत्पुनरस्य लाक्षणिकत्वात् इटःप्रत्ययस्वरेणोदात्तत्वं पादादित्वान्ननिघातः। राधसे असुन् नित्त्वादाद्युदात्तत्वम्।अस्मान् शसि द्वितीयायांचेत्यात्वम् शसोनइतिनत्वम्। जिग्युषः जिजये लिटःक्वसुश्चेति क्वसुः द्विर्भावः सन्लिटोर्जेरितिद्वितीयस्यकुत्वं क्वसोःकित्त्वाद्गुणाभावः क्रादिनियमात्प्राप्तस्येटो-वस्वेकाजाद्घसामितिनियमेननिवृत्तिः द्वितीयाबहुवचनंशस् भसंज्ञायां वसोःसंप्रसारणमिति संप्रसारणंपरपूर्वत्वं एरनेकाचह्वतियणादेशः शासिवसिघसीनांचेतिषत्वं प्रत्ययस्वरेणउकार-उदात्तः। कृतं कृञ्करणे लोण्मध्यमद्विवचनस्य लङ्वद्भावात्तमादेशः शपोबहुलंछन्दसीतिलुक् तिङ्ङतिङइतिनिघातः॥ ७॥

७. इन्द्र और वरुण! तरह-तरह के धनों के लिए मैं तुम लोगों को बुलाता हूँ। हमें भली भाँति विजयी बनाओ।

इन्द्रावरुणनूनुवांसिषासन्तीषुधीष्वा। अस्मभ्यंशर्मयच्छतम्॥ ८॥

इन्द्रावरुणा। नु। नु। वाम्। सिसासन्तीषु। धीषु। आ।
अस्मभ्यम्। शर्म। यच्छतम्॥ ८॥

इन्द्रावरुणा हेइन्द्रावरुणौ धीष्वस्मदीयबुद्धिषुवां युवां सिषासन्तीषु सनितुं संभक्तुं सम्यक् सेवितुमिच्छन्तीषुतदानीमासमन्तादस्मभ्यं शर्मसुखं नूनु अतिशयेनक्षिप्रंयच्छतंदत्तं षड्विंशतिसंख्याकेषुक्षिप्रनामसु नुमक्ष्वितिपठितम् तस्यद्विरावृत्त्यबलात् अतिशयोलभ्यते॥इन्द्रावरुणा उक्तम्। नूनु ऋचितुनुघमक्षुतङ्कुत्रोरुष्याणामिति पूर्वस्यदीर्घत्वम्। सिषासन्तीषु वनषणसंभक्तौ धात्वादेःषःसः इच्छायांसन् द्विर्भावोहलादिशेषः सन्यतइतीत्वं आदेशप्रत्यययोरितिषत्वं सनीवन्तेत्यादिनाविकल्पादिड्भावः जनसनखनांसन्झलोरितिनकारस्यआकारः उपरिलटः शतृ कर्तरिशप् उगितश्चेतिङीप् शप्श्यनोर्नित्यमितिनुम् ङीपःशपश्चपित्त्वाच्छतुश्चलसार्वधातुकत्वेनचानुदात्तत्वम् सनोनित्त्वादाद्युदात्तत्वम् तदेवशिष्यते। धीषु सावेकाचइतिविभक्तेरुदात्तत्वम्। अस्मभ्यं अस्मभ्यमप्रतिष्कुतइत्यत्रोक्तम्। यच्छतं दाण्दाने शपि पाघ्रेत्यादिनायच्छादेशः॥ ८॥

८. इन्द्र और वरुण! तुम्हारी अच्छी तरह से सेवा करने के लिए हमारी बुद्धि अभिलाषिणी है। हमें शीघ्र सुख हो।

नवमीमृचमाह—

प्रवामश्नोतुसुष्टुतिरिन्द्रावरुणयांहुवे। यामृधाथेसधस्तुतिम्॥९॥ २३॥

प्र । वाम् । अश्नोतु । सुऽस्तुतिः । इन्द्रावरुणा । याम् । हुवे ।
याम् । ऋधाथे इति । सधऽस्तुतिम् ॥ ९ ॥ ३३ ॥

इन्द्रावरुणा हेइन्द्रावरुणौ यामस्मत्कर्तृकांशोभनस्तुतिंप्रतिहुवेयुवामुभावाह्वयामि किञ्च सधस्तुतिं युवयोरुभयोःसाहित्येनक्रियमाणयास्तवक्रियययायुक्तां यां सुष्टुतिं प्रतिलभ्य ऋधाथे युवांवर्धाथे तादृशीसुष्टुतिः शोभनस्तुतिहेतुभूतऋक्समूहोवामश्नोतु युवां व्याप्नोतु ॥ अश्नोतु अशूव्याप्तौ लोटोव्यत्ययेनतिप् स्वादिभ्यःश्नुः । सुष्टुतिः नर्विधेअस्यसुष्टुतिमित्यत्रोक्तम् । इन्द्रावरुणाहुवेउक्ते अत्रतु यद्वृत्तयोगादनिघातः । ऋधाथे ऋधुवृद्धौ लट् व्यत्ययेनात्मनेपदम मध्यमद्विवचनेश्नोर्बहुलंछन्दसीतिलुक् प्रत्ययस्वरेणआकारउदात्तः यच्छब्दयोगान्ननिघातः । सधस्तुतिं सहस्तुतिर्यस्यांसुष्टुतौसासधस्तुतिः अत्रसुष्टुतिरित्यन्यपदार्थे स्तुतिशब्दस्यस्तूयतेअनयेतिकरणसाधनत्वेनऋक्परत्वे अयंस्तुतिशब्दोभावसाधनतयास्तवनक्रियापरः तस्मिन्भावसाधनत्वेनक्रियापरे अयंकरणसाधनतयाऋक्परइतिसमस्यमानपदार्थादन्यः सहेत्यत्रहकारस्यव्यत्ययेनधकारः सहशब्दएवमादित्वादन्तोदात्तः बहुव्रीहित्वेनपूर्वपदप्रकृतिस्वरत्वम् ॥ ९ ॥

९. इन्द्र और वरुण ! जिस स्तुति से हम तुम्हें बुलाते हैं, अपनी जिस स्तुति को तुम परिवर्द्धित करते हो, वही सुशोभन स्तुति तुम्हें प्राप्त हो।

॥इतिप्रथमस्यप्रथमेत्रयस्त्रिंशोवर्गः॥ ३३ ॥

इतिचतुर्थोनुवाकः ॥ ४ ॥

सोमानमित्यादिषट्सूक्तात्मकेपञ्चमानुवाकेसोमानमित्यादिकंनवर्चंसूक्तम् ऋषिच्छन्दसी पूर्ववत् देवताविशेषस्त्वेवमनुक्रम्यते सोमानमितिपञ्चब्राह्मणस्पत्याश्चतुर्थ्यामिन्द्रश्चसोमश्च पञ्चम्यांदक्षिणाचान्याःसादसस्पत्यानाराशंसीवान्त्येति सूक्तगताआद्याःपञ्चर्चोब्रह्मणस्पतिदेवताकाः तासांमध्येसघावीरइत्येतस्याश्चतुर्थ्यांऋचोब्रह्मणस्पतिरिन्द्रश्चसोमश्चेतितिस्रोदेवताः त्वन्तमित्येतस्याःपञ्चम्यादक्षिणयासहपूर्वोक्तास्तिस्रोदेवताः षष्ठीमारभ्यतिसृणांसदसस्पतिर्देवता नराशंसमित्येतस्यानवम्याःसदसस्पतिर्नराशंसोवाविकल्प्यते विनियोगस्तुपूर्ववत् ॥

तस्मिन्सूक्तेप्रथमामृचमाह—

सोमानंस्वरणंकृणुहिब्रह्मणस्पते । कक्षीवन्तंयऔशिजः ॥ १ ॥

सोमानम् । स्वरणम् । कृणुहि । ब्रह्मणः । पते । कक्षीवन्तम् ।
यः । औशिजः ॥ १ ॥

हेब्रह्मणस्पते एतन्नामकदेव सोमानमभिषवस्यकर्तारंमांअनुष्ठातारंस्वरणंदेवेषुप्रकाशनवन्तं कृणुहि कुरु अत्रदृष्टान्तः—कक्षीवन्तंएतन्नामकमृषिं इवशब्दोऽत्राध्याहर्तव्यः कक्षीवान्यथादेवेषुप्रसिद्धः तद्वदित्यर्थः यःकक्षीवानृषिरौशिजःउशिजःपुत्रःतमिवेतिपूर्वत्रयोजना कक्षीवतोनुष्ठातृषुमुनिषुप्रसिद्धिःतैत्तिरीयैराम्नायते—एतंवैपरआट्णारःकक्षीवाꣳऔशिजोवीतहव्यः श्रायसस्त्रसदस्युःपौरुकुत्स्यःप्रजाकामाअचिन्वतेति । ऋगन्तरेऽप्यृषित्वकथनेनुष्ठातृप्रसिद्धिः सूच्यते—अहंकक्षीवाँऋषिरस्मिविप्रइति । तस्मादस्यानुष्ठातारंप्रतिदृष्टान्तत्वंयुक्तं सोयंमन्त्रोयास्केनैवंव्याख्यातः—सोमानंसोतारंप्रकाशनवन्तंकुरुब्रह्मणस्पतेकक्षीवन्तमिवयऔशिजःकक्षीवान् कक्ष्यावानौशिजउशिजःपुत्रउशिग्वष्टेःकान्तिकर्मणोपित्वयंमनुष्यकक्षएवाभिप्रेतःस्यात्तंसोमानं सोतारंमाप्रकाशनवन्तंकुरुब्रह्मणस्पतइति । अस्मिन्मन्त्रेसोमानमितिपदेनब्रह्मणइतिपदेनसूचितं तात्पर्यं तैत्तिरीयाआमनन्ति—सोमानंस्वरणमित्याह सोमपीथमेवावरुन्धे कृणुहिब्रह्मणस्पतइत्याह ब्रह्मवर्चसमेवावरुन्धइति ॥ सोमानं सुनोतीति षुञ्अभिषवे अन्येभ्योऽपिदृश्यन्तइति मनिन् दृशिग्रहणस्यविध्यन्तरोपसंग्रहणार्थत्वान्नित्त्वेऽपिनाद्युदात्तत्वं किंतुप्रत्ययस्वरएव उञ्छादिषुवासोमन्शब्दोद्रष्टव्यः बहुलग्रहणादौणादिकोवामनिर्द्रष्टव्यः । स्वरणं प्रख्यातं स्वृशब्दोपतापयोः कृत्यल्युटोवहुलमितिकर्मणिल्युट् लितीत्यकारउदात्तः । कृणुहि कृविहिंसाःकरणयोश्च इदितोनुम्धातोरितिनुम् लोटःसिपोहिःशपिप्राप्तेधिन्विकृण्व्योरचेत्युप्रत्ययः तत्सन्नियोगेनवकारस्यचाकारः तस्यातोलोपइतिलोपः तस्यस्थानिवद्भावान्नपूर्वस्यलघूपधगुणः हेर्ङित्त्वादुकारस्यनगुणःउतश्चप्रत्ययाच्छन्दोवावचनमितिहेर्नलुक् सतिशिष्टस्वरवलीयस्त्वंमन्यत्र विकरणेभ्यइतिवचनाद्धेरेवप्रत्ययस्वरेणोदात्तत्वम् पादादित्वान्ननिघातः । ब्रह्मणः षष्ठ्याःपतिपुत्रेत्यादिनासंहितायांविसर्जनीयस्यसकारः सुबामन्त्रितपराङ्गवद्भावात्पदद्वयस्यामन्त्रितनिघातः। कक्षीवन्तं कक्षेभवाकक्ष्या अश्वोदरसंबन्धिनीरज्जुः भवेछन्दसीतियत्प्रत्ययः साअस्यास्तीत्यर्थेआसंदीवदष्ठीवच्चक्रीवत्कक्षीवदितिऋषिविशेषनामकक्षीवच्छब्दोनिपातितः छन्दसीरइतिवत्वं यप्रत्ययस्वरेणतदादेशोनिपातितईकारउदात्तः मतुप्सुपौपित्त्वादनुदात्तौ । औशिजः वशकान्तौ इजीत्यनुवृत्तौ वशेःकिच्चेतिइजिप्रत्ययः तस्यकित्त्वाद्ग्रहिज्येत्यादिनासंप्रसारणं परपूर्वत्वेगुणाभावः सतस्यापत्यमितिप्राग्दीव्यतोऽण् आदिवृद्धिः प्रत्ययस्वरेणान्तोदात्तत्वम् ॥१॥

१. हे ब्रह्मणस्पति ! मुझ सोमरस-दाता को उशिज्-पुत्र कक्षीवान् की तरह देवताओं में प्रसिद्ध करो।

द्वितीयामृचमाह—

योरे॒वान्यो अ॑मीव॒हा व॑सु॒वित्पु॑ष्टि॒वर्ध॑नः । स नः॑ सिषक्तु॒ यस्तु॒रः ॥ २ ॥

---

१ तै०सं. ५. ६. ५. । २ ऋ० ३. ६. १५. । ३ नि० ६. १०. । ४ तै० सं. १. ५. ७. ।

यः । रेवान् । यः । अमीवऽहा । वसुऽवित् । पुष्टिऽवर्धनः ।
सः । नः । सिसक्तु । यः । तुरः ॥ २ ॥

योब्रह्मणस्पतिः रेवान्धनवान्यश्चामीवहारोगाणांहन्ता वसुवित्धनस्यलब्धा पुष्टिवर्धनः पुष्टेर्वर्धयिता यश्चतुरःत्वरोपेतः शीघ्रफलदः सब्रह्मणस्पतिर्नोऽस्मान् सिषक्तुसेवतां परिगृह्यानुगृह्णात्वित्यर्थः अत्रसिषक्तुशब्दस्यसेवार्थत्वंयास्कआह—सिषक्तुसचतइतिसेवमानस्येतिं। प्रत्यायकौशब्दावितिशेषः ॥ रेवान् रयिरस्यास्तीतिमतुप् रयेर्मतौबहुलमितियकारस्यसंप्रसारणं परपूर्वत्वं छन्दसीरइतिवत्वं आद्गुणः ननुवत्वस्यासिद्धत्वाद्बहिरङ्गत्वाच्चप्रागेवगुणेकृते इवर्णाभावान्नवत्वं नचान्तादिवच्चेत्यादिवद्भावेनइवर्णसंपादनम् वर्णाश्रयविधौतत्प्रतिषेधात् अन्यथाखट्वाभिरित्यत्रसवर्णदीर्घस्यान्तवद्भावेनअकारत्वादतोभिसऐसित्यैसादेशःस्यात् नचनिरवकाशत्वेनचवत्वस्यानवकाशत्वम् अग्निवान्वैदर्भस्तंवेः। उपब्रह्माणिहरिवइत्यादाववकाशलाभात् सत्यं अत्रगुणप्रवृत्तेः प्रागिकारात्परोमतुप्कदाचिदिवर्णात्परस्यमतुपःपश्चादेकारादेशेनइवर्णाभावेऽपिभवतिवत्वमितिछन्दसीरइतिसूत्रकृताविवक्षितम् अमुनैवाभिप्रायेण हरिवइत्यादिकमुदाहृत्यापि अन्तेवृत्तिकृताआरेवानित्यप्युदाहृतम् ह्रस्वनुड्भ्यामित्यत्रआरेशब्दान्मतुपइत्युदात्तत्वंवक्तव्यमित्यत्रारेशब्दोरेशब्दस्याप्युपलक्षणम् अतएवहि रेवाँइन्द्रेत्यादौमतुपउदात्तत्वंदृष्टम् अथवाह्रस्वनुड्भ्यामित्यत्रापिकदाचिद्ह्रस्वात्परस्यमतुपउदात्तत्वमित्येवव्याख्येयं एवं चसंप्रसारणपरपूर्वत्वयोःकृतयोर्गुणात्प्राक्ह्रस्वात्परोमतुबितिरेवानारेवानित्यादौसर्वत्रोदात्तत्वंसिध्यति अयमेवसूत्रकृतोभिप्रायोवार्तिककृताव्याख्यातइति । अमीवहा अमरोगेइत्येतस्माद्बन्प्रत्ययेनअमीवशब्दोनिपातितः तंहन्तीतिबहुलंछन्दसीतिक्विप् कृदुत्तरपदप्रकृतिस्वरत्वम्। वसुवित् वसुविन्दतीतिवसुवित् क्विप्चेतिक्विप् उत्तरपदप्रकृतिस्वरत्वम्। पुष्टिवर्धनः वर्धयतेर्नन्द्यादित्वाल्ल्युः लितीतिप्रत्ययात्पूर्वस्योदात्तत्वं पुष्टेर्वर्धनइतिकर्मणिषष्ठ्यासमासः कृदुत्तरपदप्रकृतिस्वरत्वम्। सिषक्तु षचसमवाये लोटि बहुलंछन्दसीतिशपःश्लुः श्लाविविद्वित्वे हलादिशेषेच बहुलंछन्दसीत्यभ्यासाकारस्यइकारः। तुरः तुरत्वरणे इगुपधज्ञाप्रीकिरःकः प्रत्ययस्वरः ॥२॥

२. जो सम्पत्तिशाली, रोगापसारक, धन-दाता, पुष्टि-वर्द्धक और शीघ्र फलदाता हैं, वे ही ब्रह्मणस्पति या बृहस्पति देवता हमारे ऊपर अनुग्रह करें।

तृतीयामृचमाह—

मानःशंसोअररुषोधूर्तिःप्रणङ्मर्त्यस्य। रक्षाणोब्रह्मणस्पते ॥ ३ ॥

मा । नः । शंसः । अररुषः । धूर्तिः । प्रणक् । मर्त्यस्य । रक्ष । नः । ब्रह्मणः । पते ॥ ३ ॥

---

१ नि०३. २१. । २ तै० ब्रा० २. २. १. । ३ ऋ० सं. १. १. ५. । ४ तै०. सं० २. २. १२.।

अररुषोमर्त्यस्यउपद्रवंकर्तुमसमत्समीपंप्राप्तस्यशत्रुरूपस्यमनुष्यस्यधूर्तिःहिंसकःशंसः शंसनमधिक्षेपइत्यर्थः तादृशोवाग्विशेषोनोस्मान्माप्रणक्मासंपृणक्तु शत्रुणाप्रयुक्तोधिक्षेपः कदाचिदस्मान्माप्राप्नोत्वित्यर्थः तदर्थंहेब्रह्मणस्पते नोऽस्मान् रक्षपालय ॥ मा निघातः । शंसनंशंसः भावेघञ् ञित्त्वादाद्युदात्तः । अररुषः अर्तेररुरित्यन्तर्भावितण्यर्थात् ऋगतावित्यस्मादरुस् गुणोरपरत्वं प्रत्ययस्वरेप्राप्ते वृषादित्वादाद्युदात्तः । धूर्तिः धुर्वीहिंसायां क्तिच्क्तौचसंज्ञायामितिक्तिच् तितुत्रतथसिसुसरकसेषुचेतीट्प्रतिषेधः उपधायाश्चेत्युपधादीर्घत्वं वलिलोपंबाधित्वाऊठिप्राप्ते राल्लोपइतिवकारलोपः । प्रणक् पृचीसंपर्के लङ्स्तिप् इतश्चेतीकारलोपः हल्ङ्यादिलोपः कुत्वं रुधादिभ्यःश्नम् तस्यव्यत्ययोबहुलमित्यडागमः यणादेशः अकारस्यागमानुदात्तत्वंबाधित्वा व्यत्ययेनउदात्तत्वम् चादिलोपेविभाषेतिनिघाताभावः । मर्त्यस्य मृङ्प्राणत्यागे असिदसिहृइत्यादिनाऔणादिकस्तन्प्रत्ययः मर्तेषु भवइत्यर्थेभवेछन्दसि इतियत् यतोनावइत्याद्युदात्तत्वम् । रक्ष रक्षपालने शपःपित्त्वादनुदात्तत्वं धातुस्वरएवशिष्यते पादादित्वान्ननिघातः । रक्षाणः द्व्यचोतस्तिङइतिदीर्घः उपसर्गाद्बहुलमितिबहुलग्रहणात् अनुपसर्गादपिनसोणत्वम् । ब्रह्मणस्पते षष्ठ्याःपतिपुत्रेतिसंहितायांविसर्गस्यसकारः सुबामन्त्रितपराङ्गवद्भावात्पदद्वयस्यामन्त्रितनिघातः ॥ ३ ॥

३. ऊधम मचानेवाले मनुष्यों की डाह-भरी निन्दा हमें न छू सके। हे ब्रह्मणस्पति ! हमारी रक्षा करो ।

सघावीरोनरिष्यतियमिन्द्रोब्रह्मणस्पतिः । सोमोहिनोतिमर्त्यम् ॥ ४ ॥

सः । घ । वीरः । न । रिष्यति । यम् । इन्द्रः । ब्रह्मणः । पतिः ।
सोमः । हिनोति । मर्त्यम् ॥ ४ ॥

इन्द्रोदेवोयंमर्त्यंयक्ष्यमाणंहिनोतिप्राप्नोतिवर्धयतिवा तथाब्रह्मणस्पतिर्देवोहिनोतितथासोमोहिनोति सघ सएवयजमानःवीरोवीर्ययुक्तःसन् नरिष्यति नविनश्यति ॥ घ चादिरनुदात्तः संहितायां ऋचितुनुघमक्षुतङ्कुत्रोरुष्याणामितिदीर्घः । ब्रह्मणस्पतिः उक्तम् । हिनोति हिगतौवृद्धौच स्वादिभ्यःश्नुः तिपःपित्त्वात्श्नुप्रत्ययस्वरएवशिष्यते ॥ ४ ॥

४. जिसे इन्द्र, वरुण और सोम उन्नयन करते हैं, वह वीर मनुष्य विनाश को प्राप्त नहीं होता ।

पञ्चमीमृचमाह—

त्वंतंब्रह्मणस्पतेसोमइन्द्रश्चमर्त्यम् । दक्षिणापात्वंहसः ॥ ५ ॥ ३४ ॥

त्वम् । तम् । ब्रह्मणः । पते । सोमः । इन्द्रः । च । मर्त्यम् ।

दक्षिणा । पातु । अंहसः ॥ ५ ॥ ३४ ॥

हेब्रह्मणस्पते त्वंतंमर्त्यं अनुष्ठातारंमनुष्यं अंहसः पापात्पाहीतिशेषः तथासोमःपातु इन्द्रश्चपातु दक्षिणाख्यादेवताचपातु ॥ दक्षिणा दक्षवृद्धौ द्रुदक्षिभ्यामिनन् नित्त्वादाद्युदात्तः। अंहसः नविषयस्येत्यादिनाआद्युदात्तः ॥ ५ ॥

५. हे ब्रह्मणस्पति! तुम, सोम, इन्द्र और दक्षिणादेवी—सब उस मनुष्य को पाप से बचाओ।

इतिप्रथमस्यप्रथमेचतुस्त्रिंशोवर्गः ॥ ३४ ॥

अनुप्रवचनीयचरोर्होमेसदसस्पतिमित्येषाविनियुक्ता तथाचगृह्ये मेखलामाबध्येतिखण्डे पठ्यते—आचार्यःसमन्वारब्धेजुहुयात्सदसस्पतिमद्भुतमिति ।

तामेतांसूक्तेषष्ठीमृचमाह—

सदसस्पतिमद्भुतंप्रियमिन्द्रस्यकाम्यम् । सनिंमेधामयासिषम् ॥ ६ ॥

सदसः । पतिम् । अद्भुतम् । प्रियम् । इन्द्रस्य । काम्यम् ।

सनिम् । मेधाम् । अयासिषम् ॥ ६ ॥

मेधांलब्धुंसदसस्पतिं एतन्नामकंदेवं अयासिषं माप्तवानस्मि कीदृशं अद्भुतमाश्चर्यकरं इन्द्रस्यप्रियं सोमपानेसहचारित्वात् काम्यंकमनीयं सनिंधनस्यदातारम् ॥ सदसः षद्लृविशरणादौ सर्वधातुभ्योऽसुन् नित्त्वादाद्युदात्तः। पतिं पातेर्डतिः टिलोपः प्रत्ययस्वरः। प्रियं इगुपधज्ञाप्रीकिरःकः इयङादेशः प्रत्ययस्वरः। काम्यं कामयतेरचोयत् णेरनिटीतिणिलोपः यतोनावइत्याद्युदात्तत्वम् । सनिं षणुदाने धात्वादेःषःसः अचइरित्यनुवृत्तौ खनिकषिकस्यज्यसिवशिध्वनिस्तनिवनिसनिग्रन्थिचरिभ्यश्चेतिइप्रत्ययः प्रत्ययस्वरः । अयासिषं यामापणे लुङ् मिपः अमादेशः यमरमनमातांसक्चेतिसिचइडागमः धातोःसगागमः निघातः ॥ ६ ॥

६. आश्चर्यकारक, इन्द्र-प्रिय, कमनीय और धनदाता सदसस्पति (अग्नि) के पास हम स्मृति-शक्ति की याचना कर चुके हैं।

यस्मादृतेनसिध्यतियज्ञोविपश्चितश्चन । सधीनांयोगमिन्वति ॥ ७ ॥

यस्मात् । ऋते । न । सिध्यति । यज्ञः । विपःऽचितः । चन ।

सः । धीनाम् । योगम् । इन्वति ॥ ७ ॥

यज्ञोयमनुष्ठातव्योविपश्चितश्चनविदुषोऽपियजमानस्ययस्मात्सदसस्पतिदेवादृतेनसिध्यति सोऽयंसदसस्पतिर्देवोधीनांमनोनुष्ठानविषयाणांअस्मद्बुद्धीनामनुष्ठेयकर्मणांवायोगंसंबन्धमिन्वति

व्याप्नोति यजमानमनुगृह्य तदीयंयज्ञंनिष्पादयतीत्यर्थः ॥ यस्मात् अन्यारादित्यादिनाक्तेयोगात्पञ्चमी सावेकाचइतिविभक्तेरुदात्तत्वेप्राप्ते नगोश्वन्त्सावववर्णेतिप्रतिषेधः।सिध्यति षिधुसंसिद्धौ श्यनोनित्त्वादाद्युदात्तत्वम्. यद्वृत्तान्नित्यमितिनिघातप्रतिषेधः । धीनां सावेकाचइतिविभक्तेरुदात्तत्वम्। योगं युजिर्योगे घञोञ्नित्त्वादाद्युदात्तत्वम्। इन्वति इविव्याप्तौ शप् इदितोनुम्धातोरितिनुम् निघातः ॥ ७॥

७. जिनकी प्रसन्नता के बिना ज्ञानवान् का भी यज्ञ सिद्ध नहीं होता, वही अग्नि हमारी मानसिक वृत्तियों को सम्बन्ध-युक्त किये हुए हैं।

आदृध्नोतिहविष्कृतिंप्राञ्चंकृणोत्यध्वरम्। होत्रादेवेषुगच्छति ॥ ८ ॥

आत्। ऋध्नोति। हविःऽकृतिम्। प्राञ्चम्। कृणोति। अध्वरम्।
होत्रा। देवेषु। गच्छति ॥ ८ ॥

आत्अनन्तरमेवहविष्कृतिं हविःसंपादनयुक्तं यजमानंऋध्नोति सदसस्पतिर्देवोवर्धयतिहविर्दानानन्तरमेवफलंप्रयच्छतीत्यर्थः तथाविधफलसिद्धये अध्वरंयजमानेनानुष्ठीयमानंयज्ञं प्राञ्चंप्रकर्षेण गच्छन्तंअविघ्नेनपरिसमाप्तियुक्तंकृणोतिकरोति होत्राहूयमानादेवतातुष्टासतीयजमानंप्रख्यापयितुंदेवेषुगच्छति यद्वा होत्राअस्मदीयस्तुतिरूपावाक्देवान्परितोषयितुंदेवेषुगच्छति श्लोकोधारेत्यादिषुसप्तपञ्चाशत्सुवाङ्नामसु होत्रागीरितिपठितम् ॥ हविष्कृतिं हविषःकृतिः संपादनंयस्ययजमानस्यसोयंहविष्कृतिः बहुव्रीहौप्रकृत्येतिपूर्वपदप्रकृतिस्वरत्वम्।प्राञ्चं अनिगन्तोञ्चतौवप्रत्ययेइतिगतेःप्रकृतिस्वरत्वम्. पश्चादेकादेशस्वरः। अध्वरं नविद्यतेध्वरोहिंसायस्मिन् नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् हूयतेअस्यामिति होत्रादेवता हुयामाश्रुभसिभ्यस्त्रन्नितित्रन् नित्त्वादाद्युदात्तः ॥ ८ ॥

८. अनन्तर वही अग्नि हव्य-सम्पादक यजमान की उन्नति करते और अच्छी तरह यज्ञ की समाप्ति करते हैं। उनकी कृपा से हमारी स्तुति देवों को प्राप्त हो।

नराशंसंसुधृष्टममपश्यंसप्रथस्तमम्। दिवोनसद्मंमखसम् ॥१॥३५॥

नराशंसम्। सुऽधृष्टमम्। अपश्यम्। सप्रथःऽतमम्। दिवः।
न। सद्मऽमखसम् ॥ १ ॥ ३५ ॥

नराशंसंएतन्नामकं देवविशेषं यद्वा अवयवार्थंव्युत्पत्त्यासदसस्पतिदेवतापरोयंशब्दः व्युत्पत्तिंचयास्कोदर्शयति—नराशंसोयज्ञइतिकात्थक्योनराअस्मिन्नासीनाः शंसंत्यग्निरितिशाकपू-

१ नि० ८. ६.

णिर्न रैःप्रशस्योभवतीति। अत्राग्निवत्सदसस्पतेरपिनरैःशस्यमानत्वान्नराशंसत्वं एतमेवाभिप्रायंहृदिनिधायब्राह्मणमेवमाम्नायते—प्रजावैनरोवाक्शंसइति । अतोमनुष्यैःशस्यमानोयःसदसस्पतिर्योवानराशंसनामकोदेवः तमपश्यंशास्त्रदृष्टयादृष्टवानस्मि कीदृशंसुधृष्टमंअत्याधिक्येनधार्ष्ट्ययुक्तंसप्रथस्तमं अतिशयेनप्रख्यातंसद्ममखसंप्राप्ततेजस्कं तत्रदृष्टान्तः—दिवोन द्युलोकानिव आदित्यचन्द्रादिभिरधिष्ठिताद्युलोकविशेषायथातेजस्विनः तद्वदयंनराशंसःतेजस्वीत्यर्थः । सुधृष्टमं शोभनंधृष्णोतीतिसुधृक् क्विप्चेविक्विप् अतिशायनिकस्तमप् षकारस्यजश्त्वाभावश्छान्दसः कृदुत्तरपदप्रकृतिस्वरत्वेनऋकारउदात्तः ।अपश्यं पाघ्राध्मेत्यादिनापश्यादेशः लुङ्लङ्लृङ्क्ष्वडुदात्तइत्यटउदात्तत्वम् पादादित्वादनिघातः। सप्रथस्तमं प्रथप्रख्याने प्रथनंप्रथः सर्वधातुभ्योसुन् नित्त्वादाद्युदात्तत्वं सहप्रथसावर्ततइति तेनसहेतितुल्ययोगेइतिबहुव्रीहिसमासः वोपसर्जनस्येतिसादेशः पूर्वपदप्रकृतिस्वरत्वेप्राप्ते परादिश्छन्दसिबहुलमितिउत्तरपदाद्युदात्तत्वम् ॥ दिवः ऊडिदमित्यादिनाविभक्तेरुदात्तत्वम् । सद्ममखसं सीदतीतिसद्म षद्लृविशरणादौ अन्येभ्योऽपिदृश्यन्तइतिमनिन् नित्त्वादाद्युदात्तः सद्ममहोयस्येतिबहुव्रीहौहकारस्यव्यत्ययेनखकारः ॥ ९ ॥

९. प्रतापशाली, प्रसिद्ध और आकाश की तरह तेजस्वी, नराशंस देवता को मैं देख चुका हूँ।

इतिप्रथमस्यप्रथमेपञ्चत्रिंशोवर्गः ॥ ३५ ॥

प्रतित्यमितिनवर्चंसूक्तं ऋषिच्छन्दसीपूर्ववद् देवतात्वनुक्रम्यते—प्रतित्यमाग्निमारुतमिति कारीरीष्टौप्रतित्यमेषाधाय्या तथाचसूत्रितम्—वर्षकामेष्टिःकारीरीतस्यां प्रतित्यंचारुमध्वरमीळेअग्निंस्ववसंनमोभिरितिधाय्येइति ।

तामेतांसूक्तगतांप्रथमामृचमाह—

प्रतित्यंचारुमध्वरंगोपीथायप्रहूयसे। मरुद्भिरग्नआगहि ॥ १ ॥

प्रति। त्यम्। चारुम्। अध्वरम्। गोऽपीथाय। प्र। हूयसे। मरुत्ऽभिः। अग्ने। आ। गहि ॥ १ ॥

त्यच्छब्दः सर्वनाम तच्छब्दपर्यायः हेअग्ने योयज्ञः चारुरंगवैकल्यरहितः त्यं तथाविधं चारुमध्वरंप्रतिलक्ष्य गोपीथायसोमपानायप्रहूयसे प्रकर्षेणत्वंहूयसे तस्मादस्मिन्नध्वरे त्वं मरुद्भिः देवविशेषैःसहआगहि आगच्छ सेयमृक् यास्केनैवंव्याख्याता—संप्रतिचारुमध्वरंसो-

१ ऐ० ब्रा० २. ४. । २ नि० १०. ३६. ।

मपानायमहूयसेसोग्नेमरुद्भिःसहागच्छेति॥ प्रति निपातआद्युदात्तः। त्यंत्यदादीनामः प्रातिपदिकस्वरः। चारुं दृसनिजनिचरीत्यादिनाञ्ञ्युण् अतउपधायाइतिवृद्धिः ञित्त्वादाद्युदात्तः। गोपीथाय निशीथगोपीथावगथाइतिथक्प्रत्ययान्तोनिपातितः। प्र निपातस्वरः॥ १॥

१. अग्निदेव! इस सुन्दर यज्ञ में सोमरस का पान करने के लिए तुम बुलाये जाते हो; इसलिए मरुद्गण के साथ आओ।

द्वितीयामृचमाह—

नहिदेवोनमर्त्योमहस्तवक्रतुंपरः। मरुद्भिरग्नआगहि॥ २॥

नहि। देवः। न। मर्त्यः। महः। तव। क्रतुम्। परः। मरुत्ऽभिः। अग्ने। आ। गहि॥ २॥

हे अग्ने महोमहतस्तवसंबन्धिक्रतुं कर्मविशेषमुल्लंघ्य परोनहि उत्कृष्टोदेवोनभवति खलु तथा मर्त्योमनुष्यश्चपरोनभवति येमनुष्यास्त्वदीयं क्रतुमनुतिष्ठन्ति येच देवास्त्वदीयेक्रताविज्यन्तेतएवोत्कृष्टाइत्यर्थः मरुद्भिरित्यादिपूर्ववत्। नहि एवमादीनामित्यन्तोदात्तः। देवः पचाद्यजन्तश्चित्त्वादन्तोदात्तः। महः महतस्तलोपश्छान्दसः बृहन्महतोरुपसंख्यानमिति विभक्तेरुदात्तत्वम्। तव युष्मदस्मदोर्ङसीत्याद्युदात्तत्वम्। क्रतुं कृञःकतुः प्रत्ययाद्युदात्तत्वं गहि गमॢसृप्लृगतौ लोटःसेर्हिः बहुलंछन्दसीतिशपोलुक् अनुदात्तोपदेशेत्यादिनाअनुनासिकलोपः तस्यासिद्धवदत्राभादित्यसिद्धत्वादतोहेरितिलुङ्नभवति निघातः॥ २॥

२. अग्निदेव! तुम महान् हो। ऐसा कोई उच्च देव या मनुष्य नहीं है, जो तुम्हारे यज्ञ का उल्लङ्घन कर सके। मरुद्गण के साथ आओ।

येमहोरजसोविदुर्विश्वेदेवासोअद्रुहः। मरुद्भिरग्नआगहि॥ ३॥

ये महः। रजसः। विदुः। विश्वे। देवासः। अद्रुहः। मरुत्ऽभिः। अग्ने। आ। गहि॥ ३॥

हे अग्ने येमरुतोमहोरजसोमहत्त्वं उदकस्यवर्षणप्रकारं विदुः तैर्मरुद्भिरित्यन्वयः कीदृशामरुतः विश्वे सर्वे सप्तविधगणोपेताः। सप्तगणावैमरुतइतिश्रुतेः। देवासोद्योतमानाः अद्रुहोद्रोहरहिताः वर्षणेनसर्वभूतोपकारित्वात् तथाचोपरिष्टादाम्नायते—उँदीरयथामरुतःसमुद्रतोयूयंवृष्टिंवर्षयथापुरीषिणइति। शाखान्तरेपि मन्त्रान्तरस्यब्राह्मणमेवमाम्नायते—मॅरुतांपृषतयःस्थेत्याह। मरुतोवैवृष्ट्याईशतइति। रजःशब्दोयास्केनबहुधाव्याख्यातः—रँजोरजतेर्ज्यो-

१ तै०सं. २. २. ५.। २ ऋ०सं. ४. ३. १७.। ३ तै०ब्रा० ३. ३. ९.। ४ नि०.१९.।

तीरजउच्यतउदकंरजउच्यतेलोकारजांस्युच्यन्तेसृगहनीरजसीउच्येतेइति ॥ रजसः नब्वि-षयस्यानिसन्तस्येत्याद्युदात्तः विदुः विदज्ञाने विदोलटोवेतिझेर्जुसादेशः प्रत्ययस्वरः यद्वृ-त्तयोगान्निघाताभावः। विश्वे। विशेःक्वन्नन्तस्य नित्त्वादाद्युदात्तत्वम्। देवासः आज्जसेरसुक् देवशब्दःपचाद्यजन्तः चित्त्वादन्तोदात्तः। अद्रुहः संपदादित्वाद्भावेक्विपिसति बहुव्रीहौ नञ्सु-भ्यामित्यन्तोदात्तत्वम् कर्तरिवाक्विप् तत्पुरुषेहिअव्ययपूर्वपदप्रकृतिस्वरत्वंस्यात् नचकृदुत्तरपद-प्रकृतिस्वरत्वं यतोनञ् नगतिर्नचकारकइति ॥ ३ ॥

३. अग्निदेव ! जो प्रकाशशाली और हिंसा-शून्य मरुद्गण महा-वृष्टि करना जानते हैं, उन मरुतों के साथ आओ।

चतुर्थीमृचमाह—

यउग्राअर्कमानृचुरनाधृष्टासओजसा। मरुद्भिरग्नआगहि ॥४॥

ये। उग्राः। अर्कम्। आनृचुः। अनाधृष्टासः। ओजसा। मरुत्ऽभिः। अग्ने। आ। गहि ॥ ४ ॥

ये मरुतः उग्रा[1]स्तीव्राःसन्तः अर्कमुदकं आनृचुः अर्चितवन्तः वर्षणेन संपादितवन्त-इत्यर्थः तैर्मरुद्भिरित्यन्वयः कीदृशामरुतः ओजसाबलेन अनाधृष्टासः अतिरस्कृताः स-र्वेभ्योऽपिप्रबलाइत्यर्थः अर्कशब्दस्योदकवाचित्वंवाजसनेयिनआमनन्ति—आपोवाअर्कइति तन्निर्वचनंचतएवामनन्ति—सोर्चन्नचरत्तस्यार्चतआपोजायन्तार्चतोवैमेकमभूदितितदेवार्कस्यार्क-त्वमिति। सजगत्सृष्ट्वा हिरण्यगर्भउदकंस्रष्टुमुद्युक्तअर्चन् उदकसत्यसंकल्पत्वमहिमप्रख्याप-नेन स्वात्मानं पूजयन्नचरत् तथा पूजयतोहिरण्यगर्भस्यसकाशादुदकमुत्पन्नं तदानीमर्चतो-मत्तः कमभूदित्यवोचत् तेनोदकस्यार्कनामनिष्पन्नमित्यर्थः। आनृचुः[2] अर्चतेरपस्पृधेथामित्या-दिनानिपातितः प्रत्ययस्वरः यद्वृत्तयोगान्ननिघातः। अनाधृष्टासः अव्ययपूर्वपदप्रकृतिस्वरत्वम्। ओजसा उब्जेर्बलेबलोपश्चेत्यसुन् नित्त्वादाद्युदात्तः ॥ ४ ॥

४. जिन उग्र और अजेयबलशाली मरुतों ने जल-वृष्टि की थी; अग्निदेव, उन्हीं के साथ पधारो।

येशुभ्राघोरवर्पसःसुक्षत्रासोरिशादसः। मरुद्भिरग्नआगहि ॥५॥३६॥

ये। शुभ्राः। घोरऽवर्पसः। सुऽक्षत्रासः। रिशादसः। मरुत्ऽभिः। अग्ने। आ। गहि ॥ ५ ॥ ३६ ॥

---

१ उग्रशब्दोरक्प्रत्ययान्तः ऋज्रेन्द्रेतिसूत्रेण तत्रहिलक्ष्यानुरोधेनरन्प्रत्ययान्तारक्प्रत्य-यान्ताश्चनिपातिताः। २ अकारस्यस्थानेऋकारोनिपात्यते.।

येमरुतः शुभ्रत्वादिगुणोपेताः तैर्मरुद्भिरित्यन्वयः शुभ्राः शोभनाः घोरवर्पसःउग्ररूपधराः सुक्षत्रासः शोभनधनोपेताः रिशादसः हिंसकानांभक्षकाः मघमित्यादिष्वष्टाविंशतिसंख्याकेषुधननामसुक्षत्रंभगइतिपठितम् ॥ शुभ्राः स्फायितञ्चीत्यादिनाशुभेरौणादिकोरक् प्रत्ययस्वरः । घोरवर्पसः घोरंवर्पोयेषां बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । सुक्षत्रासः बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वं आद्युदात्तंद्व्यच्छन्दसीत्येवतुनभवति क्षत्रशब्दस्यान्तोदात्तत्वात् रिशंतिहिंसन्तीतिरिशाः तानदन्तीतिरिशादसः सर्वधातुभ्योसुन्प्रत्ययः नित्स्वरेणउत्तरपदमाद्युदात्तं कृदुत्तरपदप्रकृतिस्वरेणसएवशिष्यते ॥ ५ ॥

५. जो सुशोभन और उग्र रूप धारण करनेवाले हैं, जो पर्याप्त-बलशाली और शत्रु-संहारी हैं, अग्निदेव, उन्हीं मरुद्गण के साथ आओ।

इतिप्रथमस्यप्रथमेषट्त्रिंशोवर्गः ॥ ३६ ॥

सूक्तेषष्ठीमृचमाह—

येनाकस्याधिरोचनेदिविदेवासआसते । मरुद्भिरग्नआगहि ॥ ६ ॥

ये । नाकस्य । अधि । रोचने । दिवि । देवासः । आसते ।

मरुत्ऽभिः । अग्ने । आ । गहि ॥ ६ ॥

येमरुतोनाकस्याधि दुःखरहितस्यसूर्यस्योपरि दिविद्युलोके रोचने दीप्यमाने येदेवासः स्वयमपिदीप्यमानाआसते तैर्मरुद्भिरित्यन्वयः ॥ नाकस्य कंसुखंतद्यस्मिन्नास्ति असावकइतिबहुव्रीहिंकृत्वा पश्चान्नञ् नअकोनाकइतिनञ्तत्पुरुषः नलोपोनञइतिनलोपोनभवति नभ्राण्नपादित्यादिनाप्रकृतिभावात् तत्पुरुषेतुल्यार्थेत्यादिनाअव्ययपूर्वपदप्रकृतिस्वरत्वेनउदात्तत्वं प्रथमंतत्पुरुषंकृत्वा पश्चाद्बहुव्रीहौउत्तरपदान्तोदात्तत्वंस्यात् । अधिशब्दउपर्यर्थे उपसर्गप्रतिरूपकोनिपातः । रोचने रुचदीप्तौ अनुदात्तेतश्चहलादेरितियुच् चितइत्यन्तोदात्तत्वम् । दिवि ऊडिदमित्यादिनाविभक्तेरुदात्तत्वम् । देवासः आज्जसेरसुगित्यसुक् । आसते आसउपवेशने अनुदात्तेत्त्वादात्मनेपदं झस्यअदादेशः अदिप्रभृतिभ्यःशपइतिशपोलुक् अनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वम् यद्वृत्तयोगान्ननिघातः ॥ ६ ॥

६. आकाश के ऊपर प्रकाश-स्वरूप स्वर्ग में जो दीप्तिमान् मरुत रहते हैं, अग्नि! उन्हीं के साथ आओ।

यईङ्खयन्तिपर्वतान्तिरःसमुद्रमर्णवम् । मरुद्भिरग्नआगहि ॥ ७ ॥

ये । ईङ्खयन्ति । पर्वतान् । तिरः । समुद्रम् । अर्णवम् ।

मरुत्ऽभिः । अग्ने । आ । गहि ॥ ७ ॥

येमरुतः पर्वतान्मेघानींखयन्तिचालयन्ति तथा अर्णवंउदकयुक्तंसमुद्रं तिरस्कुर्वन्तीति शेषः निश्चलस्यजलस्यतरंगाद्युत्पत्तयेचालनंतिरस्कारः तैर्मरुद्भिरित्यन्वयः ॥ ईंखयन्ति

उखणखेत्यादावीखिर्गत्यर्थः हेतुमतिचेतिणिच् इदितोनुम्धातोरितिनुम् णिजन्तधातोश्चित इत्यन्तोदात्तत्वम् शपःपित्त्वादनुदात्तत्वं तिङश्चलसार्वधातुकस्वरेणधातुस्वरएवशिष्यते। पर्वतान् पुर्वपर्वमर्वपूरणे औणादिकोतच् प्रत्ययस्वरः ॥ ७ ॥

७. जो मेघ-माला का संचालन करते और जल-राशि को समुद्र में गिराते हैं, अग्नि! उन्हीं मरुद्गण के साथ आओ।

आयेतन्वन्तिरश्मिभिस्तिरःसमुद्रमोजसा। मरुद्भिरग्नआगहि ॥ ८ ॥

आ। ये। तन्वन्ति। रश्मिऽभिः। तिरः। समुद्रम्। ओजसा।

मरुत्ऽभिः। अग्ने। आ। गहि ॥ ८ ॥

येमरुतोरश्मिभिः सूर्यकिरणैःसह आतन्वन्ति आप्नुवन्ति आकाशमितिशेषः किंच ओजसास्वकीयेनबलेनसमुद्रंतिरस्कुर्वन्ति तैर्मरुद्भिरित्यन्वयः ॥ तनुविस्तारे लटोझोऽन्तः तनादिकृञ्भ्यउः सतिशिष्टस्वरबलीयस्त्वमन्यत्रविकरणेभ्यइतितिङएवाद्युदात्तत्वम्। रश्मिभिः नियोमिरित्यनुवृत्तौ अश्नोतेरशचेतिमिः प्रत्ययस्वरः। समुद्रं उन्दीक्लेदने स्फायीतंचीतिरक् समासेकृदुत्तरपदप्रकृतिस्वरः ॥ ८ ॥ नवमीमृचमाह—

८. जो सूर्य-किरणों के साथ समस्त आकाश में व्याप्त हैं और जो बल से समुद्र को उत्क्षिप्त करते हैं, अग्निदेव, उन्हीं मरुद्गण के साथ आओ।

अभित्वापूर्वपीतयेसृजामिसोम्यंमधु। मरुद्भिरग्नआगहि॥९॥२७॥१।

अभि। त्वा। पूर्वऽपीतये। सृजामि। सोम्यम्। मधु।

मरुत्ऽभिः। अग्ने। आ। गहि ॥ ९ ॥ २७ ॥ १।

हेअग्ने पूर्वपीतयेपूर्वकाले प्रवृत्तायपानाय त्वांप्रतिसोम्यंमधु सोमसंबन्धिनंमधुररसं अभिसृजामि सर्वतःसंपादयामि अतस्त्वंमरुद्भिःसहात्रआगच्छ ॥ अभि एवादीनामन्तइत्यन्तोदात्तः। त्वामौद्वितीयायाइतित्वादेशःसर्वानुदात्तः। पूर्वपीतये पूर्वाचासौपीतिश्च पुंवत्कर्मधारयेत्यादिनापुंवद्भावः। सृजामि सृजविसर्गे मिपःपित्त्वादनुदात्तत्वं विकरणस्वरः। सोम्यं सोममर्हतियइतियः।प्रत्ययस्वरेणान्तोदात्तः। मधु फलिपाटिनमीत्यादिनाउप्रत्ययः निदित्यनुवृत्तेराद्युदात्तत्वम्। अन्यद्गतम्॥ अत्रयास्कः—अभिसृजामित्वापूर्वपीतयेपूर्वपानायसोम्यंमधुसोममयंसोग्नेमरुद्भिःसहागच्छेति ॥ ९ ॥

९. तुम्हारे प्रथम पान के लिए सोम-मधु दे रहा हूँ। अग्निदेव! मरुद्गण के साथ आओ।

वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन्। पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणाचार्येणविरचितेमाधवीयेवेदार्थप्रकाशेऋक्संहिताभाष्येप्रथमाष्टकेप्रथमोऽध्यायःसंपूर्णः॥१॥

---

१ भृमृदृशियजिपर्विपच्यमितमिनमिहर्यिभ्योऽतच्। २ नि० १०. ३७।

॥ श्रीगणेशायनमः ॥

यस्यनिःश्वसितंवेदायोवेदेभ्योखिलंजगत् ॥ निर्ममेतमहंवन्देविद्यातीर्थंमहेश्वरम् ॥ १ ॥
अथप्रथमाऽष्टकेद्वितीयोध्यायआरभ्यते । तत्रायंदेवायेत्यष्टर्चंसूक्तं तस्य ऋषिच्छन्दसीपूर्ववत् ऋभुदेवताकत्वमनुक्रम्यते—अयमष्टावार्भवमिति। विनियोगस्तुसूक्तस्यलैङ्गिकःस्मार्तोवाद्रष्टव्यः। व्यूढस्यप्रथमेछन्दोमे वैश्वदेवशस्त्रे अयंदेवायजन्मनइत्यार्भवस्तृचः अथछन्दोमाइतिखण्डेसूत्रितम्—अभित्वादेवसवितःप्रेतांयज्ञस्यशम्भुवायंदेवायजन्मनइति ।

तस्मिन्सूक्तेप्रथमामृचमाह—

ओम् अ॒यं दे॒वाय॒ जन्म॑ने॒ स्तोमो॒ विप्रे॑भिरास॒या ॥ अका॑रि रत्न॒धात॑मः ॥ १ ॥

अ॒यम् । दे॒वाय॑ । जन्म॑ने । स्तोम॑ः । विप्रे॑भिः । आ॒स॒या ।
अका॑रि । र॒त्न॒ऽधात॑मः ॥ १ ॥

ऋभवोहिमनुष्याःसन्तस्तपसादेवत्वंप्राप्ताः तेचात्रसूक्तेदेवताः तत्सङ्घोजायमानवाचिनाजन्मशब्देनैकवचनान्तेनात्रनिर्दिश्यते जन्मने जायमानायऋभुसंघरूपायदेवायतत्प्रीत्यर्थं अयं स्तोमः स्तोत्रविशेषः विप्रेभिः मेधाविभिर्ऋत्विग्भिरासयास्वकीयेनास्येन अकारि निष्पादितः कीदृशः स्तोमः रत्नधातमः अतिशयेनरमणीयमणिमुक्तादिधनप्रदः स्तोत्रेण तुष्टाऋभवोधनंप्रयच्छन्तीत्यर्थः ॥ आसया आस्यशब्दात्तृतीयैकवचनस्यसुपांसुलुगित्यादिनायाजादेशः व्यत्ययेनप्रकृतियकारस्यलोपः चितइत्यन्तोदात्तः । रत्नधातमः रत्नानिदधातीतिरत्नधाः कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ १ ॥

१. जिन ऋभुओं ने जन्म ग्रहण किया था, उन्हीं के उद्देश्य से मेधावी ऋत्विकों ने, अपने मुख से, यह प्रभूत धन-प्रद स्तोत्र स्मरण किया था।

द्वितीयामृचमाह—

यइन्द्रा॑य वचो॒युजा॑ तत॒क्षुर्मन॑सा॒ हरी॑ ॥ शमी॑भिर्य॒ज्ञमा॑शत ॥ २ ॥

ये । इन्द्रा॑य । व॒चः॒ऽयुजा॑ । त॒त॒क्षुः । मन॑सा । हरी॒ इति॑ । शमी॑भिः ।
य॒ज्ञम् । आ॒श॒त॒ ॥ २ ॥

येऋभवः इन्द्राय इन्द्रप्रीत्यर्थंवचोयुजाताडनादिकंविनावाङ्मात्रेणरथेयुज्यमानौसुशिक्षितौहरीएतन्नामकावश्वौमनसाततक्षुः संपादितवन्तः ऋभूणांसत्यसङ्कल्पत्वात्तत्सङ्कल्पमात्रेणे-

न्द्रस्याश्वौसंपन्नावित्यर्थः तेऋभवः शमीभिः ग्रहचमसादिनिष्पादनरूपैःकर्मभिः यज्ञमस्मदीयमाशतव्याप्तवन्तः अपःअमइत्यादिषुषड्विंशतिसंख्याकेषुकर्मनामसुशमीशिमीतिपठितम् ॥ वचोयुजा वचसायुज्ञाते सत्सूद्विषेत्यादिनाक्विप् सुपांसुलुगित्यादिनाविभक्तेराकारः कृदुत्तरपदप्रकृतिस्वरः। ततक्षुः तक्षूत्वक्षूतनूकरणे लिटि झेरुसादेशः पादादित्वादनिघातः। शमीभिः शमयन्तिपापानीतिशम्यःकर्माणि औणादिकइन् कृदिकारादक्तिनइतिङीष् वृषादित्वादाद्युदात्तः। आशत अशूव्याप्तौ लुङि झस्य अदादेशः स्वादिभ्यःश्नुः तस्यबहुलंछन्दसीतिलुक् अडागमः तिङ्ङतिङइतिनिघातः ॥ २ ॥

२. जिन्होंने इन्द्र के उन हरि नाम के घोड़ों की, मानसिक बल से, सृष्टि की है, जो घोड़े आज्ञा पाते ही रथ में संयुक्त हो जाते हैं, वे ही ऋभुलोग, चमस आदि उपकरण-द्रव्यों के साथ, हमारे यज्ञ में व्याप्त हैं।

तक्षन्नासत्याभ्यांपरिज्मानंसुखंरथम् ॥ तक्षन्धेनुंसबर्दुघाम् ॥ ३ ॥

तक्षन्। नासत्याभ्याम्। परिऽज्मानम्। सुऽखम्। रथम्। तक्षन्। धेनुम्। सबःऽदुघाम् ॥ ३ ॥

नासत्याभ्यांअश्विदेवप्रीत्यर्थंरथंतक्षन् ऋभवोदेवाः कंचिद्रथमतक्षन् तक्षणेनसंपादितवन्तः कीदृशंपरिज्मानं परितोगन्तारं सुखंउपर्युपवेशनेसुखकरं किञ्चधेनुं कांचिद्गांतक्षन् धातूनामनेकार्थत्वात्तक्षतिरत्रसंपादनवाची कीदृशींधेनुं सबर्दुघां सबरःक्षीरस्यदोग्ध्रीम् ॥ तक्षन् बहुलंछन्दसीत्यडभावः। नासत्याभ्यां नविद्यतेसत्यंययोस्तावसत्यौ नअसत्यौनासत्यौ नभ्राण्नपादित्यादिनानलोपाभावः। परिज्मानं अजेःपरिपूर्वस्यश्वन्नुक्षन्नित्यादिनामन्प्रत्ययेअकारलोपआद्युदात्तत्वंचनिपातनात्। सबर्दुघां सबःपयोदोग्धीतिसबर्दुघा दुहःकब्घश्चेतिकप् सबरितिरेफान्तंप्रातिपदिकंक्षीरवाचीतिसंप्रदायविदः कपःपित्त्वादनुदात्तत्वं धातुस्वरएवशिष्यते समासेकृदुत्तरपदप्रकृतिस्वरः ॥ ३ ॥

३. ऋभुओं ने अश्विनीकुमारद्वय के लिए सर्वत्र-गन्ता और सुखवाही एक रथ का निर्माण किया था और दूध देनेवाली एक गाय भी पैदा की थी।

द्वितीयेछन्दोमेवैश्वदेवशस्त्रेयुवानापितरापुनरित्यार्भवस्तृचः द्वितीयस्याग्निंवोदेवमिति खण्डेसूत्रितम्—महीद्यौःपृथिवीचनोयुवानापितरापुनरितितृचाविति।

युवानापितरापुनःसत्यमन्त्राऋजूयवः ॥ ऋभवोविष्ट्यक्रत ॥४ ॥

युवाना। पितरा। पुनरिति। सत्यऽमन्त्राः। ऋजुऽयवः। ऋभवः। विष्टी। अक्रत ॥ ४ ॥

ऋभवएतन्नामकादेवाःपितरौस्वकीयौमातापितरौपूर्वंवृद्धावपिपुनर्युवानातरुणावकृतकृतव-न्तः कीदृशाः सत्यमन्त्राः अवितथमन्त्रसामर्थ्योपेताः पुरश्चरणाद्यनुष्ठानेनसिद्धमन्त्रत्वाद्यद्यत्फल-मुद्दिश्यमन्त्राःप्रयुज्यन्तेतत्तत्फलंतथैवसंपद्यते तस्माज्जीर्णयोःपित्रोर्युवत्वंसंपादयितुंसमर्थाइत्यर्थः ऋजूयवः ऋजुत्वमात्मनइच्छन्तः छलरहिताइत्यर्थः अतएवैतेषामनुष्ठितामन्त्राःसिध्यन्ति विष्टी विष्टयोव्याप्तियुक्ताःसर्वेषुकार्येषुएतदीयस्यमन्त्रसामर्थ्यस्याप्रतिघातोत्रव्याप्तिरुच्यते ऋभुशब्दंया-स्कएवंनिर्वक्ति–ऋभवउरुभान्तीतिवर्तेनभान्तीतिवर्तेनभवन्तीतिवेति[1]॥ युवाना युवन्शब्दोयौतेः कनिन्नन्तोनित्त्वादाद्युदात्तः सुपांसुलुगित्यादिनाविभक्तेराकारः। पितरा पूर्ववदाकारः। सत्यम-न्त्राःबहुव्रीहौपूर्वपदप्रकृतिस्वरः। ऋजुशब्दोभावपरः ऋजुत्वमात्मनइच्छन्तीतिक्यच् अकृत्सार्वधा-तुकयोर्दीर्घइतिदीर्घः। क्याच्छन्दसीत्युप्रत्ययः प्रत्ययस्वरः। विष्टी विषॢव्याप्तौ क्तिच्क्तौचसंज्ञा-यामितिक्तिच् तितुत्रेत्यादिनाइट्प्रतिषेधः तस्माज्जसइयाडियाजिकाराणामुपसंख्यानमिति तस्यईकारादेशः सचालोन्त्यस्येति सकारस्यभवति ततआद्गुणइतिगुणेकृतेप्रथमयोःपूर्वसवर्णइति पूर्वसवर्णदीर्घः तंबाधित्वा परत्वात् जसिचेतिह्रस्वस्यगुणेनभवितव्यमितिचेत् न संज्ञापूर्वकस्य विधेरनित्यत्वात्। अक्रत कृञोलुङ् आत्मनेपदं झस्यअदादेशः मन्त्रेघसेत्यादिनाच्लेर्लुक् यणादे-शःअडागमः निघातः॥ ४॥

४. सरल-हृदय और सब कामों में व्याप्त ऋभुओं का मंत्र विफल नहीं होता। उन्होंने अपने मा-बाप को फिर जवान बना दिया था।

पञ्चमीमृचमाह–

सं॒वो॒मदा॑सोअग्म॒तेन्द्रे॑णचम॒रुत्व॑ता॥ आ॒दि॒त्येभि॑श्च॒राज॑भिः॥५॥१॥

सम्। वः॒। मदा॑सः। अ॒ग्म॒त॒। इन्द्रे॑ण। च॒। म॒रुत्व॑ता।
आ॒दि॒त्येभिः॑। च॒। राज॑ऽभिः॥ ५॥ १॥

हेऋभवोयुष्माकंसंबन्धिनोमदासोमदहेतवःसोमाः इन्द्रेणचादित्येभिरादित्यैश्चसमग्मतस-ङ्गत्वाःऋभूणामिन्द्रादित्यैःसहसोमपानंतृतीयसवनेस्ति अतएवावाहननिगदआश्वलायनेनैवंपठितः-इन्द्रमादित्यवन्तंऋभुमन्तंविभुमन्तंवाजवन्तंबृहस्पतिमन्तंविश्वदेव्यावन्तमावहेति। कीदृशेनेन्द्रे-ण मरुत्वतामरुद्भिर्युक्तेन अतएवमन्त्रान्तरमेवमाम्नायते–मरुद्भिरिन्द्रसख्यंतेअस्त्विति[2]। कीदृशैरा-दित्येभिःराजभिःदीप्यमानैः॥मदासः माद्यन्त्येभिरितिमदाःसोमाः मदोनुपसर्गेइत्यप् तस्यपित्त्वा-दनुदात्तत्वं धातुस्वरएवशिष्यते। आज्जसेरसुगितिजसोसुक्। अग्मत गमेःसंपूर्वाल्लुङ् समोगम्यृ-च्छीत्यादिनाआत्मनेपदं झस्यअदादेशः मन्त्रेघसेत्यादिनाच्लेर्लुक् गमहनेत्यादिनाउपधालोपःव्यत्य-

१ नि० ११. १५। २ ऋ० सं० ६. ४. ३३।

हिताश्चेतिसमोव्यवहितप्रयोगः निघातः। मरुत्वता मरुतःअस्यसन्तीतिमरुत्वान् तसौमत्वर्थेइ-तिभसंज्ञयापदसंज्ञायाबाधितत्वावजश्त्वाभावः झयइतिमतुपोवत्वम्। आदित्येभिः बहुलंछन्द-सीतिभिसऐसादेशाभावेबहुवचनेझल्येदित्येत्वम्। राजभिः राजन्शब्दस्यकनिन्नन्तत्वेननित्वा-दाद्युदात्तत्वम्॥ ५ ॥

५. ऋभुगण! मरुद्गण से संयुक्त इन्द्र और दीप्यमान सूर्य के साथ तुम लोगों को सोमरस प्रदान किया जाता है।

उतत्यंचमसंनवंत्वष्टुर्देवस्यनिष्कृतम्॥ अकर्तचतुरःपुनः॥ ६ ॥

उत। त्यम्। चमसम्। नवम्। त्वष्टुः। देवस्य। निःकृतम्। अकर्त। चतुरः। पुनरिति॥ ६ ॥

उतअपिच त्वष्टुः एतन्नामकस्यदेवस्यसंबन्धितक्षणव्यापारः नवंनूतनंत्यंचमसंतंसोमधा-रणक्षमंकाष्ठपात्रविशेषंनिष्कृतं निःशेषेणसंपादितमकरोदितिशेषः तक्षणव्यापारकुशलस्यत्व-ष्टुः शिष्याऋभवः तेननिर्मितंतमेकंचमसंपुनरपिचतुरोकर्त चतुर्धाविभक्तांश्चमसान्कृतवन्तः एक-स्यचतुर्विधत्वकरणरूपोयमर्थोमन्त्रान्तरेपिविस्पष्टः—एकंचमसंचतुरःकृणोतनेति[२]॥ नवं णुस्तुतौ नूयतइतिनवं कर्मणिअप्प्रत्ययः सहिघञोपवादत्वात् घञर्थेसर्वत्रभवति घञ्प्रत्ययश्च अकर्त-रिचकारकेसंज्ञायामितिकर्तृव्यतिरिक्तेसर्वत्रकारकेभवति यद्यपितत्रसंज्ञायामित्युक्तंतथापिचका-रस्यसंज्ञाव्यभिचारार्थत्वादसंज्ञायामपिभवत्येव । संबध्यतेइतिसंबन्धः कर्मणिघञित्युक्तम्। त्वष्टुः तक्षूत्वक्षूतनूकरणे औणादिकस्तृन् ऊदित्त्वात्पक्षेइडभावः स्कोःसंयोगाद्योरन्तेचेतिक-कारलोपः। निष्कृतं कृञोनिरुपसृष्टात्कर्मणिक्तः प्रादिसमासे नित्यंसमासेनुत्तरपदस्थस्येतिषत्वं अत्र कर्तृकर्मणोःकृतीतिप्राप्ताषष्ठी यद्यपिनलोकाव्ययेतिनिषिद्धा तथापिकर्तुःशेषत्वेनविव-क्षितत्वात्कर्तृकरणयोस्तृतीयेत्येतस्याःप्राप्तेःशैषिकीषष्ठी यथाकर्मणिशेषत्वेनविवक्षिते माषाणा-मश्नीयादिति गतिरनन्तरइतिनिसउदात्तत्वम्। अकर्तअकृषत कृञोलुङि झस्य व्यत्ययेनतादे-शः मन्त्रेघसेत्यादिनाच्लेर्लुक् छन्दस्युभयथेतितिङआर्धधातुकत्वात्ङित्त्वाभावेनगुणः। चतुरः चतुरःशसीत्युकारउदात्तः। पुनः स्वरादिष्वाद्युदात्तःपठितः॥ ६ ॥

६. त्वष्टा का यह नया चमस बिलकुल तैयार हो गया था; परन्तु उसे ऋभुओं ने चार टुकड़ों में विभक्त कर दिया।

तृतीयेछन्दोमे वैश्वदेवशस्त्रे तेनोरत्नानिधत्तनेतिद्वेऋचावावार्भव्यौ तृतीयस्यागन्ममहेति खण्डेसूत्रितम्—इन्द्रइषेददातुनस्तेनोरत्नानिधत्तनेत्येकाद्वेचेति।

---

१ अत्यमिचमीत्यादिनाअसच्चित्वादन्तोदात्तः। २ ऋ० सं० २. ३. ४.।

तयोराद्यांसूक्तेसप्तमीमृचमाह—

तेनोरत्नानिधत्तनत्रिरासाप्तानिसुन्वते ॥ एकमेकंसुशस्तिभिः ॥ ७ ॥

ते । नः । रत्नानि । धत्तन । त्रिः । आ । साप्तानि । सुन्वते ।
एकम्ऽएकम् । सुशस्तिऽभिः ॥ ७ ॥

पूर्वास्वृक्षु येप्रतिपादिताऋभवस्तेयूयं सुशस्तिभिः शोभनैरस्मदीयशंसनैर्युक्ताः सन्तो-नोस्माकं संबन्धिने सुन्वते सोमाभिषवंकुर्वतेयजमानाय रत्नानिरमणीयानि सुवर्णमणिमुक्तादीनि धनानि एकमेकं क्रमेणप्रत्येकं धत्तन प्रयच्छत सुवर्णादीनांमध्ये प्रतिद्रव्यंयावदपेक्षितं तावदितिविवक्षया एकमेकमित्युक्तं कीदृशानिरत्नानि त्रिरा त्रिवारमावृत्तानि उत्तमानिमध्यमानिअधमानिचेत्येवंरत्नानांत्रिरावृत्तिः किञ्च साप्तानिसप्तसंख्यानिष्पन्नवर्गरूपाणि कर्माणि च धत्तन संपादयत कीदृशानिसाप्तानि त्रिरा त्रिवारमावृत्तानि अग्न्याधेयदर्शपूर्णमासादीनांसप्तानांहविर्यज्ञानामेकोवर्गः । औपासनहोमवैश्वदेवइत्यादीनांसप्तानांपाकयज्ञानांवर्गोद्वितीयः । अग्निष्टोमोत्यग्निष्टोमइत्यादीनांसप्तानांसोमसंस्थानांवर्गस्तृतीयः ॥ रत्नानि रमुक्रीडायां निदित्यनुवृत्तौ रमेस्तचेति नप्रत्ययः तत्सन्नियोगेनमकारस्यतकारः नित्त्वादाद्युदात्तः । धत्तन तप्तनप्तनथनाश्चेतितशब्दस्यतनादेशः । सप्तानांवर्गःसाप्तं सप्तनोञ्छन्दसीतिवर्गे अञ्प्रत्ययः नस्तद्धितेइतिटिलोपः ञित्त्वादादिवृद्धिः आद्युदात्तत्वंच अत्रवर्गवचनेनतच्चानेन वर्गिणोलक्ष्यन्ते तेनबहुवचनं अन्यथाह्येकएववर्गस्त्रिरावृत्तइत्येकवचनमेवस्यात् । सुन्वते शतुरनुमइतिविभक्तेरुदात्तत्वम् । एकमेकं नित्यवीप्सयोरितिवीप्सायांद्विर्भावः एकशब्दः इणः कन्नन्तोनित्त्वादाद्युदात्तः द्वितीयस्यैकशब्दस्य तस्यपरमाम्रेडितमित्याम्रेडितसंज्ञायां अनुदात्तंचेतिअनुदात्तत्वम् । सुशस्तिभिः शस्यतेआभिरितिशस्तयऋचः शंसुस्तुतौ करणेक्तिन् तस्य कित्त्वान्नलोपः शोभनाःशस्तयइतिप्रादिसमासे यद्यपिचक्तिनोनित्त्वादाद्युदात्तत्वेनक्तुत्तरपदप्रकृतिस्वरत्वेन तदेवप्राप्तं तत्पुरुषेणमन्क्तिन्व्याख्यानेत्यादिना उत्तरपदान्तोदात्तत्वेनबाध्यते ॥७॥

७. ऋभुगण! तुम हमारी शोभन प्रार्थना प्राप्त कर हमारा सोमरस तैयार करनेवाले को तीन तरह के रत्न, एक एक कर, प्रदान करो और उसके सातों गुण तीन बार सम्पादन करो।

---

१ अग्न्याधेयदर्शपूर्णमासाग्निहोत्राग्रयणचातुर्मास्यनिरूढपशुबन्धसौत्रामणीतिसप्तहविर्यज्ञसंस्थाः । २ पञ्चमहायाअष्टकाश्राद्धंपार्वणश्राद्धंश्रवणाकर्मप्रत्यवरोहणंशूलगवः आश्वयुजीकर्मेतिसप्तपाकयज्ञसंस्थाः । औपासनहोमवैश्वदेवयोर्ग्रहणंपञ्चमहायज्ञोपलक्षणम् । ३ अग्निष्टोमोत्यग्निष्टोमउक्थ्यः षोडशीवाजपेयोतिरात्रोप्तोर्यामइतिसप्तसोमयज्ञसंस्थाः ।

अष्टमीमृचमाह—

अधा॑रयन्त॒ वह्न॒यो॒ऽभ॑जन्त सुकृ॒त्यया॑ ॥ भा॒गं दे॒वेषु॑ य॒ज्ञिय॑म् ॥ ८ ॥२ ॥

अधा॑रयन्त । वह्न॑यः । अभ॑जन्त । सु॒ऽकृ॒त्यया॑ । भा॒गम् । दे॒वेषु॑ ।

य॒ज्ञिय॑म् ॥ ८ ॥ २ ॥

वह्नयश्चमसादिसाधननिष्पादनेनयज्ञस्यवोढारऋभवःअधारयन्तपूर्वंमनुष्यत्वेन मरणयोग्याअप्यमृतत्वलाभेनमाणान्धारितवन्तः तथाचमन्त्रान्तरमाम्नायते—मर्तासःसन्तोअमृतत्वमानशुरिति । किञ्चैतेसुकृत्ययायज्ञसाधनद्रव्यसंपादनरूपेणशोभनव्यापारेणदेवेषुमध्येस्थित्वा यज्ञियंयज्ञार्हंभागंहविर्लक्षणंअभजन्तसेवितवन्तः अयमर्थः सौधन्वनायज्ञियंभागमानशुरित्यादिमन्त्रान्तरेषुविस्पष्टः । ब्राह्मणेपि ऋभवोवैदेवेषुतपसासोमपीथमभ्यजयन्नित्याद्युपाख्यानंविस्पष्टम् ॥ वह्नयः निदित्यनुवृत्तौ वहिश्रीत्यादिनानिप्रत्ययः । अभजन्त पादादित्वादनिघातः । सुकृत्यया विभाषाकृवृषोरिति कृञःकर्मणिक्यप् शोभनंकृत्यमस्याभजनक्रियायाः सासुकृत्या बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वंबाधित्वा नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वं ननु कृत्यशब्देक्यपःपित्त्वेनानुदात्तत्वाद्धातुस्वरेणआदिरुदात्तः ततश्चाद्युदात्तंद्व्यच्छन्दसीत्यनेनाद्युदात्तत्वेनभवितव्यं तेनहिपुरस्तादपवादेनपरमपिनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वंबाध्यतइत्युक्तं एवंतर्हिकृञःशचेति स्त्रियांभावेक्यप्प्रत्ययान्तःकृत्याशब्दः क्यपःपित्त्वेपिव्यत्ययेनउदात्तत्वं प्रादिसमासेकृदुत्तरपदप्रकृतिस्वरत्वेनतदेवशिष्यते । भागं कर्षात्वतइत्यन्तोदात्तः । यज्ञियं यज्ञमर्हतीत्यर्थे यज्ञर्त्विग्भ्यांघखञाविति घः तस्यइयादेशः प्रत्ययस्वरः ॥ ८ ॥

८. यज्ञ के वाहक ऋभुगण मनुष्य-जन्म ले चुकने पर भी अविनाशी आयु प्राप्त किये हुए हैं और अपने सत्कर्म-द्वारा देवों के बीच यज्ञ-भाग का सेवन करते हैं।

॥ इतिप्रथमस्यद्वितीयेद्वितीयोवर्गः ॥२॥

इहेन्द्राग्नीइत्यादिकंषळृचंसूक्तं ऋषिच्छन्दसीपूर्ववत् देवतात्वनुक्रम्यते—इहषळैन्द्राग्नमिति । विनियोगस्तु अग्निष्टोमे अच्छावाकशस्त्रे इहेन्द्राग्नीउपह्वयइतिसूक्तम् स्तोत्रमग्रेशस्त्रादितिखण्डे-इहेन्द्राग्नीउपेयंवामस्यमन्मनइतिनवेतिसूत्रितत्वात् । तथा अभिप्लवषडहेप्रातःसवनेअच्छावाकशस्त्रेस्तोमातिशंसनार्थमेतदेवसूक्तम् तथाचसूत्रितम्—अभिप्लवपृष्ठ्याहानीत्युपक्रम्येहेन्द्राग्नीइन्द्राग्नीआगतमिति ।

तस्मिन्सूक्तेप्रथमामृचमाह—

इ॒हेन्द्रा॒ग्नी उप॑ ह्वये॒ तयो॒रित्स्तोम॑मुश्मसि ॥ ता सोमं॑ सोम॒पात॑मा ॥ १ ॥

---

१ ऋ० सं० १. ७. ३०. । २ ऋ० सं० ३. ४. ७. । ३ ऐ० ब्रा० ३. ३०. ।

इह । इन्द्राग्नी इति । उप । ह्वये । तयोः । इत् । स्तोमम् ।
उश्मसि । ता । सोमम् । सोमऽपातमा ॥ १ ॥

इहास्मिन्कर्मणिइन्द्राग्नीदेवावुपह्वयेआह्वयामि तयोरिवइन्द्राग्न्योरेवस्तोमंस्तोत्रमुश्मसिकामयामहे सोमपातमा अतिशयेनसोमंपातुंक्षमौतौद्वौदेवौसोमंपिबतामितिशेषः ॥ इन्द्राग्नी अत्र देवताद्वन्द्वेपिपूर्वपदस्यानङ्नभवति तत्रहिद्वन्द्वइत्यनुवृत्तौपुनर्द्वन्द्वग्रहणाल्लोकप्रसिद्धसाहचर्याणामेवद्वन्द्वेआनङित्युक्तं तस्मादत्रावग्रहेह्रस्वइन्द्रशब्दः समासस्येत्यन्तोदात्तत्वं देवताद्वन्द्वेचेत्युभयपदप्रकृतिस्वरत्वंतुनभवति अग्निशब्दस्यानुदात्तादित्वेननोत्तरपदेनुदात्तादावितिप्रतिषेधात् । उश्मसि वशकान्तौ लटोमस् इदन्तोमसिरितिइकारोपजनः अदादित्वात् शपोलुक् मसोर्ङित्त्वाद्ग्रहिज्येत्यादिनासंप्रसारणं । ता सोमपातमा उभयत्र सुपांसुलुगित्याकारः ॥ १ ॥

१. इस यज्ञ में इन्द्र और अग्नि का मैं आह्वान करता हूँ। उन्हीं की स्तुति करना चाहता हूँ। वेही इन्द्र और अग्निविशेष सोमपायी हैं। आवें, सोमपान करें।

ताय॒ज्ञेषु॒प्रशं॑सतेन्द्रा॒ग्नीशुं॑भतानरः ॥ तागा॑य॒त्रेषु॑गायत ॥ २ ॥

ता । यज्ञेषु । प्र । शंसत । इन्द्राग्नी इति । शुंभत । नरः । ता ।
गायत्रेषु । गायत ॥ २ ॥

हेनरोमनुष्याऋत्विजस्तापूर्वोक्तौ ताविन्द्राग्नीयज्ञेषुअनुष्ठीयमानकर्मसुप्रशंसत शस्त्रैः तथा शुंभत नानाविधैरलङ्कारैः शोभितौकुरुत तथा तापूर्वोक्ताविन्द्राग्नी गायत्रेषुगायत्रीछन्दस्केषुमन्त्रेषुसामरूपेणगायत ॥ ता सुपांसुलुगित्याकारः । शुंभत अस्यसंहितायामन्येषामपिदृश्यतइति दीर्घः ॥ २ ॥

२. मनुष्यगण! इस यज्ञ में उन्हीं इन्द्र और अग्नि की प्रशंसा करो और उन्हें सुशोभित करो; उन्हीं दोनों के उद्देश्य से गायत्री छन्द द्वारा गाओ।

तामि॒त्रस्य॒प्रश॑स्तयइन्द्रा॒ग्नीताह॑वामहे ॥ सो॒म॒पासोम॑पीतये ॥ ३॥

ता । मित्रस्य । प्रऽशस्तये । इन्द्राग्नी इति । ता । हवामहे । सोमऽपा ।
सोमऽपीतये ॥ ३ ॥

मित्रस्यस्नेहविषयस्यममानुष्ठातुः प्रशस्तयेतापूर्वोक्तौदेवौसंपद्येतामितिशेषः यद्वा मित्रस्यममसंबन्धिनौ ताविन्द्राग्नीप्रशस्तयेप्रशंसितुमिच्छामइतिशेषः सोमपानक्षमौतापूर्वोक्ताविन्द्रा-

श्रीसोमपीतयेसोमपानार्थं हवामहेआह्वयामः। प्रशस्तये तुमर्थाच्चभाववचनादितिचतुर्थी कृदुत्तरपदप्रकृतिस्वरत्वंबाधित्वातादौचनितिकृत्यतावितिगतेःप्रकृतिस्वरत्वम्। सोमपीतये सोमस्य पीतिर्यस्मिन्कर्मणितस्मै बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् सोमस्यपीतिरितितत्पुरुषेवा दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वम्॥ ३॥

३. मित्रदेव की प्रशंसा के लिए हम इन्द्र और अग्नि का आह्वान करते हैं। उन्हीं दोनों सोम-रस-पान-कर्त्ताओं को सोमपान के लिए आह्वान करते हैं।

उग्रासन्ताहवामहउपेदंसवनंसुतम्। इन्द्राग्नीएहगच्छताम् ॥ ४ ॥

उग्रा। संता। हवामहे। उप। इदम्। सवनम्। सुतम्।
इन्द्राग्नी इति। आ। इह। गच्छताम्॥ ४॥

सुतंअभिषवोपेतंइदमनुष्ठीयमानं सवनंप्रातःसवनादिरूपंकर्मउपसामीप्येनप्राप्तुंउग्रासन्ता वैरिवधादिषु क्रूरौसन्तौदेवौहवामहे आह्वयामः इन्द्राग्नीदेवौइहकर्मण्यागच्छताम् ॥ सन्ता अस्तेः शतरि श्नसोरल्लोपः। सवनं सुतमितिद्वयं सेमंनःस्तोममागहीत्यत्रोक्तम्॥ ४ ॥

४. उन्हीं दोनों उग्र देवों को इस सोमरस-संयुक्त यज्ञ के पास आह्वान करते हैं। इन्द्र और अग्नि इस यज्ञ में पधारें।

तामहान्तासदस्पतीइन्द्राग्नीरक्षउब्जतम्॥ अप्रजाःसन्त्वत्रिणः ॥५॥

ता। महान्ता। सदस्पती इति। इन्द्राग्नी इति। रक्षः। उब्जतम्।
अप्रजाः। सन्तु। अत्रिणः॥ ५॥

तौपूर्वोक्ताविन्द्राग्नीरक्षोराक्षसजातिंउब्जतं ऋजुकुरुतंक्रौर्यंपरित्याजयतमित्यर्थः कीदृशौमहान्तामहान्तौ गुणैरधिकौ सदस्पती सभापालकौ तयोःप्रसादादअत्रिणोभक्षकाराक्षसाः अप्रजाअनुत्पन्नाःसन्तु ॥ महान्ता सान्तमहतःसंयोगस्येतिदीर्घः। सदस्पती सदसस्पतीइवि समासे षष्ठ्यालुकिप्रातिपदिकसकारस्यरुत्वाभावश्छान्दसः उभेवनस्पत्यादिषुयुगपदिति उभयपदप्रकृतिस्वरत्वम्। इन्द्राग्नी आमन्त्रिताद्युदात्तत्वम्। अप्रजाः प्रजायन्तइतिप्रजाः अन्येष्वपि दृश्यतइतिजनेर्डप्रत्ययः नप्रजाअप्रजाःप्रजाशब्दस्यबहुव्रीहौहि नित्यमसिच्प्रजामेधयोरित्यसिजादेशःस्यात् अव्ययपूर्वपदप्रकृतिस्वरः। अत्रिणः तृजन्तस्यअत्रिशब्दस्यजसश्छान्दसइनुडागमः चितइति ऋकारउदात्तः तस्ययणादेशे उदात्तयणोहल्पूर्वात् इतिइकारउदात्तः॥ ५ ॥

५. वे महान् और सभा-रक्षक इन्द्र और अग्नि राक्षस-जाति को कुष्ठता-शून्य करें। भक्षक राक्षस लोग निःसन्तान हों।

तेनसत्येन जागृतमधिप्रचेतुनेपदे ॥ इन्द्राग्नीशर्मयच्छतम्॥ ६ ॥ ३॥

---

१ अदेस्त्रिनिश्चेतित्रिन् प्रत्ययस्वरेणान्तोदात्तः।

तेन । सत्येन । जागृतम् । अधि । प्रऽचेतुने । पदे । इन्द्राग्नी इति ।
शर्म । यच्छतम् ॥ ६ ॥ ३ ॥

हेइन्द्राग्नी सत्येन अवश्यफलप्रदानादवितथेन तेनास्माभिरनुष्ठितेनकर्मणाप्रचेतुने प्रकर्षेणफलभागज्ञापकेपदेस्वर्गलोकादिस्थानेअधिजागृतं आधिक्येनसावधानौभवतं ततोस्मभ्यंशर्मयच्छतंसुखंगृहंवादत्तम् गयःकृदरइत्यादिषुद्वाविंशतिसंख्याकेषुगृहनामसुशर्मवर्मेत्युक्तम् ॥ जागृतं जागृनिद्राक्षये अदिप्रभृतिभ्यःशपइतिशपोलुक् तिङ्ङतिङइतिनिघातः । प्रचेतुने चितीसंज्ञानेइत्यस्माण्ण्यन्तात्पशकेरुनोन्तइतिविहितत्वाद्बाहुलकादौणादिकउनप्रत्ययः समासे कृदुत्तरपदप्रकृतिस्वरत्वम् । इन्द्राग्नी इहेन्द्राग्नीइत्यत्रोक्तम् आमन्त्रितत्वादाद्युदात्तत्वमत्रविशेषः । श्रृणातिहिनस्तिदुःखमितिशर्म शॄहिंसायां अन्येभ्योपिदृश्यन्तइतिमनिन् । यच्छतं इषुगमियमांछइतिछः ॥ ६ ॥

६. इन्द्र और अग्नि ! जिस स्वर्ग-लोक में कर्म-फल जाना जाता है, वहीं इस यज्ञ के लिए तुम जागो और हमें सुख प्रदान करो ।

॥ इतिप्रथमस्यद्वितीयेतृतीयोवर्गः ॥ ३ ॥

प्रातर्युजेत्यादिकमेकविंशत्यृचंसूक्तं तस्यऋषिच्छन्दसीपूर्ववत् देवताविशेषस्त्वनुक्रम्यते— प्रातर्युंजासैकाचतस्रआश्विन्यस्तथासावित्र्यआग्नेय्यौद्वेदेवीनामेकैकेन्द्राणीवरुणान्यग्नायीनां द्यावापृथिव्येपार्थिवीषड्वैष्णव्योतोदेवादैवीवेति सूक्तसंख्यानुवर्ततइत्यस्मिन्खण्डे—अनिरुक्ता संख्याविंशतिरितिपरिभाषितत्वात् । प्रातर्युजेतिसूक्ते संख्याविशेषस्यानिरुक्तासंख्याविंशतिसंख्याद्रष्टव्या साचविंशतिःएकयाअधिकयासहवर्ततइतिसैका तत्रादौचतस्रऋचोश्विदेवताकाः पञ्चमीमारभ्याष्टम्यन्ताश्चतस्रःसवितृदेवताकाः नवमीदशमीचोभेअग्निदेवताके एकादश्याऋचोदेवसंबन्धिन्योदेव्योदेवताः द्वादश्याइन्द्रवरुणाग्निपत्न्यइन्द्राणीवरुणान्यग्नाय्योदेवताः त्रयोदशीचतुर्दश्यौद्यावापृथिवीदेवताके पञ्चदशीपार्थिवी षोडश्याद्याःषड्विष्णुदेवत्याः षोडशीदेवदेवत्यावा ॥ अत्रसूक्तेविनियोगोलैङ्गिकः प्रातरनुवाकेआश्विनेक्रतौप्रातर्युजाविबोधयेतिचतस्रऋचः सूत्रितंच—अथाश्विनएषोउषाःप्रातर्युजेतिचतस्रइति । आश्विनग्रहस्यप्रातर्युजेत्येकापुरोनुवाक्या द्विदेवत्यैश्चरन्तीतिखण्डेसूत्रितम्—आश्विनस्यप्रातर्युजाविबोधयेति ।

तत्रप्रथमामृचमाह—

प्रातर्युजाविबोधयाश्विनावेहगच्छताम् ॥ अस्यसोमस्यपीतये ॥१॥

---

१ पृथिवीदेवीदेवताकाषोडशीमारभ्यैकविंश्यन्त्याःषड्विष्णुदेवताकाः अतोदेवाइत्यस्याषोडश्यास्तुकृत्स्नादेवाविष्णुर्वाविकल्पेनदेवता ।

प्रातःऽयुजा । वि । बोधय । अश्विनौ । आ । इह । गच्छताम् ।
अस्य । सोमस्य । पीतये ॥ १ ॥

अत्रहोताध्वर्युमुद्दिश्यब्रूते हेअध्वर्योप्रातर्युजाप्रातःसवनग्रहेणसंयुक्तावश्विनौदेवौविबोधय विशेषेणप्रबुद्धौकुरु अश्विनौप्रबुद्धौ तावश्विनौदेवौअस्याभिषवसंस्कारयुक्तस्यसोमस्यपीतयेसोमपानायइहकर्मण्यागच्छताम्॥प्रातर्युञ्जातेगृह्यमाणेनग्रहेणसहेतिप्रातर्युजा सत्सूद्विषेत्यादिनाक्विप् सुपांसुलुगित्याकारः कृदुत्तरपदप्रकृतिस्वरत्वम् । अस्य ऊडिदमित्यादिनाविभक्तेरुदात्तत्वम् । पीतये व्य येनक्तिनउदात्तत्वम् ॥ १ ॥

१. पुरोहित ! प्रातःसवन-सम्बन्ध से युक्त अश्विनीकुमारों को जगाओ । सोमपान के लिए वे इस यज्ञ में पधारें ।

यासुरथारथीतमोभादेवादिविस्पृशा । अश्विनाताहवामहे ॥ २ ॥

या । सुऽरथा । रथिऽतमा । उभा । देवा । दिविऽस्पृशा ।
अश्विना । ता । हवामहे ॥ २ ॥

योभाश्विनादेवायावुभावश्विनौदेवौ सुरथाशोभनरथयुक्तौ रथीतमारथिनांमध्ये अतिशयेनरथिनौ दिविस्पृशाद्युलोकनिवासिनौ ताहवामहे तादृशावश्विनावाह्वयामहे ॥ येत्यादिष्वष्टसुपदेषुसुपांसुलुगितिद्विवचनस्याकारः । सुरथा शोभनोरथोययोस्तौसुरथौ समासान्तोदात्तत्वापवादंबहुव्रीहौपूर्वपदप्रकृतिस्वरंबाधित्वा नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वेप्राप्ते आद्युदात्तंद्व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वम् । रथीतमा अन्येषामपिदृश्यतइतिसंहितायामिकारस्यदीर्घत्वम् । दिविस्पृशा दिविस्पृशतइतिदिविस्पृशौ क्विप्चेतिक्विप् तत्पुरुषेकृतिबहुलमित्यलुक् गतिकारकोपपदात्कृदितिकृदुत्तरपदप्रकृतिस्वरत्वम् ॥ २ ॥

२. जो आश्विनीकुमार सुन्दर रथ से युक्त हैं; रथियों में श्रेष्ठ और स्वर्गवासी हैं, उन्हें हम आह्वान करते हैं।

तृतीयामृचमाह—

यावांकशामधुमत्यश्विनासूनृतावती । तयायज्ञंमिमिक्षतम् ॥ ३॥

या । वाम् । कशा । मधुऽमती । अश्विना । सूनृताऽवती । तया ।
यज्ञम् । मिमिक्षतम् ॥ ३ ॥

अश्विना हेअश्विनौदेवौ वांयुवयोःसंबन्धिनी या कशा अश्वताडनीविद्यते तयासहआगत्य यज्ञमस्मदीयं मिमिक्षतं सोमरसेनसेक्तुमिच्छतं कशयाश्वंदृढंताडयित्वा सहसास-

मागत्यभवद्विषयांसोमरसाहुतिंनिष्पादयितुमुद्युक्तौभवतमित्यर्थः कीदृशीकशामधुमती अर्णः क्षोदमित्यादिषुएकशतसंख्याकेषुउदकनामसुमधुपुरीषमितिपठितं तस्मादुदकवतीत्युक्तंभवति अश्वस्यशीघ्रगत्यायत्स्वेदोदकंस्रवतितेनेयंकशाक्लिन्नेत्यर्थः सूनृतावती प्रियसत्यवाग्युक्ता तीव्रेणकशाताडनेनयोऽश्वनिर्निर्णिणद्यतेताडनवेलायांअश्वारूढेनचयआक्रोशःक्रियतेतदुभयंशीघ्रगमनहेतुत्वेनयजमानस्यप्रियं यद्वा श्लोकःधारेत्यादिषुसप्तपञ्चाशद्वाङ्नामसुकशाधिषणेतिपठितं अश्विनोर्यावाक्मधुमतीमाधुर्योपेतापारुष्यरहिता सूनृतावती प्रियत्वसत्यत्वोपेताफलप्रदानविषयेत्यर्थः तयावाचायुक्तौयज्ञंमिमिक्षतमितियोजनीयम् ॥ कशा कशगतिशासनयोः पचाद्यच् वृषादित्वादाद्युदात्तः। सूनृतावती ऊनपरिहाणे सुष्ठुऊनयत्यप्रियमितिसून् तथाविधमृतंसत्यं यस्यां वाचिसासूनृता नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वंबाधित्वापरादिश्छन्दसिबहुलं इतिऋकारउदात्तः सायस्याअस्तिसाकशासूनृतावतीतिकशायाःसंज्ञा एवंनामाकशेत्यर्थः संज्ञायामितिमतुपोवत्वम्। मिमिक्षतं मिहेःसन् हलन्ताच्चेतिकित्त्वाद्गुणाभावः ढत्वकत्वषत्वानि ॥ ३ ॥

३. अश्विनीकुमार! तुम लोगों की जो घोड़ों के पसीने और ताड़ना से युक्त चाबुक है, उसके साथ आकर इस यज्ञ को सोमरस से सिक्त करो।

नहिवामस्तिंदूरकेयत्रारथेनगच्छथः ॥ अश्विनासोमिनोगृहम् ॥ ४॥

नहि। वाम्। अस्ति। दूरके। यत्र। रथेन। गच्छथः। अश्विना। सोमिनः। गृहम् ॥ ४ ॥

अश्विना हेअश्विनौ देवौयुवांसोमिनः सोमवतोयजमानस्यगृहंप्रतिरथेनगच्छथः समार्गोवांयुवयोर्दूरकेदूरदेशेनह्यस्तिनवर्ततेखलु यद्वा यत्रगृहेगच्छथः तच्चगृहंदूरेनभवति॥नहि एवमादीनामन्तइत्यन्तोदात्तः। अस्ति चादिलोपेविभाषेतिनिघाताभावः। अत्रहिगृहंदूरेचनास्ति युवांचरथेनगच्छथइतिसमुच्चयश्चार्थोगम्यते चशब्दोनप्रयुज्यतइतिचलोपेप्रथमातिङ्विभक्तिरस्तीति। यत्र निपातस्यचेतिसंहितायांदीर्घत्वम्। गच्छथः इयंयद्यपिनप्रथमातथापि यत्रेवियद्वृत्तयोगान्ननिघातः॥ ४ ॥

४. अश्विनीकुमार! सोमरस देनेवाले यजमान के जिस गृह की ओर रथ से जा रहे हो, वह गृह दूर नहीं है।

व्यूढस्यद्वितीयेछन्दोमेवैश्वदेवशस्त्रेहिरण्यपाणिमूतयइतिसावित्र्यश्वतस्रः द्वितीयस्येतिखण्डेसूत्रितम्—हिरण्यपाणिमूतयइतिचतस्रोमहीद्यौःपृथिवीचनइति।

तत्रप्रथमांसूक्तेपञ्चमीमृचमाह—

हिरंण्यपाणिमूतयेंसवितारमुपंह्वये। सचेत्तांदेवतांपदम् ॥ ५ ॥ ४ ॥

हिर॑ण्यऽपाणिम् । ऊ॒तये॑ । स॒वि॒तार॑म् । उप॑ । ह्व॒ये॒ । सः । चेत्ता॑ ।
दे॒वता॑ । प॒दम् ॥ ५ ॥ ४ ॥

ऊतये अस्मद्रक्षणार्थंसवितारं देवमुपह्वये आह्वयामि सचसवितादेवएतन्मन्त्रप्रतिपाद्यदेवताभूत्वापदंयजमानेनप्राप्यंस्थानंचेत्ताज्ञापयिताभवति कीदृशं सवितारं हिरण्यपाणिंयजमानायदातुंहस्तेसुवर्णधारिणं यद्वा देवताकर्तृकेयागेसवितास्वयमृत्विग्भूत्वाब्रह्मत्वेनावस्थितः तदानींकस्यांचिदिष्टावध्वर्यवः तस्मैसवित्रेब्रह्मणे प्राशित्रनामकंपुरोडाशभागंदत्तवन्तः तच्च प्राशित्रंहस्तेसवित्रागृहीतंसत्तदीयपाणिंचिच्छेद ततः प्राशित्रस्यदातारोध्वर्यवः सुवर्णमयं पाणिं निर्मायप्रक्षिप्तवन्तः सोयमर्थःकौषीतकिब्राह्मणेसमाम्नातः—सवित्रेप्राशित्रंप्रतिजह्रुस्तस्य पाणी प्रचिच्छेदतस्मैहिरण्मयौप्रतिदधुस्तस्माद्धिरण्यपाणिरितिश्रुतइति । पाणिशब्दंहिरण्यशब्दंचयास्कएवंनिर्वक्ति—हिरण्यंकस्माद्ध्रियतआयम्यमानमितिवाह्रियतेजनाजनमितिवाहितरमणंभवतीतिवाहृदयरमणंभवतीतिवाहर्यतेर्वास्यात्प्रेप्साकर्मणइति[1] ।तथापाणिः पणायतेःपूजाकर्मणइति[2] ॥ हिरण्यशब्दोनव्विषयत्वादाद्युदात्तः बहुव्रीहौपूर्वपदप्रकृतिस्वरः ।ऊतये उदात्तइत्यनुवृत्तावूतियूतिजूतिसातीत्यादिनाक्तिन्नन्तोन्तोदात्तोनिपातितः।सवितारं तृचश्चित्त्वादन्तोदात्तत्वम् । चेत्ता चिती संज्ञाने अस्मादन्तर्भावितण्यर्थात्ताच्छील्येतृन् अनित्यमागमशास्त्रमितीडभावः नित्त्वादाद्युदात्तः । देवता देवात्तलितिस्वार्थेतल् लितीतिप्रत्ययात्पूर्वमुदात्तम् । पदशब्दः पचाद्यजन्तः चित इत्यन्तोदात्तः ॥ ५ ॥

५. सुवर्ण-हस्तक सूर्य को, रक्षा के लिए, मैं बुलाता हूँ । वेही देव यजमान को मिलनेवाला पद बता देंगे ।

॥ इतिप्रथमस्यद्वितीयेचतुर्थोवर्गः ॥ ४ ॥

सूक्तेषष्ठीमृचमाह—

अ॒पांनपा॑त॒मव॑सेसवि॒तार॒मुप॑स्तुहि । तस्य॑व्र॒तान्यु॑श्मसि ॥ ६ ॥

अ॒पाम् । नपा॑तम् । अव॑से । स॒वि॒तार॑म् । उप॑ । स्तु॒हि॒ । तस्य॑ ।
व्र॒तानि॑ । उ॒श्म॒सि॒ ॥ ६ ॥

अत्रहोतासामगमृत्विजमन्यंवाशस्त्रिणंब्रूते अवसे अस्मान्रक्षितुंसवितारं उपस्तुहि तस्यसवितुःसंबन्धीनिव्रतानिकर्माणि सोमयागादिरूपाणि उश्मसि कामयामहे कीदृशं सवितारं अपांनपातं जलस्यनपालकं सन्तापेनशोषकमित्यर्थः ॥ अपां ऊडिदमित्यादिना विभक्तेरुदात्तत्वम् । नपातं पारक्षणेअस्यशत्रन्तःपाच्छब्दः तस्यनञासमासे नभ्राण्नपादित्या-

---

[1] नि० २. १०. । [2] नि० २. २६. ।

दिनानञोपप्रतिषेधइतिवृत्तिकारः अग्निर्हि अपोनपातितच्छोषकत्वात् तर्हिकथमपामितिषष्ठी नलोकाव्ययनिष्ठाखलर्थेतिकर्मणिषष्ठ्याःप्रतिषेधात् इतिचेत्तर्हि एषाशेषलक्षणास्तु अग्न्यादित्यौ अपांकरणतया संबन्धिनौ अग्नेरापइतिश्रुतेः[1]। आदित्याज्जायतेवृष्टिरितिस्मृतेश्च। अस्मिन्पक्षे उगिदचामितिनुमभावोपिनिपातनादेवेतिमन्तव्यं पातेःक्विबन्तस्यतुग्वानिपातनात् द्रष्टव्यः अथवानपातयतीतिनपात् पत्लृगतावितिधातोर्ण्यन्तात्क्विप् अग्न्यादित्यौह्यपांनप्रापकौ प्रत्युतत्च्छोषकौ अव्ययपूर्वपदप्रकृतिस्वरत्वम्। अवसे तुमर्थेसेसेन् इत्यादिनाअसेन् नित्वादाद्युदात्तः। उश्मसि वशकान्तौ अदिप्रभृतिभ्यइतिशपोलुक् इदन्तोमसिः इतीकारोपजनः॥ ६॥

६. अपने रक्षण के लिए जल को सुखा देनेवाले सूर्य की स्तुति करो। हम सूर्य के लिए यत्न करना चाहते हैं।

विभक्तारंहवामहेवसोश्चित्रस्यराधसः। सवितारंनृचक्षसम्॥ ७॥

विऽभक्तारम्। हवामहे। वसोः। चित्रस्य। राधसः। सवितारम्। नृऽचक्षसम्॥ ७॥

वसोः निवासहेतोश्चित्रस्यसुवर्णरजतादिरूपेण बहुविधस्यराधसोधनस्यविभक्तारंअस्य यजमानस्यैतावद्धनदानमुचितमितिविभागकारिणं नृचक्षसं मनुष्याणांप्रकाशकारिणंसवितारंहवामहे कौषीतकिनएतस्याऋचोव्याख्यानरूपेब्राह्मणे सवितुर्विभागहेतुत्वमेवसमामनन्ति— यदेतद्ब्रूथ चित्रंराधस्तदेषसविताविभक्ताभ्यःप्रजाभ्योविभजतीति॥ विभक्तारं तृचश्चित्त्वादन्तोदात्तत्वं कृदुत्तरप्रकृतिस्वरत्वेनतदेवशिष्यते। हवामहे ह्वयतेर्बहुलंछन्दसीतिसंप्रसारणम्। वसोः वसनिवासेशृस्वृस्निहीत्यादिनाउः निदित्यनुवृत्तेर्नित्त्वादाद्युदात्तः। राधसः असुन्नन्तोनित्त्वादाद्युदात्तः। नृचक्षसं नॄंश्चष्टइतिनृचक्षाः तंनृचक्षसं चक्षेर्बहुलंशिच्चेत्यसुन् शित्त्वादनार्धधातुकत्वेनख्याञादेशाभावः कृदुत्तरपदप्रकृतिस्वरत्वम्॥ ७॥

७. निवास के कारणभूत, अनेक प्रकार के धनों के विभाजनकर्त्ता और मनुष्यों के प्रकाश-कर्त्ता सूर्य का हम आह्वान करते हैं।

अष्टमीमृचमाह—

सखायआनिषीदतसवितास्तोम्योनुनः। दाताराधांसिशुंभति॥ ८॥

सखायः। आ। नि। सीदत। सविता। स्तोम्यः। नु। नः। दाता। राधांसि। शुंभति॥ ८॥

सखिभूताहेऋत्विजः आनिषीदत सर्वत्रोपविशतनोस्माकमयंसवितानुक्षिप्रंस्तोम्यःस्तुतियोग्यः राधांसिधनानिदाताप्रदातुमुद्युक्तः एषसविता शुंभति शोभते॥ समानाःसन्तःख्यान्ति

[1] तै. आ. अष्टमपाठके।

प्रकाशन्तइतिसखायः ख्याप्रकथने समानेख्यश्चोदात्तइतीण्प्रत्ययः तत्सन्नियोगेनडित्त्वंयलोपश्च डित्त्वादाकारलोपः समानस्यच्छन्दसीत्यादिनासमानशब्दस्यसादेशः इण् सन्नियोगेनोदात्तत्वं जसि सख्युरसंबुद्धौइतिणित्त्वाद्वृद्धिरायादेशश्च। निषीदत सदिरप्रतेरितिषत्वम्। स्तोमेषुप्रतिपाद्यत्वेनभवः स्तोम्यः भवेछन्दसीतियत् यतोनावइत्याद्युदात्तत्वम्। दाता दानशीलः ताच्छील्येतृन् नित्त्वादाद्युदात्तः । राधांसि गतं कर्तृकर्मणोःकृतीतिविभाषायाःषष्ठ्याः नलोकाव्ययेतिप्रतिषेधः ॥ ८ ॥

८. सखालोग! चारों ओर बैठ जाओ। हमें शीघ्र सूर्य की स्तुति करनी होगी। धन-प्रदाता सूर्य सुशोभित हो रहे हैं।

अग्निष्टोमेप्रातःसवने अग्नेपत्नीरिहावहेतिनेष्टुःप्रस्थितयाज्या प्रशास्ताब्राह्मणाच्छंसीतिखण्डेसूत्रितम्—अग्नेपत्नीरिहावहोक्षाान्नायवशान्नायेति।

तामेतांसूक्तेनवमीमृचमाह—

अग्ने॒पत्नी॑रि॒हाव॑ह दे॒वाना॑मु॒श॒तीरुप॑। त्वष्टा॑रं॒सोम॑पीतये ॥ ९ ॥

अग्ने॑। पत्नीः॑। इ॒ह। आ। व॒ह॒। दे॒वाना॑म्। उ॒श॒तीः। उप॑। त्वष्टा॑रम्। सोम॑ऽपीतये ॥ ९ ॥

हेअग्नेउशतीःकामयमानाःदेवानांपत्नीरिन्द्राण्याद्याः इहदेवयजनदेशेआवह तथात्वष्टारं देवंसोमपीतयेसोमपानार्थंउपसमीपे आवह ॥ पत्नीः इत्यन्तःपतिशब्दआद्युदात्तः पत्युर्नोयज्ञसंयोगेइतिङीप् तत्संनियोगेनतकारश्च ङीपःपित्त्वात् ङतिस्वरएव। उशतीः वशकान्तौ लटःशतृ अदिप्रभृतिभ्यःशपइतिशपोलुक् शतुर्ङित्त्वात् ग्रहिज्यादिनासंप्रसारणं उगितश्चेतिङीप् शतुरनुमइतिङीप्उदात्तः ॥ ९ ॥

९. अग्निदेव! देवों की अभिलाषा करनेवाली पत्नियों को इस यज्ञ में ले आओ। सोमपान करने के लिए त्वष्टा को पास ले आओ।

आग्ना अ॑ग्नइ॒हाव॑से॒होत्रां॑यविष्ठ॒भार॑तीम् ॥ वरू॑त्रींधि॒षणां॑वह ॥ १० ॥ ५ ॥

आ। ग्नाः। अ॒ग्ने॒। इ॒ह। अव॑से। होत्रा॑म्। य॒वि॒ष्ठ॒। भार॑तीम्। वरू॑त्रीम्। धि॒षणा॑म्। व॒ह॒ ॥ १० ॥ ५ ॥

हेअग्ने अवसेअस्मानवितुंग्नादेवपत्नीरिहावह तथाहेयविष्ठयुवतमाग्ने होत्रांहोमनिष्पादकामग्निपत्नींभारतींभरतनामकस्यादित्यस्यपत्नींवरूत्रींवरणीयांधिषणांवाग्देवींचावह वाग्वैधिषणेतिवाजसनेयकम्। भरतआदित्यइतियास्केनोक्तत्वात् तस्यपत्नीभारतीत्युच्यते॥ गम्यन्तइ-

---

१ नि० ८. १३.।

त्विग्राः गमृसृपृगतौ औणादिकोङ्नप्रत्ययः डित्वाट्टिलोपः प्रत्ययस्वरः । होत्रां हुयामस्तिभसिभ्यस्त्रन्निति त्रन्नन्तोनित्त्वादाद्युदात्तः अतिशयेनयुवायविष्ठः अतिशायनेतमविष्ठनौ स्थूलदूरेत्यादिनायणादिपरस्यलोपः पूर्वस्यचगुणः । भारतीं शार्ङ्गरवादेरवृत्लक्षतत्वाट्ङीनन्तोनित्त्वादाद्युदात्तः । वरूत्रीं ग्रसितस्कभितइत्यादौ यद्यपिवरूतृशब्दस्तृजन्तइत्युक्तं तथाप्यन्तेइतिकरणस्यप्रदर्शनार्थत्वात् वरूतृशब्दस्तृन्नन्तोपिद्रष्टव्यः तेननित्त्वादाद्युदात्तत्वं शेषनिघातेनऋकारस्यानुदात्तत्वात् उदात्तयणोहल्पूर्वात् इत्यपिनङीपउदात्तत्वम् । धिषणां क्युप्रत्ययानुवृत्तौधृषेर्धिषचसंज्ञायामितिक्युः ॥ १० ॥

१०. अग्नि ! हमारी रक्षा के लिए देव-रमणियों को इस यज्ञ में ले आओ। युवक अग्नि ! देवों को बुलानेवाली, सत्य कथनशीला और सत्यनिष्ठा सुबुद्धि को ले आओ।

॥ इतिप्रथमस्यद्वितीयेपञ्चमोवर्गः ॥ ५ ॥

सूक्तेएकादशीमृचमाह—

अ॒भि नो॑ दे॒वीरव॑सा म॒हः शर्म॑णा नृ॒पत्नीः॑ ॥ अच्छि॑न्नपत्राः सचन्ताम् ॥ ११ ॥

अ॒भि । न॒ः । दे॒वीः । अव॑सा । म॒हः । शर्म॑णा । नृ॒ऽपत्नीः॑ ।
अच्छि॑ऽन्नपत्राः । स॒च॒न्ता॒म् ॥ ११ ॥

देवीर्देव्योदेवपत्न्यःअवसारक्षणेनमहोमहताशर्मणाचसुखेनचसहनोस्मान् अभिसचन्तां आभिमुख्येनसेवन्तां कीदृश्योदेव्यः नृपत्नीः मनुष्याणांपालयित्र्यः अच्छिन्नपत्राःअच्छिन्नपक्षाःनहिपक्षिरूपाणांदेवपत्नीनांपक्षाः केनचिच्छिद्यन्ते ॥ देवीः पुंयोगादाख्यायांइतिङीषन्तः प्रत्ययस्वरेणान्तोदात्तः दीर्घाज्जसिचेतिप्रतिषेधस्य वाछन्दसीतिपाक्षिकत्वोक्तेः पूर्वसवर्णदीर्घत्वम् । अवसा अवरक्षणे असुन् नित्त्वादाद्युदात्तः । महः महपूजायां क्विप् सुपांसुपोभवन्तीतितृतीयैकवचनस्यङसादेशःसावेकाचइतिविभक्तेरुदात्तत्वम् । नृपत्नीः समासान्तोदात्तत्वेप्राप्ते परादिश्छन्दसिबहुलमित्युत्तरपदाद्युदात्तत्वम् । अच्छिन्नपत्राः न छिन्नानिअच्छिन्नानि अव्ययपूर्वपदप्रकृतिस्वरत्वं अच्छिन्नानिपत्राणियासांताः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् ॥ ११ ॥

११. अच्छिन्नपक्षा वा द्रुतगामिनी और मनुष्यरक्षिका देवी रक्षण और महान् सुख-प्रदान द्वारा हमारे ऊपर प्रसन्न हों।

इ॒हेन्द्रा॒णीमुप॑ह्वये वरुणा॒नीं स्व॒स्तये॑ । अ॒ग्नायीं॒ सोम॑पीतये ॥ १२ ॥

इ॒ह । इ॒न्द्रा॒णीम् । उप॑ । ह्व॒ये॒ । व॒रु॒णा॒नीम् स्व॒स्तये॑ । अ॒ग्नायीम् ।
सोम॑ऽपीतये ॥ १२ ॥

इहास्मिन्कर्मणि स्वस्तये अस्माकमविनाशाय सोमपीतयेसोमपानायच इन्द्रवरुणाग्नीनांपत्नीराह्वयामि ॥ इन्द्राणींवरुणानीं इन्द्रवरुणेत्यादिनापुंयोगेङीषुप्रत्ययः आनुगागमश्च प्रत्ययस्वरः। अग्नायीं वृषाकप्यग्निकुसितकुसिदानामुदात्तइतिङीप् तत्सन्नियोगेन इकारस्यैकारउदात्तः। सोमपीतये असकृत्पूर्वोक्तम्॥ १२॥

१२. अपने मङ्गल के लिए और सोम-पान के लिए इन्द्राणी, वरुणानी और अग्नायी या अग्निपत्नी को हम बुलाते हैं।

द्वितीयेछन्दोमेवैश्वदेवशस्त्रेमहीद्यौःपृथिवीचनइतिद्यावापृथिव्यनिविद्धानीयस्तृचः द्वितीयस्याग्निंवइतिखण्डेसूत्रितम्—महीद्यौःपृथिवीचनोयुवानापितरापुनरिति । आग्रयणेष्टौ महीद्यौरित्येषाद्यावापृथिव्यैककपालस्यानुवाक्या आग्रयणंव्रीहिश्यामाकेतिखण्डेसूत्रितम्—येकेचज्मामहिनोअहिमायामहीद्यौःपृथिवीचनइति। अग्निमन्थनेप्येषाविनियुक्ता प्रातर्वैश्वदेव्याविति खण्डेसूत्रितम्—अभित्वादेवसवितर्महीद्यौःपृथिवीचनइति। विष्यन्दमानंसान्नाय्यं अनयैवाहवनीयदेशेनिनयेव विष्यपराधइतिखण्डेतथैवसूत्रितम्—विष्यन्दमानंमहीद्यौःपृथिवीचनइतिअन्तःपरिधिदेशेनिनयेयुरिति । आश्विनशस्त्रेप्येषा संस्थितेष्वाश्विनायेतिखण्डेसूत्रितम्—महीद्यौःपृथिवीचनस्तेहिद्यावापृथिवीविश्वशंभुवेति।

तामेतांसूक्तेत्रयोदशीमृचमाह—

म॒ही द्यौः पृ॑थि॒वी च॑ न इ॒मं य॒ज्ञं मि॑मिक्षताम्। पि॒पृ॒तां नो॒ भरी॑मभिः॥ १३॥

म॒ही। द्यौः। पृ॒थि॒वी। च॒। न॒ः। इ॒मम्। य॒ज्ञम्। मि॒मि॒क्ष॒ता॒म्। पि॒पृ॒ताम्। न॒ः। भरी॑मऽभिः॥ १३॥

महीमहतीद्यौर्द्युलोकदेवता पृथिवीभूमिदेवताच नोस्मदीयमिमंयज्ञंमिमिक्षतां स्वकीयसारभूतेनरसेन मिमिक्षतां सेक्तुमिच्छतां तथा भरीमभिः भरणैःपोषणैर्नोस्मान् पिपृतामुभेदेव्यौपूरयताम्॥ मही महच्छब्दात् उगितश्चेतिङीप् अत्शब्दलोपःछान्दसः बृहन्महतोरुपसंख्यानमितिङीपउदात्तत्वम्। द्यौः दिव्शब्दःप्रातिपदिकस्वरेणान्तोदात्तः गोतोणिदितिततः परस्यसोर्णिद्वद्भावाद्वृद्धिरपिस्थानिवद्भावेनोदात्ता। पृथिवी प्रथप्रख्याने प्रथेःषिवन् संप्रसारणंचेतिषिवन्प्रत्ययः षिद्गौरादिभ्यश्चेतिङीष् प्रत्ययस्वरः। मिमिक्षतां मिहसेचने सनि द्विर्भावहलादिशेषौ ढत्वकत्वषत्वानि। पिपृतां पृपालनपूरणयोः ह्रस्वइत्येके लोट् तसस्ताम् शपःश्लुः अर्तिपिपर्त्योश्चेत्यभ्यासस्याकारस्यइकारः तिङ्प्रत्ययस्वरः। भरीमभिः डुभृञ्धारणपोषणयोः हस्रभृधृस्तृस्तृभ्यइमन्नितीमन् नित्त्वादाद्युदात्तः॥ १३॥

१३. महान् द्यु और पृथिवी हमारा यह यज्ञ रस से सिक्त करें और पोषण-द्वारा हमें पूर्ण करें।

चतुर्दशीमृचमाह—

तयोरिद्घृतवत्पयो विप्रां रिहन्ति धीतिभिः । गन्धर्वस्य ध्रुवे पदे ॥ १४ ॥

तयोः । इत् । घृतऽवत् । पयः । विप्राः । रिहन्ति । धीतिऽभिः ।
गन्धर्वस्य । ध्रुवे । पदे ॥ १४ ॥

गन्धर्वस्यध्रुवंपदंअन्तरिक्षं तथाचतापनीयशाखायांसमाम्नायते—यक्षगन्धर्वाप्सरोगणसेवितमन्तरिक्षमिति । तेनान्तरिक्षेणोपलक्षिते आकाशेवर्तमानयोस्तयोरिव् द्यावापृथिव्योरेवसंबन्धिपयोजलंघृतवत् घृतसदृशं विप्रामेधाविनः प्राणिनोधीतिभिःकर्मभिः रिहंतिलिहन्ति यद्वा घृतवद्भूतंसारंतेनोपेतंरिहन्तिलिहेर्व्यत्ययेनरेफः ॥ गन्धर्वस्य धृञ्धारणे गविधृञोगमृचइतिवप्रत्ययः तत्सन्नियोगेनगोशब्दस्यचगमादेशः॥ १४ ॥

१४. अपने कर्म के बल द्यु और पृथिवी के बीच में, मेधावी लोग गन्धर्वों के निवास-स्थान अन्तरिक्ष में, घी की तरह, जल पीते हैं।

स्योनापृथिवीत्येषामहानाम्नीव्रतेभूमिस्पर्शनेविनियुक्ता एतद्विदंब्रह्मचारिणमितिखण्डेसूत्रितम्—स्योनापृथिविभवेतिसमाप्येति । स्मार्तेहेमन्तप्रत्यवरोहणेप्येपाक्गुजप्या मार्गशीर्ष्यांप्रत्यवरोहणमितिखण्डेसूत्रितम्—तस्मिन्नुपविश्यस्योनापृथिविभवेतिजपित्वेति ।

तामेतांसूक्तेपञ्चदशीमृचमाह—

स्योनापृथिविभवानृक्षरानिवेशनी । यच्छानःशर्मसप्रथः ॥१५॥६॥

स्योना । पृथिवि । भव । अनृक्षरा । निऽवेशनी । यच्छ । नः ।
शर्म । सऽप्रथः ॥ १५ ॥ ६ ॥

हेपृथिवि स्योनत्वादिगुणयुक्ताभव स्योनशब्दोविस्तीर्णवाची तथाचवाजसनेयब्राह्मणेस्योनशब्दोपेतंकंचिन्मन्त्रमुदाहृत्यव्याख्यातम्—इन्द्रस्योरुमाविशस्योनःस्योनमिति विस्तीर्णोविस्तीर्णमित्येवतदाहेति । यद्वास्योनशब्दः सुखवाची तथाचयास्कवाक्यमुदाहरिष्यते—अनृक्षराकण्टकरहिता निवेशनी निवेशस्थानभूतासप्रथोविस्तारभूतं शर्मशरणंनोस्मभ्यं यच्छ हेपृथिवि देहि ।तामेतामृचमुदाहृत्ययास्कएवंव्याचष्टे—सुखानःपृथिविभवानृक्षरानिवेशन्यृक्षरःकण्टकऋच्छतेर्यच्छनःशर्मयच्छन्तुशरणंसर्वतःपृथ्वितिं[1] ॥ स्योना षिवुतन्तुसन्ताने सिवेष्टेयेचितिनप्रत्ययः टेश्चयोइत्यादेशः प्रत्ययस्वरः स्योनापृथिवीत्यनयोर्भवेत्याख्यातेनैवान्वयोनपरस्परं अतोसामर्थ्येनैवपराङ्गवद्भावादोकारस्य नामन्त्रितायुदात्तत्वम्। अनृक्षरा ऋषीगतौ गच्छत्यन्त-

---

[1] नि० ९. ३२.

रित्यृक्षरः कण्टकः तन्यृषिभ्यांक्सरन् षढोःकःसीतिकत्वं आदेशप्रत्यययोरितिषत्वं नञोबहुव्रीहिः तस्मान्नुडचीतिनुडागमः नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । निविशत्यस्यामितिनिवेशनी करणाधिकरणयोश्चेतिल्युट् लितीतिप्रत्ययात्पूर्वस्योदात्तत्वम् । यच्छ दाण्दाने पाघ्रेत्यादिना यच्छादेशः द्व्यचोतस्तिङइतिदीर्घः । सप्रथः प्रथप्रख्याने असुन् प्रथसासहवर्ततइति तेनसहेतितुल्ययोगेइतिसमासः वोपसर्जनस्येतिसभावः कृत्स्वरः ॥ १५ ॥

१५. पृथिवी! तुम विस्तृत, कण्टक-रहित और निवासभूता बनो। हमें यथेष्ट सुख दो।

॥ इतिप्रथमस्यद्वितीयेषष्ठोवर्गः ॥ ६ ॥

प्रातःसवनेसोमातिरेके एकंशस्त्रंशंसनीयं तत्रअतोदेवाइत्याद्याःषळृचः सोमातिरेकइतिखण्डेसूत्रितम्—महाँइन्द्रोयओजसाअतोदेवाअवन्तुनइत्यैन्द्रीभिर्वैष्णवीभिश्चेति । अप्तोर्यामेच्छावाकातिरिक्तोक्थेपिएताःषड्ऋचःस्तोत्रियानुरूपार्थाः तथाचयस्यपशवइतिखण्डेसूत्रितम्—अतोदेवाअवन्तुनइतिस्तोत्रियानुरूपाविति । दर्शपूर्णमासयोःप्रायश्चित्तहोमेप्याद्येविनियुक्ते तथैववेदंपत्न्याइतिखण्डेसूत्रितम्—अतोदेवाअवन्तुनइतिद्वाभ्यांव्याहृतिभिश्चेति । याज्यानुवाक्ययोर्मध्येलौकिकभाषणेअतोदेवाइत्येषाजप्या सूत्रितंहि—आपद्यतोदेवाअवन्तुनइतिजपेदिति ।

तामेतांसूक्तेषोडशीमृचमाह—

अतो॑ दे॒वा अ॑वन्तु नो॒ यतो॒ विष्णु॑र्विचक्र॒मे । पृ॒थि॒व्याः स॒प्त धाम॑भिः ॥ १६ ॥

अतः॑ । दे॒वाः । अ॒व॒न्तु॒ । नः॒ । यतः॑ । विष्णुः॑ । वि॒ऽच॒क्र॒मे ।
पृ॒थि॒व्याः । स॒प्त । धाम॑ऽभिः ॥ १६ ॥

विष्णुःपरमेश्वरः सप्तधामभिः सप्तभिर्गायत्र्यादिभिश्छन्दोभिःसाधनभूतैः यतः पृथिव्याःयस्माद्भूप्रदेशाद्विचक्रमे विविधंपादक्रमणंकृतवान् अतोस्मात्पृथिवीप्रदेशान्नोस्मान्देवाअवन्तु विष्णोःपृथिव्यादिलोकेषुछन्दोभिःसाधनैःजयंतैत्तिरीयाआमनन्ति—विष्णुमुखावैदेवाश्छन्दोभिरिमाँल्लोकाननपजय्यमभ्यजयन्निति । विष्णोस्त्रिविक्रमावतारे पादत्रयक्रमणस्यपृथिव्यपादानंपृथिवीप्रदेशाद्रक्षणंनामभूलोकेवर्तमानानांपापनिवारणम् ॥ अतः एतच्छब्दात् पञ्चम्यास्तसिल् इतितसिल् एतदोशित्यशादेशः लित्स्वरेणाकारउदात्तः । यतः तसिलःप्राग्दिशोविभक्तिरितिविभक्तिसंज्ञायां त्यदाद्यत्वं लित्स्वरः । विष्णुः विषेःकिच्चेतिनुप्रत्ययः कित्त्वा-

१ परादिश्छन्दसि इतिउत्तरपदाद्युदात्तत्वम् । २ तै० सं० ५. २. १. ।

चगुणः निदित्यनुवृत्तेराद्युदात्तत्वम्। विचक्रमे सुविवितियोगविभागाव् विशब्दस्यसमासः समासान्तोदात्तत्वं यद्वृत्तयोगान्ननिघातः। सप्त सुपांसुलुगितिभिसोलुक्। धामभिः दधातेरातोमनिन्निितिमनिन् नित्स्वरः॥ १६॥

१६. जिस भू-प्रदेश से, अपने सातों छन्दों द्वारा विष्णु ने विविध पाद-क्रम किया था, उसी भू-प्रदेश से देवता लोग हमारी रक्षा करें।

वैष्णवोपांशुयाजस्य इदंविष्णुरित्येषानुवाक्या उक्तादेवताइतिखण्डेसूत्रितम्—इदंविष्णुर्विचक्रमेत्रिर्देवःपृथिवीमेषएतामिति। गार्हपत्याहवनीययोर्मध्येश्वातिक्रमणेअनयैवश्वपदेषुभस्मप्रक्षिपेत् विध्यपराधइतिखण्डेसूत्रितम्—भस्मनाशुनःपदंप्रतिवपेदिदंविष्णुर्विचक्रमइति। आतिथ्यायांप्रधानस्यहविषएषैवानुवाक्या अथातिथ्येळांतेतिखण्डेसूत्रितम्—इदंविष्णुर्विचक्रमे तदस्यप्रियमभिपाथोअश्यामिति। उपसत्सुवैष्णवस्यैषैवानुवाक्या अथोपसदितिखण्डेसूत्रितम्—गयस्फानोअमीवहेदंविष्णुर्विचक्रमइति।

तामेतांसूक्तेसप्तदशीमृचमाह—

इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम्। समूळ्हमस्यपांसुरे॥ १७॥

इदम्। विष्णुः। वि। चक्रमे। त्रेधा। नि। दधे। पदम्।
सम्ऽऊळ्हम्। अस्य। पांसुरे॥ १७॥

विष्णुस्त्रिविक्रमावतारधारी इदंप्रतीयमानंसर्वंजगदुद्दिश्य विचक्रमे विशेषेणपादक्रमणं कृतवान् तदा त्रेधात्रिभिःप्रकारैः पदंनिदधेस्वकीयंपादंप्रक्षिप्तवान् अस्यविष्णोः पांसुरे धूलियुक्तेपादस्थाने समूळ्हं इदंसर्वं जगत्सम्यगन्तर्भूतम् सेयमृक्यास्केनैवंव्याख्याता—विष्णुर्विशतेर्वाव्यश्नोतेर्वायदिदंकिञ्चतद्विक्रमतेविष्णुस्त्रेधानिधत्तेपदंत्रेधाभावायपृथिव्यामन्तरिक्षेदिवीतिशाकपूणिः समारोहणेविष्णुपदेगयशिरसीत्यौर्णवाभः समूळ्हमस्यपांसुरेप्यायनेन्तरिक्षेपदं नदृश्यतेपिवोपमार्थेस्यात् समूळ्हमस्यपांसुरइवपदंनदृश्यतइतिपांसवःपादैःसूयन्तइतिवापन्नाःशेरतइतिवापंसनीयाभवन्तीतिवेति[१]॥ त्रेधा एधाच्च इत्येधाच्प्रत्ययः चितोन्तोदात्तः। समूळ्हं वहप्रापणे निष्ठेतिक्तः वचिस्वपीत्यादिनासंप्रसारणं ढत्वधत्वष्टुत्वढलोपदीर्घत्वानि गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम्। अस्य इदमोन्वादेशेइत्यशनुदात्तः प्रत्ययश्चसुप्स्वरेण। पांसुरे नगपांसुपांडुभ्यश्चेतिवक्तव्यमितिमत्वर्थीयोरः प्रत्ययस्वरः॥ १७॥

१७. विष्णु ने इस जगत् की परिक्रमा की, उन्होंने तीन प्रकार से अपने पैर रक्खे और उनके धूलियुक्त पैर से जगत् छिप-सा गया।

उपसदिवैष्णवयागस्यप्रातःकालेयाज्या सायंकालेनुवाक्यात्रीणिपदेत्येषास्त्रिवंच—त्रीणिपदाविचक्रमइति स्विष्टकृदादिलुप्यतइति।

---

१ नि० १२. १९।

तामेतामष्टादशीमृचमाह—

त्रीणिपदाविचक्रमेविष्णुर्गोपाअदाभ्यः। अतोधर्माणिधारयन्॥ १८॥

त्रीणि। पदा। वि। चक्रमे। विष्णुः। गोपाः। अदाभ्यः।

अतः। धर्माणि। धारयन्॥ १८॥

अदाभ्यः केनापिहिंसितुमशक्यः गोपाः सर्वस्यजगतोरक्षकोविष्णुःपृथिव्यादिस्थानेषु अतएतेषुत्रीणिपदानिविचक्रमे किंकुर्वन् धर्माण्यग्निहोत्रादीनिधारयन् पोषयन्॥ पदा सुपां-सुलुगित्यादिनाविभक्तेर्डादेशः तस्यस्थानिवद्भावेनानुदात्तत्वेमाप्ते उदात्तनिवृत्तिस्वरेणो-दात्तत्वम्।गोपाः गोपाश्वतस्येत्यत्रोक्तम्॥ अदाभ्यः दभेर्ऋहलोर्ण्यदितिण्यत् नञ्समासः अव्य-यपूर्वपदप्रकृतिस्वरत्वम्। धारयन् शपःपित्त्वादनुदात्तत्वं शतुश्चलसार्वधातुकस्वरेणणिचएवस्वरः शिष्यते॥ १८॥

१८. विष्णु जगत् के रक्षक हैं, उनको आघात करनेवाला कोई नहीं है। उन्होंने समस्त धर्मों का धारण कर तीन पैरों का परिक्रमा किया।

विष्णोःकर्माणिपश्यतयतोव्रतानिपस्पशे। इन्द्रस्ययुज्यःसखा॥ १९॥

विष्णोः। कर्माणि। पश्यत। यतः। व्रतानि। पस्पशे। इन्द्रस्य।

युज्यः। सखा॥ १९॥

हेऋत्विगादयः विष्णोःकर्माणिपालनादीनिपश्यत यतोयैःकर्मभिःव्रतान्यग्निहोत्रादीनि पस्पशेसर्वोयजमानः स्पृष्टवान् विष्णोरनुग्रहादनुतिष्ठतीत्यर्थः तादृशोविष्णुरिन्द्रस्ययुज्योयो-ग्योनुकूलः सखाभवति विष्णोरिन्द्रानुकूल्यं त्वष्टाहतपुत्रइत्यनुवाकेअथहवैतर्हिविष्णुरित्यादिना प्रपञ्चेनतैत्तिरीयाआमनन्ति—पस्पशे स्पशबाधनस्पर्शनयोः लिट् द्विर्भावे शर्पूर्वाःखयइतिप-कारःशिष्यते सकारोलुप्यते यद्वृत्तयोगादनिघातः।युज्यः युजेर्बाहुलकात्क्यप् कित्त्वाद्गुणाभावः क्यपःपित्त्वादनुदात्तत्वं धातुस्वरः॥ १९॥

१९. विष्णु के कर्मों के बल ही यजमान अपने व्रतों का अनुष्ठान करते हैं। उनके कर्मों को देखो। वे इन्द्र के उपयुक्त सखा हैं।

विंशीमृचमाह—

तद्विष्णोःपरमंपदंसदापश्यन्तिसूरयः। दिवीवचक्षुराततम्॥ २०॥

तत्। विष्णोः। परमम्। पदम्। सदा। पश्यन्ति। सूरयः।

दिविऽइव। चक्षुः। आऽततम्॥ २०॥

---

१ तै० २. ४. १२.।

सूरयोविद्वांसः ऋत्विगादयः विष्णोःसंबन्धिपरममुत्कृष्टं तच्छास्त्रप्रसिद्धंपदंस्वर्गस्थानं शास्त्रदृष्ट्या सर्वदापश्यन्ति तत्रदृष्टान्तः—दिवीव आकाशेयथाआततं सर्वतः प्रसृतंचक्षुर्निरोधाभावेन विशदंपश्यतितद्वत् ॥ सदा सर्वैकान्येतिदाप्रत्ययः सर्वस्यसोन्यतरस्यांदीतिसर्वशब्दस्य सभावः व्यत्ययेनाद्युदात्तत्वम्। दिवि ऊडिदमित्यादिनाविभक्तेरुदात्तत्वं इवेनविभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वंचेतितदेवशिष्यते। चक्षुः नब्विषयस्येत्याद्युदात्तत्वम्। आततं तनोतेःकर्मणिक्तः यस्यविभाषेतीट्प्रतिषेधः अनुदात्तोपदेशेत्यादिनानलोपः कृदुत्तरपदप्रकृतिस्वरत्वेप्राप्ते गतिरनन्तरइतिगतेरुदात्तत्वम् ॥ २० ॥

२०. आकाश में चारों ओर विचरण करनेवाली आँखें जिस प्रकार दृष्टि रखती हैं, उसी प्रकार विद्वान् भी सदा विष्णु के उस परम पद पर दृष्टि रखते हैं।

तद्विप्रा॑सो विप॒न्यवो॑ जागृ॒वांस॒ः समि॑न्धते। विष्णो॒र्यत्प॑र॒मं प॒दम् ॥ २१ ॥ ७

तत्। विप्रा॑सः। वि॒प॒न्यवः॑। जा॒गृ॒ऽवांसः॑। सम्। इ॒न्ध॒ते। विष्णोः॑। यत्। प॒रम्। प॒दम् ॥ २१ ॥ ७ ॥

पूर्वोक्तं विष्णोर्यत्परमंपदमस्ति तत्पदंविप्रासोमेधाविनः समिन्धतेसम्यक् दीपयन्ति कीदृशाः विपन्यवः विशेषेणस्तोतारः जागृवांसः शब्दार्थयोःप्रमादराहित्येनजागरूकाः ॥ विप्रासः आज्जसेरसुक्। विपन्यवः स्तुत्यर्थस्यपनेर्बाहुलकादौणादिकोयुप्रत्ययः तत्र प्रत्ययस्वरः। जागृवांसः जागृनिद्राक्षये लिटःक्वसुः क्रादिनियमात्प्राप्तस्येटोवस्वेकाजाद्धसामितिनियमान्निवृत्तिः ॥ २१ ॥

२१. स्तुतिवादी और मेधावी मनुष्य विष्णु के उस परम पद से अपने हृदय को प्रकाशित करते हैं।

इतिप्रथमस्यद्वितीयेसप्तमोवर्गः ॥ ७ ॥

तीव्राइतिचतुर्विंशत्यृचंसूक्तं अत्रेयमनुक्रमणिका—तीव्राश्चतुर्विंशतिर्वायव्यैकेन्द्रवायव्यौ मैत्रावरुणमरुत्वतीयवैश्वदेवपौष्णास्तृचाः शिष्टाआप्योन्त्याध्यर्धाग्नेय्यप्स्वन्तःपुरउष्णिक् परानुष्टुप् तिस्रश्चान्त्याएकविंशीप्रतिष्ठेति। ऋषिश्चान्यस्मादितिपरिभाषयानुवर्तमानान्मेधातिथिःकाण्वऋषिः अप्स्वन्तरित्येषापुरउष्णिक् प्रथमपादस्यद्वादशाक्षरेण आद्यश्चेत्पुरउष्णिगिविलक्षणसद्भावात्अप्सुमेसोमइत्येषानुष्टुप् इदमापइत्याद्यास्तिस्रोनुष्टुभः शिष्टाएकोनविंशतिसंख्याकाऋचोगायत्र्यः आदौगायत्रमितिपरिभाषितत्वात् आद्यावायुदेवताकाततोद्वेऋचाविन्द्रवायूदेवताके ततः एकस्तृचोमित्रावरुणदेवत्यः ततउत्तरतृचस्यमरुद्गणविशिष्टेन्द्रोदेवता ततएकस्तृचोवैश्वदेवः तदनन्तरभावीपौष्णः शिष्टाऋचोब्देवताकाः पयस्वानग्नइत्यर्धर्चयुक्तासंमाग्नइत्येषात्वग्निदेवताका सूक्तविनियोगोलिङ्गादवगन्तव्यः अभिप्लवषडहस्यद्वितीयेहनिम-

उगशस्त्रेवायव्यतृचस्यतीव्राःसोमासइत्येषातृतीया द्वितीयस्यचतुर्विंशेनेतिखण्डेसूत्रितम्—तीव्राः सोमासआगहीत्येकेति पृष्ठ्यषडहेपिद्वितीयेहनिप्रउगएषा ।

तामेतांसूक्तेप्रथमामृचमाह—

ती॒व्राः सोमा॑स॒ आग॑ह्या॒शीर्व॑न्तः सु॒ता इ॒मे। वायो॒ तान्प्रस्थि॑ता॒न्पिब ॥ १ ॥

ती॒व्राः । सोमा॑सः । आ । ग॒हि॒ । आ॒शीःऽव॑न्तः । सु॒ताः । इ॒मे ।
वायो॒ इति॑ । तान् । प्रऽस्थि॑तान् । पिब॒ ॥ १ ॥

हेवायो इमेसोमासः ऐन्द्रवायवग्रहादिरूपाः सोमाः सुताःअभिषुताः तेचतीव्राःप्रभूतत्वाव तर्पयितुंसमर्थाः आशीर्वन्तः आशिरयुक्ताः अतस्त्वमागहि अस्मिन्कर्मण्यागच्छ प्रस्थितानु- त्तरवेदिंप्रत्यानीतान्सोमान् पिब॥सोमासः अर्तिस्तुस्वित्यादिनामन् नित्त्वादाद्युदात्तः आज्जसेर- सुक् । गहि मरुद्भिरग्नआगहीत्यत्रोक्तम् । आशीर्वन्तः श्रिञ्पाके अपस्पृधेथामित्यादिसूत्रे आङ्पूर्वस्य क्विपिशिरादेशोनिपातितः करणस्यापिश्रयणद्रव्यस्यस्वव्यापारेकर्तृत्वविवक्षयाक- र्तरिक्विप्नविरुध्यते आशीरेषामस्तीत्याशीर्वन्तः छन्दसीरइतिवत्वम् । वायो आमन्त्रिताद्युदा- त्तत्वम् । प्रस्थितान् प्रादिसमासे कृदुत्तरपदप्रकृतिस्वरत्वंबाधित्वा व्यत्ययेन अव्ययपूर्वपद- प्रकृतिस्वरत्वम् ॥ १ ॥

१. वायुदेव! यह तीखा और सुपक्व सोमरस तैयार है। तुम आओ; वही सोमरस यहाँ लाया गया है। पान करो।

पूर्वोक्तएवशस्त्रे उभादेवादिविस्पृशेतिद्वैऐन्द्रवायवतृचस्यप्रथमाद्वितीये । तथाचद्विती- यस्येतिखण्डेसूत्रितम्—उभादेवादिविस्पृशेतिद्वेइति ।

तयोःप्रथमांसूक्तेद्वितीयामृचमाह—

उ॒भा दे॒वा दि॑वि॒स्पृशे॑न्द्रवा॒यू ह॑वामहे । अ॒स्य सोम॑स्य पी॒तये॑ ॥ २ ॥

उ॒भा । दे॒वा । दि॒वि॒ऽस्पृशा॑ । इ॒न्द्र॒वा॒यू इति॑ । ह॒वा॒म॒हे॒ । अ॒स्य ।
सोम॑स्य । पी॒तये॑ ॥ २ ॥

दिविस्पृशाद्युलोकवर्तिनौ उभादेवा द्वौदेवाविन्द्रवायूहवामहे आह्वयामः किमर्थं अ- स्यसोमस्यपीतये असकृद्व्याख्यातम ॥ उभादेवा सुपांसुलुगित्याकारः । दिविस्पृशा हद्युभ्यां ङेरुपसंख्यानमितिसप्तम्याअलुक् कृदुत्तरपदप्रकृतिस्वरत्वम् । इन्द्रवायू इन्द्रश्चवायुश्चेतिद्व- न्द्वः उभयत्रवायोःप्रतिषेधोवक्तव्यइत्यानङोनिषेधः देवताद्वन्द्वेचेतिप्राप्तस्योभयपदप्रकृतिस्व-

---

१ तीव्राः तिजनिशाने रक्दीर्घत्वं जस्यवः इतिऋज्रेन्द्रेत्यत्रमनोरमा.

रत्वस्यनोत्तरपदेनुदात्तादौ इतिनिषेधात्समासान्तोदात्तत्वमवशिष्यते। हवामहे ह्वेञ्स्पर्धायां शब्देच बहुलंछन्दसीतिसंप्रसारणं संप्रसारणाच्चेतिपरपूर्वत्वं शप् गुणावादेशौ शपःपित्त्वादनुदात्तत्वं तिङश्चलसार्वधातुकस्वरेणपदस्याद्युदात्तत्वेप्राप्ते तिङ्ङतिङइतिआष्टमिकोनिघातः। अस्य ऊडिदमित्यादिनाषष्ठ्याउदात्तत्वम्। पीतये पापाने स्थागापापचइतिभावेक्तिन् घुमास्थेतीत्वं व्यत्ययेनान्तोदात्तत्वम् ॥ २ ॥

२. आकाश-स्थित इन्द्र और वायु को, सोम-पान के लिए, हम बुलाते हैं।

इन्द्रवायूमनोजुवाविप्राहवन्तऊतये। सहस्राक्षाधियस्पती ॥ ३ ॥

इन्द्रवायू इति। मनःऽजुवा। विप्राः। हवन्ते। ऊतये।
सहस्रऽअक्षा। धियः। पती इति ॥ ३ ॥

विप्रामेधाविनऋत्विग्यजमानाः ऊतयेरक्षणार्थमिन्द्रवायूहवन्तेआह्वयन्ति कीदृशौ मनोजुवौ मनइववेगयुक्तौ सहस्राक्षा सहस्रनयनयुक्तौ यद्यपीन्द्रएवसहस्राक्षः तथापिछत्रिन्यायेन वायुरपितथोच्यते धियस्पतीकर्मणोबुद्धेर्वापालकौ। मनोजुवा जवतिर्गतिकर्मा मनोवज्जवतइतिमनोजुवा मनइववेगयुक्तौ कृदुत्तरपदप्रकृतिस्वरत्वं सुपांसुलुगित्याकारः। विप्राः औणादिकोरन्प्रत्ययान्तआद्युदात्तः। ऊतये ऊतियूतीत्यादिनाक्तिनउदात्तत्वम्। सहस्राक्षासहस्रमक्षीणि ययोस्तौ बहुव्रीहौसक्थ्यक्ष्णोः इतिषच्समासान्तः बहुव्रीहिस्वरेप्राप्ते षचःसमासान्तप्रत्ययस्यसतिशिष्टत्वात् चितइत्यन्तोदात्तत्वम्। धियः सावेकाचइतिङसउदात्तत्वं षष्ठ्याःपतिपुत्रेतिसंहितायांविसर्जनीयस्यसकारः। पतीइत्यन्तःआद्युदात्तः ॥ ३ ॥

३. यज्ञ-रक्षक इन्द्र और वायु मन के समान वेगवान् और सहस्राक्ष हैं। प्रतिभाशाली मनुष्य अपने रक्षण के लिए दोनों का आह्वान करते हैं।

चतुर्विंशकेहनिप्रातःसवनेमैत्रावरुणशस्त्रेमित्रंवयंहवामहइतितृचःषळहस्तोत्रियः चतुर्विंशइतिखण्डेसूत्रितम्—आनोमित्रावरुणामित्रंवयंहवामहइति। अभिप्लवषडहेपिप्रातःसवनेमैत्रावरुणस्यायंतृचआवापार्थः अभिप्लवपृष्ठ्याहानीतिखण्डेसूत्रितम्—परिशिष्टानावापानुद्धृत्यमित्रंवयंहवामहइति। मैत्रावरुणस्यमित्रंवयंहवामहइत्येषाप्रातःसवनेप्रस्थितयाज्या प्रशस्ताब्राह्मणाच्छंसीत्युपक्रम्यइदंतेसोम्यंमधुमित्रंवयंहवामहेइतिसूत्रितम्।

तामेतांसूक्तेचतुर्थीमृचमाह—

मित्रंवयंहवामहेवरुणंसोमपीतये। जज्ञानापूतदक्षसा ॥ ४ ॥

मित्रम्। वयम्। हवामहे। वरुणम्। सोमऽपीतये। जज्ञाना।
पूतऽदक्षसा ॥ ४ ॥

वयमनुष्ठातारः सोमपीतये सोमपानार्थं मित्रंवरुणंचोभावाह्वयामः कीदृशावुभौ जज्ञा-ना कर्मप्रदेशेप्रादुर्भवन्तौ पूतदक्षसाशुद्धबलौ ॥ वरुणं वृञ्वरणे कृवृदृदारिभ्यउनन् नित्त्वादाद्युदात्तः । सोमपीतये दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वम् । जज्ञाना जनीप्रादुर्भावे छन्दसि लिट् तस्यलिटःकानज्वा इतिकानजादेशः गमहनेत्यादिनाउपधालोपः तस्य अचःपरस्मिन्निति स्थानिवद्भावाज्जन्शब्दस्यद्विर्वचनं स्तोश्चुनाश्चुरितिनकारस्यञकारः चितइत्यन्तोदात्तत्वं पूर्ववदाकारः । पूतदक्षसा पूञ्पवने निष्ठेतिक्तः श्र्युकःकितीतीट्प्रतिषेधः पूतंदक्षोययोस्तौ बहुव्रीहौप्रकृत्येतिपूर्वपदप्रकृतिस्वरत्वम् ॥ ४ ॥

४. मित्र और वरुण---दोनों शुद्ध-बल-शाली और यज्ञ में प्रादुर्भूत होनेवाले हैं। हम उन्हें सोमरस-पान के लिए, बुलाते हैं।

पञ्चमीमृचमाह—

ऋतेनयावृतावृधावृतस्यज्योतिषस्पती । तामित्रावरुणाहुवे ॥५॥ ८॥

ऋतेन । यौ । ऋतऽवृधौ । ऋतस्य । ज्योतिषः । पती इति ।
ता । मित्रावरुणा । हुवे ॥ ५ ॥ ८ ॥

यौमित्रावरुणौ ऋतेन सत्यवचनेन यजमानानुग्रहकारिणा ऋतावृधौ ऋतमवश्यंभावितयासत्यंकर्मफलंतस्यवर्धकौ ऋतस्यसत्यस्य प्रशस्तस्यज्योतिषः प्रकाशस्यपती पालकौ श्रुत्यन्तरे मित्रावरुणयोरदितिपुत्रत्वेनश्रुतत्वाद्द्वादशादित्येष्वन्तर्भूतत्वेन ज्योतिःपालकत्वंयुक्तं श्रुत्यन्तरेच अष्टौपुत्रासोअदितेरित्युपक्रम्य मित्रश्चवरुणश्चेत्यादिकमाम्नातम् । तामित्रावरुणा तथाविधौ मित्रावरुणौ हुवेआह्वयामि ॥ ऋतावृधौ वृधुवृद्धौ क्विप्चेतिक्विप् अन्येषामपिदृश्यत-इतिदीर्घः कृदुत्तरपदप्रकृतिस्वरत्वम् । ज्योतिषः द्युतदीप्तौ द्युतेरिसिन्नादेश्चजइतिइसिन्प्रत्ययोनित्त्वादाद्युदात्तः षष्ठ्याःपतिपुत्रेतिसंहितायां विसर्जनीयस्यसः षत्वम् । मित्रावरुणा देवताद्वन्द्वेचेत्यानङ् देवताद्वन्द्वेचेत्युभयपदप्रकृतिस्वरत्वं सुपांसुलुगितिपूर्वसवर्णदीर्घआकारः । हुवे ह्वेञ् आत्मनेपदोत्तमपुरुषैकवचनेसंप्रसारणे परपूर्वत्वेचकृते बहुलंछन्दसीतिशपोलुक् टेरेत्वं गुणेप्राप्ते क्ङितिचेतिप्रतिषेधः उवङादेशः तिङ्ङतिङइतिनिघातः ॥ ५ ॥

५. जो मित्र और वरुण सत्य के द्वारा यज्ञ की वृद्धि और यज्ञ के प्रकाश का पालन करते हैं, उन लोगों का मैं आह्वान करता हूँ।

षष्ठीमृचमाह—

वरुणःप्राविताभुवन्मित्रोविश्वाभिरूतिभिः । करतांनःसुराधसः ॥६॥

वरुणः । प्रऽअविता । भुवत् । मित्रः । विश्वाभिः । ऊतिऽभिः ।
करताम् । नः । सुऽराधसः ॥ ६ ॥

अयं वरुणोस्माकंमाविताभुवत् प्रकर्षेणरक्षकोभवतु मित्रश्च विश्वाभिरूतिभिः सर्वाभीरक्षाभिः प्राविताभुवत् तावुभावपि नोस्मान् सुराधसः प्रभूतधनयुक्तान् करतां कुरुताम् ॥ अविता तृचश्चित्त्वादन्तोदात्तत्वं प्रादिसमासे कृदुत्तरपदप्रकृतिस्वरत्वेन तदेवशिष्यते। भुवत् भूसत्तायां लेटस्तिप् लेटोडाटौ इत्यडागमः इतश्चलोपइतीकारलोपः बहुलंछन्दसीतिशपोलुक् गुणेप्राप्ते भूसुवोस्तिङीतिप्रतिषेधः उवङादेशः तिङ्ङतिङइतिनिघातः। विश्वाभिः अशूप्रुषीत्यादिनाक्वन्नन्तोविश्वशब्दआद्युदात्तः टाप्सुपोरनुदात्तत्वात्तदेवशिष्यते। ऊतिभिः ऊतियूतीत्यादिनाक्तिन्नुदात्तः। करतां कृञ्करणे भौवादिकः लोटः तस् तसस्तां कर्तरिशप् गुणोरपरत्वं शपःपित्त्वादनुदात्तत्वं तिङश्च लसार्वधातुकस्वरेणधातुस्वरःशिष्यते। सुराधसः राधसाधसंसिद्धौ राध्नोत्यनेनेतिराधोधनं शोभनंराधोयेषांते बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वेप्राप्ते नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वंप्राप्तं सोर्मनसीअलोमोषसी इत्युत्तरपदाद्युदात्तत्वेनबाध्यते ॥ ६ ॥

६. वरुण और मित्र सब तरह से हमारी रक्षा करते हैं। वे हमें यथेष्ट सम्पत्ति दें।

मरुत्वन्तंहवामहइन्द्रमासोमपीतये। सजूर्गणेनतृम्पतु ॥ ७ ॥

मरुत्वन्तम्। हवामहे। इन्द्रम्। आ। सोमऽपीतये। सऽजूः। गणेन। तृम्पतु ॥ ७ ॥

मरुत्वन्तं मरुद्भिर्युक्तमिन्द्रं सोमपीतयेसोमपानाय आहवामहे आह्वयामः सचेन्द्रोगणेनमरुत्समूहेन सजूःसहतृम्पतुतृप्तोभवतु॥ मरुतोस्यसन्तीतिमरुत्वान् झयइतिमतुपोवत्वं तसौमत्वर्थेइतिभसंज्ञयापदसंज्ञायाबाधितत्वात् जश्त्वाभावः मतुप्सुपौपित्त्वादनुदात्तौ ननु ह्रस्वनुड्भ्यां मतुप् इतिमतुपउदात्तत्वेनभवितव्यंस्वरविधौव्यञ्जनमविद्यमानवदितितकारस्याविद्यमानवत्त्वेन ह्रस्वात्परत्वात् न ह्रस्वनुड्भ्यामित्यत्र नुड्ग्रहणसामर्थ्यादविद्यमानपरिभाषानाश्रीयतइतिवृत्तावुक्तं अतोमरुच्छब्दस्यस्वरएवशिष्यते। सजूः जुषीप्रीतिसेवनयोः संपदादिलक्षणःक्विप् समानाप्रीतिर्यस्येतिबहुव्रीहिः समानस्यच्छन्दसीतिसभावः ससजुषोरुरितिरुत्वं र्वोरुपधायाइत्युपधादीर्घः बहुव्रीहिस्वरेप्राप्तेत्रिचक्रादीनांछन्दसीत्युत्तरपदान्तोदात्तत्वम्। तृम्पतु तृम्पतृम्पतृप्तौ तुदादिभ्यःशः शेतृम्पादीनामितिनुमागमः ॥ ७ ॥

७. मरुतों के साथ, सोम-पान के लिए, हम इन्द्र का आह्वान करते हैं। वे मरुद्गण के साथ तृप्त हों।'

अष्टमीमृचमाह—

इन्द्रज्येष्ठामरुद्गणादेवासःपूषरातयः। विश्वेममश्रुताहवम् ॥ ८ ॥

इन्द्रऽज्येष्ठाः । मरुत्ऽगणाः । देवासः । पूषऽरातयः । विश्वे । मम । श्रुत । हवम् ॥ ८ ॥

हेदेवासः इन्द्रमरुद्रूपाविश्वेसर्वेयूयं ममहवमाह्वानंश्रुतश्रृणुत कीदृशाःइन्द्रज्येष्ठाः इन्द्रोज्येष्ठोमुख्योयेषुते तथाविधाः मरुद्गणाः मरुत्समूहरूपाः पूषरातयः पूषाख्योदेवोरातिर्दाता येषामिन्द्रमरुतांतेपूषरातयः॥ इन्द्रज्येष्ठाः आमन्त्रितायुदात्तत्वं पादादित्वादनिघातः । मरुद्गणाः विभाषितंविशेषवचनेबहुवचनमितिपूर्वस्याविद्यमानवत्त्वादनिघातः । देवासः पूषरातयः पूर्ववत् । श्रुत श्रुश्रवणे लोण्मध्यमबहुवचनं थ तस्थस्थमिपामितितादेशः व्यत्ययेनशप् बहुलंछन्दसीतिशपोलुक् सार्वधातुकार्धधातुकयोरितिगुणेप्राप्तेग्क्ङितिचेतिप्रतिषेधः द्व्यचोतस्तिङइतिदीर्घः । हवं ह्वेञ्स्पर्धायांशब्देच भावेनुपसर्गस्येत्यप् संप्रसारणं परपूर्वत्वं गुणावादेशौ अपःपित्वादनुदात्तत्वं धातुस्वरःशिष्यते ॥ ८ ॥

८. मरुद्गण ! तुम्हारे अन्दर इन्द्र अग्रणी हैं, पूषा या सूर्य तुम्हारे दाता हैं। तुम सब लोग हमारा आह्वान सुनो।

नवमीमृचमाह—

हतवृत्रंसुदानवइन्द्रेणसहसायुजा ।मानोदुःशंसईशत ॥ ९ ॥

हत । वृत्रम् । सुऽदानवः । इन्द्रेण । सहसा । युजा । मा । नः । दुःऽशंसः । ईशत ॥ ९ ॥

हेसुदानवः शोभनदानयुक्ताः मरुद्गणाः सहसाबलवता युजायोग्येनेन्द्रेणसहवृत्रं शत्रुं हतनाशयत दुःशंसः दुष्टेनशंसनेनकीर्तनेनयुक्तोवृत्रोनोस्मान् प्रतिमेशत समर्थोमाभूत् ॥ हत हनर्हिंसागत्योः लोटस्थ तस्यत अदिप्रभृतिभ्यःशपइतिशपोलुक् अनुदात्तोपदेशेत्यादिना अनुनासिकलोपः । सुदानवः डुदाञ्दाने दाभाभ्यांनुरित्यौणादिकोनुप्रत्ययः प्रादिसमासेआमन्त्रितनिघातः । युजा युजिर्योगे ऋत्विगित्यादिनाक्विन् सावेकाचइतितृतीयैकवचनस्योदात्तत्वम् । दुःशंसः ईषद्दुःसुष्विति खल् लितीप्रत्ययात्पूर्वस्योदात्तत्वम् । ईशत ईश ऐश्वर्ये माङिलुङ्प्राप्ते छन्दसिलुङ्लङ्लिटइतिव्यत्ययेनलङ् तस्यतः बहुलंछन्दसीतिशपोलुगभावः नमाङ्योगेइत्याडागमाभावः तिङ्ङतिङइतिनिघातः ॥ ९ ॥

९. दान-परायण मरुतो ! बली और अपने सहायक इन्द्र के साथ शत्रु का विनाश करो, जिससे दुष्ट शत्रु हमारा स्वामी न बन बैठे ।

विश्वान्देवान्हवामहमरुतःसोमपीतये । उग्राहिपृश्निमातरः॥१०॥९॥

विश्वा॑न् । दे॒वान् । ह॒वा॒म॒हे॒ । म॒रुतः॑ । सोम॑ऽपीतये । उ॒ग्राः ।
हि । पृश्नि॑ऽमातरः ॥ १० ॥ ९ ॥

मरुतोमरुत्संज्ञकान् विश्वान्सर्वान्देवान् सोमपीतयेहवामहे सोमपानार्थमाह्वयामः तेच मरुतः उग्राः शत्रुभिरसह्यबलाः पृश्निमातरः पृश्नेर्नानावर्णयुक्तायाभूमेःपुत्राः हिशब्दः प्रसिद्ध्यर्थः साचप्रसिद्धिः पृश्नेःपुत्राइतिमन्त्रान्तरादवगन्तव्या ॥ पृश्निर्मातायेषांते पृश्निशब्दोघृणिपृश्निरित्युणादावाद्युदात्तोनिपातितः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् ॥ १० ॥

१०. सारे मरुत्देवों को सोमरस-पान के लिए हम आह्वान करते हैं। वे उग्र और पृश्नि (पृथिवी, आकाश या मेघ) की संतान हैं।

इतिप्रथमस्यद्वितीयेनवमोवर्गः ॥ ९ ॥

एकादशीमृचमाह—

जयंतामिवतन्यतुर्मरुतामेतिधृष्णुया । यच्छुभंयाथनानरः ॥ ११ ॥

जयं॑ताम्ऽइव । त॒न्य॒तुः । म॒रुता॑म् । ए॒ति॒ । धृ॒ष्णु॒ऽया । यत् ।
शुभ॑म् । या॒थन॑ । न॒रः॒ ॥ ११ ॥

मरुतांदेवानां तन्यतुःशब्दः धृष्णुया धाष्टर्ययुक्तःसन्नेतिगच्छति केषामिव जयतांविजययुक्तानां शूराणांभटानामिव हेनरोनेतारोमरुतोयूयं यद्यदा शुभंशोभनंदेवयजनं याथन यामुथ तदात्वदीयःशब्दोगच्छतीतिपूर्वेणान्वयः ॥ तन्यतुः तनुविस्तारे ऋतन्यञ्जीत्यादिना यतुच्प्रत्ययः । धृष्णुया ञिधृषाप्रागल्भ्ये असिगृधिधृषिक्षिपेःक्नुरितिक्नुः सुपांसुलुगिति सोर्याजादेशः चित्त्वादन्तोदात्तः । याथन तप्तनप्तनथनाश्चेतिथनादेशः यच्छब्दयोगान्निघाताभावः ॥ ११ ॥

११. जिस समय मरुत्लोग शोभन यज्ञ को प्राप्त होते हैं उस समय विजयी लोगों के नाद की तरह उनका, दर्प के साथ, निनाद होता है।

हस्काराद्विद्युतस्पर्यतोजाताअवन्तुनः । मरुतोमृळयन्तुनः ॥ १२ ॥

ह॒स्का॒रात् । वि॒ऽद्युतः॑ । परि॑ । अतः॑ । जा॒ताः । अ॒व॒न्तु॒ । नः॒ ।
म॒रुतः॑ । मृ॒ळ॒य॒न्तु॒ । नः॒ ॥ १२ ॥

हस्कारादीप्तिकारात् विद्युतोविशेषेणदीप्यमानात् अतःअन्तरिक्षात्परिजाताः सर्वतउत्पन्नाः मरुतोनोस्मानवन्तुरक्षन्तु तथाविधामरुतोनोस्मान्मृळयन्तुसुखयन्तु ॥ हस्कारात् हसेहसने अत्रतुप्रकाशमात्रेवर्तते अस्मात्संपदादिलक्षणःक्विप् अस्मिन्नुपपदे डुकृञ्करणेइत्यस्मा-

१ ऋ० ४. ३. २३.

व कर्मण्यण् इत्यण्प्रत्ययः तत्पुरुषेतुल्यार्थेत्यादिनापूर्वपदप्रकृतिस्वरत्वेप्राप्ते गतिकारकेत्यादिनाकृदुत्तरपदप्रकृतिस्वरत्वं अतःकृकमीत्यादिनाविसर्जनीयस्यसत्वम् ॥ १२ ॥

१२. प्रकाशमयी बिजली से उत्पन्न मरुत् लोग हमारा रक्षण और सुख-विधान करें।

आपूषञ्चित्रबर्हिषमाघृणेधरुणंदिवः। आजानष्टंयथापशुम् ॥ २३ ॥

आ। पूषन्। चित्रऽबर्हिषम्। आघृणे। धरुणम्। दिवः।
आ। अज। नष्टम्। यथा। पशुम् ॥ १३ ॥

हेपूषन् चित्रबर्हिषं विचित्रैर्दर्भैर्युक्तं धरुणंयागस्यधारकंसोमंदिवआ द्युलोकादाहरेतिशेषः पूषाविशेष्यते आघृणे आगतदीप्तियुक्त तत्रदृष्टान्तः हेअज गमनशील यथालोकेनष्टंपशुंमहारण्यादावन्वीक्ष्यकश्चिदाहरतितद्वत् ॥ आघृणे घृक्षरणदीप्त्योरित्यस्माद्घृणिपृश्नीतिनिप्रत्ययोनिपातितः ऋवर्णाच्चेतिवक्तव्यमितिणत्वं प्रादिसमासः आमन्त्रिताद्युदात्तत्वम्। धरुणं धृञ्धारणेअस्माण्ण्यन्ताद्धातोरर्जेर्णिलुक्चेत्युनन्प्रत्ययः व्यत्ययेननित्स्वराभावेप्रत्ययस्वरः। दिवः ऊडिदमित्यादिनाषष्ठ्याउदात्तत्वम्। अज अजगतिक्षेपणयोः पचादित्वादच् ॥ १३ ॥

१३. हे दीप्तिमान् और शीघ्रगन्ता पूषा या सूर्य ! जिस तरह दुनिया में किसी पशु के खो जाने पर उसे लोग खोज लाते हैं, उसी प्रकार तुम आकाश से विचित्र कुशोंवाले और यज्ञधारक सोम को ले आओ।

पूषाराजानमाघृणिरपगूळ्हंगुहाहितम्। अविन्दच्चित्रबर्हिषम् ॥ १४ ॥

पूषा। राजानम्। आघृणिः। अपऽगूळ्हम्। गुहा। हितम्।
अविन्दत्। चित्रऽबर्हिषम् ॥ १४ ॥

आघृणिः पूषाराजानं सोममविन्दत् अलभत कीदृशं अपगूळ्हं अत्यन्तंगूढं तत्रहेतुः गुहाहितं गुहासदृशेदुर्गमेद्युलोकेस्थितं तथाचित्रबर्हिषम् ॥ अपगूळ्हं गुहूसंवरणे निष्ठेतिकर्मणिक्तः होढइतिढत्वं झषस्तथोर्धोधइतिधकारः ष्टुत्वढ्लोपदीर्घाः समासे गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम्। गुहा सुपांसुलुगितिसप्तम्यालुक्। हितं निष्ठायांदधातेर्हिः ॥ १४ ॥

१४. प्रकाशमान पूषा ने गुहा में अवस्थित, छिपा हुआ विचित्र-कुश-सम्पन्न और दीप्तिमान् सोम पाया।

उतोसमह्यमिन्दुभिःषड्युक्ताँअनुसेषिधत्। गोभिर्यवंनचर्कृषत् ॥ १५ ॥ १०

उतो इति। सः। मह्यम्। इन्दुऽभिः। षट्। युक्तान्।
अनुऽसेसिधत्। गोभिः। यवम्। न। चर्कृषत् ॥ १५ ॥ १० ॥

उतो अपिच सपूषामह्यंयजमानाय इन्दुभिः यागहेतुभिः सोमैर्युक्तान् षड्वसन्तादीन् ऋतून् अनुसेषिधत् अनुक्रमेणपुनःपुनर्नयन् वर्ततइतिशेषः तत्रदृष्टान्तः—गोभिर्बलीवर्दैर्यवंन चर्कृषत् नशब्दउपमार्थः यथायवमुद्दिश्य भूमिं प्रतिसंवत्सरं पुनःपुनःकृषतितद्वत् ॥ मह्यं ङयिचेत्याद्युदात्तत्वम् । इन्दुभिः उन्दीक्लेदने उन्देरिच्चादेरितिउप्रत्ययः उकारस्येकारादेशश्च निदित्यनुवृत्तेराद्युदात्तत्वम् । युक्तान् दीर्घादटिसमानपादेइतिसंहितायां नकारस्यरुत्वं आतोटिनित्यमितिसानुनासिकआकारः । सेषिधत् षिधुगत्यां धातोरेकाचइतियङ् यङोचिच इतितस्यलुक् प्रत्ययलक्षणेन सन्यङोरितिद्विर्भावः हलादिशेषः गुणोयङ्लुकोरित्यभ्यासस्यगुणः इण्कोरितिषत्वं सनादित्वाद्धातुसंज्ञायां लटःशतृ कर्तरिशप् अदादिवच्चेतिवचनाच्छपोलुक् नाभ्यस्ताच्छतुः इतिनुम्प्रतिषेधः प्रत्ययस्वरेप्राप्तेअभ्यस्तानामादिरित्याद्युदात्तत्वम् । गोभिः सावेकाचइतिभिसउदात्तत्वेप्राप्ते नगोश्वन्नितिप्रतिषेधः । चर्कृषत् कृषविलेखने यङ्लुकिद्विर्भावहलादिशेषोरत्वचर्त्वानि रुग्रिकौचलुकि इत्यभ्यासस्यरुगागमः अस्माद्यङ्लुगन्ताल्लेटस्तिप् इतश्चलोपः लेटोडाटावित्यडागमः अदिप्रभृतिभ्यः शपइतिशपोलुक् लघूपधगुणेप्राप्ते नाभ्यस्तस्याचिपितीतिनिषेधः तिङ्ङतिङइतिनिघातः ॥ १५ ॥

१५. जिस प्रकार किसान बैलों से यव का खेत बार-बार जोतता है, उसी प्रकार पूषा भी मेरे लिए, सोम के साथ, क्रमशः छः ऋतुएँ बार-बार, लाये थे।

॥ इतिप्रथमस्यद्वितीयेदशमोवर्गः ॥ १० ॥

अपोनप्त्रीयेएकधनास्वपानीतासुस्वयमन्वगच्छन्नंबयइतिद्वेअनुब्रूयात् तृतीयया अपोदेवीरित्यनयैकधनासुहविर्धानंप्रविष्टासु स्वयमनुप्रविशेत् तथैवसूत्रितम्—अंबयोयन्त्यध्वभिरितितिस्रउत्तमयानुप्रपद्येतेति ।

अस्मिंस्तृचेप्रथमांसूक्तेषोडशीमृचमाह—

अम्बयोयन्त्यध्वभिर्जामयोअध्वरीयताम् । पृञ्चतीर्मधुनापयः ॥ १६ ॥

अम्बयः । यन्ति । अध्वऽभिः । जामयः । अध्वरिऽयताम् । पृञ्चतीः । मधुना । पयः ॥ १६ ॥

अध्वरीयतां अध्वरमात्मनइच्छतां अस्माकं अंबयोमातृस्थानीयाआपः तथाचकौषीतकिब्राह्मणेसमाम्नायते—अंबयोयन्त्यध्वभिरित्यापोवाअंबयइति । ताआपः अध्वभिर्देवयजनमार्गैर्यन्ति गच्छन्ति कीदृश्यआपः जामयोहितकारिण्योबन्धवः तथामधुनामाधुर्यरसेनयुक्तंपयःपृञ्चतीः गवादिषुयोजयन्त्यः ॥ अंबयः रबिलुबिअबिशब्दे एतस्मात् अचइरितिप्रकरणेबाहुलकात् इः प्रत्ययस्वरः । अध्वभिः अदेर्ध्वंचेतिक्वनिप् पित्त्वात्प्रत्ययस्यानुदात्तत्वेधातुस्वरः । जामयः

जमुअदने बाहुलकात् इः । अध्वरीयतां अध्वरशब्दात्सुपआत्मनःक्यजितिक्यच् क्यचिचेतीत्वं अपुत्रादीनामितिवक्तव्यमितिवचनात् नच्छन्दस्यपुत्रस्येतीत्वनिषेधाभावः सर्वेविधयश्छन्दसि विकल्प्यन्तेइतिकव्यध्वरपृतनस्येत्यकारलोपोपिनभवति क्यचप्रत्ययान्तधातोर्लटःशतृ शपः पित्त्वादनुदात्तत्वं शतुश्चलसार्वधातुकस्वरेण तयोःक्यचासहैकादेशः एकादेशउदात्तेनोदात्तः इत्यन्तोदात्तत्वेसति शतुरनुमोनद्यजादीइतिषष्ठ्याउदात्तत्वम् । पृञ्चतीः पृचीसंपर्के लटः शतृ रुधादिभ्यःश्नम् श्नसोरल्लोपः अनुस्वारपरसवर्णौ उगितश्चेतिङीप् वाछन्दसीतिपूर्वसवर्णदीर्घत्वं शतुरनुमइतिङीपउदात्तत्वम् ॥ १६ ॥

१६. हम यज्ञेच्छुओं का मातृ-स्थानीय जल यज्ञ-मार्ग से जा रहा है। वह जल हमारा हितैषी बन्धु है। वह दूध को मधुर बनाता है।

अमूर्याउपसूर्येयाभिर्वासूर्यःसह । तानोहिन्वन्त्वध्वरम् ॥ १७ ॥

अमूः । याः । उप । सूर्ये । याभिः । वा । सूर्यः । सह । ताः । नः । हिन्वन्तु । अध्वरम् ॥ १७ ॥

या अमूरापः सूर्ये उपसमीपेनावस्थिताः आपःसूर्येसमाहिताइतिश्रुत्यन्तरात् वा अथवा सूर्योयाभिरद्भिःसहवर्तते पूर्वत्रापांप्राधान्यं उत्तरत्रसूर्यस्येतिविशेषः तास्तादृश्यआपोनोस्मदीयमध्वरंयागं हिन्वन्तु प्रीणयन्तु ॥ याभिः सावेकाचइतिविभक्त्युदात्तस्य नगोश्वन्साववर्णेतिप्रतिषेधः । शेषप्रक्रियास्पष्टा ॥ १७ ॥

१७. यह जो सारा जल सूर्य के पास है अथवा सूर्य जिस सब जल के साथ है वह सब जल हमारे यज्ञ को प्रेम-पात्र करे।

अपोदेवीरुपह्वयेयत्रगावःपिबन्तिनः । सिन्धुभ्यःकर्त्वंहविः॥१८॥

अपः । देवीः । उप । ह्वये । यत्र । गावः । पिबन्ति । नः । सिन्धुऽभ्यः । कर्त्वम् । हविः ॥ १८ ॥

नोस्मदीयागावोयत्रयास्वप्सुपिबन्तिपानंकुर्वन्ति ताअपोदेवीरुपह्वये आह्वयामि सिन्धुभ्यः स्यन्दनशीलाभ्योद्भ्योदेवताभ्यः हविः कर्त्वं अस्माभिः कर्तव्यम् ॥ अपः ऊडिदमित्यादिनाशसउदात्तत्वम् । पिबन्ति पाघ्रेत्यादिनापिबादेशः शपःपित्त्वादनुदात्तत्वं तिङश्चलसार्वधातुकस्वरेणाद्युदात्तत्वं निपातैर्यद्यदीत्यादिना निघाताभावः । कर्त्वं डुकृञ्करणे कृत्यार्थेतवैकेन्केन्यत्वनइतिकर्मणित्वन्प्रत्ययः गुणः नित्स्वरेणाद्युदात्तत्वम् ॥ १८ ॥

१८. हमारी गायें जिस जल को पान करती हैं, उसी जल का हम आह्वान करते हैं। जो जल नदी-रूप होकर बह रहा है, उस सबको हव्य देना कर्त्तव्य है।

---

१ तै० आ० प्रथमप्रपाठके.

एकोनविंशीमृचमाह—

अप्स्व१न्तरमृतमप्सुभेषजमपामुतप्रशस्तये। देवाभवतवाजिनः॥१९॥

अप्ऽसु। अन्तः। अमृतम्। अप्ऽसु। भेषजम्। अपाम्।
उत। प्रऽशस्तये। देवाः। भवत। वाजिनः॥ १९॥

अप्सुजलेषु अन्तर्मध्ये अमृतं पीयूषंवर्तते तस्याविकारत्वात् अमृतंवाआपइति-श्रुत्यन्तराच्च तथैवाप्सुभेषजमौषधंवर्तते क्षुद्रोगनिवर्तकास्यान्नस्यापकार्यत्वात् उतअपिच तादृशीनामपांदेवतानां प्रशस्तये प्रशंसार्थं हेदेवाऋत्विजादयोब्राह्मणाःएतेवैदेवाःप्रत्यक्षंय-द्ब्राह्मणाइतिश्रुत्यन्तरात्। वाजिनोवेगवन्तोभवत शीघ्रंस्तुतिंकुरुतेत्यर्थः॥ अप्सु ऊडिदमि-त्यादिनासप्तम्याअनुदात्तत्वं संहितायां उदात्तस्वरितयोर्यणःस्वरितइति स्वरितत्वम्। अमृतं नञोजरमरमित्रमृताइत्युत्तरपदाद्युदात्तत्वम्। प्रशस्तयेतादौचनितीतिगतेःप्रकृतिस्वरत्वम्। भवत आमन्त्रितंपूर्वमविद्यमानवदिति पूर्वस्यामन्त्रितस्याविद्यमानवत्त्वेन पादादित्वादनिघातः॥ १९॥

१९. जल के भीतर अमृत और ओषधि है। हे ऋषि लोग! उस जल की प्रशंसा के लिए उत्साही बनिए।

कारीर्यामुत्तरस्याज्यभागस्यअप्सुमइत्येषानुवाक्या वर्षकामेतिखण्डे—अप्स्वग्नेसधिष्टवा-प्सुमेसोमोअब्रवीदितिसूत्रितम्।

विंशीमृचमाह—

अप्सुमेसोमोअब्रवीदन्तर्विश्वानिभेषजा। अग्निंचविश्वशंभुवमापश्चविश्वभेषजीः॥२०॥ ११॥

अप्ऽसु। मे। सोमः अब्रवीत्। अन्तः। विश्वानि। भेषजा। अग्निम्।
च। विश्वऽशंभुवम्। आपः। च। विश्वऽभेषजीः॥ २०॥ ११॥

अप्सुजलेषु अन्तर्मध्ये विश्वानिभेषजा सर्वाण्यौषधानिसन्तीति मेमह्यंमन्त्रदर्शिनेमुनये सोमोदेवोऽब्रवीत् तथाविश्वशंभुवं सर्वस्यजगतः सुखकरमेतन्नामकंचाग्निंचाप्सुवर्तमानं सोमो-ऽब्रवीत् तथाचतैत्तिरीयाअग्नेस्त्रयोज्यायांसइत्यनुवाके—सोपःप्राविशदित्यग्नेरप्सुप्रवेशमामनन्ति लतागुल्मवृक्षमूलादीनामोषधीनां वृष्टिजन्यत्वेनजलवर्तित्वंप्रसिद्धं विश्वभेषजीः विश्वानिभे-षजानियासुतथाविधाआपोप्यब्रवीत्॥ भेषजा सुपांसुलुगित्याकारः। विश्वशं-

१ तै०सं. ५. ६. २.। २ तै० सं० १. ७. ३.। ३ तै० सं० २. ६. ६.।

भुवं भवतेरन्तर्भावितण्यर्थात्क्विप् व्यत्ययेनपूर्वपदप्रकृतिस्वरत्वं यद्वा विश्वेसर्वेपिव्यापाराः सुखकरायस्य बहुव्रीहौविश्वंसंज्ञामितिपूर्वपदान्तोदात्तत्वम्। आपः कर्मणिशसिप्राप्तेव्यत्ययेन जस् अप्तृन्नित्यादिनोपधादीर्घः। विश्वभेषजीः विश्वशंभुरितिवत्॥ २०॥

२०. सोम या चन्द्रमा ने मुझसे कहा है कि जल में औषध है, संसार को सुख देनेवाली अग्नि है और सब तरह की दवायें हैं।

एकविंशीमृचमाह—

आपः पृणीत भेषजं वरूथं तन्वे३ मम। ज्योक्च सूर्यं दृशे॥ २१॥

आपः। पृणीत। भेषजम्। वरूथम्। तन्वे। मम। ज्योक्। च। सूर्यम्। दृशे॥ २१॥

हेआपः ममतन्वेशरीरार्थंवरूथंरोगनिवारकंभेषजमौषधंपृणीतपूरयत किंच ज्योक्चिरं सूर्यंदृशेद्रष्टुं नीरोगावयंशक्तवामेतिशेषः॥ पृणीत पृपालनपूरणयोः लोण्मध्यमबहुवचनं थ त-स्य तस्थस्थमिपामितितादेशः क्र्यादिभ्यःश्ना प्वादीनांह्रस्वइतिह्रस्वः ईहल्यघोरितीत्वं ऋवर्णा-च्चेतिणत्वं सतिशिष्टस्वरबलीयस्त्वमन्यत्रविकरणेभ्यइतितिङ्स्वरःशिष्यते आपइत्यस्यामन्त्रि-तंपूर्वमविद्यमानवदित्यविद्यमानवत्त्वेपादादित्वान्निघाताभावः। वरूथं वृञ्वरणे जॄवृञ्भ्यांऊथन् नित्त्वादाद्युदात्तः। तन्वे ङितिह्रस्वश्चेतिनदीसंज्ञापाक्षिकीत्याडागमाभावः उदात्तयणोहल्-पूर्वादितिविभक्त्युदात्तत्वेप्राप्तेव्यत्ययेनोदात्तस्वरितयोरितिस्वरितत्वम्। दृशे दृशेविख्येचेति तुमर्थेनिपात्यते॥ २१॥

२१. हे जल! मेरे शरीर के लिए रोग-नाशक औषध पुष्ट करो, जिससे मैं बहुत दिन सूर्य को देख सकूँ।

पशौमार्जने इदमापःप्रवहतेत्येषाविनियुक्ता हुतायांवपायामितिखण्डेसूत्रितम्—इदमापः-प्रवहतेति। ऐषैवावभृथेष्टौस्नानेविनियुक्ता पत्नीसंयाजैश्चरित्वेतिखण्डे—इदमापःप्रवहतसुमित्र्या-नआपओषधयःसन्त्वितिसूत्रितम्।

तामेतांसूक्तेद्वाविंशीमृचमाह—

इदमापः प्र वहत यत्किं च दुरितं मयि। यद्वाहमभिदुद्रोह यद्वा शेप उतानृतम्॥ २२॥

इदम्। आपः। प्र। वहत। यत्। किम्। च। दुःऽइतम्। मयि। यत्। वा। अहम्। अभिऽदुद्रोह। यत्। वा। शेपे। उत। अनृतम्॥ २२॥

मयियजमानेयत्किंचदुरितं अज्ञानान्निष्पन्नं वा अथवा अहंयजमानःअभिदुद्रोहसर्वतोबुद्धिपूर्वकंद्रोहंकृतवानस्मि वा अथवा शेपेसाधुजनंशप्तवानस्मीतियदस्ति उतअपिच अनृतमुक्तवानितियंदस्तितदिदंसर्वमपराधजातं हेआपः प्रवहत मत्तोपनीयप्रवाहेणान्यतोनयत॥ मयि मपर्यन्तस्य त्वमावेकवचनेइतिमादेशेकृते अतोगुणेइतिपररूपेचसतियोचीतिदकारस्ययकारादेशः एकादेशस्वरेणमकारात्परस्याकारस्योदात्तत्वम्। दुद्रोह द्रुहजिघांसायां णलि गुणे द्विर्वचनहस्वहलादिशेषाः लितीतिप्रत्ययात्पूर्वस्योदात्तत्वं यद्वृत्तयोगान्निघाताभावः । शेपे शपआक्रोशे लिटि व्यत्ययेनतङ् उत्तमैकवचनमिट् टेरेत्वं अतएकहल्मध्येइत्येत्वाभ्यासलोपौ प्रत्ययस्वरेणान्त्योदात्तत्वं पूर्ववन्निघाताभावः॥ २२॥

२२. मुझमें जो कुछ दुष्कर्म है, मैंने जो कुछ अन्यायाचरण किया है, मैंने जो शाप दिया है और मैं जो झूठ बोला हूँ, हे जल! वह सब धो डालो।

पश्चादाहवनीयोपस्थाने आपोअद्यान्वचारिषमित्येषा मनोतायैसंमेषितइतिखण्डेसूत्रितम्—एत्योपतिष्ठन्तआपोअद्यान्वचारिषमिति ।

आपो॑अ॒द्यान्व॑चारिषं॒रसे॑न॒सम॑गस्महि । पय॑स्वानग्न॒आग॑हि॒तंमा॒सं सृ॑ज॒वर्च॑सा ॥ २३ ॥

आप॑ः । अ॒द्य । अनु॑ । अ॒चा॒रि॒ष॒म् । रसे॑न । सम् । अ॒ग॒स्म॒हि॒ ।
पय॑स्वान् । अग्ने॑ । आ । ग॒हि॒ । तम् । मा॒ । सम् । सृ॒ज॒ ।
वर्च॑सा ॥ २३ ॥

अद्यास्मिन्दिनेअवभृथार्थमापोऽन्वचारिषंजलान्यनुप्रविष्टोस्मिप्रविश्यचरसेनजलसारेणसमगस्महि संगतास्मः हेअग्ने पयस्वान् जलेवर्तमानत्वेन पयोयुक्तस्त्वं आगहि अस्मिन्कर्मण्यागच्छ तंमांतादृशंस्नानंमांवर्चसातेजसासंसृजसंयोजय॥ आपः कर्मणिशस्प्राप्तेव्यत्ययेनजस्। अचारिषं चरगत्यर्थः लुङि च्लेःसिच् आर्धधातुकस्येड्वलादेरितीट् नेटीतिवृद्धिप्रतिषेधेप्राप्ते तदपवादतया अतोल्रान्तस्येत्युपधायावृद्धिः । अगस्महि समोगम्यृच्छीत्यात्मनेपदं च्लेःसिच् मन्त्रेघसेत्यादिनाच्लेर्लुगभावश्छान्दसः एकाचउपदेशेनुदात्तादितीट्प्रतिषेधः वागमइतिसिचःकित्त्वादनुदात्तोपदेशेत्यादिनानुनासिकलोपः। गहि लोटिगमःसिपोहिः अपित्त्वेनङित्त्वादनुदात्तोपदेशेत्यादिनानुनासिकलोपः अतोहेरितिलुग्नभवति असिद्धवदत्राभाव इतिमलोपस्यासिद्धत्वात्॥ २३॥

२३. आज स्नान के लिए जल में पैठता हूँ, जल के सार से सम्मिलित हुआ हूँ । हे जल-स्थित अग्नि! आओ। मुझे तेज से परिपूर्ण करो ।

चतुर्विंशीमृचमाह—

संमाग्नेवर्चसासृजसंप्रजयासमायुंषा। विद्युर्मेअस्यदेवाइन्द्रोविद्या त्सहऋषिभिः ॥ २४ ॥ १२ ॥

सम्। मा। अग्ने। वर्चसा। सृज। सम्। प्रऽजया। सम्। आयुंषा। विद्युः। मे। अस्य। देवाः। इन्द्रः। विद्यात्। सह। ऋषिऽभिः ॥ २४ ॥ १२ ॥

हेअग्नेवर्चसाप्रजायुर्भिर्मां संसृजसंयोजय देवाःसोमपातारः अस्यमे यजमानस्य विद्युः अनुष्ठानंजानीयुः किञ्च इन्द्रश्चऋषिभिःऋषिगणैःसहममानुष्ठानंविद्यात्जानीयात् ॥ विद्युः विदज्ञाने लिङ्झेर्जुस् यासुट् लिङःसलोपइतिसकारलोपः उस्यपदान्तादितिपररूपत्वं यासुटउदात्तत्वेनैकादेशउकारोप्युदात्तः। अस्य इदमोन्वादेशइत्यशुउदात्तः विभक्तिरपिसुप्त्वेनानुदात्ता। सहऋषिभिरित्यत्र ऋत्यकइतिप्रकृतिभावः ॥ २४ ॥

२४. हे अग्नि! मुझे तेज, सन्तान और दीर्घायु दो, जिससे देवता लोग, इन्द्र और ऋषिगण मेरे अनुष्ठान को जान सकें।

इतिप्रथमस्यद्वितीयेद्वादशोवर्गः ॥ १२ ॥

इतिप्रथमेमण्डलेपञ्चमोनुवाकः ॥ ५ ॥

प्रथममण्डलस्यषष्ठेनुवाकेसप्तसूक्तानि तत्रकस्यनूनमितिपञ्चदशर्चंप्रथमंसूक्तं अजीगर्तपुत्रस्यशुनःशेपस्यार्षंत्रैष्टुभं अभित्वादेवेतितृचोगायत्रः आद्यायाअनिरुक्तत्वात्प्रजापतिर्देवता अग्नेर्वयमित्यस्यअग्निः अभित्वादेवेत्यस्यतृचस्यसविता भगभक्तस्येत्येषाभगदेवताकावा शेषावारुण्यः तथाचानुक्रान्तम्—कस्यपञ्चोनाजीगर्तिःशुनःशेपःसकृत्रिमोवैश्वामित्रोदेवरातोवारुणंतुत्रैष्टुभमाद्यौकाग्न्याग्नेय्यौसावित्रस्तृचोगायत्रोस्यान्त्याभागीवेति। राजसूयेभिषेचनीयेहनिमरुत्वतीयेपरिसमाप्तेसतिएतदादिकंसूक्तसप्तकमभिषिक्तस्यपुत्रादिभिःपरिवृतस्यराज्ञःपुरस्ताद्धोत्राख्यातव्यं तथाचसूत्रेभिहितम्—संस्थितेमरुत्वतीयेदक्षिणतआहवनीयस्यहिरण्यकशिपावासीनोभिषिक्तायपुत्रामात्यपरिवृतायराज्ञेशौनःशेपमाचक्षीतेति ब्राह्मणंचभवति—तदेतपरऋक्शतगाथंशौनःशेपमाख्यानंतद्धोताराज्ञेभिषिक्तायाचष्टे हिरण्यकशिपावासीनआचष्टे हिरण्यकशिपावासीनःप्रतिगृणातीति[1]।

---

१ ऐ० ब्रा० ७. १८.।

तस्मिन्सूक्ते प्रथमामृचमाह—

कस्यनूनंकतमस्यामृतानांमनामहेचारुदेवस्यनाम । कोनोमह्याअदितयेपुनर्दात्पितरंचदृशेयंमातरंच ॥ १ ॥

कस्य । नूनम् । कतमस्य । अमृतानाम् । मनामहे । चारु ।
देवस्य । नाम । कः । नः । मह्यै । अदितये । पुनः । दात् ।
पितरम् । च । दृशेयम् । मातरम् । च ॥ १ ॥

कस्येत्यनयर्चाशुनःशेपोयूपेबद्धःकांदिशीकः कंदेवमुपधावामीतिविचिकित्सति तथा चाम्नायते—हन्ताहंदेवताउपधावामीतिसप्रजापतिमेवप्रथमंदेवतानामुपससारेति । वयंशुनःशेपनामकाअमृतानां देवानांमध्येकतमस्यकिंजातीयस्यकस्यदेवस्यचारुशोभनंनाममनामहेउच्चारयामः नूनमितिविचिकित्सति कोदेवोनःअस्मान्सांमुमूर्षुंपुनरपिमह्यैमहत्यैअदितयेपृथिव्यैदावद्यात् तेनदानेनाहमप्यतःसन् पितरंचमातरंचदृशेयं पश्येयं कोवैनामप्रजापतिरितिश्रुतेः कस्येतिशब्दसामान्यादनयाप्रजापतिरेवोपसृतइतिगम्यते ॥ कतमस्य किंशब्दात् वाबहूनांजातिपरिप्रश्नेडतमच् चितइत्यन्तोदात्तत्वम् । अमृतानां नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वेप्राप्ते नञोजरमरमित्रमृताइत्युत्तरपदाद्युदात्तत्वम् । मनामहे मनज्ञाने व्यत्ययेनशप् पादादित्वादनिघातः । मह्यै उदात्तयणोहल्पूर्वात् इतिविभक्तेरुदात्तत्वम् । दात् गातिस्थेतिसिचोलुक् बहुलंछन्दस्यमाङ्योगेपीत्यडभावः । दृशेयं दृशिर्प्रेक्षणे आशीर्लिङि मिपोम् दृशेरग्वक्तव्यइतिअङ्प्रत्ययः शपोपवादः किञ्चाल्लघूपधगुणाभावः लिङ्याशिष्यङित्यङिहिसति ऋदृशोङिगुणइतिगुणःस्यात् यासुट् सुलोपः अतोयेयः आद्गुणः यासुटःस्वरेणैकारउदात्तः मातरंचेत्यत्रचशब्दात् दृशेयमित्यनुषज्यते अतस्तदपेक्षयैषातिङ्विभक्तिःप्रथमेतिचवायोगेति ननिहन्यते ॥ १ ॥

१. देवों में किस श्रेणी के किस देवता का सुन्दर नाम उच्चारण करूँ ? कौन मुझे फिर इस पृथिवी पर रहने देगा, जिससे मैं पिता और माता के दर्शन कर सकूँ ?

द्वितीयामृचमाह—

अग्नेर्वयंप्रथमस्यामृतानांमनामहेचारुदेवस्यनाम । सनोमह्याअदितयेपुनर्दात्पितरंचदृशेयंमातरंच ॥ २ ॥

अग्नेः । वयम् । प्रथमस्य । अमृतानाम् । मनामहे । चारु ।
देवस्य । नाम । सः । नः । मह्यै । अदितये । पुनः । दात् । पितरम् ।
च । दृशेयम् । मातरम् । च ॥ २ ॥

---

१ ऐ० ब्रा० ७. १६. । २ ऐ० ब्रा० ३. २१. ।

इत्थंप्रथमयर्चाविचिकित्सांकृत्वा प्रजापतेःसकाशात्तंदेवमग्निंनिश्चित्य अनयातुष्टाव। तथा-चश्रूयते—तंप्रजापतिरुवाचाग्निर्वैदेवानांनेदिष्ठस्तमेवोपधावेति सोग्निमुपससाराग्नेर्वयंप्रथमस्यामृतानामित्येतयर्चेति[1]। पूर्ववद्योजना दात् ददातु दृशेयं पश्यानीत्येवमाशीःपरत्वेनपदद्वयंयोज्यम्॥ २॥

२. देवों में पहले अग्नि का सुन्दर नाम लेता हूँ, वह मुझे इस विशाल पृथिवी पर रहने दें, ताकि मैं मा-बाप के दर्शन कर सकूँ।

प्रथमेछन्दोमेवैश्वदेवशस्त्रेअभित्वादेवसवितरितिसावित्रस्तृचःसूक्तस्थानीयः अथच्छन्दोमाइतिखण्डे—अभित्वादेवसवितःप्रेतांयज्ञस्यशंभुवेतिसूत्रितम्। अभित्वेत्येषाअग्निमन्थनेपिविनियुक्ता प्रातर्वैश्वदेव्यामितिखण्डे—अभित्वादेवसवितर्मही द्यौःपृथिवीचनइतिसूत्रितम् श्रूयते च—अभित्वादेवसवितरितिसावित्रीमन्वाहेति। तथाप्रवर्ग्येप्येषैवविनियुक्ता अथोत्तरइतिखण्डे-अभित्वादेवसवितःसमीवत्संनमातृभिरितिसूत्रितं तथाग्रावस्तोत्रेपिएतस्मिन्कालेग्रावस्तुदितिखण्डे—मध्यमस्वरेणेदंसवनमभित्वादेवसवितरितिसूत्रितम्।

तामेतांसूक्तेतृतीयामृचमाह—

अभित्वादेवसवितरीशानंवार्याणाम्। सदावन्भागमीमहे ॥ ३ ॥

अभि। त्वा। देव। सवितः। ईशानम्। वार्याणाम्। सदा। अवन्। भागम्। ईमहे॥ ३॥

अथाग्निनाप्रेरितः सन्सवितारमभित्वेत्यनेनतृचेनप्रार्थयते तथैवश्रूयते—तमग्निरुवाचसवितावैप्रसवानामीशेतमेवोपधावेतिससवितारमुपससाराभित्वादेवसवितरित्येतेनतृचेनेति[2]।हेसदाअवन् सदा सर्वदारक्षक हेसवितर्देव वार्याणांवरणीयानांधनानामीशानंस्वामिनं त्वात्वांप्रतिभागंभजनीयं धनंअभिसर्वतईमहेयाचामहे ॥ ईशानं ईशऐश्वर्ये लटःशानच् तास्यनुदात्तेदिल्सार्वधातुकानुदात्तत्वेधातुस्वरः। वार्याणां वृङ्संभक्तौ ऋहलोर्ण्यत् ईडवन्देत्यादिनाआद्युदात्तत्वम्। अवन् आमन्त्रितनिघातः। भागंकर्षात्वतइतिघञोन्तउदात्तः॥ ३॥

३. हे सर्वदा त्राता सूर्य! तुम श्रेष्ठ धन के स्वामी हो; इसलिए तुम्हारे पास उपभोग करने योग्य धन की याचना करता हूँ।

यश्चिद्धितइत्थाभगःशशमानःपुरानिदः। अद्वेषोहस्तयोर्दधे ॥ ४ ॥

यः। चित्। हि। ते। इत्था। भगः। शशमानः। पुरा। निदः। अद्वेषः। हस्तयोः। दधे॥ ४॥

---

१ ऐ० ब्रा० ७. १६.। २ ऐ० ब्रा० ७. १६.।

हेसवितर्योभगोभजनीयोधनविशेषस्तेतवहस्तयोर्दधे धृतोभुव तंधनविशेषं ईमहे इतिपूर्वान्वयः चिच्छब्दःपूजार्थे हिशब्दःप्रसिद्धौ धनस्यपूज्यत्वंसर्वत्रप्रसिद्धं तामेवपूज्यत्वप्रसिद्धिं विशदयति—इत्थाशशमानः अनेनप्रकारेणशस्यमानःस्तूयमानः धनस्तुतिप्रकारंचसर्वेजानन्ति ननुस्वकीयेधनेवैरिभिरपहृतेसतिवैरिगृहीतंधनंसर्वोलोकोनिन्दतिद्वेष्टिच अतोधनस्तुतिर्ननियतेत्याशंक्याह निदःपुरा अद्वेषः निन्दायाःपूर्वंस्वकीयत्वेनव्यवस्थितेसतितदानींद्वेषरहितः तस्मात्स्वकीयत्वाभिप्रायेणस्तूयमानत्वमुक्तमित्यर्थः॥ इत्था प्रकारवचनेइदमस्थमुः एतेतौरथोरितिइदमइव सुपांसुलुगितिव्यत्ययेनविभक्तेर्डादेशः टिलोपेउदात्तनिवृत्तिस्वरेण आकारउदात्तः. शशमानः शशप्लुतगतौ इहतुस्तुत्यर्थः ताच्छील्यवयोवचनेतिताच्छीलिकश्चानश् कर्तरिशप् चितइत्यन्तोदात्तत्वम्। निदः णिदिकुत्सायां संपदादिलक्षणःक्विप् नुमभावश्छान्दसः सावेकाचइतिपञ्चम्याउदात्तत्वम् । अद्वेषः नविद्यते द्वेषोस्येतिबहुव्रीहौनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्। दधे कर्मणिलिट् तस्यआर्धधातुकत्वेनअभ्यस्तानामादिरित्याद्युदात्तोनभवति तेनप्रत्ययस्वरएवशिष्यते यद्वृत्तयोगान्निघाताभावः॥ ४ ॥

४. प्रशंसित, निन्दा-शून्य, द्वेष-रहित और सम्भोग-योग्य धन को तुम दोनों हाथों में धारण किये हुए हो।

भगभक्तस्यतेवयमुदशेमतवावसा । मूर्धानंरायआरभे ॥ ५ ॥ १२ ॥

भगऽभक्तस्य । ते । वयम् । उत् । अशेम । तव । अवसा ।
मूर्धानम् । रायः । आऽरभे ॥ ५ ॥ १२ ॥

हेसवितः तेत्वदीयावयंशुनःशेपनामानः भगभक्तस्यधनेनसंयुक्तस्य तवावसारक्षणेन उदशेम उत्कर्षेणव्यामुमः किंकर्तुं रायोधनस्यमूर्धानं उत्कर्षमारभे मारब्धुं धनिकत्वप्रसिद्ध्याव्याप्ताभूयामेत्यर्थः ॥ भगशब्दोवृषादित्वादाद्युदात्तः तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरत्वम्। अशेम अशूव्याप्तौ लुङि व्यत्ययेनपरस्मैपदं शप्।रायः ऊडिदमितिषष्ठ्याउदात्तत्वम्। आरभेकृत्यार्थेतवैकेनिति तुमर्थेकेन्प्रत्ययः नित्स्वरेणाद्युदात्तत्वम्॥ ५॥

५. सूर्यदेव! तुम धनशाली हो, तुम्हारी रक्षा-द्वारा धन की उन्नति करने में लगे रहते हैं।

इतिप्रथमस्यद्वितीयेद्वादशोवर्गः॥ १२ ॥

षष्ठीमृचमाह—

नहितेक्षत्रंनसहोनमन्युंवयश्चनामीपतयन्तआपुः । नेमाआपोअनिमिषंचरन्तीर्नयेवातस्यप्रमिनन्त्यभ्वम्॥ ६ ॥

नहि । ते । क्षत्रम् । न । सहः । न । मन्युम् । वयः । चन । अमी इति ।
पतयन्तः । आपुः । न । इमाः । आपः । अनिऽमिषम् ।
चरन्तीः । न । ये । वातस्य । प्रऽमिनन्ति । अभ्वम् ॥ ६ ॥

अथसविश्वामित्रेरितःशुनःशेपएतदादिसूक्तशेषेणोत्तरेणचसूक्तेनवरुणंतुष्टाव तथाचश्रूयते—तंसवितोवाचवरुणायवैराज्ञेनियुक्तोसितमेवोपधावेतिसवरुणंराजानमुपससारातउत्तराभिरेकत्रिंशतेति[1] । हेवरुण पतयन्तः मौढेवियत्युत्पतन्तः अमीदृश्यमानाःवयश्चन श्येनादयःपक्षिणोपितेक्षत्रंत्वदीयंशरीरबलं नह्यापुःनैवमाप्ताः त्वत्सदृशंशरीरबलंपक्षिणामपिनास्तीत्यर्थः तथासहः त्वदीयंपराक्रमंतवसामर्थ्यमपिनमापुः तथामन्युंत्वदीयंकोपमपिनमापुः त्वयिक्रुद्धेसति सोढुमशक्ताइत्यर्थः अनिमिषंसर्वदाचरन्तीः प्रवाहरूपेणगच्छन्त्यइमाआपःत्वदीयंबलंनमापुः वातस्यवायोर्येगतिविशेषाः त्वदीयमभ्वंवेगंनप्रमिनन्तिनाहिंसन्ति अतिक्रमंकर्तुंनशक्ताइत्यर्थः तेपिनमापुरितिपूर्वत्रान्वयः ॥ पतयन्तः पतगतौचुरादिरदन्तः लटःशतृ शप् गुणायादेशौ अदुपदेशाल्लसार्वधातुकानुदात्तत्वेणिचःस्वरः । आपुः आप्लृव्याप्तौ लिटिचुसि द्विर्भावहलादिशेषौ अतआदेरित्यात्वं अत्रनसहोनमन्युमित्यादिभिरापुरित्यस्यसंबन्धात् तदपेक्षयाप्राथम्याच्चादिलोपे विभाषेतिप्रथमातिङ्विभक्तिर्ननिहन्यते । चरन्तीः वाच्छन्दसीतिपूर्वसवर्णदीर्घः । प्रमिनन्ति मीञ्हिंसायां क्र्यादिभ्यःश्ना श्नाभ्यस्तयोरातइत्याकारलोपः मीनातेर्निगमेइतिह्रस्वत्वं प्रत्ययस्वरः तिङ्चोदात्तवतीतिगतिरनुदात्तः यद्वृत्तयोगादनिघातः ॥६॥

६. वरुणदेव! ये उड़नेवाली चिड़ियाँ तुम्हारे समान बल और पराक्रम नहीं प्राप्त कर सकीं। तुम्हारे सदृश इन्होंने क्रोध भी नहीं प्राप्त किया। निरन्तर विहरण-शील जल और वायु की गति भी तुम्हारे वेग को नहीं लाँघ सकी।

अबुध्नेराजावरुणोवनस्योर्ध्वंस्तूपंददतेपूतदक्षः । नीचीनाःस्थुरुपरिबुध्नएषामस्मेअन्तर्निहिताःकेतवःस्युः ॥ ७ ॥

अबुध्ने । राजा । वरुणः । वनस्य । ऊर्ध्वम् । स्तूपम् । ददते ।
पूतऽदक्षः । नीचीनाः । स्थुः । उपरि । बुध्नः । एषाम् । अस्मे इति ।
अन्तः । निऽहिताः । केतवः । स्युरिति स्युः ॥ ७ ॥

पूतदक्षः शुद्धबलोवरुणोराजाअबुध्नेमूलरहितेन्तरिक्षेतिष्ठन् वनस्यवननीयस्यतेजसःस्तूपंसंघं ऊर्ध्वमुपरिदेशेददते धारयति नीचीनाःस्थुः ऊर्ध्वदेशेवर्तमानस्यवरुणस्यरश्मयइत्य-

1 ऐ० ब्रा० ७. १६.

ध्याहार्यं तेह्यधोमुखास्तिष्ठन्ति एषांरश्मीनांबुध्नोमूलंउपरितिष्ठतीतिशेषः तथासतिकेतवः प्रज्ञापकाःप्राणाः अस्मेअस्मास्वन्तर्निहिताः स्थापिताःस्युः मरणंनभविष्यतीत्यर्थः ॥ अबुध्ने नविद्यतेबुध्नोमूलमस्येतिबहुव्रीहौनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । स्तूपं स्त्यैशब्दसंघातयोः स्त्यःसंप्रसारणमूञ्चेतिपप्रत्ययः तत्सन्नियोगेनयकारस्यसंप्रसारणं परपूर्वत्वं ऊकारादेशश्च निदित्यनुवृत्तेराद्युदात्तत्वम् । ददते भौवादिकः । नीचीनाः निपूर्वादञ्चतेर्ऋत्विगित्यादिनाक्विन् अनिदितामितिनलोपः न्यच्शब्दात्स्वार्थे विभाषाञ्चेरदिक्स्त्रियामितिखः आयन्नित्यादिनातस्यईनादेशः आयन्नादिषूपदेशिवद्वचनंस्वरसिद्ध्यर्थमितिवचनादीकारउदात्तः अचइत्यकारलोपे चाविंतिदीर्घत्वम् । स्थुः गातिस्थेत्यादिनासिचोलुक् आतइतिझेर्जुसादेशः उस्यपदान्तादितिपररूपत्वं बहुलंछन्दस्यमाङ्योगेपीत्यडभावः ।अस्मे सुपांसुलुगितिसप्तम्याःशे आदेशः । निहिताः गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम् । स्युः अस्तेर्लिङिश्नसोरल्लोपः॥७॥

७. पवित्र-बलशाली वरुण आदि-रहित अन्तरिक्ष में रहकर श्रेष्ठ तेजः-पुञ्ज को ऊपर ही धारण करते हैं। तेजः-पुञ्ज का मुख नीचे और मूल ऊपर है। उसी के द्वारा हमारे प्राण स्थिर रहते हैं।

अष्टमीमृचमाह—

उरुंहिराजावरुणश्चकारसूर्यायपन्थामन्वेतवाउ । अपदेपादाप्रतिधातवेक रुतापवक्ताहृदयाविधश्चित् ॥ ८ ॥

उरुम् । हि । राजा । वरुणः । चकार । सूर्याय । पन्थाम् ।
अनुऽएतवै । ऊम् इति । अपदे । पादा । प्रतिऽधातवे । अकः ।
उत । अपऽवक्ता । हृदयऽविधः । चित् ॥ ८ ॥

वरुणोराजासूर्यायसूर्यस्यपन्थांमार्गंउरुंविस्तीर्णं चकार हिशब्दःप्रसिद्धौ उत्तरायणदक्षिणायनमार्गस्यविस्तारःप्रसिद्धः किमर्थमेवंकृतवानितितदुच्यते—अन्वेतवाउ अनुक्रमेणोदयास्तमयौगन्तुमेव तथा अपदे पादरहितेन्तरिक्षे पादाप्रतिधातवे पादौप्रक्षेप्तुं अकःमार्गंकृतवान् पूर्वत्ररथस्यमार्गः अत्रपादयोरितिविशेषः यद्वा अपदेयूपेबद्धेनमयागंतुमशक्येभूप्रदेशे पादौ प्रक्षेप्तुमुपायंबन्धविमोचनरूपंकरोत्वित्यर्थः उतअपिच हृदयाविधश्चित् शत्रोरपिअपवक्ता अपवदिता निराकर्ताभवतु ॥ चकार लित्स्वरेणआकारउदात्तः हिचेतिनिघातप्रतिषेधः । पन्थां पथिमथ्यृभुक्षामादितिद्वितीयायामपिव्यत्ययेनात्वं पथिन्शब्दस्य पतस्थचेतिनिप्रत्ययान्तत्वेन अन्तोदात्तत्वेप्राप्ते-पथिमथोःसर्वनामस्थानेइत्याद्युदात्तत्वम् । अन्वेतवै अनुपूर्वादेतेस्तुमर्थे सेसेनसेनिति तवैप्रत्ययःतवैचान्तश्चयुगपत् इत्याद्यन्तयोरुदात्तत्वम् ।पादा सुपांसुलुगित्याकारः।

प्रतिधातवे दधातेस्तुमर्थेइतिसूत्रेणैवतवेन्प्रत्ययः तादौचनितीतिगतेःप्रकृतिस्वरत्वम् । अकः करोतेश्छन्दसिलुङ्लङ्लिटइतिलोडर्थेलङ् तस्यतिप् मन्त्रेघसेत्यादिना च्लेर्लुक् गुणोरपरत्वं हल्ङ्याब्भ्यइतितिपोलोपः अडागमः । हृदयाविधः हृञ्हरणे वृहोःषुक्दुकौचेति कयन् व्यधताडने क्विप् नहिवृतीत्यादिनापूर्वपदस्यदीर्घत्वं कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ ८ ॥

८. देवराज वरुण ने सूर्य के उदय और अस्त के गमन के लिए सूर्य के पथ का विस्तार किया है। पाद-रहित अन्तरिक्ष-प्रदेश में सूर्य के पाद-विक्षेप के लिए वरुण ने मार्ग दिया है। वे वरुणदेव मेरे हृदय का वेध करनेवाले शत्रु का निराकरण करें।

श॒तंते॑राजन्भि॒षजः॑स॒हस्र॑मु॒र्वीग॑भी॒रासु॑म॒तिष्टे॑अस्तु । बाध॑स्व दू॒रेनिर्ऋ॑तिंपरा॒चैः कृ॒तंचि॒देनः॒प्रमु॑मुग्ध्य॒स्मत् ॥ ९ ॥

श॒तम् । ते॒ । रा॒ज॒न् । भि॒षजः॑ । स॒हस्र॑म् । उ॒र्वी । ग॒भी॒रा । सु॒ऽम॒तिः । ते॒ । अ॒स्तु॒ । बाध॑स्व । दू॒रे । निःऽऋ॑तिम् । प॒रा॒चैः । कृ॒तम् । चि॒त् । एनः॑ । प्र । मु॒मु॒ग्धि॒ । अ॒स्मत् ॥ ९ ॥

हेराजन्वरुण तेतवशतंभिषजः सहस्रंबन्धनिवारकाणि शतसहस्रसंख्याकान्योषधानि वैद्यावासन्ति तेतवसुमतिरस्मदनुग्रहबुद्धिः उर्वीविस्तीर्णागभीरागांभीर्योपेतास्थिरास्तु निर्ऋतिमस्मदनिष्टकारिणींनिर्ऋतिंपापदेवतां पराचैः पराङ्मुखांकृत्वा दूरेअस्मत्तोव्यवहितेदेशे स्थापयित्वा तांबाधस्व कृतंचित् अस्माभिरनुष्ठितमपिएनःपापं अस्मत्तःप्रमुमुग्धिप्रकर्षेणमुक्तं नष्टंकुरु ॥ सुमतिः तादौचेतिपूर्वपदप्रकृतिस्वरत्वेप्राप्ते मन्क्तिन्नित्यादिनोत्तरपदान्तोदात्तत्वं संहितायांविसर्जनीयसकारस्ययुष्मत्तत्ततक्षुष्वन्तःपादमितिषत्वम् । बाधस्व बाधृविलोडने शपःपित्वादनुदात्तत्वं तिङश्चलसार्वधातुकस्वरेणधातुस्वरएवशिष्यते । निर्ऋतिं तादौचेतिगतेःप्रकृतिस्वरत्वम् । मुमुग्धि मुचॢमोक्षणे बहुलंछन्दसीतिश्लुः हुझल्भ्योहेर्धिः तस्यापित्त्वेनङित्त्वाद्गुणाभावः चोःकुरितिकुत्वम् ॥ ९ ॥

९. वरुणराज! तुम्हारी सैकड़ों-हजारों ओषधियाँ हैं, तुम्हारी सुमति विस्तीर्ण और गम्भीर हो। निर्ऋतिया पाप देवता को विमुख करके दूर रक्खो। हमारे किये हुए पाप से हमें मुक्त करो।

अ॒मीय ऋक्षा॒निहि॑तास उ॒च्चानक्तं॒ददृ॑श्रे॒कुह॑चि॒द्दिवे॑युः । अद॑ब्धानि॒ वरु॑णस्यव्र॒तानि॑वि॒चाक॑शच्च॒न्द्रमा॒नक्त॑मेति ॥ १० ॥ १४ ॥

अ॒मी इति॑ । ये । ऋक्षाः॑ । निऽहि॑तासः । उ॒च्चा । नक्त॑म् । ददृ॑श्रे । कुह॑ । चि॒त् । दिवा॑ । ई॒युः॒ । अद॑ब्धानि । वरु॑णस्य । व्र॒तानि॑ । वि॒ऽचाक॑शत् । च॒न्द्रमाः॑ । नक्त॑म् । ए॒ति॒ ॥ १० ॥ १४ ॥

अमीरात्रावस्माभिर्दृश्यमाना ऋक्षाःसप्तऋषयः तथाचवाजसनेयिनआमनन्ति—ऋक्षा-इतिहस्मवैपुरासप्तऋषीनाचक्षतइति । यद्वा ऋक्षाःसर्वेपिनक्षत्रविशेषाः ऋक्षाःस्तृभिरितिनक्ष-त्राणामितियास्केनोक्तत्वात्। उच्चा उच्चैरुपरिमदेशे निहितासः स्थापितायेसन्तितेऋक्षाःनक्तं रात्रौददृश्रे सर्वैरपिदृश्यन्ते दिवाअहनिकुहचित् ईयुःक्वापिगच्छेयुः नदृश्यन्तइतिभावः वरुण-स्यराज्ञोव्रतानिकर्माणिनक्षत्रदर्शनादिरूपाणिअदब्धानिकेनाप्यहिंसितानि किञ्च वरुणस्याज्ञयै-वचन्द्रमा नक्तंरात्रौ विचाकशद्विशेषेणदीप्यमानएतिगच्छति ॥ निहितासः आज्जसेरसुक् था-थादिस्वरेणोत्तरपदान्तोदात्तत्वेप्राप्ते गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम्। ददृश्रे दृशेर्लिटि इरयो-रे इतिरेआदेशः व्यत्ययेनाद्युदात्तत्वं यद्वृत्तयोगादनिघातः ।कुह वाहचच्छन्दसीतिकिंश-ब्दादुत्तरस्यत्रलोहादेशः कुतिहोः इतिकिंशब्दस्यकुआदेशः स्थानिवद्भावाल्लित्स्वरेणाद्युदात्त-त्वम् । विचाकशत् कशेर्दीप्त्यर्थाद्यङ्लुगन्ताच्छतृप्रत्ययः अभ्यस्तानामादिरित्याद्युदात्तत्वं समासेकृत्स्वरः यद्वा काशतेर्वाव्यत्ययेनोपधाह्रस्वत्वम् । चन्द्रमाः चन्द्रेमोडिदितिअसिप्रत्ययः कृदुत्तरपदप्रकृतिस्वरत्वेप्राप्ते दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वम्.॥ १० ॥

१०. ये जो सप्तर्षि नक्षत्र हैं, जो ऊपर आकाश में संस्थापित हैं और रात्रि आने पर दिखाई देते हैं, दिन में कहाँ चले जाते हैं ? वरुणदेव की शक्ति अप्रतिहत है। उनकी आज्ञा से रात्रि में चन्द्रमा प्रकाशमान होते हैं।

इतिप्रथमस्यद्वितीयेचतुर्दशोवर्गः ॥ १४ ॥

एकादशिनस्यवारुणस्यपशोर्वपापुरोडाशयोस्तत्त्वायामीतिद्वेऋचौयाज्ये सूत्रितंच—त-त्त्वायामिब्रह्मणावन्दमानइतिद्वे अस्तभ्नाद्यामिति वरुणप्रघासेषुवरुणस्यहविषोयाज्या तत्त्वा-यामीत्येषा पञ्चम्यांपौर्णमास्यामित्यत्रसूत्रितम्—इमंमेवरुणश्रुधितत्त्वायामिब्रह्मणावन्दमानइति।

तामेतांसूक्ते एकादशीमृचमाह—

तत्त्वा॑यामि॒ब्रह्म॑णा॒वन्द॑मान॒स्तदाशा॑स्ते॒यज॑मानो॒ह॒विर्भिः॑। अहे॑ळ मानोवरुणे॒ह॒बो॒ध्यु॒रुशं॑स॒मान॒आयुः॒प्रमो॑षीः ॥ ११ ॥

तत्। त्वा॒। या॒मि॒। ब्रह्म॑णा। वन्द॑मानः। तत्। आ। शा॒स्ते॒। यज॑मानः। ह॒विःऽभिः॑। अहे॑ळमानः। व॒रु॒ण॒। इ॒ह। बो॒धि॒। उरु॑ऽशंस। मा। नः॒। आयुः॑। प्र। मो॒षीः॒ ॥ ११ ॥

हेवरुण मुमूर्षुरहंत्वात्वांप्रतितदायुर्यामियाचे कीदृशः ब्रह्मणामौढेनस्तोत्रेणवन्दमानः स्तु-वन् सर्वत्रयजमानोपिहविर्भिस्तदायुराशास्तेप्रार्थयते त्वंचेहकर्मणिअहेळमानः अनादरम-

१ नि० ३. २. । २ गतिकारकयोरितिपूर्वसूत्रात्पूर्वपदप्रकृतिस्वरत्वमनुवर्तते तेनपूर्व-पदप्रकृतिस्वरः । ३ ब्रह्मणावन्दमानःवेदेनाभिष्टवानः ।

कुर्वन् बोधिअस्मदपेक्षितंबुध्यस्व हेउरुशंसबहुभिःस्तुत्य नोस्मदीयमायुः मामप्रमोषीः प्रमुषितं माकुरु सप्तदशसंख्याकेषुयाज्ञाकर्मस्वीमहेयामीतिपठितं चाशब्दलोपश्छान्दसः ॥ अहेळमानः हेडूअनादरेअदुपदेशाल्लसार्वधातुकानुदात्तत्वे शपश्चपित्त्वादनुदात्तत्वेसतिधातुस्वरःशिष्यते ततोनञ्समासेअव्ययपूर्वपदप्रकृतिस्वरत्वम्। बोधि बुधअवगमने लोटःसेर्हिः बहुलंछन्दसीतिविकरणस्यलुक् वाछन्दसीत्यपित्त्वाभावेनङित्त्वाभावाल्लघूपधगुणः हुझल्भ्योहेर्धिरितिहेर्धिरादेशः धातोरन्त्यलोपश्छान्दसः। मोषीः मुषस्तेये लोडर्थेछान्दसोलुङ् वदव्रजेतिप्राप्तायावृद्धेर्नेटीतिप्रतिषेधेसतिलघूपधगुणः बहुलंछन्दस्यमाङ्योगेपीत्यडभावः ॥ ११ ॥

११. मैं स्तोत्र से तुम्हारी स्तुति कर तुम्हारे पास वही परमायु माँगता हूँ। हव्य-द्वारा यजमान भी उसे ही पाने की प्रार्थना करता है। वरुण ! तुम इस विषय में उदासीन न होकर ध्यान दो। तुम अनन्त जीवों के प्रार्थना-पात्र हो। मेरी आयु मत लो।

तदिन्नक्तंतद्दिवामह्यमाहुस्तदयंकेतोहृदआविचष्टे । शुनःशेपोयमह्वद्गृभीतःसोअस्मान्राजावरुणोमुमोक्तु ॥ १२ ॥

तत् । इत् । नक्तम् । तत् । दिवा । मह्यम् । आहुः । तत् । अयम् । केतः । हृदः । आ । वि । चष्टे । शुनःशेपः । यम् । अह्वत् । गृभीतः । सः । अस्मान् । राजा । वरुणः । मुमोक्तु ॥ १२ ॥

तदित्तदेववरुणस्यविषयंस्तोत्रंनक्तंरात्रौमह्यंशुनःशेपायआहुः कर्तव्यत्वेनअभिज्ञाःकथयन्ति तथादिवापितदेवाहुः हृदोमदीयमनसोनिष्पन्नोयंकेतः प्रज्ञाविशेषोपितदेवकर्तव्यत्वेनाविचष्टेसर्वतोविशेषेणप्रकाशयति गृभीतः गृहीतोयूपेबद्धः शुनःशेपएतन्नामकोजनः यंवरुणमह्वत् आहूतवान्सचवरुणोराजाअस्मान्शुनःशेपान् मुमोक्तु बन्धाद्मुक्तान्करोतु ॥ मह्यं ङयिचेत्याद्युदात्तत्वम्। आहुः ब्रुवःपञ्चानामितिब्रूञोलटिझेरुसादेशः धातोराहादेशश्च ।- हृदः पद्न्नित्यादिनाहृदयशब्दस्यहृदादेशः ऊडिदंपदादितिपञ्चम्याउदात्तत्वम्। शुनःशेपःशुनइवशेपोयस्येतिसमासे शुनःशेपपुच्छलाङ्गूलेषुसंज्ञायांषष्ठ्याअलुग्वक्तव्यइत्यलुक् पूर्वपदप्रकृतिस्वरत्वेप्राप्ते उभेवनस्पत्यादिष्वितिपूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम्।अह्वत् ह्वेञोलुङि लिपिसिचिह्वश्चेतिच्लेरङादेशः आतोलोपइटिचेत्याकारलोपः अडागमउदात्तः यद्वृत्तयोगादनिघातः हिचेतिनिघातप्रतिषेधः। गृभीतः ह्रग्रहोर्भइतिभत्वं सोअस्मान् प्रकृत्यान्तःपादमितिप्रकृतिभावः। मुमोक्तु बहुलंछन्दसीतिविकरणस्यश्लुः ॥ १२ ॥

१२. दिन और रात, सदा लोग में मुझसे ऐसा ही कहा गया है। मेरा हृदयस्थ ज्ञान भी यही गवाही देता है कि, आबद्ध होकर शुनःशेप ने जिस वरुण का आह्वान किया था, वही वरुणराज हम लोगों को मुक्तिदान करें।

त्रयोदशीमृचमाह—

शुनःशेपोह्यह्वद्गृभीतस्त्रिष्वादित्यंद्रुपदेषुबद्धः। अवैनंराजावरुणः ससृज्याद्विद्वाँअदब्धोविमुमोक्तुपाशान् ॥ १३ ॥

शुनःशेपः। हि। अह्वत्। गृभीतः। त्रिषु। आदित्यम्। द्रुऽपदेषु। बद्धः। अव। एनम्। राजा। वरुणः। ससृज्यात्। विद्वान्। अदब्धः। वि। मुमोक्तु। पाशान्॥ १३ ॥

गृभीतोबन्धनायगृहीतः त्रिषुत्रिसंख्याकेषुद्रुपदेषु द्रोःकाष्ठस्ययूपस्यपदेषुप्रदेशविशेषेषुबद्धःशुनःशेपआदित्यमदितेःपुत्रंयंवरुणं अह्वत् आहूतवान् हियस्मादेवंतस्मात् सवरुणोराजाएनंशुनःशेपमवससृज्यात् अवसृष्टं बन्धनाद्विमुक्तंकरोतु विमोकप्रकारएवस्पष्टीक्रियते—विद्वान् विमोकप्रकाराभिज्ञः अदब्धः केनाप्यहिंसितोवरुणःपाशान्बन्धनरज्जुविशेषान् विमुमोक्तु विच्छिद्यैनंमुक्तंकरोतु ॥ त्रिषु षट्त्रिचतुर्भ्योहलादिरितिविभक्तेरुदात्तत्वं संहितायां उदात्तस्वरितयोर्यणइतिपरआकारःस्वर्यते। ससृज्यात् सृजविसर्गे प्रार्थनायांलिङ् बहुलंछन्दसीतिविकरणस्यश्लुः। विद्वान् विदज्ञाने विदेःशतुर्वसुः उगिदचामितिनुम् हल्ङ्याब्भ्योदीर्घादितिसुलोपः संयोगान्तलोपौ संहितायां दीर्घादटिसमानपादेइतिनकारस्यरुत्वं आतोटिनित्यमितिसानुनासिकआकारः। अदब्धः दंभुदंभे निष्ठायामनिदितामितिनलोपेझषस्तथोर्धोधइतिधत्वं अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥ १३ ॥

१३. शुनःशेप ने घृत और तीन काठों में आबद्ध होकर अदिति के पुत्र वरुण का आह्वान किया था; इसी लिए विद्वान् और दयालु वरुण ने शुनःशेप को मुक्त किया था, उनका बन्धन छुड़ा दिया था।

अवभृथेअवतेहेळइतिद्वेऋचौवरुणस्यहविषोयाज्यानुवाक्ये पत्नीसंयाजैश्चरित्वेतिखण्डे सूत्रितम्—अवतेहेळोवरुणनमोभिरिति।

तयोराद्यांसूक्तेचतुर्दशीमृचमाह—

अवतेहेळोवरुणनमोभिरवयज्ञेभिरीमहेहविर्भिः। क्षयन्नस्मभ्यमसुरप्रचेताराजन्नेनांसिशिश्रथःकृतानि ॥ १४ ॥

अव। ते। हेळः। वरुण। नमःऽभिः। अव। यज्ञेभिः। ईमहे। हविःऽभिः। क्षयन्। अस्मभ्यम्। असुर। प्रचेत इति प्रऽचेतः। राजन्। एनांसि। शिश्रथः। कृतानि ॥ १४ ॥

हेवरुणतेतवहेळःक्रोधं नमोभिः नमस्कारैः अवेमहे अवनयामः तथा यज्ञेभिः यज्ञैः सांगानुष्ठानेनपूज्यैर्हविर्भिः अवेमहे वरुणंपरितोष्यक्रोधमपनयामः हेअसुरअनिष्टक्षेपणशीलप्रचेतः प्रकर्षेणप्रज्ञायुक्तराजन्दीप्यमानवरुण अस्मभ्यं अस्मदर्थं क्षयन् अस्मिन् कर्मणिनिवसन् कृतानिअस्माभिरनुष्ठितानि एनांसिपापानि शिश्रथः श्रथितानिशिथिलानिकुरु ॥ हेळः असुनोनित्स्वादाद्युदात्तत्वम् । यज्ञेभिः बहुलंछन्दसीत्यैसभावः । ईमहे ईङ्गतौविकरणस्यलुक् । क्षयन् क्षिनिवासगत्योः लटःशतृ व्यत्ययेनशप् आमन्त्रिताद्युदात्तत्वम् । असुर असेरुरन् आमन्त्रितनिघातः । शिश्रथः श्रथदौर्बल्येचुरादिरदन्तः छान्दसेलुङि णिश्रिद्रुस्रुभ्यइतिच्लेश्चङ् द्विर्भावहलादिशेषौअग्लोपित्वात्सन्वद्भावाभावेपि बहुलंछन्दसीत्यभ्यासस्येत्वं पूर्ववदडभावः॥१४॥

१४. वरुण ! नमस्कार करके हम तुम्हारे क्रोध को दूर करते हैं और यज्ञ में हव्य देकर भी तुम्हारा क्रोध दूर करते हैं। हे असुर ! प्रचेतः ! राजन् ! हमारे लिए इस यज्ञ में निवास करके हमारे किये हुए पाप को शिथिल करो।

उदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमंश्रथाय । अथावयमादित्यव्रतेतवानागसोअदितयेस्याम ॥ १५ ॥ १५ ॥

उत् । उत्ऽतमम् । वरुण । पाशम् । अस्मत् । अव । अधमम् ।
वि । मध्यमम् । श्रथय । अथ । वयम् । आदित्य । व्रते ।
तव । अनागसः । अदितये । स्याम ॥ १५ ॥ १५ ॥

हेवरुणउदुत्तममुत्कृष्टंशिरसिबद्धंपाशं अस्मत् अस्मत्तः उच्छ्रथाय उत्कृष्यशिथिलंकुरु अधमंनिकृष्टंपादेअवस्थितंपाशंअवश्रथायअवज्ञाय अधस्तादवकृष्य शिथिलीकुरु मध्यमंनाभिप्रदेशगतंपाशं विश्रथाय वियुज्यशिथिलीकुरु अथानन्तरं हेआदित्यअदितेः पुत्रवरुण वयंशुनःशेपाः तवव्रते त्वदीयेकर्मणिअदितयेखण्डनराहित्याय अनागसःअपराधरहिताः स्यामभवेम ॥ उत्तमं तमपःपित्त्वादनुदात्तत्वेनआद्युदात्तत्वेप्राप्ते उत्तमशश्वत्तमौसर्वत्रेत्युञ्छादिषुपाठादन्तोदात्तत्वम् । अधमं अवद्यावमाधमार्वरेफाःकुत्सितेइतिअवतेरमच् वस्य धः । श्रथाय श्रथदौर्बल्ये संहितायांछान्दसोदीर्घः ।तव युष्मदस्मदोर्ङसीत्याद्युदात्तत्वम् । अनागसः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वं नञ्सुभ्यामितितुव्यत्ययेननप्रवर्तते यद्वा आगस्शब्दात् अस्मायामेधेत्विमत्वर्थीयोविनिः तस्य विन्मतोर्लुक्इतिलुक् नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥ १५ ॥

१५. वरुण ! मेरा ऊपरी पाश ऊपर से और नीचे का नीचे से खोल दो और बीच का पाश भी खोलकर शिथिल करो । अनन्तर हे अदितिपुत्र ! हम तुम्हारे व्रत का खण्डन न करके पापरहित हो जायँगे।

॥ इतिप्रथमस्यद्वितीयेपञ्चदशोवर्गः ॥ १५ ॥

यच्चिदित्येकविंशत्यृचंद्वितीयंसूक्तं तथाचानुक्रान्तम्—यच्चित्सैकेति ऋषिश्चान्यस्मादिति परिभाषयाशुनःशेपएवऋषिः आदौगायत्रमितिपरिभाषितत्वात् गायत्रीछन्दः वारुणंत्वितिपूर्वोक्तत्वात् तुह्यादिपरिभाषयावरुणोदेवता · विनियोगउक्तःशौनःशेपाख्याने विशेषविनियोगस्तु अभिप्लवषडहेइदंसूक्तं होत्रकशस्त्रेस्तोमनिमित्तमावापार्थं अभिप्लवपृष्ठ्याहानीतिखण्डेतथैवसूत्रितम्—यच्चिद्धितेविशइतिवारुणमेतस्यतृचमावपेतमैत्रावरुणइति ।

तस्मिन्सूक्तेप्रथमामृचमाह—

यच्चिद्धितेविशोयथाप्रदेववरुणव्रतम् । मिनीमसिद्यविद्यवि ॥ १ ॥

यत् । चित् । हि । ते । विशः । यथा । प्र । देव । वरुण ।
व्रतम् । मिनीमसि । द्यविद्यवि ॥ १ ॥

हेवरुण यथालोकेविशःप्रजाः कदाचित्प्रमादंकुर्वन्तितथावयमपितेतवसंबन्धि यच्चिद्धि यदेवकिञ्चिद्व्रतंकर्म द्यविद्यविप्रतिदिनं प्रमिनीमसि प्रमादेनहिंसितवन्तः तदपिव्रतंप्रमादपरिहारेण साङ्गंकुर्वितिशेषः ॥ यथा लित्स्वरेणाद्युदात्तत्वेप्राप्ते यथेतिपादान्तेइतिसर्वानुदात्तत्वम् । मिनीमसि मीञ्हिंसायां इदन्तोमसिः क्र्यादिभ्यःश्ना मीनातेर्निगमेइतिह्रस्वत्वं ईहल्यघोरितीकारः सतिशिष्टस्वरबलीयस्त्वमन्यत्रविकरणेभ्यइतिवचनात् तिङएवस्वरःशिष्यते यद्वृत्तयोगान्निघाताभावः ॥ १ ॥

१. जिस तरह संसार के मनुष्य वरुणदेव के व्रतानुष्ठान में भ्रम करते हैं, उसी तरह हम लोग भी दिन-दिन प्रमाद करते हैं।

द्वितीयामृचमाह—

मानोवधायहत्नवेजिहीळानस्यरीरधः । माहृणानस्यमन्यवे ॥ २ ॥

मा । नः । वधाय । हत्नवे । जिहीळानस्य । रीरधः । मा ।
हृणानस्य । मन्यवे ॥ २ ॥

हेवरुणजिहीळानस्यअनादरंकृतवतः हत्नवे हन्तुःपापिहननशीलस्य तवसंबन्धिने त्वत्कर्तृकायवधायनोस्मान्मारीरधः संसिद्धान् विषयभूतान्माकुरु हृणानस्य हृणीयमानस्य क्रुद्धस्यतवमन्यवेक्रोधायमाअस्मान् रीरधः ॥ वधाय हनश्चवधइतिअदन्तोवधशब्दः उञ्छादिषु पाठादन्तोदात्तः । हत्नवे हनहिंसागत्योः कृहनिभ्यांक्नुरितिक्नुप्रत्ययः धातोर्नकारस्यतकारः । जिहीळानस्य हेडृअनादरे अस्माल्लिटःकानच् द्विर्भावहलादिशेषह्रस्वजुत्वजश्त्वानि एकारस्य ईकारादेशश्छान्दसः चितइत्यन्तोदात्तत्वम् । रीरधः राधसाधसंसिद्धौ चङि णिलोपेऽजुपधायाह-

स्त्वं द्विर्वचनहलादिशेषह्रस्वत्वसन्वद्भावेत्वाभ्यासदीर्घाः नमाङ्योगेइत्यडभावः। हणानस्य हणीङ्लज्जायां अस्मात्शानचि पृषोदरादित्वादभिमतरूपसिद्धिः ॥ २ ॥

२. वरुण! अनादरकर और घातक बनकर तुम हमारा वध नहीं करना। क्रुद्ध होकर हमारे ऊपर क्रोध नहीं करना।

विमृ॒ळी॒काय॑ते॒मनो॑र॒थीर॑श्वं॒नसंदि॑तम्। गी॒र्भिर्व॑रुणसीमहि ॥ ३ ॥

वि। मृ॒ळी॒काय॑। ते॒। मनः॑। र॒थीः। अश्व॑म्। न। सम्ऽदि॑तम्।

गी॒ःऽभिः। व॒रु॒ण॒। सी॒म॒हि॒ ॥ ३ ॥

हेवरुण मृळीकायअस्मत्सुखायतेतवमनोगीर्भिःस्तुतिभिः विसीमहिविशेषेणबध्नीमः प्रसादयामइत्यर्थः तत्रदृष्टान्तः—रथीःरथस्वामीसन्दितंसम्यक्खण्डितं दूरगमनेनश्रान्तं अश्वंन अश्वमिव यथास्वामीश्रान्तमश्वं घासप्रदानादिना प्रसादयतितद्वत् ॥ रथीः मत्वर्थीयईकारः। सन्दितं दोअवखण्डने निष्ठेतिक्तः द्यतिस्यतिमास्थामितीकारान्तादेशः गतिरनन्तरइतिगतेः प्रकृतिस्वरत्वम्। गीर्भिः सावेकाचइतिभिसउदात्तत्वम्। सीमहि षिञ्तन्तुसन्ताने व्यत्ययेनात्मनेपदं बहुलंछन्दसीतिविकरणस्यलुक् वलिलोपः यद्वा षिञ्बन्धनेइत्यस्माद्विकरणस्यलुक् दीर्घश्छान्दसः ॥ ३ ॥

३. वरुणदेव, जिस प्रकार रथ का स्वामी अपने थके हुए घोड़ों को शान्त करता है, उसी प्रकार सुख के लिए स्तुति-द्वारा हम तुम्हारे मन को प्रसन्न करते हैं।

परा॒हिमे॒विम॑न्यवः॒पत॑न्ति॒वस्य॑इष्टये। वयो॒नव॑स॒तीरुप॑ ॥ ४ ॥

परा॑। हि। मे॒। विऽम॑न्यवः। पत॑न्ति। वस्यः॑ऽइष्टये। वयः॑।

न। व॒स॒तीः। उप॑ ॥ ४ ॥

हेवरुण मेममशुनःशेपस्यविमन्यवः क्रोधरहिताबुद्धयः वस्यइष्टये वसीयसोतिशयेन वसुमतोजीवनस्यप्राप्तये परापतन्तिपराङ्मुखाः पुनरावृत्तिरहिताःप्रसरन्ति हिशब्दोस्मिन्नर्थेसर्वजनप्रसिद्धिमाह परापतनेदृष्टान्तः—वयोन पक्षिणोयथावसतीर्निवासस्थानानिउपसामीप्येनप्राप्नुवन्ति तद्वत् ॥ पतन्ति पादादित्वान्निघाताभावः। वस्यइष्टये वसुमच्छब्दादिष्ठन्मतोर्लुगितिमतुपोलुकि टिलोपे ईयसुनोयकारलोपश्छान्दसः। वसतीः शतुरनुमइतिङीपउदात्तत्वम् ॥ ४ ॥

४. जिस तरह चिड़ियाँ अपने घोसलों की ओर दौड़ती हैं, उसी तरह हमारी क्रोध-रहित चिन्तायें भी धन-प्राप्ति की ओर दौड़ रही हैं।

क॒दाक्ष॑त्र॒श्रियं॒नर॒मावरु॑णंकरामहे। मृ॒ळी॒काये॒रु॒चक्ष॑सम् ॥५॥ १६॥

क॒दा। क्ष॒त्र॒ऽश्रिय॑म्। नर॑म्। आ। वरु॑णम्। क॒रा॒म॒हे॒।

मृ॒ळी॒काय॑। उ॒रु॒ऽचक्ष॑सम् ॥ ५ ॥ १६ ॥

मृळीकाय अस्मत्सुखाय वरुणंकदाकस्मिन्काले आकरामहे अस्मिन्कर्मण्यागतं करवाम कीदृशंक्षत्रश्रियं बलसेविनं नरंनेतारं उरुचक्षसंबहूनांद्रष्टारम् ॥ क्षत्रश्रियं क्षत्राणिश्रयतीतिक्षत्रश्रीः क्विप्चेत्यादिनाक्विप्दीर्घश्च कृदुत्तरपदप्रकृतिस्वरत्वम्। नरं ऋदोरबिति अबन्तआद्युदात्तः। करामहे करोतेर्व्यत्ययेनशप्। उरुचक्षसं चक्षेर्बहुलंशिचेत्यसुन् शिद्वद्भावात्ख्याञादेशाभावः ॥ ५ ॥

५. वरुणदेव बलवान् नेता और असंख्य लोगों के द्रष्टा हैं। सुख के लिए हम कब उन्हें यज्ञ में ले आवेंगे ?

॥ इतिप्रथमस्यद्वितीयेषोडशोवर्गः ॥ १६ ॥

षष्ठीमृचमाह—

तदित्समानमाशातेवेनन्तानप्रयुच्छतः। धृतव्रतायदाशुषे ॥ ६ ॥

तत्। इत्। समानम्। आशाते इति। वेनन्ता। न। प्र। युच्छतः। धृतऽव्रताय। दाशुषे ॥ ६ ॥

धृतव्रताय अनुष्ठितकर्मणे दाशुषेहविर्दत्तवतेयजमानायवेनन्तौकामयमानौमित्रावरुणावितिशेषः तावुभौसमानंसाधारणं तदित्अस्माभिर्दत्तं तदेवहविः आशाते अश्नुवाते नप्रयुच्छतः कदाचिदपिप्रमादंनकुरुतः ॥ आशाते अश्नोतेर्लिटिद्विर्भावहलादिशेषौ अतआदेरित्यात्वं अनित्यमागमशासनमितिवचनादश्नोतेश्चेतिनुडभावः। वेनन्ता वेनतिःकान्तिकर्मा। सुपांसुलुगित्याकारः। प्रयुच्छतः युच्छप्रमादे। दाशुषे दाश्दाने इत्यस्मात् दाश्वान्साह्वानितिक्वसुप्रत्ययोनिपातितः वसोःसंप्रसारणमितिसंप्रसारणं शासिवसिघसीनांचेतिषत्वम् ॥ ६ ॥

६. यज्ञ करनेवाले हव्यदाता के प्रति प्रसन्न होकर मित्र और वरुण यह साधारण हव्य ग्रहण करते हैं, त्याग नहीं करते।

सप्तमीमृचमाह—

वेदायोवीनांपदमन्तरिक्षेणपतताम्। वेदनावःसमुद्रियः ॥ ७ ॥

वेद। यः। वीनाम्। पदम्। अन्तरिक्षेण। पतताम्। वेद। नावः। समुद्रियः ॥ ७ ॥

अन्तरिक्षेणपततां आकाशमार्गेणगच्छतां वीनांपक्षिणांपदंयोवरुणोवेद तथा समुद्रियः समुद्रेवस्थितोवरुणः नावोजलेगच्छन्त्याःपदं वेद जानाति सोऽस्मान् बन्धनान्मोचयत्वितिशेषः ॥ वेद विदज्ञाने विदोलटोवेतितिपोणल् लित्स्वरेणाद्युदात्तत्वं द्व्यचोतस्तिङइतिसंहितायां दीर्घः। वीनां नामन्यतरस्यांइतिनामउदात्तत्वम्। पततां शपःपित्वादनुदात्तत्वं शतुश्चलसा-

१

१ नि० १०. ३८.।

र्वधातुकस्वरेणधातुस्वरः। नावः सावेकाचइतिषष्ठ्याउदात्तत्वम्। समुद्रियः भवार्थेसमुद्राभ्रा-द्घइतिघप्रत्ययः ॥ ७ ॥

७. जो वरुण अन्तरिक्ष-चारी चिड़ियों का मार्ग और समुद्र की नौकाओं का मार्ग जानते हैं।

वेदमासोधृतव्रतोद्वादशप्रजावतः। वेदायउपजायते ॥ ८ ॥

वेद। मासः। धृतऽव्रतः। द्वादश। प्रजाऽवतः। वेद।
यः। उपऽजायते ॥ ८ ॥

धृतवतः स्वीकृतकर्मविशेषोयथोक्तमहिमोपेतः वरुणः प्रजावतः तदातदोत्पद्यमानप्रजायुक्तान् द्वादशमासः चैत्रादीन् फाल्गुनान्तान्वेदजानाति यस्त्रयोदशोधिकमासउपजायते संवत्सरसमीपेस्वयमेवउत्पद्यतेतमपिवेद वाक्यशेषःपूर्ववत् ॥ मासः पद्दन्नित्यादिनामासशब्दस्यमासित्यादेशः ऊडिदमित्यादिनाशसउदात्तत्वम्। द्वादश द्वौचदशचेतिद्वन्द्वः द्व्यष्टनःसंख्यायामित्यात्वं संख्येतिसूत्रेणपूर्वपदप्रकृतिस्वरत्वम। प्रजावतः जनीप्रादुर्भावे प्रपूर्वाज्जनसनखनक्रमगमोविट्प्रत्ययः विड्वनोरित्यात्वं कृदुत्तरपदप्रकृतिस्वरत्वं प्रजाएषांसन्तीति तदस्यास्त्यस्मिन्नितिमतुप् मादुपधायाइतिमतुपोवत्वम्। उपजायते जनेःकर्मकर्तरिलट् कर्मवद्भावादात्मनेपदं यक् जनादीनांउपदेशएवात्वंवक्तव्यमितिवचनादचःकर्तृयकीत्याद्युदात्तत्वं तिङिचोदात्तवतीत्युपसर्गस्यनिघातः नचतिङ्ङतिङइतिनिघातः यद्वृत्तान्नित्यमितिप्रतिषेधात् ॥ ८ ॥

८. जो व्रतावलम्बन करके अपने अपने फलोत्पादक बारह महीनों को जानते हैं और उत्पन्न होनेवाले तेरहवें मास को भी जानते हैं।

वेदवातस्यवर्तनिमुरोर्ऋष्वस्यबृहतः। वेदायेअध्यासते ॥ ९ ॥

वेद। वातस्य। वर्तनिम्। उरोः। ऋष्वस्य। बृहतः।
वेद। ये। अधिऽआसते ॥ ९ ॥

उरोर्विस्तीर्णस्यऋष्वस्यदर्शनीयस्य बृहतोगुणैरधिकस्यवातस्य वायोर्वर्तनिंमार्गंविदवरुणोजानाति येदेवाः अध्यासते उपरिनिवसन्तितानपिवेदजानाति ॥ वातस्य असिहसीत्यादिनातन्प्रत्ययान्तोवातशब्दोनित्त्वादाद्युदात्तः। वर्तनिं वर्ततेअनेनेतिवर्तनिः स्तोत्रवाचकस्यवर्तनिशब्दस्यअन्तोदात्तत्वसिद्ध्यर्थमुञ्छादिषुपाठादस्यप्रत्ययस्वरेणमध्योदात्तत्वेप्राप्तेव्यत्ययेनान्तोदात्तत्वम्। बृहतः बृहन्महतोरुपसंख्यानमितिङसउदात्तत्वम्। अध्यासते लसार्वधातुकानुदात्तत्वेसतिधातुस्वरः ॥ ९ ॥

९. जो वरुणदेव विस्तृत, शोभन और महान् वायु का भी पथ जानते हैं और जो ऊपर, आकाश में, निवास करते हैं, उन देवों को भी जानते हैं।

दशमीमृचमाह—

निषसादधृतव्रतोवरुणःपस्त्याउस्वा । साम्राज्यायसुक्रतुः॥१०॥१७॥

नि । ससाद । धृतऽव्रतः । वरुणः । पस्त्यासु । आ । साम्ऽराज्याय ।
सुऽक्रतुः ॥ १० ॥ १७ ॥

धृतव्रतःपूर्वोक्तोवरुणः पस्त्यासुदैवीषु प्रजासु आनिषसादआगत्यनिषण्णवान्किमर्थं प्रजानांसाम्राज्यसिद्ध्यर्थं सुक्रतुःशोभनकर्मा ॥ निषसाद सदिरप्रतेरितिषत्वम् । साम्राज्याय सम्राजोभावःसाम्राज्यं गुणवचनब्राह्मणादिभ्यइतिष्यञ् ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वम्। सुक्रतुः क्रत्वादयश्चेत्युत्तरपदाद्युदात्तत्वम् ॥ १० ॥

१०. धृत-व्रत और शोभनकर्मा वरुण दैवी सन्तानों के बीच साम्राज्य-संसिद्धि के लिए आकर बैठे थे।

अतोविश्वान्यद्भुताचिकित्वाँअभिपश्यति । कृतानियाचकर्त्वा॥११॥

अतः । विश्वानि । अद्भुता । चिकित्वान् । अभि । पश्यति ।
कृतानि । या । च । कर्त्वा ॥ ११ ॥

अतोऽस्माद्वरुणाद्विश्वान्यद्भुतासर्वाण्याश्चर्याणि चिकित्वान्प्रज्ञावानभिपश्यतिसर्वतोवलोकयति याकृतानियान्याश्चर्याणिपूर्वंवरुणेनसंपादितानिचकारादन्यानि यान्याश्चर्याणि कर्त्वा इतःपरंकर्तव्यानितानिसर्वाण्यभिपश्यतीतिपूर्वत्रान्वयः ॥ अद्भुता शेश्छन्दसिबहुलमिति शेर्लोपः प्रत्ययलक्षणेन नपुंसकस्यझलचइतिनुम् नलोपः । चिकित्वान् कितज्ञाने लिटः क्वसुः अभ्यासहलादिशेषचुत्वानि वस्वेकाजाद्घसामितिनियमादिड्भावः रुत्वानुनासिकावुकौसंहितायाम । पश्यति पाघ्रेत्यादिनादृशेःपश्यादेशः। कर्त्वा कृत्यार्थेतवैकेनितिकरोतेस्त्वन् नित्त्वादाद्युदात्तत्वं पूर्ववच्छेर्लोपः ॥ ११ ॥

११. ज्ञानी मनुष्य वरुण की कृपा से वर्त्तमान और भविष्यत्—सारी अद्भुत घटनाओं को देखते हैं।

द्वादशीमृचमाह—

सनोविश्वाहासुक्रतुरादित्यःसुपथाकरत् । प्रणआयूंषितारिषत् ॥१२॥

सः । नः । विश्वाहा । सुऽक्रतुः । आदित्यः । सुऽपथा । करत् ।
प्र । नः । आयूंषि । तारिषत् ॥ १२ ॥

सुक्रतुः शोभनप्रज्ञः सआदित्योवरुणः विश्वाहा सर्वेष्वहःसु नोस्मान् सुपथा शोभनेन मार्गेण सहितान् करत् करोतु किञ्च नोस्माकमायूंषिप्रतारिषत् प्रवर्धयतु ॥ सुपथा स्वतीपूजायामितिसमासे नपूजनादितिसमासान्तप्रतिषेधः अव्ययपूर्वपदप्रकृतिस्वरत्वेप्राप्ते परादिश्छन्दसिबहुलमिति उत्तरपदाद्युदात्तत्वम् यद्वा तृतीयायाआलादेशः अव्ययपूर्वपदप्रकृतिस्वरत्वंछित्स्वरेणबाध्यते कृत्वादयश्चेत्येतन्नभवति अबहुव्रीहित्वात् बहुव्रीहौहितद्विधीयते आद्युदात्तंद्व्यच्छन्दसीत्येतदपिनभवति पथिन्शब्दस्यान्तोदात्तत्वात्। करत् करोतेर्लेटिव्यत्ययेनशप् शपोवालुकि लेटोडाटावित्यडागमः इतश्चलोपइतीकारलोपः यद्वा छान्दसेलुङि कृमृदृरुहिभ्यइतिच्लेरङ् ऋदृशोङिगुणइतिगुणः बहुलंछन्दस्यमाङ्योगेपीत्यडभावः। प्रणः उपसर्गाद्बहुलमितिनसोणत्वम्। तारिषत् तारयतेर्लेटचडागमः सिब्बहुलंलेटीतिसिप् आदेशप्रत्यययोरितिषत्वम् ॥ १२ ॥

१२. वही सत्कर्मपरायण और अदिति-पुत्र वरुण हमें सदा सुपथगामी बनावें, हमारी आयु बढ़ावें।

त्रयोदशीमृचमाह—

बिभ्रद्द्रापिंहिरण्ययंवरुणोवस्तनिर्णिजम्। परिस्पशोनिषेदिरे ॥१३॥

बिभ्रत्। द्रापिम्। हिरण्ययम्। वरुणः। वस्त। निःऽनिजम्। परि। स्पशः। नि। सेदिरे ॥ १३ ॥

हिरण्ययंसुवर्णमयंद्रापिंकवचंबिभ्रत् धारयन् वरुणोनिर्णिजंपुष्टंस्वशरीरं वस्त आच्छादयति स्पशः हिरण्यस्पर्शिनोरश्मयः परिनिषेदिरेसर्वतोनिषण्णाः ॥ बिभ्रत् बिभर्तेः शतरि नाभ्यस्ताच्छतुरितिनुमभावः अभ्यस्तानामादिरित्याद्युदात्तत्वम्। द्रापिं द्राकुत्सायांगतौ द्रापयतीपुरुकुत्सितांगतिंमापयतीतिद्रापिःकवचं अर्तिह्रीत्यादिनापुगागमः औणादिकइप्रत्ययेणिलोपः। हिरण्ययं ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानिच्छन्दसि इतिहिरण्यशब्दाद्विकारार्थेविहितस्यमयटोमशब्दलोपोनिपातितः। वस्त वसआच्छादने लङि अदादित्वाच्छपोलुक्पूर्ववदडभावः। निर्णिजं णिजिर्शौचपोषणयोः। स्पशः स्पशबाधनस्पर्शनयोः क्विप्चेतिक्विप्। निषेदिरे षद्लृविशरणगत्यवसादनेषु अस्माद्गत्यर्थात्कर्मणिलिटिएत्वाभ्यासलोपौ सदिरप्रतेरितिषत्वम् ॥१३॥

१३. वरुण सोने का वस्त्र धारण कर अपना पुष्ट शरीर ढकते हैं, जिससे चारों ओर हिरण्यस्पर्शी किरणें फैलती हैं।

नयंदिप्सन्तिदिप्सवोनद्रुह्वाणोजनानाम्। नदेवमभिमातयः ॥ १४ ॥

न। यम्। दिप्सन्ति। दिप्सवः। न। द्रुह्वाणः। जनानाम्। न। देवम्। अभिऽमातयः ॥ १४ ॥

दिप्सवः हिंसितुमिच्छन्तोवैरिणः यंवरुणंनदिप्सन्तिभीताः सन्तोहिंसितुमिच्छांपरित्यजन्ति जनानांप्राणिनां द्रुह्वाणोद्रोग्धारोपियंवरुणंप्रतिनद्रुह्यन्ति अभिमातयः पाप्मानः पाप्मावाअभिमातिरितिश्रुत्यन्तराद्। देवं तंवरुणंनस्पृशन्ति ॥ दिप्सन्ति दंभुदंभे अस्मात्सनि सनीवन्तर्धेत्यादिनाइडभावः हलन्ताच्चेत्यत्रहल्ग्रहणस्यजातिवाचित्वाद् सनःकित्त्वाद् दंभइच्चेति दकारात्परस्याकारस्येकारः अनिदितामितिनलोपः भष्भावाभावश्छान्दसः अत्रलोपोभ्यासस्येत्यभ्यासलोपः शपःपित्त्वादनुदात्तत्वं तिङश्चलसार्वधातुकस्वरेण सनोनित्त्वान्नित्स्वरेणाद्युदात्तत्वं यद्वृत्तयोगादनिघातः। दिप्सवः सन्नन्ताद्दंभेः सनाशंसभिक्षउरित्युप्रत्ययः प्रत्ययस्वरः। द्रुह्वाणः द्रुहजिघांसायां अन्येभ्योपिदृश्यन्तेइतिक्वनिप् प्रत्ययस्यपित्त्वादनुदात्तत्वेधातुस्वरेणाद्युदात्तत्वम् ॥ १४ ॥

१४. जिस वरुणदेव से शत्रु लोग शत्रुता नहीं कर सकते, मनुष्य-पीड़क जिसे पीड़ा नहीं दे सकते और पापी लोग जिस देव के प्रति पापाचरण नहीं कर सकते।

पञ्चदशीमृचमाह—

उतयोमानुषेष्वायशश्चक्रेअसाम्या। अस्माकमुदरेष्वा ॥१५॥१८॥

उत। यः। मानुषेषु। आ। यशः। चक्रे। असामि। आ।
अस्माकम्। उदरेषु। आ ॥ १५ ॥ १८ ॥

उतअपिचयोवरुणोमानुषेषुयशोन्नं आचक्रेसर्वतःकृतवान् सवरुणः कुर्वन्नपिआसर्वतः असामिसंपूर्णंचक्रे नतुन्यूनंकृतवान् विशेषतोस्माकमुदरेषुआसर्वतश्चक्रे ॥ मानुषेषु मनोर्जातावञ्यतौषुक्चेत्यञ् ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वम्। चक्रे प्रत्ययस्वरः। असामि अव्यये नञ्कुनिपातानामितिवक्तव्यमित्यव्ययपूर्वपदप्रकृतिस्वरत्वम्। यशः अशेर्युट्चेत्यसुन्। उदरेषु उद्दिदृणातिरजलौपूर्वपदान्त्यलोपश्चेतिअल् लित्स्वरः गतिकारकोपपदादितिउत्तरपदप्रकृतिस्वरत्वम् ॥ १५ ॥

१५. जिन्होंने मनुष्यों, विशेषतः हमारी उदर-पूर्ति के लिए यथेष्ट अन्न तैयार कर दिया है।

परामेयन्तिधीतयोगावोनगव्यूतीरनु। इच्छन्तीरुरुचक्षसम् ॥ १६ ॥

परा। मे। यन्ति। धीतयः। गावः। न। गव्यूतीः। अनु।
इच्छन्तीः। उरुऽचक्षसम् ॥ १६ ॥

उरुचक्षसंबहुभिर्द्रष्टव्यंवरुणंइच्छन्तीर्मेधीतयःशुनःशेपस्यबुद्धयः परायन्तीपराङ्मुखानिवृत्तिरहितागच्छन्ति तत्रदृष्टान्तः—गावोन यथागावः गव्यूतीरनु गोष्ठानिअनुलक्ष्यगच्छन्तितद्व-

१ तै० सं. २.१.३.।

त ॥ गव्यूतीः गावोत्रयूयन्तेइत्यधिकरणेक्तिन् गोर्यूतौछन्दसीतिअवादेशः दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वं यद्वा यूतिर्यवनं गवांयवनमत्रेतिबहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । इच्छन्तीः इषइच्छायां लटःशतृ तुदादिभ्यःशः इषुगमियमांछइतिछत्वं अदुपदेशाल्लसार्वधातुकानुदात्तत्वेविकरणस्वरःशिष्यते ॥ १६ ॥

१६. बहुतों ने उस वरुण को देखा है। जिस प्रकार गौएँ गोशाला की ओर जाती हैं, उसी प्रकार निवृत्तिरहित होकर हमारी चिन्ता वरुण की ओर जा रही है।

सं॒नु वो॑चावहै॒ पुन॒र्यतो॑ मे॒ मध्वाभृ॑तम् । होते॑व॒ क्षद॑से प्रि॒यम् ॥ १७ ॥

सम् । नु । वो॒चा॒व॒है॒ । पुनः॑ । यतः॑ । मे॒ । मधु॑ । आऽभृ॑तम् ।

होता॑ऽइव । क्षद॑से । प्रि॒यम् ॥ १७ ॥

यतोयस्मात्कारणात् मेममजीवनार्थं मधुरंहविः आभृतं अत्रःसवाख्येकर्मणिसंपादितं अतःकारणात् होतेव होमकर्तेव त्वमपिमियंहविः क्षदसे अश्नासि पुनर्हविःस्वीकारादूर्ध्वं तृप्तस्त्वं जीवन्नहंच नु अवश्यं संवोचावहै संभूयप्रियवार्ताकरवावहै ॥ वोचावहै लोडर्थे छान्दसलुङि ब्रुवोवचिः अस्यतिवक्तीतिच्लेरङादेशः वचउमित्युमागमेगुणः व्यत्ययेनटेरेत्वं यद्वा लोटएवलुङादेशः स्थानिवद्भावादेत्वम् । आभृतं हृग्रहोर्भः गतिरनन्तरइतिगतेः प्रकृतिस्वरत्वम् ॥ १७ ॥

१७. वरुण! चूंकि मेरा मधुर हव्य तैयार है; इसलिए होता की तरह तुम वही प्रिय हव्य भक्षण करो। अनन्तर हम दोनों बातें करेंगे।

दर्शं॒ नु वि॒श्वद॑र्शतं॒ दर्शं॒ रथ॒मधि॒ क्षमि॑ । ए॒ता जु॑षत मे॒ गिरः॑ ॥ १८ ॥

दर्श॑म् । नु । वि॒श्वऽद॑र्शतम् । दर्श॑म् । रथ॑म् । अधि॑ । क्षमि॑ । ए॒ताः ।

जु॒ष॒त॒ । मे॒ । गिरः॑ ॥ १८ ॥

विश्वदर्शतं सर्वैर्दर्शनीयमस्मदनुग्रहार्थमत्राविर्भूतंवरुणंदर्शंनु अहंदृष्टवान्खलु क्षमिक्षमायां भूमौरथंवरुणसंबन्धिनंअधिदर्शं आधिक्येनदृष्टवानस्मि एताउच्यमानामेगिरोमदीयाः स्तुतीःजुषत वरुणःसेवितवान् ॥ दर्शं दृशेरिरितोवेतिच्लेरङादेशः ऋदृशोङिगुणइतिगुणः । विश्वदर्शतं दृशेर्भृमृदृशीत्यादिनाअतच्प्रत्ययान्तोदर्शतशब्दः मरुद्वृधादित्वात्पूर्वपदान्तोदात्तत्वम् यद्वा विश्वंदर्शनीयमस्येतिबहुव्रीहिः बहुव्रीहौविश्वंसंज्ञायामितिपूर्वपदान्तोदात्तत्वम् । क्षमि आतोधातोरित्यत्र आतइतियोगविभागादाकारलोपः ॥ १८ ॥

१८. सर्व-दर्शनीय वरुण को मैंने देखा है। भूमि पर, कई बार, उनका रथ मैंने देखा है। उन्होंने मेरी स्तुति ग्रहण की है।

वरुणप्रघासेषुइमंमेवरुणेतिवरुणस्यहविषोनुवाक्या पञ्चम्यांपौर्णमास्यामितिखण्डेसूत्रितम्—इमंमेव रुणश्रुधितत्त्वायामिब्रह्मणावन्दमानइति ।

तामेतांसूक्तेएकोनविंशीमृचमाह—

इमंमेवरुणश्रुधीहवमद्याचमृळय। त्वामवस्युराचके॥ १९॥

इमम्। मे। वरुण। श्रुधि। हवम्। अद्य। च। मृळय।

त्वाम्। अवस्युः। आ। चके॥ १९॥

हेवरुणमेमदीयमिमंहवमाह्वानंश्रुधिशृणु किञ्च अद्यास्मिन्दिनेमृळयअस्मान्सुखय अवस्युः रक्षणेच्छुरहंत्वांवरुणंआभिमुख्येन चके शब्दयामिस्तौमीत्यर्थः॥ श्रुधि श्रुश्रवणे लोटोहिःश्रुशृणुपॄकृवृभ्यश्छन्दसीतिहेर्धिरादेशः बहुलंछन्दसीतिविकरणस्यलुक् अन्येषामपिदृश्यते इतिसंहितायांदीर्घः। अवस्युः अवस्शब्दात् सुपआत्मनःक्यच् क्याच्छन्दसीत्युप्रत्ययः। आचके कैगैशब्दे अस्माल्लिटि आदेचइत्यात्वं द्विर्भावचुत्वे आतोलोपइटिचेत्याकारलोपः तिङ्ङतिङइतिनिघातः॥ १९॥

१९. वरुण! मेरा यह आह्वान सुनो। आज मुझे सुखी करो। तुम्हारी रक्षा का अभिलाषी होकर मैं तुम्हें बुलाता हूँ।

त्वंविश्वस्यमेधिरदिवश्चग्मश्चराजसि। सयामनिप्रतिश्रुधि॥ २०॥

त्वम्। विश्वस्य। मेधिर। दिवः। च। ग्मः। च। राजसि।

सः। यामनि। प्रति। श्रुधि॥ २०॥

हेमेधिरमेधाविन् वरुण त्वं दिवश्चद्युलोकस्यापि ग्मश्चभूलोकस्यापि विश्वस्य सर्वस्य जगतोमध्ये राजसिदीप्यसे सतादृशस्त्वं यामनिक्षेमप्रापणे अस्मदीये प्रतिश्रुधिप्रतिश्रवणमाज्ञापनंकुरु रक्षिष्यामीतिप्रत्युत्तरंदेहीत्यर्थः॥ दिवः ऊडिदमित्यादिनाषष्ठ्याउदात्तत्वम्। ग्मः ग्मेत्येतद्भूनामसुपठितं आतोधातोरित्यत्रआतइतियोगविभागादातोलोपइतिप्रतिषेधेप्यत्ययेनाकारलोपः उदात्तनिवृत्तिस्वरेणविभक्तेरुदात्तत्वम्। यामनि यामापणे आतोमनिन्क्वनिब्वनिपश्चेतिमनिन् नित्त्वादाद्युदात्तत्वम्। श्रुधि उक्तम्॥ २०॥

२०. मेधावी वरुण! तुम द्युलोक, भूलोक और समस्त संसार में दीप्तिमान् हो। हमारी रक्षा-प्राप्ति के लिए प्रार्थना सुनने के अनन्तर तुम उत्तर दो।

उदुत्तमंमुमुग्धिनोविपाशंमध्यमंचृत। अवाधमानिजीवसे॥ २१॥ १९॥

उत्। उत्ऽतमम्। मुमुग्धि। नः। वि। पाशम्। मध्यमम्।

चृत। अव। अधमानि। जीवसे॥ २१॥ १९॥

नोस्माकं उत्तमंशिरोगतं पाशं उन्मुमुग्धि उत्कृष्यमोचय मध्यमं उदरगतं पाशं विचृतवियुज्यनाशय जीवसे जीवितुं अधमानि मदीयान् पादगतान् पाशान् अवचृतअवकृष्यना-

शय ॥ उत्तमं उञ्छादिषुपाठादन्तोदात्तत्वम्। मुमुग्धि मुच्लृमोक्षणे बहुलंछन्दसीतिविकरणस्य श्लुः द्विर्भावः हलादिशेषः हुझल्भ्योहेर्धिरितिहेर्धिरादेशः तिङ्ङतिङइतिनिघातः। चृत चृती-हिंसाग्रन्थनयोः लोटोहिः तुदादिभ्यःशः अतोहेरितिहेर्लुक्। जीवसे जीवप्राणधारणे तुमर्थे-सेसेनिति असेप्रत्ययः प्रत्ययस्वरः ॥ २१ ॥

२१. हमारे ऊपर का पाश ऊपर से खोल दो। मध्य और नीचे का पाश भी खोल दो, जिससे हम जीवित रह सकें।

॥ इतिप्रथमस्यद्वितीयेएकोनविंशोवर्गः ॥ १९ ॥

वसिष्वेतिदशर्चंतृतीयंसूक्तं अत्रानुक्रम्यते—वसिष्वदशाग्नेयंत्विति शुनःशेपऋषिः गाय-त्रीछन्दः इदमुत्तरंचसूक्तमाग्नेयं प्रातरनुवाकेआग्नेयेक्रतौगायत्रेछन्दसि एतद्।।दसूक्तद्वयमनुव-क्तव्यं तथाचसूत्रितम्—वसिष्वाहीतिसूक्तयोरुत्तमामुद्धरेदिति।

अस्मिन्सूक्तेप्रथमामृचमाह—

वसिष्वाहिमियेध्यवस्त्राण्यूर्जांपते। सेमंनोअध्वरंयज ॥ १ ॥

वसिष्व। हि। मियेध्य। वस्त्राणि। ऊर्जाम्। पते। सः। इमम्। नः। अध्वरम्। यज ॥ १ ॥

वरुणेनअग्निस्तुत्यैमेरितःशुनःशेपः एतदादिसूक्तद्वयेनाग्निमस्तौत् तथाचाम्नायते—तंवरु-णउवाचाग्निर्वैदेवानांमुखंसुहृदयतमस्तन्नुस्तुसंथत्वोत्स्रक्ष्यामइतिसोग्निंतुष्टावातउत्तराभिर्द्वाविंश-त्येति[1]। हेमियेध्य मेध्यस्ययज्ञस्ययोग्य ऊर्जांपते अन्नानांपालकाग्ने वस्त्राणिआच्छादकानि तेजांसिवसिष्वआच्छादयप्रज्वलितस्तेजसाभवेत्यर्थः हियस्मात्प्रज्वलितः तस्मात्सतादृशस्त्वं नोस्मदीयमिममध्वरं यजनिष्पादय ॥ वसिष्व वसआच्छादने लोटिथासःसे सवाभ्यांवामौ छन्दस्युभयथेत्यार्धधातुकत्वात् आर्धधातुकस्येड्वलादेरितीडागमः लसार्वधातुकानुदात्तत्वेधा-तुस्वरः अन्येषामपिदृश्यतइतिसंहितायांदीर्घः। मियेध्य मकारैकारयोर्मध्ये इयागमश्छान्दसः। ऊर्जांपते सुबामन्त्रितइतिपराङ्गवद्भावात् षष्ठ्यामन्त्रितस्यसमुदायस्याष्टमिकोनिघातः। सेमं सोचिलोपेचेत्पादपूरणमितिसोर्लोपः ॥ १ ॥

१. यज्ञपात्र और अन्नभाजन अग्निदेव! अपना तेज ग्रहण करो और हमारे इस यज्ञ का सम्पादन करो।

निनोहोतावरेण्यःसदायविष्ठमन्मभिः। अग्नेदिवित्मतावचः ॥ २ ॥

नि। नः। होता। वरेण्यः। सदा। यविष्ठ। मन्मऽभिः। अग्ने। दिवित्मता। वचः ॥ २ ॥

---

[1] ऐ० ब्रा० ७. १६.।

सदायविष्ठ सर्वदायुवतम हेअग्ने वरेण्योवरणीयस्त्वंनोस्माकंहोताहोमनिष्पादकोभूत्वा दिवित्मतादीप्तिमतावचोवचसास्तूयमानःसन् निषीदेतिशेषः कीदृशस्त्वं मन्मभिर्ज्ञापकैस्तेजोभिर्युक्तइतिशेषः ॥ यविष्ठ युवशब्दादिष्ठनि स्थूलदूरेत्यादिनायणादिपरस्यलोपः पूर्वस्योकारस्य गुणश्च अवादेशः आमन्त्रितनिघातः । मन्मभिः मनज्ञाने अन्येभ्योपिदृश्यन्तइतिमनिन्प्रत्ययः नित्त्वादाद्युदात्तत्वम् । दिवित्मता दिवुक्रीडादौ इकृश्तिपौधातुनिर्देशेइतिइक्प्रत्ययः तेनच धातुवाचिनादिविशब्देनधात्वर्थोदीप्तिर्लक्ष्यते यद्वा औणादिकोभावेकिप्रत्ययः दिविशब्दान्मतुपितकारोपजनश्छान्दसः । वचः सुपांसुलुगितितृतीयैकवचनस्यलुक् ॥ २ ॥

२. अग्नि! तुम सर्वदा युवक, श्रेष्ठ और तेजस्वी हो। हमारे होमकर्त्ता और प्रकाशमय वाक्यों-द्वारा स्तुत होकर बैठो ।

आहिष्मासूनवेपितापिर्यजत्यापये । सखासख्येवरेण्यः ॥ ३ ॥

आ । हि । स्म । सूनवे । पिता । आपिः । यजति । आपये ।
सखा । सख्ये । वरेण्यः ॥ ३ ॥

हेअग्नेवरेण्योवरणीयः पिता पितृस्थानीयस्त्वं सूनवेपुत्रस्थानीयाय मह्यंअभीष्टंदेहीतिशेषः हिस्मेतिनिपातद्वयंसर्वथेत्यमुमर्थमाचष्टे अभीष्टदानेदृष्टान्तद्वयमुच्यते—यथाआपिर्बंधुरापयेबन्धवे आयजतिहिस्म सर्वथाददातीतिशेषः सखाप्रियः सख्येप्रियायअभीष्टंसर्वथा यथाददातितथात्वमपिदेहि ॥ स्मासूनवे निपातस्यचेतिदीर्घः । यजतीत्यस्यसखासख्यइत्यत्राप्यनुषंगात्तदपेक्षयाइयंप्रथमेति चादिलोपेविभाषेतिननिहन्यते यद्वा हिचेतिनिघातप्रतिषेधः । सख्ये समानेख्यश्चोदात्तइतिसखिशब्दइप्रत्ययान्तआद्युदात्तः सुपःपित्त्वादनुदात्तत्वेसएव शिष्यते ॥ ३ ॥

३. श्रेष्ठ अग्निदेव! जिस प्रकार पिता पुत्र को, बन्धु बन्धु को और मित्र मित्र को दान देता है, उसी प्रकार तुम भी मेरे लिए दानपरायण बनो।

चतुर्थीमृचमाह—

आनोबर्हीरिशादसोवरुणोमित्रोअर्यमा । सीदन्तुमनुषोयथा ॥ ४ ॥

आ । नः । बर्हिः । रिशादसः । वरुणः । मित्रः । अर्यमा ।
सीदन्तु । मनुषः । यथा ॥ ४ ॥

हेअग्ने वरुणादयोदेवास्त्वद्बन्धवस्त्वयाप्रेरिताः रिशादसः हिंसकानदन्तःनोस्मदीयंबर्हिर्यज्ञंआसीदन्तु तत्रदृष्टान्तः—यथामनुषः प्रजापतेर्यज्ञमासीदन्तितद्वत् ॥ बर्हीरिशादसः विस-

जनीयस्यरुत्वेकृते रोरीतिरेफलोपः ढ्रलोपेपूर्वस्यदीर्घोणइतिइकारस्यदीर्घत्वम् । रिशादसः रिशहिंसायां रिशन्तिहिंसन्तीतिरिशाःशत्रवः इगुपधज्ञाप्रीकिरःकः तानदन्तीतिरिशादसः सर्वधातुभ्योसुन् कृदुत्तरपदप्रकृतिस्वरत्वम् । सीदन्तु षद्लृविशरणगत्यवसादनेषु पाघ्रेत्यादिनासीदादेशः शपःपित्त्वादनुदात्तत्वम् शतुश्चलसार्वधातुकस्वरेणधातुस्वरःशिष्यते । मनुषः मनज्ञाने मन्यतेजानातीतिमनुःप्रजापतिः जनेरुसिर्निंचेत्यनुवृत्तौ बहुलमन्यत्रापीत्यौणादिकउसिप्रत्ययः नित्त्वादाद्युदात्तत्वम् । यथा यथेतिपादान्तेइतिसर्वानुदात्तत्वम् ॥ ४ ॥

४. शत्रुञ्जय मित्र, वरुण और अर्यमा जिस तरह मनु के यज्ञ में बैठे थे, उसी तरह तुम भी हमारे यज्ञ के कुश पर बैठो।

पूर्व्यहोतरस्यनोमन्दस्वसख्यस्यच । इमाउषुश्रुधीगिरः ॥ ५ ॥ २० ॥

पूर्व्य । होतः । अस्य । नः । मन्दस्व । सख्यस्य । च । इमाः ।
ऊम् इति । सु । श्रुधि । गिरः ॥ ५ ॥ २० ॥

हेपूर्व्यअस्मदादेःपूर्वमुत्पन्न होतःहोमनिष्पादकाग्ने नोस्मदीयस्यास्यप्रवर्तमानस्ययज्ञस्य सख्यस्यचास्मदनुग्रहस्यच सिध्यर्थंमन्दस्वहृष्टोभव इमाअस्माभिःप्रयुज्यमानाःगिरः उषु स्तुतिरूपावाचोपिश्रुधिशृणु ॥ पूर्व्य आमन्त्रिताद्युदात्तत्वम् । होतरित्यस्यनामन्त्रितेसमानाधिकरणे इतिपूर्वस्याविद्यमानवत्त्वात् आष्टमिकोनिघातः । अस्य ऊडिदमितिषष्ठ्याउदात्तत्वम् । मन्दस्व मदिस्तुतिमोदमदस्वप्नकान्तिगतिषु शपःपित्त्वादनुदात्तत्वं तिङश्चलसार्वधातुकस्वरेणधातुस्वरः अपादादावितिपर्युदासादाष्टमिकोनिघाताभावः।सख्यस्य सख्युःकर्मसख्यं सख्युर्यइतियप्रत्ययः यस्येतिलोपेप्रत्ययस्वरः । उषु सुञइतिषत्वम् । श्रुधि श्रुश्रवणे श्रुशृणुपॄकृवृभ्यश्छन्दसीतिहेर्धिरादेशः बहुलंछन्दसीतिशपोलुक् ॥ ५ ॥

५. हे पुराणहोमसम्पादक, हमारे इस यज्ञ और मित्रता में तुम प्रसन्न बनो। यह स्तुति-वचन श्रवण करो।

॥ इतिप्रथमस्यद्वितीयेविंशोवर्गः ॥ २० ॥

षष्ठीमृचमाह—

यच्चिद्धिशश्वतातनादेवंदेवंयजामहे । त्वेइद्धूयतेहविः ॥ ६ ॥

यत् । चित् । हि । शश्वता । तना । देवम्ऽदेवम् । यजामहे ।
त्वेइति । इत् । हूयते । हविः ॥ ६ ॥

हेअग्ने यच्चिद्धियद्यपिशश्वताशाश्वतेननित्येनतनाविस्तृतेनहविषादेवंदेवं अन्यमन्यं वरुणेन्द्रादिरूपंनानाविधंदेवताविशेषंयजामहे तथापितद्धविः सर्वंत्वेइत्वय्येवहूयते अतोदेवता-

न्तरविषयोयागोपि त्वदीयैवसेवेत्यर्थः ॥ तना तनुविस्तारे क्विप्चेतिक्विप् यद्वा पचाद्यच् सुपांसुलुगितितृतीयायाआकारः । देवंदेवं नित्यवीप्सयोरितिद्विर्भावः तस्यपरमाम्रेडितमितिउत्तरस्याम्रेडितसंज्ञायां अनुदात्तंचेतिसर्वानुदात्तत्वम् । यजामहे निपातैर्यद्यदिहन्तेतिनिघातप्रतिषेधः । त्वे युष्मच्छन्दात्सप्तम्येकवचनस्यसुपांसुलुगितिशेआदेशः त्वमावेकवचनेइतिमपर्यन्तस्य त्वादेशः शेषलोपे अतोगुणेइतिपररूपत्वं शेइतिप्रगृह्यसंज्ञायां प्लुतप्रगृह्याअचीतिप्रकृतिभावः । हूयते अकृत्सार्वधातुकयोर्दीर्घइतिदीर्घः ॥ ६ ॥

६. नित्य और विस्तीर्ण हव्य-द्वारा हम और-और देवों का जो यज्ञ करते हैं, वह हव्य तुम्हें ही दिया जाता है।

प्रियोनोअस्तुविश्पतिर्होतामन्द्रोवरेण्यः । प्रियाःस्वग्नयोवयम् ॥ ७ ॥

प्रियः । नः । अस्तु । विश्पतिः । होता । मन्द्रः । वरेण्यः । प्रियाः । सुऽअग्नयः । वयम् ॥ ७॥

विश्पतिर्विशांप्रजानांपालकोहोताहोमनिष्पादकोमन्द्रोहृष्टःवरेण्योवरणीयोग्निर्नोस्माकं प्रियोस्तु वयमपिस्वग्नयःशोभनाग्नियुक्ताःसन्तस्तवप्रियाभूयास्मेतिशेषः ॥ विश्पतिः पत्यावैश्वर्ये इतिपूर्वपदप्रकृतिस्वरेप्राप्ते परादिश्छन्दसिबहुलमित्युत्तरपदाद्युदात्तत्वम् । वरेण्यः वृञ्एण्यः वृषादित्वादाद्युदात्तः । स्वग्नयः बहुव्रीहौनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् ॥ ७ ॥

७. सर्व-प्रजा-रक्षक, होम-सम्पादक, प्रसन्न और वरेण्य अग्नि हमारे प्रिय हों, ताकि हम भी शोभन अग्नि से संयुक्त होकर तुम्हारे प्रिय बनें।

स्वग्नयोहिवार्यंदेवासोदधिरेचनः । स्वग्नयोमनामहे ॥ ८ ॥

सुऽअग्नयः । हि । वार्यम् । देवासः । दधिरे । च । नः । सुऽअग्नयः । मनामहे ॥ ८ ॥

स्वग्नयः शोभनाग्नियुक्तादेवासोदीप्यमानाऋत्विजोनोस्मदीयंवार्यंवरणीयंहविःहियस्माद्दधिरेधृतवन्तः तस्माद्वयंस्वग्नयःशोभनाग्नियुक्ताःसन्तोमनामहेत्वांयाचामहे॥ वार्यं वृञ्वरणे वृङ्संभक्तौ ऋहलोर्ण्यत् ईडवन्देत्यादिनाआद्युदात्तत्वम् । दधिरे इरेचश्चित्त्वादन्तोदात्तत्वम् हिचेति निघातप्रतिषेधः । मनामहे मनज्ञानेव्यत्ययेनशप् ॥ ८॥

८. शोभनीय अग्नि से युक्त और दीप्तिमान् ऋत्विक् लोगों ने हमारा श्रेष्ठ हव्य धारण किया है; इसलिए हम शोभन अग्नि से संयुक्त होकर याचना करते हैं।

अथानउभयेषाममृतमर्त्यानाम् । मिथःसंन्तुप्रशस्तयः ॥ ९ ॥

अथ । नः । उभयेषाम् । अमृत । मर्त्यानाम् । मिथः । सन्तु । प्रऽशस्तयः ॥ ९ ॥

हेअग्नेअमृतमरणरहिताग्ने अथकर्मानुष्ठानानन्तरं मर्त्यानांमनुष्याणां नोस्माकमस्मत्स्वामिनस्तवचोभयेषांमिथःपरस्परं प्रशस्तयःप्रशंसारूपावाचःसन्तु सम्यगनुष्ठितमितियजमानविषयप्रशंसा सम्यगनुगृहीतमित्यग्निविषया ॥ अथ निपातस्यचेतिसंहितायांदीर्घः । अमृत अपादादावितिपर्युदासात्षाष्ठिकमाद्युदात्तत्वम् । मर्त्यानां मृङ्प्राणत्यागे असिहसीत्यादिनातन्प्रत्ययान्तोमर्तशब्दः तस्माद्भवेछन्दसीतियत् यतोनावइत्याद्युदात्तत्वम् । सन्तु श्नसोरल्लोपः । प्रशस्तयः तादौचेतिगतेःप्रकृतिस्वरत्वम् ॥ ९ ॥

९. अग्निदेव! तुम अमर हो और हम मरणशील मनुष्य हैं। आओ, हम परस्पर प्रशंसा करें।

विश्वेभिरग्नेअग्निभिरिमंयज्ञमिदंवचः । चनोधाःसहसोयहो ॥ १० ॥ २१ ॥

विश्वेभिः । अग्ने । अग्निऽभिः । इमम् । यज्ञम् । इदम् । वचः । चनः । धाः । सहसः । यहो इति ॥ १० ॥ २१ ॥

सहसोबलस्ययहोपुत्रहेदेवतारूपाग्ने विश्वेभिरग्निभिःसर्वैराहवनीयादिभिर्युक्तस्त्वंइमंअस्मदीयंयज्ञंइदमस्मदीयंवचःस्तोत्रंचसेवमानः चनोन्नं धाः अस्मभ्यंधेहि विश्वेभिः बहुलंछन्दसीति भिसऐसादेशाभावः । चनः चायृपूजानिशामनयोः चायेरन्नेह्रस्वश्चेत्यसुन्तत्सन्नियोगेननुडागमश्च नित्त्वादाद्युदात्तत्वम् । धाः लुङ्गातिस्थेतिसिचोलुक् बहुलंछन्दस्यमाङ्योगेपीत्यडभावः । सहसोयहोइतिसुबामन्त्रितइतिपराङ्गवद्भावादामन्त्रितस्यचेतिषष्ठ्यामन्त्रितसमुदायोनिहन्यते ॥ १० ॥

१०. बल के पुत्र अग्नि! तुम सब अग्नियों के साथ यह यज्ञ और स्तोत्र ग्रहण करके अन्नप्रदान करो।

इतिप्रथमस्यद्वितीयेएकविंशोवर्गः ॥ २१ ॥

अश्वंनत्वेतित्रयोदशर्चंचतुर्थंसूक्तंपूर्ववद्ध्यादयः त्रयोदश्यानमोमहद्भ्यइत्यस्यास्त्रिष्टुप्छन्दः विश्वेदेवादेवता तथाचानुक्रान्तम्—अश्वंसप्तोनागायत्रंन्त्यादैवीत्रिष्टुबिति । प्रातरनुवाकाश्विनशस्त्रयोरुक्तमावर्जितस्यसूक्तस्यविनियोगः ।

तस्मिन्सूक्तेप्रथमामृचमाह—

अश्वंनत्वावारवन्तंवन्दध्याअग्निंनमोभिः । सम्राजन्तमध्वराणाम् ॥ १ ॥

अश्वम् । न । त्वा । वारऽवन्तम् । वन्दध्यै । अग्निम् । नमःऽभिः । सम्ऽराजन्तम् । अध्वराणाम् ॥ १ ॥

अध्वराणांयज्ञानां सम्राजंतंसम्राट्स्वरूपंस्वामिनंअग्निंत्वां नमोभिः स्तुतिभिः वन्दध्यैव-न्दितुंप्रवृत्ताइतिशेषः अत्रदृष्टान्तः—वारवन्तंवालयुक्तंअश्वंन अश्वमिव अश्वोयथावालैः बाधका-न्मशकमक्षिकादीन्परिहरति तथात्वमपिज्वालाभिरस्मद्विरोधिनःपरिहरसीत्यर्थः ॥ वारवन्तं मतुपःपित्त्वादनुदात्तत्वं घञोञित्त्वादाद्युदात्तोवारशब्दः कर्षात्वतइत्यन्तोदात्तत्वंव्ययेननप्रवर्त-ते यद्वा वारयतिदंशकानितिवारः पचाद्यच् कपिलादित्वाल्लत्वविकल्पः वृषादिः । वन्दध्यै वदिअ-भिवादनस्तुत्योः इदितोनुम्धातोरितिनुम् तुमर्थेसेसेनित्यध्यैप्रत्ययः प्रत्ययस्वरः सम्राजन्तं शपः पित्त्वादनुदात्तत्वं शतुश्चलसार्वधातुकस्वरेणधातुस्वरःशिष्यते समासेकृदुत्तरप्रकृतिस्वरेणसएव। अध्वराणां नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् ॥ १ ॥

१. अग्निदेव! तुम पुच्छयुक्त घोड़े के समान हो, साथ ही यज्ञ के सम्राट् भी हो। हम स्तुति-द्वारा तुम्हारी वन्दना करने में प्रवृत्त हुए हैं।

सघानःसूनुःशवसापृथुप्रगामासुशेवः। मीढ्वाँअस्माकंबभूयात् ॥ २ ॥

सः। घ। नः। सूनुः। शवसा। पृथुऽप्रगामा। सुऽशेवः। मीढ्वान्। अस्माकम्। बभूयात् ॥ २ ॥

सघ सएवाग्निर्नोऽस्माकं सुशेवः सुसुखोभवत्वितिशेषः कीदृशः शवसाबलस्यसूनुःपुत्रः पृथुप्रगामापृथुप्रगमनः किञ्च अस्माकंमीढ्वान्कामानां वर्षिताबभूयात् भवतु॥ सघानः ऋचितुनु-घमक्षुतङ्कुत्रोरुष्याणामितिदीर्घः । शवसा सुपांसुपोभवन्तीतिङसष्टादेशः । पृथुःप्रगामा प्रकर्षे-णगमनंप्रगामः हलश्चेतिघञ् पृथुःप्रगामोयस्यासौपृथुप्रगामा सुपांसुलुगितिपूर्वसवर्णदीर्घआका-रः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्। सुशेवः इण्शीङ्भ्यांवन्निति शेवशब्दोवन्प्रत्ययान्तआद्यु-दात्तः ततोबहुव्रीहौनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वेप्राप्ते आद्युदात्तंद्व्यच्छन्दसीत्युत्तरपदाद्यु-दात्तत्वम् । मीढ्वान् मिहसेचने इत्यस्मात्क्वसुप्रत्ययान्तोदाश्वान्साह्वान्मीढ्वांश्चेतिनिपातितः । बभूयात् भवतेश्छान्दसस्यलिटः विङांतिङोभवन्तीतिलिङादेशः यासुट् स्थानिवद्भावादार्ध-धातुकत्वाच्छबभावः द्विर्वचनेभवतेरइत्यत्वम् तिङ्तिङइतिनिघातः यद्वा एतस्मादेवलिङि छा-न्दसःश्लुः भवतेरइतिलिटिविहितमभ्यासस्यसर्वेविधयश्छन्दसिविकल्प्यन्तइत्यत्वम् ॥ २ ॥

२. अग्नि बल के पुत्र और स्थूल-गमन हैं। वे हमारे ऊपर प्रसन्न हों। हमारी अभिलषित वस्तु का वर्षण करें।

तृतीयामृचमाह—

सनोदूराच्चासाच्चनिमर्त्यादघायोः। पाहिसदमिद्विश्वायुः ॥ ३ ॥

स॒: । न॒: । दू॒रात् । च॒ । आ॒सात् । च॒ । नि । मर्त्यात् । अ॒घ॒ऽयोः ।
पा॒हि । सद॑म् । इत् । वि॒श्वऽआयुः ॥ ३ ॥

हेअग्ने विश्वायुःव्याप्तगमनः सत्वं दूराच्च दूरेपि आसाच्च आसन्नदेशेपि अघायोःअघंपापमनिष्टंकर्तुमिच्छतोमर्त्यात् मनुष्याद्वैरिणोनोस्मान् सदमित् सर्वदैवनिपाहिनितरांपालय । अघायोः सुपआत्मनःक्यच् अश्वाघस्यादित्यात्वम् । पाहि पादादित्वादनिघातः । विश्वायुः इण्गतावित्यस्मात् भावे एतेर्णिच्चेत्युसिः । विश्वमयनंगमनंयस्येतिबहुव्रीहिः बहुव्रीहौविश्वं संज्ञायामितिपूर्वपदान्तोदात्तत्वम् ॥ ३ ॥

३. सर्वत्र-गामी अग्नि! तुम दूर और सन्निकट देश में पापाचारी मनुष्य से हमारी सर्वदा रक्षा करो।

इ॒मम्ू॒षुत्वम॒स्माकं॑स॒निंगा॑य॒त्रंनव्यां॑सम् । अग्ने॑दे॒वेषु॒प्रवो॑चः ॥ ४ ॥

इ॒मम् । ऊ॒म् इति॑ । सु । त्वम् । अ॒स्माक॑म् । स॒निम् । गा॒य॒त्रम् ।
नव्यां॑सम् । अग्ने॑ । दे॒वेषु॑ । प्र । वो॒चः ॥ ४ ॥

हेअग्ने त्वमस्माकमस्मत्संबन्धिनं इममूषु पुरोदेशेनुष्ठीयमानमपि सनिंहविर्दानंनव्यांसं नवतरंगायत्रंस्तुतिरूपंवचोपि देवेषुदेवानामग्रेप्रवोचः प्रब्रूहि ॥ ऊषु निपातस्यचेतिसंहितायां दीर्घत्वं सुञइतिषत्वम् । नव्यांसं नवशब्दादीयसुनि ईकारलोपश्छान्दसः ईयसुनोनित्त्वादाद्युदात्तत्वम् । वोचः छन्दसिलुङ्लङ्लिटइतिलोडर्थेप्रार्थनायांलुङि अस्यतिवक्तीतिच्लेरङादेशः वचउम् ॥ ४ ॥

४. अग्नि! तुम हमारे इस हव्य की बात और इस अभिनव गायत्री छन्द में विरचित स्तोत्र की बात देवों से कहना।

आनो॑भजप॒र॒मेष्वावाजे॑षुम॒ध्य॒मेषु॑ । शिक्षा॒वस्वो॒अन्त॑मस्य ॥५॥२२॥

आ । नः॒ । भ॒ज । प॒र॒मेषु॑ । आ । वाजे॑षु । म॒ध्य॒मेषु॑ । शिक्ष॑ ।
वस्वः॑ । अन्त॑मस्य ॥ ५ ॥ २२ ॥

हेअग्नेपरमेषूत्कृष्टेषु द्युलोकवर्तिषुवाजेष्वन्नेषु नोस्मानाभजसर्वतः प्रापय मध्यमेष्वन्तरिक्षलोकवर्तिषु वाजेष्वाभज अन्तमस्यअन्तिकतमस्यभूलोकस्यसंबन्धिनिवस्वोवसूनि शिक्षदेहि ॥ शिक्ष शिक्षविद्योपादाने शपःपित्त्वादातुस्वरः द्व्यचोतस्तिङइतिसंहितायांदीर्घः । अन्तमस्य अन्तिकतमस्यतमेवादेश्चेतितिकशब्दलोपः ॥ ५ ॥

५. परम (दिव्य लोक का), मध्यम (अन्तरिक्ष का) और अन्तिकस्थ (पृथिवी का) धन प्रदान करो।

॥ इतिप्रथमस्यद्वितीयेद्वाविंशोवर्गः ॥ २२ ॥

षष्ठीमृचमाह—

विभक्तासिचित्रभानोसिन्धौरूर्मांउपाकआ। सद्योदाशुषेंक्षरसि॥६॥

विऽभक्ता। असि। चित्रभानो इति चित्रऽभानो। सिन्धोः। ऊर्मौ। उपाके। आ। सद्यः। दाशुषे। क्षरसि॥ ६॥

हेचित्रभानो विचित्ररश्मियुक्ताग्ने विभक्ता विशिष्टस्यधनस्य प्रापयितासि तत्रदृष्टान्तउच्यते—आकारउपमार्थः यथासिन्धोर्नद्याउपाकेसमीपे ऊर्मौऊर्मितरङ्गोपलक्षितंकुल्यादिरूपं प्रवाहंविभजन्तितद्वत् दाशुषेहविर्दत्तवतेयजमानायसद्यस्तदानीमेव क्षरसिकर्मफलभूतांवृष्टिंकरोषि॥ सिन्धोः स्यन्दूप्रस्रवणे स्यन्देःसंप्रसारणंधश्चेत्युप्रत्ययः निदित्यनुवृत्तेराद्युदात्तत्वम्। ऊर्मिः अर्तेरूच्चेतिमिः प्रत्ययस्वरः। दाशुषे धृतवतायदाशुषेइत्यत्रोक्तम्॥ ६॥

६. विलक्षण-किरण अग्नि! सिन्धु के पास तरङ्ग की तरह तुम धन के विभागकर्त्ता हो। हव्यदाता को तुम शीघ्र कर्मफलप्रदान करो।

यमग्नेपृत्सुमर्त्यमवावाजेषुयंजुनाः। सयन्ताशश्वतीरिषः॥ ७॥

यम्। अग्ने। पृत्ऽसु। मर्त्यम्। अवाः। वाजेषु। यम्। जुनाः। सः। यन्ता। शश्वतीः। इषः॥ ७॥

हे अग्ने पृत्सुसंग्रामेषु यंमर्त्यंयजमानमवाः अवसिरक्षसि यंपुरुषंवाजेषुसंग्रामेषुजुनाःप्रेरयसिसनरःयजमानः शश्वतीरिषः नित्यान्यन्नानियन्ता नियन्तुंसमर्थोभवति॥ पृत्सु पदादिषुमांस्पृत्स्नूनामुपसंख्यानमितिपृतनाशब्दस्यपृदादेशः सावेकाचइतिविभक्तेरुदात्तत्वम्। अवाः आवः अकाराकारयोर्विपर्ययः यद्वा लेट्याडागमः इतश्चेतिसिप् इकारस्यलोपः। जुनाः जूइतिगत्यर्थः सौत्रोधातुः लङःसिप् क्र्यादिभ्यःश्ना बहुलंछन्दस्यमाङ्योगेपीत्यडभावः यद्वृत्तयोगादनिघातः। यन्ता तृनोनित्त्वादाद्युदात्तत्वम्। शश्वतीः उगितश्चेतिङीप्॥ ७॥

७. अग्नि! युद्ध-क्षेत्र में तुम जिस मनुष्य की रक्षा करते हो, जिसे तुम रणाङ्गण में भेजते हो, वह नित्य अन्न प्राप्त करेगा।

अष्टमीमृचमाह—

नकिरस्यसहन्त्यपर्येताकयस्यचित्। वाजोअस्तिश्रवाय्यः॥ ८॥

नकिः। अस्य। सहन्त्य। परिऽएता। कयस्य। चित्। वाजः। अस्ति। श्रवाय्यः॥ ८॥

हेसहन्त्य शत्रूणामभिभवनशीलाग्ने अस्यत्वद्भक्तस्ययजमानस्य कयस्यचित् कस्यापिपर्येतानकिः आक्रमितानास्ति किञ्चास्ययजमानस्यश्रवाय्यः श्रवणीयोवाजोस्तिबलविशेषोस्ति ॥ कयस्य यकारोपजनश्छान्दसः । श्रवाय्यः श्रुदक्षिस्पृहिग्रहिभ्यआय्यइत्याय्यप्रत्ययः ॥ ८ ॥

८. रिपु-दमन अग्नि! तुम्हारे भक्त पर कोई आक्रमण नहीं कर सकता; क्योंकि उसके पास प्रसिद्ध शक्ति है।

नवमीमृचमाह—

सवाजंविश्वचर्षणिरर्वद्भिरस्तुतरुता । विप्रेभिरस्तुसनिता ॥ ९ ॥

सः । वाजम् । विश्वऽचर्षणिः । अर्वत्ऽभिः । अस्तु । तरुता ।
विप्रेभिः । अस्तु । सनिता ॥ ९ ॥

विश्वचर्षणिः सर्वैर्मनुष्यैरुपेतः सोग्निरर्वद्भिरश्वैर्वाजंसंग्रामं तरुतातारयितास्तु विप्रेभिः मेधाविभिः ऋत्विग्भिःसहितस्तुष्टोग्निः सविताफलस्यदातास्तु ॥ विश्वेचर्षणयोयस्य बहुव्रीहौ तेत्यादौतृन्नन्तोनिपातितः निपातनादेवेकारस्योत्वम् ॥ ९ ॥

९. समस्त-मानव-पूजित अग्नि ने घोड़े के द्वारा हमें युद्ध से पार करा दिया। मेधावी ऋत्विकों के कर्म के फलदाता हो।

आप्तोर्यामेहोतुरतिरिक्तोक्थेजराबोधतद्विविड्ढीतिस्तोत्रियस्तृचः यस्यपशवोनोपधरेरन्निति खण्डेसूत्रितम्—अतिरिक्तोक्थानिजराबोधतद्विविड्ढीति ।

तामेतांसूक्तेदशमीमृचमाह—

जराबोधतद्विविड्ढिविशेविशेयज्ञियाय । स्तोमंरुद्रायदृशीकम् ॥ १० ॥ २३

जराऽबोध । तत् । विविड्ढि । विशेऽविशे । यज्ञियाय । स्तोमम् ।
रुद्राय । दृशीकम् ॥ १० ॥ २३ ॥

हेजराबोध जरयास्तुत्याबोध्यमानाग्नेविशेविशे तत्तद्यजमानरूपप्रजानुग्रहार्थं यज्ञियाय यज्ञसंबन्ध्यनुष्ठानसिद्ध्यर्थं तद्देवयजनंविविड्ढिप्रविश यजमानोपिरुद्रायक्रूरायाग्नयेतुभ्यंदृशीकंदर्शनीयंसमीचीनं स्तोमंस्तोत्रंकरोतीतिशेषः अत्रयास्कएवंव्याख्यातवान्—जरास्तुतिर्जरतेःस्तुतिकर्मणस्तांबोधतयाबोधयितवरितिवा तद्विविड्ढितत्कुरुमनुष्यस्यमनुष्यस्ययज्ञियायस्तोमंरुद्रायदर्शनीयमिति[1] ॥ जराबोध जॄष्वयोहानौ अत्रस्तुत्यर्थः पिद्भिदादिभ्योङित्यङ्प्रत्ययः ततश्चाप्

१ नि० १०. ८.।

जरयास्तुत्यावोधोयस्यासौजरावोधः यद्वा जरयावोध्यतइतिजरावोधः कर्मणिघञ् आमन्त्रितायुदात्तत्वम्। विविड्ढि विशप्रवेशने लोटोहिः बहुलंछन्दसीतिशपःश्लुः अभ्यासहलादिशेषौ हुझल्भ्योहेर्धिरितिहेर्धिरादेशः षत्वष्टुत्वे यद्वा विष्लृव्याप्तावित्यस्माल्लोणमध्यमैकवचने अभ्यासस्यगुणाभावः। विशेविशे सावेकाचइतिचतुर्थ्याउदात्तत्वं अनुदात्तंचेत्याम्रेडितानुदात्तत्वम्। यज्ञियाय यज्ञर्त्विग्भ्यांघखञावितिघः। दृशीकं अनिदृशिभ्यांचेतिकीकन्प्रत्ययः नित्वादाद्युदात्तः ॥ १० ॥

१०. अग्नि! प्रार्थना-द्वारा तुम जागो। विविध यजमानों पर कृपा करके यज्ञानुष्ठान के लिए यज्ञ में प्रवेश करो। तुम रुद्र या उग्र हो। रुचिकर स्तोत्रों से तुम्हारी स्तुति करते हैं।

इतिप्रथमस्यद्वितीयेत्रयोविंशोवर्गः ॥ २३ ॥

एकादशीमृचमाह—

सनोमहाँअनिमानोधूमकेतुःपुरुश्चन्द्रः। धियेवाजायहिन्वतु ॥ ११ ॥

सः। नः। महान्। अनिऽमानः। धूमऽकेतुः। पुरुऽचन्द्रः। धिये। वाजाय। हिन्वतु ॥ ११ ॥

सोग्निर्नोस्मान् धियेकर्मणे वाजायान्नायचहिन्वतुप्रीणयतु कीदृशः महान् गुणाधिकः अनिमानः निमानवर्जितः अपरिच्छिन्नइत्यर्थः धूमकेतुः धूमेनज्ञाप्यमानः पुरुश्चन्द्रः बहुदीप्तिः॥ महाँअनीत्यत्रसंहितायांनकारस्यरुत्वानुनासिकावुक्तौ। अनिमानः नविद्यतेनिमानोऽस्येतिबहुव्रीहौ नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्। धूमकेतुः इषियुधीन्धिदसिश्याधूसूभ्योमक् चायःकिः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्। पुरुश्चन्द्रः चदिआह्लादनेदीप्तौच अस्मात्स्फायितञ्चीत्यादिनाकर्तरिरक् पुरुश्चासौचन्द्रश्चेतिसमासान्तोदात्तत्वं ह्रस्वाच्चन्द्रोत्तरपदेमन्त्रे इतिसुट् तस्यश्चुत्वेनशकारः। धिये सावेकाचइतिचतुर्थ्याउदात्तत्वम्। हिन्वतु हिविप्रीणनार्थः इदितोनुम्धातोरितिनुम् ॥ ११ ॥

११. अग्नि विशाल, असीम-धूम-केतु और प्रभूत-दीप्ति-सम्पन्न हैं। अग्नि हमारे यज्ञ और अन्न में प्रसन्न हों।

सरेवाँइवविश्पतिर्दैव्यःकेतुःशृणोतुनः। उक्थैरग्निर्बृहद्भानुः ॥ १२ ॥

सः। रेवान्ऽइव। विश्पतिः। दैव्यः। केतुः। शृणोतु। नः। उक्थैः। अग्निः। बृहत्ऽभानुः ॥ १२ ॥

सोग्निःउक्थैःस्तोत्रैर्युक्तानस्मान्शृणोतु तत्रदृष्टान्तः—रेवानिव यथालोकेधनवान्राजा बन्दिनांस्तोत्रंशृणोतितद्वत् कीदृशः विश्पतिःप्रजापालकः दैव्यःदेवानांसंबन्धी अग्निर्वैदेवानांहो-

तेतिश्रुत्यन्तरात्। केतुः दूतवद्ज्ञापकः अग्निर्देवानांदूतआसीदितिश्रुतेः। बृहद्भानुः प्रौढरश्मिः॥ सरेवान् एतत्तदोरितिसोर्लोपः रयेर्मतौबहुलमितिसंप्रसारणं परपूर्वत्वं आद्गुणः छन्दसीरइतिमतुपो-वत्वं आरेशब्दाच्चमतुपउदात्तत्वंवक्तव्यमितिमतुपउदात्तत्वम्। विश्पतिः परादिश्छन्दसिबहुलमि-त्युत्तरपदाद्युदात्तत्वम्। बृहद्भानुः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् ॥ १२ ॥

१२. अग्नि प्रजा-रक्षक, देवों के होता, देवदूत, स्तोत्र-पात्र और प्रौढ़-किरणशाली हैं। वे धनी लोगों की तरह हमारी स्तुति सुनें।

दर्शपूर्णमासयोःस्रुगादापनात्पूर्वभाविनिजपेनमोमहद्भ्यइत्येषा ब्रह्मौदनेप्राशिष्यमाणइति खण्डे—सूर्योनोदिवस्पातुनमोमहद्भ्योनमोअर्भकेभ्यइतिसूत्रितम्।

नमो॑ म॒हद्भ्यो॒ नमो॑ अर्भ॒केभ्यो॒ नमो॒ युव॑भ्यो॒ नम॑ आशि॒नेभ्यः॑ । यजा॑म दे॒वान्यदि॑ श॒क्नवा॑म॒ मा ज्याय॑सः॒ शंस॒मा वृ॑क्षि देवाः ॥ १३ ॥ २४ ॥

नमः॑ । म॒हत्ऽभ्यः॑ । नमः॑ । अ॒र्भ॒केभ्यः॑ । नमः॑ । युव॑ऽभ्यः । नमः॑ । आ॒शि॒नेभ्यः॑ । यजा॑म । दे॒वान् । यदि॑ । श॒क्नवा॑म । मा । ज्याय॑सः । शंस॑म् । आ । वृ॒क्षि॒ । दे॒वाः॒ ॥ १३ ॥ २४ ॥

अग्निनाप्रेरितःशुनःशेपोविश्वान्देवाननयातुष्टाव तथाचाम्नायते—तमग्निरुवाचविश्वान्नु देवान्स्तुह्यथत्वोत्स्रक्ष्यामीतिसविश्वान्देवान्तुष्टावनमोमहद्भ्योनमोअर्भकेभ्यइत्येतयर्चेति। महा-न्तोगुणैरधिकाः अर्भकागुणैर्न्यूनायुवानस्तरुणाःआशिनावयसाव्याप्ताःवृद्धाः यथोक्तचतुर्विधदे-हयुक्तेभ्योदेवेभ्योनमोस्तु यदिशक्नवाम कथंचिद्धनादिसंपत्त्याशक्ताश्चेत् तदानींदेवान्यजामहेदेवाः ज्यायसोज्येष्ठस्यदेवताविशेषस्य आ सर्वतःप्रसृतंशंसंस्तोत्रंआवृक्षि अहंविच्छिन्नंमाकार्षम्॥आ-शिनेभ्यः अशूव्याप्तौ बहुलमन्यत्रापीत्यौणादिकइनच्प्रत्ययः चितइत्यन्तोदात्तत्वम्। यजाम शपः पित्त्वादनुदात्तत्वं तिङश्चलसार्वधातुकस्वरेणधातुस्वरः। शक्नवाम शक्लृशक्तौ आद्युत्तमस्यपिच्चेति तिङःपिद्वद्भावादनुदात्तत्वेसतिविकरणस्वरः निपातैर्यद्यदिहन्तेतिनिघातप्रतिषेधः। ज्यायसः प्र-शस्यशब्दादीयसुनिज्यचेतिज्यादेशः ज्यादादीयसइतिईयसुनईकारस्यात्वं नित्त्वादाद्युदात्तत्वम्। शंसं हलश्चेतिघञ्। वृक्षि ओव्रश्चूछेदने व्यत्ययेनात्मनेपदोत्तमपुरुषैकवचनं इट् च्लेःसिच् स्वर-तिसूतीत्यादिनाइडभावः स्कोःसंयोगाद्योरित्युपधासकारलोपः व्रश्चादिनाषत्वं षढोःकःसीतिकत्वं आदेशप्रत्यययोरितिषत्वं नमाङ्योगइत्यडभावः ॥ १३ ॥

१३. बड़े, बालक, युवक और वृद्ध देवों को नमस्कार करते हैं। हो सकेगा, तो हम देवों की पूजा करेंगे। देवगण! हम वृद्ध देवों की स्तुति न छोड़ दें।

इतिप्रथमस्यद्वितीयेचतुर्विंशोवर्गः ॥ २४ ॥

---

१ तै० सं. २. ५. ९.। २ तै०सं. २. ५. ८.। ३ ऐ० ब्रा० ७. १६।

यत्रग्रावेतिपञ्चमंसूक्तंनवर्चं आदितःषळनुष्टुभः आयजीइत्याद्यास्तिस्रोगायत्र्यः आदितश्चतसृणामिन्द्रोदेवता ततोद्वेउलूखलदेवत्ये तदनन्तरभाविन्यौउलूखलमुसलोभयदेवताके अन्त्यायाउच्छिष्टमित्यस्याहरिश्चन्द्राधिषवणचर्मसोमानामन्यतमोदेवता तथाचबृहद्देवतायामुक्तम्—चर्माधिषवणीयंवासोमंवान्त्याप्रशंसतीति। तदुक्तमनुक्रमण्यां यत्रग्रावानवषळनुष्टुबादिगायत्र्यौलूखल्यौपरेमौसल्यौचप्रजापतेर्हरिश्चन्द्रस्यान्त्याचर्मप्रशंसावेति । आद्याश्चतस्रोज्ञःसवेहोमेविनियुक्ताः पञ्चम्याद्याश्चतस्रोभिषवे अन्त्याद्रोणकलशेसोमावनयने तथाचब्राह्मणम्—अथहैतंशुनःशेपोज्ञःसवंददर्शतमेताभिश्चतसृभिरभिसुषावयच्चिद्धित्वंगृहेगृहइत्यथैनंद्रोणकलशमभ्यवनिनायोच्छिष्टंचम्वोर्भरेत्येतयर्चाथहास्मिन्नन्वारब्धेपूर्वाभिश्चतसृभिःसस्वाहाकाराभिर्जुहवांचकारेति ॥

तत्रप्रथमामृचमाह—

यत्र॒ग्रावा॑पृ॒थुबु॑ध्न ऊ॒र्ध्वोभव॑ति॒सोत॑वे। उ॒लूख॑लसुताना॒मवेद्वि॑न्द्रजल्गुलः ॥१

यत्र॑ । ग्रावा॑ । पृ॒थुऽबु॑ध्नः । ऊ॒र्ध्वः । भव॑ति । सोत॑वे । उ॒लूख॑लऽसुतानाम् । अव॑ । इत् । ऊम् इति॑ । इ॒न्द्र॒ । ज॒ल्गु॒लः ॥ १ ॥

हेइन्द्र यस्मिन्नज्ञःसवेकर्मणिसोतवेभिषवार्थंग्रावापाषाणः पृथुबुध्नः स्थूलमूलऊर्ध्वेउन्नतोभवति तस्मिन्कर्मणि उलूखलसुतानांउलूखलेनाभिषुतानांरसंअवेद् स्वकीयत्वेनावगत्यैवजल्गुलोभक्षय ॥ पृथुबुध्नः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वं निपातैर्यद्यदिहन्तेतिनिघातप्रतिषेधः । सोतवे षुञ्अभिषवे तुमर्थेसेसेनितितवेन्प्रत्ययः नित्त्वादाद्युदात्तत्वम् । उलूखलसुतानां उलूखलेनसुतानांतृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरत्वम् । जल्गुलः गलअदने अस्माद्यङ्लुकि लेण्मध्यमैकवचने लेटोडाटावित्यडागमः इतश्चलोपइतीकारलोपः उपधायाउत्वंहलादिशेषाभावश्चपृषोदरादित्वात् ॥ १ ॥

१. जिस यज्ञ में सोमरस चुआने के लिए स्थूलमूल पत्थर उठाये जाते हैं, हे इन्द्र! उसी यज्ञ में ओखल से तैयार किया हुआ सोमरस, अपना जानकर, पान करो।

द्वितीयामृचमाह—

यत्र॒द्वावि॑वज॒घना॑धिषव॒ण्या॑कृ॒ता। उ॒लूख॑लसुताना॒मवेद्वि॑न्द्रजल्गुलः ॥२॥

यत्र॑ । द्वौऽइ॑व । ज॒घना॑ । अ॒धि॒ऽस॒व॒न्या॑ । कृ॒ता । उ॒लूख॑लऽसुतानाम् । अव॑ । इत् । ऊम् इति॑ । इ॒न्द्र॒ । ज॒ल्गु॒लः ॥ २ ॥

---

१ ऐ० ब्रा० ७. १७. ।

यत्रयस्मिन्कर्मणिअधिषवण्याउभेअधिषवणफलकेद्वाविवजघनाद्वौजघनप्रदेशाविव जघनंजङ्घन्यतइतियास्कः। कृताविस्तीर्णेकृतेसंपादिते अन्यत्पूर्ववत् ॥ जघना हन्तेः शरीरावयवेद्वेचेतिहन्धातोः अच् द्वित्वं कर्दमादित्वान्मध्योदात्तः सुपांसुलुगित्याकारः । अधिषवण्या षुञ्अभिषवे ल्युट् भवेछन्दसीतियत् उपसर्गात्सुनोतीतिषत्वं तित्स्वरितमितिस्वरितः नच यतोनावइत्याद्युदात्तत्वं तत्रहिनिष्ठाचद्व्यजनादित्यस्यानुवृत्तेः द्व्यच्कस्यैवतदिति। कृता पूर्ववदाकारः॥ २ ॥ तृतीयामृचमाह—

२. जिस यज्ञ में सोम कूटने के लिए दो फलक, जांघों की तरह, विस्तृत हुए हैं, उसी यज्ञ में ओखल-द्वारा प्रस्तुत सोमरस, अपना जानकर, पान करो।

यत्रनार्यपच्यवमुपच्यवंचशिक्षते। उलूखलसुतानामवेद्विन्द्रजल्गुलः॥३॥

यत्र। नारी। अपऽच्यवम्। उपऽच्यवम्। च। शिक्षते। उलूखलऽसुतानाम्। अव। इत्। ऊम् इति। इन्द्र। जल्गुलः॥३॥

यत्रयस्मिन्कर्मणिनारीपत्नी अपच्यवं शालायानिर्गमनं उपच्यवंच शालामाप्तिंचशिक्षते अभ्यासंकरोति अन्यत्पूर्ववत् ॥ अपच्यवं च्युङ्गतौ ऋदोरबित्यप् गुणावादेशौ थाथादिनोत्तरपदान्तोदात्तत्वं एवमुपच्यवम् । शिक्षते शिक्षविद्योपादाने अदुपदेशात्लसार्वधातुकानुदात्तत्वेधातुस्वरः निपातैर्यद्यदिहन्तेतिनिघातप्रतिषेधः ॥ ३ ॥

३. जिस यज्ञ में यजमान-पत्नी पैठती और वहां से बाहर निकलती रहती है, इन्द्र! उसी यज्ञ में ओखल-द्वारा तैयार सोमरस, अपना जानकर, पान करो।

यत्रमन्थांविबध्नतेरश्मीन्यमितवाइव। उलूखलसुतानामवेद्विन्द्रजल्गुलः॥४

यत्र। मन्थाम्। विऽबध्नते। रश्मीन्। यमितवैऽइव। उलूखलऽसुतानाम्। अव। इत्। ऊम् इति इन्द्र। जल्गुलः॥ ४ ॥

यस्मिन्कर्मणिमन्थां आशिरमथनहेतुंमन्थानंविबध्नन्ति तत्रदृष्टान्तः—रश्मीनश्वबन्धनार्थान्प्रग्रहान् यमितवाइवनियन्तुमिवअन्यत्पूर्ववत् ॥ मन्थां पथिमथ्यृभुक्षामादितिद्वितीयायामपि व्यत्ययेनात्वं प्रातिपदिकस्वरेणान्तोदात्तत्वेमाप्ते पथिमथोःसर्वनामस्थानइत्याद्युदात्तत्वं यद्वा मथ्यते अनयेतिमन्था मथिविलोडनेइत्यस्मात् हलश्चेतिकरणेघञ् ततष्टाप् ञित्वादाद्युदात्तत्वम् । विबध्नते बन्धबन्धने क्र्यादिभ्यःश्ना अनिदितामितिनलोपे श्नाभ्यस्तयोरातइत्याकारलोपः प्रत्ययस्वरः तिङिचोदात्तवतीतिगतेर्निघातः। यमितवै यमउपरमे तुमर्थेसेसेनितितवैप्रत्ययः इडागमश्छान्दसः यद्वा ण्यन्तात्तवैप्रत्ययस्येडागमेसति णिलोपश्छान्दसः अन्तश्चतवैयुगपदित्याद्यन्तयोरुदात्तत्वम्॥४॥

४. जिस यज्ञ में लगाम की तरह रस्सी से मन्थन-दण्ड बांधा जाता है, उसी यज्ञ में इन्द्र! ओखल-द्वारा प्रस्तुत सोमरस, अपना जानकर, पान करो।

अभिषवेविनियुक्तांचतसृषुमध्येप्रथमांसूक्तेपञ्चमीमृचमाह—

यच्चिद्धित्वंगृहेगृंहउलूंखलकयुज्यसें । इहद्युमत्तमंवदजयंतामिवदुन्दुभिः ॥ ५ ॥ २५ ॥

यत् । चित् । हि । त्वम् । गृहेऽगृंहे । उलूंखलक । युज्यसें । इह । द्युमत्ऽतंमम् । वद । जयंताम्ऽइव । दुन्दुभिः ॥ ५ ॥ २५ ॥

हे उलूखलक यच्चिद्धि यद्यपित्वं अवघातार्थं गृहेगृहेयुज्यसे तथापीहवैदिककर्मणितीव्रमुसलप्रहारेणद्युमत्तमं अतिशयेनदीप्तंप्रभूतध्वनियुक्तंशब्दंवद तत्रदृष्टान्तः—जयतामिवदुन्दुभिः यथायुद्धेजयंप्राप्नुवतांराज्ञांदुन्दुभिर्महान्तंध्वनिंकरोतितद्वत उलूखलशब्दंयास्कएवंव्याख्यातवान्—उलूखलमुरुकरंवोर्करंवोर्ध्वखंवोरुमेकुर्वित्यब्रवीत्तदुलूखलमभवदुरुकरंचैतत्तदुलूखलमित्याचक्षतेपरोक्षेणेतिचब्राह्मणमिति[1] ॥ उलूखलक अपादादावितिपर्युदासादाष्टमिकनिघाताभावेषाष्ठिकमाद्युदात्तत्वम् । युज्यसे अदुपदेशाल्लसार्वधातुकानुदात्तत्वेयक्स्वरःशिष्यते नचतिङ्ङतिङइतिनिघातः निपातैर्यद्यदिहन्तेतिप्रतिषेधात् । द्युमत्तमं दीव्यतेर्दीप्त्यर्थस्यसंपदादिलक्षणः क्विप् दिवउदित्युत्वं यणादेशे ह्रस्वनुड्भ्यांमतुबितिमतुपउदात्तत्वं ननुदिवउदित्यत्रप्रातिपदिकंगृह्यते नधातुरित्युक्तत्वात् अक्षद्यूरित्यादाविवात्राप्यूठाभवितव्यं एवंतर्हिदीप्तिमत्स्वर्गवाचकेनदिवुप्रातिपदिकेनदीप्तिर्लक्ष्यतेइत्युत्वंभविष्यति ॥ ५ ॥

५. ओखल ! यद्यपि घर-घर तुमसे काम लिया जाता है, तो भी इस यज्ञ में विजयी लोगों की दुन्दुभि की तरह तुम ध्वनि करते हो।

॥ इतिप्रथमस्यद्वितीयेपञ्चविंशोवर्गः ॥२५॥

षष्ठीमृचमाह—

उतस्मंतेवनस्पतेवातोविवात्यग्रमित् । अथोइन्द्रांयपातंवेसुनुसोमंमुलूखल ॥ ६ ॥

उत । स्म । ते । वनस्पते । वातः । वि । वाति । अग्रम् । इत् । अथो इतिं । इन्द्राय । पातंवे । सुनु । सोमंम् । उलूखल ॥ ६ ॥

उतअपिचहेवनस्पते उलूखलरूपवृक्ष तेअग्रमित् तवपुरतएव वातोविवातिस्म त्वरोपेतमुसलप्रहारैर्वायुर्विशेषेणप्रसरतिखलु अथोऽनन्तरं हेउलूखल इन्द्रायइन्द्रोपकारार्थंपातवे

---

[1] नि० ९.२०.

पातुंसोमंसुनु सोमाभिषवंकुरु ॥ वनस्पते पारस्करादित्वात्सुट् कार्यैकारणशब्दः । पातवे पा- पाने तुमर्थेसेसेनितितवेन्प्रत्ययः ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वम् । सुनु उतश्चप्रत्ययादसंयो- गपूर्वादितिहेर्लुक् विकरणस्वरेणान्तोदात्तत्वं पादादित्वादनिघातः । उलूखल उर्ध्वंखम- स्येत्युलूखलः पृषोदरादिः ॥ ६ ॥

६. हे ओखल-रूप काष्ठ ! तुम्हारे सामने वायु बहती है; इसलिए ओखल ! इन्द्र के पान के लिए सोमरस तैयार करो।

आयजीवाजसातमाताह्यू१च्चाविजर्भृतः। हरींइवान्धांसिबप्सता॥७॥

आयजी इत्याऽयजी । वाजऽसातमा । ता । हि । उच्चा । विऽजर्भृतः । हरींइवेति हरींऽइव । अन्धांसि । बप्सता ॥ ७ ॥

येउलूखलमुसले आयजीसर्वतोयज्ञसाधने वाजसातमाअतिशयेनान्नप्रदे ताहि ते खलु उच्चाप्रौढध्वनिर्यथाभवतितथाविजर्भृतः विशेषेणपुनःपुनर्विहारंकुरुतः तत्रदृष्टान्तः—अन्धांस्यन्ना- निचणकादीनिखाद्यानिबप्सन्तौभक्षयन्तौहरीइव इन्द्रस्याश्वाविव अत्रयास्कएवंव्याचख्यौ— आयजीआयष्टव्येअन्नानांसंभक्ततमेतेह्युच्चैर्विह्रियेतेहरीइवान्नानिभक्षयन्ताविति[1] ॥ आय- जी यजेरौणादिकःकरणेइप्रत्ययः कृदुत्तरपदप्रकृतिस्वरत्वम् । वाजसातमा वाजंसनोती- तिवाजसाः षणुदाने जनसनेत्यादिनाविट्प्रत्ययः विड्वनोरनुनासिकस्यादित्यात्वं कृ- दुत्तरप्रकृतिस्वरत्वं आतिशायनिकस्तमप् सुपांसुलुगितिपूर्वसवर्णदीर्घः । विजर्भृतः हृञ्हरणे अस्माद्यङ्लुकिअभ्यासहलादिशेषोरुग्जशत्वेषुकृतेषु रुग्रिकौचलुकीतिरुगागमः ततः प्रत्य- यलक्षणेनधातुसंज्ञायांलिटिद्विवचनंतस् अदादिवच्चेतिवचनाच्छपोलुक् गुणेप्राप्तेग्क्ङितिचेतिप्रति- षेधः हृग्रहोर्भश्छन्दसीतिभत्वं प्रत्ययस्वरः हिचेतिनिघातप्रतिषेधः । बप्सता भसभक्षणदी- प्त्योः लटःशतृ जुहोत्यादिभ्यःश्लुः घसिभसोर्हलिचेत्युपधालोपः नाभ्यस्तादितिनुमप्रतिषेधः अभ्यस्तानामादिरित्याद्युदात्तत्वम् ॥ ७ ॥

७. हे अन्न-दाता यज्ञ के दोनों साधन ओखल और मूसल ! जिस प्रकार अपना खाद्य चबाते समय इन्द्र के दोनों घोड़े ध्वनि करते हैं, उसी प्रकार तुमुल ध्वनि से युक्त होकर तुम लोग बार-बार बिहार करते हो।

अष्टमीमृचमाह—

तानोअद्यवनस्पतीऋष्वावृष्वेभिःसोतृभिः । इन्द्रायमधुमत्सुतम् ॥८॥

ता । नः । अद्य । वनस्पती इति । ऋष्वौ । ऋष्वेभिः । सोतृऽभिः । इन्द्राय । मधुऽमत् । सुतम् ॥ ८ ॥

---

१ नि० ९. ३६.।

अद्यास्मिन्कर्मणिहेवनस्पती उलूखलमुसलरूपौ तौयुवांऋष्वेभिर्दर्शनीयैः सोतृभिःअभिषवहेतुभिः सहऋष्वौदर्शनीयौभूत्वाइन्द्रायइन्द्रार्थंमधुमत् माधुर्येपेतंसोमद्रव्यं नोस्मदीयंसुतंअभिषुणुतम् ॥ ता सुपांसुलुगित्याकारः । नोअद्य प्रकृत्यान्तःपादमितिप्रकृतिभावः । वनस्पती उभयपदप्रकृतिस्वरेप्राप्ते आमन्त्रितस्येतिसर्वानुदात्तत्वं प्लुतप्रगृह्याअचीतिप्रकृतिभावः । सुतं षुञ्अभिषवे बहुलंछन्दसीतिविकरणस्यलुक्निघातः ॥ ८ ॥

८. हे सुदृश्य दोनों काष्ठ (ओखल और मूसल) ! दर्शनीय अभिषव-मंत्र-द्वारा आज तुम लोग इन्द्र के लिए मधुर सोमरस प्रस्तुत करो।

उच्छिष्टंचम्वोर्भरसोमंपवित्रआसृज । निधेहिगोरधित्वचि॥९॥२६॥

उत् । शिष्टम् । चम्वोः । भर । सोमम् । पवित्रे । आ । सृज । नि । धेहि । गोः । अधि । त्वचि ॥ ९ ॥ २६ ॥

हेऋत्विग्विशेष हरिश्चन्द्र देवतापक्षेहेहरिश्चन्द्रेतिवा चम्वोः सोमस्यभक्षत्वसंपादकयोरधिषवणफलकयोः शिष्टं अभिषवराहित्येनावशिष्टंसोमंउद्भर शकटस्योपरिहर सोमंअभिषुतंसोमं पवित्रेदशापवित्रे आसृज आनीयप्रक्षिप प्रक्षेपसत्यवशिष्टंसोमं गोस्त्वचिआनडुहेचर्मणिअधिनिधेहि अध्यारोप्यस्थापय ॥ चम्वोः चमुअदने चम्यतेभक्ष्यतेत्रेतिचमूः कृषिचमीत्यादिना औणादिकऊःप्रत्ययः प्रत्ययस्वरः सप्तमीद्विवचनस्य उदात्तस्वरितयोर्यणःस्वरितइतिस्वरितत्वं उदात्तयणोहल्पूर्वादितिव्यत्ययेननभवति । भर हृग्रहोर्भः । धेहि घ्वसोरेद्धावभ्यासलोपश्चेत्येत्वाभ्यासलोपौ निघातः । त्वचि सावेकाचइतिविभक्तेरुदात्तत्वम्॥ ९ ॥

९. हे ऋत्विक् ! दोनों अभिषव-फलकों (पात्र-विशेष) से अवशिष्ट सोम उठाओ, उसे पवित्र कुश के ऊपर रक्खो। अनन्तर उसे गो-चर्म-(निर्मित पात्र) पर रक्खो।

इतिप्रथमस्यद्वितीयेषड्विंशोवर्गः ॥ २६ ॥

यच्चिद्धिसत्यसोमपाइतिषष्ठंसूक्तंसप्तर्चंशुनःशेपस्यार्षं पाङ्क्तमैन्द्रं अनुक्रमणिकाच—यच्चिद्धिसप्तपाङ्क्तमिति पृष्ठ्यषडहस्यपञ्चमेहनिमाध्यंदिनेसवनेहोत्रकायच्चिद्धीतिसप्तर्चंसूक्तंर्नीस्तृचान्कृत्वास्वस्वशस्त्रेएकैकंतृचमावपेरन् चतुर्थेहनीतिखण्डे—यच्चिद्धिसत्यसोमपाइत्येकैकमेवमेवेति सूत्रितम् ।　　तत्रप्रथमामृचमाह—

यच्चिद्धिसत्यसोमपाअनाशस्ताइवस्मसि । आतूनंइन्द्रशंसयगोष्वश्वेषु शुभ्रिषुसहस्रेषुतुवीमघ ॥ १ ॥

यत् । चित् । हि । सत्य । सोमऽपाः । अनाशस्ताःऽइव । स्मसि । आ । तु । नः । इन्द्र । शंसय । गोषु । अश्वेषु । शुभ्रिषु । सहस्रेषु । तुविऽमघ ॥ १ ॥

विश्वेर्देवैःप्रेरितःशुनःशेपःएतदादिकाभिर्द्वाविंशतिसंख्याकाभिः ऋग्भिरिन्द्रंतुष्टाव तथाचब्राह्मणम्—तंविश्वेदेवाऊचुरिन्द्रोवैदेवानामोजिष्ठोबलिष्ठःसहिष्ठःसत्तमःपारयिष्णुतमस्तंनुस्तुह्यथत्वोत्स्रक्ष्यामइति सइन्द्रंतुष्टावयच्चिद्धिसत्यसोमपाइत्येतेनसूक्तेनउत्तरस्यपञ्चदशभिरिति[1] ॥ हे सोमपाःसोमस्यपातः सत्य सत्यवादिन् इन्द्र यच्चिद्धियद्यपिवयंअनाशस्ताइवस्मसि अप्रशस्ताइवभवामः तथापि हेतुवीमघबहुधनेन्द्र त्वंगोषुअश्वेषुशुभ्रिषुशोभनेषु सहस्रेषुसहस्रसंख्याकेषुच निमित्तभूतेषु नोस्मानाशंसयसर्वतःप्रशस्तान्कुरु अस्मद्दोषमनपेक्ष्यगवादीन् प्रयच्छेत्यर्थः ॥ सोमपाः विजन्तः आमन्त्रितनिघातः । अनाशस्ताइव शंसुस्तुतौ निष्ठेतिभावेक्तः यस्यविभाषेतीट्प्रतिषेधः नञाबहुव्रीहौ नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । स्मसि इदन्तोमसिः । नूनः ऋचितुनुघेत्यादिनादीर्घः । गोषु सावेकाचइतिप्राप्तस्यविभक्त्युदात्तस्य नगोश्वन्सावबर्णेतिप्रतिषेधः । अश्वेषु अश्नुतेध्वानमित्यश्वः अशूपृषीत्यादिनाक्वन्प्रत्ययः नित्त्वादाद्युदात्तत्वम् । शुभ्रिषुशुभदीप्तौ अदिशदिभूशुभिभ्यःक्रिन्निति क्रिन्प्रत्ययः व्यत्ययेनान्तोदात्तत्वम् ॥ १ ॥

१. हे सोमपायी और सत्यवादी इन्द्र! यद्यपि हम कोई धनी नहीं हैं, तो भी हे बहुधनशाली इन्द्र! सुन्दर और असंख्य गौओं और घोड़ों-द्वारा हमें प्रशस्त धनवान् करो।

शिप्रिन्वाजानांपतेशचीवस्तवंदंसना । आतूनंइन्द्रशंसयगोष्वश्वेषु शुभ्रिषुंसहस्रेषुतुवीमघ ॥ २ ॥

शिप्रिन् । वाजानाम् । पते । शचीऽवः । तव । दंसना । आ । तु । नः । इन्द्र । शंसय । गोषु । अश्वेषु । शुभ्रिषु । सहस्रेषु । तुविऽमघ ॥ २ ॥

हेशचीवःशक्तिमन् शिप्रिन् शोभनहनूयुक्त वाजानांपतेअन्नानांपतेतवदंसनाकर्मविशेषोनुग्रहरूपःसर्वदावर्तते अन्यत्पूर्ववत् ॥ शिप्रिन् शिप्रेहनूनासिकेवेतियास्कः[2] । अतइनिठनाविति मत्वर्थीयइनिः आमन्त्रिताद्युदात्तत्वम् । वाजानांपते सुबामन्त्रितइतिपराङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायनिघातः नचामन्त्रितंपूर्वमविद्यमानवदिति शिप्रिन्नित्यस्याविद्यमानवत्त्वेनपदादपरत्वात् पादादित्वाच्चनिघातः नामन्त्रितेसमानाधिकरणेसामान्यवचनमितिअविद्यमानवत्त्वप्रतिषेधात् । शचीवः छन्दसीरइतिमतुपोवत्वं मतुवसोरुरितिरुत्वे खरवसानयोर्विसर्जनीयः पादादित्वादामन्त्रितनिघाताभावः ॥ २ ॥

२. शक्तिशाली, सुन्दर नाकवाले और धनरक्षक इन्द्र! तुम्हारी दया चिरस्थायिनी है। बहुधनशाली इन्द्र! सुन्दर और असंख्य गौओं और घोड़ों-द्वारा हमें प्रशंसनीय करो।

---

1 ऐ० ब्रा० ७. १६.। 2 नि० ६. १७.।

तृतीयामृचमाह—

निष्वा॑पया मिथू॒दृशा॑ स॒स्ताम॒बु॑ध्यमाने । आतू न॑ इन्द्र शंसय॒ गोष्वश्वे॑षु शु॒भ्रिषु॑ स॒हस्रे॑षु तुवीमघ ॥ ३ ॥

नि । स्वा॒प॒य॒ । मि॒थु॒ऽदृशा॑ । स॒स्ताम् । अबु॑ध्यमाने॒ इति॑ । आ । तु । नः॒ । इ॒न्द्र॒ । शं॒स॒य॒ । गोषु॑ । अश्वे॑षु । शु॒भ्रिषु॑ । स॒हस्रे॑षु । तु॒वि॒ऽम॒घ॒ ॥ ३ ॥

मिथूदृशा परस्परसङ्गतत्वेन दृश्यमाने यमदूत्यौ निष्वापय नितरां सुप्ते कुरु ते चास्मान्मारयितुमबुध्यमाने सत्यौ सस्तां निद्रां प्राप्नुतं अन्यत्पूर्ववत् ॥ निष्वापय सुषामादित्वात्षत्वं अन्येषामपि दृश्यत इति दीर्घः । मिथूदृशा मिथुनतया युगलरूपेण पश्यत इति मिथूदृशा क्विप् चेति दृशेः कर्तरि क्विप् कृदुत्तरपदप्रकृतिस्वरत्वं पूर्ववत्पूर्वपदस्य दीर्घः सुपां सुलुगिति विभक्तेराकारः । सस्तां षस स्वप्ने लोटि तसस्तां अदिप्रभृतिभ्यः शप इति शपो लुक् प्रत्ययस्वरः पादादित्वान्निघाताभावः । अबुध्यमाने नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥ ३ ॥

३. जो दोनों यम-दूतियाँ आपस में देखती हैं, उन्हें सुलाओ; वे बेहोश रहें। बहुधनशाली इन्द्र! सुन्दर और असंख्य गौओं और घोड़ों द्वारा हमें प्रशंसनीय करो।

स॒सन्तु॒ त्या अरा॑तयो॒ बोध॑न्तु शूर रा॒तयः॑ । आतू न॑ इन्द्र शंसय॒ गोष्वश्वे॑षु शु॒भ्रिषु॑ स॒हस्रे॑षु तुवीमघ ॥ ४ ॥

स॒सन्तु॑ । त्याः । अरा॑तयः । बोध॑न्तु । शू॒र॒ । रा॒तयः॑ । आ । तु । नः॒ । इ॒न्द्र॒ । शं॒स॒य॒ । गोषु॑ । अश्वे॑षु । शु॒भ्रिषु॑ । स॒हस्रे॑षु । तु॒वि॒ऽम॒घ॒ ॥ ४ ॥

त्याः अस्माभिर्दृश्यमानाः परोक्षास्ता अरातयः अदानशीलाः शत्रवः ससन्तु निद्रां कुर्वन्तु हे शूर शौर्ययुक्तेन्द्र रातयो दानशीलाः बन्धवो बोधन्तु अस्मान् बुध्यतां अन्यत्पूर्ववत् ॥ ससन्तु प्रत्ययस्वरः । अरातयः रादाने मन्त्रे वृषेत्यादिना भावे क्तिन् नविद्यते रातिरेष्विति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं नञ्सुभ्यामिति तु सर्वे विधयश्छन्दसि विकल्प्यन्त इति न भवति यद्वा क्तिच्क्तौ च संज्ञायामिति कर्तरि क्तिच् नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् । बोधन्तु पादादित्वात्तिङ्ङतिङ इति निघाताभावः ॥ ४ ॥

४. शूर! हमारे शत्रु सोये रहें और मित्र जागे रहें। बहुधनशाली इन्द्र! सुन्दर और असंख्य गौओं और घोड़ों से हमें प्रशस्य बनाओ।

पञ्चमीमृचमाह—

समिन्द्रगर्दभंमृणनुवन्तंपापयामुया । आतूनइन्द्रशंसयगोष्वश्वेषुशुभ्रिषुसहस्रेषुतुवीमघ ॥ ५ ॥

सम् । इन्द्र । गर्दभम् । मृण । नुवन्तम् । पापया । अमुया । आ ।
तु । नः । इन्द्र । शंसय । गोषु । अश्वेषु । शुभ्रिषु ।
सहस्रेषु । तुविऽमघ ॥ ५ ॥

हेइन्द्र अमुया अनयास्माभिःश्रूयमाणया पापया निन्दारूपयावाचा नुवन्तंस्तुवन्तं अपकीर्तिंप्रकटयन्तमित्यर्थः तादृशंगर्दभंगर्दभसमानवैरिणं संमृणसम्यक्मारय यथागर्दभः श्रोतुमशक्यंपरुषंशब्दंकरोति तथाशत्रुरपि अन्यत्पूर्ववत् ॥ गर्दभं नर्दगर्दशब्दे कृगृशृशलिगर्दिभ्योभच् चितइत्यन्तोदात्तत्वम् । मृण मृणहिंसायां तौदादिकः शस्यङित्त्वाद्गुणाभावः । नुवन्तं णुस्तुतौ शतरि अदिप्रभृतित्वाच्छपोलुक् शतुर्ङित्त्वाद्गुणाभावे उवङादेशः प्रत्ययाद्युदात्तत्वम् ॥ ५ ॥

५. इन्द्र ! यह गर्दभ-रूप शत्रु पाप या वचन द्वारा तुम्हारी निन्दा करता है, इसे वध करो। बहुधनशाली इन्द्र ! सुन्दर और असंख्य गौओं और घोड़ों से हमें धनी बनाओ।

पतातिकुण्डृणाच्यादूरंवातोवनादधि । आतूनइन्द्रशंसयगोष्वश्वेषुशुभ्रिषुसहस्रेषुतुवीमघ ॥ ६ ॥

पताति । कुण्डृणाच्या । दूरम् । वातः । वनात् । अधि । आ । तु ।
नः । इन्द्र । शंसय । गोषु । अश्वेषु । शुभ्रिषु । सहस्रेषु ।
तुविऽमघ ॥ ६ ॥

वातोस्मत्प्रतिकूलोवायुः कुण्डृणाच्याकुटिलगत्यासत्वास्मान्परित्यज्य वनादधि अरण्यादप्यधिकंदूरदेशं पतातिपततु अन्यत्पूर्ववत् ॥ पताति लेटचाडागमः । कुण्डृणाच्या कुडिदाहे अस्मात् ल्युडन्ते कुण्डनशब्दे डकारात्परस्याकारस्यऋकारश्छान्दसः ऋवर्णाच्चेतिवक्तव्यमितिणत्वं तदञ्चतीतिकुण्डृणाची ऋत्विगित्यादिनाक्विन् अनिदितामितिनलोपे अञ्चतेश्चेतिङीप् अचइत्याकारलोपः चावितिपूर्वपदस्यदीर्घत्वं चावित्याकारस्योदात्तत्वम् ॥ ६ ॥

६. विरुद्ध वायु, कुटिल गति के साथ, वन से दूर जाय। बहुधनशाली इन्द्र ! सुन्दर और असंख्य गौओं और घोड़ों-द्वारा हमें धनी बनाओ।

सप्तमीमृचमाह—

सर्वंपरिक्रोशंजहिजंभयांकृकदाश्वम् । आतूनंइन्द्रशंसयगोष्वश्वेषु शुभ्रिषुंसहस्रेषुतुवीमघ ॥ ७ ॥

सर्वम् । परिऽक्रोशम् । जहि । जम्भय । कृकदाश्वम् । आ । तु । नः । इन्द्र । शंसय । गोषु । अश्वेषु । शुभ्रिषु । सहस्रेषु । तुविऽमघ ॥ ७ ॥ २७ ॥

परिक्रोशं अस्मद्विषये सर्वतआक्रोशकर्तारं सर्वंपुरुषं जहि मारय कृकदाश्वं अस्मद्विषयेहिंसाप्रदंशत्रुं जंभय मारय अन्यत्पूर्ववत् ॥ परिक्रोशं क्रुशआह्वाने परितःक्रोशयतीतिपरिक्रोशः पचाद्यच् कृदुत्तरपदप्रकृतिस्वरत्वम् । जहि हनहिंसागत्योः हन्तेर्जइतिजादेशः तस्यासिद्धवदत्राभादिति असिद्धत्वादतोहेरितिहेर्लुक्नभवति । जंभय जभिनाशने चुरादित्वात्स्वार्थिकोणिच् शपःपित्त्वादनुदात्तत्वे णिचएवस्वरःशिष्यते । कृकदाश्वं कृञ्हिंसायां कृदाधारार्चिकलिभ्यःकन्निति भावेकन्प्रत्ययः किदित्यनुवृत्तेर्गुणाभावः तथाच कृकोहिंसा तां दाशति प्रयच्छतीतिकृकदाशुः बहुलग्रहणाद्दाशतेरपि कृकउपपदे कृकेवचःकश्चेत्युण् प्रत्ययस्वरेणान्तोदात्तः द्वितीयायाममिपूर्वत्वेप्राप्ते वाछन्दसीति तस्यबाधितत्वाद्यणादेशः उदात्तस्वरितयोर्यणइतिविभक्तेःस्वरितत्वम् ॥ ७ ॥

७. सब डाह करनेवालों का वध करो। हिंसकों का विनाश करो। बहुधनशाली इन्द्र! सुन्दर और असंख्य गौओं और घोड़ों द्वारा हमें प्रशंसनीय (धनवान्) करो।

इतिप्रथमस्यद्वितीयेसप्तविंशोवर्गः ॥ २७ ॥

आवइन्द्रमितिद्वाविंशत्यृचंसप्तमंसूक्तं शुनःशेपस्यार्षंगायत्रं अस्माकमित्येषापादनिचृद्गायत्री त्रयःसप्तकाःपादनिचृदित्युक्तत्वात् शश्वदिन्द्रइत्येषात्रिष्टुप् आदितःषोडशर्चऐन्द्र्यः आश्विनावश्वावत्येत्याद्यास्तिस्रआश्विन्यः कस्तउषइत्याद्यास्तिस्रउषोदेवताकाः तथाचानुक्रमणिका—आवोद्व्यधिकास्माकंपादनिचृत् शश्वत्त्रिष्टुप्परौतृचावाश्विनौषस्याविति ॥

प्रथमामृचमाह—

आवइन्द्रंक्रिविंयथावाजयन्तःशतक्रतुम् । मंहिष्ठंसिञ्चइन्दुभिः ॥ १ ॥

आ । वः । इन्द्रम् । क्रिविम् । यथा । वाजऽयन्तः । शतऽक्रतुम् । मंहिष्ठम् । सिञ्चे । इन्दुऽभिः ॥ १ ॥

वाजयन्तोन्नमिच्छन्तोवयंशुनःशेपाः हेऋत्विग्यजमानावोयुष्माकंसंबन्धिनमिममिन्द्रं इन्दुभिः सोमैरासिञ्चे सर्वतःसिञ्चामहे तर्पयामः कीदृशंशतक्रतुं शतसंख्याककर्मोपेतं मंहिष्ठमतिशयेनप्रवृद्धं सेचनेदृष्टान्तः—यथायेनप्रकारेण क्रिविमवटं जलेनपूरयन्तितद्वत् क्रिंविशब्दोवम्रःकाटइत्यादिषुचतुर्दशसुकूपनामसु क्रिविःकूपःसूदइतिपठितम् ॥ क्रिविं कृतीछेदने कृत्यतइतिक्रिविः कृविघृष्विछविस्थवीत्यादौक्रिन्प्रत्ययान्तोनिपातितः अतएवतशब्दलोपः नित्त्वादाद्युदात्तत्वम् । यथा यथेतिपादान्ते इवसर्वानुदात्तत्वम् । वाजयन्तः वाजआत्मनइच्छन्तः सुपआत्मनःक्यच् नच्छन्दस्यपुत्रस्येतीत्वदीर्घत्वयोर्निषेधः अश्वाघस्यादिति पुनर्दीर्घविधानावज्ञापकात् । मंहिष्ठं महिवृद्धौ अतिशयेनमंहितामंहिष्ठः तुश्छन्दसीतितृजन्तादिष्ठन्प्रत्ययः तुरिष्ठेमेयःस्वितितृलोपः इष्ठनोनित्त्वादाद्युदात्तत्वम् । सिञ्चे षिचिर्क्षरणे व्यत्ययेनैकवचनं शेमुचादीनामितिनुमागमः ॥ १ ॥

१. संसार में जिस प्रकार कुएँ को जल-पूर्ण कर दिया जाता है, उसी प्रकार हम, अनाकाङ्क्षी होकर यजमानो, तुम्हारे इस यज्ञ करनेवाले और अतिवृद्ध इन्द्र को सोमरस से सेचन करते हैं।

शतंवायःशुचीनांसहस्रंवासमाशिराम् । एदुनिम्नंनरीयते ॥ २ ॥

शतम् । वा । यः । शुचीनाम् । सहस्रम् । वा । समऽआशिराम् ।
आ । इत् । ऊम् इति । निम्नम् । न । रीयते ॥ २ ॥

यइन्द्रः शुचीनां शुद्धानां सोमानांशतंवा शतसंख्यांकंसमूहंवा समाशिरां समीचीनेन आशिराख्येन श्रयणद्रव्येणोपेतानां सोमानां सहस्रंवासहस्रसंख्याकं समूहंवा एदुरीयते आगच्छत्येव सोस्माननुगृह्णात्वितिशेषः सोमप्राप्तौदृष्टान्तः—निम्नंन यथानिम्नप्रदेशं आपःआप्नुवन्तितद्वत् ॥ समाशिरां श्रिञ्पाकेइत्यस्यसमाङ्पूर्वकस्य अपस्पृधेथामित्यादौ आशीरादेशोनिपातितः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । रीयते रीङ्श्रवणे दिवादिभ्यःश्यन् ॥ २ ॥

२. जिस प्रकार जल स्वयं नीचे जाता है, उसी प्रकार इन्द्र सैकड़ों विशुद्ध सोमरस और "आशीर" नामक सहस्र श्रपण द्रव्य से युक्त सोमरस के पास आते हैं।

संयन्मदायशुष्मिणएनाह्यस्योदरे । समुद्रोनव्यचोदधे ॥ ३ ॥

सम् । यत् । मदाय । शुष्मिणे । एना । हि । अस्य । उदरे ।
समुद्रः । न । व्यचः । दधे ॥ ३ ॥

---

१ दशपाद्यांपंचपाद्यांअत्रापिचक्रिविशब्दोऋकारवान्साधनिकयाभवति वस्तुतस्तुडुकृञ्करणेक्रिन्निडागमश्चनिपात्यतेइतिनिघण्टुभाष्यम् ।

यत्पूर्वोक्तं शतंसहस्रंवाशुष्मिणे बलवतइन्द्रस्य मदायमदार्थंसंगतंभवति एनाहि अनेनैव शतेनसहस्रेणचअस्येन्द्रस्योदरे व्यचोव्याप्तिर्दधेधृता भवति तत्रदृष्टान्तः—समुद्रोन समुद्रइव यथा समुद्रमध्येजलंव्याप्तंतद्वत् ॥ एना सुपांसुलुगितितृतीयायाडादेशः । व्यचः व्यचेःकुटादित्वमनसीति ङिद्वद्भावस्यप्रतिषिद्धत्वात् ग्रहिज्येत्यादिनासंप्रसारणंनभवति असुनोनित्त्वादाद्युदात्तत्वम् । दधे दधातेः कर्मणिअभ्यासह्रस्वजश्त्वेषुकृतेषु आतोलोपइटिचेत्याकारलोपः प्रत्ययस्वरेणान्तोदात्तत्वं हिचेतिप्रतिषेधान्निघाताभावः ॥ ३ ॥

३. यह अनन्त प्रकार का सोम इन्द्र की प्रसन्नता के लिए इकट्ठा होता है। इसके द्वारा इन्द्र का उदर समुद्र की तरह व्याप्त होता है।

अयमुतेसमंतसिकपोतंइवगर्भधिम् । वचस्तच्चिन्नओहसे ॥ ४ ॥

अयम् । ऊम् इति । ते । सम् । अतसि । कपोतःऽइव ।
गर्भऽधिम् । वचः । तत् । चित् । नः । ओहसे ॥ ४ ॥

हेइन्द्र अयमु अयमपिदृश्यमानःसोमःत्वदर्थंसंपादितःयंसोमंसमतसि सम्यक्सातत्येनमाप्नोषि तत्रदृष्टान्तः—कपोतंइव यथाकपोताख्यःपक्षी गर्भधिंगर्भधारिणींकपोतींप्राप्नोतितद्वत् तच्चित्तस्मादेवकारणान्नोस्मदीयंवचओहसेप्राप्नोषि ॥ अतसि अतसातत्यगमने लटिसिप् शप् तिङ्ङतिङइतिनिघातः । गर्भधिं गर्भोस्यांधीयतइतिगर्भधिः कर्मण्यधिकरणेचेतिकिप्रत्ययः कृदुत्तरपदप्रकृतिस्वरत्वम् । ओहसे तुहिर्दुहिर्उहिर्अर्दने व्यत्ययेनात्मनेपदम् ॥ ४ ॥

४. जिस प्रकार कपोत गर्भिणी कपोती को ग्रहण करता है, उसी प्रकार, हे इन्द्र ! यह सोम तुम्हारा है, तुम भी इसे ग्रहण करो; और, इसी कारण हमारा वचन ग्रहण करो।

पञ्चमीमृचमाह—

स्तोत्रंराधानांपतेगिर्वाहोवीरयस्यते । विभूतिरस्तुसूनृता ॥५॥ २८॥

स्तोत्रम् । राधानाम् । पते । गिर्वाहः । वीर । यस्य । ते ।
विऽभूतिः । अस्तु । सूनृता ॥ ५ ॥ २८ ॥

हेइन्द्र राधानांपते धनानांपालक गिर्वाहोगीर्भिरुह्यमान वीरशौर्योपेत यस्यतेतवस्तोत्रमीदृशं भवतितस्यतवविभूतिर्लक्ष्मीःसूनृताप्रियसत्यरूपास्तु ॥ स्तोत्रं दाम्नीशसेतिष्ट्रन्पश्चात् अर्शआद्यच् अथवा स्तोतुःइदं इत्यर्थेअण् संज्ञापूर्वकोविधिरनित्यइतिवृद्धिर्न । राधानांपते राध्नुवन्त्येभिरितिरा-

---

१ उदरे उदिदृणातेरितिअर् । २ कपोतइव कवेरोतच्पश्चेत्योतच् व्यत्ययेनमध्योदात्तः अथवाअव्युत्पन्नएवलघावन्तेइतिगुरुरुदात्तः ।

धानिधनानि सुबामन्त्रितइतिपराङ्गवद्भावात्षष्ठ्यामन्त्रितसमुदायस्यनिघातः। गिर्वाहः वहप्रापणे वहिहाधाञ्भ्यश्छन्दसीतिकारकपूर्वस्यापिवहतेरसुन्प्रत्ययः गतिकारकयोरपिपूर्वपदप्रकृतिस्वरत्वंचेत्युक्तत्वात् णिदित्यनुवृत्तेरुपधावृद्धिःपूर्वपदस्य वोंरुपधायाइतिदीर्घस्याभावश्छान्दसः षाष्ठिकमामन्त्रिताद्युदात्तत्वम्। विभूतिः तादौचनितीतिगतेःप्रकृतिस्वरत्वम्॥ ५॥

५. धन-रक्षक और स्तोत्र-पात्र इन्द्र! तुम्हारा ऐसा स्तोत्र तुम्हारा प्रतिभा-प्रिय और सत्य हो।

ऊर्ध्वस्तिष्ठानऊतयेस्मिन्वाजेशतक्रतो। समन्येषुंब्रवावहै॥ ६॥

ऊर्ध्वः। तिष्ठ। नः। ऊतये। अस्मिन्। वाजे। शतक्रतो इति शतऽक्रतो। सम्। अन्येषु। ब्रवावहै॥ ६॥

हेशतक्रतो शतसंख्याककर्मोपेत अस्मिन्प्रसक्तेवाजेसंग्रामेनोस्माकमूतयेरक्षणायऊर्ध्वंउन्नतः उत्सुकस्तिष्ठभव त्वंचाहंचमिलित्वाअन्येषुकार्यान्तरेषु संब्रवावहै सम्यक्विचारयावः॥ तिष्ठ द्व्यचोतस्तिङइतिसंहितायांदीर्घः। ऊतये ऊतियूतीत्यादिनाक्तिनउदात्तत्वम्। अस्मिन् ऊडिदमित्यादिनासप्तम्याउदात्तत्वम्॥ ६॥

६. शतक्रतु! इस समर में हमारी रक्षा के लिए उत्सुक बनो। दूसरे कार्य के सम्बन्ध में हम दोनों मिलकर विचार करेंगे।

योगेयोगेतवस्तरंवाजेवाजेहवामहे। सखायइन्द्रमूतये॥ ७॥

योगेऽयोगे। तवःऽतरम्। वाजेऽवाजे। हवामहे। सखायः। इन्द्रम्। ऊतये॥ ७॥

योगेयोगे प्रवेशे तत्तत्कर्मोपक्रमे वाजेवाजेकर्मविघातिनितस्मिन्सङ्ग्रामे तवस्तरंअतिशयेन बलिनमिन्द्रंऊतयेरक्षार्थंसखायःसखिवत्प्रियावयंहवामहेआह्वयामः॥ योगेयोगे युजिर्योगे हलश्चेतिघञ् चजोःकुघिण्यतोरितिकुत्वं घञोञित्त्वादाद्युदात्तत्वं नित्यवीप्सयोरितिवीप्सायांद्विर्भावेसतिआम्रेडितानुदात्तत्वम्। तवस्तरं तवसःशब्दात् अस्मायामेधेतिमत्वर्थीयोविनिः तस्यछान्दसोलोपः॥ ७॥

७. विभिन्न कर्मों के प्रारम्भ में, विविध युद्धों में हम, अत्यन्त बली इन्द्र को, रक्षा के लिए, सखा की तरह बुलाते हैं।

आघागमद्यदिश्रवंत्सहस्रिणीभिरूतिभिः। वाजेभिरुपनोहवम्॥ ८॥

आ। घ। गमत्। यदि। श्रवत्। सहस्रिणीभिः। ऊतिऽभिः। वाजेभिः। उप। नः। हवम्॥ ८॥

यदिश्रवत् यद्ययमिन्द्रोनोस्मदीयंहवमाह्वानंश्रृणुयात् तदानींस्वयमेवसहस्रिणीभिरूतिभिःबहुभिःपालनैः वाजेभिरन्नैश्चउपसमीपे आवअवश्यमागमत् आगच्छेत् ॥ घ ऋचितुनुघेत्यादिनासंहितायांदीर्घः । गमत् लिङर्थेलेट् लेटोडाटावित्यडागमः इतश्चलोपइतीकारलोपः यद्वा छान्दसेलुङि पुषादिद्युताद्यृदितःपरस्मैपदेष्वितिच्लेरङादेशः बहुलंछन्दस्यमाङ्योगेपीत्यडभावः। श्रवत् श्रुश्रवणे पूर्ववत् लेटचडागमः । वाजेभिः बहुलंछन्दसीतिभिसऐसादेशाभावः। हवं भावेनुपसर्गस्येतिह्वयतेरप्संप्रसारणंच अपःपित्त्वादनुदात्तत्वेधातुस्वरेणाद्युदात्तत्वम् ॥ ८ ॥

८. यदि इन्द्र हमारा आह्वान सुनेंगे, तो निश्चय ही सहस्रों ऐसी शक्ति और धन-शक्ति के साथ हमारे निकट आवेंगे।

नवमीमृचमाह—

अनुंप्रत्नस्यौकंसोहुवेतुंविप्रतिंनरम् । यंतेपूर्वंपिताहुवे ॥ ९ ॥

अनु । प्रत्नस्य । ओकसः । हुवे । तुविऽप्रतिम् । नरम् । यम् । ते । पूर्वम् । पिता । हुवे ॥ ९ ॥

प्रत्नस्य पुरातनस्य ओकसःस्थानस्यस्वर्गरूपस्यतत्सकाशात् तुविप्रतिं बहून्यजमानान्प्रतिगन्तारंनरंपुरुषमिन्द्रं अनुहुवे अनुक्रमेणकर्मस्वाह्वयामि यं तेत्वामिन्द्रं पिता अस्मदीयोजनकः पूर्वंपुरास्वकीयानुष्ठानकाले हुवेआहूतवान् तंआह्वयामीतिपूर्वत्रान्वयः ॥ ओकसः नब्विषयस्येत्याद्युदात्तत्वम् । हुवे ह्वेञ्स्पर्धायांशब्देच इटि बहुलंछन्दसीतिसंप्रसारणं परपूर्वत्वं गुणेप्राप्ते ग्क्ङितिचेतिप्रतिषेधः उवङादेशः प्रत्ययस्वरेणान्तोदात्तत्वं पादादित्वादनिघातः । तुविप्रतिं तुवीनांबहूनांप्रतिगन्तारं अत्रप्रतिशब्दोभीमसेनोभीमइतिवत् प्रतिगन्तृशब्दं लक्षयित्वातद्द्वारातदर्थंलक्षयति अतः प्रतिःप्रतिनिधिप्रतिदानयोरितिवत् सत्त्ववचनत्वेनानिपातत्वादनव्ययत्वेनपूरणगुणेत्यादिनानषष्ठीसमासनिषेधः । हुवे ह्वेञोलटिबहुलंछन्दसीतिपूर्ववत्संप्रसारणपरपूर्वत्वे द्विर्वचनप्रकरणे छन्दसिवेतिवक्तव्यमितिद्विर्वचनाभावः यद्वृत्तयोगादनिघातः ॥ ९ ॥

९. इन्द्र बहुतों के पास जाते हैं। पुरातन निवास या स्वर्ग से मैं उस पुरुष का आह्वान करता हूँ, जिसे पहले पिता बुला चुके हैं।

दशमीमृचमाह—

तंत्वांवयंविश्ववाराशांस्महेपुरुहूत । सखेवसोजरितृभ्यः ॥१०॥२९॥

तम् । त्वा । वयम् । विश्वऽवार । आ । शास्महे । पुरुऽहूत । सखे । वसो इति । जरितृऽभ्यः ॥ १० ॥ २९ ॥

हेविश्ववार सर्वैर्वरणीय पुरुहूत बहुभिःस्वस्वकर्मण्याहूत सखेसखिवत्प्रिय वसोनिवासहे-तोइन्द्रतंपूर्वोक्तगुणयुक्तंत्वांजरितृभ्यःस्तोतृणामनुग्रहार्थं आशास्महेप्रार्थयामहे ॥ आशास्महे आङःशासुइच्छायां अदिप्रभृतिभ्यःशपइतिशपोलुक्। वसो नामन्त्रितेसमानाधिकरणेइतिपूर्व-स्याविद्यमानवत्त्वनिषेधात्पराङ्गवद्भावेसतिशेषनिघातेनवाआमन्त्रितस्यचेतिवासर्वानुदात्तत्वम्। जरितृभ्यः जरतिःस्तुतिकर्मा तृचश्चित्त्वादन्तोदात्तत्वम् ॥ १० ॥

१०. इन्द्र! तुम्हें सब चाहते हैं, तुम्हें असंख्य लोग बुला चुके हैं। तुम सखा और निवास के कारण हो। मैं प्रार्थना करता हूँ कि तुम अपने स्तोताओं पर अनुग्रह करो।

अ॒स्माकं॑शि॒प्रिणी॑नां॒सोम॑पाः॒सोम॒पाव्नां॑म्। सखे॑वज्रि॒न्त्सखी॑नाम्॥११॥

अ॒स्माक॑म्। शि॒प्रिणी॑नाम्। सोम॑ऽपाः। सो॒म॒ऽपाव्नां॑म्।

सखे॑। व॒ज्रि॒न्। सखी॑नाम् ॥ ११ ॥

हेसोमपाः सोमस्यपातः सखे सखिवत्प्रियवज्रिन् वज्रयुक्तेन्द्र सखीनांसखिवत्प्रियाणां सोमपाव्नांसोमस्यपातॄणामस्माकं शिप्रिणीनांदीर्घाभ्यांहनूभ्यांनासिकाभ्यांवायुक्तानांगवांसमूहः त्वत्प्रसादादस्त्विति शेषः ॥ शिप्रिणीनां ऋन्नेभ्योङीप्इतिङीप् तस्यपित्त्वादनुदात्तत्वेस इतिप्रत्ययस्वरः शिष्यते। सोमपाः आमन्त्रितस्यसतिशिष्टत्वादामन्त्रिताद्युदात्तत्वम्। सोमपाव्नां आतोमनिन्नित्यादिनावनिप् अल्लोपोनइत्यनोकारस्यलोपः ॥ ११ ॥

११. हे सोमपायी, सखा और वज्रधारी इन्द्र! हम भी तुम्हारे सखा और सोमपायी हैं। हमारी दीर्घ नासिकावाली गौओं को बढ़ाओ।

तथा॒न॒दस्तु॒सोम॑पाः॒सखे॑वज्रि॒न्तथा॑कृणु। यथा॑त॒उ॒श्मसी॒ष्टये॑ ॥ १२ ॥

तथा॑। तत्। अ॒स्तु। सो॒म॒ऽपाः॒। सखे॑। व॒ज्रि॒न्। तथा॑।

कृ॒णु॒। यथा॑। ते॒। उ॒श्मसि॑। इ॒ष्टये॑ ॥ १२ ॥

हेसोमपाःसखेवज्रिन् इष्टयेअभिलषितार्थं तेतवानुग्रहं यथायेनप्रकारेणोश्मसिवयंकाम-यामहे त्वंतथाकुरु त्वत्प्रसादात्तदभीष्टंतथास्तु ॥ कृणु कृविहिंसाकरणयोश्च इदित्वान्नुम् धिन्विकृण्व्योरचेत्युप्रत्ययःतत्सन्नियोगेनवकारस्यचाकारः अतोलोपइतितस्यलोपःतस्यस्थानि-वद्भावाल्लघूपधगुणाभावः उतश्चप्रत्ययादसंयोगपूर्वादितिहेर्लुक्। उश्मसि वशकान्तौ इदन्तो-मसिःअदादित्वाच्छपोलुक् ग्रहिज्यादिनासंप्रसारणं प्रत्ययस्वरः यद्वृत्तयोगादनिघातः। इष्टये इषइच्छायां क्तिनि तितुत्रेत्यादिनाइट्प्रतिषेधः यद्वा यजतेःक्तिनि वचिस्वपीत्यादिनासंम-सारणं व्रश्चादिनाषत्वष्टुत्वे पूर्वस्मिन्पक्षे मन्त्रेवृषेतिक्तिनउदात्तत्वं द्वितीयेतुव्यत्ययेन ॥ १२ ॥

१२. सोमपायी, सखा और वज्रधर इन्द्र! तुम ऐसे बनो; तुम इस तरह आचरण करो, जिससे हम मंगलार्थ तुम्हारी अभिलाषा करें।

त्रयोदशीमृचमाह—

रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः। क्षुमन्तो याभिर्मदेम ॥ १३ ॥

रेवतीः। नः। सधऽमादे। इन्द्रे। सन्तु। तुविऽवाजाः।
क्षुऽमन्तः। याभिः। मदेम ॥ १३ ॥

क्षुमन्तोन्नवन्तो वयं याभिर्गोभिः सह मदेम हृष्येम इन्द्रे सधमादे अस्माभिः सह हर्षयुक्ते सति नोऽस्माकं ता गावः रेवतीः क्षीराज्यादिधनवत्यः तुविवाजाः प्रभूतबलाश्च सन्तु॥ रेवतीः रयिशब्दान्मतुपि रयेर्मतौ बहुलमिति संप्रसारणं परपूर्वत्वं छन्दसीर इति मतुपो वत्वं वा छन्दसीति पूर्वसवर्णदीर्घः आरेशब्दाच्च मतुप उदात्तत्वं वक्तव्यमिति रेशब्दादुत्तरस्यापि भवतीति पूर्वमेवोक्तम्। सधमादे मद तृप्तियोगे चौरादिकः सह मादयतीति सधमादः पचाद्यच् सधमादस्थयोश्छन्दसीति सहशब्दस्य सधादेशः थाथादिनोत्तरपदान्तोदात्तत्वे प्राप्ते परादिश्छन्दसि बहुलमित्युत्तरपदाद्युदात्तत्वम्। तुविवाजाः तु इति सौत्रो धातुर्वृद्ध्यर्थः अच इरिति इः संज्ञापूर्वकत्वाद्गुणो न भवति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। क्षुमन्तः टुक्षु शब्दे अस्मात्क्विपि तुगभावश्छान्दसः ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वम्। मदेम मदी हर्षे व्यत्ययेन शप् अदुपदेशाल्लसार्वधातुकानुदात्तत्वे शपः पित्त्वादनुदात्तत्वम् ततो धातुस्वरः शिष्यते ॥१३॥

१३. इन्द्र के हमारे ऊपर प्रसन्न होने पर हमारी गायें दूधवाली और पर्याप्त-शक्ति-सम्पन्न होंगी। गायों से खाद्य प्राप्त कर हम भी प्रसन्न होंगे।

चतुर्दशीमृचमाह—

आ घ त्वावान्त्मनाप्तः स्तोतृभ्यो धृष्णवियानः। ऋणोरक्षं न चक्र्योः ॥ १४ ॥

आ। घ। त्वाऽवान्। त्मना। आप्तः। स्तोतृऽभ्यः। धृष्णो इति।
इयानः। ऋणोः। अक्षम्। न। चक्र्योः ॥ १४ ॥

हे धृष्णो धाष्ट्र्ययुक्तेन्द्र त्वावान् त्वत्सदृशो देवताविशेषः त्मनाप्तः त्वदनुग्रहवशात्स्वयमेवाप्तः सन् इयानोऽस्माभिर्याच्यमानः स्तोतृभ्यः स्तोतॄणामनुग्रहाय तदभीष्टमर्थं घ अवश्यं आ ऋणोः आनीय प्रक्षिपतु तत्र दृष्टान्तः—चक्र्योः रथस्य चक्रयोः अक्षं न यथा अक्षं प्रक्षिपन्ति तद्वत् ॥ त्वावान् वतुप्प्रकरणे युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसंख्यानमिति वतुप् प्रत्ययोत्तरपदयोश्चेति मपर्यन्तस्य त्वादेशः आसर्वनाम्न इति दकारस्यात्वम् वतुपः पित्त्वादनुदात्तत्वे प्रातिपदिकस्वरः शिष्यते। त्मना मन्त्रेष्वाङ्यादेरात्मन इत्याकारलोपः। धृष्णो ञिधृषा प्रागल्भ्ये त्रसिगृधिधृषिक्षिपेः क्नुः आमन्त्रितानुदात्तत्वम्। इयानः इङ् गतौ छन्दसि लिट् तस्य लिटः कानज्वेति कान-

जादेशः अचिश्नुधात्वित्यादिनाइयङादेशः द्विर्वचनप्रकरणे छन्दसिवेतिवक्तव्यमितिवचनाद-भ्यासोनक्रियते चितइत्यन्तोदात्तत्वम्। ऋणोः ऋणगतौ लङि व्यत्ययेनतिपःसिपि इतश्चेतीकार-लोपः तनादिकृञ्भ्यउः सार्वधातुकगुणः बहुलंछन्दस्यमाङ्योगेपीत्याडागमाभावः विकरणस्वरेणान्तोदात्तत्वम्। अक्षं अक्षस्यादेवनस्येत्याद्युदात्तत्वम्। चक्र्योः अकारस्येकारश्छान्दसः॥ १४॥

१४. हे साहसी इन्द्र! तुम्हारे समान कोई भी देवता प्रसन्न होकर, हमारे द्वारा याचित होकर, स्तोताओं के लिए अवश्य ही अभीष्ट धन ले आ देंगे। वह उसी प्रकार धन देंगे, जिस प्रकार घोड़े रथ के दोनों चक्कों के अक्ष को घुमा देते हैं।

आयद्दुवःशतक्रतवाकामंजरितॄणाम्। ऋणोरक्षंनशचीभिः॥१५॥३०

आ। यत्। दुवः। शतक्रतो इति शतऽक्रतो। आ। कामम्। जरितॄणाम्। ऋणोः। अक्षम्। न। शचीभिः॥ १५॥ ३०॥

हेशतक्रतो इन्द्र यद्दुवोधनंकामितार्थरूपं आस्तोतृभिराप्तव्यमस्तितंकामंजरितॄणां स्तोतॄणांअनुग्रहाय आऋणोःआनीयप्रक्षिपसि तत्रदृष्टान्तः शचीभिः कर्मभिः शकटोचितव्यापारविशेषैःअक्षंन यथाअक्षंप्रक्षिपन्तितद्वत्॥शचीभिः शचीशब्दःशार्ङ्गरवादिङीनन्तआद्युदात्तः॥१५॥

१५. हे शतक्रतु इन्द्र! जिस तरह शकट की गति अक्ष को घुमाती है, उसी प्रकार तुम कामना के अनुसार स्तोताओं को धन अर्पण करो।

शश्वदिन्द्रःपोप्रुथद्भिर्जिगायनानदद्भिःशाश्वसद्भिर्धनानि। सनोहिरण्यरथंदंसनावान्त्सनःसनितासनयेसनोदात्॥ १६॥

शश्वत्। इन्द्रः। पोप्रुथत्ऽभिः। जिगाय। नानदत्ऽभिः। शाश्वसत्ऽभिः। धनानि। सः। नः। हिरण्यऽरथम्। दंसनाऽवान्। सः। नः। सनिता। सनये। सः। नः। अदात्॥ १६॥

तुष्टेनेन्द्रेणदत्तंहिरण्यरथं अनयाप्रतिजग्राह तथाचब्राह्मणम्—तस्माइन्द्रःस्तूयमानः प्रीतोमनसाहिरण्यरथंददौतमेतयाप्रतीयायशश्वदिन्द्रइतीति[1]। इन्द्रः शश्वत्सर्वदाधनानिवैरिसंबन्धीनि जिगायजितवान् अश्वैरितिशेषः कीदृशैः पोप्रुथद्भिः घासभक्षणानन्तरभाविनमोष्ठशब्दंकुर्वद्भिः नानदद्भिः नादमास्यगतंहेषाशब्दंकुर्वद्भिः शाश्वसद्भिः पुनःपुनर्भृशंवाश्वसद्भिः दंसनावान् कर्मवान् सनितादाता सइन्द्रोनोस्माकं सनयेसंभजनार्थं हिरण्यरथंसुवर्णेन

1 ऐ० ब्रा० ७. १६.।

निर्मितंरथं अदावद्दत्तवान् ॥ सनः सनोद्विरुक्तिरादरार्थं । पोपुथद्भिः मोथृपर्याप्तौ अस्माद्यङ्लुकि अभ्यासहळादिशेषौ ह्रस्वइतिह्रस्वत्वेकृते गुणोयङ्लुकोरितिगुणः धातोरुपधायाउत्वंछान्दसं अस्माद्यङ्लुगन्ताच्छतरि अभ्यस्तानामादिरित्याद्युदात्तत्वम् । जिगाय जिजये लिटोणलि वृद्धिः द्विर्वचनेचीतिस्थानिवद्भावाज्जिइत्यस्यद्विर्वचनं सन्लिटोर्जेरितिअभ्यासादुत्तरस्यकुत्वम् । नानदद्भिः णदअव्यक्तेशब्दे पूर्ववद्यङ्लुकि दीर्घोकितइतिअभ्यासस्यदीर्घः पूर्ववदाद्युदात्तत्वम् । शाश्वसद्भिः श्वसप्राणने अन्यत्सर्वपूर्ववत् । हिरण्यरथं समासस्येत्यन्तोदात्तत्वम् । अदात् गातिस्थेतिसिचोलुक् । दंसनावान् दंसशब्दः अमोदंसोवेषइतिकर्मनामसुपठितः दंसएवदंसना तदस्यास्तीतिमतुप् दस्यतेअनेनेतिदंसना ॥ १६ ॥

१६. इन्द्र के जो घोड़े खा लेने के बाद फर-फर शब्द के साथ हिनहिनाते और घहराता साँस फेंकते हैं, उन्हीं के द्वारा इन्द्र ने सदा धन जीता है। कर्मठ और दान-परायण इन्द्र ने हमें सोने का रथ दिया था।

प्रातरनुवाके आश्विनेक्रतौगायत्रेछन्दसि आश्विनावश्वावत्येतितृचः अथाश्विनइतिखण्डे—अश्विनायज्वरीरिषः आश्विनावश्वावत्येतिसूत्रितम् ।

तृचेप्रथमांसूक्तेसप्तदशीमृचमाह—

आश्विनावश्वावत्येषायातंशवीरया । गोमद्दस्राहिरण्यवत् ॥ १७ ॥

आ । अश्विना । अश्वऽवत्या । इषा । यातम् । शवीरया ।
गोऽमत् । दस्रा । हिरण्यऽवत् ॥ १७ ॥

इन्द्रेणप्रेषितःशुनःशेपः अश्विनौतुष्टाव तथाचब्राह्मणम्—तमिन्द्रउवाचाश्विनौनुस्तुह्यथत्वोत्स्रक्ष्यामइतिसोश्विनौतुष्टावातउत्तरेणतृचेनेति[1] । हेअश्विनौ अश्वावत्याबहुभिरश्वैर्युक्तयाशवीरयाप्रेर्यमाणयाइषान्नेनसहआयातं अस्मिन्कर्मण्यागच्छतं हेदस्राअश्विनौ युवयोःप्रसादाद्गोमत् बहुभिर्गोभिर्युक्तं हिरण्यवत् बहुनाहिरण्येनयुक्तमस्मदीयंगृहमस्त्विति शेषः ॥ अश्वावत्या मन्त्रेसोमाश्वेन्द्रियविश्वदेव्यस्यमतावितिदीर्घत्वम् । इषा सावेकाचइति तृतीयायाउदात्तत्वम् । यातं यामापणे लोटितसस्तं अदादित्वाच्छपोलुक् । शवीरया शुगतौ कॄगॄशॄपृकटिपटिशौटिभ्यईरन्नितीरन्प्रत्ययोबहुलवचनादस्मादपिभवति नित्त्वाद्युदात्तत्वम् ॥ १७ ॥

१७. अश्विनीकुमारद्वय! अनेक घोड़ों से प्रेरित अन्न के साथ आओ। शत्रुसंहारी! हमारे घर में गायें और सोना आवे।

समानयोजनोहिवांरथोदस्रावमर्त्यः । समुद्रेअश्विनेयते ॥ १८ ॥

---

1 ऐ० ब्रा० ७. १६.

समानऽयोजनः । हि । वाम् । रथः । दस्रौ । अमर्त्यः ।

समुद्रे । अश्विना । ईयते ॥ १८ ॥

हेदस्रावश्विनौ वांयुवयोः संबन्धीरथः समानयोजनः तुल्ययोजनः युवयोर्द्वयोरेकरथारूढत्वादुभयार्थंसकृदेवयुज्यते युक्तःसरथः अमर्त्योविनाशरहितः अप्रतिहतगतिरित्यर्थः अतएव हेअश्विनौ हियस्मात्समुद्रेन्तरिक्षे ईयतेगच्छति अन्तरिक्षनामसुपठितं समुद्रशब्दं यास्कएवंव्याचख्यौ—समुद्रःकस्मात्समुद्द्रवन्त्यस्मादापःसमभिद्रवन्त्येनमापःसंमोदन्तेस्मिन्भूतानिसमुदकोभवतिसमुनत्तीतिवेति[1] ॥ समानयोजनः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । अमर्त्यः अव्ययपूर्वपदप्रकृतिस्वरत्वम् । ईयते ईङ्गतौ अदुपदेशाल्लसार्वधातुकानुदात्तत्वेश्यनोनित्त्वादाद्युदात्तत्वम् हिचेतिनिघातप्रतिषेधः ॥ १८ ॥

१८. शत्रु-नाशक अश्विनीकुमारद्वय! तुम दोनों के लिए तैयार रथ विनाश-रहित है; यह समुद्र या अन्तरिक्ष में जाता है।

न्य१घ्न्यस्यमूर्धनिचक्रंरथस्ययेमथुः । परिद्यामन्यदीयते ॥ १९ ॥

नि । अघ्न्यस्य । मूर्धनि । चक्रम् । रथस्य । येमथुः । परि ।

द्याम् । अन्यत् । ईयते ॥ १९ ॥

हे अश्विनौ युवां अघ्न्यस्यहन्तुंविनाशयितुमशक्यस्यदृढस्यपर्वतस्यमूर्धनिउपरिचक्रं भवदीयरथसंबन्धिएकंचक्रंनियेमथुः नियमितवन्तौ अन्यच्चक्रं परिद्यांद्युलोकस्यपरितः ईयतेगच्छति ॥ अघ्न्यस्य अहननमघ्नः घञर्थेकविधानं स्थास्नापाव्यधिहनियुध्यर्थमितिहन्तेःकः प्रत्ययः अघ्नमर्हतिअघ्न्यः छन्दसिचेतियप्रत्ययःप्रत्ययस्वरेणान्तोदात्तत्वम् । येमथुः यमउपरमे कितिलिटिअतएकहल्मध्येइत्यत्वाभ्यासलोपौ ॥ १९ ॥

१९. अश्विनीकुमारो! तुमने अपने रथ का एक चक्का अविनाशी पर्वत के ऊपर स्थिर किया है और दूसरा आकाश के चारों ओर घूम रहा है।

प्रातरनुवाके आश्विनेशस्त्रेउषस्येक्रतौगायत्रेछन्दसिकस्तउषइतितृचः अथोषस्यइतिखण्डे—कस्तउषइतितिस्रइतिसूत्रितम् ।

तस्मिंस्तृचेप्रथमांसूक्तेविंशीमृचमाह—

कस्तंउषःकधप्रियेभुजेमर्तोअमर्त्ये । कंनक्षसेविभावरि ॥ २० ॥

कः । ते । उषः । कधऽप्रिये । भुजे । मर्तः । अमर्त्ये । कम् ।

नक्षसे । विभाऽवरि ॥ २० ॥

---

1 नि० २. १०. ।

अश्विभ्यांप्रेरितःशुनःशेपः उषसंतुष्टाव तथाचब्राह्मणम्—तमश्विनावूचतुरुषसंनुस्तुह्यथत्वोत्स्रक्ष्यावइतिसउषसंतुष्टावाततउत्तरेणतृचेनतस्यहस्मऋच्यृच्युक्तायांविपाशोमुमुचेकनीयऐक्ष्वाकस्योदरंभवत्युत्तमस्यामेवर्च्युक्तायांविपाशोमुमुचेगदऐक्ष्वाकआसेति[1]। हेकधप्रिये स्तुतिप्रिये अमर्त्येमरणरहिते उषः एतच्छब्दाभिधेयेउषःकालाभिमानिनिदेवते भुजेतवभोगायमर्तोमनुष्यःकोविद्यते हेविभावरि विशेषप्रभावयुक्तेउषोदेवि कंपुरुषंनक्षसेआप्नोषि तवोचितंभोगंदातुंनकोपिमनुष्यःसमर्थः अतएवत्वंकमपिपुरुषंभोगापेक्षयानप्राप्नोषि ईदृशस्तवमहिमेत्यर्थः॥ ते तेमयावेकवचनस्येतियुष्मच्छब्दस्यतेआदेशः सर्वानुदात्तः। कधप्रिये कथवाक्यप्रबन्धे चुरादिरदन्तः णौअतोलोपस्यस्थानिवद्भावात् उपधावृद्ध्यभावः चिन्तिपूजिकथिकुंबिचर्चश्चेत्यङ्प्रत्ययः णेरनिटीतिणिलोपः ततष्टाप् षष्ठीसमासे ङ्यापोःसंज्ञाछन्दसोर्बहुलमितिह्रस्वत्वं थकारस्यधकारश्छान्दसः आमन्त्रितानुदात्तत्वम्। भुजे भुजपालनाभ्यवहारयोः संपदादिलक्षणःक्विप् सावेकाचइतिविभक्तेरुदात्तत्वम्। मर्तः असिहसीत्यादिनातन्प्रत्ययान्तआद्युदात्तः। नक्षसे नक्षणक्षगतौ। विभावरि भादीप्तौ विपूर्वादस्मादातोमनिन्क्वनिब्वनिपश्चेति वनिप् वनोरचेतिङीप् तत्सन्नियोगेननकारस्यरेफादेशः अंबार्थनद्योर्ह्रस्वइतिह्रस्वत्वम्॥ २०॥

२०. हे स्तुति-प्रिय अमर उषा! तुम्हारे संभोग के लिए कौन मनुष्य है? हे प्रभाव-सम्पन्न! तुम किसे प्राप्त होगी?

एकविंशीमृचमाह—

व॒यंहि॒ते॒अम॑न्म॒ह्यान्ता॒दाप॑रा॒कात्। अश्वे॒नचि॒त्रे॒अरु॒षि॥ २१॥

व॒यम्। हि। ते॒। अम॑न्महि। आ। अन्ता॑त्। आ। प॒रा॒कात्।
अश्वे॑। न। चि॒त्रे॒। अ॒रु॒षि॒॥ २१॥

अश्वेव्यापनशीले चित्रेचायनीये येअरुषिआरोचमाने उषःकालाभिमानिनिदेवते तवस्वरूपं आन्तात्समीपपर्यन्तं आपराकात् दूरपर्यन्तंवयंमनुष्याःनामन्महिनबोद्धुंसमर्थाः हिशब्दः प्रसिद्धौ देवतामहिम्नःपारावारयोरज्ञानमस्मासुप्रसिद्धमित्यर्थः॥ अमन्महि मनज्ञाने बहुलंछन्दसीतिबहुलवचनाद्वश्य नोलुक् लुङ्लङ्लृङ्क्ष्वडुदात्तः हिचेतिनिघातप्रतिषेधः। अश्वे अशूव्याप्तौ अशूप्रुषीत्यादिनाक्वन्प्रत्ययः आमन्त्रिताद्युदात्तत्वम्॥ २१॥

२१. हे व्यापक और विचित्र-प्रकाशवती उषा! हम दूर या पास से तुम्हें नहीं समझ सकते।

द्वाविंशीमृचमाह—

त्वंत्येभि॒रागहि॒वाजे॑भिर्दुहितर्दिवः। अ॒स्मेर॒यिंनिधा॑रय॥ २२॥३१॥

---

१ ऐ० ब्रा० ७. १६. । २ अरुषिअर्तिपृवपीत्यादिनाअर्तेरुसिनित् आमन्त्रितनिघातः। ३ अन्तात् अमधातोः हसिमृग्रिणेतितन्। ४ पराकात् परापूर्वात्। किरतेरन्येष्वपीतिडः।

त्वम् । त्येभिः । आ । गहि । वाजेभिः । दुहितः । दिवः ।
अस्मे इति । रयिम् । नि । धारय ॥ २२ ॥ ३१ ॥

हेदिवोदुहितः द्युदेवतायाःपुत्रि उषोदेवि त्येभिर्वाजेभिः तैरन्नैः सहत्वमागहि अत्रागच्छ अस्मे अस्मासुरयिंधनंनिधारयनितरांस्थापय॥त्येभिः बहुलंछन्दसीतित्यद्शब्दात् भिसऐसादेशाभावः। गहि असकृदुक्तम्। दुहितर्दिवः परस्यापिदिवइत्यस्यदिवोदुहितरितिअन्वयेसतिपूर्वत्वात् सुबामन्त्रितइतिपराङ्गवद्भावेनपष्ठ्यामन्त्रितसमुदायस्यसर्वानुदात्तत्वम् यद्वा कार्यकालंहिसंज्ञापरिभाषमितिन्यायेन सुबामन्त्रितेइति अस्यामन्त्रितस्यचेत्याष्टमिकेनयोगेनैकवाक्यत्वेसति परत्वात् पराङ्गवद्भावेसतिसर्वानुदात्तत्वं कृतस्वरयोःषष्ठ्यामन्त्रितयोःपश्चाद्व्यत्ययोबहुलमितिव्यत्ययस्तत्प्रयोगः। अस्मे सुपांसुलुगितिसप्तम्याःशेआदेशः॥ २२ ॥

२२. हे स्वर्ग-पुत्री ! उस अन्न के साथ तुम आओ, हमें धन प्रदान करो।

इतिप्रथमस्यद्वितीयेएकत्रिंशोवर्गः॥ ३१ ॥

इतिप्रथमेमण्डलेषष्ठोनुवाकः॥ ६ ॥

सप्तमेनुवाकेपञ्चसूक्तानि तत्रत्वमग्नेप्रथमइतिप्रथमंसूक्तमष्टादशर्चं आङ्गिरसोहिरण्यस्तूपऋषिः अष्टमीषोडश्यष्टादश्यस्त्रिष्टुभः शिष्टास्त्रिष्टुबन्तपरिभाषयाजगत्यः अग्निर्देवता तथाचानुक्रमणिका—त्वमग्नेद्यूनाहिरण्यस्तूपआग्नेयंत्रिष्टुबन्त्याष्टमीषोळश्यौचेति। प्रातरनुवाकेआग्नेयेक्रतौआश्विनशस्त्रेचत्वमग्नेप्रथमइतिसूक्तं अथैतस्यारात्रेरितिखण्डे—त्वमग्नेप्रथमोअङ्गिराऋषिर्नूचित्सहोजाअमृतोनितुन्दतइतिसूत्रितम् अभिप्लवषडहस्यतृतीयेहनिआग्निमारुतेशस्त्रेइदंसूक्तंजातवेदस्यंनिविद्धानीयं तथाचतृतीयस्यत्र्यर्यमेतिखण्डेसूत्रितम्—त्वमग्नेप्रथमोअङ्गिराइत्याग्निमारुतमिति। वाजपेयेआग्निमारुतेएतत्सूक्तं जातवेदस्यंनिविद्धानीयं तृतीयेनाभिप्लविकेनोक्तंतृतीयसवनमित्यतिदिष्टत्वात्।

तस्मिन्सूक्तेप्रथमामृचमाह—

त्वमग्नेप्रथमोअङ्गिराऋषिर्देवोदेवानामभवःशिवःसखा । तवव्रतेकवयोविद्मनापसोजायन्तमरुतोभ्राजदृष्टयः ॥ १ ॥

त्वम् । अग्ने । प्रथमः । अङ्गिराः । ऋषिः । देवः । देवानाम् ।
अभवः । शिवः । सखा । तव । व्रते । कवयः । विद्मनाऽअपसः ।
अजायन्त । मरुतः । भ्राजत्ऽऋष्टयः ॥ १ ॥

हेअग्नेत्वंप्रथमःआद्यः आङ्गिरसानामृषीणांसर्वेषांजनकत्वात् तादृशोऽङ्गिरोनामकऋषिः अभवः तथाचब्राह्मणम्—येऽङ्गाराआसंस्तेऽङ्गिरसोभवन्निति। तथास्वयंदेवोभूत्वादेवानामन्येषांशिवःशोभनःसखाभव तवव्रतेत्वदीयेकर्मणिकवयोमेधाविनोविद्मनापसोज्ञानेनव्याप्नुवानाः ज्ञातकर्माणोवाभ्राजदृष्टयः दीप्यमानायुधाः मरुतोमरुत्संज्ञकादेवाअजायन्त॥ विद्मनापसः विदज्ञाने विद्मोवेदनं बहुलग्रहणादौणादिकोमक्प्रत्ययः तदस्यास्तीतिपामादिलक्षणोनः प्रत्ययस्वरेणान्तोदात्तत्वं विद्मनान्यपांसियेषांतेविद्मनापसःपूर्वपदस्य अन्येषामपिदृश्यतइतिदृशिग्रहणादवग्रहसमयेपिदीर्घत्वम्। अजायन्त जनीप्रादुर्भावे तस्यश्यनि ज्ञाजनोर्जेतिजादेशः। भ्राजदृष्टयः भ्राजृदीप्तौ व्यत्ययेनशत्रन्तस्य लसार्वधातुकानुदात्तत्वेधातुस्वरः ऋषीगताविस्यस्मात्क्विच्क्तौचसंज्ञायामितिक्तिजन्तऋषिशब्दः ततोबहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्. ॥ १ ॥

१. अग्नि! तुम अङ्गिरा ऋषि लोगों के आदि ऋषि थे। देवता होकर देवों के कल्याण-वाही सखा थे। तुम्हारे ही कर्म से मेधावी, ज्ञात-कार्य और शुभ्रशस्त्र मरुद्गण ने जन्म ग्रहण किया था।

त्वम॑ग्ने प्रथ॒मो अङ्गि॑रस्तमः क॒विर्दे॒वानां॒ परि॑ भूषसि व्र॒तम्। वि॒भुर्विश्व॑स्मै॒ भुव॑नाय॒ मेधि॑रो द्वि॒मा॒ता श॒युः क॑ति॒धा चि॑दा॒यवे॑ ॥ २ ॥

त्वम्। अ॒ग्ने॒। प्र॒थ॒मः। अङ्गि॑रःऽतमः। क॒विः। दे॒वाना॑म्। परि॑। भू॒ष॒सि॒। व्र॒तम्। वि॒ऽभुः। विश्व॑स्मै। भुव॑नाय। मेधि॑रः। द्वि॒ऽमा॒ता। श॒युः। क॒ति॒धा चि॒त्। आ॒यवे॑ ॥ २ ॥

हेअग्ने त्वंप्रथमआद्यः अङ्गिरस्तमः अतिशयेनाङ्गिरोभूत्वाकविर्मेधावीसन्देवानामन्येषां व्रतंकर्मपरिभूषसिपरितोलङ्करोषि कीदृशस्त्वं विश्वस्मैभुवनायसमस्तलोकानुग्रहार्थंविभुःबहुविधः आहवनीयाद्यनेकरूपधारीत्यर्थः मेधिरोमेधावान्. द्विमाताद्वयोररण्योरुत्पन्नः यद्वा द्वयोर्लोकयोर्निर्माता आयवेमनुष्यार्थंकतिधाचित्कतिभिःप्रकारैःसर्वत्रशयुः शयानः तत्तन्मनुष्यगृहेवस्थितस्यतवप्रकाराइयन्तइतिनकेनापिज्ञायतइत्यर्थः॥भूषसि भूषअलङ्कारे भौवादिकः। विभुः विप्रसंभ्योड्वसंज्ञायामितिविपूर्वाद्भवतेर्डुप्रत्ययः कृदुत्तरपदप्रकृतिस्वरत्वम्। भुवनाय भूसूधूभ्रस्जिभ्यश्छन्दसीतिक्युन् योरनादेशेनित्स्वरेणाद्युदात्तत्वम्। मेधिरःमेधृसङ्गमेच अस्माद्बाहुलकःइरन्प्रत्ययः नित्स्वरः। द्विमाता द्वेमातरौयस्यासोद्विमाता नद्यृतश्चेतिकप्प्रत्ययोनभवति मातृमातृकयोर्भेदेनोपादानात् नद्यृतश्चेतिकबपिविभाष्यतइतितस्यमातृशब्दविषयेपाक्षिकत्वोक्तेः त्रिचक्रादित्वादुत्तरपदान्तोदात्तत्वम्.यद्वा द्वयोर्मातािद्वमाता समासस्येत्यन्तोदात्तत्वम्। शयुः शीङ्स्वप्ने भृमृदृशी-

१ ऐ० ब्रा० ३. ३४.। २ अङ्गिराः अङ्गतेरसिरुडागमःआद्युदात्तश्चनिपात्यते।
३ शिवःसर्वनिघृष्वेत्यत्रशीङ्धातोर्ह्रस्वत्वंवनुअन्तोदात्तत्वंचनिपात्यते।

त्यादिनाउप्रत्ययः। कतिधा इत्यन्तस्यकिमशब्दस्य बहुगणवतुडतिसंख्येतिसंख्यासंज्ञायांसंख्यायाविधार्थेधेतिधाप्रत्ययः। आयवे छन्दसीणइत्येतेरुण्प्रत्ययः ॥ २ ॥

२. अग्नि! तुम अङ्गिरा लोगों में प्रथम और सर्वोत्तम हो। तुम मेधावी हो और देवों का यज्ञ विभूषित करते हो। तुम सारे संसार के विभु हो; तुम मेधावी और द्विमातृक (दो काठों से उत्पन्न) हो। मनुष्यों के उपकार के लिए विभिन्न रूपों में सर्वत्र वर्त्तमान हो।

त्वमग्ने प्रथमो मातरिश्वन आविर्भव सुक्रतूया विवस्वते। अरेजेतां रोदसी होतृवूर्येऽसघ्नोर्भारमयजो महो वसो ॥ ३ ॥

त्वम्। अग्ने। प्रथमः। मातरिश्वने। आविः। भव। सुक्रतुऽया। विवस्वते। अरेजेताम्। रोदसी इति। होतृऽवूर्ये। असघ्नोः। भारम्। अयजः। महः। वसो इति ॥ ३ ॥

हेअग्ने त्वंमातरिश्वनेप्रथमोमुख्योभूत्वावर्तसे अग्निर्वायुरादित्यइतिवाय्वपेक्षयासर्वत्रमुख्यत्वावगमात् तादृशस्त्वंसुक्रतूयाशोभनकर्मेच्छयाविवस्वतेपरिचरतेयजमानायाविर्भवप्रकटोभव तवसामर्थ्यंदृष्ट्वारोदसीद्यावापृथिव्यौ अरेजेतां अकंपेताम् भ्यसतेरेजतइतिभयवेपनयोरितियास्कः। होतृवूर्येहोतृवरेणयुक्तेकर्मणिभारंभरणं असघ्नोःऊढवानसि हेवसोनिवासहेतोवह्नेमहःपूज्यन्देवानयजःइष्टवानसि मातरिश्वनेनिर्माणहेतुत्वान्मातान्तरिक्षं तत्रश्वसितिप्राणितीतिमातरिश्वावायुः श्वन्नुक्षन्नित्यादौमातरिश्वन्शब्दःकन्प्रत्ययान्तोनिपातितः। सुक्रतूया सुक्रतुमात्मनइच्छतिसुपआत्मनःक्यच्। अकृत्सार्वधातुकयोरितिदीर्घः क्यजन्तस्यधातुसंज्ञायांअप्रत्ययादितिभावेअकारप्रत्ययः ततष्टाप् सुपांसुलुगितितृतीयैकवचनस्यडादेशः टिलोपे उदात्तनिवृत्तिस्वरेणतस्योदात्तत्वं संहितायामन्येषामपिदृश्यतइतिपूर्वपदस्यदीर्घः। विवस्वते विवासतिःपरिचरणकर्मा। अस्मात्संपदादिलक्षणःक्विप् व्यत्ययेनोपधाह्रस्वत्वं तदस्यास्तीतिमतुप् मादुपधायाइतिमतोर्वत्वं तसौमत्वर्थेइतिभत्वेनपदत्वाभावाद्रुत्वाभावः मतुपःपित्त्वादनुदात्तत्वं धातुस्वरःशिष्यते। रोदसी वाछन्दसीतिपूर्वसवर्णदीर्घत्वम्। होतृवूर्ये होत्राव्रियतइतिहोतृवूर्योयज्ञः वृञ्वरणे बहुलग्रहणादौणादिकःक्यप् उदोष्ठ्यपूर्वस्येत्युत्वं हलिचेतिदीर्घः यद्वा वृञ्वरणेइत्यस्मादेतिस्तुशास्वित्यादिनाक्यप् अनित्यमागमशासनमितितुगभावः अकृत्सार्वधातुकयोरितिदीर्घत्वे पूर्ववतउत्त्वदीर्घौ प्रत्ययस्यपित्त्वानुदात्तत्वे धातुस्वरः कृदुत्तरपदप्रकृतिस्वरत्वेनसएवशिष्यते। असघ्नोः षघहिंसायां अत्रतुवहनार्थः स्वादिभ्यःश्नुः पादादित्वादनिघातः। अयजः भारमित्यस्यपूर्वपदस्यवाक्यान्तरगतत्वात् तदपेक्षयास्यनिघातोनभवति समानवाक्येनिघातयुष्मदस्मदादेशावक्तव्याइतिवचनात्। महः

१ नि० ३.२१। २ नि० ११.२३।

महपूजायां क्विप्चेतिक्विप् सुपांसुपोभवन्तीतिशसोङसादेशः सावेकाचइतितस्योदात्तत्वम् यद्वा शसिमहच्छब्दस्य अच्छब्दलोपश्छान्दसः बृहन्महतोरुपसंख्यानमितिशसउदात्तत्वम् ॥ ३ ॥

३. अग्नि! तुम मातरिश्वा या वायु के अग्रगामी हो। तुम शोभन यज्ञ की अभिलाषा से सेवक यजमान के निकट प्रकट हो जाओ। तुम्हारी शक्ति देखकर आकाश और पृथ्वी काँप जाती हैं। तुम्हें होता माना गया है; इसलिए तुमने यज्ञ में उस भार को वहन किया है। हे आवास-हेतु अग्नि! तुमने पूजनीय देवों का यज्ञ निष्पन्न किया है।

त्वमग्नेमनवेद्यामवाशयःपुरूरवसेसुकृतेसुकृत्तरः। श्वात्रेणयत्पित्रोर्मुच्यसेपर्यात्वापूर्वमनयन्नापरंपुनः ॥ ४ ॥

त्वम्। अग्ने। मनवे। द्याम्। अवाशयः। पुरूरवसे। सुऽकृते। सुकृत्ऽतरः। श्वात्रेण। यत्। पित्रोः। मुच्यसे। परि। आ। त्वा। पूर्वम्। अनयन्। आ। अपरम्। पुनरिति ॥ ४ ॥

हेअग्ने त्वंमनवेमनोरनुग्रहार्थंद्यांद्युलोकंअवाशयः शब्दितवानसि पुण्यकर्मभिःसाध्योद्युलोकइतिप्रकटितवानसि सुकृते तवपरिचरणंकुर्वते पुरूरवसे एतन्नामकस्यराज्ञोनुग्रहार्थंसुकृत्तरः अतिशयेनशोभनफलकार्यभूः यद्यदापित्रोररण्योः श्वात्रेणक्षिप्रमथनेनपरिमुच्यसेपरितोमुक्तो-भवसिउत्पद्यसइत्यर्थः तदानींत्वाअरण्योरुत्पन्नंत्वां पूर्वं वेदेःपूर्वदेशंआनयन् आहवनीयत्वेन स्थापितवन्तः पुनःपश्चादपरंपश्चिमंदेशंआनयन् गार्हपत्यरूपेणप्रापितवन्तः आहवनीयकर्मा-नुष्ठानादूर्ध्वंगार्हपत्यरूपेणधारितवन्तइत्यर्थः॥अवाशयः वाश्रृशब्दे पुरूरवसेपुरुरौतीतिपुरूरवाः रुशब्दे अस्मादौणादिकेऽसुनि पुरसिचपुरूरवाइतिपूर्वपदस्यदीर्घोनिपात्यते। सुकृते सुकर्मपाप-मन्त्रपुण्येषुकृञइतिक्विप् ततस्तुक्। पित्रोः उदात्तयणोहल्पूर्वादितिविभक्तेरुदात्तत्वम्। मुच्यसे अदुपदेशाल्लसार्वधातुकानुदात्तत्वं यद्यपिसतिशिष्टस्वरवलीयस्त्वमन्यत्रविकरणेभ्यइति वचनाद्विकरणस्वरःसतिशिष्टोपिलसार्वधातुकस्वरस्यबाधकोनभवति तथापिधातुस्वरंबाधतएव धातुस्वरंश्नास्वरइत्युक्तत्वात् अतोयकएवस्वरेप्राप्ते व्यत्ययेनाद्युदात्तत्वम् ॥ ४ ॥

४. अग्नि! तुमने मनु को स्वर्ग-लोक की कथा सुनाई थी। तुम परिचर्या करनेवाले पुरुरवा राजा को अनुगृहीत करने के लिए अत्यन्त शुभफल-दायक हुए थे। जिस समय अपने पितृ-रूप दो काष्ठों के घर्षण से तुम उत्पन्न होते हो, उस समय तुम्हें ऋत्विक् लोग वेदी की पूर्व ओर ले जाते हैं। अनन्तर तुम्हें पश्चिम ओर ले जाया जाता है।

त्वमग्नेवृषभःपुष्टिवर्धनउद्यतस्रुचेभवसिश्रवाय्यः। यआहुतिंपरिवेदावषट्कृतिमेकायुरग्रेविशआविवाससि ॥ ५ ॥ २२ ॥

त्वम् । अ॒ग्ने॒ । वृ॒ष॒भः । पु॒ष्टि॒ऽवर्धनः । उद्य॑तऽस्रुचे । भ॒व॒सि॒ ।
श्र॒वाय्यः॑ । यः । आऽहुतिम् । परि॑ । वेद॑ । वषट्ऽकृतिम् ।
एक॑ऽआयुः । अग्रे॑ । विशः॑ । आ॒ऽवि॒वास॑सि ॥ ५ ॥ ३२ ॥

हेअग्ने त्वंवृषभः कामानांवर्षितापुष्टिवर्धनोयजमानस्यधनादिपोषाभिवृद्धिहेतुः उद्यतस्रुचे उद्धृतयास्रुचायुक्ताययजमानायतदनुग्रहार्थंश्रवाय्यः मन्त्रैःश्रवणीयोभवसि योयजमानोवषट्कृतिं वषट्कारयुक्तामाहुतिंपरिवेदपरितोजानातिसमर्पयतीत्यर्थः एकायुःमुख्यान्नः त्वमग्रेमथमंतंयजमानंविशः तदनुकूलाःप्रजाःआविवाससि सर्वतःप्रकाशयसि ॥ पुष्टिवर्धनः वृधुवृद्धौ अस्मात् णिजन्तान्नन्द्यादित्वाल्ल्युः लित्स्वरेणोत्तरपदस्याद्युदात्तत्वं कृदुत्तरपदप्रकृतिस्वरत्वेनसएवशिष्यते । उद्यतस्रुचे यमउपरमे अस्मादुत्पूर्वान्निष्ठेतिक्तप्रत्यये अनुदात्तोपदेशेत्यादिना अनुनासिकलोपः गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम् उद्यतास्रुक्येनेतिबहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । वेद द्व्यचोतस्तिङइतिसंहितायांदीर्घत्वम् ॥ ५ ॥

५. अग्नि ! तुम ईप्सित-फल-दाता और पुष्टिकारक हो। यज्ञ-पात्र उठाने के समय यजमान तुम्हारा यश गाता है। जो यजमान तुम्हें वषट्कार से युक्त आहुति प्रदान करता है, हे एकमात्र अन्नदाता अग्नि ! उसे तुम पहले और पीछे समस्त लोक को प्रकाश देते हो।

त्वम॑ग्ने वृजि॒नव॑र्तनिं॒ नरं॒ सक्म॑न्पिपर्षि वि॒दथे॑ विचर्षणे । यः शूर॑साता॒ परि॑तक्म्ये॒ धने॑ द॒भ्रेभि॑श्चि॒त्समृ॑ता॒ हंसि॒ भूय॑सः ॥ ६ ॥

त्वम् । अ॒ग्ने॒ । वृ॒जि॒नऽव॑र्तनिम् । नर॑म् । सक्म॑न् । पि॒प॒र्षि॒ ।
वि॒दथे॑ । वि॒ऽच॒र्ष॒णे॒ । यः । शूर॑ऽसाता । परि॑ऽतक्म्ये । धने॑ ।
द॒भ्रेभि॑ः । चि॒त् । सम्ऽऋ॑ता । हंसि॑ । भूय॑सः ॥ ६ ॥

हेविचर्षणे विशिष्टज्ञानयुक्ताग्ने त्वंवृजिनवर्तनिंविस्तृतमार्गंसदाचाररहितंनरंपुरुषंसक्मन् सचनीयेसमवेतुंयोग्येविदथेकर्मणि पिपर्षिपालयसिपूरयसिवासत्कर्मानुष्ठानयुक्तंकरोषीत्यर्थः यस्त्वंपरितक्म्येपरितोगन्तव्येधने धनवत्शूराणांमियतमे शूरसाता शूरैःसंभजनीयेयुद्धेदभ्रेभिश्चिदअल्पैरपिशौर्यरहितैःपुरुषैः दभ्रमर्भकमित्यल्पस्येतियास्कः । समृतासम्यक्योद्धुंप्राप्तेसतितदनुग्रहार्थंभूयसःप्रौढान्प्रतिपक्षिणः शत्रूनहंसिमारयसि ईदृशस्त्वमहिमेत्यर्थः ॥ वृजिनवर्तनिं वृजिना वर्तनिर्यस्येतिबहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । सक्मन् षचसमवाये अन्येभ्योपिदृश्यन्तइतिमनिन् नेड्वशिकृतीतिइट्प्रतिषेधः न्यंक्वादित्वात्कुत्वं सुपांसुलुगितिसप्तम्यालुक् । पिपर्षि पृपालनपूरणयोः सिपि श्लौ द्विर्भावह्रस्वोरदत्वहलादिशेषाः अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वम् । शूरसा-

१ वृषभः ऋषिवृषिभ्यांकिदित्यभच् । २ स्रुचे स्रुवःकःचिक्चइकारउच्चारणार्थः ककारत चकारःअवशिष्यते । ३ श्रवाय्यःश्रुदक्षीत्यादिनाआय्यः ४ वृजिनवर्तनिं वृजेःकिच्चेतिइनच् वृतेश्चेतिअनिः ५ विदथे रुदिविदिभ्यांङिदितिअथप्रत्ययः । ६ नि० ३. २०. ।

ता शुगतौ शुषिचिमीनांदीर्घश्चेतिशूरशब्दोरन्प्रत्ययान्तआद्युदात्तः वनषणसंभक्ताविस्यस्माद् क्तिन्नन्तःसातिशब्दः जनसनखनांसञ्झलोरित्यात्वम् शूराणांसातिः संभजनमत्रेति बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वं सुपांसुलुगितिसप्तम्याडादेशः। परितक्म्ये तकहसने अस्मादौणादिकोभावेमक् तदर्हतीतिछन्दसिचेतियः प्रादयोगताद्यर्थेप्रथमयेतिसमासे अव्ययपूर्वपदप्रकृतिस्वत्वरम्। दभ्रेभिः दंभुदंभे स्फायितञ्चीत्यादिनारक् बहुलंछन्दसीतिभिसऐसादेशाभावः। सभृता गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वं पूर्ववद्दाकारः। हंसि हन्तेःसिपि नश्चापदान्तस्यझलीत्यनुस्वारः यद्वृत्तयोगादनिघातः। भूयसः बहोर्लोपोभूचबहोरितिबहुशब्दादुत्तरस्येयसुनईकारलोपः बहोर्भूभावश्च नित्त्वादाद्युदात्तत्वम्॥ ६॥

६. विशिष्ट-ज्ञान-शाली अग्नि! तुम कुमार्ग-गामी पुरुष को उसके उद्धार-योग्य कार्य में नियुक्त करो। युद्ध के चारों ओर विस्तृत और अच्छी तरह प्रारम्भ होने पर तुम अल्प-संख्यक और वीरता-विहीन पुरुषों के द्वारा बड़े-बड़े वीरों का भी वध करते हो।

त्वंतमंग्नेअमृतत्वउत्तमेमर्तंदधासिश्रवसेदिवेदिवे।यस्तातृषाणउभयायजन्मनेमयःकृणोषिप्रयआचसूरये॥ ७॥

त्वम्। तम्। अग्ने। अमृतऽत्वे। उत्ऽतमे। मर्तम्। दधासि।
श्रवसे। दिवेऽदिवे। यः। ततृषाणः। उभयाय। जन्मने।
मयः। कृणोषि। प्रयः। आ। च। सूरये॥ ७॥

हेअग्नेत्वंतंमर्तं तथाविधंत्वत्सेविनंमनुष्यं दिवेदिवे प्रतिदिनं श्रवसेन्नार्थं उत्तमे अमृतत्वे उत्कृष्टे मरणरहितेपदेदधासि धारयसि योयजमानउभयायजन्मने द्विविधजन्मार्थं द्विपदांचतुष्पदांलाभायेत्यर्थः ततृषाणः अतिशयेनतृष्णायुक्तोभवति तस्मैसूरये अभिज्ञाययजमानाय मयः सुखं यद्वैसुखंतन्मयइतिश्रुत्यन्तरात्। प्रयश्च अन्नमपि आकृणोषिसर्वतःकरोषि॥ ततृषाणः ञितृषापिपासायां लिटःकानच् चित्त्वादन्तोदात्तत्वं संहितायांदीर्घश्छान्दसः। कृणोषि कृविहिंसाकरणयोश्च धिन्विकृण्व्योरचेत्युप्रत्ययः चादिलोपेविभाषेति निघातप्रतिषेधः॥ ७॥

७. अग्नि! तुम अपने उस सेवक मनुष्य को, अनुदिन अन्न के लिए, उत्कृष्ट और अमरपद पर प्रतिष्ठित करते हो। जो स्वर्ग-लोक और जन्मान्तर की प्राप्ति या उभय-रूप जन्म के लिए अतीव पिपासु है, उस ज्ञानी यजमान को सुख और अन्न दो।

त्वंनोअग्नेसनयेधनानांयशसंकारुंकृणुहिस्तवानः। ऋध्यामकर्मापसानवेनदेवैर्द्यावापृथिवीप्रावतंनः॥ ८॥

---

१ तै० ब्रा० २. २. ९।

त्वम् । नः । अग्ने । सनये । धनानाम् । यशसम् । कारुम् ।
कृणुहि । स्तवानः । ऋध्याम । कर्म । अपसा । नवेन । देवैः ।
द्यावापृथिवी इति । प्र । अवतम् । नः ॥ ८ ॥

हेअग्ने स्तवानः स्तूयमानस्त्वंनोस्माकं धनानांसनयेदानार्थं यशसंयशोयुक्तं कारुंकर्मणांकर्तारंपुत्रंकृणुहिकुरु नवेननूतनेन अपसाप्राप्तेन त्वद्दत्तेनपुत्रेणकर्मयागदानादिरूपं ऋध्यामवर्धयामहे द्यावापृथिवीउभेदेवते देवैरन्यैःसहनोस्मान् प्रावतं प्रकर्षेणरक्षतम् ॥ यशसं अर्शआदित्वादच्प्रत्ययः व्यत्ययेनप्रत्ययात्पूर्वस्योदात्तत्वं यद्वा सर्वप्रातिपदिकेभ्यःक्विब्वक्तव्यइतियशस्शब्दात्क्विप् तस्यप्रत्ययान्तस्य सनाद्यन्तधातुसंज्ञायां क्विप्चेतिक्विप् प्रत्ययान्तधातोःसतिशिष्टत्वाद्धातोरित्यन्तोदात्तत्वम् । कृणुहि उतश्चप्रत्ययाच्छन्दोवावचनमितिहेर्लुगभावः । स्तवानः सम्यानच्स्तुवइतिबहुलवचनात् केवलस्यापिस्तौतेरानच्प्रत्ययः वृषादित्वादाद्युदात्तत्वम् । ऋध्याम ऋधुवृद्धौ बहुलंछन्दसीतिविकरणस्यलुक् यासुटउदात्तत्वम् । द्यावापृथिवी दिवोद्यावेतिद्यावादेशः आमन्त्रितानुदात्तत्वम् ॥ ८ ॥

८. अग्नि ! हम धन-लाभ के लिए तुम्हारी स्तुति करते हैं। तुम यशस्वी और यज्ञकर्त्ता पुत्रवान करो। नये पुत्र के द्वारा यज्ञ-कर्म की हम वृद्धि करेंगे। हे द्यु और पृथिवी ! देवों के साथ हमें सुचारु-रूप से बचाओ।

नवमीमृचमाह—

त्वंनोअग्नेपित्रोरुपस्थआदेवोदेवेष्वनवद्यजागृविः । तनूकृद्बोधि प्रमतिश्चकारवेत्वंकल्याणवसुविश्वमोपिषे ॥ ९ ॥

त्वम् । नः । अग्ने । पित्रोः । उपऽस्थे । आ । देवः । देवेषु ।
अनवद्य । जागृविः । तनूऽकृत् । बोधि । प्रऽमतिः । च ।
कारवे । त्वम् । कल्याण । वसु । विश्वम् । आ । ऊपिषे ॥ ९ ॥

हेअनवद्य दोषरहिताग्ने देवेषु सर्वेषुमध्ये जागृविर्जागरूकस्त्वं पित्रोर्मातृपितृरूपयोर्द्यावापृथिव्योरुपस्थे समीपस्थाने वर्तमानःसन् नोस्माकंतनूकृत् पुत्ररूपशरीरकारीभूत्वा बोधिबुध्यस्व अनुगृहाणेत्यर्थः तथा कारवे कर्मकर्त्रे यजमानायप्रमतिश्चअनुग्रहरूपप्रकृष्टमतियुक्तश्चभवेतिशेषः हेकल्याणमङ्गलरूपाग्नेत्वंविश्वंवसुसर्वमपिधनं ओपिषे यजमानार्थमावपसि ॥ उपस्थे सुपिस्थइतितिष्ठतेःकःप्रत्ययः आतोलोपइटिचेत्याकारलोपः मरुद्वृधादीनांछन्दस्युपसंख्यानमितिपूर्वपदान्तोदात्तत्वम् । जागृविः जागृनिद्राक्षये जॄशॄस्तृजागृभ्यःक्विन्निति क्विन् नित्त्वादाद्युदात्तत्वम् । बोधि बुधअवगमने बहुलंछन्दसीतिशपोलुक् वाछन्दसीतिहेरपित्त्वस्य

विकल्पितत्वेनपित्त्वात् अङित्त्वेसति अङित्श्चेतिहेर्धिरादेशः लघूपधगुणः धातोरन्त्यलोपश्छान्दसः। प्रमतिः मनज्ञाने क्तिनि अनुदात्तोपदेशेत्यादिना अनुनासिकलोपः प्रकृष्टामतिर्यस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। ऊपिषे टुवप्बीजसन्ताने छान्दसेलिटि थासःसे वचिस्वपीत्यादिनासंप्रसारणपरपूर्वत्वे द्विर्भावहलादिशेषौ क्रादिनियमादिट्॥ ९॥

९. निर्दोष अग्निदेव ! तुम सब देवों में जागरूक हो। अपने पितृ-मातृ-रूप द्यावा-पृथिवी के पास रहकर और हमें पुत्र-दान करके अनुग्रह करो। यज्ञ-कर्त्ता के प्रति प्रसन्न-बुद्धि बनो। कल्याण-वाही अग्नि ! तुम यजमान के लिए संसार का सब तरह का अन्नप्रदान करो।

त्वमग्नेप्रमतिस्त्वंपितासिनस्त्वंवयस्कृत्तवजामयोवयम्। संत्वारायः शतिनःसंसहस्रिणःसुवीरंयन्तिव्रतपामदाभ्य॥ १०॥ २३॥

त्वम्। अग्ने। प्रऽमतिः। त्वम्। पिता। असि। नः। त्वम्। वयःऽकृत्। तव। जामयः। वयम्। सम्। त्वा। रायः। शतिनः। सम्। सहस्रिणः। सुऽवीरम्। यन्ति। व्रतऽपाम्। अदाभ्य॥ १०॥ २३॥

हेअग्ने त्वंप्रमतिः अस्मदनुग्रहरूपप्रकृष्टमतियुक्तोसि तथात्वंनोस्माकं पितापालकोसि तथात्वंवयस्कृत् आयुष्यप्रदोसि वयमनुष्ठातारस्तवजामयोबन्धवः हेअदाभ्य केनाप्यहिंसनीयाग्ने सुवीरं शोभनपुरुषयुक्तं व्रतपां कर्मणःपालकं त्वात्वां शतिनःशतसंख्यायुक्ताः रायोधनानि संयन्ति सम्यक्प्राप्नुवन्ति तथासहस्रिणः सहस्रसंख्याकाःरायः संयन्ति॥ सुवीरं बहुव्रीहौनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वेप्राप्ते वीरवीर्यौचेत्युत्तरपदाद्युदात्तत्वम्। अदाभ्य दभिःप्रकृत्यन्तरमस्तीतिकेचिदाहुः दभेश्चेतिवक्तव्यमितिण्यत्॥१०॥

१०. अग्नि ! तुम हमारे लिए प्रसन्न-मति हो; तुम हमारे पितृरूप हो। तुम परमायु के दाता हो; हम तुम्हारे बन्धु हैं। हिंसारहित अग्नि ! तुम शोभन पुरुषों से युक्त और व्रत-पालक हो। तुम्हें सैकड़ों-हज़ारों धन प्राप्त हों।

त्वामग्नेप्रथममायुमायवेदेवाअकृण्वन्नहुषस्यविश्पतिम्। इळामकृण्वन्मनुषस्यशासनींपितुर्यत्पुत्रोममकस्यजायते॥ ११॥

त्वाम्। अग्ने। प्रथमम्। आयुम्। आयवे। देवाः। अकृण्वन्। नहुषस्य। विश्पतिम्। इळाम्। अकृण्वन्। मनुषस्य। शासनीम्। पितुः। यत्। पुत्रः। ममकस्य। जायते॥११॥

हेअग्ने त्वां प्रथमंपुरा देवाः आयवेआयोर्मनुष्यरूपस्यनहुषस्यएतन्नामकराजविशेषस्य आयुंमनुष्यरूपं विश्पतिंसेनापतिंअकृण्वन्कृतवन्तः तथामनुष्यस्यमनोः इळां एतन्नामधेयांपुत्रींशासनींधर्मोपदेशकर्त्रीमकृण्वन्कृतवन्तः तथाचतैत्तिरीयैराम्नायते—इडावैमानवीयज्ञानुकाशिन्यासीदिति[2]। वाजसनेयिनोप्येवमामनन्ति—प्रयाजानुयाजानांमध्येमामवकल्पयमया सर्वानवाप्स्यसिकामानितिसामनुमन्वशादितियद्वशादिति। यद्यदाममकस्यमदीयस्यहिरण्यरूपसंबन्धिनोयःपिताङ्गिरास्तस्यपितुःपुत्रोजायते तदानींहिअग्नेत्वमेवपुत्ररूपआसीरितिशेषः ॥ आयवेषष्ठ्यर्थेचतुर्थीवक्तव्येतिचतुर्थी। नहुषस्य णहबन्धने नहिकलिहन्यर्तिभ्यउषच् वृषादित्वादाद्युदात्तत्वम्। विश्पतिं परादिश्छन्दसिबहुलमितिउत्तरपदाद्युदात्तत्वम्। मनुषस्य मनेर्नित्युषच् नित्त्वादाद्युदात्तत्वम् बाहुलकाद्वृद्ध्यभावः। शासनीं शिष्यतेअनयेतिशासनी करणाधिकरणयोश्चेतिल्युट् टिड्ढाणञित्यादिनाङीप् लित्स्वरेणाद्युदात्तत्वम्। ममकस्य ममेदमित्यर्थेतस्येदमित्यणि तवकममकावेकवचनेइत्यस्मच्छब्दस्यममकादेशः संज्ञापूर्वकोविधिरनित्यइतिवृद्ध्यभावः व्यत्ययेनाद्युदात्तत्वम्॥ ११॥

११. अग्नि! देवों ने पहले पुरुरवा के मानवरूपधारी पौत्र नहुष का तुम्हें मनुष्य शरीरवान् सेनापति बनाया। साथ ही उन्होंने इला को मनु की धर्मोपदेशिका भी बनाया था। जिस समय मेरे पिता अङ्गिरा ऋषि के पुत्र-रूप से तुमने जन्म ग्रहण किया था।

त्वंनोअग्नेतवदेवपायुभिर्मघोनोरक्षतन्वश्चवन्द्य। त्रातातोकस्यतनयेगवामस्यनिमेषंरक्षमाणस्तवव्रते ॥ १२ ॥

त्वम्। नः। अग्ने। तव। देव। पायुऽभिः। मघोनः। रक्ष। तन्वः। च। वन्द्य। त्राता। तोकस्य। तनये। गवाम्। असि। अनिऽमेषम्। रक्षमाणः। तव। व्रते॥ १२॥

हेवन्द्य वन्दनीयाग्नेदेव तवपायुभिस्त्वदीयैःपालनैःमघोनोधनयुक्तान्नोस्मान्रक्ष तथातन्वश्च तनूःपुत्रदेहानपिरक्ष तोकस्यास्मदीयस्यपुत्रस्ययस्तनयोस्मत्पौत्रादिस्तवव्रतेत्वदीयेकर्मणि अनिमेषंनिरन्तरंरक्षमाणः सावधानोवर्ततेतस्मिन्यागावःसन्तितासांगवांत्रातारक्षकोसि ईदृशस्यतवास्मद्रक्षणेकिमुवक्तव्यमित्यर्थः॥ मघोनः शसि श्वयुवमघोनामतद्धितइतिसम्प्रसारणम्। तन्वः सुपांसुपोभवन्तीतिशसोजसादेशः पूर्वसवर्णदीर्घस्यदीर्घाज्जसिचेतिप्रतिषेधः उदात्तस्वरितयोर्यणइतिस्वरितत्वम् शसि हि उदात्तयणोहल्पूर्वादितिविभक्त्युदात्तत्वंस्यात्॥ १२॥

१२. वन्दनीय अग्नि! हम धनवान् हैं। तुम रक्षण-शक्ति-द्वारा हम लोगों की और हमारे पुत्रों की देह की रक्षा करो। हमारा पौत्र तुम्हारे व्रत में निरन्तर नियुक्त है। तुम उसकी गौओं की रक्षा करो।

---

१ इलां इलस्वमक्षेपणयोःक्विप्हलन्तत्वादाप्। २ तै० ब्रा० १. १, ४.।

त्रयोदशीमृचमाह—

त्वमग्ने यज्यवे पायुरन्तरोऽनिषङ्गाय चतुरक्ष इध्यसे। यो रातहव्योऽवृकाय धायसे कीरेश्चिन्मन्त्रं मनसा वनोषि तम् ॥ १३ ॥

त्वम्। अग्ने। यज्यवे। पायुः। अन्तरः। अनिषङ्गाय। चतुःऽअक्षः। इध्यसे। यः। रातऽहव्यः। अवृकाय। धायसे। कीरेः। चित्। मन्त्रम्। मनसा। वनोषि। तम् ॥ १३ ॥

हे अग्ने त्वं यज्यवे यज्योर्यजमानस्य पायुः पालकः अन्तरः समीपवर्ती सन् अनिषङ्गाय रक्षोभिरसंबद्धाय यज्ञाय चतुरक्षः दिक्चतुष्टयेऽपि इन्द्रियस्थानीयज्वालायुक्तः इध्यसे दीप्यसे अवृकायाहिंसकाय धायसे पोषकाय तुभ्यं रातहव्यो दत्तहविष्को यो यजमानोऽस्ति कीरेश्चित् स्तोतुरेव सतस्तस्य सबन्धिनं मन्त्रं त्वदीयस्तोत्ररूपं मनसा त्वदीयेन चित्तेन वनोषि याचसि ॥ यज्यवे यजिमनिशुन्धीत्यादिना यजतेर्युप्रत्ययः वृषादित्वादाद्युदात्तः। पायुः कृवापाजीत्यादिना उण्प्रत्ययः आतो युक् चिण्कृतोरिति युगागमः। अनिषङ्गाय षञ्ज सङ्गे न विद्यते निषङ्गोऽस्येति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्। चतुरक्षः चत्वार्यक्षीणि ज्वालारूपाणि यस्यासौ चतुरक्षः बहुव्रीहौ सक्थ्यक्ष्णोरिति समासान्तः षच्प्रत्ययः चित इत्यन्तोदात्तत्वम्। धायसे वहिहाधाञ्भ्यश्छन्दसीत्यसुन् णिदित्यनुवृत्तेरातो युक्चिण्कृतोरिति युगागमः। कीरेः कृत संशब्दने अस्माण्ण्यन्तादच इ इरितीप्रत्यये णिलोपे धातोरन्त्यलोपश्छान्दसः। मन्त्रं मत्रि गुप्तभाषणे पचाद्यचि वृषादिषु पाठादाद्युदात्तत्वम्। वनोषि वनु याचने तनादिकृञ्भ्य उः प्रत्ययस्वरः ॥ १३ ॥

१३. अग्नि! तुम यजमान-रक्षक हो। यज्ञ को बाधा-शून्य करने के लिए पास में रहकर यज्ञ के चारों ओर दीप्तिमान् हो। तुम अहिंसक और पोषक हो। तुम्हें जो हव्य दान करता है, उस स्तोत्र-कर्त्ता के मंत्र को तुम ध्यान से ग्रहण करते हो।

चतुर्दशीमृचमाह—

त्वमग्न उरुशंसाय वाघते स्पार्हं यद्रेक्णः परमं वनोषि तत्। आध्रस्य चित्प्रमतिरुच्यसे पिता प्र पाकं शास्सि प्र दिशो विदुष्टरः ॥ १४ ॥

त्वम्। अग्ने। उरुऽशंसाय। वाघते। स्पार्हम्। यत्। रेक्णः। परमम्। वनोषि। तत्। आध्रस्य। चित्। प्रऽमतिः। उच्यसे। पिता। प्र। पाकम्। शास्सि। प्र। दिशः। विदुःऽतरः ॥ १४ ॥

---

१ सुवृशूशुपीत्यादिना कन् नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्।

हेअग्नेत्वं उरुशंसाय बहुभिःस्तोतव्याय वाघते ऋत्विजेतदुपकारार्थंस्पार्हंस्पृहणीयं परममुत्तमंयद्रेक्णोधनमस्तितद्धनंवनोषिअनुष्ठातालभतामितिकामयसे तथात्वंआध्रस्यचित् सर्वतोधारणीयस्यपोषणीयस्यदुर्बलस्ययजमानस्यापिप्रमतिः प्रकृष्टबुद्धियुक्तःपितापालकइत्यभिज्ञैरुच्यसे तथाविदुष्टरोतिशयेनाभिज्ञस्त्वंपाकंशिशुं पोतःपाकोर्भकोडिंभइत्यभिधानात् यास्कोप्येवमाह—पाकःपक्तव्योभवति[1]। तथाविधंयजमानंप्रशास्सि। प्रकर्षेणानुशिष्टंकरोषि तथादिशः प्राच्यादिकाः प्रशास्सि त्वदीयशासनाभावेनुष्ठातॄणांविभ्रमःस्यात् तथाचश्रूयते—देवावैदेवयजनमध्यवसायदिशोनप्राजानन्निति। सभ्रमोदक्षिणदिग्गतोग्निनानिवर्त्यते तदपितत्रैवाम्नातम्—पथ्या३स्वस्तिमयजन्प्राचीमेवतयादिशंप्राजानन्नग्निनादक्षिणेति[2]। ऐतरेयिणापितथैवाम्नातम्—अथोएनंवरमवृणीतमय्येवप्राचींदिशंप्रजानाथाग्निनादक्षिणामिति[3]॥ उरुशंसाय शंसुस्तुतौ शस्यतइतिशंसः कर्मणिघञ् ञित्स्वरेणाद्युदात्तत्वं कृदुत्तरपदप्रकृतिस्वरत्वेनसएवशिष्यते। स्पार्हं स्पृहासंबन्धि तस्येदमित्यण्। रेक्णः रिचिर्विरेचने रिचेर्धनेघिच्चेत्यसुन् नकारान्तुडागमः चजोःकुघिण्ण्यतोरितिकुत्वम्। आध्रस्य ध्यैतृप्तौ आदेचउपदेशेशितीत्यात्त्वे आतश्चोपसर्गेइतिकप्रत्ययः। शास्सि शासुअनुशिष्टौ अदादित्वाच्छपोलुक् पित्त्वादनुदात्तत्वेधातुस्वरः। पाकंचप्रशास्सि दिशश्चप्रशास्सीतिअत्रचार्थोगम्यते अतश्चादिलोपेविभाषेतिप्रथमातिङ्विभक्तिर्ननिहन्यते। विदुष्टरः विद्वच्छब्दात्तरपि अयस्मयादीनिच्छन्दसीतिभसंज्ञायां वसोःसंप्रसारणमितिसंप्रसारणं परपूर्वत्वं शासिवसीतिषत्वं तरपःपित्त्वादनुदात्तत्वे वसोः स्वरेणोकारउदात्तः॥ १४॥

१४. अग्नि ! तुम्हारा स्तोता ऋत्विक् जैसे अभिलषित और परम धन प्राप्त करे, वैसी तुम इच्छा करो। संसार कहता है कि, तुम पालनीय या दुर्बल यजमान के लिए प्रसन्न-मति पितृ-स्वरूप हो। तुम अत्यन्त पारज्ञाता हो। अज्ञ यजमान को शिक्षा दो। साथ ही सब दिशाओं का निर्णय भी कर दो।

त्वम॑ग्ने॒ प्रय॑तदक्षिणं॒ नरं॒ वर्मे॑व स्यू॒तं परि॑पासि वि॒श्वतः॑। स्वा॒दु॒क्ष॒द्मा यो व॑स॒तौ स्यो॑न॒कृज्जी॑वया॒जं यज॑ते॒ सो॑प॒मा दि॒वः॥ १५॥ ३५॥

त्वम्। अ॒ग्ने॒। प्रय॑तऽदक्षिणम्। नर॑म्। वर्म॑ऽइव। स्यू॒तम्। परि॑। पा॒सि॒। वि॒श्वतः॑। स्वा॒दु॒ऽक्ष॒द्मा। यः। व॒स॒तौ। स्यो॒न॒ऽकृत्। जी॒व॒ऽया॒जम्। यज॑ते। सः। उ॒प॒ऽमा। दि॒वः॥ १५॥ ३५॥

हेअग्ने त्वंप्रयतदक्षिणंयेनयजमानेनऋत्विग्भ्योदक्षिणादत्ता तादृशं नरंपुरुषंयजमानं विश्वतः सर्वतः परिपासिसम्यक्पालयसि तत्रदृष्टान्तः—स्यूतं निश्छिद्रत्वेनसूचीभिः सम्यक्-

1 नि० ३.१२। 2 तै० सं. ६.१.५। 3 ऐ० ब्रा० १.७।

निष्पादितं वर्मेव यथाकवचंयुद्धेपालयतितद्वत् स्वादुक्षद्मास्वाद्वन्नः वसतौ निवासभूतेस्वगृहे स्योनकृत्अतिथीनांसुखकारी योयजमानोजीवयाजं जीवयजनसहितंयज्ञं यद्वा जीवनिष्पाद्यंयजते अनुतिष्ठति सयजमानोदिवः स्वर्गस्योपमादृष्टान्तोभवति यथास्वर्गोनुष्ठातॄन्सुखयति तथात्वमपिऋत्विगादीनित्यर्थः ॥ स्यूतं षिवुतन्तुसन्ताने निष्ठेतिक्तः यस्यविभाषेतीट्प्रतिषेधः छ्वोःशूडनुनासिकेचेतिवकारस्यऊठादेशः । स्वादून्क्षदतीतिस्वादुक्षद्मा क्षदतिरत्तिकर्मा अन्येभ्योपिदृश्यन्तइतिमनिन् नित्त्वादाद्युदात्तत्वे कृदुत्तरपदप्रकृतिस्वरत्वं बहुव्रीहौतुव्यत्ययेन । जीवयाजं जीवाऋत्विजइज्यन्तेदक्षिणाभिःपूज्यन्तेत्रेत्यधिकरणेघञ् कुत्वाभावश्छान्दसः यद्वा जीवैःपशुभिर्याजनंजीवयाजः याजयतेर्घञ् णेरनिटीतिणिलोपस्य अचःपरस्मिन्निति स्थानिवद्भावाच्चजोःकुघिण्ण्यतोरितिकुत्वाभावः थाथादिस्वरेणोत्तरपदान्तोदात्तत्वम् । सोपमा सोचिलोपेचेत्पादपूरणमितिसंहितायांसोर्लोपः । दिवः ऊडिदमितिविभक्तेरुदात्तत्वम् ॥ १५ ॥

१५. अग्नि ! जिस यजमान ने ऋत्विकों को दक्षिणा दी है, उसकी सुम सिलाई किये हुए कवच की तरह, अच्छी तरह, रक्षा करो। जो यजमान सुस्वादु अन्न-द्वारा अतिथियों को सुखी करके अपने घर में जीव-तृप्तिकारी या जीवों-द्वारा विधीयमान यज्ञानुष्ठान करता है, वह स्वर्गीय उपमा का पात्र होता है।

इतिप्रथमस्यद्वितीयेचतुस्त्रिंशोवर्गः ॥ ३४ ॥

इमामग्नइत्यनयाअनाहिताग्निरार्त्विज्यंकृत्वास्वाग्नावाहुतिंजुहुयात् ऋत्विजोवृणीतइतिखण्डे—एवमनाहिताग्निर्गृह्यइमामग्नेशरणिंमीमृषोनइतिसूत्रितम् ।

इमामग्ने शरणिंमीमृषोनइममध्वानंयमगामदूरात् । आपिःपिताप्रमतिःसोम्यानांभृमिरस्यृषिकृन्मर्त्यानाम् ॥ १६ ॥

इमाम् । अग्ने । शरणिम् । मीमृषः । नः । इमम् । अध्वानम् ।
यम् । अगाम । दूरात् । आपिः । पिता । प्रऽमतिः । सोम्यानाम् ।
भृमिः । असि । ऋषिऽकृत् । मर्त्यानाम् ॥ १६॥

हेअग्ने नोस्मत्संबन्धिनींइमामिदानींसंपादितांशरणिंहिंसांव्रतलोपरूपां मीमृषः क्षमस्व तथा त्वदीयसेवां अग्निहोत्रादिरूपांपरित्यज्यदूराद्दूरदेशंयमिममध्वानं अगाम वयंगतवन्तः तमपिक्षमस्वेतिशेषः सोम्यानांसोमार्हाणामनुष्ठातॄणांमर्त्यानांत्वमाप्यादिगुणयुक्तोसि आपिःआपणीयः पिताःपालकःप्रमतिःप्रकृष्टमननयुक्तः भृमिःभ्रामकःकर्मनिर्वाहकइत्यर्थःऋषिकृत्दर्शनकारी अनुजिघृक्षस्तामत्यक्षोभवसीत्यर्थः ॥ शरणिं शृहिंसायामित्यस्मादौणादिकःअनिप्रत्ययः । मीमृषः

मृषस्तितिक्षायां अस्माण्णौ चङि गुणेप्राप्ते नित्यंछन्दसीतिउपधाऋकारस्यऋकारादेशःणिलोप-द्विर्भावहलादिशेषोरदत्वसन्वद्भावेत्वदीर्घत्वानि तिङ्ङतिङइतिनिघातः । अगाम इण्गतौ इणो-गालुङीतिगादेशः गातिस्थेतिसिचोलुक् अडागमउदात्तः । भ्रमिः भ्रमुअनवस्थाने भ्रमेःसंप्रसा-रणंचेतीन्प्रत्ययः संप्रसारणेपरपूर्वत्वं इगुपधात्किदित्यनुवृत्तेःकित्त्वाद्गुणप्रतिषेधः निच्वादाद्युदा-त्तत्वम् ॥ १६ ॥

१६. अग्नि ! हमारे इस यज्ञ-कार्य की भ्रान्ति को क्षमा करो और बहुत दूर से आकर कुमार्ग में जो पड़ गया है, उसे क्षमा करो। सोम का यज्ञ करनेवाले मनुष्यों के लिए तुम सरलता से प्राप्य हो, पितृ-तुल्य हो, प्रसन्न-मति और कर्म-निर्वाहक हो। उन्हें प्रत्यक्ष दर्शन दो।

मनुष्वदग्नेअङ्गिरस्वदङ्गिरोययातिवत्सदनेपूर्ववच्छुचे । अच्छंयाह्या वहादैव्यंजनमासादयबर्हिषियक्षिचप्रियम् ॥ १७ ॥

मनुष्वत् । अग्ने । अङ्गिरस्वत् । अङ्गिरः । ययातिऽवत् । सदने । पूर्वऽवत् । शुचे । अच्छ । याहि । आ । वह । दैव्यम् । जनम् । आ । सादय । बर्हिषि । यक्षि । च । प्रियम् ॥ १७ ॥

हेशुचे शुद्धियुक्त अङ्गिरोङ्गनशीलहविरादानायतत्रतत्रगमनशीलाग्ने अच्छ आभिमुख्येन सदनेदेवयजनदेशेयाहिगच्छ तत्रचत्वारोदृष्टान्ताः—मनुष्वत् यथामनुरनुष्ठानदेशेगच्छति अङ्गि-रस्वत् यथाचाङ्गिरागच्छति ययातिवत् यथाययातिर्नामराजागच्छति पूर्ववत् अन्येचपूर्वपुरुषाय-थागच्छन्ति यथामन्वादयोयज्ञेगच्छन्तितद्वत् अथवा मन्वादीनांयज्ञेयथात्वंगच्छसितद्वत् गत्वा-चदैव्यंदेवतासमूहरूपंजनमावह अस्मिन्कर्मण्यानय आनीयचबर्हिषिआस्तीर्णेदर्भेआसादय ता-न्देवानुपवेश्य उपवेश्यच प्रियमभीष्टंहविर्यक्षिच देहि ॥ मनुष्वत् तेनतुल्यमितिप्रथमार्थेवातत्र तस्येवेतिषष्ठ्यर्थेवावतिः अयस्मयादित्वेनभत्वाद्रुत्वाद्यभावः प्रत्ययस्वरः एवमङ्गिरस्वदित्यादि-षु । वह द्व्यचोतस्तिङइतिसंहितायांदीर्घः । यक्षि लोटिबहुलंछन्दसीतिशपोलुक् सेर्ह्यपिच्चेतिहेर-भावश्छान्दसः षत्वकत्वे ॥ १७ ॥

१७. पवित्र अग्निदेव ! हे अङ्गिरा ! मनु, अङ्गिरा, ययाति और अन्यान्य पूर्व-पुरुषों की तरह तुम सम्मुखवर्ती होकर यज्ञदेश में गमन करो, देवों को ले आओ, उन्हें कुशों पर बैठाओ और अभीष्ट हव्यदान करो।

साग्निचयनेक्रतौ उषासंभरणीयायामिष्टावग्नेर्ब्रह्मण्वतःपुरोनुवाक्याएतेनाग्नइत्येषा दर्शपू-र्णमासाभ्यामिष्ट्वेतिखण्डे—एवेनाग्नेब्रह्मणावावृधस्वब्रह्मचतेजातवेदोनमश्चेतिसूत्रितम् ।

एतेनाग्नेब्रह्मणावावृधस्वशक्तीवायत्तेचकृमाविदाबा । उतप्रणेष्यभिवस्योअस्मान्त्संनःसृजसुमत्यावाजवत्या ॥ १८ ॥ ३५ ॥

एतेन॑ । अ॒ग्ने॒ । ब्रह्म॑णा । व॒वृ॒ध॒स्व॒ । शक्ती॑ । वा॒ । यत् । ते॒ ।
च॒कृ॒म । वि॒दा । वा॒ । उ॒त । प्र । ने॒षि॒ । अ॒भि । वस्यः॑ ।
अ॒स्मान् । सम् । नः॒ । सृ॒ज॒ । सु॒ऽम॒त्या । वाज॑ऽवत्या ॥ १८ ॥३५॥

हेअग्ने एतेनअस्मत्प्रयुक्तेनब्रह्मणामन्त्रेणववृधस्वअभिवृद्धोभव शक्तीवाविदावाअस्मदीयशक्त्यावास्मदीयज्ञानेनचतेतवयत्स्तोत्रंचकृम वयंकृतवन्तः एतेनब्रह्मणेतिपूर्वत्रान्वयः उतअपि चअस्मानत्नुष्ठातॄन्वस्यःवसुमत्तरत्वलक्षणंश्रेयः प्रणेषिप्रकर्षेणप्रापय नोस्मान् वाजवत्याप्रभूतान्नयुक्तयासुमत्याअनुष्ठानविषयया शोभनबुद्ध्यासंसृजसंयोजय। ववृधस्व वृधुवृद्धौ लेटयडागमः बहुलंछन्दसीतिशपःश्लुः द्विर्भावहलादिशेषोरदत्वानि अभ्यासस्यसंहितायांदीर्घश्छान्दसः। शक्ती सुपांसुलुगितितृतीयायाःपूर्वसवर्णदीर्घत्वं क्तिनोनित्त्वादाद्युदात्तत्वम्। विदा सावेकाचइतितृतीयायाउदात्तत्वम्। नेषि णीञ्प्रापणे बहुलंछन्दसीतिशपोलुक् उपसर्गादसमासेइतिणत्वम्। सुमत्या मन्क्तिन्नित्यादिनोत्तरपदान्तोदात्तत्वंप्रथमाध्यायेप्रपञ्चितं उदात्तयणोहल्पूर्वादिति विभक्तेरुदात्तत्वम्॥ १८॥

१८. अग्नि ! इस मंत्र से वृद्धि को प्राप्त हो। अपनी शक्ति और ज्ञान के अनुसार हमने तुम्हारी स्तुति की। इसके द्वारा हमें विशेष धन दो और हमें अन्न-सम्पन्न शोभन बुद्धि प्रदान करो।

इतिप्रथमस्यद्वितीयेपञ्चत्रिंशोवर्गः॥ ३५॥

इन्द्रस्यनुवीर्याणीतिपञ्चदशर्चंद्वितीयंसूक्तं आङ्गिरसोहिरण्यस्तूपऋषिस्त्रिष्टुप्छन्दः इन्द्रोदेवता इन्द्रस्यपञ्चोनेत्यनुक्रमणिका अग्निष्टोमेमाध्यंदिनसवने निष्केवल्यशस्त्रे इन्द्रस्यनुवीर्याणीतिनिविद्धानीयंसूक्तं निष्केवल्यस्येतिखण्डेसूत्रितम्—इन्द्रस्यनुवीर्याणीत्येतस्मिन्नैन्द्रींनिविदंदध्यादिति। विषुवत्यपितस्मिन्शस्त्रेएतद्विनियुक्तं विषुवान्दिवाकीर्त्यंइतिखण्डे सूत्रितम्—इन्द्रस्यनुवीर्याणीत्येतस्मिन्नैन्द्रींनिविदंशस्त्वेति। महाव्रतेनिष्केवल्येपि एतदेवविनियुक्तं राथंतरोदक्षिणःपक्षइतिखण्डे—चतस्रः सतीःषड्बृहतीःकरोतीन्द्रस्यनुवीर्याणिप्रवोचमिति।

तत्रप्रथमामृचमाह—

इन्द्र॑स्य॒नुवी॒र्या॑णि॒प्रवो॑चं॒यानि॑च॒कार॑प्रथ॒मानि॑व॒ज्री । अह॒न्नहि॑म॒न्वप॒स्तत॑र्द॒प्रव॒क्षणा॑अभिन॒त्पर्व॑तानाम् ॥ १ ॥

इन्द्र॑स्य । नु । वी॒र्या॑णि । प्र । वो॒च॒म् । यानि॑ । च॒कार॑ । प्र॒थ॒मानि॑ । व॒ज्री । अह॑न् । अहि॑म् । अनु॑ । अ॒पः । त॒त॒र्द॒ । प्र । व॒क्षणाः॑ । अ॒भि॒न॒त् । पर्व॑तानाम् ॥ १ ॥

वज्रीवज्रयुक्तइन्द्रः प्रथमानिपूर्वंसिद्धानिमुख्यानिवीर्याणिपराक्रमयुक्तानिकर्माणिचकार तस्येन्द्रस्यतानिवीर्याणि नु क्षिप्रंप्रब्रवीमि कानिवीर्याणिइतितदुच्यते अहिंमेघं अहन्हतवान् तदेतदेकंवीर्यं अनुपश्चादपोजलानि ततर्द हिंसितवान् भूमौनिपातितवानित्यर्थः इदंद्वितीयंवीर्यं पर्वतानांसंबन्धिनीर्वक्षणाः प्रवहणशीलानदीः प्राभिनत् भिन्नवान् कूलद्वयकर्षणेनप्रवाहितवानित्यर्थः इदंतृतीयंवीर्यं एवमुत्तरत्रापिद्रष्टव्यम् ॥ वीर्याणि शूरवीरविक्रान्तौ ण्यन्तादचोयदितियत् णेरनिटीतिणिलोपः तित्स्वरितमितिस्वरितत्वं यतोनावइत्याद्युदात्तत्वं नभवति आद्युदात्तत्वेहिसुशब्देनबहुव्रीहौ आद्युदात्तंद्व्यच्छन्दसीत्यनेनैवोत्तरपदाद्युदात्तत्वस्यसिद्धत्वात् वीरवीर्यौचेतिपुनस्तद्विधानमनर्थकंस्यात् अतोवगम्यते यतोनावइत्याद्युदात्तत्वंवीरशब्देनप्रवर्ततइति अतःपरिशेषात्तित्स्वरितमितिप्रत्ययस्यस्वरितत्वमेव । वोचं अस्यतिवक्तिख्यातिभ्योङितिच्लेरङादेशः बहुलंछन्दस्यमाङ्योगेपीत्यडभावः चकार णलि लित्स्वरेणप्रत्ययात्पूर्वस्योदात्तत्वम् यद्वृत्तयोगादनिघातः । अहन् लङि इतश्चेतीकारलोपे हल्ङ्याब्भ्यइतिवकारलोपः । अहिं आङ्पूर्वाद्धन्तेराङि श्रिहनिभ्यांह्रस्वश्चेतीण्प्रत्ययः आङोह्रस्वत्वंच चशब्देनवेञोडित् समानेख्यश्चोदात्तइतिडित्त्वं पूर्वपदान्तोदात्तत्वंचानुकृष्यते तत्रटिलोपेपूर्वपदस्योदात्तत्वम् । ततर्द उतृदिर्हिंसानादरयोः तिङ्ङतिङइतिनिघातः । वक्षणाः वक्षरोषे क्रुधमण्डार्थेभ्यश्चेतियुच् चित्स्वरंबाधित्वाव्यत्ययेनप्रत्ययस्वरः ॥ १ ॥

१. वज्रधारक इन्द्र ने पहले जो पराक्रम का कार्य किया था, उसी कार्य का हम वर्णन करते हैं। इन्द्र ने मेघ का वध किया था। अनन्तर उन्होंने वृष्टि की थी। प्रवहमाना पार्वत्य नदियों का मार्ग भिन्न किया था।

द्वितीयामृचमाह—

अहन्नहिंपर्वतेशिश्रियाणंत्वष्टास्मैवज्रंस्वर्यंततक्ष । वाश्राइवधेनवःस्यन्दमानाअञ्जःसमुद्रमवजग्मुरापः ॥ २ ॥

अहन् । अहिम् । पर्वते । शिश्रियाणम् । त्वष्टा । अस्मै ।
वज्रम् । स्वर्यम् । ततक्ष । वाश्राःऽइव । धेनवः । स्यन्दमानाः ।
अञ्जः । समुद्रम् । अव । जग्मुः । आपः ॥ २ ॥

पर्वतेशिश्रियाणंआश्रितंअहिंमेघंअहन्हतवान् अस्माइन्द्रायस्वर्यंसुष्ठुप्रेरणीयंयद्वाशब्दनीयंस्तुत्यं त्वष्टाविश्वकर्मा वज्रंततक्षतनूकृतवान् तेनवज्रेणमेघेभिन्नेसतिस्यन्दमानाः प्रस्रवणयुक्ताआपः समुद्रमञ्जःसम्यगवजग्मुःप्राप्ताः तत्रदृष्टान्तः—वाश्रावत्सान्प्रतिहंभारवोपेताधेनवइव यथांधेनवःसहसावत्सगृहेगच्छन्तितद्वत्॥ शिश्रियाणं श्रिञ्सेवायां लिटःकानच् द्विर्भावहलादि-

शेषेयजादेशाः चितइत्यन्तोदात्तत्वम्। स्वर्यं ऋगतौ अस्मात्ऋहलोर्ण्यदितिण्यत् संज्ञापूर्वकोविधिरनित्यइतिवृद्ध्यभावः यद्वा स्वृशब्दोपतापयोरित्यस्मात् णिति पूर्ववद्वृद्ध्यभावः तित्स्वरितमितिस्वरितत्वम्। वाश्यन्तइतिवाश्राः वाश्शब्दे स्फायितञ्चीत्यादिनारक्। जग्मुः उसिगमहनेत्युपधालोपः ॥ २ ॥

२. इन्द्र ने पर्वत पर आश्रित मेघ का बध किया था। विश्वकर्मा या त्वष्टा ने इन्द्र के लिए दूरवेधी वज्र का निर्माण किया था। अनन्तर जिस तरह गाय वेगवती होकर अपने बछड़े की ओर जाती है, उसी तरह धारावाही जल सवेग समुद्र की ओर गया था।

वृषायमाणोवृणीतसोमंत्रिकंद्रुकेष्वपिबत्सुतस्यं । आसायंकंमघवादत्तवज्रमहंन्नेनंप्रथमजामहीनाम् ॥ ३ ॥

वृषऽयमाणः । अवृणीत । सोमम् । त्रिऽकंद्रुकेषु । अपिबत् । सुतस्यं । आ । सायकम् । मघऽवा । अदत्त । वज्रम् । अहन् । एनम् । प्रथमऽजाम् । अहीनाम् ॥ ३ ॥

वृषायमाणः वृषइवाचरन्निन्द्रः सोममवृणीतवृतवान् त्रिकद्रुकेषुज्योतिर्गौरायुरित्येतन्नामकास्त्रयोयागास्त्रिकद्रुकाउच्यन्ते तेषुसुतस्याभिषुतस्यसोमस्यांशमपिबत्पीतवान् मघवाधनवानिन्द्रः सायकंबन्धकंवज्रं आदत्तस्वीकृतवान् तेनवज्रेणाहीनांमेघानांमध्येप्रथमजांप्रथमोत्पन्नंमेघंअहन्हतवान् ॥ वृषायमाणः वृषइवाचरन् कर्तुःक्यङ्सलोपश्चेतिक्यङ् अकृत्सार्वधातुकयोरितिदीर्घः अदुपदेशाद्धातोरन्तोदात्तत्वे क्यङन्ताद्धातोरन्तोदात्तत्वम्। सायकं षिञ्बन्धने सिनोतीतिसायकः ण्वुल् लित्स्वरेणाद्युदात्तत्वम्। प्रथमजां प्रथमंजायतइतिप्रथमजाः जनसनखनक्रमगमोविट् विड्वनोरित्यात्वम्॥ ३ ॥

३. बैल की तरह वेग के साथ इन्द्र ने सोम ग्रहण किया था। त्रिकद्रुक यज्ञ अर्थात् ज्योतिष्टोम, गोमेध और आयु नामक त्रिविध यज्ञों में चुवाए हुए सोम का इन्द्र ने पान किया था। धनवान् इन्द्र ने वज्र का सायक ग्रहण किया था और उसके द्वारा अहियों या मेघों के अग्रज को मारा था।

यदिन्द्राहंन्प्रथमजामहीनामान्मायिनाममिनाःप्रोतमायाः। आत्सूर्यंजनयन्द्यामुषासंतादीत्नाशत्रुंनकिलांविवित्से ॥ ४ ॥

यत् । इन्द्र । अहंन् । प्रथमऽजाम् । अहीनाम् । आत् । मायिनाम् । अमिनाः । प्र । उत । मायाः । आत् । सूर्यम् । जनयन् । द्याम् । उषसम् । तादीत्ना । शत्रुम् । न । किल । विवित्से ॥ ४ ॥

---

१ पदकालेह्रस्वश्छान्दसः।

उतअपिच हेइन्द्र यत्यदाअहीनांमेघानांमध्येप्रथमजांप्रथमोत्पन्नंमेघंअहन् हतवानसि आत्तदनन्तरं मायिनांमायोपेतानामसुराणांसंबन्धिनीर्मायाःप्रामिनाः प्रकर्षेणनाशितवानसि अनन्तरंसूर्यमुषसं उषःकालंद्यामाकाशंचजनयन्नुत्पादयन्नावरकमेघनिवारणेनप्रकाशयन्वर्तसे तादीत्नातदानीं आवरकान्धकाराभावाच्छत्रुंघातकंवैरिणंनविवित्सेकिल त्वंनलब्धवान् खलु॥ अहन् हन्तेर्लङिहल्ङ्याब्भ्यइतिसिलोपः अडागमउदात्तः यद्वृत्तयोगादनिघातः। मायिनां मायाशब्दस्यव्रीह्यादिषुपाठाद्व्रीह्यादिभ्यश्चेतिमत्वर्थीयइनिः। अमिनाः मीञ्हिंसायां क्रैयादिकः मीनातेर्निगमेइतिह्रस्वत्वम्। तादीत्ना तदानीमित्यस्यपृषोदरादित्वाद्वर्णविपर्ययः। किल निपातस्यचेतिदीर्घत्वम्। विवित्से विद्लृलाभे क्रादिनियमात्प्राप्तइट्व्यत्ययेननभवति ॥४॥

४. जिस समय तुमने मेघों के अग्रज को मारा था, उस समय तुमने मायावियों की माया का विनाश किया था। अनन्तर सूर्य, उषा और आकाश का प्रकाश किया। अन्त को तुम्हारा कोई शत्रु नहीं रहा।

पञ्चमीमृचमाह—

अहन्वृत्रंवृत्रतरंव्यंसमिन्द्रोवज्रेणमहतावधेन। स्कन्धांसीवकुलिशेनाविवृक्णाहिःशयतउपपृक्पृथिव्याः॥५॥३६॥

अहन्। वृत्रम्। वृत्रऽतरम्। विऽअंसम्। इन्द्रः। वज्रेण। महता। वधेन। स्कंधांसिऽइव। कुलिशेन। विऽवृक्णा। अहिः। शयते। उपऽपृक्। पृथिव्याः॥ ५॥ ३६॥

अयमिन्द्रोवज्रेणसंपादितोयोमहान्वधः तेनवज्रेण वृत्रतरंअतिशयेनलोकानामावरकमन्धकाररूपं यद्वा वृत्रैरावरणैः सर्वान्शत्रून् तरति तंवृत्रमेतन्नामकमसुरं व्यंसं विगतांसंछिन्नबाहुर्यथाभवतितथाअहन्हतवान् अंसच्छेदेदृष्टान्तः—कुलिशेनकुठारेण विवृक्णाविशेषतः छिन्नानिस्कंधांसीवयथावृक्षस्कन्धाश्छिन्नाभवन्तितद्वत् तथासति अहिर्वृत्रः पृथिव्याउपरिउपपृक्सामीप्येनसंपृक्तःशयतेशयनंकरोति छिन्नकाष्ठवद्भूमौपततीत्यर्थः॥ वृत्रतरं वृतुवर्तने स्फायितञ्चीत्यादिनाभावे रक्प्रत्ययान्तोवृत्रशब्दः वृत्रेणावरणेनसर्वंतरतीतिवृत्रतरः तरतेः पचाद्यच् परादिश्छन्दसिबहुलमित्युत्तरपदाद्युदात्तत्वं तरपितुव्यत्ययेन। व्यंसं बहुव्रीहौपूर्वपदप्रकृतिस्वरितत्वे उदात्तस्वरितयोर्यणइतिस्वरितत्वम्। वधेन हनश्चवधइतिभावेअप् तत्सन्नियोगेनधातोर्वधादेशः सचान्तोदात्तः अन्त्यस्याकारस्य अतोलोपइतिलोपे उदात्तनिवृत्तिस्वरेणप्रत्ययस्योदात्तत्वम्। विवृक्णा ओव्रश्चूछेदने कर्मणिनिष्ठा यस्यविभाषेतीट्प्रतिषेधः ओदितश्चेतिपरत्वान्निष्ठानत्वं ततोव्रश्चभ्रस्जेतिषत्वेप्राप्तेनिष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषुसिद्धोवक्तव्यइति नत्वस्यसिद्धत्वेन झल्परत्वाभावात्षत्वंनभवति कुत्वेतुकर्तव्येतदसिद्धमेवेति चोःकुरितिकुत्वं

शेश्छन्दसिबहुलमितिशेर्लोपः गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम् । शयते बहुलंछन्दसीति शेःपरस्यशपोलुगभावः । पृथिव्याः उदात्तयणोहल्पूर्वादितिविभक्तेरुदात्तत्वम् ॥ ५ ॥

५. संसार में आवरण या अन्धकार करनेवाले वृत्र को महाध्वंसकारी वज्र-द्वारा, छिन्न-बाहु करके विनष्ट किया था। कुठार से काटे हुए वृक्ष-स्कन्ध की तरह अहि या वृत्र पृथिवी पर पड़ा हुआ है।

॥ इतिप्रथमस्यद्वितीयेषट्त्रिंशोवर्गः ॥ ३६ ॥

षष्ठीमृचमाह—

अयोद्धेवदुर्मदआहिजुह्वेमहावीरंतुविबाधमृजीषम्। नातारीदस्य समृतिंवधानांसंरुजानाःपिपिषइन्द्रशत्रुः ॥ ६ ॥

अयोद्धाऽइव । दुःऽमदः । आ । हि । जुह्वे । महाऽवीरम् । तुविऽबाधम् । ऋजीषम् । न । अतारीत् । अस्य । समऽऋतिम् । वधानाम् । सम् । रुजानाः । पिपिषे । इन्द्रऽशत्रुः ॥ ६ ॥

दुर्मदोदुष्टमदोपेतोहर्षयुक्तोवृत्रः अयोद्धेवयोद्धूरहितइवइन्द्रंआजुह्वेहि आहूतवान्खलु कीदृशं इन्द्रं महावीरंगुणैर्महान्भूत्वा शौर्योपेतं तुविबाधंबहूनांबाधकं ऋजीषं शत्रूणामपार्जकं अस्येदृशस्येन्द्रस्यसंबन्धिनोयेशत्रुवधाःसन्तितेषांवधानांसमृतिंसङ्गमंनातारीव पूर्वोक्तोदुर्मदः तरीतुंनाशक्नोत् इन्द्रशत्रुः इन्द्रःशत्रुर्घातकोयस्यवृत्रस्यतादृशोवृत्रः इन्द्रेणहतोनदीषुपतितःस-न्रुजानाः नदीः संपिपिषे सम्यक्पिष्टवान् सर्वांल्लोकानावृण्वतोवृत्रदेहस्यपातेननदीनांकूला-नितत्रत्यंपाषाणादिकंचचूर्णीभूतमित्यर्थः ॥ अयोद्धाइव नविद्यतेयोद्धास्येतिबहुव्रीहौनञ्सु-भ्यामित्युत्तरपदान्तोदात्तत्वं समासान्तविधेरनित्यत्वान्नद्युतश्चेतिकबभावः । जुह्वे ह्वेञ्स्पर्धायां शब्देच अभ्यस्तस्यचेतिसंप्रसारणं उवङादेशाभावश्छान्दसः यद्वा छन्दस्युभयथेतिसार्वधा-तुकसंज्ञायांहुश्नुवोःसार्वधातुकइतियणादेशः अत्रलक्षणप्रतिपदोक्तपरिभाषालक्ष्यानुरोधान्ना-श्रीयते इतरथाहिआजुह्वानइत्यादिषुयणादेशोनस्यात् नचैवंसविसातयेहुवेवामित्यादावपितथा स्यादितिवाच्यं अनेकाचूलाभावात् अनेकाचइतिहितत्रानुवर्तते प्रत्ययस्वरेणान्तोदात्तत्वं हिचे-तिनिघातप्रतिषेधः । महावीरं महांश्चासौवीरश्चमहावीरः आन्महतइतिआत्वम् । तुविबाधं बाधृविलोडने तुवीन् प्रभूतान्बाधतेइतितुविबाधः पचाद्यच् कृदुत्तरपदप्रकृतिस्वरत्वम् । समृ-तिं तादौचेतिगतेःप्रकृतिस्वरत्वम् । रुजानाः रुजोभङ्गे रुजन्तिकूलानीतिरुजानानद्यः रुजाना-नद्योभवन्तिरुजन्तिकूलानीतियास्कः।व्यत्ययेनशानच् तुदादिभ्यःशः नुमभावश्छान्दसः अदुप-

१ऋजीषं अर्जेर्ऋजचेतिईषन् अर्थआयच्युत्सोमस्यपूयमानस्यातिरिच्यतेतदृजीषंतद्वान्।
२ नि० ६. ४.।

देशाल्लसार्वधातुकानुदात्तत्वेविकरणस्वरः । पिपिषे पिषृसंचूर्णने व्यत्ययेनलिट् । दन्द्रशत्रुः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् ॥ ६ ॥

६. दर्पान्ध वृत्र ने पृथिवी पर अपने समान योद्धा न समझकर महावीर, बहुध्वंसक और शत्रुञ्जय इन्द्र का युद्ध में आह्वान किया था। इन्द्र के विनाश-कार्य से वृत्र त्राण नहीं पा सका। इन्द्र-शत्रु वृत्र ने नदी में गिरकर नदियों को भी पीस दिया।

अपादहस्तोअपृतन्यदिन्द्रमास्यवज्रमधिसानौजघान। वृष्णोवध्रिःप्रतिमानंबुभूषन्पुरुत्रावृत्रोअशयद्व्यस्तः ॥ ७ ॥

अपात् । अहस्तः । अपृतन्यत् । इन्द्रम् । आ । अस्य । वज्रम् । अधि । सानौ । जघान । वृष्णः । वध्रिः । प्रतिऽमानम् । बुभूषन् । पुरुऽत्रा । वृत्रः । अशयत् । विऽअस्तः ॥ ७ ॥

अपात् वज्रेणछिन्नत्वात्पादरहितः अहस्तःहस्तरहितोविप्रः इन्द्रमुद्दिश्यअपृतन्यत् पृतनां युद्धमैच्छत् द्वेषाधिक्येनबहुधाविद्धोपियुद्धंनपरित्यक्तवानित्यर्थःअस्यहस्तपादहीनस्यवृत्रस्य सानौपर्वतसानुसदृशेप्रौढस्कन्धेअधिउपरिवज्रं आजघान इन्द्रआभिमुख्येनप्रक्षिप्तवान् अशक्तस्यापियुद्धेच्छायांदृष्टान्तः—वध्रिः छिन्नमुष्कःपुरुषः वृष्णोरेतःसेचनसमर्थस्य पुरुषान्तरस्यप्रतिमानंसादृश्यंबुभूषन् प्राप्तुमिच्छन् यथानशक्नोतितद्वदयमितिशेषः सवृत्रः पुरुत्राबहुष्ववयवेषुव्यस्तः विविधंक्षिप्तः ताडितःसन् अशयत् भूमौपतितवान् ॥ अपात् बहुव्रीहौ पादशब्दस्यान्त्यलोपश्छान्दसः। अहस्तः बहुव्रीहौनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्। अपृतन्यत् सुपआत्मनःक्यच् कव्यध्वरपृतनस्येत्यन्त्यलोपः। बुभूषन् सनिग्रहगुहोश्चेतीट्प्रतिषेधः। पुरुत्रा देवमनुष्यपुरुषपुरुमर्त्येभ्योद्वितीयासप्तम्योर्बहुलमितिसप्तम्यर्थेत्राप्रत्ययः । अशयत् व्यत्ययेनपरस्मैपदं बहुलंछन्दसीतिशपोलुगभावः। व्यस्तः असुक्षेपणेइत्यस्मात् कर्मणिक्तः यस्यविभाषेतीट्प्रतिषेधः गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम् संहितायामुदात्तस्वरितयोर्यणइतिपरस्यानुदात्तस्यस्वरितत्वम् ॥ ७ ॥

७. हाथ और पैर से रहित वृत्र ने युद्ध में इन्द्र को बुलाया था। इन्द्र ने गिरि-सानु-तुल्य प्रौढ़ स्कन्ध में वज्र मारा था। जिस प्रकार वीर्य-हीन मनुष्य पौरुषशाली मनुष्य की समानता करने का व्यर्थ यत्न करता है, उसी प्रकार वृत्र ने भी वृथा यत्न किया। अनेक स्थानों में क्षत-विक्षत होकर वृत्र पृथिवी पर गिर पड़ा।

नदंनभिन्नममुयाशयानंमनोरुहाणाअतियन्त्यापः । याश्चिद्वृत्रोमहिनापर्यतिष्ठत्तासामहिःपत्सुतःशीर्बभूव ॥ ८ ॥

नदम् । न । भिन्नम् । अमुया । शयानम् । मनः । रुहाणाः ।
अति । यन्ति । आपः । याः । चित् । वृत्रः । महिना ।
परिऽअतिष्ठत् । तासाम् । अहिः । पत्सुतःऽशीः । बभूव ॥ ८ ॥

अमुया अमुष्यां पृथिव्यां शयानंपतितं मृतं वृत्रं आपोजलानि अतियन्ति अतिक्रम्य गच्छन्ति तत्रदृष्टान्तः—भिन्नंबहुधाभिन्नकूलंनदंन सिन्धुमिव यथावृष्टिकालेप्रभूताआपोनद्याः कूलंभित्त्वातिक्रम्यगच्छन्तितद्वत् कीदृश्यआपः मनोरुहाणाः नृणांचित्तमारोहन्त्यः पुरावृत्रे जीवतिसति तेननिरुद्धामेवस्थिताआपोभूमौवृष्टानभवन्ति तदानींनृणांमनःखिद्यते मृतेतु वृत्रे निरोधरहिताआपोवृत्रशरीरमुल्लंघ्यमवहन्ति तदावृष्टिलाभेनमनुष्यास्तुष्यन्तीत्यर्थः त- देतदुत्तरार्धेनस्पष्टीक्रियते—वृत्रोजीवनदशायां महिनास्वकीयेनमहिम्नायाश्चित् याएवमेघग- ताआपः पर्यतिष्ठत् परिवृत्य स्थितवान् अहिर्वृत्रोमेघः तासामपांपत्सुतःशीः पादस्याधःशया- नोबभूव यद्यप्यपांपादोनास्ति तथाप्यद्भिर्वृत्रस्याभिलङ्घितत्वात् पादस्याधःशयनमुपपद्यते ॥ भिन्नं रदाभ्यांनिष्ठातोनइतिनत्वम् । अमुया सुपांसुलुगितिसप्तम्यायाजादेशः । शयानं शी- ङःसार्वधातुकेइतिगुणः धातोर्ङित्त्वाल्लसार्वधातुकानुदात्तत्वेधातुस्वरः । रुहाणाः रुहबीजजन्म- निप्रादुर्भावेच व्यत्ययेनशानच् कर्तरिशपिप्राप्तेव्यत्ययेनशः अनित्यमागमशासनमितिवचना- न्मुगभावः अदुपदेशाल्लसार्वधातुकानुदात्तत्वे विकरणस्वरेप्राप्ते व्यत्ययेनधातुस्वरः । महिना महपूजायां इन्सर्वधातुभ्यइतीन्प्रत्ययः व्यत्ययेनविभक्तेरुदात्तत्वम् यद्वा महिना महिम्ना महच्छब्दस्यपृथ्वादिषुपाठात् तस्यभावइत्यस्मिन्नर्थे पृथ्वादिभ्यइमनिज्वेतिइमनिच्प्रत्ययः टेरितिटिलोपः चितइत्यन्तोदात्तत्वम् तृतीयैकवचने अल्लोपेसति उदात्तनिवृत्तिस्वरेणतस्यो- दात्तत्वं मकारलोपश्छान्दसः । पत्सुतःशीः पादस्याधःशेतइतिपत्सुतःशीः क्विप्चेतिक्विप् तसि पद्दन्नित्यादिनापादशब्दस्यपदादेशः शस्प्रभृतिष्वितिप्रभृतिशब्दःप्रकारवचनेइतिशल्लादो- षणोत्यत्रापिदोषन्नादेशोभवतीत्युक्तत्वात् मध्येसुइतिशब्दोपजनश्छान्दसः यद्वा पादशब्दस्य सप्तमीबहुवचने पदादेशेकृते इतराभ्योपिदृश्यन्तइतिसप्तम्यर्थेतसिल् लुगभावश्छान्दसः ॥ ८ ॥

८. जिस तरह भग्न तटों को लाँघकर नद बहता है, उसी तरह मनोहर जल पतित वृत्र की देह को अतिक्रम करके जा रहा है। जीवितावस्था में अपनी महिमा-द्वारा वृत्र ने जिस जल को बद्ध कर रक्खा था, इस समय वृत्र उसी जल के पद-देश के नीचे सो गया।

नीचावयाअभवद्वृत्रपुत्रेन्द्रोअस्याअववधर्जभार । उत्तरासूरधरः पुत्रआसीद्दानुःशयेसहवत्सानधेनुः ॥ ९ ॥

नीचाऽवयाः । अभवत् । वृत्रऽपुत्रा । इन्द्रः । अस्याः । अव । वधः । जभार । उत्ऽतरा । सूः । अधरः । पुत्रः । आसीत् । दानुः । शये । सहऽवत्सा । न । धेनुः ॥ ९ ॥

वृत्रपुत्रा वृत्रःपुत्रोयस्याः मातुः सेयंमाता वृत्रपुत्रा नीचावयाः न्यग्भावं प्राप्ताहताभवत् पुत्रं प्रहाराद्रक्षितुं पुत्रदेहस्योपरि तिरश्चीपतितवतीत्यर्थः तदानीमयमिन्द्रः अस्यामातुःअव अधोभागे वृत्रस्योपरिवधं हननसाधनमायुधंजभार प्रहृतवान् तदानीं सूर्माता उत्तराउपरिस्थितासीत् पुत्रस्तुअधोभागस्थितआसीत् साचदानुर्दानवीवृत्रमाता शये मृता शयनंकृतवती तत्र दृष्टान्तः—धेनुर्लोकप्रसिद्धागौः सहवत्सान यथावत्ससहिताशयनंकरोतितद्वत् ॥ नीचावयाः वेतिखादतीतिवयोबाहुः औणादिकोसिप्रत्ययः न्यञ्चौवयसीयस्याःसानीचावयाः न्यञ्च्शब्दादुत्तरस्याविभक्तेः सुपांसुपोभवन्तीतितृतीयैकवचनादेशः अचइत्यकारलोपेचाविति दीर्घत्वं अञ्चेश्छन्दस्यसर्वनामस्थानमितितस्योदात्तत्वं समासेलुगभावश्छान्दसः बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् यद्वा नीचौनिकृष्टौ वयसौयस्याःसा पूर्वपदस्यदीर्घश्छान्दसः । वधः हन्यते अनेनेतिवधः अप्तुनिहन्तेर्वधादेशः नित्त्वादाद्युदात्तत्वम् । जभार हृग्रहोर्भइतिभत्वम् । सूः षूङ्प्राणिगर्भविमोचने सूते गर्भंविमुञ्चतीतिसूर्माता क्विप्चेतिक्विप् । दानुः दोअवखण्डने दाभाभ्यांनुः । शये लटि लोपस्तआत्मनेपदेष्वितितलोपः शीङःसार्वधातुकेइतिगुणे अयादेशः ॥ ९ ॥

९. वृत्र की माता वृत्र की रक्षा के लिए उसकी देह पर टेढ़ी गिरी थी; परन्तु उस समय इन्द्र ने उसके नीचे के भाग पर अस्त्र-प्रहार किया। तब माता ऊपर और पुत्र नीचे हो रहा। अनन्तर बछड़े के साथ गाय की तरह वृत्र की माता 'दनु' अनन्त निद्रा में सो गई।

अतिष्ठन्तीनामनिवेशनानांकाष्ठानांमध्येनिहितंशरीरम्। वृत्रस्यंनिण्यंविचरन्त्यापोदीर्घंतमआशयदिन्द्रशत्रुः ॥ १० ॥ ३७ ॥

अतिष्ठन्तीनाम्। अनिऽवेशनानाम्। काष्ठानाम्। मध्ये। निऽहितम्। शरीरम्। वृत्रस्य। निण्यम्। वि। चरन्ति। आपः। दीर्घम्। तमः। आ। अशयत्। इन्द्रऽशत्रुः ॥ १० ॥ ३७ ॥

वृत्रस्यशरीरमापोविचरन्ति विशेषेणोपर्याक्रम्यप्रवहन्ति कीदृशं शरीरं निण्यं निर्नामधेयं अप्सुमग्नत्वेनगूढत्वात्तदीयंनामनकेनापिज्ञायते एतदेवस्पष्टीक्रियते—काष्ठानामपांमध्ये निहितं निक्षिप्तं कीदृशानांकाष्ठानां अतिष्ठन्तीनां स्थितिरहितानां अनिवेशनानां उपवेशनरहितानां प्रवहणस्वभावत्वादेतासांमनुष्यवत्क्कापिस्थितिःसंभवति इन्द्रशत्रुः वृत्रोजलमध्येशरीरेप्रक्षिप्तेसति दीर्घंतमोदीर्घनिद्रात्मकं मरणं यथाभवतितथा आशयत् सर्वतःपतितवान्। अतिष्ठन्तीनां अव्ययपूर्वपदप्रकृतिस्वरत्वम् । अनिवेशनानां निविशन्त्यस्मिन्नितिनिवेशनंस्थानं करणाधिकरणयोश्चेत्यधिकरणेल्युट् तद्रहितानां बहुव्रीहौनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्। क्रान्त्वास्थिताःकाष्ठाः पृषोदरादिः । निहितं गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वं अत्रयास्कः—अतिष्ठन्तीनामनिविशमानानामित्यस्थावराणांकाष्ठानांमध्येनिहितं

शरीरंमेघःशरीरंशरीरंशृणातेःशन्नातेर्वावृत्रस्यनिण्यंनिर्णामंविचरन्तिविजानन्त्यापइतिदीर्घंद्राघ-तेस्तमस्तनोतेराशयदाशेतेरिन्द्रशत्रुरिन्द्रोस्यशमयितावाशातयितावातस्मादिन्द्रशत्रुस्तत्कोवृत्रोमे-घइतिनैरुक्तास्त्वाष्ट्रोसुरइत्यैतिहासिकाइति ॥ १० ॥

१०. स्थिति-शून्य, विश्राम-रहित, जलमध्य-निहित और नाम-विरहित शरीर के ऊपर से जल बहता चला जा रहा है और इन्द्र-द्रोही वृत्र अनन्त निद्रा में पड़ा हुआ है।

॥ इतिप्रथमस्यद्वितीयेसप्तत्रिंशोवर्गः ॥ ३७ ॥

एकादशीमृचमाह—

दासपत्नीरहिगोपाअतिष्ठन्निरुद्धाआपःपणिनेवगावः । अपांबिल मपिहितंयदासीद्वृत्रंजघन्वाँअपतद्ववार ॥ ११ ॥

दासऽपत्नीः । अहिऽगोपाः । अतिष्ठन् । निऽरुद्धाः । आपः ।
पणिनाऽइव । गावः । अपाम् । बिलम् । अपिऽहितम् । यत् ।
आसीत् । वृत्रम् । जघन्वान् । अप । तत् । ववार ॥ ११ ॥

दासपत्नीःदासोविश्वोपक्षयहेतुर्वृत्रःपतिःस्वामीयासामपांताः दासपत्नीः अतएवाहिगो-पाअहिर्वृत्रोगोपारक्षकोयासांताःगोपनंनामस्वच्छन्देनयथानप्रवहन्तितथानिरोधनं एतदेवस्पष्टी-क्रियते—आपोनिरुद्धाअतिष्ठन्नितितत्रदृष्टान्तः—पणिनेवगावः पणिनामकोसुरः गाअपहृत्यबिले स्थापयित्वातद्बिलद्वारमाच्छाद्ययथानिरुद्धवांस्तथेत्यर्थः अपांयद्बिलंप्रवहणद्वारंअपिहितं वृत्रे-णनिरुद्धमासीत् तद्बिलंप्रवहणद्वारंवृत्रंजघन्वान् हतवानिन्द्रः अपववार अपवृतमकरोत् वृत्रकृ-तमपांनिरोधंपरिहृतवान् अत्रयास्कः—दासपत्नीर्दासाधिपत्न्योदासोदस्यतेरुपदासयतिकर्माण्य-हिगोपाअतिष्ठन्नहिनागुप्ताअहिरयनादेत्यन्तरिक्षेऽयमपीतरोहिरेतस्मादेवनिर्ह्रसितोपसर्गआह-न्तीतिनिरुद्धाआपःपणिनेवगावःपणिर्वणिग्भवतिपणिःपणनाद्वणिक्पण्यंनेनेक्ति अपांबिलमपि-हितंयदासीत् बिलंभरंभवतिबिभर्तेर्वृत्रंजघ्निवानपववारतद्वृत्रोवृणोतेर्वावर्ततेर्वावर्धतेर्वायदवृणो-त्तद्वृत्रस्यवृत्रत्वमितिविज्ञायतेयदवर्ततत्तद्वृत्रस्यवृत्रत्वमितिविज्ञायतेयदवर्धततद्वृत्रस्यवृत्रत्वमिति-विज्ञायतइति ॥ दासपत्नीः दसुउपक्षये दासयतीतिदासोवृत्रःपचाद्यच् चितइत्यन्तोदात्तत्वम् दासःपतिर्यासां विभाषासपूर्वस्येतिङीप् तत्संनियोगेनइकारस्यनकारः बहुव्रीहौपूर्वपदप्रकृति-स्वरत्वं यद्वा दासस्यपालयित्र्यः पत्यावैश्वर्येइतिपूर्वपदप्रकृतिस्वरत्वम् । अहिगोपाः गुपूरक्षणे गोपायतीतिगोपाः आयादयआर्धधातुकेवेत्यायःप्रत्ययः ततःक्विप् अतोलोपः वेरपृक्तलोपाद्वलि-लोपोबलीयानितिपूर्वंयकारलोपः नचाचःपरस्मिन्नितिअतोलोपस्यस्थानिवत्त्वं नपदान्तद्विर्वचने-

१ नि० २. १६. । २ नि० २. १७. ।

तिप्रतिषेधात् अहिर्गोपायासां पूर्ववत्स्वरः। निरुद्धाः रुधिर्आवरणे झषस्तथोर्धोधइतिनिष्ठात-कारस्यधकारः गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम्।जघन्वान् हन्तेर्लिटःक्वसुः अभ्यासाच्चेत्यभ्या-सादुत्तरस्यहकारस्यकुत्वम्. क्रादिनियमप्राप्तस्येटोविभाषागमहनेत्यादिनाविकल्पविधानादभावः संहितायां नकारस्यरुत्वानुनासिकावुकौ ॥ ११ ॥

११. पणि नामक असुर-द्वारा जैसे गायें गुप्त थीं, उसी तरह वृत्र की स्त्रियाँ भी मेघ-द्वारा रहित होकर निरुद्ध थीं। जल का वाहक द्वार भी बन्द था। वृत्र का वध कर इन्द्र ने उस द्वार को खोला था।

अश्व्योवारोअभवस्तदिन्द्रसृकेयत्त्वाप्रत्यहन्देवएकः । अजयोगा अजयःशूरसोममवासृजःसर्तवेसप्तसिन्धून् ॥ १२ ॥

अश्व्यः । वारः । अभवः । तत् । इन्द्र । सृके । यत् । त्वा । प्रतिऽअहन् । देवः । एकः । अजयः । गाः । अजयः । शूर । सोमम् । अव । असृजः । सर्तवे । सप्त । सिन्धून् ॥ १२ ॥

सृकेवज्रे सृकःवृकइतिवज्रनामसुपठितत्वात् देवोदीप्यमानः सर्वायुधकुशलः एकः अ-द्वितीयोवृत्रः यद्यदात्वांप्रत्यहन् प्रतिकूलत्वेनप्रहृतवान् तत्तदानींत्वं अश्व्योवारः अश्वसं-बन्धीवालोभवः यथाअश्वस्यवालोऽनायासेनमक्षिकादीनिवारयतितद्वद्वृत्रमगणयित्वा नि-राकृतवानित्यर्थः किंच गाःपणिनापहृतास्त्वमजयः जितवान्हेशूरशौर्ययुक्तेन्द्र सोममजयो-जितवान् तथाचतैत्तिरीयाः त्वष्टाहतपुत्रइत्यस्मिन्नुपाख्यानेसमामनन्ति—सयज्ञवेशसंकृत्वाप्रा-सहासोममपिबदिति । सप्तसिन्धून् इमंमेगङ्गइत्यस्यामृच्याम्नातागङ्गाद्याःसप्तसंख्याकानदीः सर्तवेसर्तुंप्रवाहरूपेणगन्तुं अवासृजःत्यक्तवान् वृत्रकृतंप्रवाहनिरोधंनिराकृतवानित्यर्थः । अ-श्व्यः अश्वेभवः भवेछन्दसीतियत् यतोनावइत्याद्युदात्तत्वम् वारयतिदंशमशकानितिवारः पचाद्यच् कपिलकादित्वाल्लत्वविकल्पः वृषादित्वादाद्युदात्तत्वम् । प्रत्यहन् यद्वृत्तान्नित्य-मितिनिघातप्रतिषेधः तिङ्ङिचोदात्तवतीतिगतेरनुदात्तत्वम् । अजयः गाःइत्यस्यवाक्यान्तर-गतत्वात् तदपेक्षयास्यतिङ्ङतिङइतिनिघातोनभवति समानवाक्येनिघातयुष्मदस्मदादेशावक्त-व्याइतिवचनात् । सर्तवे तुमर्थेसेसेनितितवेन्प्रत्ययः निच्वादाद्युदात्तत्वम् ॥ १२ ॥

१२. इन्द्र ! जब उस एक देव वृत्र ने तुम्हारे वज्र के ऊपर आघात किया था, तब तुमने घोड़े की पूँछ की तरह होकर उसका निवारण कर दिया था। तुमने पणि की छिपाई गाय को भी जीत लिया था, त्वष्टा के सोमरस को जीता था और सप्त सिन्धुओं या नदियों के प्रवाह को अप्रतिहत किया था।

नास्मैविद्युन्नतन्यतुःसिषेधनयांमिहमकिरद्ध्रादुनिंच । इन्द्रश्चयद्युयुधातेअहिश्चोतापरीभ्योमघवाविजिग्ये ॥ १३ ॥

---

१ सृके सृवृभूशुषिमुषिभ्यःकक्। २ तै०सं. २. ४. १२. । ३ ऋ० सं० ८. ३. ६.।

न। अस्मै। विऽद्युत्। न। तन्यतुः। सिसेध। न। याम्। मिहम्।
अकिरत्। ह्रादुनिम्। च। इन्द्रः। च। यत्। युयुधाते इति।
अहिः। च। उत। अपरीभ्यः। मघऽवा। वि। जिग्ये॥ १३॥

इन्द्रं निषेद्धुं वृत्रो यान् विद्युदादीन् मायया निर्मितवान् ते सर्वेऽप्येनं निषेद्धुमशक्ताः सोयमर्थो-नेनमन्त्रेणोच्यते अस्मै इन्द्रार्थं निर्मिता विद्युत् न सिषेध इन्द्रं न प्राप्नोत् तथा तन्यतुः गर्जनं यां मिहं सेचनं यां वृष्टिं अकिरत् वृत्रो विक्षिप्तवान् सापि वृष्टिर्नैनं सिषेध ह्रादुनिं च अशनिमपि यां वृत्रः प्रयुक्तवान् सापि न सिषेध इन्द्रश्चाहिश्च इन्द्रवृत्रावुभावपि यद्यदा युयुधाते युद्धं कृतवन्तौ तदानीं विद्युदादयो न मा-प्ना इति पूर्वत्रान्वयः उत अपि च मघवा धनवानिन्द्रः अपरीभ्यः अपराभ्यः अन्यासामपि वृत्रनिर्मिता-नां मायानां सकाशाद्वि जिग्ये विशेषेण जितवान्॥ सिषेध षिधु गत्यां। मिहं मिह सेचने मेहति सिञ्च-तीति मिट् वृष्टिः क्विप् चेति क्विप्। अकिरत् कॄ विक्षेपे तुदादिभ्यः शः ऋत इद्धातोरितीत्वं अडागम-उदात्तः यद्वृत्तयोगादनिघातः। युयुधाते युध संप्रहारे लिटि प्रत्ययस्वरः। जिग्ये सन्लिटोर्जेरि-त्यभ्यासादुत्तरस्य जकारस्य कुत्वम्॥ १३॥

१३. जिस समय इन्द्र और वृत्र में युद्ध हुआ था उस समय वृत्र ने जिस बिजली, मेघ-ध्वनि, जल-वृष्टि और वज्र का इन्द्र के प्रति प्रयोग किया था, वह सब इन्द्र को नहीं छू सके। साथ ही इन्द्र ने वृत्र की अन्य मायायें भी जीत ली थीं।

अहेर्यातारं कमपश्य इन्द्र हृदि यत्ते जघ्नुषो भीरगच्छत्। नव च यन्नवतिं च स्रवन्तीः श्येनो न भीतो अतरो रजांसि॥ १४॥

अहेः। यातारम्। कम्। अपश्यः। इन्द्र। हृदि। यत्। ते।
जघ्नुषः। भीः। अगच्छत्। नव। च। यत्। नवतिम्। च।
स्रवन्तीः। श्येनः। न। भीतः। अतरः। रजांसि॥ १४॥

हे इन्द्र जघ्नुषो वृत्रं हतवतः तव हृदि चित्ते यत् यदि भीरगच्छत् न हतवानस्मीति बुद्ध्या भयं मा-नुयात् तर्हि अहेर्वृत्रस्य यातारं हन्तारं कमपश्यः त्वत्तोऽन्यं कं पुरुषं दृष्टवानसि तादृशस्य पुरुषान्तरस्या-भावात् माभूत्तव भयमित्यर्थः यद्यस्मात्कारणात्त्वं नव च नवतिं च स्रवन्तीः एकोनशतसंख्याकाः प्रवहन्तीर्नदीः प्राप्य रजांसि तत्रत्यान्युदकानि अतरः तीर्णवानसि तत्र दृष्टान्तः—श्येनो न श्येनो नाम कोबलवान् पक्षीव दूरगमनात्तव भयमासीदिति गम्यते तद्भयं माभूदित्यभिप्रायः तच्च दूरगमनं ब्राह्म-णे समाम्नातं—इन्द्रो वै वृत्रं हत्वा नास्तृषीति मन्यमानः पराः परावतोऽगच्छदिति। तैत्तिरीयाश्चामनन्ति-इन्द्रो वृत्रं हत्वा परां परावतमगच्छदपाराधमिति मन्यमान इति॥ हृदि पद्दन्नित्यादिना हृदयशब्दस्य

१ ऋतन्यञ्जीत्यादिना तनोतेर्यतुच्। २ श्येनः शास्यास्रविभ्य इनच्।
३ ऐ० ब्रा० ३.१५। ४ तै० सं. २.५.३.।

इदादेशःऊडिदमित्यादिनाविभक्तेरुदात्तत्वम्। जघ्नुषः हन्तेर्लिटःक्वसुः षष्ठ्येकवचनेवसोःसंप्रसारणमितिसंप्रसारणं परपूर्वत्वे शासिवसिघसीनांचेतिषत्वं नचषत्वतुकोरसिद्धइतिएकादेशस्यासिद्धत्वात्षत्वंनप्राप्नुयादितिवाच्यं संप्रसारणङीट्सुप्रतिषेधोवक्तव्यइति असिद्धवद्भावस्यप्रतिषिद्धत्वात् गमहनेत्यादिनोपधालोपः नचासिद्धवदत्राभादितिसंप्रसारणस्यासिद्धवद्भावः भिन्नाश्रयत्वात् संप्रसारणंहिषष्ठ्येकवचने उपधालोपस्तु वसाविितिभिन्नाश्रयत्वम्। स्रवन्तीः स्रुगतौ शप्श्यनोर्नित्यमितिनुमागमः शपःपित्त्वादनुदात्तत्वं शतुश्चलसार्वधातुकस्वरेणाद्युदात्तत्वम्। अतरः यद्वृत्तयोगादनिघातः ॥१४॥ पञ्चदशीमृचमाह—

१४. इन्द्र! वृत्र-हनन के समय जब तुम्हारे हृदय में भय नहीं हुआ था, तब तुमने किसी अन्य वृत्र-हन्ता की क्या प्रतीक्षा की थी या सहायक खोजा था? निर्भीक श्येन पक्षी की तरह तुम निन्यानवे नदियाँ और जल पार गये थे।

इन्द्रो॑ या॒तोऽव॑सितस्य॒ राजा॒ शम॑स्य च शृ॒ङ्गिणो॒ वज्र॑बाहुः। से दु॒ राजा॑ क्षयति चर्षणी॒नाम॒रान्न ने॒मिः परि॒ ता ब॑भूव ॥१५॥३८॥

इन्द्रः॑। या॒तः। अव॑ऽसितस्य। राजा॑। शम॑स्य। च॒। शृ॒ङ्गिणः॑। वज्र॑ऽबाहुः। सः। इत्। ऊ॒म् इति॑। राजा॑। क्ष॒य॒ति॒। च॒र्ष॒णी॒नाम्। अ॒रान्। न। ने॒मिः। परि॑। ता। ब॒भू॒व॒ ॥ १५ ॥ ३८ ॥

वज्रबाहुरिन्द्रःशत्रौहतेसतिनिःसपत्नोभूत्वायातोगच्छतोजङ्गमस्यअवसितस्यएकत्रैवस्थितस्यस्थावरस्यशमस्यशान्तस्यशृङ्गराहित्येनप्रहरणादावप्रवृत्तस्याश्वगर्दभादेःशृङ्गिणःशृङ्गोपेतस्योग्रस्यमहिषबलीवर्दादेश्चराजाभूत् सेदुसएवेन्द्रः चर्षणीनांमनुष्याणांराजाभूत्वाक्षयति निवसति ता तानिपूर्वोक्तानिजङ्गमादीनिसर्वाणिपरिबभूवव्याप्तवान् तत्रदृष्टान्तः—अरान्ननेमिः यथारथचक्रस्यपरितोवर्तमानानेमिरराननाभौकीलितान्काष्ठविशेषान्व्याप्नोतितद्वत्॥यातः यामापणे यातिगच्छतीतियात् लटःशतृ सावेकाचइतिविभक्तेरुदात्तत्वम्। सः सोचिलोपेचेत्पादपूरणमितिसंहितायांसोर्लोपः। ता शेश्छन्दसिबहुलमितिशेर्लोपः। बभूव भवतेर्लिटोणलि भवतेरइत्यभ्यासस्यात्वं कृताकृतप्रसङ्गित्वयावुगागमस्यनित्यत्वाद्वृद्धेःपूर्वंवुगागमः यद्वा इन्धिभवतिभ्यांचेतिलिटःकित्त्वाद्वृद्ध्यभावः नचासिद्धवदत्राभादितितस्यासिद्धत्वादुवङादेशःशङ्कनीयः वुग्युटावुवङ्यणोःसिद्धौभवतइतितस्यसिद्धत्वात् तिङ्ङतिङइतिनिघातः॥१५॥

१५. शत्रु-विनाश के अनन्तर वज्रबाहु इन्द्र स्थावरों, जंगमों, शान्त पशुओं और शृङ्गी पशुओं के राजा हुए थे। इन्द्र मनुष्यों में राजा होकर निवास कर रहे हैं। जिस प्रकार चक्र-नेमि अराओं को धारण करती है, उसी प्रकार इन्द्र ने भी अपने बीच सबको धारण किया था।

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणामात्येनविरचितेमाधवीयेवेदार्थप्रकाशेऋक्संहिताभाष्येप्रथमाष्टकेद्वितीयोऽध्यायःसमाप्तः॥२॥

॥ श्रीगणेशायनमः ॥

यस्यनिःश्वसितंवेदायोवेदेभ्योखिलंजगत् । निर्ममेतमहंवन्देविद्यातीर्थमहेश्वरम् ॥ १ ॥ अथतृतीयाध्यायआरभ्यते ॥ त्वमग्नेप्रथमइतिसप्तमानुवाकेपञ्चसूक्तानि तत्रएतायामेतितृतीयंसूक्तंपञ्चदशर्चं ऋषिश्चान्यस्मादितिपरिभाषयाआंगिरसोहिरण्यस्तूपऋषिः अनुक्तत्वादिन्द्रोदेवता त्रिष्टुप्छन्दः एतइत्यनुक्रमणिका गोसववीवधयोर्निष्केवल्येएतायामेतिसूक्तंविनियुक्तं तथाचसूत्रितम्—अतिमूर्तिनायक्ष्यमाणइतिखण्डे—गोसववीवधौपशुकामइन्द्रसोममेतायामेतिमध्यन्दिनइति ।

तत्रप्रथमामृचमाह—

ॐम् एतायामोपंगव्यन्तइन्द्रंमस्माकंसुप्रमंतिंवावृधाति ।
अनामृणःकुविदादस्यरायोगवांकेतंपरमावर्जतेनः ॥ १ ॥

आ । इत । अयाम । उप । गव्यन्तः । इन्द्रम् । अस्माकम् ।
सु । प्रऽमंतिम् । ववृधाति । अनामृणः । कुवित् । आत् । अस्य ।
रायः । गवाम् । केतम् । परम् । आऽवर्जते । नः ॥ १ ॥

देवाः परस्परमेवंकथयन्ति हेदेवाः गव्यन्तः पणिनामकेनासुरेणअपहृताअस्मदीयाः गाः प्राप्तुमिच्छन्तोयूयं एतआगच्छत युष्माभिः सहितावयं इन्द्रंगवानयनक्षमंउपायाममप्राप्नुवाम सचेन्द्रः अनामृणः हिंसकरहितःसन् अस्माकंदेवानांममतिंगोलाभेनहर्षयित्वाप्रकृष्टांबुद्धिंसुववृधाति सुष्ठुवर्धयति आत् अनन्तरं सइन्द्रः अस्यरायोधनस्यगवांगोरूपस्यसम्बन्धिपरंकेतंउत्कृष्टं ज्ञानंनोस्माकंकुविदावर्जतेअधिकंमापयति ॥ इत इण्गतौ अदादित्वाच्छपोलुक् । अयाम एतेर्लोडुत्तमबहुवचने आडुत्तमस्यपिच्चेत्याडागमः पिद्वद्भावात्सार्वधातुकलक्षणेगुणे अयादेशः नचेणोयणितियणादेशः मध्येपवादाःपूर्वान्विधीन्बाधन्तइतिवचनात्तस्येयङादेशापवादत्वात् अतःपरत्वात् गुणेनयणादेशोबाध्यते पिद्वद्भावात्प्रत्ययस्यानुदात्तत्वेधातुस्वरेणाद्युदात्तत्वम् । गव्यन्तः गाआत्मनइच्छन्तः सुपआत्मनःक्यजितिगोशब्दात्कर्मणःक्यच् वान्तोयिप्रत्ययेइत्यवादेशः प्रत्ययान्ताद्धातोर्लटःशतृ तस्यादुपदेशाल्लसार्वधातुकानुदात्तत्वेधातुस्वरः । प्रमतिं मन्यतेःक्तिनि अनुदात्तोपदेशेत्यादिनानुनासिकलोपः तादौचेतिगतेःप्रकृतिस्वर-

त्वम्। ववृधाति वृधुवृद्धौ लेटयाडागमः बहुलंछन्दसीतिशपःश्लुः संहितायामभ्यासस्यदीर्घश्छान्दसः। अनामृणः मृणहिंसायां मृणन्तिहिंसन्तीतिमृणाः इगुपधलक्षणःकः नसन्त्यामृणाअस्येतिबहुव्रीहौनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्। अस्य रायः ऊडिदमित्युभयत्रविभक्तेरुदात्तत्वम्। गवां सावेकाचइतिप्राप्तस्यविभक्त्युदात्तस्यनगोश्वन्सावववर्णेतिप्रतिषेधः। केतं कितज्ञाने घञन्तआद्युदात्तः। आवर्जते वृजीवर्जने अदादित्वाच्छपोलुकिप्राप्ते बहुलंछन्दसीतितदभावः शपःपित्त्वादनुदात्तत्वम् तिङश्चलसार्वधातुकत्वेनधातुस्वरः तिङ्ङिचोदात्तवतीतिगतेरनुदात्तत्वम् कुविद्योगान्निपातैर्यद्यदिहन्तेत्यादिनानिघातप्रतिषेधः॥ १॥

१. आओ, हम गाय पाने की इच्छा से इन्द्र के पास चलें। इन्द्र हिंसा-रहित हैं और हमारी प्रकृष्ट बुद्धि का परिवर्द्धन करते हैं। अन्त को वह इस गोस्वरूप धन के विषय में हमें उच्च ज्ञान प्रदान करते हैं।

उपेदहंधनदामप्रतीतंजुष्टांनश्येनोवसतिंपतामि।
इन्द्रंनमस्यन्नुपमेभिरर्कैर्यःस्तोतृभ्योहव्योअस्तियामन्॥ २॥

उप। इत्। अहम्। धनऽदाम्। अप्रतिऽइतम्। जुष्टाम्। न। श्येनः। वसतिम्। पतामि। इन्द्रम्। नमस्यन्। उपऽमेभिः। अर्कैः। यः। स्तोतृऽभ्यः। हव्यः। अस्ति। यामन्॥ २॥

यइन्द्रः स्तोतृभ्यः स्तोतॄणामनुष्ठातॄणामनुग्रहार्थंयामन् तदीयशत्रुभिःसहप्रवृत्ते युद्धे हव्योस्तितैराह्वातव्योभवति तमिन्द्रमहमनुष्ठाताउपेत् पतामि उपागोम्येव किंकुर्वन् उपमेभिः उपमानस्थानीयैरुत्तमैरर्कैःस्तोत्रैःसहनमस्यन्पूजयन् कीदृशमिन्द्रं धनदां धनप्रदं अप्रतीतंअप्रतिगतं बलिभिरतिरस्कृतमित्यर्थः इन्द्रप्राप्तौदृष्टान्तः—जुष्टांपूर्वैःसेवितांवसतिं स्वकीयनीडरूपांनिवासभूमिंश्येनोन यथाश्येननामकोवेगवान्पक्षीस्वकीयस्थानंप्रत्यादरेणधावति तद्वदहमिन्द्रंत्वरयागमामि॥ धनदां धनंददातीतिधनदाः आतोमनिन्नित्यादिनाविच्। अप्रतीतं शत्रुभिर्नप्रतिगतं अव्ययपूर्वपदप्रकृतिस्वरत्वम्। जुष्टाम् जुषीप्रीतिसेवनयोः श्वीदितोनिष्ठायामितीट्प्रतिषेधः नित्यंमन्त्रेइत्याद्युदात्तत्वम्। पतामि लेटयाडागमः। नमस्यन् नमसशब्दात्पूजार्थे नमोवरिवइतिक्यच् प्रत्ययस्वरः अदुपदेशाल्लसार्वधातुकानुदात्तस्यएकादेशस्वरेणोदात्तत्वम्। उपमीयन्तेएभिरित्युपमाः माङ्माने घञर्थेकविधानमितिकः बहुलंछन्दसीतिभिसऐसादेशाभावः कृदुत्तरपदप्रकृतिस्वरत्वम्। हव्यः ह्वेञोबहुलं छन्दसीतिसम्प्रसारणम् अचोयदितियत् गुणे धातोस्तन्निमित्तस्यैवेत्यवादेशः यतोनावइत्याद्युदात्तत्वम्। यामन् यामापणे मनिनोनित्त्वादाद्युदात्तत्वम् सुपांसुलुगितिसप्तम्यालुक्॥ २॥

२. जिस प्रकार श्येन पक्षी अपने पूर्व-सेवित नीड़ की तरफ़ दौड़ता है, उसी प्रकार मैं भी उपमानस्थानीय स्तोत्रों से, पूजन करके धनदाता और अप्रतिहत इन्द्र की ओर दौड़ता हूँ। युद्ध-वेला में इन्द्र स्तोताओं के आराध्य हैं।

तृतीयामृचमाह—

निसर्वसेनइषुधींरसक्तसमर्योगाअजतियस्यवष्टि ।
चोष्कूयमाणइन्द्रभूरिवामंमापणिर्भूरस्मदधिप्रवृद्ध ॥ ३ ॥

नि । सर्वऽसेनः । इषुऽधीन् । असक्त । सम् । अर्यः । गाः ।
अजति । यस्य । वष्टि । चोष्कूयमाणः । इन्द्र । भूरि । वामम् ।
मा । पणिः । भूः । अस्मत् । अधि । प्रऽवृद्ध ॥ ३ ॥

सर्वसेनः कृत्स्नसेनायुक्तः इषुधीन् बाणानामाधारभूतान् निषङ्गान्न्यषक्तनितरांपृष्ठभागेसंयोजितवान् अर्यःस्वामिरूपइन्द्रः यस्यदेवस्यवष्टिअसुरेणापहृताः गाः प्रदातुंकामयते तस्य देवस्य गृहेतागाः समजतिसम्यक्प्रापयति हेप्रवृद्धप्रकृष्टवृद्धियुक्तइन्द्र भूरिवामंप्रभूतंगोरूपंधनंचोष्कूयमाणः अस्मभ्यंप्रयच्छन् अस्मदधिअस्मासुपणिर्माभूः व्यवहारीमाभूयाः गवांमूल्यंमायाचस्वेत्यर्थः ॥ सर्वसेनः इनेनसहवर्ततइतिसेना वोपसर्जनस्येतिसभावः सर्वासरणशीलासेनायस्येतिबहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् प्रत्ययलक्षणेनाप्ययंस्वरइष्यतइतिवचनात्प्रत्ययलक्षणेनसर्वस्य सुपीतिसर्वशब्दआद्युदात्तः । इषुधीन् इषवःएषुधीयन्तइतिइषुधयः कर्मण्यधिकरणेचेतिकिप्रत्ययः संहितायांदीर्घादटीत्यादिनानकारस्यरुत्वम् अत्रानुनासिकःपूर्वस्यतुवेतिपूर्वस्वरोनुनासिकः । असक्त षचसमवाये बहुलंछन्दसीतिशपोलुक् । अर्यः अर्यःस्वामिवैश्ययोरितियत्प्रत्ययान्तोनिपातितः अर्यःस्वाम्याख्याचेत्यन्तोदात्तत्वम् । अजति अजगतिक्षेपणयोः । वष्टि वशकान्तौ अदादित्वाच्छपोलुक् व्रश्चादिषत्वेष्टुत्वम् । चोष्कूयमाणः स्कुञ्आप्रवणे धातोरेकाचइतियङ् अकृत्सार्वधातुकयोर्दीर्घः द्विर्वचने शर्पूर्वाःखयइतिककारःशिष्यते सकारोलुप्यते कुहोश्चुरितिचुत्वे गुणोयङ्लुकोरितिगुणः सुषामादित्वात्षत्वम् यङन्तात् लटः शानच् अदुपदेशाल्लसार्वधातुकानुदात्तत्वेधातुस्वरः । भूः गातिस्थेतिसिचोलुक् ॥ ३ ॥

३. समस्त सेनापति पीठ पर धनुष लगाये हुए हैं। स्वामिस्वरूप इन्द्र जिसे चाहते हैं, उसके पास गाय भेज देते हैं। उच्चवृद्धिशाली इन्द्र! हमें भरपूर धन देकर हमारे पास व्यापारी नहीं बनना अर्थात् हमसे गाय का मूल्य नहीं माँगना।

चतुर्थीमृचमाह—

वधीर्हिदस्युंधनिनंघनेनँएकश्चरन्नुपशाकेभिरिन्द्र ।
धनोरधिविषुणक्तेव्यायन्नयज्वानःसनकाःप्रेतिमीयुः ॥ ४ ॥

वधीः । हि । दस्युम् । धनिनम् । घनेन । एकः । चरन् ।
उपऽशाकेभिः । इन्द्र । धनोः । अधि । विषुणक् । ते । वि ।
आयन् । अयज्वानः । सनकाः । प्रऽईतिम् । ईयुः ॥ ४ ॥

हेइन्द्र धनिनंबहुधनोपेतंदस्युंचोरंवृत्रंघनेनकठिनेनवज्रेणवधीर्हि त्वंहतवान्खलु धनित्वंवाजसनेयिनोपिस्पष्टमामनन्ति—वृत्रस्यान्तःसर्वेदेवाःसर्वाश्चविद्याःसर्वाणिहवींषिचासन्निति । उपशाकेभिः समीपवर्तिभिः शक्तियुक्तैर्मरुद्भिः सहितोभूत्वाएकश्चरन्प्रहर्तुंस्वयमेकएवगच्छन् यद्यपिमरुतः समीपेवर्तन्ते तथापितेमोत्साहयन्त्येव नतुवृत्रंमहरन्ति प्रहर्तातुस्वयमेकएव तथाचब्राह्मणेसमाम्नातम्—मरुतोहैनंनाजहुःप्रहरभगवोजहिवीरयस्वेत्येवैनमेतांवाचंवदन्तउपातिष्ठन्तेति[1] । धनोरधि इन्द्रसंबन्धिनोधनुषउपरि विषुणक् विविधंनाशमुद्दिश्य यद्वा विष्वक्सर्वतः तेवृत्रानुचराः व्यायन्विविधमागच्छन् आगत्यचअयज्वानः यज्ञविरोधिनःसन्तः सनकाएतन्नामकावृत्रानुचराःप्रेतिमीयुः मरणंप्राप्ताः ॥ वधीः हनहिंसागत्योः लुङिचेतिवधादेशः सचादन्तः तस्यातोलोपइतिलोपेसतिस्थानिवद्भावादतोहलादेरितिवृद्ध्यभावः इटईटीतिसिचोलोपः आगमानुदात्तत्वेधातवकारस्योदात्तत्वम् । घनेनँएकः ईषाअक्षादिषुछन्दसिप्रकृतिभावमात्रंवक्तव्यमिति संहितायांप्रकृतिभावः अनुनासिकश्छान्दसः । उपशाकेभिः उपशक्तंकुर्वन्तीत्युपशाकाःशकॢशकौ अस्माद्धेतुमण्यन्तात्पचाद्यच् थाथादिस्वरेणोत्तरपदान्तोदात्तत्वम् । विषुणक् विषुपूर्वात्णशेः सम्पदादिलक्षणःक्विप् नशेर्वेतिकुत्वम् यद्वा विषुपूर्वस्याश्नोतेर्नुडागमः । सनकाइत्यसुराणांनाम षणुदाने सनन्तिददतीतिसनाः दातारः पचाद्यच् सनान्कायन्तिशब्दयन्तीतिसनकाः आतोनुपसर्गेकः आतोलोपइटिचेत्याकारलोपः कृदुत्तरपदप्रकृतिस्वरत्वम् । प्रेतिं तादौचनितीतिगतेःप्रकृतिस्वरत्वम् । ईयुः एतेरुसिपरत्वादिणोयणितियणादेशेद्विर्वचनेचीतिस्थानिवद्भावादिकारस्य द्विर्वचनम् दीर्घइणःकितीत्यभ्यासस्यदीर्घत्वम् ॥ ४ ॥

४. इन्द्र ! शक्तिशाली मरुतों से संयुक्त रहकर भी तुमने अकेले ही धनवान् और चोर वृत्र का कठिन वज्र-द्वारा वध किया था। यज्ञ-शत्रु वृत्रानुचरों ने तुम्हारे धनुष से विनाश का उद्देश्य करके पहुंचकर मृत्यु प्राप्त की।

पराचिच्छीर्षाववृजुस्तइन्द्रायज्वानोयज्वभिःस्पर्धमानाः ।
प्रयद्दिवोहरिवःस्थातरुग्रनिरव्रताँअधमोरोदस्योः ॥ ५ ॥ १ ॥

परा । चित् । शीर्षा । ववृजुः । ते । इन्द्र । अयज्वानः । यज्वऽभिः ।
स्पर्धमानाः । प्र । यत् । दिवः । हरिऽवः । स्थातः । उग्र । निः ।
अव्रतान् । अधमः । रोदस्योः ॥ ५ ॥ १ ॥

---

[1] ऐ० ब्रा० ३. २०. ।

हेइन्द्र तेवृत्रानुचराः शीर्षास्वकीयानिशिरांसिपराचित्पराङ्मुखान्येवकृत्वाववृजुः गतवन्तः कीदृशास्तेअयज्वानः स्वयंयागरहिताः प्रत्युतयज्वभिः यागानुष्ठातृभिःसहस्पर्धमानाः हे-हरिवःहरिनामकाश्वयुक्त स्थातःस्थितियुक्त युद्धेपलायनरहित उग्र शौर्ययुक्तेन्द्र यद्यदादिवोन्तरिक्षात् रोदस्योः द्यावापृथिव्योः सकाशाच्चअव्रतान्व्रतरहितान् वृत्रानुचरान् निष्पाधमः निःशेषेणधमनंकृतवानसि तदानींत्वदीयमुखवायुनानुन्नाःसन्तोववृजुरितिपूर्वत्रान्वयः ॥ शीर्षा शेश्छन्दसिबहुलमितिशेर्लोपः। ववृजुः वृजीवर्जने असंयोगाल्लिट्किदितिकित्त्वाद्गुणाभावः।अयज्वानः यजतेःसुयजोर्ङ्वनिबिति भूतेङ्वनिप्प्रत्ययस्यपित्त्वादनुदात्तत्वेधातुस्वरेणाद्युदात्तत्वम् नञ्समासेअव्ययपूर्वपदप्रकृतिस्वरत्वम् । दिवः ऊडिदमितिविभक्तेरुदात्तत्वम् । हरिवः हरीअस्य स्तइतिहरिवान् छन्दसीरइतिमतुपोवत्वम् संबुद्धौमतुवसोरितिरुत्वम्। अव्रतान् बहुव्रीहौनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् दीर्घादटीतिसंहितायांनकारस्यरुत्वम् आतोटिनित्यमितिसानुनासिकआकारः।अधमः ध्माशब्दाग्निसंयोगयोः लङि सिपि शपि पाघ्रेत्यादिनाधमादेशः ॥ ५॥

५. इन्द्र! वे यज्ञ-रहित और यज्ञ का अनुष्ठान करनेवालों के विरोधी सिर घुमाकर भाग गये हैं। हे हरि नाम के घोड़ोंवाले, पलायन-विरहित और उग्र इन्द्र! तुमने दिव्य लोक, आकाश और पृथिवी से व्रत-विरहित लोगों को उठा दिया है।

इतिप्रथमस्यतृतीयेप्रथमोवर्गः ॥ १ ॥

षष्ठीमृचमाह—

अयुयुत्सन्ननवद्यस्यसेनामयातयन्तक्षितयोनवग्वाः ।
वृषायुधोनवध्रयोनिरष्टाःप्रवद्भिरिन्द्राच्चितयन्तआयन् ॥ ६ ॥

अयुयुत्सन् । अनवद्यस्य । सेनाम् । अयातयन्त । क्षितयः ।
नवऽग्वाः । वृषऽयुधः । न । वध्रयः । निःऽअष्टाः । प्रवत्ऽभिः ।
इन्द्रात् । चितयन्तः । आयन् ॥ ६ ॥

अनवद्यस्य गर्हणीयदोषरहितस्येन्द्रस्य सेनांप्रतिअयुयुत्सन् वृत्रस्यानुचरायोद्धुमैच्छन् तदानीं नवग्वाः नवनीतगतयः स्तोतव्यचरित्राः यद्वा अङ्गिरसांसत्रमासीनानांमध्येयेनवभिर्मासैरवाप्तफलाःउत्थिताः तेषांनवग्वाइतिसंज्ञा नवग्वासःसुतसोमासइन्द्रमित्यादिषुतथाभिहितत्वात् क्षितयोमनुष्याः अङ्गिरःप्रभृतयः क्षितयःकृष्टयइतितन्नामसुपाठात् अयातयन्त युद्धार्थमिन्द्रंनानाविधैर्मन्त्रैःप्रोत्साहितवन्तः इन्द्रेयोद्धुंगतेसतिनिरष्टाःतेनेन्द्रेणनिराकृताःवृत्रानुचराश्चितयन्तःस्वकीयामशक्तिंज्ञापयन्तःइन्द्रात् इन्द्रस्यसकाशात्प्रवद्भिः प्रवणैः पलायितुंसुशकैर्मार्गैरायन्दूरेगतवन्तः तत्रदृष्टान्तः—वृषायुधः वृषेणसेचनसमर्थेनपुंस्त्वयुक्तेनशूरेणसहयुद्धंकुर्वतो-

१ ऋ०सं ४. १. २५।

वध्रयोन नपुंसकाइव निसर्गपण्डोवध्रिश्चेत्यादिस्मृतिषुप्रयोगात् तेयथाप्रबलेनदूरेनिराकृताभ-वन्तितद्वत् ॥ अयुयुत्सन् युधसम्प्रहारे सनि हलन्ताच्चेतिसनःकित्त्वाद्गुणाभावः एकाचउपदे-शेनुदात्तादितीट्प्रतिषेधः व्यत्ययेनपरस्मैपदम्। सेनाम् इनेनसहवर्ततइतिसेना वोपसर्जनस्ये-तिसहशब्दस्यसभावः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्। अयातयन्त यतीप्रयत्ने हेतुमतिचेति णिच् क्षितयः क्षिनिवासगत्योः क्षियन्तिगच्छन्तीतिक्षितयोमनुष्याः क्तिच्क्तौचसंज्ञायामिति क्तिच्। नवग्वाः नवभिर्मासैर्गच्छन्तीतिनवग्वाः गमेरौणादिकोड्वप्रत्ययः यद्वा क्विपि गमः क्वावित्यनुनासिकलोपे ऊङ्चगमादीनामितिवक्तव्यमितिअकारस्यऊकारः जसि ओःसुपीतिय-णादेशः दीर्घश्छान्दसः। वृषायुधः क्विप्चेतिक्विप् क्विप्चेत्यत्रसोपपदेभ्योनिरुपपदेभ्यइत्यु-क्तत्वादत्रसोपपदेभ्यःक्विप् अन्येषामपिदृश्यतइतिपूर्वपदस्यसंहितायांदीर्घः। निरष्टाः अशूव्या-प्तौ भावेनिष्ठा यस्यविभाषेतीट्प्रतिषेधः व्रश्चादिनाषत्वेष्टुत्वम् निसाचबहुव्रीहौपूर्वपदप्रकृ-तिस्वरत्वम् यद्वा निरस्ताइत्यत्रसकारस्यषत्वंछान्दसं तदानीं अस्ताइत्येतत्कर्मणिनिष्ठेतिग-तिरनन्तरइतिगतेःप्रकृतिस्वरत्वम्। प्रवद्भिः वनषणसंभक्तौ अस्मात्प्रपूर्वात्क्विप् गमादीनामि-तिवक्तव्यमित्यनुनासिकलोपः ततस्तुक् कृदुत्तरपदप्रकृतिस्वरत्वम्। चितयन्तः चितीसंज्ञाने अस्मात् ण्यन्तात् लटःशतृ शप् अनित्यमागमशासनमितिवचनाल्लघूपधगुणाभावः॥६॥

६. उन्होंने निर्दोष इन्द्र की सेना के साथ युद्ध करने की इच्छा की थी। चरित्रवान् मनुष्यों ने इन्द्र को प्रोत्साहित किया था। शूरों के साथ जिस प्रकार युद्ध ठानकर नपुंसक भाग जाते हैं, उसी प्रकार वे भी इन्द्र-द्वारा निराकृत होकर और अपनी शक्तिहीनता समझकर इन्द्र के पास से सहज-मार्ग से दूर भाग गये।

त्वमेतान्रुदतोजक्षतश्चायोधयोरजसइन्द्रपारे।
अवादहोदिवआदस्युमुच्चाप्रसुन्वतःस्तुवतःशंसमावः॥ ७॥

त्वम्। एतान्। रुदतः। जक्षतः। च। अयोधयः। रजसः। इन्द्र। पारे। अव। अदहः। दिवः। आ। दस्युम्। उच्चा। प्र। सुन्वतः। स्तुवतः। शंसम्। आवः॥ ७॥

हेइन्द्र त्वंरुदतोरोदनंकुर्वतःजक्षतःभक्षणंहसनंवाकुर्वतश्चएतान्द्विविधानपिवृत्रानुचरा-न्रजसःपारेअन्तरिक्षस्यपरभागेरजःशब्दोन्तरिक्षवाची लोकारजांस्युच्यन्तइत्युक्तत्वात् अयोध-यःयुद्धमकरोःयुद्धेनमारितवानित्यर्थः दस्युं उपक्षयितारंवृत्रं दिवआ द्युलोकादानीयउच्चाउत्क-र्षेणअवादहः दग्धवानसि वृत्रंसपरिवारंविनाश्यततऊर्ध्वंसुन्वतःसोमाभिषवंकुर्वतः स्तुवतःस्तोत्रं

१ नि० ४. १९.।

कुर्वंतोयजमानस्यशंसंस्तुतिंमावःप्रकर्षेणरक्षितवानसि ॥ रुदतः रुदिर्अश्रुविमोचने लटःशतृ अदादित्वाच्छपोलुक् प्रत्ययस्वरेणान्तोदात्तत्वम् शतुरनुमइतिशसउदात्तत्वम्। जक्षतः जक्ष-भक्षहसनयोः पूर्ववच्छपोलुक् जक्षित्यादयःषडितिअभ्यस्तसंज्ञा अतःअभ्यस्तानामादिरित्याद्युदात्तत्वम् । सुन्वतः सुनोतेःशतरि स्वादिभ्यःश्नुः हुश्नुवोरित्यादिनायणादेशः शतुरनुमइति विभक्तेरुदात्तत्वम्। स्तुवतः ष्टुञ्स्तुतौ अदादित्वाच्छपोलुक् उवङादेशः पूर्ववत्स्वरः ॥ ७ ॥

७. इन्द्र! तुमने हास्यासक्तों को अन्तरिक्ष में युद्ध-दान किया है। दस्यु वृत्र को दिव्य लोक से लाकर अच्छी तरह दग्ध किया है। इसी प्रकार सोम तैयार करनेवालों और स्तोताओं की स्तुति-रक्षा की है।

चक्राणासःपरीणहंपृथिव्याहिरण्येनमणिनाशुंभमानाः।
नहिन्वानासस्तितिरुस्तइन्द्रंपरिस्पशोअदधात्सूर्येण ॥ ८ ॥

चक्राणासः। परिऽनहम्। पृथिव्याः। हिरण्येन। मणिना। शुंभमानाः। न। हिन्वानासः। तितिरुः। ते। इन्द्रम्। परि। स्पशः। अदधात्। सूर्येण ॥ ८ ॥

येवृत्रानुचराः पृथिव्याःभूमेःपरीणहमाच्छादनंसर्वतोव्याप्तिंचक्राणासःकुर्वाणाःहिरण्येनहिरण्ययुक्तेनमणिनाकण्ठबाह्वादिगतेनमण्याद्याभरणेनशुंभमानाः शोभमानाः हिन्वानासः वर्धमानाःसन्तोवर्तन्ते तेतथाविधावृत्रानुचराइन्द्रंयुद्धायोद्यन्तंनतितिरुः जेतुंनसमर्थाआसन् तदानींसइन्द्रः स्पशोबाधकान्वृत्रानुचरान्सूर्येणादित्येनपर्यदधात्परिहितान्व्यवहितानकरोत्। तथाचब्राह्मणम्—आदित्योह्येवोद्यन्पुरस्ताद्रक्षांस्यपहन्तीति[1]॥ चक्राणासः करोतेश्छन्दसिलिडिति वर्तमानेलिटःकानच् ततोसुक् चितइत्यन्तोदात्तत्वम्। परीणहं परिणहनंपरीणट् परिपूर्वान्नह्यतेर्भावेक्विपिनहिवृतीत्यादिनापूर्वपदस्यदीर्घः । पृथिव्याः उदात्तयणइतिविभक्तेरुदात्तत्वम्। हिन्वानासः हिगतौवृद्धौच ताच्छीलिकश्चानश्। तितिरुः तिरतिर्गत्यर्थः ॥ ८ ॥

८. उन वृत्रानुचरों ने पृथिवी को आच्छादन कर डाला था; और, सुवर्ण और मणियों से भी वे सम्पन्न हुए थे। परन्तु वे इन्द्र को नहीं जीत सके। इन्द्र ने उन विघ्नकर्त्ताओं को सूर्य-द्वारा तिरोहित कर डाला था।

परियदिन्द्ररोदसीउभेअबुभोजीर्महिनाविश्वतःसीम्।
अमन्यमानाँअभिमन्यमानैर्निर्ब्रह्मभिरधमोदस्युमिन्द्र ॥ ९ ॥

---

१ तै० सं. २. ६. ६.।

परि । यत् । इन्द्र । रोदसी इति । उभे इति । अबुभोजीः । महिना ।
विश्वतः । सीम् । अमन्यमानान् । अभि । मन्यमानैः । निः ।
ब्रह्मऽभिः । अधमः । दस्युम् । इन्द्र ॥ ९ ॥

हेइन्द्र यद्यदारोदसीउभेद्युलोकावुभौमहिनात्वदीयेनमहिम्नाविश्वतःसीं सर्वतःपरिगृह्यप-र्यबुभोजीः परितोभुक्तवानसि तदानीं त्वं अमन्यमानान्मन्त्रार्थमनुध्यातुंअशक्तानपिकेवलपा-ठकान्यजमानान् अभिमन्यमानैः अस्मदीयाएतेयजमानाःरक्षणीयाइत्यभिमानंकुर्वद्भिर्ब्रह्म-भिर्मन्त्रैर्दस्युंचोरंवृत्रादिरूपमसुरंनिरधमः निःसारितवानसि धमंतिर्गतिकर्मेतियास्कः॥ अबुभो-जीः भुजपालनाभ्यवहारयोः लुङि सिपि बहुलंछन्दसीतिविकरणस्यश्लुः बहुलंछन्दसीतीडागमः अडुदात्तः यद्वृत्तयोगादनिघातः।महिना महिम्ना महच्छब्दात्पृथ्वादिलक्षणोभावेइमनिच् टेरि-तिटिलोपः तृतीयैकवचने अल्लोपेसति उदात्तनिवृत्तिस्वरेणउदात्तत्वं मलोपश्छान्दसः। अम-न्यमानान् मन्यन्तेजानन्तीतिमन्यमानाः मनज्ञाने दिवादिभ्यःश्यन् श्यनोनित्त्वादाद्युदात्तत्वम् समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् संहितायांरुत्वानुनासिकावुक्तौ ॥ ९ ॥

९. इन्द्र! चूंकि तुमने महिमा-द्वारा द्युलोक और भूलोक को सम्पूर्ण रूप से वेष्टन करके सारा भोग किया है; इसलिए तुमने मन्त्रार्थ-ग्रहण करने में असमर्थ यजमानों की भी रक्षा करने में समर्थ मन्त्रों-द्वारा वृत्र-रूप चोर को निःसारित किया था।

नयेदिवःपृथिव्याअन्तमापुर्नमायाभिर्धनदांपर्यभूवन् ।
युजंवज्रंवृषभश्चक्रइन्द्रोनिर्ज्योतिषातमसोगाअदुक्षत्॥१०॥२॥

न । ये । दिवः । पृथिव्याः ।अन्तम् । आपुः । न । मायाभिः ।
धनऽदाम् । परिऽअभूवन् । युजम् । वज्रम् । वृषभः । चक्रे ।
इन्द्रः । निः । ज्योतिषा । तमसः । गाः । अधुक्षत् ॥ १० ॥ २ ॥

येजलविशेषादिवोद्युलोकात्पृथिव्याअन्तंभूमेःस्थानंनापुःनप्राप्ताः मेघरूपमापन्नेनवृत्रेणनिरु-द्धत्वात् अतएवभूमिप्राप्त्यभावात् धनदांधनप्रदांभूमिंमायाभिःसस्योपकारादिभिः कर्मभिः नपर्य-भूवन्परितोनव्याप्ताः जलपानसस्याभिवृद्ध्याद्युपकारंनचक्रुरित्यर्थः तदानीमयमिन्द्रोमेघभेदना-यवज्रंयुजंस्वहस्तयुक्तंचक्रेततोज्योतिषाद्योतमानेनवज्रेणतमसःअन्धकाररूपान्मेघात् गाः गमन-शीलान्युदकानिनिरधुक्षत् निःशेषेणदुग्धवान् मेघंभित्त्वाजलंवृष्टवानित्यर्थः॥दिवः ऊडिदमितिप-ञ्चम्याउदात्तत्वम्। आपुः आप्लृव्याप्तौ लिट्युसिरूपम् यद्वृत्तयोगादनिघातः। पर्यभूवन् अत्रापि

१ नि० ६. २.।

यच्छब्दस्यानुषङ्गात् निघाताभावः। युजं युजिर्योगे ऋत्विगित्यादिनाक्विन् अनित्यमागमशासनमितिवचनान्नुमभावः। अधुक्षत् दुहप्रपूरणे लुङिशलइगुपधादनिटःक्सइतिच्लेःक्सादेशः दादेर्धातोर्घइतिघत्वम् एकाचोबशइत्यादिनाभष्भावः संहितायांभष्भावाभावश्छान्दसः॥ १०॥

१०. जब कि, दिव्य लोक से जल पृथिवी पर नहीं प्राप्त हुआ और धन-प्रद भूमि को उपकारी द्रव्य-द्वारा पूर्ण नहीं किया, तब वर्षाकारी इन्द्र ने अपने हाथों में वज्र उठाया और द्युतिमान् वज्र-द्वारा अन्धकार-रूप मेघ से पतन-शील जल का पूर्णरूप से दोहन कर लिया।

अनुस्वधामक्षरन्नापोअस्यावर्धतमध्यआनाव्यानाम्।
सध्रीचीनेनमनसातमिन्द्रओजिष्ठेनहन्मनाहन्नभिद्यून्॥११॥

अनु। स्वधाम्। अक्षरन्। आपः। अस्य। अवर्धत। मध्ये।
आ। नाव्यानाम्। सध्रीचीनेन। मनसा। तम्। इन्द्रः। ओजिष्ठेन।
हन्मना। अहन्। अभि। द्यून्॥ ११॥

आपोजलानिअस्येन्द्रस्यस्वधामन्नंव्रीह्यादिरूपंअनुलक्ष्याक्षरन्मेघादुद्दृष्टाअभवन् तदानीमयंवृत्रोनाव्यानांनावातरणयोग्यानांबह्वीनांअपांमध्येआसमन्तात् अवर्धतवृद्धिंप्राप्तः प्रभूतजलेवर्तमानोपिनममार किन्त्वभिवृद्धएव तदानीमिन्द्रःसध्रीचीनेनसहगच्छतामनसायुक्तंतंवृत्रंओजिष्ठेनअतिबलयुक्तेनहन्मनाहननसाधनेनवज्रेणअभिद्यून्कतिचिद्दिवसानभिलक्ष्यअहन् तेषुदिवसेषुहतवान्जलमध्यपतितस्यापिवृत्रस्यमनोयत्रेन्द्रस्तिष्ठतितत्रैवसहगच्छति तादृशमभिज्ञायहतवानित्यर्थः॥ अक्षरन् क्षरसञ्चलने। नाव्यानां नावातार्याणाम् नौवयोधर्मेत्यादिनायत्वान्तोयिमत्ययेइत्यावादेशः अनावइतिपर्युदासात् तित्स्वरितमितिमत्ययस्यस्वरितत्वम्। सध्रीचीनेन सह अञ्चतीतिसध्यङ् सहस्यसध्रिरितिसध्र्यादेशः विभाषाञ्चेरदिक्स्त्रियामितिस्वार्थेखमत्ययः तस्यआयन्नित्यादिनाईनादेशः अचइत्यकारलोपेचावितिदीर्घत्वम् खादेशस्योपदेशिवद्वचनादीकारउदात्तः। ओजिष्ठेन ओजोस्यास्तीतिओजस्वी अस्मायामेधेतिविनिः ततआतिशायनिकइष्ठन्विन्मतोर्लुगितिविनोलुक्टेरितिटिलोपःनित्त्वादाद्युदात्तत्वम्।हन्मना हन्यतेअनेनेतिहन्म अन्येभ्योपिदृश्यन्तइतिदृशिग्रहणात् करणेपिमनिन् नित्त्वादाद्युदात्तत्वम् तृतीयैकवचनेअल्लोपेमाप्ते नसंयोगाद्वमन्तादितिमतिषेधः॥ ११॥

११. प्रकृति के अनुसार जल बहने लगा; किन्तु वृत्र नौकागम्य नदियों के बीच में बढ़ा। तब इन्द्र ने महाबलशाली और प्राण-संहारी आयुध-द्वारा कुछ ही दिनों में स्थिर-मना वृत्र का वध किया था।

द्वादशीमृचमाह—

न्यांविध्यदिलीबिशस्यदृह्णाविशृङ्गिणमभिनच्छुष्णमिन्द्रः।
यावत्तरोमघवन्यावदोजोवज्रेणशत्रुमवधीःपृतन्युम् ॥ १२ ॥

नि। अविध्यत्। इलीविशस्य। दृह्णा। वि। शृङ्गिणम्। अभिनत्। शुष्णम्। इन्द्रः। यावत्। तरः। मघऽवन्। यावत्। ओजः। वज्रेण। शत्रुम्। अवधीः। पृतन्युम्॥१२॥

इलीविशस्यइलायाभूमेर्विलेशयानस्यवृत्रस्यसम्बन्धिनी इलांबिलशयस्येतियास्कः। दृह्णादृंहितानिअसुरेणनिरुद्धानिमभूतान्युदकानिइन्द्रोन्यविध्यत्नितरांविद्धवान् यद्वा दृह्णानिमबलानिसैन्यानि नितरांविद्धवान् ततऊर्ध्वंशृङ्गिणंगोमहिषादिशृंगसमानैरायुधैरुपेतंशुष्णंजगतः शोषकंवृत्रंव्यभिनत्विविधंताडितवान् हेमघवन् धनयुक्तेन्द्र तवयावत्तरः यावान्वेगोस्तियावदोजः यावद्बलमस्तितेनसर्वेणयुक्तस्त्वंपृतन्युं पृतनांयुद्धंइच्छन्तंशत्रुंवृत्रंवज्रेणावधीः हतवानसि॥ अविध्यत् व्यधताडने श्यनि ग्रहिज्येत्यादिनासम्प्रसारणम् तिङ्ङतिङइतिनिघाते उदात्तस्वरितयोर्यणइतिसंहितायां अडागमस्यस्वरितत्वम्। इलीविशस्य पृषोदरादित्वादभिमतरूपस्वरसिद्धिः। दृह्णा दृंहेर्निष्ठायां दृढः स्थूलबलयोरितिनिपात्यते शेश्छन्दसिबहुलमितिशेर्लोपः। अभिनत् भिदिर् विदारणे लङि रुधादिभ्यःश्नम् इतश्चेतीकारलोपेहल्ङ्याब्भ्यइतितिलोपः। शुष्णं शुषशोषणे शोषयतीतिशुष्णः तृषिशुषिरसिभ्यःकिच्चेतिनप्रत्ययः निदित्यनुवृत्तेराद्युदात्तत्वम्। अवधीः लुङिचेतिहन्तेर्वधादेशः। पृतन्युम् पृतनाशब्दात् क्यचि कव्यध्वरपृतनस्येति अन्त्यलोपः क्याच्छन्दसीतिउप्रत्ययः॥ १२॥

१२. भूमि पर सोये हुए वृत्र की सेना को इन्द्र ने विद्ध किया था और शृंगी तथा जगच्छोषक वृत्र को विविध प्रकार से ताड़ना दी थी। इन्द्र! तुम्हारे पास जितना वेग और बल है, उससे युद्धाकाङ्क्षी शत्रु को वज्र-द्वारा हनन किया था।

अभिसिध्मोअजिगादस्यशत्रून्वितिग्मेनवृषभेणापुरोभेत्।
संवज्रेणासृजद्वृत्रमिन्द्रःप्रस्वांमतिमतिरच्छाशदानः॥ १३ ॥

अभि। सिध्मः। अजिगात्। अस्य। शत्रून्। वि। तिग्मेन। वृषभेण। पुरः। अभेत्। सम्। वज्रेण। असृजत्। वृत्रम्। इन्द्रः। प्र। स्वाम्। मतिम्। अतिरत्। शाशदानः॥ १३॥

---

१ नि० ६. १९.।

अस्येन्द्रस्यसिध्मः साधकोवज्रः शत्रूनभिइन्द्रवैरिणोभिलक्ष्य अजिगात् गतवान् जिगातिर्गतिकर्मा गातिजिगातीतिगतिकर्मसुपाठाव सचेन्द्रस्तिग्मेनतीक्ष्णेनवृषभेणश्रेष्ठेनायुधेनतेन वज्रेणपुरः वृत्रस्यपुराणिव्यभेवविविधंभिन्नवान् ततःसइन्द्रोवज्रेणस्वकीयेनवृत्रंसमसृजत् संयोजितवान् संयोज्यचशाशदानः वृत्रंहिंसन् स्वांमतिंस्वकीयां हर्षेपितांबुद्धिंमातिरत्प्रकर्षेणवर्धितवान् ॥ सिध्मः षिधुसंराद्धौ अस्मादौणादिकोमक् कित्त्वादगुणः प्रत्ययस्वरःशिष्यते । अजिगात् गास्तुतौ अत्रतुगत्यर्थः जुहोत्यादित्वाच्श्लुः द्विर्भावेबहुलंछन्दसीत्यभ्यासस्येत्त्वम् । अभेत् भिदिर्विदारणे अमिमाप्ते व्यत्ययेनशप् तस्यवहुलंछन्दसीतिलुक् लघूपधगुणेहल्ङ्याब्भ्य इतिविलोपः यद्वा लुङि चेर्लुक् ।अतिरत् प्रपूर्वस्तिरतिर्वर्धनार्थः यद्वा तरतेर्व्यत्ययेनशः ऋतइद्धा-तोरितीत्वम् । शाशदानः शदॢशातने अस्माद्यङन्तावशानच् तस्यछन्दस्युभयथेति आर्धधातुकत्वादतोलोपयलोपौ सार्वधातुकत्वादभ्यस्तानामादिरित्याद्युदात्तत्वम् ॥ १३ ॥

१३. इन्द्र का कार्य-साधक वज्र शत्रु को लक्ष्य कर गिरा था। इन्द्र ने तीक्ष्ण और श्रेष्ठ आयुध-द्वारा वृत्र के नगरों को विविध प्रकार से भिन्न किया था। अन्त को इन्द्र ने वृत्र पर वज्र-द्वारा आघात किया था और उसे मारकर भली भाँति अपना उत्साह बढ़ाया था।

आवः कुत्समिन्द्र यस्मिञ्चाकन्प्रावो युध्यन्तं वृषभं दशद्युम् ।
शफच्युतो रेणुर्नक्षत द्यामुच्छ्वैत्रेयो नृषाह्याय तस्थौ ॥ १४ ॥

आवः । कुत्सम् । इन्द्र । यस्मिन् । चाकन् । प्र । आवः । युध्यन्तम् वृषभम् । दशऽद्युम् । । शफऽच्युतः । रेणुः । नक्षत । द्याम् । उत् । श्वैत्रेयः । नृऽसह्याय । तस्थौ ।१४॥

हेइन्द्रकुत्संएतन्नामकंगोत्रप्रवर्तकमृषिं आवःरक्षितवानसि यस्मिन्कुत्सेचाकनस्तुतिंकामयमानोवर्तसे तंकुत्समितिपूर्वत्रान्वयः तथादशद्युंएतन्नामकंदशसुदिक्षुदीप्यमानमृषिंमावः प्रकर्षेणरक्षितवानसि कीदृशं युध्यन्तंस्वकीयैःशत्रुभिःसहयुद्धंकुर्वन्तं वृषभंगुणैःश्रेष्ठंशफच्युतःत्वदीयाश्वस्यशफात्पतितोरेणुर्धूलिर्द्यांद्युलोकंनक्षतप्राप्नोति श्वैत्रेयः श्वित्राख्यायायोषितःपुत्रः पुराशत्रुभयाज्जलेमग्नः सन्त्वदनुग्रहात् नृसह्याय नृभिःपुरुषैःसोढव्याय उत्तस्थौजलादुत्थितवान् ॥ चाकन् चकतृप्तौ अस्माण्ण्यन्तावशतृ छन्दस्युभयथेत्यार्धधातुकत्वाण्णिलोपः शवभावश्च प्रत्ययस्वरेणान्तोदात्तत्वम् यद्वा कमुकान्तावित्यस्मात् यङ्लुगन्ताल्लङिसिपिअभ्यासस्यनुगभावश्छान्दसः दीर्घोकितइतिदीर्घत्वम् सिलोपे मोनोधातोरितिमकारस्यनकारः धातुस्वरः यद्वृत्तयोगादनिघातः ।युध्यन्तं व्यत्ययेनपरस्मैपदम् । दशद्युं दीव्यतेःप्रकाशार्थात् सम्पदादिल-

क्षणःक्विप् द्योःशूडित्यूठ् दशसुदिक्षुद्यूर्यस्यासौदशद्युः छान्दसंह्रस्वत्वम् यद्वा द्युशब्दोहर्नामसुपठितः तेनप्रवृत्तिनिमित्तभूतःप्रकाशोलक्ष्यते बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । शफच्युतः शफेनच्युतः तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरत्वम् । नक्षत णक्षगतौ व्यत्ययेनात्मनेपदम् । श्वैत्रेयः श्वित्रायाअपत्यं स्त्रीभ्योढक् । नृषह्याय शकिसहोश्चेतिकर्मणियत् यतोनावइत्याद्युदात्तत्वम् । समासेकृदुत्तरपदप्रकृतिस्वरत्वम् पूर्वपदादितिषत्वम् संहितायांदीर्घश्छान्दसः ॥ १४ ॥

१४. इन्द्र ! तुम जिस कुत्स की स्तुति को चाहते हो, उसी कुत्स की तुमने रक्षा की थी। तुमने युद्ध-रत, श्रेष्ठ और दसों दिशाओं में दीप्तिमान् दशद्यु की रक्षा की थी । तुम्हारे घोड़ों के सुमों से पतित धूलि द्युलोक तक फैल गई थी। शत्रु भय से जल में मग्न होकर भी श्वैत्रेय ऋषि, मनुष्यों में अग्रणी होने की अभिलाषा से, आपके अनुग्रह से बाहर निकल आये थे।

आवः शर्मं वृषभं तुग्र्यासु क्षेत्रजेषे मघवञ्छ्वित्र्यं गाम् ।
ज्योक्चिदत्र तस्थिवांसो अक्रञ्छत्रूयतामधरा वेदनाकः ॥ १५ ॥ ३ ॥

आवः । शर्मम् । वृषभम् । तुग्र्यासु । क्षेत्रऽजेषे । मघऽवन् ।
श्वित्र्यम् । गाम् । ज्योक् । चित् । अत्र । तस्थिऽवांसः । अक्रन् ।
शत्रुऽयताम् । अधरा । वेदना । अकरित्यकः ॥ १५ ॥ ३ ॥

हेमघवन् धनवन्निन्द्रश्वित्र्यंश्वित्रायाःपुत्रंपूर्वोक्तंपुरुषंआवः रक्षितवानसि किमर्थं क्षेत्रजेषे शत्रुभिःसहयुद्धवेळायांक्षेत्रप्राप्त्यर्थं कीदृशं शर्मं त्वदीयपरिपालनेनचित्तव्याकुलतांपरित्यज्यशान्तंवृषभंगुणैःश्रेष्ठं तुग्र्यासुगांजलेषुगतंमग्नमित्यर्थः तुग्र्यावर्बुरमितिउदकनामसुपठितत्वात् अत्र अस्माभिःसहयुद्धेज्योक्चित् चिरकालमपितस्थिवांसः अवस्थिताःसन्तः अक्रन् यैर्वैरिणः शत्रुत्वमकुर्वन् शत्रूयतां शत्रूनात्मनइच्छतांतेषां अधरा वेदना निकृष्टानिदुःखानि त्वं अकःकुरु॥ तुग्र्यशब्दोन्तरिक्षवचनः तत्रभवास्तुग्रियाः तुग्राद्घन्नितिघन् घस्येयादेशः इकारलोपश्छान्दसः नित्त्वादाद्युदात्तत्वम् । क्षेत्रजेषे जेषृणेषृएषृप्रेषृगतौ अस्मात्सम्पदादिलक्षणःक्विप् क्षेत्रस्यजेट्क्षेत्रजेट् समासान्तोदात्तत्वम् अन्तोदात्तादुत्तरपदादित्यादिनाविभक्तेरुदात्तत्वम् । श्वित्र्यं श्वित्रायांभवः भवेछन्दसीतियत् यतोनावइत्याद्युदात्तत्वम् । तस्थिवांसः तिष्ठतेःक्वसुः वस्वेकाजाद्घसामितीडागमः । अक्रन् करोतेर्लुङिमन्त्रेघसेत्यादिनाच्लेर्लुक् । शत्रूयतां शत्रूनात्मनइच्छन्तीतिशत्रूयन्तः सुपआत्मनःक्यजितिक्यच् तदन्ताच्छतृ तस्यलसार्वधातुकानुदात्तत्वे एकादेशस्वरेणोदात्तत्वम् तस्यचपूर्वत्रासिद्धत्वंनेष्यतइत्युक्तत्वाच्छत्रन्तमन्तोदात्तत्वमिति शतुरनुमोनद्यजादीइतिविभक्तेरुदात्तत्वम् । अधरावेदनेत्युभयत्रशेश्छन्दसिबहुलमितिशेर्लोपः । अकः करोतेर्लुङि मन्त्रेघसेत्यादिनाच्लेर्लुक् गुणः ॥ १५ ॥

१५. इन्द्र ! सौम्य, श्रेष्ठ और जल-मग्न श्वैत्रेय को क्षेत्र-प्राप्ति के लिए तुमने बचाया था। जो हमारे साथ बहुत समय से युद्ध कर रहे हैं, उन शत्रुताकाङ्क्षी लोगों को तुम वेदना और दुःख दो ।

त्रिश्चिन्नोअद्येतिचतुर्थंसूक्तंद्वादशर्चं ऋषिश्चान्यस्मादृषेरितिपरिभाषयाआङ्गिरसोहिरण्यस्तूपऋषिः अश्विनौदेवता ऋत्रीचक्रेतिनवमीआनोश्विनेतिद्वादशीचत्रिष्टुभौ शिष्टास्त्रिष्टुबन्तपरिभाषयाजगत्यः त्रिश्चिद्द्वादशाश्विनंनवम्यन्तेत्रिष्टुभावित्यनुक्रमणिका । प्रातरनुवाकेआश्विनेक्रतौजागतेछन्दसिइदंसूक्तम् अथाश्विनइतिखण्डेसूत्रितम्—त्रिश्चिन्नोअद्येळद्यावापृथिवीइतिजागतमिति । आश्विनशस्त्रेप्येतत्सूक्तम् प्रातरनुवाकन्यायेनेत्यतिदिष्टत्वात् ।

तत्रप्रथमामृचमाह—

त्रिश्चिन्नोअद्याभवतंनवेदसाविभुर्वांयामउतरातिरश्विना ।
युवोर्हियन्त्रंहिम्येववासंसोभ्यायंसेन्याभवतंमनीषिभिः ॥ १ ॥

त्रिः । चित् । नः । अद्य । भवतम् । नवेदसा । विऽभुः । वाम् ।
यामः । उत । रातिः । अश्विना । युवोः । हि । यन्त्रम् । हिम्याऽइव ।
वाससः । अभिऽआयंसेन्या । भवतम् । मनीषिऽभिः ॥ १ ॥

हेनवेदसाश्विनामेधाविनावश्विदेवौ नवेदाइतिमेधाविनाम नवेदाःकविःमनीषीतितन्नामसुपठितत्वात् तादृशौयुवांत्रिश्चित्त्रिवारमपिअद्यास्मिन्कर्मणि नः अस्मदर्थंभवतंआगतौभवतम् अत्रत्रिरितिवचनंसवनत्रयापेक्षंआदरातिशयद्योतनार्थंवात्रिषत्याहिदेवाइतिश्रुत्यन्तरात् वांयुवयोःयामोगमनसाधनभूतोरथोविभुःव्याप्तःउतअपिचरातिः दानंविभुरितिशेषः युवोर्युवयोरुभयोर्यन्त्रंहि परस्परनियमनरूपःसम्बन्धविशेषोस्तिखलु तत्रदृष्टान्तः—वाससःसूर्यरश्म्याच्छादनयुक्तस्यवासरस्यहिम्येव हिमयुक्तयाराज्येव यथाराज्यासहदिवसस्यसम्बन्धःकदाचिदपिनापैतितद्वत् युवामुभौमनीषिभिः मेधाविभिःऋत्विग्भिः मनीषीतिमेधाविनाम मनीषीमन्धातेतितन्नामसुपठितत्वात् अभ्यायंसेन्या अभितोनियन्तव्यौअनुग्रहवशात्तदधीनौभवतम् ॥ अद्य निपातस्यचेतिसंहितायांदीर्घः।नवेदसा विपरीतंनविदन्तइतिनवेदसौ विदज्ञानेइत्यस्मादौणादिकोसुन् नञ्समासे नभ्राण्णपादित्यादिनानकारस्यप्रकृतिभावः सुपांसुलुगित्याकारः आमन्त्रितनिघातः । यामः यायतेगम्यतेनेनेतियामोरथः अर्तिस्तुसुहुस्रिक्षि इत्यादिनामन् नित्त्वादाद्युदात्तत्वम् यद्वा यमउपरमेइत्यस्मात्कर्मणिघञ् वृषादिषुपाठादाद्युदात्तत्वम् । रातिः रादानेइत्यस्मात् भावेक्तिन् मन्त्रेवृषेत्यादिनातस्योदात्तत्वम् । युवोः सुपांसुपोभवन्तीतिषष्ठीद्विवचनस्यषष्ठीद्विवचनादेशः अतश्चादेशविषयत्वाद्योचीतियत्वंनभवति शेषेलोपइतिटिलोपेउदात्तनिवृत्तिस्वरेणविभक्ते-

रुदात्तत्वम् अन्त्यलोपपक्षेतुएकादेशस्वरेण । हिम्याइव हिमेतिरात्रिनाम ऊधःपयः हिमेतितन्नाम-सुपठितत्वात् ततउत्तरस्यतृतीयैकवचनस्यसुपांसुलुगितिडचादेशः ततष्टिलोपेउदात्तनिवृत्तिस्वरे-णतस्योदात्तत्वम् । वाससः वसआच्छादने वासयतिप्रकाशेनाच्छादयतीत्यहर्वासः । अभ्यायं-सेन्या अभ्याङित्युपसर्गद्वयोपसृष्टाद्यमउपरमेइत्यस्मादौणादिकःसेन्यप्रत्ययः सुपांसुलुगित्या-कारः ॥ १ ॥

१. हे मेधावी अश्विनीकुमारद्वय ! हमारे लिए तुम आज तीन बार आओ। तुम्हारा रथ और दान बहुव्यापी है। जिस प्रकार रश्मियुक्त दिन और हिमयुक्त रात्रि का परस्पर नियम-रूप सम्बन्ध है, उसी प्रकार तुम दोनों के बीच भी सम्बन्ध है। अनुग्रह करके तुम मेधावी ऋत्विकों के वशवर्त्ती हो जाओ।

त्रयः॑प॒वयो॑मधु॒वाह॑ने॒रथे॒सोम॑स्यवे॒नामनु॒विश्व॒इद्वि॑दुः ।
त्रयः॑स्क॒म्भास॑स्कभि॒तास॑आ॒रभे॒त्रिर्नक्तं॑या॒थस्त्रिर्व॑श्विना॒दिवा॑ ॥२॥

त्रयः॑ । प॒वयः॑ । म॒धु॒ऽवाह॑ने । रथे॑ । सोम॑स्य । वे॒नाम् । अनु॑ । विश्वे॑ । इत् । वि॒दुः । त्रयः॑ । स्क॒म्भासः॑ । स्क॒भि॒तासः॑ । आ॒ऽरभे॑ । त्रिः । नक्त॑म् । या॒थः । त्रिः । ऊम् इति॑ । अ॒श्वि॒ना॒ । दिवा॑ ॥ २ ॥

मधुवाहनेमधुरद्रव्याणांनानाविधखाद्यादीनांवाहनेनयुक्ते अश्विनोःसम्बन्धिरथेपवयः वज्रसमानादृढाःचक्रविशेषास्त्रयःत्रिसंख्याकाःसन्ति इत् इत्थंचक्रत्रयसद्भावप्रकारंविश्वेसर्वेदेवाः सोमस्यचन्द्रस्यवेनांकमनीयांभार्यांअनुलक्ष्ययात्रायांविदुर्जानन्ति यदासोमस्यवेनयासहविवाहः तदानींनानाविधखाद्ययुक्तंचक्रत्रयोपेतंमौढंरथमारुह्याश्विनौगच्छतइतिसर्वेदेवाजानन्तीत्यर्थःत-स्यरथस्योपरिस्कंभासःस्तम्भविशेषास्त्रयः त्रिसंख्याकाः स्कभितासः स्थापिताः किमर्थमारभे-आरब्धुंअवलम्बितुं यदारथस्त्वरयायातितदानींपतनभीतिनिवृत्त्यर्थंहस्तालम्बनभूताःस्तम्भाइ-त्यर्थः हेअश्विना युवांतादृशेनरथेननक्तंरात्रौत्रिर्याथः त्रिवारंगच्छथः तदादिवादिवसेपित्रिर्याथः रात्रावहनिचरथमारुह्यपुनःपुनःक्रीडथइत्यर्थः ॥ मधुवाहने मधुवाह्यते अनेनेतिमधुवाहनः करणेल्युट् । विदुः वेत्तेर्लटिविदोलटोवेतिझेरुसादेशः । स्कम्भासः ष्टभिस्कभिगतिप्रतिबन्धेस्क-म्भन्तेप्रतिबद्धाभवन्तीतिस्कम्भाः पचाद्यच् । स्कभितासः स्कम्भुःसौत्रोधातुः अस्मान्निष्ठायां यस्यविभाषेतीट्प्रतिषेधेप्राप्ते प्रसितस्क भितेत्यादिनेडागमोनिपातितः । आरभे रभराभस्ये अ-स्मादाङ्पूर्वात्सम्पदादिलक्षणोभावेक्विप् कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ २ ॥

२. तुम्हारे मधुर-खाद्य-वाहक रथ में तीन दृढ़ चक्र हैं; उन्हें सभी देवों ने चन्द्रमा की रमणीय पत्नी वेना के साथ विवाह-यात्रा करने के समय जाना। उस रथ के ऊपर, अवलम्बन के लिए, तीन खम्भे हैं। अश्विद्वय ! उसी रथ से दिन में तीन बार और रात्रि में भी तीन बार गमन करो।

समानेअहन्त्रिरवद्यगोहनात्रिरद्ययज्ञंमधुनामिमिक्षतम् ।
त्रिर्वाजवतीरिषोअश्विनायुवंदोषाअस्मभ्यमुषसश्चपिन्वतम् ॥ ३॥

समाने । अहन् । त्रिः । अवद्यऽगोहना । त्रिः । अद्य । यज्ञम् ।
मधुना । मिमिक्षतम् । त्रिः । वाजऽवतीः । इषः । अश्विना । युवम् ।
दोषाः । अस्मभ्यम् । उषसः । च । पिन्वतम् ॥ ३ ॥

हेअश्विनाअश्विदेवौयुवंयुवामुभौसमानेअहन्नेकस्मिन्ननुष्ठानदिनेत्रिरवद्यगोहना त्रिवारमनुष्ठानगतानांदोषाणांसंवरणकारिणौभवतम् अद्यास्मिन्दिनेयज्ञंयज्ञगतंहविःमधुनामधुररसेनत्रिर्मिमिक्षतंत्रिवारंसिञ्चतम् किञ्च दोषाउषसश्चरात्रीर्दिवसांश्चरात्रिषुदिवसेषुचनैरन्तर्येणवाजवतीःबलकारिणीरिषोन्नानिअस्मभ्यंपिन्वतंसिञ्चतंप्रयच्छतमित्यर्थः॥ अहन् सुपांसुलुगितिसप्तम्यालुक् ।अवद्यगोहना गुहूसंवरणे अवद्यगूहयितारौ नन्द्यादित्वात् ल्युः ऊदुपधायागोहइतिप्राप्तस्यऊत्वस्याभावश्छान्दसः । मिमिक्षतं मिहसेचने सनिएकाचउपदेशेनुदात्तादितीट्प्रतिषेधः हलन्ताच्चेतिसनःकित्त्वाल्लघूपधगुणाभावः द्विर्भावहलादिशेषौ ढत्वकत्वषत्वानि । वाजवतीः उगितश्चेतिङीप् । पिन्वतं पिविमिविणिविसेचने इदित्त्वान्नुम् कर्तरिशप् ॥ ३ ॥

३. अश्विद्वय ! तुम एक दिन में तीन बार यज्ञानुष्ठान का दोष शुद्ध करो। आज तीन बार मधुर रस से यज्ञ का हव्य सिक्त करो। रात और दिन में तीन बार पुष्टिकर अन्न-द्वारा हमारा भरण करो।

त्रिर्वर्तिर्यातंत्रिरनुव्रतेजनेत्रिःसुप्राव्येत्रेधेवशिक्षतम् । त्रिर्नान्द्यंवहतमश्विनायुवंत्रिःपृक्षोअस्मेअक्षरेवपिन्वतम् ॥ ४॥

त्रिः । वर्तिः । यातम् । त्रिः । अनुऽव्रते । जने । त्रिः । सुप्रऽअव्ये ।
त्रेधाऽइव । शिक्षतम् । त्रिः । नान्द्यम् । वहतम् । अश्विना ।
युवम् । त्रिः । पृक्षः । अस्मे इति । अक्षराऽइव । पिन्वतम् ॥ ४॥

हेअश्विनायुवंत्रिर्वर्तिर्यातंअस्मदीयवर्तनसाधनंगृहंत्रिर्यातंत्रिवारंप्राप्नुतम् तथा अनुव्रतेअस्मदनुकूलव्यापारयुक्तेजनेत्रिर्यातंत्रिवारंतदनुग्रहायगच्छतम् त्रिःसुप्राव्येत्रिवारंसुष्ठुप्रकर्षेणभवद्भ्यांरक्षणीयेप्रवर्तमानानस्मान्त्रेधेवत्रिभिरेवप्रकारैःशिक्षतंपुनःपुनरनुष्ठानमुपदेष्टव्यमित्यर्थः तथा नांद्यंनन्दनीयंसन्तोषकरंफलंत्रिर्वहतंप्रापयतम् अस्मे अस्मासुपृक्षोन्नंत्रिःपिन्वतंत्रिवारंप्रयच्छतम् तत्रदृष्टान्तः—अक्षरेवअक्षराण्युदकानि अक्षरास्तोतः तृप्तिरितितन्नामसुपाठात् तानिपर्जन्योयथा प्रयच्छतितद्वत् ॥ वर्तिः वर्ततेत्रेतिवर्तिर्गृहम् हृपिषिरुहिवृतीत्यादिनाइप्रत्ययः सुपांसुलुगितिद्वितीयैकवचनस्यसुआदेशः ।सुप्राव्ये उपसर्गद्वयोपसृष्टादवतेःकर्मणिण्यत् संज्ञापूर्वकोविधिरनित्यइतिवृद्ध्यभावः तित्स्वरितमितिस्वरितत्वम् । शिक्षतं शिक्षविद्योपादाने । नान्द्यं ण्यदन्तः । पृक्षः

पृचीसम्पर्के असुनिसुडागमः। अस्मे सुपांसुलुगितिशेआदेशः। अक्षराइव अश्नुवतेव्याप्नुवन्तीत्यक्षराणिउदकानि औणादिकः क्सरःप्रत्ययः शेर्लोपः ॥ ४ ॥

४. अश्विद्वय! हमारे घर में तीन बार आओ। हमारे अनुकूल व्यापार में लगे मनुष्य के पास तीन बार आओ। रक्षा करने योग्य मनुष्य के पास तीन बार आओ। हमें तीन प्रकार शिक्षा दो। हमें तीन बार आनन्द-जनक फल प्रदान करो। जैसे इन्द्र जल देते हैं, उसी प्रकार हमें तीन बार अन्न दो।

त्रिर्नो॑र॒यिंव॑हतमश्विनायु॒वंत्रिर्दे॒वता॑ता॒त्रिरु॒ताव॑तं॒धियः॑। त्रिःसौ॑भ॒गत्वंत्रिरु॒तश्रवां॑सिनस्त्रि॒ष्ठंवां॒सूरे॑दुहि॒तारु॑ह॒द्रथ॑म् ॥ ५ ॥

त्रिः। नः॒। र॒यिम्। व॒ह॒त॒म्। अ॒श्वि॒ना॒। यु॒वम्। त्रिः। दे॒वऽता॑ता। त्रिः। उ॒त ।अ॒व॒त॒म्। धियः॑। त्रिः। सौ॒भ॒ग॒ऽत्वम्। त्रिः। उ॒त। श्रवां॑सि। नः॒। त्रि॒ऽस्थम्। वा॒म्। सूरे॑। दु॒हि॒ता। आ। रु॒ह॒त्। रथ॑म् ॥५॥

हेअश्विना युवंयुवांनोस्मान् रयिंधनंत्रिर्वहतंत्रिवारंप्रापयतंदेवताती देवैर्युक्तेकर्मणित्रिः त्रिवारमागच्छतमितिशेषः उतअपिचधियोस्मद्बुद्धीःत्रिःत्रिवारंरक्षतंसौभगत्वम् सौभाग्यंत्रिर्वहतमितिशेषः उतअपिच श्रवांस्यन्नानिनःअस्मभ्यंत्रिर्वहतम् वांयुवयोःसम्बन्धिनंत्रिष्ठंचक्रत्रयेवस्थितंरथंसूरेसूर्यस्यदुहितापुत्री दुहितादुर्हितादूरेहितेतियास्कः। साआरूढवती ॥ देवताता सर्वदेवात्तातिलितिस्वार्थिकस्तातिल्प्रत्ययः तेनदेवतातिशब्देनदेवसम्बद्धोयज्ञोलक्ष्यते देवताता मखइतितन्नामसुपठितत्वात् लितीतिप्रत्ययात्पूर्वस्योदात्तत्वम् सुपांसुलुगितिसप्तम्याडादेशः। त्रिष्ठं त्रिषुचक्रेषुतिष्ठतीतित्रिष्ठः सुपिस्थइतिकः अम्बाम्बेत्यादिनासकारस्यषत्वम्। सूरे षूप्रेरणे सुसूधागृधिभ्यःक्रन् इतिक्रन् नित्त्वादाद्युदात्तः विभक्तिव्यत्ययः। रुहत् कृमृदृरुहिभ्यश्छन्दसीति च्लेरङादेशः ॥ ५ ॥

५. अश्विद्वय! हमें तीन बार धन दो। देव-युक्त कर्मानुष्ठान में तीन बार आओ। हमारी बुद्धि-रक्षा तीन बार करो। हमारा तीन बार सौभाग्य-सम्पादन करो। हमें तीन बार अन्न दो। तुम्हारे त्रिचक्र रथ पर सूर्य की पुत्री चढ़ी हुई है।

त्रिर्नो॑अश्विनादि॒व्यानि॑भेष॒जात्रिःपार्थि॑वानि॒त्रिरु॑दत्तम॒द्भ्यः। ओ॒मानं॑शं॒योर्मम॑कायसू॒नवे॑त्रि॒धातु॒शर्म॑वहतंशुभस्पती ॥ ६ ॥४॥

त्रिः। नः॒। अ॒श्वि॒ना॒। दि॒व्यानि॑। भे॒ष॒जा। त्रिः। पार्थि॑वानि। त्रिः। ऊ॒म् इति॑। द॒त्त॒म्। अ॒त्ऽभ्यः। ओ॒मान॑म्। श॒म्ऽयोः। मम॑काय। सू॒नवे॑। त्रि॒ऽधातु॑। शर्म॑। व॒ह॒त॒म्। शु॒भः॒। प॒ती॒ इति॑ ॥६॥४

१ नि० ६. १९.

हे अश्विना नः अस्मभ्यं दिव्यानिद्युलोकवर्तीनि भेषजाऔषधानि त्रिर्दत्तं तथापार्थिवानिपृथिव्यामुत्पन्नानिऔषधानित्रिर्दत्तंअद्भ्यउ अन्तरिक्षसकाशादपिऔषधानित्रिर्दत्तंआपइत्यन्तरिक्षनाम आपःपृथिवीभूरितितन्नामसुपाठात् शंयोरेतन्नामकस्यबृहस्पतिपुत्रस्य तेशंयुं बार्हस्पत्यमवृधन्निति ब्राह्मणान्तरात् तस्यसम्बन्धिनमोमानंसुखविशेषंममकाय सूनवेमदीयायपुत्रायदत्तं हे शुभस्पतीशोभनस्यौषधजातस्यपालकौयुवांत्रिधातु वातपित्तश्लेष्मधातुत्रयशमनविषयंसुखंवहतंप्रापयतम् ॥ दिव्यानि दण्डादित्वाद्यप्रत्ययः । अद्भ्यः ऊडिदमित्यादिनाविभक्तेरुदात्तत्वम् । ओमानं अवतेरन्येभ्योपिदृश्यन्तइतिमनिन् ज्वरत्वरेत्यादिना अकारवकारयोरूठ् सार्वधातुकार्धधातुकलक्षणोगुणः यदिज्वरत्वरेत्यत्रानुनासिकेचेतिनानुवर्तेत तर्हिपूर्वेणैव सूत्रेणवकारस्यऊठादेशोभविष्यति । शुभस्पती शुभदीप्तौ सम्पदादिलक्षणःक्विप् षष्ठ्याःपतिपुत्रेतिसंहितायांविसर्जनीयस्यसत्वम् सुबामन्त्रितेइतिपराङ्गवद्भावात्षष्ठ्यामन्त्रितसमुदायस्याष्टमिकंसर्वानुदात्तत्वम् ॥ ६ ॥

६. अश्विद्वय ! दिव्य लोक की औषध हमें तीन बार दो। पार्थिव औषध तीन बार दो। अन्तरिक्ष से तीन बार औषधप्रदान करो। बृहस्पति के पुत्र शंयू की तरह हमारी सन्तान को सुख-दान करो । शोभनीय-औषध-रक्षक ! तुम वात, पित्त, श्लेष्मा आदि आदि तीन धातु-सम्बन्धी सुख दो।

त्रिर्नो॑अश्विनायज॒ता दि॒वेदि॑वे॒परि॑त्रि॒धातु॑पृथि॒वीम॑शायतम् ।
ति॒स्रोना॑सत्यारथ्यापरा॒वत॑आ॒त्मेव॒वातः॒स्वस॑राणिगच्छतम् ॥ ७ ॥

त्रिः । नः॒ । अ॒श्वि॒ना॒ । य॒ज॒ता॒ । दि॒वेऽदि॑वे । परि॑ । त्रि॒ऽधातु॑ । पृ॒थि॒वीम् । अ॒शा॒य॒त॒म् । ति॒स्रः । ना॒स॒त्या॒ । र॒थ्या॒ । प॒रा॒ऽवतः॑ । आ॒त्माऽइ॑व । वातः॑ । स्वस॑राणि । ग॒च्छ॒त॒म् ॥ ७ ॥

हेअश्विनादिवेदिवे प्रतिदिनं दिवेदिवेद्यविद्यवीत्यहर्नामसुपठितत्वात् यजतायष्टव्यौयुवांनोस्मदीयांपृथिवींवेदिरूपांभूमिं परि सर्वतःप्राप्य त्रिधातुकक्ष्यात्रययुक्तेआस्तीर्णेबर्हिषिअशायतंशयनंकुरुतम् हेरथ्यारथ्यौरथस्वामिनौ तिस्रस्त्रिसंख्याकाऐष्टिकपाशुकसौमिकरूपावेदीर्गच्छतम् तत्रदृष्टान्तः—स्वसराणिशरीराणिआत्मेववातः यथाप्राणिनामात्मभूतःप्राणवायुः तदीयानिशरीराणिगच्छतितद्वत् ॥ यजता यजतेर्भृमृदृशीत्यादिनाअतच् चितइत्यन्तोदात्तत्वम् । त्रिधातु त्रेधाधीयतेनिधीयतइतित्रिधातु सितनिगमीत्यादिनाधात्रस्तुन् नित्त्वादाद्युदात्तत्वम् समासेकृदुत्तरपदप्रकृतिस्वरत्वेनतदेवशिष्यते सुपांसुलुगितिसप्तम्याः लुक् । अशायतम् अदादित्वाच्छपोलुक् अशयातामित्यस्यह्रस्वदीर्घयोर्व्यत्यासः । नासत्या सत्सुसाधूस-

त्यौनसत्यौअसत्यौ नअसत्यौ सत्यावेदनासत्यस्यवित्यौर्णवाभइतियास्कः । नभ्राण्नपादित्यादिनानञःप्रकृतिभावः। रथ्या रथाहौँस्वामिनावित्यर्थः छन्दसिचेतियप्रत्ययः। स्वसराणि सरन्तिगच्छन्तीतिसराइन्द्रियाणि स्वकीयाःसरा येषांशरीराणाम् बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् ॥ ७ ॥

७. अश्विद्वय ! तुम हमारे पूजनीय हो। प्रतिदिन तीन बार पृथिवी पर आगमन करके तीन कक्षा-युत कुशों पर शयन करो। हे नासत्यरयिद्वय ! जिस प्रकार आत्म-रूप वायु शरीरों में आती है, उसी प्रकार तुम घी, पशु और वेदी नाम के तीन यज्ञस्थानों में आगमन करो।

त्रिरश्विनासिन्धुभिःसप्तमातृभिस्त्रयआहावास्त्रेधाहविष्कृतम् ।
तिस्रःपृथिवीरुपरिप्रवादिवोनाकंरक्षेथेद्युभिरक्तुभिर्हितम् ॥ ८ ॥

त्रिः । अश्विना । सिन्धुऽभिः । सप्तमातृऽभिः । त्रयः । आऽहावाः । त्रेधा । हविः । कृतम् । तिस्रः । पृथिवीः । उपरि । प्रवा । दिवः । नाकम् । रक्षेथे इति । द्युऽभिः । अक्तुऽभिः । हितम् ॥ ८ ॥

हेअश्विना सप्तमातृभिःइमंमेगङ्गइत्यादिमन्त्रोक्ताःसप्तसंख्याकाःगङ्गाद्यानद्योमातरःउत्पादिकायेषांजलविशेषाणांतेसप्तमातरःतैःसिन्धुभिःस्यन्दनस्वभावैःजलैः वसतीवरीनामभिः त्रिःसोमाभिषवःकृतइतिशेषः तथाचान्यत्रब्राह्मणेसमाम्नातम्—अष्टौकृत्वोभिषुणोतिएकादशकृत्वोद्वितीयंद्वादशकृत्वस्तृतीयमिति।आहावाः यथोक्तजलयुक्तस्यसोमस्याधारभूताःकूपसदृशास्त्रयःत्रिसंख्याकाद्रोणकलशाधवनीयपूतभृदाख्यानिष्पन्नाइतिशेषः तेषुत्रिषुपात्रविशेषेषुत्रेधात्रिभिःप्रकारैःसवनत्रयगतैः हविष्कृतंसोमाख्यंहविःसम्पादितंद्रव्यंवर्ततइतिशेषः तिस्रःपृथिवीरुपरित्रिभ्यःपृथिव्यादिलोकेभ्यऊर्ध्वंप्रवाप्रवन्तौगच्छन्तौयुवां दिवोनाकंद्युलोकसम्बन्धिनमादित्यंरक्षेथे कीदृशंनाकंद्युभिरहोभिरक्तुभिरात्रिभिश्चहितंस्थापितंअहनिसूर्यउदेतिरात्रावस्तंगच्छति इत्येवमहोरात्राभ्यांसूर्योव्यवस्थापितइत्यर्थः ॥ सप्तमातृभिः बहुव्रीहिस्वरः । आहावाः निपानमाहावइतिआङ्पूर्वाद्ध्वयतेरप्प्रत्ययः सम्प्रसारणंवृद्धिश्चनिपातनात् थाथादिनोत्तरपदान्तोदात्तत्वम् । प्रवा च्युङ्प्रुङ्गतौ प्रवेतेगच्छतइतिप्रवौ पचाद्यच् सुपांसुलुगित्याकारः। नाकं नास्मिन्नकमस्तीतिनाकः नभ्राण्नपादित्यादिनानञःप्रकृतिभावः । द्युभिः ऊडिदमित्यादिनाप्राप्तस्य विभक्त्युदात्तस्यदिवोझल्लितिप्रतिषेधः ॥ ८ ॥

८. अश्विद्वय ! सिन्धु आदि नदियों के सप्त मातृ-जल-द्वारा तीन सोमाभिषव प्रस्तुत हुए हैं। तीन कलस और हव्य भी तैयार हैं। तुमने तीनों संसारों से ऊपर जाकर दिवा-रात्रि-संयुक्त आकाश के सूर्य की रक्षा की थी।

---

१ निं० ६. १३. । २ तै० सं० ६. ४. ५. ।

क्वंत्रीचक्रात्रिवृतोरथस्यक्वंत्रयोवंधुरोयेसनीळाः।
कदायोगोवाजिनोरासभस्ययेनंयज्ञंनासत्योपयाथः ॥९॥

क्वं। त्री। चक्रा। त्रिऽवृतः। रथस्य। क्वं। त्रयः। वन्धुरः। ये। सऽनीळाः। कदा। योगः। वाजिनः। रासभस्य। येन। यज्ञम्। नासत्या। उपऽयाथः ॥ ९ ॥

हेनासत्यावश्विनौ त्रिवृतः त्रिसंख्याकैरश्रिभिरुपेतस्यभवदीयस्यरथस्यईषाद्वयं पूर्वभागेसंयुज्यतेसेयमेकाश्रिः पृष्ठभागेवियुज्यतेतत्रकोणद्वयंसम्पद्यते ईदृशस्यरथस्यसम्बन्धीनि त्रीचक्रा त्रीणिचक्राणि क्व कुत्रस्थितानिइत्यस्माभिर्नदृश्यन्ते येकाष्ठविशेषाः सनीळाः नीडंगृहसदृशंरथस्योपर्युपवेशनस्थानं तेनसहवर्तन्तइतिसनीळाः तेकाष्ठविशेषाः वन्धुरः नीडवन्धनाधारभूतास्त्रयः अक्षेणसहितेद्वेईषेत्येवंत्रिसंख्याकाः क्वकुत्रस्थिताइत्यस्माभिर्नज्ञायन्ते वाजिनोबलवतोरासभस्यभवदीयाश्वस्थानीयस्यगर्दभस्ययोगोरथेयोजनंकदाकस्मिन्कालेनिष्पन्नमित्यस्माभिर्नदृश्यते येनचक्रत्रयनीडकाष्ठत्रयरासभयोजनसहितेनरथेनयज्ञमस्मदीयंयागस्थानंउपयाथः युवांमामुथः तादृशस्यरथस्येतिपूर्वत्रान्वयः ॥ त्रीचक्रा उभयत्रापिशेश्छन्दसिवहुलमिति शेर्लोपः । वन्धुरः बन्धेरौणादिकउरप्रत्ययः वत्वंछान्दसम् । सनीळाः वोपसर्जनस्येतिसभावः ॥ ९ ॥

९. हे नासत्य-अश्विद्वय! तुम्हारे त्रिकोण रथ के तीन चक्र कहाँ हैं? बन्धनाधार-भूत नीड़ या रथ के उपवेशन-स्थान के तीनों काठ कहाँ हैं? कब बलवान् गर्दभ तुम्हारे रथ में जोते जाते हैं, जिनके द्वारा हमारे यज्ञ में आते हो।

आनासत्यागच्छंतंहूयतेहविर्मध्वंःपिबतंमधुपेभिंरासभिंः।
युवोर्हिपूर्वंसवितोषसोरथमृतायंचित्रंघृतवन्तमिष्यंति ॥१०॥

आ। नासत्या। गच्छतम्। हूयते। हविः। मध्वः। पिबतम्। मधुऽपेभिः। आसऽभिः। युवोः। हि। पूर्वम्। सविता। उषसः। रथम्। ऋताय। चित्रम्। घृतऽवन्तम्। इष्यति ॥ १० ॥

हे नासत्यौ अश्विनौ इहकर्मण्यागच्छतम् अत्रास्माभिर्हविर्हूयते युवांचमधुपेभिः मधुरद्रव्यपानयुक्तैरासभिः भवदीयैरास्यैः मध्वोमधुरद्रव्याणिहवींषिपिबतं सवितासूर्यउषसःपूर्वं उषःकालात्पुरायुवयोरश्विनोःसम्बन्धिनंरथंऋतायास्मद्यज्ञार्थंइष्यतिहिप्रेरयतिखलु कीदृशं चित्रं पूर्वोक्तैश्चक्रत्रयादिभिः विचित्रं घृतवन्तं अक्षाञ्जनसाधनेनघृतेनोपेतम् ॥ गच्छतम् अदुपदेशाल्लसार्वधातुकानुदात्तत्वेशपःपित्त्वादनुदात्तत्वम् धातुस्वरः अत्रगच्छतंपिबतंचेतिचार्थम-

तीतेश्चादिलोपेविभाषेतिप्रथमायास्तिङ्विभक्तेर्निघातप्रतिषेधः। हूयते लसार्वधातुकस्वरानुदात्तत्वे यकःस्वरः। मध्वः लिङ्गव्यत्ययः शसियणादेशश्छान्दसः। मधुपेभिः मधुपिबन्तीतिमधुपानि आतोनुपसर्गेकइतिकप्रत्ययः। आसभिः पद्दन्नित्यादिनाआस्यशब्दस्यासन्नादेशः। युवोः युवोर्हियन्त्रमित्यत्रोक्तम्। इष्यति इषगतौश्यनोनित्त्वादाद्युदात्तत्वम् हिचेतिनिघातप्रतिषेधः॥१०॥

१०. हे नासत्य-अश्विद्वय! आओ। हव्य देता हूँ। अपने मधुपायी मुख-द्वारा मधुर हव्य पान करो। उषा-समय से पहले ही सूर्य ने तुम्हारे विचित्र और घृतवत् रथ को यज्ञ में आने के लिए प्रेरित किया है।

आनासत्यात्रिभिरेकादशैरिहदेवेभिर्यातंमधुपेयमश्विना।
प्रायुस्तारिष्टंनीरपांसिमृक्षतंसेधतंद्वेषोभवतंसचाभुवा॥ ११॥

आ। नासत्या। त्रिऽभिः। एकादशैः। इह। देवेभिः। यातम्। मधुऽपेयम्। अश्विना। प्र। आयुः। तारिष्टम्। निः। रपांसि। मृक्षतम्। सेधतम्। द्वेषः। भवतम्। सचाऽभुवा॥ ११॥

हेनासत्या असत्येनानृतेनरहितौअश्विनाअश्विदेवौयुवांत्रिभिरेकादशैः येदेवासोदिव्येकादशस्थेत्यादिमन्त्रप्रतिपादितैस्त्रिसंख्याकैः एकादशात्मकवर्गत्रयगतैर्देवैःसहमधुपेयंसोमात्मकमधुरद्रव्यपानमभिलक्ष्य इहास्मिन्देवयजनदेशेआयातमागच्छतम् आयुरस्मदीयमायुष्यंप्रतारिष्टंप्रवर्धयतं रपांस्यस्मदीयानिपापानिनिर्मृक्षतंनिःशेषेणशोधयतं द्वेषःद्वेषकर्तॄन् सेधतंप्रतिषेधतं सचाभुवा अस्माभिःसहावस्थितौभवतम्॥त्रिभिः षट्त्रिचतुर्भ्यइतिविभक्तेरुदात्तत्वम्। एकादशैः एकादशानांपूरणैः तस्यपूरणइतिडट्। मधुपेयं पापाने अचोयदितिकर्मणियत् ईद्यतीत्याकारस्यईकारादेशः यतोनावइत्याद्युदात्तत्वम् मधुचतत्पेयमितिसमासेकृदुत्तरपदप्रकृतिस्वरत्वम्। तारिष्टम् तॄप्लवनतरणयोः छान्दसेप्रार्थनायांलुङि च्लेःसिच् इडागमः वृतोवेतिप्राप्तस्येटोदीर्घस्य सिचिचपरस्मैपदेष्वितिप्रतिषेधः बहुलंछन्दस्यमाङ्योगेपीत्यडभावः अत्रतारिष्टंमृक्षतंचेतिचशब्दार्थप्रतीतेस्तस्यचाप्रयोगाच्चादिलोपेविभाषेतिनिघातप्रतिषेधः आदिःसिचोन्यतरस्यामित्याद्युदात्तत्वम्। मृक्षतम् मृशआमर्शने छन्दसिलुङ्लङ्लिटइतिलोडर्थेलुङ् शलइगुपधादनिटःक्सइति क्सादेशः एकाचउपदेशेनुदात्तादितीट्प्रतिषेधः षत्वकुत्वे पूर्ववदडभावः। सेधतम् षिधुगत्याम् अत्रकेवलोपिषिधिः प्रतिपूर्वस्यार्थेवर्तते प्रार्थनायांलोट् शपःपित्त्वादनुदात्तत्वम् तिङश्चलसार्वधातुकस्वरेणधातुस्वरः पादादित्वात्तिङःपरत्वाद्वानिघाताभावः। द्वेषः अन्येभ्योपिदृश्यन्तेइतिकर्तरिविच् भवतंद्वेषइत्यस्यवाक्यान्तरगतत्वात्तदपेक्षयास्यनिघातोनभवति समानवाक्येनिघातयुष्मदस्मदादेशावक्तव्याइतिवचनात्। सचाभुवा सचेत्ययंनिपातःसहशब्दसमानार्थः तथाच

यास्कः—सचासहेत्यर्थइति¹। सचाभवतइतिसचाभुवौ क्विप् ओःसुपीतियणादेशस्यनभूसुधियो-रितिप्रतिषेधः सुपांसुलुगितिविभक्तेराकारः ॥ ११ ॥

११. हे नासत्य-अश्विद्वय! तैंतीस देवताओं के साथ मधुपान के लिए यहाँ आओ। हमारी आयु को बढ़ाओ। पाप का खण्डन करो। विद्वेषियों को रोको। हमारे साथ रहो।

आनोअश्विनात्रिवृतारथेनार्वाञ्चंरयिंवहतंसुवीरम्।
शृण्वन्तावामवसेजोहवीमिवृधेचनोभवतंवाजसातौ ॥ १२ ॥५॥

आ। नः। अश्विना। त्रिऽवृता। रथेन। अर्वाञ्चम्। रयिम्।
वहतम्। सुऽवीरम्। शृण्वन्ता। वाम्। अवसे। जोहवीमि।
वृधे। च। नः। भवतम्। वाजऽसातौ। १२ ॥ ५ ॥

हेअश्विना त्रिवृतारथेनअप्रतिहतगतित्वात्त्रिषुलोकेषुवर्तमानेनरथेनसह नोस्माकंअर्वाञ्चं अभिमुखंसुवीरंशोभनैर्वीरैःपुत्रभृत्यादिभिरुपेतंरयिंधनंआवहतंआनीयप्रापयतम् शृण्वन्ता अस्मदीयस्तुतिंशृण्वन्तौयुवांअवसेअस्मद्रक्षणार्थंजोहवीमिआह्वयामि नोस्माकंवाजसातौसंग्रामेवाजसातौमहाधनइतिसंग्रामनामसुपाठात् वृधेवर्धनायभवतम्॥ सुवीरं शोभनावीरायस्येतिबहुव्रीहौवीरवीर्यौचेत्युत्तरपदाद्युदात्तत्वम्। शृण्वन्ता श्रुश्रवणे शतरि श्रुवःशृचेतिश्रुःशृभावश्च हुश्नुवोःसार्वधातुकइतियणादेशः सुपांसुलुगितिआकारः। जोहवीमि ह्वेञ्स्पर्धायांशब्देच यङ्लुकि अभ्यस्तस्यचेतिकृतसम्प्रसारणादस्माल्लडुत्तमैकवचनेयङोवेतिईडागमः। वृधे वृधुवृद्धौ इत्यस्मात् सम्पदादिलक्षणोभावेक्विप्। वाजसातौ षणुदाने क्तिनि तितुत्रेत्यादिनाइट्प्रतिषेधः जनसनेत्यादिनाआत्वम् वाजानांसातिर्यस्मिन्निति पूर्वपदप्रकृतिस्वरत्वम्॥ १२ ॥

१२. अश्विकुमारद्वय! त्रिकोण या त्रिलोक में चलनेवाले रथ द्वारा हमारे पास पुत्र-भृत्यादि-संयुक्त धन लाओ। अपनी रक्षा के लिए हम तुम्हारा आह्वान करते हैं। तुम सुनो; हमारी वृद्धि करो और संग्राम में बल-दान करो।

ह्वयाम्यग्निमित्येकादशर्चंपञ्चमंसूक्तम् हिरण्यस्तूपऋषिः आद्यानवमीचजगतीछन्दस्के शिष्टास्त्रिष्टुभः कृत्स्नस्यसूक्तस्यसवितादेवता आद्यायाःह्वयाम्यग्निमित्यस्याअग्निमित्रावरुणरात्रिसवित्राख्यालिङ्गोक्तादेवताः तथाचानुक्रान्तम्—ह्वयाम्येकादशसावित्रं नवमीजगत्याद्याचसालिङ्गोक्तदैवतपादाइति। अभिप्लवषडहस्यचतुर्थेहनिवैश्वदेवशस्त्रइदंसूक्तंसावित्रंनिविद्धानं तृतीयस्यत्र्यर्यमेतिखण्डेसूत्रितम्—ह्वयाम्यग्निमस्यमेद्यावापृथिवीइतितिस्रइति।

---

१ नि० ५ ५।

तत्रप्रथमामृचमाह—

ह्वया॑म्य॒ग्निंप्र॑थ॒मंस्व॒स्तये॒ह्वया॑मिमि॒त्रावरु॑णावि॒हाव॑से ।
ह्वया॑मि॒रात्रीं॒जग॑तोनि॒वेश॑नीं॒ह्वया॑मिदे॒वंस॑वि॒तार॑मू॒तये॑ ॥ १ ॥

ह्वया॑मि । अ॒ग्निम् । प्र॒थ॒मम् । स्व॒स्तये॑ । ह्वया॑मि । मि॒त्रावरु॑णौ । इ॒ह । अव॑से । ह्वया॑मि । रात्री॑म् । जग॑तः । नि॒ऽवेश॑नीम् । ह्वया॑मि । दे॒वम् । स॒वि॒तार॑म् । ऊ॒तये॑ ॥ १ ॥

स्वस्तयेअस्माकंअविनाशाय स्वस्तीत्यविनाशिनामेतियास्कः । प्रथममादौअग्निंह्वयामि-इहास्मिन्कर्मण्यवसेस्मद्रक्षणायमित्रावरुणौह्वयामि जगतोजङ्गमस्यप्राणिजातस्यनिवेशनींउप-वेशनहेतुभूतांरात्रींरात्रिदेवतांह्वयामि जङ्गमाःसर्वेप्राणिनोदिवसेस्वस्वव्यापारान्कृत्वास्वस्वगृहे रात्रावुपविशन्तीतिप्रसिद्धम् ऊतयेअस्मद्रक्षार्थं सवितारंदेवंह्वयामि ॥ मित्रावरुणौ देवताद्वन्द्वेचे-तिपूर्वपदस्यानङादेशः देवताद्वन्द्वेचेत्युभयपदप्रकृतिस्वरत्वम् । रात्रीं रात्रेश्चाजसाविति ङीप् । नि-वेशनीं निविशन्त्यस्यामितिनिवेशनी करणाधिकरणयोश्चेतिल्युट् टिड्ढाणञित्यादिनाङीप् । ऊ-तये अवतेःक्तिनि ज्वरत्वरेत्यादिनावकारस्यउपधायाश्चऊठ् ऊतियूतीत्यादिनाक्तिनउदात्त-त्वम् ॥ १ ॥

१. अपनी रक्षा के लिए पहले अग्नि का आह्वान करता हूँ। रक्षा के लिए मित्र और वरुण को इस स्थान पर बुलाता हूँ। संसार का विश्राम-कारण रात्रि को मैं बुलाता हूँ । रक्षा के लिए सविता देवता को बुलाता हूँ।

आकृ॒ष्णेन॒रज॑सा॒वर्त॑मानोनि॒वे॒शय॑न्न॒मृतं॒मर्त्यं॑च ।
हि॒र॒ण्ययेन॑सवि॒तारथे॒नादे॒वोया॑ति॒भुव॑नानि॒पश्य॑न् ॥ २ ॥

आ । कृ॒ष्णेन॑ । रज॑सा । वर्त॑मानः । नि॒ऽवे॒शय॑न् । अ॒मृत॑म् । मर्त्य॑म् । च॒ । हि॒र॒ण्यये॑न । स॒वि॒ता । रथे॑न । आ । दे॒वः । या॒ति॒ । भुव॑नानि । पश्य॑न् ॥ २ ॥

सवितासूर्यः कृष्णेनरजसाकृष्णवर्णेनलोकेन कृष्णंकृष्यतेर्निकृष्टोवर्णइतियास्कः । लो-कारजांस्युच्यन्तइतिच अन्तरिक्षलोकोहिसूर्यागमनात्पुराकृष्णवर्णोभवति तेनान्तरिक्षमार्गे-

---

१ नि० ३.२१. । २ नि० २.२०. ।

णआवर्तमानःपुनःपुनरागच्छन्अमृतंदेवंमर्त्यंमनुष्यंचनिवेशयन्स्वस्वस्थानेवस्थापयन्यद्वा अ-मृतंमरणरहितंप्राणंमर्त्यंमरणसहितंशरीरंचनिवेशयन् तथाचारण्यकाण्डेअमर्त्योमर्त्येनासयोनि-रित्येतस्यमन्त्रभागस्यव्याख्यानरूपेब्राह्मणेयथोक्तार्थोवगम्यते-मर्त्यानिहीमानिशरीराण्यमृतैषा-देवतेति। यथोक्तगुणोपेतः सवितादेवोभुवनानिसर्वांन्लोकान्पश्यन्अवेक्षमाणः प्रकाशयन्नि-त्यर्थः हिरण्ययेनसुवर्णनिर्मितेनरथेनआयातिअस्मत्समीपमागच्छति ॥ अमृतं मृतंमरणं नास्त्यस्येतिबहुव्रीहौ नञोजरमरमित्रमृताइत्युत्तरपदाद्युदात्तत्वम्। मर्त्यं मर्तेभवं भवेछन्द-सीतियत् यतोनावइत्याद्युदात्तत्वम्। हिरण्ययेन ऋत्व्यवास्त्व्येत्यादिनामयटोमकारस्यलोपोनि-पातितः यस्येतिलोपेप्रत्ययस्वरः। भुवनानि भूसत्तायां भूधूसूभ्रस्जिभ्यश्छन्दसीतिक्युन्प्रत्य-यः योरनादेशेउवङादेशः नित्त्वादाद्युदात्तत्वम् ॥ २ ॥

२. अन्धकार-पूर्ण अन्तरिक्ष से बार-बार भ्रमण कर देव और मनुष्य को सचेतन करके सविता देवता सोने के रथ से समस्त भुवनों को देखते-देखते भ्रमण करते हैं।

यातिदेवःप्रवतायात्युद्वतायातिशुभ्राभ्यांयजतोहरिभ्याम्।
आदेवोयातिसवितापरावतोपविश्वादुरिताबाधमानः ॥ ३ ॥

याति। देवः। प्रऽवता। याति। उत्ऽवता। याति। शुभ्राभ्याम्। यजतः। हरिऽभ्याम्। आ। देवः। याति। सविता। पराऽवतः। अप। विश्वा। दुःऽइता। बाधमानः ॥ ३ ॥

देवोदीप्यमानःसविताप्रवताप्रवणवतामार्गेणयातिगच्छति तथाउद्वताउत्कृष्टेनऊर्ध्वदेशयुक्ते-नमार्गेणयाति उदयानन्तरंआमध्याह्नंऊर्ध्वोमार्गः ततउपरिआसायं प्रवणोमार्गइतिविवेकः तथा यजतोयष्टव्यःसदेवः शुभ्राभ्यांश्वेताभ्यांहरिभ्यामश्वाभ्यांयातिदेवयजनदेशंगच्छति सवि-तादेवोविश्वादुरितासर्वाणिपापान्यपबाधमानोविनाशयन्परावतःदूरदेशात्परावतइतिदूरनामसुप-ठितत्वात् तादृशात् द्युलोकात्आयातियागदेशेआगच्छति ॥ प्रवता वनषणसम्भक्तौ अस्मात्म-पूर्वात्क्विप् गमादीनामितिवक्तव्यमित्यनुनासिकलोपः ततस्तुक् कृदुत्तरपदप्रकृतिस्वरत्वम्। उद्व-ता उत्पूर्वाद्वनतेः पूर्ववत्प्रक्रिया। यजतः भृमृदृशीत्यादिनायजेःकर्मण्यतच्प्रत्ययः। विश्वा दु-रिता उभयत्रशेश्छन्दसिबहुलमितिशेर्लोपः ॥ ३ ॥

३. देव सविता उदय से मध्याह्न तक उर्द्धगामी पथ से और मध्याह्न से सायं तक अधोगामी पथ देकर गमन करते हैं। वह पूजनीय सूर्यदेव दो श्वेत घोड़ों द्वारा गमन करते हैं। समस्त पापों का विनाश करते-करते दूर देश से आते हैं।

अभीवृतंकृशनैर्विश्वरूपंहिरण्यशम्यंयजतोबृहन्तम्।
आस्थाद्रथंसवितचित्रभानुःकृष्णारजांसितविषींदधानः ॥ ४ ॥

अभिऽवृतम् । कृशनैः । विश्वऽरूपम् । हिरण्यऽशम्यम् । यजतः ।
बृहन्तम् । आ । अस्थात् । रथम् । सविता । चित्रऽभानुः ।
कृष्णा । रजांसि । तविषीम् । दधानः ॥ ४ ॥

सविता रथमास्थात् आस्थितवानारूढवानित्यर्थः कीदृशं अभीवृतंअभितोवर्तमानं तथाकृशनैर्विश्वरूपंसुवर्णेननानारूपं कृशनंलोहमितिसुवर्णनामसुपाठात् क्वचित्सुवर्णनिर्मितगजपंक्तिः क्वचिदश्वपंक्तिः क्वचिन्मनुष्यपङ्क्तिरित्येवंबहुरूपत्वं हिरण्यशम्यंअश्वानांस्कन्धेषुरथयोजनवेलायांनियन्तुंप्रक्षेप्यमाणाः शङ्कवःशम्याः ताःसुवर्णमय्योरथेवर्तन्तेबृहन्तंप्रौढम् कीदृशः सविता यजतःयष्टव्यःचित्रभानुः विविधरश्मियुक्तः कृष्णारजांसिअन्धकारयुक्ततयाकृष्णवर्णान्लोकानुद्दिश्यतमोनिवारणार्थंतविषींबलंस्वकीयंप्रकाशरूपंदधानः॥ अभीवृतं अभितोवर्ततइत्यभीवृत् वृतुवर्तने क्विप् नहिवृतीत्यादिनापूर्वपदस्यदीर्घत्वम् । विश्वरूपं विश्वानिरूपाणियस्यासौविश्वरूपः बहुव्रीहौविश्वंसंज्ञायामितिव्यत्ययेनासंज्ञायामपिपूर्वपदान्तोदात्तत्वम् । हिरण्यशम्यं हर्यगतिकान्त्योः हर्यतेःकन्यन्हिरचेतिकन्यन्प्रत्ययोधातोर्हिरादेशश्च नित्त्वादाद्युदात्तत्वम् बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् ।अस्थात् तिष्ठतेर्लुङि गातिस्थेतिसिचोलुक्। कृष्णा कृषेर्वर्णेइतिनक्प्रत्ययः शेश्छन्दसिबहुलमितिशेर्लोपः । तविषीं तविःसौत्रोधातुः तवतेर्णिद्वेतिटिषच् टित्त्वात् टिड्ढाणजित्यादिनाङीप् व्यत्ययेनाद्युदात्तत्वम् वृषादित्वाद्वाद्रष्टव्यम् । दधानः शानचि अभ्यस्तानामादिरित्याद्युदात्तत्वम् ॥ ४ ॥

४. पूजनीय और विचित्र किरणोंवाले सविता देवता भुवनों के अन्धकार के विनाश के लिए तेज धारण करके पास के सुवर्ण-विचित्रित और सोने की रस्सियों से युक्त विशाल रथ पर सवार हुए।

पञ्चमीमृचमाह—

विजनाञ्छ्यावाःशितिपादोअख्यन्रथंहिरण्यप्रउगंवहन्तः ।
शश्वद्विशःसवितुर्दैव्यस्योपस्थेविश्वाभुवनानितस्थुः ॥ ५ ॥

वि । जनान् । श्यावाः । शितिऽपादः । अख्यन् । रथम् ।
हिरण्यऽप्रउगम् । वहन्तः । शश्वत् । विशः । सवितुः । दैव्यस्य ।
उपऽस्थे । विश्वा । भुवनानि । तस्थुः ॥ ५ ॥

श्यावाःएतन्नामकाःसूर्यस्याश्वाःश्यावाःसवितुरितिनिघण्टावुक्तत्वात् तेचशितिपादः श्वेतैः पादैरुपेताः हिरण्यप्रउगंरथस्यमुखमीषयोरग्रंयुगबन्धनस्थानंप्रउगमित्युच्यते तच्चात्रसुवर्णमयं तद्युक्तंरथंवहन्तोजनान्प्राणिनोव्यख्यन् विशेषेणप्रकाशितवन्तइत्यर्थः शश्वत्सर्वदाविशः प्रजाः

दैव्यस्यइतरदेवसम्बन्धिनः सवितुःप्रेरकस्यसूर्यस्यउपस्थेसमीपस्थानेतस्थुः स्थितवत्यः नकेवलंप्रजाः किंतर्हि विश्वाभुवनानिसर्वेचलोकाः प्रकाशायसूर्यसमीपेतस्थुः ॥ शितिपादः शितयः श्वेतवर्णाः पादायेषांतेशितिपादाः सुपांसुलुगितिजसःसुआदेशः यद्वा शितिःश्वेतवर्णः स्फटिकादिःसइवपादोयेषां पादस्यलोपोहस्त्यादिभ्यइतिसमासान्तः पादशब्दस्यान्त्यलोपः उपमानादितिहितत्रानुवर्तते पादशब्दस्यवृषादित्वादाद्युदात्तत्वम् तस्यबहुव्रीहौसमासेशितेर्नित्याबह्वच्बहुव्रीहावभसवइतिप्रकृतिस्वरत्वम्। अख्यन् ख्यातेर्लुङि अस्यतिवक्तीत्यादिनाच्लेरङादेशः। हिरण्यप्रउगम् बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्। वहन्तः शपःपित्त्वादनुदात्तत्वम् शतुश्चलसार्वधातुकस्वरेणधातुस्वरः कृदुत्तरपदप्रकृतिस्वरत्वेनसएवशिष्यते। दैव्यस्य तस्येदमित्यर्थेदेवाद्यञञाविति देवशब्दात्प्राग्दीव्यतीयोञ् तद्धितेष्वचामादेरित्यादिवृद्धिः ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वम्। उपस्थे आतश्चोपसर्गेइतिकः आतोलोपइटिचेत्याकारलोपः मरुद्वृधादित्वात्पूर्वपदान्तोदात्तत्वम् ॥ ५ ॥

५. श्वेत पैरोंवाले श्याव नाम के घोड़े सुवर्ण युग या सोने की रस्सियोंवाले रथ को लेकर मनुष्यों के पास प्रकाश करते हैं। सूर्यदेव के पास मनुष्य और संसार उपस्थित हैं।

षष्ठीमृचमाह—

तिस्रोद्यावःसवितुर्द्वाउपस्थाँएकायमस्यभुवनेविराषाट्।
आणिंनरथ्यममृताधितस्थुरिहब्रवीतुयउतच्चिकेतत् ॥ ६ ॥ ६ ॥

तिस्रः। द्यावः। सवितुः। द्वौ। उपऽस्था। एका। यमस्य। भुवने। विराषाट्। आणिम्। न। रथ्यम्। अमृता। अधि। तस्थुः। इह। ब्रवीतु। यः। ऊम् इति। तत्। चिकेतत् ॥ ६ ॥ ६ ॥

द्यावःस्वर्गोपलक्षिताःप्रकाशमानालोकास्तिस्रस्त्रिसंख्याकाःसन्ति तत्रद्वौलोकौसवितुःसूर्यस्यउपस्थासमीपस्थानेवर्तेते द्युलोकभूलोकयोःसूर्येणप्रकाशितत्वात् एकामध्यमाभूमिरन्तरिक्षलोकः यमस्यभुवनेपितृपतेर्गृहेविराषाट्विरान्गन्तॄन्सहतेप्रेताःपुरुषाअन्तरिक्षमार्गेणयमलोकेगच्छन्तीत्यर्थः अमृताअमृतानिचंद्रनक्षत्रादीनि ज्योतींषिजलानिवाअधितस्थुः सवितारमधिगम्यस्थिताः तत्रदृष्टान्तः—रथ्यमाणिंन रथाद्बहिरक्षच्छिद्रेप्रक्षिप्तःकीलविशेषआणिरित्युच्यतेरथसम्बन्धिनमाणिमधिगम्ययथारथस्तिष्ठति तद्वत् यस्तुमानवः तत्सवितृरूपंचिकेतत्जानातिसमानवइहास्मिन्विषयेब्रवीतुकेनापिवक्तुमशक्यःसवितुर्महिमेत्यर्थः ॥ तिस्रः तिसृभ्योजसइतिविभक्तेरुदात्तत्वम्। द्वौ संहितायामावादेशे लोपःशाकल्यस्येतिवकारलोपः। उपस्था आङ्याजयारांचोपसंख्यानमितिसप्तम्याआङादेशः आङोनुनासिकश्छन्दसीतिप्रकृतिभावः। विरा-

षाद् वृञ्वरणे घञर्थेकविधानमितिकर्मणिकः बहुलंछन्दसीतिइत्वम् तथासतिवूर्यन्तइतिविरा-इत्युक्तंभवति तान्सहतइतिविराषाट् छन्दसिसहइतिसहेर्ण्विः सहेःसाडःसइतिषत्वम् अन्येषाम-पिदृश्यतइतिपूर्वपदस्यदीर्घः। रथस्येदंरथ्यं रथाद्यदितियत् यतोनावइत्याद्युदात्तत्वम् अमृ-ता शेश्छन्दसिबहुलमितिशेर्लोपः। चिकेतत् कितज्ञाने लेटयाडागमः इतश्चलोपइतीकारलोपः जुहोत्यादित्वात्श्लुः लघूपधगुणः अनुदात्तेचेत्यभ्यस्तस्याद्युदात्तत्वम् यद्वृत्तयोगादनिघातः॥६॥

६. द्युलोक आदि तीन लोक हैं। इनमें द्युलोक और भूलोक— दो सूर्य के पास हैं। एक अन्तरिक्ष यमराज के गृह में जाने का रास्ता है। जिस प्रकार रथ कील का ऊपरी भाग अवलम्बन करता है, उसी प्रकार अमर या चन्द्रमा आदि नक्षत्र सूर्य को अवलम्ब किये हुए हैं। जो सूर्य को जानते हैं; वे इस विषय में बोलें।

इतिप्रथमस्यतृतीयेषष्ठोवर्गः॥ ६॥

वि<u>सु</u>प<u>र्णो</u>अ<u>न्</u>तरि॑क्षाण्यख्यद्ग<u>भी</u>रवे॑पा॒असु॑रःसु<u>नी</u>थः ।
क्वे॑<u>दानीं</u>सू॒र्यः॑कश्चि॑केतक॒त॒मां द्यां र॒श्मिर॒स्यात॑तान ॥ ७॥

वि । सु॒ऽप॒र्णः । अ॒न्तरि॑क्षाणि । अ॒ख्य॒त् । ग॒भी॒रऽवे॑पाः । असु॑रः ।
सु॒ऽनी॒थः । क्व॑ । इ॒दानी॑म् । सूर्यः॑ । कः । चि॒के॒त॒ । क॒त॒माम् ।
द्याम् । र॒श्मिः । अ॒स्य॒ । आ । त॒ता॒न॒ ॥ ७॥

सुपर्णः शोभनपतनः सूर्यस्यरश्मिःसुपर्णइतिपञ्चदशरश्मिनामानीतितन्नामसुपठितत्वात् अन्तरिक्षाणि अन्तरिक्षोपलक्षितानिलोकत्रयस्थानानिव्यख्यत् विशेषेणख्यापितवान्प्रकाशित-वान् कीदृशोरश्मिः गभीरवेपाः गम्भीरकम्पनः रश्मेः प्रकंपनंचलनंकेनापिद्रष्टुमशक्यमित्यर्थः असुरः सर्वेषांप्राणदः तथाचान्यत्राम्नायते—सर्वेषांभूतानांप्राणानादायोदेतीति सुनीथः सुनयनः शोभनप्रापणः मार्गप्रकाशनेनाभीष्टदेशंप्रापयतीत्यर्थः तादृशरश्मियुक्तः सूर्यइदानींरात्रौक्कु-त्रवर्तते तदेतद्रहस्यंकश्चिकेत कोजानातिनकोपीत्यर्थः अस्यसूर्यस्यरश्मिः कतमांद्यांआततान कंद्युलोकंरात्रौव्याप्तवान्एतदपिकोजानाति ॥ सुपर्णः नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्व-म्। गभीरवेपाः टुवेपृकम्पने असुन् गभीरंवेपोयस्य पूर्वपदप्रकृतिस्वरत्वम्। असुरः असुक्षे-पणे अस्यतिशत्रूनित्यसुरः असेरुरन् नित्त्वादाद्युदात्तत्वम् यद्वा असून्प्राणान् रातिददाती तिअसुरः आतोनुपसर्गेकइतिकप्रत्ययः। सुनीथः णीञ्प्रापणे हनिकुषिनीरमिकाशिभ्यःक्थ-न्इतिक्थन् प्रादिसमासेथाथादिनाउत्तरपदान्तोदात्तत्वम्।इदानीं इदंशब्दात्सप्तम्यर्थे दानींचे-तिदानींप्रत्ययः इदमइशितीदम् शब्दस्येशादेशः प्रत्ययाद्युदात्तत्वम्। सूर्यः षूप्रेरणे सुवतीति सूर्यः राजसूयसूर्येत्यादिनारुडागमसहितःक्यप्प्रत्ययोनिपातितः प्रत्ययस्यानुदात्तत्वेधातुस्वरे-

णाद्युदात्तत्वम् । चिकेत कितज्ञाने लिट् । कतमां किंजातीयां वाबहूनांजातिपरिप्रश्नेडतमच्इति किम्शब्दाव्डतमच् डित्वाट्टिलोपः चितइत्यन्तोदात्तत्वम् ॥ ७ ॥

७. गंभीर कम्पन से संयुक्त, प्राणदायी सुनयन से संयुक्त किरणें अन्तरिक्ष आदि तीनों लोकों में व्याप्त हैं। इस समय सूर्य कहाँ हैं; कौन कह सकता है ? किस दिव्य लोक में सूर्य की रश्मि विस्तृत है ?

अ॒ष्टौव्य॑ख्य॒त्क॒कुभः॑पृथि॒व्यास्त्रीधन्व॒योज॑नास॒प्तसिन्धू॑न् ।
हि॒र॒ण्या॒क्षःस॑वि॒तादे॒वआगा॒द्दध॒द्रत्ना॑दा॒शुषे॒वार्या॑णि ॥ ८ ॥

अ॒ष्टौ । वि । अ॒ख्य॒त् । क॒कुभः॑ । पृ॒थि॒व्याः । त्री । धन्व॑ । योज॑ना । स॒प्त । सिन्धू॑न् । हि॒र॒ण्य॒ऽअ॒क्षः । स॒वि॒ता । दे॒वः । आ । अ॒गा॒त् । दध॑त् । रत्ना॑ । दा॒शुषे॑ । वार्या॑णि ॥ ८ ॥

पृथिव्याःसम्बन्धिनीरष्टौककुभः प्राच्याद्याश्चतस्रोदिशः आग्नेय्याद्याश्चतस्रोविदिशइत्येवमष्टौदिशः व्यख्यत सविताप्रकाशितवान् तथायोजनाप्राणिनः स्वस्वाभोगेनयोजयितॄन्धन्व अन्तरिक्षोपलक्षितान् त्रीन्त्रिसंख्याकान्पृथिव्यादिलोकान्सप्तसिन्धून्गङ्गादिनदीः समुद्रान्वा सविताव्यख्यत हिरण्याक्षः हितरमणीयचक्षुर्युक्तः हिरण्मयाक्षोवासवितादेवआगातइहागच्छतु किंकुर्वन् दाशुषेहविर्दत्तवतेयजमानायवार्याणिवरणीयानिरत्नानिदधत्प्रयच्छन् ॥अख्यत ख्यातेर्लुङि अस्यतिवक्तीत्यादिनाच्लेरङादेशः । त्री शेश्छन्दसिबहुलमितिशेर्लोपः।धन्व रिविरविधविगत्यर्थाः इदितोनुम्धातोरितिनुम् अस्मात्कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवइतिकनिन् सुपांसुलुगितिविभक्तेर्लुक् नलोपः प्रत्ययस्यनित्त्वादाद्युदात्तत्वम् । योजना योजयन्तिप्राणिनउपभोगेनेतियोजनानि नन्द्यादिलक्षणोल्युः णेरनिटीतिणिलोपः पूर्ववच्छेर्लोपः ।हिरण्याक्षः हिरण्मयानिअक्षीणियस्यासौहिरण्याक्षः बहुव्रीहौसक्थ्यक्ष्णोरितिसमासान्तः षच्प्रत्ययः। आगात एतेर्लुङिइणोगालुङीतिगादेशः गातिस्थेतिसिचोलुक् । दधत् नाभ्यस्ताच्छतुरितिनुमागमप्रतिषेधः श्नाभ्यस्तयोरातइत्याकारलोपः अभ्यस्तानामादिरित्याद्युदात्तत्वम् । दाशुषे दाश्वान्साह्वान् इत्यादिनाक्वसुप्रत्ययान्तोनिपातितः चतुर्थ्येकवचने वसोःसम्प्रसारणमितिसम्प्रसारणंपरपूर्वत्वं शासिवसिघसीनांचेतिषत्वम् । वार्याणि वृङ्सम्भक्तौ ऋहलोर्ण्यत ईडवन्देत्यादिनाआद्युदात्तत्वम ॥ ८ ॥

८. सूर्य ने पृथिवी की आठों दिशायें प्रकाशित की हैं। प्राणियों के तीनों संसार और सप्त सिन्धु भी प्रकाशित किये हैं। सोने की आँखोंवाले सविता हव्यदाता यजमान को वरणीय द्रव्यदान देकर यहाँ आवें।

नवमीमृचमाह—

हिरण्यपाणिःसविताविचर्षणिरुभेद्यावापृथिवीअन्तरीयते ।
अपामीवांबाधतेवेतिसूर्यमभिकृष्णेनरजसाद्यामृणोति ॥ ९ ॥

हिरण्यऽपाणिः । सविता । विऽचर्षणिः । उभे इति । द्यावापृथिवी इति । अन्तः । ईयते । अप । अमीवाम् । बाधते । वेति । सूर्यम् । अभि । कृष्णेन । रजसा । द्याम् । ऋणोति ॥ ९ ॥

हिरण्यपाणिः सुवर्णमयहस्तयुक्तः यद्वा यजमानेभ्योदातुं हिरण्यंहस्तेधृतवान् विचर्षणिः विविधदर्शनयुक्तः विचर्षणिः पश्यतीत्यर्थःविचर्षणिः विश्वचर्षणिरितिपश्यकर्मसुपाठात् सवितादेवः उभेद्यावापृथिवी अन्तः उभयोर्लोकयोर्मध्येईयतेगच्छति अमीवां रोगादिबाधां अपबाधते सम्यक् निराकरोति तथासूर्यंवेतिगच्छति यद्यपिसवितृसूर्ययोरेकदेवतात्वं तथापिमूर्तिभेदेनगन्तृगन्तव्यभावः कृष्णेनतमसः कर्षकेणनिवर्तकेन रजसातेजसा द्यामाकाशंअभ्यृणोति-सर्वतोव्याप्नोति ॥द्यावापृथिवी दिवसश्चपृथिव्यामितिचशब्दादिव्शब्दस्यद्यावादेशः देवता द्वन्द्वे-चेत्युभयपदप्रकृतिस्वरत्वं नोत्तरपदेनुदात्तादावितिनिषेधः।अपृथिवीरुद्रपूषमन्थिष्वितिपर्युदस्तत्वात्। ईयते ईङ्गतौ तिङ्ङतिङइतिनिघातः बाधतेवेतिचेतिसमुच्चयार्थप्रतीतेश्चशब्दस्याप्रयोगा-च्चादिलोपेविभाषेतिनिघातप्रतिषेधः। वेति वीगतिव्याप्तिप्रजनकान्त्यसनखादनेषु अदादित्वा-च्छपोलुक् तिपःपित्त्वादनुदात्तत्वेधातुस्वरः यद्यप्येषाद्वितीया तथापि तिङःपरत्वान्निघाता-भावः। ऋणोति ऋणुगतौ तनादित्वादुः तनादिषुकृञौतेरेवगुणोनान्येषामितिआपिशलिमते-नगुणाभावः ॥ ९ ॥

९. सुवर्ण-पाणि और विविध दर्शन से युक्त सविता दोनों लोकों में गमन करते हैं, रोगादि का निराकरण करते हैं, उदय होते हैं और तमोनाशक तेज-द्वारा आकाश को व्याप्त करते हैं।

दशमीमृचमाह—

हिरण्यहस्तोअसुरःसुनीथःसुमृळीकःस्ववाँयात्वर्वाङ् ।
अपसेधन्रक्षसोयातुधानानस्थाद्देवःप्रतिदोषंगृणानः ॥ १० ॥

हिरण्यऽहस्तः । असुरः । सुऽनीथः । सुऽमृळीकः । स्वऽवान् । यातु । अर्वाङ् । अपऽसेधन् । रक्षसः । यातुऽधानान् । अस्थात् । देवः । प्रतिऽदोषम् । गृणानः ॥ १० ॥

हिरण्यहस्तः असुरः प्राणप्रदाता सुनीथः सुष्ठुनेता प्रशस्यइत्यर्थः सुनीथःपाकइतिप्रशस्यनामसुपाठात् सुमृळीकः सुष्ठुसुखयिता स्ववान्धनवान् अर्वाङ्अभिमुखः कर्मदेशेगच्छतु किञ्च अयंदेवः प्रतिदोषं प्रतिरात्रि गृणानःस्तूयमानः अस्थात् स्थितवान् किंकुर्वन् रक्षसः बाधकत्वेनरक्षणनिमित्तभूतान् रक्षोरक्षितव्यमस्मादितियास्कः । यातुधानानसुरान् अपसेधन् निराकुर्वन् ॥ हिरण्यहस्तादयोगताः । सुमृळीकः सुष्ठुमृळीकंसुखंयस्यासौतथोक्तः नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । स्ववान् स्वमस्यास्तीतिस्ववान् मादुपधायाइतिवत्वम् संहितायांनकारस्यदीर्घादटिसमानपादेइतिरुत्वम् आतोटिनित्यमितिसानुनासिकआकारः रोर्यत्वम् यलोपश्च । अपसेधन् षिधुगत्यां शपःपित्त्वादनुदात्तत्वम् शतुश्चलसार्वधातुकस्वरेणकृदुत्तरपदप्रकृतिस्वरत्वम् । रक्षसः रक्षपालनेइत्यस्मादपादाने औणादिकःअसिप्रत्ययः यद्वा रक्षन्त्यनेनेतिरक्षोबलं करणेअसुन् तदेषामस्तीतिरक्षस्विनः मत्वर्थप्रत्ययलोपश्छान्दसः प्रत्ययस्वरः । यातुधानान् यतनिकारोपस्कारयोः तस्माण्ण्यन्तादौणादिकोभावेउप्रत्ययः यातवोयातनाएषुधीयन्तइतियातुधानाः अधिकरणे ल्युट् लितीतिप्रत्ययात्पूर्वस्योदात्तत्वम् । अस्थात् गातिस्थेतिसिचोलुक् । प्रतिदोषं दोषांदोषांप्रति वीप्सालक्षणेयथार्थेअव्ययीभावः । गृणानः गृशब्दे कर्मणिलटःशानच् व्यत्ययेनश्ना प्वादीनांह्रस्वइतिह्रस्वत्वं चितइत्यन्तोदात्तत्वम् ॥ १० ॥

१०. सुवर्ण-हस्त, प्राणदाता, सुनेता, हर्षदाता और धनदाता सविता अभिमुख होकर आवें। वे देव, राक्षसों और यातुधानों का निराकरण करके प्रतिरात्रि स्तुति प्राप्त कर अवस्थित हैं।

एकादशीमृचमाह—

येतेपन्थाःसवितःपूर्व्यासोरेणवःसुकृताअन्तरिक्षे ।
तेभिर्नोअद्यपथिभिःसुगेभीरक्षाचनोअधिचब्रूहिदेव ॥११॥७॥

ये । ते । पन्थाः । सवितरिति । पूर्व्यासः । अरेणवः । सुऽकृताः । अन्तरिक्षे । तेभिः । नः । अद्य । पथिऽभिः । सुऽगेभिः । रक्ष । च । नः । अधि । च । ब्रूहि । देव ॥ ११ ॥ ७ ॥

हेसवितःतेतवपन्थामार्गाः पूर्व्यासः पूर्वसिद्धाः अरेणवोधूलिरहिताः अन्तरिक्षेसुकृताः सुष्ठुसम्पादिताः सुगेभिः सुष्ठुगन्तुंशक्यैः तेभिः पथिभिः तैर्मार्गैः आगत्य अद्यास्मिन्दिनेनोस्मान् रक्षच पालनमपिकुरु तथाहेदेव नोस्माननुष्ठातॄन्अधिब्रूहिच देवानामग्रेअधिकत्वेनकथय च ॥ पन्थाः सुपांसुलुगितिजसःसुः पथिमथोःसर्वनामस्थानेइत्याद्युदात्तत्वम् । पूर्व्यासः पूर्वैःकृ-

---

१ नि० ४. १८.

ताः पूर्व्याः पूर्वैःकृतमिनयौचेतियः प्रत्ययस्वरः असुगागमः। अरेणवः नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्। सुकृताः कर्मणिक्तः गतिरनन्तरइतिगतेः प्रकृतिस्वरत्वम्। सुगेभिः सुष्ठुगच्छन्त्येष्वितिसुगाः सुदुरोरधिकरणेइतिगमेर्डप्रत्ययः कृदुत्तरपदप्रकृतिस्वरत्वम् । रक्ष द्व्यचोतस्तिङ इतिसंहितायांदीर्घः ॥ ११ ॥

११. सविता देव! तुम्हारा मार्ग पूर्व-निश्चित, धूलि-रहित और अन्तरिक्ष में सुनिर्मित है। वैसे ही मार्गों से आकर आज हमारी रक्षा करो। देव! हमारी बातें देवों के पास प्रकाश कीजिए।

॥ इतिप्रथमस्यतृतीयेसप्तमोवर्गः ॥ ७ ॥

॥ इतिप्रथमेमण्डलेसप्तमोनुवाकः ॥ ७ ॥

अष्टमेनुवाकेअष्टौसूक्तानि तत्रप्रवोयह्वमितिविंशत्यृचंप्रथमंसूक्तं घोरपुत्रःकण्वऋषिः अयुजोबृहत्यः तृतीयपादस्यद्वादशाक्षरत्वात् युजःसतोबृहत्यःप्रथमतृतीययोःपादयोर्द्वादशाक्षरत्वात् अग्निर्देवता ऊर्ध्वऊष्वित्यादिकेयूपदेवत्ये तथाचानुक्रान्तम् प्रवोविंशतिःकण्वोघौरआग्नेयंप्रागाथमूर्ध्वऊषुयौप्याविति ननूर्ध्वऊष्वित्यादिकयोरप्यग्निदेवतात्वेनभवितव्यंआग्नेयेक्तत्वनयोरनुद्धारात् तथाहिसूत्रेएनावोअग्निंप्रवोयह्वमितिप्रतीकमात्रस्यैवोपादानात् कृत्स्नसूक्तमाग्नेयमितिगम्यते यद्येतेअन्यदेवत्येस्यातां वसिष्ठाहीतिसूक्तयोरुत्तमामुद्धरेदितिवदुद्धारंब्रूयात् न चब्रूते अतःकथंयौप्याविति नैषदोषः यूपाधिष्ठानस्याग्नेःस्तूयमानत्वादनयोरप्यग्निर्देवतेत्याग्नेयेक्तावुद्धारोनकृतः अधिष्ठानप्राधान्यविवक्षयायौप्यावित्येतदपिनविरुध्यते प्रातरनुवाके आग्नेयेक्रतौबार्हतेछन्दसि प्रवोयह्वमितिसूक्तम् अथैतस्यारात्रेर्विवासकालइतिखण्डेसूत्रितम्—एनावोअग्निंप्रवोयह्वमिति ।

तत्रप्रथमामृचमाह—

प्रवो॑य॒ह्वंपु॑रू॒णांवि॒शांदे॑वय॒तीना॑म् ।
अ॒ग्निंसू॒क्तेभि॒र्वचो॑भिरीमहे॒यंसी॒मिद॒न्यई॒ळते ॥१॥

प्र। व॒ः। य॒ह्वम्। पु॒रू॒णाम्। वि॒शाम्। दे॒व॒ऽय॒तीना॑म्। अ॒ग्निम्। सु॒ऽउ॒क्तेभिः। वच॑ःऽभिः। ई॒म॒हे॒। यम्। सी॒म्। इत्। अ॒न्ये। ई॒ळते ॥ १ ॥

हेऋत्विग्यजमानादेवयतीनां देवान्कामयमानानां पुरूणां बहूनां विशांप्रजारूपाणां वोयुष्माकमनुग्रहाययह्वंमहान्तं यह्वः ववक्षिथइतिमहन्नामसुपाठात् अग्निंसूक्तेभिर्वचोभिःसुकरूपैर्वाक्यैःप्रेमहे प्रकर्षेणयाचामहे ईमहेयामीतियाञ्चाकर्मसुपाठात् अन्यइवअन्ये

प्यृषयः यमग्निंसीं सर्वतः ईळतेस्तुवन्तितमग्निमितिपूर्वत्रान्वयः ॥ पूरूणां नामन्यतरस्यामिति नामउदात्तत्वम् । विशां सावेकाचइतिविभक्तेरुदात्तत्वम् । देवयतीनां देवानात्मनइच्छन्त्यो-देवयन्त्यः सुपआत्मनःक्यच् नच्छन्दस्यपुत्रस्येति ईत्वस्येवदीर्घस्यापिप्रतिषेधः अश्वाघस्या-दितिपुनरात्वविधानाज्ज्ञापकात् क्यजन्तात्लटःशतृ कर्तरिशप् शपःपित्त्वादनुदात्तत्वम् शतुश्च लसार्वधातुकस्वरेणक्यचासहैकादेशउदात्तेनोदात्तइतिशतुरुदात्तत्वम् उगितश्चेतिङीप् अ-नित्यमागमशासनमितिवचनान्नुमभावः एकादेशस्वरस्यपूर्वत्रासिद्धत्वंनेष्यतइतिवचनाच्छ-तुरुदात्तत्वंसिद्धमेवेतिशतुरनुमइतिनद्याउदात्तत्वम् । सूक्तेभिः वचेः क्तिच्क्तौचसंज्ञायामिति क्तः थाथादिनोत्तरपदान्तोदात्तत्वम् । ईळते ईडस्तुतौ अदादित्वाच्छपोलुक् अनुदात्तेत्त्वाल्लसा-र्वधातुकानुदात्तत्वेधातुस्वरः यद्वृत्तयोगादनिघातः ॥ १ ॥

१. तुम लोग बहु-संख्यक प्रजा हो; तुम लोग देवता की कामना करते हो; तुम लोगों के लिए, सूक्त-वाक्य-द्वारा, महान् अग्नि की हम प्रार्थना करते हैं। अन्य ऋषि लोग भी उन्हीं अग्नि की स्तुति करते हैं।

जनांसोअग्निंदधिरेसहोवृधंहविष्मन्तोविधेमते ।
सत्वंनोअद्यसुमनांइहाविताभवावाजेषुसन्त्य ॥ २ ॥

जनांसः । अग्निम् । दधिरे । सहःऽवृधम् । हविष्मन्तः । विधेम । ते । सः । त्वम् । नः । अद्य । सुऽमनाः । इह । अविता । भव । वाजेषु । सन्त्य ॥ २ ॥

जनासः अनुष्ठातारोजनाः सहोवृधं बलस्यवर्धयितारमग्निंदधिरेधृतवन्तः हविष्मन्तः हविर्यु-क्तावयं हेअग्नेतेत्वांविधेमपरिचरेम विधतिःपरिचरणकर्मा विधेमसपर्यतीतिपरिचरणकर्मसुपठि-तत्वात् वाजेष्वन्नेषुसन्त्यदानशीलहेअग्नेसत्वमद्यास्मिन्दिने इहकर्मणिनोस्मान् प्रतिसुमनाः शो-भनमनस्कः अवितारक्षिताभव॥सहोवृधं वृधुवृद्धौ अस्मादन्तर्भावितण्यर्थात्क्विप्कृदुत्तरपदम-कृतिस्वरत्वम् ।हविष्मन्तः तसौमत्वर्थेइतिभत्वेनपदत्वाभावाद्रुत्वाद्यभावः । विधेम विधविधाने तुदादित्वाच्छः । सुमनाः शोभनंमनोयस्यासौसुमनाः सोर्मनसीअलोमोषसीइत्युत्तरपदाद्युदात्त-त्वम् । भव पादादित्वात्तिङ्ङतिङइतिनिघाताभावः द्व्यचोतस्तिङ इतिसंहितायांदीर्घः । सन्त्य षणुदाने क्तिचि तितुत्रेत्यादिनाइट्प्रतिषेधः नक्तिचिदीर्घश्चेतिअनुनासिकलोपदीर्घयोर्निषेधः स-न्तिर्दानं तत्रभवःसन्त्यः भवेछन्दसीतियत् ॥ २ ॥

२. अनुष्ठाता लोगों ने बल-वर्द्धन-कारी अग्नि को धारण किया था। अग्निदेव ! हम हव्य लेकर तुम्हारी परिचर्या करते हैं। तुम अन्न-दान में तत्पर होकर आज इस अनुष्ठान में हमारे प्रति सुप्रसन्न होकर हमारे रक्षक बनो।

१ नि० २.१०.।

तृतीयामृचमाह—

प्रत्वांदूतंवृणीमहेहोतांरंविश्ववेदसम् ।
महस्तेंसतोविचंरन्त्यर्चयोदिविस्पृशन्तिभानवः ॥ ३ ॥

प्र । त्वा । दूतम् । वृणीमहे । होतांरम् । विश्वऽवेंदसम् । महः । ते । सतः । वि । चरन्ति । अर्चयः । दिवि । स्पृशन्ति । भानवः ॥ ३ ॥

हेअग्ने होतारंहोमनिष्पादकंआह्वातारंवाविश्ववेदसंसर्वज्ञंदूतंदेवानांदूत्येप्रवृत्तंअग्निर्वैदेवानां दूतआसीदितिश्रुत्यन्तराव् । तादृशंत्वांप्रवृणीमहे प्रकर्षेणवरणंकुर्मः महोमहतःसतोनित्यंवर्तमानस्यतेतवअर्चयोदीप्तयः विचरन्तिविविधंप्रचरन्ति भानवःत्वदीयारश्मयोदिविद्युलोकेस्पृशन्ति तत्रत्यान्प्राणिनःप्रकाशयन्तीत्यर्थः ॥ विश्ववेदसं विश्वानिवेत्तीतिविश्ववेदाः असुन् मरुद्धादित्वात्पूर्वपदान्तोदात्तत्वम् यद्वा वेदइतिधननाम विश्वंवेदोधनंयस्य बहुव्रीहौविश्वंसंज्ञायामितिपूर्वपदान्तोदात्तत्वम् । महः महपूजायां क्विप्चेतिक्विप् सावेकाचइतिङसउदात्तत्वम् यद्वा महशब्देअच्छब्दलोपश्छान्दसः । सतः अस्तेःशतरिश्नसोरल्लोपइत्यकारलोपः शतुरनुमइतिविभक्तेरुदात्तत्वम्। दिवि ऊडिदमितिविभक्तेरुदात्तत्वम् ॥ ३ ॥

३. अग्नि ! तुम देवताओं के होता और सर्वज्ञ हो। हम तुम्हें वरण करते हैं। तुम महान् और नित्य हो। तुम्हारी दीप्ति विस्तृत होती है । तुम्हारी किरण आकाश छूती है।

देवासंस्त्वावरुणोमित्रोअर्यमासन्दूतंप्रत्नमिन्धते ।
विश्वंसोअग्नेजयतित्वयाधनंयस्तेंददाशमर्त्यः ॥ ४ ॥

देवासः । त्वा । वरुणः । मित्रः । अर्यमा । सम् । दूतम् । प्रत्नम् । इन्धते । विश्वम् । सः । अग्ने । जयति । त्वया । धनम् । यः । ते । ददाश । मर्त्यः ॥ ४ ॥

हेअग्ने वरुणादयः त्रयोदेवासः देवाःप्रत्नंपुरातनंदूतंत्वात्वांसमिन्धतेसम्यक्दीपयन्ति योमर्त्योमनुष्योयजमानस्तेतुभ्यंददाशहविर्दत्तवान् सयजमानस्त्वयासहायभूतेनविश्वंसर्वंधनंजयति॥ अर्यमा अर्यान् मिमीतइत्यर्यमा श्वन्नुक्षन्नित्यादिनाकनिन्प्रत्ययान्तोनिपातितः । इन्धते ञिइन्धीदीप्तौ अस्माल्लटिझस्यादादेशेश्नम्श्नान्नलोपः श्नसोरल्लोपइत्यकारलोपः । ददाश दाशृदाने लिटिणलि लित्स्वरेणप्रत्ययात्पूर्वस्याकारस्योदात्तत्वम् यद्वृत्तयोगादनिघातः ॥ ४ ॥

४. अग्नि ! तुम प्राचीन दूत हो। वरुण, मित्र और अर्यमा तुम्हें भली भाँति दीप्तिमान् करते हैं। जो मनुष्य तुम्हें हविर्दान करता है, वह तुम्हारी सहायता से समस्त धन विजय करता है।

पञ्चमीमृचमाह—

मन्द्रोहोतागृहपतिरग्नेदूतोविशामसि ।
त्वेविश्वासंगतानिव्रताध्रुवायानिदेवाअकृण्वत ॥ ५ ८ ॥

मन्द्रः । होता । गृहऽपतिः । अग्ने । दूतः । विशाम् । असि । त्वे इति ।
विश्वा । सम्ऽगतानि । व्रता । ध्रुवा । यानि । देवाः ।अकृण्वत॥५॥८॥

हेअग्ने त्वंमन्द्रोहर्षहेतुः होतादेवानामाह्वाता विशांयजमानरूपाणांप्रजानांगृहपतिः गृहस्यपालकोदूतोदेवदूतोसि त्वेत्वयिविश्वानिव्रता सर्वाणिकर्माणिसङ्गतानि व्रतंकर्ववरमितिकर्मनाम-सुव्रतशब्दःपठितः पृथिव्यादयोदेवाः ध्रुवास्थिराणियानिकर्माणिअकृण्वत कृतवन्तः पृथिवीधारयतिपर्जन्योवर्षति सूर्यःप्रकाशयति तान्येतानित्वयिसङ्गतानीतिपूर्वत्रान्वयः ॥ गृहपतिः पत्यावैश्वर्येइतिपूर्वपदप्रकृतिस्वरत्वम् । त्वे सुपांसुलुगितिसप्तम्येकवचनस्यशेआदेशः त्वमावेकवचने इतिमपर्यन्तस्यत्वादेशः शेषेलोपइतिटिलोपपक्षेउदात्तनिवृत्तिस्वरेणविभक्तेरुदात्तत्वम् अन्त्यलोप-पक्षेतुएकादेशस्वरेण । सङ्गतानि गमेःकर्मणिनिष्ठायामेकाचइतीट्प्रतिषेधः अनुदात्तोप-देशेत्यादिनाअनुनासिकलोपः गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम् । व्रताध्रुवेत्युभयत्र शेर्लोपः । अकृण्वत कृविहिंसाकरणयोश्च व्यत्ययेनात्मनेपदम् इदित्वान्नुम् धिन्विकृण्व्योरचेत्युप्रत्ययः॥५॥

५. अग्नि! तुम हर्षदाता हो। तुम देवों को बुलाओ। तुम प्रजाओं के गृहपति हो। तुम देवों के दूत हो । सूर्य, पर्जन्य, पृथिवी आदि देवता जो सब अमोघ व्रत करते हैं, वे सब तुममें सम्मिलित हो जाते हैं।

इतिप्रथमस्यतृतीयेष्टमोवर्गः ॥ ८ ॥

षष्ठीमृचमाह—

त्वेइदग्नेसुभगेयविष्ठ्यविश्वमाहूयतेहविः ।
सत्वंनोअद्यसुमनाउतापरंयक्षिदेवान्त्सुवीर्या ॥ ६ ॥

त्वे इति । इत् । अग्ने । सुऽभगे । यविष्ठ्य । विश्वम् । आ ।
हूयते । हविः । सः । त्वम् । नः । अद्य । सुऽमनाः । उत । अपरम् ।
यक्षि । देवान् । सुऽवीर्या ॥ ६ ॥

हेयविष्ठ्ययुवतमाग्ने सुभगेसौभाग्ययुक्तेत्वेइत्त्वय्येवविश्वंसर्वंहविराहूयते सर्वतःप्रक्षिप्य-ते सत्वंनोस्मान्प्रतिसुमनाःशोभनमनस्कोभूत्वा अद्यास्मिन्दिनेउतअपिच अपरंश्वइत्यादिक-मुत्तरं सर्वस्मिन्नपिकालेनैरन्तर्येणसुवीर्याशोभनवीर्योपेतान्देवान्यक्षियज ॥ सुभगे शोभनोभ-

गोयस्येतिबहुव्रीहौआद्युदात्तंद्व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वम्। यविष्ठ्य युवशब्दादिष्ठन् स्थूलदूरेत्यादिनायणादेःपरस्यलोपः पूर्वस्यचगुणः छान्दसोयकारोपजनः । यक्षि बहुलंछन्दसीतिशपोलुक्। सुवीर्या शोभनंवीर्यंयेषां वीरवीर्यौचेत्युत्तरपदाद्युदात्तत्वम् सुपांसुलुगितिविभक्तेराकारः ॥ ६ ॥

६. युवक अग्नि। सौभाग्यशाली हो। तुम्हें लक्ष्य करके सब हव्य दिये जाते हैं। तुम हमारे लिए प्रसन्न-मना होकर आज और कल——सर्वदा शोभनीय वीर्य-शाली देवों का अर्चन करो।

मन्द्रः। होता। गृहऽपतिः। अग्ने। दूतः। विशाम्। असि। त्वे इति। विश्वा। समऽगतानि। व्रता। ध्रुवा। यानि। देवाः।अकृण्वत॥५॥८॥

तंघेमित्थानमस्विनउपस्वराजमासते ।
होत्राभिरग्निंमनुषःसमिन्धतेतितिर्वांसोअतिस्रिधः ॥ ७ ॥

तम्। घ। ईम्। इत्था। नमस्विनः। उप। स्वऽराजम्। आसते। होत्राभिः। अग्निम्। मनुषः। सम्। इन्धते। तितिर्वांसः। अति। स्रिधः॥ ७ ॥

हेअग्ने नमस्विनःअन्नयुक्तानमस्कारयुक्तावा नमः आयुः सूनृतेतिअन्ननामसुपाठाव् नमःशब्दस्यान्नवाचित्वम् तादृशायजमानाः स्वराजंस्वतोदीप्यमानंतंघेम् तमेवपूर्वोक्तंसर्वगुणविशिष्टंत्वां इत्थाअनेनप्रकारेणहविःप्रदानादिरूपेणोपासते मनुषोमनुष्यायजमानाःहोत्राभिःसप्तभिर्वषट्कर्तृभिः सप्तहोत्राःप्राचीर्वषट्कुर्वन्तीतिश्रुत्यन्तराव्। अग्निंत्वांसमिन्धतेसम्यग्दीपयन्ति कीदृशा-मनुष्याः स्रिधः शत्रून् तितिर्वांसः अतिशयेनतरन्तः॥ नमस्विनः अस्मायामेधेतिमत्वर्थीयोविनिः। स्वराजं स्वभासाराजतेइतिस्वराट् सत्सूद्विषेतिक्विप् कृदुत्तरपदप्रकृतिस्वरत्वम्। आसते आसउपवेशने अदादित्वाच्छपोलुक्। तितिर्वांसः तॄप्लवनतरणयोः छन्दसिलिडितिवर्तमाने लिट् क्वसुश्चेतिक्वसुः वस्वेकाजाद्घसामितिनियमादिडभावः ऋतइद्धातोरितीत्त्वम् ऋच्छत्यॄतामितिगुणोहलिचेतिदीर्घत्वंचनभवति संज्ञापूर्वकोविधिरनित्यइतितयोरनित्यत्वाव् यद्वा तिरतिःप्रकृत्यन्तरंद्रष्टव्यम्। स्रिधः स्रिधुशोषणे क्विप्चेतिक्विप् ॥ ७ ॥

७. यजमान लोग नमस्कार-पूर्वक उन स्वयं दीप्तिमान् अग्नि की इसी प्रकार उपासना करते हैं। शत्रु को दृढ़तर पराजय करने की इच्छावाले मनुष्य होत्र लोगों के द्वारा अग्नि को प्रदीप्त करते हैं।

घ्नन्तोवृत्रमतरन्रोदसीअपउरुक्षयायचक्रिरे ।
भुवत्कण्वेवृषाद्युम्न्याहुतःक्रन्ददश्वोगविष्टिषु ॥ ८ ॥

---

१ तै० ब्रा० २. ३. १०.।

घ्नन्तः। वृत्रम्। अतरन्। रोदसी इति। अपः। उरु। क्षयाय। चक्रिरे। भुवत्। कण्वे। वृषा। द्युम्नी। आऽहुतः। क्रन्दत्। अश्वः। गोऽइष्टिषु॥ ८॥

हेअग्ने घ्नन्तः त्वत्सहायेनइतरेदेवाःप्रहरन्तोवृत्रमतरन्तीर्णवन्तः तदनन्तरंरोदसीद्यावापृथिव्यौअपोन्तरिक्षंचक्षयायप्राणिनांनिवासार्थंउरुविस्तारोयथाभवतितथाचक्रिरे अप्शब्दोन्तरिक्षवाची आपःपृथिवीतितन्नामसुपठितत्वात् भवांस्तु कण्वेकण्वनामकेमहर्षौवृषाकामानांवर्षिता द्युम्नी धनवान् आहुतः सर्वतोहोमयुक्तश्चभुवद्भवतु तत्रदृष्टान्तः—गविष्टिषुगोविषयेच्छायुक्तेषुसंग्रामेषुअश्वःक्रन्दत्शब्दंकुर्वन्यथाभीष्टप्रापकस्तथेतिशेषः॥ घ्नन्तः हन्तेःशतरिगमहनेत्यादिनाउपधालोपः होहन्तेर्ञ्णिन्नेष्विितिघत्वम्। अपः ऊडिदमितिशसउदात्तत्वम्। क्षयाय क्षिनिवासगत्योः क्षियन्तिनिवसन्त्यस्मिन्नितिक्षयोनिवासस्थानम् पुंसिसंज्ञायांघःप्रायेणेतिघः क्षयोनिवासेइत्याद्युदात्तत्वम्। भुवत् भवतेर्लेटिअडागमः इतश्चलोपइतीकारलोपः बहुलंछन्दसीतिशपोलुक् भूसुवोस्तिङीतिगुणप्रतिषेधः अडागमस्यानुदात्तत्वेधातुस्वरः। आहुतः आहूयतइत्याहुतः हुदानादनयोः कर्मणिक्तः गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम्। क्रन्दत् कदिक्रदिक्लदिआह्वाने शतरिनुमभावश्छान्दसः अदुपदेशाल्लसार्वधातुकानुदात्तत्वेधातुस्वरः। गविष्टिषु इषइच्छायाम् एषणमिष्टिः गवामिष्टिर्येषुसंग्रामेषु बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्॥ ८॥

८. देवों ने प्रहार करके वृत्र का हनन किया था। दोनों जगत् और अन्तरिक्ष को, रहने के लिए, विस्तृत किया था। अग्नि बलशाली हैं। वे गो-प्राप्ति के लिए संग्राम में हिनहिनाते हुए घोड़े की तरह सर्वतोभाव से आहूत होकर कण्व ऋषि के लिए यथेच्छ द्रव्य वर्षण करें।

प्रवर्ग्येमहावीरेखरेसंसाद्यमानेसंसीदस्वमहाँअसीत्येषा सृष्टोदकमितिखण्डेसूत्रितम्—संसीदस्वमहाँअसीतिसंसाद्यमानइति।

संसीदस्वमहाँअसिशोचस्वदेववीतमः।
विधूममग्नेअरुषंमियेध्यसृजप्रशस्तदर्शतम्॥ ९॥

सम्। सीदस्व। महान्। असि। शोचस्व। देवऽवीतमः। वि। धूमम्। अग्ने। अरुषम्। मियेध्य। सृज। प्रऽशस्त। दर्शतम्॥ ९॥

हेअग्नेसंसीदस्वबर्हिष्युपविश महानसिगुणाधिकोभवसि देववीतमः अतिशयेनदेवान्कामयमानः शोचस्वदीप्यस्व हेमियेध्य मेधार्ह प्रशस्त उत्कृष्टाग्नेअरुषंगमनशीलं दर्शनंदर्शनीयंधूमं

विसृजविशेषेणसम्पादय ॥ सीदस्व षद्लृविशरणगत्यवसादनेषु व्यत्ययेनात्मनेपदम् प्रार्थनायां लोटि शपि पाघ्रेत्यादिनासीदादेशः। महान् संहितायांनकाराकारयोः रुत्वानुनासिकावुकौ। शोचस्व शुचदीप्तौ अदुपदेशाल्लसार्वधातुकानुदात्तत्वेधातुस्वरः तिङःपरत्वान्निघाताभावः। देववीतमः वीगतिव्याप्तिप्रजनकान्त्यसनखादनेषु देवान् वेतिगच्छतीतिदेववीः क्विप्चेतिक्विप् अतिशयेनदेववीः देववीतमः तमपःपित्त्वादनुदात्तत्वेकृदुत्तरपदप्रकृतिस्वरत्वम्। अरुषम् अरोषणम् रुषरिषहिंसायां घञर्थेकविधानमितिभावेकप्रत्ययः नास्तिरुषोस्येतिबहुव्रीहौनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्। मियेध्य छन्दसिचेत्यर्हार्थेयप्रत्ययः मकारात्परइयागमश्छान्दसः। सृज सृजविसर्गे तुदादित्वाच्छः विकरणस्वरः पादादित्वादनिघातः। दर्शतं भृमृदृशीत्यादिना दृशेः कर्मण्यतच्प्रत्ययः ॥ ९ ॥

९. प्रशस्त अग्निदेव! बैठो। तुम बड़े हो; देवों की अतिशय कामना करो। तुम दीप्ति-पूर्ण बनो। हे मेधावी और उत्कृष्ट अग्नि! गमनशील और सुदृश्य धूम उत्पन्न करो।

यंत्वादेवासोमनवेदधुरिहयजिष्ठंहव्यवाहन।
यंकण्वोमेध्यातिथिर्धनस्पृतंयंवृषायमुपस्तुतः॥ १० ॥ ९ ॥

यम्। त्वा। देवासः। मनवे। दधुः। इह। यजिष्ठम्। हव्यऽवाहन। यम्। कण्वः। मेध्यऽअतिथिः। धनऽस्पृतम्। यम्। वृषा। यम्। उपऽस्तुतः॥ १० ॥ ९ ॥

हेहव्यवाहनहविषोवाहकाग्ने मनवेमनोरनुग्रहायदेवासः सर्वेदेवाः यजिष्ठंअतिशयेनपूज्यंयष्टृतमंवायंत्वात्वांइहदेवयजनदेशेंदधुः धृतवन्तः मेध्यातिथिः मेध्यैरतिथिभिर्युक्तः कण्वः एतन्नामकोमहर्षिः यंत्वांधनस्पृतंधनेनप्रीणयितारंकृत्वादधेइतिशेषः तथावृषेन्द्रोयंत्वांदधेतथा उपस्तुतः अन्योपिस्तोतायजमानोयंत्वांदधेसत्वंसंसीदस्वेतिपूर्वत्रान्वयः ॥ दधुः लिट्युसिकित्त्वे आतोलोपइटिचेत्याकारलोपः प्रत्ययस्वरः। यजिष्ठं यष्टृशब्दात् तुश्छन्दसीत्यगुणवचनादप्यातिशायनिकइष्ठन् तुरिष्ठेमेयःस्वितितृलोपः नित्त्वादाद्युदात्तत्वम्। हव्यवाहन हव्यंवहतीतिहव्यवाहनः हव्येनन्तःपादमितिवहतेर्ञ्युट्। मेध्यातिथिः मेध्याअतिथयोयस्येतिबहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्। धनस्पृतं धनैरस्मान्स्पृणोतिप्रीणयतीतिधनस्पृत् स्पृप्रीतिबलयोः क्विप्चेतिक्विप् तवस्तुक् कृदुत्तरपदप्रकृतिस्वरत्वम्। उपस्तुतः क्तिच्क्तौचसंज्ञायामितिकर्तरिक्तः थाथादिनाउत्तरपदान्तोदात्तत्वम् ॥ १० ॥

१०. हव्यवाही अग्नि। तुम अत्यन्त पूजा-पात्र हो। सारे देवों ने, मनु के लिए, तुम्हें इस यज्ञ-स्थान में धारण किया था। तुम धन-द्वारा प्रीति सम्पादन करो। कण्व ने पूजा-पात्र अतिथि के साथ तुम्हें धारण किया है। वर्षाकारी इन्द्र ने तुम्हें धारण किया है। अन्यान्य स्तुतिकारकों ने भी तुम्हें धारण किया है।

एकादशीमृचमाह—

यम॒ग्निं मेध्या॑तिथि॒ः कण्व॑ ई॒ध ऋ॒तादधि॑ ।
तस्य॒ प्रेषो॑ दीदियु॒स्तमि॒मा ऋ॒च॒स्तम॒ग्निं व॑र्धयामसि ॥ ११ ॥

यम् । अ॒ग्निम् । मेध्य॑ऽअतिथिः । कण्व॑ः । ई॒धे । ऋ॒तात् । अधि॑ । तस्य॑ । प्र । इष॑ः । दी॒दि॒यु॒ः । तम् । इ॒माः । ऋच॑ः । तम् । अ॒ग्निम् । व॒र्धया॒म॒सि॒ ॥ ११ ॥

मेध्यातिथिः यागयोग्याअतिथयः ऋत्विग्रूपायस्यतादृशः कण्वऋषिः ऋतादधिआदित्यादध्याहृत्ययमग्निमीधेदीप्तवान् तस्याग्नेरिषोगमनस्वभावारश्मयः प्रदीदियुः प्रकर्षेणदीप्यन्ते तथातमग्निमिमाअस्माभिःप्रयुज्यमानाऋचोवर्धयन्तीतिशेषः वयमपितमग्निंवर्धयामसिस्तोत्रैर्वर्धयामः ॥ ईधे ञिइन्धीदीप्तौ इन्धिभवतिभ्यांचेतिलिटःकित्त्वादनिदितामितिनकारलोपः द्विर्भावहलादिशेषयोःकृतयोःसवर्णदीर्घः प्रत्ययस्वरः यद्वृत्तयोगादनिघातः । इषः इषगतौ इष्यन्तिगच्छन्तीतिइषोरश्मयः। दीदियुः दीदेतिश्छान्दसोधातुर्दीप्तिकर्मा लिटःउसि इयङादेशः एरनेकाचइतियणादेशाभावश्छान्दसः । वर्धयामसि इदन्तोमसिरितिमसइकारागमः ॥ ११॥

११. पूजार्ह और अतिथि-प्रिय कण्व ने अग्नि को आदित्य से भी अधिक दीप्तिमान् किया है। उन्हीं अग्नि की गति-विशिष्ट किरण दीप्तिमान् हैं। ये ऋचायें उन अग्नि को वर्द्धित करती हैं; हम भी परिवर्द्धित करते हैं।

द्वादशीमृचमाह—

रा॒यस्पू॒र्धि स्व॑धा॒वोऽस्ति॒ हि तेऽग्ने॑ दे॒वेष्वाप्य॑म् ।
त्वं वाज॑स्य॒ श्रुत्य॑स्य राजसि॒ स नो॑ मृळ म॒हाँ अ॑सि ॥ १२ ॥

रा॒यः । पू॒र्धि । स्व॒धा॒ऽवः॒ । अस्ति॑ । हि । ते॒ । अग्ने॑ । दे॒वेषु॑ । आ॒प्य॑म् । त्वम् । वाज॑स्य । श्रुत्य॑स्य । रा॒ज॒सि॒ । सः । नः॒ । मृ॒ळ । म॒हान् । अ॒सि॒ ॥ १२ ॥

हेस्वधावः अन्नवन्नग्ने स्वधाअर्कइतितन्नामसुपाठात् अस्माकंरायोधनानिपूर्धिपूरयदेहि वा पूर्धिपूरयदेहीतिवाइतियास्कः[1] । हेअग्ने तेतवदेवेषुआप्यं प्रापणीयंसख्यमस्तिहिविद्यतेखलु त्वंश्रुत्यस्यश्रवणीयस्यवाजस्यान्नस्यराजसिईश्वरोभवसि सत्वं नोस्मान्मृळसुखय महान्गुणैरधिकोसि ॥ रायः ऊडिदमित्यादिनाविभक्तेरुदात्तत्वम्। पूर्धि पृपालनपूरणयोः श्रुशृणुपृकृवृभ्यश्छन्दसिइतिहेर्धिरादेशः बहुलंछन्दसीतिशपोलुक् हेरपित्त्वेनङित्त्वाद्गुणाभावे उदोष्ठ्यपूर्वस्ये-

१ नि० ४. ३.

त्युत्त्वम् हलिचेतिदीर्घः। स्वधावः संबुद्धौमतुवसोरितिरुत्वम्। आप्यं अदुपधत्वाभावेपिण्यत्ययेन पोरदुपधादितिकर्मणियत् यतोनावइत्याद्युदात्तत्वम् यद्वा ण्यतिछान्दसमाद्युदात्तत्वम्। श्रुत्यस्य श्रुश्रवणे औणादिकःक्यप् तुगागमः यद्वा श्रुतिशब्दात् भवेछन्दसीतियत्। मृळ मृडसुखने शस्यङित्त्वाल्लघूपधगुणाभावः॥ १२॥

१२. हे अन्न-युक्त अग्नि! हमारे धन की पूर्ति करो। तुम्हारे द्वारा देवों की मित्रता मिलती है। तुम प्रसिद्ध अन्न के स्वामी हो। तुम महान् हो। हमें सुखी करो।

यूपोच्छ्रयणे ऊर्ध्वऊषुणऊतयइतिद्वे पशाविष्टिरितिखण्डेसूत्रितम्। ऊर्ध्वऊषुणइतिद्वेइति एतेएवाभिष्टवेपिविनियुक्ते अथोत्तरमितिखण्डेसूत्रितम्—सखेसखायमभ्याववृत्स्वोर्ध्वऊषुणऊतयइतिद्वेइति।

ऊर्ध्वऊषुणंऊतयेतिष्ठादेवोनसविता।
ऊर्ध्वोवाजस्यसनितायदञ्जिभिर्वाघद्भिर्विह्वयामहे॥ १३॥

ऊर्ध्वः। ऊम् इति। सु। नः। ऊतये। तिष्ठ। देवः। न।
सविता। ऊर्ध्वः। वाजस्य। सनिता। यत्। अञ्जिऽभिः।
वाघत्ऽभिः। विऽह्वयामहे॥ १२॥

हेयूप यद्वा यूपात्मकदारुनिष्ठाग्ने नोस्माकमूतयेरक्षणायऊर्ध्वउन्नतस्तिष्ठ तत्रदृष्टान्तः—सविता देवोन यथासूर्योदेवउन्नतस्तिष्ठतितद्वत् ऊर्ध्वउन्नतः सन्वाजस्यान्नस्यसनितादाताभविष्यसि यद्यस्मात्कारणादञ्जिभिः आज्येनयूपमञ्जद्भिः वाघद्भिर्यज्ञंवहद्भिर्ऋत्विग्भिःसहविह्वयामहे अन्नदानायत्वांविशेषेणाह्वयामः तस्मादन्नस्यदाताभवेतिपूर्वत्रान्वयः॥ ऊषुणः इकःसुञीतिसंहितायां दीर्घःसुञइतिषत्वं नश्चधातुस्थोरुषुभ्यइतिणत्वम्। ऊतये अवतेःक्तिनि ज्वरत्वरेत्यादिनाऊठ् ऊतियूतीत्यादिनाक्तिनउदात्तत्वम्। तिष्ठ शपि पाघ्रेत्यादिनातिष्ठादेशः द्व्यचोतस्तिङइतिसंहितायांदीर्घः। वाजस्य क्रियाग्रहणंकर्तव्यमितिकर्मणःसंप्रदानत्वाच्चतुर्थ्यर्थेषष्ठी। सनिता षणुदाने लुटि तासि वलादिलक्षणइट् तिपोडादेशः टिलोपः उदात्तनिवृत्तिस्वरेणतिबादेशस्योदात्तत्वेप्राप्ते तास्यनुदात्तेदितितस्यानुदात्तत्वम् धातुस्वरः नलुडितिनिघातप्रतिषेधः। अञ्जिभिः अञ्जूव्यक्तिम्रक्षणकान्तिगतिषु खनिकष्यञ्जीत्यादिनाइप्रत्ययः। विह्वयामहे निसमुपविभ्योह्वइत्यकर्त्रभिप्रायेप्यात्मनेपदम् अदुपदेशाल्लसार्वधातुकानुदात्तत्वेधातुस्वरः तिङ्ङिचोदात्तवतीतिगतेरनुदात्तत्वम् यद्वृत्तयोगादनिघातः॥ १३॥

१३. हमारी रक्षा के लिए सूर्य की तरह उन्नत बनो। उन्नत होकर अन्नदाता बनो; क्योंकि विलक्षण यज्ञ-सम्पादक लोगों के द्वारा हम तुम्हें आह्वान करते हैं।

चतुर्दशीमृचमाह—

ऊर्ध्वोनःपाह्यंहसोनिकेतुनाविश्वंसमत्रिणंदह।
कृधीनऊर्ध्वाञ्चरथायजीवसेविदादेवेषुनोदुवः ॥ १४ ॥

ऊर्ध्वः । नः । पाहि । अंहसः । नि । केतुना । विश्वम् । सम् । अत्रिणम् । दह । कृधि । नः । ऊर्ध्वान् । चरथाय । जीवसे । विदाः । देवेषु । नः । दुवः ॥ १४ ॥

हेयूप यद्वा तन्निष्ठाग्ने ऊर्ध्वउन्नतःसन् नोस्मान्केतुनाज्ञानेनअंहसःपापात्निपाहिनितरां पालय विश्वमत्रिणंसर्वमत्तारंभक्षकंराक्षसंसन्दहसम्यक्भस्मीकुरु नोस्मानूर्ध्वानुन्नतान्कृधिकुरु किमर्थं चरथायलोकेचरणाय जीवसेजीवनायचनोस्माकंदुवोधनंचहविःस्वरूपंदेवेषुविदाः लंभय ॥ अत्रिणं अदभक्षणे अदेस्त्रिनिश्चेतिऔणादिकस्त्रिनिप्रत्ययः यद्वा अदतस्त्रायन्तइत्यत्राः आतोनुपसर्गेकइतिकः अतोमत्वर्थीयइनिः कृधि श्रुशृणुपृकृवृभ्यश्छन्दसीतिहेर्धिरादेशः बहुलंछन्दसीतिविकरणस्यलुक् अन्येषामपिदृश्यतइतिसंहितायांदीर्घः ।ऊर्ध्वान् उभयथर्क्ष्वितिविकल्पविधानान्नश्छव्यप्रशानितिनकारस्यरुत्वाभावः। चरथाय चरेरौणादिकोभावेअथप्रत्ययः। जीवसे जीवप्राणधारणे तुमर्थेसेसेनित्यसेप्रत्ययः । विदाः विद्लृलाभे अस्मादन्तर्भावितण्यर्थात् लेटिसिपि लेटोडाटावित्याडागमः तुदादित्वाच्छः शेमुचादीनामितिनुमप्रसक्ति अनित्यमागमशासनमितिवचनेनतस्यानित्यत्वात् इतश्चलोपइतीकारलोपः आगमानुदात्तत्वेविकरणस्वरः ॥ १४॥

१४. उन्नत होकर हमें, ज्ञान द्वारा, पाप से बचाओ। सब राक्षसों को जलाओ। हमें उन्नत करो, जिससे हम संसार में विचरण कर सकें। इसी प्रकार हमारा हव्य-रूप धन देवों के गृहों में ले जाओ, जिससे हम जीवित रह सकें।

पञ्चदशीमृचमाह—

पाहिनोअग्नेरक्षसःपाहिधूर्तेररांव्णः।
पाहिरीषतउतवाजिघांसतोबृहद्भानोयविष्ठ्य ॥ १५ ॥

पाहि । नः । अग्ने । रक्षसः । पाहि । धूर्तेः । अरांव्णः । पाहि । रिषतः । उत । वा । जिघांसतः । बृहद्भानो इति बृहत्ऽभानो । यविष्ठ्य ॥ १५ ॥ १० ॥

हेअग्ने हेबृहद्भानो बृहन्तोभानवोयस्यतादृशहेयविष्ठयुवतमाग्ने नोस्मान्रक्षसः बाधकाद्राक्षसादेः पाहिपालय तथा अराव्णः धनादीनामदातृरूपाद्धूर्तेर्हिंसकात्पाहि तथा रिषतोर्हिंसकात् व्याघ्रादेःसकाशात्पाहि उतवाअथवा जिघांसतोहन्तुमिच्छतःशत्रोःसकाशात्पाहि ॥ धूर्तेः धुर्वीर्हिंसार्थः क्तिच्क्तौचसंज्ञायामितिकर्तरिक्तिच् तितुत्रेत्यादिनाइट्प्रतिषेधः राल्लोपइतिवकारलोपः हलिचेतिदीर्घत्वम्। अराव्णः रादाने आतोमनिन्नित्यादिनावनिप् नञ्समासेअव्ययपूर्वपदप्रकृतिस्वरत्वम् पञ्चम्येकवचने अल्लोपोनइत्यनोकारस्यलोपः । रिषतः रिषहिंसायाम् लटःशतृ बहुलंछन्दसीतिशपोलुक् प्रत्ययस्वरेप्राप्तेव्यत्ययेनाद्युदात्तत्वम्। जिघांसतः हन्तेरिच्छार्थेसनि अज्झनगमांसनीतिउपधादीर्घत्वम् अभ्यासाच्चेत्यभ्यासादुत्तरस्यहकारस्यघत्वम् सन्यतइतीत्वम् अदुपदेशाल्लसार्वधातुकानुदात्तत्वेसनोनित्त्वान्नित्स्वरेणपदस्याद्युदात्तत्वम्। बृहद्भानो आमन्त्रितस्यचेतिषाष्ठिकमाद्युदात्तत्वम् पादादित्वादाष्टमिकनिघाताभावः। यविष्ठय स्थूलदूरेत्यादिनायणादिपरस्यलोपः पूर्वस्यचगुणः यकारोपजनश्छान्दसः ॥ १५ ॥

१५. हे विशाल किरणवाले युवक अग्नि! हमें राक्षसों से बचाओ। धन-दान न करनेवाले धूर्त्त से हमारी रक्षा करो। हिंसक पशु से हमारी रक्षा करो। हननेच्छ शत्रु से हमारी रक्षा करो।

इतिप्रथमस्यतृतीयेदशमोवर्गः ॥ १० ॥

षोडशीमृचमाह—

घनेवविष्वग्विजह्यराव्णस्तपुर्जंभयोअस्मध्रुक्।
योमर्त्यःशिशीतेअत्यक्तुभिर्मानःसरिपुरीशत ॥ १६ ॥

घनाऽइव। विष्वंक्। वि। जहि। अराव्णः। तपुःऽजम्भ। यः। अस्मऽध्रुक्। यः। मर्त्यः। शिशीते। अति। अक्तुऽभिः। मा। नः। सः। रिपुः। ईशत ॥ १६ ॥

हेतपुर्जंभ तप्यमानरश्मियुक्ताग्ने अराव्णः अस्मभ्यंदेयस्यधनस्यअदातॄन्वैरिणः विष्वक्सर्वतोविजहिविशेषेणमारय तत्रदृष्टान्तः—घनाइव यथाकठिनेनदण्डपाषाणादिनाभाण्डादिभङ्गं करोतितद्वत् योन्योपिरिपुरस्मध्रुक् अस्मद्विषयद्रोहकारी भर्त्सनादिनाबाधतेयश्चान्योमर्त्यः मनुष्यःशत्रुरक्तुभिरायुधैरतिशिशीतेतनूकरोति अस्मान्प्रहरतीत्यर्थः सरिपुःभर्त्सनप्रहारकारीद्विविधोपिशत्रुर्नोस्मान् प्रतिमेशत ईश्वरःशक्तोमाभूत् ॥ घनाइव सुपांसुलुगितितृतीयायाडादेशः। जहि हन्तेर्लोटि हौ हन्तेर्जादेशः तस्यासिद्धत्वात् हेर्लुगभावः। तपुर्जंभ तपसंतापे औणादिकःकरणेउसिन्प्रत्ययान्तस्तपुस्शब्दोनित्त्वादाद्युदात्तः जभनाशने जंभ्यन्तेशत्रवएभिरितिजंभान्यायुधानि करणेघञ् तपूंष्येवजम्भानियस्यासौतपुर्जम्भः आमन्त्रिताद्युदात्तत्वम्। अस्मध्रुक् द्रुहजिघां-

सायां सत्सूद्विषेत्यादिनाक्विप् वाद्रुहमुहष्णुहष्णिहामितिहकारस्यघत्वम् भष्भावः । शिशीति शीतनूकरणे व्यत्ययेनात्मनेपदम् बहुलंछन्दसीतिविकरणस्यश्लुः आदेचइत्यात्त्वम् ततोद्विर्वचने बहुलंछन्दसीत्यभ्यासस्येत्वम् ईहल्यघोरितीत्वम् व्यत्ययेनाद्युदात्तत्वम् यद्वृत्तयोगादनिघातः। ईशत लङि बहुलंछन्दसीतिशपोलुगभावः नमाङ्योगेइत्याडागमाभावः ॥ १६ ॥

१६. हे उत्तप्त किरणवाले अग्निदेव ! जिस तरह हम लोग कड़े दण्ड-द्वारा भाँड आदि नष्ट करते हैं, उसी तरह धन-दान न करनेवालों का सदा संहार करो।

अ॒ग्निर्व॑व्ने सु॒वीर्य॑म॒ग्निः कण्वा॑य॒ सौभ॑गम् ।
अ॒ग्निः प्राव॑न्मि॒त्रोत मेध्या॑तिथिम॒ग्निः सा॒ता उ॑पस्तु॒तम् ॥ १७ ॥

अ॒ग्निः । व॒व्ने । सु॒ऽवीर्य॑म् । अ॒ग्निः । कण्वा॑य । सौभ॑गम् । अ॒ग्निः । प्र । आ॒व॒त् । मि॒त्रा । उ॒त । मेध्य॑ऽअतिथिम् । अ॒ग्निः । सा॒तौ । उ॒प॒ऽस्तु॒तम् ॥ १७ ॥

अग्निर्देवः सुवीर्यंशोभनवोर्योपेतंधनमुद्दिश्यवव्नेयाचितःसोग्निः कण्वायमहर्षयेसौभगंशोभनधनादिरूपंभाग्यंप्रायच्छदितिशेषः तथा मित्राअस्मन्मित्राणिप्रावत् प्रकर्षेणरक्षितवान् उत अपिच मेध्यातिथिंमेधयोग्यैरतिथिभिरुपेतंऋषिंप्रावत् तथाउपस्तुतंअन्यमपिस्तोतारंयजमानंसातौधनादिदाननिमित्तंप्रावदितिशेषः॥ वव्ने वनुयाचने कर्मणिलिट् नशसददवादिगुणानामित्येत्वाभ्यासलोपयोःप्रतिषेधः उपधालोपश्छान्दसः। सौभगं सुभगान्मन्त्रेइत्युद्गात्रादिषुपाठात्तस्यभावइत्येतस्मिन्नर्थेअञ् ञित्वादाद्युदात्तत्वम्। मित्रा शेश्छन्दसिबहुलमितिशेर्लोपः। उपस्तुतम् क्तिच्क्तौचसंज्ञायामितिस्तौतेःकर्तरिक्तः थाथादिना उत्तरपदान्तोदात्तत्वम् ॥ १७ ॥

१७. सुशोभन वीर्य के लिए अग्नि की याचना की जाती है। अग्नि ने कण्व को सौभाग्य-दान किया। अग्नि ने हमारे मित्रों की रक्षा की। अग्नि ने पूजा-पात्र और अतिथि-संयुक्त ऋषि की रक्षा की। इसी प्रकार धनादि दान के लिए जिस-किसी ने अग्नि की स्तुति की, उसकी अग्नि ने रक्षा की।

अ॒ग्निना॑ तु॒र्वशं॒ यदुं॑ परा॒वत॑ उ॒ग्रादे॑वं हवामहे ।
अ॒ग्निर्न॑य॒न्नव॑वास्त्वं बृ॒हद्र॑थं तु॒र्वीतिं॒ दस्य॑वे॒ सहः॑ ॥ १८ ॥

अ॒ग्निना॑ । तु॒र्वश॑म् । यदु॑म् । प॒रा॒ऽवतः॑ । उ॒ग्रऽदे॑वम् । ह॒वा॒म॒हे॒ । अ॒ग्निः । न॒य॒त् । नव॑ऽवास्त्वम् । बृ॒हत्ऽर॑थम् । तु॒र्वीति॑म् । दस्य॑वे । सहः॑ ॥ १८ ॥

अग्निनासहावस्थितान् तुर्वशनामकंयदुनामकंउग्रदेवनामकंचराजर्षीन् परावतोदूरदेशाव् हवामहे आह्वयामः सचाग्निः नववास्त्वनामकंबृहद्रथनामकंतुर्वीतिनामकंचराजर्षीन्नयत्इहानयतु कीदृशोग्निः दस्यवेसहःअस्मदुपद्रवहेतोश्चौरस्याभिभविता॥ नयत् णीञ्प्रापणे लेट्यडागमः इतश्चलोपइतीकारलोपः। नववास्त्वं नववास्तुयस्यासौनववास्तुः वाछन्दसीत्यनुवृत्तेरमिपूर्वत्वाभावेयणादेशः। बृहद्रथं बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्॥ १८॥

१८. चोरों का दमन करनेवाले अग्नि के साथ तुर्वश, यदु और उग्रादेव को दूर देश से हम बुलाते हैं। वह अग्नि नवास्त्व, बृहद्रथ और तुर्वीति को इस स्थान पर बुलावे।

नित्वामग्नेमनुर्दधेज्योतिर्जनायशश्वते।
दीदेथकण्वऋतजातउक्षितोयंनमस्यन्तिकृष्टयः॥ १९॥

नि। त्वाम्। अग्ने। मनुः। दधे। ज्योतिः। जनाय। शश्वते।
दीदेथ। कण्वे। ऋतऽजातः। उक्षितः। यम्। नमस्यन्ति।
कृष्टयः॥ १९॥

हेअग्नेज्योतिःप्रकाशरूपंत्वांशश्वतेबहुविधायजनायमनुःप्रजापतिर्निदधेदेवयजनदेशेस्थापितवान् हेअग्नेत्वंऋतजातः ऋतेनयज्ञेननिमित्तभूतेनोत्पन्नः उक्षितोहविर्भिस्तर्पितःसन् कण्वेएतन्नामकेमहर्षौदीदेथदीप्तवानसि यमग्निंकृष्टयोमनुष्याः कृष्टयःचर्षणयइतिमनुष्यनामसुपठितत्वात् नमस्यन्तिनमस्कुर्वन्ति सत्वमितिपूर्वत्रान्वयः॥ दीदेथ दीदेतिश्छान्दसोदीप्तिकर्मा थलिद्विर्वचनप्रकरणेछन्दसिवेतिवक्तव्यमितिद्विर्वचनाभावः अनित्यमागमशासनमितिवचनादिडभावः लित्स्वरेणप्रत्ययात्पूर्वस्योदात्तत्वम्। ऋतजातः ऋतेनजन्यतइतिऋतजातः श्वीदितोनिष्ठायामितीट्प्रतिषेधः जनसनेत्यादिनाआत्वम् तृतीयापूर्वपदप्रकृतिस्वरत्वम्। नमस्यन्ति नमोवरिवइतिपूजार्थेक्यच् अदुपदेशाल्लसार्वधातुकानुदात्तत्वेक्यजन्तधातुस्वरः। कृष्टयः कृषविलेखने क्तिच्कौचसंज्ञायामितिक्तिच्॥ १९॥

१९. अग्नि! तुम ज्योतिःस्वरूप हो। मनु ने विविध जातियों के मनुष्यों के लिए तुम्हें स्थापित किया था। अग्निदेव! तुम यज्ञ के लिए उत्पन्न होकर और हव्य-द्वारा तृप्त होकर कण्व के प्रति प्रकाशमान हुए हो। मनुष्य तुम्हें नमस्कार करते हैं।

त्वेषासोअग्नेरमवन्तोअर्चयोभीमासोनप्रतीतये।
रक्षस्विनःसदमिद्यातुमावतोविश्वंसमत्रिणंदह॥ २०॥ ११॥

त्वेषासः। अग्नेः। अमऽवन्तः। अर्चयः। भीमासः। न।
प्रतिऽइतये। रक्षस्विनः। सदम्। इत्। यातुऽमावतः। विश्वम्।
सम्। अत्रिणम्। दह॥ २०॥ ११॥

अग्नेरर्चयोज्वालाः त्वेषासोदीप्ताः अमवन्तोबलवन्तः भीमासोभयङ्कराः अतः प्रतीतयेअस्माभिःप्रत्येतुंनशक्याइतिशेषः हेअग्ने रक्षस्विनोबलवन्तः यातुमावतः यातुधानानसुरान्सदमित्सर्वदैवसन्दह सम्यक्भस्मीकुरु तथा विश्वंसर्वंअत्रिणंभक्षकंअस्मद्बाधकंशत्रुंसन्दह ॥ त्वेषासः त्विषदीप्तौ पचाद्यच् चितइत्यन्तोदात्तत्वम्।अमवन्तः अमरोगे अमतिशत्रूनरुजतीत्यमोबलं पचाद्यच् वृषादित्वादाद्युदात्तत्वम् तदेषामस्तीत्यमवन्तः । प्रतीतये तादौचनितीतिगतेःप्रकृतिस्वरत्वम्। रक्षस्विनः रक्षन्त्यनेनेतिरक्षोबलं करणेअसुन् अस्मायामेधेतिमत्वर्थीयोविनिः। यातुमावतः यातवोयातनास्ताभिमिमतेनिर्मिमतेइतिराक्षसव्यापारायातुमाः आतोनुपसर्गेकइतिकः तदेषामस्तीतिमतुप् मवौबह्वृचइतिदीर्घत्वम् संज्ञायामितिवत्वम् मतुपःपित्त्वादनुदात्तत्वे कृदुत्तरपदप्रकृतिस्वरत्वम्। अत्रिणं अदेस्त्रिनिश्चेतिकर्तरित्रिनिप्रत्ययः॥ २०॥

२०. अग्नि की शिखा प्रदीप्त, बलवती और भयंकर हैं। उसका विनाश नहीं किया जा सकता। अग्निदेव! राक्षसों, यातुधानों और विश्वभक्षक शत्रुओं का दहन करो।

॥ इतिप्रथमस्यतृतीयेएकादशोवर्गः ॥ ११ ॥

क्रीळंवइतिद्वितीयंसूक्तंपञ्चदशर्चं अत्रेयमनुक्रमणिका—क्रीळंपञ्चोनामारुतंहिगायत्रं त्विति। ऋषिश्चान्यस्मादृषेरवाविशिष्टइतिपरिभाषयाघोरपुत्रःकण्वऋषिः इदमुत्तरंचगायत्रीछन्दस्के इदमादिसूक्तत्रयंमरुद्देवताकं तुहिहवाइतिपरिभाषितत्वात् व्यूळ्हेद्वितीयेछंन्दोमेआग्निमारुतशस्त्रेएतत्सूक्तंनिविद्धानीयं द्वितीयस्याग्निंवोदेवमितिखण्डेसूत्रितम्—क्रीळंवःशर्धोअग्निमृळेत्याग्निमारुतमिति। ब्राह्मणंच—क्रीळंवःशर्धोमारुतमिति । मरुद्भ्यःक्रीळिभ्यःपुरोळाशंसप्तकपालमित्यस्यामिष्टौ क्रीळंवइत्येषाप्रधानस्यानुवाक्या तथावतइतिखण्डेसूत्रितम्—क्रीळंवःशर्धोमारुतमत्यासोनयेमरुतःस्वञ्चइति ।

तामेतांसूक्तेप्रथमामृचमाह—

क्रीळंवःशर्धोमारुतमनर्वाणंरथेशुभम् । कण्वाअभिप्रगायत ॥१॥

क्रीळम् । वः । शर्धः । मारुतम् । अनर्वाणम् । रथेऽशुभम् ।
कण्वाः । अभि । प्र । गायत ॥ १ ॥

हेकण्वाः कण्वगोत्रोत्पन्नामहर्षयः यद्वा मेधाविनऋत्विजः वोयुष्मदर्थंमारुतंमरुत्समूहरूपंशर्धोबलंअभिप्रगायतअभितःप्रकर्षेणस्तुध्वं कीदृशंशर्धः क्रीळं विहरणशीलं अनर्वाणंभ्रातृ-

---

१ ऐ० ब्रा० ५. १९.

व्यरहितं अतएवश्रुत्यन्तरेब्राह्मणेनमन्त्रान्तरमेवंव्याख्यातम्—अनर्वाणंप्रेहीत्याह भ्रातृव्योवाअ-र्वा भ्रातृव्यापनुत्त्याइति । रथेशुभंस्वकीयरथेवस्थायशोभमानम् ॥ क्रीळं क्रीडृविहारे प-चाद्यच् । शर्धः शृधुप्रसहने शर्धयत्यनेनशत्रूनितिशर्धोबलं असुन् नित्त्वादाद्युदात्तत्वम् । मारुतं मरुतांसम्बन्धि तस्येदमित्यण् व्यत्ययेनाद्युदात्तत्वम् यद्वा समूहार्थेअनुदात्तादेरञितिअनुदा-त्तादिलक्षणःअञ्प्रत्ययः । अनर्वाणं व्यत्ययेनपुँल्लिङ्गता नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । रथेशुभम् शुभदीप्तौ रथेशोभतइतिरथेशुप् क्विप्चेतिक्विप् तत्पुरुषेकृतिबहुलमित्यलुक् कृदु-त्तरपदप्रकृतिस्वरत्वम् । गायत कैगैशब्दे तिङ्ङतिङइतिनिघातः ॥ १ ॥

१. हे कण्व-गोत्रोत्पन्न ऋषिगण ! क्रीड़ासक्त और शत्रुशून्य मरुतों को उद्देश्य करके गाओ । वे रथ पर सुशोभित होते हैं ।

ये पृषतीभिर्ऋष्टिभिः साकं वाशीभिरञ्जिभिः । अजायन्त स्वभानवः ॥ २ ॥

ये । पृषतीभिः । ऋष्टिऽभिः । साकम् । वाशीभिः । अञ्जिऽभिः । अजायन्त । स्वऽभानवः ॥ २ ॥

येमरुतः पृषत्यादिभिःसाकंस्वभानवः स्वकीयदीप्तियुक्ताःअजायन्तइतिसंपन्नाः पृष-त्योबिन्दुयुक्ताःमृग्योमरुद्वाहनभूताः पृषत्योमरुतामितिनिघण्टावुक्तत्वात् ऋष्टयःआयुधानि वाश्यःशब्दविशेषाः परकीयसेनाभीतिहेतवः वाशीवाणीतिवाङ्नामसुपठितत्वात् अञ्जयोलङ्कर-णानि तान्स्तुमइतिशेषः ॥ अजायन्त जनीप्रादुर्भावे श्यनिज्ञाजनोर्जेतिजादेशः अडागमउदात्तः । स्वभानवः स्वकीयाभानवोयेषां बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् ॥ २ ॥

२. उन्होंने अपनी दीप्ति से सम्पन्न होकर बिन्दु-चिह्न-संयुक्त मृगरूप वाहन के साथ तथा युद्ध-गर्जन, आयुध और नाना रूप अलङ्कारों के साथ जन्म ग्रहण किया है ।

इहेव शृण्व एषां कशा हस्तेषु यद्वदान् । नियामञ्चित्रमृञ्जते ॥ ३ ॥

इहऽइव । शृण्वे । एषाम् । कशाः । हस्तेषु । यत् । वदान् । नि । यामन् । चित्रम् । ऋञ्जते ॥ ३ ॥

एषांमरुतांहस्तेषुस्थिताः कशाःस्वस्ववाहनताडनहेतवः यद्वदान् यद्वदन्ति यंध्वनिंकुर्वन्ति तंध्वनिंइहेवअत्रैवस्थित्वाशृण्वेशृणोमि सध्वनिविशेषोयामन्संग्रामेचित्रंविविधंशौर्यंन्यृञ्जते नितरामलङ्करोति ऋञ्जतिःप्रसाधनकर्मेतियास्कः ॥ शृण्वे श्रुश्रवणे व्यत्ययेनात्मनेपदं श्रुवःशृ-

१ तै० सं० ६.३.८. । २ नि० ६.२१. ।

चेतिश्नुः हुश्नुवोःसार्वधातुकइतियणादेशः। वदान् वदव्यक्तायांवाचि लेटचाडागमः इतश्चेती-कारलोपे संयोगान्तस्यलोपः आगमानुदात्तत्वेधातुस्वरः यद्वृत्तयोगादनिघातः। यामन् सुपां-सुलुगितिसप्तम्याल्लुक् नङिसम्बुध्योरिविनलोपप्रतिषेधः। ऋञ्जते ऋजिभृजीभर्जने अन्नप्रसा-धनार्थः॥ ३॥

३. उनके हाथों में रहनेवाली चाबुक जो शब्द कर रही है, वह हम सुन रहे हैं। वह चाबुक युद्ध में बल-वृद्धि करती है।

प्रवःशर्धायघृष्वयेत्वेषद्युम्नायशुष्मिणे। देवत्तंब्रह्मगायत॥४॥

प्र। वः। शर्धाय। घृष्वये। त्वेषऽद्युम्नाय। शुष्मिणे। देवत्तम्। ब्रह्म। गायत॥ ४ ॥

हेऋत्विजः वोयुष्माकंसम्बन्धिनेशर्धायप्रसहनशीलायघृष्वयेशत्रुघर्षणयुक्तायत्वेषद्युम्नाय दीप्यमानयशसे द्युम्नंद्योततेर्यशोवाऽन्नंवेतियास्कः।शुष्मिणेबलवतेशुष्मंशुष्णमितिबलनामसुपा-ठात् ब्रह्महविर्लक्षणमन्नमुद्दिश्यएवंभूतायमरुद्गणायप्रगायतस्तुध्वम् कीदृशंब्रह्म देवत्तंदेवैर्दत्तंदेव-तानुग्रहाल्लब्धम्॥शर्धाय शृधुप्रसहने शर्धयत्यभिभवतीतिशर्धोबलं पचाद्यच् वृषादित्वादाद्युदा-त्तत्वम्। घृष्वये घृषसंघर्षे कुविघृष्वीत्यादिनाक्विन्प्रत्ययान्तोनिपातितः। त्वेषद्युम्नाय त्विषदीप्तौ पचाद्यच् त्वेषंदीप्तंद्युम्नंयस्य बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्। देवत्तं देवैर्दत्तं छान्दसोवर्णलोपः उक्तंच द्वौचापरौवर्णविकारनाशाविति तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरत्वम्॥ ४॥

४. जो तुम्हारे बल का समर्थन करते, शत्रु-दमन करते और जो दीप्य-मान कीर्ति से पूर्ण और बलवान् हैं, हवि के उद्देश्य से उन्हीं मरुतों की स्तुति करो।

पञ्चमीमृचमाह—

प्रशंसागोष्वघ्न्यंक्रीळंयच्छर्धोमारुतम्। जंभेरसस्यवावृधे॥ ५॥१२॥

प्र। शंस। गोषु। अघ्न्यम्। क्रीळम्। यत्। शर्धः। मारुतम्। जंभे। रसस्य। ववृधे॥ ५॥ १२॥

गोषुमरुन्मातृभूतपृश्निप्रभृतिषुधेनुष्ववस्थितं पृश्न्यैवैपयसोमरुतोजाताइतिश्रुत्यन्तरात्। अघ्न्यंअहन्तव्यंक्रीळंविहारोपेतंमारुतंमरुत्सम्बन्धि शर्धःप्रसहनशीलंतेजोयदस्तितत्प्रशंस हे ऋत्विक्समूह स्तुहि रसस्यगोक्षीररूपस्यसम्बन्धितत्तेजः जम्भेमुखेउदरेवा ववृधेवृद्ध-मभूत्॥ शंस शंसुस्तुतौ द्व्यचोतस्तिङइतिसंहितायांदीर्घः। गोषु सावेकाचइतिप्राप्तस्य

१ नि० ५. ५.।

विभक्त्युदात्तस्यनगोश्वन्सावर्णेतिनिषेधः। अघ्न्यं घ्नोहननं यत्रर्थेकविधानमितिकः गमहने-त्यादिनाउपधालोपः होहन्तेरितिघत्वम् तदर्हतीतिद्यं छन्दसिचेतियः नघ्न्यं अघ्न्यं अव्ययपूर्व-पदप्रकृतिस्वरत्वम्। क्रीळादयोगताः। जम्भे जभिनाशने जंभ्यतेभक्ष्यतेनेनेतिजम्भमास्यं कर-णेघञ्। ववृधे वृधुवृद्धौ लिट् छान्दसंसंहितायामभ्यासस्यदीर्घत्वम्॥ ५॥

५. जो मरुद्गण पृश्नि-रूप या दुग्धधात्री-रूप धेनुओं के बीच स्थित हैं, उनके अविनाशी, क्रीड़ा-परायण और सहन-शील तेज की प्रशंसा करो। वृध के आस्वादन में वही तेज परिवर्द्धित हुआ है।

कोवोवर्षिष्ठआनरोदिवश्चग्मश्चधूतयः। यत्सीमन्तंनधूनुथ ॥ ६ ॥

कः। वः। वर्षिष्ठः। आ। नरः। दिवः। च। ग्मः। च। धूतयः। यत्। सीम्। अन्तम्। न। धूनुथ॥ ६॥

दिवश्चद्युलोकस्यापिग्मश्चभूलोकस्यापि गौःग्मेतिभूनामसुपठितत्वात् धूतयःकम्पनकारिणः हेनरः नेतारोमरुतः वोयुष्माकंमध्येआसमन्तात्वर्षिष्ठोवृद्धतमःकः यद्यस्मात्कारणात्सीं सर्वतः अन्तंन वृक्षाग्रमिव धूनुथ चालयथ तस्मात्कारणात्कम्पयितॄणांयुष्माकंमध्येकःप्रबलइतिप्रश्नः॥ वर्षिष्ठः वृद्धशब्दादिष्ठनि प्रियस्थिरेत्यादिनावर्षादेशः नित्त्वादाद्युदात्तः। ग्मः ग्माशब्दात्षष्ठये-कवचनेआतोधातोरित्यत्रआतइतियोगविभागःकर्तव्यइत्युक्तत्वात्आकारलोपः उदात्तनिवृत्ति-स्वरेणविभक्तेरुदात्तत्वम्। धूतयः धूञ्कम्पने क्तिच्क्तौचसंज्ञायामितिक्तिच् तितुत्रेत्यादिनेट्प्र-तिषेधः आमन्त्रितस्यचेतिसर्वानुदात्तत्वम्। धूनुथ स्वादिभ्यःश्नुः सतिशिष्टस्वरबलीयस्त्वमन्य-त्रविकरणेभ्यइतिवचनात्सतिशिष्टोपिविकरणस्वरोलसार्वधातुकस्वरंनबाधते अतस्तिङएवस्व-रः यद्वृत्तयोगादनिघातः॥ ६॥

६. द्युलोक और भूलोक में कम्पन करनेवाले नेतृ-स्थानीय मरुतो, तुममें कौन बड़ा है? तुम वृक्षाग्र की तरह चारों दिशाओं को परिचालित करो।

सप्तमीमृचमाह—

निवोयामायमानुषोदध्रउग्रायमन्यवे। जिहीतपर्वतोगिरिः॥ ७॥

नि। वः। यामाय। मानुषः। दध्रे। उग्राय। मन्यवे। जिहीत। पर्वतः। गिरिः॥ ७॥

हेमरुतोवोयुष्माकंयामायगमनार्थंमानुषः गृहस्वामीकश्चिन्मनुजः निदध्रेगृहदार्ढ्यार्थंदृढं स्तंभंनिक्षिप्तवान् भवदीयगमनेनचालितंगृहंपतिष्यतीतिभीत्यातन्निवारणायदृढस्तम्भप्रक्षेपः की-

दृशाय यामायउग्रायतीव्राय मन्यवेचालनार्थमभिमन्यमानाय युज्यतेहिभवद्गमनाद्भीतिः यतो-भवद्भत्याचालितःपर्वतोबहुविधपर्वयुक्तोगिरिः शिखरी जिहीतगच्छेत् ॥ मानुषः मनोर्जाताव-ञ्यतौषुक्चेतिमनुशब्दादपत्यार्थेअञ्षुगागमश्च ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वम् । दध्रे धृङ् अवस्थानेइत्यस्यलिटिकित्त्वाद्गुणाभावेसतियणादेशः प्रत्ययस्वरः पादादित्वान्ननिघातः। जिही-त ओहाङ्गतौ लिङि जुहोत्यादित्वाच्छपःश्लुः भृञामिदित्यभ्यासस्येत्त्वम् श्नाभ्यस्तयो-रातइत्याकारलोपेप्राप्तेईहल्यघोरितीत्वम् । पर्ववान्पर्वतः मत्वर्थीयस्तप्प्रत्ययः ॥ ७ ॥

७. मरुद्गण ! तुम्हारी कठोर और भयंकर गति के डर से मनुष्यों ने घरों में सुदृढ़ खम्भे खड़े किये हैं; क्योंकि तुम्हारी गति से अनेक शृङ्ग-युक्त पर्वत भी चालित हो जाते हैं ।

येषा॒मज्मे॑षुपृथि॒वीजु॑जु॒र्वाँ इ॑ववि॒श्पतिः॑ । भि॒यायामे॑षु॒रेज॑ते ॥ ८ ॥

येषा॑म् । अज्मे॑षु । पृ॒थि॒वी । जु॒जु॒र्वान्ऽइ॑व । वि॒श्पतिः॑ । भि॒या । यामे॑षु । रेज॑ते ॥ ८ ॥

हेमरुतः येषांयुष्माकं यामेषुगमनेषु अज्मेषुक्षेपकेषुसत्सुपृथिवीभूमिः भियारेजतेकम्प-ते तत्रदृष्टान्तः—जुजुर्वाँइवविश्पतिः यथावयोहानिरोगादिनाजीर्णःप्रजापालकोराजावैरिभ-यात्कम्पतेतद्वत् ॥ अज्मेषु अजगतिक्षेपणयोः बहुलग्रहणादौणादिकोमन् अजेर्व्यघञपोरितिवी-भावोनभवति वलादावार्धधातुकेविकल्पयिष्यतइतिवचनात् नित्त्वादाद्युदात्तत्वम् । जुजुर्वान् जॄ षुवयोहानौ लिटःक्वसुः बहुलंछन्दसीतिउत्वम् अभ्यासहलादिशेषौ वस्वेकाजाद्घसामितिनि-यमादिडागमाभावः ऋच्छत्यॄतामितिगुणोहलिचेतिदीर्घत्वंच संज्ञापूर्वकोविधिरनित्यइतिवच-नान्नभवति । विशांपतिर्विश्पतिः पत्यावैश्वर्येइतिपूर्वपदप्रकृतिस्वरेप्राप्ते परादिश्छन्दसिबहुल-मितिउत्तरपदाद्युदात्तत्वम् । भिया सावेकाचइतिविभक्तेरुदात्तत्वम् । यामेषु यमउपरमे भा-वेघञ् कर्षात्वतोघञइत्यन्तोदात्तत्वेप्राप्ते वृषादिषुपाठादाद्युदात्तत्वम् । रेजते रेजृकम्पने अदुपदे-शाल्लसार्वधातुकानुदात्तत्वेधातुस्वरः यद्वृत्तयोगादनिघातः ॥ ८ ॥

८. मरुतों की गति से सारे पदार्थ फेंके जाने लगे। पृथिवी भी बूढ़े और जीर्ण राजा की तरह कम्पित हो जाती है।

स्थि॒रंहि॒जान॑मेषां॒वयो॑मा॒तुर्निरे॑तवे । यत्सी॒मनु॑द्वि॒ताशवः॑ ॥ ९ ॥

स्थि॒रम् । हि॒ जान॑म् । ए॒षा॒म् । वयः॑ । मा॒तुः । निःऽए॑तवे । यत् । सीम् । अनु॑ । द्वि॒ता । शवः॑ ॥ ९ ॥

एषांमरुतांजानंजन्मस्थानमाकाशंस्थिरंहि चलनरहितंखलु मातुर्मरुतांजननीस्थानीयादाकाशाद्वयःपक्षिणोनिरेतवेनिर्गन्तुंसमर्थाभवन्तीतिशेषः तादृशादाकाशादुद्भवजन्मेति मरुतांस्तुतिः यद्यस्मात्कारणात् शवःभवदीयंबलंअनुक्रमेणसींसर्वतः द्विताद्वित्वेन द्यावापृथिव्योर्विभज्यवर्तते अतोभवदीयंजानंस्थिरंहीतिपूर्वत्रान्वयः ॥ जानं जन्यतेस्मिन्निति जानमन्तरिक्षं अधिकरणेघञ् । एषां इदमोन्वादेशेइत्यशादेशोनुदात्तः विभक्तिश्चसुप्त्वादनुदात्ता नचोडिदमित्यादिनाविभक्त्युदात्तत्वम् अन्तोदात्तादिदंशब्दात्तस्यविधानात् । निरेतवे इण्गतौ तुमर्थेसेसेनितितवेन्प्रत्ययः तादौचेतिगतेःप्रकृतिस्वरत्वम् ॥ ९ ॥

९. मरुतों का उद्भव-स्थान आकाश अविकल्प रहता है। उनके मातृ-रूप आकाश से पक्षी भी निकल सकते हैं; क्योंकि उनका बल दोनों लोकों में फैलकर सर्वत्र वर्त्तमान है।

उदुत्येसूनवोगिरःकाष्ठाअज्मेष्वत्नत । वाश्राअभिज्ञुयातवे ॥१०॥१३॥

उत् । ऊम् इति । त्ये । सूनवः । गिरः । काष्ठाः । अज्मेषु । अत्नत । वाश्राः । अभिऽज्ञु । यातवे ॥ १० ॥ १३ ॥

त्ये पूर्वप्रकृतागिरःसूनवः वाचउत्पादकामरुतः वायवोहिताल्वोष्ठादिषुसंचरन्तोवाचमुत्पादयन्ति अज्मेषुस्वकीयेषुगमनेषुसत्सुकाष्ठाअपः आपोपिकाष्ठाउच्यन्तेक्रान्त्वास्थिताभवन्तीति[1] यास्कः । उदु उत्कर्षेणैवअत्नतअतनिषतविस्तारितवन्तः उदकंविस्तार्यतत्पानार्थंवाश्राः हंभारवोपेतागाः अभिज्ञुजान्वभिमुखंयथाभवतितथायातवेगन्तुंप्रेरितवन्तइतिशेषः ॥ सूनवः षूप्रेरणे सुवःकिदितिनुप्रत्ययः कित्त्वाद्गुणाभावः । अत्नत तनुविस्तारे लङिझस्यादादेशो बहुलंछन्दसीतिविकरणस्यलुक् तनिपत्योश्छन्दसीत्युपधालोपः अडागमः । अभिज्ञु अभिगतेजानुनीयस्यतदभिज्ञु प्रसंख्यांजानुनोर्ज्ञुरितिव्यत्ययेनाभिपूर्वस्यापिजानुशब्दस्यज्ञुशब्दादेशःसमासान्तः । यातवे तुमर्थेसेसेनितितवेन्प्रत्ययः नित्त्वादाद्युदात्तत्वम् ॥ १० ॥

१०. मरुद्गण शब्दों के जनयिता है। वे गमन-समय में जल का विस्तार करते हैं और गायों को "हम्बा" शब्द के साथ घुटने भर जल में प्रेरण करते हैं।

॥ इतिप्रथमस्यतृतीयेत्रयोदशोवर्गः ॥ १३ ॥

त्यंचिद्घादीर्घंपृथुंमिहोनपातममृध्रम् । प्रच्यावयन्तियामभिः ॥ ११ ॥

त्यम् । चित् । घ । दीर्घम् । पृथुम् । मिहः । नपातम् । अमृध्रम् । प्र । च्यवयन्ति । यामऽभिः ॥ ११ ॥

---

१ नि० २. १५ ।

त्यंचिद्घ प्रसिद्धोयोमेघः तमपिमेघंयामभिः स्वकीयगमनैः प्रच्यावयन्ति मरुतःप्रकर्षेणगमयन्ति कीदृशं दीर्घंआयामोपेतं पृथुंतिर्यग्विस्तृतं मिहोनपातं सेचनीयस्यजलस्यनपातयितारं वृष्टिमकुर्वन्तमित्यर्थः अमृध्रं केनाप्यहिंस्यम् ॥ घ ऋचितुनुघेत्यादिनादीर्घः । मिहः मिहसेचने मेहतिसिञ्चतीतिमिट्वृष्टिः क्विप्चेतिक्विप् सावेकाचइतिविभक्तेरुदात्तत्वम् । नपातं नपातयतीतिनपात् नभ्राण्नपादित्यादिनानञःप्रकृतिभावः अव्ययपूर्वपदप्रकृतिस्वरत्वम् । अमृध्रम् मृधुमृधुउन्दने मर्धति उदकेनोनत्तीतिमृध्रः बहुलवचनादौणादिकोरक्प्रत्ययः नञ्समासेअव्ययपूर्वपदप्रकृतिस्वरत्वम् यद्वा संग्रामवाचिनामृधशब्देनहिंसालक्ष्यते मत्वर्थीयोरः पूर्ववत्स्वरसमासौ । च्यावयन्ति च्युङ्गतौ णिचिवृद्ध्यावादेशौ पदकालेह्रस्वश्छान्दसः ॥ ११ ॥

११. जो बादल प्रसिद्ध, दीर्घ और छोटे हैं, जो जल-वर्षण नहीं करते और किसी के द्वारा वध्य नहीं हैं, उन्हें भी मरुत् लोग, अपनी गति से, कम्पित करते हैं।

मरुतोयद्धवोबलंजनाँअचुच्यवीतन । गिरीँरचुच्यवीतन ॥ १२ ॥

मरुतः । यत् । ह । वः । बलम् । जनान् । अचुच्यवीतन । गिरीन् । अचुच्यवीतन ॥ १२ ॥

हेमरुतः यद्धयस्मादेवकारणात् वोयुष्माकंबलमस्ति अस्मादेवकारणात्जनान् प्राणिनः अचुच्यवीतन स्वस्वव्यापारेषुप्रेरयत तथा गिरीन् मेघान्अचुच्यवीतनप्रेरयत ॥ मरुतः आमन्त्रिताद्युदात्तत्वम् । अचुच्यवीतन च्यवतेर्लिङिव्यत्ययेनपरस्मैपदम् तप्तनप्तनथनाश्चेतितस्यतनबादेशः बहुलंछन्दसीतिशपःश्लुः बहुलंछन्दसीतिईडागमः गुणावादेशौ तिङ्ङतिङइतिनिघातः । गिरीन् दीर्घादटिसमानपादेइतिसंहितायांनकारस्यरुत्वम् अत्रानुनासिकइतिइकारस्यानुनासिकः ॥ १२ ॥

१२. मरुतो ! तुम बलवान् हो; इसलिए आदमियों को अपने-अपने कार्यों में लगाते हो। मेघों को भी प्रेरित करते हो।

त्रयोदशीमृचमाह—

यद्धयान्तिमरुतःसंहब्रुवतेध्वन्ना । शृणोतिकश्चिदेषाम् ॥ १३ ॥

यत् । ह । यान्ति । मरुतः । सम् । ह । ब्रुवते । अध्वन् । आ । शृणोति । कः । चित् । एषाम् ॥ १३ ॥

यद्धयदाखलुमरुतोयान्तिगच्छन्तितदानींअध्वन्नामार्गेसर्वतः संब्रुवतेह सम्भूयध्वनिमवश्यंकुर्वन्ति एषांमरुतांसंबन्धिनंशब्दंकश्चित्पुरुषःकोपिशृणोति ॥ यान्ति यामापणे अदादित्वाच्छपोलुक् झोन्तइतिझादेशस्योपदेशिवद्भावादन्तीत्येतदाद्युदात्तं धातुनासहैकादेशेएकादेशस्वरः

यद्वृत्तयोगादनिघातः। ब्रुवते ब्रूञ्व्यक्तायांवाचि झस्यादादेशेकृतेपरत्वात्प्राप्तस्यगुणस्यङित्त्वेन बाधितत्वादुवङादेशः। अध्वन् सुपांसुलुगितिसप्तम्यालुक् । शृणोति तिपःपित्त्वानुदात्तत्वेविकरणस्वरः॥ १३॥

१३. जभी मरुद्गण गमन करते हैं, तभी रास्ते में चारों ओर ध्वनि करते हैं। उनकी ध्वनि सभी सुन सकते हैं।

प्रयातशीभमाशुभिःसन्तिकण्वेषुवोदुवः। तत्रोषुमादयाध्वै॥ १४॥

प्र। यात। शीभम्। आशुऽभिः। सन्ति। कण्वेषु। वः। दुवः। तत्रो इति। सु। मादयाध्वै॥ १४॥

हेमरुतः आशुभिर्वेगवद्भिः स्वकीयैर्वाहनैः शीभंशीघ्रंशीभंतृप्युतूयमितिक्षिप्रनामसुपाठात् प्रयातप्रकर्षेणकर्मभूमिंगच्छत. कण्वेषुमेधाविष्वनुष्ठातृषुवोयुष्माकंदुवोदुवांसिपरिचरणानिसन्ति तत्रोषुतेष्वेवपरिचारकेषुकण्वेषुमादयाध्वैतृप्ताभवत॥ आशुभिः अशूव्याप्तौ कृवापाजीत्यादिनाउण् प्रत्ययस्वरः। सन्ति श्नसोरल्लोपइत्यकारलोपः। मादयाध्वै मदतृप्तियोगे चुरादिराकुस्मीयआत्मनेपदी लेट्याडागमः टेरेत्वम् वैतोन्यत्रेत्येकारस्यैकारादेशः॥ १४॥

१४. वेगवान् वाहन के द्वारा तुरत आओ। मेधावी अनुष्ठाताओं ने तुम्हारी परिचर्या का समारोह किया है। उनके प्रति तृप्त हो।

अस्तिहिष्मामदायवःस्मसिष्मावयमेषाम्। विश्वंचिदायुर्जीवसे॥ १५॥ १४

अस्ति। हि। स्म। मदाय। वः। स्मसि। स्म। वयम्। एषाम्। विश्वम्। चित्। आयुः। जीवसे॥ १५॥ १४॥

हेमरुतः वोयुष्माकंमदायतृप्तयेअस्तिहिष्म अस्माभिःप्रयुज्यमानंहविर्वोविद्यतेखलु एषांयुष्माकंभृत्यभूतावयंस्मसिष्मविद्यामहेखलु जीवसेजीवितुं विश्वंचिदायुः सर्वमप्यायुः प्रयच्छतेतिशेषः॥ स्म निपातस्यचेतिसंहितायांदीर्घः। स्मसि इदन्तोमसिः। जीवसे तुमर्थेसेसेनित्यसेप्रत्ययः॥ १५॥

१५. तुम्हारी तृप्ति के लिए हव्य है। हम समस्त परमायु जीने के लिए तुम्हारे सेवक बने हुए हैं।

कद्धनूनमितिपञ्चदशर्चंतृतीयंसूक्तम् घोरपुत्रःकण्वऋषिःऋषिश्चान्यस्मादितिपरिभाषितत्वात् पूर्वसूक्तेमारुतंहीत्युक्तत्वादिदमपिमरुद्देवताकं गायत्रंत्वित्युक्तत्वाद्गायत्रीछन्दस्कम् कद्धेत्यनुक्रमणिका विनियोगोलैङ्गिकः।

तत्रप्रथमामृचमाह—

कद्धनूनंकधप्रियःपितापुत्रंनहस्तयोः। दधिध्वेवृक्तबर्हिषः ॥ १ ॥

कत्। ह। नूनम्। कधऽप्रियः। पिता। पुत्रम्। न। हस्तयोः।
दधिध्वे। वृक्तऽबर्हिषः ॥ १ ॥

हेमरुतः कद्धकदाखलुनूनमवश्यंहस्तयोःदधिध्वे यूयमस्मान्हस्तेधारयथ तत्रदृष्टान्तः— पितापुत्रंनहस्तयोः यथालोकेपिताहस्तयोःस्वकीयंपुत्रंधारयतितद्वत् कीदृशामरुतः कधप्रियः स्तुतिप्रीताः वृक्तबर्हिषः वृक्तंछिन्नंबर्हिर्दर्भोयेषांमरुतांयजमानायतेमरुतस्तथाविधाः ॥ कत् कदा द्वौचापरौवर्णविकारनाशावित्युक्तत्वादाकारलोपः। कधप्रियः कथास्तुतिः तयाप्रीणयन्तीति कथप्रियः प्रीञ्प्रीतौ क्विप् पूर्वपदस्यङ्यापोःसंज्ञाछन्दसोर्बहुलमितिह्रस्वत्वम् धकारश्छान्दसः आमन्त्रितनिघातः। दधिध्वे दधातेः छन्दसिलुङ्लङ्लिटइतिवर्तमानेलिट् क्रादिनियमादिट् प्रत्ययस्वरः। वृक्तबर्हिषः आमन्त्रितनिघातः ॥ १ ॥

१. मरुद्गण! तुम लोग प्रार्थनाप्रिय हो। तुम्हारे लिए कुश छिन्न हैं। जिस प्रकार पिता पुत्र को हाथों से धारण करता है, उसी प्रकार क्या हमें भी तुम धारण करोगे?

क्वनूनंकद्वोअर्थंगन्तादिवोनपृथिव्याः। क्ववोगावोनरण्यन्ति ॥ २ ॥

क्व। नूनम्। कत्। वः। अर्थम्। गन्त। दिवः। न। पृथिव्याः।
क्व। वः। गावः। न। रण्यन्ति ॥ २ ॥

हेमरुतः नूनमिदानींक्वयूयंकुत्रस्थिताः कद्वःकदावोयुष्माकं अर्थं अरणंदेवयजनदेशगमनं विलम्बंमाकुरुतेत्यर्थः दिवोगन्त द्युलोकादागच्छत पृथिव्यानगन्त भूलोकान्मागच्छत वोयुष्मान्क्वरण्यन्तिदेवयजनरूपायाःपृथिव्याअन्यत्रकुत्रशब्दयन्ति यजमानाःस्तुवन्ति तत्रदृष्टान्तः—गावोन यथागावोरणन्तिशब्दयन्तितद्वत् ॥ क्व किंशब्दात्सप्तम्यन्तात् किमोदित्यत्प्रत्ययः क्वातीतिकिमःक्वादेशः तित्स्वरितमितिस्वरितत्वम्। अर्थं ऋगतौ उषिकुषिगार्तिभ्यस्थन्इति भावेथन् नित्त्वादाद्युदात्तत्वम्। गन्त गमेर्लोटि बहुलंछन्दसीतिशपोलुक् थादेशस्यतस्य तप्तनप्तनथनाश्चेतितबादेशः अतएवङित्त्वाभावादनुदात्तोपदेशेत्यादिनाअनुनासिकलोपोनभवति प्रत्ययस्यपित्त्वादनुदात्तत्वेधातुस्वरः द्व्यचोतस्तिङइतिसंहितायांदीर्घत्वम्। दिवः ऊडिदमितिविभक्तेरुदात्तत्वम्। पृथिव्याः उदात्तयणोहल्पूर्वादितिविभक्तेरुदात्तत्वम्। रण्यन्ति रणतिःशब्दार्थः व्यत्ययेनश्यन् ॥ २ ॥

२. इस समय तुम कहाँ हो? कब आओगे? आकाश से आओ। पृथिवी से मत जाना। यजमान लोग, गायों की तरह, तुम्हें कहाँ बुलाते हैं?

तृतीयामृचमाह—

क्वःसुम्नानव्यांसिमरुतःक्वसुविता। क्वोविश्वानिसौभगा ॥ ३ ॥

क्व । वः । सुम्ना । नव्यांसि । मरुतः । क्व । सुविता ।
क्वो इति । विश्वानि । सौभगा ॥ ३ ॥

हेमरुतोवोयुष्माकंसम्बन्धीनिनव्यांसिनवतराणिसुम्नाप्रजापशुरूपाणिधनानि प्रजावैपशवः सुम्नमितिश्रुत्यंन्तरात् । क्वकुत्रवर्तन्ते तथा सुविताशोभनानिप्राप्यानिमणिमुक्तादीनिभवदीयानिक्वकुत्रवर्तन्ते विश्वानिसर्वाणिसौभगा सौभाग्यरूपाणिगजाश्वादीनिक्वोकुत्रवर्तन्ते भवदीयैः सुम्नादिभिःसर्वैःसहागन्तव्यमित्यर्थः ॥ सुम्ना शेश्छन्दसिबहुलमितिशेर्लोपः । नव्यांसि नवशब्दादीयसुनिईकारलोपश्छान्दसः । सुविता सुष्ठुइतानिसुवितानितन्वादीनांछन्दसिबहुलमुपसंख्यानमित्युवङादेशः । सौभगा सुभगान्मन्त्रेइतितस्यभावइत्यर्थेअञ् पूर्ववच्छेर्लोपः ॥ ३ ॥

३. तुम्हारा नया धन कहाँ है? तुम्हारा सुशोभन द्रव्य कहाँ है? तुम्हारा समस्त सौभाग्य कहाँ है?

यद्यूयंपृश्निमातरोमर्तासःस्यातन । स्तोतावोअमृतःस्यात् ॥ ४ ॥

यत् । यूयम् । पृश्निऽमातरः । मर्तासः । स्यातन । स्तोता । वः ।
अमृतः । स्यात् ॥ ४ ॥

हेपृश्निनामकधेनुपुत्रामरुतोयूयंयद्यपिमर्तासोमनुष्याःस्यातनभवेत तथापिवोयुष्माकं स्तोतायजमानः अमृतःस्यात् देवोभवेत् ॥ पृश्निर्मातायेषांते समासान्तविधेरनित्यत्वात् नद्यृतश्चेतिकबभावः । मर्तासः असिहसीत्यादिनाम्रियतेस्तन्प्रत्ययः आज्जसेरसुक् । स्यातन अस्तेर्लिङि तस्य तप्तनप्तनथनाश्चेतितनादेशः यासुटउदात्तत्वम् । अमृतः नञोजरमरमित्रमृताइत्युत्तरपदाद्युदात्तत्वम् ॥ ४ ॥

४. हे पृश्नि नामक धेनु-पुत्र! यद्यपि तुम मनुष्य हो; परन्तु तुम्हारा स्तोता अमर हो।

पञ्चमीमृचमाह—

मावोमृगोनयवसेजरिताभूदजोष्यः । पथायमस्यगादुप ॥ ५ ॥ १५ ॥

मा । वः । मृगः । न । यवसे । जरिता । भूत् । अजोष्यः । पथा ।
यमस्य । गात् । उप ॥ ५ ॥ १५ ॥

---

१ तै० सं. ५. ४. ६.।

हेमरुतोवोयुष्माकंजरितास्तोताअजोष्यः असेव्योमाभूत् तत्रदृष्टान्तः—मृगोनयवसे यथातृणेभक्षणीयेमृगःकदाचिदप्यसेव्योनभवति किन्तु सर्वदातृणंभक्षयतितद्वत् किञ्च सःस्तोता यमस्यपथा यमलोकसम्बन्धिमार्गेणमोपगात्मागच्छत्मागच्छतु तस्यमरणंमाभूदित्यर्थः॥जरिता जॄष्वयोहानौ स्तुतिकर्मेतियास्कः। तृचीडागमः चित्त्वादन्तोदात्तत्वम्। भूत् लुङिगातिस्थेतिसिचोलुक् नमाङ्योगेइत्यडभावः। अजोष्यः जुषीप्रीतिसेवनयोः ऋहलोर्ण्यदितिकर्मणिण्यत् नञ्समासेअव्ययपूर्वपदप्रकृतिस्वरत्वम्। पथा तृतीयैकवचनेभस्यटेर्लोपइतिटिलोपः उदात्तनिवृत्तिस्वरेणविभक्तेरुदात्तत्वम्। गात् एतेर्लुङिइणोगालुङीतिगादेशः गातिस्थेतिसिचोलुक् पूर्ववदडभावः॥ ५॥

५. जिस प्रकार घासों के बीच मृग सेवा-रहित नहीं होता, तृण-भक्षण करता है; उसी प्रकार तुम्हारे स्तोता भी सेवा-शून्य न हों, जिससे वे यम के पथ नहीं जायँ।

मोषुणःपरांपरानिर्ऋतिर्दुर्हणावधीत्। पदीष्टतृष्णयासह ॥ ६ ॥

मो इति। सु। नः। पराऽपरा। निःऽऋतिः। दुःऽहना। वधीत्। पदीष्ट। तृष्णया। सह॥ ६॥

हेमरुतः नोस्मान्निर्ऋतिःरक्षोजातिदेवतामोषुवधीत्सर्वथावधंमाकार्षीत् कीदृशी परापरा उत्कृष्टादप्युत्कृष्टाअतिबलेत्यर्थः अतएवदुर्हणा केनापिहन्तुंदुःशक्या सानिर्ऋतिःतृष्णयासहपदीष्टपततु अस्मदीयातृष्णाबाधिकानिर्ऋतिश्चविनश्यत्वित्यर्थः॥ मोषुणः सुञइतिषत्वं नश्चधातुस्थोरुषुभ्यइतिणत्वम्। दुर्हणा ईषद्दुःसुष्वित्यादिनाहन्तेःकर्मणिखल् लित्स्वरेणप्रत्ययात्पूर्वस्योदात्तत्वम्। वधीत् लुङि हन्तेर्लुङिचेतिवधादेशः सिचिईडागमः वधादेशस्यादन्तत्वात् एकाचउपदेशेइतीट्प्रतिषेधोनभवति अतोलोपेसति तस्यस्थानिवत्त्वादतोहलादेरितिवृद्ध्यभावः इटईटीतिसिचोलोपः। पदीष्ट पदगतौ आशीर्लिङिछन्दस्युभयथेतिसार्वधातुकत्वात्सलोपः आर्धधातुकत्वात्सुडागमः प्रत्ययस्वरः। तृष्णया ञितृषापिपासायां तृषिशृषिरसिभ्यःकिच्चेतिनप्रत्ययः निदित्यनुवृत्तेराद्युदात्तत्वम्॥ ६॥

६. निर्ऋति या पाप-देवी अत्यन्त बलशालिनी हैं; और, उसका विनाश नहीं किया जा सकता। वह निर्ऋति हमारा वध न करे और हमारी तृष्णा के साथ विलुप्त हो जाय।

सप्तमीमृचमाह—

सत्यंत्वेषाअमवन्तोधन्वञ्चिदारुद्रियासः। मिहंकृण्वन्त्यवाताम्॥ ७॥

---

१ नि० १. ८।

सत्यम् । । त्वेषाः । अमंऽवन्तः । धन्वंन् । चित् । आ ।
रुद्रियासः । मिहंम् । कृण्वन्ति । अवाताम् ॥ ७ ॥

धन्वन् चित्मरुदेशेपि रुद्रियासः रुद्रेणपालितत्वात्तदीयामरुतः आसर्वतः अवातांवायुरहितांमिहंवृष्टिंकृण्वन्तिकुर्वन्ति तदेतत्सत्यं कीदृशारुद्रियासः त्वेषाःदीप्ताः अमवन्तोबलवन्तः मरुतांरुद्रपालनमाख्यानेषुप्रसिद्धम् ॥ धन्वन् रिविरविधविगत्यर्थाः इदित्त्वान्नुम् कनिन्युवृषितक्षीत्यादिनाकनिन् नित्त्वादाद्युदात्तत्वम् सुपांसुलुगितिसप्तम्यालुक् । रुद्रियासः रुद्रस्येमेरुद्रियाः तस्येदमित्यर्थेघः आज्जसेरसुक् । मिहं मिहसेचने क्विप्चेतिक्विप् । कृण्वन्ति कृविहिंसाकरणयोश्च धिन्विकृण्व्योरचेत्युप्रत्ययः तत्सन्नियोगेनवकारस्यचअकारादेशः अतोलोपेनलुप्तस्यतस्यस्थानिवद्भावाल्लघूपधगुणाभावः ॥ ७ ॥

७. दीप्तिमान् और बलवान् रुद्रियगण या मरुद्गण सचमुच मरुभूमि में भी वायु-रहित वृष्टि करते हैं।

कारीर्यांमारुतंसप्तकपालमित्यस्यहविषोवाश्रेवविद्युदित्येषानुवाक्या वर्षकामेष्टिरितिखण्डे सूत्रितम्—वाश्रेवविद्युन्मिमातिपर्वतश्चिन्महिवृद्धोबिभायेति ।

वाश्रेवंविद्युन्मिंमातिवत्संनमातासिषक्ति । यदेषांवृष्टिरसर्जि ॥ ८ ॥

वाश्राऽईव । विऽद्युत् । मिमाति । वत्सम् । न । माता । सिसक्ति ।
यत् । एषाम् । वृष्टिः । असर्जि ॥ ८ ॥

वाश्रेव शब्दयुक्ताप्रस्नुतस्तनवतीधेनुरिव विद्युन्मेघस्थाद्दृश्यमानासती मिमातिशब्दंकरोति विद्युद्वेलायांहिमेघगर्जनंप्रसिद्धं माताधेनुर्वत्संन वत्समिव सिषक्ति इयंविद्युन्मरुतः सेवते सिषक्तिःसेवनार्थः सिषकुसचवइतिसेवमानस्येतियास्कोक्तत्वात् । यद्यस्मात्कारणादेषांमरुतांसंबन्धिनीवृष्टिः असर्जिगर्जनसहितेविद्युत्कालेवृष्टाभवति तस्माद्विद्युतोमरुत्सेवनमुपपन्नम् ॥ वाश्राइव वाश्रृशब्दे स्फायितञ्चीत्यादिनारक् । मिमाति माङ्मानेशब्देच व्यत्ययेनपरस्मैपदम् जुहोत्यादित्वात्श्लुः भृञामिदितिअभ्यासस्येत्वम् । सिषक्ति षचसमवाये लटिबहुलंछन्दसीतिशपःश्लुः बहुलंछन्दसीत्यभ्यासस्येत्वम् । असर्जि सृजविसर्गे कर्मणिलुङ् चिण्भावकर्मणोरितिचिण् चिणोलुगितितशब्दस्यलुक् गुणः अडागमउदात्तः यद्वृत्तयोगादनिघातः ॥ ८ ॥

८. प्रसूत स्तनोंवाली धेनु की तरह बिजली गरजती है। जिस प्रकार गाय बछड़े की सेवा करती है, उसी प्रकार बिजली भी मरुद्गण की सेवा करती है। फलतः मरुद्गण ने वृष्टि की।

---

१ नि० ३. २१. ।

नवमीमृचमाह—

दिवाचित्तमःकृण्वन्तिपर्जन्येनोदवाहेन । यत्पृथिवींव्युन्दन्ति ॥ ९ ॥

दिवा । चित् । तमः । कृण्वन्ति । पर्जन्येन । उदऽवाहेन । यत् ।
पृथिवीम् । विऽउन्दन्ति ॥ ९ ॥

हेमरुतः उदवाहेनउदकधारिणापर्जन्येनमेघेन सूर्यमाच्छाद्यदिवाचित् अहन्यपि तमः कृण्वन्तिअन्धकारंकुर्वन्ति यद्यदापृथिवींभूमिंव्युन्दन्तिविशेषेणक्लेदयन्ति तदानीमतिवृष्टिकालेतमःकुर्वन्तीतिपूर्वत्रान्वयः ॥ उदवाहेन उदकानिवहतीत्युदवाहः कर्मण्यण् मेघविशेषस्येयं संज्ञा उदकस्योदःसंज्ञायामितिउदकशब्दस्योदभावः कृदुत्तरपदप्रकृतिस्वरत्वम् । व्युन्दन्ति उन्दीक्लेदने रुधादित्वाछ्नम् श्नान्नलोपइतिनलोपः यद्वृत्तयोगादनिघातः ॥ ९ ॥

९. मरुद्गण जलधारी मेघों-द्वारा दिन में भी अन्धकार करते हैं। पृथिवी को भी सींचते हैं।

अधस्वनान्मरुतांविश्वमासद्मपार्थिवम् । अरेजन्तप्रमानुषाः ॥ १० ॥ १६ ॥

अध । स्वनात् । मरुताम् । विश्वम् । आ । सद्म । पार्थिवम् ।
अरेजन्त । प्र । मानुषाः ॥ १० ॥ १६ ॥

मरुतां सम्बन्धिनःस्वनादध ध्वनेर्गर्जनरूपादनन्तरं पार्थिवंपृथिवीसम्बन्धिविश्वंसद्मसर्वंगृहं आसमन्तात् अरेजतेतिशेषः तथा मानुषाः गृहवर्तिनोमनुष्याअपि प्रारेजन्तप्रकर्षेण कम्पितवन्तः ॥ अध छान्दसंधत्वम् । सद्म षद्लृविशरणगत्यवसादनेषु अन्येभ्योपिदृश्यन्तेइति मनिन् । पार्थिवं पृथिव्याःसंबन्धि पृथिव्याञाञावितिप्राग्दीव्यतीयःअञ्प्रत्ययः ञित्त्वादाद्युदात्तत्वम् । अरेजन्त रेजृकम्पने ॥ १० ॥

१०. मरुद्गण के गर्जन से सारी पृथिवी के ग्रह आदि चारों ओर काँपने लगते हैं। मनुष्य भी काँपने लगते हैं।

॥ इतिप्रथमस्यतृतीयेषोडशोवर्गः ॥ १६ ॥

एकादशीमृचमाह—

मरुतोवीळुपाणिभिश्चित्रारोधस्वतीरनु । यातेमखिद्रयामभिः ॥ ११ ॥

मरुतः । वीळुपाणिऽभिः । चित्राः । रोधस्वतीः । अनु । यात ।
ईम् । अखिद्रयामऽभिः ॥ ११ ॥

हेमरुतोयूयंवीळुपाणिभिः दृढहस्तैःसहिताःसन्तः रोधस्वतीरनु कूलयुक्तानदीरनुलक्ष्य अखिद्रयामभिः अच्छिन्नगमनैः यातेम् गच्छतैव ॥ मरुतः आमन्त्रितायुदात्तत्वम् । वीळुपाणिभिः वीडुइतिबलनाम वीळुच्यौत्नमितितन्नामसुपाठात् तेनचतद्वान्लक्ष्यते वीळवश्चतेपाणयश्च समासस्येत्यन्तोदात्तत्वम् । रोधस्वतीः रुधिर्आवरणे रुणद्धिस्रोतइतिरोधःकूलम् रोधः कूलंनिरुणद्धिस्रोतंइत्युक्तत्वात् । असुनोनित्त्वादाद्युदात्तत्वम् तद्युक्तारोधस्वत्यः मादुपधाया-इतिमतुपोवत्वम् उगितश्चेतिङीप् मतुब्ङीपोःपित्त्वादनुदात्तत्वे असुनःस्वरएवशिष्यते । यात यामापणे अदादित्वाच्छपोलुक् । ईम् चादयोनुदात्ताइत्यनुदात्तत्वम् गुणेएकादेशउदात्तेनोदात्तइत्युदात्तत्वम् । अखिद्रयामभिः खिददैन्ये स्फायितञ्चीत्यादिनारक् खिद्रंयान्तीतिखिद्रयामानः नखिद्रयामानः अखिद्रयामानः तैः अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥ ११ ॥

११. मरुतो ! दृढ़ हस्त-द्वारा विलक्षण कूल से संयुक्त नदी की भाँति अबाध-गति से गमन करो ।

द्वादशीमृचमाह—

स्थिरावःसन्तुनेमयोरथाअश्वासएषाम् । सुसंस्कृता अभीशवः ॥ १२ ॥

स्थिराः । वः । सन्तु । नेमयः । रथाः । अश्वासः । एषाम् । सुऽसंस्कृताः । अभीशवः ॥ १२ ॥

हेमरुतः येषांवोयुष्माकंनेमयोरथचक्रवलयाःस्थिराःसन्तु तथारथाअश्वासः अश्वाश्चस्थिराःसन्तु अभीशवोङ्गुलयः अभीशवः दीधितयइतितन्नामसुपाठात् सुसंस्कृताअश्वबन्धनरज्जुपरिग्रहणे स्वलङ्कृताः सावधानाः सन्तु ॥ सुसंस्कृताः सम्पूर्वात्करोतेःकर्मणिक्तः संपर्युपेभ्यइतिसुट् पुनःसुशब्देनप्रादिसमासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् । अभीशवः अभिपूर्वादश्नोतेः कृवापाजिमीत्यादिनाउण् वर्णव्यत्ययेनआकारस्यइकारः उक्तञ्च—वर्णागमोवर्णविपर्ययश्चेति अभीशवोभ्यश्नुवतेकर्माणीतिनिरुक्तम् ॥ १२ ॥

१२. मरुद्गण ! तुम्हारा रथ-चक्र-वलय या नेमि दृढ़ हो। रथ और घोड़े भी दृढ़ हों। घोड़ों की रज्जु पकड़ने में तुम्हारी अँगुलियाँ सावधान हों।

त्रयोदशीमृचमाह—

अच्छांवदातनागिराजरायैब्रह्मणस्पतिम् । अग्निंमित्रंनदर्शतम् ॥ १३ ॥

अच्छ । वद । तना । गिरा । जरायै । ब्रह्मणः । पतिम् । अग्निम् । मित्रम् । न । दर्शतम् ॥ १३ ॥

हेऋत्विक्समूह तनातनया देवतास्वरूपंप्रकाशयन्त्यागिरावाचा ब्रह्मणस्पतिंमन्त्रस्यहविर्लक्षणस्यान्नस्यवापालकंमरुद्गणं अग्निंदर्शतंदर्शनीयंमित्रंन मित्रमपि जरायै स्तोतुंअच्छ आभिमुख्येनवदब्रूहि ॥ अच्छ निपातस्यचेतिसंहितायांदीर्घत्वम् । वद द्व्यचोतस्तिङइतिसंहितायांदीर्घः । तना तनुविस्तारे तनोतिदेवतामाहात्म्यंविस्तारयतीतितना पचाद्यच् वृषादित्वादाद्युदात्तत्वम् तृतीयायाडादेशः । गिरा सावेकाचइतिविभक्तेरुदात्तत्वम् । ब्रह्मणः षष्ठ्याःपतिपुत्रेतिसंहितायांसत्वम् ॥ १३ ॥

१३. हे ऋत्विक्गण ! ब्रह्मणस्पति या मरुद्‌गण, अग्नि और सुदृश्य मित्र की प्रार्थना के लिए देवों के स्वरूप-प्रकाशक वाक्यों-द्वारा हमारे सामने होकर उनकी स्तुति करो।

मिमीहिश्लोकंमास्यैपर्जन्यंइवततनः । गायंगायत्रमुक्थ्यम् ॥ १४ ॥

मिमीहि । श्लोकम् । आस्ये । पर्जन्यःऽइव । ततनः । गाय । गायत्रम् । उक्थ्यम् ॥ १४ ॥

हेऋत्विक्समूह आस्ये स्वकीयमुखे श्लोकंस्तोत्रं मिमीहिनिर्मितंकुरु तंचश्लोकं ततनः विस्तारय तत्रदृष्टान्तः—पर्जन्यइव यथामेघोवृष्टिंविस्तारयति तद्वत् उक्थ्यं शस्त्रयोग्यं गायत्रं गायत्रीछन्दस्कंसूक्तं गाय पठ ॥ मिमीहि माङ्माने जौहोत्यादिकः व्यत्ययेनपरस्मैपदम् भृञामिदित्यभ्यासस्येत्त्वम् । आस्ये असुक्षेपणे अस्यतेक्षिप्यतेस्मिन्नित्यास्यं कृत्यल्युटोबहुलमितिअधिकरणेण्यत् तित्स्वरितमितिस्वरितत्वम् । ततनः तनुविस्तारे लेटिसिपि बहुलंछन्दसीतिविकरणस्यश्लुः लेटोडाटावित्यडागमः इतश्चलोपइतीकारलोपः । गायत्रं गायत्र्याःसम्बन्धि तस्येदमित्यण् यद्वा गायतस्त्रायतइतिगायत्रं आतोनुपसर्गेकः ॥ १४ ॥

१४. ऋत्विक्गण ! अपने मुंह से स्तोत्र बनाओ। मेघ की तरह उस स्तोत्र-श्लोक को विस्तृत करो। शास्त्रयोग्य और गायत्री-छन्द से युक्त सूक्त का पाठ करो।

वन्दस्वमारुतंगणंत्वेषंपनस्युमर्किणम्। अस्मेवृद्धाअसन्निह ॥ १५ ॥ १७ ॥

वन्दस्व । मारुतम् । गणम् । त्वेषम् । पनस्युम् । अर्किणम् । अस्मे इति । वृद्धाः । असन् । इह ॥ १५ ॥ १७ ॥

हेऋत्विक्संघ मारुतं मरुत्संबन्धिनंगणंसमूहंवन्दस्व नमस्कुरु स्तुहिवा कीदृशंगणं त्वेषंदीप्तं पनस्युं स्तुतियोग्यं अर्किणंअर्चनोपेतं अस्मे अस्माकंइहास्मिन्कर्मणिवृद्धाअसन् मरुतः प्रवृद्धाभवन्तु ॥ वन्दस्व वदिअभिवादनस्तुत्योः अनुपदेशात्सार्वधातुकमनुदात्तत्वेधातु-

स्वरः । पनस्युं पनचेतिस्तुत्यर्थोधातुः असुन् पनःस्तोत्रं आत्मनइच्छतीतिपनस्युः सुपआत्मनःक्यच् क्याच्छन्दसीत्युप्रत्ययः । अर्किणं ऋचस्तुतौ पुंसिसंज्ञायामितिघः अर्कोस्यास्तीतिअर्की अतइनिठनौ असुन् बहुलंछन्दसीतिशपोलुगभावः इतश्चलोपइतीकारलोपः तिङ्ङतिङइतिनिघातः ॥ १५ ॥

१५. ऋत्विको ! दीप्त, स्तुति-योग्य और अर्चना से संयुक्त मरुतों की वन्दना करो, जिससे वे हमारे इस कार्य में वर्द्धनशील हों ।

प्रयदित्येतिदशर्चंचतुर्थंसूक्तम् घोरपुत्रस्यकण्वस्यार्षम् मरुद्देवताकम् अयुजोबृहत्यः युजःसतोबृहत्यः प्रयद्दशमागाथंत्वित्यनुक्रमणिका गतोविनियोगः ।

प्रयदित्थापरावतःशोचिर्नमानमस्यथ ।
कस्यक्रत्वामरुतःकस्यवर्पसाकंयाथकंहधूतयः ॥ १ ॥

प्र । यत् । इत्था । पराऽवतः । शोचिः । न । मानम् । अस्यथ ।
कस्य । क्रत्वा । मरुतः । कस्य । वर्पसा । कम् । याथ । कम् ।
ह । धूतयः ॥ १ ॥

हेधूतयः स्थावरादीनांकंपनकारिणोमरुतः यद्यदामानंमननीयंयुष्मद्बलंपरावतोदूरात् आरेपरावतइतिदूरनामसुपाठात् इत्थाअस्मादन्तरिक्षात् प्रास्यथभूमौप्रक्षिपथ तत्रदृष्टान्तः—शोचिर्न तेजइव यथासूर्यस्यतेजोन्तरिक्षाद्भूमौप्रक्षिप्यतेतद्वत् तदानींयूयंकस्ययजमानस्यक्रत्वाक्रतुनासङ्गच्छध्वेइतिशेषः तथाकस्ययजमानस्यवर्पसः स्तोत्रेणसङ्गच्छध्वे कंयजमानमुद्दिश्ययाथदेवयजनदेशेगच्छथ कंह कंखलुयजमानमनुगृह्णीथेतिशेषः॥ इत्था था हेतौचच्छन्दसीतिइदंशब्दात्प्रकारवचनेथाल्प्रत्ययः यदितत्रेदंशब्दस्यनानुवृत्तिः तर्हि थमुप्रत्ययान्तादिदंशब्दादुत्तरस्याविभक्तेर्व्यत्ययेनसुपांसुलुगितिडादेशः प्रथमपक्षेप्रत्ययस्वरः द्वितीयपक्षेतूदात्तनिवृत्तिस्वरः । अस्यथ असुक्षेपणे अदुपदेशाल्लसार्वधातुकानुदात्तत्वेश्यनोनित्त्वादाद्युदात्तत्वम् यद्वृत्तयोगादनिघातः। क्रत्वा जसादिषुछन्दसिवावचनमितिनाभावस्यविकल्पितत्वादभावः । वर्पसा वृङ्संभक्तौ वृङ्शीङ्भ्यांरूपस्वाङ्गयोःपुट्चेत्यसुन् तत्सन्नियोगेनपुडागमश्च नित्त्वादाद्युदात्तत्वम् अत्ररूपाभिधायिनावर्पसःशब्देनदेवतास्वरूपप्रकाशकंस्तोत्रंलक्ष्यते क्रतुनासाहचर्यात् ॥ १ ॥

१. कम्पनकारी मरुद्गण ! जब कि, दूर से आलोक की तरह तुम अपने तेज को इस स्थान पर विकीर्ण करते हो, तब तुम किसके यज्ञद्वारा, किसके स्तोत्र-द्वारा, आकृष्ट होते हो ? कहाँ किस यजमान के पास जाते हो ?

द्वितीयामृचमाह—

स्थि॒रा वः॑ स॒न्त्वायु॑धा परा॒णुदे॑ वी॒ळू उ॒त प्र॑ति॒ष्कभे॑ ।
यु॒ष्माक॑मस्तु॒ तवि॑षी॒ पनी॑यसी॒ मा मर्त्य॑स्य मा॒यिनः॑ ॥ २ ॥

स्थि॒रा । वः॒ । स॒न्तु॒ । आयु॑धा । प॒रा॒ऽनुदे॑ । वी॒ळु । उ॒त । प्र॒ति॒ऽस्कभे॑ ।
यु॒ष्माक॑म् । अ॒स्तु॒ । तवि॑षी । पनी॑यसी । मा । मर्त्य॑स्य । मा॒यिनः॑ ॥२॥

हेमरुतः वःआयुधा युष्माकमायुधानिपराणुदे शत्रूणामपनोदनायस्थिरासन्तु स्थिराणिभवन्तु उतअपिच प्रतिष्कभेशत्रूणांप्रतिबन्धायवीळुसन्तुदृढानिसन्तु युष्माकंतविषीबलं पनीयसीअतिशयेनस्तोतव्यंभवतु मायिनः अस्मासुछद्मचारिणोमर्त्यस्यमनुष्यस्यशत्रोर्माबलं माभवतु॥ स्थिराआयुधा उभयत्रशेश्छन्दसिबहुलमितिशेर्लोपः। पराणुदे णुदप्रेरणे संपदादिलक्षणःक्विप् उपसर्गादसमासेपीतिणत्वम् कृदुत्तरपदप्रकृतिस्वरत्वम्। वीळु सुपांसुलुगितिविभक्तेर्लुक् ईषाअक्षादित्वात्प्रकृतिभावः। प्रतिष्कभे स्कंभुःसौत्रोधातुः संपदादिलक्षणोभावेक्विप् अनिदितामितिनलोपः । पनीयसी पनतिःस्तुत्यर्थः अस्मादौणादिकःकर्मण्यसुन् ततईयसुनि टेरितिटिलोपः उगितश्चेतिङीप् ईयसुनोनित्त्वादाद्युदात्तत्वम् । मायिनः मायाशब्दस्य व्रीह्यादिषुपाठात् व्रीह्यादिभ्यश्चेतिमत्वर्थीयइनिः॥ २ ॥

२. मरुद्गण! शत्रु-विनाश के लिए तुम्हारे हथियार स्थिर हों। साथ ही शत्रुओं को रोकने के लिए कठिन हों। तुम्हारा बल प्रार्थना-पात्र हो। दुराचारी मनुष्यों का बल हमारे पास स्तुति-भाजन न हो।

तृतीयामृचमाह—

परा॑ ह॒ यत्स्थि॒रं ह॒थ नरो॑ व॒र्तय॑था गु॒रु ।
वि या॑थन व॒निनः॑ पृथि॒व्या व्याशाः॒ पर्व॑तानाम् ॥ ३ ॥

परा॑ । ह॒ । यत् । स्थि॒रम् । ह॒थ । नरः॑ । व॒र्तय॑थ । गु॒रु । वि ।
या॒थ॒न॒ । व॒निनः॑ । पृ॒थि॒व्याः । वि । आशाः॑ । पर्व॑तानाम् ॥ ३ ॥

हेनरोनेतारोमरुतः यद्यदास्थिरंवस्तुपराहथवृक्षादिकंपराहतंभग्नंकुरुथ गुरु पाषाणादिकंगुरुत्वोपेतंवर्तयथप्रेरयथ तदानींपृथिव्याःसंबन्धिनः वनिनोवनवतोवृक्षान् वियाथन वियुज्यमध्येगच्छथ अरण्यगतानांनिबिडानांवृक्षाणांमध्येयस्यकस्यापिवृक्षस्यभग्नत्वादितरवृक्षाणांपरस्परवियोगेनप्रौढोमार्गोभवति तथापर्वतानामाशाः पर्वतपार्श्वदिशः विया-

थनवियुज्यगच्छथ ॥ हथ हनहिंसागत्योः अनुदात्तोपदेशेत्यादिनानुनासिकलोपः यद्वृत्तयोगा-
दनिघातः। नरः पादादित्वादामन्त्रितनिघाताभावः। वर्तयथ अदुपदेशाल्लसार्वधातुकानुदात्तत्वे
णिच्स्वरएवशिष्यते यच्छब्दानुषंगान्निघाताभावः। याथन तप्तनप्तनथनाश्चेतिथनादेशः ॥ ३॥

३. नेतृ-स्थानीय मरुतो! जब स्थिर वस्तु को तुम तोड़ते हो, भारी वस्तु को चलाते हो, तब पृथिवी के नव वृक्ष के बीच से और पहाड़ की बगल से तुम जाते हो।

नहिवःशत्रुर्विविदेअधिद्यविनभूम्यांरिशादसः।
युष्माकमस्तुतविषीतनायुजारुद्रासोनूचिदाधृषे ॥ ४ ॥

नहि। वः। शत्रुः। विविदे। अधि। द्यवि। न। भूम्याम्।
रिशादसः। युष्माकम्। अस्तु। तविषी। तना। युजा। रुद्रासः।
नु। चित्। आऽधृषे ॥ ४ ॥

हेरिशादसःशत्रुहिंसकामरुतः अधिद्यविद्युलोकस्योपरिवोयुष्माकंशत्रुर्नहिविविदेनचबभूव
तथाभूम्यामपिशत्रुर्नबभूव हेरुद्रासोरुद्रपुत्रामरुतः युष्माकंएकोनपंचाशत्संख्यानांभवतांयुजायो-
गेनपरस्परैकमत्येनआधृषेवैरिणांसर्वतोधर्षणायतविषीबलंनूचिवक्षिप्रमेवतनास्तु विस्तृताभवतु ॥
विविदे विदसत्तायां लिटिमित्ययस्वरः। द्यवि नहिविविदेभूम्यांचनविविदेइतिचशब्दार्थमती-
तेश्चादिलोपेविभाषेतिमथमायास्तिङ्विभक्तेर्निघातप्रतिषेधः प्राथम्यंचानुषक्तक्रियापेक्षया। रि-
शादसः रिशहिंसायां रिशन्ति हिंसन्तीतिरिशाः इगुपधलक्षणःकः तानदन्तीतिरिशादसः असुन्
आमन्त्रितनिघातः। युजा युजिर्योगे ऋत्विगित्यादिनाक्विन् सावेकाचइतिविभक्तेरुदात्तत्वम्।
रुद्रासः रुद्रशब्देनतत्सम्बन्धिनोमरुतोलक्ष्यन्ते आज्जसेरसुक्। नूचित् ऋचितुनुघेत्यादिनादी-
र्घः। आधृषे ञिधृषाप्रागल्भ्ये संपदादिलक्षणोभावेक्विप् कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ ४ ॥

४. शत्रु-विनाशी मरुद्गण! द्युलोक और पृथिवीलोक में तुम्हारे शत्रु नहीं हैं। रुद्रपुत्र मरुद्गण! तुम इकट्ठे हो। शत्रुओं के दमन के लिए तुम्हारा बल शीघ्र विस्तृत हो।

प्रवेपयन्तिपर्वतान्विविञ्चन्तिवनस्पतीन्।
प्रोआरतमरुतोदुर्मदाइवदेवासःसर्वयाविशा ॥ ५ ॥ १८ ॥

प्र। वेपयन्ति। पर्वतान्। वि। विञ्चन्ति। वनस्पतीन्। प्रो इति।
आरत। मरुतः। दुर्मदाःऽइव। देवासः। सर्वया। विशा ॥५॥१८॥

पर्वतान्मेरुहिमवदादीन् प्रवेपयन्ति मरुतःप्रकर्षेणकम्पयन्ति वनस्पतीन् वटाश्वत्थादीन्वि-विञ्चन्तिपरस्परवियुक्तान्कुर्वन्ति हेमरुतोदेवासोदेवाः सर्वयाविशाप्रजयासहितायूयंमोआरतमक-र्षेणैवसर्वतोगच्छत तत्रदृष्टान्तः—दुर्मदाइव यथामदोन्मत्ताःस्वेच्छयासर्वतःक्रीडन्तितद्वत् ॥ वेपय-न्ति टुवेपृकम्पने वेपमानान्प्रयुङ्क्ते हेतुमण्णिच् । विञ्चन्ति विचिर्पृथग्भावे रुधादित्वाच्छ्नम् श्नसोरल्लोपइत्यकारलोपः । वनस्पतीन् वनानांपतयोवनस्पतयः पारस्करादित्वात्सुट् वनपतिशब्दा-वाद्युदात्तौ उभेवनस्पत्यादिषुयुगपदितिपूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम् । आरत ऋगतौ लङि मध्यमबहुवचनेबहुलंछन्दसीतिशपोलुग्भावः यद्वा लुङ् सर्तिशास्त्यर्तिभ्यश्चेत्यङ् आडजादीना-मित्याडागमःआटश्चेतिवृद्धिः । देवासः आमन्त्रिताद्युदात्तत्वम् । सर्वया सर्वस्यसुपीत्याद्युदात्त-त्वम् । विशा सावेकाचइतिविभक्तेरुदात्तत्वम् ॥ ५ ॥

५. मरुद्गण पहाड़ों को विशेष रूप से कँपाते हैं। वनस्पतियों को अलग-अलग कर देते हैं। देव मरुद्गण! प्रजागण के साथ तुम यथेच्छ उन्मत्तों की तरह सब स्थानों को जाते हो।

॥ इतिप्रथमस्यतृतीयेऽष्टादशोवर्गः ॥ १८ ॥

षष्ठीमृचमाह—

उपो॒रथे॑षु॒पृष॑तीरयुग्ध्वं॒प्रष्टि॒र्वह॑ति॒रोहि॑तः ।
आवो॒यामा॑यपृथि॒वीचि॑दश्रो॒दबी॑भयन्त॒मानु॑षाः ॥ ६ ॥

उपो॒ इति॑ । रथे॑षु । पृष॑तीः । अ॒यु॒ग्ध्व॒म् । प्रष्टि॑ः । व॒ह॒ति॒ । रोहि॑तः ।
आ । व॒ः । यामा॑य । पृ॒थि॒वी । चि॒त् । अ॒श्रो॒त् । अबी॑भयन्त ।
मानु॑षाः ॥ ६ ॥

हेमरुतः रथेषुभवदीयेषुपृषतीः बिन्दुयुक्तामृगीः उपोसामीप्यैनैवअयुग्ध्वं योजितवन्तः प्रष्टिः एतत्संज्ञकोवाहनत्रयमध्यवर्तीयुगविशेषः रोहितःमृगावान्तरजातिर्लोहितवर्णः वहति रथंनयति वोयुष्माकंयामायगमनायपृथिवीचिदन्तरिक्षमपिअश्रोदाभिमुख्येनाशृणोत् अ-नुजानातीत्यर्थः पृथिवीत्यन्तरिक्षनाम पृथिवीभूःस्वयंभ्वितितन्नामसुपाठात् मानुषाः भूलोकव-र्तिनः पुरुषाअबीभयन्त स्वयंभीताःसन्तोऽन्येषामपिभीतिमुत्पादितवन्तः ॥ उपोइतिनिपातद्वय-समुदायात्मकमन्यन्निपातान्तरम् ओदितिप्रगृह्यत्वम् । अयुग्ध्वम् लुङि झलोझलीतिसकारस्य लोपः चोःकुरितिकुत्वम् । रोहितः रुहेरश्चलोवेतिइतन्प्रत्ययान्तोनित्त्वादाद्युदात्तः । यामाय यमेर्भावेघञ् कर्षात्वतइत्यन्तोदात्तत्वेप्राप्तेवृषादिषुपाठादाद्युदात्तत्वम् । अश्रोत् श्रुश्रवणे बहुलं-छन्दसीतिविकरणस्यलुक् । अबीभयन्त ञिभीभये अस्माण्ण्यन्ताल्लुङि भीस्म्योर्हेतुभयेइत्या-

त्मनेपदम् विभेतेर्हेतुभये इत्यात्वस्य विकल्पितत्वात् पक्षे भियोहेतुभयेषुगितिषुक्प्राप्नोति तन्न क्रियते आगमानुशासनस्यानित्यत्वात् णौचङ्युपधाह्रस्वादि ॥ ६ ॥

६. तुम बिन्दु-चिह्नित या विविध-वर्ण विशिष्ट मृगों को रथ में जोतते हो। लोहित मृग वाहनत्रीय-मध्यवर्ती होकर रथ वहन करता है। पृथिवी ने तुम्हारा आगमन सुना है। मनुष्य डरे हैं।

आवोमक्षूतनायकंरुद्राअवोवृणीमहे ।
गन्तानूनंनोवसायथापुरेत्थाकण्वायबिभ्युषे ॥ ७ ॥

आ । वः । मक्षु । तनाय । कम् । रुद्राः । अवः । वृणीमहे । गन्त । नूनम् । नः । अवसा । यथा । पुरा । इत्था । कण्वाय । बिभ्युषे ॥ ७ ॥

हेरुद्रारुद्रपुत्रामरुतः तनायकंअस्मदीयपुत्रार्थंमक्षुशीघ्रंवोयुष्मदीयमवोरक्षणंआवृणीमहे सर्वतः प्रार्थयामः मक्ष्विति क्षिप्रनाममक्षुइतितन्नामसुपाठात् पुरापूर्वस्मिन्कालेकर्मान्तरेषुनोवसा अस्मदीयरक्षणेननिमित्तेनयूयंयथाप्राप्तवन्तः इत्थाअनेनप्रकारेणबिभ्युषेभीतियुक्तायकण्वायमेधाविने यजमानायतदनुग्रहार्थंनूनंक्षिप्रंगन्तप्राप्नुत ॥ मक्षु ऋचितुनुघमक्षुतङ्कुत्रोरुष्याणामितिदीर्घः। तनाय तनोतीतितनः पचाद्यच् वृषादित्वादाद्युदात्तत्वम् यद्वा तनयशब्देअयइत्यस्यलोपश्छान्दसः कमित्येतत्पादान्तेप्रयुज्यमानंपादपूरणं शिशिरंजीवनायकमितिवत् उक्तञ्च—अथापिपदपूरणाःकमीमिद्विितीति। रुद्राः रोदयन्तीतिरुद्राः रोदेर्णिलुक्चेतिरक्प्रत्ययः आमन्त्रिताद्युदात्तत्वम् पादादित्वान्निघाताभावः। गन्त लोटि बहुलंछन्दसीतिशपोलुक् तप्तनबित्यादिनातबादेशः अतः पित्त्वादनुनासिकलोपाभावः। बिभ्युषे बिभेतेर्लिटःक्वसुः वस्वेकाजाद्घसामितिनियमादिडभावः चतुर्थ्येकवचने वसोःसम्प्रसारणमितिसम्प्रसारणंपरपूर्वत्वम् शासिवसिघसीनांचेतिषत्वम् ॥ ७ ॥

७. रुद्रपुत्र मरुतो ! पुत्र के लिए तुम्हारी रक्षण-शक्ति की हम शीघ्र प्रार्थना करते हैं। एक समय हमारी रक्षा के लिए तुम्हारा जो रूप आया था, वही रूप भीरु मेधावी यजमान के पास शीघ्र आवे।

अष्टमीमृचमाह—

युष्मेषितोमरुतोमर्त्येषितआयोनोअभ्वईषते ।
वितंयुयोतशवसाव्योजसावियुष्माकाभिरूतिभिः ॥ ८ ॥

युष्माऽइंषितः । मरुतः । मर्त्यऽइषितः । आ । यः । नः । अभ्वः । ईषते । वि । तम् । युयोत । शवसा । वि । ओजसा । वि । युष्माकाभिः । ऊतिऽभिः ॥ ८ ॥

हेमरुतः योयःकश्चिदभ्वःशत्रुः युष्मेषितःयुष्माभिःप्रेषितः मर्त्येषितःमारकैरन्यैर्वाप्रेषितःसन् नोस्मान्प्रतिआईषते आभिमुख्येनमाप्नोति तंशत्रुंशवसाअन्नेनवियुयोतविभक्तंकुरुत तथा ओजसाबलेनवियुयोत युष्माकाभिरूतिभिः युष्मत्सम्बन्धिभीरक्षणैश्चवियुयोत॥युष्मेषितः युष्माभिरिषितः सुब्लुकि प्रत्ययलक्षणेन युष्मदस्मदोरनादेशेइत्यात्वम् नच नलुमताङ्गस्येतिप्रतिषेधः इकोचिविभक्तावित्यत्राच्ग्रहणेनतस्यपाक्षिकत्वोक्तेः तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरत्वम्। मर्त्येषितः पूर्ववत्। अभ्वः आभवतीत्यभ्वःशत्रुः पृषोदरादित्वादभिमतरूपस्वरसिद्धिः। ईषते ईषगतिहिंसादर्शनेषु अदुपदेशाल्लसार्वधातुकानुदात्तत्वेधातुस्वरः। युयोत युमिश्रणामिश्रणयोः लोण्मध्यमबहुवचनेबहुलंछन्दसीतिशपःश्लुः तप्तनप्तनथनाश्चेतितबादेशः पित्त्वाद्गुणः। युष्माकाभिः युष्मत्सम्बन्धिनीभिः तस्मिन्नणिचयुष्माकास्माकावितियुष्मच्छब्दस्ययुष्माकादेशः ङीपृवृद्धीछान्दसत्वान्नक्रियेते। ऊतिभिः अवतेःक्तिनिज्वरत्वरेत्यादिनाऊठ् ऊतियूतीत्यादिनाक्तिनउदात्तत्वम्॥ ८॥

८. तुम्हारे या किसी अन्य मनुष्य के द्वारा उत्तेजित होकर जो कोई शत्रु हमारे सामने आवे, उसका खाद्य और बल अपहृत करो। अपनी सहायता भी उससे वापस ले लो।

नवमीमृचमाह—

असामिहिप्रयज्यवःकण्वंददप्रचेतसः।
असामिभिर्मरुतआनऊतिभिर्गन्तावृष्टिंनविद्युतः॥ ९॥

असामि। हि। प्रऽयज्यवः। कण्वम्। दद। प्रऽचेतसः।
असामिऽभिः। मरुतः। आ। नः। ऊतिऽभिः। गन्त। वृष्टिम्। न। विऽद्युतः॥ ९॥

असामिहि संपूर्णमेवयथाभवतितथा प्रयज्यवः प्रकर्षेणयष्टव्याः प्रचेतसः प्रकृष्टज्ञानयुक्ताः हेमरुतः कण्वं मेधाविनंयजमानं एतन्नामकमृषिंवाददधारयत हियस्माद्यूयंकण्वनामकमृषिंधारितवन्तः तस्मात्कारणात् असामिभिरूतिभिः सम्पूर्णैरक्षणैर्नोस्मान् प्रत्यागन्तआगच्छत तत्रदृष्टान्तः—वृष्टिंनविद्युतः यथाविद्युतोवृष्टिंगच्छन्तितद्वत्॥ असामि सामर्थ्ये नसामि असामि अव्ययपूर्वपदप्रकृतिस्वरत्वम्। प्रयज्यवः प्रकर्षेणयष्टव्याः यजिमनिशुन्धिदसिजनिभ्योयुरितिकर्मणियुप्रत्ययः आमन्त्रितनिघातः। दद डुदाञ्दाने लोण्मध्यमबहुवचनस्यतिङांतिङोभवन्तीतिलङात्मनेपदप्रथमपुरुषबहुवचनादेशः श्लौद्विर्भावेसति श्नाभ्यस्तयोरातइतिआकारलोपः लोपस्तआत्मनेपदेष्वितितलोपः अवोगुणेइतिपरपूर्वत्वम्

छन्दस्युभयथेत्यार्धधातुकत्वादभ्यस्तानामादिरित्याद्युदात्तत्वंनभवति किन्तु प्रत्ययस्वरएव हिचेतिनिघातप्रतिषेधः । प्रचेतसः प्रकृष्टंचेतोयेषां आमन्त्रितनिघातः । गन्त गमेर्लोण्मध्यमबहुवचनस्यतस्यतबादेशः बहुलंछन्दसीतिशपोलुक् प्रत्ययस्यपित्त्वादनुदात्तत्वे धातुस्वरः पादादित्वान्निघाताभावः द्व्यचोतस्तिङइतिसंहितायांदीर्घत्वम् । विद्युतः विद्योतते इतिविद्युत् भ्राजभासेत्यादिनाक्विप् ॥ ९ ॥

९. मरुद्गण! तुम सब प्रकार से यज्ञ के भोजन और उत्कृष्ट ज्ञान से युक्त हो। तुम कण्व अथवा यजमान को धारण करो। जिस प्रकार बिजली वर्षा लाती है, उसी प्रकार तुम भी अपनी समस्त रक्षण-शक्ति के साथ हमारे पास आओ।

असाम्योजोबिभृथासुदानवोसामिधूतयःशवः ।
ऋषिद्विषेमरुतःपरिमन्यवइषुंनसृजतद्विषम् ॥ १० ॥ ११ ॥

असामि । ओजः । बिभृथ । सुऽदानवः । असामि । धूतयः । शवः ।
ऋषिऽद्विषे । मरुतः । परिऽमन्यवे । इषुम् । न । सृजत ।
द्विषम् ॥ १० ॥ ११ ॥

हेसुदानवः शोभनदानोपेतामरुतः असामिसम्पूर्णमोजोबलंबिभृथधारयथ हेधूतयः कम्पनकारिणोमरुतः असामिसम्पूर्णंशवोबलंपरिमन्यवे कोपपरिवृताय ऋषिद्विषेऋषीणां द्वेषंकुर्वते शत्रवेतद्विनाशार्थं द्विषंद्वेषकारिणंहन्तारंसृजत तत्रदृष्टान्तः—इषुंन यथा शत्रोरुपरिबाणंमुञ्चन्तितद्वत् अत्रनिरुक्तम्—असामिसामिप्रतिषिद्धंसामिस्यतेःअसाम्योजोबिभृथासुदानवः असुसमाप्तंबलंबिभृथकल्याणदानाइति[1] ॥ बिभृथ डुभृञ्धारणपोषणयोः जुहोत्यादित्वाच्छ्लुः भृञामिदित्यभ्यासस्येत्वम् ।ऋषिद्विषे ऋषीन्द्वेष्टीतिऋषिद्विट् सत्सूद्विषेत्यादिना क्विप् । परिमन्यवे मन्युनापरिवृतः परिमन्युः प्रादिसमासे परेरभितोभाविमण्डलमित्युत्तरपदान्तोदात्तत्वम् । इषुं इषगतौ इष्यतिगच्छतीतिइषुः इषेःकिच्चेतिउप्रत्ययः धान्येनिदित्यनुवृत्तेर्नित्त्वादाद्युदात्तत्वम् ।सृजत सृजविसर्गे विकरणस्यङित्त्वाद्गुणाभावः । द्विषं क्विप्चेतिक्विप् ॥ १० ॥

१०. सुशोभन दान से युक्त मरुद्गण! तुम समस्त तेज को धारण करो। हे कम्पन-कर्त्ता मरुतो! तुम सम्पूर्ण बल धारण करो। ऋषि-द्वेषी और क्रोध-परायण शत्रु के प्रति, बाण की तरह, अपना क्रोध प्रेरण करो।

उत्तिष्ठेत्यष्टर्चंपञ्चमंसूक्तं कण्वस्यार्षंबार्हतम् युजःसतोबृहत्यः अयुजोबृहत्यः ब्रह्मणस्पतिदेवताकम् अनुक्रम्यतेच—उत्तिष्ठाष्टौब्राह्मणस्पत्यमिति । सूक्तविनियोगोलैङ्गिकः चतुर्वि-

---

[1] नि० ६. २३.

शेहनिमरुत्वतीयेप्राकृतावब्राह्मणस्पत्याव प्रगाथात्पूर्वंउत्तिष्ठब्रह्मणस्पतइत्ययंप्रगाथः मरुत्व-तीयइतिखण्डेसूत्रितम्—प्रैतुब्रह्मणस्पतिरुत्तिष्ठब्रह्मणस्पतइतिब्राह्मणस्पत्यावावपतेपूर्वौनित्यादिति आघ्रातुमवर्ग्येऽप्यभिष्टवेविनियुक्ता उत्तिष्ठब्रह्मणस्पतइत्येतामुक्त्वावतिष्ठतइतिसूत्रितत्वात् ।

तत्रप्रथमामृचमाह—

उत्तिष्ठब्रह्मणस्पतेदेवयन्तस्त्वेमहे ।
उपप्रयन्तुमरुतःसुदानवइन्द्रप्राशूर्भवासचा ॥ १ ॥

उत् । तिष्ठ । ब्रह्मणः । पते । देवऽयन्तः । त्वा । ईमहे । उप । प्र । यन्तु । मरुतः । सुऽदानवः । इन्द्र । प्राशूः । भव । सचा ॥ १ ॥

हेब्रह्मणस्पते एतन्नामक देव उत्तिष्ठ अस्मदनुग्रहायत्वदीयनिवासादुत्थानंकुरु देवयन्तोदेवान्कामयमानावयं त्वात्वामीमहे याचामहे सुदानवः शोभनदानयुक्तामरुतः उपप्रयन्तु समीपेप्रकर्षेणगच्छन्तु हेइन्द्र त्वं सचाब्रह्मणस्पतिनासहप्राशूः सोमस्यप्राशकोभव यद्वा वृत्रस्यहिंसकोभव ॥ उत्तिष्ठ ऊर्ध्वकर्मत्वादात्मनेपदाभावः । ब्रह्मणस्पते सुबामन्त्रितइति पराङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायस्याष्टमिकंसर्वानुदात्तत्वम् । देवयन्तः देवानात्मनइच्छन्तः सुपआत्मनःक्यच् नच्छन्दस्यपुत्रस्येतीत्वस्येवदीर्घस्यापिनिषेधः अश्वाघस्यादिति पुनरात्वविधानसामर्थ्यात् । ईमहइत्यादयोगताः । प्राशूः शॄहिंसायां प्रकर्षेण आसमन्तात् शृणातिहिनस्तीतिप्राशूः बहुलंछन्दसीत्युत्वम् वोरुपधायादीर्घः कृदुत्तरपदप्रकृतिस्वरत्वम् । भव द्व्यचोतस्तिङइतिसंहितायांदीर्घत्वम् ॥ १ ॥

१. ब्रह्मणस्पति ! उठो । देव-कामनाकारी हम तुम्हारी याचना करते हैं । शोभन और दाता मरुद्गण के पास होकर जाओ । इन्द्र ! तुम साथ में रहकर सोमरस सेवन करो ।

द्वितीयामृचमाह—

त्वामिद्धिसहसस्पुत्रमर्त्यउपब्रूतेधनेहिते ।
सुवीर्यंमरुतआस्वश्व्यंदधीतयोवआचके ॥ २ ॥

त्वाम् । इत् । हि । सहसः । पुत्र । मर्त्यः । उपऽब्रूते । धने । हिते । सुऽवीर्यम् । मरुतः । आ । सुऽअश्व्यम् । दधीत । यः । वः । आऽचके ॥ २ ॥

हेसहसस्पुत्र बलस्यबहुपालक ब्रह्मणस्पते पुत्रःपुरुत्रायतेनिपरणाद्वेतिनिरुक्तम् । मर्त्योमनुष्यः हितेशत्रुषुप्रक्षिप्तेधनेनिमित्तभूतेसति त्वामित् त्वामेवोपब्रूतेहि समीपंप्राप्य स्तौतिखलु तद्धनसंपादनायप्रार्थयतइत्यर्थः हेमरुतः योधनार्थीमर्त्यः वोयुष्मान्ब्रह्मणस्पति-सहितान् आचके स्तौति समर्त्यः स्वश्व्यंशोभनाश्वयुक्तं सुवीर्यंशोभनवीर्ययुक्तंचधनंद-धीतधारयेत् ॥ सहसस्पुत्र ब्रह्मणस्पते इतिवषष्ठ्याःपतिपुत्रेतिविसर्जनीयस्यसत्वम् । उप-ब्रूते हिचेतिनिघातप्रतिषेधः तिङिचोदात्तवतीतिगतेरनुदात्तत्वम् । हिते निष्ठायां दधाते-र्हिरितिहिरादेशः । सुवीर्यं शोभनंवीर्यंयस्येतिबहुव्रीहौ वीरवीर्यौचेत्युत्तरपदाद्युदात्तत्वम् । स्व-श्व्यं अश्वानां समूहोश्वीयं केशाश्वाभ्यांयञ्छावन्यतरस्यामितिसमूहार्थेछप्रत्ययः छस्य ईयादेशः शोभनमश्वीयंयस्यतत्स्वश्व्यम् ईकारलोपश्छान्दसः परादिश्छन्दसिबहुलमिति उत्तरपदाद्युदात्तत्वम् । दधीत सीयुटःसकारस्यलोपेसतिअभ्यस्तानामादिरित्याद्युदात्तत्वम् पादादित्वान्निघाताभावः । आचके कैगैरैशब्दे आदेचइत्यात्वम् लिटिद्विर्वचनेअभ्यासस्यह्र-स्वचुत्वे आतोलोपइटिचेत्याकारलोपः प्रत्ययस्वरः यद्वृत्तयोगादनिघातः ॥ २ ॥

२. हे बहुबल-पालक ब्रह्मणस्पति देवता ! शत्रुओं के बीच प्रक्षिप्त धन के लिए मनुष्य तुम्हारी ही स्तुति करता है। मरुद्गण ! जो मनुष्य तुम्हारी स्तुति करता है, वह सुशोभन अश्व और वीर्य से युक्त धन पाता है।

चतुर्विंशेहनिमरुत्वतीयेउत्तिष्ठब्रह्मणस्पतेइत्यस्मात्प्रगाथात्पूर्वं प्रैतुब्रह्मणस्पतिरित्ययंप्र-गाथोविनियुक्तः सूत्रंतूत्तिष्ठब्रह्मणस्पतइत्यत्रैवोदाहृतम् महावीरमादायशालांप्रतिगच्छत्सु प्रैतुब्रह्मणस्पतिरित्येतांपठन्होतानुगच्छेत् सूत्रञ्च प्रैतुब्रह्मणस्पतिरित्यनुव्रजेदिति एषैवाग्नीषो-मीयमणयनेपिविनियुक्ता सूत्रितंच—प्रैतुब्रह्मणस्पतिर्होतादेवोअमर्त्यइति ।

प्रैतुब्रह्मणस्पतिःप्रदेव्येतुसूनृता ।
अच्छावीरंनर्यंपङ्क्तिराधसंदेवायज्ञंनयन्तुनः ॥ ३ ॥

प्र । एतु । ब्रह्मणः । पतिः । प्र । देवी । एतु । सूनृता । अच्छ । वीरम् । नर्यम् । पङ्क्तिऽराधसम् । देवाः । यज्ञम् । नयन्तु । नः ॥३॥

ब्रह्मणस्पतिर्देवःप्रैतुअस्मान्प्राप्नोतु सूनृतादेवीप्रियसत्यरूपावाग्देवताप्रैतुअस्मान्प्राप्नोतु देवाः ब्रह्मणस्पत्यादयोदेवाःवीरंशत्रुंनिःशेषेणद्वूरेमेरयन्तु तंनर्यंमनुष्येभ्योहितंपङ्क्तिराधसंब्राह्म-णोक्तहविष्पङ्क्त्यादिभिःसमृद्धंयज्ञंप्रति नोस्मान्अच्छआभिमुख्येननयन्तु ॥ प्रैतु एङिपररू-

१ नि०२. ११.।

पमितिपररूपेप्राप्ते एत्येधत्यूठ्सुइतिवृद्धिः । देव्येत्वित्यत्र उदात्तस्वरितयोर्यणःस्वरितोनुदात्तस्येतिस्वरितत्वम्। नर्यं नरेभ्योहितम् प्राक्क्रीतीयउगवादिलक्षणोयत्प्रत्ययोद्रष्टव्यः। पङ्क्तिराधसं पङ्क्तिभीराध्नोतीतिपङ्क्तिराधाः गतिकारकयोरपिपूर्वपदप्रकृतिस्वरत्वंचेत्यसुन्पूर्वपदप्रकृतिस्वरत्वंच। यज्ञं यजयाचेत्यादिनायजतेर्नङ् ॥ ३ ॥

३. ब्रह्मणस्पति या बृहस्पति हमारे पास आवें। सत्यदेवी आवें। देवता लोग वीर शत्रु को दूर करें। हमें हितकारी और हव्य-युक्त यज्ञ में ले जायँ।

योवाघतेददातिसूनरंवसुसधत्तेअक्षितिश्रवः।
तस्माइळांसुवीरामायजामहेसुप्रतूर्तिमनेहसम् ॥ ४ ॥

यः। वाघते। ददाति। सूनरम्। वसु। सः। धत्ते। अक्षिति। श्रवः। तस्मै। इळाम्। सुऽवीराम्। आ। यजामहे। सुऽप्रतूर्तिम्। अनेहसम् ॥ ४ ॥

योयजमानोवाघतेऋत्विजेसूनरंसुष्ठुनेतव्यंवसुधनंददाति सयजमानोब्रह्मणस्पतेःप्रसादादक्षितिक्षयरहितंश्रवोन्नंधत्तेधारयति तस्मैतादृशाययजमानायइळांएतन्नामधेयांमनोःपुत्रीं इडावैमानवीयज्ञानूकाशिन्यासीदितिश्रुत्यन्तरात्। आयजामहे वयमृत्विजःसर्वतोयजामः कीदृशीमिळां सुवीरांशोभनैर्वीरैर्भटैर्युक्तां सुप्रतूर्तिंसुष्ठुप्रकर्षेणहिंसाकारिणीम् अनेहसं केनाप्यहिंस्याम् ॥ ददाति अनुदात्तेचेत्यभ्यस्तस्याद्युदात्तत्वम् यद्वृत्तयोगादनिघातः। सूनरं सुखेननीयतइतिसूनरम् ईषद्दुःसुष्विितिखल् निपातस्यचेत्युपसर्गस्यदीर्घत्वम्। अक्षिति क्षयोनास्त्यस्येत्यक्षिति बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् नञ्सुभ्यामितितुसर्वेविधयश्छन्दसिविकल्प्यन्तेइतिवचनान्नप्रवर्तते। श्रवः श्रूयतइतिश्रवः श्रुश्रवणे असुनोनित्त्वादाद्युदात्तत्वम्। सुवीराम् शोभनावीरायस्याःसासुवीरा तां वीरवीर्यौचेत्युत्तरपदाद्युदात्तत्वम्। सुप्रतूर्तिम् तुर्वीहिंसार्थः प्रपूर्वादस्माद्भावेक्तिन् शोभनाप्रतूर्तिःशत्रूणांहिंसनंयस्याःसा तां परादिश्छन्दसिबहुलमित्युत्तरपदाद्युदात्तत्वम् क्रत्वादिर्वाद्रष्टव्यः। अनेहसं नहन्यतइत्यनेहाः नञिहनएहचेत्यसुन्प्रत्ययःधावोरेहादेशश्च नलोपोनञइतिनकारस्यलोपः तस्मान्नुडचीतिनुट् ॥ ४ ॥

४. जो मनुष्य ऋत्विक् के ग्रहण-योग्य धन-दान करता है, वह अक्षय अन्न प्राप्त करता है। उसके लिए हम लोग इला के पास याचना करते हैं। इला सुवीरा है। वह शत्रु का हनन करती है। उन्हें कोई नहीं मार सकता।

अग्निष्टोमेमरुत्वतीयशस्त्रेइन्द्रनिहवप्रगाथानन्तरंप्रनूनमितिप्रगाथः मरुत्वतीयेनेतिखण्डेसूत्रितम्—प्रनूनंब्रह्मणस्पतिरितिब्राह्मणस्पत्यइति।[1]

1 तै० ब्रा० २. ४. ४.।

प्रगाथेप्रथमांसूक्तेपञ्चमीमृचमाह—

प्रनूनंब्रह्मणस्पतिर्मन्त्रंवदत्युक्थ्यम् ।
यस्मिन्निन्द्रोवरुणोमित्रोअर्यमादेवाओकांसिचक्रिरे ॥ ५॥२०॥

प्र । नूनम् । ब्रह्मणः । पतिः । मन्त्रम् । वदति । उक्थ्यम् । यस्मिन् ।
इन्द्रः । वरुणः । मित्रः । अर्यमा । देवाः । ओकांसि । चक्रिरे ॥५॥२०

ब्रह्मणस्पतिर्देवः उक्थ्यंशस्त्रयोग्यंमन्त्रंनूनमवश्यंप्रवदति होतृमुखेस्थितःसन्प्रब्रूते यस्मिन्म-न्त्रेइन्द्रादयश्चसर्वेदेवाःओकांसिस्थानानिचक्रिरे तादृशंसर्वदेवप्रतिपादकंमन्त्रमितिपूर्वत्रान्वयः ॥ मन्त्रं मन्त्रिगुप्तभाषणे पचाद्यच् वृषादिषुपाठादाद्युदात्तत्वम् । उक्थ्यं उक्थार्हं छन्दसिचेत्यर्हा-र्थेयप्रत्ययः यद्वा भवेछन्दसीतियत् सर्वेविधयश्छन्दसिविकल्प्यन्तेइतिवचनाद्यतोनावइत्याद्युदा-त्तत्वाभावेव्यत्ययेनतित्स्वरितमितिस्वरितत्वम् । ओकांसि उचसमवाये समवयन्त्यत्रेत्यधिकर-णेऔणादिकोसुन् बहुलग्रहणात्कुत्वंप्रष्टव्यमितिओकउचःकइत्यत्रवृत्तावित्युक्तम् । चक्रिरे इरेचश्चित्त्वादन्तोदात्तत्वम् यद्वृत्तयोगादनिघातः ॥ ५ ॥

५. ब्रह्मणस्पति अवश्य ही पवित्र मंत्र का उच्चारण करते हैं। उस मंत्र में इन्द्र, वरुण, मित्र और अर्यमा देवता अवस्थान करते हैं ।

॥ इतिप्रथमस्यतृतीयेविंशोवर्गः ॥ २० ॥

षष्ठीमृचमाह—

तमिद्वोचेमाविदथेषुशंभुवंमन्त्रंदेवाअनेहसम् ।
इमांचवाचंप्रतिहर्यथानरोविश्वेद्वामावोअश्नवत् ॥ ६ ॥

तम् । इत् । वोचेम । विदथेषु । शम्ऽभुवम् । मन्त्रम् । देवाः ।
अनेहसम् । इमाम् । च । वाचम् । प्रतिऽहर्यथ । नरः ।
विश्वा । इत् । वामा । वः । अश्नवत् ॥ ६ ॥

हेदेवाब्रह्मणस्पतिप्रमुखयः तमित् तमेवेन्द्रादिसर्वदेवताप्रतिपादकंमन्त्रंविदथेषुयज्ञेषुवोचेमवय-मृत्विजोब्रवाम कीदृशं शम्भुवं सुखस्यभावयितारं अनेहसं अहिंसनीयंदोषरहितंहेनरोनेतारोदेवाः इमामस्माभिरुच्यमानांमन्त्ररूपांवाचंप्रतिहर्यथच यूयंकामयध्वेचेत्तर्हिविश्वेवसर्वापिवामा वननी-यावाक्वोयुष्मानश्नवत्व्याप्नुयात् ॥ वोचेम वचपरिभाषणे आशीर्लिङि लिङ्याशिष्यङित्यङ् वचउमित्युमागमः छन्दस्युभयथेतिसार्वधातुकत्वात् लिङःसलोपोनन्त्यस्येतियासुटःसकारस्य

लोपः अतोयेयइतीयादेशःआद्गुणः तिङ्ङतिङइतिनिघातः। विदथेषु विदज्ञाने विद्यतेफलसाधनत्वे-नज्ञायतेइतिविदथोयज्ञः रुविदिभ्यांकिदित्यथप्रत्ययः। शम्भुवम् भवतेरन्तर्भावितण्यर्थात् कि-प्चेतिक्विप् ओःसुपीतियणादेशस्य नभूसुधियोरितिप्रतिषेधः। मन्त्रादयोगताः। प्रतिहर्यथ हर्य-गतिकान्त्योः शपःपित्त्वादनुदात्तत्वम् तिङश्चलसार्वधातुकस्वरेणाद्युदात्तत्वम् इमांचेत्यत्रचशब्द-श्चेदर्थः। चणितिनिपातान्तरम् नचसमुच्चयार्थश्चकारः तेननिपातैर्यद्यदिहन्तकुविन्नेच्चेच्चणइ-तिनिघातप्रतिषेधः। अश्नवत् अशूव्याप्तौ लेटचडागमः व्यत्ययेनपरस्मैपदं इतश्चलोपइतीकार-लोपः इयङुवङ्भ्यांगुणवृद्धीभवतोविप्रतिषेधेनेतिगुणः॥ ६॥

६. देवगण! सुख के लिए उस हिंसा-द्वेष-शून्य मंत्र का यज्ञ में हम उच्चारण करते हैं। हे नेतृ-गण! यदि तुम इस वाक्य की इच्छा करते हो, तो सारे शोभनीय वचन तुम्हारे पास जायेंगे।

कोदेवयन्तमश्नवज्जनंकोवृक्तबर्हिषम्।
प्रप्रदाश्वान्पस्त्याभिरस्थितान्तर्वावत्क्षयंदधे॥ ७॥

कः। देवऽयन्तम्। अश्नवत्। जनम्। कः। वृक्तऽबर्हिषम्।
प्रऽप्र। दाश्वान्। पस्त्याभिः। अस्थित। अन्तःऽवावत्।
क्षयम्। दधे॥ ७॥

देवयन्तंदेवान्कामयमानंजनंकः अश्नवत् ब्रह्मणस्पतिव्यतिरिक्तःकोनामदेवोव्याप्नुयात् त-थावृक्तबर्हिषं अनुष्ठानायछिन्नबर्हिषंयजमानंकोनामान्योदेवोश्नवत् दाश्वान्हविर्दत्तवान् यजमानः पस्त्याभिःमनुष्यैर्ऋत्विग्भिःसह प्रप्रास्थितदेवयजनदेशंप्रतिप्रस्थितवान् अन्तर्वावत् अन्तःस्थितं बहुधनोपेतं यद्वा अन्तःस्थितपुत्रपौत्रादिप्रयुक्तबहुविधगुणोपेतंक्षयंनिवासस्थानं गृहंदधेधृतवान् भवति॥ देवयन्तमित्यादयोगताः। प्रप्र प्रसमुपोदःपादपूरणेइतिप्रशब्दस्यद्विर्भावः अनुदात्तंचेत्याम्रेडितानुदात्तत्वम्। अस्थित ष्ठागतिनिवृत्तौ लुङि समवप्रविभ्यःस्थइत्यात्म-नेपदम् स्थाघ्वोरिच्चेतिधातुसिचोरित्वकित्त्वे ह्रस्वादङ्गादितिसलोपः। अन्तर्वावत् वागतिग-न्धनयोः अन्तर्वान्तिगच्छन्तीतिअन्तर्वाःपुत्रपश्वादयः आतोमनिन्नित्यादिनाविच् तदस्या-स्तीतिमतुप् मतुपःपित्त्वादनुदात्तत्वेकृदुत्तरपदप्रकृतिस्वरत्वम् यद्वा वावदीतेःक्विप्। क्षयं क्षि-यन्तिनिवसन्त्यस्मिन्निविक्षयः ... सिसंज्ञायामित्यधिकरणेघः क्षयोनिवासेइत्याद्युदात्तत्वम्॥ ७॥

७. जो देवों की अभिलाषा करते हैं, उनके पास ब्रह्मणस्पति को छोड़कर कौन आवेगा? जो यज्ञ के लिए कुश तोड़ते हैं, उनके पास ब्रह्मणस्पति को छोड़कर कौन आवेगा? ऋत्विकों के साथ द्रव्य-दाता यजमान यज्ञ-भूमि के लिए प्रस्थान कर चुके हैं और अन्तःस्थित बहुधन-युक्त घर में गमन भी कर चुके हैं।

उप॑क्ष॒त्रंपृ॑ञ्ची॒तहन्ति॒राज॑भिर्भ॒येचि॑त्सुक्षि॒तिंद॑धे ।
नास्य॑व॒र्तान॑त॒रु॒ता म॑हाध॒नेनार्भे॑अस्तिव॒ज्रिणः॑ ॥ ८ ॥ २१ ॥

उप॑ । क्ष॒त्रम् । पृ॒ञ्ची॒त । हन्ति॑ । राज॑ऽभिः । भ॒ये । चि॒त् ।
सु॒ऽक्षि॒तिम् । द॒धे । न । अ॒स्य॒ । व॒र्ता । न । त॒रु॒ता । म॒हा॒ऽध॒ने ।
न । अर्भे॑ । अ॒स्ति॒ । व॒ज्रिणः॑ ॥ ८ ॥ २१ ॥

ब्रह्मणस्पतिर्देवः क्षत्रंबलंउपपृञ्चीतस्वात्मनिसंपृक्तंकुर्यात् ततोराजभिर्वरुणादिभिःसह-हन्ति शत्रून्मारयति भयेचिद्भीतिहेतावपियुद्धेपिसुक्षितिंदधे सुष्ठुनिवासस्थैर्यंधारयतिनतुपलाय-ते वज्रिणोवज्राद्यायुधवतोस्यब्रह्मणस्पतेर्महाधनेमभूतधननिमित्तयुद्धेवर्तामवर्तयिताअन्यः को-पिनास्ति स्वयमेवप्रवर्ततइत्यर्थः महाधनइतिसंग्रामनाम महाधनेसमीकेइतितन्नामसुपाठात् त-था तरुता तरणस्योल्लङ्घनस्यकर्ताअन्यःकोपिनास्ति तथैवार्भेस्वल्पेयुद्धेप्यन्यःप्रवर्तयितानास्ति॥पृञ्चीत पृचीसंपर्के लङ्रुधादित्वाच्छ्नम् श्नसोरल्लोपइतिअकारलोपः प्रत्ययस्वरः। क्षत्रं पृञ्चीतराजभिर्हन्तिचेतिसमुच्चयलक्षणस्यचार्थस्यदर्शनाच्चादिलोपेविभाषेतिप्रथमायास्तिङ्वि-भक्तेर्निघातप्रतिषेधः हन्तीत्येषाद्वितीयापितिङःपरत्वान्ननिहन्यते। सुक्षितिः शोभनाक्षितिः सुक्षितिः मन्क्तिन्नित्यादिनोत्तरपदान्तोदात्तत्वम्। वर्ता वर्ततेर्वृणोतेर्वातृचिआगमानुशासनस्या-नित्यत्वादिडभावः। तरुता तॄप्लवनतरणयोः ग्रसितस्कभितेत्यादिनातृच्युडागमोनिपातितः चि-त्वइत्यन्तोदात्तत्वम्। महाधने महच्चधनंचमहाधनम् आन्महतइत्यात्वम् तेनशब्देनतद्धेतुभूतःसं-ग्रामोलक्ष्यते। अर्भे ऋगतौ अर्तिगृभ्यांभन्नितिभन्प्रत्ययः नित्त्वादाद्युदात्तत्वम् ॥ ८ ॥

८. अपने शरीर में ब्रह्मणस्पति बल संचय करें। राजाओं के साथ वे शत्रु का विनाश करते हैं और भय के समय वे अपने स्थान पर रहते हैं। वे वज्रधारी हैं। महाधन के लिए बड़े या छोटे युद्ध में उन्हें कोई उत्साहित और निरुत्साहित करनेवाला नहीं है।

यंरक्षन्तीतिनवर्चंषष्ठंसूक्तम् तत्रानुक्रमणम्—यंरक्षन्तिनववरुणमित्रार्यम्णांमध्येतृचआ-दित्येभ्योगायत्रंहीति। घोरपुत्रःकण्वऋषिः इदमादीनित्रीणिसूक्तानिगायत्राणि आद्यन्तयोस्तृच-योर्वरुणमित्रार्यमणोदेवताः मध्यतृचस्यसुगःपन्थाइत्यस्यादित्यादेवताः गतोविनियोगः।

यंरक्ष॑न्ति॒प्रचे॑तसो॒वरु॑णो॒मि॒त्रोअ॑र्य॒मा । नू॒चि॒त्सद॑भ्यते॒जनः॑ ॥ १ ॥

यम् । रक्ष॑न्ति । प्रऽचे॑तसः । वरु॑णः । मि॒त्रः । अ॒र्य॒मा । नु ।
चि॒त् । सः । द॒भ्य॒ते॒ । जनः॑ ॥ १ ॥

प्रचेतसः प्रकृष्टज्ञानयुक्तावरुणादयोदेवायंयजमानंरक्षन्ति सजनोयजमानोनूचिवक्षिप-मेवदभ्यते दभ्नोति शत्रून्हिनस्ति ॥ प्रचेतसः प्रकृष्टंचेतोयेषां बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । नूचिव् ऋचितुनुघेत्यादिनादीर्घः । दभ्यते दम्भुदम्भे व्यत्ययेनश्यन् आत्मनेपदंच ॥ १ ॥

१. उत्कृष्ट ज्ञान से सम्पन्न वरुण, मित्र और अर्यमा जिसकी रक्षा करते हैं, उसे कोई नहीं मार सकता।

यंबा॒हुते॑व॒पिप्र॑ति॒पान्ति॒मर्त्यं॑रि॒षः । अरि॑ष्टः॒सर्व॑एधते ॥ २ ॥

यम् । बा॒हुता॑ऽइव । पिप्र॑ति । पान्ति॑ । मर्त्य॑म् । रि॒षः । अरि॑ष्टः । सर्वः॑ । ए॒ध॒ते ॥ २ ॥

यंयजमानं पिप्रतिवरुणादयोदेवाःधनैःपूरयन्ति तत्रदृष्टान्तः—बाहुतेव स्वकीयोबाहु-वर्गोपेक्षितंधनमानीययथापूरयति तद्वत् तथायंमर्त्यंमनुष्यं यजमानं रिषोहिंसकात् पान्तिरक्ष-न्तिससर्वोयजमानः अरिष्टः केनाप्यहिंसितःसन् एधतेवर्धते ॥ बाहुतेव बाहुताबाहुत्वं भाववा-चिनानेनशब्देन बाहवस्तदाश्रयालक्ष्यन्ते यद्वा समूहार्थेतल्प्रत्ययोद्रष्टव्यः लितीतिप्रत्ययात्पू-र्वस्योदात्तत्वम् । पिप्रति पृपालनपूरणयोः पृइत्येके जुहोत्यादित्वात्श्लुः अर्तिपिपर्त्योश्चेत्यभ्या-सस्येत्वम् अभ्यस्तानामादिरित्याद्युदात्तत्वम् । पान्ति तिङःपरत्वात्पादादित्वाद्वानिघाताभावः। रिषः रिषहिंसायाम् क्विप्चेतिक्विप् सावेकाचइतिविभक्तेरुदात्तत्वम् । अरिष्टः रिषहिंसायाम् एकाचइ-तीट्प्रतिषेधः व्रश्चादिनाषत्वम् नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥ २ ॥

२. वे जिसको अपने हाथ से धन-युक्त करते और हिंसक से बचाते हैं, वह मनुष्य किसी के द्वारा हिंसित न होकर वृद्धि पाता है।

विदु॒र्गावि॒द्विषः॑पु॒रोघ्नन्ति॒राजा॑नएषाम् । नय॑न्तिदु॒रि॒ता॒ति॒रः ॥ ३ ॥

वि । दुः॒ऽगा । वि । द्विषः॑ । पु॒रः । घ्नन्ति॑ । राजा॑नः । ए॒षा॒म् । नय॑न्ति । दुः॒ऽइ॒ता । ति॒रः ॥ ३ ॥

राजानोवरुणादयएषां स्वकीययजमानानांपुरः पुरस्ताद्दुर्गागन्तुंदुःशकानि शत्रुनग-राणि विघ्नन्तिविशेषेणनाशयन्ति तथा द्विषःशत्रूनपिघ्नन्ति तथा दुरितायजमानसम्बन्धी-निदुरितानि तिरोनयन्ति विनाशं मापयन्ति ॥ दुर्गा दुःखेनगच्छन्त्यत्रेतिदुर्गाणि सुदुरोरधिकर-णेइतिगमेर्डप्रत्ययः शेश्छन्दसिबहुलमितिशेर्लोपः । पुरः कालवाचिनःपूर्वशब्दात्सप्तम्यर्थे पूर्वा-धरावराणामिति असिप्रत्ययः तत्सन्नियोगेनपूर्वशब्दस्यपुरादेशश्च प्रत्ययस्वरः । घ्नन्ति हन्तेर्ल-टि अदादित्वाच्छपोलुक् गमहनेत्यादिनोपधालोपः होहन्तेरितिघत्वम् अन्तादेशस्योपदेशवच-नादाद्युदात्तत्वम् पादादित्वादनिघातः ॥ ३ ॥

३. वरुण आदि राजन्य वैसे मनुष्यों के लिए शत्रुओं का क़िला विनष्ट करते हैं; साथ ही शत्रुओं का भी विनाश करते हैं। अनन्तर वैसे मनुष्यों का पाप-मोचन भी कर डालते हैं।

चतुर्थीमृचमाह—

सुगःपन्थाअनृक्षरआदित्यासऋतंयते । नात्रावखादोअस्तिवः ॥४॥

सुऽगः । पन्थाः । अनृक्षरः । आदित्यासः । ऋतम् । यते । न ।
अत्र । अवऽखादः । अस्ति । वः ॥ ४ ॥

हेआदित्यासोऋतंयते यज्ञंगच्छते भवत्समूहायपन्थामार्गः सुगःसुष्ठुगन्तुंशक्यः अनृक्षरः कण्टकरहितश्च अत्रास्मिन्कर्मणिवोयुष्माकं अवखादः अवमन्तव्यःखादोजुगुप्सितहविर्विशेषोनास्ति तस्मादिहागन्तव्यमित्यर्थः ॥ सुगः सुदुरोरधिकरणेइतिगमेर्डप्रत्ययः । पन्थाः पथिमथोःसर्वनामस्थानेइत्याद्युदात्तत्वम् । अनृक्षरः ऋषीगतौ ऋषन्ति अन्तर्गच्छन्तीत्यृक्षराःकण्टकाः तन्यृषिभ्यांक्सरन्इतिक्सरन्प्रत्ययः कित्त्वाद्गुणाभावः कत्वषत्वे यास्कस्त्वाह—ऋक्षरःकण्टकऋच्छतेरिति[1] । नविद्यन्तेऋक्षराअस्मिन्नित्यनृक्षरः नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । आदित्यासः अदितेः पुत्राआदित्याः दित्यदित्यादित्येत्यादिना ण्यप्रत्ययः आज्जसेरसुक् आमन्त्रिताद्युदात्तत्वम् पादादित्वादाष्टमिकनिघाताभावः।यते इण्गतौ लटःशतृ अदादित्वाच्छपोलुक् इणोयणितियणादेशः शतुरनुमइतिविभक्तेरुदात्तत्वम् । अवखादः खादृभक्षणे भावेघञ् अवमतःखादोवखादः थाथादिना उत्तरपदान्तोदात्तत्वम् ॥ ४ ॥

४. आदित्यगण ! तुम्हारे यज्ञ में पहुँचने का मार्ग सुख-गम्य और कण्टक-रहित है। इस यज्ञ में तुम्हारे लिए बुरा खाद्य नहीं तैयार होता।

यंयज्ञंनयथानरआदित्याऋजुनापथा । प्रवःसधीतयेनशत् ॥५॥२२॥

यम् । यज्ञम् । नयथ । नरः । आदित्याः । ऋजुना । पथा ।
प्र । वः । सः । धीतये । नशत् ॥ ५ ॥ २२ ॥

हेनरोनेतारआदित्याः यंयज्ञंऋजुनापथा अविकलेनमार्गेणनयथपारंप्रापयथ सयज्ञः वोधीतयेयुष्मत्पानायउपभोगायप्रणशत्प्राप्नोतु ॥ नयथ अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः यद्वृत्तयोगादनिघातः अन्येषामपिदृश्यतइतिसंहितायांदीर्घत्वम् । पथा तृतीयैकवचने भस्यटेर्लोपइतिटिलोपः अनुदात्तस्यचयत्रोदात्तलोपइतिविभक्तेरुदात्तत्वम् । धीतये धेट्पाने आदेचइत्यात्वम् क्तिचि घुमास्थेतीत्वम् । नशत् नशतिर्गत्यर्थः लेटचडागमः इतश्चलोपइतीकारलोपः ॥ ५ ॥

५. नेतृ-स्थानीय आदित्यगण ! जिस यज्ञ में तुम सरल मार्ग से आते हो, उस यज्ञ में तुम्हें उपभोग प्राप्त हो।

॥ इतिप्रथमस्यतृतीयेद्वाविंशोवर्गः ॥ २२ ॥

---

[1] नि० ६. ३२।

षष्ठीमृचमाह—

सरत्नंमर्त्योवसुविश्वंतोकमुतत्मना । अच्छागच्छत्यस्तृतः ॥ ६ ॥

सः । रत्नम् । मर्त्यः । वसु । विश्वम् । तोकम् । उत । त्मना ।

अच्छ । गच्छति । अस्तृतः ॥ ६ ॥

हेआदित्याः सतादृशोभवद्भिरनुगृहीतोमर्त्योमनुष्योयजमानः अस्तृतः केनाप्यहिंसितःसन् रत्नंरमणीयं विश्वंवसु सर्वंधनं अच्छआभिमुख्येनगच्छतिप्राप्नोति उतअपिच त्मनास्वेनसदृशंतोकमपत्यंगच्छति ॥ त्मना मन्त्रेष्वाङ्यादेरात्मनइतिआकारलोपः । अच्छ निपातस्यचेतिदीर्घत्वम् । अस्तृतः स्तृञ्हिंसायाम् नस्तृतः अस्तृतः अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥ ६ ॥

६. आदित्यगण! वह तुम्हारा अनुगृहीत मनुष्य किसी के द्वारा हिंसित न होकर सारा रमणीय धन सामने ही प्राप्त करता है। साथ ही अपने सदृश अपत्य भी प्राप्त करता है।

कथाराधामसखायःस्तोमंमित्रस्यार्यम्णः । महिप्सरोवरुणस्य ॥ ७॥

कथा । राधाम । सखायः । स्तोमम् । मित्रस्य । अर्यम्णः ।

महि । प्सरः । वरुणस्य ॥ ७ ॥

हेसखायः सखिभूताऋत्विजः मित्रादीनां त्रयाणां महि महत् प्सरोरूपं अतस्तदनुरूपंस्तोमंस्तोत्रं कथाकेनप्रकारेणराधामसाधयामः ॥ कथा थाहेतौचच्छन्दसीतिकिंशब्दात्प्रकारवचनेथुप्रागिदिशोविभक्तिरितिविभक्तिसंज्ञायां किमःकइतिकादेशः प्रत्ययस्वरः । राधाम राधसाधसंसिद्धौ लेटिबहुलंछन्दसीतिविकरणस्यलुक् तिङ्ङतिङइतिनिघातः । स्तोमं ष्टुञ्स्तुतौ अर्तिस्तुस्वित्यादिनाभावेमन् नित्त्वादाद्युदात्तत्वम् । अर्यम्णः षष्ठ्येकवचने अल्लोपोनइत्यकारलोपेउदात्तनिवृत्तिस्वरेणविभक्तेरुदात्तत्वम् । महि महपूजायां औणादिकइन्प्रत्ययः । प्सरः प्साभक्षणे प्सातिभक्षयतीतिप्सरोरूपम् औणादिकोऽरप्रत्ययः ॥ ७ ॥

७. सखा लोग! मित्र, अर्यमा और वरुण के महत्त्व के अनुकूल स्तोत्र किस तरह हम साधित करेंगे?

मावोघ्नन्तंमाशपन्तंप्रतिवोचेदेवयन्तम् । सुम्नैरिद्वआविवासे ॥८॥

मा । वः । घ्नन्तम् । मा । शपन्तम् । प्रति । वोचे । देवऽयन्तम् ।

सुम्नैः । इत् । वः । आ । विवासे ॥ ८ ॥

हेमित्रादयोदेवाः देवयन्तं देवान्कामयमानंयजमानं यःशत्रुर्हन्ति घ्नन्तंतादृशंशत्रुंवोयुष्म-भ्यंमाप्रतिवोचे दुरुक्तकथनभीत्याअहंनकथयामि तथा यजमानंयःशत्रुःशपतितमपिशपन्तं माप्रतिवोचेभवद्भिरेवविचार्यशिक्षणीयइत्यर्थः अहंतुसुम्नैरित् धनैरेववोयुष्मानाविवासे सर्वतःप-रिचरामि॥ घ्नन्तं हन्तीतिघ्नन् गमहनेत्यादिनाउपधालोपः होहन्तेरितिकुत्वे प्रत्ययस्वरः । शपन्तं शपआक्रोशे अदुपदेशाल्लसार्वधातुकानुदात्तत्वेधातुस्वरः । वोचे ब्रूञ्व्यक्तायांवाचि माङि लुङि इटि ब्रुवोवचिरितिवचिः अस्यतिवक्तीत्यादिनाच्लेरङादेशः वचउमित्युमागमः नमाङ्योगे इत्यडभावः । देवयन्तं सुपआत्मनःक्यच् नच्छन्दस्यपुत्रस्येतिईत्वप्रतिषेधः । सुम्नैः म्नाअभ्यासे सुष्ठुम्नायतेअभ्यस्यतइतिसुम्नम् आतश्चोपसर्गेइतिकप्रत्ययः आतोलोपइटिचेत्याकारलोपः । विवासे विवासतिःपरिचरणकर्मा ॥ ८ ॥

८. देवगण ! देवाभिलाषी यजमान का जो हनन करता है और जो कटु वचन बोलता है, उसके विरुद्ध तुम्हारे पास अभियोग नहीं उपस्थित करता। मैं धन से तुम्हें तृप्त करता हूँ।

नवमीमृचमाह—

चतुरश्चिद्ददमानाद्बिभीयादानिधातोः । नदुरुक्तायस्पृहयेत्॥९॥२३॥

चतुरः । चित् । ददमानात् । बिभीयात् । आ । निऽधातोः ।
न । दुःऽउक्ताय । स्पृहयेत् ॥ ९ ॥ २३ ॥

घ्नन्तंशपन्तंचमाप्रतिवोचइतियदुक्तंतत्रोपपत्तिरुच्यते दुरुक्तायनस्पृहयेत् दुष्टंवाक्यंनका-मयेत किन्तु दुरुक्ताद्बिभीयात् तत्रावशिष्टोमन्त्रभागःसर्वोपिदृष्टान्तः—चिदित्युपमार्थेवर्तते अक्ष-द्यूतंकुर्वतोरुभयोर्मध्येयःपुमान्चतुरः चतुःसंख्याकान्कपर्दकानददमानात् ददतोहस्तेधारयतः पु-रुषादानिधातोःकपर्दकनिपातपर्यन्तंबिभीयात् अस्यजयोभविष्यतिनभविष्यतीतिअन्योभीतिं प्राप्नुयात् अत्रयथाभयं तथादुरुक्ताद्भेतव्यमितिधर्मरहस्यम् । तस्मादहंघ्नन्तंशपन्तं माप्रतिवो-चेइत्यभिप्रायः अत्रनिरुक्तम्—चतुरोक्षान्धारयतइतितद्यथाकितवाद्बिभीयादेवमेवदुरुक्ताद्बिभी-यान्नदुरुक्तायस्पृहयेदिति[1] ॥ चतुरः चतुरःशसीतिविभक्तेःपूर्वस्योदात्तत्वम् । ददमानात् दद-दाने अत्रधारणार्थः शपःपित्त्वादनुदात्तत्वम् अदुपदेशाल्लसार्वधातुकानुदात्तत्वेनशानजनुदात्तः धातुस्वरएवशिष्यते । बिभीयात् ञिभीभये लिङि जुहोत्यादित्वात्शपःश्लुः यासुटउदात्तत्वम् पा-दादित्वान्निघाताभावः । निधातोः निपूर्वाद्दधातेः सितनिगमीत्यादिनाभावेतुन्प्रत्ययः व्यत्ययेनाद्युदात्तत्वम् तादौचेतिगतिस्वरोनभवति अतावितिपर्युदस्तत्वात् । दुरुक्ताय स्पृहेरीप्सितइ-

---

१ नि० ११. २३. ।　　२ नि० ३. १६. ।

तिसम्प्रदानसंज्ञायांचतुर्थीसम्प्रदानेइतिचतुर्थी। स्पृहयेत् स्पृहईप्सायां चुरादिरदन्तः अतोलोप-स्यस्थानिवद्भावाल्लघूपधगुणाभावः ॥ ९ ॥

९. अक्ष, द्यूत या जूए के खेल में जो मनुष्य चार कौड़ियाँ अपने हाथों में रखता है, उस मनुष्य से तब तक लोग डरते हैं, जब तक वह कौड़ियों को नहीं फेंक लेता है; उसी प्रकार यजमान दूसरे की निन्दा नहीं करना चाहता है—डरा करता है।

संपूषन्निति दशर्चं सप्तमं सूक्तम् काण्वं गायत्रं पूषदेवताकम् संपूषन्दश पौष्णमित्यनुक्रान्तम्। स्मार्तेमहान्तमध्वानमेष्यन्निदंसूक्तंजपेत्—संपूषन्नध्वनइतिमहान्तमध्वानमेष्यन्प्रतिभयंवेति सूत्रितत्वात्। तत्रजपेदित्यनुवर्तते।

तत्रप्रथमामृचमाह—

संपूषन्नध्वनस्तिर्व्यंहोविमुचोनपात्। सक्ष्वादेवप्रणस्पुरः ॥ १ ॥

सम्। पूषन्। अध्वनः। तिर। वि। अंहः। विऽमुचः। नपात्। सक्ष्व। देव। प्र। नः। पुरः ॥ १ ॥

हेपूषन्जगत्पोषकपृथिव्यभिमानिदेव अध्वनोमार्गात्संतिरअस्मानभीष्टस्थानंसम्यक्प्रापय अंहोविघ्नहेतुंपाप्मानंवितिर विनाशय पूषाविशेष्यते विमुचोनपात् जलविमोचनहेतोर्मेघस्य पुत्र नपादितिपुत्रनाम नपात्प्रजाइतितन्नामसुपाठात् श्रुत्यन्तरे—अद्भ्यःपृथिवीतिजलाद्भूम्युत्पत्तिः श्रूयते। तथान्यत्राप्युदकसारत्वंपृथिव्याःश्रूयते—तद्यदपांसारआसीत्तत्समहन्यतसापृथिव्यभवदिति। मेघस्यजलधारित्वादुदकपुत्रएवमेघपुत्रोभवति नचपृथिव्यामेघपुत्रत्वेपूष्णःकिमायातमितिवाच्यम् पृथिव्याएवपूषत्वात् तथाश्रुत्यन्तरेकस्यचिन्मन्त्रस्यब्राह्मणमेवमाम्नायते—पूषाध्वनःपात्वित्याहेयंवैपूषेति। तन्निर्वचनंचान्यत्रैवमाम्नायते—इयंवैपूषेयंहीदंसर्वंपुष्यतियदिदंकिञ्चेति। हेदेवपूषन् नःपुरःअस्माकंपुरतः प्रसक्ष्वप्रसक्तोभव पुरतोगच्छेत्यर्थः ॥ विमुचोनपात् उदकंविमुञ्चतीतिविमुङ्मेघः क्विप्चेतिक्विप् नपातयतिकुलमितिनपात्पुत्रः नञ्पूर्वात्पातयतेःक्विप् नभ्राण्नपादित्यादिनानञःप्रकृतिभावः सुबामन्त्रितइतिपराङ्गवद्भावात षष्ठ्यामन्त्रितसमुदायस्याष्टमिकंसर्वानुदात्तत्वम्। सक्ष्व षचसेवने अनुदात्तेत्त्वादात्मनेपदम् लोटि बहुलंछन्दसीतिशपोलुक् तास्यनुदात्तेदितिलसार्वधातुकानुदात्तत्वेधातुस्वरः। प्रणः उपसर्गाद्बहुलमितिनसोणत्वम्। पुरः उक्तम् ॥ १ ॥

१. हे पूषन्! मार्ग के पार लगा दो। विघ्न के कारण पाप का विनाश करो। हे मेघ-पुत्र देव! हमारे आगे जाओ।

---

१ तै० आ० अष्टमप्रपाठके। २ तै० सं. ६. १. ७।

द्वितीयामृचमाह—

योनःपूषन्नघोवृकोदुःशेवआदिदेशति। अपस्मतंपथोजहि ॥ २ ॥

यः। नः। पूषन्। अघः। वृकः। दुःऽशेवः। आऽदिदेशति।

अप। स्म। तम्। पथः। जहि ॥ २ ॥

हेपूषन् यःप्रतिपक्षीनोस्मानादिदेशति अनेनमार्गेणनगन्तव्यंइत्येवमाज्ञापयति कीदृशः अघः आहन्ता वृकः अस्मदीयस्यधनस्यादाताअपहर्तेत्यर्थः दुःशेवः सेवितुंदुःशकःदुष्टसुखोवा तंतादृशंप्रतिपक्षिणंपथोमार्गाद् अपजहिस्मअवश्यमपाकुरु ॥ वृकः कुकवृकआदाने वर्कतइति वृकः इगुपधलक्षणःकः वृषादित्वादाद्युदात्तत्वम्। दुःशेवः दुष्टंशेवंयस्यासौदुःशेवः परादिश्छन्दसिबहुलमितिउत्तरपदाद्युदात्तत्वम् यद्वा दुःखेनसेव्यतइतिदुःशेवः वर्णव्यत्ययेनसकारस्यशकारः ईषद्दुःसुष्वितिखल् लित्स्वरेणप्रत्ययात्पूर्वस्योदात्तत्वम कृदुत्तरपदप्रकृतिस्वरत्वम्। आदिदेशति दिशअतिसर्जने लेटचडागमः बहुलंछन्दसीतिशपःश्लुः बहुलंछन्दसीतिवक्तव्यमितिवचनाभ्यस्तस्याचीतिलघूपधगुणप्रतिषेधाभावः। पथः उदात्तनिवृत्तिस्वरेणविभक्तेरुदात्तत्वम् ॥ २ ॥

२. पूषन्! यदि कोई आक्रामक, अपहर्त्ता और दुष्ट हमें उलटा मार्ग दिखा दे, तो उसे उचित मार्ग से दूर हटा दो।

अपत्यंपरिपन्थिनंमुषीवाणंहुरश्चितम्। दूरमधिस्रुतेरज ॥ ३ ॥

अप। त्यम्। परिऽपन्थिनम्। मुषीवाणम्। हुरःऽचितम्। दूरम्। अधि। स्रुतेः। अज ॥ ३॥

त्यंतादृशंपूर्वोक्तगुणयुक्तंस्रुतेर्मार्गादधिदूरंअत्यन्तदूरदेशंप्रति अपाज अपगमय कीदृशंपरिपन्थिनंमार्गप्रतिबन्धकं मुषीवाणं तस्कररूपम् मुषीवाइतितस्करनाम मुषीवान् वनिम्रुचइतितन्नामसुपाठाद् हुरश्चितंकौटिल्यानांसञ्चेतारम्॥परिपन्थिनं छन्दसिपरिपन्थिपरिपरिणौपर्यवस्थातरिइतिशत्रावभिधेयेइनिप्रत्ययान्तोनिपातितः। मुषीवाणं मुषस्तेये मोषणंमुषिः औणादिकोभावेकिप्रत्ययः मुषिंवनति सम्भजतइतिमुषीवा वनषणसंभक्तौ अन्येभ्योपिदृश्यन्तइतिविच्प्रत्ययः सर्वनामस्थानेचासंबुद्धावितिदीर्घः अन्येषामपिदृश्यतइतिपूर्वपदस्यदीर्घत्वम्। हुरश्चितं हुर्छांकौटिल्ये सम्पदादिलक्षणोभावेक्विप् राल्लोपइतिछकारलोपः हुरश्चिनोतीतिहुरश्चित् चिनोतेः क्विपि तुगागमः तत्पुरुषेकृतिबहुलमित्यलुक् कृदुत्तरपदप्रकृतिस्वरत्वम्। स्रुतेः स्रुगतौ क्तिच्क्तौचसंज्ञायामितिक्तिच् चितइत्यन्तोदात्तत्वम्। अज अजगतिक्षेपणयोः ॥ ३ ॥

३. उस मार्ग-प्रतिबन्धक, चोर और कपटी को मार्ग से दूर भगा दो।

---

१ मलिम्लुचइतिपाठान्तरम्.

चतुर्थीमृचमाह—

त्वंतस्यंद्वयाविनोघशंसस्यकस्यंचित् । पदाभितिष्ठतपुंषिम् ॥ ४ ॥

त्वम् । तस्यं । द्वयाविनः । अघऽशंसस्य । कस्यं । चित् ।

पदा । अभि । तिष्ठ । तपुंषिम् ॥ ४ ॥

हेपूषन् त्वंतस्यचौरस्यतपुंषिंपरसन्तापकंदेहंपदाभितिष्ठभवदीयेनपादेनाक्रम्यतिष्ठ कीदृशस्य द्वयाविनः प्रत्यक्षापहारःपरोक्षापहारश्चेतियद्द्वयंतद्युक्तस्य अघशंसस्यअस्मास्वघमनिष्टंशंसतः अघशंसइतितस्करनाम मलिम्लुचःअघशंसः इतितन्नामसुपाठात् कस्यचित्अनिर्दिष्टविशेषस्यकस्यापि ॥ द्वयाविनः द्वयमस्यास्तीतिद्वयावी बहुलंछन्दसीतिमत्वर्थीयोविनिः अन्येषामपिदृश्यतइतिदीर्घत्वम्। अघशंसस्य अघेपापेशंसोमनस्यभिलाषोयस्यसोयमघशंसः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । तपुंषिं तापयत्यनेनान्यमितितपुषिः औणादिकउषिन्प्रत्ययः बहुलवचनादिकारस्यनेत्संज्ञा नित्त्वादाद्युदात्तत्वम् ॥ ४ ॥

४. जो कोई प्रत्यक्ष या परोक्ष--दोनों प्रकार से हरण करता और अनिष्ट-साधन करता है; हे देव ! उसकी पर-पीड़क देह को अपने पैरों से रौंद डालो ।

आतत्तेंदस्रमन्तुमःपूषन्नवोंवृणीमहे । येनंपितॄनचोंदयः ॥ ५ ॥ २४ ॥

आ । तत् । ते । दस्र । मन्तुऽमः । पूषन् । अवंः । वृणीमहे ।

येनं । पितॄन् । अचोंदयः ॥ ५ ॥ २४ ॥

हेमन्तुमः ज्ञानवन्दस्रदर्शनीय यद्वा वैर्युपक्षयकारिन्पूषन् तेत्वदीयंतदवः तादृशंरक्षणं आवृणीमहे सर्वतःप्रार्थयामहे येनरक्षणेनपितॄनङ्गिरःप्रभृतीन्पितृदेहानचोदयः प्रेरितवानसि तद्रक्षणमितिपूर्वत्रान्वयः॥दस्र दसिदंसनदर्शनयोः स्फायितञ्चीत्यादिनारक्प्रत्ययः आगमानुशासनस्यानित्यत्वान्नुमभावः यद्वा दसुउपक्षयेइत्यस्मादन्तर्भावितण्यर्थात्पूर्ववद्रक् । मन्तुमः मनज्ञाने कमिमनिजनीत्यादिनाभावेतुप्रत्ययः मन्तुर्ज्ञानमस्यास्तीतिमन्तुमान् सम्बुद्धौमतुवसोरुरितिरुत्वम् । अचोदयः चुदसञ्चोदने चौरादिकः ॥ ५ ॥

५. अरि-मर्दन और ज्ञानी-पूषन् ! तुमने जिस रक्षा-शक्ति से पितरों को उत्साहित किया था, तुम्हारी उसी रक्षा-शक्ति के लिए हम प्रार्थना करते हैं ।

षष्ठीमृचमाह—

अधानोविश्वसौभगहिरंण्यवाशीमत्तम । धनांनिसुषणांकृधि ॥ ६ ॥

अर्ध । नः । विश्वऽसौभग । हिरण्यवाशीमत्ऽतम । धनानि ।
सुऽसना । कृधि ॥ ६ ॥

हेविश्वसौभगकृत्स्नधनयुक्त यद्वा कृत्स्नसौभाग्ययुक्तहिरण्यवाशीमत्तमअतिशयेनसुवर्ण-मयायुधवन्पूषन् अध पूर्वोक्तास्मदीयप्रार्थनानन्तरंनोस्माकंधनानिसुवर्णमणिमुक्तादीनिसुषणा सुष्ठुदानयुक्तानिकृधिकुरु ॥ अध अथशब्देधत्वंछान्दसं निपातस्यचेतिसंहितायांदीर्घत्वम् । वि-श्वसौभग सुभगान्मन्त्रेइत्युद्गात्रादिषुपाठाव् भावेअञ् हृद्भगसिन्ध्वन्तेपूर्वपदस्यचेतिउत्तरपदवृ-द्धौमाप्तायांसत्यां सर्वविधीनांछन्दसिविकल्पितत्वाव् उत्तरपदवृद्धिर्नभवतीतिवृत्तावुक्तम् विश्वा-निसौभगानियस्यासौविश्वसौभगः आमन्त्रितनिघातः । हिरण्यवाशीमत्तम हिरण्यमयीवाशी वदेषामस्तीतिहिरण्यवाशीमन्तः अतिशयेनहिरण्यवाशीमान् हिरण्यवाशीमत्तमः आमन्त्रित-निघातः । सुषणा वनषणसम्भक्तौ सुखेनसम्भज्यतइतिसुषणानि ईषद्दुःसुष्वितिखल् शेश्छन्दसी-तिशेर्लोपः लितीतिप्रत्ययात्पूर्वस्योदात्तत्वम् कृदुत्तरपदप्रकृतिस्वरत्वम् । कृधि डुकृञ्करणे श्रुश्रृ-णुपृकृवृभ्यश्छन्दसीतिहेर्धिरादेशः बहुलंछन्दसीतिविकरणस्यलुक् ॥ ६ ॥

६. सर्व-सम्पत्शाली और विविध-स्वर्णास्त्र-संयुक्त पूषन् ! हमारी प्रार्थना के अनन्तर हमारे निमित्त धन-समूह दान में परिणत करो।

अतिनःसश्चतोनयसुगानःसुपथाकृणु । पूषन्निहक्रतुंविदः ॥ ७ ॥

अति । नः । सश्चतः । नय । सुऽगा । नः । सुऽपथा । कृणु ।
पूषन् । इह । क्रतुम् । विदः ॥ ७ ॥

सश्चतः अस्मद्बाधनायप्राप्नुवतः शत्रूनतोतिअस्मानतिक्रम्यनयअन्यत्रप्रापय नोस्मान् सुगासुष्ठुगन्तुंशक्येनसुपथाशोभनमार्गेणकृणुगन्तॄन्कुरु हेपूषन्इहाध्वनिक्रतुंप्रज्ञानंअस्मद्रक्षण-रूपंविदोजानीहि ॥ सश्चतः गत्युश्चुषस्जगतौ इत्यत्रसश्चिमप्येकेपठन्तीतिधातुवृत्तौउक्तम् अ-स्माल्लटःशतृ बहुलंछन्दसीतिशपोलुक्प्रत्ययस्वरेणशतुरुदात्तत्वम् शतुरनुमइति विभक्त्युदा-त्ताभावश्छान्दसः । सुगा सुष्ठुगच्छन्त्यत्रेतिसुगः सुदुरोरधिकरणेइतिगमेर्डप्रत्ययः सुपांसुलु-गितितृतीयायाआकारः । सुपथा शोभनेनपथा नपूजनादितिसमासान्तप्रतिषेधः परादिश्छन्द-सिबहुलमित्युत्तरपदाद्युदात्तत्वम् क्त्वादयश्चेत्युत्तरपदाद्युदात्तत्वंनभवतिअबहुव्रीहित्वाव् तत्रहि बहुव्रीहावित्यनुवर्तते । कृणु कृविर्हिंसाकरणयोः धिन्विकृण्व्योरचेत्युप्रत्ययः उतश्चप्रत्ययादि-तिहेर्लुक् । विदः विदज्ञाने लेट्यडागमःइतश्चलोपइतीकारलोपः ॥ ७ ॥

७. बाधक शत्रुओं का अतिक्रम करके हमें ले जाओ । सुख-गम्य और सुन्दर मार्ग से हमें ले जाओ । पूषन् ! तुम इस मार्ग में हमारी रक्षा का उपाय करो।

अष्टमीमृचमाह—

अभिसूयवसंनयनवज्वारोअध्वने। पूषन्निहक्रतुंविदः॥ ८॥

अभि। सुऽयवसम्। नय। न। नवऽज्वारः। अध्वने। पूषन्। इह। क्रतुम्। विदः॥ ८॥

हेपूषन् सुयवसंशोभनतृणोपलक्षितसर्वौषधियुक्तंदेशमभिनयअस्मानभितःप्रापय अध्वनेमार्गाय नवज्वारोनूतनःसन्तापोनभवत्वितिशेषः मार्गेगच्छतामस्माकंइदानींतनःक्लेशःकोपि माभूदित्यर्थः गतार्थमन्यत्॥ सूयवसं शोभनंयवसंयस्मिन्देशेससूयवसोदेशः निपातस्यचेतिपूर्वपदस्यदीर्घत्वम् परादिश्छन्दसिबहुलमित्युत्तरपदाद्युदात्तत्वम् क्रत्वादिर्वाद्रष्टव्यः। नवज्वारः ज्वररोगेभावेघञ् नवश्चासौज्वारोनवज्वारः थाथादिनोत्तरपदान्तोदात्तत्वम्॥ ८॥

८. सुन्दर और तृण-युक्त देश में हमें ले जाओ। रास्ते में नया सन्ताप न होने पावे। पूषन्! तुम इस मार्ग में हमारी रक्षा का उपाय करो।

शग्धिपूर्धिप्रयंसिचशिशीहिप्रास्युदरम्। पूषन्निहक्रतुंविदः॥ ९॥

शग्धि। पूर्धि। प्र। यंसि। च। शिशीहि। प्रासि। उदरम्। पूषन्। इह। क्रतुम्। विदः॥ ९॥

हेपूषन् शग्धिअस्माननुगृहीतुंशक्तोभव पूर्धिअस्मद्गृहंधनेनपूरय किञ्च प्रयंसिअन्यदप्यपेक्षितंवस्तुप्रयच्छ शिशीहिअस्मान्सर्वेषुमध्येतीक्ष्णीकुरु तेजस्विनःकुर्वित्यर्थः उदरमस्मदीयंप्रासिप्रकृष्टान्नेनसोमरसेनवापूरय अन्यत्पूर्ववत्॥ शग्धि शक्लृशक्तौ लोटोहिः बहुलंछन्दसीतिविकरणस्यलुक् हुझल्भ्योहेर्धिरितिहेर्धिरादेशः हेरपित्त्वात्प्रत्ययस्वरेणोदात्तत्वम्। पूर्धि पृ पालनपूरणयोः श्रुशृणुपॄकृवृभ्यश्छन्दसीतिहेर्धिरादेशः पूर्ववद्विकरणस्यलुक् उदोष्ठ्यपूर्वस्येत्युत्वम् हलिचेतिदीर्घः तिङःपरत्वान्निघाताभावः। यंसि यमउपरमे लोडर्थेलटिपूर्ववद्विकरणस्यलुक् निघातः। शिशीहि शोतनूकरणे लोटिबहुलंछन्दसीत्यभ्यासस्येत्वम् ईहल्यघोरितीत्वम् प्रत्ययस्वरः। प्रासि प्रापूरणे अदादित्वाच्छपोलुक् सिपःपित्त्वादनुदात्तत्वेधातुस्वरः॥ ९॥

९. हमारे ऊपर अनुग्रह करो। हमारा घर धन-धान्य से पूर्ण करो। अन्य अभीष्ट वस्तु भी हमें दान करो। हमें उग्र-तेजा करो। हमारी उदर-पूर्त्ति करो। पूषन्! तुम इस मार्ग से हमारी रक्षा का उपाय करो।

नपूषणंमेथामसिसूक्तैरभिगृणीमसि। वसूनिदस्ममीमहे॥१०॥२५॥

न । पूषणंम् । मेथामसि । सुऽउक्तैः । अभि । गृणीमसि । वसूंनि ।
दस्मम् । ईमहे ॥ १० ॥ २५ ॥

पूषणंदेवंनमेथामसिवयंनतुनिन्दामः किन्तुसूक्तैर्वेदगतैरभिगृणीमसि सर्वतस्तुमः दस्मं दर्शनीयंपूषणंप्रतिवसूनिधनानिईमहेयाचामहे॥ मेथामसि मेथृमेधाहिंसनयोः लटि इदन्तोमसि-रितिमसइकारागमः। सूक्तैः सुष्ठुस्तुवन्तेदेवताःप्रकाशयन्तीतिसूक्तानि किचूकौचसंज्ञायामितिक-र्तरिक्तः वचिस्वपीत्यादिनासम्प्रसारणम् थाथादिस्वरः यद्वा कर्मणिनिष्ठा सूपमानात्क्तइ-त्युत्तरपदान्तोदात्तत्वम्। गृणीमसि गृशब्दे प्वादीनांह्रस्वइतिह्रस्वत्वम् इदन्तोमसिः। दस्म इ-षियुधीन्धिदसिश्याधूसूभ्योमगितिमक्प्रत्ययः ॥ १० ॥

१०. हम पूषा की निन्दा नहीं कर सकते; उनकी स्तुति करते हैं। हम दर्शनीय पूषा के पास धन की याचना करते हैं।

॥ इतिप्रथमस्यतृतीयेपञ्चविंशोवर्गः ॥ २५ ॥

कद्रुद्रायेतिनवर्चंअष्टमंसूक्तम् अत्रानुक्रम्यते—कद्रुद्रायनवरौद्रंतृतीयामैत्रावरुणीचान्त्य-स्तृचःसौम्योन्त्यानुष्टुबिति । घोरपुत्रःकण्वऋषिः गायत्रीछन्दःयास्तेप्रजाइत्यन्त्यानुष्टुप् रुद्रो-देवता यथानोमित्रइत्येषामित्रावरुणदेवताकाच अस्मेसोमेत्यादिरन्त्यतृचस्तुसौम्यएव सर्वेषुरु-द्रदेवताकेषुकर्मसुअनेनसूक्तेनदिगुपस्थानंकर्तव्यम् तथाचसूत्रितम्—कद्रुद्रायेमारुद्रायातेपित-रिमारुद्रायस्थिरधन्वनेइतिसर्वरुद्रयज्ञेषुदिशामुपस्थानमिति ।

तत्रप्रथमामृचमाह—

कद्रुद्रायप्रचेतसेमीळ्हुष्टमायतव्यंसे । वोचेमशन्तमंहृदे ॥ १ ॥

कत् । रुद्राय । प्रऽचेतसे । मीळ्हुःऽतमाय । तव्यसे । वोचेम ।
शम्ऽतमम् । हृदे ॥ १ ॥

कत्कदारुद्रायएतन्नामकाय देवायशंतमंअतिशयेनसुखकरंस्तोत्रंवोचेमपठेम कीदृशा-यप्रचेतसे प्रकृष्टज्ञानयुक्तायमीढुष्टमायसेक्तृतमायअभीष्टकामवर्षायेत्यर्थः तव्यसेअतिशये-नप्रवृद्धायहृदेअस्मदीयहृन्निष्ठाय॥कत्कदाअन्त्यलोपश्छान्दसः । रुद्राय रोदयतिसर्वमन्तकाले इतिरुद्रः रोदेर्णिलुक्चेतिरक्प्रत्ययः । प्रचेतसे चितीसंज्ञाने प्रकृष्टंचेततीतिप्रचेताः गतिकारक-योरपिपूर्वपदप्रकृतिस्वरत्वंचेत्यसुन्पूर्वपदप्रकृतिस्वरत्वंच । मीढुष्टमाय अतिशयेनमीढ्वान्मीढुष्टमः दाश्वान्साह्वान्मीढ्वांश्चेतिक्वसुप्रत्ययान्तोनिपातितः तमपिअयस्मयादित्वेनभत्वाद्वसोःसम्प्रसा-रणमितिसम्प्रसारणम् शासिवसिघसीनांचेतिषत्वम् । तव्यसे तवतिर्वृद्धयर्थःसौत्रोधातुः अः

तिशयेनतवितातवीयान् तुश्छन्दसीतीयसुन्प्रत्ययः तुरिष्ठेमेयःस्वितितृलोपः ईयसुनइकारलोपश्छान्दसः नित्त्वादाद्युदात्तत्वम्। वोचेम वचपरिभाषणे लिङ्याशिष्यङ् वचउमित्युमागमः यासुटः स्वरेणएकारउदात्तः। हृदे पद्दन्नित्यादिनाहृदयशब्दस्यहृदादेशः ऊडिदमित्यादिनाविभक्तेरुदात्तत्वम्॥ १ ॥

१. उत्कृष्ट ज्ञान से युक्त, अभीष्ट-वर्षी और अत्यन्त महान् रुद्र हमारे हृदय में अवस्थान करते हैं। कब हम उनको लक्ष्य करके सुखकर पाठ करेंगे ?

यथा॑नो॒अदि॑तिः॒कर॒त्पश्वे॒नृभ्यो॒यथा॒गवे॑। यथा॑तो॒काय॑रु॒द्रिय॑म् ॥२॥

यथा॑। नः॒। अदि॑तिः। कर॑त्। पश्वे॑। नृऽभ्यः॑। यथा॑। गवे॑।
यथा॑। तो॒काय॑। रु॒द्रिय॑म्॥ २ ॥

अदितिर्भूमिर्नोस्माकं रुद्रियंरुद्रसम्बन्धिभेषजं यथायेनप्रकारेणसिध्यति करत् तथाकरोतु किञ्च यथायेनप्रकारेणपश्वे अस्मदीयाश्वमहिषादिपशवेनृभ्योऽस्मदीयपुरुषेभ्यः विशेषेणगवेगोजातयेहितं रुद्रियं सिध्यति तथाकरोतु किञ्च तोकायास्मदीयपुत्राय रुद्रियं यथासिध्यति तथाकरोतु भेषजस्यरुद्रसम्बन्धित्वंमन्त्रान्तरेसमाम्नातम्—यातेरुद्रशिवातनूःशिवाविश्वाहभेषजी। शिवारुद्रस्यभेषजीति[1]। गवादिविषयभेषजंचान्यत्रस्पष्टमाम्नातम्—भेषजंगवेश्वायपुरुषायभेषजमथोअस्मभ्यंभेषजंसुभेषजमिति[2]॥ करत् डुकृञ्करणे लङि व्यत्ययेनशप् यद्वा लेटचडागमः इतश्चलोपइतीकारलोपः यद्वा लुङि कृमृदरुहिभ्यश्छन्दसीतिच्लेरङादेशः ऋदृशोङिगुणइतिगुणः आद्ययोःपक्षयोः प्रत्ययस्यपित्त्वादनुदात्तत्वेधातुस्वरः तृतीयेतुव्यत्ययेन यद्वृत्तयोगादनिघातः। पश्वे संज्ञापूर्वकस्यविधेरनित्यत्वात् घेर्ङितीतिगुणाभावः यणादेशः। नृभ्यः नृचान्यतरस्यामितिविभक्त्युदात्तत्वाभावः। गवे सावेकाचइतिप्राप्तस्यविभक्त्युदात्तस्यनगोश्वन्सावर्णेतिप्रतिषेधः। रुद्रियं रुद्रशब्दात्तस्येदमित्यर्थेघप्रत्ययः॥ २ ॥

२. जैसे व जिस प्रकार भूमि-देवता हमारे लिए, पशु के लिए, मनुष्य के लिए, गायों के लिए और हमारे अपत्य के लिए रुद्र-सम्बन्धी औषध प्रदान करें।

तृतीयामृचमाह—

यथा॑नोमि॒त्रोवरु॑णो॒यथा॑रु॒द्रश्चिके॑तति। यथा॒विश्वे॑स॒जोष॑सः॥ ३॥

यथा॑। नः॒। मि॒त्रः। वरु॑णः। यथा॑। रु॒द्रः। चिके॑तति। यथा॑।
विश्वे॑। स॒ऽजोष॑सः॥ ३॥

---

१ तै० सं. ४. ५. १०.।   २ तै० सं. १. ८. ६.।

मित्रोवरुणश्चनोस्मान्यथायेनप्रकारेणचिकेतति अनुग्राह्यत्वेनजानाति रुद्रोपियथाचिकेतति सजोषसः समानप्रीतयः विश्वेसर्वेदेवायथाचिकेतन्तितथाभवत्विति शेषः यद्वा यथाशब्दोपेतमन्त्रद्वयस्य तथाकदावोचेमेतिपूर्वेणान्वयः ॥ चिकेतति कितज्ञाने लेट्यडागमः नाभ्यस्तस्येतिगुणनिषेधोनभवति बहुलंछन्दसीतिवक्तव्यमितिवचनात् सार्वधातुकत्वाच्चाभ्यस्तानामादिरित्याद्युदात्तत्वम् । सजोषसः जुषीप्रीतिसेवनयोः समानंजुषन्तीतिसजोषसः समानस्यछन्दसीतिसभावः असुनोनित्त्वादुत्तरपदस्याद्युदात्तत्वम् तदेवकृदुत्तरपदप्रकृतिस्वरत्वेनशिष्यते ॥ ३ ॥

३. मित्र, वरुण, रुद्र और समान-प्रीतियुक्त सब देवता हमारे ऊपर अनुग्रह करें।

गा॒थप॑तिंमे॒धप॑तिंरु॒द्रंजला॑षभेशजम् । तच्छं॒योः सु॒म्नमी॑महे ॥४ ॥

गा॒थऽप॑तिम् । मे॒धऽप॑तिम् । रु॒द्रम् । जला॑षऽभेषजम् । तत् । शम्ऽयोः । सु॒म्नम् । ई॒म॒हे॒ ॥ ४ ॥

रुद्रमभिलक्ष्यवयंशंयोः बृहस्पतिपुत्रस्यसम्बन्धितत्प्रसिद्धंसर्वप्रजाभ्योहितंसुम्नंसुखमीमहेयाचामहे कीदृशंरुद्रं गाथपतिंस्तुतिपालकंमेधपतिं यज्ञपालकं जलाषभेषजंसुखरूपौषधोपेतं यद्वा उदकरूपौषधोपेतं उदकंहिरुद्रनामाभिमन्त्रितंसदौषधंभवति ॥ गाथपतिं गाथेतिवाङ्नाम गाथागणइतितन्नामसुपठितत्वात् वाग्रूपायाःस्तुतेःपतिर्गाथपतिः कैगैरैशब्दे आदेचइत्यात्वम् उषिकुषिगार्तिभ्यस्थन्निति थन्प्रत्ययः नित्त्वादाद्युदात्तत्वम् ङ्याप्योःसंज्ञाछन्दसोर्बहुलमितिपूर्वपदस्यह्रस्वत्वम् पत्यावैश्वर्येइतिपूर्वपदप्रकृतिस्वरेप्राप्ते मरुद्वृधादीनांछन्दस्युपसंख्यानमितिपूर्वपदान्तोदात्तत्वम्।मेधपतिं पूर्ववत्।जलाषभेषजम् जनीप्रादुर्भावे जायन्तइतिजाः अन्येष्वपिदृश्यतइतिदृशिग्रहणात्केवलादपिडप्रत्ययः । लाषः लषकान्तौ कान्तिरभिलाषः भावेघञ् जानांलाषोयस्मिन्तज्जलाषंसुखं जलाषरूपंभेषजंयस्मिन्रुद्रेसजलाषभेषजः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । शंयोः कंशंभ्यामितिमत्वर्थीयोयुस्प्रत्ययः सितिचेतिपदसंज्ञायांअनुस्वारपरसवर्णौ प्रत्ययस्वरः ॥ ४ ॥

४. रुद्र स्तुति-रक्षक, यज्ञ-पालक और उदक-रूप औषध से युक्त हैं। उनके पास हम बृहस्पति-पुत्र शंयु की तरह सुख की याचना करते हैं।

पञ्चमीमृचमाह—

यः शु॒क्रइ॑व॒सूर्यो॒हिर॑ण्यमिव॒रोच॑ते । श्रेष्ठो॑दे॒वाना॒ंवसु॑ः ॥ ५ ॥ २६ ॥

यः । शु॒क्रःऽइ॑व । सूर्यः॑ । हिर॑ण्यम्ऽइव । रोच॑ते । श्रेष्ठः॑ । दे॒वाना॑म् । वसु॑ः ॥ ५ ॥ २६ ॥

योरुद्रः सूर्यइवशुक्रः सूर्यइवदीप्तिमान्‌हिरण्यमिवरोचते यथासर्वेषांप्राणिनांहिरण्यंप्रीतिकरंभवति तथारुद्रोपि सचदेवानांसर्वेषांमध्येश्रेष्ठः वसुः निवासहेतुश्च ॥ रोचते रुचदीप्तावभिप्रीत्यांच अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः। श्रेष्ठः प्रशस्यतरः प्रशस्यशब्दादिष्ठनिप्रशस्यस्यश्रइतिश्रादेशः नित्त्वादाद्युदात्तत्वम्। वसुः वासयतिसर्वमितिवसुः वसनिवासे अन्तर्भावितण्यर्थात्‌ शृस्वृस्निहीत्यादिनाउप्रत्ययः निदित्यनुवृत्तेराद्युदात्तत्वम् ॥ ५ ॥

५. जो रुद्र सूर्य की तरह दीप्तिमान् और सोने की तरह उज्ज्वल हैं, वे देवों के बीच श्रेष्ठ और अधिवास-कारण हैं!

इतिप्रथमस्यतृतीयेषड्विंशोवर्गः ॥ २६ ॥

आग्निमारुतेशन्नःकरतीतिधाय्या अथयथेतमितिखण्डेसूत्रितम्—वैश्वानरायपृथुपाजसे शन्नःकरत्यर्वतइति ।

तामेतांसूक्तेषष्ठीमृचमाह—

शंनः॑कर॒त्यर्व॑ते सु॒गंमे॒षाय॑मे॒ष्ये॑ । नृभ्यो॒नारि॑भ्यो॒गवे॑ ॥ ६॥

शम् । नः॒ । क॒र॒ति॒ । अर्व॑ते । सु॒ऽगम् । मे॒षाय॑ । मे॒ष्ये॑ । नृऽभ्यः॑ । नारि॑ऽभ्यः । गवे॑ ॥ ६ ॥

नोस्माकंसम्बन्धिभ्योर्वदादिभ्यः सुगं सुष्ठुगम्यंशंसुखंकरतिदेवःकरोति अर्वतेअश्वाय अर्वन्शब्दोश्वनाम अर्वावाजीतितन्नामसुपाठात्‌ मेषायमेषजातिपुरुषायमेष्येतज्जातीयस्त्रियै नृभ्यः पुरुषेभ्यः नारिभ्यः स्त्रीभ्यःगवेगोजातये ॥ करति डुकृञ्करणे व्यत्ययेनशप् । अर्वते अर्तिगच्छतीत्यर्वा अन्येभ्योपिदृश्यन्तइतिवनिप् चतुर्थ्येकवचनेअर्वणस्त्रसावनञइतिनकारस्यतृआदेशः वनिप्सुपौपित्त्वादनुदात्तौ धातुस्वरः। मेषाय मिषस्पर्धायां पचाद्यच् देवसेनमेषादयःपचादिषुद्रष्टव्याइतिवचनात्। मेष्ये जातेरस्त्रीविषयादयोपधादितिङीष् प्रत्ययस्वरः चतुर्थ्येकवचनेआगमानुशासनस्यानित्यत्वात्‌आडागमाभावः उदात्तस्वरितयोर्यणःस्वरितोनुदात्तस्येतिस्वरितत्वम् उदात्तयणोहल्पूर्वादितितुनभवति सर्वेविधयश्छन्दसिविकल्प्यन्तइतिवचनात्। नृभ्यः सावेकाचइतिप्राप्तस्यविभक्त्युदात्तत्वस्यनृचान्यतरस्यामितिप्रतिषेधः। नारिभ्यः नृनरयोर्वृद्धिश्चेतिशार्ङ्गरवादिषुपाठात्ङीन्प्रत्ययः नित्त्वादाद्युदात्तः। गवे नगोश्वन्सावर्णेतिविभक्त्युदात्तस्यप्रतिषेधः ॥ ६ ॥

६. हमारे घोड़े, मेष, मेषी, पुरुष, स्त्री और गो-जाति के लिए देवता सुगम्य सुख प्रदान करें।

अ॒स्मे सो॑म॒ श्रिय॒मधि॒ नि धे॑हि श॒तस्य॑ नृ॒णाम् । महि॒ श्रव॑स्तुवि॒नृम्ण॑म् ॥ ७ ॥

अस्मे इति । सोम । श्रियम् । अधि । नि । धेहि । शतस्य ।
नृणाम् । महि । श्रवः । तुविऽनृम्णम् ॥ ७ ॥

हेसोमदेव नृणांपुरुषाणां शतस्यपर्याप्तांश्रियंअस्मेअस्मासुअधिनिधेहिआधिक्येनस्थापय तथामहिमहत्तुविनृम्णंप्रभूतबलयुक्तंश्रवोन्नंअधिनिधेहि ॥ अस्मे सुपांसुलुगितिसप्तम्याः शेआदेशः । नृणां नृचेतिदीर्घप्रतिषेधः नामन्यतरस्यामितिनामउदात्तत्वम् । महीत्यादयोगताः ॥७॥

७. सोम, हमें प्रचुर परिमाण में, सौ मनुष्यों का धन दान करो। साथ ही महान् और यथेष्ट बल से युक्त अन्न भी दान करो।

अष्टमीमृचमाह—

मानःसोमपरिबाधोमारातयोजुहुरन्त । आनइन्दोवाजेभज ॥८॥

मा । नः । सोमऽपरिबाधः । मा । अरातयः । जुहुरन्त । आ । नः ।
इन्दो इति । वाजे । भज ॥ ८ ॥

सोमपरिबाधः सोमस्यपरितोबाधकाःयागरहितानोस्मान्माजुहुरन्तमाहिंसन्तु तथाअरातयः शत्रवोमाजुहुरन्त हेइन्दोसोम वाजेबलविषयेन्नविषयेवानोस्मानाभजसर्वतःसेवस्व सोमपरिबाधः सोमंपरिबाधन्तेयेतेतादृशाः क्विप्चेतिक्विप् कृदुत्तरपदप्रकृतिस्वरत्वम् । अरातयः रादाने कृत्यल्युटोबहुलमितिबहुलवचनात्कर्तरिक्तिन् यद्वा क्तिच्क्तौचसंज्ञायामितिक्तिच् नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् । जुहुरन्त ह्वृसंवरणे व्यत्ययेनात्मनेपदम् लङिजुहोत्यादित्वात् श्लुः बहुलंछन्दसीतिबहुलवचनात् इकारस्याप्युत्वम् द्विर्भावहलादिशेषौ सर्वेविधयश्छन्दसिविकल्प्यन्तइतिवचनाददभ्यस्तादित्यदादेशाभावेसतिझोन्तइत्यन्तादेशः नमाङ्योगइत्यडभावः॥८॥

८. सोमदेव के प्रतिबाधक और शत्रुगण हमारी हिंसा न करें। सोमदेव हमें अन्न दान करो।

यास्तेप्रजाअमृतस्यपरस्मिन्धामन्नृतस्य ।
मूर्धानाभासोमवेनआभूषन्तीःसोमवेदः ॥ ९ ॥ २७॥

याः । ते । प्रऽजाः । अमृतस्य । परस्मिन् । धामन् । ऋतस्य ।
मूर्धा । नाभा । सोम । वेनः । आऽभूषन्तीः । सोम । वेदः ॥९ ॥२७॥

हेसोम तेतवसंबन्धिन्योयाःप्रजाःसन्तिस्तोत्रंवाकुर्वन्तिताःप्रजाः मूर्धाशिरःस्थानीयस्त्वं नाभासन्नहनयुक्तेयज्ञगृहे वेनः कामयस्व कीदृशस्यतेअमृतस्यमरणरहितस्यपरस्मिन्धामन्नृतस्य

उत्तमेस्थानेप्राप्तस्यहेसोमआभूषन्तीः सर्वतस्तामलंकुर्वन्तीःप्रजाःवेदः जानीहि ॥ धामन् सु- पांसुलुगितिसप्तम्यालुक् । नाभा णहबन्धने नहोभश्चेतिकर्मणिइञ्प्रत्ययः ञित्वादाद्युदात्तत्वम् सुपांसुलुगितिसप्तम्याडादेशः । वेनः वेनतिःकान्तिकर्मा लेटिसिप्यडागमः तिङ्ङतिङइतिनिघातः। आभूषन्तीः भूषअलङ्कारे भौवादिकः शपःपित्वादनुदात्तत्वम् शतुश्चलसार्वधातुकस्वरेणाद्युदा- त्तत्वम् समासेकृदुत्तरपदप्रकृतिस्वरत्वम् । वेदः विदज्ञाने लेटिसिप्यडागमः ॥ ९ ॥

९. सोम ! तुम अमर और उत्तम स्थान प्राप्त किये हुए हो। तुम शिरःस्थानीय होकर यज्ञ-गृह में अपनी प्रजा की कामना करो। वह प्रजा तुम्हें विभूषित करती है, तुम उसे जानो।

इतिप्रथमस्यतृतीयेसप्तविंशोवर्गः ॥ २७ ॥

इतिप्रथमेमण्डलेअष्टमोनुवाकः ॥ ८ ॥

नवमेनुवाकेसप्तसूक्तानि तत्राग्नेविवस्वदितिचतुर्दशर्चंप्रथमंसूक्तम् तत्रानुक्रमणिका—अग्ने- षळूनाप्रस्कण्वःकाण्वआग्नेयंतुप्रागाथमाद्योद्दृचोश्व्युषसांचेति। कण्वपुत्रः प्रस्कण्वऋषिः अत्रद्वि- तीयाचतुर्थ्याद्यायुजःसतोबृहत्यः प्रथमातृतीयाद्याअयुजोबृहत्यः कृत्स्नंसूक्तमाग्नेयंउत्तरंच आ- द्येद्वेअश्विदेवताकेउषोदेवताकेच प्रातरनुवाकेआग्नेयेक्रतौबार्हतेछन्दसिआश्विनशस्त्रेचेदंसूक्तम् अथैतस्यारात्रेरितिखण्डेसूत्रितम्—अग्नेविवस्वत्सखायस्त्वेति वाजपेयेआग्निमारुतेआद्यःप्रगाथो- नुरूपः वाजपेयेनेतिखण्डेसूत्रितम्—चित्रवतीषुचेत्तुवीरनत्वंनश्चित्रऊत्याग्नेविवस्वदुषसइत्यग्नि- ष्टोमसाम्नः स्तोत्रियानुरूपाविविपर्यायव्युष्टावाश्विनशस्त्रस्यायमेवप्रगाथःस्तोत्रियः यदिपर्यो- यानभिव्युच्छेदितिखण्डेआश्विनायैकस्तोत्रियोग्नेविवस्वदुषसइतिसूत्रितम्।

तत्रप्रथमामृचमाह—

अग्नेविवस्वदुषसश्चित्रंराधोअमर्त्य ।
आदाशुषेजातवेदोवहात्वमद्यादेवाँउषर्बुधः ॥ १॥

अग्ने । विवस्वत् । उषसः । चित्रम् । राधः । अमर्त्य । आ ।
दाशुषे । जातऽवेदः । वह । त्वम् । अद्य । देवान् । उषःऽबुधः ॥ १॥

हेअग्नेत्वं उषसः उषोदेवतायाःसकाशात् राधोधनंदाशुषेहविर्दत्तवतेयजमानायआवह आनीयंप्रापय सोग्निर्विशेष्यते अमर्त्य मरणरहितजातवेदः जातानांवेदितः तमेतंशब्दंयास्को- व्याचष्टे—जातवेदाःकस्माज्जातानिवेदजातानिवैनंविदुर्जातेजातेविद्यतइतिवाजातवित्तोवाजातध- नोजातविद्योवाजातप्रज्ञानोयत्तज्जातःपशून्विन्दतेतितज्जातवेदसोजातवेदस्त्वमितिब्राह्मणंतस्मा-

त्सर्वानृतून्पशवोग्निमभिसर्पन्तीतिचेति[1]। कीदृशंराधः विवस्वत् विशिष्टनिवासोपेतं चित्रंनानाविधं किञ्च अद्यास्मिन्दिने उषर्बुधः उषःकाले प्रबुद्धान्देवान् आवह ॥ विवस्वत् विवासनंविवः तद्युक्तम् वसनिवासे विपूर्वादन्तर्भावितण्यर्थात्सम्पदादिलक्षणोभावेक्विप् तदस्यास्तीतिमतुप् मादुपधायाइतिवत्वम् तसौमत्वर्थेइतिभत्वेनपदत्वाभावाद्रुत्वाद्यभावः वृषादित्वादाद्युदात्तत्वम्। राधः राधसाधसंसिद्धौ राध्नोत्यनेनेतिराधोधनं करणेअसुन् नित्त्वादाद्युदात्तत्वम्। दाशुषे दाश्वदाने दाश्वान्साह्वानितिक्वसुप्रत्ययान्तोनिपातितः चतुर्थ्येकवचनेवसोःसम्प्रसारणमितिसम्प्रसारणम् शासिवसीतिषत्वम्। जातवेदः जातानिवेत्तीतिजातवेदाः गतिकारकयोरपिपूर्वपदप्रकृतिस्वरत्वंचेत्यसुन् यद्वा वेदइतिधननाम जातंधनंयस्यसतादृशः आमन्त्रितनिघातः। वह द्व्यचोतस्तिङइतिसंहितायांदीर्घत्वम्। देवान् दीर्घादटिसमानपादेइतिसंहितायांनकारस्यरुत्वम् आतोटिनित्यमित्यनुनासिकआकारः। उषर्बुधः उषसिबुध्यन्तइत्युषर्बुधः बुधअवगमने क्विप्चेतिक्विप् रोरुत्वाभावश्छान्दसः कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ १ ॥

१. अग्निदेव! तुम अमर और सर्व-भूतज्ञ हो। तुम उषा के पास से हविर्दान शील यजमान के लिए नानाविध और निवास-युक्त धन ला दो। आज उषाकाल में जाग्रत देवों को ले आना।

द्वितीयामृचमाह—

जुष्टोहिदूतोअसिंहव्यवाहनोग्नेरथीरध्वराणाम्।
सजूरश्विभ्यांमुषसांसुवीर्यमस्मेधेहिश्रवोबृहत् ॥ २ ॥

जुष्टः। हि। दूतः। असि। हव्यऽवाहनः। अग्ने। रथीः। अध्वराणाम्। सऽजूः। अश्विऽभ्याम्। उषसां। सुऽवीर्यम्। अस्मे इति। धेहि। श्रवः। बृहत् ॥ २॥

हेअग्ने त्वंजुष्टत्वादिविशेषणगुणयुक्तोसि जुष्टःसेवितःदूतःदेवानांवार्ताहारः हव्यवाहनः हविषोवोढा अध्वराणांक्रतूनांरथीःरथस्थानीयः तथाचमन्त्रान्तरंब्राह्मणेनैवंव्याख्यातम्—रथीरध्वराणामित्याहैषहिदेवरथइति। ब्राह्मणान्तरंच—रथीरध्वराणामित्याह रथोहवाएषभूतोदेवेभ्योहव्यंवहतीति। तादृशस्त्वमश्विभ्यांदेवताभ्यां उषसादेवतयाचसजूः सहितोभूत्वासुवीर्यं शोभनवीर्योपेतं बृहत् प्रभूतं श्रवोन्नं अस्मेधेहिअस्मासुप्रक्षिप ॥ जुष्टः जुषीप्रीतिसेवनयोः नित्यंमन्त्रेइत्याद्युदात्तत्वम्। असि सिपि तासस्त्योर्लोपइतिसलोपः हिचेति निघातप्रतिषेधः। हव्यवाहनः हव्यंवहतीतिहव्यवाहनः हव्येनन्तःपादमितिञ्युट् योरनादेशः

१ नि० ७. १९.। २ तै० सं २. ५. ९.।

नित्त्वादाद्युदात्तत्वेकृदुत्तरपदप्रकृतिस्वरत्वम्। अग्ने पादादित्वादाष्टमिकनिघाताभावः। रथीः रथशब्दात्स्वार्थिकईकारप्रत्ययः। अध्वराणाम् ध्वरोनास्त्येष्विति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्। सुवीर्यं वीरवीर्यौचेत्युत्तरपदाद्युदात्तत्वम्। अस्मे सुपांसुलुगिति सप्तम्याःशेआदेशः॥ २॥

२. अग्नि! तुम देवों के सेवित दूत हो। हव्य वहन करो। तुम यज्ञ को रथ की तरह वहन करनेवाले हो। तुम अश्विनीकुमारों और उषा के साथ शोभनीय, वीर्य-युक्त और प्रभूत धन हमें दान करो।

अ॒द्या दू॒तं वृ॑णीमहे॒ वसु॑म॒ग्निं पु॑रुप्रि॒यम्।
धू॒मके॑तुं॒ भाऋ॑जीकं॒ व्यु॑ष्टिषु य॒ज्ञाना॑मध्वर॒श्रिय॑म्॥ ३॥

अ॒द्य। दू॒तम्। वृ॒णी॒म॒हे॒। वसु॑म्। अ॒ग्निम्। पु॒रु॒ऽप्रि॒यम्।
धू॒मऽके॑तुम्। भाःऽऋ॑जीकम्। विऽउ॑ष्टिषु। य॒ज्ञाना॑म्।
अ॒ध्व॒र॒ऽश्रिय॑म्॥ ३॥

अद्यास्मिन्दिने अग्निंवृणीमहे प्रार्थयामहे कीदृशं दूतं वार्ताहारम् वसुंनिवासहेतुं पुरुप्रियं बहूनांप्रियं धूमकेतुं धूमरूपध्वजयुक्तं भाऋजीकंप्रसिद्धभासालङ्कृतम् भाऋजीकः प्रसिद्धभाइतियास्कवचनम्। व्युष्टिषुउषःकालेषुयज्ञानांयजमानानांअध्वरश्रियंयागसेविनम्॥ अद्य निपातस्यचेतिदीर्घत्वम्। पुरूणां प्रियःपुरुप्रियः समासस्येत्यन्तोदात्तत्वम्। धूमकेतुम् इषियुधीन्धीत्यादिनाधूमशब्दोमक्प्रत्ययान्तोन्तोदात्तः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्। भाऋजीकम् ऋजगतिस्थानार्जनोपार्जनेषु ऋजेश्चेतीकन्प्रत्ययः किन्त्वस्यानुवर्तनात् गुणाभावः भासः प्रकाशस्यऋजीकः प्रार्जयिता आद्युदात्तप्रकरणे दिवोदासादीनांछन्दस्युपसंख्यानमितिपूर्वपदाद्युदात्तत्वम् यद्वा भासोर्जनंयस्मिन् बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्। व्युष्टिषु उच्छीविवासे विवासोवर्जनं विशेषेणउच्छयन्तेतमसावर्ज्यन्तइतिव्युष्टयः उषःकालाः कर्मणिक्तिन् तितुत्रेत्यादिनाइट्प्रतिषेधः व्रश्चादिनाषत्वेष्टुत्वम् तादौचेतिपूर्वपदप्रकृतिस्वरत्वम् यणादेशेउदात्तस्वरितयोर्यणइतिपरस्यानुदात्तस्यस्वरितत्वम्। अध्वरश्रियम् अध्वरं श्रयतइतिअध्वरश्रीः क्विप्चेत्यादिनाक्विप्प्रत्ययः तत्संनियोगेनसम्प्रसारणाभावः दीर्घश्च द्वितीयैकवचने अचिश्नुधात्वित्यादिनाइयङादेशः॥ ३॥

३. अग्नि दूत निवासहेतु, विविध-प्रिय, धूम-रूप ध्वजा से युक्त, प्रख्यात ज्योति के द्वारा अलंकृत और उषाकाल में यजमानों का यज्ञ सेवन करनेवाले हैं। उन्हीं अग्नि को आज हम वरण करते हैं।

---

१ नि० ६. ४.

चतुर्थीमृचमाह—

श्रेष्ठंयविष्ठमतिथिंस्वाहुतंजुष्टंजनायदाशुषे।
देवाँअच्छायातवेजातवेदसमग्निमीळेव्युष्टिषु ॥ ४ ॥

श्रेष्ठम्। यविष्ठम्। अतिथिम्। सुऽआहुतम्। जुष्टम्। जनाय। दाशुषे। देवान्। अच्छ। यातवे। जातऽवेदसम्। अग्निम्। ईळे। विऽउष्टिषु ॥ ४ ॥

व्युष्टिषु उषःकालेषुदेवान् इतरान्सर्वदेवान्अच्छआभिमुख्येन यातवे मन्तुं अग्निं देवमीळे स्तौमि कीदृशं श्रेष्ठं अतिशयेनप्रशस्तं यविष्ठंयुवतमं अतिथिं सततगमनक्षमं स्वाहुतं सुष्ठुआसमन्तात् होमाधिकरणं दाशुषेहविर्दत्तवतेयजमानाय जुष्टंप्रीतं जातवेदसंजातानां वेदितारम् ॥ यविष्ठं युवशब्दादिष्ठनिस्थूलदूरेत्यादिनायणादेःपरस्यलोपः पूर्वस्यचगुणः अवादेशः नित्वादाद्युदात्तत्वम्। अतिथिं अतसातत्यगमने ऋतन्यञ्जीत्यादिनाइथिन्प्रत्ययः नित्वादाद्युदात्तत्वम्। स्वाहुतम् हुदानादनयोः आहूयतेस्मिन्नित्याहुतः सुःपूजायामितिसुशब्दस्य कर्मप्रवचनीयसंज्ञायांस्वतीपूजायामितिसमासः अव्ययपूर्वपदप्रकृतिस्वरत्वम् नचगतिकारकोपपदात्कृदितिगतेःप्रकृतिस्वरत्वम् अस्यसुशब्दस्यगतिसंज्ञायाबाधितत्वात् ॥ ४ ॥

४. अग्नि श्रेष्ठ, अतिशय युवक, सदा गति-विशिष्ट, सबके द्वारा आहूत, हव्य-दाता के प्रति प्रसन्न और सर्व-भूतज्ञ हैं। उषाकाल में देवगणाभिमुख जाने के लिए मैं उनकी स्तुति करता हूँ।

पञ्चमीमृचमाह—

स्तविष्यामित्वामहंविश्वस्यामृतभोजन। अग्नेत्रातारममृतंमियेध्ययजिष्ठंहव्यवाहन ॥ ५ ॥ २८ ॥

स्तविष्यामि। त्वाम्। अहम्। विश्वस्य। अमृत। भोजन। अग्ने। त्रातारम्। अमृतम्। मियेध्य। यजिष्ठम्। हव्यऽवाहन ॥५॥२८॥

हेअमृतमरणरहितविश्वस्यभोजन कृत्स्नस्यजगतःपालक हव्यवाहनहविषोवोढः मियेध्य यज्ञार्ह एवंविधहेअग्ने विश्वस्यत्रातारंसर्वस्यजगतोरक्षकंअमृतंमरणरहितंयजिष्ठंअतिशयेनयष्टारं त्वांअहमनुष्ठातास्तविष्यामिस्तुतिंकरिष्यामि ॥ ष्टुञ्स्तुतौ व्यत्ययेनेडागमः आगमानुदात्तत्वे प्रत्ययस्वरः। भोजन कर्मफलंभोजयतीतिभोजनः नन्द्यादिलक्षणोल्युः। त्रातारं त्रैङ्पालने आदेचइत्यात्वम् तृचिएकाचउपदेशेइतीट्प्रतिषेधः। अमृतं नञोजरमरमित्रमृताइत्युत्तरप-

दाद्युदात्तत्वम्। मियेध्य इयागमश्छान्दसः। यजिष्ठं यष्टृशब्दात् तुश्छन्दसीतिइष्ठन्प्रत्ययः तु-रिष्ठेमेयःस्वितितृलोपः॥ ५॥

५. हे अमर, विश्व-रक्षक, हव्यवाही और यज्ञार्ह अग्निदेव, तुम विश्व के त्राण-कर्त्ता, मरण-रहित और यज्ञ-निर्वाहक हो, मैं तुम्हारी स्तुति करूँगा।

षष्ठीमृचमाह—

सुशंसोबोधिगृणतेयविष्ठ्यमधुजिह्वःस्वाहुतः। प्रस्कंण्वस्य प्रतिरन्नायुर्जीवसेनमस्यादैव्यंजनम्॥ ६॥

सुऽशंसः। बोधि। गृणते। यविष्ठ्य।। मधुऽजिह्वः। सुऽआहुतः। प्रस्कंण्वस्य। प्रऽतिरन्। आयुः। जीवसे। नमस्य। दैव्यम्। जनम्॥ ६ ॥

हेयविष्ठ्ययुवतमाग्ने त्वंगृणतेस्तुवतेयजमानार्थंसुशंसः सुष्ठुशंसनीयः मधुजिह्वः मादयितृज्वालः स्वाहुतः सुष्ठुआभिमुख्येनहुतःसन्बोधिअस्मदभिप्रायंबुध्यस्व किञ्च प्रस्कण्वस्यएतन्नामकस्य कण्वपुत्रस्यमहर्षेः प्रस्कण्वः कण्वस्यपुत्रः कण्वप्रभवइतियास्कवचनात्। तस्यजीवसेजीवनार्थ-मायुः प्रतिरन्प्रकर्षेणवर्धयन् दैव्यं देवसम्बन्धिनंजनंनमस्यपूजय॥ सुशंसः शंसुस्तुतौ भावेघञ् शोभनः शंसोयस्यासौसुशंसः आद्युदात्तंद्व्यच्छन्दसीत्युत्तरपदान्तोदात्तत्वम्। बोधि बुधअवग-मने लोटोहिः बहुलंछन्दसीतिविकरणस्यलुक् हुझल्भ्योहेर्धिरितिहेर्धिरादेशः वाछन्दसीत्यपि-त्त्वस्यविकल्पितत्वाल्लघूपधगुणः धातोरन्त्यलोपश्छान्दसः। गृणते गॄशब्दे लटःशतृ क्र्यादिभ्यः श्ना श्नाभ्यस्तयोरातइत्याकारलोपः शतुरनुमइतिविभक्तेरुदात्तत्वम्। यविष्ठ्य गतम्। प्रस्कण्व-स्य प्रभूतिरुत्पत्तिःकण्वाद्यस्यसप्रस्कण्वः प्रस्कण्वहरिश्चन्द्रावृषीइतिसुडागमोनिपातितः बहुव्री-हौपूर्वपदप्रकृतिस्वरत्वम्। प्रतिरन् प्रपूर्वस्तिरतिर्वर्धनार्थः। नमस्य नमोवरिवश्चित्रङःक्यच्इ-तिपूजार्थेक्यच् प्रत्ययस्वरः अन्येषामपिदृश्यतइतिसंहितायांदीर्घत्वम्। दैव्यं देवाद्यञञाविति तस्येदमित्यर्थेप्राग्दीव्यतीयोयञ्प्रत्ययः॥ ६॥

६. युवक अग्नि! तुम स्तोता के स्तुतिपात्र हो और तुम्हारी शिखा अन्नदायिनी है। तुम आहूत होकर हमारे अभिप्राय को उपलब्ध करो। प्रस्कण्व जीवित रहें; इसलिए उसकी आयु बढ़ा दो। उस देव-भक्त जन का सम्मान करो।

होतारंविश्ववेदसंसंहित्वाविशइन्धते। सआवहपुरुहूतप्रचेतसोग्नेदेवाँइहद्रवत्॥ ७॥

---

१ नि० ३. १७.।

होतारम् । विश्वऽवेदसम् । सम् । हि । त्वा । विशः । इन्धते । सः ।
आ । वह । पुरुऽहूत । प्रऽचेतसः । अग्ने । देवान् । इह । द्रवत् ॥ ७ ॥

होतारंहोमनिष्पादकंविश्ववेदसंसर्वज्ञंत्वामग्निंविशःप्रजाःसमिन्धतेहिसम्यग्दीपयन्तिखलु हेपुरुहूतबहुभिराहूताग्ने सत्वंप्रचेतसःप्रकृष्टज्ञानयुक्तान्देवानिहकर्मणिद्रवत्क्षिप्रंआवहआभिमुख्येनप्रापय द्रवदितिक्षिप्रनामं द्रवत्ओषमितितन्नामसुपाठात् ॥ विश्ववेदसं विश्वानिवेत्तीतिविश्ववेदाः असुन् मरुद्वृधादित्वात्पूर्वपदान्तोदात्तत्वम् यद्वा वेदइतिधननाम विश्वानिवेदांसियस्यासौविश्ववेदाः बहुव्रीहौविश्वंसंज्ञायामितिपूर्वपदान्तोदात्तत्वम् । इन्धते ञिइन्धीदीप्तौ श्नसोरल्लोपइत्यकारलोपः श्नान्नलोपः प्रत्ययस्वरः हिचेतिनिघातप्रतिषेधः ॥ ७ ॥

७. तुम होमनिष्पादक और सर्वज्ञ हो। तुम्हें संसार दीप्तिमान् करता है। अग्निदेव! तुम बहुतों के द्वारा आहूत हो। उत्कृष्ट ज्ञान से युक्त देवों को शीघ्र इस यज्ञ में ले आओ।

सवितारमुषसमश्विनाभगमग्निंव्युष्टिषुक्षपः ।
कण्वासस्त्वासुतसोमासइन्धतेहव्यवाहंस्वध्वर ॥ ८ ॥

सवितारम् । उषसम् । अश्विना । भगम् । अग्निम् । विऽउष्टिषु ।
क्षपः । कण्वासः । त्वा । सुतऽसोमासः । इन्धते । हव्यऽवाहम् ।
सुऽअध्वर ॥ ८ ॥

हेस्वध्वरशोभनयागयुक्ताग्ने व्युष्टिषुउषःकालेषुश्रवोन्नमाहुतिरूपमभिलक्ष्यसवित्रादीन्देवान्आवहेत्यनुवर्तते स्वध्वरेत्याहवनीयाग्नेःसम्बोधनं अग्निमितिहविषउद्देश्यंदेवतान्तरं उच्यते सुतसोमासः अभिषुतसोमाः कण्वासोमेधाविनः ऋत्विजःहव्यवाहंहविषःप्रापकंआहवनीयंत्वांइन्धतेदीपयन्ति ॥ व्युष्टिषु उच्छीविवासे विवासोवर्जनं व्युच्छ्यतेतमसावर्ज्यतइतिव्युष्टिरुषःकालः कर्मणिक्तिनितादौचनितीतिगतेःप्रकृतिस्वरत्वम् संहितायामुदात्तस्वरितयोर्यणइतिपरस्यानुदात्तस्यस्वरितत्वम् । क्षपः क्षपेतिरात्रिनाम ङसिआतोधातोरित्यत्रातइतियोगविभागादाकारलोपः । सुतसोमासः सुतःसोमोयैः निष्ठेतिपूर्वनिपातः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । हव्यवाहं हव्यंवहतीतिहव्यवाट् वहश्चेतिण्विप्रत्ययः ॥ ८ ॥

८. शोभन यज्ञ से युक्त अग्नि! रात्रि के प्रभात में सविता, उषा, अश्विद्वय, भग और अग्नि को ले आओ। हव्यवाही कण्व लोग सोम तैयार करके तुम्हें दीप्तिमान् करते हैं।

पतिर्ह्यध्वराणामग्नेदूतोविशामसि ।
उषर्बुधआवहसोमपीतयेदेवाँअद्यस्वर्दृशः ॥ ९ ॥

पतिः। हि। अध्वराणाम्। अग्ने। दूतः। विशाम्। असि।
उषःऽबुधः। आ। वह। सोमऽपीतये। देवान्। अद्य।
स्वःऽदृशः॥ ९॥

हेअग्ने विशांप्रजानांसम्बन्धिनोयेअध्वरायागाः तेषांपतिःपालकस्त्वंदूतोसिहि देवानां वार्ताहारोभवसिखलु उषर्बुधः उषःकालेप्रबुद्धान्स्वर्दृशःसूर्यदर्शिनोदेवान्अद्यास्मिन्दिनेसोमपीतयेसोमपानार्थंआवहआभिमुख्येनप्रापय॥ असि हिचेतिनिघातप्रतिषेधः। सोमपीतये पापाने स्थागापापचोभावेइतिभावेक्तिन् घुमास्थेतीत्वम् सोमस्यपीतिः दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वम्। स्वर्दृशः सुष्ठुअर्तिगच्छतीतिस्वरादित्यः अर्तेरन्येभ्योपिदृश्यन्तइतिविच् तं पश्यन्तीतिस्वर्दृशः क्विप्चेतिक्विप् कृदुत्तरपदप्रकृतिस्वरत्वम्॥ ९॥

९. अग्नि! तुम लोगों के यज्ञ-पालक और देवों के दूत हो। उषाकाल में प्रबुद्ध सूर्य-दर्शी देवों को आज सोमपान के लिए ले आओ।

अग्नेपूर्वाअनूषसोविभावसोदीदेथविश्वदर्शतः।
असिग्रामेष्ववितापुरोहितोसियज्ञेषुमानुषः॥ १०॥ २९॥

अग्ने। पूर्वाः। अनु। उषसः। विभावसो इति विभाऽवसो।
दीदेथ। विश्वऽदर्शतः। असि। ग्रामेषु। अविता। पुरःऽहितः।
असि। यज्ञेषु। मानुषः॥ १०॥ २९॥

हेविभावसो विशिष्टप्रकाशनरूपधनवन्नग्ने विश्वदर्शतः सर्वैर्दर्शनीयस्त्वं पूर्वाउषसोनुअतीतान्उषःकालान्अनुलक्ष्यदीदेथदीप्तवानसि तादृशस्त्वंग्रामेषुजननिवासस्थानेषुअवितासि रक्षकोभवसि यज्ञेष्वनुष्ठेयकर्मसुपुरोहितःवेदेःपूर्वस्यांदिश्यवस्थितःमानुषोसि ऋत्विग्यजमानानांमनुष्याणांहितोसि॥ दीदेथ दीदेतिश्छान्दसोदीप्तिकर्मा आगमानुशासनस्यानित्यत्वादिडभावः द्विर्वचनप्रकरणेछन्दसिवेतिवक्तव्यमितिवचनाद्द्विर्वचनाभावः। विश्वदर्शतः विश्वैर्दर्शनीयः भृमृदृशीत्यादिनादृशेरतच् मरुद्वृधादित्वात्पूर्वपदान्तोदात्तत्वम्। पुरोहितः पूर्वाधरावराणामसिपुरधवश्चैषामित्यसिप्रत्ययान्तःपुरस्शब्दः तद्धितश्चासर्वविभक्तिरित्यव्ययत्वात् पुरोव्ययमितिगतिसंज्ञायांसत्यां गतिसमासेगतिरनन्तरइतिपूर्वपदप्रकृतिस्वरत्वम्॥ १०॥

१०. प्रभामान् और धनशाली अग्नि! तुम सबके दर्शनीय हो। तुम पूर्वगामिनी उषा के बाद दीप्त हो। तुम ग्रामों के पालक, यज्ञों के पुरोहित और वेदी के पूर्वदिशास्थित मनुष्य हो।

॥ इतिप्रथमस्यतृतीयेएकोनत्रिंशोवर्गः॥ २९॥

एकादशीमृचमाह—

नित्वा॑य॒ज्ञस्य॒साध॑न॒मग्ने॒होता॑रमृ॒त्विज॑म् ।
म॒नु॒ष्वद्दे॑वधीमहि॒प्रचे॑तसंजी॒रंदू॒तमम॑र्त्यम् ॥ ११ ॥

नि । त्वा॒ । य॒ज्ञस्य॑ । साध॑नम् । अग्ने॑ । होता॑रम् । ऋ॒त्विज॑म् । म॒नु॒ष्वत् । दे॒व॒ । धी॒म॒हि॒ । प्रऽचे॑तसम् । जी॒रम् । दू॒तम् । अम॑र्त्यम् ॥ ११ ॥

हेअग्नेदेव मनुष्ववद्यथामनुर्यागदेशेनिदधातितद्वद्वयंत्वांनिधीमहिअत्रस्थापयामः कीदृशं यज्ञस्यसाधनंयज्ञनिष्पादकं होतारंऋत्विजंऋतौवसन्तादिकेयष्टारं प्रचेतसंप्रकृष्टज्ञानयुक्तं जीरंशत्रूणांवयोहानिकरं दूतं देवानांदूतस्थानीयं अमर्त्यंमरणरहितम् ॥ मनुष्वत् औणादिकउसिप्रत्ययान्तोमनुस्शब्दः तेनतुल्यंक्रियाचेद्वतिरितिवतिप्रत्ययः अयस्मयादित्वेनभत्वाद्रुत्वाद्यभावः । धीमहि डुधाञ्धारणपोषणयोः लिङिअभ्यासलोपश्छान्दसः । जीरं जुइतिसौत्रोधातुः जोरीचेतिरक्प्रत्ययः कात्यायनस्त्वाह—रकिज्यःसम्प्रसारणेजीरइति ॥ ११ ॥

११. अग्निदेव! तुम यज्ञ के साधन, देवों के आह्वानकारी ऋत्विक्, प्रकृष्ट ज्ञान से युक्त, शत्रुओं के आयुनाशक, देवों के दूत और अमर हो। हम मनु की तरह तुम्हें यज्ञस्थान में स्थापन करते हैं।

द्वादशीमृचमाह—

यद्दे॒वानां॑मित्रमहः॒पु॒रोहि॑तो॒न्त॑रो॒यासि॑दू॒त्य॑म् ।
सिन्धो॑रिव॒प्रस्व॑नितासऊ॒र्मयो॒ग्नेर्भ्राज॑न्ते॒अ॒र्चय॑ः ॥ १२ ॥

यत् । दे॒वाना॑म् । मि॒त्र॒ऽम॒हः॒ । पु॒रःऽहि॑तः । अन्त॑रः । यासि॑ । दू॒त्य॑म् । सिन्धोः॑ऽइव । प्रऽस्व॑नितासः । ऊ॒र्मय॑ः । अ॒ग्नेः । भ्राज॑न्ते । अ॒र्चय॑ः ॥ १२ ॥

हेमित्रमहः मित्राणांपूजकाग्ने यद्यदापुरोहितस्त्वंवेदेःपूर्वस्यांदिशिस्थापितः अन्तरःदेवयजनमध्येवर्तमानःसन् देवानांदूत्यंदूतकर्मयासिप्राप्नोषि तदानींअग्नेस्तवार्चयोदीप्तयः भ्राजन्तेदीप्यन्ते तत्रदृष्टान्तः—सिन्धोरिव यथासमुद्रस्यप्रस्वनितासः प्रकृष्टध्वनियुक्ताऊर्मयस्तरङ्गाः भ्राजन्तेतद्वत् ॥ मित्रमहः महपूजायां मित्रैर्ऋत्विग्भिर्महसतेपूज्यतेइतिमित्रमहाः औणादिकोसुन् । यासि यद्वृत्तयोगादनिघातः । दूत्यं दूतस्यकर्मदूत्यं दूतस्यभागकर्मणीइतियत्प्रत्ययः सर्वेविधयश्छन्दसिविकल्प्यन्तइतिवचनाद्यतोनावइत्याद्युदात्तत्वाभावेतित्स्वरितमितिस्वरितत्वम् ।

प्रस्वनितासः स्यमुस्वनध्वनशब्दे भावेनिष्ठा प्रकृष्टंस्वनितंयेषांतेप्रस्वनिताः सअसुगागमः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्। ऊर्मयः अर्तेरूच्चेतिमिप्रत्ययः ॥ १२ ॥

१२. मित्रों के पूजक अग्नि! जब कि, यज्ञ के पुरोहित-रूप से तुम देवों का यज्ञ-कर्म सम्पादित करते हो, तब समुद्र की प्रकृष्ट ध्वनि से युक्त तरंग की तरह तुम्हारी शिखायें दीप्तिमती रहती हैं।

श्रुधिश्रुत्कर्णवह्निभिर्देवैरग्नेसयावभिः।
आसीदन्तुबर्हिषिमित्रोअर्यमाप्रातर्यावाणोअध्वरम् ॥ १३ ॥

श्रुधि। श्रुत्ऽकर्ण। वह्निऽभिः। देवैः। अग्ने। सयावऽभिः।
आ। सीदन्तु। बर्हिषि। मित्रः। अर्यमा। प्रातःऽयावानः।
अध्वरम् ॥ १३ ॥

हेश्रुत्कर्णश्रवणसमर्थाभ्यांकर्णाभ्यांयुक्ताग्ने श्रुधिअस्मदीयंवचनंशृणु योमित्रोदेवः यश्चार्यमायेचान्येप्रातर्यावाणः प्रातःकालेदेवयजनंगच्छन्तोदेवाः तैःसर्वैःसयावभिः आहवनीयाग्निना त्वयासमानगतिभिःअन्यैर्वह्निभिर्देवैःसह अध्वरंक्रतुमुद्दिश्यबर्हिषिदर्भेआसीदन्तुउपविशन्तु ॥ श्रुधि श्रुश्रवणे श्रुशृणित्यादिनाहेर्धिरादेशः बहुलंछन्दसीतिविकरणस्यलुक्। श्रुत्कर्ण शृणोतीतिश्रुत् क्विपितुगागमः श्रुतौकर्णौयस्यासौश्रुत्कर्णः। वह्निभिः वहप्रापणे वहिश्रियुश्रुग्लाहात्वरिभ्योनिवइतिनिप्रत्ययः नित्त्वादाद्युदात्तत्वम्। सयावभिः समानंयान्तीतिसयावानः याप्रापणे आतोमनिन्क्वनिबिति वनिप् कृदुत्तरपदप्रकृतिस्वरत्वम्। प्रातर्यावाणःपूर्ववत् प्रातिपदिकान्तनुम्विभक्तिषुचेतिणत्वम् ॥ १३ ॥

१३. अग्नि! तुम्हारे श्रवण-समर्थ कर्ण हमारे वचन सुनें। मित्र, अर्यमा तथा अन्य जो देवगण प्रातःकाल में या देवयज्ञ में गमन करते हैं, उन्हीं हव्यवाही सहगामियों के साथ इस यज्ञ को लक्ष्य करके कुश पर बैठो।

शृण्वन्तुस्तोमंमरुतःसुदानवोग्निजिह्वाऋतावृधः।
पिबन्तुसोमंवरुणोधृतव्रतोश्विभ्यामुषसासजूः ॥ १४ ॥ ३० ॥

शृण्वन्तु। स्तोमम्। मरुतः। सुऽदानवः। अग्निऽजिह्वाः।
ऋतऽवृधः। पिबन्तु। सोमम्। वरुणः। धृतऽव्रतः। अश्विऽभ्याम्।
उषसा। सऽजूः ॥ १४ ॥ ३० ॥

मरुतोदेवाः स्तोमंअस्मदीयंस्तोत्रंशृण्वन्तु कीदृशाः सुदानवः सुष्ठुफलस्यदातारः अग्निजिह्वाः अग्निर्जिह्वास्थानीयोमुख्योयेषुमरुत्सुवादृशाः ऋतावृधः सत्यस्ययज्ञस्यवावर्धकाः व-

थाधृतव्रतः गृहीतकर्मावरुणोदेवःअश्विभ्यांदिवाभ्यांउषसादेवतयासजूः सहसोमंपिबतु ॥ सुदानवः डुदाञ्दाने दाभाभ्यांनुरितिभावेनुप्रत्ययः दानुशब्दआद्युदात्तः शोभनंदानुयेषां आद्युदात्तंद्व्यच्छन्दसीतिउत्तरपदाद्युदात्तत्वम् । अग्निजिह्वाः अग्नेर्जिह्वायामेवस्थिताहविर्भाजइत्यर्थः तात्स्थ्यात्ताच्छब्द्यम् अग्निर्जिह्वास्थानीयोयेषांते छान्दसमन्तोदात्तत्वम् । ऋतावृधः ऋतस्य सत्यस्ययज्ञस्यवावर्धयितारः वृधेरन्तर्भावितण्यर्थात् क्विप्चेतिक्विप् अन्येषामपिदृश्यतइतिपूर्वपदस्यदीर्घत्वम् ॥ १४ ॥

१४. मरुद्गण दानशील, अग्निजिह्व और यज्ञवर्द्धनकारी हैं। वे हमारा स्तोत्र सुनें। गृहीतकर्मा वरुण अश्विनीकुमारों और उषा के साथ सोमपान करें।

त्वमग्नेवसूनितिद्वितीयंदशर्चंसूक्तम् अत्रानुक्रमणिका—त्वमग्नेदशानुष्टुभमर्धर्चोन्त्योदैवश्चेति । प्रस्कण्वऋषिः आनुष्टुभंछन्दः इदंसूक्तमग्निदेवताकम् पूर्वत्राग्नेयंत्वित्युक्तत्वात् अयंसोमइत्यर्धर्चोदेवदेवत्यः प्रातरनुवाकेआग्नेयेक्रतौआश्विनशस्त्रेचैतत्सूक्तम् अथैतस्यारात्रेरितिखण्डेसूत्रितम्—त्वमग्नेवसूंस्त्वंहिक्षैतवदिति । तथागर्गत्रिरात्रस्यान्तेहन्येतत्सूक्तंआज्यशस्त्रम् आङ्गिरसं स्वर्गकामइतिखण्डेसूत्रितम्—वारवंतीयमुत्तमेत्वमग्नेवसूँरितिचाज्यमिति ।

तत्रप्रथमामृचमाह—

त्वम॑ग्ने॒वसूँ॑रि॒हरु॒द्राँआ॑दि॒त्याँउ॒त। यजा॑स्वध्व॒रंजनं॒मनु॑जातंघृत॒प्रुष॑म् ॥ १ ॥

त्वम् । अ॒ग्ने॒ । वसू॑न् । इ॒ह । रु॒द्रान् । आ॒दि॒त्यान् । उ॒त । यज॑ । सु॒ऽअ॒ध्व॒रम् । जन॑म् । मनु॑ऽजातम् । घृ॒त॒ऽप्रुष॑म् ॥ १ ॥

हेअग्नेत्वंइहकर्मणिवस्वादीन्यजउतअपिचजनंअन्यमपिदेवतारूपंप्राणिनंयज कीदृशं स्वध्वरंशोभनयागयुक्तंमनुजातंमनुनाप्रजापतिनाउत्पादितं घृतप्रुषंउदकस्यसेक्तारम् ॥ यज द्व्यचोतस्तिङइतिसंहितायांदीर्घत्वम् । स्वध्वरः शोभनः अध्वरोयस्यासौस्वध्वरः नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । मनुजातम् जनेरन्तर्भावितण्यर्थात्कर्मणिक्तः तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरत्वम् । घृतप्रुषं पुषप्रुषप्लुषस्नेहनसेचनपूरणेषु घृतेनोदकेनप्रुष्णातिपूरयतीतिघृतप्रुट् क्विप्चेतिक्विप् ॥ १ ॥

१. अग्निदेव! तुम इस यज्ञ में वसुओं, रुद्रों और आदित्यों को अर्चित करो। शोभनीय-यज्ञ-युक्त और अन्नदाता अन्य मनुपुत्र देवों को भी पूजित करो।

श्रु॒ष्टी॒वानो॒हि॒दा॒शुषे॑दे॒वाअ॑ग्ने॒विचे॑तसः ।
तान्रो॑हिदश्वगिर्वण॒स्त्रय॑स्त्रिंशत॒मावह ॥ २ ॥

श्रु॒ष्टी॒ऽवानः॑ । हि । दा॒शुषे॑ । दे॒वाः । अ॒ग्ने॒ । विऽचे॑तसः । तान् । रोहि॑त्ऽअ॒श्व॒ । गि॒र्व॒णः॒ । त्रयः॑ऽत्रिंशतम् । आ । व॒ह॒ ॥ २ ॥

हेअग्नेविचेतसोविशिष्टमज्ञानादेवाः दाशुषेहविर्दत्तवतेयजमानायश्रुष्टीवानोहिश्रुष्टिःफल-स्यदानंतद्भाजःखलु हेरोहिदश्वरोहिन्नामकैरश्वैरुपेत गिर्वणःगीर्भिःस्तुतिभिर्वननीयाग्ने गिर्व-णादेवोभवतिगीर्भिरेनंवनयन्तीतियास्कः । त्रयस्त्रिंशतंअनयासंख्ययासंख्यातान्तान्देवानावह इहानय ॥ श्रुष्टीवानः श्रुष्टिःप्रेरणार्थः भावेक्तिन् श्रुष्टिंवनन्तिसंभजन्तइतिश्रुष्टीवानः अन्येभ्यो पिदृश्यन्तइतिविच् छान्दसंदीर्घत्वम् । विचेतसः विशिष्टंचेतोयेषांते बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । गिर्वणः गीर्भिर्वननीयोगिर्वणाः वनतेरसुन् पूर्वपदस्यह्रस्वत्वंछान्दसम् । त्रयश्चत्रिंशच्चत्रयस्त्रिं-शत् त्रेस्त्रयइतित्रिशब्दस्यत्रयस्आदेशः संख्येतिपूर्वपदप्रकृतिस्वरत्वम् ॥ २ ॥

२. अग्नि! विशिष्ट प्रज्ञावाले देवता हव्यदाता को फल प्रदान करते हैं। अग्नि! तुम्हारे पास रोहित नाम का अश्व है। तुम स्तुति-पात्र हो। तुम उन तैंतीस देवों को यहाँ ले आओ।

प्रियमेधवदत्रिवज्जातवेदोविरूपवत् ।
अङ्गिरस्वन्महिव्रतप्रस्कंण्वस्यश्रुधीहवम् ॥ ३ ॥

प्रियमेधऽवत् । अत्रिऽवत् । जातऽवेदः । विरूपऽवत् । अङ्गिरस्वत् ।
महिऽव्रत । प्रस्कंण्वस्य । श्रुधि । हवम् ॥ ३ ॥

हेमहिव्रतप्रभूतकर्मन्जातवेदोग्ने प्रस्कण्वस्यकण्वपुत्रस्यमहर्षेर्हवमाह्वानंश्रुधिशृणु तत्रच-त्वारोदृष्टान्ताः—प्रियमेधात्रिविरूपाङ्गिरोनामकाएतेषामाह्वानंयथाश्रृणोषितद्वत् अत्रनिरुक्तम्—प्रियमेधःप्रियाअस्यमेधायथैतेषामृषीणामेवंप्रस्कण्वस्यशृणुह्वानंप्रस्कण्वःकण्वस्यपुत्रःकण्वप्रभ-वोयथाप्राग्रमिति विरूपोनानारूपोमहिव्रतोमहाव्रतइतिच । प्रियमेधवत्प्रियमेधस्येव तत्रतस्येवे-तिषष्ठ्यर्थेवतिः । एवमत्रिवदित्यादावपि । प्रस्कण्वादयोगताः ॥ ३ ॥

३. अग्नि! तुम प्रभूतकर्मा और सर्वभूतज्ञ हो। जैसे तुमने प्रियमेधा, अत्रि, विरूप और अङ्गिरा नाम के ऋषियों का आह्वान सुना, वैसे ही प्रस्कण्व का आह्वान सुनो।

महिकेरवऊतयेप्रियमेधाअहूषत ।
राजन्तमध्वराणामग्निंशुक्रेणशोचिषा ॥ ४ ॥

महिऽकेरवः । ऊतये । प्रियऽमेधाः । अहूषत । राजन्तम् ।
अध्वराणाम् । अग्निम् । शुक्रेण । शोचिषा ॥ ४ ॥

महिकेरवः प्रौढकर्माणः प्रियमेधाःप्रियेणयज्ञेनोपेताःऋषयः ऊतयेरक्षार्थंअग्निमहूषत-आहूतवन्तः कीदृशं अध्वराणांयज्ञानांमध्येशुक्रेणशोचिषाशुद्धेनप्रकाशेनराजन्तंदीप्यमानम् ॥

१ नि० ६.१४। १ नि० ३.१७।

महिकेरवः महपूजायां औणादिकइन्प्रत्ययः डुकृञ्करणे कृवापाजीत्युण् महयोमहान्तः कारवोयेषांतेतथोक्ताः आकारस्यएकारादेशश्छान्दसः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्। प्रियमेधाः प्रियोमेधोयेषांते। अहूषत ह्वेञ्स्पर्धायांशब्देच लुङिसिचिबहुलंछन्दसीतिसंप्रसारणपरपूर्वत्वे हलइतिदीर्घत्वम् आदेशप्रत्यययोरितिषत्वम्॥ ४ ॥

४. यज्ञों के बीच, विशुद्ध प्रकाश-द्वारा, अग्नि प्रकाशमान होते हैं। प्रौढ़कर्मा प्रियमेधा लोगों ने, अपनी रक्षा के लिए, अग्नि का आह्वान किया था।

घृताहवनसन्त्येमाउषुश्रुधीगिरः।
याभिःकण्वस्यसूनवोहवन्तेवसेत्वा॥ ५॥ ३१॥

घृतऽआहवन। सन्त्य। इमाः। ऊम् इति। सु। श्रुधि। गिरः।
याभिः। कण्वस्य। सूनवः। हवन्ते। अवसे। त्वा॥ ५॥ ३१॥

हेघृताहवनघृतेनहूयमान सन्त्यफलप्रदाग्ने इमाउगिरः अस्माभिःप्रयुज्यमानाअपिस्तोत्ररूपावाचःसुश्रुधिसुष्ठुश्रृणु कण्वस्यमहर्षेःसूनवःपुत्राः याभिर्गीर्भिरवसेस्वरक्षार्थंत्वाहवन्तेत्वामाह्वयन्ति॥ घृताहवन घृतेनाहूयतेस्मिन्नितिघृताहवनः अधिकरणेल्युट् आमन्त्रिताद्युदात्तत्वम्। श्रुधि श्रुश्रृणुपॄकृवृभ्यश्छन्दसिइतिहेर्धिरादेशः बहुलंछन्दसीतिविकरणस्यलुक्॥ ५॥

५. कण्व के पुत्र, अपनी रक्षा के लिए, जिस स्तुति से तुम्हें बुलाते हैं, घृताहुत फलदाता अग्नि! वह सब स्तुति तुम सुनो।

॥इतिप्रथमस्यतृतीयेएकत्रिंशोवर्गः॥ ३१॥

अश्वमेधेपौष्ण्यामिष्टौस्विष्टकृतोनुवाक्यात्वांचित्रश्रवस्तमेत्येषा सर्वान्कामानाप्स्यन्नितिखण्डेसूत्रितम्—त्वांचित्रश्रवस्तमयद्वाहिष्ठंतदग्नयइति।

तामेतांसूक्तेषष्ठीमृचमाह—

त्वांचित्रश्रवस्तमहवन्तेविक्षुजन्तवः।
शोचिष्केशंपुरुप्रियाग्नेहव्यायवोह्ळवे॥ ६॥

त्वाम्। चित्रश्रवःऽतम। हवन्ते। विक्षु। जन्तवः। शोचिःऽकेशम्। पुरुऽप्रिय। अग्ने। हव्याय। वोह्ळवे॥ ६॥

हेचित्रश्रवस्तमअतिशयेनविविधहवीरूपान्नयुक्तपुरुप्रियबहूनांयजमानानांप्रीतिकराग्ने त्वांहव्यायवोह्ळवेहविर्वोढुं विक्षुजन्तवः प्रजासूत्पन्नायजमानाहवन्तेआह्वयन्ति कीदृशंशोचि-

ष्केशंदीप्तिरूपकेशोपेतम् तथाचवाजसनेयिनआमनन्ति—शोचन्तइवहेतस्यसमिद्धस्यरश्मयः केशाइति ॥ चित्रश्रवस्तम श्रवइत्यन्ननाम चित्रंश्रवोयस्यासौचित्रश्रवाः अतिशयेनचित्रश्रवाः चित्रश्रवस्तमः आमन्त्रितानुदात्तत्वम् । शोचिष्केशं शुचदीप्तौ अर्चिशुचिहुसृपिछादिछर्दिभ्यइ-सिरितीसिः प्रत्ययस्वरः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । हव्याय हवनक्रियायांप्राप्यत्वात् क्रि-याग्रहणंकर्तव्यमितिसंप्रदानत्वाच्चतुर्थी । वोळ्हवे वहप्रापणे तुमर्थेसेसेनितितवेन्प्रत्ययः ढत्व-धत्वष्टुत्वढलोपेषुकृतेषु सहिवहोरोदवर्णस्येतिअकारस्यओकारः नित्त्वादाद्युदात्तत्वम् ॥ ६ ॥

६. अग्निदेव ! तुम यथेष्ट और विविध प्रकार के अन्नोंवाले हो तथा बहुत लोगों के प्रिय हो। तुम्हारे दीप्ति-रूप केश हैं। मनुष्य लोग तुम्हें हव्य वहन के लिए बुलाते हैं।

नित्वाहोतारमृत्विजंदधिरेवसुवित्तमम् ।
श्रुत्कर्णंसप्रथस्तमंविप्राअग्नेदिविष्टिषु ॥ ७ ॥

नि । त्वा । होतारम् । ऋत्विजम् । दधिरे । वसुवित्ऽतमम् ।
श्रुत्ऽकर्णम् । सप्रथःऽतमम् । विप्राः । अग्ने । दिविष्टिषु ॥ ७ ॥

हेअग्नेविप्रामेधाविनोदिविष्टिषुयागेषुत्वांनिदधिरेस्थापितवन्तः कीदृशं होतारंआह्वाता-रंऋत्विजं ऋतुषुयजनशीलं वसुवित्तमंअतिशयेनधनस्यलंभयितारं श्रुत्कर्णंश्रवणयो-ग्यकर्णोपेतं सप्रथस्तमं अतिशयेनप्रख्यातम् ॥ दधिरे इरेचश्छित्त्वादन्तोदात्तत्वं पादादित्वा-न्निघाताभावः । दिविष्टिषु इष्टयएषणानि दिवःस्वर्गस्यएषणानियेषुयागेषुतेदिविष्टयः सर्वेविधय-श्छन्दसिविकल्प्यन्तइतिवचनाद्दिवउदित्युत्वंनक्रियते बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् ॥ ७ ॥

७. अग्नि ! तुम आह्वानकारी, ऋत्विक् और बहुधनदाता हो। तुम्हारे कर्ण श्रवण-समर्थ हैं। तुम्हारी प्रसिद्धि बहुव्यापक है। मेधावियों ने यज्ञ में तुम्हें स्थापित किया है।

आत्वाविप्राअचुच्यवुःसुतसोमाअभिप्रयः ।
बृहद्भाबिभ्रतोहविरग्नेमर्तायदाशुषे ॥ ८ ॥

आ । त्वा । विप्राः । अचुच्यवुः । सुतऽसोमाः । अभि । प्रयः ।
बृहत् । भाः । बिभ्रतः । हविः । अग्ने । मर्ताय । दाशुषे ॥ ८ ॥

हेअग्ने सुतसोमाः अभिषुतसोमयुक्ताः विप्रामेधाविनऋत्विजः प्रयःअभि हविर्लक्षणमन्नम-भिलक्ष्यत्वाआचुच्यवुःत्वामागमयन्ति कीदृशंत्वांबृहन्महान्तं भाः भासमानं कीदृशाविप्राः दा-

शुषेमर्ताय हविःप्रदस्ययजमानस्यसम्बन्धिहविर्बिभ्रतोधारयन्तः ॥ अचुच्यवुः च्युङ्गतौ अस्मा-दन्तर्भावितण्यर्थाद्वलङ्व्यित्ययेनपरस्मैपदम् बहुलंछन्दसीतिशपःश्लुः सिजभ्यस्तविदिभ्य-श्चेतिझेर्जुसादेशः जुसिचेतिगुणः । बृहद्भाः उभयत्रसुपांसुलुगितिविभक्तेर्लुक् । बिभ्रतः डुभृञ्धा-रणपोषणयोः शतरिनाभ्यस्ताच्छतुरितिनुमागमप्रतिषेधः अभ्यस्तानामादिरित्याद्युदात्तत्वम् । मर्ताय दाशुषे उभयत्रषष्ठयर्थेचतुर्थीवक्तव्येतिचतुर्थी ॥ ८ ॥

८. अग्नि! हव्यदाता के लिए हव्य धारण कर और सोमरस तैयार कर मेधावी ऋत्विक् अन्न के पास तुम्हें बुलाते हैं। तुम महान् और प्रभाशाली हो।

प्रातर्याव्णःसहस्कृतसोमपेयायसन्त्य ।
इहाद्यदैव्यंजनंबर्हिरासादयावसो ॥ ९ ॥

प्रातःऽयाव्नः । सहःऽकृत । सोमऽपेयाय । सन्त्य । इह । अद्य । दैव्यम् । जनम् । बर्हिः । आ । सादय । वसो इति ॥ ९ ॥

हेसहस्कृतबलेनमथित सन्त्य फलदातः वसोनिवासहेतुभूताग्ने इहदेवयजनदेशेअद्यास्मि-न्दिनेसोमपेयायसोमपानार्थंप्रातर्याव्णः प्रातरागच्छतोदेवान्दैव्यंजनंअन्यमपिदेवताजनंबर्हिरा-सादययज्ञंप्रापय ॥ प्रातर्याव्णः शसिअल्लोपोनइत्यकारलोपः । सहस्कृत सहतेभिभवत्यनेनेतिस-होबलं तेनक्रियतइतिसहस्कृतः ओजःसहोंभस्तमसस्तृतीयायाइतिअलुगभावश्छान्दसः ॥ ९ ॥

९. अग्नि! तुम काष्ठ-बल-द्वारा घर्षित होकर उत्पन्न हो। तुम फलदाता और निवास हेतु हो। आज इस स्थान पर प्रातरागमन करने-वाले देवों और अन्य देवता जनों को, सोमपान के लिए, कुश के ऊपर बुलाओ।

अर्वाञ्चंदैव्यंजनमग्नेयक्ष्वसहूतिभिः ।
अयंसोमःसुदानवस्तंपाततिरोअह्न्यम् ॥ १० ॥ ३२ ॥

अर्वाञ्चम् । दैव्यम् । जनम् । अग्ने । यक्ष्व । सहूतिऽभिः । अयम् । सोमः । सुऽदानवः । तम् । पात । तिरःऽअह्न्यम् ॥ १० ॥ ३२ ॥

हेअग्ने अर्वाञ्चमभिमुखंदैव्यंजनंदेवतारूपंप्राणिनंसहूतिभिःसमानाह्वानैःदेवान्तरैःसह यक्ष्वयज हेसुदानवः सुष्ठुफलदातारोदेवाः अयंसोमःयुष्मदर्थंसोमःपुरतोवर्ततेतंसोमंपा-त पिबत कीदृशं तिरोअह्न्यंएतन्नामकंपूर्वस्मिन्नह्निअभिषुतोयःसोमः उत्तरेहनिहूयते तस्यै-तन्नामधेयम् ॥ दैव्यम् देवाद्यञञावितिप्राग्दीव्यतीयोयञ् । यक्ष्व लोटिबहुलंछन्दसीतिशपोलुक् प्रत्ययस्वराभावश्छान्दसः अग्नेइत्यस्यपादादौवर्तमानस्यामन्त्रितंपूर्वमविद्यमानवदितिअविद्य-

मानवत्त्वात् तिङ्ङतिङइतिनिघाताभावः । सहूतिभिः समानाहूतिराह्वानंयेषांतेसहूतयः समानस्यच्छन्दसीतिसभावः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । पात पापाने बहुलंछन्दसीतिशपोलुक् । तिरोअह्नयं अह्निभवमह्नयम् भवेछन्दसीतियत् नस्तद्धितेइतिटिलोपोनभवति अह्नष्टखोरेवेति नियमात् भसंज्ञायामल्लोपोनइत्यकारलोपः येचाभावकर्मणोरितिप्रकृतिभावस्तुसर्वविधीनांछन्दसिविकल्पितत्वान्नक्रियते तिरोहितोअह्नयस्तिरोअह्नयः प्रकृत्यान्तःपादमितिप्रकृतिभावः अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥ १० ॥

१०. अग्नि ! सम्मुखस्थ देवरूप प्राणियों को, अन्य देवों के साथ, समान आह्वान के द्वारा यजन करो। दानशील देवो, तुम्हारे लिए यह सोम अभी गत दिवस प्रस्तुत किया गया है। इसे पान करो।

॥ इतिप्रथमस्यतृतीयेद्वात्रिंशोवर्गः ॥ ३२ ॥

एषोउषाइतिपञ्चदशर्चंतृतीयंसूक्तम् प्रस्कण्वस्यार्षं इदमुत्तरंचाश्विनंगायत्रीछन्दस्कम् अत्रानुक्रमणिका—एषोपञ्चोनाश्विनंतुगायत्रमिति ।प्रातरनुवाकेआश्विनेक्रतौगायत्रेछन्दसिआश्विनशस्त्रेचेदंसूक्तम् । अथाश्विनएषोउषाइतिसूत्रितम् ।

तत्रप्रथमामृचमाह—

एषोउषाअपूर्व्याव्युच्छतिप्रियादिवः । स्तुषेवामश्विनाबृहत् ॥ १ ॥

एषो इति । उषाः । अपूर्व्या । वि । उच्छति । प्रिया । दिवः । स्तुषे । वाम् । अश्विना । बृहत् ॥ १ ॥

एषो एषैवास्माभिःपरिदृश्यमाना प्रिया सर्वेषांप्रीतिहेतुः अपूर्व्या पूर्व्येषुमध्यरात्रादिकालेषुविद्यमानानभवति किन्त्विदानींतनी उषा उषोदेवतादिवोद्युलोकस्यसकाशात्आगत्यव्युच्छतितमोवर्जयति हेअश्विनौवांयुवांबृहत्प्रभूतंयथाभवतितथास्तुषे स्तौमि ॥ स्तुषे ष्टुञ्स्तुतौ विङांतिङोभवन्तीत्युत्तमैकवचनस्यमध्यमैकवचनादेशः यद्वा लेटयुत्तमैकवचनेसिब्बहुलंलेटीतिसिप् ॥ १ ॥

१. प्रिय उषा इसके पहले नहीं दिखाई दी। यह उषा आकाश से अन्धकार दूर करती है। अश्विनीकुमारो ! मैं तुम्हारी प्रभूत स्तुति करता हूँ।

यादस्रासिन्धुमातरामनोतरारयीणाम् । धियादेवावसुविदा ॥ २ ॥

या । दस्रा । सिन्धुऽमातरा । मनोतरा । रयीणाम् । धिया । देवा । वसुऽविदा ॥ २ ॥

यादेवा यावुभावश्विनौवक्ष्यमाणगुणयुक्तौतौस्तुषेइतिपूर्वत्रान्वयः कीदृशौ दस्रा दर्शनीयौ सिन्धुमातरा समुद्रमातृकौ यद्यपिसूर्याचन्द्रमसावेवसमुद्रजौ तथाप्यश्विनोःकेषांचिन्मतेतद्रूपत्वात्तथात्वम् रयीणांधनानांमनोतरा मनसातारयितारौधियाकर्मणावसुविदा निवासस्थानस्य लम्भयितारौ ॥मनोतरा मनसातरतइतिमनोतरौ तरतेरन्तर्भावितण्यर्थाद्वक्रदोरबित्यप् पूर्वपदान्तस्यसकारस्यरुत्वेसतिछान्दसमुत्वम्।रयीणां नामन्यतरस्यामितिनामउदात्तत्वम्।धिया सावेकाचइतिविभक्तेरुदात्तत्वम्। वसुविदा वसूनिनिवासस्थानानिविन्दतइतिवसुविदौ क्विप्चेतिक्विप्॥ २॥

२. जो दर्शनीय समुद्र-पुत्र देवद्वय या अश्विद्वय मनोहर और धनदाता हैं और जो हमारे यज्ञ करने पर निवासस्थान प्रदान करते हैं, उनकी मैं स्तुति करता हूँ।

वच्यन्तेवांककुहासोजूर्णायामधिविष्टपि। यद्वांरथोविभिष्पतात्॥ ३॥

वच्यन्ते। वाम्। ककुहासः। जूर्णायाम्। अधि। विष्टपि। यत्। वाम्। रथः। विऽभिः। पतात्॥ ३॥

हेअश्विनौ वांयुवयोःसम्बन्धीरथः जूर्णायांनानाशास्त्रैःस्तुतायांअधिविष्टपिस्वर्गलोके यद्यदा विभिरश्वैःपतात् पततिगच्छति तदानींवांयुवयोः ककुहासःस्तुतयोवच्यन्ते अस्माभिरुच्यन्ते ॥ वच्यन्ते ब्रवीतेर्यकि ब्रुवोवचिरितिवच्यादेशः वचिस्वपीत्यादिनासम्प्रसारणम् संप्रसारणाच्चेत्यत्रवाछन्दसीत्यनुवृत्तेःपरपूर्वत्वस्यपाक्षिकत्वाद्यणादेशः प्रत्ययस्वरः। ककुहासः ककुभंशृङ्गेविदुः प्रधानेचेत्यभिधानात्प्राधान्याभिधायिनाककुभशब्देनतत्प्रतिपादिकाःस्तुतयोलक्ष्यन्ते हत्वंछान्दसं आज्जसेरसुगित्यसुक्। जूर्णायाम् जॄष्वयोहानौ अत्रस्तुत्यर्थः धातूनामनेकार्थत्वात् निष्ठायां श्र्युकःकितीति इट्प्रतिषेधः बहुलंछन्दसीत्युत्वम् हलिचेतिदीर्घः रदाभ्यामितिनिष्ठानत्वम् प्रत्ययस्वरः। विभिः वीगत्यादौ वियन्तिगच्छन्तीतिवयोश्वाः औणादिकोडिप्रत्ययः। पतात् पतॢगतौ लेट्याडागमः इतश्चलोपइतीकारलोपः॥ ३॥

३. अश्विनीकुमारद्वय! जिस समय तुम्हारा प्रशंसित रथ घोड़ों द्वारा स्वर्ग में चलता है, उस समय हम तुम्हारी स्तुति करते हैं।

चतुर्थीमृचमाह—

हविषाजारोअपांपिपर्तिपपुरिर्नरा। पिताकुटस्यचर्षणिः॥ ४॥

हविषा। जारः। अपाम्। पिपर्ति। पपुरिः। नरा। पिता। कुटस्य। चर्षणिः॥ ४॥

हेअश्विनौदेवौ अपांजारः स्वकीयतापेनोदकानांजरयितासूर्यः हविषाअस्मद्दत्तेन पिपर्तिदेवान्पूरयति उदितेसूर्येहविःप्रदानात्सूर्यस्यपूरकत्वंद्रष्टव्यम् अतःसूर्योदयकाले युवाभ्यामागन्तव्यमित्यर्थः कीदृशोजारः पपुरिः उक्तक्रमेणपूरणस्वभावः पिता पालकः कुटस्यचर्षणिः कर्मणोद्रष्टा अत्रनिरुक्तम्—हविषापांजरयितापिपर्तिपपुरिरितिपृणातिनिगमौ वाप्रीणातिनिगमौवापिताकृतस्यकर्मणश्चायितादित्यइति[1] ॥ जारः जरयतीतिजारआदित्यः दारजारौकर्तरिणिलुक्चेतिघञन्तोनिपातितः कर्षात्वतइत्यन्तोदात्तत्वम् । अपां ऊडिदमितिविभक्तेरुदात्तत्वम् । पिपर्ति पॄपालनपूरणयोः तिपि जुहोत्यादित्वाच्छपःश्लुः अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वम् अनुदात्तेचेत्यभ्यस्तस्याद्युदात्तत्वम् । पपुरिः आदृगमहनइतिकिन्प्रत्ययः लिड्वद्भावात्किस्त्वेसिद्धेपि पुनःकित्करणसामर्थ्याद्दच्छत्यृतामितिगुणाभावः उदोष्ठ्यपूर्वस्येत्युत्वम् नित्वादाद्युदात्तत्वम् ॥ ४ ॥

४. हे नेतृस्थानीय अश्विद्वय ! पूरक, पालक, यज्ञ-दर्शक और जल-शोषक सविता हमारे हव्य-द्वारा देवों को प्रसन्न करें ।

आदारोवांमतीनांनासत्यामतवचसा । पातंसोमस्यधृष्णुया ॥ ५॥३३॥

आऽदारः । वाम् । मतीनाम् । नासत्या । मतऽवचसा । पातम् । सोमस्य । धृष्णुऽया ॥ ५ ॥ ३३ ॥

हेमतवचसा अभिमतस्तोत्रौ नासत्या अश्विनौ वांयुवयोर्मतीनां बुद्धीनां आदारः प्रेरकोयःसोमोस्ति सोमस्य तंसोमं पातं युवां पिबतं कीदृशंसोमं धृष्णुयाधर्षणशीलंमदकरत्वेनतीव्रमित्यर्थः ॥ आदारः दृङ्आदरे आदरयतीत्यादारः दारजारौ कर्तरिणिलुक्चेतिघञ्प्रत्ययः थाथादिनोत्तरपदान्तोदात्तत्वम् । मतीनां नामन्यतरस्यामितिनामउदात्तत्वम् । मतवचसा मतं अभिमतं स्तोत्ररूपं वचोययोस्तौ सुपांसुलुगितिविभक्तेराकारः । पातं पापाने बहुलंछन्दसीतिशपोलुकिसति पाघ्रेत्यादिनापिबादेशोनभवति । सोमस्य क्रियाग्रहणंकर्तव्यमिति कर्मणः सम्प्रदानत्वाच्चतुर्थ्यर्थेषष्ठी । धृष्णुया सुपांसुलुगितिविभक्तेर्याजादेशः ॥ ५ ॥

५. हे नासत्यद्वय ! हमारी प्रिय स्तुति ग्रहण कर बुद्धि-परि-चालक तीव्र सोमरस का पान करो ।

॥ इतिप्रथमस्यतृतीयेत्रयस्त्रिंशोवर्गः ॥ ३३ ॥

---

१ नि० ५, २४.।

षष्ठीमृचमाह—

यानःपीपरदश्विनाज्योतिष्मतीतमस्तिरः । तामस्मेरासाथामिषम् ॥६॥

या । नः । पीपरत् । अश्विना । ज्योतिष्मती । तमः । तिरः । ताम् । अस्मे इति । रासाथाम् । इषम् ॥६ ॥

हेअश्विना ज्योतिष्मतीरसवीर्यादिरूपज्योतिर्युक्तायाइट्अन्नं नोस्मान् पीपरत् पारयेत् तृप्तिंप्रापयेत् किंकृत्वा तमोदारिद्र्यरूपं अन्धकारं तिरः अन्तर्हितं विनष्टंकृत्वा तामिषं तादृशमन्नं अस्मे अस्मभ्यं रासाथां युवांदत्तम् ॥ पीपरत् पॄपालनपूरणयोः ण्यन्तात् लुङिचङि णिलोपः उपधाह्रस्वत्वद्विर्भावहलादिशेषसन्वद्भावेत्वदीर्घाः बहुलंछन्दस्यमाङ्योगेपीत्यडभावः चङ्यन्यतरस्यामिति उपोत्तमस्य धात्वकारस्योदात्तत्वेप्राप्ते व्यत्ययेनाभ्यासस्योदात्तत्वम् यद्वृत्तान्नित्यमितिनिघातप्रतिषेधः । अस्मे सुपांसुलुगितिचतुर्थीबहुवचनस्यशेआदेशः । रासाथां रादाने छान्दसे प्रार्थनायांलुङि व्यत्ययेनात्मनेपदं च्लेःसिच् एकाचइतीट्प्रतिषेधः पूर्ववदडभावः तिङ्ङतिङइतिनिघातः ॥ ६ ॥

६. अश्विद्वय ! जो ज्योतिष्क अन्न अन्धकार का विनाश करके हमें तृप्ति-प्रदान करता है, वही अन्न हमें प्रदान करो ।

सप्तमीमृचमाह—

आनोनावामतीनांयातंपारायगन्तवे । युञ्जाथामश्विनारथम् ॥ ७ ॥

आ । नः । नावा । मतीनाम् । यातम् । पाराय । गन्तवे । युञ्जाथाम् । अश्विना । रथम् ॥ ७॥

हेअश्विना मतीनांस्तुतीनांपारायगन्तवेपारंगन्तुं नावानौरूपेणगमनसाधनेननोस्मान्प्रतिआयातंसमुद्रमध्यादागच्छतंभूमावागन्तुंरथंभवदीयंयुंजाथांसाश्वंकुरुतम् ॥ नावा सावेकाचइति विभक्तेरुदात्तत्वम् । गन्तवे तुमर्थेसेसेनितितवेन्प्रत्ययःनित्त्वादाद्युदात्तत्वम् । युञ्जाथाम् युजिर्योगे लोट्याथामि रुधादित्वाव्श्नम् श्नसोरल्लोपइत्यकारलोपः प्रत्ययस्वरः ॥ ७ ॥

७. अश्विद्वय ! स्तुति-समुद्र के पार जाने के लिए नौकारूप होकर आओ । हमारे सामने अपने रथ में अश्व संयोजित करो ।

अरित्रंवांदिवस्पृथुतीर्थेसिन्धूनांरथः । धियायुयुज्रइन्दवः ॥ ८ ॥

अरित्रम् । वाम् । दिवः । पृथु । तीर्थे । सिन्धूनाम् । रथः ।
धिया । युयुज्रे । इन्दवः ॥ ८ ॥

हेअश्विनौ वांयुवयोः दिवस्पृथु द्युलोकादपिविस्तीर्णअरित्रंगमनसाधनंनौरूपंसिन्धूनां समुद्राणां तीर्थेअवतरणप्रदेशेविद्यतइतिशेषः रथश्च भूमौगन्तुंविद्यते इन्दवःसोमाः धियाभवद्विषयेणयुयुज्रेयुक्ताबभूवुः॥ अरित्रं ऋगतौ अर्तिलूधूसूखनसहचरइत्रइत्रविकरणेइत्रप्रत्ययः प्रत्ययस्वरः। दिवःऊडिदमितिविभक्तेरुदात्तत्वम्। तीर्थे तॄप्लवनतरणयोः पातॄतुदिवचिरिरिचिसिचिभ्यस्थगितिथक् ऋतइद्धातोरितीत्वम् हलिचेतिदीर्घः। युयुज्रे लिटिइरयोरेइतिइरेचोरेआदेशः॥८॥

८. तुम्हारा समुद्र के तीर पर आकाश से भी बड़ा नौकारूप यान है। पृथिवी पर तुम्हारा रथ है। तुम्हारे यज्ञ-कर्म में सोमरस भी मिला हुआ है।

दिवस्कण्वासइन्दवोवसुसिन्धूनांपदे। स्वंवव्रिंकुहधित्सथः ॥ ९ ॥

दिवः । कण्वासः । इन्दवः । वसु । सिन्धूनाम् । पदे । स्वम् ।
वव्रिम् । कुह । धित्सथः ॥ ९ ॥

हेकण्वासः कण्वपुत्राः यद्वा मेधाविनऋत्विजः अश्विनावित्थंपृच्छतेतिशेषः कथमिति तदुच्यते दिवोद्युलोकसकाशात् इन्दवःसूर्यरश्मयःप्रादुर्भूताःसिन्धूनामपांवृष्टिरूपाणांस्यन्दनस्वभावानां पदेस्थानेअन्तरिक्षेवसुअस्मदादिनिवासहेतुभूतमुषःकालीनंज्योतिःआविर्भूतमितिशेषः अस्मिन्नवसरेयुवांस्वंवव्रिंस्वकीयंरूपंकुहधित्सथः कुत्रस्थापयितुमिच्छथः अत्रागत्यप्रदर्शनीयमितितात्पर्यार्थः ॥ कुह वाहचच्छन्दसीतिकिंशब्दात्सप्तम्यर्थेहप्रत्ययः कुतिहोरितिकिमः कुः। धित्सथः डुधाञ्धारणपोषणयोः सनि सनिमीमाघुरभलभशकपतपदामचइसितिआकारस्यइसादेशः अत्रलोपोभ्यासस्येतिअभ्यासलोपः सःस्यार्धधातुकेइतिसकारस्यतकारः ॥ ९ ॥

९. कण्ववंशियो! अश्विद्वय की जिज्ञासा करो। द्युलोक से सूर्य-किरणें आती हैं। वृष्टि के उत्पत्ति-स्थान अन्तरिक्ष में हमारी निवास-हेतु ज्योति प्रादुर्भूत होती है। अश्विनीकुमारद्वय! इन स्थानों में से किस स्थान पर तुम अपना स्वरूप रखना चाहते हो?

अभूदुभाउअंशवेहिरण्यंप्रतिसूर्यः। व्यख्यज्जिह्वयासितः ॥१०॥३४॥

अभूत् । ऊम् इति । भाः । ऊम् इति । अंशवे । हिरण्यम् । प्रति ।
सूर्यः । वि । अख्यत् । जिह्वया । असितः ॥ १० ॥ ३४ ॥

भाउ सूर्यस्यदीप्तिस्तुअंशवेउषःकालीनरश्मिसिद्ध्यर्थंअभूदुमादुर्भूतैव सूर्यश्चहिरण्यंप्रति स्वकीयोदयेनहिरण्यसदृशोभूत् अग्निश्च असितः स्वकीयदीप्तेः सूर्यस्यप्रवेशेनस्वयंकृष्णोभूत्वा जिह्वयास्वकीययाज्वालयाव्यख्यत्प्रकाशितवान् तस्मादयमश्विनोर्युवयोरागमनकालइत्यर्थः ॥ अभूत् भूसुवोस्तिङीतिगुणप्रतिषेधः । हिरण्यंप्रति प्रतिःप्रतिनिधिप्रतिदानयोरितिप्रतेः कर्मप्रवचनीयत्वम् कर्मप्रवचनीययुक्तेद्वितीयेतिद्वितीया । अख्यत् चक्षिङ्व्यक्तायांवाचि लुङि चक्षिङःख्याञितिख्याञादेशः ॥ १० ॥

१०. सूर्य-रश्मि-द्वारा उषाकाल का आलोक उत्पन्न हुआ है। सूर्य उदित होकर हिरण्य के समान हुए हैं। सूर्य के बीच में जाने से अग्नि कृष्णवर्ण होकर अपनी शिखा-द्वारा प्रकाश पाये हुए हैं।

अभूदुपारमेतवेपन्थाऋतस्यसाधुया । अदर्शिविस्रुतिर्दिवः ॥११॥

अभूत् । ऊम् इति । पारम् । एतवे । पन्थाः । ऋतस्य । साधुऽया । अदर्शि । वि । स्रुतिः । दिवः ॥ ११ ॥

ऋतस्यसूर्यस्यपारमेतवे रात्रेःपारभूतमुदयाद्रिंगन्तुं पन्थामार्गःसाधुयासमीचीनः अभूदुनिष्पन्नएव दिवः द्योतनात्मकस्यसूर्यस्यस्रुतिःप्रसृतादीप्तिर्व्यदर्शिविशेषेणदृष्टा तस्मादश्विनौयुवाभ्यामागन्तव्यम् ॥ एतवे इण्गतौ तुमर्थेसेसेनितितवेन्प्रत्ययः । साधुया सुपांसुलुगितिविभक्तेर्याजादेशः । अदर्शि कर्मणिलुङि च्लेश्चिणादेशः चिणोलुगितितशब्दस्यलुक् । स्रुतिः स्रुगतौ क्तिच्कौचसंज्ञायामितिक्तिच् ॥ ११ ॥

११. रात्रि के पार जाने के निमित्त सूर्य के लिए सुन्दर मार्ग बना हुआ है। सूर्य की विस्तृत दीप्ति दिखाई दी है।

तत्तदिदश्विनोरवोजरिताप्रतिभूषति । मदेसोमस्यपिप्रतोः ॥१२॥

तत्ऽतत् । इत् । अश्विनोः । अवः । जरिता । प्रति । भूषति । मदे । सोमस्य । पिप्रतोः ॥ १२ ॥

जरितास्तोता अश्विनोःसम्बन्धितत्तदित् पुनःपुनःकृतंसर्वमपिअवोस्मद्विषयंरक्षणंप्रतिभूषतिप्रत्येकमलङ्करोति तदातदाप्रशंसतीत्यर्थः कीदृशयोरश्विनोः मदेहर्षेनिमित्तभूतेसतिसोमस्य पिप्रतोः सोमंपूरयतोः ॥ भूषति भूषअलङ्कारे भौवादिकः । पिप्रतोः पॄपालनपूरणयोः पृइत्येके अस्माल्लटःशतृ जुहोत्यादित्वाच्छपःश्लुः द्विर्भावोरदत्वहलादिशेषाः अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वम् शतुर्ङित्त्वाद्गुणाभावेयणादेशः अभ्यस्तानामादिरित्याद्युदात्तत्वम् ॥ १२॥

१२. अश्विद्वय प्रसन्नता के लिए सोम पान करते हैं। स्तोता लोग बार-बार उनके रक्षण-कार्य की प्रशंसा करते हैं।

त्रयोदशीमृचमाह—

वावसानाविवस्वतिसोमस्यपीत्यागिरा। मनुष्वच्छंभूआगतम् ॥१३॥

वुवसाना। विवस्वति। सोमस्य। पीत्या। गिरा। मनुष्वत्।

शंभू इति शम्ऽभू। आ। गतम् ॥ १३ ॥

हेशम्भू सुखस्यभावयितारौअश्विनौ मनुष्वत् मनाविवविवस्वतिपरिचरणवतियजमानेव-वसानानिवासशीलौयुवां सोमस्यपीत्या सोमपाननिमित्तंगिरास्तुतिनिमित्तंचआगतंआगच्छत-म् ॥ववसाना वसनिवासे ताच्छील्यवयोवचनेतिताच्छीलिकश्चानश् बहुलंछन्दसीतिशपःश्लुः अन्येषामपिदृश्यतइतिसंहितायामभ्यासस्यदीर्घत्वम् सुपांसुलुगितिविभक्तेराकारः चितइत्यन्तो-दात्तत्वम्।पीत्या पापाने स्थागापापचोभावेइतिभावेक्तिन् घुमास्थेतीत्वम् व्यत्ययेनान्तोदात्तत्व-म् तृतीयैकवचनेयणादेशेउदात्तयणोहल्पूर्वादितिविभक्तेरुदात्तत्वम्। मनुष्वत् मनज्ञाने मन्य-तेजानातीतिमनुः बहुलवचनादौणादिकउसिप्रत्ययः तत्रतस्येवेतिसप्तम्यर्थेवतिःप्रत्ययस्वरः।गतं गमेर्लोटि बहुलंछन्दसीतिशपोलुक् अनुदात्तोपदेशेत्यादिनानुनासिकलोपः ॥ १३ ॥

१३. सुखद अश्विद्वय! मनु की तरह सेवक यजमान के घर में निवास-शील होकर तुम सोमपान और स्तुति-श्रवण के लिए आओ।

युवोरुषाअनुश्रियंपरिज्मनोरुपाचरत्। ऋतावनथोअक्तुभिः ॥१४॥

युवोः। उषाः। अनु। श्रियम्। परिऽज्मनोः। उपऽआचरत्।

ऋता। वनथः। अक्तुऽभिः ॥ १४ ॥

हेअश्विनौपरिज्मनोःपरितोगन्त्रोर्युवोः युवयोरुभयोः श्रियमनुआगमनरूपांशोभामनुसृ-त्यउषाउपाचरत् उषःकालदेवताइहागच्छतु युवयोरागतयोःसतोः पश्चादागतेत्यर्थः युवांचअक्तु-भीरात्रिभिः ऋता यज्ञगतानिहवींषिवनथःकामयेथेसम्भजेथे ॥ युवोः युष्मच्छब्दात्षष्ठीद्विवचन-स्यसुपांसुपोभवन्तीतिषष्ठीद्विवचनादेशः अतआदेशविषयत्वाद्योचीतियत्वाभावः शेषेलोपः। प-रिज्मनोः परितःअजतोगच्छतइतिपरिज्मानौ श्वन्नुक्षन्नित्यादिनाअजतेर्मनिन्प्रत्ययान्तोनिपा-तितः। ऋता शेश्छन्दसीतिशेर्लोपः। वनथः वनषणसम्भक्तौ तिङ्ङतिङइतिनिघातः ॥१४॥

१४. अश्विद्वय! तुम चतुर्दिक्चारी हो। तुम्हारी शोभा का अनुधावन करके उषा आगमन करे। रात्रि में सम्पादित यज्ञ का हव्य तुम ग्रहण करो।

प्रवर्ग्येपौर्वाह्णिकेघर्मस्यहविषोद्वितीयायाज्याउभापिबतमित्येषा अथोत्तरमितिखण्डेसू-त्रितम्—उभापिबतमश्विनेतिचोभाभ्यामनवाममिति। आश्विनशस्त्रेप्येषाद्वितीयायाज्या सूत्रितं च—प्रवामन्धांसिमद्यान्यस्थुरुभापिबतमश्विनेतियाज्येति।

तामेतांपञ्चदशीमृचमाह—

उभापिबतमश्विनोभानःशर्मयच्छतम्।
अविद्रियाभिरूतिभिः॥ १५॥ ३५॥ ३॥

उभा। पिबतम्। अश्विना। उभा। नः। शर्म। यच्छतम्।
अविद्रियाभिः। ऊतिऽभिः॥ १५॥ ३५॥ ३॥

हेअश्विना उभायुवामुभौपिबतंसोमपानं कुरुतम् ततऊर्ध्वमुभायुवामुभौअविद्रियाभिःप्रशस्ताभिरूतिभीरक्षाभिर्नोस्मभ्यंशर्मसुखंयच्छतम्॥ पिबतम् पापाने लोटिशपि पाघ्रेत्यादिनापिबादेशः अङ्गवृत्तेपुनर्वृत्तावविधिर्निष्ठितस्येतिवचनाल्लघूपधगुणाभावः यद्वा आद्युदात्तःअदन्तःपिबादेशः तिङ्ङतिङइतिनिघातः। यच्छतम् दाण्दाने लोटिशपि पाघ्रेत्यादिनायच्छादेशः। अविद्रियाभिः द्रुकुत्सायांगतौ विपूर्वादस्माद्भावेऔणादिकःकिः आतोलोपइटिचेत्याकारलोपः विद्रिर्निन्दा तद्विरोधिनी अविद्रिःस्तुतिः तांयान्तीत्यविद्रियाः अन्येभ्योपिदृश्यन्तइतिविच् कृदुत्तरपदप्रकृतिस्वरत्वम्। ऊतिभिः अवतेःक्तिनि ज्वरत्वरेत्यादिनाऊठ् ऊतियूतीत्यादिनाक्तिनउदात्तत्वम्॥ १५॥

१५. अश्विद्वय! तुम दोनों पान करो। तुम दोनों प्रशस्त रक्षण-द्वारा हमें सुखदान करो।

॥इतिप्रथमस्यतृतीयेपञ्चत्रिंशोवर्गः॥ ३५॥

वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन्। पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः॥ १॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरेणसायणामात्येनविरचितेमाधवीयेवेदार्थप्रकाशेऋक्संहिताभाष्येप्रथमाष्टकेतृतीयोध्यायःसमाप्तः॥३॥

॥ श्रीगणेशायनमः ॥

यस्यनिःश्वसितंवेदायोवेदेभ्योखिलंजगत् । निर्ममेतमहंवन्देविद्यातीर्थमहेश्वरम् ॥ १ ॥

अथप्रथमाष्टकेचतुर्थोध्यायआरभ्यते अयंवामितिनवमानुवाकस्यचतुर्थंसूक्तंदशर्चम् अत्रानुक्रान्तम्—अयंदशप्रागाथंत्विति। ऋषिश्चान्यस्माद्दषेरितिपरिभाषितत्वात् कण्वपुत्रःप्रस्कण्वऋषिः तथापूर्वत्राश्विनंत्वित्युक्तत्वात् तुह्यादिपरिभाषयाइदमपिसूक्तमश्विदेवताकम् अनयैवपरिभाषयाइदमुत्तरंचप्रागाथम् अतः प्रथमातृतीयाद्याअयुजोबृहत्यः द्वितीयाचतुर्थ्याद्यायुजःसतोबृहत्यः प्रातरनुवाकेआश्विनेक्रतौबार्हतेछन्दसिएतत्सूक्तम् अथाश्विनइतिखण्डेसूत्रितम्—इमाउवामयंवामिति आश्विनशस्त्रेप्येतत्सूक्तं प्रातरनुवाकन्यायेनेत्यतिदिष्टत्वात्।

तत्रप्रथमामृचमाह—

ॐ अयंवांमधुमत्तमःसुतःसोमऋतावृधा ।
तमश्विनापिबतंतिरोअह्न्यंधत्तंरत्नानिदाशुषे ॥ १ ॥

अयम् । वाम् । मधुमत्ऽतमः । सुतः । सोमः । ऋतऽवृधा । तम् । अश्विना । पिबतम् । तिरःऽअह्न्यम् । धत्तम् । रत्नानि । दाशुषे ॥१॥

हेऋतावृधा ऋतस्यसत्यस्ययज्ञस्यवावर्धयितारौअश्विनाअश्विनौ वांयुवयोः अयंपुरोवर्तीसोमः सुतोऽभिषुतः कीदृशः मधुमत्तमःअतिशयेनमाधुर्यवान् तिरोअह्न्यंतिरोभूतेपूर्वस्मिन्दिनेभिषुतंतंसोमंपिबतम् दाशुषेहविर्दत्तवतेयजमानायरत्नानिरमणीयानिधनानिधत्तंप्रयच्छतम् ॥ वां युष्मदस्मदोःषष्ठीचतुर्थीद्वितीयास्थयोर्वांनावावितिषष्ठीद्विवचनस्यवामादेशःसर्वानुदात्तः । मधुमत्तमः मनज्ञाने मन्यतइतिमधु फलिपाटिनमीत्यादिनाउप्रत्ययः निदित्यनुवृत्तेराद्युदात्तत्वं धकारश्चान्तादेशः अतिशयेनमधुमान् मधुमत्तमः मतुप्तमपोःपित्त्वादनुदात्तत्वेपदस्वरएवशिष्यते। ऋतावृधा वृधेरन्तर्भावितण्यर्थात् क्विप्चेतिक्विप् अन्येषामपिदृश्यतइतिपूर्वपदस्यदीर्घत्वम् । तिरोअह्न्यं अह्निभवोह्न्यः भवेछन्दसीतियत् अह्नष्टखोरेवेतिनियमान्नस्तद्धितेइतिटिलोपाभावः सर्वेविधयश्छन्दसिविकल्प्यन्तइतिवचनाद्येचाभावकर्मणोरितिप्रकृतिभावाभावेअल्लोपोनइत्यका-

रलोपः तिरोहितोअह्नचस्तिरोअह्न्यः तिरोन्तर्धाविति गतित्वेन निपातत्वादव्ययत्वेप्रादिसमासेअव्ययपूर्वपदप्रकृतिस्वरत्वम्। दाशुषे दाश्वान्साह्वानित्यादिनाक्कसुप्रत्ययान्तोनिपातितः चतुर्थ्येकवचने वसोःसम्प्रसारणमितिसंप्रसारणम् शासिवसिघसीनांचेतिषत्वम्॥ १॥

१. हे यज्ञवर्द्धनकारी अश्विद्वय! यह अतीव मधुर सोम तुम्हारे लिए अभिषुत हुआ है। यह कल ही तैयार हुआ है। इसे पान करो और हव्यदाता यजमान को रमणीय धन दान करो।

त्रिवन्धुरेणंत्रिवृतांसुपेशसारथेनायातमश्विना।
कण्वासोवांब्रह्मकृण्वन्त्यध्वरेतेषांसुश्रृणुतंहवम्॥ २॥

त्रिऽवन्धुरेण। त्रिऽवृता। सुऽपेशसा। रथेन। आ। यातम्। अश्विना। कण्वासः। वाम्। ब्रह्म। कृण्वन्ति। अध्वरे। तेषाम्। सु। श्रृणुतम्। हवम्॥ २॥

हेअश्विनात्रिवन्धुरेणउन्नतानतरूपेणत्रिविधबन्धनकाष्ठयुक्तेनत्रिवृताअप्रतिहतगतितया लोकत्रयेवर्तमानेनसुपेशसाशोभनसुवर्णयुक्तेनरथेनआयातं इहागच्छतम् कण्वासः कण्वपुत्राः मेधाविनऋत्विजोवांयुवयोरध्वरेयागेब्रह्मस्तोत्ररूपंमन्त्रंहविर्लक्षणमन्नंवाकृण्वन्तिकुर्वन्ति तेषांकण्वानांहवमाह्वानंसुश्रृणुतंसुष्ठुआदरेणश्रृणुतम्॥ त्रिवन्धुरेण बध्नन्तीतिवन्धुराःबन्धेरौणादिकउरन्प्रत्ययः त्रयोबन्धुरायस्यासौत्रिबन्धुरः त्रिचक्रादिषुपाठात् त्रिचक्रादीनांछन्दस्युपसंख्यानमितिउत्तरपदान्तोदात्तत्वम्। त्रिवृता त्रिषुलोकेषुवर्ततइतित्रिवृत् क्विप्चेतिक्विप्। सुपेशसा पेशइतिहिरण्यनाम शोभनंपेशोयस्यासौसुपेशाः आद्युदात्तंद्व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वम्। श्रृणुतम् श्रुश्रवणे श्रुवःश्रृचेतिश्नुः तत्सन्नियोगेनधातोःश्रृभावश्च। हवं ह्वयतेर्भावेनुपसर्गस्येत्यप्संप्रसारणंच गुणावादेशौ प्रत्ययस्यपित्त्वादनुदात्तत्वेधातुस्वरः॥ २॥

२. अश्विद्वय! अपने त्रिविध बन्धन-काष्ठों से युक्त, त्रिकोण या लोकत्रय में वर्त्तमान और सुरूप रथ से आओ। कण्वपुत्र या मेधावी ऋत्विक् लोग तुम्हारे लिए स्तोत्र-पाठ कर रहे हैं। उनका सादर आह्वान सुनो।

अश्विनामधुमत्तमंपातंसोममृतावृधा।
अथाद्यदस्रावसुबिभ्रतारथेदाश्वांसमुपगच्छतम्॥ ३॥

अश्विना। मधुमत्ऽतमम्। पातम्। सोमम्। ऋतऽवृधा। अथ। अद्य। दस्रा। वसु। बिभ्रता। रथे। दाश्वांसम्। उप। गच्छतम्॥ ३॥

हेऋतावृधा यज्ञस्यवर्धकावश्विनौमधुमत्तमंसोमंपातंपिबतं हेदस्राअश्विनौ सोमपानार्थं अथअस्मदाह्वानानन्तरं अद्यास्मिन्दिनेरथेस्वकीयेवसुबिभ्रताअस्मदुपयुक्तंधनंधारयन्तौदाश्वां-

संहविःभदंयजमानंउपगच्छतंसमीपेमामुतम् ॥ बिभ्रता डुभृञ्धारणपोषणयोः शतरिजुहोत्यादित्वाच्छपःश्लुः भृञामिदित्यभ्यासस्येत्वम् शतुर्ङित्त्वाद्गुणाभावेयणादेशः अभ्यस्तानामादिरित्याद्युदात्तत्वम् ॥ ३ ॥

३. यज्ञवर्द्धनकर्त्ता अश्विद्वय ! अत्यन्त मधुर सोमरस का पान करो। इसके अनन्तर हे अश्विद्वय ! आज रथ पर धन लेकर हव्यदाता यजमान के पास गमन करो।

त्रिषधस्थेबर्हिषिविश्ववेदसामध्वायज्ञंमिमिक्षतम्।
कण्वासोवांसुतसोमाअभिद्यवोयुवांहवन्तेअश्विना ॥ ४ ॥

त्रिऽसधस्थे। बर्हिषि। विश्वऽवेदसा। मध्वा। यज्ञम्। मिमिक्षतम्। कण्वासः। वाम्। सुतऽसोमाः। अभिऽद्यवः। युवाम्। हवन्ते। अश्विना ॥ ४ ॥

हेविश्ववेदसासर्वज्ञावश्विनौ त्रिषधस्थेकक्षात्रयरूपेणास्तीर्णतयात्रिषुस्थानेष्ववस्थितेबर्हिषिदर्भेस्थित्वामध्वामधुरेणरसेनयज्ञंमिमिक्षतंसेक्तुमिच्छतं हेअश्विना वांयुष्मदर्थंसुतसोमाअभिषुतसोमयुक्ताः अभिद्यवःअभिगतदीप्तयः कण्वासोयुवामुभौहवन्तेआह्वयन्ते ॥ त्रिषधस्थे त्रिषुस्थानेषुसहतिष्ठतीतित्रिषधस्थंबर्हिः सुपिस्थइतिकप्रत्ययः आतोलोपइटिचेत्याकारलोपः सधमादस्थयोश्छन्दसीतिसहशब्दस्यसधादेशः। मध्वा आगमानुशासनस्यानित्यत्वान्नुमभावः जसिचेत्यत्रजसादिषुछन्दसिवावचनमितिवचनान्नाभावाभावश्च। मिमिक्षतं मिहसेचने सनिएकाचइतीट्प्रतिषेधः हलन्ताच्चेतिसनःकित्त्वाल्लघूपधगुणाभावः अभ्यासहलादिशेषौ ढत्वकत्वषत्वानि। सुतसोमाः सुतःसोमोयैः बहुव्रीहिस्वरः। अभिद्यवः द्युरित्यहर्नाम तेनवतत्सम्बन्धी प्रकाशोलक्ष्यते अभिगताद्युं अत्यादयःक्रान्ताद्यर्थेद्वितीययेतिसमासः अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥ ४ ॥

४. सर्वज्ञाता अश्विद्वय ! तीन स्थानों में अवस्थित कुश पर स्थित होकर मधुर रस-द्वारा यज्ञ सिक्त करो। अश्विद्वय ! दीप्तिमान् कण्वपुत्र सोमरस तैयार करके तुम्हारा आह्वान करते हैं।

याभिःकण्वमभिष्टिभिःप्रावतंयुवमश्विना।
ताभिःष्वस्माँअवतंशुभस्पतीपातंसोममृतावृधा ॥ ५ ॥ १ ॥

याभिः। कण्वम्। अभिष्टिऽभिः। प्र। आवतम्। युवम्। अश्विना। ताभिः। सु। अस्मान्। अवतम्। शुभः। पती इति। पातम्। सोमम्। ऋतऽवृधा ॥ ५ ॥ १ ॥

हेअश्विना युवंयुवामुभौयाभिरभिष्टिभिः अपेक्षिताभीरक्षाभिः कण्वंमहर्षिमावतंरक्षितवन्तौ हेशुभस्पतीशोभनस्यकर्मणःपालकौ ताभीरक्षाभिरस्माननुष्ठातॄन्स्ववतंसुष्ठुरक्षतम् स्पष्टमन्यत्॥ अभिष्टिभिः आभिमुख्येनेष्यन्तइत्यभिष्टयःफलानि इषइच्छायां कर्मणिक्तिनि तितुत्रेत्यादिनाइट्प्रतिषेधः एमन्नादिषुछन्दसिपररूपंवक्तव्यमितिपररूपत्वम् तादौचेतिगतेःप्रकृतिस्वरत्वम् उपसर्गाश्चाभिवर्जमित्यभिरन्तोदात्तः । शुभस्पती शुभदीप्तौ क्विप्चेतिक्विप् षष्ठ्याःपतिपुत्रेतिविसर्जनीयस्यसत्वम् सुबामन्त्रितेइतिषष्ठ्यन्तस्यपराङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायस्याष्टमिकंसर्वानुदात्तत्वम् ॥ ५ ॥

५. अश्विद्वय! जिस अभीष्ट रक्षण-कार्य-द्वारा तुम दोनों ने कण्व की रक्षा की थी, हे शोभन-कर्म-पालक, उसी कार्य-द्वारा हमारी रक्षा करो। हे यज्ञ-वर्द्धक! सोमपान करो।

सुदासेदस्रावसुबिभ्रंतारथेपृक्षोवहतमश्विना ।
रयिंसमुद्रादुतवादिवस्पर्यस्मेधत्तंपुरुस्पृहम् ॥ ६ ॥

सुऽदासे । दस्रा । वसु । बिभ्रता । रथे । पृक्षः । वहतम् । अश्विना । रयिम् । समुद्रात् । उत । वा । दिवः । परि । अस्मे इति । धत्तम् । पुरुऽस्पृहम् ॥ ६ ॥

हेदस्रादर्शनीयावश्विनौसुदासेशोभनदानयुक्तायराज्ञेपिजवनपुत्रायरथेवसुबिभ्रतायुवांपृक्षोन्नंवहतंमापितवन्तौ समुद्रादन्तरिक्षात् समुद्रमित्यन्तरिक्षनाम समुद्रःअध्वरमित्यन्तरिक्षनामसुपाठात् उतवादिवस्परि अथवास्वर्गात्पर्याहृत्यपुरुस्पृहंबहुभिःस्पृहणीयंरयिंधनंअस्मेधत्तं अस्मासुस्थापयतम्॥सुष्ठुददातीतिसुदाःअसुनि कृदुत्तरपदप्रकृतिस्वरत्वम् । दिवस्परि पञ्चम्याः परावध्यर्थेइतिविसर्जनीयस्यसत्वम् । पुरुस्पृहम् स्पृहईप्सायां चुरादिरदन्तः पुरुभिःस्पृह्यतइतिपुरुस्पृहः कर्मणिघञ् अतोलोपस्यस्थानिवत्त्वाल्लघूपधगुणाभावः ञित्स्वरेणउत्तरपदस्याद्युदात्तत्वेकृदुत्तरपदप्रकृतिस्वरेणतदेवशिष्यते ॥ ६ ॥

६. अश्विनीकुमारद्वय! तुमने दानशील राजा पुजवन-पुत्र सुदास के लिए लड़ाई में धन को धारण और अन्न को वहन किया था। उसी प्रकार आकाश से अनेक के वांछनीय धन हमें दान करो।

सप्तमीमृचमाह—

यन्नासत्यापरावतियद्वास्थोअधितुर्वशे ।
अतोरथेनसुवृतानआगतंसाकंसूर्यस्यरश्मिभिः ॥ ७ ॥

यत् । नासत्या । पराऽवति । यत् । वा । स्थः । अधि । तुर्वशे ।
अतः । रथेन । सुऽवृता । नः । आ । गतम् । साकम् । सूर्यस्य ।
रश्मिऽभिः ॥ ७ ॥

हेनासत्याअसत्यरहिताविश्विनौ यद्यदियुवांपरावतिदूरदेशेस्थःवर्तेथे यद्वा अथवाअधितुर्वशेअधिकेसमीपेस्थः अतोस्माद्दूराद्समीपाद्वा सूर्यस्यरश्मिभिःसाकं सूर्योदयकालेसुवृता शोभनवर्तनयुक्तेनरथेननोस्मान्प्रतिआगतमागच्छतम् ॥ नासत्या सत्सुभवौसत्यौनसत्यौअसत्यौनअसत्यौनासत्यौ नभ्राण्नपादित्यादिनानञःप्रकृतिभावः । स्थः असुभुवि श्नसोरल्लोपइत्यकारलोपः यद्वृत्तयोगादनिघातः । गतं गमेर्लोटिबहुलंछन्दसीतिशपोलुक् अनुदात्तोपदेशेत्यादिनानुनासिकलोपः ॥ ७ ॥

७. नासत्यद्वय ! चाहे तुम पास रहो या दूर रहो; सूर्योदय के समय सूर्य-किरणों के साथ अपने सुनिर्मित रथ पर हमारे पास आओ।

अष्टमीमृचमाह—

अर्वाञ्चावांसप्तयोध्वरश्रियोवहन्तुसवनेदुप ।
इषंपृञ्चन्तासुकृतेसुदानवआबर्हिःसीदतंनरा ॥ ८ ॥

अर्वाञ्चा । वाम् । सप्तयः । अध्वरऽश्रियः । वहन्तु । सवना । इत् ।
उप । इषम् । पृञ्चन्ता । सुऽकृते । सुऽदानवे । आ । बर्हिः ।
सीदतम् । नरा ॥ ८ ॥

हेअश्विनौअध्वरश्रियोयागसेविनः सप्तयोश्वाः सवनेदुपअस्मदनुष्ठेयानित्रीणिसवनान्येवोपलक्ष्यअर्वाञ्चाअभिमुखावांयुवांवहन्तुमापयन्तु हेनराअश्विनौसुकृतेसुष्ठुकर्मकारिणेसुदानवेशोभनदानयुक्तायजमानायेषमन्नंपृञ्चन्तासंयोजयन्तौ युवांबर्हिरासीदतंदर्भेमासुतम् ॥ अर्वाञ्चा सुपांसुलुगितिविभक्तेराकारः । अध्वरश्रियम् अध्वरंश्रयन्तीत्यध्वरश्रियः क्विब्वचिप्रच्छीत्यादिनाक्विप्दीर्घश्च । वहन्तु वहप्रापणे शपःपित्त्वादनुदात्तत्वम् तिङश्चलसार्वधातुकस्वरेणाद्युदात्तत्वम् पादादित्वान्निघाताभावः । सवना षुञ्अभिषवे अभिषूयतेसोमएष्विति सवनानि अधिकरणेल्युट् योरनादेशः गुणावादेशौ लितीतिप्रत्ययात्पूर्वस्योदात्तत्वम् शेश्छन्दसिबहुलमितिशेर्लोपः । पृञ्चन्ता पृचीसम्पर्के शतरिरुधादित्वाच्छ्नम् श्नसोरल्लोपइत्यकारलोपः प्रत्ययस्वरः । सुकृते सुकर्मपापेत्यादिनाकरोतेर्भूतकालेक्विप् ह्रस्वस्यपितीतितुक् । सुदानवे शोभ-

मंदानुदानंयस्यासौसुदानुः दानुशब्दोनुप्रत्ययान्तआद्युदात्तः आद्युदात्तंद्व्यच्छन्दसीतिबहुव्री-हावुत्तरपदाद्युदात्तत्वम्। सीदतं षद्लृविशरणगत्यवसादनेषु ॥ ८ ॥

८. तुम सदा यज्ञसेवी हो। तुम्हारे सात घोड़े तुम्हें निकट लाकर सवन-यज्ञ की ओर ले जायें। हे नेतृ-स्थानीय अश्विद्वय! शुभकर्म-कर्त्ता और दानशील यजमान को अन्न दान करके तुम कुश पर बैठो।

तेनंनासत्यागतंरथेनसूर्यत्वचा।
येनशश्वदूहथुर्दाशुषेवसुमध्वःसोमस्यपीतये॥ ९॥

तेनं। नासत्या। आ। गतम्। रथेन। सूर्यऽत्वचा। येन। शश्वत्। ऊहथुः। दाशुषे। वसु। मध्वः। सोमस्य। पीतये॥ ९॥

हेनासत्यासूर्यत्वचासूर्यसंवृतेन सूर्यरश्मिसदृशेनवा तेनप्रसिद्धेनरथेनआगतमागच्छतं दा-शुषे हविर्दत्तवतेयजमानायवसुधनं शश्वत्सर्वदायेनरथेनऊहथुः प्रापितवन्तौतेनरथेनेतिपूर्वत्रा-न्वयः किमर्थमागमनमितितदुच्यते मध्वः मधुरस्यसोमस्यपीतयेसोमपानार्थम्॥ सूर्यत्वचा त्व-चसंवरणे त्वचतिसंवृणोतीतित्वग्रश्मिः सूर्यस्यत्वगिवत्वग्यस्य सप्तम्युपमानेत्यादिनाबहुव्रीहिरु-त्तरपदलोपश्च सूर्यशब्दःषूप्रेरणेइत्यस्मात्क्यपि राजसूयसूर्येत्यादिनारुडागमसहितोनिपातितः ततःप्रत्ययस्यपित्त्वादनुदात्तत्वेधातुस्वरेणाद्युदात्तः सएवबहुव्रीहौपूर्वपदप्रकृतिस्वरेणशिष्यते। ऊहथुः वहप्रापणे लिटिअसंयोगाल्लिट्किदितिलिटःकित्त्वे वचिस्वपीत्यादिनासंप्रसारणं अभ्या-सहलादिशेषौ सवर्णदीर्घः प्रत्ययस्वरः यद्वृत्तयोगादनिघातः॥ ९॥

९. अश्विद्वय! तुमने जिस रथ पर धन लाकर हव्यदाता को सदा दान किया है, उसी सूर्य-किरण-सम्बलित रथ पर मधुर सोम-पान के लिए आओ।

उक्थेभिरर्वागवसेपुरूवसूअर्कैश्चनिह्वयामहे।
शश्वत्कण्वानांसदसिप्रियेहिकंसोमंपपथुरश्विना॥१०॥ २॥

उक्थेभिः। अर्वाक्। अवसे। पुरुवसू इति पुरुऽवसू। अर्कैः। च। नि। ह्वयामहे। शश्वत्। कण्वानाम्। सदसि। प्रिये। हि। कम्। सोमम्। पपथुः। अश्विना॥ १०॥ २॥

पुरुवसू प्रभूतधनावश्विनौअवसेस्मद्रक्षणार्थंउक्थेभिरुक्थैःशस्त्रैः अर्कैश्च अर्चनसाधनैः स्तोत्रैश्चअर्वागस्मदाभिमुख्येननिह्वयामहेनितरामाह्वयामः हेअश्विनाकण्वानांकण्वपुत्राणामि-

धाविनांवाप्रियेसदसियज्ञस्थानेशश्वत्सर्वदासोमं पपथुर्हिकंयुवांपीतवन्तौखलु ॥ उक्थेभिः बहुलंछन्दसीतिभिसऐसादेशाभावः बहुवचनेझल्येदित्येत्वम्। अर्कैः ऋचस्तुवौ पुंसिसंज्ञायांघःप्रायेणेतिकरणेघः चजोःकुघिण्ण्यतोरितिकुत्वम्। निह्वयामहे निसमुपविभ्योह्वइत्यात्मनेपदम् ।सदसि सीदन्त्यस्मिन्नितिसदः असुनोनित्त्वादाद्युदात्तत्वम् । पपथुः पापाने लिटिआतोलोपइटिचेत्याकारलोपः प्रत्ययस्वरः हिचेतिनिघातप्रतिषेधः ॥ १० ॥

१०. हम रक्षा के लिए उक्थ और स्तोत्र-द्वारा अश्विद्वय को अपनी ओर आह्वान करते हैं। अश्विद्वय! कण्वपुत्रों या मेधावी ऋत्विकों के प्रिय सदन में तुमने सदा सोम पान किया है।

॥ इतिप्रथमस्यचतुर्थेद्वितीयोवर्गः ॥ २ ॥

सहवामेनेतिषोडशर्चंपञ्चमंसूक्तम् प्रस्कण्वऋषिः बार्हतत्वादयुजोबृहत्यःयुजःसतोबृहत्यः उषादेवता सहषोडशोषस्यंत्वित्यनुक्रमणिका प्रातरनुवाकेउषस्येक्रतौबार्हतेछन्दसीदंसूक्तम् अथोषस्यइतिखण्डेसूत्रितम्—प्रत्युअदर्शिसहवामेनेतिबार्हतमिति । तथाआश्विनशस्त्रेप्येतत्सूक्तं प्रातरनवाकन्यायेनेत्यतिदिष्टत्वात् ।

सहवामेननउषोव्युच्छादुहितर्दिवः।
सहद्युम्नेनबृहताविभावरिरायादेविदास्वती ॥ १ ॥

सह । वामेन । नः । उषः । वि । उच्छ । दुहितः । दिवः । सह । द्युम्नेन । बृहता । विभाऽवरि । राया । देवि । दास्वती ॥ १ ॥

हेदुहितर्दिवोद्युदेवतायाःपुत्रि उषः उषःकालदेवते नोस्मदर्थेवामेनधनेनसहव्युच्छप्रभातं कुरुहेविभावरिउषोदेवतेबृहताप्रभूतेनद्युम्नेनान्नेनसहव्युच्छ हेदेवि त्वंदास्वतीदानयुक्तासतीराया पशुलक्षणेनधनेनसहव्युच्छ॥ उच्छ उच्छीविवासे । दुहितर्दिवः सुबामन्त्रितेपराङ्गवत्स्वरेइत्यत्र परमपिछन्दसीतिवचनाद्दिवइत्यस्यपूर्वाङ्गवद्भावेसतिआमन्त्रितस्यचेतिषष्ठ्यामन्त्रितसमुदायस्याष्टमिकंसर्वानुदात्तत्वम् । बृहता बृहन्महतोरुपसंख्यानमितिविभक्तेरुदात्तत्वम् । विभावरि भादीप्तौ आतोमनिन्नित्यादिनावनिप् वनोरचेतिङीप् तत्सन्नियोगेननकारस्यरेफादेशः सम्बुद्धौह्रस्वत्वम्। दास्वती डुदाञ्दाने भावेअसुन्प्रत्ययः तदस्यास्तीतिदास्वती मादुपधायाइतिमतुपोवत्वम् उगितश्चेतिङीप् ॥ १ ॥

१. हे देवपुत्री उषा! हमें धन देकर प्रभात करो। विभावरी उषा देवता! प्रभूत अन्न देकर प्रभात करो। देवी! दानशीला होकर पशु-रूप-धन प्रदान-पूर्वक प्रभात करो।

अश्वावतीर्गोमतीर्विश्वसुविदोभूरिच्यवन्तवस्तवे।
उदीरयप्रतिमासूनृताउषश्चोदराधोमघोनाम् ॥ २॥

अश्वंऽवतीः । गोऽमंतीः । विश्वऽसुविदंः । भूरि । च्यवंन्त ।
वस्तवे । उत् । ईरय । प्रति । मा । सूनृताः । उषः । चोद ।
राधः । मघोनाम् ॥ २ ।

अश्वावतीःबह्वश्वोपेताःगोमतीःबहुभिर्गोभिर्युक्ताः विश्वसुविदः कृत्स्नस्यधनस्यसुष्ठुलम्भयित्र्यः उषोदेवताः वस्तवेप्रजानांनिवासायभूरिप्रभूतंयथाभवतितथाच्यवन्तप्राप्ताः हेउषोदेवते मामतिमामुद्दिश्य सूनृताःप्रियहितवाचः उदीरय ब्रूहि मघोनांधनवतांसम्बन्धिराधोधनंचोदअस्मदर्थंप्रेरय ॥ अश्वावतीः मन्त्रेसोमाश्वेन्द्रियविश्वदेव्यस्यमतावितिपूर्वपदस्यदीर्घत्वम् वाछन्दसीतिपूर्वसवर्णदीर्घनिषेधस्यपाक्षिकत्वोके: पूर्वसवर्णदीर्घत्वम् । च्यवन्त च्युङ्गतौ लङि बहुलंछन्दस्यमाङ्योगेपीत्यडभावः । वस्तवे वसनिवासे तुमर्थेसेसेनितितवेन्प्रत्ययः नित्त्वादाद्युदात्तत्वम् । ईरय ईरगतौकम्पनेच हेतुमतिणिच् । चोद चुदसञ्चोदने चौरादिकः लोटि छन्दस्युभयथेतिशप् आर्धधातुकत्वात् णेरनिटीतिणिलोपः शपःपित्त्वादनुदात्तत्वेधातुस्वरः पादादित्वान्निघाताभावः । मघोनां षष्ठीबहुवचने श्वयुवमघोनामतद्धितेइतिसम्प्रसारणम् ॥ २ ॥

२. उषा अश्व-संवलिता, गोसम्पन्ना और सकलधनदात्री हैं। प्रजा के सुख के लिए उसके पास विविध सम्पत्तियाँ हैं। उषा! मुझे सत्यवचन, बल और धनिकों का धन दो।

तृतीयामृचमाह—

उवासोषाउच्छाच्चनुदेवीजीरारथानाम् ।
येअस्याआचरणेषुदध्रिरेसमुद्रेनश्रवस्यवः ॥ ३ ॥

उवास । उषाः । उच्छात् । च । नु । देवी । जीरा । रथानाम् ।
ये । अस्याः । आऽचरणेषु । दध्रिरे । समुद्रे । न । श्रवस्यवः ॥ ३ ॥

उषोदेवी उवास पुरानिवासमकरोत् प्रभातंकृतवतीत्यर्थः चनुअद्यापिउच्छात् व्युच्छति प्रभातंकरोति कीदृशीदेवी रथानांजीराप्रेरयित्री उषःकालेहिरथाःप्रेर्यन्ते अस्याउषसः आचरणेषुआगमनेषुयेरथादध्रिरेधृताःसज्जीकृताभवन्ति तेषांरथानामितिपूर्वत्रान्वयः रथप्रेरणेदृष्टान्तः—श्रवस्यवोधनकामाः समुद्रेन यथासमुद्रमध्येनावःसज्जीकृत्यप्रेरयन्तितद्वत् ॥ उवास वसनिवासे णलि लिटचभ्यासस्योभयेषामितिअभ्यासस्यसम्प्रसारणं लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वम् । उच्छात् लेट्याडागमः इतश्चलोपइतीकारलोपः तुदादित्वात् शप्रत्ययः आगमानुदात्तत्वेप्रत्ययस्वरः । उषाःइत्यस्यवाक्यान्तरगतत्वात्तदपेक्षयाअस्य निघातोनभवति समानवाक्येनिघातयुष्मदस्मदादेशावक्तव्याइतिवचनात् । जीरा जुइ-

विगत्यर्थः सौत्रोधातुः जोरीचेतिरक्प्रत्ययः। अस्याः इदमोन्वादेशेइत्यशादेशोनुदात्तः विभक्तिरपिसुप्त्वादनुदात्तेतिसर्वानुदात्तत्वम्। आचरणेषु चरगत्यर्थः ल्युट्चेतिभावेल्युट् लित्स्वरेणप्रत्ययात्पूर्वस्योदात्तत्वम् कृदुत्तरपदप्रकृतिस्वरत्वम्। दध्रिरे धृङ्अवस्थाने लिटःकित्त्वाद्गुणाभावेयणादेशः चित्त्वादन्तोदात्तत्वम् यच्छब्दयोगादनिघातः। श्रवस्यवः श्रूयतइति श्रवोधनं असुन् तदात्मनइच्छन्तीतिश्रवस्यवः सुपआत्मनःक्यच् क्याच्छन्दसीत्युप्रत्ययः॥३॥

३. उषा पहले प्रभात करती थीं और अब भी प्रभात करती हैं। जिस प्रकार धनाभिलाषी समुद्र में नाव प्रेरित करते हैं, जिस प्रकार उषा के आगमन में रथ तैयार किये जाते हैं, उसी प्रकार उषा रथ-प्रेरयित्री हैं।

उषायेतेप्रयामेषुयुञ्जतेमनोदानायसूरयः।
अत्राहतत्कण्वएषांकण्वतमोनामगृणातिनृणाम् ॥ ४ ॥

उषः। ये। ते। प्र। यामेषु। युञ्जते। मनः। दानाय। सूरयः। अत्र। अह। तत्। कण्वः। एषाम्। कण्वऽतमः। नाम। गृणाति। नृणाम् ॥ ४ ॥

हेउषः तेतवयामेषुगमनेषुसत्सुयेसूरयोविद्वांसोदानाभिज्ञाःदानायधनादिदानार्थंमनःस्वकीयंप्रयुञ्जतेप्रेरयन्ति दानशीलाः उदाराःप्रभवः प्रातःकालेदातुमिच्छन्तीत्यर्थः एषांदातुमिच्छतांनृणांतन्नाम दानविषयेलोकप्रसिद्धंनाम कण्वतमोतिशयेनमेधावीकण्वोमहर्षिरत्राह—अत्रैवोषःकालेगृणात्युच्चारयति योदातुमिच्छतियश्चनामग्रहणेनदातारंप्रशंसतितावुभावप्युषःकालएवतथाकुरुतइत्युषसःस्तुतिः॥ गृणाति गृशब्दे क्रैयादिकः प्वादीनांह्रस्वइतिह्रस्वत्वम्। नृणां नामि नृचेतिदीर्घप्रतिषेधः नृचान्यतरस्यामितिविभक्तेरुदात्तत्वम्॥ ४ ॥

४. उषा, तुम्हारा आगमन होने पर विद्वान् लोग दान की ओर ध्यान देते हैं; अतिशय मेधावी कण्व ऋषि दानशील मनुष्यों के प्रख्यात नाम उषाकाल में ही लेते हैं।

आघायोषेवसूनर्युषायातिप्रभुञ्जती।
जरयन्तीवृजनंपद्वदीयतउत्पातयतिपक्षिणः ॥ ५ ॥ ३ ॥

आ। घ। योषाऽइव। सूनरी। उषाः। याति। प्रऽभुञ्जती। जरयन्ती। वृजनम्। पत्ऽवत्। ईयते। उत्। पातयति। पक्षिणः ॥ ५ ॥ ३ ॥

उषादेवी प्रभुञ्जती प्रकर्षेण सर्वं पालयन्ती आयातिच प्रतिदिनमागच्छतिखलु तत्रदृष्टान्तः—सूनरी सुष्ठुगृहकृत्यस्यनेत्री योषेवगृहिणीव कीदृशीउषाः वृजनंगमनशीलंजङ्गमं प्राणिजातं जरयन्ती जरांप्रापयन्ती असकृदुषस्यावृत्तायांवयोहान्याप्राणिनोजीर्णाभवन्ति किञ्च उषःकाले पद्वत् पादयुक्तंप्राणिजातं ईयते निद्रांपरित्यज्यस्वस्वकृत्यार्थंगच्छति किञ्च इयमुषाः पक्षिणउत्पादयति पक्षिणोह्युषःकालेसमुत्थायतत्रतत्रव्रजन्ति ॥ घ ऋचितुनुघेत्यादिनासंहितायांदीर्घः । सुष्ठुनयतीतिसूनरी नूनये अचइरितिइप्रत्ययः गतिसमासेकृद्ग्रहणेगतिकारकपूर्वस्यापिग्रहणमितिवचनात् कृदिकारादक्तिनइतिङीष् परादिश्छन्दसिबहुलमित्युत्तरपदान्तोदात्तत्वम् निपातस्यचेतिपूर्वपदस्यदीर्घः । प्रभुञ्जती भुजपालनाभ्यवहारयोः लटःशतृ रुधादित्वाच्छ्नम् श्नसोरल्लोपइत्यकारलोपः उगितश्चेतिङीप् शतुरनुमइतिनद्याउदात्तत्वम् । वृजनं वृजीवर्जने वर्ज्यतेइतिवृजनंप्राणिजातं कॄपॄवृजिमन्दिनिधाञ्भ्यः क्युरितिक्युःप्रत्ययः कित्त्वाल्लघूपधगुणाभावः योरनादेशेप्रत्ययस्वरः । पद्वत् पत्पादः वदस्यास्तीतिपद्वत् झयइतिमतुपोवत्वम् व्यत्ययेनमतुपउदात्तत्वम् नचस्वरविधौव्यञ्जनमविद्यमानवदितिव्यंजनस्याविद्यमानवत्त्वेसतिह्रस्वनुड्भ्यांमतुबितिमतुपउदात्तत्वमितिवाच्यं ह्रस्वादित्येवसिद्धे पुनर्नुड्ग्रहणसामर्थ्यादिषापरिभाषानाश्रीयतेइतिवृत्तावुक्तम् इतरथाहिमरुत्वानित्यत्रापिमतुपउदात्तत्वंस्यात् ॥ ५ ॥

५. उषा घर का काम सँभालनेवाली गृहिणी की तरह सबका पालन करके आती है। वह जंगम प्राणियों की परमायु का ह्रास करती है या जंगम प्राणियों की आयु को क्रमशः एक-एक दिन कम करती है। पंखवाले प्राणियों को चलाती है और पक्षियों को उड़ाती है।

षष्ठीमृचमाह—

वियासृजतिसमनंव्य१र्थिनःपदंनवेत्योदती ।
वयोनकिष्टेपप्तिवांसआसतेव्युष्टौवाजिनीवति ॥ ६ ॥

वि । या । सृजति । समनम् । वि । अर्थिनः । पदम् । न । वेति । ओदती । वयः । नकिः । ते । पप्तिऽवांसः । आसते । विऽउष्टौ । वाजिनीऽवति ॥ ६ ॥

यादेवतासमनंसमीचीनचेष्टावन्तंपुरुषंविसृजतिप्रेरयति गृहारामादिचेष्टाकुशलान्पुरुषानुषःकालः शयनादुत्थाप्यस्वस्वव्यापारेप्रेरयतीतिप्रसिद्धं किञ्च उषाः अर्थिनोयाचकान्विसृजति तेपिह्युषःकालेसमुत्थायस्वकीयदातृगृहेगच्छन्ति ओदतीउषोदेवतापदंस्थानंनवेतिनकामयते उषःकालःशीघ्रंगच्छतीत्यर्थः हेवाजिनीवतिउषोदेवते तेव्युष्टौत्वदीयप्रभातकालेपप्तिवांसः

पतनयुक्तावयःपक्षिणः नकिरासतेनतिष्ठन्ति किन्तु स्वस्वनीडाद्विनिर्गत्यगच्छन्तीत्यर्थः ॥ सृजति सृजविसर्गे तुदादित्वाच्छः तस्यङित्त्वाल्लघूपधगुणाभावः प्रत्ययस्यापित्त्वादनुदात्तत्वेविकरणस्वरः यद्वृत्तयोगादनिघातः। ओदती उन्दीक्लेदने उनत्तिसर्वंनीहारेणेत्योदतीउषाः शतरिव्यत्ययेनशप् व्यत्ययेनानुनासिकलोपेलघूपधगुणः उगितश्चेतिङीप् आगमानुशासनस्यानित्यत्वात् नुमभावः शपःपित्त्वादनुदात्तत्वम् शतुरदुपदेशाल्लसार्वधातुकानुदात्तत्वेधातुस्वरेणाद्युदात्तत्वम् नचशतुरनुमइतिनद्याउदात्तत्वम् अन्तोदात्ताच्छतुःपरस्यास्तद्विधानात् । नकिष्टे युष्मत्तत्तक्षुष्वन्तःपादमितिषत्वम् । पप्तिवांसः पत्लृगतौ लिटःक्वसुः क्रादिनियमात्प्राप्तइट् वस्वेकाजाद्घसामितिनियमान्नप्राप्नोतितत्क्रियते सर्वविधीनांछन्दसिविकल्पितत्वात् तनिपत्योश्छन्दसीत्युपधालोपः द्विर्वचनेचीतिस्थानिवद्भावाद्द्विर्भावः प्रत्ययस्वरः । वाजिनीवति वाजोन्नं अस्यास्तीतिवाजिनीक्रियामत्वर्थीयइनिः ऋन्नेभ्यइतिङीप् तादृशी क्रियायस्याःसा तदस्यास्तीतिमतुप् संज्ञायांइतिमतुपोवत्वम् ॥ ६ ॥

६. तुम सम्यक् चेष्टावान् पुरुष को कार्य में लगाती हो। तुम भिक्षुकों को भी प्रेरित करती हो। तुम नीहार-वर्षो हो और अधिक क्षण नहीं ठहरतीं। अन्नयुक्त यज्ञसम्पन्ना उषा! तुम्हारे आगमन करने पर उड़नेवाले पक्षी अपने घोंसले में नहीं रहते।

एषायुक्तपरावतःसूर्यस्योदयनादधि ।
शतंरथेभिःसुभगोषाइयंवियात्यभिमानुषान् ॥ ७ ॥

एषा । अयुक्त । पराऽवतः । सूर्यस्य । उत्ऽअयनात् । अधि ।
शतम् । रथेभिः । सुऽभगा । उषाः । इयम् । वि । याति ।
अभि । मानुषान् ॥ ७ ॥

एषाउषोदेवीशतंअयुक्त स्वकीयानांरथानांशतंयोजितवती सुभगासौभाग्ययुक्ताइयमुषाः परावतोदूरस्थात्सूर्यस्योदयनादधि सूर्योदयस्थानादधिकाद्युलोकात् मानुषानभि मनुष्यानुद्दिश्य रथेभिःशतसंख्याकैर्युक्तैरथैर्वियाति विशेषेणगच्छति ॥ अयुक्त लुङि झलोझलीतिसिचोलोपः । उदयनात् उदेत्यनेनेत्युदयनं इण्गतौ अधिकरणेल्युट् कृदुत्तरपदप्रकृतिस्वरत्वम्। सुभगा शोभनोभगोयस्याःसा आद्युदात्तंद्व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वम्। मानुषान् मनोःपुत्रामानुषाः मनोर्जातावञ्यतौषुक्चेत्यञ् षुगागमश्च ञित्त्वादाद्युदात्तत्वम् ॥ ७ ॥

७. उषा ने रथ योजित किया है। यह सौभाग्यशालिनी उषा दूर से, सूर्य के उदयस्थान के ऊपर से या दिव्य-लोक से, सौ रथों-द्वारा मनुष्यों के पास आती है।

विश्वमस्यानानामचक्षसेजगज्ज्योतिष्कृणोतिसूनरी ।
अपद्वेषोमघोनीदुहिताद्विवउषाउच्छदपस्रिधः ॥ ८ ॥

विश्वम् । अस्याः । ननाम । चक्षसे । जगत् । ज्योतिः । कृणोति । सूनरी । अप । द्वेषः । मघोनी । दुहिता । दिवः । उषाः । उच्छत् । अप । स्रिधः ॥ ८ ॥

विश्वंसर्वंजगत्जङ्गमंप्राणिजातंअस्याउषसश्चक्षसेप्रकाशायननाममह्वीभवति रात्रौतमसि निमग्नाःसर्वेजनाः तन्निवारयित्रीमुषसमुपलभ्यनमस्कुर्वन्तीत्यर्थः कुतः यस्मादेषासूनरीसुष्ठु नेत्री अभिमतफलस्यप्रापयित्रीउषाःज्योतिष्कृणोतिसर्वंप्रकाशयति किञ्च मघोनीमघवतीधनवतीदिवोदुहितायुलोकसकाशादुत्पन्नाउषाः द्वेषः द्वेष्टॄन् अपोच्छत्अपवर्जयति तथा स्रिधः शोषयितॄनपोच्छत् अपवर्जयति तस्मादिष्टप्राप्त्यनिष्टपरिहारहेतुभूतांउषोदेवतांविश्वंजगन्नमस्करोतीत्यर्थः॥ अस्याः इदमोन्वादेशेइत्यशादेशोनुदात्तः विभक्तिश्चसुप्त्वादनुदात्तेतिसर्वानुदात्तत्वम् । ननाम संहितायामन्येषामपिदृश्यतेइत्यभ्यासस्यदीर्घत्वम् तुजादित्वेहितूतुजानइत्यादाविवपदकालेपिदीर्घःश्रूयते । ज्योतिः इणःषइत्यनुवृत्तौ इसुसोःसामर्थ्येइतिविसर्जनीयस्यषत्वम् । द्वेषः द्विषअप्रीतौ अन्येभ्योपिदृश्यन्तइतिविच् लघूपधगुणः । मघोनी मघंवनतिसंभजतइतिमघोनी श्वन्नुक्षन्नित्यादिनामघवन्शब्दःकनिन्प्रत्ययान्तोनिपातितः स्त्रियामृन्नेभ्योङीबितिङीप् भसंज्ञायां श्वयुवमघोनामतद्धितेइतिसम्प्रसारणम् । उच्छत् उच्छीविवासे विवासोवर्जनं छन्दसिलुङ्लङ्लिटइतिवर्तमानेलङ् बहुलंछन्दस्यमाङ्योगेपीत्यडागमाभावः । स्रिधः स्रिधुशोषणे क्विप्चेति क्विप्॥८॥

नवमीमृचमाह—

८. उषा के प्रकाश के लिए समस्त प्राणी नमस्कार करते हैं; क्योंकि ये ही सुनेत्री ज्योति प्रकाश करती हैं और ये ही धनवती स्वर्ग-पुत्री या द्युलोक से उत्पन्ना उषादेवी द्वेषियों और शोषणकर्त्ताओं को दूर करती हैं ।

उषआभाहिभानुनाचन्द्रेणदुहितर्दिवः ।
आवहन्तीभूर्यस्मभ्यंसौभगंव्युच्छन्तीदिविष्टिषु ॥ ९ ॥

उषः । आ । भाहि । भानुना । चन्द्रेण । दुहितः । दिवः । आऽवहन्ती । भूरि । अस्मभ्यम् । सौभगम् । विऽउच्छन्ती । दिविष्टिषु ॥ ९ ॥

हेदिवोदुहितः द्युलोकस्यपुत्रिउषःउषोदेवते चन्द्रेणसर्वेषामाह्लादकेनभानुनाप्रकाशकेनआसमन्तावभाहिप्रकाशस्व किंकुर्वती दिविष्टिषुदिवसेषुभूरिप्रभूतंसौभगंअस्मभ्यमावहन्तीसंपादयन्ती तथा व्युच्छन्ती तमांसिवर्जयन्ती ॥ उषः षाष्ठिकमामन्त्रितायुदात्तत्वम् । दुहितर्दिवः परमपिछन्दसीतिदिवइत्यस्यपरस्यषष्ठ्यन्तस्यपूर्वामन्त्रिताङ्गवद्भावेसतिषष्ठ्यामन्त्रितसमुदायस्याष्टमिकंसर्वानु-

दात्तत्वम् । आवहन्ती ङीप्शपौपित्त्वादनुदात्तौ शतुश्चादुपदेशाल्लसार्वधातुकस्वरेणानुदात्तत्वम् अतोधातुस्वरःशिष्यते समासेकृदुत्तरपदप्रकृतिस्वरत्वम् । भूरिभवतिनविनश्यतीतिभूरि अदिश-दिभूशुभिभ्यःक्रिन्निति क्रिन् नित्त्वादाद्युदात्तत्वम् । सुभगस्यभावःसौभगं सुभगान्मन्त्रेइत्युद्गात्रा-दिषुपाठात् अञ्प्रत्ययः हृद्भगसिन्ध्वन्तेपूर्वपदस्यचेत्युभयपदवृद्धौप्राप्तायां सर्वेविधयश्छन्दसिवि-कल्प्यन्तइतिवचनादत्रोत्तरपदवृद्धिर्नभवतीतिवृत्तावुक्तम् ।व्युच्छन्ती उच्छीविवासे विवासोवर्ज-नं तौदादिकः अदुपदेशाल्लसार्वधातुकानुदात्तत्वेविकरणस्वरः । दिविष्टिषु दिव्शब्देनदिविष्ठ-आदित्योलक्ष्यते तस्यइष्टयएषणानिगमनानियेषुदिवसेषुतेदिविष्टयः बहुव्रीहौपूर्वपदप्रकृति-स्वरत्वम् ॥ ९ ॥

९. स्वर्गतनया उषा ! आह्लादकर ज्योति के साथ प्रकाशित हो, अनुदिन हमें सौभाग्य दो और अन्धकार दूर करो।

दशमीमृचमाह—

विश्वस्यहिप्राणनंजीवनंत्वेवियदुच्छसिसूनरि ।
सानोरथेनबृहताविभावरिश्रुधिचित्रामघेहवम् ॥१०॥४॥

विश्वस्य । हि । प्राणनम् । जीवनम् । त्वे इति । वि । यत् । उच्छसि । सूनरि । सा । नः । रथेन । बृहता । विभाऽवरि । श्रुधि । चित्रऽमघे । हवम् ॥ १० ॥ ४ ॥

हेसूनरीउषोदेवि विश्वस्यसर्वस्यप्राणिजातस्य प्राणनंचेष्टनं जीवनंप्राणधारणंचत्वेहि त्वय्येववर्तते यद्यस्मात्त्वंव्युच्छसितमोवर्जयसि हेविभावरिविशिष्टप्रकाशयुक्ते सात्वादृशीत्वंनोस्मा-न्प्रतिबृहताप्रौढेनरथेनआयाहीतिशेषः तथाहेचित्रामघेविचित्रधनयुक्ते उषोदेवते अस्मदीयंहव-माह्वानंश्रुधिशृणु ॥ प्राणनं अनचेष्टायां ल्युट्चेतिभावेल्युट् योरनादेशः समासेअनितेरित्युपसर्ग-स्थान्निमित्तादुत्तरस्यनकारस्यणत्वम् नन्वनितेरितिइटानिर्देशात्कथमनचेष्टायामित्यस्यणत्वम् तर्हिजीवनस्यपृथगुपादानात् तेनैवधातुनाचेष्टालक्ष्यते समासेकृदुत्तरपदप्रकृतिस्वरत्वम् संहिता-यामेकादेशस्वरेणैकादेशस्योदात्तत्वम् । त्वे सुपांसुलुगितिसप्तम्याःशेआदेशः । उच्छसि उच्छीवि-वासे तौदादिकः सिपःपित्त्वादनुदात्तत्वेविकरणस्वरः निपातैर्यद्यदिहन्तेतिनिघातप्रतिषेधः । सून-रि सुष्ठुनयतीतिसूनरी नृनयेइत्यस्मादचइरित्यौणादिकइप्रत्ययः गतिसमासेकृद्ग्रहणेगतिकारक-पूर्वस्यापिग्रहणात्कृदिकारादक्तिनइतिङीप् निपातस्यचेतिपूर्वपदस्यदीर्घत्वम् परादिश्छन्दसिब-हुलमित्युत्तरपदाद्युदात्तत्वेप्राप्ते आमन्त्रितस्यचेत्याष्टमिकोनिघातः । विभावरि विशिष्टाभायस्याः

सा छन्दसीवनिपाविविति मत्वर्थीयोवनिप् वनोरचेतिङीप् तत्सन्नियोगेननकारस्यरेफादेशश्च । श्रुधि श्रुश्रृणुपृकृवृभ्यश्छन्दसीतिहेर्धिरादेशः बहुलंछन्दसीतिविकरणस्यलुक् हेरपित्त्वेनप्रत्ययस्वरेणान्तोदात्तत्वेपादादित्वान्निघाताभावः । मघमितिधननाम चित्रंमघंयस्याःसाचित्रामघा अन्येषामपिदृश्यतइतिसंहितायांपूर्वपदस्यदीर्घत्वम् । हवं ह्वेञ्स्पर्धायांशब्देच भावेनुपसर्गस्येत्यप्प्रत्ययः तत्सन्नियोगेन्सम्प्रसारणंच ॥ १० ॥

१०. नेत्री उषा ! सारे प्राणियों की इच्छा और जीवन तुम्हारे में ही हैं; क्योंकि तुम्हीं अन्धकार को दूर करती हो । विभावरी उषा ! विशाल रथ पर आना । विलक्षण रथ-सम्पन्ना उषा ! हमारा आह्वान् सुनो ।

उषो॒ वाजं॒ हि वंस्व॒ यश्चि॒त्रो मानु॑षे॒ जने॑ ।
तेना व॑ह सु॒कृतो॑ अध्व॒राँ उप॒ ये त्वा॑ गृ॒णन्ति॒ वह्न॑यः ॥ ११ ॥

उष॑: । वाज॑म् । हि । वंस्व॑ । यः । चि॒त्रः । मानु॑षे । जने॑ । तेन॑ । आ । व॒ह॒ । सु॒ऽकृत॑: । अ॒ध्व॒रान् । उप॑ । ये । त्वा॒ । गृ॒णन्ति॑ । वह्न॑यः ॥ ११ ॥

हेउषः वाजंहविर्लक्षणमन्नं हि श्रुतिषुप्रसिद्धं वंस्वयाचस्वस्वीकुर्वित्यर्थः योवाजश्चित्रश्चायनीयः मानुषेमनुष्येजनेजातेयजमानेवर्ततेतंवाजमितिपूर्वत्रान्वयः तेनकारणेनसुकृतःसुष्ठुकृतवतोयजमानान्अध्वरान्हिंसारहितान्यागानुपावहप्रापय येयजमानावह्नयोयज्ञनिर्वाहकाः त्वात्वां गृणन्तिस्तुवन्तितान्सुकृतइतिपूर्वेणसम्बन्धः एतदुक्तंभवति यजमानैःप्रत्तंहविःस्वीकृत्यपुनरपितेषांयज्ञंसम्पादयन्ति ॥ वाजं वजव्रजगतौ कर्मणिघञ् अजिव्रज्योश्चेत्यत्रचशब्दस्यानुक्तसमुच्चयार्थत्वाद्वाजोवाज्यमित्यत्रापिकुत्वाभावइतिवृत्तावुक्तत्वात् कुत्वाभावः कर्षात्वतइत्यन्तोदात्तत्वेप्राप्तेवृषादित्वादाद्युदात्तत्वम् । वंस्व वनुयाचने अत्रयाचनवाचिनाधातुनातदुत्तरभावीस्वीकारोलक्ष्यते बहुलंछन्दसीतिविकरणस्यलुक् अनुदात्तत्वात्लसार्वधातुकानुदात्तत्वेधातुस्वरः हिचेतिनिघातप्रतिषेधः । सुकृतः सुकर्मपापेत्यादिनाकरोतेर्भूतार्थेक्विप्तुगागमः कृदुत्तरपदप्रकृतिस्वरत्वम् । अध्वरान् ध्वरोहिंसानास्त्यस्मिन्नितिबहुव्रीहौ नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् अध्वरानित्यस्यईप्सिततमत्वात् कर्तुरीप्सिततममितिकर्मसंज्ञा । सुकृतइत्यस्यतु अकथितंचेति नीवह्योर्हरतेश्चेविद्विकर्मकेषुवहतेःपरिगणितत्वात् । अध्वरानित्यत्रनकारस्यसंहितायांदीर्घादटीतिरुत्वम् आतोटिनित्यमितिपूर्वपदस्याकारस्यसानुनासिकता । गृणन्ति गॄशब्दे क्र्यादिभ्यःश्ना प्वादीनां ह्रस्वइतिह्रस्वत्वम् श्नाभ्यस्तयोरातइत्याकारलोपः प्रत्ययस्वरः यद्वृत्तयोगादनिघातः ॥ ११ ॥

११. उषा ! मनुष्य के पास जो विचित्र अन्न है, वह तुम ग्रहण करो और जो यज्ञ-निर्वाहक लोग तुम्हारी स्तुति करते हैं, उन सुकृतियों को हिंसा-रहित यज्ञ में ले आओ ।

द्वादशीमृचमाह—

विश्वान्देवाँआवहसोमपीतयेन्तरिक्षादुषस्त्वम् ।
सास्मासुधागोमदश्वावदुक्थ्यंमुषोवाजंसुवीर्यम् ॥१२॥

विश्वान् । देवान् । आ । वह । सोमऽपीतये । अन्तरिक्षात् ।
उषः । त्वम् । सा । अस्मासु । धाः । गोऽमत् । अश्वऽवत् । उक्थ्यम् ।
उषः । वाजम् । सुऽवीर्यम् ॥ १२ ॥

हेउषः त्वंसोमपीतयेसोमपानायअन्तरिक्षादन्तरिक्षलोकाद्विश्वान् सर्वान्आवहअस्मदीयंदेवयजनदेशंप्रापय हेउषः सातादृशीत्वंगोमत् गोमन्तंबहुभिर्गोभिर्युक्तं अश्वावत्अश्वैरुपेतंउक्थ्यंप्रशस्यंसुवीर्यंशोभनवीर्योपेतंवाजमन्नं अस्मासु धाः निधेहिस्थापयेत्यर्थः॥धाः दधातेश्छन्दसिलुङ्लङ्लिटइतिप्रार्थनायांलुङ् गातिस्थेतिसिचोलुक् बहुलंछन्दस्यमाङ्योगेपीत्यडभावः । गोमत् अश्वावत् मन्त्रेसोमाश्वेन्द्रियेतिमतुपिदीर्घत्वम् उभयत्रसुपांसुलुगितिविभक्तेर्लुक् । उक्थ्यं उक्थंस्तोत्रंतत्रभवमुक्थ्यं भवेछन्दसीतियत् सर्वेविधयश्छन्दसिविकल्प्यन्तइतियतोनावइत्याद्युदात्तत्वाभावे तित्स्वरितमितिस्वरितत्वम् । उषः आमन्त्रिताद्युदात्तत्वम् पादादित्वान्निघाताभावः । सुवीर्यं शोभनंवीर्यंयस्य वीरवीर्यौचेत्युत्तरपदाद्युदात्तत्वम् ॥ १२ ॥

१२. उषा ! अन्तरिक्ष से सोमपान के लिए सब देवों को ले आओ। उषा ! तुम हमें अश्व-गो-युक्त, प्रशंसनीय और वीर्य-सम्पन्न अन्न प्रदान करो।

त्रयोदशीमृचमाह—

यस्यारुशन्तोअर्चयःप्रतिभद्राअदृक्षत ।
सानोरयिंविश्ववारंसुपेशसमुषाददातुसुग्म्यम् ॥१३॥

यस्याः । रुशन्तः । अर्चयः । प्रति । भद्राः । अदृक्षत । सा ।
नः । रयिम् । विश्वऽवारम् । सुऽपेशसम् । उषाः । ददातु ।
सुग्म्यम् ॥ १३ ॥

यस्याः उषसःअर्चयःप्रकाशाः रुशन्तः शत्रून्हिंसन्तःभद्राः कल्याणाः प्रत्यदृक्षतप्रतिदृश्यन्ते सातथाभूताउषाः नोस्मभ्यंरयिंददातु कीदृशंरयिंविश्ववारंविश्ववारकम् यद्वा विश्वैर्वरणीयंसुपेशसं पेशइतिरूपनाम शोभनरूपोपेतंसुग्म्यंसुष्ठुगन्तव्यम् यद्वा सुग्म्यमितिसुखनाम तद्धेतुत्वात्तच्छब्द्यम् ॥ रुशन्तः रुशरिशहिंसायां शतरितुदादित्वाच्छः अदुपदेशाल्लसार्वधातुकानुदात्तत्वे सतिशिष्टत्वाद्विकरणस्वरेप्राप्तेव्यत्ययेनाद्युदात्तत्वम् । अदृक्षत दृशेःकर्मणिलुङ्झिस्यादादे-

शः चेः सिच् नदृशइतिक्सप्रतिषेधः एकाचइतीट्प्रतिषेधः लिङ्सिचावात्मनेपदेष्विति सिचः कित्त्वाल्लघूपधगुणाभावः सृजिदृशोर्झल्यमकितीत्यमागमाभावश्चकित्त्वादेव षत्वकत्वषत्वानि अडागमउदात्तः यद्वृत्तयोगादनिघातः। विश्ववारं विश्वंवृणोतीतिविश्ववारः वृञ्वरणे कर्मण्यण् यद्वा विश्वैर्व्रियतइतिविश्ववारः कर्मणिघञ् मरुद्वृधादित्वात्पूर्वपदान्तोदात्तत्वम्। सुगम्यं सुष्ठुगन्तव्यःसुगमः गमेर्वञर्थेकविधानमितिकप्रत्ययः गमहनेत्यादिनोपधालोपः तत्रभवंसुगम्यं भवेछन्दसीतियत् यतोनावइत्याद्युदात्तत्वम्॥ १३ ॥

१३. जिन उषा की ज्योति शत्रुओं को विनाश करके कल्याण-रूप में दिखाई देती है, वह हम सबों को वरणीय, सुरूप और सुखद धन प्रदान करें।

येचि॒द्धित्वामृष॑य॒ःपूर्वं॑ऊ॒तयें॒जु॒हूरेवंसेमहि।
सान॒ःस्तोमाँ॑अ॒भिगृ॒णीहि॒राध॒सोष॑ःशु॒क्रेण॒शो॒चिषा॑ ॥१४॥

ये। चि॒त्। हि। त्वाम्। ऋष॑यः। पूर्वे॑। ऊ॒तये॑। जु॒हू॒रे। अव॑से। म॒हि॒। सा। न॒ः। स्तोमा॑न्। अ॒भि। गृ॒णी॒हि॒। राध॑सा। उष॑ः। शु॒क्रेण॑। शो॒चिषा॑॥ १४ ॥

हेमहिमहितेपूजनीयेवाउषोदेवते त्वांयेचिद्धियेखलुप्रसिद्धाः पूर्वेचिरन्तनाऋषयोमन्त्रदृष्टारः ऊतयेरक्षणाय अवइत्यन्ननाम अवसेअन्नायचजुहूरेजुह्विरेआहूतवन्तः सूक्तरूपैर्मन्त्रैःस्तुतवन्तइत्यर्थः हेउषः सातादृशीत्वंराधसाअस्माभिर्दत्तेनहविर्लक्षणेनधनेनशुक्रेणशोचिषादीप्तेनतमोनिवारयितुंसमर्थेनतेजसाचोपलक्षितासतीतेषामृषीणामिवनोस्माकंस्तोमानभि स्तुतीरभिलक्ष्यगृणीहिसम्यक्स्तुतमितिशब्दय अस्मदीयाभिःस्तुतिभिःसन्तुष्टाभवेत्यर्थः ॥ ऊतये अवतेःक्तिनि ज्वरत्वरेत्यादिनावकारस्योपधायाश्चोठ् ऊतियूतीत्यादिनाक्तिन्नुदात्तोनिपातितः। जुहूरे ह्वेञ्स्पर्धायांशब्देच लिटिअभ्यस्तस्यचेतिद्विर्वचनात्पूर्वमेवअभ्यस्तकारणभूतस्यह्वयतेः सम्प्रसारणम् अभ्यस्तस्ययोह्वयतिःकश्चाभ्यस्तस्यह्वयतिःयस्तस्यकारणमितिव्याख्यातत्वात् परपूर्वत्वेहलइतिदीर्घत्वम् द्विर्वचनादीनि इरयोरेइतिइरेचोरेआदेशः चितइत्यन्तोदात्तत्वम् यद्वृत्तयोगादनिघातः तत्रहिपञ्चमीनिर्देशेपि व्यवहितेपिकार्यंभवतीत्युक्तम्। महि महपूजायाम् औणादिकइप्रत्ययः कृदिकारादक्तिनइतिङीप् संबुद्धावंवार्थनद्योर्ह्रस्वइतिह्रस्वत्वम्। स्तोमान् संहितायांनकारस्यरुत्वाद्युक्तम्। गृणीहि गॄशब्दे क्रैयादिकःशिति प्वादीनांह्रस्वइतिह्रस्वत्वम्। राधसा राध्नोत्यनेनेतिराधः असुनोनित्त्वादाद्युदात्तत्वम्। उषः पादादित्वादाष्टमिकनिघाताभावे षाष्ठिकमामन्त्रिताद्युदात्तत्वम्॥ १४ ॥

१४. पूज्य उषा! पहले के ऋषियों ने रक्षण और अन्न के लिए तुम्हें बुलाया था। तुम धन और दीप्तिशाली तेज से विशिष्ट होकर हमारी स्तुति पर सन्तुष्ट हो।

पञ्चदशीमृचमाह–

उषोयदद्यभानुनाविद्वारावृणवोदिवः ।
प्रनोयच्छतादवृकंपृथुच्छर्दिःप्रदेविगोमतीरिषः ॥१५॥

उषः । यत् । अद्य । भानुना । वि । द्वारौ । ऋणवः । दिवः । प्र । नः । यच्छतात् । अवृकम् । पृथु । छर्दिः । प्र । देवि । गोऽमतीः । इषः ॥ १५ ॥

हेउषः त्वंअद्यास्मिन्प्रभातसमयेयद्यस्माद्भानुनाप्रकाशेनदिवोन्तरिक्षस्यद्वारौद्वारभूतौ पूर्वापरदिगन्तौअन्धकारेणाच्छादितौव्यृणवःविश्लिष्यप्रामोषि तस्मात्त्वंनोस्मभ्यंछर्दिस्तेजस्विगृहंप्रयच्छताद्देहि कीदृशंछर्दिः अवृकंहिंसकरहितं पृथुविस्तीर्णं अपिच हेदेविदेवनशीले गोमतीः बहुभिर्गोभिर्युक्ताइषोन्नानिप्रेत्युपसर्गस्यावृत्तेः यच्छतादित्यनुषज्यते प्रयच्छताद्देहि त्वदागमनस्यांस्मद्रक्षणार्थत्वादस्मदभीष्टंगृहादिकंप्रयच्छेत्यर्थः छर्दिरितिगृहनाम छर्दिःछदिरिति तन्नामसुपाठात् ॥ ऋणवः ऋणुस्तुतौ छान्दसेलङिसिपि तनादित्वादुप्रत्ययः ततोव्यत्ययेनशपिगुणावादेशौ शपःपित्त्वादनुदात्तत्वेउप्रत्ययस्वरःशिष्यते यद्वृत्तयोगादनिघातः । दिवः ऊडिदमित्यादिनाविभक्तेरुदात्तत्वम् । प्रनः उपसर्गाद्बहुलमितिबहुलवचनान्नसोणत्वाभावः । यच्छतात् दाण्दाने शपिपाघ्रेत्यादिनायच्छादेशः । अवृकं नास्तिवृकोस्मिन्निविबहुव्रीहौ नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । पृथु प्रथप्रख्याने प्रथिम्रदिभ्रस्जांसम्प्रसारणंसलोपश्चेतिकुप्रत्ययःसम्प्रसारणंच । छर्दिरितिगृहनाम उछृदिरदीप्तिदेवनयोः अर्चिशुचिहुसृपिछादिछर्दिभ्यइसिरितीसिप्रत्ययः लघूपधगुणः प्रत्ययस्वरः ॥ १५॥

१५. उषा ! तुमने आज ज्योति से आकाश के दोनों द्वारों को खोल दिया है; इसलिए हमें हिंसकों से रहित और विस्तीर्ण गृह दान करो। साथ ही गो-युक्त अन्न भी दान करो।

षोडशीमृचमाह–

संनोरायाबृहताविश्वपेशसामिमिक्ष्वासमिळाभिरा ।
संद्युम्नेनविश्वतुरोषोमहिसंवाजैर्वाजिनीवति ॥१६॥५॥

सम् । नः । राया । बृहता । विश्वऽपेशसा । मिमिक्ष्व । सम् । इळाभिः । आ । सम् । द्युम्नेन । विश्वऽतुरा । उषः । महि । सम् । वाजैः । वाजिनीऽवति ॥ १६ ॥ ५ ॥

हेउषः नोस्मान्रायाधनेनसंमिमिक्ष्वसंसिञ्चसंयोजयेत्यर्थः कीदृशेनधनेन बृहता प्रभूतेन विश्वपेशसा पेशइतिरूपनाम बहुविधरूपयुक्तेन तथा इळाभिःआ गोभिश्चास्मान्संमिमिक्ष्व इळेतिगोनाम इळाजगतीतितन्नामसुपाठात् आकारःसमुच्चये पादान्ते वर्तमानत्वात् उक्तञ्च—एतस्मिन्नेवार्थेदेवेभ्यश्चपितृभ्यआइत्याकारइति। किञ्च हेमहि महनीये उषोदेवते द्युम्नेनयशसा संमिमिक्ष्व द्युम्नंद्योततेर्यशोवान्नंवेतियास्कः। कीदृशेनद्युम्नेन विश्वतुरा सर्वेषांशत्रूणांहिंसकेन तथाहेवाजिनीवति अन्नसाधनभूतक्रियायुक्ते वाजैरन्नैरस्मान् संमिमिक्ष्व अन्नंवैवाजइतिश्रुत्यन्तरात् ॥ राया ऊडिदमित्यादिनाविभक्तेरुदात्तत्वम्। बृहता बृहन्महतोरुपसंख्यानमितिविभक्तिरुदात्ता। विश्वपेशसा विश्वानिपेशांसियस्यासौविश्वपेशाः बहुव्रीहौविश्वंसंज्ञायामितिव्यत्ययेनासंज्ञायामपिपूर्वपदान्तोदात्तत्वम् यद्वा मरुद्वृधादिर्द्रष्टव्यः। मिमिक्ष्व मिहसेचने व्यत्ययेनात्मनेपदम् लोटि बहुलंछन्दसीतिशपःश्लुः द्विर्भावहलादिशेषौ ढत्वकत्वषत्वानि प्रत्ययस्वरस्यसविशिष्टत्वात्सएवशिष्यते पादादित्वादनिघातः पूर्वपदस्यासमानवाक्यस्थत्वात् तिङ्ङतिङइतिनिघातोनभवति समानवाक्येनिघातयुष्मदस्मदादेशावक्तव्याइतिवचनात्। विश्वतुरा तुर्वतीतितुः तुर्वीहिंसार्थः क्विप्चेतिक्विप् राल्लोपइतिवलोपः विश्वेषांतूर्विश्वतूः समासस्येत्यन्तोदात्तत्वम्। वाजिनीवति वाजोन्नमस्याअस्तीतिवाजिनीक्रिया तादृशीक्रियायस्याःसातथोक्ता ॥ १६ ॥

१६. उषा! हमें प्रभूत और बहु-विध-रूपयुक्त धन और गौ दान करो। पूजनीय उषा! हमें सर्व-शत्रुनाशक यश दान करो। अन्न-युक्त क्रियासम्पन्न उषा! हमें अन्न दान करो।

॥ इतिप्रथमस्यचतुर्थेपञ्चमोवर्गः ॥ ५ ॥

उषोभद्रेभिरितिचतुर्ऋचंषष्ठंसूक्तम् अत्रानुक्रम्यते उषश्चतुष्कमानुष्टुभंत्विति। कण्वपुत्रः प्रस्कण्वऋषिः तुह्यादिपरिभाषयाइदमुत्तरंचानुष्टुभं पूर्वत्रउषस्यंत्वित्युक्तत्वात् इदमपिसूक्तमुषस्यम् प्रातरनुवाकस्योषस्येक्रतौआनुष्टुभेछन्दस्येतत्सूक्तम् सूत्र्यतेहि—उषोभद्रेभिरित्यानुष्टुभमिति। आश्विनशस्त्रेप्येतत्सूक्तम् प्रातरनुवाकन्यायेनेत्यतिदेशात्।

तत्रप्रथमामृचमाह—

उषोभद्रेभिरागहिदिवश्चिद्रोचनादधि।
वहन्त्वरुणप्सवउपत्वासोमिनोगृहम् ॥१॥

उषः। भद्रेभिः। आ। गहि। दिवः। चित्। रोचनात्। अधि। वहन्तु। अरुणऽप्सवः। उप। त्वा। सोमिनः। गृहम् ॥ १ ॥

---

१ नि० ५.५.। २ तै० सं० ५.४.७.।

हेउषः उषोदेवते भद्रेभिःभन्दनीयैः शोभनैर्मार्गैः दिवोन्तरिक्षलोकाद्रोचनाद्रोचमाना-दीप्यमानात् अधिरुपर्यर्थः उपरिवर्तमानाव चिदितिपूजितार्थः पूजितादेवंविधाव अन्तरिक्ष-लोकाव आगह्यागच्छ हेउषः अरुणप्सवः अरुणवर्णागावः सोमिनःसोमयुक्तस्ययजमान-स्यगृहंदेवयजनरूपंयज्ञगृहंत्वात्वामुपवहन्तुप्रापयन्तु ॥ गहि गमेर्लोटि बहुलंछन्दसीतिशपोलुक् हेरपित्त्वेनङित्त्वे अनुदात्तोपदेशेत्यादिनानुनासिकलोपः अतोहेरितिलुग्नभवति असिद्धवदत्रा-भादित्यनुनासिकलोपस्यासिद्धत्वाव। रोचनाव रुचदीप्तौ अनुदात्तेतश्चहलादेरितियुच् योरनादे-शे चितइत्यन्तोदात्तत्वम्। अरुणप्सवः प्साभक्षणे प्सान्तिभक्षयन्तिस्तनंपिबन्तीतिप्सवोवत्साः औणादिकःकुप्रत्ययः आतोलोपइटिचेत्याकारलोपः अरुणाःप्सवोयासांतास्तथोक्ताः अत्रव-त्सानामारुण्यप्रतिपादनाव मातॄणामपितथात्वंगम्यते पैतृकमश्वाअनुहरन्तेमातृकंगावोनुहरन्ती-तिगोनर्दीयः तासांचोषोवाहनत्वंनिघण्टावुक्तम्—अरुण्योगावउषसामिति। अरुणशब्दःअर्तेश्चेति उनन्प्रत्ययान्तः तृणाख्यायांचिदित्यतश्चिदित्यनुवृत्तेरन्तोदात्तः सएवबहुव्रीहौपूर्वपदप्रकृतिस्व-रत्वेनशिष्यते ॥ १ ॥

१. उषा ! दीप्यमान आकाश के ऊपर से शोभन पथ-द्वारा आगमन करो। अरुण-वर्ण गायें सोम-युक्त यजमान के घर में तुम्हें ले आवें।

द्वितीयामृचमाह—

सुपेशसंसुखंरथंयमध्यस्थाउषस्त्वम्।
तेनासुश्रवसंजनंप्रावाद्यदुहितर्दिवः ॥२॥

सुऽपेशसम्। सुऽखम्। रथम्। यम्। अधिऽअस्थाः। उषः। त्वम्। तेन। सुऽश्रवसम्। जनम्। प्र। अव। अद्य। दुहितः। दिवः ॥ २ ॥

हेउषः त्वंयंरथमध्यस्थाअधितिष्ठसि कीदृशंरथंसुपेशसंशोभनावयवं शोभनरूपयुक्तंवा पे-शइतिरूपनामेतियास्कः। यद्वा शोभनहिरण्ययुक्तम् पेशःकृशनमितितन्नामसुपाठाव सुखंशोभने-नखेनाकाशेनयुक्तंविस्तृतमित्यर्थः यद्वा सुखहेतुभूतं अथवासुखमितिक्रियाविशेषणं सुखंयथा-भवतितथेत्यर्थः हेदिवोदुहितः द्युलोकसकाशादुत्पन्ने उषोदेवते तेनरथेनअद्यास्मिन्कालेसुश्रवसं शोभनहविर्युक्तंजनंयजमानंप्राव प्रकर्षेणगच्छ॥सुपेशसं पिशअवयवे अस्मादसुन्प्रत्ययः नित्त्वा-दाद्युदात्तःपेशस्शब्दः शोभनंपेशोयस्यासौसुपेशाः आद्युदात्तंद्व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वम्। अध्यस्थाः तिष्ठतेःछन्दसिलुङ्लङ्लिटइतिवर्तमानेलुङि गातिस्थेतिसिचोलुक् अडागमउदात्तः यद्वृत्तयोगादनिघातः तिङिचोदात्तवतीतिगतेरनुदात्तत्वम् तेनअन्येषामपिदृश्यतइतिसंहितायांदी-

१ गोनर्दीयः पतञ्जलिः। २ नि० ८. ११।

र्थः। सुश्रवसं श्रवइत्यन्ननाम श्रूयतइतिसतइतियांस्कः। सुपेशसइति उत्तरपदाद्युदात्तत्वम्। अव अवरक्षणगतिमीतिद्वमीत्युकत्वादत्रावतिर्गत्यर्थः। दुहितर्दिवः परमपिछन्दसीतिषष्ठ्यन्तस्य पूर्वामन्त्रितान्गवद्भावेसति पदद्वयसमुदायस्याष्टमिकंसर्वानुदात्तत्वम्॥ २॥

२. उषा! तुम जिस सुरूप और सुखकर रथ पर अधिष्ठान करती हो, हे स्वर्गतनया उषा! उसी से आज हव्यदाता यजमान के पास आओ।

वयश्चित्तेपतत्रिणोद्विपच्चतुष्पदर्जुनि।
उषःप्रारन्नृतूँरनुदिवोअन्तेभ्यस्परि॥३॥

वयः। चित्। ते। पतत्रिणः। द्विऽपत्। चतुःऽपत्। अर्जुनि।
उषः। प्र। आरन्। ऋतून्। अनु। दिवः। अन्तेभ्यः। परि॥ ३॥

हेअर्जुनिशुभ्रवर्णे उषः उषोदेवते तेतवऋतूँरनुगमनान्यनुलक्ष्य द्विपत्द्विपादमनुष्यादिकं चतुष्पत्गवादिकं तथापतत्रिणःपतत्रवन्तःपक्षोपेतावयश्चित्पक्षिणश्चदिवोअन्तेभ्यःआकाशप्रान्तेभ्यःपरिउपरिप्रारन्प्रकर्षेणगच्छन्ति रात्रावन्धकारेणाभिभूताःसर्वेप्राणिनस्त्वदागमनानन्तरंचेष्टावन्तोभवन्तीत्यर्थः॥ पतत्रिणः पतॢगतौ पतन्त्यनेनेतिपतत्रं अमिनक्षीत्यादिनाअत्रन्प्रत्ययः ततोमत्वर्थीयइनिः। द्विपत् द्वौपादावस्येतिसंख्यासुपूर्वस्येतिपादशब्दस्यान्त्यलोपःसमासान्तः अयस्मयादित्वेनभत्वात्पादःपदितिपद्भावः द्वित्रिभ्यांपादन्मूर्धसुबहुव्रीहावितिउत्तरपदान्तोदात्तत्वम्। चतुष्पात् चत्वारःपादाअस्य स्वरव्यतिरिक्तंपूर्ववत् बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् इणःषइत्यनुवृत्तौइदुदुपधस्यचाप्रत्ययस्येतिविसर्जनीयस्यषत्वं नचपरत्वेनास्यासिद्धत्वात् कुप्वोः ꣹क ꣹पौचेति उपध्मानीयादेशःशङ्कनीयः येननाप्राप्तिन्यायेनतस्यापवादत्वात् अपवादस्तुपरमपिपूर्वंबाधतएवेतिवृत्तावुक्तम्। आरन् ऋगतौ छन्दसिलुङ्लङ्लिटइतिवर्तमानेलुङि सर्तिशास्त्यर्तिभ्यश्चेतिच्लेरङादेशः ऋदृशोऽङिगुणइतिगुणःआडागमः। ऋतून् ऋगतौ अस्मादौणादिकोभावेकुप्रत्ययः लक्षणेअनोःकर्मप्रवचनीयत्वम् कर्मप्रवचनीययुक्तेइतिद्वितीया संहितायांदीर्घादटिसमानपादेइतिनकारस्यरुत्वम् अत्रानुनासिकःपूर्वस्यतुवेतिरोःपूर्वस्यवर्णस्यसानुनासिकत्वम्। दिवः ऊडिदमितिविभक्तिरुदात्ता। अन्तेभ्यः पञ्चम्याःपरावध्यर्थेइतिविसर्जनीयस्यसत्वम्॥ ३॥

३. हे अर्जुनि या शुभ्रवर्णा उषा! तुम्हारे आगमन के समय द्विपद, चतुष्पद और पक्ष-युक्त पक्षिगण आकाशप्रान्त के उपरि भाग में गमन करते अर्थात् आकाशमण्डल में अपने-अपने कार्य में लगते हैं।

व्युच्छन्तीहिरश्मिभिर्विश्वमाभासिरोचनम्।
तांत्वामुषर्वसूयवोगीर्भिःकण्वाअहूषत॥४॥ ६॥

नि० १०. ३, १.

विऽउच्छन्ती । हि । रश्मिऽभिः । विश्वम् । आऽभासि । रोचनम् ।
ताम् । त्वाम् । उषः । वसुऽयवः । गीःऽभिः । कण्वाः । अहूषत ॥ ४ ॥ ६ ॥

हेउषः व्युच्छन्तीतमोवर्जयन्तीत्वंरश्मिभिः स्वकीयैस्तेजोभिर्विश्वंसर्वभूतजातंरोचनंरोचमानंप्रकाशयुक्तंयथाभवतितथाआभासिआसमन्तात्प्रकाशसे हियस्मादेवंतस्मात्तांतादृशींत्वां वसूयवःवसुकामाः कण्वामेधाविनऋत्विजः कण्वगोत्रोत्पन्नावामहर्षयःगीर्भिःस्तुतिलक्षणैर्वचोभिःअहूषत स्तुतवन्तइत्यर्थः कण्वइतिमेधाविनाम कण्वःऋभुरितितन्नामसुपाठात् ॥ आभासि भादीप्तौ अदादित्वाच्छपोलुक् सिपःपित्त्वादनुदात्तत्वेधातुस्वरः हिचेतिनिघातप्रतिषेधः तिङि चोदात्तवतीतिगतेरनुदात्तत्वम् । रोचनं रुचदीप्तौ अनुदात्तेतश्चहलादेरितियुच् चितइत्यन्तोदात्तत्वम् । वसूयवः वसुधनमात्मनइच्छन्तः सुपआत्मनःक्यच् अकृत्सार्वधातुकयोर्दीर्घः क्याच्छन्दसीत्युप्रत्ययः । गीर्भिः सावेकाचइतिविभक्तेरुदात्तत्वम् । कण्वाः कणशब्दार्थः अशूप्रुषिलटिकणीत्यादिनाक्वन्प्रत्ययः नित्त्वादाद्युदात्तत्वम् । अहूषत ह्वेञोलुङि ह्वःसम्प्रसारणमित्यनुवृत्तौबहुलंछन्दसीतिसम्प्रसारणं परपूर्वत्वे हलइतिदीर्घत्वम् च्लेःसिच् एकाचइतीट्प्रतिषेधः संज्ञापूर्वकस्य विधेरनित्यत्वाद्गुणाभावः ॥ ४ ॥

४. उषा ! तुम अन्धकार का विनाश करके किरणों के द्वारा जगत् को प्रकाशित करो । कण्वपुत्रों या मेधावी ऋत्विकों ने धन-याचक होकर स्तोत्र-द्वारा तुम्हारा स्तव किया है ।

॥ इतिप्रथमस्यचतुर्थेषष्ठोवर्गः ॥ ६ ॥

उदुत्यमितित्रयोदशर्चंसप्तमंसूक्तं प्रस्कण्वस्यार्षंसूर्यदेवत्यम् आदौनवगायत्र्यः शिष्टाश्चतस्रोनुष्टुभइत्युक्तम् तथाचानुक्रान्तम्—उदुत्यंसप्तोनासौर्यंनवाद्यागायत्र्यइति आश्विनशस्त्रेसौर्ये क्रतौउदुत्यमित्यादयोनवर्चःशंसनीयाः संस्थितेष्वाश्विनायेतिखण्डेसूत्रितम्—सूर्योनोदिवःउदुत्यंजातवेदसमितिनवेति ।

तत्रप्रथमामृचमाह—

उदुत्यंजातवेदसंदेवंवहन्तिकेतवः । दृशेविश्वायसूर्यम् ॥ १ ॥

उत् । ऊम् इति । त्यम् । जातऽवेदसम् । देवम् । वहन्ति । केतवः ।
दृशे । विश्वाय । सूर्यम् ॥ १ ॥

केतवः प्रज्ञापकाः सूर्याश्वाः यद्वा सूर्यरश्मयःसूर्यंसर्वस्यप्रेरकमादित्यंउद्वहन्ति ऊर्ध्वंवहन्ति उइतिपदपूरणःउक्तञ्च—मिताक्षरेष्वनर्थकाःकमीमिद्वितीति किमर्थंविश्वायविश्वस्मैभुवना-

यद्दशेद्रष्टुं यथासर्वेजनाः सूर्यंपश्यन्तितथोर्ध्वंवहन्तीत्यर्थः कीदृशंसूर्यं त्यंमसिद्धंजातवेदसंजाता-नांमाणिनांविदितारंजातमज्ञंजातधनंवादेवंद्योतमानम् अत्रनिरुक्तम्—उद्वहन्तिवंजातवेदसंदेवमश्वाः केतवोरश्मयोवासर्वेषांभूतानांसंदर्शनायसूर्यमिति ॥ जातवेदसं जातानिवेत्तीतिजातवेदाः गति-कारकयोरपिपूर्वपदप्रकृतिस्वरत्वंचेत्यसुन् पूर्वपदप्रकृतिस्वरत्वंच । दृशे दृशेविख्येचेतितुमर्थे निपातितः । सूर्यं राजसूयसूर्येत्यादिना षूप्रेरणेइत्यस्मात्क्यप्रुडागमसहितोनिपातितः अतःप्र-त्ययस्यपित्त्वादनुदात्तत्वेधातुस्वरेणाद्युदात्तत्वम् ॥ १ ॥

१. सूर्य प्रकाशमान हैं और सारे प्राणियों को जानते हैं । सूर्य के घोड़े उन्हें सारे संसार के दर्शन के लिए ऊपर ले जाते हैं।

द्वितीयामृचमाह—

अप॒त्ये ता॒यवो॑ यथा॒ नक्ष॑त्रा यन्त्य॒क्तुभिः॑। सूरा॑य वि॒श्वच॑क्षसे ॥२॥

अप॑ । त्ये । ता॒यवः॑ । य॒था॒ । नक्ष॑त्रा । य॒न्ति॒ । अ॒क्तुऽभिः॑ ।
सूरा॑य । वि॒श्वऽच॑क्षसे ॥ २ ॥

त्येतायवोयथाप्रसिद्धास्तस्कराइवनक्षत्रानक्षत्राणिदेवगृहरूपाणि देवगृहावैनक्षत्राणीति श्रुत्यन्तरात् । यद्वा इहलोकेकर्मानुष्ठानाययेस्वर्गंप्राप्नुवन्तितेनक्षत्ररूपेणदृश्यन्ते तथाचश्रूयते—यो-वाइहयजते अमुंलोकंनक्षते तन्नक्षत्राणांनक्षत्रत्वमिति । यद्वा तेषांसुकृतीनांज्योतींषिनक्षत्राण्यु-च्यन्ते सुकृतांवाएतानिज्योतींषियन्नक्षत्राणीत्याम्नानात् । यास्कस्त्वाह—नक्षत्राणिनक्षतेर्ग-तिकर्मणोनेमानिक्षत्राणीतिचब्राह्मणमिति । तथाविधानिनक्षत्राणिअक्तुभिःरात्रिभिःसहअपय-न्तिअपगच्छन्ति विश्वचक्षसेविश्वस्यसर्वस्यप्रकाशकस्यसूरायसूर्यस्य आगमनंदृष्ट्वेतिशेषः तस्क-रानक्षत्राणिचरात्रिभिःसहसूर्यआगमिष्यतीतिभीत्यापलायन्तइत्यर्थः तायुरितिस्तेननाम तायु-स्तस्करइतितन्नामसुपाठात् अक्तुरितिरात्रिनाम शर्वरीअक्तुरितितत्रपाठात् ॥ यथा यथेतिपादा-न्तेइतिसर्वानुदात्तत्वम् । नक्षत्रा नक्षगतौ अमिनक्षियजिवन्धिपतिभ्योत्रन्नित्यत्रन्प्रत्ययः नित्त्वा-दाद्युदात्तत्वम् नभ्राण्नपादित्यत्रवृत्तौत्वेवमुक्तम् नक्षरतिनक्षीयतइतिवानक्षत्रम् क्षीयतेःक्षरतेर्वा नक्षत्रमितिनिपात्यतइति शेश्छन्दसिबहुलमितिशेर्लोपः । यन्ति इण्गतौ इणोयणितियणादेशः। सूराय विश्वचक्षसे विश्वंचष्टेप्रकाशयतीतिविश्वचक्षाः चक्षेर्बहुलंशिच्चेत्यसुन्प्रत्ययः शित्त्वेनसार्व-धातुकत्वात् ख्याञादेशाभावः उभत्रषष्ठयर्थेचतुर्थीवक्तव्येतिचतुर्थी ॥ २ ॥

२. सारे संसार के प्रकाशक सूर्य का आगमन होने पर नक्षत्रगण चोरों की तरह रात्रि के साथ चले जाते हैं।

---

१ नि० १२. १५. । २ तै० ब्रा० १. ५. २. । ३ तै० ब्रा० १. ५. २. ।
४ तै० सं. ५. ४. १. । ५ नि० ३. २०. ।

तृतीयामृचमाह—

अदृ॑श्रमस्य के॒तवो॒ वि र॒श्मयो॒ जनाँ॒ अनु॑। भ्राज॑न्तो अ॒ग्नयो॒ यथा॥३॥

अदृ॑श्रम्। अ॒स्य॒। के॒तवः॑। वि। र॒श्मयः॑। जना॑न्। अनु॑। भ्राज॑न्तः। अ॒ग्नयः॑। य॒था॒॥ ३ ॥

अस्यसूर्यस्यकेतवःप्रज्ञापकाः रश्मयोदीप्तयः जनाँअनुव्यदृश्रंजातान्सर्वान्अनुक्रमेणप्रेक्षन्ते सर्वंजगत्प्रकाशयन्तीत्यर्थः तत्रदृष्टान्तः—भ्राजन्तोदीप्यमानाः अग्नयोयथा अग्नयइव॥अदृश्रं दृशिर्प्रेक्षणे वर्तमानेलुङि इरितोवेतिच्लेरङादेशः रुडित्यनुवृत्तौ बहुलंछन्दसीतिरुडागमः अतएवबहुलवचनात् ऋदृशोऽङिगुणइतिगुणाभावइत्युक्तं तिङांतिङोभवन्तीतिप्रथमपुरुषबहुवचनस्य उत्तमपुरुषैकवचनादेशः प्रथमपुरुषएवशाखान्तरेश्रूयते—अदृश्रन्नस्यकेतवइति। जनानित्यस्यनकारस्यसंहितायांरुत्वयत्वादिपूर्ववत्। भ्राजन्तः शपःपित्त्वादनुदात्तत्वम् शतुश्चलसार्वधातुकस्वरेणधातुस्वरएवशिष्यते॥ ३ ॥

३. दीप्यमान अग्नि की तरह सूर्य की सूचक किरणें समूचे जगत् को एक-एक कर देखती हैं।

चातुर्मास्येषुशुनासीर्येपर्वणिअस्तिसौर्यएककपालः तस्यतरणिरित्येषानुवाक्या तथाचसूत्रितम्—तरणिर्विश्वदर्शतश्चित्रंदेवानामुदगादनीकमितियाज्यानुवाक्याइति तथा अतिमूर्तिनाम्न्येकाहेकृष्णपक्षेसौरीष्टिःकर्तव्या तस्यामप्येषानुवाक्या अतिमूर्तिनेतिखण्डेसूत्रितम्—नवोनवोभ्रवतिजायमानस्तरणिर्विश्वदर्शतइति।

तामेतांसूक्तेचतुर्थीमृचमाह—

त॒रणि॑र्वि॒श्वद॑र्शतो ज्यो॒ति॒ष्कृद॑सि सूर्य। विश्व॒मा भा॑सि रोच॒नम्॥४॥

त॒रणिः॑। वि॒श्वऽद॑र्शतः। ज्यो॒तिः॒ऽकृत्। अ॒सि॒। सू॒र्य॒। विश्व॑म्। आ। भा॒सि॒। रो॒च॒नम्॥ ४ ॥

हेसूर्य त्वंतरणिःतरिताअन्येनगन्तुमशक्यस्यमहतोध्वनोगन्तासि तथाचस्मर्यते—योजनानांसहस्रेद्वेद्वेशतेद्वेचयोजने। एकेननिमिषार्धेनक्रममाणनमोस्तुतइति। यद्वा उपासकानांरोगाच्चारयितासि आरोग्यंभास्करादिच्छेदितिस्मरणात्। तथाविश्वदर्शतः विश्वैःसर्वैःप्राणिभिर्दर्शनीयः आदित्यदर्शनस्यचाण्डालादिदर्शनजनितपापनिर्हरणहेतुत्वात् तथाचापस्तम्बः—दर्शने ज्योतिषांदर्शनमिति। यद्वा विश्वंसकलंभूतजातंदर्शतंद्रष्टव्यंप्रकाश्यंयेनसतथोक्तः तथाज्यो-

तिष्कृत् ज्योतिषःप्रकाशस्यकर्तासर्वस्यवस्तुनःप्रकाशयितेत्यर्थः यद्वा चन्द्रादीनांरात्रौप्रकाशयिता रात्रौहिअम्मयेषुचन्द्रादिबिंबेषुसूर्यकिरणाःप्रतिफलिताःसन्तोन्धकारंनिवारयन्ति यथा द्वारस्थदर्पणोपरिनिपातिताःसूर्यरश्मयोगृहान्तर्गततमोनिवारयन्तितद्वदित्यर्थः यस्मादेवंतस्मात् विश्वंव्याप्तंरोचनंरोचमानमन्तरिक्षंआसमन्ताद्भासिप्रकाशयसि यद्वा हेसूर्यअन्तर्यामितयासर्वस्य प्रेरकपरमात्मन्तरणिःसंसाराब्धेस्तारकोसि यस्मात्त्वंविश्वदर्शतः विश्वैःसर्वैर्मुमुक्षुभिर्दर्शतोद्रष्टव्यः साक्षात्कर्तव्यइत्यर्थः अधिष्ठानसाक्षात्कारेह्यारोपितंनिवर्तते ॥ ज्योतिष्कृत् ज्योतिषःसूर्यादेःकर्ता तथाचाम्नायते—चन्द्रमामनसोजातश्चक्षोःसूर्योअजायतेति[1] । ईदृशस्त्वंचिद्रूपतयाविश्वंसर्वंदृश्यजातंरोचनंरोचमानंदीप्यमानंयथाभवतितथाआभासिप्रकाशयसि चैतन्यस्फुरणेहिसर्वंजगद्दृश्यते तथाचाम्नायते—तमेवभान्तमनुभातिसर्वंतस्यभासासर्वमिदंविभातीति । तरणिः तॄप्लवनतरणयोः अस्मादन्तर्भावितण्यर्थात् अर्तिसृधृधम्यश्यवितॄभ्योनिरित्यनिप्रत्ययः प्रत्ययाद्युदात्तत्वम् । ज्योतिःकरोतीतिज्योतिष्कृत् क्विप्चेतिक्विप् नित्यंसमासेनुत्तरपदस्थस्येतिविसर्जनीयस्यषत्वम् । भासि भादीप्तौ अन्तर्भावितण्यर्थाल्लटिअदादित्वाच्छपोलुक् ॥ ४ ॥

४. सूर्य ! तुम महान् मार्ग का भ्रमण करो, तुम सारे प्राणियों के दर्शनीय हो। ज्योति के कारण हो। तुम समूचे दीप्यमान अन्तरिक्ष में प्रभा का विकाश करते हो।

पञ्चमीमृचमाह—

प्रत्यङ्देवानांविशःप्रत्यङ्ङुदेषिमानुषान् । प्रत्यङ्विश्वंस्वर्दृशे ॥५॥७॥

प्रत्यङ् । देवानाम् । विशः । प्रत्यङ् । उत् । एषि । मानुषान् ।
प्रत्यङ् । विश्वम् । स्वः । दृशे ॥ ५ ॥ ७ ॥

हेसूर्य त्वंदेवानांविशःमरुन्नामकान्देवान् मरुतोवैदेवानांविशइतिश्रुत्यन्तरात्[2] । तान्मरुत्संज्ञकान्देवान्प्रत्यङ्ङुदेषिमतिगच्छन्नुदयंप्राप्नोषितेषामभिमुखंयथाभवतितथेत्यर्थः तथामानुषान्मनुष्यान्प्रत्यङ्ङुदेषि तेपियथाअस्मदभिमुखएवसूर्यउदेतीतिमन्यन्ते तथाविश्वंव्याप्तंस्वःस्वर्लोकंदृशेद्रष्टुंप्रत्यङ्ङुदेषि यथास्वर्लोकवासिनोजनाः स्वस्वाभिमुख्येनपश्यन्तितथाउदेषीत्यर्थः एतदुक्तंभवति—लोकत्रयवर्तिनोजनाः सर्वेपिस्वस्वाभिमुख्येनसूर्यंपश्यन्तीति तथाचाम्नायते—तस्मात्सर्वएवमन्यतेमांप्रत्युदगादिति[3] ॥ प्रत्यङ् प्रत्यञ्चतीतिप्रत्यङ् अञ्चुगतिपूजनयोः ऋत्विगित्यादिना क्विन् अनिदितामितिनलोपः उगिदचामितिनुम् हल्ङ्याब्भ्योदीर्घात्सुतिस्यपृक्तंहल्लोपौ संयोगान्तलोपस्यासिद्धत्वात् उपधादीर्घनलोपयोरभावः क्विन्प्रत्ययस्यकुरितिकुत्वं अनिगन्तोञ्चतावितिअनिगन्तइति

1 ऋ० सं० ८. ४. १९. । 2 तै० सं० २. २. ५. । 3 तै० सं. ६. ५. ४. ।

पर्युदासात्पूर्वपदप्रकृतिस्वराभावेकृदुत्तरपदप्रकृतिस्वरत्वम्। एषि इण्गतौ सिपि अदादित्वाच्छपोलुक् आदेशप्रत्यययोरितिषत्वम्। स्वः सुपूर्वादर्तेर्विच् गुणेयणादेशः न्यक्स्वरौस्वरितौचेतिस्वरितत्वम्। दृशे दृशिर्प्रेक्षणेइत्यस्माद्दृशेविख्येचेतितुमर्थेनिपातितः ॥ ५॥

५. तुम मरुद्देवों के सामने उदित हो। मनुष्यों के सामने उदित हो। समस्त स्वर्गलोक के दर्शन के लिए उदित हो।

॥ इतिप्रथमस्यचतुर्थेसप्तमोवर्गः ॥ ७ ॥

षष्ठीमृचमाह—

येनापावकचक्षसाभुरण्यन्तंजनाँअनु। त्वंवरुणपश्यसि॥६॥

येन। पावक। चक्षसा। भुरण्यन्तम्। जनान्। अनु। त्वम्। वरुण। पश्यसि ॥ ६ ॥

हेपावक सर्वस्यशोधकवरुणअनिष्टनिवारकसूर्य त्वंजनान्जातान्प्राणिनः भुरण्यन्तंधारयन्तंपोषयन्तंवाइमंलोकंयेनचक्षसाप्रकाशेनानुपश्यसि अनुक्रमेणप्रकाशयसि तंप्रकाशंस्तुमइतिशेषः यद्वा उत्तरस्यामृचिसम्बन्धः तेनचक्षसाव्येषीति तथाचयास्केनोक्तं—तत्तेवयंस्तुमइतिवाक्यशेषोपिवोत्तरस्यामन्वयस्तेनव्येषीति[1] ॥ भुरण्यन्तं भुरणधारणपोषणयोः कण्ड्वादित्वाद्यक् ततःशतरिकर्तरिशप् अदुपदेशाल्लसार्वधातुकानुदात्तत्वेयकएवस्वरःशिष्यते। वरुण वृञ्वरणे अस्मादन्तर्भावितण्यर्थात् कृवृदारिभ्यउनन्निति उननप्रत्ययः अत्रवरुणशब्देनआदित्यएवोच्यते तथाचान्यत्राम्नातम्—तस्यैवमित्रश्चवरुणश्चाजायेतामिति। मित्रश्चवरुणश्चधाताचार्यमाचेति[2] ॥ ६ ॥

६. हे संस्कारक और अनिष्टहन्ता सूर्य! तुम जिस दीप्ति-द्वारा प्राणियों के पालक बनकर जगत् को देखते हो, हम उसी की प्रार्थना करते हैं।

सप्तमीमृचमाह—

विद्यामेषिरजस्पृथ्वहामिमानोअक्तुभिः। पश्यञ्जन्मानिसूर्य॥७॥

वि। द्याम्। एषि। रजः। पृथु। अहा। मिमानः। अक्तुऽभिः। पश्यन्। जन्मानि। सूर्य ॥ ७ ॥

हेसूर्य त्वंपृथुविस्तीर्णंरजोलोकं लोकारजांस्युच्यन्तइतियास्कः। कंलोकंद्यामन्तरिक्षलोकंव्येषिविशेषेणगच्छसि किंकुर्वन्अहाअहानिअक्तुभीरात्रिभिःसहमिमानः उत्पादयन् आदित्यगत्यधीनत्वादहोरात्रविभागस्य तथाजन्मानिजननवन्तिभूतजातानिपश्यन्प्रकाशयन् ॥

१ नि० १२. २२। २ तै० ब्रा० १. १. ९।

रजस्पृथ्वित्यत्र छन्दसिवाग्राम्रेडितयोरितिविसर्जनीयस्यसत्वम्। अहाशेश्छन्दसिबहुलमितिशेर्लोपः। मिमानः माङ्माने जौहोत्यादिकः शानचिश्लौद्विर्भावेभृञामिदित्यभ्यासस्येत्वम् श्नाभ्यस्तयोरातइत्याकारलोपः अभ्यस्तानामादिरित्यभ्यस्तस्याद्युदात्तत्वम्। जन्मानि जनीप्रादुर्भावे अन्येभ्योपिदृश्यन्तइतिमनिन् नित्त्वादाद्युदात्तत्वम्॥ ७॥

७. उसी दीप्ति के द्वारा रात्रि के साथ दिवस को उत्पादन और प्राणियों को अवलोकन करके विस्तृत अन्तरिक्ष-लोक में भ्रमण करते हो।

अष्टमीमृचमाह—

सप्तत्वाहरितोरथेवहन्तिदेवसूर्य। शोचिष्केशंविचक्षण॥८॥

सप्त। त्वा। हरितः। रथे। वहन्ति। देव। सूर्य। शोचिःऽकेशम्। विऽचक्षण॥ ८॥

हेसूर्यसर्वस्यद्योतमानविचक्षणसर्वस्यप्रकाशयितः सप्त सप्तसंख्याकाः हरितोश्वाः रसहरणशीलारश्मयोवात्वांवहन्तिप्रापयन्ति कीदृशं रथेअवस्थितमितिशेषःतथाशोचिष्केशंशोचींषितेजांस्येवयस्मिन् केशाइवदृश्यन्तेसतथोक्तः तम्। हरितइत्यादित्याश्वानांसंज्ञा हरितआदित्यस्येतिनिघण्टावुक्तत्वात्॥ शोचिष्केशं शुचदीप्तौ अर्चिशुचिहुसृपीत्यादिनाइसिप्रत्ययान्तोन्तोदात्तः सएवबहुव्रीहौपूर्वपदप्रकृतिस्वरत्वेनशिष्यते नित्यंसमासेनुत्तरपदस्थस्येतिविसर्जनीयस्यषत्वम्॥ ८॥

८. दीप्तिमान् और सर्व-प्रकाशक सूर्य! हरित् नाम के सात घोड़े रथ में तुम्हें ले जाते हैं। किरणें ही तुम्हारे केश हैं।

अयुक्तसप्तशुन्ध्युवःसूरोरथस्यनप्त्यः। ताभिर्यातिस्वयुक्तिभिः॥९॥

अयुक्त। सप्त। शुन्ध्युवः। सूरः। रथस्य। नप्त्यः। ताभिः। याति। स्वयुक्तिऽभिः॥ ९॥

सूरः सर्वस्यप्रेरकःसूर्यः शुन्ध्युवः शोधिकाः अश्वस्त्रियः तादृशीःसप्तसप्तसंख्याकाः अयुक्तस्वरथेयोजितवान् कीदृश्यः रथस्यनप्त्यःनपातयित्र्यः याभिर्युक्ताभिःरथोयातिनपततिवादृशीरित्यर्थः एवंभूताभिस्ताभिरश्वस्त्रीभिःस्वयुक्तिभिः स्वकीययोजनेनरथेसम्बद्धाभिर्याति यज्ञगृहंप्रत्यागच्छति अतस्तस्मैहविर्दातव्यमितिवाक्यशेषः॥ अयुक्त युजिर्योगे स्वरितत्वात्कर्त्रभिप्रायेआत्मनेपदम् लुङिच्लेःसिच् एकाचइतीट्प्रतिषेधः लिङ्सिचावात्मनेपदेष्विति सिचः कित्त्वाल्लघूपधगुणाभावः झलोझलीतिसिचःसकारलोपः चोःकुरितिकुत्वम्। शुन्ध्युवः शुन्धविशुद्धौ यजिमनिशुन्धिदसिजनिभ्योयुरितियुप्रत्ययः शसि तन्वादीनांछन्दसिबहुलमुपसंख्या-

नमितिउवङादेशः। सूरः षूप्रेरणे सुसूधागृधिभ्यः क्रन्निति क्रन्प्रत्ययः नित्त्वादाद्युदात्तत्वम्। नप्त्यः नपातयतीत्यर्थेनप्तृनेष्टृइत्यादिनाउणादिषुनप्तृशब्दस्तृजन्तोनिपातितः ऋन्नेभ्योङीबिति ङीप् यणादेशेउदात्तयणोहल्पूर्वादितिङीपउदात्तत्वम् सुपांसुपोभवन्तीतिशसोजसादेशः ततोयणादेशेउदात्तस्वरितयोर्यणइतिस्वरितत्वम् रेफलोपश्छान्दसः उक्तंच द्वौचापरौवर्णविकारनाशाविति। शाखान्तरेतुनप्त्र्यइत्येवपठ्यते। स्वयुक्तिभिः स्वकीयाःसूर्यसम्बन्धिन्यः युक्तयोयोजनानियासां बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्॥ ९॥

९. सूर्य ने रथवाहिका सात घोड़ियों को रथ में संयोजित किया। उन संयोजित घोड़ियों के द्वारा सूर्य गमन करते हैं।

अवभृथेष्टौहोत्रकाजलान्निष्क्रम्यउद्वयंतमसस्परीतिमन्त्रंब्रूयुः तथाचपत्नीसंयाजेश्वरित्वेतिखण्डेसूत्रितम्—उद्वयंतमसस्परीत्युदेत्येति।

तामेतांसूक्तेदशमीमृचमाह—

उद्वयंतमसस्परिज्योतिष्पश्यन्तउत्तरम्।
देवंदेवत्रासूर्यमगन्मज्योतिरुत्तमम्॥ १०॥

उत्। वयम्। तमसः। परि। ज्योतिः। पश्यन्तः। उत्ऽतरम्।
देवम्। देवऽत्रा। सूर्यम्। अगन्म। ज्योतिः। उत्ऽतमम्॥ १०॥

वयमनुष्ठातारःतमसस्परितमसउपरिरात्रेरूर्ध्ववर्तमानंतमसःपापात्परिउपरिवर्तमानंवापापरहितमित्यर्थः तथाचाम्नायते-उद्वयंतमसस्परीत्याह पाप्मावैतमः पाप्मानमेवास्मादपहन्तीति[1]। ज्योतिस्तेजस्विनंउत्तरंउद्गततरंउत्कृष्टतरंवादेवत्रादेवेषुमध्येदेवंदानादिगुणयुक्तंसूर्यंपश्यन्तः स्तुतिभिर्हविर्भिश्चउपासीनाःसन्तःउत्तमंउत्कृष्टतमंज्योतिः सूर्यरूपंअगन्मप्राप्नुवाम तथाचश्रूयते—अगन्मज्योतिरुत्तममित्याह असौवाआदित्योज्योतिरुत्तममादित्यस्यैवसायुज्यंगच्छतीति[2]। युक्तंचैतद् वं यथायथोपासतेतदेवभवन्तीतिश्रुत्यन्तरात्॥ तमसस्परि पञ्चम्याःपरावध्यर्थेइतिविसर्जनीयस्य सत्वं। ज्योतिष्पश्यन्तः इसुसोःसामर्थ्येइतिविसर्जनीयस्यषत्वं व्यपेक्षालक्षणंसामर्थ्यंतत्राङ्गीक्रियते। देवत्रा देवमनुष्यपुरुषपुरुमर्त्येभ्योद्वितीयासप्तम्योर्बहुलमितिसप्तम्यर्थेत्राप्रत्ययः प्रत्ययस्वरः। अगन्म छन्दसिलुङ्लङ्लिटइतिप्रार्थनायांलङ्बहुलंछन्दसीतिशपोलुक् म्वोश्चेतिधातोर्मकारस्यनकारः अडागमउदात्तः पादादित्वान्निघाताभावः। उत्तमं तमपःपित्त्वानुदात्तत्वेप्राप्तेउत्तमशश्वत्तमौसर्वत्रेत्युञ्छादिषुपाठादन्तोदात्तत्वम्॥१०॥

१०. अन्धकार के ऊपर उठी हुई ज्योति को देखकर हम सब देवों में प्रकाशवाली सूर्य के पास जाते हैं। सूर्य ही उत्कृष्ट ज्योति हैं।

---

१ तै० ब्रा० २. ४. ५. । २ तै० सं० ५. १. ८. । ३ तै० सं. ५. १. ८. ।

उद्यन्नित्ययंतृचोरोगशान्त्यर्थः तथाचानुक्रमण्यामुक्तम्—अन्त्यस्तृचोरोगघ्नउपनिषदिति युक्तंचैतत् यस्मादनेनतृचेनत्वग्दोषशान्त्येप्रस्कण्वःसूर्यमस्तौत् तेनतृचेनस्तुतःसूर्यःतमृषिंरोगान्निरगमयत् तस्मादिदानीमपिरोगशान्त्येअनेनतृचेनसूर्यउपासनीयः तदुक्तंशौनकेन—उद्यन्नद्येतिमन्त्रोयंसौरःपापप्रणाशनः। रोगघ्नश्चविषघ्नश्चभुक्तिमुक्तिफलप्रदइति।

तृचस्याद्यांसूक्तेएकादशीमृचमाह—

उद्यन्नद्यमित्रमहआरोहन्नुत्तरांदिवम्।
हृद्रोगंममसूर्यहरिमाणंचनाशय॥ ११॥

उत्ऽयन्। अद्य। मित्रऽमहः। आऽरोहन्। उत्ऽतराम्। दिवम्।
हृत्ऽरोगम्। मम। सूर्य। हरिमाणम्। च। नाशय॥ ११॥

हेसूर्यसर्वस्यप्रेरकमित्रमहः सर्वेषामनुकूलदीप्तियुक्त अद्यास्मिन्कालेउद्यन् उदयंगच्छन्उत्तरां उद्गततरांदिवमन्तरिक्षंआरोहन्आभिमुख्येनप्राप्नुवन् यद्वा दिवमन्तरिक्षंउत्तरामारोहन्उत्कर्षेणप्राप्नुवन् एवंविधस्त्वंममहृद्रोगंहृदयगतंअन्तरंरोगंहरिमाणंशरीरगतकान्तिहरणशीलं बाह्यंरोगं यद्वा शरीरगतंहरिद्वर्णंरोगप्राप्तंवैवर्ण्यमित्यर्थः तदुभयमपिनाशय मांस्तोतारंउभयविधाद्रोगान्मोचयेत्यर्थः॥ मित्रमहःमित्रमनुकूलंमहस्तेजोयस्यासौ आमन्त्रितनिघातः। उत्तरां उदित्यनेनोपसर्गेणस्वसंसृष्टधात्वर्थोलक्ष्यते तस्मादातिशायनिकस्तरप् प्रथमपक्षे अन्तरिक्षविशेषणत्वेनद्रव्यप्रकर्षप्रतीतेराम् नभवति द्वितीयेत्वारोहणक्रियायाः प्रकर्षोगम्यतइतिकिमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षेइत्याम् प्रथमपक्षेशप्तरपोःपित्त्वादनुदात्तत्वेउपसर्गस्वरएवशिष्यते द्वितीयेतुआम्प्रत्ययस्यसतिशिष्टत्वात्तस्यैवस्वरेप्राप्ते व्यत्ययेनाद्युदात्तत्वम् वृषादिर्वाद्रष्टव्यः सह्याकृतिगणः। हृद्रोगम् वाशोकष्यञ्रोगेष्विति हृदयशब्दस्यहृदादेशः। मम युष्मदस्मदोर्ङसीत्याद्युदात्तत्वम्। हरिमाणं हृञ्हरणे जनिहृभ्यामिमनिन्नित्यौणादिकइमनिन्प्रत्ययः व्यत्ययेनान्तोदात्तत्वं यद्वा हरिच्छब्दस्यवर्णवाचित्वात् वर्णदृढादिभ्यःष्यञ्चेतिचकारादिमनिन्प्रत्ययः इष्ठेमेयःस्वित्यनुवृत्तौटेरितिटिलोपः॥ ११॥

११. अनुरूप-दीप्ति-युक्त सूर्य! आज उदित होकर और उन्नत आकाश में चढ़कर मेरा हृद्रोग या मानसरोग और हरिमाण (हलीमक)-रोग या शरीर-रोग विनष्ट करो।

द्वादशीमृचमाह—

शुकेषुमेहरिमाणंरोपणाकासुदध्मसि।
अथोहारिद्रवेषुमेहरिमाणंनिदध्मसि॥ १२॥

शुकेषु। मे। हरिमाणम्। रोपणाकासु। दध्मसि। अथो इति।
हारिद्रवेषु। मे। हरिमाणम्। नि। दध्मसि॥ १२॥

मेमदीयंहरिमाणं शरीरगतंहरिद्वर्णस्यभावं शुकेषुतादृशंवर्णकामयमानेषुपक्षिषु तथारोपणाकासुशारिकासुपक्षिविशेषेषुदध्मसिस्थापयामः अथोअपिचहारिद्रवेषुहरितालद्रुमेषुतादृग्वर्णवस्तु मेमदीयंहरिमाणंनिदध्मसिनिदधीमहि सचहरिमातत्रैवसुखेनास्तांअस्मान्माबाधिष्टेत्यर्थः ॥ दध्मसि इदन्तोमसिरितिमसइकारागमः ॥ १२ ॥

१२. मैं अपने हरिमाण (हलीमक) रोग को शुक और सारिका पक्षियों पर न्यस्त करता हूँ। अपना हरिमाण रोग हरिद्रा पर स्थापित करता हूँ।

उदंगादयमादित्योविश्वेनसहंसासह ।
द्विषन्तंमह्यंरन्धयन्मोअहंद्विषतेरंधम् ॥ १३ ॥ ८॥

उत् । अगात् । अयम् । आदित्यः । विश्वेन । सहसा । सह ।
द्विषन्तंम् । मह्यम् । रन्धयन् । मो इति । अहम् । द्विषते । रधम्॥१३॥८॥

अयंपुरोवर्तीआदित्यःअदितेःपुत्रःसूर्यः विश्वेनसहसासर्वेणबलेनसहउदगावउदयंप्राप्तवान् किंकुर्वन्मह्यंद्विषन्तंरन्धयन्सभोपद्रवकारिणंरोगंहिंसन् अपिचअहंद्विषतेअनिष्टकारिणेरोगायमोरधंमैवहिंसांकरोमि सूर्यएवअस्मदनिष्टकारिणं रोगंविनाशयत्वित्यर्थः॥अगात् एतेर्लुङि इणोगालुङीतिगादेशःगातिस्थेतिसिचोलुक्। आदित्यः दित्यदित्यादित्येत्यपत्यार्थेप्राग्दीव्यतीयोण्यप्रत्ययः। रन्धयन्रधहिंसासंराध्योः ण्यन्ताल्लटःशतृ रधिजभोरचीतिणौधातोर्नुमागमः। मो मा उ निपातद्वयसमुदायोमैवेत्यस्यार्थे ओदितिप्रगृह्यत्वेप्लुतप्रगृह्याअचीतिप्रकृतिभावः। द्विषते शत्रुरनुमइति विभक्तेरुदात्तत्वम्। रधम् रधेर्लुङिपुषादित्वाच्च्लेरङादेशःरधिजभोरचीतिधातोर्नुम् अनिदितामित्यनुषङ्गलोपः नमाङ्योगेइत्यडभावः ॥१३॥

१३. यह आदित्य मेरे अनिष्टकारी रोग के विनाश के लिए समस्त तेज के साथ उदित हुए हैं। मैं उस रोग का विनाश-कर्त्ता नहीं, वे ही हैं।

॥ इतिप्रथमस्यचतुर्थेष्टमोवर्गः ॥ ८ ॥

॥ इतिप्रथमेमण्डलेनवमोनुवाकः ॥ ९ ॥

दशमेनुवाकेसप्तसूक्तानि तत्राभित्यमितिपञ्चदशर्चंप्रथमंसूक्तम् अत्रेतिहासमाचक्षते—अङ्गिराइन्द्रसदृशंपुत्रंआत्मनःकामयमानोदेवताउपासांचक्रे तस्यसव्याख्येनपुत्ररूपेणइन्द्रएवस्वयंजज्ञे जगतिमत्तुल्यःकश्चिन्माभूदिति ससव्यआङ्गिरसोस्यसूक्तस्यऋषिः चतुर्दशीपञ्चदश्यौत्रिष्टुभौ त्रिष्टुबन्तस्यसूक्तस्यशिष्टाजगत्यइतिपरिभाषयाअवशिष्टास्त्रयोदशर्चोजगत्यः इन्द्रोदेवता तदेतत्सर्वमनुक्रमण्यामुक्तम्—अभित्यंपञ्चोनासव्योद्विनिष्टुबन्तमङ्गिराइन्द्रतुल्यंपुत्रमिच्छन्नप्यध्याय-

वसव्यइतीन्द्रएवास्यपुत्रोजायतेति । अतिरात्रेप्रथमेपर्यायेहोतुःशस्त्रेइदंसूक्तंशंसनीयं अतिरात्रे-पर्यायाणामितिखण्डेसूत्रितम्—अभित्यंमेषमध्वर्यवोभरतेन्द्रायसोममितियाज्येति गवामयनस्य मध्यभूतेविषुवत्संज्ञकेहन्यपिनिष्केवल्येइदंसूक्तम् तथाचसूत्रितम्—यस्तिग्मशृङ्गोभित्यंमेष-मिन्द्रस्यनुवीर्याणीत्येतस्मिन्नैन्द्रींनिविदंशस्त्वेति ।

तत्रप्रथमामृचमाह—

अ॒भि त्यं मे॒षं पु॑रुहू॒तमृ॒ग्मिय॒मिन्द्रं॑ गी॒र्भिर्म॑दता॒ वस्वो॑ अर्ण॒वम् ।
यस्य॒ द्यावो॒ न वि॒चर॑न्ति॒ मानु॑षा भु॒जे मंहि॑ष्ठम॒भि विप्र॑मर्चत ॥ १ ॥

अ॒भि । त्यम् । मे॒षम् । पु॒रु॒ऽहू॒तम् । ऋ॒ग्मिय॑म् । इन्द्र॑म् । गी॒ःऽभिः । मद॑त । वस्वः॑ । अ॒र्ण॒वम् । यस्य॑ । द्यावः॑ । न । वि॒ऽचर॑न्ति । मानु॑षा । भु॒जे । मंहि॑ष्ठम् । अ॒भि । विप्र॑म् । अ॒र्च॒त ॥ १॥

त्यंप्रसिद्धंमेषंशत्रुभिःस्पर्धमानं यद्वा कण्वपुत्रंमेधातिथिंयजमानमिन्द्रोमेषरूपेणागत्यत-दीयंसोमंपपौ सऋषिस्त्वंमेषइत्यवोचत् अतइदानीमपिमेषइतीन्द्रोभिधीयते मेधातिथेर्मेषेति सुब्र-ह्मण्यामन्त्रैकदेशस्यव्याख्यानरूपंब्राह्मणमेवमाम्नायते—मेधातिथिंहिकाण्वायनंमेषोभूत्वाजहा-रेति आगत्यसोमंअपहृतवानित्यर्थः । पुरुहूतम् पुरुभिर्यजमानैराहूतम् ऋग्मियंऋग्भिर्विक्रि-यमाणंस्तूयमानमित्यर्थः स्तुत्याहिदेवताविक्रियते यद्वा ऋग्भिर्मीयतेशब्द्यतेइतिऋग्मीःतं वस्वो-अर्णवंधनानामावासभूमिं एवंगुणविशिष्टमिन्द्रंहेस्तोतारोगीर्भिःस्तुतिभिरभिमदतआभिमुख्येनह-र्षंप्रापयत यस्येन्द्रस्यकर्मणिमानुषामनुष्याणांहितानिविचरन्तिविशेषेणवर्तन्ते तत्रदृष्टान्तः—द्या-वोन यथासूर्यरश्मयः सर्वेषांहितकराः भुजे भोगायमंहिष्ठंअतिशयेनप्रवृद्धंविप्रंमेधाविनं तथावि-धमिन्द्रमभ्यर्चत अभिपूजयत ॥ मेषं मिषस्पर्धायां इगुपधलक्षणेकेप्राप्तेदेवसेनमेषादयःपचा-दिषुद्रष्टव्याइतिवचनादच्प्रत्ययः।ऋग्मियं तस्यविकारइत्यर्थेएकाचोनित्यंमयटमिच्छन्तीतिमय-ट्प्रत्ययःअकारस्येकारश्छान्दसः प्रत्ययस्वरः यद्वा माङ्मानेशब्देच ऋग्भिर्मीयतेइतिऋग्मीः क्विपिवल्लिलोपात्पूर्वमेवपरत्वाद्घुमास्थेतीत्वम् अचिश्नुधात्वित्यादिनेयङादेशः कृदुत्तरपदप्रकृति-स्वरत्वम् । मदत मदीहर्षेहेतुमतिणिच् मदीहर्षग्लेपनयोरितिघटादिषुपाठात् हर्षार्थेवर्तमानस्यघ-टादयोमितइतिमित्त्वेसतिमितांह्रस्वइतिह्रस्वत्वम् लोण्मध्यमपुरुषबहुवचनेशपिछन्दस्युभयथे-त्यार्धधातुकत्वात् णेरनिटीतिणिलोपः तशब्दस्यसार्वधातुकमपिदितिङित्त्वेऋचितुनुघमक्षुतङ्कु-

न्नोरुण्याणामितिदीर्घः। वस्वः ङसि आगमानुशासनस्यानित्यत्वान्नुमभावः जसादिषुछन्दसिवा-वचनमितिवचनात् घेर्ङितीतिगुणाभावेयणादेशः ।अर्णवं अर्णउदकमस्मिन्नस्तीत्यर्णवःसमुद्रः अर्णसोलोपश्चेतिमत्वर्थीयोवप्रत्ययःसलोपश्च तेनशब्देनजलाश्रयवाचिनाआश्रयमात्रंलक्ष्यते प्रत्ययस्वरः।विचरन्ति चरगत्यर्थःअदुपदेशाल्लसार्वधातुकानुदात्तत्वेधातुस्वरः तिङ्चोदात्तवती-तिगतिरनुदात्ता यद्वृत्तयोगादनिघातः । मानुषा शेश्छन्दसिबहुलमितिशेर्लोपः।भुजे भुजपालना-भ्यवहारयोः संपदादिलक्षणोभावेक्विप् सावेकाचइतिविभक्तेरुदात्तत्वम् । मंहिष्ठं महिवहिवृ-द्धौ अतिशयेनमंहितोमंहिष्ठः तुश्छन्दसीतिइष्ठन्प्रत्ययः तुरिष्ठेमेयःस्वितितृलोपः नित्त्वादाद्युदा-त्तत्वम्। अर्चत अर्चपूजायां भौवादिकः ॥ १ ॥

१. जिन्हें लोग बुलाते हैं, जो स्तुति-पात्र और धन के सागर हैं, उन्हीं मेष या बलवान् इन्द्र को स्तुति-द्वारा प्रसन्न करो । सूर्य-किरणों की तरह जिनका काम मनुष्यों का हित करना है, उन्हीं क्षमता-शाली और मेधावी इन्द्र को, धन-सम्भोग के लिए, अर्चित करो ।

द्वितीयामृचमाह—

अ॒भीम॑वन्वन्त्स्वभि॒ष्टिमू॒तयो॑न्तरिक्ष॒प्रांतवि॑षीभि॒राव्र॑तम् ।
इन्द्रं॒दक्षा॑सऋ॒भवो॑मद॒च्युतं॑श॒तक्र॑तुं॒जव॑नीसू॒नृतारु॑हत ॥ २ ॥

अ॒भि । ई॒म् । अ॒व॒न्व॒न् । सु॒ऽअ॒भि॒ष्टिम् । ऊ॒तयः॑ । अ॒न्त॒रि॒क्ष॒ऽप्राम् । तवि॑षीभिः । आऽवृ॑तम् । इन्द्र॑म् । दक्षा॑सः । ऋ॒भवः॑ । म॒द॒ऽच्युत॑म् । श॒तऽक्र॑तुम् । जव॑नी । सू॒नृता॑ । आ । अ॒रु॒ह॒त् ॥ २ ॥

ऊतयः अवितारोरक्षितारोदक्षासोदक्षयितारः प्रवर्धयितारः ऋभवः उरुभान्तीतिनै-रुक्तव्युत्पत्त्याऋभवोत्रमरुतउच्यन्ते एवंभूतामरुतः इन्द्रमभीमवन्वन्आभिमुख्येनखलुअभजन्त वृत्रेणसहयुध्यमानमिन्द्रंसर्वेदेवाःपर्यत्यजन् मरुतस्तुतथानपर्यत्याक्षुः तथाचाम्नायते—विश्वेदे-वाअजहुर्येसखायः मरुद्भिरिन्द्रसख्यंतेअस्त्विति[1]। ब्राह्मणेप्याम्नातम्—मरुतोहैनंनाजहुरिति[2] । कीदृशमिन्द्रंस्वभिष्टिं शोभनाभ्येषणवन्तंशोभनाभिगमनमित्यर्थः। अन्तरिक्षप्रां अन्तरिक्षंद्यु-लोकं स्वतेजसाप्राःतिपूरयतीत्यन्तरिक्षप्राः द्वादशस्वादित्येषुइन्द्रस्य विद्यमानत्वात् शाखान्तरेपिश्रू-यते—तस्याइन्द्रश्चविवस्वांश्चाजायेतामिति[3] । इन्द्रश्चविवस्वांश्चेत्येवइति[4] च । तविषीभिरावृतम् तविषीतिबलनाम तविषीशुष्मिमितितन्नामसुपाठात् बलैरावृतंअतिबलिनमित्यर्थः अतएवमदच्यु-तम् शत्रूणांमदस्यगर्वस्यच्यावयितारं किञ्च शतक्रतुंशतसंख्याकानांक्रतूनामाहर्तारं बहुविधकर्मा-णंवापूर्वोक्तंतमिन्द्रंजवनीवृत्रवधंप्रतिप्रेरयित्रीसूनृतातैर्मरुद्भिःप्रयुक्ता प्रहरभगवोजहिवीरयस्वेति

१ ऋ०८. ६. ३३. । २ ऐ० ब्रा०३. २०. । ३ तै० ब्रा० १. १. ९. । ४ ऐ०ब्रा० ९'२०. ।

ब्राह्मणोकरूपाप्रियसत्यात्मिकावागपिआरुहत् आरूढवती वृत्रवधंप्रतिसापिवाक् इन्द्रस्योत्साह-कारिण्यभूदित्यर्थः॥अवन्वन् वनषणसंभक्तौ लङिशपिप्राप्तेव्यत्ययेनउप्रत्ययः।स्वभिष्टिः इषगतौ भावेक्तिन्प्रत्ययः तितुत्रेत्यादिनेट्प्रतिषेधः एमन्नादित्वात्पररूपत्वम् शोभनाअभिष्टयोयस्येतिब-हुव्रीहौनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्।ऊतयः अवतेःकृत्यल्युटोबहुलमितिकर्तरिक्तिन्प्रत्ययः यद्वा किच्क्तौचेतिकिच् ज्वरत्वरेत्यादिनाऊठ् चितइत्यन्तोदात्तत्वम्। अन्तरिक्षप्राः प्रापूरणेअ-न्तरिक्षंप्रातिपूरयतीत्यन्तरिक्षप्राः आतोमनिन्निन्नित्यत्रचशब्दाद्विच्। आवृतम् वृञ्वरणेआब्रिय-तइत्यावृतः कर्मणिनिष्ठा गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम्। दक्षासः दक्षवृद्धौ दक्षन्त्एभिरि-तिदक्षाः करणेघञ् ञित्वादाद्युदात्तत्वम् आज्जसेरसुक्।मदच्युतं च्युङ्गतौअन्तर्भावितण्यर्थात् क्विप्चेतिक्विप् ह्रस्वस्यपितिकृतीतितुक्।शतक्रतुं शतंक्रतवोयस्य बहुव्रीहौपूर्वपदप्रकृतिस्वरत्व-म्। जवनी जुइतिसौत्रोधातुः करणेल्युट् टिड्ढाणञित्यादिनाङीप् लित्स्वरेणजकारात्परस्योदा-त्तत्वम्। अरुहत् रुहेर्लुङिकृमृदृरुहिभ्यश्छन्दसीतिच्लेरङादेशः॥ २॥

२. इन्द्र का आगमन सुशोभन है। अपने तेज से इन्द्र अन्तरिक्ष को पूरण करते हैं। वे बली, दर्पहर और शतक्रतु हैं। रक्षण और वर्द्धन में तत्पर होकर ऋभुगण या मरुद्गण इन्द्र के सामने आये और उनकी सहायता की। उन्होंने उत्साह-वाक्यों-द्वारा इन्द्र को उत्साहित किया था।

त्वंगोत्रमङ्गिरोभ्योऽवृणोरपोतात्रयेशतदुरेषुगातुवित्।
ससेनंचिद्विमदायावहोवस्वाजावद्रिंवावसानस्यनर्तयन् ॥३॥

त्वम्। गोत्रम्। अङ्गिरःऽभ्यः। अवृणोः। अप। उत।
अत्रये। शतऽदुरेषु। गातुऽवित्। ससेन। चित्। विऽमदाय।
अवहः। वसु। आजौ। अद्रिम्। ववसानस्य। नर्तयन्॥३॥

हेइन्द्र त्वंगोत्रंअव्यक्तशब्दवन्तंवृष्टयुदकस्यावरकंमेघंअङ्गिरोभ्यः अङ्गिरसामृषीणामर्था-यअपावृणोःअपावरणंकृतवानसि वृष्टेरावरकंमेघंवज्रेणोद्घाटयवर्षणंकृतवानित्यर्थः यद्वा गोत्रंगो-समूहंपणिभिरपहृतंगुहासुनिहितंअङ्गिरोभ्यऋषिभ्योपावृणोः गुहाद्वारोद्घाटनेनप्रकाशय उतअ-पिच अत्रयेमहर्षयेकीदृशायशतदुरेषुशतद्वारेषुयन्त्रेषुअसुरैःपीडार्थंप्रक्षिप्ताय गातुवित्मार्गस्यल-म्भयिताभूः तथाविमदायचित् विमदनाम्नेमहर्षयेपिससेनअन्नेनयुक्तंवसुधनंअवहःप्रापितवान् तथा आजौसंग्रामेजयार्थंववसानस्यनिवसतोवर्तमानस्यान्यस्यापिस्तोतुःअद्रिंवज्रंनर्तयन्रक्षणं कृतवानसीतिशेषः अतस्तवमहिमाकेनवर्णयितुंशक्यतेइतिभावः ॥ गोत्रं गुङ्अव्यक्तेशब्दे औणादिकःत्रप्रत्ययः यद्वा खलगोरथादित्यनुवृत्तौ इनित्रकट्यचश्चेतिसमूहार्थेत्रप्रत्ययः।शत-

दुरेषु शतंदुराःद्वाराणिएषां द्वइत्येके द्वर्यन्तेसंवियन्तइतिदुराः घञर्थेकविधानमितिकप्रत्ययः छान्दसंसम्प्रसारणंपरपूर्वत्वम् तच्च योह्युभयोःस्थानेभवतिसलभतेअन्यतरेणापिव्यपदेशमित्युरण्रपरइतिरपरत्वंभवति यद्वा द्वारशब्दस्येवछान्दसंसम्प्रसारणंद्रष्टव्यम्। गातुवित् गाङ्गतौ अस्माकमिमनिजनिभागापायाहिभ्यस्थेतितुप्रत्ययः तंवेदयतिलंभयतीतिगातुवित् विद्लृलाभे अन्तर्भावितण्यर्थाद्विप् कृदुत्तरपदप्रकृतिस्वरत्वम्। ससेन ससमित्यन्ननाम ससंनमःआयुरितितन्नामसु पाठात् आजिरितिसंग्रामनाम आहवेआजावितितत्रपाठात्। आद्रैँ अत्तिभक्षयतिवैरिणमित्यद्रिर्वज्रः अदिशदिभूशुभिभ्यःक्रिन्नितिक्रिन्प्रत्ययः नित्त्वादाद्युदात्तत्वम् यास्कस्त्वेवंअद्रिशब्दंव्याचख्यौ—अद्रिरादृणात्यनेनापिवात्तेःस्यादिति[1]॥ववसानस्य वसनिवासे कर्तरिताच्छीलिकश्चानश् बहुलंछन्दसीतिशपःश्लुः द्विर्भावहलादिशेषौ चित्त्वादन्तोदात्तत्वम् ॥ ३॥

३. तुमने अङ्गिरा ऋषियों के लिए मेघ से वर्षा कराई थी। जब असुरों ने अत्रि के ऊपर शतद्वार नाम का अस्त्र फेंका था, तब भागने के लिए तुमने अत्रि को मार्ग बता दिया था। तुमने विमद ऋषि को अन्न-युक्त धन दिया था। इसी प्रकार संग्राम में विद्यमान स्तोता को, अपना वज्र चलाकर, बचाया था।

त्वमपामपिधानावृणोरपाधारयःपर्वतेदानुमद्वसु।
वृत्रंयदिन्द्रशवसावधीरहिमादित्सूर्यंदिव्यारोहयोदृशे ॥४॥

त्वम्। अपाम्। अपिऽधाना। अवृणोः। अप। अधारयः। पर्वते। दानुऽमत्। वसु। वृत्रम्। यत्। इन्द्र। शवसा। अवधीः। अहिम्। आत्। इत्। सूर्यम्। दिवि। आ। अरोहयः। दृशे ॥४॥

हेइन्द्र त्वमपामुदकानांअपिधानाअपिधानानिआच्छादकान्मेघानअपावृणोः अपावरीष्ठाः तथापर्वतेपर्ववतिपूरयितव्यप्रदेशयुक्तेस्वकीयनिवासस्थानेदानुमत् दानुमतोहिंसायुक्तस्य यद्वा दनुरसुरमाता सैवदानुःतद्वतः तादृशस्यवृत्रादेर्वसुधनंअधारयः शत्रून्जित्वातदीयंधनमपहृत्यस्वगृहेन्यचिक्षिपइत्यर्थः यद्वा दानुमदितिवसुविशेषणं शोभनदानयुक्तमित्यर्थः हेइन्द्र त्वंयत्यदाशवसाबलेनवृत्रंत्रयाणांलोकानामावरीतारं तथाचशाखान्तरेसमाम्नातम्—यदिमाँल्लोकानवृणोत्तद्वृत्रस्यवृत्रत्वमिति[2]। अहिमासमन्ताद्धन्तारं तथाचवाजसनेयिनःसमामनन्ति—सोग्नीसोमावभिसंबभूव सर्वांविद्यांसर्वंयशःसर्वमन्नाद्यंसर्वांश्रियंसयत्ससर्वमेतत्समभवत्तस्मादहिरिति। एवंभूतमसुरंअवधीर्वधंप्रापितः आदित्अनन्तरमेवदिविद्युलोकेदृशेद्रष्टुंसूर्यमारोहयः वृत्रेणावृतंसूर्यंतस्माद्वृत्रादमूमुचइत्यर्थः॥ अपां ऊडिदमित्यादिनाविभक्तेरुदात्तत्वम्। अपिधाना अपिधीयन्ते

१ नि० ४. ४. । २ तै० सं० २. ४. १२.

आच्छाद्यन्तेएभिरित्यपिधानानि करणेल्युट् लितीतिप्रत्ययात्पूर्वस्यधात्वाकारस्योदात्तत्वम् त-तएकादेशस्वरः कृदुत्तरपदप्रकृतिस्वरत्वम् सुपांसुलुगितिविभक्तेःपूर्वसवर्णदीर्घत्वम्। अधारयः पादादित्वान्निघाताभावः। पर्वते पर्ववान्पर्वतः पर्वपुनःपृणातेःप्रीणातेर्वेतियास्कः। दानुमत् दो अवखण्डनेइत्यस्माद्वा दाण्दानेइत्यस्माद्वा दाभाभ्यांनुरित्यौणादिकोनुप्रत्ययः असुरविशेषणत्वे सुपांसुलुगितिषष्ठ्यालुक्॥ ४॥

४. इन्द्र! तुमने जल-वाहक मेघ को खोल दिया है और पर्वत पर वृत्र आदि असुरों का धन छिपा रक्खा है। इन्द्र! तुमने हत्यारे वृत्र का वध किया था और संसार को देखने के लिए सूर्य को आकाश में चढ़ा दिया था।

पञ्चमीमृचमाह—

त्वंमायाभिरपमायिनोधमःस्वधाभिर्येअधिशुप्तावजुह्वत।
त्वंपिप्रोर्नृमणःप्रारुजःपुरःप्रऋजिश्वानंदस्युहत्येष्वाविथ॥५॥१॥

त्वम्। मायाभिः। अप। मायिनः। अधमः। स्वधाभिः। ये। अधि। शुप्तौ। अजुह्वत। त्वम्। पिप्रोः। नृऽमनः। प्र। अरुजः। पुरः। प्र। ऋजिश्वानम्। दस्युऽहत्येषु। आविथ॥ ५॥१॥

हेइन्द्र त्वंमायाभिः जयोपायज्ञानैः मायेतिज्ञाननाम शचीमायेतितन्नामसुपाठात् यद्वा मायाभिः लोकप्रसिद्धैःकपटैः मायिनः उक्तलक्षणमायोपेतान्वृत्रादीनसुरान्अपाधमः अपाजी-गमः धमतिर्गतिकर्मेतियास्कः। येअसुराःस्वधाभिर्हविर्लक्षणैरन्नैः शुप्तावधि शोभमानेस्वकीये मुखेएवअजुह्वत अहौषुः नाग्नौ तानसुरानितिपूर्वेणसम्बन्धः तथाचकौषीतकिभिराम्नायते—अ-सुरावाआत्मन्नजुहवुरुद्वातेग्नौतेपराभवन्निति। वाजसनेयिभिरप्याम्नातम्—देवाश्चहवाअसुराश्चा-स्पर्धंततोहासुराअभिमानेनकस्मैचनजुहुमइतिस्वेष्वेवास्येषुजुह्वतश्चेरुस्तेपराबभूवुरिति। तथा हेनृमणः नृषुयजमानेषुरक्षितव्येषुअनुग्रहबुद्धियुक्तस्त्वंपिप्रोः पूरयितुःएतन्नाम्नोसुरस्यपुरःपुराणि निवासस्थानानिप्रारुजः प्राभांक्षीः एवंकृत्वातेनासुरेणोपद्रुतं ऋजिश्वानंऋजुगमनंएतत्संज्ञकंस्तो-तारंदस्युहत्येषुदस्यूनामुपक्षपयितॄणांहननेनयुक्तेषुसंग्रामेषु यद्वा दस्यूनांहनननेनिमित्तभूतेषुप्रावि-थप्रकर्षेणररक्षिथ॥ मायिनः मायाशब्दस्यव्रीह्यादिषुपाठात् व्रीह्यादिभ्यश्चेतिमत्वर्थीयइनिः। शुप्तौ शुभदीप्तौ कर्मणिक्तिन् तितुत्रेत्यादिनेट्प्रतिषेधः झषस्तथोरितिधत्वाभावश्छान्दसः खरिचेति चर्त्वम्। अजुह्वत जुहोतेर्लङि व्यत्ययेनात्मनेपदम् अदभ्यस्तादितिझस्यादादेशः हुश्नुवोःसार्वधातु-कइतियणादेशः। पिप्रोः पॄपालनपूरणयोः पॄभिदिव्यधीत्यादिनाकुप्रत्ययः उदोष्ठ्यपूर्वस्येत्यत्र

१ नि० १. २०। २ नि० ६. २।

बहुलंछन्दसीत्युकत्वावउत्वाभावः छान्दसंद्विर्वचनम् अभ्यासस्योरदत्वहलादिशेषाः. अर्तिपिपर्त्योश्च बहुलंछन्दसीत्यभ्यासस्येत्वम् यणादेशः। नृमणः नृषुमनोयस्य छन्दस्यृदवग्रहादितिणत्वम्। अरुजः रुजोभङ्गे शस्यङित्त्वाद्गुणाभावः । ऋजिश्वानम् ऋजुअश्वुतेप्राप्नोतीत्यृजिश्वा पृषोदरादिः । दस्युहत्येषु हनहिंसागत्योः हनस्तचेतिभावेक्यप्प्रत्ययः तकारश्चान्तादेशः दस्यूनांहत्यायेषुसंग्रामेषु परादिश्छन्दसिबहुलमित्युत्तरपदाद्युदात्तत्वम् तत्पुरुषपक्षेतु कृदुत्तरपदप्रकृतिस्वरत्वम् । आविथ अवरक्षणे ॥ ५ ॥

५. जिन असुरों ने यज्ञीय अन्न को अपने शोभन मुख में डाल लिया था, इन्द्र ! उन मायावियों को माया-द्वारा तुमने परास्त किया था। मनुष्यों के लिए तुम प्रसन्न-चित्त हो। तुमने पिप्रु असुर का निवासस्थान ध्वस्त किया था। ऋजिश्वान नामक स्तोता को, चोरों के हाथ मरने से आसानी से बचा लिया था ।

त्वंकुत्संशुष्णहत्येष्वाविथारंधयोतिथिग्वायशंबरम् ।
महान्तंचिदर्बुदंनिक्रमीःपदासनादेवदस्युहत्यायजज्ञिषे ॥६॥

त्वम् । कुत्सम् । शुष्णऽहत्येषु । आविथ । अरन्धयः ।
अतिथिऽग्वाय । शम्बरम् । महान्तम् । चित् । अर्बुदम् । नि ।
क्रमीः । पदा । सनात् । एव । दस्युऽहत्याय । जज्ञिषे ॥ ६ ॥

हेइन्द्र त्वंकुत्संकुत्ससंज्ञकमृषिंशुष्णहत्येषु शुष्णःशोषयिताएतन्नाम्नोसुरस्यहननयुक्तेषुसंग्रामेषुआविथररक्षिथ तथा अतिथिग्वायअतिथिभिर्गन्तव्यायदैवोदासायशंबरंएतन्नामानमसुरं अरन्धयः हिंसांप्रापितः तथा महान्तंचिदतिप्रवृद्धमपिअर्बुदंएतत्संज्ञकमसुरंपदापादेननिक्रमीःनितरामाक्रमिताभूः यस्मादेवंतस्मात्सनादेवचिरकालादेवारभ्यदस्युहत्यायउपक्षपयितॄणांहननायजज्ञिषे सर्वदात्वंदस्युहननशीलोभवसीत्यर्थः ॥ अरन्धयः रधहिंसासंराध्योः रधिजभोरचीतिधातोर्नुम् । अतिथिग्वाय गमेरौणादिकोड्वप्रत्ययः। क्रमीः क्रमुपादविक्षेपे ह्यन्तक्षणेतिवृद्धिप्रतिषेधः बहुलंछन्दस्यमाङ्योगेपीत्यडभावः । पदा सावेकाचइतिवा ऊडिदंपदादीतिवाविभक्तेरुदात्तत्वम् । जज्ञिषे जनीप्रादुर्भावे लिटिगमहनेत्यादिनोपधालोपः ॥६॥

६. शुष्ण असुर के साथ युद्ध में तुमने कुत्स ऋषि की रक्षा की थी और तुमने अतिथि-वत्सल दिवोदास की रक्षा के लिए शम्बर राक्षस का वध किया था। तुमने महान् अर्बुद नाम के असुर को पादाक्रान्त किया था। इन सब कारणों से विदित होता है कि तुमने दस्युओं के वध के लिए ही जन्म ग्रहण किया है ।

त्वेविश्वातविषीसध्र्यग्घितातवराधःसोमपीथायहर्षते ।
तववज्रश्चिकितेबाह्वोर्हितोवृश्चाशत्रोरवविश्वानिवृष्ण्या ॥७॥

त्वे इति । विश्वा । तविषी । सध्र्यक् । हिता । तव । राधः ।
सोमऽपीथाय । हर्षते । तव । वज्रः । चिकिते । बाह्वोः ।
हितः । वृश्च । शत्रोः । अव । विश्वानि । वृष्ण्या ॥ ७॥

हेइन्द्र त्वेत्वयिविश्वातविषीसर्वंबलंसध्र्यक्सध्रीचीनंअपराङ्मुखंयथाभवतितथाहिता निहितं तथा तवराधोमनःसोमपीथायसोमपानायहर्षतेहृष्यति किञ्च तवबाह्वोर्हस्तयोर्हितोवस्थितोवज्रश्चिकितेअस्माभिर्ज्ञायते अतःशत्रोःशातयितुर्वैरिणः विश्वानिसर्वाणिवृष्ण्यावृष्ण्यानिवीर्याणिअववृश्च छेदनंकुरु॥ सहअञ्चतीतिसध्र्यक् अञ्चतेर्ऋत्विगित्यादिनाक्विन् अनिदितामितिनलोपःसमासेसहस्यसध्रिरितिसहशब्दस्यसध्र्यादेशः चोःकुरितिकुत्वम् कृदुत्तरपदप्रकृतिस्वरेप्राप्ते अद्रिसध्र्योरन्तोदात्तत्वनिपातनंकृत्स्वरनिवृत्त्यर्थमितिवचनात्सध्र्यादेशोन्तोदात्तः तस्ययणादेशे उदात्तस्वरितयोर्यणइतिपरस्यानुदात्तस्यस्वरितत्वम् । राधः राध्नोति समृद्धोभवत्यनेन राधोत्रमनउच्यते असुनोनित्त्वादाद्युदात्तत्वम् । सोमपीथाय पापाने पातृतुदिवचीत्यादिनाथक्प्रत्ययः घुमास्थेतीत्वम् । हर्षते हृषतुष्टौ श्यनिप्राप्तेव्यत्ययेनशप् आत्मनेपदंच । चिकिते कितज्ञाने छन्दसिलुङ्लङ्लिटइतिवर्तमानेकर्मणिलिट् । बाह्वोः उदात्तयणइतिविभक्तेरुदात्तत्वम् । वृश्च ओव्रश्चूछेदने तौदादिकः ग्रहिज्यादिनासम्प्रसारणं विकरणस्वरः संहितायां द्व्यचोतस्तिङइतिदीर्घत्वम् । वृष्ण्या वृषसेचने उणादिकोनक्प्रत्ययः तत्रंभवानिवृष्ण्यानि भवेछन्दसीतियत् यतोनावइत्याद्युदात्तत्वम् शेश्छन्दसीतिशेर्लोपः ॥ ७ ॥

७. निःसन्देह तुम्हारे अन्दर समस्त बल निहित हैं। सोमपान करने पर तुम्हारा मन प्रसन्न होता है। तुम्हारे दोनों हाथों में वज्र है—यह हम जानते हैं। शत्रुओं का सारा वीर्य छिन्न करो।

विजानीह्यार्यान्येचदस्यवोबर्हिष्मतेरन्धयाशासदव्रतान ।
शाकीभवयजमानस्यचोदिताविश्वेत्तातेसधमादेषुचाकन ॥८॥

वि । जानीहि । आर्यान् । ये । च । दस्यवः । बर्हिष्मते ।
रन्धय । शासत् । अव्रतान् । शाकी । भव । यजमानस्य ।
चोदिता । विश्वा । इत् । ता । ते । सधऽमादेषु । चाकन ॥ ८ ॥

हेइन्द्र त्वंआर्यान्विदुषोनुष्ठातॄन्विजानीहिविशेषेणबुध्यस्व येचदस्यवः तेषामनुष्ठातॄणामुपक्षपयितारः शत्रवः तानपिविजानीहीतिशेषः ज्ञात्वाचबर्हिष्मतेबर्हिषायज्ञेनयुक्तायय्जमानायाव्रतान् व्रतमितिकर्मनाम कर्मविरोधिनस्तान्दस्यून्रन्धयहिंसांप्रापय यद्वा यजमानस्यवशं

गमय रध्यतिर्वशगमनेइतियास्कः। किंकुर्वन् शासत् दुष्टानामनुशासनंनिग्रहंकुर्वन् अतःशाकी शक्तियुक्तस्त्वंयजमानस्यचोदिताप्रेरकोभव यज्ञविघातकानसुरान्तिरस्कृत्ययज्ञान्यजमानैः सम्यगनुष्ठापयेतिभावः अहमपिस्तोता तेतव तानिपूर्वोक्तानिकर्माणिविश्वेत् सर्वाण्येवसधमादेषुसहमादनयुक्तेषुयज्ञेषुस्तोतुंचाकनकामये॥ जानीहि ज्ञाअवबोधने क्र्यादिकः ज्ञाजनोर्जेतिजादेशः अत्रप्रीगतौवृदितिवृत्करणंल्वादिपरिसमाप्त्यर्थमेवनप्वादिपरिसमाप्त्यर्थमितियेषांदर्शनं तेषांप्वादीनांह्रस्वइतिह्रस्वेनभवितव्यं मैवं ज्ञाजनोर्जेतिदीर्घोच्चारणसामर्थ्यात् जनीप्रादुर्भावेइत्यस्यतुदीर्घोच्चारणमन्तरेणाप्यतोदीर्घोयञीत्यनेनैवदीर्घःसिध्यति तस्माद्दीर्घोच्चारणवैयर्थ्यप्रसंगात् अत्रह्रस्वोनभवतीतिसिद्धम्। बर्हिष्मते तसौमत्वर्थेइतिभत्वात्रुत्वजश्त्वयोरभावः। रन्धय रधहिंसासंराध्योः। शासत् शासुअनुशिष्टौ शतरिअदादित्वाच्छपोलुक् जक्षित्यादयःषडित्यभ्यस्तसंज्ञायाम् नाभ्यस्ताच्छतुरितिनुम्प्रतिषेधः अभ्यस्तानामादिरित्याद्युदात्तत्वम्। शाकी शक्लृशक्तौ भावेघञ् ततोमत्वर्थीयइनिः व्यत्ययेनाद्युदात्तत्वम् यद्वावृषादिर्द्रष्टव्यः। विश्वा ता उभयत्रशेश्छन्दसीतिशेर्लोपः। सधमादेषु सहमाद्यन्त्येष्विति सधमादायज्ञाः अधिकरणेघञ्प्रत्ययः ननु मदोनुपसर्गेइत्यप्प्रत्ययेनभवितव्यम् मैवं व्यधजपोरनुपसर्गेइत्यत्रैवमदइतिवक्तव्येयन्मदोनुपसर्गेइतिपृथगुपादानं तद्घञपिपक्षेयथास्यादितिन्यासकारेणप्रत्यपादीत्यस्माभिर्धातुवृत्तावुक्तम् सधमादस्थयोश्छन्दसीतिसहशब्दस्यसधादेशः। चाकन कनीदीप्तिकान्तिगतिषु अत्रकान्त्यर्थः छन्दसिलुङ्लङ्लिटइतिवर्तमानेलिट् णलुत्तमोवेतिणित्त्वस्यविकल्पनाद्वृद्ध्यभावः तुजादित्वादभ्यासस्यदीर्घत्वम्॥ ८॥

८. इन्द्र! कौन आर्य और कौन दस्यु है, यह बात जानो। कुशवाले यज्ञ के विरोधियों का शासन करके उन्हें यजमानों के वश कराओ। तुम शक्तिमान् हो; इसलिए यज्ञानुष्ठाताओं की सहायता करो। मैं तुम्हारे हर्षोत्पादक यज्ञ में तुम्हारे उन समस्त कर्मों की प्रशंसा करने की इच्छा करता हूँ।

अनुव्रतायरन्धयन्नपव्रतानाभूभिरिन्द्रःश्नथयन्ननाभुवः।
वृद्धस्यचिद्वर्धतोद्यामिनक्षतःस्तवानोवम्रोविजघानसंदिहः॥ ९॥

अनुऽव्रताय। रन्धयन्। अपऽव्रतान्। आऽभूभिः। इन्द्रः। श्नथयन्। अनाभुवः। वृद्धस्य। चित्। वर्धतः। द्याम्। इनक्षतः। स्तवानः। वम्रः। वि। जघान। सम्ऽदिहः॥ ९॥

यइन्द्रःअनुव्रतायअनुकूलकर्मणेयजमानायअपव्रतान् अपगतकर्मणःयजमानान्रन्धयन् हिंसयन्वशीकुर्वन्वा तथाआभूभिः आभिमुख्येनभवन्तीत्याभुवःस्तोतारः तैः अनाभुवःतदिप-

१ नि० ६. ३२।

रीतान्श्नथयन्हिंसयन्वर्तते वृद्धस्यचिद्वर्धतःपूर्वंवृद्धस्यापिपुनर्वर्धमानस्यद्यामिनक्षतः स्वर्गंप्रा-मुवतः तस्येन्द्रस्यस्तवानः स्तुतिंकुर्वाणोवम्रःस्तुत्युद्धिरणशीलः एतत्संज्ञकऋषिःसन्दिहः सं-म्यगुपचितावल्मीकवपाःजघान इन्द्रेणपरिहृतान्तरायःसन् पृथिव्याःसारभूतंवल्मीकवपाळक्ष-णंयज्ञसम्भारंआहार्षीदित्यर्थः तथाचशाखान्तरेसमाम्नातम्—यद्वल्मीकवपासम्भारोभवति ऊर्ज-मेवरसंपृथिव्याअवरुन्धइति[1] ॥ अनुव्रताय अनुकूलंव्रतंयस्य बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । श्नथयन् श्नथहिंसायां णिचिघटादित्वान्मित्त्वे मितांह्रस्वइतिह्रस्वत्वम् । वर्धतः व्यत्ययेनपरस्मै-पदम् । इनक्षतः नक्षगतौ इकारोपजनश्छान्दसः यद्वा इनक्षतिर्गत्यर्थःप्रकृत्यन्तरमन्वेष्टव्यम् । स्तवानः सम्यानचूस्तुवइतिस्तौतेर्बहुलवचनान्निरुपपदादथानचूप्रत्ययः व्यत्ययेनाद्युदात्तत्वम् । जघान अभ्यासाच्चेत्यभ्यासादुत्तरस्यहन्तेर्हकारस्यकुत्वम् । सन्दिहः दिहउपचये कृत्यल्युटोब-हुलमितिबहुलवचनात्कर्मणिक्विप् कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ ९ ॥

९. इन्द्र यज्ञ-विमुखों को यज्ञप्रिय यजमानों के वशीभूत करके और अभिमुख स्तोताओं-द्वारा स्तुति-पराङ्मुखों का ध्वंस करके अधि-ष्ठान करते हैं। वम्र ऋषि वर्द्धनशील और स्वर्ग-व्यापी इन्द्र की स्तुति करते-करते सञ्चित द्रव्य-समूह ले गये थे।

तक्षद्यत्तउशनासहसासहोविरोदसीमज्मनाबाधतेशवः ।
आत्वावातस्यनृमणोमनोयुजआपूर्यमाणमवहन्नभिश्रवः॥१०॥१०

तक्षत् । यत् । ते । उशना । सहसा । सहः । वि । रोदसी इति । मज्मना । बाधते । शवः । आ । त्वा । वातस्य । नृऽमनः । मनःऽयुजः । आ । पूर्यमाणम् । अवहन् । अभि । श्रवः ॥१०॥१०॥

हे इन्द्र यद्यदाउशनाकाव्यः सहसाआत्मीयेनबलेन तेसहः त्वदीयंबलं तक्षत् तनूकृतवान् सम्यक्तीक्ष्णमकार्षीदित्यर्थः तदाशवःत्वदीयंबलं मज्मनासर्वस्यशोधकेनस्वतैक्ष्ण्येनरोदसी द्यावापृथिव्यौविबाधते तेबिभीतइत्यर्थः तथाचान्यत्राम्नातम्—यस्यशुष्माद्रोदसीअभ्यसेतामिति[2] । यद्वा रोदसीयस्माद्धनादेर्विभीतस्तंबाधतइत्यर्थः हेनृमणः नृषुरक्षितव्येषु यजमानेषु अनुग्रहबु-द्धियुक्तेन्द्र आपूर्यमाणं पूर्वोक्तेनबलेनासमन्तात्पूर्यमाणंत्वात्वां मनोयुजःमनोव्यापारमात्रेणयु-क्ताः वातस्यवायोःसम्बन्धिनः तद्वद्वेगेनगच्छन्तइत्यर्थः एवंभूताअश्वाःश्रवोभि हविर्लक्षणमन्नं अभिलक्ष्यआवहन्आभिमुख्येन प्रापयन्तु ॥ तक्षत् तक्षूत्वक्षूतनूकरणे लङि बहुलंछन्दस्यमा-ङ्योगेपीत्यडभावः शपःपित्त्वादनुदात्तत्वेधातुस्वरःशिष्यते । उशना वशकान्तौ वशेःकनसिरिति कनस् ग्रहिज्येत्यादिनासम्प्रसारणं ऋदुशनस्पुरुदंसोनेहसांचेत्यनङादेशः सर्वनामस्थानेचेत्युप-

---

[1] तै० ब्रा० १. १. ३. । [2] तै० सं० १. ७. १३. ।

धादीर्घत्वम् हल्ङ्याब्भ्यादिनलोपौ। मज्मना टुमस्जोशुद्धौ औणादिकोमनिप्रत्ययः। नृमणः छन्दस्यृदवग्रहादितिणत्वम्। अवहन् छन्दसिलुङ्लङ्लिटइतिप्रार्थनायांलङ् ॥ १० ॥

१०. इन्द्र! जब कि उशना के बल-द्वारा तुम्हारा बल तीक्ष्ण हुआ था, तब विशुद्ध तीक्ष्णता-द्वारा तुम्हारे बल ने द्युलोक और पृथिवीलोक को भीत कर दिया था। इन्द्र! तुम्हारा मन मनुष्य के प्रति प्रसन्न है। तुम्हारे बलशाली होने पर तुम्हारी इच्छा से संयोजित और वायु की तरह वेग-विशिष्ट घोड़े तुम्हें हमारे यज्ञान्न की ओर ले आवें।

मन्दिष्टयदुशनेकाव्येसचाँइन्द्रोवङ्कूवङ्कुतराधितिष्ठति ।
उग्रोययिंनिरपःस्रोतसासृजद्विशुष्णस्यदृंहिताऐरयत्पुरः ॥११॥

मन्दिष्ट । यत् । उशने । काव्ये । सचा । इन्द्रः । वङ्कू इति ।
वङ्कुऽतरा । अधि । तिष्ठति । उग्रः । ययिम् । निः । अपः ।
स्रोतसा । असृजत् । वि । शुष्णस्य । दृंहिता । ऐरयत् । पुरः ॥११॥

यद्यदाइन्द्रःउशनेकामयमानेकाव्ये सचासहमन्दिष्टस्तुतोभूत् तदानीं वंकूवंकुतराअतिशयेनकुटिलंगच्छन्तावश्वौअधितिष्ठति रथेसंयोज्यतमारोहयतीत्यर्थः यद्वा वंकुतरा अतिशयेनवक्रंगच्छतिरथे वंकूवक्रगमनशीलावश्वौसंयोज्येतियोजनीयम् उग्रउद्गूर्णस्तादृशइन्द्रः ययिंगमनयुक्तान्मेघात् स्रोतसाप्रवाहरूपेणअपोनिरसृजत् जलानिनिरगमयत् तथा शुष्णस्यसर्वस्य शोषयितुरसुरस्यदृंहिताःप्रवृद्धाःपुरःनगराणिनिवासस्थानानिव्यैरयत्विविधंप्रेरितवान् ॥ मन्दिष्ट मदिस्तुतिमोदमदस्वप्नकान्तिगतिषु लुङि बहुलंछन्दस्यमाङ्योगेपीत्यडभावः। उशने वशेरौणादिकःक्युप्रत्ययः ग्रहिज्यादिनासम्प्रसारणम् योरनादेशः। सचा षचसमवाये संपदादिलक्षणोभावेक्विप् आङ्याजयारांचोपसंख्यानमितिविभक्तेराङादेशः संहितायां आङोनुनासिकश्छन्दसीति तस्यसानुनासिकत्वम्। वंकू वंचुगतौ औणादिकउप्रत्ययः बहुलवचनात्कुत्वम्। वंकुतरा अतिशयेनवंकूवंकुतरा सुपांसुलुगितिविभक्तेराकारः अत्रगतिसामान्यवाचिनागतिविशेषोलक्ष्यते। ययिं यामापणेआदृगमहनइतिकिप्रत्ययः लिड्वद्भावाद्द्विर्वचनह्रस्वत्वे आतोलोपइटिचेत्याकारलोपः प्रत्ययस्वरः सुपांसुपोभवन्तीतिपञ्चम्याअमादेशः। दृंहिता दृहिवृद्धौ इदित्त्वान्नुम्। ऐरयत् ईरप्रेरणे चौरादिकःलङ्याडागमः आटश्चेतिवृद्धिः ॥ ११ ॥

११. जब कि शोभन उशना ने इन्द्र की स्तुति की, तब इन्द्र वक्रगतिवाले दोनों घोड़ों पर सवार थे। उग्र इन्द्र ने गमनशील मेघों से जल, प्रवाह-रूप में, बरसाया था। साथ ही शुष्ण असुर के विस्तीर्ण नगर को भी ध्वस्त किया था।

आस्मारथंवृषपाणेषुतिष्ठसिशार्यातस्यप्रभृतायेषुमन्दसे ।
इन्द्रयथासुतसोमेषुचाकनोनर्वाणंश्लोकमारोहसेदिवि ॥१२॥

आ । स्म । रथम् । वृषऽपानेषु । तिष्ठसि । शार्यातस्य ।
प्रऽभृताः । येषु । मन्दसे । इन्द्र । यथा । सुतऽसोमेषु । चाकनः ।
अनर्वाणम् । श्लोकम् । आ । रोहसे । दिवि ॥१२॥

अत्रकौषीतकिनइतिहासमाचक्षते शर्यातनाम्नोराजर्षेःयज्ञेभृगुगोत्रोत्पन्नश्च्यवनोमहर्षिः आश्विनंग्रहमगृह्णात् इन्द्रस्तंदृष्ट्वाक्रुद्धोभूत् तमिन्द्रमनुनीयपुनःसोमंतस्मैमादादिति अयमर्थोस्यांप्रतिपाद्यते हेइन्द्र त्वं वृषपाणेषु वृष्णःसेचनसमर्थस्यसोमस्यपानानिवृषपाणानि तेषुनिमित्तभूतेषुरथमातिष्ठसिस्म स्वयमेवरथमारुह्यगच्छसि नत्वन्यःकश्चित्प्रवर्तयितेतिभावः एवं चसति येषुसोमेषुत्वंमन्दसेहर्षंप्राप्नोषि तादृशाःसोमाः शार्यातस्यएतन्नाम्नोराजर्षेःसम्बन्धिनः प्रभृताःप्रकर्षेणसंपादिताः अभिषवादिसंस्कारैःसंस्कृताइत्यर्थः अतःसुतसोमेषुअभिषुतसोमयुक्तेष्वस्मदीयेषुयज्ञेषुयथाचाकनः यथाकामयसे एवमस्यापिशार्यातस्यसोमान्कामयस्व तथासतिदिविद्युलोके अनर्वाणं गमनरहितंस्थिरंश्लोकंस्तोत्रलक्षणंवचोयशोवा आरोहसे प्राप्नोषि यद्वा इमंयजमानंदिविद्युलोके उक्तलक्षणंयशः प्रापयसि॥स्म निपातस्यचेतिदीर्घत्वम्। वृषपाणेषु पापाने भावेल्युट् वाभावकरणयोरितिपूर्वपदस्थान्निमित्तादुत्तरस्यपानशब्दस्य नकारस्यणत्वम्। प्रभृताः भृञ्भरणे कर्मणिनिष्ठा गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम् । मन्दसे मदिस्तुतिमोदमदस्वप्नकान्तिगतिषु अदुपदेशाल्लसार्वधातुकानुदात्तत्वेधातुस्वरः । चाकनः कनीदीप्तिकान्तिगतिषु अत्रकान्त्यर्थः कान्तिश्चाभिलाषः लेटिसिप्यडागमः बहुलंछन्दसीति शपःश्लुः तुजादित्वादभ्यासस्यदीर्घत्वम् सर्वेविधयश्छन्दसिविकल्प्यन्तइत्यभ्यस्तस्याद्युदात्तत्वाभावे धातोरितिधात्वन्तस्योदात्तत्वम्। अनर्वाणं अर्तेरन्येभ्योपिदृश्यन्तइतिदृशिग्रहणाद्भावेवनिप् नञोबहुव्रीहौ अमि अर्वणस्त्रसावनञइतिपर्युदासात् आदेशाभावेसर्वनामस्थानेचेत्युपधादीर्घत्वम् नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्। श्लोकं श्लोकसंघाते श्लोक्यतइति श्लोकः कर्मणिघञ् ञित्त्वादाद्युदात्तत्वम्। रोहसे रुहेर्व्यत्ययेनात्मनेपदम्॥ १२ ॥

१२. इन्द्र! सोमपान के लिए रथ पर चढ़कर गमन करो। जिस सोम से तुम प्रसन्न होते हो, वही सोम शार्यात राजर्षि ने तैयार किया है; इसलिए अन्य यज्ञों में तुम जैसे प्रस्तुत सोमपान करते हो, उसी प्रकार शार्यात का सोम भी पान करो। ऐसा करने पर दिव्य-लोक में अविचल यश प्राप्त होगा।

अददाअर्भांमहतेवचस्यवेकक्षीवतेवृचयामिन्द्रसुन्वते ।
मेनाभवोवृषणश्वस्यसुक्रतोविश्वेत्तातेसवनेषुप्रवाच्या ॥१३॥

अददाः । अर्भाम् । महते । वचस्यवे । कक्षीवते । वृचयाम् ।
इन्द्र । सुन्वते । मेना । अभवः । वृषणश्वस्य । सुक्रतो इति सुऽक्रतो । विश्वा । इत् । ता । ते । सवनेषु । प्रऽवाच्या ॥ १३ ॥

अत्रेयमाख्यायिका—अङ्गराजःकस्मिंश्चिद्दिवसेस्वकीयाभिःयोषिद्भिःसहगङ्गायांजलक्रीडांचक्रे तस्मिन्समयेदीर्घतमानामऋषिः स्वभार्ययापुत्रभृत्यादिभिश्चदुर्बलत्वात् किमपिकुर्वन्न शक्नोतीतिद्वेषेणगङ्गामध्येप्रचिक्षिपे सचऋषिः केनचित्प्लवेनअङ्गराजस्यक्रीडादेशंप्रतिसमाजगाम सचराजासर्वज्ञंतमृषिमवगत्यप्लवादवतार्यैवमवोचत् हेभगवन् ममपुत्रोनास्ति एषामहिषी अस्यां कंचित्पुत्रमुत्पादयेति सचतथेत्यब्रवीत् सामहिषीतुराजानंप्रतितथेत्युक्त्वा अयंवृद्धतरोजुगुप्सितोममयोग्योनभवतीतिबुद्ध्वास्वकीयामुशिक्संज्ञांदासींप्राहैषीत् तेनचसर्वज्ञेनऋषिणामन्त्रपूतेनवारिणाभ्युक्षितासतीसैवऋषिपत्नीबभूव तस्यामुत्पन्नःकक्षीवान्नामऋषिः सएव राज्ञः पुत्रोभूत् सचबहुविधेनराजसूयादिनाईजेतस्मैराज्ञेतत्कृतैर्यज्ञैःपरितुष्टइन्द्रोवृचयाख्यां तरुणांयोषितंप्रादात् अयमर्थःपूर्वार्धेप्रतिपाद्यते । हेइन्द्रत्वंमहतेप्रवृद्धायवचस्यवे त्वदीयस्तोत्रलक्षणं वचआत्मनःइच्छतेसुन्वतेत्वद्देवताकेषुयज्ञेषुसोमाभिषवंकुर्वते कक्षीवते एतन्नाम्नेराज्ञेवृचयांवृचयाख्यामर्भांअल्पांयुवतिमित्यर्थः एवंभूतांस्त्रियमददाः तथा सुक्रतोशोभनकर्मन् शोभनप्रज्ञ वाहेइन्द्र त्वंवृषणश्वस्यएतदाख्यस्यराज्ञः मेनाभवोमेनानामकन्यकाभूः तथाचशाट्यायनिभिः सुब्रह्मण्यामन्त्रैकदेशव्याख्यानरूपंब्राह्मणमेवमाम्नायते—वृषणश्वस्यमेनइति वृषणश्वस्यमेनाभूत्वामघवाकुलउवासेति तांचप्राप्तयौवनांस्वयमेवेन्द्रश्चकमे । तथाचताण्डिभिराम्नातम्—वृषणश्वस्यमेनानामदुहितास तामिन्द्रश्चकमइति । अतउक्तरूपाणियानिकर्माणि त्वयाकृतानि ते ता त्वदीयानितानि विश्वेत् सर्वाण्येव सवनेषुयज्ञेषुप्रवाच्या प्रकर्षेणवक्तव्यानि स्तुतिभिःस्तोतव्यानीत्यर्थः ॥ महते बृहन्महतोरुपसंख्यानमितिविभक्तेरुदात्तत्वम् । वचस्यवे सुपआत्मनः क्यच् क्याच्छन्दसीत्युप्रत्ययः । कक्षीवते अश्वबन्धनहेतवोरज्जवःकक्ष्याः कक्षीवान्कक्ष्यावानितियास्कः । आसंदीवदष्ठीवच्चक्रीवत्कक्षीवदितिसम्प्रसारणं मतुपोवत्वंसंज्ञायांनिपात्यते । मेनेतिस्त्रीनाम मेनाग्नाइतिपाठात् मनज्ञाने मन्यतेगृहकृत्यंजानातीतिमेना पचाद्यच् नशिमन्योरलिट्येत्वंवक्तव्यमित्येत्वं वृषादिर्द्रष्टव्यः मेनामानयन्त्येनाइतियास्कः ।सवनेषु सवनमितियज्ञनाम सूयतेअभिषूयतएष्विति अधिकरणेल्युट् । प्रवाच्या वचपरिभाषणे ण्यति यजयाचरुचप्रवचर्चश्चेतिकुत्वाभावः तित्स्वरितेप्राप्तेव्यत्ययेनाद्युदात्तत्वम् यद्वा वाचयतेरचोयदितियत् यतोनावइत्याद्युदात्तत्वम् कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ १३ ॥

१३. इन्द्र ! तुमने अभिषव-कारी और स्तुत्याकाङ्क्षी वृद्ध कक्षीवान् राजा को वृचया नाम की युवती स्त्री प्रदान की थी। शोभन-कर्मा इन्द्र ! तुम वृषणश्व राजा की मेना नामक कन्या हुए थे। अभिषवण-समय में इन सब विषयों का वर्णन करना चाहिए।

---

१ नि० ६.१०.।   २ नि ३.२१.।

चतुर्दशीमृचमाह—

इन्द्रो॑ अश्रायि सु॒ध्यो॑ निरे॒के प॒ज्रेषु॒ स्तोमो॒ दुर्यो॒ न यूपः॑ ।
अ॒श्व॒युर्ग॒व्यू र॑थ॒युर्व॑सू॒युरिन्द्र॒ इद्रा॒यः क्ष॑यति प्रय॒न्ता ॥१४॥

इन्द्रः॑ । अ॒श्रा॒यि॒ । सु॒ऽध्यः॑ । नि॒रे॒के । प॒ज्रेषु॑ । स्तोमः॑ । दुर्यः॑ । न । यूपः॑ । अ॒श्व॒ऽयुः । ग॒व्युः । र॒थ॒ऽयुः । व॒सु॒ऽयुः । इन्द्रः॑ । इत् । रा॒यः । क्ष॒य॒ति॒ । प्र॒ऽय॒न्ता ॥१४॥

इन्द्रोदेवःसुध्यःशोभनकर्मणोयजमानान्शोभनप्रज्ञान्वा निरेकेनैर्धन्येनिमित्तभूतेसविता-न्रक्षितुंअश्रायिअसेविष्ट पज्रेषुपज्राइत्यङ्गिरसामाख्या तथाचशाट्यानिभिराम्नातम्—पज्रावा-अङ्गिरसःपशुकामास्तपोतप्यन्तेति । येषुयजमानेष्वङ्गिरःसु स्तोमस्तोत्रंनिश्चलंतिष्ठति दुर्योनयू-पः द्वारिनिखातास्थूणेव तान् सुध्यइतिपूर्वेणान्वयः तस्मादिदानीमपिरायःप्रयन्ताधनस्यप्रदाताइ-न्द्रइव इन्द्रएवयजमानानांदातुंअश्वयुःअश्वानिच्छन् तथागव्युःगाइच्छन् रथयुरथानिच्छन् व-सूयुः एवमन्यदपियद्धनमस्तितदपीच्छन्क्षयतिवर्तते ॥ अश्रायि श्रिञ्सेवायाम् कर्तरिलुङि व्य-त्ययेनचिण्णादेशः। सुध्यः धीरितिकर्मनाम शोभनाधीर्येषां नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् शसि छन्दस्युभयथेतियणादेशःउदात्तस्वरितयोर्यणइतिस्वरितत्वम् । निरेके नितरांरिचनंनिरे-कः रिचिर्विरेचने भावेघञ् थाथादिनोत्तरपदान्तोदात्तत्वम्। दुर्यः दुरेभवोदुर्यः भवेछन्दसीतियत् यतोनावइत्याद्युदात्तत्वम् । यूपः युमिश्रणे यूयतेयुज्यतेस्मिन्निति यूपः कुयुभ्यांचेतियप्रत्ययः दीर्घइत्यनुवृत्तेर्दीर्घत्वम् सुशृभ्यांनिच्चेत्यनुवृत्तावाद्युदात्तत्वम्। अश्वयुः यजमानेभ्योश्वानिच्छन् छन्दसिपरेच्छायामितिक्यच् नछन्दस्यपुत्रस्येतीत्वदीर्घयोर्निषेधः अश्वाघस्यादित्यात्वंतु छान्द-सत्वान्नभवति क्याच्छन्दसीत्युप्रत्ययः एवमुत्तरत्रापि एतावांस्तुविशेषः गव्युरित्यत्र वान्तोयिप्र-त्ययेइत्यवादेशः । यास्कस्त्वेवंव्याचष्ट—इदंयुरिदंकामयमानोथापितद्वदर्थेभाष्यते वसूयुरिन्द्रो-वसुमानित्यर्थः अश्वयुर्गव्यूरथयुर्वसूयुरित्यपिनिगमोभवतीति[1] । क्षिक्षये भौवादिकः । प्रयन्ता यमउपरमे तृचि एकाचइतीट्प्रतिषेधः चितइत्यन्तोदात्तत्वम् कृदुत्तरपदप्रकृतिस्वरत्वम् ॥१४॥

१४. शोभनकर्मा निर्धनों की रक्षा के लिए इन्द्र की सेवा की गई है। पज्रों या अंगिरोवंशीयों के स्तोत्र, द्वारस्थित स्तम्भ की तरह अचल हैं। धनदाता इन्द्र यजमानों के लिए अश्व, गौ और रथ की इच्छा करते हैं; और, विविध धन की इच्छा करके अधिष्ठान करते हैं।

इ॒दं नमो॑ वृष॒भाय॑ स्व॒राजे॑ स॒त्यशु॑ष्माय त॒वसे॑ऽवाचि ।
अ॒स्मिन्नि॑न्द्र वृ॒जने॒ सर्व॑वीराः स्म॒त्सूरि॑भि॒स्तव॒ शर्म॑न्त्स्याम ॥१५॥११

1 नि० ६. ३१.।

इदम् । नमः । वृषभाय । स्वऽराजे । सत्यऽशुष्माय । तवसे ।
अवाचि । अस्मिन् । इन्द्र । वृजने । सर्वऽवीराः । स्मत् । सूरिऽभिः ।
तव । शर्मन् । स्याम ॥ १५ ॥ ११ ॥

इदंपुरोवर्तिनमः स्तुतिलक्षणंवचः हेइन्द्र तुभ्यमवाचि अस्माभिःप्रायोजि कीदृशाय वृषभायव-र्षणशीलाय स्वराजे स्वकीयेनतेजसाराजमानाय सत्यशुष्माय शुष्ममितिबलनाम शत्रूणांशोषक-त्वात्अवितथबलयुक्ताय तवसेअत्यन्तंप्रवृद्धाय यस्मादेवंतस्मात्अस्मिन्वृजनेवर्जनवतिसंग्रामेस-र्ववीराः विशेषेणईरयन्त्यमित्रानितिवीराभटाः तादृशैःसर्वैर्भटैरुपेतावयं स्मदितिनिपातःसुशब्दा-र्थः तवस्मत्शर्मन्त्वयादत्तेशोभनेगृहे सूरिभिःविद्वद्भिःपुत्रादिभिःसहस्यामभवेमनिवसेमेत्यर्थः यद्वा त्वत्सम्बन्धिनिशोभनेयज्ञगृहेसूरिभिःविद्वद्भिःऋत्विग्भिःसहस्याम शर्मेतिगृहनाम शर्मवर्मे-तिपठितत्वात् ॥ स्वराजे राजृदीप्तौ सत्सूद्विषेतिक्विप् । सत्यशुष्माय सत्यंशुष्मंबलंयस्य बहुव्रीहौपू-र्वपदप्रकृतिस्वरत्वम् । तवसे तवतिःसौत्रोधातुः अस्मादौणादिकोसिप्रत्ययः वृजने वृजीवर्जने कृ-पृवृजिमन्दिनिधाञ्भ्यःक्युरितिक्युःप्रत्ययः । शर्मन् सुपांसुलुगितिसप्तम्यालुक् नङिसंबुद्ध्यो-रितिनलोपप्रतिषेधः । स्याम नश्चेतिसंहितायांसकारस्यधुडागमः खरिचेतिचर्त्वं चयोद्वितीयाःश-रिपौष्करसादेरितितकारस्यथकारः ॥ १५ ॥

१५. इन्द्र! वृष्टि दान करो। तुम अपने तेज से स्वराज करते हो। तुम प्रकृत-बल-सम्पन्न और अतीव महान् हो। हमने तुम्हारे लिए इस स्तुति-वाक्य का प्रयोग किया है। हम इस युद्ध में समस्त वीरों-द्वारा युक्त होकर तुम्हारे दिये हुए शोभनीय घर में विद्वानों या ऋत्विकों के साथ वास करें।

त्यंसुमेषमितिपञ्चदशर्चंद्वितीयंसूक्तंसव्यस्यार्षमैन्द्रं त्रयोदशीपञ्चदशीचत्रिष्टुभौ शिष्टाजगत्यः तथाचानुक्रान्तम्—त्यंसुत्रयोदश्यन्त्येत्रिष्टुभाविति गवामयनस्यमध्यमेहनिविषुवत्संज्ञकेमरुत्वती-यशस्त्रेइदंसूक्तम् विषुवान्दिवाकीर्त्यइतिखण्डेसूत्रितम्—त्यंसुमेषंकयाशुभेतिचमरुत्वतीयमिति ।

तत्रप्रथमामृचमाह—

त्यंसुमेषंमहयास्वर्विदंशतंयस्यसुभ्वःसाकमीरते ।
अत्यंनवाजंहवनस्यदंरथमेन्द्रंववृत्यामवसेसुवृक्तिभिः ॥१॥

त्यम् । सु । मेषम् । महय । स्वःऽविदम् । शतम् । यस्य । सुऽभ्वः ।
साकम् । ईरते । अत्यम् । न । वाजम् । हवनऽस्यदम् । रथम् ।
आ । इन्द्रम् । ववृत्याम् । अवसे । सुवृक्तिऽभिः ॥ १ ॥

त्यंतंप्रसिद्धंमेषंशत्रुभिः सहस्पर्धमानंस्वर्विदंस्वरादित्योद्यौर्वातस्यवेदितारंलब्धारंवा यद्वा स्वः सुष्ठुअरणीयंधनंतस्यलम्भयितारं एवंगुणविशिष्टमिन्द्रंहेअध्वर्योसुमहयसम्यक्पूजय यस्येन्द्रस्यशतंशतसंख्याकाः सुम्वः स्तोतारः साकंसहैवयुगपदेवईरतेस्तुतौप्रवर्तन्ते यद्वा यस्येन्द्रस्य रथंशतंसुम्वः शतसंख्याकाअश्वाः साकंसहईरतेगमयन्ति तमिन्द्रंअवसेऽस्मद्रक्षणायसुवृक्तिभिः सुष्ठुआवर्जकैःस्तोत्रैः रथमाववृत्यां रथंप्रतिआवर्तयामि कीदृशंरथं हवनस्यदंहवनमाह्वानंयागं वाप्रतिवेगेनगच्छन्तं वेगगमनेदृष्टान्तः—अत्यंतवाजं गमनसाधनंअश्वमिव॥ महय महपूजायां चुरादिरदन्तः संहितायामन्येषामपिदृश्यतेइतिदीर्घत्वम्।सुम्वः सुष्ठुभवन्तीतिसुम्वःस्तोतारः क्विप्चेतिक्विप् कृदुत्तरपदप्रकृतिस्वरत्वम् जसि ओःसुपीतियणादेशस्य नभूसुधियोरितिप्रतिषेधेप्राप्ते छन्दस्युभयथेत्युभयथाभावाद्यणादेशः उदात्तस्वरितयोर्यणइतिपरस्यजसोनुदात्तस्यस्वरितत्वम्। ईरतेईरगतौकम्पनेच अदादित्वाच्छपोलुक्झस्यादादेशः टेरेत्वं अनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वेधातुस्वरःशिष्यते यद्वृत्तयोगादनिघातः तत्रहिपञ्चमीनिर्देशेपिव्यवहितेपिकार्यमिष्यतेइत्युक्तम्। अत्यं अत्यइत्यश्वनाम अत्यः हयइतिपाठात्।वाजं वाज्यतेगम्यतेनेनेतिवाजः वजव्रजगतौ करणेघञ् अजिव्रज्योश्चेत्यत्रचशब्दस्यानुक्तसमुच्चयार्थत्वात् वाजोवाज्यमित्यत्रापिकुत्वाभावइत्युक्तम्। हवनस्यदं स्यन्दूप्रस्रवणे स्यदोजवेइतिवेगेगम्यमानेघञन्तोनिपातितः अतएवनलोपोवृद्ध्यभावश्च नच नधातुलोपआर्धधातुकेइतिवृद्धेःप्रतिषेधः इग्लक्षणाहिवृद्धिस्तत्रप्रतिषिद्ध्यते नचेयमिग्लक्षणा घञोञित्त्वादुत्तरपदस्याद्युदात्तत्वम् कृदुत्तरपदप्रकृतिस्वरत्वेनतदेवशिष्यते। ववृत्यां वृतुवर्तने लिङिव्यत्ययेनपरस्मैपदं बहुलंछन्दसीतिशपःश्लुः द्विर्वचनादि यासुटोङित्त्वाल्लघूपधगुणाभावःतिङ्ङतिङइतिनिघातः॥ १॥

१. जिनके स्तुति-कार्य में सौ स्तोता एक साथ ही प्रवृत्त होते हैं और जो स्वर्ग दिखा देते हैं, उन बली इन्द्र की पूजा करो। गतिशील घोड़े की तरह वेग से इन्द्र का रथ यज्ञ की ओर गमन करता है। मैं अपनी रक्षा के लिए उसी रथ पर चढ़ने के निमित्त स्तुति द्वारा इन्द्र से अनुरोध करता हूँ।

सपर्वतोनधरुणेष्वच्युतःसहस्रमूतिस्तविषीषुवावृधे।
इन्द्रोयद्वृत्रमवधीन्नदीवृतमुब्जन्नर्णांसिजर्हृषाणोअन्धसा॥२॥

सः। पर्वतः। न। धरुणेषु। अच्युतः। सहस्रम्ऽऊतिः। तविषीषु। ववृधे। इन्द्रः। यत्। वृत्रम्। अवधीत्। नदीऽवृतम्। उब्जन्। अर्णांसि। जर्हृषाणः। अन्धसा॥ २॥

अन्धसासोमलक्षणेनान्नेनजर्हृषाणः अत्यर्थंहृष्यन्निन्द्रःयद्यदावृत्रं त्रयाणां लोकानामावरीतारमसुरंअवधीत् हतवान् कीदृशंवृत्रं नदीवृतंनदनान्नद्यआपस्तासामावरीतारं किंकुर्वन्नि-

न्द्रः अर्णांसि जलानि उब्जन् अधःपातयन् तदानींसइन्द्रः पर्वतोन पर्ववान्शिलोच्चयइव ध-रुणेषु सर्वस्यधारकेषूदकेषुमध्ये अच्युतः चलनराहित्येनस्थितः सहस्रमूतिः बहुविधरक्षणवा-न् तविषीषुवलेषु ववृधेमवृद्धोवभूव ॥ धरुणेषु धारयतेर्णिलुक्चेत्युनःप्रत्ययः प्रत्ययस्वरः। सहस्रमूतिः सहस्रमूतयोयस्यासौ लुगभावश्छान्दसः। ववृधे संहितायामभ्यासस्यान्येषामपि-दृश्यतेइतिदीर्घत्वम्। नदीवृतं नदींवृणोतीतिनदीवृत् क्विप् तुगागमः। उब्जन् उब्जआर्जवे वि-करणस्वरः।अर्णांसि उदकेनुट्चेत्यर्तेरसुन्प्रत्ययः तत्सन्नियोगेननुडागमश्च नित्त्वादाद्युदात्तत्वम्। जर्हृषाणः हृषतुष्टौ यङ्लुगन्ताव्यत्ययेनशानच् अभ्यस्तानामादिरित्याद्युदात्तत्वम् यद्वा यङन्ता-देवशानचि बहुलंछन्दसीतिशपोलुक् छन्दस्युभयथेतिशानचआर्धधातुकत्वादतोलोपयलोपौ सा-र्वधातुकत्वाच्च अभ्यस्तस्याद्युदात्तत्वम्। अन्धसा अद्यतइत्यन्धः अदेर्नुम्धश्चेत्यसुन् धावोर्नु-मागमोधकारान्तादेशश्च नित्त्वादाद्युदात्तत्वम् ॥ २ ॥

२. जिस समय यज्ञान्न-प्रिय इन्द्र ने जल-वर्षण करके नदी का प्रतिरोध करनेवाले वृत्र का वध किया, उस समय इन्द्र ने धारावाही जल के बीच पर्वत की तरह अचल होकर और प्रजा की हजारों तरह से रक्षा करके यथेष्ट बल प्राप्त किया था।

सहिद्वरोद्वरिषुंवव्रऊधनिचन्द्रबुध्नोमदवृद्धोमनीषिभिः।
इन्द्रंतमह्वेस्वपस्ययाधियामंहिष्ठरातिंसहिपप्रिरन्धसः ॥३॥

सः । हि । द्वरः । द्वरिषुं । वव्रः । ऊधनि । चन्द्रऽबुध्नः । मदऽवृद्धः ।
मनीषिऽभिः । इन्द्रम् । तम् । अह्वे । सुऽअपस्यया । धिया ।
मंहिष्ठऽरातिम् । सः । हि । पप्रिः । अन्धसः ॥ ३ ॥

सपूर्वोक्तगुणविशिष्टइन्द्रः द्वरिषुआवरीतृषुशत्रुषुद्वरोहि अतिशयेनावरीवाखलु शत्रुजयशील-इत्यर्थः यस्मात् ऊधनिउद्धृतजलवत्यन्तरिक्षेवव्रः सम्भक्तःव्याप्यवर्तते अतएवचन्द्रबुध्नःसर्वासां प्रजानामाह्लादकमूलः अन्तरिक्षस्यसर्वाह्लादकत्वात् मदवृद्धः माद्यन्त्येभिरितिमदाःसोमाःतैर्वर्धितः एवंभूतोयइन्द्रोमंहिष्ठरातिंप्रवृद्धधनंप्रवृद्धदानंवातमिन्द्रंमनीषिभिः मनसईषितृभिःप्राज्ञैर्ऋत्विग्भिः सह स्वपस्ययाधिया शोभनकर्मयोग्ययाबुद्ध्या अह्वेआह्वयामि हियस्मात् सइन्द्रःअन्धसोन्नस्या-स्मदपेक्षितस्यपप्रिःपूरयिता ॥ द्वरः द्वइत्येके द्वरत्यावृणोतीतिद्वरः पचाद्यच् चित्स्वरेणान्तोदा-त्तत्वम् द्वरिषु अचइरितिकर्तरिइप्रत्ययः। वव्रः वृञ्सम्भक्तौ व्रियतेसंभज्यतइतिवव्रः रत्नर्थेकवि-धानंस्थाम्नागापाव्यधिहनियुद्धयर्थमितिपरिगणनस्योपलक्षणार्थत्वात्कर्मणिकप्रत्ययः द्विर्भाव-श्छान्दसः। ऊधनि उवऊर्ध्वंध्रियतेस्मिन्जलमित्यूधः सप्तम्येकवचने अस्थिदधिसक्थ्यक्ष्णाम-नङुदात्तः छन्दस्यपिदृश्यतइतिदृशिग्रहणाद्ऊधसशब्दस्याप्यनङादेशः यद्वा ऊधसोनङितिसमा-

सेविधीयमानोनङादेशश्छान्दसत्वात् केवलादपिभवति। चन्द्रबुध्नः चदिआह्लादनेदीप्तौच इदित्वान्नुम् स्फायितञ्चीत्यादिनारक् प्रत्ययस्वरेणान्तोदात्तत्वम् बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वेनतदेव शिष्यते। मदवृद्धः मदीहर्षे मदोनुपसर्गेइतिकरणेअप् तस्यपित्त्वादनुदात्तत्वेधातुस्वरः तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरत्वम्। अह्वे ह्वेञ्स्पर्धायांशब्देच छन्दसिलुङ्लङ्लिटइतिवर्तमानेलुङि आत्मनेपदेष्वन्यतरस्यामितिच्लेरङादेशः आतोलोपइटिचेत्याकारलोपः गुणः। स्वपस्यया अपइतिकर्मनाम शोभनमपःस्वपः तदर्हतीतिस्वपस्यः छन्दसिचेतियप्रत्ययः मंहिष्ठरातिं मंहिर्वृद्धौ अतिशयेनमंहित्रीमंहिष्ठा तुश्छन्दसीतीष्ठन्प्रत्ययः तुरिष्ठेमेयःस्वितितृलोपः नित्त्वादाद्युदात्तत्वम् मंहिष्ठारातिर्यस्य स्त्रियाःपुंवदितिपुंवद्भावाद्ध्रस्वत्वम् बहुव्रीहौप्रकृत्येतिपूर्वपदप्रकृतिस्वरत्वम्। पप्रिः पॄपालनपूरणयोः आदृगमहनजनइतिकिन्प्रत्ययः उदोष्ठ्यपूर्वस्येत्युत्वस्यबहुलंछन्दसीतिवचनादभावेयणादेशः लिड्वद्भावाद्द्विर्वचनेचीतिस्थानिवद्भावेसतिद्विर्भावोरदत्वहलादिशेषाः नित्त्वादाद्युदात्तत्वम्॥ ३॥

३. इन्द्र ने आवरणकारी शत्रुओं को जीता। इन्द्र जल की तरह अन्तरिक्ष में व्याप्त हैं। इन्द्र सबके हर्ष-मूल हैं। वह सोमपान से वर्द्धित हुए हैं। मैं, विद्वान् ऋत्विकों के साथ, उन प्रवृद्ध और धनसम्पन्न इन्द्र को शोभन-कर्मयोग्य अन्तःकरण के साथ बुलाता हूँ; क्योंकि इन्द्र अन्न के पूरयिता हैं।

चतुर्थीमृचमाह—

आयंपृणन्तिदिविसद्मबर्हिषःसमुद्रंनसुभ्व१ःस्वाअभिष्टयः।
तंवृत्रहत्येअनुतस्थुरूतयःशुष्माइन्द्रमवाताअह्रुतप्सवः॥४॥

आ। यम्। पृणन्ति। दिवि। सद्मऽबर्हिषः। समुद्रम्। न। सुऽभ्वः। स्वाः। अभिष्टयः। तम्। वृत्रऽहत्ये। अनु। तस्थुः। ऊतयः। शुष्माः। इन्द्रम्। अवाताः। अह्रुतऽप्सवः॥ ४॥

सद्मसदनंस्थानं बर्हिःशब्दोपलक्षितोयज्ञोयेषांसोमानांतेसोमाः दिविस्वर्गलोकेअवस्थितं यमिन्द्रंआपृणन्ति आसमन्तात्पूरयन्ति तत्रदृष्टान्तः—सुष्ठुभवन्तीतिसुभ्वोनद्यः समुद्रंन यथा नद्यःसमुद्रंपूरयन्तितद्वदित्यर्थः कीदृश्योनद्यः स्वाः समुद्रस्यस्वभूताः तथाचाम्नायते—समुद्रायवयुनायसिन्धूनांपतयेनमइति। अभिष्टयः आभिमुख्येनगमनवत्यः ऊतयः अवितारोमरुतः वृत्रहत्येवृत्रहननेनिमित्तभूतेसति तमिन्द्रमनुतस्थुःअनुलक्ष्यस्थितावभूवुः कीदृशामरुतः शुष्माः शत्रूणांशोषयितारः अवाताः वान्तिमातिकूल्येनगच्छन्तीतिवाताःशत्रवः तद्रहिताः अह्रुतप्सवः अकुटिलरूपाःशोभनावयवाइत्यर्थः॥ पृणन्ति पॄपालनपूरणयोः क्रैयादिकः प्वादीनांह्रस्वइति ह्रस्वत्वम् श्नाभ्यस्तयोरातइत्याकारलोपः प्रत्ययस्वरः यद्वृत्तयोगादनिघातः। सद्मबर्हिषः षद्लृविशरणगत्यवसादनेषु सीदन्त्यस्मिन्निति सद्म औणादिकोधिकरणेमनिन्प्रत्ययः नित्त्वादाद्यु-

दात्तत्वम् बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वेनतदेवशिष्यते । सुम्वः भवतेःक्विप्चेतिक्विप् कृदुत्तरपदप्रकृतिस्वरत्वम् जसि ओःसुपीतियणादेशस्य नभूसुधियोरितिप्रतिषेधेप्राप्ते छन्दस्युभयथेतियणादेशः उदात्तस्वरितयोर्यणइत्यनुदात्तस्यजसःस्वरितत्वम् । अभिष्टयः इष्टयएषणानि उपसर्गोऽश्चाभिवर्जमितिवचनादभिरन्तोदात्तः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वेनसएवशिष्यते एमन्नादित्वात्पररूपत्वम् । वृत्रहत्ये हनस्तचेतिहन्तेर्भावेक्यप् तकारान्तादेशश्च प्रत्ययस्यपित्त्वादनुदात्तत्वेधातुस्वरःशिष्यते । अह्रुतप्सवः ह्रुकौटिल्ये अस्मान्निष्ठायां ह्रुह्वरेश्छन्दसीतिह्रुआदेशः प्सा भक्षणेइत्यस्मादौणादिकोडुःप्रत्ययः नह्रुतप्सवः अह्रुतप्सवः अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥४॥

४. जिस प्रकार समुद्र की आत्मभूता और अभिमुखगामिनी नदियाँ समुद्र को पूर्ण करती हैं, उसी प्रकार कुशस्थित सोमरस दिव्यलोक में इन्द्र को पूर्ण करता है। शत्रुओं के शोषक, अप्रतिहत-वेग और सुशोभन मरुद्गण, वृत्रहनन के समय उन्हीं इन्द्र के सहायक होकर पास में उपस्थित थे।

अभि स्ववृष्टिं मदे अस्य युध्यतो रघ्वीरिव प्रवणे सस्रुरूतयः ।
इन्द्रो यद्वज्री धृषमाणो अन्धसा भिनद्वलस्य परिधीँरिव त्रितः ॥५॥१२॥

अभि । स्वऽवृष्टिम् । मदे । अस्य । युध्यतः । रघ्वीःऽइव । प्रवणे ।
सस्रुः । ऊतयः । इन्द्रः । यत् । वज्री । धृषमाणः । अन्धसा ।
भिनत् । वलस्य । परिधीन्ऽइव । त्रितः ॥ ५ ॥ १२ ॥

ऊतयोमरुतः मदेसोमपानेनहर्षेसतिअस्येन्द्रस्ययुध्यतोवृत्रेणसहयुध्यमानस्यपुरतःस्ववृष्टिंस्वभूतवृष्टिमन्तंवृत्रंअभि आभिमुख्येनसस्रुःजग्मुःरघ्वीरिवप्रवणे यथागमनस्वभावाआपःनिम्नदेशेगच्छन्ति यद्यदाअन्धसासोमलक्षणेनान्नेनपीतेनधृषमाणः प्रगल्भःसन्वज्रीवज्रवानिन्द्रः वलस्यसंवृण्वतः एतत्संज्ञमसुरंभिनदव्यदारयदअवधीदित्यर्थः तत्रदृष्टान्तः—त्रितःपरिधीनिव देवानांहविर्लेपनिघर्षणाय अग्नेःसकाशादप्सु एकतोद्वितस्त्रितइतित्रयःपुरुषाजज्ञिरे तथाचतैत्तिरीयैःसमाम्नातम्—सोऽङ्गारेणापः अभ्यपातयत् ततएकतोजायत सद्वितीयमभ्यपातयत् ततोद्वितोजायत सतृतीयमभ्यपातयत् ततस्त्रितोजायतेति[1] । तत्रउदकपानार्थंप्रवृत्तस्यकूपेपतितस्यप्रतिरोधायअसुरैःपरिधयः परिधायकाःकूपस्याच्छादकाःस्थापिताः तान्यथासोभिनत्तद्वत्॥ स्ववृष्टिं बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । युध्यतः युधसंप्रहारे दैवादिकः व्यत्ययेनशत् अदुपदेशाल्लसार्वधातुकानुदात्तत्वेश्यनोनित्स्वादाद्युदात्तत्वम् । रघ्वीः रघिर्गत्यर्थः रंघिबंहोर्नलोपश्चेतिउप्रत्ययः वोतोगुणवचनादितिङीष् जसि वाछन्दसीतिपूर्वसवर्णदीर्घत्वम् ङीष्स्वरःशिष्यते । धृषमाणः ञिधृषाप्रागल्भ्ये श्नुप्रत्ययेप्राप्तेव्यत्ययेनशःआत्मनेपदंच अदुपदेशाल्लसार्वधातुकानुदात्तत्वे

---

[1] तै० ब्रा० ३. २. ८. ।

विकरणस्वरःशिष्यते । भिनत् लङिबहुलंछन्दस्यमाङ्योगेपीत्यडभावः विकरणस्वरः यद्वृत्तयोगादनिघातः । वलस्य वलसंवरणे वलतिसंवृणोतिसर्वमितिवलः पचाद्यच् क्रियाग्रहणंकर्तव्यमितिकर्मणःसम्प्रदानत्वाच्चतुर्थ्यर्थेषष्ठी । परिधीन् परिधीयन्तइतिपरिधयः उपसर्गेघोःकिरितिदधातेःकर्मणिकिप्रत्ययः आतोलोपइटिचेत्याकारलोपः कृदुत्तरपदप्रकृतिस्वरत्वम् ॥५॥

५. जिस प्रकार गमनशील जल नीचे जाता है, उसी प्रकार इन्द्र के सहायक मरुद्गण सोमपान-द्वारा हृष्ट होकर युद्धलिप्सु इन्द्र के सामने वृष्टि-सम्पन्न वृत्र के निकट गये। जिस प्रकार त्रित ने परिधि-समुदाय का भेद किया था, उसी प्रकार इन्द्र ने यज्ञ के अन्न से प्रोत्साहित होकर बल नाम के असुर का भेद किया था।

परीं घृणा चरति तित्विषे शवोऽपो वृत्वी रजसो बुध्नमाशयत्।
वृत्रस्य यत्प्रवणे दुर्गृभिश्वनो निजघन्थ हन्वोरिन्द्र तन्यतुम् ॥६॥

परि । ईम् । घृणा । चरति । तित्विषे । शवः । अपः ।
वृत्वी । रजसः । बुध्नम् । आ । अशयत् । वृत्रस्य । यत् । प्रवणे ।
दुःऽगृभिश्वनः । निऽजघन्थ । हन्वोः । इन्द्र । तन्यतुम् ॥ ६ ॥

योवृत्रः अपोवृत्वीउदकान्यावृत्यरजसोबुध्नंअन्तरिक्षस्योपरिप्रदेशंआशयत् आश्रित्याशेत तस्यवृत्रस्यप्रवणेप्रकर्षेणवननीयेन्तरिक्षेवर्तमानस्यदुर्गृभिश्वनः दुर्ग्रहव्यापनस्यतस्यहिव्यापनंनकेनापिग्रहीतुंशक्यते सइमाँल्लोकानवृणोदितिश्रुतेः । एवंभूतस्यवृत्रस्यहन्वोः मुखपार्श्वयोः हेइन्द्र यद्यदातन्यतुंप्रहारंविस्तारयन्तं यद्वा शब्दकारिणंवज्रं तृतीयार्थेद्वितीया तन्यतुनावज्रेणनिजघन्थनितरांप्रजहर्थ तदानीं ईमेनंत्वांइन्द्रं घृणा शत्रुजयलक्षणादीप्तिः परिचरतिपरितोव्याप्नोति त्वदीयंशवोबलंचतित्विषे प्रदिदीपे ॥ तित्विषे त्विषदीप्तौ लिटिप्रत्ययस्वरः तिङ्परत्वान्निघाताभावः। वृत्वी वृञ्वरणे स्नात्व्यादयश्चेत्यादिग्रहणात्क्त्वाप्रत्ययस्यईकारः। रजसः रञ्जरागे रञ्जन्त्यस्मिन्गन्धर्वा[illegible]इतिरजोन्तरिक्षम् असुनि रजकरजनरजःसूपसंख्यानमितिनलोपः नित्त्वादाद्युदात्तत्वम्। अशयत् शीङोव्यत्ययेनपरस्मैपदं बहुलंछन्दसीतिशपोलुगभावः। दुर्गृभिश्वनः ग्रहउपादाने अशू[illegible]वित्यनयोर्दुःशब्देउपपदेपृषोदरादित्वादभिमतरूपस्वरसिद्धिः। निजघन्थ हन्हिंसागत्योः लिटिथलिक्रादिनियमात्प्राप्तस्येटः उपदेशेत्वतइतिनिषेधः अभ्यासाच्चेतिअभ्यासादुत्तरस्यहकारस्यध[illegible] लितीतिप्रत्ययात्पूर्वस्योदात्तत्वम् तिङिचोदात्तवतीतिगतेर्निघातः यद्वृत्तयोगान्निघाताभावः । [illegible] तनुविस्तारे अस्मात् ऋतन्यञ्जीत्यादिनायतुच् यद्वा स्तनशब्देइत्यस्माद्बहुलवचनाद्यतुच्प्रत्ययेसकारलोपः ॥ ६ ॥

६. जल रोककर जो वृत्रासुर अन्तरिक्ष के ऊपर सोया था और जिसकी वहाँ असीम व्याप्ति है इन्द्र, जिस समय तुमने उसी वृत्र की केहुनियों को, शब्दायमान वज्र द्वारा, आहत किया था, उस समय तुम्हारी शत्रु-विजयिनी दीप्ति विस्तृत हुई थी और तुम्हारा बल प्रदीप्त हुआ था।

सप्तमीमृचमाह—

ह्रदंनहित्वान्यृषन्त्यूर्मयोब्रह्माणीन्द्रतवयानिवर्धना ।
त्वष्टाचित्तेयुज्यंवावृधेशवस्ततक्षवज्रमभिभूत्योजसम् ॥७॥

ह्रदम् । न । हि । त्वा । निऽऋषन्ति । ऊर्मयः । ब्रह्माणि । इन्द्र । तव । यानि । वर्धना । त्वष्टा । चित् । ते । युज्यम् । ववृधे । शवः । ततक्ष । वज्रम् । अभिभूतिऽओजसम् ॥ ७ ॥

हेइन्द्र यानिब्रह्माणिस्तोत्रशस्त्ररूपाणिमन्त्रजातानितववर्धनावर्धयितॄणि तानित्वात्वांन्यृषन्तिहि नितरांप्राप्नुवन्त्येव तत्रदृष्टान्तः-ऊर्मयोजलप्रवाहाह्रदंन यथाजलाशयंप्राप्नुवन्तितद्वत् त्वष्टा चित्सत्वष्टादेवएव तेतवयुज्यंयोग्यंशवोबलंववृधेप्रावर्धयत् अपिच अभिभूत्योजसं शत्रूणामभिभवितॄणांओजसाबलेनयुक्तंवज्रंततक्षतीक्ष्णीचकार॥ न्यृषन्ति ऋषीगतौ तौदादिकः अदुपदेशाल्लसार्वधातुकानुदात्तत्वेविकरणस्वरः हिचेतिनिघातप्रतिषेधः। ऊर्मयः ऋगतौ ऋच्छन्तिगच्छन्तीत्यूर्मयः अर्तेरुचेतिमिप्रत्ययः गुणेसत्यकारस्यऊकारादेशश्च प्रत्ययस्वरः। वर्धना वृधुवृद्धौ वर्धतेएभिरितिवर्धना करणेल्युट् शेश्छन्दसीतिशेर्लोपः। ततक्ष तक्षूत्वक्षूतनूकरणे लिटिणलिलित्स्वरेणप्रत्ययात्पूर्वपदस्योदात्तत्वम् पादादित्वान्निघाताभावः। अभिभूत्योजसं अभिभूयतेनेनेत्यभिभूति करणेक्तिन् तादौचनितीतिगतेःप्रकृतिस्वरत्वम् अभिभूत्योजोयस्य बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्॥ ७ ॥

७. जिस प्रकार जलाशय को जल-प्रवाह प्राप्त करता है, उसी प्रकार तुम्हारे लिए कहे हुए स्तोत्र तुम्हें प्राप्त होते हैं। त्वष्टा ने तुम्हारे योग्य बल-वृद्धि की है और शत्रुविजयी बल से संयुक्त तुम्हारे वज्र को भी अधिकतर बल-सम्पन्न किया है।

अष्टमीमृचमाह—

जघन्वाँउहरिभिःसंभृतक्रतविन्द्रवृत्रंमनुषेगातुयन्नपः ।
अयच्छथाबाह्वोर्वज्रमायसमधारयोदिव्यासूर्यंदृशे ॥८॥

जघन्वान् । ऊम् इति । हरिऽभिः । संभृतक्रतो इति संभृतऽक्रतो । इन्द्र । वृत्रम् । मनुषे । गातुऽयन् । अपः । अयच्छथाः । बाह्वोः । वज्रम् । आयसम् । अधारयः । दिवि । आ । सूर्यम् । दृशे ॥ ८ ॥

हेसंभृतक्रतो सम्पादितकर्मन् संपादितप्रज्ञवाइन्द्र मनुषेजनायगातुयन् गातुंमार्गमिच्छन् वृत्रंलोकानामावरकमसुरं हरिभिरश्वैर्युक्तस्त्वंजघन्वानऊ हतवान्खलु तदनन्तरंअपोवृष्ट्युदका-

निमावर्तयइत्यध्याहारः बाह्वोस्त्वदीययोर्हस्तयोरायसमयोमयंवज्रमयच्छथाः अग्रहीः आकारः समुच्चयार्थः सूर्यंचदिविद्युलोकेदृशेद्रष्टुंसर्वेषामस्माकंदर्शनायअधारयः स्थापयांचकृषे ॥ जघन्वान् हन्तेर्लिटःक्वसुः विभाषागमहनविदविशामितीडागमस्यविकल्पोकेरभावः । गातुयन् गातुमिच्छसि छन्दसिपरेच्छायामपीतिक्यच् नच्छन्दस्यपुत्रस्येतिदीर्घप्रतिषेधः क्यजन्ताच्छतरिअदुपदेशाल्लसार्वधातुकानुदात्तत्वेक्यचएवस्वरःशिष्यते । बाह्वोः उदात्तयणोहल्पूर्वादितिविभक्तेरुदात्तत्वम् ॥ ८ ॥

८. हे सिद्धकर्मा इन्द्र! मनुष्यों के पास आने के लिए तुमने अश्वयुक्त होकर वृत्र-विनाश किया, वृष्टि की, दोनों हाथों में लौह-वज्र ग्रहण किया और हमारे देखने के लिए आकाश में सूर्य को स्थापित किया।

बृहत्स्वश्चन्द्रममवद्यदुक्थ्य१मकृण्वतभियसारोहणंदिवः ।
यन्मानुषप्रधनाइन्द्रमूतयःस्वर्नृषाचोमरुतोमदन्ननु ॥ ९ ॥

बृहत् । स्वऽचन्द्रम् । अमऽवत् । यत् । उक्थ्यम् । अकृण्वत । भियसा । रोहणम् । दिवः । यत् । मानुषऽप्रधनाः । इन्द्रम् । ऊतयः । स्वः । नृऽसाचः । मरुतः । अमदन् । अनु ॥ ९ ॥

बृहद्बृहत्सामस्तोतारोयजमानाः भियसावृत्रभयेनयद्यदोक्थ्यमुक्थार्हंस्तोत्रयोग्यमकृण्वताकुर्वन् कीदृशंबृहत्साम स्वश्चन्द्रं स्वकीयेनचन्द्रेणाह्लादकेनतेजसायुक्तम् अमवत् अमतिशत्रूनरुजत्यनेनेत्यमोबलंतद्युक्तम् दिवःस्वर्गस्यरोहणं आरोहणहेतुभूतं एवंविधेनस्तोत्रेणवृत्राद्भीताइन्द्रमस्तोषतेत्यर्थः यद्यदामानुषप्रधनाः प्रकीर्णान्यस्मिन्धनानिभवन्तीतिनिरुक्तव्युत्पत्त्याप्रधनमितिसङ्ग्रामनाम मनुष्यहितसंग्रामाः ऊतयःस्वः द्युलोकस्यरक्षितारोमरुतःनृषाचः प्राणरूपेणनॄन्सेवमानाभूत्वा इन्द्रमपितेनैवरूपेणान्वमदन् आनुपूर्व्येणहर्षमापयन् तदानीं सइन्द्रः वृत्रवधमतिउद्युक्तोबभूवेतिशेषः ॥ स्वश्चन्द्रं स्वकीयंचन्द्रंयस्य. ह्रस्वाच्चन्द्रोत्तरपदेमन्त्रेइति सुट्श्चुत्वेनशकारः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । भियसा भीशब्दस्यतृतीयैकवचनेछान्दसोऽसुगागमः तस्योदात्तत्वंच । नृषाचः षचसमवाये अयंसेवनार्थइतियास्कः । वहश्चेत्यत्रचशब्दस्यानुक्तसमुच्चयार्थत्वात्अस्मादपिण्विप्रत्ययः । अमदन् मदीहर्षे णिचि मदीहर्षग्लेपनयोरिति घटादिषुपाठात्मित्त्वेसति मितांह्रस्वइतिह्रस्वत्वम् लङि छन्दस्युभयथेतिशपआर्धधातुकत्वात्णेरनिटीतिणिलोपः ॥ ९ ॥

९. वृत्र के डर के मारे स्तोताओं ने स्तोत्रों का अनुध्यान किया था। वे स्तोत्र बृहत्, आह्लादयुक्त, बल-सम्पन्न और स्वर्ग की सीढ़ियाँ हैं। स्वर्ग-रक्षक मरुद्गण ने उस समय मनुष्यों के लिए युद्ध करके और उनका पालन करके, इन्द्र को प्रोत्साहित किया था।

---

१ नि० ९.३३। २ नि० ३.२१।

दशमीमृचमाह—

द्यौश्चिदस्यामवाँ अहेः स्वनादयोयवीद्भियसा वज्र इन्द्र ते।
वृत्रस्य यद्बद्बधानस्य रोदसी मदे सुतस्य शवसाभिनच्छिरः ॥१०॥१३॥

द्यौः । चित् । अस्य । अमऽवान् । अहेः । स्वनात् । अयोयवीत् । भियसा । वज्रः । इन्द्र । ते । वृत्रस्य । यत् । बद्बधानस्य । रोदसी इति । मदे । सुतस्य । शवसा । अभिनत् । शिरः ॥१०॥ १३॥

अमवान्बलवान्द्यौश्चिद्द्युलोकोपिअस्याहेर्वृत्रस्यस्वनाच्छब्दात् भियसाभयेनअयोयवीत् अत्यर्थंपृथग्भूतआसीत्अकंपतेत्यर्थः हेइन्द्र तेतवसुतस्याभिषवादिभिःसंस्कृतस्यसोमस्यपाने-नमदेहर्षेजातेसतित्वदीयोवज्रःरोदसीद्यावापृथिव्यौबद्बधानस्यबाधनशीलस्यवृत्रस्यशिरःयद्यदा शवसाबलेनाभिनत् अच्छिनत् तदानींद्युलोकोभयराहित्येननिश्चलोबभूवेतिशेषः ॥ अयोयवीत् युमिश्रणामिश्रणयोरित्यस्माद्यङ्लुगन्ताल्लङि यङोवेत्यपृक्तप्रत्ययस्येडागमः अडागमउदात्तः। बद्बधानस्य बाधृविलोडने ताच्छीलिकेचानशि बहुलंछन्दसीतिशपःश्लुः हलादिशेषाभा-बोधातोर्ह्रस्वत्वंचछान्दसत्वात् चितइत्यन्तोदात्तत्वम् ॥ १० ॥

१०. इन्द्र ! अभिषुत सोमपान करके तुम्हारे हृष्ट होने पर जिस समय तुम्हारे वज्र ने द्युलोक और पृथिवीलोक के बाधक वृत्र का मस्तक वेग से छिन्न किया था, उस समय बलवान् आकाश भी उस के शब्द-भय से कम्पित हुआ था।

एकादशीमृचमाह—

यदिन्न्विन्द्र पृथिवी दशभुजिरहानि विश्वा ततनन्त कृष्टयः।
अत्राह ते मघवन्विश्रुतं सहो द्यामनु शवसा बर्हणा भुवत् ॥११॥

यत् । इत् । नु । इन्द्र । पृथिवी । दशऽभुजिः । अहानि । विश्वा । ततनन्त । कृष्टयः । अत्र । अह । ते । मघऽवन् । विऽश्रुतम् । सहः । द्याम् । अनु । शवसा । बर्हणा । भुवत् ॥ ११ ॥

यदिन्नु यदाखलु पृथिवीदशभुजिःदशगुणिताभवेत् यदिवाकृष्टयःसर्वेमनुष्याः विश्वा सर्वाण्यहानिततनन्तविस्तारयेयुः हेमघवन्धनवन्इन्द्र अत्राहअत्रैवपूर्वोक्तेष्वेषुदेशकालकर्तृकेषु तेत्वदीयंसहोवृत्रवधादिकारणंबलंविश्रुतंविख्यातंमस्तिद्धं शवसात्वदीयेनबलेनकृतावर्हणावृत्रादे-

र्वंधरूपाक्रियाद्यामनुभुवत् अनुभवति यथाद्यौर्महतीतथात्वत्कृतंवृत्रादेर्हिंसनमपिमहदितिभावः॥ ततनन्त तनुविस्तारे स्वरितेत्त्वादात्मनेपदम् लिङर्थेलङिउप्रत्ययेमाप्तेव्यत्ययेनशप् छान्दसोद्विर्भावः यद्वा बहुलंछन्दसीत्युप्रत्ययस्यश्लौसतिपुनरपिव्यत्ययेनशप् शपःपित्त्वादनुदात्तत्वम् तिङश्चलसार्वधातुकस्वरेणधातुस्वरःशिष्यते बहुलंछन्दस्यमाङ्योगेपीत्यडभावः यद्वृत्तयोगादनिघातः। विश्रुतं श्रुश्रवणे कर्मणिनिष्ठा गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम्। वर्हणा वर्हवल्हपरिभाषणहिंसादानेषुअस्मादौणादिकःक्युप्रत्ययः बवयोरभेदइतिवकारस्यबत्वम् प्रत्ययस्वरः निवर्हयतीतिवधकर्मसुपठितंच। भुवत् भूसत्तायां लेटचडागमः इतश्चलोपइतीकारलोपःबहुलंछन्दसीतिशपोलुक् भूसुवोस्तिङीतिगुणप्रतिषेधेउवङादेशः॥ ११॥

११. इन्द्र! यदि पृथिवी दसगुनी बड़ी होती और यदि मनुष्य सदा जीवित रहते, तब तुम्हारी शक्ति, प्रकृत रूप में, सर्वत्र प्रसिद्ध होती। तुम्हारी बल-साधित क्रिया आकाश के सदृश विशाल है।

त्वमस्यपारेरजसोव्योमनःस्वभूत्योजाअवसेधृषन्मनः।
चकृषेभूमिंप्रतिमानमोजसोपःस्वःपरिभूरेष्यादिवम्॥१२॥

त्वम्। अस्य। पारे। रजसः। विऽओमनः। स्वभूतिऽओजाः। अवसे। धृषत्ऽमनः। चकृषे। भूमिम्। प्रतिऽमानम्। ओजसः। अपः। स्व१रिति स्वः। परिऽभूः। एषि। आ। दिवम्॥१२॥

हेधृषन्मनःशत्रूणांधर्षकमनोयुक्तेन्द्र अस्यअस्माभिःपरिदृश्यमानस्यव्योमनः व्याप्तस्यान्तरिक्षस्यरजसोलोकस्यपारेउपरिप्रदेशेवर्तमानः स्वभूत्योजाःस्वभूतबलस्त्वंअवसेअस्मद्रक्षणार्थंभूमिंभूलोकंचकृषेकृतवानसि किञ्च ओजसोबलवतांबलस्यप्रतिमानंप्रतिनिधिरभूः तथा स्वः सुष्ठुअरणीयंगन्तव्यं आपइत्यन्तरिक्षनाम अपोन्तरिक्षलोकंआदिवंद्युलोकंचपरिभूः परिग्रहीता परिपूर्वोभवतिःपरिग्रहणार्थः एषिप्राप्नोषि॥अस्य ऊडिदमितिविभक्तेरुदात्तत्वम्।व्योमनः अवतिर्गत्यर्थः अवरक्षणगतिकान्तीत्यभिधानात् विशेषेणगच्छतिव्याप्नोतीतिव्योम यद्वा वृष्टिप्रदानेनविशेषेणप्राणिनोवतिरक्षतीतिव्योम अन्येभ्योपिदृश्यन्तइतिमनिन् ज्वरत्वरेत्यादिनोपधायावकारस्यचऊठ् गुणः दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वम् यद्वा भावेमनिन् विविधमोमरक्षणंयस्मिन् बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् यणादेशेउदात्तस्वरितयोर्यणइतिपरस्यानुदात्तस्यस्वरितत्वम्। स्वः सुपूर्वादर्तेरन्येभ्योपिदृश्यन्तइतिविच् अव्ययादाप्सुपइतिसुपोलुक् न्यक्स्वरौस्वरितावितिस्वरितत्वम्॥ १२॥

१२. अरिमर्दन इन्द्र! इस व्यापक अन्तरिक्ष के ऊपर रहकर निज भुज-बल से तुमने, हमारी रक्षा के लिए, भूलोक की सृष्टि की है। तुम बल के परिमाण हो। तुम सुगन्तव्य अन्तरिक्ष और स्वर्ग व्याप्त किये हुए हो।

भूनाम्येकाहेमरुत्वतीयशस्त्रेनिविद्धानीयावसूक्तात्पुरा त्वंभुवःप्रतिमानमित्येषाशंसनाया तथैवासूत्रयत्—शस्यमुक्तंबृहस्पतिसवेनत्वंभुवःप्रतिमानंपृथिव्याइति ।

तामेतांसूक्तेत्रयोदशीमृचमाह—

त्वंभुवःप्रतिमानंपृथिव्याऋष्ववीरस्यबृहतःपतिर्भूः ।
विश्वमाप्राअन्तरिक्षंमहित्वासत्यमद्धानकिरन्यस्त्वावान् ॥१३॥

त्वम् । भुवः । प्रतिऽमानम् । पृथिव्याः । ऋष्वऽवीरस्य । बृहतः ।
पतिः । भूः । विश्वम् । आ । अप्राः । अन्तरिक्षम् । महिऽत्वा ।
सत्यम् । अद्धा । नकिः । अन्यः । त्वाऽवान् ॥ १३ ॥

हेइन्द्रत्वंपृथिव्याःप्रथितायाःविस्तीर्णायाःभूमेःप्रतिमानंभुवःप्रतिनिधिर्भवसि यथाभूर्लोकोमहानचिन्त्यशक्तिः एवंत्वमपीत्यर्थः तथा ऋष्ववीरस्य वीरयन्तिविक्रान्ताभवन्तीतिवीरादेवाः ऋष्वादर्शनीयावीरायस्यसतथोक्तः तस्यबृहतोबृंहितस्यप्रवृद्धस्यस्वर्गलोकस्यपतिर्भूःपालयितासि तथा अन्तरिक्षंअन्तराक्षान्तंद्यावापृथिव्योर्मध्येवर्तमानमाकाशंविश्वंसर्वमपिमहित्वामहित्वेनसत्यमाप्राः निश्चयेनआसमन्तादपूरयः अतस्त्वावान्त्वत्सदृशोन्यः कश्चिन्नकिरस्तिनास्तीतियदेतत् तदद्धा सत्यमेव ॥ भुवः भवतेर्लोटिसिप्यडागमः उवङादेशः । पृथिव्याः उदात्तयणोहल्पूर्वादितिविभक्तिरुदात्ता । बृहतः बृहन्महतोरुपसंख्यानमितिविभक्तेरुदात्तत्वम् । भूः छान्दसेवर्तमानेलुङि बहुलंछन्दस्यमाङ्योगेपीत्यडभावः । अप्राः प्रापूरणे आदादिकः लङ्यडागमः । महित्वा सुपांसुलुगितितृतीयायाडादेशः त्वावान्वतुप्प्रकरणे युष्मदस्मद्भ्यांछन्दसिसादृश्यउपसंख्यानमितिसादृश्यार्थेवतुप् प्रत्ययोत्तरपदयोश्चेतिमपर्यन्तस्यत्वादेशः आसर्वनाम्नइत्यात्वम् प्रत्ययस्य पित्त्वादनुदात्तत्वेप्रातिपदिकस्वरएवशिष्यते ॥ १३ ॥

१३. तुम विपुलायतना पृथिवी के परिमाण हो, तुम दर्शनीय देवों के बृहत् स्वर्ग के पालनकारी हो । सचमुच तुम अपनी महिमा-द्वारा समस्त अन्तरिक्ष को व्याप्त किये हुए हो। फलतः तुम्हारे समान कोई नहीं ।

चतुर्दशीमृचमाह—

नयस्यद्यावापृथिवीअनुव्यचोनसिन्धवोरजसोअन्तमानशुः ।
नोतस्ववृष्टिंमदेअस्ययुध्यतएकोअन्यच्चकृषेविश्वमानुषक् ॥१४॥

न । यस्य । द्यावापृथिवी इति । अनु । व्यचः । न । सिन्धवः ।
रजसः । अन्तम् । आनशुः । न । उत । स्वऽवृष्टिम् । मदे । अस्य ।
युध्यतः । एकः । अन्यत् । चकृषे । विश्वम् । आनुषक् ॥ १४ ॥

यस्येन्द्रस्यव्यचोव्यापनंद्यावापृथिवीद्यावापृथिव्यौनान्वानशातेप्राप्तुमसमर्थेबभूवतुः तथा रजसोन्तरिक्षलोकस्यउपरिसिन्धवःस्यन्दनशीलाआपः यस्येन्द्रस्यतेजसोन्तमवसानंनानशुःनमापुःउतअपिच सोमपानेनमदेहर्षेसतिस्ववृष्टिंस्वीकृतवृष्टिंवृत्रादियुध्यतःयुद्ध्यमानस्यास्येन्द्रस्यबलस्यान्तंवृत्रादयोनमापुःअतः हेइन्द्र एकस्त्वंअन्यवस्त्वव्यतिरिक्तंविश्वंसर्वंभूतजातंआनुषक्अनुषक्तंचकृषे सकलमपिभूतजातंत्वदधीनमभूदितिभावः ॥ द्यावापृथिवीद्यौश्चपृथिवीच दिवोद्यावेतिद्यावादेशआद्युदात्तोनिपातितः पृथिवीशब्दः षिद्गौरादिभ्यश्चेतिङीषन्तोन्तोदात्तः देवताद्वन्द्वेचेत्युभयपदप्रकृतिस्वरत्वम् अपृथिवीरुद्रपूषमन्थिष्वितिपर्युदासान्नोत्तरपदेनुदात्तादावितिनिषेधाभावः । व्यचः व्यचेःकुटादित्वमनसीतिवचनाद्ङित्त्वाभावेसम्प्रसारणाभावः । आनशुः अश्नोतेर्व्यत्ययेन परस्मैपदम् अतआदेरित्यभ्यासस्यात्वम् अश्नोतेश्चेतिनुडागमः । आनुषक् अनुपूर्वात् षञ्जसंगेइत्यस्मात्क्विप्यनिदितामितिनलोपः अनोरकारस्यदीर्घश्छान्दसः ॥ १४ ॥

१४. जिन इन्द्र की व्याप्ति को द्युलोक और पृथिवीलोक नहीं पा सके हैं, अन्तरिक्ष के ऊपर का प्रवाह जिनके तेज का अन्त नहीं पा सका है, इन्द्र! वही तुम अकेले अन्य सारे भूतों को अपने वश में किये हुए हो।

पञ्चदशीमृचमाह—

आर्चन्नत्रमरुतःसस्मिन्नाजौविश्वेदेवासोअमदन्ननुत्वा ।
वृत्रस्ययद्भृष्टिमतावधेननित्वमिन्द्रप्रत्यानंजघन्थ ॥१५॥१४॥

आर्चन् । अत्र । मरुतः । सस्मिन् । आजौ । विश्वे । देवासः ।
अमदन् । अनु । त्वा । वृत्रस्य । यत् । भृष्टिऽमता । वधेन । नि ।
त्वम् । इन्द्र । प्रति । आनम् । जघन्थ ॥ १५ ॥ १४ ॥

हेइन्द्र त्वांमरुतःअत्रास्मिन्संग्रामेआर्चन् प्रहरभगवोजहिवीरयस्वेत्यनेनवचनेनापूजयन् सस्मिन्तस्मिन् यद्वा सर्वस्मिन्नाजौसङ्ग्रामेविश्वेदेवासः तेसर्वेदानादिगुणयुक्तामरुतस्त्वात्वामन्वमदन्अनुक्रमेणहर्षमापयन् यद्वा त्वदीयमदानन्तरंतेपिमदंप्राप्ताः हेइन्द्र त्वंयद्यदाभृष्टिमता भ्रंशयति शत्रूनितिभ्रष्टिरश्रिः तद्वतावधेनहननसाधनेनवज्रेण अश्रिमत्त्वंचवज्रस्यब्राह्मणेसमाम्नातम्—वज्रोवाएषयद्यूपःसोष्टाश्रिःकर्तव्योष्टाश्रिर्वैवज्रइति[1] । तेनवज्रेणवृत्रस्यानंप्रति आननंमुखंप्रति यद्वा श्वासहेतुप्राणंप्रति निजघन्थनितरांप्राहार्षीः॥ आर्चन् अर्चपूजायांभौवादिकः आडागमउदात्तः । सस्मिन् तदोःसःसावितिविधीयमानंसत्वंव्यत्ययेनसप्तम्यामपिद्रष्टव्यम् यद्वा सर्वस्मिन्नित्यत्रवर्णलोपोद्रष्टव्यः। देवासः आज्जसेरसुगित्यसुक् । आनं आननं वर्णलोपश्छान्दसः यद्वा अनमाणने अ-

---

1 ऐ० ब्रा० २.१.

न्यतेनेनेत्यानंमाणं करणेघञ् कर्षात्वतइत्यन्तोदात्तत्वम्। जघन्थ हनहिंसागत्योः थलि उपदेशेत्वतइतीट्प्रतिषेधः अभ्यासाच्चेत्यभ्यासादुत्तरस्यहकारस्यघत्वम् लित्स्वरेणप्रत्ययात्पूर्वस्योदात्तत्वम्॥ १५॥

१५. इस लड़ाई में मरुतों ने तुम्हारी अर्चना की थी। जिस समय तुमने तीक्ष्णघातक वज्र-द्वारा वृत्र के मुंह के ऊपर आघात किया था, उस समय सारे देवगण संग्राम में तुम्हें आमन्दित देखकर आह्लावित हुए थे।

॥ इतिप्रथमस्यचतुर्थेचतुर्दशोवर्गः॥ १४॥

न्यूष्वित्येकादशर्चंतृतीयंसूक्तं दशम्येकादश्यौत्रिष्टुभौ शिष्टानवजगत्यः सव्यऋषिः इन्द्रोदेवता तथाचानुक्रान्तम्—न्यूष्वेकादशान्त्येत्रिष्टुभाविति। अतिरात्रेप्रथमेपर्यायेब्राह्मणाच्छंसिनःशस्त्रेएतत्सूक्तम् तथाचासूत्रयदाचार्यः—न्यूषुवाचमप्रसुधूतस्यहरिवःपिबेहेतियाज्येति।

तत्रप्रथमामृचमाह—

न्यू३षुवाचंप्रमहेभरामहेगिरइन्द्रायसदनेविवस्वतः।
नूचिद्धिरत्नंससतामिवाविदन्नदुष्टुतिर्द्रविणोदेषुशस्यते॥१॥

नि। ऊम् इति। सु। वाचम्। प्र। महे। भरामहे। गिरः।
इन्द्राय। सदने। विवस्वतः। नु। चित्। हि। रत्नम्। ससताम्ऽइव।
अविदत्। न। दुःऽस्तुतिः। द्रविणःऽदेषु। शस्यते॥ १॥

महेमहतेइन्द्रायसुवाचं शोभनांस्तुतिंनिप्रभरामहे नितरांप्रयुंज्महे उइतिपदपूरणः यतः विवस्वतः परिचरतोयजमानस्यसदनेयज्ञगृहेइन्द्रायगिरः स्तुतयःक्रियन्ते हियस्मात् सइन्द्रः नूचित्क्षिप्रमेवरत्नंरमणीयमसुराणांधनंअविदत् विन्दति तत्रदृष्टान्तः-ससतामिव यथास्वपतांपुरुषाणांधनंचोरःक्षिप्रंलभतेतद्वत् अतोस्मभ्यंधनंदातुंशक्तइतिभावः द्रविणोदेषुधनस्यदातृषुपुरुषेषु दुष्टुतिरसमीचीनास्तुतिर्नशस्यते नाभिधीयते अतःसुवाचंप्रभरामहइतिपूर्वेणसम्बन्धः॥ न्यूषुइत्यस्यउदात्तस्वरितयोर्यणइतिस्वरितत्वम् अत्रउदात्तपरत्वात्संहितायांकम्प्यते इकःसुञीति दीर्घत्वम् सुञइतिषत्वम्॥ महे महपूजायामित्यस्मात्क्विप्चेतिक्विप् सावेकाचइतिविभक्तेरुदात्तत्वम् यद्वा महच्छब्दस्याच्छब्दलोपश्छान्दसः।नूचित् ऋचितुनुघेत्यादिनादीर्घः। ससतामिव षस्वप्ने अस्माच्छत्रन्तादन्तोदात्तात्परस्या विभक्तेःशतुरनुमइत्युदात्तत्वम् इवेनविभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वंचेतिसमासः। अविदत् विद्लृलाभे छन्दसिलुङ्लङ्लिटइतिवर्तमानेलुङ् पुषादिद्युताद्यॢदितःपरस्मैपदेष्विति च्लेरङादेशः अडागमउदात्तः हिचेतिनिघातप्रतिषेधः।द्रविणोदेषु द्रविणानिधनानिददातीतिद्रविणोदाः द्रुगतावित्यस्मात् द्रुदक्षिभ्यामिनन्निती नन्प्रत्ययान्तोद्रविणशब्दः तस्मिन्कर्मण्युप-

पदेआतोनुपसर्गेकइतिकः पूर्वपदस्यसुगागमश्छान्दसः कदुत्तरपदप्रकृतिस्वरत्वम्। शस्यते शंसुस्तुतौ यकि अनिदितामितिनलोपः ॥ १ ॥

१. हम महापुरुष इन्द्र के उद्देश से शोभनीय-वाक्य प्रयोग करते हैं और सेवाव्रती यजमान के घर शोभनीय-स्तुति-वाक्य प्रयोग करते हैं। इन्द्र ने असुरों के धन पर उसी तरह तुरत अधिकार कर लिया, जिस तरह सोये हुए मनुष्यों के धन पर अधिकार जमाया जाता है। धनदाताओं को समीचीन स्तुति करनी चाहिए ।

दुरोअश्वस्यदुरइन्द्रगोरसिदुरोयवस्यवसुनइनस्पतिः ।
शिक्षानरःप्रदिवोअकामकर्शनःसखासखिभ्यस्तमिदंगृणीमसि॥ २ ॥

दुरः । अश्वस्य । दुरः । इन्द्र । गोः । असि । दुरः । यवस्य । वसुनः । इनः । पतिः । शिक्षाऽनरः । प्रऽदिवः । अकामऽकर्शनः । सखा । सखिऽभ्यः । तम् । इदम् । गृणीमसि ॥ २ ॥

हेइन्द्र त्वंअश्वस्यदुरोदातासि तथागोःपश्वादेर्दुरोदातासि तथायवस्ययवादेर्धान्यजातस्य दुरोदातासि वसुनःनिवासहेतोर्धनस्येनःस्वामीपतिःसर्वेषांपालयिता शिक्षानरःशिक्षतिर्दानकर्मा शिक्षायादानस्यनेतासि प्रदिवःपुराणः प्रगतादिवोदिवसायस्मिन्सतथोक्तःअकामकर्शनः कामान् कर्शयतिनाशयतीतिकामकर्शनःनकामकर्शनः अकामकर्शनःअव्ययपूर्वपदप्रकृतिस्वरत्वम्हविर्दत्तवतांयजमानानांकामानभिमतफलप्रदानेनपूरयतीत्यर्थः सखिभ्यःसमानख्यानेभ्यऋत्विग्भ्यः सखासखिवदत्यन्तंप्रियः एवंभूतोयइन्द्रस्तंप्रतिइदंस्तोत्रलक्षणंवचः गृणीमसिब्रूमहे ॥ दुरः दुदाञ्दाने मन्दिवाशिमथिचतिचक्यंकिभ्यउरजितिविधीयमानउरच्प्रत्ययोबहुलवचनादस्मादपिभवति अतएवाकारलोपः।शिक्षानरः शिक्षविद्योपादाने गुरोश्चहलइत्यकारप्रत्ययः ततष्टाप् षष्ठीसमासः समासस्येत्यन्तोदात्तत्वम् । गृणीमसि गृशब्दे क्र्यादिकः प्वादीनांह्रस्वइतिह्रस्वत्वम् इदन्तोमसिरितिमसेरिकारः॥ २ ॥

२. इन्द्र! तुम अश्व, गौ और यव आदि धान्य दान करो। तुम निवासहेतु, प्रभूत धन के स्वामी और रक्षक हो। तुम दान के नेता और प्राचीनतम देव हो। तुम कामना व्यर्थ नहीं करते, तुम याजकों के सखा हो। उन्हीं के उद्देश से हम यह स्तुति पढ़ते हैं।

शचीवइन्द्रपुरुकृद्द्युमत्तमतवेदिदमभितश्चेकितेवसु ।
अतःसंगृभ्याभिभूतआभरमात्वायतोजरितुःकाममूनयीः ॥३॥

शचीऽवः । इन्द्र । पुरुऽकृत् । द्युमत्ऽतम । तव । इत् । इदम् ।

अभितः । चेकिते । वसु । अतः । सम्ऽगृभ्य । अभिऽभूते । आ ।
भर । मा । त्वाऽयतः । जरितुः । कामम् । ऊनयीः ॥ ३ ॥

शचीवःशचीतिप्रज्ञानाम हेइन्द्र शचीवःप्रज्ञावन् पुरुकृत्प्रभूतस्यवृत्रवधादेःकर्तः द्युमत्तमअतिशयेनदीप्तिमन् अभितःसर्वत्रवर्तमानंवसुधनंयदस्ति तदिदंतवेवतवैवस्वभूतमितिचेकिते भृशमस्माभिर्ज्ञायते अतःकारणात्धनंसंगृभ्यसम्यक्गृहीत्वाअभिभूतेशत्रूणामभिभवितः आभरअस्मभ्यमाहरदेहीत्यर्थः त्वायतःत्वामात्मनइच्छतोजरितुःस्तोतुःकाममभिलाषंमाऊनयीः परिहीनंमाकार्षीःपूरयेत्यर्थः॥ शचीवः मतुवसोरुरितिरुत्वम् षाष्ठिकमामन्त्रितायुदात्तत्वम् इतरेष्वाष्टमिकंसर्वानुदात्तत्वम् नचामन्त्रितंपूर्वमविद्यमानवदितिअविद्यमानवत्त्वम् नामन्त्रितेसमानाधिकरणेइतिनिषेधात् । चेकिते कितज्ञाने अस्माद्यङन्ताद्वर्तमानेलिटिअमन्त्रेइतिनिषेधात् आम्प्रत्ययाभावेसतिलिटिआर्धधातुकत्वादतोलोपयलोपौ । संगृभ्यआभरेत्युभयत्र हृग्रहोर्भश्छन्दसीतिभत्वम्। त्वायतः त्वामात्मनइच्छति सुपआत्मनः क्यच् प्रत्ययोत्तरपदयोश्चेतिमपर्यन्तस्यत्वादेशः छान्दसमात्वं क्यजन्ताल्लटःशतृ तस्यअदुपदेशाल्लसार्वधातुकस्वरेणानुदात्तस्यएकादेशस्वरेणोदात्तत्वम् एकादेशस्वरोन्तरङ्गःसिद्धोभवतीतिवक्तव्यमितिवचनात् तस्यसिद्धत्वेसति शतुरनुमइत्यजादिविभक्तेरुदात्तत्वम् । कामं कमुकान्तौ इत्यस्माद्भावेघञ् कर्षात्वतइत्यन्तोदात्तत्वेप्राप्तेवृषादिषुपाठादाद्युदात्तत्वम् । ऊनयीः ऊनपरिहाणे चुरादिःलुङि णिश्रिद्रुस्रुभ्यइतिचेश्चङादेशस्य नोनयतिध्वनयतीत्यादिना प्रतिषेधः ह्यन्तक्षणेतिसिचिवृद्धिप्रतिषेधः ॥ ३ ॥

३. हे प्रज्ञावान्, प्रभूतकर्मा और अतिशय दीप्तिमान् इन्द्र! चारों ओर जो धन है, वह तुम्हारा ही है—यह हम जानते हैं। शत्रु-विध्वंसी इन्द्र! वही धन ग्रहण करके हमें दान करो। जो स्तोता तुम्हें चाहते हैं, उनकी अभिलाषा व्यर्थ न करना।

एभिर्द्युभिःसुमनाएभिरिन्दुभिर्निरुन्धानोअमतिंगोभिरश्विना ।
इन्द्रेणदस्युंदरयन्तइन्दुभिर्युतद्वेषसःसमिषारभेमहि ॥४॥

एभिः । द्युऽभिः । सुऽमनाः । एभिः । इन्दुऽभिः । निऽरुन्धानः ।
अमतिम् । गोभिः । अश्विना । इन्द्रेण । दस्युम् । दरयन्तः ।
इन्दुऽभिः । युतऽद्वेषसः । सम् । इषा । रभेमहि ॥ ४ ॥

हेइन्द्र एभिरस्माभिर्दत्तैर्द्युभिर्दीप्तैश्चरुपुरोडाशादिभिः एभिरिन्दुभिः पुरोवर्तिभिस्तुभ्यंदत्तैःसोमैश्चप्रीतस्त्वंअस्माकंअमतिंदारिद्र्यंगोभिस्त्वयादत्तैःपशुभिरश्विनाश्वयुक्तेनधनेनचनिरुन्धानोनिवर्तयन्सुमनाःशोभनमनाभव वयमिन्दुभिरस्माभिर्दत्तैःसोमैःप्रीतेनेन्द्रेणदस्युंउपक्षपयितारंशत्रुं दरयन्तोहिंसन्तःअतएवयुतद्वेषसः पृथग्भूतशत्रुकाभूत्वाइषाइन्द्रदत्तेनान्नेनसंरभेमहिसंरब्धाभवे-

मसङ्गच्छेमहीत्यर्थः ॥ सुमनाः शोभनंमनोयस्य सोमंनसीअल्लोमोषसीइत्युत्तरपदाद्युदात्तत्वम् । निरुन्धानः रुधिर्आवरणे स्वरितेत्त्वादात्मनेपदं श्नसोरल्लोपइत्यकारलोपः चितइत्यन्तोदात्तत्वम् कृदुत्तरपदप्रकृतिस्वरत्वम् । अमतिं मन्तव्यामतिःऐश्वर्यं न मतिःअमतिः अव्ययपूर्वपदप्रकृतिस्वरत्वम् नलोकाव्ययेतिषष्ठीप्रतिषेधः । अश्विना अश्वोस्यास्तीत्यश्विधनम् मत्वर्थीयइनिः ॥४॥

४. इन्द्र ! इस प्रकार हव्य और सोमरस से तुष्ट होकर गौ और घोड़े के साथ धन दान कर और हमारा दारिद्रय दूर कर प्रसन्नमना हो जाओ। इस सोमरस से तुष्ट इन्द्र की सहायता से हम दस्यु को ध्वंस कर और शत्रुओं से मुक्ति प्राप्त कर अच्छी तरह अन्न भोगेंगे।

समिन्द्ररायासमिषारभेमहिसंवाजेभिःपुरुश्चन्द्रैरभिद्युभिः ।
संदेव्याप्रमत्यावीरशुष्मयागोअग्रयाश्वावत्यारभेमहि ॥५॥१५॥

सम् । इन्द्र । राया । सम् । इषा । रभेमहि । सम् । वाजेभिः ।
पुरुऽचन्द्रैः । अभिद्युऽभिः । सम् । देव्या । प्रऽमत्या । वीरऽशुष्मया ।
गोऽअग्रया । अश्वऽवत्या । रभेमहि ॥ ५ ॥ १५ ॥

हेइन्द्र रायाधनेनवयंसंरभेमहिसंगच्छेमहि तथाइषाअन्नेनसंरभेमहि तथावाजेभिर्बलैःसंरभेमहि कीदृशैर्वाजैःपुरुश्चन्द्रैःपुरूणांबहूनामाह्लादकैः अभिद्युभिःअभितोदीप्यमानैःकिञ्च देव्या द्योतमानयाप्रमत्यात्वदीययाप्रकृष्टबुद्ध्यासंरभेमहि कीदृश्यावीरशुष्मया वीरंविशेषेणशत्रूणांक्षेपणसमर्थंशुष्मंबलंयस्याःसातथोक्ता गोअग्रयास्तोतृभ्योदानार्थमग्रे प्रमुखतएवगावोयस्याःसातथोक्ता अश्वावत्या अश्वैरुपेतया ॥ राया ऊडिदमित्यादिनाविभक्तेरुदात्तत्वम् । पुरुश्चन्द्रैः ह्रस्वाच्चन्द्रोत्तरपदेमन्त्रेइतिसुट् श्चुत्वेनशकारः समासस्वरः । अभिद्युभिः अभिगताद्यौर्दीप्तिर्येषां अत्रदिवुशब्दोदीप्तिंलक्षयतिअव्ययपूर्वपदप्रकृतिस्वरत्वम् । देव्या उदात्तयणइतिविभक्तेरुदात्तत्वम् । प्रमत्या तादौचनितीतिगतेःप्रकृतिस्वरत्वम् उत्तरयोःबहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । सर्वत्रविभाषागोरितिगोअग्रयेत्यत्रप्रकृतिभावः । अश्वावत्या मन्त्रेसोमाश्वेन्द्रियेतिमतुपिदीर्घत्वम् ॥ ५ ॥

५. इन्द्र ! हम धन, अन्न और आह्लादकर और दीप्तिमान् बल पावें। तुम्हारी प्रकाशमान सुमति हमारी सहायिका हो। वह सुमति वीर शत्रुओं का शोषण करे। वह स्तोताओं को गौ आदि पशु और अश्व दान करे।

षष्ठीमृचमाह—

तेत्वामदाअमदन्तानिवृष्ण्यातेसोमासोवृत्रहत्येषुसत्पते ।
यत्कारवेदशवृत्राण्यप्रतिबर्हिष्मतेनिसहस्राणिबर्हयः ॥६॥

ते । त्वा । मदाः । अमदन् । तानि । वृष्ण्या । ते । सोमासः ।
वृत्रऽहत्येषु । सत्ऽपते । यत् । कारवे । दश । वृत्राणि । अप्रति ।
बर्हिष्मते । नि । सहस्राणि । बर्हयः ।॥ ६ ॥

हेसत्पतेसतांपालयितरिन्द्र वृत्रहत्येषुवृत्रहननेषुनिमित्तभूतेषुसत्सुतेपूर्वोक्तामदाः मादकामरुतःत्वात्वाममदन्अमदयन् हर्षमापयन् तानिपूर्वोक्तानिवृष्ण्यावृष्णःसेचनसमर्थस्यतवसम्बन्धीनिचरुपुरोडाशादीनिहवींषित्वाममदन् तेसोमासः प्रसिद्धाः सोमाश्चत्वाममदन् यद्यदा कारवेस्तुतिकर्त्रेबर्हिष्मतेयज्ञवतेयजमानाय दशसहस्राणिअपरिमितानिवृत्राण्यावरकाणिउपद्रवजातानि अप्रति शत्रुभिरप्रतिगतस्त्वंनिबर्हयः न्यवधीःतदानीमितिपूर्वेणसम्बन्धः ॥ वृष्ण्या शेश्छन्दसिबहुलमितिशेर्लोपः । बर्हयः बर्हयतिर्हिंसाकर्मा लङि बहुलंछन्दस्यमाङ्योगेपीत्यडभावः शपःपित्वादनुदात्तत्वे णिचएवस्वरःशिष्यते यद्वृत्तयोगादनिघातः ॥ ६ ॥

६. साधु-रक्षक इन्द्र ! वृत्रासुर के वध के समय तुम्हारे आनन्ददाता मरुद्गण ने तुम्हें प्रसन्न किया था। वर्षक इन्द्र ! जिस समय तुमने शत्रुओं-द्वारा अप्रतिहत होकर स्तोता और हव्यदाता यजमान के लिए दस हज़ार उपद्रवों का विनाश किया था, उस समय विविध हव्य और सोमरस ने तुम्हें हृष्ट किया था।

युधायुधमुपघेदेषिधृष्णुयापुरापुरंसमिदंहंस्योजसा ।
नम्यायदिन्द्रसख्यापरावतिनिबर्हयोनमुचिंनाममायिनम् ॥७॥

युधा । युधम् । उप । घ । इत् । एषि । धृष्णुऽया । पुरा । पुरम् ।
सम् । इदम् । हंसि । ओजसा । नम्या । यत् । इन्द्र । सख्या ।
पराऽवति । निऽबर्हयः । नमुचिम् । नाम । मायिनम् ॥ ७ ॥

हेइन्द्र धृष्णुयाशत्रूणांधर्षकस्त्वं युधायुद्धेनसम्बद्धंयुधंयुद्धंउपघेदेषिउपैवगच्छसि सर्वदायुद्धशीलोभवसीत्यर्थः घेतिपदपूरणः शत्रूणामसुराणांपुरापुरेणनगरेणसहइदंपुरोवर्तिपुरंशत्रुनगरंओजसाबलेनसंहंसिसम्यक्विनाशयसि शत्रूणांपुराण्यभैत्सीरित्यर्थः हेइन्द्र त्वंनम्याशत्रुणांनमनशीलेनसख्यासहायभूतेनवज्रेणपरावतिदूरदेशेनमुचिंनाम अनयासंज्ञयाप्रसिद्धंमायिनंमायाविनमसुरंयद्यस्मान्निबर्हयः नितरामहिंसीः अतस्त्वमेवंस्तूयसइत्यर्थः ॥ युधा युधसम्प्रहारे सम्पदादिलक्षणोभावेक्विप् सावेकाचइतिविभक्तेरुदात्तत्वम् । एषि इण्गतौ अदादित्वाच्छपोलुक् । धृष्णुयाञिधृषाप्रागल्भ्ये त्रसिगृधिधृषिक्षिपेःक्नुरितिक्नुःप्रत्ययः किच्चाद्गुणाभावः सुपांसुलुगितिसोर्यादेशः चितइत्यन्तोदात्तत्वम् । पुरा पॄपालनपूरणयोः पूरयतिराज्ञामभिमतानीति क्विप्चेतिक्विप्

उदोष्ठ्यपूर्वस्येत्युत्वम् सावेकाचइतिविभक्तिरुदात्ता । हंसि हन्तेर्लटिसिपिअदादित्वाच्छपोलु-किनश्चापदान्तस्यझलीत्यनुस्वारः । नम्या णमप्रह्वत्वे औणादिकइन्प्रत्ययः सुपांसुलुगितितृती-यायाडयादेशः टिलोपः । सख्या शेषोघ्यसखीतिघिसंज्ञाप्रतिषेधान्नाभावाभावेयणादेशः । नमु-चिं इन्द्रेणसहयुद्धंनमुञ्चतीतिनमुचिः औणादिकःकिःप्रत्ययः नभ्राण्नपादित्यादिनानञःप्रकृति-भावः नञ्नगतिर्नचकारकमितिकृदुत्तरपदप्रकृतिस्वरत्वाभावेव्ययपूर्वपदप्रकृतिस्वरत्वम् । मा-यिनं मायाशब्दस्यव्रीह्यादिषुपाठात् मत्वर्थीयइनिः ॥ ७ ॥

७. इन्द्र ! तुम शत्रुओं के धर्षणकारी हो। तुम युद्धान्तर में जाते हो। तुम बल से एक नगर के बाद दूसरे नगर का ध्वंस करते हो। इन्द्र ! तुमने, दूर देश में, वज्र सहायता से नमुचि नामक मायावी का वध किया था।

त्वंकरंञ्जमुतपर्णयंवधीस्तेजिष्ठयातिथिग्वस्यंवर्तनी ।
त्वंशतावंगृदस्याभिनत्पुरोनानुदःपरिषूताऋजिश्वना ॥८॥

त्वम् । करंञ्जम् । उत । पर्णयम् । वधीः । तेजिष्ठया । अतिथिऽग्वस्य । वर्तनी । त्वम् । शता । वंगृदस्य । अभिनत् । पुरः । अननुऽदः । परिऽसूताः । ऋजिश्वना ॥ ८ ॥

हेइन्द्र त्वंकरंजमेतत्संज्ञकमसुरं उतअपिचपर्णयंएतन्नामानमसुरंच अतिथिग्वस्यएतत्संज्ञ-स्यराज्ञःप्रयोजनाय तेजिष्ठया अतिशयेनतेजस्विन्यावर्तनीवर्तन्याशत्रुप्रेरणकुशलयाशक्त्या वधीः हतवानसि तथाअननुदः अनुपश्चाव द्यतिखण्डयतीत्यनुदोनुचरः तादृशानुचररहितः एकएवत्वं ऋजिश्वना एतत्संज्ञेन राज्ञापरिभूताःपरितोवष्टब्धाः शताशतानिशतसंख्याकाः वङ्गृदस्यए-तत्संज्ञस्यासुरस्यपुरः पुराणि नगराणि अभिनत् बिभिदिषे॥वधीः हन्तेर्लुङि सिपि लुङिचेतिव-धादेशः तस्यादन्तत्वाद्वृद्ध्यभावः अतएवानेकाच्त्वादिट्प्रतिषेधाभावः इटईटीतिसिचोलोपः । ते-जिष्ठया तेजस्शब्दादस्मायामेधेतिमत्वर्थीयोविनिः तस्मादातिशायनिकेइष्ठनिविन्मतोर्लुगि-तिविनोलुक् टेरितिटिलोपः नित्त्वादाद्युदात्तत्वम् । वर्तनी वृत्यन्तेप्रेर्यन्तेऽनयेतिवर्तनी करणेल्युट् टित्त्वान्ङीप् सुपांसुलुगितिविभक्तेःपूर्वसवर्णदीर्घत्वम् व्यत्ययेनान्तोदात्तत्वम् । अभिनत् भिदिर्विदारणे लङिसिपिरुधादित्वाच्श्नम् इतश्चेतीकारलोपः हल्ङ्याभ्यइतिसकारलोपः । अननुदः दोअवखण्डने आदेचइत्यात्वम् आतश्चोपसर्गेइतिकप्रत्ययः नास्त्यनुदोस्येतिबहुव्री-हौ नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् संहितायांदीर्घश्छान्दसः । परिषूताः षूप्रेरणे कर्मणि निष्ठा गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम् ॥ ८ ॥

८. तुमने अतिथिग्व नाम के राजा के लिए करंज और पर्णय नामक असुरों को, तेजस्वी शत्रुनाशक अस्त्र से, वध किया था। अनन्तर तुमने अकेले ऋजिश्वान् नामक राजा के द्वारा चारों ओर वेष्टित वंगृद नामक असुर के शतसंख्यक नगरों को उच्छिन्न किया था।

नवमीमृचमाह—

त्वमे॒ताञ्ज॑नरा॒ज्ञो द्विर्दशा॑ब॒न्धुना॑ सु॒श्रव॑सोपज॒ग्मुषः॑ ।
ष॒ष्टिं स॒हस्रा॑ नव॒तिं नव॑ श्रु॒तो नि च॒क्रेण॒ रथ्या॑ दु॒ष्पदा॑वृणक् ॥ ९ ॥

त्वम् । ए॒तान् । ज॒न॒ऽरा॒ज्ञः । द्विः । दश॑ । अ॒ब॒न्धुना॑ । सु॒ऽश्रव॑सा ।
उ॒प॒ऽज॒ग्मुषः॑ । ष॒ष्टिम् । स॒हस्रा॑ । न॒व॒तिम् । नव॑ । श्रु॒तः । नि ।
च॒क्रेण॑ । रथ्या॑ । दुः॒ऽपदा॑ । अ॒वृ॒ण॒क् ॥ ९ ॥

हेइन्द्र श्रुतोविश्रुतःप्रख्यातस्त्वं द्विर्दश विंशतिसंख्याकान्अबन्धुना बन्धुरहितेनसहायरहितेन सुश्रवसाएतत्संज्ञकेनराज्ञायुद्धार्थमुपजग्मुषः उपगतवतः एतानेवंविधान्जनराज्ञोजनपदानामधिपतीन् षष्टिमित्यादिनातेषांराज्ञामनुचरसंख्योच्यते षष्टिंसहस्रा सहस्राणांषष्टिं नवतिंनव नवसंख्योत्तरांनवतिं तान्राज्ञईदृक्संख्याकान् अनुचरांश्चरथ्यारथसम्बन्धिनादुष्पदादुष्प्रपदनेनशत्रुभिः प्राप्तुमशक्येनेत्यर्थः ईदृशेनचक्रेणन्यवृणक्न्यवर्जयः त्वांस्तुवतःसुश्रवसोजयार्थं त्वमागत्यतदीयान्शत्रूनजैषीरित्यर्थः ॥ जनराज्ञः समासान्तविधेरनित्यत्वाट्टच्प्रत्ययाभावः राजन्शब्दोराजृदीप्तावित्यस्मात्कनिन्प्रत्ययान्तआद्युदात्तः कृदुत्तरपदप्रकृतिस्वरत्वेनसएवशिष्यते । अबन्धुना नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । सुश्रवसा शोभनंश्रवोन्नंयस्य आद्युदात्तंद्व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वम् । उपजग्मुषः गमेर्लिटःक्वसुः शसिभसंज्ञायांवसोःसम्प्रसारणमितिसम्प्रसारणम् परपूर्वत्वम् गमहनेत्यादिनोपधालोपःशासिवसिघसीनांचेतिषत्वम् कृदुत्तरपदप्रकृतिस्वरत्वेनक्वसोरेवस्वरःशिष्यते । रथ्या रथस्येदंरथ्यं रथाद्यदितियत् यतोनावइत्याद्युदात्तत्वम् सुपांसुलुगितिविभक्तेराकारः । दुष्पदा पदगतौ ईषद्दुःसुष्विति खल् लितीतिप्रत्ययात्पूर्वस्योदात्तत्वम् पूर्ववद्विभक्तेराकारः । अवृणक् वृजीवर्जने रौधादिकः लङिमध्यमैकवचनेहल्ङ्याब्भ्यइतिसिचोलोपः चोःकुरितिकुत्वम् ॥ ९ ॥

९. असहाय सुश्रवा नामक राजा के साथ युद्ध करने के लिए जो बीस नरपति और उनके साठ हजार निन्यानबे अनुचर आये थे, प्रसिद्ध इन्द्र ! तुमने शत्रुओं के अलंघ्य चक्रों-द्वारा उनको पराजित किया था।

दशमीमृचमाह—

त्वमा॑विथ सु॒श्रव॑सं॒ तवो॒तिभि॒स्तव॒ त्राम॑भिरिन्द्र॒ तूर्व॑याणम् ।
त्वम॑स्मै॒ कुत्स॑मतिथि॒ग्वमा॒युं म॒हे राज्ञे॒ यूने॑ अरन्धनायः ॥१०॥

त्वम् । आ॒वि॒थ॒ । सु॒ऽश्रव॑सम् । तव॑ । ऊ॒तिऽभिः॑ । तव॑ । त्राम॑ऽभिः ।
इ॒न्द्र॒ । तूर्व॑याणम् । त्वम् । अ॒स्मै॒ । कुत्स॑म् । अ॒ति॒थि॒ऽग्वम् । आ॒युम् ।
म॒हे । राज्ञे॑ । यूने॑ । अ॒र॒न्ध॒ना॒यः॒ ॥१०॥

हेइन्द्र त्वंतवोतिभिः त्वदीयैःपालनैः सुश्रवसंपूर्वोक्तंराजानमाविथररक्षिथ तथातूर्वयाणमेतन्नामानंराजानं तवत्रामभिस्त्वदीयैस्त्रायकैःपालकैर्बलैराविथेतिशेषः किञ्च त्वंमहेमहतेयूने तरुणायास्मैसुश्रवसेराज्ञेकुत्सादींस्त्रीन्राज्ञःअरन्धनायःवशमनयः रध्यतिर्वशगमनइतियास्कः ॥ त्रामभिः त्रैङ्पालने आदेचइत्यात्वम् आतोमनिन्निति मनिन् निस्वादाद्युदात्तत्वम् ।अरन्धनायः रन्धनंवशीकरणंकरोति रन्धनयति तत्करोतीतिणिच् इष्ठवण्णौप्रातिपदिकस्येतीष्ठवद्भावात्टिलोपः लुङिसिपिदीर्घश्छान्दसः॥१०॥

१०. तुमने अपनी रक्षा-शक्ति के द्वारा सुश्रवा राजा की रक्षा की थी। तूर्वयान राजा को अपनी परित्राण-शक्ति द्वारा बचाया था। तुमने कुत्स, अतिथिग्व और आयु राजाओं को महान् युवक सुश्रवा राजा के अधीन किया था।

ये उद्‌वृचीन्द्रदेवगोपाःसखायस्तेशिवतमाअसाम ।
त्वांस्तोषामत्वयासुवीराद्राघीयआयुःप्रतरंदधानाः ॥११॥१६॥

ये । उत्ऽऋचि । इन्द्र । देवऽगोपाः । सखायः । ते । शिवऽतमाः । असाम । त्वाम् । स्तोषाम । त्वया । सुऽवीराः । द्राघीयः । आयुः । प्रऽतरम् । दधानाः ॥ ११ ॥ १६ ॥

हेइन्द्र येवयं उदृचिउदर्केयज्ञसमाप्तौवर्तमानाःदेवगोपाःदेवैःपालिताःतेतवसखायःसखिवदत्यन्तंप्रियाः अतएवशिवतमाअसाम अतिशयेनकल्याणाअभूम तेवयंयज्ञसमाप्त्युत्तरकालमपित्वां स्तोषामस्तवाम अस्माभिःस्तुतेनत्वयासुवीराः शोभनपुत्रवन्तःसन्तःद्राघीयोतिशयेनदीर्घमायुर्जीवनंप्रकरंप्रकृष्टतरंयथाभवतितथादधानाःधारयन्तोभूयास्म॥ देवगोपाः देवागोपायेषां बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । असाम असभुवि लुङर्थेलेटिआडुत्तमस्यपिच्चेतिपिद्वद्भावात्पिच्चङिन्नेविङित्त्वाभावेश्नसोरल्लोपइत्यकारलोपाभावः पित्त्वादेवतिङोनुदात्तत्वम् धातुस्वरःशिष्यते। स्तोषाम स्तौतेर्लेटि सिब्बहुलंलेटीतिबहुलग्रहणात् लोटचपिसिप् तस्यपित्त्वाद्गुणः।सुवीराः वीरवीर्यौचेत्युत्तरपदाद्युदात्तत्वम् । द्राघीयः दीर्घशब्दादीयसुनिप्रियस्थिरेत्यादिनाद्राघादेशः नित्त्वादाद्युदात्तत्वम्।प्रतरम् प्रशब्दात्तरपि अमुचच्छन्दसीत्यद्रव्यप्रकर्षेअमुप्रत्ययः प्रत्ययस्वरेणान्तोदात्तत्वम् । दधानाः दधातेः शानचि अभ्यस्तानामादिरित्याद्युदात्तत्वम् ॥ ११ ॥

११. इन्द्र! तुम्हारे मित्ररूप हम यज्ञ-समाप्ति में विद्यमान हैं। हम देवों-द्वारा पालित हुए हैं। हम मङ्गलमय हैं। हम तुम्हारी स्तुति करते हैं। तुम्हारी कृपा से हम शोभनीय पुत्र पावें और उत्तम रूप से दीर्घ जीवन धारण करें।

नि० ६. ३२.।

मानइत्येकादशर्चंचतुर्थंसूक्तम् षष्ठ्यष्टमीनवम्येकादश्यस्त्रिष्टुभः शिष्टाःसप्तजगत्यःसव्य-ऋषिः इन्द्रोदेवता तथाचानुक्रान्तम्—मानोन्त्यात्रिष्टुप्षष्ठ्यष्टमीनवमीचेति अतिरात्रेप्रथमपर्याये-च्छावाकशस्त्रेइदंसूक्तं तथाचसूत्रितम्—मानोअस्मिन्मघवन्त्विन्द्रपिबतुभ्यंसुतोमदायेतियाज्येति।

तत्रप्रथमामृचमाह—

मानोअस्मिन्मघवन्पृत्स्वंहसिनहितेअन्तःशवसःपरीणशे।
अक्रन्दयोनद्योरोरुवद्वनाकथानक्षोणीर्भियसासमारत ॥१॥

मा। नः। अस्मिन्। मघऽवन्। पृत्ऽसु। अंहसि। नहि। ते। अन्तः। शवसः। परिऽनशे। अक्रन्दयः। नद्यः। रोरुवत्। वना। कथा। न। क्षोणीः। भियसा। सम्। आरत ॥ १ ॥

हेमघवन् धनवन्निन्द्र अस्मिन्परिदृश्यमानेअंहसिपापेपृत्सुपृतनासुपापफलभूतेषुसङ्ग्रामेषु चनोस्मान्मामक्षैप्सीरितिशेषः यस्मात्तेतवशवसोबलस्यान्तोवसानं परीणशेपरितोव्याप्तुंनहिश-क्यतेसर्वोपिजनस्त्वदीयंबलंअतिक्रमितुंनशक्नोतीत्यर्थः तस्मात्त्वंअन्तरिक्षेवर्तमानोरोरुवदत्य-र्थंशब्दंकुर्वन्नद्योनदीः वना तत्सम्बन्धीन्युदकानिचाक्रन्दयः शब्दयसि क्षोणीः क्षोण्यः क्षो-णीतिपृथिवीनाम तदुपलक्षितास्त्रयोलोकाः भियसात्वद्भयेनकथाकथंनसमारतसङ्गच्छन्ते त्वदी-यंबलमवलोक्यत्रयोपिलोकाबिभ्यतीतिभावः ॥ पृत्सु पदादिषुमांस्पृत्स्नूनामुपसंख्यानमितिपृ-तनाशब्दस्यपृद्भावः। परीणशे नशतिर्व्याप्तिकर्मा कृत्यार्थेतवैकेनितिकेन्प्रत्ययः नित्त्वादाद्यु-दात्तत्वम् निपातस्यचेतिपूर्वपदस्यदीर्घत्वम्। नद्यः द्वितीयार्थेप्रथमा। रोरुवत् रुशब्दे यङ्लुग-न्ताल्लटःशतृ अदादिवच्चेतिवचनाच्छपोलुक् शतुर्ङित्त्वाद्गुणाभावेउवङादेशः नाभ्यस्ताच्छतुरि-तिनुम्प्रतिषेधः अभ्यस्तानामादिरित्याद्युदात्तत्वम्। कथा थाहेतौचच्छन्दसीतिकिम्शब्दात्प्र-कारवचनेथाप्रत्ययः तस्यविभक्तिसंज्ञायां किमःकइतिकादेशः। आरत ऋगतौ समोगम्यृच्छी-त्यात्मनेपदं छान्दसेवर्तमानेलङिअदादित्वाच्छपोलुक् झस्यादादेशः अडागमोवृद्धिश्च ॥ १ ॥

१. मघवन्! इस पाप में, इस युद्ध-समुदाय में, हमें नहीं प्रक्षेप करना; क्योंकि तुम्हारे बल की अनन्तता है। तुम अन्तरीक्ष में रहकर और अत्यन्त शब्द कर नदी के जल को शब्दायमान करते हो। तब फिर पृथिवी क्यों न भय पाये?

अर्चाशक्रायशाकिनेशचीवतेशृण्वन्तमिन्द्रंमहयन्नभिष्टुहि।
योधृष्णुनाशवसारोदसीउभेवृषावृषत्वावृषभोन्यृञ्जते ॥ २॥

अर्च । शक्राय॑ । शाकिने॑ । शची॑ऽवते । शृण्वन्त॑म् । इन्द्र॑म् । मह॒यन्॑ । अ॒भि । स्तु॒हि॒ । यः । धृ॒ष्णुना॑ । शव॑सा । रोद॑सी॒ इति॑ । उ॒भे इति॑ । वृषा॑ । वृष॒ऽत्वा । वृ॒ष॒भः । नि॒ऽऋ॒ञ्जते॑ ॥ २ ॥

हेअध्वर्यो शाकिनेशक्तियुक्तायशचीवतेप्रज्ञावतेशक्रायेन्द्रायार्च एवंविधमिन्द्रंपूजय किञ्च स्तुतीःशृण्वन्तंसमीचीनेयंस्तुतिरितिजानन्तंतमिन्द्रंमहयन् पूजयन् अभिष्टुहिआभिमुख्येनतस्य स्तोत्रंकुरु यइन्द्रः धृष्णुनाशत्रूणांधर्षकेणशवसाबलेनउभेरोदसीद्यावापृथिव्यौन्यृञ्जतेनितरांप्र-साधयति ऋञ्जतिःप्रसाधनकर्मेतियास्कः । सइन्द्रः वृषासेचनसमर्थःवृषत्वावृषत्वेनअनेनैवसेच-नसामर्थ्येनवृषभोवर्षिताकामानां यद्वा वृष्ट्युदकानाम् ॥ अर्च शपःपित्त्वादनुदात्तत्वेधातुस्वरः द्व्य-चोतस्तिङइतिदोर्घत्वम् । शाकिने शक्तिःशाकः शकॄशकौ भावेघञ् मत्वर्थीयइनिः क्रियाग्रहणं-कर्तव्यमितिकर्मणःसम्प्रदानत्वाच्चतुर्थी । अभिष्टुहि स्तौतेरदादित्वाच्छपोलुक् उपसर्गात्सुनोती-तिषत्वम् ष्टुनाष्टुरितिष्टुत्वम् । वृषत्वा सुपांसुलुगितिविभक्तेराकारः । न्यृञ्जते ऋजिभृजीभर्जने इ-दित्त्वान्नुम् शपिप्राप्तेव्यत्ययेनशः ॥ २ ॥

२. शक्तिशाली और बुद्धिमान् इन्द्र की पूजा करो। वह स्तुति सुनते हैं। उनकी पूजा करके स्तुति करो। जो इन्द्र शत्रुजयी बल के द्वारा द्युलोक और पृथिवीलोक को अलंकृत करते हैं, वे वर्षा-धिधाता हैं, वर्षण-शक्ति-द्वारा वृष्टि दान करते हैं।

तृतीयामृचमाह—

अर्चा॑ दि॒वे बृ॑ह॒ते शू॒ष्यं[१] वचः॒ स्वक्ष॑त्रं॒ यस्य॑ धृष॒तो धृ॒षन्मनः॑ ।
बृ॒हच्छ्र॑वा॒ असु॑रो ब॒र्हणा॑ कृ॒तः पु॒रो हरि॑भ्यां वृष॒भो रथो॒ हि षः ॥ ३ ॥

अर्च॑ । दि॒वे । बृ॒ह॒ते । शू॒ष्य॑म् । वचः॑ । स्वऽक्ष॑त्रम् । यस्य॑ । धृ॒ष॒तः । धृ॒षत् । मनः॑ । बृ॒हत्ऽश्र॑वाः । असु॑रः । ब॒र्हणा॑ । कृ॒तः । पु॒रः । हरि॑ऽभ्याम् । । वृ॒ष॒भः । रथः॑ । हि । सः ॥ ३ ॥

हेस्तोतः दिवेदीप्तायबृहतेमहतेइन्द्रायशूष्यं शूषमितिसुखनाम तत्रसाधुशूष्यंतादृशं स्तुतिल-क्षणंवचःअर्चउच्चारय यस्येन्द्रस्यधृषतःशत्रूनधर्षयतःस्वक्षत्रंस्वभूतबलवत्मनोधृषत्धृष्टंभवति हिषः सहि सखल्विन्द्रः बृहच्छ्रवाःप्रभूतयशाःअसुरःशत्रूणांनिरसिता यद्वा असुःप्राणोत्रलंवात-द्वान् रोमत्वर्थीयः अथवाअसवः प्राणाः तेनचापोलक्ष्यन्ते प्राणावाआपइतिश्रुतेः । तान्रातिददा-तीत्यसुरः बर्हणाशत्रूणांनिबर्हयिता हरिभ्यामश्वाभ्यांपुरस्कृतःपूजितः वृषभः कामानांवर्षिता र-थोरंहणशीलः ॥ शूष्यं तत्रसाधुरितियत् सर्वेविधयश्छन्दसिविकल्प्यन्तेइतियतोनावइत्याद्युदा-

१ नि० ६. २१। २ तै० ब्रा० ३. २. ५।

त्त्वाभावेतित्स्वरितइतिस्वरितत्वम्। धृषतः ञिधृषाप्रागल्भ्ये व्यत्ययेनशः शतुरनुमइतिविभक्तेरु-दात्तत्वम्। बृहच्छ्रवाः बृहच्छ्रवोयस्य बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्। असुरः असुक्षेपणे असे-रुरन्नित्युरन्प्रत्ययः नित्त्वादाद्युदात्तत्वम्। बर्हणा सुपांसुलुगितिविभक्तेराकारः। पुरः पूर्वाधरे-त्यादिनाअसिप्रत्ययान्तोन्तोदात्तः ॥३ ॥

३. जो इन्द्र शत्रुजयी और अपने बल में दृढ़मना हैं, उन्हीं महान् और दीप्तिमान् इन्द्र के उद्देश से झुककर स्तुति-वाक्य उच्चारण करो; क्योंकि इन्द्र प्रभूत-यशःशाली और असुर अर्थात् बलशाली हैं। इन्द्र शत्रुओं को दूर करते हैं। इन्द्र अश्व-द्वारा सेवित, अभीष्टवर्षी और वेगवान् हैं।

त्वंदिवोबृ॑हृतःसानु॑कोपयोवत्मनाधृषताशंबरंभिनत्।
यन्मायिनो॑व्रन्दिनो॑मन्दिनाधृषच्छितांगभ॑स्तिमशनि॑पृतन्यसि॑॥ ४ ॥

त्वम्। दिवः। बृहतः। सानु॑। कोपयः। अव। त्मना। धृषता। शम्बरम्। भिनत्। यत्। मायिनः। व्रन्दिनः। मन्दिना। धृषत्। शिताम्। गभ॑स्तिम्। अशनि॑म्। पृतन्यासि॑॥ ४ ॥

हेइन्द्र त्वंबृहतोमहतोदिवोद्युलोकस्यसानुसमुच्छ्रितंउपरिप्रदेशंकोपयः अकम्पयः धृषताश-त्रूणांधर्षयित्रा त्मनाआत्मनास्वयमेवशंबरंएतत्संज्ञमसुरंअवाभिनत् अवधीः यत्यदाव्रन्दिनः शत्रून्जेतुंमृदुभावंप्राप्तान् यद्वा वृन्दंसमूहः असुरसमूहवतोमायिनोमायाविनोसुरान्मन्दिनाहृष्टेन धृषत् धृषतामागल्भ्यंप्राप्नुवतामनसायुक्तस्त्वं शितांतीक्ष्णीकृतांगभस्तिहस्तेनगृहीतां यद्वा गभस्ति-रितिरश्मिनाम तद्वतींअशनिंवज्रंपृतन्यसितानसुरान्जेतुंपृतनारूपेणेच्छसितान्प्रतिप्रेरयसीत्यर्थः तदानींबृहतोदिवः सानुकोपयइतिपूर्वेणान्वयः॥ कोपयः कुपकोपे ण्यन्ताल्लङि बहुलंछन्दस्यमा-ङ्योगेपीत्यडभावः। त्मना मन्त्रेष्वाङ्यादेरात्मनइत्याकारलोपः। धृषत् सुपांसुलुगितितृतीयाया-लुक्। शितां शोतनूकरणे निष्ठायां शाच्छोरन्यतरस्यामितीकारादेशः। पृतन्यसि पृतनाशब्दा-त्सुपआत्मनःक्यच् कव्यध्वरपृतनस्येत्यन्तलोपः प्रत्ययस्वरः॥ ४ ॥

४. इन्द्र! तुमने महान् आकाश के ऊपर का प्रदेश कम्पित किया है; तुमने अपनी शत्रु-विध्वंसिनी क्षमता के द्वारा शम्बर असुर का वध किया है। तुमने हृष्ट और उल्लसित मन से तीक्ष्ण और रश्मि-युक्त वज्र को दलबद्ध मायावियों के विरुद्ध प्रेरित किया है।

नियद्वृणक्षिश्वसनस्यमूर्धनिशुष्णस्यचिद्व्रन्दिनोरोरुवद्वना।
प्राचीनेनमनसाबर्हणावतायदद्याचित्कृणवःकस्त्वापरि॥५॥१७॥

नि । यत् । वृणक्षि । श्वसनस्य । मूर्धनि । शुष्णस्य । चित् ।
व्रन्दिनः । रोरुवत् । वना । प्राचीनेन । मनसा । बर्हणाऽवता ।
यत् । अद्य । चित् । कृणवः । कः । त्वा । परि ॥ ५ ॥ १७ ॥

हेइन्द्र त्वंरोरुवत्मेघैरत्यर्थंशब्दयन् श्वसनस्य अन्तरिक्षेश्वसितीतिश्वसनोवायुः तस्यव्रन्दिनःस्वकिरणैराम्रफलादीन्मृदूभावंमापयतःशुष्णस्यचिद्रसानांशोषयितुरादित्यस्यापिमूर्धन्युपरिप्रदेशेवनावनान्युदकानियद्यस्माच्चिवृणक्षिआवर्जयसिप्रापयसीत्यर्थःवायुनासूर्यकिरणैश्चवृष्ट्याआपःसूर्यस्योपरिपुनरवस्थाप्यन्ते तदेवावस्थापनमिन्द्रःकरोतीत्युपचर्यते प्राचीनेनप्रकर्षेण गत्राअपराङ्मुखेनेत्यर्थः बर्हणावता निबर्हयतीतिवधकर्मसुपाठाद्बर्हणाशत्रूणांहिंसा तद्वता एवंभूतेनमनसायुक्तस्त्वंयद्यस्मादद्याचिदद्यापिकृणवःघर्मकालेसूर्यस्योपरिभौमान्रसानवस्थापयसि वर्षासुचवर्षयसि यस्मादेतत्कुरुषेतस्मात्कारणात्त्वात्वांपर्युपरिकोवर्ततेनकोपीत्यर्थः अतस्त्वमेवसर्वाधिकइतिभावः ॥ वृणक्षि वृजीवर्जने रौधादिकः शपःपित्स्वादनुदात्तत्वेविकरणस्वरः यद्वृत्तयोगादनिघातः । प्राचीनेन प्रपूर्वादञ्चतेःऋत्विगित्यादिनाक्विनि अनिदितामितिनलोपः विभाषाञ्चेरदिक्स्त्रियामितिस्वार्थेखः खस्येनादेशः अचइत्यकारलोपेचावितिदीर्घत्वम् खप्रत्ययस्य सतिशिष्टत्वात्तदादेशस्योपदेशिवद्भावेनेकारउदात्तः। अद्याचिद् निपातस्यचेतिदीर्घत्वम्।कृणवः कृविहिंसाकरणयोश्च इदित्त्वान्नुम् लेटिसिप्यडागमः धिन्विकृण्व्योरचेत्युप्रत्ययः वकारस्याकारादेशश्च तस्यातोलोपेसतिस्थानिवद्भावाल्लघूपधगुणाभावः गुणावादेशौ आगमानुदात्तत्वेविकरणस्वरः । व्रन्दिनः अत्रनिरुक्तम्—व्रन्दीव्रन्दतेर्मृदूभावकर्मणोनिवृणक्षियच्छ्वसनस्यमूर्धनिशब्दकारिणःशुष्णस्यादित्यस्यशोषयितूरोरूयमाणोवनानीतिवाधनानीतिवेति[1] । धनानीतिपक्षे मेघस्यधनानीतिव्याख्येयम् ॥ ५ ॥

५. इन्द्र! तुमने मेघ-गर्जन-द्वारा शब्द करके वायु के ऊपर और जल-शोषक तथा जल-परिपाककारी सूर्य के मस्तक पर जल वर्षण किया है। तुम्हारा मन अपरिवर्त्तनशाली और शत्रु विनाश परायण है। तुमने आज जो काम किया है, उससे तुम्हारे ऊपर कौन है? अर्थात् तुम्हारे ऊपर कोई नहीं—तुम्हीं सर्व-श्रेष्ठ हो।

षष्ठीमृचमाह—

त्वमाविथनर्यंतुर्वशंयदुंत्वंतुर्वीतिंवय्यंशतक्रतो ।
त्वंरथमेतशंकृत्व्येधनेत्वंपुरोनवतिंदंभयोनव ॥ ६ ॥

---

१ नि० ५. १५.

त्वम् । आविथ । नर्यम् । तुर्वशम् । यदुम् । त्वम् । तुर्वीतिम् ।
वय्यम् । शतक्रतो इति शतऽक्रतो । त्वम् । रथम् । एतशम् ।
कृत्व्ये । धने । त्वम् । पुरः । नवतिम् । दंभयः । नव ॥ ६ ॥

हेइन्द्र त्वंनर्यादींस्त्रीन्राज्ञःआविथररक्षिथ तथाहेशतक्रतोबहुविधकर्मन्बहुविधप्रज्ञवा त्वं वय्यंवय्यकुलजंतुर्वीतिंतुर्वीतिनामानंराजानंआविथेत्येव अपिच त्वंरथंरंहणस्वभावमेतत्संज्ञमृषिं एतशंएतत्संज्ञकंधनेधननिमित्तेसङ्ग्रामेकृत्व्येकर्तव्येसतिआविथेतिशेषः यद्वा पूर्वोक्तानांराज्ञांरथं एतशइत्यश्वनाम एतशमश्वंचररक्षिथेतियोज्यम् तथा त्वंशम्बरस्यनवतिंनव नवोत्तरनवतिसंख्याकाः पुरः पुराणिदम्भयः व्यनीनशः ॥ एतशं एतिगच्छतीत्येतशः इण्गतौ इणस्तशन्तशसुनाविति तशन्प्रत्ययः गुणः । कृत्व्ये कर्तव्येइत्यस्यशब्दस्यवर्णविकारःपृषोदरादित्वात् ॥ ६ ॥

६. तुमने नर्य, तुर्वश और यदु नाम के राजाओं की रक्षा की है। शत-यज्ञकर्त्ता इन्द्र! तुमने वय्य-कुलोद्भव तुर्वीति नाम के राजा की रक्षा की है। तुमने रथ और एतश ऋषि की, आवश्यक धन के लिए संग्राम में रक्षा की है। तुमने शम्बर के निन्यानवे नगरों का विनाश किया है।

सप्तमीमृचमाह—

सघाराजासत्पतिःशूशुवज्जनोरातहव्यःप्रतियःशासमिन्वति ।
उक्थावायोअभिगृणातिराधसादानुरस्माउपरापिन्वतेदिवः॥७॥

सः । घ । राजा । सत्ऽपतिः । शूशुवत् । जनः । रातऽहव्यः ।
प्रति । यः । शासम् । इन्वति । उक्था । वा । यः । अभिऽगृणाति ।
राधसा । दानुः । अस्मै । उपरा । पिन्वते । दिवः ॥ ७ ॥

सघसखलुजनोजातोराजाराजमानः सत्पतिः सतांपालयितायजमानः शूशुवत् आत्मानंवर्धयति यइन्द्रंप्रतिरातहव्योदत्तहविष्कःसन् शासंइन्द्रकर्तृकमनुशासनं यद्वा तस्यस्तुतिंइन्वतिव्याप्नोति उक्थावा उक्थानिशस्त्राणिवा यःस्तोताराधसाहविर्लक्षणेनान्नेनसहाभिगृणाति तस्याभिमुखीकरणायशंसतिअस्मैस्तोत्रेदानुरभिमतफलप्रदातेन्द्र उपरा उपरान्मेघान् उपरइति मेघनाम सचयास्केनैवंनिरुक्तः—उपरउपलोमेघोभवतिउपरमन्तेऽस्मिन्नभ्राण्युपरताआपइतिवेति[1]। तान्मेघान् दिवःसकाशात्पिन्वते सेचयति दोग्धीतियावत् ॥ घ ऋचितुनुघेत्यादिनादीर्घः । सत्पतिः सतांपतिःसत्पतिः पत्यावैश्वर्येइतिपूर्वपदप्रकृतिस्वरत्वम् । शूशुवत् टुओश्विगतिवृद्ध्योः ण्यन्ताद्वर्तमानेलुङ्ञ्चिङेरङादेशे संप्रसारणंसम्प्रसारणाश्रयंचबलीयइत्यन्तरङ्गमपिवृद्ध्यादिकंबाधि-

---

1 नि० २. २१ ।

त्वा णौचसंश्वङोरितिसम्प्रसारणं संज्ञापूर्वकस्यविधेरनित्यत्वाद्वृद्ध्यभावेद्विर्वचनादि उवङादेशः। रातहव्यः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्। शासं शासुअनुशिष्टावित्यस्माद्भावेघञि कर्षात्वतइ-त्यन्तोदात्तत्वेप्राप्ते व्यत्ययेनाद्युदात्तत्वम् वृषादिर्वाद्रष्टव्यः सह्याकृतिगणइत्युक्तम् यद्वा शंसुस्तुता-वित्यस्माद्धञिव्यत्ययेननलोपः। इन्वति इविव्याप्तौ शपःपित्त्वादनुदात्तत्वेधातुस्वरः यद्वृत्तयोगा-दनिघातः। अभिगृणाति गृशब्दे क्रैयादिकः प्वादीनांह्रस्वइतिह्रस्वत्वम् तिपःपित्त्वादनुदा-त्तत्वेविकरणस्वरः पूर्ववन्निघाताभावः। उपरा सुपांसुलुगितिशसःपूर्वसवर्णदीर्घत्वम्। पिन्वते पिविमिविणिविसेचने व्यत्ययेनात्मनेपदम् ॥ ७॥

७. जो इन्द्र को हव्य दान करके इन्द्र की स्तुति का प्रचार करते हैं अथवा हव्य के साथ मंत्र का पाठ करते हैं, वे ही स्वराज्य करते हैं, साधु-रक्षा करते हैं और अपने को वर्द्धन करते हैं। फलदाता इन्द्र उन्हीं के लिए आकाश से मेघ-जल का वर्षण करते हैं।

असमंक्षत्रमसमामनीषाप्रसोमपाअपसासन्तुनेमें।
येतइन्द्रददुषोवर्धयन्तिमहिक्षत्रंस्थविरंवृष्ण्यंच ॥ ८ ॥

असमम्। क्षत्रम्। असमा। मनीषा। प्र। सोमऽपाः। अपसा। सन्तु। नेमें। ये। ते। इन्द्र। ददुषः। वर्धयन्ति। महि। क्षत्रम्। स्थविरम्। वृष्ण्यम्। च ॥ ८ ॥

इन्द्रस्यक्षत्रंबलमसमं नकेनचित्समं सर्वाधिकमित्यर्थः तथा मनीषाबुद्धिश्चअसमा नक-स्यापिबुद्ध्यासमाना सर्ववस्तुविषयीकरोतीत्यर्थः नेमइति सर्वनामशब्दएतच्छब्दसमानार्थः ने-मेएतेसोमपाः सोमस्यपातारोयजमानाःअपसाकर्मणाप्रसन्तुप्रवृद्धाभवन्तु हेइन्द्र तेतवददुषोहविर्द-त्तवन्तोयेत्वदीयंमहिमहत् क्षत्रंबलंस्थविरंस्थूलं प्रवृद्धंवृष्ण्यंवृषत्वं पुंस्त्वंचवर्धयन्ति प्रवृद्धंकुर्वन्ति यद्वा ददुषः यजमानेभ्योयागफलंदत्तवतस्तवेतियोजनीयम्। नेमे सर्वनामत्वाज्जसःशीभावे गुणः त्वसमसिमनेमेत्यनुच्चानीतिसर्वानुदात्तत्वेप्राप्ते व्यत्ययेनाद्युदात्तत्वम्। ददुषः ददातेर्लिटः क्वसुः जसोव्यत्ययेनशसादेशः सम्प्रसारणंसम्प्रसारणाश्रयंचबलीयइति इडागमात्पूर्वमेवसम्प्र-सारणं शासिवसिघसीनांचेतिषत्वम् प्रत्ययस्वरः। महि महेरौणादिकइन्प्रत्ययः। स्थविरं अजिरशिशिरेत्यादिनातिष्ठतेःकिरच्प्रत्ययान्तोनिपातितः ॥ ८॥

८. इन्द्र का बल अतुल है, उनकी बुद्धि भी अतुल है। जो तुम्हें हव्य दान करके तुम्हारा महान् बल और स्थूल पौरुष बढ़ाते हैं, वही सोमपायी लोग यज्ञ-कर्म-द्वारा प्रवृद्ध हों।

तुभ्येदेतेबहुलाअद्रिदुग्धाश्चमूषदश्चमसाइन्द्रपानाः।
व्यश्नुहितर्पयाकाममेषामथामनोवसुदेयायकृष्व ॥ ९ ॥

तुभ्यं । इत् । एते । बहुलाः । अद्रिऽदुग्धाः । चमूऽसदः । चमसाः । इन्द्रऽपानाः । वि । अश्नुहि । तर्पय । कामम् । एषाम् । अथ । मनः । वसुऽदेयाय । कृष्व ॥ ९ ॥

हेइन्द्र तुभ्येतुभ्यमेवचमसाः चम्यन्तेभक्ष्यन्तइतिचमसाःसोमाः एतेसोमास्त्वदर्थंसम्पादिताः कीदृशाइत्याह बहुलाः प्रभूताः अद्रिदुग्धाः अद्रिभिर्ग्रावभिरभिषुताः चमूषदः चमूषुचमसेषुअवस्थिताः इन्द्रपानाः इन्द्रस्यपानेनसुखकराः अतस्त्वंतान्व्यश्नुहिव्यामुहि व्याप्यचएषांत्वदीयानामिन्द्रियाणांकाममभिलाषंतैस्तर्पयपूरयेतियावत् अथानन्तरंवसुदेयायअस्मभ्यमभिमतधनप्रदानायत्वदीयंमनःकृष्वकुरुष्व ॥ तुभ्य छान्दसोमलोपः । अद्रिदुग्धाः दुहेःकर्मणिनिष्ठा तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरत्वम् । चमूषदः चमुअदने चमन्त्यनेनेतिचमूः कृषिचमितनीत्यादिनाउणादिकऊप्रत्ययः चमूषुसीदन्तीतिचमूषदः सत्सूद्विषेत्यादिनाक्विप् पूर्वपदादितिषत्वम् कृदुत्तरपदप्रकृतिस्वरत्वम् । इन्द्रपानाः कर्मणिचयेनसंस्पर्शादितिपिबतेःकर्मणिल्युट् । अश्नुहि व्यत्ययेनपरस्मैपदम् । वसुदेयाय डुदाञ्दाने अस्माद्चोयदितिभावेयत् ईद्यतीतीकारादेशः गुणः यतोनावइत्याद्युदात्तत्वम् कृदुत्तरपदप्रकृतिस्वरत्वम् । कृष्व डुकृञ्करणे बहुलंछन्दसीतिविकरणस्यलुक् ॥ ९ ॥

९. यह सोमरस पत्थर के द्वारा तैयार किया गया है, बर्त्तन में रक्खा हुआ है और इन्द्र के पीने योग्य है। इन्द्र ! यह सब तुम्हारे ही लिए हुआ है। तुम इसे ग्रहण करो। अपनी इच्छा तृप्त करो। अनन्तर हमें धन दान करने में ध्यान दो।

अपामतिष्ठद्धरुणह्वरंतमोन्तर्वृत्रस्यजठरेषुपर्वतः ।
अभीमिन्द्रोनद्योवव्रिणाहिताविश्वाअनुष्ठाःप्रवणेषुजिघ्नते॥१०॥

अपाम् । अतिष्ठत् । धरुणऽह्वरम् । तमः । अन्तः । वृत्रस्य । जठरेषु । पर्वतः । अभि । ईम् । इन्द्रः । नद्यः । वव्रिणा । हिताः । विश्वाः । अनुऽस्थाः । प्रवणेषु । जिघ्नते ॥ १० ॥

अपांवृष्ट्युदकानांधरुणह्वरंधरुणशब्दोधारावचनःधारानिरोधकंतमोन्धकारमतिष्ठत् अयमेवार्थःस्पष्टीक्रीयते—वृत्रस्यलोकत्रयावरितुरसुरस्यजठरेषूदरंप्रदेशेषुअन्तर्मध्येपर्वतःपर्ववान्मेघोभूत् अतस्तमोरूपेणवृत्रेणमेघस्यावृतत्वाद्वृष्ट्युदकमप्यावृतमित्युच्यते ईं इमाःपूर्वोक्तानद्योनदीः 'अपः नदनान्नद्यइतिव्युत्पत्त्यानदीशब्देनापउच्यन्ते वव्रिणाआवरकेणवृत्रेणहिताःपिहिताः

विश्वाः व्यापिनीः अनुष्ठाः अनुक्रमेण तिष्ठन्तीः एवंविधा अपः इन्द्रः प्रवणेषु निम्नेषु भूप्रदेशेषु अभिजिघ्नते अभिगमयति ॥ वव्रिणा वृञ् वरणे इत्यस्मात् आदृगमहनजन इति किप्रत्ययः लिड्वद्भावाद्द्विर्भावादियणादेशः प्रत्ययस्वरः । अनुष्ठाः आतश्चोपसर्गे इति तिष्ठतेः कः प्रत्ययः उपसर्गात्सुनोतीति षत्वम् । जिघ्नते हन्तेर्गत्यर्थाद्व्यत्ययेनात्मनेपदम् बहुलं छन्दसीति शपः श्लुः अर्तिपिपर्त्योश्च बहुलं छन्दसीत्यभ्यासस्येत्वम् ॥ १० ॥

१०. अन्धकार ने वृष्टि की धारा रोकी थी। वृत्रासुर के पेट के भीतर मेघ था। वृत्र के द्वारा रक्खे जाकर जो जल अनुक्रम से अवस्थित था, इन्द्र ने उसे निम्न भू-प्रदेश में प्रवाहित किया।

सशेवृ॑धमधिधाद्युम्नम॒स्मेमहि॑क्ष॒त्रंजना॒षाळि॑न्द्र॒तव्य॑म् ।
रक्षा॑चनोम॒घोनः॑पा॒हिसू॒रीन्रा॒येच॑नः॒स्वप॒त्याइ॒षेधाः॑ ॥ ११॥१८॥

सः । शे॒वृ॑धम् । अधि॑ । धाः॒ । द्यु॒म्नम् । अ॒स्मे इति॑ । महि॑ ।क्ष॒त्रम् । जना॒षाट् । इ॒न्द्र॒ । तव्य॑म् । रक्ष॑ । च॒ । नः॒ । म॒घोनः॑ । पा॒हि । सू॒रीन् । रा॒ये । च॒ । नः॒ । सु॒ऽअ॒प॒त्यै । इ॒षे । धाः॒ ॥११॥१८॥

हे इन्द्र स त्वं अस्मे अस्मासु द्युम्नं यशः अधिधाः अधिनिधेहि कीदृशमित्याह शेवृधं शं शमनं रोगाणां शमने सति यद्वर्धते तादृशं तथा महि महत् जनाषाट् शत्रुजनानामभिभवितृ तव्यं प्रवृद्धं क्षत्रं बलं च अधिधा इति शेषः किञ्च हे इन्द्र नोस्मान् मघोनो धनवतः कृत्वा रक्ष पालय सूरीन् विदुषोऽज्ञानपिपाहि पालय तथा राये धनाय च स्वपत्यै शोभनपुत्रयुक्ताय इषेऽन्नाय च नोस्मान् धाः धेहि स्थापय ॥ धाः छन्दसि लुङ्लङ्लिट इति प्रार्थनायां लुङि गातिस्थेति सिचो लुक् बहुलं छन्दस्यमाङ्योगेपीत्यडभावः । अस्मे सुपां सुलुगिति अस्मच्छब्दात्सप्तम्याः शेआदेशः । जनाषाट् जनान्सहत इति जनाषाट् छन्दसि सह इति ण्विः अत उपधाया इति वृद्धिः सहेः साडः स इति षत्वम् अन्येषामपि दृश्यत इति पूर्वपदस्य दीर्घः । तव्यं तव तिर्वृद्ध्यर्थः सौत्रो धातुः अचो यदिति यत् गुणे धातोस्तन्निमित्तस्यैवेत्यवादेशः यतो नाव इत्याद्युदात्तत्वम् । रक्ष रक्ष पालने शपः पित्त्वादनुदात्तत्वे धातुस्वरः द्व्यचोतस्तिङ इति दीर्घत्वम् । मघोनः श्वयुवमघोनामतद्धिते इति शसि सम्प्रसारणम् । पाहि अदादित्वाच्छपो लुक् हेरपित्त्वात् तस्यैव स्वरः शिष्यते मघोन इत्यस्य वाक्यान्तरगतत्वान्निघाताभावः । स्वपत्यै शोभनान्यपत्यानि यस्याः सा तथोक्ता नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् जसादिषु छन्दसि वावचनमिति याडापइ इति याडागमाभावे वृद्धिरेचीति वृद्धिः ॥ ११ ॥

११. इन्द्र! हमें वर्द्धमान यश दो। महान् शत्रुओं का पराजयकर्त्ता और प्रभूत बल दान करो। हमें धनवान् करके रक्षा करो। विद्वानों का पालन करो और हमें धन, शोभनीय अपत्य और अन्न दान करो।

॥ इति प्रथमस्य चतुर्थेऽष्टादशो वर्गः ॥ १८ ॥

दिवश्चिदस्येत्यष्टर्चंपञ्चमंसूक्तं सव्यस्यार्षं ऐन्द्रंजागतम् तथाचानुक्रान्तम् दिवश्चिदष्टौजागतंहीति हीत्यभिधानात् तुह्यादिपरिभाषयाउत्तरेद्वेचसूक्ते जागते अतिरात्रेप्रथमेपर्यायेमैत्रावरुणशस्त्रेइदंसूक्तम् सूत्रितञ्च—दिवश्चिदस्येतिपर्यासः सनोनव्येभिरितिचेति विषुवतिनिष्केवल्येप्येतत्सूक्तंसूत्रितञ्च—शंस्येदेवोत्तराणिषट्दिवश्चिदस्येति समूढस्यदशरात्रस्यद्वितीयेछन्दोमेपि निष्केवल्येएवतत्सूत्रितम्—त्वंमहाँइन्द्रयोहदिवश्चिदस्यत्वंमहाँइन्द्रतुभ्यमितिनिष्केवल्यमिति ।

प्रथमामृचमाह—

दि॒वश्चि॑दस्यवरि॒मावि॑पप्रथ॒इन्द्रं॒नम॒ह्नापृ॑थि॒वीच॒नप्रति॑ ।
भी॒मस्तुवि॑ष्मांश्चर्ष॒णिभ्य॑आत॒पःशिशी॑तेवज्रं॒तेज॑से॒नवंस॑गः ॥१॥

दि॒वः । चि॒त् । अ॒स्य । व॒रि॒मा । वि । प॒प्र॒थे । इन्द्र॑म् । न ।
म॒ह्ना । पृ॒थि॒वी । च॒न । प्रति॑ । भी॒मः । तुवि॑ष्मान् । च॒र्ष॒णि॒ऽभ्यः॑ ।
आ॒ऽत॒पः । शिशी॑ते । वज्र॑म् । तेज॑से । न । वंस॑गः ॥१॥

अस्येन्द्रस्यवरिमाउरुत्वंप्रभावंदिवश्चिद्द्युलोकादपिविपप्रथे विस्तीर्णंबभूव पृथिवीचन पृथिव्यपिचमह्नामहिम्नामहत्वेनइन्द्रंनप्रतिभवति भूमिरपीन्द्रस्यप्रतिनिधिर्नभवति ततोपिसगरीयानित्यर्थः भीमःशत्रूणांभयंकरः तुविष्मान्प्रज्ञावान्बलवान्वा चर्षणिभ्योमनुष्येभ्यःस्तोतृभ्यः तेषामर्थायशत्रूणामातपःआसमन्तात्तापकारी एवंविधःसइन्द्रःवज्रंवर्जनशीलमायुधंतेजसेतैक्ष्ण्यायशिशीते तनूकरोतितीक्ष्णीकरोतीति तत्रदृष्टान्तः—वंसगोन वननीयगतिमान्वृषभोयथास्वश्रृङ्गे युद्धार्थंतीक्ष्णीकरोतितद्वत् ॥ दिवः ऊडिदमितिविभक्तेरुदात्तत्वम् ।वरिमा उरुशब्दात्पृथ्वादिलक्षणइमनिच् प्रियस्थिरेत्यादिनाउरुशब्दस्यवरादेशः ।पप्रथे प्रथप्रख्याने।मह्ना महिम्ना वर्णलोपश्छान्दसः यद्वा महेरौणादिकःकनिप्रत्ययः प्रत्ययस्वरेणान्तोदात्तः तृतीयैकवचनेअल्लोपोनइत्यकारलोपः उदात्तनिवृत्तिस्वरेणविभक्तेरुदात्तत्वम् । प्रति प्रतिःप्रतिनिधिप्रतिदानयोरितिप्रतिनिधौकर्मप्रवचनीयत्वम् कर्मप्रवचनीययुक्तेइतीन्द्रशब्दाद्द्वितीया प्रतिनिधिप्रतिदानेचयस्मादितिपञ्चमीतु छान्दसत्वान्नभवति।भीमः ञिभीभये इत्यस्माद्भियःषुग्वेतिमक्प्रत्ययः भीमोबिभ्यत्यस्मादितियास्कः[1] । आतपः तपतीतितपः पचाद्यच् थाथादिनोत्तरपदान्तोदात्तत्वम् । शिशीते शोतनूकरणे व्यत्ययेनात्मनेपदम् बहुलंछन्दसीतिविकरणस्यश्लुः बहुलंछन्दसीत्यभ्यासस्येत्वम् ईहल्यघोरितीत्वम् अनजादावपिलसार्वधातुकेव्यत्ययेनाभ्यस्तानामादिरुदात्तत्वम् । वंसगः वनषणसंभक्तौ इत्यस्मात्कर्मण्यौणादिकःसप्रत्ययः वंसंवननीयंगच्छतीतिवंसगः डोन्यत्रापिदृश्य-

1 नि० ३. २०. ।

तइतिगमेर्डप्रत्ययः दिवोदासादित्वात्पूर्वपदाद्युदात्तत्वम् ॥ १ ॥

१. आकाश की अपेक्षा भी इन्द्र का प्रभाव विस्तीर्ण है। महत्त्व में पृथिवी भी इन्द्र की बराबरी नहीं कर सकती। भयावह और बली इन्द्र मनुष्यों के लिए शत्रु को दग्ध करते हैं। जैसे साँड़ अपने सींग रगड़ता है, उसी प्रकार तीक्ष्ण करने के लिए इन्द्र अपना वज्र रगड़ते हैं।

सो॑ऽर्ण॒वो न न॒द्यः॑ समु॒द्रियः॒ प्रति॑ गृभ्णाति॒ विश्रि॑ता॒ वरी॑मभिः।
इन्द्रः॒ सोम॑स्य पी॒तये॑ वृषायते स॒नात्स यु॒ध्म ओज॑सा पनस्यते ॥२॥

सः। अ॒र्ण॒वः। न। न॒द्यः॑। स॒मु॒द्रियः॑। प्रति॑। गृ॒भ्णा॒ति॒।
विऽश्रि॑ताः। वरी॑मऽभिः। इन्द्रः॑। सोम॑स्य। पी॒तये॑। वृ॒ष॒ऽय॒ते॒।
स॒नात्। सः। यु॒ध्मः। ओज॑सा। प॒न॒स्य॒ते॒ ॥२॥

सइन्द्रः समुद्रियः समुद्रवन्त्यस्मादापइतिसमुद्रमन्तरिक्षं तत्रभवः समुद्रियएवंभूतः सन् वरीमभिः स्वकीयैः संवरणैः यद्वा उरुत्वैर्विश्रिताव्याप्तानद्योनदीः शब्दकारिणीर्वृत्रेणावृताअपः अर्णवोन समुद्रइव प्रतिगृभ्णातिस्वीकृत्यवर्षतीतिभावः सचेन्द्रः सोमस्यपीतयेपानायवृषायतेवृषइवाचरतिहर्षयुक्तोवर्ततइत्यर्थः तथासइन्द्रोयुध्मोयोद्धासनात् चिरादेव यद्वा सनातनः ओजसाबलकृतेनवृत्रवधादिरूपेणकर्मणापनस्यते पनः स्तोत्रमिच्छति ॥ अर्णवः अर्णसोलोपश्चेतिमत्वर्थीयोवप्रत्ययः सलोपश्च प्रत्ययस्वरः। नद्यः नदअव्यक्तेशब्दे इत्यस्मात्कर्तरिपचाद्यच् चितइत्यन्तोदात्तत्वम् नदट्ितिटित्त्वेनपाठात् टिड्ढाणञितिङीप् यस्येतिलोपेउदात्तनिवृत्तिस्वरेणतस्योदात्तत्वम् जसियणादेशे उदात्तस्वरितयोर्यणइतिस्वरितत्वम् द्वितीयार्थेप्रथमा अनयाव्युत्पत्त्यानद्यइत्यापउच्यन्ते तथाचश्रूयते—अहावनदताहतेतस्मादानद्योनामस्थतावोनामानिसिन्धवइति ॥ समुद्रियः समुद्राभ्राद्घइतिभवार्थेघप्रत्ययः घस्येयादेशेतस्योपदेशिवद्वचनादाद्युदात्तत्वम्। गृभ्णाति हृग्रहोर्भइतिभत्वम्। विश्रिताः श्रिञ्सेवायां कर्मणिनिष्ठा गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम्। वरीमभिः वृञ्वरणेइत्यस्मादौणादिकईमनिन्प्रत्ययः नित्त्वादाद्युदात्तत्वम् यद्वा उरुशब्दादिमनिचिदीर्घः आद्युदात्तत्वंचछान्दसत्वात्। वृषायते कर्तुःक्यङ्सलोपश्चेत्याचारेर्थेक्यङ् ङित्त्वादात्मनेपदम् अकृत्सार्वधातुकयोरितिदीर्घः। युध्मः युधसम्प्रहारेइत्यस्मादिषियुधीन्धिदसिश्याधूसूभ्योमगितिमक्। पनस्यते पनस्तुतौ पननंपनः तदिच्छतिपनस्यति व्यत्ययेनात्मनेपदम् ॥२॥

२. अन्तरिक्षव्यापी इन्द्र, सागर की तरह, अपनी व्यापकता के द्वारा बहुव्यापी जल ग्रहण करते हैं। इन्द्र सोमपान के लिए साँड़ की तरह वेग से दौड़ते हैं और वही योद्धा इन्द्र प्राचीन काल से अपने वीरत्व की प्रशंसा चाहते हैं।

---

१ तै० सं० ५. ६. १.।

तृतीयामृचमाह—

त्वंतमिन्द्रपर्वतंनभोजसेमहोनृम्णस्यधर्मणामिरज्यसि।
प्रवीर्येणदेवतातिचेकितेविश्वस्माउग्रःकर्मणेपुरोहितः ॥३॥

त्वम्। तम्। इन्द्र। पर्वतम्। न। भोजसे। महः। नृम्णस्य।
धर्मणाम्। इरज्यसि। प्र। वीर्येण। देवता। अति। चेकिते।
विश्वस्मै। उग्रः। कर्मणे। पुरःऽहितः ॥ ३ ॥

हेइन्द्र त्वंभोजसेभोजनायपर्वतंपर्ववन्तंमेघंनाकार्षीः नहिहतोभुङ्क्ते इन्द्रोहिवर्षणार्थमेघंवज्रेणहन्ति तथामहःमहतःनृम्णस्यधनस्यधर्मणांधारयितॄणांकुबेरादीनां इरज्यसिईशिषे इरज्यतिरैश्वर्यकर्मा सइन्द्रोदेवतावीर्येणअतिअतिशयितःप्रचेकिते प्रकर्षेणास्माभिर्ज्ञातोबभूव सचोग्रउद्गूर्णइन्द्रः विश्वस्मैसर्वस्मैवृत्रवधादिरूपायकर्मणेदेवैःपुरोहितःपुरस्तादवस्थापितः॥ धर्मणां धृञ् धारणे अन्येभ्योपिदृश्यन्तइतिकर्तरिमनिन् नित्त्वादाद्युदात्तत्वम्। इरज्यसि इरजईर्ष्यायां ऐश्वर्ये इत्येके कण्ड्वादित्वाद्यक्। वीर्येण शूरवीरविक्रान्तौ चुरादिः अचोयदितियत् णिलोपः बहुव्रीहौ वीरवीर्यौचेत्युत्तरपदाद्युदात्तत्वम् विधानसामर्थ्याद्यतोनावइत्याद्युदात्तत्वाभावेतित्स्वरितमितिस्वरितत्वम् तस्मिन्हिसति आद्युदात्तंद्व्यच्छन्दसीत्यनेनैवसिद्धत्वात्पुनर्वीर्यग्रहणमनर्थकंस्यादित्युक्तम्। देवता देवएवदेवता देवात्तलितिस्वार्थेतल्प्रत्ययः लितीतिप्रत्ययात्पूर्वस्योदात्तत्वम्। चेकिते कितज्ञाने अस्माद्यङन्ताच्चेकित्यतेःकर्मणिलिटि अतोलोपयलोपौ। पुरोहितः पुरस्शब्दस्यास्तिप्रत्ययान्तस्य तद्धितश्चासर्वविभक्तिरित्यव्ययत्वेनपुरोव्ययमितिगतिसंज्ञायां गतिरनन्तरइतिपूर्वपदप्रकृतिस्वरत्वम् ॥ ३ ॥

३. इन्द्र! तुम अपने भोग के लिए मेघ को भिन्न नहीं करते। तुम महान् धनाढ्यों के ऊपर आधिपत्य करते हो। इन्द्रदेव अपने वीर्य के कारण अच्छी तरह परिचित हैं। सारे देवों ने उग्र इन्द्र को उनके कर्म के कारण सामने स्थान दिया है।

चतुर्थीमृचमाह—

सइद्वनेनमस्युभिर्वचस्यतेचारुजनेषुप्रब्रुवाणइन्द्रियम्।
वृषाछन्दुर्भवतिहर्यतोवृषाक्षेमेणधेनांमघवायदिन्वति ॥४॥

सः। इत्। वने। नमस्युऽभिः। वचस्यते। चारु। जनेषु।
प्रऽब्रुवाणः। इन्द्रियम्। वृषा। छन्दुः। भवति। हर्यतः। वृषा।
क्षेमेण। धेनाम्। मघऽवा। यत्। इन्वति ॥ ४ ॥

सइत्सएवेन्द्रः वनेअरण्येनमस्युभिः नमसास्तोत्रेणपूजयितृभिः ऋषिभिर्वचस्य तेवचइच्छन् क्रियतेस्तूयतइत्यर्थः यद्वा वचःस्तोत्रमात्मनइच्छति सचेन्द्रः आत्मीयेषुजनेषुइन्द्रियंस्ववीर्यंमब्रुवाणः प्रकटयन्चारुवर्तते किञ्च सवृषाकामानांवर्षकःहर्यतःप्रेप्सावतोयियक्षतः छन्दुःउपच्छन्दयिता भवति यियक्षतांपुरुषाणांयागेरुचिमुत्पादयतीतिभावः वृषा हविषांवर्षयिताहविःप्रदातेत्यर्थः मघवाधनवानेवंभूतोयजमानः क्षेमेणइन्द्रकृतेनरक्षणेनयुक्तःसन् यत्यदा धेनांस्तुतिलक्षणांवाचंइन्वतिप्रेरयति तदानींछन्दुर्भवतीतिपूर्वेणान्वयः यद्वा मघवान्वृषेन्द्रः क्षेमेणक्षेमकरेणमनसाधेनांयजमानैःकृतांस्तुतिं यद्यस्मादिन्वतिव्याप्नोतितस्मादितियोज्यम् ॥ नमस्युभिः नमोवरिवइतिपूजार्थे क्यच् क्याच्छन्दसीत्युप्रत्ययः। वचस्यते वचइच्छतिवचस्यतितंवचस्यन्तंकुर्वन्तिमुनयः वचस्यन्ति वचस्ययतेःकर्मणियकिअतोलोपयलोपौ यद्वा वचस्यतेर्व्यत्ययेनात्मनेपदम्। मब्रुवाणः ब्रूञ् व्यक्तायांवाचि लटःशानच् अदादित्वाच्छपोलुक् शानचोङित्त्वाद्गुणाभावेउवङ् चित्स्वरेणान्तोदात्तः। इन्द्रियं इन्द्रस्यलिङ्गमिन्द्रियम् इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमितिवेतिलिङ्गादिष्वर्थेषुइन्द्रशब्दाद्घच्प्रत्ययोनिपात्यते अतोन्तोदात्तत्वम्। इन्वति इविव्याप्तौ शपःपित्त्वादनुदात्तत्वेधातुस्वरः यद्वृत्तयोगादनिघातः ॥ ४ ॥

४. इन्द्र जंगल में स्तोता ऋषियों द्वारा स्तुत होते हैं। मनुष्यों के बीच में अपना वीर्य प्रकट करके बड़ी सुन्दरता से अवस्थित होते हैं। जिस समय हव्यदाता धनी यजमान इन्द्र-द्वारा रक्षित होकर स्तुति-वाक्य उच्चारण करता है, उस समय अभीष्टवर्षी इन्द्र यज्ञेच्छु को यज्ञ में तत्पर करते हैं।

सइन्महानिसमिथानिमज्मनाकृणोतियुध्मओजसाजनेभ्यः।
अधाचनश्रद्दधतित्विषीमतइन्द्रायवज्रंनिघनिघ्नतेवधम्॥५॥१९॥

सः। इत्। महानि। सम्ऽइथानि। मज्मना। कृणोति। युध्मः। ओजसा। जनेभ्यः। अध। चन। श्रत्। दधति। त्विषिऽमते। इन्द्राय। वज्रम्। निऽघनिघ्नते। वधम्॥ ५॥१९॥

सइत् सएवेन्द्रोयुध्मोयोद्धामहानिसमिथानिमहतःसङ्ग्रामान्मज्मनासर्वस्यशोधकेनओजसाबलेनकृणोतिकरोति किमर्थम् जनेभ्यःस्तोतृजनार्थं यदेन्द्रोवधंहननसाधनंवज्रमायुधंमेघेषुनिघनिघ्नतेनिहन्ति अधाचन अनन्तरमेवत्विषीमतेदीप्तिमतेइन्द्रायसर्वेजनाःश्रद्दधति श्रदितिसत्यनाम इन्द्रोबलवानितियदुच्यतेतत्सत्यमेवेतिसर्वेप्रतिपद्यन्ते॥ महानि महान्तीत्यस्यतकारलोपश्छान्दसः यद्वा महन्तेपूज्यन्तइतिमहानिमहवृद्धानि घञर्थेकविधानमितिकः। प्रत्ययस्वरः समिथानि इणगतौ संयन्तिसङ्गच्छन्तेस्मिन्वीराइतिसमिथानिसङ्ग्रामाः समीणइतिथक्प्रत्ययः कित्त्वाद्गुणाभावः

थाथादिनोत्तरपदान्तोदात्तत्वम्।मज्मना टुमस्जोशुद्धौ मनिन्प्रत्ययः झलांजश्झशीतिसकारस्य जश्त्वं दकारः ततश्चुत्वं जकारः प्रत्ययस्वरः। अध छान्दसंधत्वम् निपातस्यचेतिसांहितिकोदीर्घः।त्विषीमते त्विषदीप्तौ इन्सर्वधातुभ्यइतीन्प्रत्ययः नित्त्वादाद्युदात्तत्वम् मतुपःपित्त्वादनुदात्तत्वे तदेवशिष्यते अन्येषामपिदृश्यतइतिसांहितिकोदीर्घः। निघनिघ्नते हन्तेर्व्यत्ययेनात्मनेपदम् बहुवचनंच बहुलंछन्दसीतिशपःश्लुः गमहनेत्यादिनोपधालोपः अभ्यासस्यघत्वंनिगागमश्च आगनीगन्तीतिचेतिचशब्दःप्रकारार्थइत्युक्तत्वाद्याधत्यादावेवतद्द्रष्टव्यम्॥ ५॥

५. योद्धा इन्द्र मनुष्यों के लिए सर्व-विशुद्धकारी बल-द्वारा महान् संग्रामों में संलग्न होते हैं। जिस समय इन्द्र वध-कारण वज्र फेंकते हैं, उस समय दीप्तिमान् इन्द्र को सब लोग बलशाली कहकर उनका आदर करते हैं।

षष्ठीमृचमाह—

सहिश्रवस्युःसदनानिकृत्रिमाक्ष्मयावृधानओजसाविनाशयन्।
ज्योतींषिकृण्वन्नवृकाणियज्यवेवसुक्रतुःसर्तवाअपःसृजत्॥६॥

सः। हि। श्रवस्युः। सदनानि। कृत्रिमा। क्ष्मया। वृधानः।
ओजसा। विऽनाशयन्। ज्योतींषि। कृण्वन्। अवृकाणि।
यज्यवे। अव। सुऽक्रतुः। सर्तवै। अपः। सृजत्॥ ६॥

श्रवस्युरन्नंयशोवाआत्मनइच्छन् कृत्रिमा कृत्रिमाणिक्रिययानिर्वृत्तानिसदनानिअसुरपुराणि ओजसाबलेनविनाशयन् क्ष्मयाभूम्यासमानंवृधानोवर्धनशीलः यद्वा क्ष्मयेत्योजोविशेषणं शत्रूणामभिभवित्राबलेनेत्यर्थः ज्योतींषिसूर्यादीनिवृत्रेणावृतानिअवृकाणिवृकेणावरकेणवेनरहितानिकृण्वन्कुर्वन् सुक्रतुःशोभनकर्मसहितएवंविधःसखल्विन्द्रोयज्यवेयष्ट्रेयजमानायतदर्थंसर्तवैसरणायअपःवृष्टिलक्षणान्युदकानिअवासृजत् वृष्टिंकृतवानित्यर्थः॥कृत्रिमा डुकृञ्करणे ड्वितःक्त्रिरितिभावेक्त्रिप्रत्ययः क्त्रेर्मम्नित्यमितिनिर्वृत्तार्थेमप् तस्यपित्त्वादनुदात्तत्वेक्त्रिप्रत्ययस्वरएवशिष्यते शेश्छन्दसिबहुलमितिशेर्लोपः। क्ष्मया क्षमूष्सहने क्षमतेप्राणिजातकृतमुपद्रवमितिक्ष्मा षिद्भिदादिभ्योऽङित्यङ् ततष्टाप् व्यत्ययेनधातोरुपधालोपः छान्दसंविभक्त्युदात्तत्वम् यद्वा अयंधातुरभिभवार्थःषहअभिभवेइतिसहनस्याभिभवार्थत्वात् अस्मादौणादिकोमनिन् व्यत्ययेनस्त्रीलिङ्गता मनइतिङीपोनिषेधे डाबुभाभ्यामन्यतरस्यामितिडाप् टिलोपः। वृधानः ताच्छीलिकश्चानश् बहुलंछन्दसीतिशपोलुक् चितइत्यन्तोदात्तत्वम्। अवृकाणि वृञ्वरणेसृवृभूशुषिमुषिभ्यःकक्इतिकक्प्रत्ययः बहुव्रीहौनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्। यज्यवे यजिमनिशुन्धिदसिजनिभ्योयुरिति

युमत्ययः वृषादेराकृतिगणत्वादाद्युदात्तत्वम्। सुक्रतुः बहुव्रीहौक्रत्वादयश्चेत्युत्तरपदाद्युदात्तत्वम्। सर्तवै सृगतौ कृत्यार्थेतवैकेनितिभावेतवैप्रत्ययः गुणः अन्तश्चतवैयुगपदितिआद्यन्तयोर्युगपदुदात्तत्वम्। अपः ऊडिदमितिशसउदात्तत्वम्। सृजत् लङ्बहुलंछन्दस्यमाङ्योगेपीत्यडभावः॥६॥

६. शोभनकर्मा इन्द्र यशःकामना करके, बल-द्वारा सुनिर्मित असुर-गृहों का विनाश करके, पृथिवी में समान वृद्धि प्राप्त करके और ज्योतिष्कों या तारकाओं को निरावरण करके यजमान के उपकार के लिए प्रवहमान वृष्टि-जल दान करते हैं।

दानायमनःसोमपावन्नस्तुतेर्वाञ्चाहरीवन्दनश्रुदाकृधि।
यमिष्ठासःसारथयोयइन्द्रतेनत्वाकेताआदभ्नुवन्तिभूर्णयः ॥७॥

दानाय। मनः। सोमऽपावन्। अस्तु। ते। अर्वाञ्चा। हरी इति। वन्दनऽश्रुत्। आ। कृधि। यमिष्ठासः। सारथयः। ये। इन्द्र। ते। न। त्वा। केताः। आ। दभ्नुवन्ति। भूर्णयः॥७॥

हेसोमपावन् सोमस्यपातरिन्द्र तेत्वदीयंमनः दानायअस्मदभिमतफलप्रदानायास्तुभवतु हेवन्दनश्रुत् वन्दनानांस्तुतीनांश्रोतः हरीत्वदीयावश्वावर्वाञ्चाअस्मद्यज्ञाभिमुखौआकृधि आभिमुख्येनकुरु हेइन्द्र तेतवस्वभूतायेसारथयःसन्ति ते यमिष्ठासः अतिशयेनयन्तारः अश्वनियमनकुशलाइत्यर्थः यस्मादेवंतस्मात्केताः प्रातिकूल्यज्ञातारः भूर्णयः स्वकीयायुधादीनांभर्तारः यद्वा भीताः तीक्ष्णाःशत्रवः त्वात्वांनादभ्नुवन्ति नहिंसन्ति॥ सोमपावन् आतोमनिन्क्वनिबिति वनिप् असंबुद्धावितिपर्युदासाद्दीर्घाभावः। अर्वाञ्चा सुपांसुलुगिति विभक्तेराकारः। वन्दनश्रुत् वदिअभिवादनस्तुत्योः इदित्त्वान्नुम् भावेल्युट् तेषांश्रोता श्रुश्रवणे क्विपितुगागमः। यमिष्ठासः यन्तुःशब्दाचुश्छन्दसीतीष्ठन्प्रत्ययः तुरिष्ठेमेयःस्वितितृलोपः नित्त्वादाद्युदात्तत्वम् आज्जसेरसुगित्यसुक्। सारथयः सर्तेर्णिच्चेतिघथिन्प्रत्ययोणिलोपश्च नित्त्वादाद्युदात्तः। केताः कितज्ञाने चिकेततिप्रतिकूलंजानन्तीतिकेताः पचाद्यच् वृषादेराकृतिगणत्वादाद्युदात्तत्वम् यद्वा प्रतिकूलतयाज्ञायन्तइतिकेताः कर्मणिघञ् ञित्त्वादाद्युदात्तत्वम्। दभ्नुवन्ति दंभुदंभे स्वादित्वात्श्नुः तस्यङित्त्वादनिदितामितिनलोपः संयोगपूर्वत्वेनहुश्नुवोरितियणादेशाभावे अचिश्नुधात्वित्यादिनोवङादेशः। भूर्णयः भृञ्भरणे घृणिपृश्निरित्यादौ अस्मान्निमत्ययान्तोनिपात्यते ऋतउत्वंदीर्घश्च यद्वा भृभये इत्यस्मात् कृत्यल्युटोबहुलमितिकर्तरिक्तिनि उदोष्ठ्यपूर्वस्येत्युत्वम् हलिचेतिदीर्घः ऋकारल्वादिभ्यःक्तिन्निष्ठावद्भवतीतिनिष्ठावद्भावान्नत्वम् नित्त्वादाद्युदात्तत्वम्। ७॥

७. सोमपायी इन्द्र! दान में तुम्हारा मन रत हो। स्तुतिप्रिय! अपने हरि नाम के घोड़ों को हमारे यज्ञ के अभिमुखी करो। इन्द्र! तुम्हारे सारथि घोड़ों को वश में करने में बड़े दक्ष हैं; इसलिए तुम्हारे विरोधी शत्रु हथियार लेकर तुम्हें पराजित नहीं कर सकते।

अष्टमीमृचमाह–

अप्रक्षितं वसु बिभर्षि हस्तयोरषाळ्हं सहस्तन्वि श्रुतो दधे।
आवृतासोवतासो न कर्तृभिस्तनूषु ते क्रतव इन्द्र भूरयः ॥ ८ ॥२०॥

अप्रऽक्षितम्। वसु। बिभर्षि। हस्तयोः। अषाळ्हम्। सहः। तन्वि। श्रुतः। दधे। आऽवृतासः। अवतासः। न। कर्तृऽभिः। तनूषु। ते। क्रतवः। इन्द्र। भूरयः॥ ८ ॥ २० ॥

हेइन्द्र त्वंअप्रक्षितंप्रक्षयरहितं वसुधनं हस्तयोर्बिभर्षि स्तोतृभ्योदातुंधारयसि तथा श्रुतः प्रख्यातोभवान् तन्विआत्मीयेशरीरेअषाळ्हंशत्रुभिरनभिभूतंसहोबलंदधेधारयति त्वदीयास्तनवः कर्तृभिः वृत्रादेरसुरस्यवधंकुर्वद्भिः बलकृतैःकर्मभिरावृतासःआवृताःबलकृतानिसर्वाणिकर्माण्येतस्यशरीरमावृत्यावतिष्ठन्ते तत्रदृष्टान्तः–अवतासोन अवतइतिकूपनाम यथाकूपाः जलोद्धरणायप्रवृत्तैःप्राणिभिरावियन्तेतद्वत् यस्मादेवंतस्मात् हेइन्द्र तेतवशरीरेषु क्रतवः कर्माणिभूरयोबहूनिविद्यन्ते ॥ अप्रक्षितं क्षिक्षयेइत्यस्माद्भावे निष्ठायामण्यदर्थेइतिपर्युदासाद्दीर्घाभावः अतएवक्षियोदीर्घादितिनिष्ठानत्वाभावः प्रकृष्टंक्षितंयस्यतत्प्रक्षितं नप्रक्षितमप्रक्षितम् अव्ययपूर्वपदप्रकृतिस्वरत्वम्। बिभर्षि डुभृञ्धारणपोषणयोः लिटिसिपिश्लुः भृञामिदित्यभ्यासस्येत्वम्। अषाळ्हं षहअभिभवेइत्यस्मान्निष्ठायां तकारादौप्रत्यये तीषसहेतीटोविकल्पितत्वात् यस्यविभाषेतीट्प्रतिषेधः ढत्वधत्वष्टुत्वढलोपेषु सहिवहोरोदवर्णस्येत्योत्वे प्राप्ते साढ्यैसाढ्वासाढेतिनिगमे इतिनिपातनादात्वम्. यदुक्तंसाढेतितृजन्तमेतदितितदुपलक्षणार्थं द्रष्टव्यम्। तन्वि जसादिषुछन्दसिवावचनमिति अच्चघेरित्यत्वौत्वयोरभावेयणादेशः उदात्तस्वरितयोर्यणइतिविभक्तेःस्वरितत्वम् उदात्तयणोहल्पूर्वादित्युदात्तत्वंतुछान्दसत्वान्नप्रवर्तते[1] ॥ ८॥

८. इन्द्र! तुम दोनों हाथों में अनन्त धन धारण करते हो। तुम यशस्वी हो। अपनी देह में अपराजेय बल धारण करते हो। जैसे जलार्थी मनुष्य कुओं को घेरे रहते हैं, उसी प्रकार तुम्हारे सारे अंग वीरतापूर्ण कर्मों-द्वारा घेरे रहते हैं। तुम्हारी देह में अनेक कर्म विद्यमान हैं। ॥ इतिप्रथमस्यचतुर्थेविंशोवर्गः ॥ २० ॥

---

१ हेइन्द्रप्राणादित्यरूपपरमेश्वर अप्रक्षितंअनुपहिंसितंअप्रहीणंवावसुःकर्मफलाख्यंधनं हस्तयोः अधिदैवंहस्तसदृशयोर्दक्षिणोत्तरायणयोर्बिभर्षिधारयसिअध्यात्मंचजीवनादिलक्षणं कर्मफलंहस्तसदृशयोःप्राणापानयोर्धारयसि किञ्च सहोबलंत्वदीयमषाळ्हं अन्यैरतिरस्कार्यंअतः कर्मफलंधारयितुंसमर्थोसि किञ्च तन्वितनौस्वात्मनःशरीरेश्रुतःश्रवणादिज्ञानानिदधेधारयसि अतोनुष्ठानप्रयासंज्ञात्वातदनुरूपफलंददासीत्यर्थः किञ्च कर्तृभिर्भूमौहिरण्यनिधिप्रक्षेपकारिभिःअदतासोन निधिस्थापनार्थंखाताअवटगर्ताइवआवृतासःदिशःसर्वाअपित्वदीयप्रकाशे-

एषप्रपूर्वीरितिषळृचंषष्ठंसूक्तम् सव्यस्यार्षमैन्द्रंजागतमित्युक्तम् अनुक्रान्तञ्च—एषप्रषडिति। विषुवतिनिष्केवल्येएतत्सूक्तंशंसनीयं विषुवान्दिवाकीर्त्यइतिखण्डेसूत्रितम्—एषप्रपूर्वीर्वृषामदः प्रमंहिष्ठायेति।

एषप्रपूर्वीरवतस्यंचम्रिषोत्योनयोषामुदंयंस्तभुर्वणिः।
दक्षंमहेपाययतेहिरण्ययंरथमावृत्याहरियोगमृभ्वसम् ॥१॥

एषः। प्र। पूर्वीः। अव। तस्य। चम्रिषः। अत्यः। न। योषाम्। उत्। अयंस्त। भुर्वणिः। दक्षम्। महे। पाययते। हिरण्ययम्। रथम्। आऽवृत्य। हरिऽयोगम्। ऋभ्वसम्॥ १ ॥

भुर्वणिरत्ताएषइन्द्रः तस्ययजमानस्यपूर्वीः प्रभूताश्चम्रिषः चमूषुचमसेषुअवस्थिताः सोमलक्षणा-इषः प्रावोदयंस्तप्रकर्षेणपानार्थमुद्धरति तत्रदृष्टान्तः—अत्योनयोषां यथाश्वोवडवांक्रीडार्थमुपय-च्छति सचेन्द्रःहिरण्ययंसुवर्णमयंहरियोगंहरिभ्यांयुक्तंऋभ्वसंउरुभासमानंरथमावृत्यावस्थाप्य महेमहतेवृत्रवधादिरूपायकर्मणेदक्षंप्रवृद्धमात्मानंसोमंपाययतेपानंकारयति॥ पूर्वीः पॄपालनपूरण-योः पॄभिदिव्यधीत्यादिनाकुप्रत्ययः उदोष्ठ्यपूर्वस्येत्युत्वम् पुरुशब्दाद्वोतोगुणवचनादितिङीप् यणादेशः हलिचेतिदीर्घत्वं प्रत्ययस्वरः। चम्रिषः चमुअदनेइत्यस्मात्कृषिचमितनिधनीत्यादिनाऊ-प्रत्ययान्तश्चमूशब्दः तस्यांवर्तमानाइषश्चम्रिषः वकारस्यरेफश्छान्दसः कृदुत्तरपदप्रकृतिस्वरत्वम्। अयंस्त छान्दसेवर्तमानेलुङि व्यत्ययेनात्मनेपदम् एकाचइतीट्प्रतिषेधः। भुर्वणिः भर्वतिरत्तिकर्मे-तियास्कः। धातुपाठेतुभर्वहिंसायामितिपठ्यते अस्मादौणादिकोऽनिप्रत्ययः अकारस्यउकारश्छा-न्दसः। पाययते पापाने शाच्छासाह्वाव्यावेपांयुक् इतिहेतुमतिणिचियुगागमः णिचश्चेत्यात्मनेपदम्। हिरण्ययम् ऋत्व्यवास्त्व्येत्यादिनाहिरण्यशब्दादुत्तरस्यमयटोमशब्दलोपोनिपात्यते। हरियो-गम् हर्योर्योगोयोजनंयस्मिन् हरिशब्दइन्प्रत्ययान्तआद्युदात्तः सएवबहुव्रीहिस्वरेणशिष्यते। ऋभ्वसं उरुभासमित्यस्यपृषोदरादित्वादृभ्वसादेशः॥ १ ॥

१. जिस प्रकार घोड़ा घोड़ी की ओर दौड़ता है, उसी प्रकार प्रभुताहारी इन्द्र उस यजमान के यथेष्ट पात्र-स्थित सोमरूप खाद्य की ओर दौड़ते हैं। इन्द्र स्वर्णमय, अश्वयुक्त और रश्मियुक्त रथ को रोककर पान करते हैं। वे कार्य में बड़े निपुण हैं।

नाच्छादिताःनिधिस्थापकाहिनिधिगर्तेनिक्षिप्यतंगर्तंमृत्तिकादिभिःआच्छादयन्ति एवंत्वमपि त्वदीयरश्मिभिःसर्वमाच्छादयसि तादृशस्यतेतवतनूषुशरीरेषुऋतवःसंकल्पविशेषाःफलप्रदाः भूरयोबहवोविद्यन्तेयोयत्फलमिच्छतितस्यतत्फलमस्त्वित्येवंसंकल्पमात्रेणैवददासीत्यर्थः। इत्युपनिषद्भाष्ये॥ १ नि०९. २३.।

द्वितीयामृचमाह—

तंगूर्तयोनेमन्निषःपरीणसःसमुद्रंनसंचरणेसनिष्यवः ।
पतिंदक्षस्यविदथस्यनूसहोगिरिंनवेनाअधिरोहतेजसा ॥२॥

तम् । गूर्तयः । नेमन्ऽइषः । परीणसः । समुद्रम् । न । सम्ऽचरणे ।
सनिष्यवः । पतिम् । दक्षस्य । विदथस्य । नु । सहः । गिरिम् ।
न । वेनाः । अधि । रोह । तेजसा ॥ २ ॥

गूर्तयःस्तोतारः नेमन्निषःनमस्कारपूर्वंगच्छन्तः यद्वा नीतहविष्काःपरीणसःपरितोव्यामुवन्तः एवंगुणविशिष्टायजमानाः तमिन्द्रंस्तुतिभिरधिरोहन्ति स्तुवन्तइत्यर्थः तत्रदृष्टान्तः—सनिष्यवः सनिंधनमात्मनइच्छन्तोवणिजः धनार्थंसंचरणेसञ्चारेनिमित्तभूतेसतिसमुद्रंन यथानावा समुद्रमधिरोहन्ति एवंस्तोतारोपिस्वाभिमतधनलाभायइन्द्रंस्तुवन्तीतिभावः हेस्तोतः त्वंच दक्षस्य प्रवृद्धस्यविदथस्ययज्ञस्यपतिंपालयितारं सहःसहस्व तंबलवन्तमिन्द्रंतेजसादेवताप्रकाशकेनस्तोत्रेणनुक्षिप्रंअधिरोहस्तुहीतियावत् तत्रदृष्टान्तः—वेनाःकान्ताःस्त्रियःगिरिंन यथापर्वतंस्वाभिमतपुष्पोपचयार्थमधिरोहन्ति ॥ गूर्तयः गॄशब्दे गृणन्तिस्तुवन्तीतिगूर्तयः क्तिच्क्तौचेतिकर्तरिक्तिच् बहुलंछन्दसीत्युत्वम् हलिचेतिदीर्घः चितइत्यन्तोदात्तत्वम् । नेमन्निषः णमप्रह्वत्वेइत्यस्माच्छतरिव्यत्ययेनैत्वं तकारस्यनकारादेशश्च नमन्तइष्यन्तीन्द्रंप्राप्नुवन्तीतिनेमन्निषः इषगतावित्यस्मात् क्विप्चेतिक्विप् कृदुत्तरपदप्रकृतिस्वरत्वम् यद्वा णीञ्प्रापणेइत्यस्मादर्तिस्तुस्वित्यादिनामन्प्रत्ययः बहुलवचनात् नकारस्येत्संज्ञाभावः नीताःप्रत्ताःइषोयेषां परादिश्छन्दसिबहुलमित्युत्तरपदाद्युदात्तत्वम् । परीणसः णसकौटिल्येइत्ययंधातुर्गत्यर्थः धातूनामनेकार्थत्वात् परितोनसन्तिगच्छन्तीतिपरीणसः क्विप्चेतिक्विप् निपातस्यचेतिपूर्वपदस्यदीर्घत्वम् उपसर्गादसमासेपीतिणत्वम् व्यत्ययेनाद्युदात्तत्वम् यद्वा नशतिर्गतिकर्मा अस्मात्पूर्ववत्क्विपिशकारस्यसकारः । सनिष्यवः षणुदानेइत्यस्मादिन्सर्वधातुभ्यइतिकर्मणिइन्प्रत्ययः सनिमात्मनइच्छन्तीतिक्यचि सर्वप्रातिपदिकेभ्योलालसायामसुग्वक्तव्यःसुगागमोपिवक्तव्यइतिसुक् क्याच्छन्दसीत्युप्रत्ययः । नु ऋचितुनुघेतिसांहितिकोदीर्घः । सहः अस्मादुत्तरस्यमतुपश्छान्दसोलुक् ॥ २ ॥

२. जिस प्रकार धनाभिलाषी वणिक् घूम-घूमकर समुद्र को चारों ओर व्याप्त किये रहते हैं, उसी प्रकार हव्य-वाहक स्तोता लोग चारों ओर से इन्द्र को घेरे हुए हैं। जिस प्रकार ललनायें फूल चुनने के लिए पर्वत पर चढ़ती हैं उसी प्रकार हे स्तोता, एक तेजःपूर्ण स्तोत्र के द्वारा प्रवृद्ध, यज्ञ के रक्षक, बलवान् इन्द्र के पास शीघ्र पहुँचो।

तृतीयामृचमाह—

सतुर्वणिर्महाँअरेणुपौंस्येगिरेर्भृष्टिर्नभ्राजतेतुजाशवः ।
येनशुष्णंमायिनमायसोमदेदुध्रआभृषुरामयन्निदामनि ॥३॥

सः । तुर्वणिः । महान् । अरेणु । पौंस्ये । गिरेः । भृष्टिः । न ।
भ्राजते । तुजा । शवः । येन । शुष्णम् । मायिनम् । आयसः ।
मदे । दुध्रः । आभूषु । रमयत् । नि । दामनि ॥ ३ ॥

सइन्द्रःतुर्वणिः शत्रूणांहिंसिताक्षिप्रकारीवा तुर्वणिस्तूर्णवनिरितियास्कः । तूर्णसम्भजते-इतितस्यार्थः महान्प्रवृद्धश्चभवति तस्येन्द्रस्यशवोबलं पौंस्ये वीरैःपुरुषैःकर्तव्येसङ्ग्रामेअरेणु अनवद्यं तुजाशत्रूणांहिंसकंसत्भ्राजतेदीप्यते तत्रदृष्टान्तः—गिरेःपर्वतस्यभृष्टिर्न शृङ्गमिव तद्यथा उन्नतंसत्दीप्यते तद्वत् आयसः अयोमयकवचयुक्तदेहः दुध्रः दुष्टानांशत्रूणांधर्ताअवस्थापयिता एवंभूतइन्द्रः मदेसोमपानेनहर्षेसतियेनबलेनशुष्णंसर्वस्यशोषकमसुरंमायिनंमायाविनंआभूषु कारागृहेषुदामनिबन्धकेनिगडेनिरमयत् व्यवासयत् तद्बलमितिपूर्वेणान्वयः ॥ सतुर्वणिः तुर्वी हिंसार्थः अस्मादौणादिकोनिप्रत्ययः ।अरेणु रेणुवदाच्छादकत्वाद्रेणुशब्देनावद्यमुच्यते बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् ।तुजा तुजहिंसायाम् इगुपधलक्षणःकः सुपांसुलुगितिविभक्तेराकारः। दुध्रः दुष्टान्ध्रियतेवस्थापयतीतिदुध्रः धृङ्अवस्थानेइत्यस्मादन्तर्भावितण्यर्थान्मूलविभुजादित्वात्कःप्रत्ययः यणादेशः रेफलोपश्छान्दसः ।रमयत् अमन्तत्वान्मित्त्वे मितांह्रस्वइतिह्रस्वत्वम् छान्दसःसंहितायांदीर्घः ॥ ३ ॥

३. इन्द्र शत्रुहन्ता और महान् हैं । इन्द्र का मोक्ष-शून्य और शत्रु-विनाशक बल पुरुषोचित संग्राम में पहाड़ के शृंग की तरह विराजमान है। शत्रु-मर्दक और लोह-कवच-देही इन्द्र ने सोमपान-द्वारा हृष्ट होकर बल-द्वारा, मायावी शुष्ण को हथकड़ी डालकर कारागृह में बन्द कर रक्खा था ।

चतुर्थीमृचमाह—

देवीयदितविषीत्वावृधोतयइन्द्रंसिषक्त्युषसंनसूर्यः ।
योधृष्णुनाशवसाबाधतेतमइयर्तिरेणुंबृहदर्हरिष्वणिः ॥४॥

देवी । यदि । तविषी । त्वाऽवृधा । ऊतये । इन्द्रम् । सिसक्ति । उषसम् ।
न । सूर्यः । यः । धृष्णुना । शवसा । बाधते । तमः । इयर्ति । रेणुम् ।
बृहत् । अर्हरिऽस्वनिः ॥ ४ ॥

---

१ नि० ६. १४.

यइन्द्रः धृष्णुनाधर्षकेणशवसाबलेनतमस्तमोरूपंवृत्रादिमसुरंबाधतेहिनस्ति ऊतयेरक्षणायत्वावृधात्वयास्तोत्रावर्धितंतमिन्द्रंदेवीतविषी द्योतमानंबलंयदियदासिषक्तिसमवैतिसेवतइति यास्कः। सूर्यःउषसंन यथाउषोदेवतांसेवतेनित्यंतत्संबद्धोभवतीत्यर्थः तदानींअर्हरिष्वणिःगच्छन्तोहरन्तीत्यर्हरयःशत्रवः तेषांव्यथोत्पादनेनस्वनयिता शब्दयिताइन्द्रःरेणुंरेषणंहिंसनंबृहत्प्रभूतंइयर्तिशत्रून्गमयति॥ त्वावृधा त्वयावर्धतइतित्वावृत् क्विप्चेतिक्विप् प्रत्ययोत्तरपदयोश्चेतिमपर्यन्तस्यत्वादेशः छान्दसंदकारस्यात्वम् सुपांसुलुगितिद्वितीयायाआकारः। सिषक्ति षचसमवाये बहुलंछन्दसीतिशपःश्लुः बहुलंछन्दसीत्यभ्यासस्येत्वम्। इयर्ति ऋसृगतौ जौहोत्यादिकः अस्मादन्तर्भावितण्यर्थाल्लट् शपःश्लुः द्विर्भावोरदत्वहलादिशेषाः अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वम् अभ्यासस्यासवर्णेइतीयङादेशः अनुदात्तेचेतिअभ्यासस्याद्युदात्तत्वम् पूर्वपदस्यवाक्यान्तरगतत्वेनपदादपरत्वान्निघाताभावः। रेणुं रीगतिरेषणयोः अस्मादौणादिकोनुप्रत्ययः। अर्हरिष्वणिः अर्तेरन्येभ्योपिदृश्यन्तइतिविच् अरोगच्छन्तश्चेमेहरयश्चेत्यर्हरयः तेषांस्वनयिता स्यमुस्वनध्वनशब्दे अस्माण्ण्यन्तादौणादिकइन्प्रत्ययः णेरनिटीतिणिलोपः घटादित्वान्मित्त्वे मितांह्रस्वइतिह्रस्वत्वम् कृदुत्तरपदप्रकृतिस्वरत्वम्॥ ४॥

४. जैसे सूर्य उषा का सेवन करते हैं, उसी प्रकार तुम्हारा दीप्तिमान् बल, तुम्हारी रक्षा के लिए, तुम्हारे स्तोत्र-द्वारा वर्द्धित इन्द्र की सेवा करता है। वही इन्द्र विजयी बल-द्वारा अन्धकार रूप वृत्र का दमन करते और शत्रुओं को रुलाकर अच्छी तरह उनका ध्वंस करते हैं।

वियत्तिरोधरुणमच्युतंरजोतिष्ठिपोदिवआतासुबर्हणा।
स्वर्मीळ्हेयन्मदइन्द्रहर्ष्याहन्वृत्रंनिरपामौब्जोअर्णवम्॥५॥

वि। यत्। तिरः। धरुणम्। अच्युतम्। रजः। अतिस्थिपः।
दिवः। आतासु। बर्हणा। स्वःऽमीळ्हे। यत्। मदे। इन्द्र। हर्ष्या।
अहन्। वृत्रम्। निः। अपाम्। औब्जः। अर्णवम्॥ ५॥

यद्यदातिरः वृत्रेणतिरोहितं धरुणं सर्वस्यप्राणिजातस्यधारकं अच्युतंविनाशरहितं रजः उदकंदिवोद्युलोकात् आतासु आताइतिदिङ्नाम आतासुविस्तृतासुदिक्षु हेइन्द्र बर्हणाहन्तात्वं व्यतिष्ठिपः विविधंस्थापयाञ्चकृषे तथा यद्यदास्वर्मीळ्हेमीळ्हइतिधननाम स्वःसुष्ठुगन्तव्यंमीळ्हंधनंयस्मिन्तस्मिन्सङ्ग्रामे मदे तवसोमपानेनहर्षेसति हर्ष्याहृष्टयाशक्त्या वृत्रमावरकमसुरमहन् त्वमवधीः तदानीं अपांपूर्णमर्णवंमेघंनिरौब्जः वर्षणाभिमुखंअधोमुखमकार्षीः वृष्टेरावरकंवृ-

त्वंहत्वावृष्टिजलेनभूमिंन्यसैक्षीरितितात्पर्यार्थः॥ अतिष्ठिपः तिष्ठतेर्ण्यन्ताल्लुङि चेरङ्गदेशः णिलोपः तिष्ठतेरिदित्युपधायाइत्वम् चङीतिद्विर्वचने शर्पूर्वाःखयइतिथकारःशिष्यते चर्त्वेनतकारः अडागमउदात्तः यद्वृत्तयोगादनिघातः। बर्हणा सुपांसुलुगितिसोराकारः। स्वर्मीळ्हे मिहसेचने निष्ठा होढइतिढत्वम् झषस्तथोर्धोधइतितकारस्यधत्वम् तस्यष्टुत्वेढोढेलोपइतिढलोपः ढ्रलोपेपूर्वस्येतिदीर्घत्वम् स्वरित्येतत् न्यङ्स्वरौस्वरिताविति स्वर्यते बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वेन तदेव शिष्यते। अहन् हन्तेर्लङिमध्यमैकवचने हल्ङ्याब्भ्यइतिसेर्लोपः यद्वृत्तयोगादनिघातः। औब्जः उब्जआर्जवे लङ्याडागमोवृद्धिश्च॥ ५॥

५. शत्रु-हन्ता इन्द्र! जिस समय तुमने वृत्र-द्वारा अवरुद्ध, जीवन-रक्षक और विनाश-रहित जल आकाश से चारों ओर वितरण किया, उस समय सोमपान से हर्ष-युक्त होकर तुमने लड़ाई में वृत्र का वध किया था और जल के समुद्र की तरह मेघ को निम्नमुख कर दिया था।

त्वंदिवोधरुणंधिषओजसापृथिव्याइन्द्रसदनेषुमाहिनः।
त्वंसुतस्यमदेअरिणाअपोविवृत्रस्यसमयापाष्यारुजः॥६॥२१॥

त्वम्। दिवः। धरुणम्। धिषे। ओजसा। पृथिव्याः। इन्द्र। सदनेषु। माहिनः। त्वम्। सुतस्य। मदे। अरिणाः। अपः। वि। वृत्रस्य। समया। पाष्या। अरुजः॥ ६॥ २१॥

हेइन्द्र माहिनः मवृद्धस्त्वं दिवोद्युलोकात् पृथिव्याःसदनेषुप्रदेशेषु ओजसाबलेनधरुणं सर्वस्यजगतोधारकंवृष्टिजलंधिषे दधिषे स्थापयसि यस्मात्त्वंसुतस्यसोमस्यपानेनमदे हर्षेसति अपोजलानि अरिणाःमेघान्निरगमयः वृत्रस्य आवरकंवृत्रंचसमयाधृष्टया पाष्याशिलया यद्वा शक्त्या व्यरुजः विशेषेणाभांक्षीः॥ धिषे दधातेश्छान्दसोवर्तमानेलिट् द्विर्वचनप्रकरणे छन्दसिचेतिवक्तव्यमितिवचनात् द्विर्वचनाभावः क्रादिनियमादिडागमे आतोलोपइटिचेत्याकारलोपः। माहिनः महेरिनण्चेतिमहपूजायामित्यस्मादौणादिकइनण्प्रत्ययः अतउपधायाइतिवृद्धिः। अरिणाः रीगतिरेषणयोः क्रैयादिकः लङिसिपि प्वादीनांह्रस्वइतिह्रस्वत्वम्। समया षमष्टमवैक्लव्ये समतीतिसमा पचाद्यच् चितइत्यन्तोदात्तत्वम्। पाष्या पिषॢसंचूर्णनेइत्यस्मादौणादिकइन् प्रत्ययः बहुलवचनात्उपधायाआकारः कृदिकारादक्तिनइतिङीप् प्रत्ययस्वरेणान्तोदात्तः तृतीयैकवचनेयणादेशेसति उदात्तस्वरितयोर्यणइतिस्वरितत्वम्। अरुजः रुजोभङ्गे तौदादिकः शस्यङित्वाद्गुणाभावः॥ ६॥

६. इन्द्र! तुम महान् हो। अपने बल के द्वारा सारे जगत् के धारक-वृष्टि-जल को आकाश से पृथिवी के प्रदेशों पर स्थापित करते हो। तुमने सोमपान से हृष्ट होकर मेघ से जल को बाहर कर दिया है और विशाल पाषाण से वृत्र को ध्वस्त किया है।

प्रमंहिष्ठायेतिषळृचंसप्तमंसूक्तंसव्यस्यार्षमैन्द्रंजागतं तथाचानुक्रान्तम्—प्रमंहिष्ठायेति विषुवतिनिष्केवल्येइदंसूक्तंशंसनीयं प्रमंहिष्ठायत्यमूष्वितीहवाक्ष्यमन्ततइति उक्थसंस्थेक्रतौ तृतीयसवनेब्राह्मणाच्छंसिशस्त्रेप्येतत्सूक्तम् सूत्रितञ्च—सर्वाःककुभःप्रमंहिष्ठायोदप्रुतइति ।

तत्रप्रथमामृचमाह—

प्रमंहिष्ठायबृहतेबृहद्रयेसत्यशुष्मायतवसेमतिंभरे।
अपामिवप्रवणेयस्यदुर्धरंराधोविश्वायुशवसेअपावृतम् ॥१॥

प्र । मंहिष्ठाय । बृहते । बृहत्ऽरये । सत्यऽशुष्माय । तवसे । मतिम् । भरे । अपाम्ऽइव । प्रवणे । यस्य । दुःऽधरम् । राधः । विश्वऽआयु । शवसे । अपऽवृतम् ॥ १ ॥

मंहिष्ठाय मंहतिर्दानकर्मेतियास्कः । दातृतमाय बृहतेगुणैर्महतेबृहद्रयेमहाधनायसत्यशुष्मायअवितथबलायतवसेआकारतःप्रवृद्धाय एवंगुणविशिष्टायेन्द्रायमतिंमननीयांस्तुतिंप्रभरे प्रकर्षेणसम्पादयामि यस्येन्द्रस्यबलंदुर्धरंअन्यैर्धर्तुमशक्यं तत्रदृष्टान्तः—प्रवणेनिम्नप्रदेशेअपामिव यथाजलानांवेगःकेनाप्यवस्थापयितुंनशक्यतेतद्वत् तथा राधोधनंविश्वायुसर्वेषुव्याप्तं शवसे स्तोतॄणांबलाययेनेन्द्रेणापावृतंअपगतावरणंक्रियते तस्येन्द्रस्येतिपूर्वेणसम्बन्धः ॥ मंहिष्ठाय अतिशयेन मंहितामंहिष्ठः तुश्छन्दसीतीष्ठन्प्रत्ययः तुरिष्ठेमेयःस्वितितृलोपः। बृहते बृहन्महतोरुपसंख्यानमितिविभक्तेरुदात्तत्वम् उत्तरयोश्चबहुव्रीहिस्वरः। मतिं मन्त्रेवृषेत्यादिनाक्तिनउदात्तत्वम् अनुदात्तोपदेशेत्यादिनाऽनुनासिकलोपः । दुर्धरम् धृञ्धारणे ईषद्दुःसुष्वितिकर्मणिखल् । विश्वायु विश्वस्मिन्सर्वस्मिनआयुगमनंयस्यतद्विश्वायुएतेश्छन्दसीणइत्युण्प्रत्ययः बहुव्रीहौविश्वंसंज्ञायामितिपूर्वपदान्तोदात्तत्वम् । अपावृतम् कर्मणिनिष्ठा गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम् ॥ १ ॥

१. अतीव दानी, महान्, प्रभूतधनशाली, अमोघबल-सम्पन्न और प्रकाण्ड-देह-विशिष्ट इन्द्र के उद्देश से मैं मननीय स्तुति सम्पादित करता हूँ। निम्नगामिनी जलधारा की तरह इन्द्र का बल कोई नहीं धारण कर सकता। स्तोताओं के बल-साधन के लिए इन्द्र सर्वव्यापी सम्पद् का प्रकाश करते हैं। द्वितीयामृचमाह—

अधतेविश्वमनुहासदिष्टयआपोनिम्नेवसवनाहविष्मतः ।
यत्पर्वतेनसमशीतहर्यतइन्द्रस्यवज्रःश्नथितहिरण्ययः ॥२॥

---

१ नि० १. ७. ।

अध । ते । विश्वम् । अनु । ह । असत् । इष्टये । आपः ।
निम्नाऽइव । सवना । हविष्मतः । यत् । पर्वते । न । सम्ऽअशीत ।
हर्यतः । इन्द्रस्य । वज्रः । श्नथिता । हिरण्ययः ॥ २॥

अधह अनन्तरमेव हेइन्द्र विश्वंसर्वमिदंजगत् तेतवसम्बन्धिनेइष्टयेयागायअन्वसत् अन्वभवत् यद्वा इष्टयेहविरादिभिस्त्वमाप्तयेइतियोज्यम् हविष्मतोयजमानस्यसवनासवनानियज्ञजातानिनिम्नेव निम्नानिभूस्थलान्यापइवत्वांसम्भजन्तइतिशेषः हर्यतः शत्रुवधंमेप्सतइन्द्रस्य हर्यतिःप्रेप्साकर्मेतियास्कः।यद्वा हर्यतःशोभनःहिरण्ययोहिरण्मयःश्नथिताशत्रूणांहिंसनशीलःवज्रःपर्वतेपर्ववतिशिलोच्चयेवृत्रेवायद्यदानसमशीतसंसुप्तोनाभवत् किन्तुजागरितःसन् अवधीदित्यर्थः यदाइन्द्रेणमेरितोवज्रः अप्रतिहतःसन्वृत्रमवधीत् तदाप्रभृत्येवतंयष्टुंसर्वेयजमानाःप्रावर्तिषतेविभावः॥ अध छान्दसंधत्वम्। असत् अस्तेर्लेङि बहुलंछन्दसीतिशपोलुगभावः। इष्टये यजतेर्भावे क्तिनि वचिस्वपीत्यादिनासम्प्रसारणं व्रश्चादिनाषत्वम् व्यत्ययेनान्तोदात्तत्वम् यद्वा इषगतावित्यस्माद्भावेक्तिनि मन्त्रेवृषेतितस्योदात्तत्वम्। निम्नेव सवना शेश्छन्दसिबहुलमितिशेर्लोपः।समशीत शीङ्स्वप्ने लङिसंज्ञापूर्वकस्यविधेरनित्यत्वात् शीङःसार्वधातुकइतिगुणाभावः। हर्यतः हर्यगतिकान्त्योः भृमृदृशीत्यादिनाअतच्प्रत्ययः। श्नथिता श्नथक्नथक्रथहिंसार्थाः ताच्छीलिकस्तृन्प्रत्ययः नित्त्वादाद्युदात्तत्वम्॥ २॥

२. इन्द्र! यह सारा जगत् तुम्हारे यज्ञ में (सदा) हव्य दाताओं का अभिषुत सोमरस तुम्हारी ओर प्रवाहित हुआ था। इन्द्र का शोभनीय, सुवर्णमय और हननशील वज्र पर्वत पर निद्रित था।

तृतीयामृचमाह—

अस्मैभीमायनमसासमध्वरउषोनशुभ्रआभरापनीयसे।
यस्यधामश्रवसेनामेन्द्रियंज्योतिरकारिहरितोनायसे॥३॥

अस्मै । भीमाय । नमसा । सम् । अध्वरे । उषः । न । शुभ्रे । आ । भर । पनीयसे । यस्य । धाम । श्रवसे । नाम । इन्द्रियम् । ज्योतिः । अकारि । हरितः । न । अयसे ॥ ३ ॥

हेउषः उषोदेवते शुभ्रेशोभने त्वंभीमायशत्रूणांभयंकराय पनीयसेअतिशयेनस्तोतव्याय अस्माइन्द्रायअध्वरेहिंसारहितेऽस्मिन्यागेनेतिसंप्रत्यर्थे तथाचयास्कः—अस्त्युपमार्थस्यसम्प्र-

१ नि० ७. १७.

त्यर्थेप्रयोगइहेवनिधेहीति । संप्रतिइदानींनमसा नमोहविर्लक्षणमन्नंसमाभरसम्यक्सम्पादय धामसर्वस्यधारकंनामस्तोत्रेषु नमनशीलंप्रसिद्धंवाइन्द्रियंइन्द्रत्वस्यपरमैश्वर्यस्यलिङ्गंयस्येन्द्रस्य एवंविधंज्योतिः श्रवस्येऽन्नायहविर्लक्षणान्नलाभार्थंअयसेइतस्ततोगमनायअकारिक्रियते हरितोन यथाअश्वान्सादिनःस्वाभिलषितदेशंगमयन्तितद्वदिन्द्रोपिस्वाभिमतहविर्लाभायस्वकीयंतेजोगमयतीतिभावः ॥ उषः पादादित्वान्निघाताभावः । शुभ्रे शुभदीप्तौ स्फायितश्चीत्यादिनारक्प्रत्ययः । भर ह्रग्रहोर्भइतिभत्वम् द्व्यचोतस्तिङइतिदीर्घः । पनीयसे पनतेःस्तुत्यर्थाद्बहुलवचनात्कर्मण्यसुन् तस्मादातिशायनिकेईयसुनि टेरितिटिलोपः । अकारि छन्दसिलुङ्लङ्लिटइतिवर्तमानेकर्मणिलुङ् यद्वृत्तयोगादनिघातः अडागमउदात्तः । अयसे अयगतावित्यस्माद्भावेअसुन् ॥ ३ ॥

३. शुभ उषा ! भयावह और अतीव स्तुति-पात्र इन्द्र को इस यज्ञ में इस समय यज्ञान्न दो। उनकी विश्वधारक, प्रसिद्ध और इन्द्रत्व-चिह्न युक्त ज्योति, घोड़े की तरह उनको यज्ञान्न-प्राप्ति करने के अर्थ, इधर-उधर ले जाती है।

इ॒मे त॑ इन्द्र॒ ते व॒यं पु॑रुष्टुत॒ ये त्वा॒रभ्य॒ चरा॑मसि प्रभूवसो ।
न॒हि त्वद॒न्यो गि॑र्वणो॒ गिरः॒ सघ॑त्क्षो॒णीरि॑व॒ प्रति॒ नो॑ हर्य॒ तद्वचः॑ ॥४॥

इ॒मे । ते॒ । इ॒न्द्र॒ । ते । व॒यम् । पु॒रु॒ऽस्तु॒त॒ । ये । त्वा॒ । आ॒ऽरभ्य॑ । चरा॑मसि । प्र॒भु॒व॒सो॒ इति॑ प्रभुऽवसो । न॒हि । त्वत् । अ॒न्यः । गि॒र्व॒णः॒ । गिरः॑ । सघ॑त् । क्षो॒णीःऽइ॑व । प्रति॑ । नः॒ । ह॒र्य॒ । तत् । वचः॑ ॥ ४ ॥

हेइन्द्र प्रभूवसोप्रभूतधन अतएवपुरुष्टुतपुरुभिर्बहुभिर्यजमानैःस्तुत येचवयंत्वात्वामारभ्याश्रयतयावलम्ब्य चरामसिचरामोयागेवर्तामहे तइमेवयं तेतवस्वभूताहेगिर्वणः गीर्भिर्वननीयेन्द्र त्वदन्यस्त्वत्तोन्यःकश्चिदपिगिरःस्तुतीःनहिसघत्नहिप्राप्नोति अतस्त्वंनोस्माकंतत्स्तुतिलक्षणंवचःप्रतिहर्यकामयस्व क्षोणीरिव यथाक्षोणीपृथिवीस्वकीयानिभूतजातानिकामयते ॥ चरामसि इदन्तोमसिः शपःपित्त्वादनुदात्तत्वेधातुस्वरः यद्वृत्तयोगादनिघातः । सघत् षघहिंसायां अत्रप्राप्त्यर्थः धातूनामनेकार्थत्वात् लेटचडागमः बहुलंछन्दसीतिविकरणस्यलुक् पादादित्वान्निघाताभावः । क्षोणीरिव हल्ङ्याब्भ्यइतिसुलोपाभावश्छान्दसः ॥ ४ ॥

४. प्रभूतधनशाली और बहु-लोक-स्तुत इन्द्र ! हम तुम्हारा अवलम्बन करके यज्ञ सम्पादन करते हैं। हम तुम्हारे ही हैं। स्तुति-पात्र ! तुम्हारे सिवा और कोई यह स्तुति नहीं पाता। जैसे पृथिवी अपने प्राणियों को धारण करती है, उसी तरह तुम भी वह स्तुति-वचन ग्रहण करो।

---

१ नि० ७, ३१.।

पञ्चमीमृचमाह—

भूरिंतइन्द्रवीर्यं१तवंस्मस्यस्यस्तोतुर्मघवन्काममापृण ।
अनुंतेद्यौर्बृहतीवीर्यंममइयंचंतेपृथिवीनेमओजसे ॥५॥

भूरिं । ते । इन्द्र । वीर्यम् । तवं । स्मसि । अस्य । स्तोतुः ।
मघऽवन् । कामम् । आ । पृण । अनुं । ते । द्यौः । बृहती ।
वीर्यम् । ममे । इयम् । च । ते । पृथिवी । नेमे । ओजसे ॥ ५ ॥

हेइन्द्र तेतववीर्यंसामर्थ्यं भूरिबहु नकेनापिअवच्छेत्तुंशक्यते तादृशस्यतव वयंस्मसिस्वभूताभवामः हेमघवन् अस्यस्तोतुः त्वांस्तुवतोयजमानस्य काममभिलाषं आपृणआपूरय बृहती द्यौर्महान्द्युलोकोपि तेतववीर्यंअनुममेअन्वमंस्त इन्द्रेणसहावस्थानात् इयंचइयमपिपृथिवीते तवओजसेबलायनेमे प्रह्वीबभूव त्वद्बलाद्भीतासती अधएववर्ततइतिभावः ॥ स्मसि असभुवि लटि श्नसोरल्लोपइत्यकारलोपः इदन्तोमसिः । पृण पृणप्रीणने अत्रप्रीतिहेतुतयापूरणंलक्ष्यते तुदादित्वाच्छप्रत्ययः तस्यङित्त्वाद्गुणाभावः । ममे माङ्माने शब्देच ङित्त्वादात्मनेपदम् लिटि आतोलोपइटिचेत्याकारलोपः । नेमे णमप्रह्वत्वे लिटि अतएकहल्मध्येइत्येत्वाभ्यासलोपौ तिङ्ङतिङइतिनिघातः ॥ ५ ॥

५. इन्द्र! तुम्हारा वीर्य महान् है। हम तुम्हारे ही हैं। मघवन्! इस स्तोता की कामना पूरी करो। विशाल आकाश ने तुम्हारे वीर्य का लोहा माना था। यह पृथिवी भी तुम्हारे बल से अवनत है।

षष्ठीमृचमाह—

त्वंतमिन्द्रपर्वतंमहामुरुंवज्रेणवज्रिन्पर्वशश्चकर्तिथ ।
अवासृजोनिवृंताःसर्तवाअपःसत्राविश्वंदधिषेकेवलंसहः ॥६॥२२

त्वम् । तम् । इन्द्र । पर्वतम् । महाम् । उरुम् । वज्रेण । वज्रिन् ।
पर्वऽशः । चकर्तिथ । अवं । असृजः । निऽवृंताः । सर्तवै । अपः ।
सत्रा । विश्वम् । दधिषे । केवलम् । सहः ॥ ६ ॥ २२ ॥

हेवज्रिन् वज्रवन्निन्द्र त्वंतंप्रसिद्धम् महां आयामतोमहान्तं उरुंविस्तीर्णंपर्वतंपर्ववन्तं मेघं वृत्रासुरंवा वज्रेणायुधेनपर्वशःपर्वणिपर्वणिचकर्तिथशकलीचकर्थ तेनमेघेननिवृताआवृताअपःसर्तवैसरणायगमनायअवासृजःअवाङ्मुखमस्राक्षीः अतस्त्वमेवकेवलंविश्वंव्याप्तंसहोबलंदधिषे धारयसि नान्यःकश्चिदितियदेतत् तत्सत्रासत्यमेव सत्रेतिसत्यनाम सत्रा इत्येतित्वा-

मसुपाठात्॥ महांमहान्तं नकारतकारयोर्लोपश्छान्दसः। चकर्तेथ कृतीछेदने लिटि थलि अ-भ्यासस्योरदत्वहलादिशेषचुत्वानि। सर्तवै कृत्यार्थेतवैकेनितिभावेतवैप्रत्ययः कृन्मेजन्तइत्य-व्ययत्वे अव्ययादाप्सुपइतिसुपोलुक् अन्तश्चतवैयुगपदित्याद्यन्तयोर्युगपदुदात्तत्वम्। दधिषे लिटिक्रादिनियमादिट्॥ ६॥

६. वज्रधारी इन्द्र! तुमने उस विस्तीर्ण मेघ को, वज्र-द्वारा, टुकड़े-टुकड़े किया। उस मेघ के द्वारा आवृत जल, बहने के लिए, तुमने नीचे छोड़ दिया। केवल तुम्हीं विश्वव्यापी बल धारण करते हो।

॥ इतिप्रथमस्यचतुर्थेद्वाविंशोवर्गः॥ २२॥

॥ इतिप्रथमेमण्डलेदशमोनुवाकः॥ १०॥

एकादशानुवाकेसप्तसूक्तानि तत्रनूचिदितिनवर्चंप्रथमंसूक्तम्. गौतमस्यनोधसआर्षं आ-ग्नेयं आद्याःपञ्चजगत्यः शिष्टाश्चतस्त्रस्त्रिष्टुभः तथाचानुक्रान्तम्—नूचिन्नवनोधागोतमआग्नेयंहि-चतुस्त्रिष्टुबन्तमिति हीतिवचनादुत्तरेचद्वेसूक्तेअग्निदेवताके अभिप्लवषडहस्यपञ्चमेहन्याग्नि-मारुते इदंजातवेदस्यंनिविद्धानम् तृतीयस्येतिखण्डेसूत्रितम्—पृक्षस्यवृष्णोवृष्णेशर्धायनूचि-त्सहोजाइत्याग्निमारुतमिति। प्रातरनुवाकस्याग्नेयेक्रतौआश्विनशस्त्रेचजागतेछन्दसि आदितः पञ्चर्चः सूत्रितंच—त्वमग्नेप्रथमोअङ्गिरानूचित्सहोजाअमृतोनितुन्दतइतिपञ्चेति।

तत्रप्रथमामृचमाह—

नूचित्सहोजाअमृतोनितुन्दतेहोतायद्दूतोअभवद्विवस्वतः।
विसाधिष्ठेभिःपथिभीरजोममआदेवतातादविषाविवासति॥१॥

नु। चित्। सहःऽजाः। अमृतः। नि। तुन्दते। होता। यत्। दूतः। अभवत्। विवस्वतः। वि। साधिष्ठेभिः। पथिऽभिः। रजः। ममे। आ। देवऽताता। हविषा। विवासति॥ १॥

सहोजाःसहसाबलेनजातः अग्निर्हिबलेनमथ्यमानोरण्योःसकाशाज्जायते अमृतोमरणरहि-तः एवंभूतोग्निःनूचित्क्षिप्रमेवनितुन्दतेनितरांव्यथयति उत्पन्नमात्रस्याग्नेःस्प्रष्टुमशक्यत्वात् यद्वा निर्गच्छति तुन्दतिर्गत्यर्थःसौत्रोधातुः यद्यदाहोतादेवानामाह्वाताहोमनिष्पादकोवाअयमग्निःविव-स्वतःपरिचरतोयजमानस्यदेवान्प्रतिहविर्वहनायदूतोभवत्हविर्वहनेनियुक्तोभवति तदानींसाधि-ष्ठेभिःसमीचीनैःपथिभिःमार्गैःगच्छन्रजोन्तरिक्षंलोकंविममेनिर्ममे पूर्वंविद्यमानमप्यन्तरिक्षंअस-

त्कल्पमभूत् इदानींतस्यतेजसाप्रकाशमानंसत्उत्पन्नमिवदृश्यते किञ्च देवताता देवतातेतियज्ञनाम देवताता देवतातौ यज्ञे हविषाचरुपुरोडाशादिलक्षणेनदेवानाविवासतिपरिचरति॥ अमृतः मृतंमरणमस्यनास्तीतिबहुव्रीहौ नञोजरमरमित्रमृताइत्युत्तरपदाद्युदात्तत्वम्।तुन्दते तुदव्यथने स्वरितेत्त्वादात्मनेपदम् नकारोपजनश्छान्दसः। साधिष्ठेभिः बाढशब्दादातिशायनिकेइष्ठनिअन्तिकबाढयोर्नेदसाधावितिसाधादेशः बहुलंछन्दसीतिभिसऐसभावः नित्त्वादाद्युदात्तत्वम्। देवताता सर्वदेवाचातिलितिस्वार्थिकस्तातिल्प्रत्ययः तेनचतत्सम्बन्धीयज्ञोलक्ष्यते यद्वा देवान्हविषाआविवासतीतियोज्यम् सुपांसुलुगितिविभक्तेर्डादेशः लित्स्वरेणप्रत्ययात्पूर्वस्योदात्तत्वम्॥ १॥

१. बड़े बल से उत्पन्न और अमर अग्नि व्यथा-दान या ज्वलन में समर्थ हैं। जिस समय देवाह्वानकारी अग्नि यजमान के हव्यवाही दूत हुए थे, उस समय समीचीन पथ-द्वारा जाकर उन्होंने अन्तरिक्ष निर्माण किया था या वहाँ प्रकाश किया था। अग्नि यज्ञ में हव्य-द्वारा देवों की परिचर्या करते हैं।

आस्वमद्मंयुवमानोअजरस्तृष्वविष्यन्नतसेषुतिष्ठति।
अत्योनपृष्ठंप्रुषितस्यरोचतेदिवोनसानुस्तनयन्नचिक्रदत्॥२॥

आ। स्वम्। अद्म। युवमानः। अजरः। तृषु। अविष्यन्। अतसेषु। तिष्ठति। अत्यः। न। पृष्ठम्। प्रुषितस्य। रोचते। दिवः। न। सानु। स्तनयन्। अचिक्रदत्॥ २॥

अजरोजरारहितोयमग्निः स्वंस्वकीयंअद्मअदनीयंतृणगुल्मादिकंयुवमानः स्वकीयज्वालयासंमिश्रयन् तदनन्तरंचाविष्यन्भक्षयंश्च अविष्यन्नित्येतदत्तिकर्मसुपठितम् एवंभूतोग्निःतृषुक्षिप्रमेवअतसेषुप्रभूतेषुकाष्ठेषुआतिष्ठति आरोहति अत्रातसशब्दःकाष्ठवाची अतसंनशुष्कमितिदर्शनात् प्रुषितस्यदग्धुमितस्ततःप्रवृत्तस्याग्नेःपृष्ठमुपर्यवस्थितज्वालाजालंअत्योनरोचते यथा सन्ततगमनशीलोत्योश्वइतस्ततोगच्छन्शोभते एवमग्नेर्ज्वालापिसर्वतोगच्छन्तीशोभतइतिभावः तदानींदिवोद्युलोकस्यसम्बन्धिसानुसमुच्छ्रितमभ्रंस्तनयन्न शब्दयन्निव अचिक्रदत् गम्भीरशब्दमात्मानमचीकरत्॥युवमानः युमिश्रणे व्यत्ययेनात्मनेपदम् शपिप्राप्तेव्यत्ययेनशः तस्यबहुलंछन्दसीतिलुगभावः अदुपदेशाल्लसार्वधातुकानुदात्तत्वेविकरणस्वरएवशिष्यते। अजरः बहुव्रीहौ नञोजरमरमित्रमृताइत्युत्तरपदाद्युदात्तत्वम्। अचिक्रदत् कदिक्रदिक्लदिआह्वानेरोदनेच अस्माण्ण्यन्तात्लुङिचङि आगमानुशासनस्यानित्यत्वात्नुमभावः द्विर्भावहलादिशेषसन्वद्भावेत्वानि॥२॥

२. अजर अग्नि तृण-गुल्म आदि अपने खाद्य को ज्वलन-शक्ति-द्वारा मिलाकर और भक्षण कर तुरत काठ के ऊपर चढ़ गये। दहन करने के लिए इधर-उधर जानेवाली अग्नि की पृष्ठ-देश-स्थित ज्वाला गमनशील घोड़े की तरह शोभा पाती है। साथ ही आकाश के उन्नत और शब्दायमान मेघ की तरह शब्द भी करती है।

तृतीयामृचमाह—

क्राणारुद्रेभिर्वसुभिःपुरोहितोहोतानिषत्तोरयिषाळमर्त्यः।
रथोनविक्ष्वृंजसानआयुषुव्यानुषग्वार्यादेवऋण्वति ॥३॥

क्राणा। रुद्रेभिः। वसुऽभिः। पुरःऽहितः। होता। निऽसत्तः।
रयिषाट्। अमर्त्यः। रथः। न। विक्षु। ऋञ्जसानः। आयुषु।
वि। आनुषक्। वार्या। देवः। ऋण्वति ॥ ३ ॥

क्राणाहविर्वहनंकुर्वाणः रुद्रेभीरुद्रैः वसुभिश्चपुरोहितःपुरस्कृतोहोतादेवानामाह्वातानिषत्तः हविःस्वीकरणार्थंदेवयजनेनिषण्णः रयिषाट् रयीणांशत्रुधनानांअभिभविता अमर्त्योमरणरहितः एवंभूतोदेवःद्योतमानोग्निः विक्षुप्रजासुलौकिकजनेषु रथोन रथइवआयुषुयजमानलक्षणेषु मनुष्येषुऋञ्जसानः स्तूयमानः वार्या वार्याणिसम्भजनीयानिधनानिआनुषक्आनुषक्तंयथाभवति तथाव्यृण्वतिविशेषेणप्रापयति यद्वा वार्याणिवरणीयानिहवींषिस्वयंप्राप्नोति॥क्राणा करोतेः शानचिबहुलंछन्दसीतिविकरणस्यलुक् शानचोङित्त्वाद्गुणाभावेयणादेशः चितइत्यन्तोदात्तत्वम् सुपांसुलुगितिसोःपूर्वसवर्णदीर्घत्वम्। निषत्तः षद्लृविशरणगत्यवसादनेषु अस्मात्कर्मणिनिष्ठा नसत्तनिषत्तेत्यादिनानिष्ठानत्वाभावोनिपातितः गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम्। रयिषाट् षहअभिभवे छन्दसिसहइतिण्विः सहेःसाडःसइतिषत्वम्।ऋञ्जसानः ऋञ्जतिःस्तुतिकर्मा असानजित्यनुवृत्तौऋञ्जिवृधिमन्दिसहिभ्यःकिदितिकर्मण्यसानच्प्रत्ययः चितइत्यन्तोदात्तत्वम्। आयुषु आयवइतिमनुष्यनाम इण्गतावित्यस्माच्छन्दसीणइत्युण्प्रत्ययः वृद्ध्यायादेशौ। वार्या वृङ् संभक्तौ ऋहलोर्ण्यत् तित्स्वरितेप्राप्ते ईडवन्दवृशंसदुहांण्यतइत्याद्युदात्तत्वम् शेश्छन्दसीतिशेर्लोपः। ऋण्वति रिविगतौ व्यत्ययेनसम्प्रसारणम् इदित्त्वान्नुम् कर्तरिशप्॥ ३ ॥

३. अग्नि हव्य का वहन करते हैं और रुद्रों तथा वसुओं के सम्मुख स्थान पाये हुए हैं। अग्नि देवाह्वानकारी और यज्ञ-स्थानों में उपस्थित रहते हैं। वह धन-जयी और अमर हैं। दीप्तिमान् अग्नि यजमानों की स्तुति लाभ करके और रथ की तरह चल करके प्रजाओं के घर में बार-बार वरणीय या श्रेष्ठ धन प्रदान करते हैं।

चतुर्थीमृचमाह—

विवातजूतोअतसेषुतिष्ठतेवृथाजुहूभिःसृण्यातुविष्वणिः।
तृषुयदग्नेवनिनोवृषायसेकृष्णंतएमरुशदूर्मेअजर ॥ ४ ॥

वि । वातऽजूतः । अतसेषु । तिष्ठते । वृथा । जुहूभिः । सृण्या । तुविऽस्वनिः । तृषु । यत् । अग्ने । वनिनः । वृषऽयसे । कृष्णम् । ते । एम । रुशत्ऽऊर्मे । अजर ॥ ४ ॥

वातजूतोवायुनाप्रेरितःतुविष्वणिःमहास्वनः एवंभूतोग्निः जुहूभिःस्वकीयाभिर्जिह्वाभिःसृण्यासरणशीलेनतेजःसमूहेनचयुक्तःसन् वृष्ण्येत्यनायासवचनः वृथाअनायासेनैवअतसेषुउन्नतेषुवृक्षेषुवितिष्ठतेविशेषेणतिष्ठति हेअग्ने यद्यदावनिनोवनसम्बद्धान्वृक्षानदग्धुंवृषायसेवृषवदाचरसि-दहसीत्यर्थः हेरुशदूर्मेदीप्तज्वाल अजरजरारहिताग्ने तेतवए मगमनमार्गःकृष्णंकृष्णवर्णोभवति ॥ वातजूतः जूइतिसौत्रोधातुः वातेनजूतोवातजूतः तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरत्वम्। वितिष्ठते समवप्रविभ्यइत्यात्मनेपदम्। जुहूभिः हुदानादनयोः हूयतेआस्विविजुह्वःस्रुचःश्रुवच्चेतिक्विप् चकाराद्दीर्घःश्लुवद्भावाद्द्विर्भावादि धातोरित्यन्तोदात्तत्वम् । सृण्या सृगतौ सरतीतिसृणिःसृवृषिभ्यांकिदितिनिप्रत्ययः । एम एत्यनेनेत्येम मार्गः इण्गतावित्यस्मात्करणेऔणादिकोमनिन् नित्त्वादाद्युदात्तत्वम् ॥ ४ ॥

४. अग्नि, वायु-द्वारा प्रेरित होकर, महाशब्द, ज्वलन्त जिह्वा और तेज के साथ, अनायास पेड़ों को दग्ध कर देते हैं। अग्नि ! जिस समय तुम वन्य वृक्षों को शीघ्र जलाने के लिए साँड़ की तरह व्यग्र होते हो, हे दीप्त-ज्वाल अजर अग्नि ! उस समय तुम्हारा गमन-मार्ग काला हो जाता है ।

तपुर्जम्भोवनआवातचोदितोयूथेनसाह्वाँअववातिवंसगः।
अभिव्रजन्नक्षितंपाजसारजःस्थातुश्चरथंभयतेपतत्रिणः॥५॥२३

तपुःऽजम्भः । वने । आ । वातऽचोदितः । यूथे । न । सह्वान् । अव । वाति । वंसगः । अभिऽव्रजन् । आक्षितम् । पाजसा । रजः । स्थातुः । चरथम् । भयते । पतत्रिणः ॥ ५ ॥ २३ ॥

तपुर्जम्भःतपूंषिज्वालाएवजम्भाआयुधानिमुखानिवायस्यसतथोक्तः वातचोदितःवायुनाप्रेरितः एवंभूतोग्निर्यूथेज्वालासमूहेसति अक्षितमक्षीणंरजःआर्द्रवृक्षान्तर्गतमुदकं पाजसातेजोबलेनअभिव्रजन्आभिमुख्येनगच्छन्वनेअरण्येसाह्वान्सर्वमभिभवन्आ आभिमुख्येनअववातिव्याप्नोति तत्रदृष्टान्तः-वंसगोन यथावननीयगतिर्वृषःगोयूथेसर्वमभिभवन्वर्ततेतद्वत् यस्मादेवंतस्मात्पतत्रिणःपतनवतोग्नेःसकाशात्स्थातुः स्थावरं चरथंचरज्जंगमंच भयतेबिभेति ॥ साह्वान् दाश्वान्-साह्वानितिक्वसुप्रत्ययान्तोनिपातितः दीर्घादटिसमानपादेइतिसंहितायांनकारस्यरुत्वम् आतो-

टिनित्यमितिसानुनासिकआकारः एत्वलोपौ ह्रस्वश्छान्दसः। स्थातुः कमिमनिजनीत्यादिनाविहितःसुमत्ययोबहुलवचनात्तिष्ठतेरपिभवति यद्वा स्थातुरनन्तरंचरथंभयते प्रथमंस्थातुःस्थावरंबिभेतिपश्चाच्चरथमित्यर्थः। चरथं चरगत्यर्थः अस्मादौणादिकोथप्रत्ययः। भयते ञिभीभये व्यत्ययेनात्मनेपदम् बहुलंछन्दसीतिश्लोरभावः गुणावादेशौ ॥ ५ ॥

५. अग्नि वायु-द्वारा प्रेरित होकर, शिखारूप आयुध धारण करके, महातेज के साथ, अशुष्क वृक्ष-रस आक्रमण करके और गो-वृन्द के बीच में साँड़ की तरह सबको पराभूत करके चारों ओर व्याप्त होते हैं। सारे स्थावर और जंगम अग्नि से डरते हैं।

दधुष्ट्वाभृगवोमानुषेष्वारयिंनचारुंसुहवंजनेभ्यः।
होतारमग्नेअतिथिंवरेण्यंमित्रंनशेवंदिव्यायजन्मने ॥ ६ ॥

दधुः। त्वा। भृगवः। मानुषेषु। आ। रयिम्। न। चारुम्।
सुऽहवम्। जनेभ्यः। होतारम्। अग्ने। अतिथिम्। वरेण्यम्।
मित्रम्। न। शेवम्। दिव्याय। जन्मने ॥ ६ ॥

हेअग्ने त्वात्वांमानुषेषुमनुष्येषुमध्ये भृगवः एतत्संज्ञामहर्षयः दिव्यायजन्मनेदेवत्वमाप्तये चारुंरयिंन शोभनंधनमिवआदधुः आधानसंभारेषुमन्त्रैःस्थापनेनसमस्कुर्वन् कीदृशंत्वां जनेभ्यः सुहवंयजमानार्थंआह्वातुंसुशकं होतारंदेवानामाह्वातारंअतिथिंअतिथिवत्पूज्यं यद्वा देवयजनदेशेषुसततंगन्तारंवरेण्यंवरणीयं मित्रंनशेवं यथासखासुखकरोभवतितद्वत्सुखकरमित्यर्थः॥ दधुः लिट्युसिआतोलोपइटिचेत्याकारलोपः युष्मत्तत्तक्षुष्वन्तःपादमितिविसर्जनीयस्यषत्वम्। सुहवं ह्वयतेरीषद्दुःसुष्वितिखल् बहुलंछन्दसीतिसंप्रसारणम् परपूर्वत्वं गुणावादेशौ लितीतिमत्ययात्पूर्वस्योदात्तत्वम् कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ ६ ॥

६. अग्नि! मनुष्यों के बीच में महर्षि भृगु लोगों ने, दिव्य जन्म पाने के लिए, तुम्हें शोभन धन की तरह धारण किया था। तुम आसानी से लोगों का आह्वान सुननेवाले और देवों का आह्वान करनेवाले हो। तुम यज्ञ-स्थान में अतिथि-रूप और उत्तम मित्र की तरह सुखदाता हो।

होतारंसप्तजुह्वोयजिष्ठंयंवाघतोवृणतेअध्वरेषु।
अग्निंविश्वेषामरतिंवसूनांसपर्यामिप्रयसायामिरत्नम् ॥७॥

होतारम्। सप्त। जुह्वः। यजिष्ठम्। यम्। वाघतः। वृणते।
अध्वरेषु। अग्निम्। विश्वेषाम्। अरतिम्। वसूनाम्। सपर्यामि।
प्रयसा। यामि। रत्नम् ॥ ७ ॥

सप्त सप्तसंख्याकाः जुह्वः होतारः वाघतः ऋत्विजःअध्वरेषुयागेषु यजिष्ठंयष्टृतमंहोतारंदेवानामाह्वातारं यमग्निंवृणतेसम्भजन्ते विश्वेषांसर्वेषांवसूनांअरतिंप्रापयितारंतमग्निंप्रयसाहविर्लक्षणेनान्नेनसपर्यामिपरिचरामि रत्नंरमणीयंकर्मफलंच यामि याचामि॥वृणते वृङ्संभक्तौ क्रैयादिकःप्रत्ययस्वरः। अरतिं ऋगतिप्रापणयोः अस्मादौणादिकोवहिवस्यर्तिभ्यश्चिदित्यतिप्रत्ययः चित्त्वादन्तोदात्तत्वम्। सपर्यामि सपर्यतिःपरिचरणकर्मा सपरपूजायामितिधातुःकण्ड्वादिःअतोयकएवस्वरःशिष्यते पादादित्वान्निघाताभावः। यामि याचामीत्यस्यवर्णलोपश्छान्दसः॥७॥

७. सात आह्वानकारी ऋत्विक् जो यज्ञों में परम यज्ञार्ह और देवाह्वानकारी अग्नि को वरण करते हैं, उसी सर्व-धनदाता अग्नि को मैं यज्ञान्न से सेवित करता हूँ और उनसे रमणीय धन की याचना करता हूँ।

अच्छिद्रासूनोसहसोनोअद्यस्तोतृभ्योमित्रमहःशर्मयच्छ।
अग्नेगृणन्तमंहसउरुष्योर्जोनपात्पूर्भिरायसीभिः॥८॥

अच्छिद्रा। सूनो इति। सहसः। नः। अद्य। स्तोतृऽभ्यः।
मित्रऽमहः। शर्म। यच्छ॥ अग्ने। गृणन्तम्। अंहसः। उरुष्य।
ऊर्जः। नपात्। पूःऽभिः। आयसीभिः॥ ८॥

हेसहसःसूनो बलस्यपुत्रबलेनहिमथ्यमानोग्निर्जायते मित्रमहः अनुकूलदीप्तिमन्नग्ने नोस्मभ्यं स्तोतृभ्यः अद्यास्मिन्कर्मणिअच्छिद्राअच्छेद्यानिशर्मशर्माणिसुखानियच्छदेहि किञ्च हेऊर्जोनपात् अन्नस्यपुत्र भुक्तेनान्नेनजठराग्नेःप्रवर्धनादग्नेरन्नपुत्रत्वं एवंविधाग्ने गृणन्तंत्वांस्तुवन्तंआयसीभिःव्याप्तैः यद्वा अयोवद्दृढतरैः पूर्भिःपालनैःअंहसःपापादउरुष्यरक्ष उरुष्यतीरक्षाकर्मेतियास्कः॥ अच्छिद्रा शेश्छन्दसीतिशेर्लोपः। सूनोसहसः परमपिछन्दसीतिपरस्यषष्ठ्यन्तस्यपूर्वामन्त्रिताङ्गवद्भावेसतिपदद्वयस्याष्टमिकंसर्वानुदात्तत्वम्। शर्म सुपांसुलुगितिविभक्तेर्लुक्। ऊर्जोनपात् नपातयतीतिनपात् नभ्राण्नपादितिनञःप्रकृतिभावः सुबामन्त्रितेइतिषष्ठ्यन्तस्यपराङ्गवद्भावेसतिपादादित्वादाष्टमिकनिघाताभावेषाष्ठिकमामन्त्रिताद्युदात्तत्वम्। पूर्भिः पॄ पालनपूरणयोरित्यस्मात्सम्पदादिलक्षणोभावेक्विप् उत्वदीर्घौ सावेकाचइतिविभक्तेरुदात्तत्वम्॥८॥

८. बलपुत्र और अनुरूप दीप्तियुक्त अग्नि! आज हमें अच्छेद्य सुख दान करो। अन्न-पुत्र! अपने स्तोता को, लोहे की तरह, दृढ़ रूप से रक्षा करते हुए पाप से बचाओ।

भवावरूथंगृणतेविभावोभवामघवन्मघवद्भ्यःशर्म।
उरुष्याग्नेअंहसोगृणन्तंप्रातर्मक्षूधियावसुर्जगम्यात्॥९॥२४॥

---

१ नि० ५. २३।

भर्व । वरूथम् । गृणते । विभाऽवः । भर्व । मघऽवन् । मघवंत्ऽभ्यः ।
शर्मं । उरुष्य । अग्ने । अंहसः । गृणन्तंन् । प्रातः । मक्षु ।
धियाऽवंसुः । जगम्यात् ॥ ९ ॥ २४ ॥

हेविभावः विशिष्टप्रकाश अग्ने गृणतेत्वांस्तुवते यजमानाय वरूथमितिगृहनाम वरूथंअ-निष्टनिवारकंगृहंभव हेमघवन् धनवन्नग्ने मघवद्भ्योहविर्लक्षणधनयुक्तेभ्योयजमानेभ्यः शर्म-सुखंयथाभवति तथाभव हेअग्ने गृणन्तंस्तुवन्तंअंहसःपापकारिणः शत्रोरुरुष्यरक्ष ॥ धियाव-सुः कर्मणाबुद्ध्यावाप्राप्तधनोग्निः मातरिदानीमिवपरेद्युरपिमक्षुशीघ्रंजगम्यात् आगच्छतु ॥ वरू-थम् वृञ्वरणे जॄवृञ्भ्यामूथनित्यूथन्प्रत्ययः नित्वादाद्युदात्तत्वम् । गृणते शतुरनुमइतिविभक्ते-रुदात्तत्वम् । विभावः विशिष्टाभाःविभाः आतोमनिन्निति विच् तदस्यास्तीतिमतुप् मादुपधाया-इतिमतुपोवत्वम् मतुवसोरुरितिनकारस्यरुत्वम् । मघवद्भ्यः मघवाबहुलमितिमघवन्शब्दस्य तृआदेशः सचनानुबन्धकृतमनेकाल्त्वमितिवचनात् अलोन्त्यस्येत्यन्त्यस्यभवति । मक्षु ऋचि-तुनुघमक्षुतिदीर्घः । धियावसुः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् पूर्वपदस्यसावेकाचइतिविभक्ति-रुदात्ता लुगभावश्छान्दसः । जगम्यात् गम्लृसृप्लृगतौ लङ्बहुलंछन्दसीतिशपःश्लुः ॥ ९ ॥

९. प्रभावान् अग्नि ! तुम स्तोता के गृह-रूप बनो। धनवान् अग्नि ! धनवानों के प्रति कल्याण-स्वरूप बनो । अग्नि ! स्तोताओं को पाप से बचाओ। प्रज्ञारूप धन से सम्पन्न अग्नि ! आज प्रातःकाल शीघ्र आओ ।

॥ इतिप्रथमस्यचतुर्थेचतुर्विंशोवर्गः ॥ २४ ॥

वयाइतिसप्तर्चंद्वितीयंसूक्तम् नोधसआर्षंत्रैष्टुभं वैश्वानरगुणकोग्निर्देवता तथाचानुक्रान्त-म्—वयाइत्सप्तवैश्वानरीयमिति सूक्तविनियोगोलिङ्गादवगन्तव्यः ।

तत्रप्रथमामृचमाह—

वयाइदग्नेअग्नयंस्तेअन्येत्वेविश्वेअमृतामादयन्ते ।
वैश्वानरनाभिरसिक्षितीनांस्थूणेवजनाँउपमिद्ययन्थ ॥१॥

वयाः । इत् । अग्ने । अग्नयः । ते । अन्ये । त्वे इति । विश्वे ।
अमृताः । मादयन्ते । वैश्वानर । नाभिः । असि । क्षितीनाम् ।
स्थूणाऽइव । जनान् । उपऽमित् । ययन्थ ॥ १ ॥

वयाः शाखावेतेर्वातायनाभवन्तीतियास्कः । हेअग्ने येन्येअग्नयःसन्तितेसर्वेपितेतववयाइव शाखाएव ततस्त्वत्तोन्येनसन्तीविभावः किञ्च त्वेत्वयिसतिविश्वेसर्वेअमृताअमरणधर्माणोदेवा-

मादयन्तेहृष्यन्ति नहित्वद्व्यतिरेकेणतेजीवितुंशक्यते हेवैश्वानरविश्वेषांनराणांजाठररूपेणसम्बन्धिन्नग्ने क्षितीनांमनुष्याणांनाभिः सन्नद्धासि अवस्थापकोभवसि अतस्त्वंउपमिवउपस्थापयितासन् यद्वा उपमिदित्येतद्दृष्टान्तविशेषणम् जनान्ययन्थअधारयः तत्रदृष्टान्तः—उपमिवउपनिखातास्थूणेव वंशधारणार्थंनिखातस्तम्भोयथागृहोपरिस्थवंशंधारयतितद्वत् ॥ वैश्वानर विश्वेचेमेनराःविश्वानराः नरेसंज्ञायामितिपूर्वपदस्यदीर्घः तत्सम्बन्धीवैश्वानरः तस्येदमित्यण् । नाभिः नहोभश्चेति इञ्प्रत्ययोभकारश्चान्तादेशः ञित्त्वादाद्युदात्तत्वम् । असि तासस्त्योर्लोपइतिसलोपः। क्षितीनां क्षिनिवासगत्योः अस्मात् क्तिच्क्तौचसंज्ञायामितिक्तिच् अन्तोदात्तात् क्षितिशब्दादुत्तरस्यनामोनामन्यतरस्यामित्युदात्तत्वम् । उपमित् डुमिञ्प्रक्षेपणे अस्मादुपपूर्वात् बहुलवचनात्कर्मणिक्विप् तुगागमः । ययंथ यमउपरमे लिटिथलिक्रादिनियमादिटिप्राप्तेउपदेशेत्वतइतिप्रतिषेधः ॥ १ ॥

१. अग्निदेव ! अन्यान्य जो अग्नि हैं, वे तुम्हारी शाखायें हैं अर्थात् सब अंग हैं और तुम अङ्गी हो। तुममें सब अमर देवगण दृष्टि आते हैं। वैश्वानर ! तुम मनुष्यों की नाभि हो। तुम निखात स्तम्भ के समान मनुष्यों को धारण करते हो।

विषुवत्संज्ञेहन्याग्निमारुतेमूर्धादिवोनाभिरग्निःपृथिव्याइतिवैकल्पिकोनुरूपस्तृचः विषुवान्दिवाकीर्त्यइतिखण्डेसूत्रितम्—मूर्धानंदिवोअरतिंपृथिव्यामूर्धादिवोनाभिरग्निःपृथिव्याइतिवेति।

मूर्धा दिवो नाभिरग्निः पृथिव्या अथाभवदरती रोदस्योः ।
तं त्वा देवासोऽजनयन्त देवं वैश्वानर ज्योतिरिदार्याय ॥ २ ॥

मूर्धा । दिवः । नाभिः । अग्निः । पृथिव्याः । अथ । अभवत् ।
अरतिः । रोदस्योः । तम् । त्वा । देवासः । अजनयन्त । देवम् ।
वैश्वानर । ज्योतिः । इत । आर्याय ॥ २ ॥

अयमग्निः दिवोद्युलोकस्यमूर्धाशिरोवत्प्रधानभूतोभवति पृथिव्याभूमेश्चनाभिःसन्नाहकः रक्षकइत्यर्थः अथानन्तरं रोदस्योःद्यावापृथिव्योः अयंअरतिः अधिपतिरभवत् हेवैश्वानर तंत्वादृशंदेवंदानादिगुणयुक्तंत्वात्वांदेवासःसर्वेदेवाः आर्यायविदुषेमनवेयजमानायवा ज्योतिरित् ज्योतीरूपमेवअजनयन्तउदपादयन् ॥ मूर्तमस्मिन्धीयतइतिमूर्धा श्वन्नुक्षन्नित्यादौनिपातनाद्रूपसिद्धिः । पृथिव्याः पृथिवीशब्दः षिद्गौरादिभ्यश्चेतिङीष्प्रत्ययान्तोन्तोदात्तः । अजनयन्त जनीजॄष्क्नसुरञ्जोमन्ताश्चेतिमित्त्वान्मितांह्रस्वइतिह्रस्वत्वम् ॥ २ ॥

२. अग्नि स्वर्ग के मस्तक, पृथिवी की नाभि और द्युलोक तथा पृथिवी के अधिपति हुए थे। वैश्वानर ! तुम देवता हो। देवों ने आर्य या विद्वान् मनुष्य के लिए ज्योतिःस्वरूप तुमको उत्पन्न किया था।

तृतीयामृचमाह—

आसूर्येनरश्मयोध्रुवासोवैश्वानरेदधिरेऽग्नावसूनि ।
यापर्वतेष्वोषधीष्वप्सुयामानुषेष्वसितस्यराजा ॥ ३ ॥

आ । सूर्ये । न । रश्मयः । ध्रुवासः । वैश्वानरे । दधिरे । अग्ना । वसूनि । या । पर्वतेषु । ओषधीषु । अप्ऽसु । या । मानुषेषु । असि । तस्य । राजा ॥ ३ ॥

अग्नावैश्वानरेऽग्नौवसूनिधनान्यादधिरेआहिताग्निस्थापितानिबभूवुः तत्रदृष्टान्तः—ध्रुवासोनिश्चलारश्मयःकिरणाःसूर्येन यथासूर्येआधीयन्तेतद्वत् अतस्त्वंपर्वतादिषुयानिधनानिविद्यन्ते तस्यधनजातस्यराजासिअधिपतिर्भवसि॥ अग्ना सुपांसुलुगितिविभक्तेर्डादेशः । या शेश्छन्दसिबहुलमितिशेर्लोपः ।ओषधीषु उषदाहे ओषःपाकःभावेघञ् ञित्त्वादाद्युदात्तत्वम् ओषआसुधीयतेइत्योषधयः कर्मण्यधिकरणेचेतिकिमत्ययः दासीभारादिषुपठितत्वात् पूर्वपदप्रकृतिस्वरत्वम्। सप्तमीबहुवचनेओषधेश्चविभक्तावप्रथमायामितिदीर्घः। अप्सु ऊडिदमितिविभक्तेरुदात्तत्वम्॥३॥

३. जिस तरह निश्चल किरणें सूर्य में स्थापित हुई हैं, उसी तरह वैश्वानर अग्नि में सम्पत्तियाँ स्थापित हुई थीं। पर्वतों, ओषधियों, जलों और मनुष्यों में जो, धन है, उसके राजा तुम्हीं हो।

चतुर्थीमृचमाह—

बृहतीइवसूनवेरोदसीगिरोहोतामनुष्यो३नदक्षः ।
स्वर्वतेसत्यशुष्मायपूर्वीर्वैश्वानरायनृतमाययह्वीः ॥ ४ ॥

बृहतीइवेति बृहतीऽइव । सूनवे । रोदसी इति । गिरः । होता । मनुष्यः । न । दक्षः । स्वःऽवते । सत्यऽशुष्माय । पूर्वीः । वैश्वानराय । नृऽतमाय । यह्वीः ॥ ४ ॥

रोदसीद्यावापृथिव्यौसूनवेस्वपुत्रायवैश्वानराय बृहतीइव प्रभूतेइवाभूतां वैश्वानरस्यद्यावापृथिव्योःपुत्रत्वंमन्त्रान्तरेस्पष्टमवगम्यते—उभापितरामहयन्नजायताग्निर्द्यावापृथिवीभूरिरेतसेति[1] । महतोवैश्वानरस्यावस्थानायद्यावापृथिव्यौविस्तृतेजातेइत्यर्थः किञ्चायंहोतादक्षःसमर्थः पूर्वीर्बहुविधाःयह्वीर्महतीर्गिरःस्तुतीःवैश्वानरायाग्नयेमायुङ्क्तेतिशेषः कीदृशायस्वर्वतेशोभनगमनयु-

— १ ऋ० सं० २.८.२१.।

कायसत्यशुष्मायावितथबलाय नृतमायातिशयेनसर्वेषांनेत्रे तत्रदृष्टान्तः—मनुष्योन यथामनुष्यो-लौकिकोवन्दीदातारंप्रभुम् बहुविधयास्तुत्यास्तौति तद्वत्॥ मनुष्यः मनोर्जातावञ्यतौषुक्चेतिजा-तौगम्यमानायांमनुशब्दाद्यत्र्‌षुगागमश्च तित्स्वरितमितिस्वरितत्वम् यतोनावइत्याद्युदात्तत्वंन-भवति तत्रहि द्व्यजित्यनुवर्तते। स्ववंते सुपूर्वादर्तेर्भावेविच् ततोमतुप् मादुपधायाइतिवत्वम्॥४॥

४. द्यावापृथिवी वैश्वानर के लिए विस्तृत हुए थे। जैसे बन्दी प्रभु की स्तुति करता है, वैसे ही इस निपुण होता ने सुगति-सम्पन्न, प्रकृत-बलशाली और नेतृश्रेष्ठ वैश्वानर के उद्देश से बहुविध महान् स्तुति-वाक्य का प्रयोग किया है।

दिवश्चित्तेबृहतोजातवेदोवैश्वानरप्ररिरिचेमहित्वम्।
राजाकृष्टीनामसिमानुषीणांयुधादेवेभ्योवरिवश्चकर्थ॥५॥

दिवः। चित्। ते। बृहतः। जातऽवेदः। वैश्वानर। प्र। रिरिचे। महिऽत्वम्। राजा। कृष्टीनाम्। असि। मानुषीणाम्। युधा। देवेभ्यः। वरिवः। चकर्थ॥ ५॥

हेजातवेदः जातानांवेदितः वैश्वानराग्ने तेतवमहित्वंमाहात्म्यंबृहतोमहतः दिवश्चिद्द्युलो-कादपिप्ररिरिचेप्रववृधे किञ्च त्वंमानुषीणांमनोर्जातानांकृष्टीनांप्रजानांराजासिअधिपतिर्भवसि तथावरिवःअसुरैरपहृतंधनंयुधायुद्धेनदेवेभ्यश्चकर्थदेवाधीनमकार्षीः॥ वैश्वानर पादादित्वादा-ष्टमिकनिघाताभावः। रिरिचे रिचिर्विरेचने अत्रोपसर्गवशात्तद्विपरीतेआधिक्येवर्तते। कृष्टीनां नामन्यतरस्यामितिनामउदात्तत्वम्। मानुषीणां मनुषशब्दोमनोर्जातावित्यञ्प्रत्ययान्तः जातिल-क्षणेङीषिप्राप्तेतदपवादतयाशार्ङ्गरवाद्यञइतिङीन् नित्त्वादाद्युदात्तत्वम् ङ्याश्छन्दसिबहुलमितिब-हुलवचनान्नामउदात्तस्याभावः। युधा युधसम्प्रहारेइत्यस्मात्संपदादिलक्षणोभावेक्विप् वरिवइ-तिधननाम नब्विषयस्येत्याद्युदात्तत्वम्॥ ५॥

५. वैश्वानर! तुम सब प्राणियों को जानते हो। आकाश से भी तुम्हारा माहात्म्य अधिक है। तुम मानव-प्रजाओं के राजा हो। तुमने देवों के लिए युद्ध करके धन का उद्धार किया है।

प्रनूमहित्वंवृषभस्यवोचंयंपूरवोवृत्रहणंसचन्ते।
वैश्वानरोदस्युमग्निर्जघन्वाँअधूनोत्काष्ठाअवशंबरंभेत्॥ ६॥

प्र। नु। महिऽत्वम्॥ वृषभस्य। वोचम्। यम्। पूरवः। वृत्रऽहनम्। सचन्ते। वैश्वानरः। दस्युम्। अग्निः। जघन्वान्। अधूनोत्। काष्ठाः। अव। शम्बरम्। भेत्॥ ६॥

अत्रवैश्वानरशब्देनमध्यमस्थानस्थोवैद्युतोग्निरभिधीयते पूरवइतिमनुष्यनाम पूरवोमनुष्याःवृत्रहणंआवरकस्यमेघस्यहन्तारं यंवैश्वानरंसचन्तेवर्षार्थिनःसेवन्ते तस्यवृषभस्यअपांवर्षितुर्वैश्वानरस्यमहित्वंमाहात्म्यंनुक्षिप्रंप्रवोचंप्रब्रवीमि किंतदित्यतआह अयंवैश्वानरोग्निर्दस्युंरसानांकर्मणांवोपक्षयितारं राक्षसादिकंजघन्वान् हतवान् तथाकाष्ठाअपोवृष्ट्युदकानिअधूनोत् अधोमुखान्यपातयत् शम्बरंतन्निरोधकारिणंमेघंअवभेत् अवाभिनत्॥ वोचं छन्दसिलुङ्लङ्लिटइति वर्तमानेलुङि अस्यतिवक्तीत्यादिनाच्लेरङादेशः वचउमित्युमागमः गुणः बहुलंछन्दस्यमाङ्योगेपीत्यडभावः। जघन्वान् हन्तेर्लिटःक्वसुः अभ्यासाच्चेत्यभ्यासादुत्तरस्यहकारस्यघत्वम् विभाषागमहनेतिविकल्पनादिडभावः। भेत् भिदिर् विदारणे लङिबहुलंछन्दसीतिविकरणस्यलुक् हल्ङ्याब्भ्यइतितकारस्यलोपः पूर्ववदडभावः। अत्रनिरुक्तम् —प्रब्रवीमितन्महित्वंमाहाभाग्यंवृषभस्यवर्षितुरपांयंपूरवःपूरयितव्यामनुष्यावृत्रहणंमेघहनंसचन्तेसेवन्तेवर्षकामादस्युर्दस्यतेः क्षयार्थादुपदस्यन्त्यस्मिन्रसाउपदासयतिकर्माणितमग्निर्वैश्वानरोघ्नन्नवाधूनोदपःकाष्ठाअभिनच्छम्बरंमेघमिति[1]। अत्रेदंचिन्तनीयं कोसौवैश्वानरइति तत्रकेचिदाहुः मध्यमस्थानस्थोवायुरिन्द्रोवावैश्वानरः तस्यहिवर्षकर्मणासंस्तवउपपद्यतेनत्वग्नेः पृथिवीस्थानत्वादिति। अन्येत्वेवंमन्यन्ते द्युस्थानःसूर्योवैश्वानरइति युक्तिंचाहुः—प्रातःसवनादीनित्रीणिसवनानिलोकत्रयात्मकानि तत्रतृतीयसवनंप्राप्तोयजमानःस्वर्गंप्राप्तइतिपृथिव्याःप्रच्युतोभवेत् तत्प्रच्युतिपरिहारायाग्निमारुतेन्त्यिमेशस्त्रेहोतास्वर्गाद्भूमिंप्रत्यवरोहति कथमितितदुच्यते—इतरशस्त्रवदस्तोत्रियतृचेनप्रारंभमुक्त्वाद्युस्थानसम्बन्धिनावैश्वानरीयेणसूक्तेनशस्त्रंप्रारभते ततोमध्यमस्थानसम्बन्धिनंरुद्रंमरुतश्चप्रतितद्देवत्यसूक्तपाठेनावरोहति तत्रपृथिवीस्थानमग्निंयद्यत्रवैश्वानरःसूर्योनस्यात् तदानीमवरोहोनोपपद्यते तदेतन्मतद्वयमप्यनुपपन्नम् अयमेवाग्निर्वैश्वानरः कुतःवैश्वानरशब्दनिर्वचनानुरोधात् विश्वेषां नराणांलोकान्तरंप्रतिनेतृतयासम्बन्धीवैश्वानरः तथाचाम्नातम्—वैश्वानरःपुत्रःपित्रेलोककृज्जातवेदोवहेमंसुकृतांयत्रलोकाइति[2]। यद्वा विश्वेसर्वेनराएनमग्निंयज्ञादौप्रणयन्तीतितत्सम्बन्धाद्वैश्वानरः यद्वा सर्वान्प्राणिनःप्रतिऋतोगच्छतइतिवैश्वानरौमध्यमोत्तमौ। ऋगतावित्यस्मात्पचाद्यच् लुगभावश्छान्दसः ताभ्यामुत्पन्नत्वादयमग्निर्वैश्वानरः वैद्युतोग्निर्हिमध्यमसकाशाज्जायतेअशनिपतनानन्तरंअयमेवपार्थिवोग्निःसम्पद्यते आदित्यसकाशादपिघर्मकालेसूर्यकान्तादिमणिषुअग्नेरुत्पत्तिःप्रसिद्धा तस्मान्नामनिर्वचनानुरोधेनअयमेवाग्निर्वैश्वानरइत्येतदुपपन्नम्। अस्यापि

---

१ नि० ७. २३.। २ तै० ब्रा० १. २. १.।

वर्षकर्मणास्तुतिःसम्भवतिअग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठते । आदित्याज्जायतेवृष्टिर्वृष्टे-रन्नंततःप्रजाइतिस्मरणात्प्रत्यवरोहोपिनकर्तव्यः । तृतीयसवनस्यभाक्स्वर्गतावा एतत्सर्वंयास्के-नवैश्वानरःकस्मादित्यादिनाबहुधाप्रपञ्चितम् अत्रयदनुक्तंतत्सर्वंतत्रैवानुसन्धेयम् ॥ ६ ॥

६. मनुष्य जिन वृत्र-हन्ता या मेघभेदनकारी वैश्वानर या विद्यु-दग्नि की, वर्षा के लिए, अर्चना करते हैं, उन्हीं जलवर्षी वैश्वानर का माहात्म्य मैं शीघ्र बोलता हूँ। वैश्वानर अग्नि ने दस्यु या राक्षस को हनन किया है, वर्षा का जल नीचे गिराया है और शम्बर को भिन्न किया है।

वैश्वानरोमहिम्नाविश्वकृष्टिर्भरद्वाजेषुयजतोविभावा ।
शातवनेयेशतिनीभिरग्निःपुरुणीथेजरतेसूनृतावान् ॥७॥२५॥

वैश्वानरः । महिम्ना । विश्वऽकृष्टिः । भरत्ऽवाजेषु । यजतः । विभाऽवा । शातऽवनेये । शतिनीभिः । अग्निः । पुरुऽनीथे । जरते । सूनृताऽवान् ॥ ७ ॥ २५ ॥

वैश्वानरोग्निर्महिम्नामहत्त्वेनविश्वकृष्टिः कृष्टिरितिमनुष्यनाम विश्वेसर्वेमनुष्याःयस्यस्वभूताः सतथोक्तःभरद्वाजेषुपुष्टिकरहविर्लक्षणान्नवत्सुयागेषु यद्वा एतत्संज्ञेष्वृषिषुयजतोयष्टव्यःविभावावि-शेषेणप्रकाशयिता सूनृतावान् सूनृताप्रियासत्यावाक्तद्युक्तः एवंभूतोग्निःशातवनेयेशतसंख्याकान् क्रतून्वनतिसम्भजतइतिशतवनिः तस्यपुत्रःशातवनेयःतस्मिन् पुरुणीथेबहूनांनेतरिएतत्संज्ञकेरा-जनिच शतिनीभिर्बहुभिःस्तुतिभिःजरतेस्तूयते॥ भरद्वाजेषु भरन्तिपोषयन्तिभोक्तूनितिभरन्तःता-दृशावाजायेषु बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वेप्राप्तेमरुद्वृधादित्वात्पूर्वपदान्तोदात्तत्वम् । यजतः भृमृ-दृशियजिपर्विपच्यमितमिनमिहर्येभ्योतजितियजतेरतच्प्रत्ययः। विभावाभादीप्तौ आतोमनिन्क्वि-निवनिप् तस्यपित्त्वादनुदात्तत्वेधातुस्वरःशिष्यते । शातवनेये इन्सर्वधातुभ्यइतीन्प्रत्ययः शतव-निशब्दात् इतश्चानिञइतिठक् कितइत्यन्तोदात्तत्वम् । शतिनीभिः शतशब्दान्मत्वर्थीयइनिःऋ-न्नेभ्योङीबितिङीप्। पुरुणीथे पूर्वपदात्संज्ञायामगइतिणत्वम् । जरते व्यत्ययेनकर्मणिकर्तृप्रत्ययः॥७॥

७. अपने माहात्म्य-द्वारा वैश्वानर सब मनुष्यों के अधिपति और पुष्टिकर तथा अन्नशाली यज्ञ में यजनीय हैं । वैश्वानर प्रभा-सम्पन्न और सुकृत-वाक्यशाली हैं। शतयज्ञकर्त्ता या शतवनि के पुत्र पुरुनीय राजा, अनेक स्तुतियों के साथ, उन अग्नि की स्तुति करते हैं ।

वह्निमित्तिपञ्चर्चंतृतीयंसूक्तम् नोधसआर्षंत्रैष्टुभमाग्नेयम्—अनुक्रान्तंच—वह्निंपञ्चेति। प्रा-तरनुवाकस्याग्नेयेक्रतौत्रैष्टुभेछन्दसीदंसूक्तमाश्विनेशस्त्रेच तथाचसूत्रितम्-वह्निंयशसमुपप्रजि-न्वन्नितित्रीणीति ।

---

१ नि० ७. २१ ।

तत्रप्रथमामृचमाह—

वह्निंयशसंविदथस्यकेतुंसुप्राव्यंदूतंसद्योअर्थम्।
द्विजन्मानंरयिमिवप्रशस्तंरातिंभरद्भृगवेमातरिश्वा ॥१॥

वह्निम्। यशसम्। विदथस्य। केतुम्। सुप्रऽअव्यम्। दूतम्।
सद्यःऽअर्थम्। द्विऽजन्मानम्। रयिम्ऽइव। प्रऽशस्तम्। रातिम्।
भरत्। भृगवे। मातरिश्वा ॥ १ ॥

वह्निंहविषांवोढारंयशसंयशस्विनंविदथस्यकेतुंयज्ञस्यप्रकाशयितारं सुप्राव्यंसुष्ठुप्रकर्षेणरक्षितारंदूतंदेवैर्हविर्वहनलक्षणेदूत्येनियुक्तम् सद्योअर्थं यदाहवींषिजुह्वति सद्यस्तदानीमेवहविर्भिःसहदेवान्गन्तारं यद्वा सद्योअर्थंअरणं गमनंयस्यतं द्विजन्मानं द्वयोर्द्यावापृथिव्योररण्योर्वाजायमानं रयिमिवधनमिवप्रशस्तंप्रख्यातं एवंभूतमग्निं मातरिश्वावायुः भृगवेएतत्संज्ञकाय महर्षये रातिंभरत्मित्रमहरत्अकरोदित्यर्थः रातिंनासम्भाष्येत्यत्ररातिर्मित्रमितिकपर्दिनोक्तं रातिः पुत्रइत्येके एतदर्थप्रतिपादकंमन्त्रान्तरञ्चभवति—रातिंभृगूणामुशिजंकविक्रतुमिति ॥ वह्निं वहिश्रियुश्रुग्लाहात्वरिभ्योनिदितिवहतेर्निप्रत्ययः निद्वद्भावादाद्युदात्तत्वम्। यशसं यशस्शब्दादुत्तरस्यविनोलुक् व्यत्ययेनान्तोदात्तत्वम् यद्वा अर्शआदित्वादच् स्वरःपूर्ववत्। सुप्राव्यं सुष्ठुप्रकर्षेण अवतिरक्षतीतिसुप्रावीः उपसर्गद्वयोपसृष्टादवतेः अवितॄस्तृतन्त्रिभ्यईरितीकारप्रत्ययः वाछन्दसीति अमिपूर्वइत्यस्यविकल्पेसतियणादेशः उदात्तस्वरितयोर्यणइतिस्वरितत्वम्। सद्योअर्थम् उषिकुषिगार्तिभ्यस्थन्नितिअर्तेः कर्तरिथन्प्रत्ययः सद्यएवार्थोगन्तासद्योअर्थः अव्ययपूर्वपदप्रकृतिस्वरत्वम् यदितु अव्ययेनञ्कुनिपातानामितिवक्तव्यमित्यव्ययग्रहणेनत्रितयंगृह्येत तर्हिबहुव्रीहिस्वरोभविष्यति। मातरिश्वा सर्वनिर्माणहेतुत्वात् मातान्तरिक्षम् श्वसितिरत्रगतिकर्मा मातरिअन्तरिक्षेश्वसितिगच्छतीतिमातरिश्वा श्वन्नुक्षन्नित्यादौनिपातनाद्रूपसिद्धिः यद्वा मातर्यन्तरिक्षे शुआशु असतिगच्छतीतिमातरिश्वा असगतिदीप्त्यादानेष्वित्यस्मादौणादिकोड्वन्प्रत्ययः एतच्चयास्केनोक्तम्—मातर्यन्तरिक्षेश्वसितिमातर्याश्वनितीतिवेति ॥ १ ॥

१. अग्नि हव्यवाहक, यशस्वी, यज्ञप्रकाशक और सम्यक् रक्षणशील तथा देवों के दूत हैं; सदा हव्य लेकर देवों के पास जाते हैं। वह दो काष्ठों से, अरणि-मन्थन से, उत्पन्न और धन की तरह प्रशंसित हैं। मातरिश्वा उन्हीं अग्नि को, मित्र की तरह, भृगु-वंशियों के पास ले आयें।

अस्यशासुरुभयासःसचन्तेहविष्मन्तउशिजोयेचमर्ताः।
दिवश्चित्पूर्वोन्यसादिहोतापृच्छ्योविश्पतिर्विक्षुवेधाः ॥२॥

---

१ तै० सं० ५. ६. १.। २ ऋ० सं० २. ८. १७.। ३ नि० ७. २६.।

अस्य । शासुः । उभयासः । सचन्ते । हविष्मन्तः । उशिजः ।
ये । च । मर्ताः । दिवः । चित् । पूर्वः । नि । असादि । होता ।
आऽपृच्छ्यः । विश्पतिः । विक्षु । वेधाः ॥ २ ॥

शासुः शासितुरस्याग्नेः उभयासः उभयेपिदेवाः मनुष्याश्च यद्वा स्तुतिभिः स्तोतारो-यज्ञैर्यजमानाश्च इममग्निंशासितारं सचन्तेसेवन्ते देवाःउशिजःकामयमानाः देवाहविष्मन्तः हविषायुक्ताः येचमर्ताः मरणधर्माणोयजमानाः यद्वा उशिजइतिमेधाविनाम उशिजोमेधाविनः स्तोतारः हविष्मन्तोहविर्युक्ताः यजमानाः किञ्चायंहोताहोमनिष्पादकोग्निः दिव-श्चिद्आदित्यादपिपूर्वः उषःसुवर्तमानोभूत्वाअग्निहोत्रहोमार्थंविक्षुयजमानेषुन्यसादिअध्वर्यु णाअग्न्यायतनेन्यधायिस्थाप्यते कीदृशोहोता आपृच्छ्यःआप्रष्टव्यःपूज्यइत्यर्थः विश्पतिः विशांप्रजानांपालयिता वेधाः विधाताअभिमतफलस्यकर्ता ॥ शासुः शासुअनुशिष्टौ तृन्तृचौ शंसिक्षदादिभ्यःसंज्ञायांचानिटावितितृन्इडागमाभावश्च षष्ठ्येकवचनेतकारलोपश्छा-न्दसः नित्त्वादाद्युदात्तत्वम् । उशिजः वशःकिदितिवष्टेरिजिप्रत्ययः ग्रहिज्यादिनासम्प्रसारणम् । मर्ता मृङ्प्राणत्यागे असिहसिमृगृण्वामीत्यादिनातन्प्रत्ययः नित्त्वादाद्युदात्तत्वम् । आ-पृच्छ्यः प्रच्छज्ञीप्सायाम् आङ्पूर्वादस्माच्छन्दसिनिष्टर्क्येत्यादौक्यप्प्रत्ययोनिपातितः ग्रहि-ज्यादिनासम्प्रसारणम् क्यपःपित्त्वादनुदात्तत्वेधातुस्वरःशिष्यते । विश्पतिः पत्यावैश्वर्येइतिपू-र्वपदप्रकृतिस्वरत्वेप्राप्ते परादिश्छन्दसिबहुलमित्युत्तरपदान्तोदात्तत्वम् ॥ २ ॥

२. हव्यग्राही देव और मानव—दोनों इन शासनकर्त्ता की सेवा करते हैं; क्योंकि ये पूज्य, प्रजापालक और फलदाता अग्नि सूर्योदय से भी पहले यजमानों के बीच स्थापित हुए हैं।

तृतीयामृचमाह—

तंनव्यसीहृदआजायमानमस्मत्सुकीर्तिर्मधुजिह्वमश्याः ।
यमृत्विजोवृजनेमानुषासःप्रयस्वन्तआयवोजीजनन्त ॥३॥

तम् । नव्यसी । हृदः । आ । जायमानम् । अस्मत् । सुऽकीर्तिः ।
मधुऽजिह्वम् । अश्याः । यम् । ऋत्विजः । वृजने । मानुषासः ।
प्रयस्वन्तः । आयवः । जीजनन्त ॥ ३ ॥

नव्यसी नवतरासुकीर्तिः सुष्ठुकीर्तयित्रीअस्मद् अस्माकंस्तुतिः हृदः हृदयवस्थिताद् प्रा-णाद् जायमानमुत्पद्यमानं अग्निर्हिवायोरुत्पद्यतेवायुश्चप्राणएवयःप्राणःसवायुरित्याम्नानात् ।

---

१ नि० १. २०.।

मधुजिह्वंमादयितृज्वालं एवंभूतंतमग्निमाश्याः आभिमुख्येनव्यामोतु वृजनेसङ्ग्रामेप्राप्तेसतिआ-यवोमनुष्याः यमग्निंजीजनन्तयज्ञार्थमुपपादयन् कीदृशाः मनुष्याः ऋत्विजः ऋतौकालेयष्टारः मानुषासः मनोःपुत्राः प्रयस्वन्तः हविर्लक्षणान्नोपेताः ॥ नव्यसी नवीयसीत्यत्रईकारलोपश्छा-न्दसः । हृदः अत्रहृदयशब्देनतत्स्थःप्राणोलक्ष्यते पद्दन्नित्यादिनाहृदयशब्दस्यहृदादेशः । जायमानं जनीप्रादुर्भावे श्यनिज्ञाजनोर्जेतिजादेशः अदुपदेशाल्लसार्वधातुकानुदात्तत्वेश्यनोनि-त्त्वादाद्युदात्तत्वम् अस्मत् सुपांसुलुगितिविभक्तेर्लुक् । अश्याः अशूव्याप्तौ लिङ्बहुलंछन्दसीति विकरणस्यलुक् व्यत्ययेनपरस्मैपदमध्यमौ । जीजनन्त जनीप्रादुर्भावे ण्यन्ताल्लुङिच्लेश्चङादेशः द्विर्भावहलादिशेषसन्वद्भावेत्वदीर्घाः अदुपदेशाल्लसार्वधातुकानुदात्तत्वेचङएवस्वरेप्राप्ते व्यत्य-येनाभ्यस्ताद्युदात्तत्वम् ॥ ३ ॥

३. हृदय या प्राण से उत्पन्न और मिष्ठजिह्व अग्नि के सामने हमारी नई स्तुति व्याप्त हो। मनु-पुत्र मानव लोग यथासमय यज्ञ-सम्पादन और यज्ञान्न-प्रदान करके इन अग्नि को संग्राम समय में उत्पन्न करते हैं।

उशिक्पावकोवसुर्मानुषेषुवरेण्योहोताधायिविक्षु।
दमूनागृहपतिर्दमआँअग्निर्भुवद्रयिपतीरयीणाम् ॥४॥

उशिक् । पावकः । वसुः । मानुषेषु । वरेण्यः । होता । अधायि । विक्षु । दमूनाः । गृहऽपतिः । दमे । आ । अग्निः । भुवत् । रयिऽपतिः । रयीणाम् ॥ ४ ॥

उशिक् कामयमानः पावकः शोधकः वसुर्निवासयितावरेण्योवरणशीलएवंभूतोहोताग्निः विक्षुयज्ञगृहप्रविष्टेषुमानुषेषुयजमानेषुअधायिस्थाप्यते सचाग्निर्दमूनाः रक्षसांदमनकरेणमनसा युक्तोगृहपतिर्गृहाणांपालयिताचसन् दमेयज्ञगृहेरयिपतिः धनाधिपतिः आभुवद्आसमन्ताद्भव-ति नकेवलमेकस्यरयेः अपितुसर्वेषामित्याह रयीणामिति यद्वा रयीणांमध्येउत्कृष्टंयद्धनंतस्य पतिरित्यर्थः ॥ अधायि छन्दसिलुङ्लङ्लिटइतिवर्तमानेकर्मणिलुङिच्लेश्चिणादेशेआतोयुक्चि-ण्कृतोरितियुगागमः।दमयतिराक्षसादिकमितिदमूनाः दमउपशमे दमेरूनसिरितिऔणादिकऊ-नसिप्रत्ययः यास्कस्त्वाह—दमूनादममनावादानमनावादान्तमनावाअपिवादमइतिगृहनामतन्म-नाःस्यादिति । दमआँअग्निः आङोनुनासिकश्छन्दसीतिआकारस्यसानुनासिकत्वम् प्रकृ-तिभावश्च । भुवत् लेटचडागमः इतश्चलोपइतीकारलोपः । रयिपतिः परादिश्छन्दसिबहुल-मित्युत्तरपदाद्युदात्तत्वम् । रयीणां नामन्यतरस्यामितिनामउदात्तत्वम् ॥ ४ ॥

४. अग्नि कामना-पात्र, विशुद्धिकारी, निवास-हेतु, वरणीय और देवाह्वानकारी हैं। यज्ञ में प्रविष्ट मनुष्यों के बीच अग्नि को स्थापित किया गया है। अग्नि शत्रुदमन में कृतसंकल्प और हमारे घरों में पालनकर्त्ता हों। यज्ञ-भवन में धनाधिपति हों।

पञ्चमीमृचमाह—

तंत्वांवयंपतिमग्नेरयीणांप्रशंसामोमतिभिर्गोतमासः ।
आशुंनवाजंभरंमर्जयन्तःप्रातर्मक्षूधियावसुर्जगम्यात् ॥५॥२६॥

तम् । त्वा । वयम् । पतिम् । अग्ने । रयीणाम् । प्र । शंसामः ।
मतिऽभिः । गोतमासः । आशुम् । न । वाजम्ऽभरम् । मर्जयन्तः ।
प्रातः । मक्षु । धियाऽवसुः । जगम्यात् ॥ ५ ॥ २६ ॥

गोतमासोगोतमगोत्रोत्पन्नावयं नोधसः स्तोतुरेकत्वेप्यात्मनिपूजार्थंबहुवचनम् हेअग्ने रयीणांधनानांपतिंरक्षितारं तादृशंत्वात्वांमतिभिर्मननीयैःस्तोत्रैः प्रशंसामः प्रकर्षेणस्तुमः किंकुर्वन्तःवाजंभरम् वाजस्यहविर्लक्षणान्नस्यभर्तारंत्वांमर्जयन्तोमार्जयन्तः तत्रदृष्टान्तः—आशुंन अश्वमिव यथाअश्वमारोहन्तःपुरुषाः तस्यवहनप्रदेशंहस्तैर्निमृजन्ति तद्वद्वयमप्यग्नेर्हविर्वहनप्रदेशंनिमृजन्तइत्यर्थः तथाचाग्निसंमार्जनप्रकरणे वाजसनेयिभिराम्नातम्—अथमध्येतूष्णीमेवत्रिःसंमार्ष्टि यथामुक्त्वामेहिवहेतिव्रजेदेवमेतदग्निंयुक्त्वोपक्षिपतिप्रेहिदेवेभ्योहव्यंवहेति। धियावसुः कर्मणाबुध्यावाप्राप्तधनःसोग्निःप्रातः श्वोभूतस्याह्नःप्रातःकालेमक्षुशीघ्रंजगम्यात् आगच्छतु ॥ मतिभिः मनज्ञानेइत्यस्मात्कर्मणिक्तिन् मन्त्रेवृषेषेत्यादिनातस्योदात्तत्वम्। वाजंभरं अन्नेरेषावैदिकीसंज्ञा संज्ञायांभृतॄवृजीतिवाजशब्देकर्मण्युपपदेखच्प्रत्ययः अरुर्द्विषदजन्तस्यमुमिति मुमागमः चितइत्यन्तोदात्तत्वम् । मर्जयन्तः संज्ञापूर्वकस्यविधेरनित्यत्वात् मृजेर्वृद्धिरितिवृद्ध्यभावः अदुपदेशाल्लसार्वधातुकानुदात्तत्वेणिचएवस्वरःशिष्यते। जगम्यात् लिङि बहुलंछन्दसीतिशपःश्लुः ॥ ५ ॥

५. अग्नि! हम गोतमगोत्रज हैं और तुम धनपति, रक्षणशील और यज्ञान्न के कर्त्ता हो। जैसे सवार हाथ से घोड़े को साफ़ करता है, वैसे ही हम भी तुम्हें मार्जित करके मननीय स्तोत्र द्वारा प्रशंसा करेंगे। प्रज्ञा द्वारा अग्नि ने धन प्राप्त किया है। इस प्रातःकाल में तुरत आओ।

॥ इतिप्रथमस्यचतुर्थेषड्विंशोवर्गः ॥ २६ ॥

अस्माइदुमतवसइतिषोडशर्चंचतुर्थंसूक्तंनोधसआर्षमैन्द्रंत्रैष्टुभं अनुक्रान्तंच—अस्माइदुषोडशेति। अस्यसूक्तस्यनोधादृष्टत्वेतद्ब्राह्मणेसमाम्नायते—अस्माइदुमतवसेतुरायेतिनोधास्तएवैमप्रातःसवनदैति। षळहस्तोत्रियावापवत्सुचतुर्विंशमहाव्रतादिष्वहस्सुमाध्यंदिनेसवनेब्राह्मणाच्छंसिशस्त्रेब्रह्मणावेब्रह्मयुजेत्यस्याआरम्भणीयायाऊर्ध्वमहीनसूक्तसंज्ञमेतच्छंसनीयम् तथाचसूत्रितम्—

१ यज्ञंवहेतिपाठः। २ ऐ० ब्रा० ६. १८.

अस्माइदुप्रतवसेशासद्वह्निरितीतरावहीनसूक्तेइति । ब्राह्मणंचभवति—तएतेप्रातःसवनेषळहस्तो-
त्रियान्शस्त्वामाध्यंदिनेहीनसूक्तानिशंसन्तीति[1] ।

तत्रप्रथमामृचमाह—

अस्माइदुप्रतवसेतुरायप्रयोनहर्मिस्तोमंमाहिनाय ।
ऋचीषमायाध्रिगवओहमिन्द्रायब्रह्माणिराततमा ॥१॥

अस्मै । इत् । ऊम् इति । प्र । तवसे । तुराय । प्रयः । न । हर्मि ।
स्तोमम् । माहिनाय । ऋचीषमाय । अध्रिऽगवे । ओहम् ।
इन्द्राय । ब्रह्माणि । रातऽतमा ॥ १ ॥

इदुइतिनिपातद्वयंपदपूरणे अथापिपदपूरणाःकमीमिद्वितीतियास्कः । यद्वा अवधारणार्थम्
तवसेप्रवृद्धायतुरायत्वरमाणाय यद्वा तुर्विर्त्रिशत्रूणांहिंसित्रेमाहिनायगुणैर्महते ऋचीषमाय ऋचास-
माय यादृशीस्तुतिःक्रियतेतत्समायेत्यर्थः अध्रिगवेअधृतगमनायाप्रतिहतगमनायेत्यर्थः तथा-
चयास्कः—अधृतगमनकर्मवन्निन्द्रोप्यध्रिगुरुच्यतइति[2] । एवं भूतायास्माइन्द्रायस्तोमंस्तोत्रंप्र-
हर्मिप्रहरामिकरोमीत्यर्थः तत्रदृष्टान्तः—प्रयोन प्रयेत्यन्ननाम यथाबुभुक्षितायपुरुषायकश्चिदन्नं
प्रहरति कीदृशंस्तोमंओहंवहनीयंप्रापणीयंवाअत्यन्तोत्कृष्टमित्यर्थः नकेवलंस्तोमं किंतर्हिब्रह्मा-
णिहविर्लक्षणान्यन्नानि कीदृशानि राततमा पूर्वैर्यजमानैरतिशयेनदत्तानि इन्द्रस्तुत्याहविषाचपरि-
चरेमेतिभावः॥तुराय तुरत्वरणे इगुपधलक्षणःकः यद्वा तुर्वीहिंसार्थःतुर्वतीतितुरः पचाद्यच्छान्द-
सोवलोपः।हर्मि हृञ्हरणे बहुलंछन्दसीतिशपोलुक्। माहिनाय महपूजायामित्यस्मान्महेरिनण्चे-
तीनण्प्रत्ययः उपधावृद्धिश्च । ऋचीषमाय ऋचीषमऋचासमइतियास्कः[3] । तृतीयातत्कृतेतिसमा-
सः तृतीयापूर्वपदप्रकृतिस्वरत्वम् पृषोदरादित्वादीकारोपजनः सुषामादित्वात्षत्वम् केचिदा-
हुः ऋचस्तुतावित्यस्मादिगुपधात्किदितिइप्रत्ययः कृदिकारादक्तिनइतिङीष् ऋचीस्तुतिः त-
यासमःपूर्ववत्षत्वम् अस्मिन्पक्षे तृतीयापूर्वपदप्रकृतिस्वरत्वेसतिङीषउदात्तत्वेनभवितव्यम् त-
थाचनदृश्यते तस्मात्स्वरश्चिन्तनीयः यद्वा दिवोदासादिर्द्रष्टव्यः । अध्रिगवे अधृतोन्येनानिवा-
रितोगौर्गमनंयस्यसतथोक्तः गोस्त्रियोरुपसर्जनस्येतिह्रस्वत्वम् पृषोदरादित्वादधृतशब्दस्याध्रिभा-

---

१ ऐ० ब्रा० ६.१८. । २ नि० ५.११. । ३ नि० ६.२३. ।

वः। ओहम् वहतेःकर्मणिघञिछान्दसंसम्प्रसारणम्. यद्वा तुहिर्दुहिर्उहिर्अर्दनेइत्यस्मादोहतेः पूर्ववद्धञ्। राततमा रादानेइत्यस्मान्निष्ठान्तादातिशायनिकस्तमप् शेश्छन्दसीतिशेर्लोपः ॥ १ ॥

१. इन्द्र बली, क्षिप्तकारी, गुण-द्वारा महान्, स्तुति-पात्र और अबाध-गति हैं। जैसे बुभुक्षित को अन्न दिया जाता है, वैसे ही मैं इन्द्र की ग्रहण-योग्य स्तुति और पूर्ववर्त्ती यजमान-द्वारा दिया हुआ यज्ञान्न प्रदान करता हूँ।

अस्माइदुप्रयंइवप्रयंसिभराम्याङ्गूषंबाधेसुवृक्ति।
इन्द्रायहृदामनसामनीषाप्रत्नायपत्येधियोमर्जयन्त ॥२॥

अस्मै। इत्। ऊम् इति। प्रयःऽइव। प्र। यंसि। भरामि।
आङ्गूषम्। बाधे। सुऽवृक्ति। इन्द्राय। हृदा। मनसा। मनीषा।
प्रत्नाय। पत्ये। धियः। मर्जयन्त ॥ २ ॥

अस्माइदुअस्माएवेन्द्राय प्रयइत्यन्ननाम प्रयइवअन्नमिवप्रयंसिप्रयच्छामि तदेवस्पष्टीक्रियते बाधेशत्रूणांबाधनायसमर्थंसुवृक्तिंसुष्ठुआवर्जकंआङ्गूषंस्तोत्ररूपमाघोषंभरामिसंपादयामि अन्येपिस्तोतारःप्रत्नायपुराणायपत्येस्वामिनेइन्द्रायहृदाहृदयेनमनसातदन्तर्वर्तिनान्तःकरणेनमनीषामनीषयातज्जन्येनज्ञानेनचधियःस्तुतीःकर्माणिवामर्जयन्त मार्जयन्तिसंस्कुर्वन्ति॥ प्रयंसि यमउपरमेइत्यस्मात् लटिपुरुषव्यत्ययः बहुलंछन्दसीतिशपोलुक्। आङ्गूषंआङ्गूषस्तोमआघोषइति यास्कः।[१] आङ्पूर्वाद्घुषेर्घञिपृषोदरादित्वात्घौइत्यस्यगूआदेशः आङोङ्कारस्यलोपाभावश्च थाथादिनोत्तरपदान्तोदात्तत्वम्। बाधे बाधृविलोडनेइत्यस्मात्तुमर्थेतवैकेनितिभावेकेन्प्रत्ययः एजन्तत्वादव्ययत्वेनसुपोलुक्। मनीषा सुपांसुलुगितितृतीयायाडादेशः। पत्ये पतिःसमासएवेति घिसंज्ञायाःसमासविषयत्वात् घेर्ङितीतिगुणाभावेयणादेशः॥ २ ॥

२. इन्द्र को, अन्न की तरह, हव्य दान करता हूँ। शत्रुपराजय के साधन-स्वरूप स्तुति-वाक्यों का मैंने सम्पादन किया है। अन्य स्तोता भी उस पुरातन स्वामी इन्द्र के लिए हृदय, मन और ज्ञान से स्तुति-सम्पादन करते हैं।

अस्माइदुत्यमुपमंस्वर्षांभराम्याङ्गूषमास्येन।
मंहिष्ठमच्छोक्तिभिर्मतीनांसुवृक्तिभिःसूरिंवावृधध्यै ॥३॥

अस्मै। इत्। ऊम् इति। त्यम्। उपऽमम्। स्वःऽसाम्। भरामि।
आङ्गूषम्। आस्येन। मंहिष्ठम्। अच्छोक्तिऽभिः। मतीनाम्।
सुवृक्तिऽभिः सूरिम्। ववृधध्यै ॥ ३ ॥

---

[१] नि० ५. ११.।

अस्माइदु अस्माएवेन्द्रायत्यंतंप्रसिद्धम् उपमम् उपमानहेतुभूतम् स्वर्षांसुष्ठुअरणीयस्य धनस्यदातारं सूरिंविपश्चितमिन्द्रंववृधध्यैवर्धयितुंसुवृक्तिभिःसुष्ठुआवर्जकैःसमर्थैरित्यर्थः मतीनांस्तुतीनांसम्बन्धिभिः अच्छोक्तिभिः स्वच्छैर्वचोभिः मंहिष्ठमतिशयेनप्रवृद्धं एवंलक्षणमांगूषं आघोषंआस्येनमुखेनभरामिकरोमीत्यर्थः ॥ उपमं उपमीयतेनेनेत्युपमः घञर्थेकविधानमिति करणेकप्रत्ययः आतोलोपइटिचेत्याकारलोपः । स्वर्षां सुपूर्वादर्तेर्विजन्तःस्वर्शब्दः षणुदाने जनसनखनक्रमगमोविट् विड्वनोरनुनासिकस्यादित्यात्वम् सनोतेरनइतिषत्वम् । भरामि पादादित्वान्निघाताभावः। अच्छोक्तिभिः अच्छाउक्तयोयेषां बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्। मतीनां नामन्यतरस्यामितिनामउदात्तत्वम्। ववृधध्यै वृधुवृद्धावित्यस्मादन्तर्भावितण्यर्थात् तुमर्थेसेसेनितिकध्यैप्रत्ययः कित्त्वाद्गुणाभावः द्विर्भावश्छान्दसः यद्वा यङ्लुगन्तादस्मिन्प्रत्ययेआगमानुशासनस्यानित्यत्वादीगाद्यभावः अन्येषामपिदृश्यतइतिसांहितिकंअभ्यासस्यदीर्घत्वम् प्रत्ययाद्युदात्तत्वम् ॥ ३ ॥

३. उन्हीं उपमानभूत, वरणीय-धनदाता और विज्ञ इन्द्र को वर्द्धन करने के लिए मैं मुख द्वारा उत्कृष्ट और निर्मल स्तुति वचनों से युक्त तथा अति महान् शब्द करता हूँ।

चतुर्थीमृचमाह—

अस्माइदुस्तोमंसंहिनोमिरथंनतष्टेवतत्सिनाय ।
गिरंश्चगिर्वाहसेसुवृक्तीन्द्रायविश्वमिन्वंमेधिराय ॥४॥

अस्मै । इत् । ऊम् इति । स्तोमम् । सम् । हिनोमि । रथम् । न ।
तष्टाऽइव । तत्ऽसिनाय । गिरः । च । गिर्वाहसे । सुऽवृक्ति । इन्द्राय ।
विश्वम्ऽइन्वम् । मेधिराय ॥ ४ ॥

अस्माएवेन्द्रायस्तोमंशस्त्ररूपंस्तोत्रंसंहिनोमिप्रेरयामि तत्रदृष्टान्तः—तत्सिनाय सिनमित्यन्ननाम सिनमन्नंभवतिसिनातिभूतानीतियास्कः[1]। तेनरथेन सिनमन्नंयस्यसतथोक्तःतस्मैरथस्वामिनेतष्टेवतष्टातक्षकोरथनिर्मातारथंन यथारथंप्रेरयतितद्वत् इवेत्येतत्पदपूरणम् तथागिर्वाहसे गीर्भिःस्तुतिभिरुह्यमानायेन्द्राय गिरश्चशस्त्रसम्बन्धिनीःकेवलाऋचश्चसुवृक्तिशोभनमावर्जनंयथाभवति तथाप्रेरयामि तथामेधिरायमेधाविनेइन्द्रायविश्वमिन्वंविश्वंव्यापकंविश्वैर्व्याप्तं सर्वोत्कृष्टंहविश्चसंहिनोमीत्यनुषङ्गः॥ हिनोमि हिगतौवृद्धौच स्वादित्वाच्छ्नुः। तष्टेव तक्षूत्वक्षूतनूकरणे ताच्छीलिकस्तृन् ऊदित्त्वात्पक्षेइडभावः स्कोःसंयोगाद्योरन्तेचेतिककारलोपः नित्त्वादाद्युदात्तत्वम्। तत्सिनाय सिनशब्दः षिञ्बन्धनेइत्यस्मात् इणषिञ्दीङ्भ्यविभ्योनगितिनक्प्र-

१ नि० ५.५।

त्ययान्तः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । गिर्वाहसे वहिहाधाञ्भ्यश्छन्दसीतिवहतेःकेवला-द्विहितोसुन्प्रत्ययोगतिकारकयोरपिपूर्वपदप्रकृतिस्वरत्वंचेतिवचनात्कारकपूर्वस्यापिभवति पूर्वपद-प्रकृतिस्वरत्वंच णिदित्यनुवृत्तेरुपधावृद्धिः हलिचेतिदीर्घाभावश्छान्दसः। विश्वमिन्वं इविव्याप्तौ विश्वमिन्वतिव्याप्नोतीतिविश्वमिन्वम् पचाद्यच् लुगभावश्छान्दसः यद्वा खल्प्रत्ययोबहुल-वचनादस्मादपिधातोर्द्रष्टव्यः । मेधिराय मेधाअस्यास्तीतिमेधिरः मेधारथाभ्यामिरन्निरचौ वक्तव्याविति मत्वर्थीयइरन् नित्त्वादाद्युदात्तत्वम् ॥ ४ ॥

४: जिस प्रकार रथ-निर्माता रथ-स्वामी के पास रथ चलाता है, उसी प्रकार मैं भी इन्द्र के उद्देश से स्तोत्र प्रेरण करता हूँ। स्तुतिपात्र इन्द्र के लिए शोभन स्तुतिवचन प्रेरण करता हूँ । मेधावी इन्द्र के लिए विश्वव्यापी हवि प्रेरण करता हूँ।

अस्मा इदु सप्तिमिव श्रवस्येन्द्रायार्कं जुह्वा३ समञ्जे ।
वीरं दानौकसं वन्दध्यै पुरां गूर्तश्रवसं दर्माणम् ॥५॥२७॥

अस्मै । इत् । ऊम् इति । सप्तिम्ऽइव । श्रवस्या । इन्द्राय । अर्कम् । जुह्वा । सम् । अञ्जे । वीरम् । दानऽओकसम् । वन्दध्यै । पुराम् । गूर्तऽश्रवसम् । दर्माणम् ॥ ५ ॥ २७ ॥

अस्माएवेन्द्रायअर्कं स्तुतिरूपंमन्त्रंश्रवस्या श्रवस्ययाअन्नेच्छयाअन्नलाभायेत्यर्थः जुह्वा आह्वानसाधनेनवागिन्द्रियेणसमञ्जेसमक्तंकरोमि एकीकरोमीत्यर्थः तत्रदृष्टान्तः—सप्तिमिव यथान्नलाभायगन्तुकामःपुमान् अश्वंरथेनैकीकरोतितद्वत् एकीकृत्यचवीरं शत्रुक्षेपणकुशलं दानौकसंदानानामेकनिलयं गूर्तश्रवसंप्रशस्यान्नं पुरांअसुरपुराणांदर्माणंविदारयितारं एवंगुणविशिष्टमिन्द्रंवन्दध्यैवन्दितुंस्तोतुंप्रवृत्तोस्मीतिशेषः॥ सप्तिमिव षपसमवाये समवैतिरथेनैकीभवतीति सप्तिरश्वः वसस्तिविबितिविधीयमानस्तिप्प्रत्ययोबहुलवचनादस्मादपिधातोर्भवति प्रत्ययस्य पित्त्वादनुदात्तत्वेधातुस्वरः इवेनसमासउक्तः । श्रवस्या श्रवस्शब्दात्सुपआत्मनःक्यच् क्य-जन्ताद्धातोर्भावेअप्रत्ययात्यादित्यकारप्रत्ययः ततष्टाप् सुपांसुलुगितितृतीयायाडादेशः उदात्तनिवृत्तिस्वरेणतस्योदात्तत्वम् । अर्कम् ऋचस्तुतौ ऋच्यतेस्तूयतेनेनेत्यर्कोमन्त्रः पुंसिसंज्ञायांघःप्रायेणेतिकरणेघप्रत्ययः चजोःकुघिण्ण्यतोरितिकुत्वम् लघूपधगुणःप्रत्ययस्वरः। जुह्वा बहुलंछन्दसीति कृतसम्प्रसारणस्यह्वेञोहुवःश्लुवच्चेतिक्विप् धातोर्दीर्घश्च धातुस्वरेणान्तोदात्तत्वम् तृतीयैकवचने उदात्तस्वरितयोर्यणइतिस्वरितत्वम् उदात्तयणोहल्पूर्वादित्यस्यविभक्त्युदात्तत्वस्य नोङ्धात्वोरितिप्रतिषेधः।अञ्जे अञ्जूव्यक्तिम्रक्षणकान्तिगतिषु व्यत्ययेनात्मनेपदम् ।वन्दध्यै वदिअभिवादनस्तुत्योः तुमर्थेसेसेनितिकध्यैप्रत्ययः।गूर्तश्रवसम् गृशब्दे निष्ठायांश्र्युकःकितीतीट्प्रतिषेधः ब-

हुलंछन्दसीत्युत्वम् हलिचेतिदीर्घः नसत्तनिषत्तेत्यादौनिपातनान्निष्ठानत्वाभावः गूर्तश्रवोयस्य ब-हुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् ॥ दर्माणम् दृविदारणे अन्येभ्योपिदृश्यन्तइतिमनिन् नेड्वशिकृती-तीट्प्रतिषेधः व्यत्ययेनप्रत्ययाद्युदात्तत्वम् यद्वा औणादिकोमनिप्रत्ययोद्रष्टव्यः ॥ ५ ॥

५. जैसे घोड़े को रथ में लगाया जाता है, वैसे ही मैं भी अन्न-प्राप्ति की इच्छा से स्तुति-रूप मंत्र उच्चारण करता हूँ। उन्हीं वीर, दानशील, अन्नविशिष्ट और असुरों के नगरविदारी इन्द्र की वन्दना में प्रवृत्त होता हूँ।

अस्माइदु॒त्वष्टा॑तक्ष॒द्वज्रं॒स्वप॑स्तमंस्व॒र्यं॑१रणा॑य ।
वृ॒त्रस्य॑चिद्वि॒दद्येन॒मर्म॑तु॒जन्नीशा॑नस्तु॒ज॒ताकि॑ये॒धाः ॥६॥

अ॒स्मै । इत् । ऊँ॒ इति॑ । त्वष्टा॑ । त॒क्ष॒त् । वज्र॑म् । स्वप॑ःऽतमम् ।
स्व॒र्य॑म् । रणा॑य । वृ॒त्रस्य॑ । चि॒त् । वि॒दत् । येन॑ । मर्म॑ ।
तु॒जन् । ईशा॑नः । तु॒ज॒ता । कि॒ये॒धाः ॥ ६ ॥

त्वष्टाविश्वकर्मा अस्माइदुअस्माएवेन्द्राय वज्रंवर्जकमायुधं रणाययुद्धार्थंतक्षत् तीक्ष्णमकरोत् कीदृशंवज्रं स्वपस्तमंअतिशयेनशोभनकर्माणंस्वर्यंसुष्ठु शत्रुषुप्रेर्यं यद्वा स्तुत्यं तुजन् शत्रून्हिंसन् ईशा-नःऐश्वर्यवान् कियेधाः बलवान् एवंगुणविशिष्टइन्द्रः वृत्रस्यचित्आवरकस्यअसुरस्यमर्ममर्मस्था-नंतुजताहिंसतायेनवज्रेणविदत्प्राहार्षीदित्यर्थः ॥ स्वपस्तमं शोभनंअपःकर्मयस्यासौ अतिशये-नस्वपाः स्वपस्तमः तमपःपित्त्वादनुदात्तत्वम् सोर्मनसीअलोमोषसीइत्युत्तरपदाद्युदात्तत्वम्। स्वर्यं स्वर्यंततक्षेत्यत्रोक्तम्। विदत् विद्लृलाभे लृदित्त्वाच्चेरङादेशः बहुलंछन्दस्यमाङ्योगेपीत्यडभावः यद्वृत्तयोगादनिघातः। तुजन् तुजहिंसायाम् शपिप्राप्तेव्यत्ययेनशः अदुपदेशाल्लसार्वधातुकानु-दात्तत्वेविकरणस्वरः। ईशानः ईशऐश्वर्ये शानचिअदादित्वाच्छपोलुक् अनुदात्तेत्त्वाल्लसार्वधातु-कानुदात्तत्वेधातुस्वरः। तुजता शतुरनुमइतिविभक्तेरुदात्तत्वम्। कियेधाः अत्रनिरुक्तम्—कि-येधाःकियद्धाइतिवाक्रममाणधाइतिवेति । अस्यायमभिप्रायः—कियत्किंपरिमाणमित्यस्यबल-स्यतादृशंबलंदधातिधारयतीतिकियद्धाः यःकोप्यस्यबलस्यइयत्तांनजानातीत्यर्थः। यद्वा क्रममा-णमाक्रममाणंपरेषांबलंधारयतिनिवारयतीतिक्रममाणधाः । उभयत्रापिपृषोदरादित्वात्पूर्वपदस्य कियेभावः दधातेर्विच् ॥ ६ ॥

६. इन्द्र के लिए, त्वष्टा ने, युद्ध के निमित्त शोभन-कर्मा और सुप्रेरणीय वज्र का निर्माण किया था। शत्रु-नाश के लिए तैयार होकर ऐश्वर्यवान् और अपरिमित बलशाली इन्द्र ने हननकर्त्ता वज्र से वृत्र का मर्म काटा था।

१ ऋ० सं० १. २. ३६.। २ नि ६. २०.।

सप्तमीमृचमाह—

अस्येदुमातुःसवनेषुसद्योमहःपितुंपपिवाञ्चार्वन्ना ।
मुषायद्विष्णुःपचतंसहीयान्विध्यद्वराहंतिरोअद्रिमस्ता ॥७॥

अस्य । इत् । ऊम् इति । मातुः । सवनेषु । सद्यः । महः । पितुम् ।
पपिऽवान् । चारु । अन्ना । मुषायत् । विष्णुः । पचतम् ।
सहीयान् । विध्यत् । वराहम् । तिरः । अद्रिम् । अस्ता ॥ ७॥

इदुइत्येतन्निपातद्वयंपदपूरणम् यद्वा अवधारणार्थम् मातुःवृष्टिद्वारेणसकलस्यजगतोनिर्मातुःमहोमहतोस्ययज्ञस्यसवनेषुअवयवभूतेषुप्रातःसवनादिषुत्रिषुसवनेषु पितुंसोमलक्षणमन्नंसद्यःपपिवान्यदाग्नौहूयतेतदानीमेवपानंकृतवानित्यर्थः तथाचार्वन्नाचारूणिशोभनानिधानाकरम्भादिहविर्लक्षणान्यन्नानिभक्षितवानितिशेषः किञ्च विष्णुःसर्वस्यजगतोव्यापकःपचतंपरिपक्वमसुराणांधनंयदस्तितन्मुषायदपहरन् सहीयान्अतिशयेनशत्रूणामभिभविता अद्रिमस्ता अद्रेर्वज्रस्यक्षेपकःएवंभूतइन्द्रः तिरःसतइतिप्राप्तस्येतियास्कः[1] । तिरःप्राप्तःसन्वराहंमेघंविध्यत्अताडयत् यद्वा विष्णुःसुत्यदिवसात्मकोयज्ञः यज्ञोदेवेभ्योनिलायतविष्णूरूपंकृत्वेत्याम्नानात्[2]। सविष्णुःपचतंपरिपक्वमसुरधनंयत्तन्मुषायत् अचूचुरत् तदनन्तरंदीक्षोपसदात्मनांदुर्गरूपाणांसप्तानामह्नांपरस्तादासीत् अद्रिमस्तासहीयानिन्द्रः दुर्गाण्यतीत्यतिरःप्राप्तःसन्वराहंउत्कृष्टदिवसरूपंतंयज्ञंविध्यत् तथातैत्तिरीयकम्—वराहोयंवाममोषःसप्तानांगिरीणांपरस्ताद्वित्तंवेद्यमसुराणांबिभर्तीतिसदर्भंपिञ्जूलमुद्धृत्यसप्तगिरीन्भित्त्वातमहन्नितिच[3]॥ महः महतःअच्छब्दलोपश्छान्दसः यद्वा महइत्येतत्पितुविशेषणं महःप्रशस्तंपितुमित्यर्थः । पपिवान् पिबतेर्लिटःक्वसुः वस्वेकाजाद्घसामितीडागमः आतोलोपइटिचेत्याकारलोपःप्रत्ययस्वरः। चारु सुपांसुलुगितिविभक्तेर्लुक्। मुषायत् मुषस्तेये घञर्थेकविधानमितिभावेकप्रत्ययःमुषमात्मनइच्छतिसुपआत्मनःक्यच् नच्छन्दस्यपुत्रस्येतीत्वदीर्घस्यापिप्रतिषेधेव्यत्ययेनदीर्घः अस्माल्क्यजन्ताल्लटःशतृ आगमानुशासनस्यानित्यत्वान्नुमभावः द्वितीयपक्षेतुक्यजन्ताल्लङ्बहुलंछन्दस्यमाङ्योगेपीत्यडभावः अत्रस्तेयेच्छयातदुत्तरभाविनीक्रियालक्ष्यते। पचतं भृमृदृशीत्यादिनापचतेरतच्प्रत्ययः चित्त्वादंन्तोदात्तत्वम्। विध्यत् व्यधताडने लङिदिवादित्वात्श्यन् तस्य ङित्त्वात्ग्रहिज्यादिनासम्प्रसारणम् श्यनोनित्त्वादाद्युदात्तत्वम् पादादित्वान्निघाताभावः । वराहं वरमुदकमाहारोयस्य यद्वा वरमाहरतीतिवराहारःसन्पृषोदरा-

---

1 नि० ३. २०. । 2 तै० सं० ६. २. ४. । 3 तै० ६. २. ४. ।

दित्वाद्वराहइत्युच्यते । अत्रनिरुक्तम्—वराहोमेघोभवतिवराहारोवरमाहारमाहार्षीरितिचब्राह्मणं-मिति । यज्ञपक्षेतु वरंचतदहोवराहः राजाहःसखिभ्यइतिसमासन्तष्टच्प्रत्ययः चित्वादन्तोदात्तत्वम्।अस्ता अस्तुक्षेपणेइत्यस्मात्साधुकारिणितृन् इडभावश्छान्दसः नलोकाव्ययेतिषष्ठीप्रतिषेधः ॥ ७ ॥

७. जगत् के निर्माणकर्त्ता इन्द्र को इस महायज्ञ में जो तीन अभिषव दिये गये हैं, इन्द्र ने उनमें तुरत सोमरूप अन्न पान किया है। साथ ही शोभनीय हव्यरूप अन्न भी भक्षण किया है। सारे संसार में इन्द्र व्यापक हैं। उन्होंने असुरों का धन हरण किया है। वे शत्रुविजयी और वज्र चलानेवाले हैं। उन्होंने मेघ को पाकर उसे फोड़ा था।

अस्माइदुग्नाश्चिद्देवपत्नीरिन्द्रायार्कमहिहत्यऊवुः ।
परिद्यावापृथिवीजभ्रउर्वीनास्यतेमहिमानंपरिष्टः॥८॥

अस्मै । इत् । ऊम् इति । ग्नाः । चित् । देवऽपत्नीः । इन्द्राय ।
अर्कम् । अहिऽहत्ये । ऊवुरित्यूवुः । परि । द्यावापृथिवी इति । जभ्रे ।
उर्वी इति । न । अस्य । ते इति । महिमानम् । परि । स्तइति स्तः॥८॥

अस्माएवेन्द्रायअहिहत्येअहेर्वृत्रस्यहननेनिमित्तभूतेसति ग्नाश्चित्गमनस्वभावाअपिस्थिताः देवपत्नीः देवानांपालयित्र्योगायत्र्याद्यादेवताअर्कमर्चनसाधनंस्तोत्रंऊवुः समतन्वत चक्रुरित्यर्थः सचेन्द्रंउर्वीविस्तृतेद्यावापृथिवी द्यावापृथिव्यौपरिजभ्रेस्वतेजसापरिजहार अतिचक्रामेत्यर्थः ॥ ऊवुः वेञ्तन्तुसन्ताने लिटि वेञोवयिः लिटःकित्त्वाद्यजादित्वेनसम्प्रसारणे क्रियमाणे यकारस्यलिटिवयोयइतिप्रतिषेधात् वकारस्यसम्प्रसारणं परपूर्वत्वं द्विर्वचनादि वश्चास्यान्यतरस्यांकितीतियकारस्यवकारादेशः । जभ्रे हृञ्हरणे लिटि ञित्त्वात्कर्त्रभिप्रायेआत्मनेपदम् हृग्रहोर्भइतिभत्वम् । उर्वी उरुशब्दाद्वोतोगुणवचनादितिङीष् वाछन्दसीतिपूर्वसवर्णदीर्घत्वम् ॥ ८ ॥

८. इन्द्र-द्वारा अहि या वृत्र का विनाश होने पर नमनशील देवपत्नियों ने इन्द्र की स्तुति की थी। इन्द्र ने विस्तृत आकाश और पृथिवी को अतिक्रम किया था; किन्तु द्युलोक और पृथिवीलोक इन्द्र की मर्यादा का अतिक्रम नहीं कर सकते।

अस्येदेवप्ररिरिचेमहित्वंदिवस्पृथिव्याःपर्यन्तरिक्षात् ।
स्वराळिन्द्रोदमआविश्वगूर्तःस्वरिरमत्रोववक्षेरणाय ॥९॥

---

१ नि०५. ३.

अस्य । इत् । एव । प्र । रिरिचे । महिऽत्वम् । दिवः । पृथिव्याः ।
परि । अन्तरिक्षात् । स्वऽराट् । इन्द्रः । दमे । आ । विश्वऽगूर्तः ।
सुऽअरिः अमत्रः । ववक्षे । रणाय ॥ ९ ॥

अस्येदेव इदितिपदपूरणः अस्यैवेन्द्रस्यमहित्वम् माहात्म्यं प्ररिरिचेअतिरिच्यते अधिकंभवतीत्यर्थः अत्रोपसर्गोधात्वर्थस्यनिवृत्तिमाचष्टे यथाप्रस्मरणं प्रस्थानमिति कुतःसकाशात् प्ररिरिचे इत्यतआह दिवोद्युलोकात् पृथिव्याः भूलोकात् अन्तरिक्षात् द्यावापृथिव्योर्मध्ये वर्तमानात् अन्तरिक्षलोकाच्चपरिउपर्यर्थः त्रीन्लोकानतीत्यउपरिप्ररिरिचइत्यर्थः दमेदमयितव्येविषये स्वराट्स्वेनैवतेजसाराजमानः विश्वगूर्तः विश्वस्मिन्सर्वस्मिन् कार्येउद्गूर्णःसमर्थः यद्वा विश्वंसर्वमायुधं गूर्तंउद्यतंयस्यसतथोक्तः स्वरिःशोभनशत्रुकः शोभनेशत्रौहन्तव्येसतिहन्तावीर्यवत्तमइति गम्यते यथा अंकवारिंदिव्यंशासमिन्द्रमिति।अकुत्सितारिमितिहितस्यार्थः अमत्रः युद्धादिषुगमनकुशलः मात्रयाइयत्तयारहितोवा अमत्रोमात्रोमहान्भवत्यभ्यमितोवेतियास्कः।एवंभूतइन्द्रोरणाय रणंयुद्धंआववक्षे आवहतिमेघान् प्रापयति मेघैःपरस्परयुद्धंकारयित्वावृष्टिंचकारेतिभावः यद्वा युद्धायस्वकीयान्भटान्गमयति॥अस्य ऊडिदमितिविभक्तेरुदात्तत्वम् । रिरिचे रिचिर्विरेचने छन्दसिलुङ्लङ्लिटइतिवर्तमाने कर्मणिलिट् । पृथिव्याः उदात्तयणइतिविभक्तेरुदात्तत्वम्।स्वराट् राजृदीप्तावित्यस्मात् सत्सूद्विषेतिक्विप् व्रश्चादिनाषत्वेजश्त्वम् । दमे दमउपशमे इत्यस्मात्कर्मणिघञि नोदात्तोपदेशस्यमान्तस्यानाचमेरितिवृद्धिप्रतिषेधः घञोञित्वादाद्युदात्तत्वम् । विश्वगूर्तः गॄनिगरणे अस्मान्निष्ठायां श्र्युकःकितीतीट्प्रतिषेधः बहुलंछन्दसीत्युत्वम् हलिचेतिदीर्घः यद्वा गूरीउद्यमेअस्मात् निष्ठा नसत्तनिषत्तेत्यादौनिपातनान्निष्ठानत्वाभावः तत्पुरुषपक्षेमरुद्वृधादित्वात्पूर्वपदान्तोदात्तत्वम् बहुव्रीहिपक्षेतु बहुव्रीहौविश्वंसंज्ञायामिति असंज्ञायामपिपूर्वपदान्तोदात्तत्वम् । अमत्रः अमगत्यादिषु अमिनक्षियजिवन्धीत्यादिनाउणादिकोत्रन्प्रत्ययः नित्त्वादाद्युदात्तत्वम् । ववक्षे वहेर्लेटि सिब्बहुलंलेटीतिसिप् बहुलंछन्दसीतिशपःश्लुः ढत्वकत्वषत्वानि लोपस्तआत्मनेपदेष्वितितलोपः । रणाय क्रियाग्रहणंकर्तव्यमिति कर्मणःसम्प्रदानत्वाच्चतुर्थी यद्वा गत्यर्थकर्मणीतिचतुर्थी ॥ ९ ॥

९. द्युलोक, भूलोक और अन्तरिक्ष की अपेक्षा भी इन्द्र की महिमा अधिक है। अपने अधिवास में अपने तेज से इन्द्र स्वराज करते हैं। इन्द्र सर्व-कार्य-क्षम हैं। इन्द्र का शत्रु सुयोग्य है और इन्द्र युद्ध में निपुण हैं। इन्द्र मेघरूप शत्रुओं को युद्ध में बुलाते हैं।

---

१ ऋ० सं० ३. ३. ११. । २ नि० ६. २३. ।

दशमीमृचमाह—

अस्येदेवशर्वसाशुषन्तंविवृश्चद्वज्रेणवृत्रमिन्द्रः।
गानव्राणाअवनीरमुञ्चदभिश्रवोदावनेसचेताः ॥१०॥२८॥

अस्य। इत्। एव। शवसा। शुषन्तम्। वि। वृश्चत्। वज्रेण।
वृत्रम्। इन्द्रः। गाः। न। व्राणाः। अवनीः। अमुञ्चत्। अभि।
श्रवः। दावने। सऽचेताः ॥ १० ॥ २८ ॥

अस्यैवेन्द्रस्यशवसावलेनशुषन्तंशुष्यन्तंवृत्रंइन्द्रोवज्रेणविवृश्चत्व्यवच्छिनत् तथा गाःन चौरैरपहृतागावइव व्राणाःवृत्रेणावृताः अवनीःरक्षणहेतुभूताःअपःअमुञ्चत्अवर्षीत् तथा दावने हविर्दातेयजमानायसचेताः तेनयजमानेनसमानचित्तःसन् श्रवःकर्मफलभूतमन्नंअभिआभिमुख्येनददातीतिशेषः ॥ शुषन्तं शुषशोषणे श्यनिप्राप्तेव्यत्ययेनशः अदुपदेशाल्लसार्वधातुकानुदात्तत्वेविकरणस्वरएवशिष्यते। व्राणाः वृञ्वरणे कर्मणिलटःशानचि बहुलंछन्दसीतियकोलुक् शानचोङित्त्वाद्गुणाभावेयणादेशः। अवनीः अवतेः करणे अर्तिस्तुसुहुसृधृक्षीत्यादिनाअनिप्रत्ययः प्रत्ययाद्युदात्तत्वम्। दावने आतोमनिन्क्वनिब्वनिप् चतुर्थ्येकवचनेअल्लोपाभावश्छान्दसः ॥१०॥

१०. अपने वज्र से इन्द्र ने जल-शोषक वृत्र को छिन्न-भिन्न किया था। साथ ही चोरों के द्वारा अपहृत गायों की तरह वृत्रासुर-द्वारा अवरुद्ध तथा संसार के रक्षक जल को छुड़वा दिया था। हव्यदाता को इन्द्र उसकी इच्छा के अनुसार अन्न दान करते हैं।

॥इतिप्रथमस्यचतुर्थेऽष्टाविंशोवर्गः॥ २८ ॥

एकादशीमृचमाह—

अस्येदुत्वेषसारन्तसिन्धवःपरियद्वज्रेणसीमयच्छत्।
ईशानकृद्दाशुषेदशस्यंतुर्वीतयेगाधंतुर्वणिःकः॥११॥

अस्य। इत्। ऊम् इति। त्वेषसा। रन्त। सिन्धवः। परि। यत्।
वज्रेण। सीम्। अयच्छत्। ईशानऽकृत्। दाशुषे। दशस्यन्।
तुर्वीतये ॥ गाधम्। तुर्वणिः। करिति कः ॥ ११ ॥

अस्यैवेन्द्रस्यत्वेषसादीप्तेनबलेनसिन्धवःसमुद्राः यद्वा गङ्गाद्याःसप्तनद्यः रन्त स्वेस्वेस्थानेरमन्ते यद्यस्मादयमिन्द्रोवज्रेणसींएनान्सिन्धून्वज्रेणपर्ययच्छत् परितोनियमितवान् अपिच ईशानकृत् वृत्रादिशत्रुवधेनआत्मानंऐश्वर्यवन्तंकुर्वन्निन्द्रोदाशुषेहविर्दत्तवतेयजमानाय फलंदशस्यन्प्रयच्छन् तुर्वणिस्तूर्णसम्भजनः तुर्वणिस्तूर्णवनिरितियास्कः[1]। यद्वा तुर्वितारःशत्रूणां

---

१ नि० ६. १४.।

हिंसिता एवंभूतइन्द्रः तुर्वीतयेएतत्संज्ञायउदकेनिमग्नायक्षयेगाधमवस्थानयोग्यंधिष्ण्यंमदे-शंकः अकार्षीत्॥ रन्त रमुक्रीडायां छान्दसेलुङि्वहुवचने बहुलंछन्दसीतिशपोलुक् धातोरन्त्यलो-पश्छान्दसः। अयच्छत् यमउपरमे इषुगमियमांछइतिछत्वम्। कः करोतेर्लुङि मन्त्रेघसह्वरणशे-त्यादिनाच्लेर्लुक् गुणः हल्ङ्यादिनातल्लोपः बहुलंछन्दस्यमाङ्योगेपीत्यडभावः ॥ ११ ॥

११. इन्द्र की दीप्ति के द्वारा नदियाँ अपने-अपने स्थान पर शोभा पाती हैं; क्योंकि वज्र-द्वारा इन्द्र ने उनकी सीमा निर्दिष्ट कर दी है। अपने को ऐश्वर्यवान् करके और हव्यदाता को फल प्रदान करके इन्द्र ने तुरत तुर्वीति ऋषि के निवास-योग्य एक स्थान बनाया।

अस्माइदुप्रभंरातूतुंजानोवृत्रायवज्रमीशानःकियेधाः।
गोर्नपर्वविरंदातिरश्चेष्यन्नर्णांस्यपांचरध्यै ॥१२॥
अस्मै। इत्। ऊम् इति। प्र। भर। तूतुंजानः। वृत्राय। वज्रम्।
ईशानः। कियेधाः। गोः। न। पर्व। वि। रद। तिरश्चा।
इष्यन्। अर्णांसि। अपाम्। चरध्यै ॥ १२ ॥

तूतुजानइतिक्षिप्रनाम तूतुजानस्त्वरमाणः यद्वा शत्रून्हिंसन्ईशानःईश्वरःसर्वेषांकियेधाः कियतःअनवधृतपरिमाणस्यबलस्यधाता यद्वा क्रममाणंशत्रुवलंदधात्यवस्थापयतीतिकियेधाः हेइन्द्र एवंभूतस्त्वंअस्मैवृत्रायवज्रंप्रभर इमंवृत्रंवज्रेणप्रहरेत्यर्थःप्रहृत्यच अर्णांसिवृष्टिजलानिइष्य-न्तस्माद्वृत्राद्गमयंस्त्वंअपांचरध्यै तासामपांचरणायभूप्रदेशंप्रतिगमनायतस्यवृत्रस्यमेघरूपस्य पर्वपर्वाणिअवयवसन्धीन्तिरश्चा तिर्यगवस्थितेनवज्रेणविरदविलिख छिन्धीत्यर्थः तत्रदृष्टान्तः-गोर्न यथामांसस्यविकर्तारोलौकिकाःपुरुषाःपशोरवयवानितस्ततोविभजन्तितद्वत् । अत्रनिरु-क्तम्—अस्मैप्रहरतूर्णंत्वरमाणोवृत्रायवज्रमीशानःकियेधाःकियद्धाइतिवाक्रममाणधाइतिवागो-रिवपर्वाणिविरदमेवस्येष्यन्नर्णांस्यपांचरणायेति ॥भर हृग्रहोर्भइतिभत्वम् द्व्यचोतस्तिङइतिसां-हितिकोदीर्घः। तूतुजानः तुजहिंसायां कानचितुजादीनांदीर्घोभ्यासस्येत्यभ्यासस्यदीर्घत्वम् छ-न्दस्युभयथेतिकानचःसार्वधातुकत्वेसति अभ्यस्तानामादिरित्याद्युदात्तत्वम्।कियेधाः तुजतोकि-येधाइत्यत्रोक्तम्। रद रदविलेखने तिङ्‌ङतिङइतिनिघातः। तिरश्चा तिरोञ्चतीतितिर्यङ् ऋत्विगि-त्यादिनाक्विन् अनिदितामितिनलोपः तृतीयैकवचनेभसंज्ञायामचइत्यकारलोपः श्चुत्वेनसकारस्य शकारः उदात्तनिवृत्तिस्वरेणविभक्तेरुदात्तत्वम्। इष्यन् इषगतावित्यस्मादन्तर्भावितण्यर्थाच्छ-तरिदिवादिभ्यःश्यन् तस्यनित्त्वादाद्युदात्तत्वम्। चरध्यै तुमर्थेसेसेनिविचरतेरध्यैप्रत्ययः॥१२॥

१२. इन्द्र क्षिप्तकारी, सर्वेश्वर और अपरिमितशक्तिशाली हैं। इन्द्र! तुम इस वृत्र के ऊपर वज्र-प्रहार करो। पशु की तरह वृत्र के शरीर की संधियाँ तिर्यग् भाव से अवस्थित वज्र से काटो; ताकि वृष्टि बाहर हो सके और पृथिवी पर जल विचरण कर सके।

त्रयोदशीमृचमाह—

अस्येदुप्रब्रूहिपूर्व्याणितुरस्यकर्माणिनव्यउक्थैः।
युधेयदिष्णानआयुधान्यृघायमाणोनिरिणातिशत्रून् ॥१३॥

अस्य। इत्। ऊम् इति। प्र। ब्रूहि। पूर्व्याणि। तुरस्य। कर्माणि। नव्यः। उक्थैः। युधे। यत्। इष्णानः। आयुधानि। ऋघायमाणः। निऽरिणाति। शत्रून् ॥ १३ ॥

उक्थैःशस्त्रैर्नव्यःस्तुत्योयइन्द्रः अस्येदुअस्यैवतुरस्ययुद्धार्थंत्वरमाणस्येन्द्रस्यपूर्व्याणि पुराणानिकर्माणिएतत्कृतानिबलकर्माणि हेस्तोतः प्रब्रूहिप्रशंस यद्यदायुधेयोधनायआयुधानिवज्रादीनिइष्णानः आभीक्ष्ण्येनप्रेरयन्शत्रूनृघायमाणोहिंसंश्चइन्द्रोनिरिणातिअभिमुखंगच्छति तदानींप्रब्रूहीतिपूर्वेणसम्बन्धः पूर्व्यमितिपुराणनाम पूर्व्यअह्नायेतिपुराणनामसुपाठात्॥तुरस्य तुरत्वरणे इगुपधलक्षणःकः। नव्यः णुस्तुतौ अचोयदितियत् गुणः धातोस्तन्निमित्तस्यैवेत्यवादेशः। इष्णानः इषआभीक्ष्ण्ये क्रैयादिकः व्यत्ययेनात्मनेपदम् शानच्श्चित्त्वादन्तोदात्तत्वम्। ऋघायमाणः नहित्वारोदसीउभेऋघायमाणमित्यत्रव्युत्पादितम्। निरिणाति रीगतिरेषणयोः क्र्यादिभ्यःश्ना प्वादीनांह्रस्वइतिह्रस्वत्वम् तिपःपित्त्वादनुदात्तत्वेविकरणस्वरःशिष्यते तिङ्ङिचोदात्तवतीतिगतेर्निघातः यद्वृत्तयोगात्तिङ्ङ्तिङइतिनिघाताभावः ॥ १३ ॥

१३. जो मंत्रों-द्वारा स्तुत्य हैं, उन्हीं युद्धार्थक्षिप्रगामी इन्द्र के पूर्व कर्म्मों का वर्णन करो। इन्द्र युद्ध के लिए बार-बार सारे शस्त्र फेंक-कर और शत्रुओं का वध कर उनके सम्मुख जाते हैं।

चतुर्दशीमृचमाह—

अस्येदुभियागिरयश्चदृळ्हाद्यावाचभूमाजनुषस्तुजेते।
उपोवेनस्यजोगुवानओणिंसद्योभुवद्वीर्यायनोधाः ॥१४॥

अस्य। इत्। ऊम् इति। भिया। गिरयः। च। दृळ्हाः। द्यावा। च। भूम। जनुषः। तुजेते इति। उपो इति। वेनस्य। जोगुवानः। ओणिम्। सद्यः। भुवत्। वीर्याय। नोधाः ॥ १४ ॥

१ ऋ० सं० १.१-२०.।

अस्यैवेन्द्रस्यभियापक्षच्छेदभयेनगिरयःपर्वताअपिदृह्ळाःनिश्चलाःस्वस्वदेशेवतिष्ठन्ते जनुषः प्रादुर्भूतादस्मादेवेन्द्राद्भीत्याद्यावाभूमाचद्यावापृथिव्यावपितुजेते तुजिर्हिसार्थोप्यत्रकम्पनेद्र-ष्टव्यः कंपेतेइत्यर्थः किञ्च वेनस्यकान्तस्यास्यओणिंदुःखस्यापनायकंरक्षणंउपोजोगुवानः अने-कैःसूक्तैःपुनःपुनरुपशब्दयन्नुपश्लोकयन्नित्यर्थः एवंभूतोनोधाऋषिः सद्यस्तदानीमेववीर्यायभु-वद्वीर्यंवानभवत् ॥ द्यावाचभूमा द्यावाभूमेत्यनयोर्मध्येचशब्दस्यपाठश्छान्दसः दिवोद्यावेतिदि-वृशब्दस्यद्यावादेशः सुपांसुलुगितिविभक्तेर्डादेशः छान्दसमत्वंपदकारैःकृतम् देवताद्वन्द्वेचेत्यु-भयपदप्रकृतिस्वरत्वम् "दद्वयमसिद्धिरपिसाम्प्रदायिकी । जनुषः जनीप्रादुर्भावे जनेरुसिरि-त्यौणादिकउसिप्रत्ययः । जोगुवानः गुङ्अव्यक्तेशब्दे अस्माद्यङ्लुगन्ताद्यत्ययेनशानच् अदा-दिवच्चेतिवचनाच्छपोलुक् उवङादेशः अभ्यस्तानामादिरित्याद्युदात्तत्वम् । ओणिं ओणृअपनय-ने अस्मादौणादिकइप्रत्ययः । भुवत् भवतेर्लेटचडागमः बहुलंछन्दसीतिशपोलुक् भूसुवोस्तिङी-तिगुणप्रतिषेधः । नोधाः नोधाऋषिर्भवतिनवनंदधातीतियास्कः । तस्माद्धाञोऽसुन् नवश-ब्दस्यनोभावश्च ॥ १४ ॥

१४. इन्हीं इन्द्र के डर के मारे पर्वत निश्चल हो रहते हैं और इन्द्र के प्रकट होने पर आकाश और पृथिवी काँपने लगते हैं। नोधा ऋषि ने इन्हीं कमनीय इन्द्र की रक्षण-शक्ति की, सूक्तों-द्वारा, बार-बार प्रार्थना करके तुरन्त ही वीर्य या शक्ति प्राप्त की थी।

पञ्चदशीमृचमाह—

अस्माइदुत्यदनुदाय्येषामेकोयद्वव्नेभूरेरीशानः ।
प्रैतशंसूर्येपस्पृधानंसौवश्व्येसुष्विमावदिन्द्रः ॥१५॥

अस्मै । इत् । ऊम् इति । त्यत् । अनु । दायि । एषाम् । एकः । यत् । वव्ने । भूरेः । ईशानः । प्र । एतशम् । सूर्ये । पस्पृधानम् । सौवश्व्ये । सुष्विम् । आवत् । इन्द्रः ॥ १५ ॥

एकःएकएवशत्रून्जेतुंसमर्थःभूरेर्बहुविधस्यधनस्यईशानःस्वामीयत्स्तोत्रंवव्नेययाचेएषांस्तो-तृणांसम्बन्धि यद्वा विभक्तिव्यत्ययःएतैःत्यत्तत्प्रसिद्धंस्तोत्रमस्माइन्द्रायअनुदायिअकारीत्यर्थः। उत्तरार्धस्यइयमाख्यायिका—स्वश्वोनामकश्चिद्राजासचपुत्रकामःसूर्यमुपासाञ्चक्रे तस्यचसूर्य-एवपुत्रोबभूव तेनसहएतशनाम्नोमहर्षेःयुद्धंजातमितितदेतदिहोच्यते—अयमिन्द्रःसौवश्व्येस्वश्व-पुत्रेसूर्येपस्पृधानं स्पर्धमानंसुष्विं सोमानामभिषोतारंएतशंएतत्संज्ञमृषिंप्रावत्प्रारक्षत्॥दायि बहुलं-छन्दस्यमाङ्योगेपीत्यडभावः । वव्ने वनुयाचने लिटिव्यत्ययेनोपधालोपः । पस्पृधानं स्पर्धसंघर्षे

---

१ नि० ४. १.६ ।

अस्माल्लिटःकानच् द्विर्वचने शर्पूर्वाःखयइतियकारःशिष्यते धात्वकारस्यलोपोरेफस्यसम्प्रसारणंचपृषोदरादित्वात् चित्त्वादन्तोदात्तत्वम्।सौवश्व्ये स्वश्वइतिजनपदशब्दःक्षत्रियेसंज्ञात्वेनवर्ततेवानामधेयस्यवृद्धसंज्ञायां वृद्धेत्कोसलाजादाञ्ञ्यङितिअपत्यार्थेञ्यङ्प्रत्ययः नय्वाभ्यांपदान्ताभ्यामितिवृद्धिप्रतिषेधः ऐजागमश्च ञित्त्वादाद्युदात्तत्वम्। सुष्विं षुञ्अभिषवे उत्सर्गश्छन्दसीति अस्मात्क्विन्प्रत्ययः लिड्वद्भावाद्द्विर्भावः यणादेशः उवङादेशाभावश्छान्दसः ॥ १५ ॥

१५. इन्द्र अकेले ही शत्रु-विजय कर सकते हैं। वह बहुविध धनों के स्वामी हैं। स्तोताओं के पास इन्द्र ने जिस स्तोत्र की याचना की थी, उसे ही इन्द्र को दिया गया। स्वश्वपुत्र सूर्य के साथ युद्ध के समय सोमाभिषवकारी एतश ऋषि को इन्द्र ने बचाया था।

एवाते॑हारियोजनासुवृक्तीन्द्र॒ब्रह्मा॑णि॒गोत॑मासोअक्रन्।
ऐषु॑वि॒श्वपे॑शसं॒धियं॑धाःप्रा॒तर्म॒क्षूधि॒याव॑सुर्जगम्यात्॥१६॥२९॥

ए॒व। ते॒। हा॒रि॒ऽयो॒ज॒ना। सु॒ऽवृ॒क्ति। इन्द्र॑। ब्रह्मा॑णि। गोत॑मासः। अ॒क्र॒न्। आ। ए॒षु॒। वि॒श्वऽपे॑शसम्। धिय॑म्। धाः॒। प्रा॒तः। म॒क्षु। धि॒याऽव॑सुः। ज॒ग॒म्या॒त्॥ १६॥ २९॥

हर्योरश्वयोर्योजनंयस्मिन्रथेसतथोक्तस्तस्यस्वामित्वेनसम्बन्धीहारियोजनः हेहारियोजनेन्द्र गोतमासोगोतमगोत्रोत्पन्नाऋषयः सुवृक्तिसुष्ठुआवर्जकानिअभिमुखीकरणकुशलानिब्रह्माणिस्तुतिरूपाणिमन्त्रजातानितेत्वैवाक्रन्अकुर्वत एषुस्तोतृषुविश्वपेशसंबहुविधरूपयुक्तंधियंधाः धियालभ्यत्वाद्धीर्धनमुच्यते यद्वा धीशब्दःकर्मवचनः पश्वादिबहुविधरूपंधनमग्निष्टोमादिकंबहुविधरूपंकर्मवाआधाः धेहिस्थापय प्रातः इदानीमिवपरेद्युरपिप्रातःकालेधियावसुः बुद्ध्याकर्मणावाप्राप्तधनइन्द्रः मक्षुशीघ्रंजगम्यात् अस्मद्रक्षणार्थमागच्छतु ॥ एव निपातस्यचेति संहितायांदीर्घः। सुवृक्ति सुपांसुलुगितिशसोलुक्।अक्रन् करोतेर्लुङि मन्त्रेघसह्वरेत्यादिनाच्लेर्लुक् अन्तादेशः तस्यङित्त्वाद्गुणाभावेयणादेशःइतश्चेतीकारलोपेसंयोगान्तलोपेचअडागमः।धाः छन्दसिलुङ्लङ्लिटइतिलोडर्थेलुङि गातिस्थेतिसिचोलुक् बहुलंछन्दस्यमाङ्योगेपीत्यडभावः॥१६॥

१६. अश्वयुक्त-रथेश्वर इन्द्र! तुम्हें यज्ञ में उपस्थित करने के लिए गोतम-गोत्रीय ऋषियों ने स्तुति-रूप मंत्रों को कीर्त्तित किया था या स्मृत किया था। इन्हें बहुविध बुद्धि प्रदान करो। जिन इन्द्र ने बुद्धि-द्वारा धन पाया है, वे ही इन्द्र प्रातःकाल शीघ्र आयें।

वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन्। पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणाचार्येणविरचितेमाधवीयेवेदार्थप्रकाशेऋक्संहिताभाष्येप्रथमाष्टकेचतुर्थोऽध्यायःसमाप्तः ॥ ४ ॥

॥ श्रीगणेशायनमः ॥

यस्यनिःश्वसितंवेदायोवेदेभ्योखिलंजगत् । निर्ममेतमहंवन्देविद्यातीर्थमहेश्वरम् ॥ १ ॥

अथपञ्चमाध्यायआरभ्यते प्रथमेमण्डलेएकादशानुवाकेचत्वारिसूक्तानिगतानि प्रम-न्महइत्येतत्त्रयोदशर्चंपञ्चमंसूक्तं तत्रानुक्रम्यते—प्रसप्तोनेति।अनिरुक्तासंख्याविंशतिरित्युक्तत्वात् सप्तोनेत्युक्तेत्रयोदशेत्युक्तंभवति ऋषिश्चान्यस्मादितिपरिभाषयानोधाऋषिः अनादेशपरिभाषया त्रिष्टुप्छन्दः इन्द्रोदेवता गतःसामान्यविनियोगः विशेषविनियोगस्तुलिङ्गादवगन्तव्यः ।

तत्रप्रथमामृचमाह—

ॐम् प्रमन्महेशवसानायशूषमांगूषंगिर्वणसेअङ्गिरस्वत् ।
सुवृक्तिभिःस्तुवतऋग्मियायार्चामार्कंनरेविश्रुताय ॥१॥

प्र । मन्महे । शवसानाय । शूषम् । आंगूषम् । गिर्वणसे ।
अङ्गिरस्वत् । सुवृक्तिऽभिः । स्तुवते । ऋग्मियाय । अर्चाम ।
अर्कम् । नरे । विऽश्रुताय ॥ १ ॥

शवसानाय शवइतिबलनाम तदिवाचरते यथाबलं शत्रून्हन्तितथाशत्रूणांहन्त्रेत्यर्थः गि-र्वणसे गीर्भिःस्तुतिलक्षणैर्वचोभिःसम्भजनीयाय गिर्वणादेवोभवतिगीर्भिरेनंवनयन्तीतियास्कः । एवम्भूतायेन्द्राय शूषमितिसुखनाम शूषंसुखहेतुभूतम् आङ्गूषस्तोमआघोषइतियास्कः । आङ्गू-षंस्तोमंअङ्गिरस्वत् अङ्गिरसइवप्रमन्महे वयंस्तोतारःप्रकर्षेणावगच्छामः अवगत्यचसुवृक्ति-भिः सुष्टुआवर्जकैः स्तुत्याभिमुखीकरणसमर्थैःस्तोत्रैःस्तुवतेस्तोत्रंकुर्वते ऋषये यइन्द्रः ऋग्मियः अर्चनीयोभवति यद्वा कर्मणिकर्तृप्रत्ययः ऋषिणास्तूयमानायेत्यर्थः नरेसर्वेषांनेत्रे यद्वा नरे यजमानेविश्रुतायप्रहव्यतयाविशेषेणप्रख्यातायएवम्भूतायतस्मैअर्कंमन्त्ररूपंस्तोत्रं अर्कोमन्त्रो-भवतियदनेनार्चन्तीतियास्कः । अर्चाम पूजयामउच्चारयामेत्यर्थः ॥मन्महे मनुअवबोधने तना-दित्वादुप्रत्ययः लोपश्चास्यान्यतरस्यांम्वोरितिमकारादौप्रत्ययेउकारलोपः शवसानाय शवइत्याच-

१ नि० ६. १४. । २ नि०५. ११. । ३ नि० ५. ४. ।

रविशवस्यते अस्मात्लटःशानच् बहुलंछन्दसीतिशपोलुक् शानचश्छन्दस्युभयथेतिआर्धधातुकत्वात् अतोलोपयलोपौ चितइत्यन्तोदात्तत्वं ननु क्यङोङित्वात्तास्यनुदात्तेदितिशानचोनुदात्तेनभवितव्यं एवंतर्हिताच्छीलिकश्चानश् तस्यसार्वधातुकत्वेपिलसार्वधातुकत्वाभावात् चित्स्वरएवशिष्यते।आङ्गूषं आङ्पूर्वाद्घुषेः पचाद्यचिघोइत्यस्यगूआदेशः पृषोदरादित्वादाङोङकारस्येत्वंशाभावश्छान्दसः चित्स्वरेणोत्तरपदस्यान्तोदात्तत्वेकृदुत्तरपदप्रकृतिस्वरत्वम् घनिवाथाथादिनोत्तरपदान्तोदात्तत्वम्।गिर्वणसे गृशब्दे सम्पदादिलक्षणोभावेक्विप् ऋतइद्धातोरितीत्वम् गीर्भिर्वन्यते सम्भज्यतेइतिगिर्वणाः औणादिकःकर्मण्यसुन् संज्ञापूर्वकस्यविधेरनित्यत्वात् हलिचेतिदीर्घाभावःगतिकारकयोरपिपूर्वपदप्रकृतिस्वरत्वंचेतिवचनात्पूर्वपदप्रकृतिस्वरत्वम्।अङ्गिरस्वत् तेनतुल्यमितिवतिः नभोंगिरोमनुषांवत्युपसंख्यानमितिभसंज्ञायांरुत्वाद्यभावः प्रत्ययस्वरः। सुवृक्तिभिः वृजीवर्जने भावेक्तिन् तितुत्रेतीट्प्रतिषेधः शोभनमावर्जनंयेषां नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् ननु क्तिन्नन्तस्योत्तरपदस्याद्युदात्तत्वादाद्युदात्तंद्व्यच्छन्दसीतिवचनादुत्तरपदाद्युदात्तत्वंप्राप्नोति एवंतर्हितत्पुरुषोस्तु शोभनमावर्जितोभवत्येभिरितिसुवृक्तयःस्तोत्राणि करणेक्तिन् तादौचनितीतिगतेःप्रकृतिस्वरत्वे प्राप्ते मन्क्तिन्नित्यादिनाकारकादुत्तरस्यक्तिनोविहितमुत्तरपदान्तोदात्तत्वंअकारकादपिव्यत्ययेन भवति । स्तुवते शतुरनुमइतिविभक्तेरुदात्तत्वम्। ऋग्मियाय एकाचोनित्यंमयटमिच्छन्तीतिऋक्शब्दाद्विकारार्थेमयट् स्वादिष्वसर्वनामस्थानेइतिपदसंज्ञायांकुत्वजश्त्वे व्यत्ययेनेत्वम् यद्वा ऋचस्तुतावित्यस्माद्भावेमक् बहुलवचनात्कुत्वंजश्त्वंच।ऋग्मियाय ऋग्मंस्तुतिमर्हतीतिऋग्मियः अर्हार्थेघच् चितइत्यन्तोदात्तत्वम्। अर्चाम अर्चपूजायांभौवादिकः शपःपित्वादनुदात्तत्वम् तिङश्चलसार्वधातुकस्वरेणधातुस्वरःशिष्यते।अर्कं अर्च्यतेनेनेत्यर्कःपुंसिसंज्ञायांघःप्रायेणेतिघप्रत्ययः चजोःकुघिण्ण्यतोरितिकुत्वम् । नरे नृशब्दाच्चतुर्थ्येकवचनेगुणश्छान्दसः। विश्रुताय श्रुश्रवणे कर्मणिनिष्ठा गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम्॥ १ ॥

१. वीर्यशाली और स्तव-पात्र इन्द्र को लक्ष्य कर हम, अङ्गिरा की तरह, मन में कल्याणवाहिनी स्तुति धारण करते हैं। इन्द्र शोभन स्तोत्र-द्वारा स्तुति-कर्त्ता ऋषि के पूजा-पात्र हैं। उन प्रसिद्ध नेता की, हम स्तोत्र-द्वारा पूजा करते हैं।

द्वितीयामृचमाह—

प्रवोम॒हेमहि॒नमो॑भरध्वमांगू॒ष्यं॑शवसा॒नाय॒साम॑ ।
येनो॑नः॒पूर्वे॑पि॒तरः॑पद॒ज्ञाअर्च॑न्तो॒अङ्गि॑रसो॒गाअवि॑न्दन् ॥२॥

प्र । व॒ः । म॒हे । महि॑ । नमः॑ । भर॒ध्व॒म् । आ॒ङ्गू॒ष्य॑म् । श॒व॒सा॒नाय॑ । साम॑ । येन॑ । न॒ः । पूर्वे॑ । पि॒तरः॑ । प॒द॒ऽज्ञाः । अर्च॑न्तः । अङ्गि॑रसः । गाः । अवि॑न्दन् ॥ २ ॥

हेऋत्विजोवोयूयं महेमहते शवसानायबलमिवाचरते अतिबलायेत्यर्थः उत्तरवाक्येय-च्छब्दश्रुतेस्तच्छब्दाध्याहारः एवम्भूताय तस्माइन्द्रायमहिमहत्प्रौढंनमःस्तोत्रंप्रभरध्वं प्रकर्षेणसंपादयत किंतत्स्तोत्रमित्याह आंगूष्यंसाम आघोषयोग्यंरथन्तरादिसाम तन्निष्पाद्यता-मित्यर्थः अभिंत्वाशूरेत्यादिष्वृक्षुयद्गानं तस्यसामेत्याख्या तथाचोक्तं—गीतिषुसामाख्येति[1] । ये-नेन्द्रेणनोस्माकंपितरः पितृविशेषाः पूर्वेपूर्वपुरुषाः अङ्गिरसः पणिनाम्नासुरेणापहृतानांगवांप-दज्ञाः मार्गज्ञाःसन्तः अतएवार्चन्तस्तंपूजयन्तोगाअविन्दन् अलभन्त॥वः प्रथमार्थेद्वितीया । प-दज्ञाः पदानिजानन्तीति आतोनुपसर्गेकइतिकः आतोलोपइटिचेत्याकारलोपः । अविन्दन् वि-द्लृलाभे शेमुचादीनामितिनुमागमः ॥ २ ॥

२. तुम लोग उस विशाल और बलवान् इन्द्र को उद्देश कर महान् और ऊँचे स्वर से गाये जानेवाले स्तोत्र अर्पित करो। इन्द्र की सहायता से हमारे पूर्व-पुरुष अङ्गिरा लोगों ने, पद-चिह्न देखते हुए, अर्चना-पूर्वक, पणि नाम के असुर-द्वारा अपहृत गौ का उद्धार किया था।

तृतीयामृचमाह—

इन्द्रस्याङ्गिरसांचेष्टौविदत्सरमातनंयायधासिम् ।
बृहस्पतिर्भिनदद्रिंविदद्गाःसमुस्रियाभिर्वावशन्तनरः ॥३॥

इन्द्रस्य । अङ्गिरसाम् । च । इष्टौ । विदत् । सरमा । तनयाय ।
धासिम् । बृहस्पतिः । भिनत् । अद्रिम् । विदत् । गाः । सम् ।
उस्रियाभिः । वावशन्त । नरः ॥ ३ ॥

अत्रेदमाख्यानम्—सरमानामदेवशुनीपणिभिर्गोष्वपहृतासुतदन्वेषणायतांसरमांइन्द्रःप्राहै-षीत् यथालोकेव्याधोवनान्तर्गतमृगान्वेषणायश्वानंविसृजतितद्वत् सासरमैवमवोचत् हेइन्द्र अ-स्मदीयायशिशवेतद्गोसबन्धिक्षीराद्यन्नंयदिप्रयच्छसितर्हिगमिष्यामीति सतथेत्यब्रवीत् तथाचशा-ट्यायनकम्—अन्नादिनींतेसरमेप्रजांकरोमियानोगाअन्वविन्दइति[2] । ततोगत्वागवांस्थानमज्ञासी-त् ज्ञात्वाचास्मैन्यवेदयत् तथानिवेदितासुगोषुतमसुरंहत्वातागाःसइन्द्रोलभतेति । अयमर्थोस्यां प्रतिपाद्यते इन्द्रस्याङ्गिरसामृषीणांचइष्टौप्रेषणेसतिसरमादेवशुनीतनयायस्वपुत्रायधासिमन्नंवि-दत् अविन्दत् धासिरित्यन्ननाम धासिःइरेतितन्नामसुपाठात् तयागोषुनिवेदितासुबृहस्पतिः बृह-तांदेवानामधिपतिरिन्द्रः अद्रिंअत्तारमसुरं भिनदवधीत् तेनापहृतागाःविददलभत ततोनरोनेता-रोदेवाःउस्रियाभिःगोभिःसह उस्रियेतिगोनाम संवावशन्तभृशंहर्षशब्दमकुर्वन् यद्वा गोभिःसाध-नभूताभिःतदीयंक्षीरादिकमकामयन्तसमगच्छन्तेत्यर्थः ॥ इष्टौ इषगतावित्यस्मात्भावेक्तिनि म-न्त्रेवृषेतिक्तिनउदात्तत्वम् । विदत् विद्लृलाभे लृदित्वादङ् बहुलंछन्दस्यमाङ्योगेपीत्यडभावः

१ ऋ० सं० ५. ३. २१. । २ जैमि० अ० २. ५. ।

अङएवस्वरःशिष्यते पादादित्वान्निघाताभावः। सरमा सरमासरणादितियास्कः। सर्तेरौणादिकोऽमप्रत्ययः। धासिं धेट्पाने धीयतेपीयतेइतिधासिः औणादिकःसिप्रत्ययः यद्वा दधातेःपोषणार्थात् सिप्रत्ययः। बृहस्पतिः तद्बृहतोःकरपत्योश्चोरदेवतयोःसुट्तलोपश्चेतिसुडागमःतलोपश्च बृहच्छब्दोन्तोदात्तः तस्यकेचिदाद्युदात्तत्वंवर्णयन्तीत्युक्तम् पतिशब्दोडतिप्रत्ययान्तआद्युदात्तः अतउभेवनस्पत्यादिषुइतिपूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम्। उस्रियाभिः निवसत्यस्यांक्षीरादिकमितिउस्रागौः वसनिवासेइत्यस्मात् स्फायितंचीत्यादिनाअधिकरणेरक् वचिस्वपीत्यादिना सम्प्रसारणम् उस्राशब्दात्स्वार्थेपृषोदरादित्वेनघप्रत्ययइतिनिघण्टुभाष्यम् घस्येयादेशः प्रत्ययस्वरः। वावशन्त वाशृशब्दे अस्माद्यङन्ताल्लङ्झिस्यान्तादेशेसति तस्य छन्दस्युभयथेतिआर्धधातुकत्वात् अतोलोपयलोपौ व्यत्ययेनधातोर्ह्रस्वत्वम् यद्वा वशकान्तावित्यस्माद्यङि नवशइतिसम्प्रसारणेप्रतिषिद्धेपूर्ववत्प्रक्रिया ॥ ३ ॥

३. इन्द्र और अङ्गिरा के गौ खोजते समय सरमा नाम की कुतिया ने, अपने बच्चे के लिए, इन्द्र से अन्न या दुग्ध प्राप्त किया था। उस समय इन्द्र ने असुर का वध कर गौ का उद्धार किया था। देवों ने भी गायों के साथ आह्लादकर शब्द किया था।

चतुर्थीमृचमाह—

ससुष्टुभासस्तुभासप्तविप्रैःस्वरेणाद्रिंस्वर्योऽनवग्वैः।
सरण्युभिःफलिगमिन्द्रशक्रवलंरवेणदरयोदशग्वैः ॥४॥

सः। सुऽस्तुभा। सः। स्तुभा। सप्त। विप्रैः। स्वरेण। अद्रिम्। स्वर्यः। नवऽग्वैः। सरण्युऽभिः। फलिऽगम्। इन्द्र। शक्र। वलम्। रवेण। दरयः। दशऽग्वैः ॥ ४ ॥

अङ्गिरसोद्विविधाः सत्रयागमनुतिष्ठन्तोयेनवभिर्मासैःसमाप्यगतास्तेनवग्वाः नवग्वानवनीतगतयइतियास्कोव्याचख्यौ। येतुदशभिर्मासैःसमाप्यजग्मुस्तेदशग्वाः तादृशैरुभयविधैर्विप्रैर्मेधाविभिः सरण्युभिः सरणंशोभनांगतिमिच्छद्भिः सप्त सप्तसंख्याकैः सप्तहत्रमेधातिथिप्रभृतयोङ्गिरसोदृश्यन्ते एवंभूतैरङ्गिरोभिः सुष्टुभा शोभनस्तोभयुक्तेनस्वरेणउदात्तादिश्रव्यस्वरोपेतेन यद्वा मन्द्रमध्यमादिस्वरेणस्तुभास्तोत्रेणस्वर्यः सुष्ठुमाप्यः यद्वा शब्दनीयःस्तुत्यइत्यर्थः हेशक्र शक्तिमन्निन्द्र एवम्भूतःसत्वं अद्रिंआदरणीयंवज्रेणछेत्तव्यमित्यर्थः फलिगं प्रतिफलंप्रतिबिंबंतदस्मिन्नस्तीतिफलिस्वच्छमुदकं तद्गच्छत्याधारत्वेनेतिफलिगः यद्वा व्रीह्यादिफलंतदस्मिन्सतिभवतीतिफलिवृष्टिजलं तद्गच्छतीतिफलिगः एवम्भूतंवलंमेघंरवेणआत्मीयेनशब्देनदरयःअभाययः

१ नि० ११. २४। २ नि० ११. १९।

त्वदीयशब्दश्रवणमात्रेणमेघोविभेतीत्यर्थः यद्वा अद्रिः पर्वतःअद्यतेस्मिन्पटलादिकमितिअद्रिः फलिगोमेघः फलिगः उपलइतितन्नामसुपाठात् वलोसुरः देवावैवलेगाःपर्यपश्यन्नित्यादावसुरे प्रयुक्तत्वात् एतेत्रयोपित्वदीयशब्दश्रवणमात्रेणअविभयुरित्यर्थः॥ सइत्येकःपादपूरणः। सुष्टु- भा स्तोभतिःस्तुतिकर्मा संपदादिलक्षणोभावेक्विप् शोभनःस्तुप् स्तोभोयस्य नञ्सुभ्यामित्युत्त- रपदान्तोदात्तत्वम् उपसर्गात्सुनोतीतिषत्वम्।स्तुभा करणभूतस्यापिस्तोत्रस्यस्वव्यापारेकर्तृत्वात् स्तोभतिस्तौतीति क्विप्चेतिकर्तरिक्विप् सावेकाचइतिविभक्तेरुदात्तत्वम्। सप्त सुपांसुलुगितिभिसो- लुक्। स्वर्यः स्वृशब्दोपतापयोः ऋहलोर्ण्यदितिण्यत् वृद्ध्यभावश्छान्दसः तित्स्वरितमितिस्वरित- त्वम् नवग्वैः नवशब्दउपपदेगमेर्भावेक्विपि गमःक्वावितिअनुनासिकलोपे ऊङ्चगमादीनामितिव- क्तव्यमितिऊकारान्तादेशः नवभिर्गूर्गमनंयेषांतेनवग्वाः अकारोपजनश्छान्दसः यद्वा गमेर्भावे ड्वप्रत्ययः पूर्ववद्बहुव्रीहिः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्।सरण्युभिः सरणमात्मनइच्छन्तःसरण्य- वः क्यचि अन्त्यलोपश्छान्दसः क्याच्छन्दसीत्युः। फलिगं फल्युदकंगच्छतीतिफलिगःडोन्य- त्रापिदृश्यतइतिगमेर्डः। वलं वृणोतीतिवलः पचाद्यच् कपिलकादित्वाल्लत्वम्। दरयः दृवि- दारणे वृद्धौकृतायां दृभयेइतिघटादिषुपाठान्मित्त्वे मितांह्रस्वइतिह्रस्वत्वम्॥ ४॥

४. सर्वशक्तिमान् इन्द्र! जिन्होंने नौ महीनों में यज्ञ समाप्त किया है और जिन्होंने दस महीनों में यज्ञ समाप्त किया है—ऐसे सप्तसंख्यक और सद्गति-कामी (अङ्गिरोवंशीय) मेधावियों के सुख- कर-स्वर-युक्त स्तोत्रों से तुम स्तुत किये गये हो। तुम्हारे शब्द से पर्वत और मेघ भी डर जाते हैं।

पञ्चमीमृचमाह—

गृणानोअङ्गिरोभिर्दस्मविवरुषसासूर्येणगोभिरन्धः।
विभूम्याअप्रथयइन्द्रसानुदिवोरजउपरमस्तभायः॥५॥१॥

गृणानः अङ्गिरःऽभिः। दस्म। वि। वः। उषसा। सूर्येण। गोभिः। अन्धः। वि। भूम्याः। अप्रथयः। इन्द्र। सानु। दिवः। रजः। उपरम्। अस्तभायः॥ ५॥ १॥

हेदस्मदर्शनीयशत्रूणामुपक्षपितर्वेन्द्र त्वंअङ्गिरोभिर्ऋषिभिर्गृणानःस्तूयमानःसन् उषसासू- र्येणचसहगोभिःकिरणैःअन्धः अन्धकारंविवः व्यवृणोः व्यनाशयइत्यर्थः तथाहेइन्द्र त्वंभू- म्याःपृथिव्याः सानुसमुच्छ्रितप्रदेशंव्यप्रथयः विशेषेणविस्तीर्णमकरोः विषमामिमांसमीकृतवानि- त्यर्थः तथा दिवोन्तरिक्षस्य रजः रजसोलोकस्यउपरं उपरंमूलप्रदेशंअस्तभायःअस्तभ्नाः यथान्त- रिक्षलोकस्यमूलंदृढंभवतितथाकार्षीरित्यर्थः॥ गृणानः कर्मणिलटःशानचियक्प्राप्तेव्यत्ययेन

१ ऐ० ब्रा० ६. २४.।

श्रा प्यादीनांह्रस्वइतिह्रस्वत्वम् चित्स्वरेणान्तोदात्तत्वम्। दस्म दसुउपक्षये इषियुधीन्धिदसीत्यादिनामक्। वः वृञ्वरणे लुङिसिपि मन्त्रेघसेत्यादिनाच्लेर्लुक् गुणेहल्ङ्याब्भ्यइतिसलोपः बहुलंछन्दस्यमाङ्योगेपीत्यडभावः। अन्धः तमोप्यन्धउच्यतेनास्मिन्ध्यानंभवतीतियास्कः। रजः लोकारजांस्युच्यन्तइत्युक्तत्वात् रजःशब्दोलोकवचनः सुपांसुलुगितिषष्ठ्यालुक्। अस्तभायः लङिस्तंभुस्तुंभ्वित्यादिनाश्नाप्रत्ययः छन्दसिशायजपीतिअहावपिव्यत्ययेनश्नाप्रत्ययस्यशायजादेशः अनिदितामितिनलोपः अडागमः॥ ५॥

५. सुवृश्य इन्द्र! अङ्गिरा लोगों के द्वारा स्तुत होकर तुमने उषा और सूर्य की किरणों से अन्धकार का विनाश किया है। इन्द्र! तुमने पृथिवी का ऊबड़खाबड़ प्रदेश समतल और अन्तरिक्ष का मूल प्रदेश दृढ़ किया है।

॥ इतिप्रथमस्यपञ्चमेप्रथमोवर्गः॥ १ ॥

प्रवर्ग्येअभिष्टवे तदुप्रयक्षतममित्येषा अथोत्तरमित्यत्रसूत्रितम्—तदुप्रयक्षतममस्यकर्मात्मन्वन्नभोदुहतेघृतंपयइति।

तामेतांसूक्तेषष्ठीमृचमाह—

तदु॒प्रय॑क्षतममस्य॒कर्म॑द॒स्मस्य॒चारु॑तमम॒स्ति॒दंसः॑।
उ॒प॒ह्व॒रेयदु॒प॑रा॒अपि॑न्व॒न्मध्व॑र्णसो॒न॒द्य॑१श्चत॑स्रः॥६॥

तत्। ऊ॒म् इति॑। प्रय॑क्षऽतमम्। अ॒स्य॒। कर्म॑। द॒स्मस्य॑। चारु॑ऽतमम्। अ॒स्ति॒। दंसः॑। उ॒प॒ऽह्व॒रे। यत्। उप॑राः। अपि॑न्वत्। मधु॑ऽअर्णसः। न॒द्यः॑। चत॑स्रः॥ ६ ॥

दस्मस्य दर्शनीयस्यास्येन्द्रस्यतदुतदेवकर्मप्रयक्षतमंअतिशयेनपूज्यं दंसइतिकर्मनाम दंसस्तदेवकर्मचारुतममतिशयेनशोभनंअस्ति किंतदित्यतआह अयमिन्द्रः उपह्वरे उपह्वर्तव्येगन्तव्ये पृथिव्याःसम्बन्धिनिसमीपदेशेउपराःउप्ताःस्थापिताः मध्वर्णसःमधुरोदकाः चतस्रोनद्यःप्रधानभूताः गङ्गादिनदीः अपिन्वत् असिञ्चत्इतियदेतत्कर्मतदन्येनकर्तुमशक्यत्वात्पूज्यमित्यर्थः॥प्रयक्षतमं यक्षपूजायाम् यक्ष्यतइतियक्षः अतिशयेनयक्षोयक्षतमः पुनःप्रादिसमासे अव्ययपूर्वपदप्रकृतिस्वरत्वम्।दंसः दसिदंसनदर्शनयोः चुरादिरात्मनेपदी दंस्यतेकर्तव्यतयादश्यतइतिदंसःकर्म औणादिकःकर्मण्यसुन्। उपह्वरे ह्वृकौटिल्ये कौटिल्यलक्षणगतिवाचिनात्रगतिमात्रंलक्ष्यते उपह्वरन्तिगच्छन्त्यस्मिन्नद्यइतिउपह्वरोभूप्रदेशः पुंसिसंज्ञायांघःप्रायेणेत्यधिकरणेघप्रत्ययः गुणः ऋ-

१ १ नि० ५. १।

दुत्तरपदप्रकृतिस्वरत्वम् । अपिन्वत् पिवि सेचने भौवादिकः । चतस्रः शस् त्रिचतुरोःस्त्रियांतिसृ-चतसृइतिचतुर्शब्दस्यचतसृादेशः आद्युदात्तोनिपातितः पूर्वसवर्णदीर्घेप्राप्तेअचिरऋतइतिरेफादेशः चतुर्शब्दस्याद्युदात्तत्वात् स्थानिवद्भावेनचतसृादेशस्याद्युदात्तत्वेसिद्धेपिपुनराद्युदात्तनिपातनसामर्थ्याद्यणादेशस्यवापूर्वविधौस्थानिवद्भावाच्चतुरःशसीत्यन्तोदात्तत्वस्याभावः नच नपदान्तेतिस्थानिवद्भावप्रतिषेधः स्वरदीर्घयलोपेषुलोपाजादेशएवनस्थानिवत् अन्यत्रतुस्थानिवदेवेतिनियमात् ॥ ६ ॥

६. पृथिवी की मधुर-जलपूर्ण नदियों को जो इन्द्र ने जलपूर्ण किया है, वह उन दर्शनीय इन्द्र का अत्यन्त पूज्य और सुन्दर कर्म है।

सप्तमीमृचमाह—

द्विताविवव्रेसनजासनीळेअयास्यःस्तवमानेभिरर्कैः ।
भगोनमेनेपरमेव्योमन्नधारयद्रोदसीसुदंसाः ॥७॥

द्विता । वि । वव्रे । सनऽजा । सनीळे इति सऽनीळे । अयास्यः । स्तवमानेभिः । अर्कैः । भगः । न । मेने इति । परमे । विऽओमन् । अधारयत् । रोदसी इति । सुऽदंसाः ॥ ७ ॥

अयास्यः यासःप्रयत्नः तत्साध्योयास्यः नयास्यःअयास्यःयुद्धरूपैःप्रयत्नैः साधयितुमशक्यइत्यर्थः कथंसाध्यतइत्यतआह—स्तवमानेभिः स्तोत्रंकुर्वद्भिः पुरुषैःअर्कैः स्तुतिरूपैर्मन्त्रैः स्तूयमानःसन्निन्द्रः सुसाध्योभवति यद्वा अयास्यः पञ्चवृत्तिर्मुख्यःप्राणः सहिआस्यान्मुखादयतेगच्छतिनिष्क्रामतितदुपासकोप्यङ्गिराः उपचारादयास्यउच्यते तथाच छन्दोगैराम्नातम्—तंहायास्यउद्गीथमुपासांचक्रे एतमुएवायास्यंमन्यन्तेआस्याद्यदयतेतेनेति । अथवा अयमास्येमुखेवर्ततइत्ययास्यः तथाचवाजसनेयकम्—तेहोचुःक्वनुसोभूद्योनइत्थमसक्तेत्ययमास्यान्तरितीतिपूर्ववदुपासकोप्ययास्यः तेनऋषिणा स्तवमानेभिः गुणिनिष्ठगुणाभिधानलक्षणांस्तुतिंकुर्वद्भिरर्कैर्मन्त्रैःकरणभूतैःस्तूयमानःसन् सनजा सनेतिनिपातोनित्यार्थः नित्यजातेसर्वदाविद्यमानस्वभावइत्यर्थः प्रथमभावविकारवाचिनाजनिनाद्वितीयोभावविकारःसत्तालक्ष्यते यथाऔत्पत्तिकस्तुशब्दस्यार्थेनसम्बन्धइति[1]। औत्पत्तिकमितिनित्यंब्रूमइतिहितद्भाष्यं सनीळे समानंनीडंओकोनिवासस्थानंययोस्तेसंलग्नेइत्यर्थः एवंविधेद्यावापृथिव्यौद्विताद्विधाविवव्रेविवृतेअकरोत् भेदेनास्थापयदित्यर्थःमेनेमननीयेपरमेउत्कृष्टे व्योमन्विविधलक्षणेनभसिवर्तमानोभगोन सूर्यइव सुदंसाः शोभनकर्मेन्द्रः रोदसीद्यावापृथिव्यावधारयदपोषयत् यद्वा मेनेतिस्त्रीनाम तथाचया-

1 जैमि० अ० १. सू० ५ ।

स्कः—मेनाग्नाइतिस्त्रीणांमेनामानयन्त्येनाइति । स्त्रीरूपमापन्नेरोदसीइन्द्रः अपुषदित्यर्थः ॥ द्विता द्विधेत्यस्यधकारस्यतकारश्छान्दसः । सनजा जनीप्रादुर्भावे अस्माद्भावे अन्येष्वपिदृश्यतइतिदृशिग्रहणस्यसर्वोपाधिव्यभिचारार्थत्वात्केवलादपिजनेर्डप्रत्ययः सनानित्यंजोजननंययोस्ते सनजे पूर्वपदस्यह्रस्वश्छान्दसः एवमादित्वादन्तोदात्तत्वम् तदेवबहुव्रीहिस्वरेणशिष्यते सुपांसुलुगितिविभक्तेराकारः । अयास्यः यसुप्रयत्ने यासःप्रयत्नः तत्रभवोयास्यः भवेच्छन्दसीतियत् नयास्यः अयास्यः परादिश्छन्दसिबहुलमित्युत्तरपदाद्युदात्तत्वम् श्रुत्युक्तनिर्वचनेतुपृषोदरादित्वादभिमतरूपस्वरसिद्धिः । मेने सप्तम्येकवचनस्यसुपांसुलुगितिशेआदेशः शेइतिप्रगृह्यत्वम् यद्वा मन्यतइतिमेना पचाद्यच् नशिमन्योरलिट्येत्वंवक्तव्यमित्येत्वम् ततष्टाप् द्विर्वचने ईदूदेद्विवचनंप्रगृह्यमितिप्रगृह्यत्वम् । सुदंसाः दंसइतिकर्मवाचीअसुन्प्रत्ययान्तआद्युदात्तः बहुव्रीहौआद्युदात्तंद्व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वम् ॥ ७ ॥

७. जिस इन्द्र को युद्धरूप प्रयत्न[1] से नहीं पाया जा सकता, स्तोताओं की स्तुति-द्वारा पाया जा सकता है, उन्हीं इन्द्र ने एकत्र संलग्न द्यौ और पृथिवी को अलग-अलग करके स्थित किया है; उन्हीं शोभन-कर्मा इन्द्र ने सुन्दर और उत्तम आकाश में, सूर्य की तरह, द्यौ और पृथिवी को धारण किया है।

अष्टमीमृचमाह—

सनाद्दिवंपरिभूमाविरूपेपुनर्भुवायुवतीस्वेभिरेवैः ।
कृष्णेभिरक्तोषारुशद्भिर्वपुर्भिराचरतोअन्यान्या ॥८॥

सनात् । दिवम् । परि । भूम । विरूपे इति विऽरूपे । पुनःऽभुवा । युवती इति । स्वेभिः । एवैः । कृष्णेभिः । अक्ता । उषाः । रुशत्ऽभिः वपुःऽभिः । आ । चरतः । अन्याऽअन्या ॥ ८ ॥

विरूपेशुक्लकृष्णतयाविषमरूपेपुनर्भुवा पुनःपुनःप्रतिदिवसंजायमानेयुवतीतरुण्यौराम्युषसोःसर्वदैकरूप्यात् एवम्भूतेरात्र्युषसौदिवंद्युलोकंभूमाभूमिंचसनात्चिरकालादारभ्यस्वेभिरेवैः स्वकीयैर्गमनैःपरिचरतः पर्यावर्तेते अयमेवार्थःस्पष्टीक्रियते—अक्तारात्रिःकृष्णेभिरन्धकाररूपैर्वर्णैरुपलक्षिताउषाश्चरुशद्भिर्दीप्यमानैर्वपुर्भिःस्वशरीरभूतैस्तेजोभिरुपलक्षिताअन्यान्यापरस्परव्यतिहारेणआचरतः आवर्तेते हेइन्द्र एतत्सर्वंत्वयैवकार्यते त्वदधीनत्वात्सर्वासांदेवतानामित्यर्थः॥ भूम सुपांसुलुगितिद्वितीयायाडादेशः छान्दसोह्रस्वः।एवैः इण्गतौ इण्शीङ्भ्यांवन्निविभावेवन्प्रत्ययः नित्वादाद्युदात्तत्वम् । अक्ता नक्तेतिरात्रिनाम नलोपश्छान्दसः। वपुर्भिः अर्तिपृवपीत्या-

---

[1] नि० ३. २१.।

दिनाउत् नित्त्वादाद्युदात्तः। अन्यान्या कर्मव्यतिहारेसर्वमाम्रेद्वेभवतइतिवक्तव्यम् समासवच्च-बहुलमितिद्विर्भावे तस्यपरमाम्रेडितमित्याम्रेडितसंज्ञायामनुदात्तंचेत्याम्रेडितस्यानुदात्तत्वम् ॥८॥

८. विषम-रूपिणी, प्रतिदिन सञ्जायमाना और तरुणी रात्रि तथा उषा, द्यावा-पृथिवी पर, सदा से आ-आकर विचरण करती हैं। रात्रि काली और उषा तेजोमयी है।

सनेमिसख्यंस्वपस्यमानःसूनुर्दाधारशवसासुदंसाः।
आमासुचिद्दधिषेपक्कमन्तःपयःकृष्णासुरुशद्रोहिणीषु ॥९॥

सनेमि। सख्यम्। सुऽअपस्यमानः। सूनुः। दाधार। शवसा। सुऽदंसाः। आमासु। चित्। दधिषे। पक्कम्। अन्तरिति। पयः। कृष्णासु। रुशत्। रोहिणीषु ॥ ९ ॥

स्वपस्यमानः स्वपःशोभनंकर्मतदिवाचरन्शवसाशवसोबलस्यसूनुःपुत्रःअतिबलवानित्यर्थः सुदंसाः शोभनयागादिकर्मयुक्तःएवम्भूतइन्द्रः सख्यंयजमानानांसखित्वंसनेमिपुराणंदाधारधारयतिपोषयतीत्यर्थः सनेमीतिपुराणनाम प्रवयाः सनेमीतिपाठात् किञ्च आमासुचित् आर्द्रास्वपरिपक्कासुगोषुचअन्तर्मध्येपक्कंपरिपक्कंपयोदधिषेधारयसि तथाकृष्णासुकृष्णवर्णासुरोहिणीषुलोहितवर्णासुचगोषुतद्विपरीतंरुशद्दीप्यमानंश्वेतवर्णपयोदधिषे ॥ सख्यं सख्युर्भावःसख्यं सख्युर्यइतियः प्रत्ययस्वरः।दाधार धृञ्धारणे तुजादित्वादभ्यासस्यदीर्घत्वम्। पक्कं पचोवइतिनिष्ठातकारस्यवत्वम्। रोहिणीषु रुहबीजजन्मनिप्रादुर्भावेच रुहेश्चलोवेतीतन्प्रत्ययान्तोरोहितशब्दआद्युदात्तोवर्णवाची वर्णादनुदात्तात्तोपधाचोनइतिङीप् तत्सन्नियोगेनतकारस्यनकारादेशश्च ङीपःपित्त्वादनुदात्तत्वेप्रातिपदिकस्वरएवशिष्यते ॥ ९ ॥

९. शोभन-कर्म-कर्त्ता, अतीव बली और उत्तम कर्म से सम्पन्न इन्द्र यजमानों से, पहले से, मित्रता करते आते हैं। इन्द्र, तुमने अपरिपक्व गायों को भी दूध दान किया है और कृष्ण तथा लोहित वर्णोंवाली गायों में भी शुक्लवर्ण का दूध दान किया है।

सनात्सनीळाअवनीरवाताव्रतारक्षन्तेअमृताःसहोभिः।
पुरूसहस्राजनयोनपत्नीर्दुवस्यन्तिस्वसारोअह्रयाणम् ॥१०॥२॥

सनात्। सऽनीळाः। अवनीः। अवाताः। व्रता। रक्षन्ते। अमृताः। सहःऽभिः। पुरु। सहस्रा। जनयः। न। पत्नीः। दुवस्यन्ति। स्वसारः। अह्रयाणम् ॥ १० ॥ २ ॥

सनाच्चिरकालादारभ्य सनीळाः समाननिवासस्थानाः अवाताःवातंगमनंतद्रहिताः एकपाण्यवस्थानाव् अवनयइत्यङ्गुलिनाम एवम्भूताः अवनीरङ्गुलयः पुरुपुरूणिबहूनिसहस्राअसंख्यातानिव्रतावतानिइन्द्रसम्बन्धीनिकर्माणि अमृताःपुनःपुनःकरणेपिआलस्यरहिताः सत्यःसहोभिरात्मीयैर्बलैरक्षन्तेपालयन्ति अपिच स्वसारःस्वयमेवसरत्योङ्गुलयः पत्नीःपालयित्र्यः अह्रयाणंलज्जारहितंमगल्भमित्यर्थः यद्वा अह्रीतयानंप्रशस्तगमनमिन्द्रं जनयोन जनयइतिदेवानांपत्न्य उच्यन्ते देवानांवैपत्नीर्जनयइतिश्रुतेः। ताइवदुवस्यन्तिपरिचरन्तिअञ्जलिबन्धनेनेन्द्रंप्रीणयन्तीत्यर्थः ॥ अवनीः अवनयोङ्गुलयोभवन्त्यवन्तिकर्माणीतियास्कः। सुपांसुलुगितिजसःपूर्वसवर्णदीर्घत्वम्।अवाताः वागतिगन्धनयोः असिहसीत्यादिनाभावेतन्प्रत्ययः बहुव्रीहौनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्।व्रता शेश्छन्दसिबहुलमितिशेर्लोपः। दुवस्यन्ति दुवस्यतिः परिचरणकर्मा कण्ड्वादिः अतोयकएवस्वरःशिष्यते पादादित्वान्निघाताभावः। अह्रयाणं ह्रीलज्जायाम् बहुलंछन्दसीतिश्लोरभावः व्यत्ययेनशानच् मुगभावश्छान्दसः नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वम् यद्वा बहुलंछन्दसीतिशपोलुकि छन्दस्युभयथेतिशानचआर्धधातुकत्वेनङित्त्वाभावेगुणायादेशौ पूर्ववत्समासस्वरौ। यास्कस्त्वेवंव्याख्यत्—अह्रयाणोह्रीतयानइति ॥ १० ॥

१०. जिन गति-विहीन उँगलियों ने, सदा सन्नद्ध होकर स्थिति करने पर भी, निरालसी बनकर, अपने बल पर, हजारों व्रतों का पालन किया है या इन्द्र का व्रत अनुष्ठित किया है, वे ही सेवा-तत्परा अँगुलीरूपिणी भगिनी लोग पत्नी या पालयित्री की तरह प्रगल्भ इन्द्र की सेवा करती हैं। ॥ इतिप्रथमस्यपञ्चमेद्वितीयोवर्गः ॥ २॥

एकादशीमृचमाह—

सनायुवोनमसानव्योअर्कैर्वसूयवोमतयोदस्मदद्रुः।
पतिंनपत्नीरुशतीरुशन्तंस्पृशन्तित्वाशवसावन्मनीषाः ॥११॥

सनाऽयुवः। नमसा। नव्यः। अर्कैः। वसुऽयवः। मतयः। दस्म। दद्रुः। पतिम्। न। पत्नीः। उशतीः। उशन्तम्। स्पृशन्ति। त्वा। शवसाऽवन्। मनीषाः ॥ ११ ॥

हेदस्मदर्शनीयेन्द्र अर्कैःशस्त्ररूपैर्मन्त्रैर्नमसानमस्कारेणयस्त्वंनव्यः स्तुत्योभवसि सनायुवःसनातनंअग्निहोत्रादिनित्यंकर्मआत्मनइच्छन्तः वसूयवोवसुधनमात्मनइच्छन्तोधनकामावामतयोमेधाविनस्त्वांदद्रुःबहुनाप्रयासेनजग्मुः हेशवसावन्बलवन्निन्द्र तैःप्रयुक्तामनीषास्तुतयः त्वांत्वांस्पृशन्तिप्राप्नुवन्ति तत्रदृष्टान्तः—उशतीःउशत्यःकामयमानाः पत्नीःपत्न्यःउशन्तं

---

१ नि० ३. ९.। २ नि० ५. १५.।

कामयमानंपतिंन यथापतिंसम्भजन्ते तद्वत् ॥ सनायुवः सनेत्येतदव्ययंनित्यत्वमाचष्टे तेनच तद्वान्लक्ष्यते सनासनातनंकर्मआत्मनइच्छन्तीतिसनायुवः क्याच्छन्दसीत्युप्रत्ययःजसिवर्णव्यत्ययेनोत्वम्। मतयः मनज्ञाने मन्यन्तइतिमतयःस्तोतारः क्तिच्क्तौचसंज्ञायामितिक्तिच् नक्तिचिदीर्घश्चेतिनिषेधेप्राप्तेबाहुलकात् अनुदात्तोपदेशेत्यादिनानुनासिकलोपः चित्त्वादन्तोदात्तत्वम्। दद्रुः द्राकुत्सायांगतौ लिट्चुसि आतोलोपइटिचेत्याकारलोपः। उशतीः वशकान्तौ लटः शतृ अदादित्वाच्छपोलुक् शतुर्ङित्त्वात् ग्रहिज्यादिनासम्प्रसारणम् उगितश्चेतिङीप् शतुरनुमइतिनद्याउदात्तत्वम् वाछन्दसीतिपूर्वसवर्णदीर्घः। शवसावन् मतुपिआकारोपजनश्छान्दसः यद्वा मत्वर्थीयआवनिप् ॥ ११ ॥

११. दर्शनीय इन्द्रदेव! तुम मन्त्र और प्रणाम से स्तुत होते हो। जो बुद्धिमान् अग्निहोत्रादि सनातन कर्म और धन की इच्छा करते हैं, वे बड़े यत्न के बाद तुम्हें प्राप्त होते हैं। बली इन्द्र! जैसे कामिनी स्त्रियाँ आकांक्षी पति को प्राप्त करती हैं, वैसे ही बुद्धिमानों की स्तुतियाँ तुम्हें प्राप्त करती हैं।

सनादेवतवरायोगभस्तौनक्षीयन्तेनोपदस्यन्तिदस्म।
द्युमाँअसिक्रतुमाँइन्द्रधीरःशिक्षाशचीवस्तवनःशचीभिः ॥१२॥

सनात्। एव। तव। रायः। गभस्तौ। न। क्षीयन्ते। न। उप। दस्यन्ति। दस्म। द्युऽमान्। असि। क्रतुऽमान्। इन्द्र। धीरः। शिक्ष। शचीऽवः। तव। नः। शचीभिः ॥ १२ ॥

हेदस्मदर्शनीयेन्द्र गभस्तिरितिबाहुनाम तवगभस्तौहस्तेसनादेवचिरकालादारभ्यस्थिता-निरायोधनानिनक्षीयन्तेनविनश्यन्तिनोपदस्यन्तिच स्तोतृभ्योदत्तेपित्वद्धस्तगतंधनमुपक्षयंनप्राप्नोत्यपितुवर्धते हेइन्द्र धीरोबुद्धिमान्धृष्टोवात्वंद्युमान्दीप्तिमानसि तथाक्रतुमान्लोकरक्षणहेतुभूतकर्मयुक्तोसि हेशचीवः कर्मवन्निन्द्र तवशचीभिःत्वदीयैःकर्मभिर्नोस्मभ्यं धनंशिक्षदेहि शिक्षतिर्दानकर्मा॥ क्षीयन्ते क्षीञ्हिंसायां क्र्यादिः अस्मात्कर्मकर्तरिकर्मवद्भावाद्यगात्मनेपदे वत्करणंस्वाश्रयमपियथास्यादितिकर्तृवद्भावादचःकर्तृयकीत्याद्युदात्तत्वम् चादिलोपेविभाषेतिनिघातप्रतिषेधः। शचीवः शचीअस्यास्तीतिशचीवान्छन्दसीरइतिमतुपोवत्वम् सम्बुद्धौमतुवसोरुरितिनकारस्यरुत्वम् ॥ १२ ॥

१२. सुदृश्य इन्द्र! जो सम्पत्ति, सदा से, तुम्हारे पास है, वह कभी विनष्ट नहीं होती। इन्द्र! तुम मेधावी, तेजशाली और यज्ञसम्पन्न हो। कर्मी इन्द्र! अपने कर्मों-द्वारा हमें धन प्रदान करो।

सनायतेगोतमइन्द्रनव्यमतक्षद्ब्रह्महरियोजनाय।
सुनीथायनःशवसाननोधाःप्रातर्मक्षूधियावसुर्जगम्यात् ॥१३॥३॥

सनाऽयते । गोतमः । इन्द्र । नव्यम् ।अतक्षत् । ब्रह्म ।
हरिऽयोजनाय । सुऽनीथाय । नः । शवसान । ॥ नोधाः । प्रातः ॥
मक्षु । धियाऽवसुः । जगम्यात् ॥ १२ ॥ ३ ॥

सइन्द्रः सनायतेनित्यइवाचरतिसर्वेषामाद्योभवति हेशवसानबलवन्निन्द्र हरियोजनायह-रीअश्वौरथेयोजयतीतिहरियोजनः सुनीथायसुष्टुनेत्रेएवम्भूतायतस्मैतुभ्यंगोतमः गोतमस्यऋ-षेःपुत्रोनोधाऋषिःनव्यंनूतनंब्रह्मएतत्सूक्तरूपंस्तोत्रंनोस्मदर्थमतक्षत्अकरोत् अतोस्माभिरनेन स्तोत्रेणस्तुतः सन् धियाबुद्ध्याकर्मणावामाप्तवसुःइन्द्रःप्रातःकालेमक्षुशीघ्रंजगम्यादागच्छतु ॥ सनायते सनेतिनिपातोनित्यशब्दसमानार्थः तस्मादाचारार्थेक्यङ्प्रत्ययः । सुनीथाय णी-ञ्प्रापणेइत्यस्मादौणादिकःथक्प्रत्ययः थाथादिस्वरः ॥ १३ ॥

१३. इन्द्र! तुम सबके आदि हो। हे सुलोचन और बलवान् इन्द्र! तुम रथ में घोड़े योजित करते हो। गोतम ऋषि के पुत्र नोधा ऋषि ने हमारे लिए तुम्हारा यह अभिनव सूक्त-रूप स्तोत्र बनाय है। फलतः कर्म-द्वारा जिन इन्द्र ने धन पाया है, वे प्रातःकाल में शीघ्र आवें।

॥ इतिप्रथमस्यपञ्चमेतृतीयोवर्गः ॥ ३ ॥

त्वंमहानितिनवर्चंषष्ठंसूक्तंनोधसआर्षंत्रैष्टुभमैन्द्रं अनुक्रम्यतेच—त्वंनवेति । समूळ्हेदशरात्रे द्वितीयेछन्दोमेमरुत्वतीयेशस्त्रेएतत्सूक्तम् विश्वजितोग्निरइतिखण्डेसूत्रितम्—त्वांसुतेकीर्तिर्त्वं-महाँइन्द्रयोहेति ॥

तत्रप्रथमामृचमाह—

त्वंमहाँइन्द्रयोहशुष्मैर्द्यावाजज्ञानःपृथिवीअमेधाः ।
यद्धतेविश्वागिरयश्चिदभ्वाभियादृळ्हासःकिरणानैजन् ॥१॥

त्वम् । महान् । इन्द्र । यः । ह । शुष्मैः । द्यावा । जज्ञानः । पृथिवी इति । अमे । धाः । यत् । ह । ते । विश्वा । गिरयः । चित् । अभ्वा । भिया । दृळ्हासः । किरणाः । न । ऐजन् ॥ १ ॥

हेइन्द्र त्वंमहान्गुणैःसर्वाधिकोभवसि योह यःखलुत्वंअमेअसुरकृतेभयेसतिजज्ञानस्तदानी-मेवप्रादुर्भूतःसन् शुष्मैःशत्रूणांशोषकैःआत्मीयैर्बलैर्द्यावापृथिवीद्यावापृथिव्यौधाः अधारयः।ताद-शाद्भयादमूमुचइत्यर्थः किञ्च यद्धतेयस्यखलुतवसम्बन्धिन्याभियाभीत्याविश्वाविश्वानिप्राज्ञानि यानिभूतजातानिगिरयश्चितयेचशिलोच्चयाः अभ्वा महान्तोमितअन्यान्यपिमहान्तियानिसन्तिते

पिसर्वेदृह्लासःदृढाअपिऐजन्अकंपिषत तत्रदृष्टान्तः—किरणान यथासूर्यरश्मयःइतस्ततोनभसिकम्पन्ते तद्वत् ॥ जज्ञानः जनीप्रादुर्भावे लिटःकानच् गमहनेत्यादिनोपधालोपः स्थानिवद्भावाद्द्विर्भावादि चितइत्यन्तोदात्तत्वम् ॥ द्यावापृथिवीइत्यस्यसमस्तपदस्यमध्ये जज्ञानइत्यस्यपाठश्छान्दसः। यत् सुपांसुलुगितिषष्ठ्याःलुक्। अभ्वा आसमन्ताद्भवन्तिसद्भावंप्राप्नुवन्तीत्यभ्वामहान्तः आङ्पूर्वाद्भवतेरौणादिकोड्वनन्प्रत्ययः उपसर्गस्यह्रस्वत्वंच यद्वा नञ्पूर्वाद्भवतेःप्राप्त्यर्थान्नञिभुवोड्विदितिक्वन्प्रत्ययः महान्तोहिप्राप्तुंनशक्यन्ते शेश्छन्दसिबहुलमितिशेर्लोपः । किरणाःकीर्यन्तेविक्षिप्यन्तेइतिकिरणाः कृविक्षेपे कॄपॄवृजिमन्दिनिधाञ्भ्यःक्युरितिक्युप्रत्ययः योरनादेशेप्रत्ययाद्युदात्तः ऋतइद्धातोरितीत्वम् । ऐजन् एजृकम्पने लङ्याडागमःसचोदात्तः वृद्धिश्च ॥ १॥

१. इन्द्र ! तुम सर्वोत्तम गुणी हो। भय उपस्थित होने पर अपने रिपु-शोषक बल द्वारा तुमने द्यौ और पृथिवी को धारण किया था। संसार के सारे प्राणी और पर्वत तथा दूसरे जो विशाल और सुदृढ़ पदार्थ हैं, वे सब भी, आकाश में सूर्य-किरणों की तरह, तुम्हारे डर से कांप गये थे।

द्वितीयामृचमाह—

आयद्धरीइन्द्रविव्रतावेरातेवज्रंजरिताबाह्वोर्धात् ।
येनाविहर्यतक्रतोअमित्रान्पुरइष्णासिपुरुहूतपूर्वीः ॥२॥

आ । यत् । हरी इति । इन्द्र । विऽव्रता । वेः । आ । ते । वज्रम् ।
जरिता । बाह्वोः । धात् । येन । अविहर्यतक्रतो इत्यविहर्यतऽक्रतो ।
अमित्रान् । पुरः । इष्णासि । पुरुऽहूत । पूर्वीः ॥ २ ॥

हेइन्द्र त्वंयत्यदाविव्रताविविधकर्माणौहरीत्वदीयावश्वौआवेःरथेआगमयसिरथेयोजयसीत्यर्थः तदानींतितवबाह्वोर्हस्तयोर्जरितास्तोतावज्रमाधात्स्तोत्रेणस्थापयतिस्तोत्रास्तुतेप्रयत्नमन्तरेणवज्रंत्वद्धस्तेदृश्यतइत्यर्थः हेअविहर्यतक्रतोप्रेप्सितकर्मन्निन्द्र अमित्रान्शत्रून्येनवज्रेणेष्णासिअभिगच्छसि हेपुरुहूत पुरुभिर्बहुभिर्यजमानैराहूतस्त्वंपूर्वीर्बह्वीःपुरःअसुरपुराणिभेत्तुमभिगच्छसीत्यर्थः ॥ विव्रता व्रतमितिकर्मनाम विविधंव्रतंकर्मययोस्तौ सुपांसुलुगितिपूर्वसवर्णदीर्घत्वम् बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्। वेः वीगतिव्याप्तिप्रजनकान्त्यसनखादनेषु अन्तर्भावितण्यर्थाच्छान्दसेलङि सिपि अदादित्वाच्छपोलुक् बहुलंछन्दस्यमाङ्योगेपीत्यडभावः। धात् दधातेश्छान्दसेलुङिगातिस्थेतिसिचोलुक् पूर्ववदडभावः। अविहर्यतक्रतो हर्यतिःप्रेप्साकर्मेतियास्कः । हर्यगतिकान्त्योः कान्तिरभिलाषः विहर्यतोनभिलषितः अविहर्यतोभिलषितइत्यर्थः तादृशः क्रतुःकर्मयस्यसतथोक्तः । अमित्रान् नसन्तिमित्राण्येषुइतिबहुव्रीहौ नञोजरमरमित्रमृताइत्युत्तर-

१ नि० ७. १७. ।

पदाद्युदात्तत्वम्। इष्णासि इषआभीक्ष्ण्ये अत्रगत्यर्थः क्र्यादिभ्यःश्ना सिपःपित्त्वादनुदात्तत्वे तस्यैवस्वरःशिष्यते यद्वृत्तयोगादनिघातः॥२॥

२. इन्द्र! जिस समय तुम विभिन्न-गतिशाली अश्वों को रथ में संयुक्त करते हो, उस समय तुम्हारे हाथ में स्तोता वज्र देता है; और, तुम उसी वज्र से शत्रुओं का अनभीष्ट कर्म करके उनका विनाश करते हो। बहुलोकाहूत इन्द्र! तुम उसके द्वारा असुरों के अनेक नगर भी ध्वस्त करते हो।

त्वंसत्यइंन्द्रधृष्णुरेतान्त्वमृभुक्षानर्यस्त्वंषाट्।
त्वंशुष्णंवृजनेपृक्षआणौयूनेकुत्सायद्युमतेसचाहन्॥३॥

त्वम्। सत्यः। इन्द्र। धृष्णुः। एतान्। त्वम्। ऋभुक्षाः। नर्यः।
त्वम्। षाट्। त्वम्। शुष्णम्। वृजने। पृक्षे। आणौ। यूने।
कुत्साय। द्युऽमते। सचा। अहन्॥ ३॥

हेइन्द्र त्वंसत्यःसत्सुभवः सर्वोत्कृष्टइत्यर्थः एतान्शत्रूनभिगतःसन् धृष्णुः तेषांधर्षयिता तिरस्कर्ता किञ्च त्वमृभुक्षाः ऋभूणामधिपतिः तेषुकृतनिवासोवा यद्वा महन्नामैतत् महान्प्रवृद्धोसि नर्योनृभ्योहितः तथा त्वं षाट् शत्रूणामभिभविताहन्तेत्यर्थः किञ्च वृजनइत्यादीनित्रीणिसङ्ग्रामनंनामानि अत्रपूर्वंविशेषणे वृजनेवर्जनयुक्ते सङ्ग्रामेहिवीराःपुरुषावर्ज्यन्तेहिंस्यन्ते पृक्षेसंपर्चनीयेर्वीर्यैर्योद्धुंमासव्ये एवंविधेआणौसङ्ग्रामेद्युमतेदीप्तिमतेयूनेतरुणायकुत्साय सचात्वंसहायोभूत्वाशुष्णंशोषयितारमेतत्संज्ञमसुरंअहन्अवधीः॥ ऋभुक्षाः ऋभुरितिमेधाविनाम उरुविस्तीर्णं भाति यद्वा ऋतेनयज्ञेनभातिभवतीतिवाऋभुः उरुशब्देऋतशब्देवोपपदेभातेर्भवतेर्वामृगय्वादयश्चेतिकुप्रत्ययः पूर्वपदस्यऋभावश्चनिपात्यते क्षयतिरैश्वर्यकर्मा तेषामीष्टेइत्यृभुक्षाः यद्वा क्षि निवासगत्योः तेषुनिवसतीतिपतेस्थइतिविधीयमानइनिप्रत्ययोवहुलवचनादस्मादपिभवति टिलोपश्च सौपथिमथ्यृभुक्षामादित्यात्वं मत्ययस्वरः। षाट् सहअभिभवे छन्दसिसहइतिकेवलादपिण्विः षत्वंछान्दसम्। द्युमते द्यौःदीप्तिरस्मिन्नस्तीतिद्युमान् स्वादिष्वसर्वनामस्थानेइतिपदसंज्ञायां दिवउदित्युत्वं ह्रस्वनुड्भ्यांमतुबितिमतुपउदात्तत्वम्॥३॥

३. इन्द्र! तुम सर्वोत्कृष्ट हो। तुम इन शत्रुओं के विनाशक हो। तुम ऋभुगण के स्वामी, मनुष्य-गण के उपकर्त्ता और शत्रुओं के हन्ता हो। संहारक और तुमुल युद्ध में तुमने प्रकाशक और तरुण कुत्स के सहायक बनकर शुष्ण नामक असुर का वध किया था।

त्वंहत्यदिन्द्रचोदीःसखावृत्रंयद्वज्रिन्वृषकर्मन्नुभ्नाः।
यद्धशूरवृषमणःपराचैर्विदस्यूँर्योनावकृतोवृथाषाट्॥४॥

त्वम् । ह । त्यत् । इन्द्र । चोदीः । सखा । वृत्रम् । यत् । वज्रिन् ।
वृषऽकर्मन् । उभ्नाः । यत् । ह । शूर । वृषऽमनः । पराचैः । वि ।
दस्यून् । योनौ । अकृतः । वृथाषाट् ॥ ४ ॥

हेइन्द्र त्वंह त्वंखलुसखाकुत्सस्यसहायःसन् त्यत्तत्प्रसिद्धंधनंजयलक्षणंयशोवाचोदीः प्रेरितवानअकार्षीरित्यर्थः हेवृषकर्मन् वृष्ट्युदकसेचनरूपकर्मोपेत वज्रिन्वज्रवन्निन्द्र वृत्रंसर्वस्यधनस्यावरीतारंकुत्सस्यशत्रुंयत्यदाउभ्नाः अतुभ्नाः अहिंसीः अपिच हेशूरशत्रूणांमेरक वृषमणःकामाभिवर्षकमनस्केन्द्र वृथाषाट्अनायासेनशत्रूणामभिभवितात्वं यच्चयदाखलुयोनौवीरैर्मिश्रणीयेसंग्रामेदस्यून् कुत्सस्योपक्षयितॄन्अन्यान्शत्रून्पराचैः परागमनैः व्यकृतःपराङ्मुखाययथाभवन्तितथाव्यच्छिनः तदानींकुत्सःसर्वंयशः प्रापोदित्यर्थः॥चोदीः चुदप्रेरणे लुङि नेटीतिसिचिवृद्धिप्रतिषेधः। उभ्नाःणभतुभ्नाहिंसायाम् क्रैयादिकः लङिसिपि तलोपश्छान्दसः बहुलंछन्दस्यमाङ्योगेपीत्यडभावः पराचैरित्येतदव्ययं नीचैरुच्चैरितिवदितिभट्टभास्करमिश्रः। पराचैःपराञ्चैरितिनिरुक्तम्। दस्यून् दीर्घादटिसमानपादेइतिनकारस्यरुत्वम् अत्रानुनासिकःपूर्वस्यतुवेतिउकारस्यसानुनासिकता।अकृतः कृतीछेदने लङिसिपितुदादित्वाच्छप्रत्ययः आगमानुशासनस्यानित्यत्वाच्छेमुचादीनामितिनुमागमस्याभावः शस्यङित्त्वाद्गुणाभावः॥४॥

४. हे वृष्टि-वर्षक और वज्रधर इन्द्र! जिस समय तुमने शत्रु का वध किया था, हे वीर, अभीष्ट-वर्षन-कामी और शत्रुजयी इन्द्र! उस समय तुमने लड़ाई के मैदान में दस्युओं को पराङमुख करके उन्हें ध्वस्त किया था और कुत्स के सहायक होकर उनको प्रथितयशा बनाया था।

पञ्चमीमृचमाह—

त्वंह॒त्यदि॑न्द्रारि॑षण्यन्दृ॒ळ्हस्य॑चि॒न्मर्ता॑ना॒मजु॑ष्टौ ।
व्य१॒॑स्मदाकाष्ठा॒अर्व॑तेव॒र्घ॒नेव॑वज्रिञ्छ्नथिह्य॒मित्रा॑न् ॥५॥४॥

त्वम् । ह । त्यत् । इन्द्र । अरि॑षण्यन् । दृ॒ळ्हस्य॑ । चित् । मर्ता॑नाम् ।
अजु॑ष्टौ । वि । अ॒स्मत् । आ । काष्ठा॑ः । अर्व॑ते । व॒ः । घ॒नाऽइ॑व ।
वज्रिन् । श्न॒थि॒हि । अ॒मित्रा॑न् ॥ ५ ॥ ४ ॥

हेइन्द्र त्वंखलुत्यत्तस्यदृळ्हस्यचित्दृढस्यकस्यचिदपिअरिषण्यन्रेषणमनिच्छन् एवंस्वभावोभवसि देवतात्वेनानुगृहीतत्वात् तथापिमर्तानांस्तोतॄणामस्माकंशत्रुभिरजुष्टावप्रीतौसत्यांअस्मदर्वते अस्मदीयाश्वायगन्तुं काष्ठादिशःआसमन्ताद्विवःविवृताः कुरु यथासर्वासुदिक्षुअस्मदीयाअश्वाः

---

१ नि॰ ११, २५।

प्रतिरोधमन्तरेणगच्छन्तितथाकुर्वित्यर्थः किञ्च तत्रत्यानमित्रान् हेवज्रिन्वज्रवन्निन्द्र घनेवघनेन कठिनेनपर्वतेनेववज्रेणश्नथिहिश्नथयजहीत्यर्थः यद्वा मर्तानांमनुष्याणांमध्येयस्मिन्कस्मिंश्चित्त्वामीवौसत्यांवस्यशत्रोर्दृढस्यापि अरिषण्यन् रेषणंहिंसनमनिच्छन्वर्तसेयस्मिंस्तुकुत्सादौमीतिरस्तितस्यशत्रुवधंचकृषे अतस्तवमियाणामस्माकमर्वतइत्यादिपूर्ववत् ॥ त्यत् सुपांसुलुगितिषष्ठ्यालुक् । अरिषण्यन् रिष्टशब्दात्क्यचिदुरस्युद्रविणस्युर्वृषण्यतिरिषण्यतीतिरिषण्भावोनिपात्यते नञ्समासेअव्ययपूर्वपदप्रकृतिस्वरत्वम् ।अस्मत् पूर्ववत्षष्ठ्यालुक् ।अर्वते अर्वणस्त्रसावनञइतिनकारस्यतकारादेशः वनिप्सुपौपित्त्वादनुदात्तौ परिशेषात् धातुस्वरएवशिष्यते । घनेव मूर्तौघनइतिकाठिन्येगम्यमानेहन्तेरप्प्रत्ययान्तोनिपात्यते।श्नथिहि श्नथर्हिंसार्थः ण्यन्ताल्लोटिबहुलंछन्दसीतिशपोलुक् ॥ ५ ॥

५. इन्द्र ! तुम किसी वृद्ध व्यक्ति की हानि करने की इच्छा नहीं करते; तो भी शत्रुओं के द्वारा मनुष्यों का उपद्रव होने पर तुम उनके अश्व के विचरण के लिए चारों ओर खोल देते हो अर्थात् केवल अपने भक्तों के लिए चारों दिशायें निरुपद्रुत कर देते हो। हे वज्रधर ! कठिन वज्र से शत्रुओं का विनाश करते हो।

षष्ठीमृचमाह—

त्वांह॒त्यदि॑न्द्रा॒र्णसा॑तौ॒स्व॑र्मीळ्हे॒नर॑आ॒जाह॑वन्ते ।
तव॑स्वधावइ॒यमा॒स॑म॒र्यऊ॒तिर्वाजे॑ष्वत॒साय्या॑भूत् ॥६॥

त्वाम् । ह॒ । त्यत् । इ॒न्द्र॒ । अर्णऽसातौ । स्वः॑ऽमीळ्हे । नर॑ः । आ॒जा । ह॒वन्ते॒ । तव॑ । स्व॒धा॒ऽव॒ः । इ॒यम् । आ । स॒ऽम॒र्ये । ऊ॒तिः । वाजे॑षु । अ॒त॒साय्या॑ । भू॒त् ॥ ६ ॥

हेइन्द्र अर्णसातौअर्णानांगन्तॄणांयुद्धेमवृत्तानांपुरुषाणांसातिर्लाभोयस्मिन्स्वर्मीळ्हेमीळ्हमिति धननाम सुष्ठुअरणीयंधनंयस्मिन्एवम्भूतेआजाआजौसङ्ग्रामे त्यत्तंप्रसिद्धंत्वामेवनरोयोद्धुकामाः पुरुषाः सहायार्थंहवन्तेआह्वयन्ति यद्वा अर्णसउदकस्यसातिर्लाभोयस्मिन्वृत्रादियुद्धेतस्मिन्नित्यर्थः वृष्टिनिरोधकेनवृत्रेणसहवर्षणार्थंतवयत्युद्धंतत्रस्तोतारस्त्वांप्रोत्साहयन्तीतिभावः यस्मादेवं तस्मात् हेस्वधावः हेअन्नवन्बलवन्वाइन्द्र समर्येसङ्ग्रामेतवसम्बन्धिनीइयमूतिःत्वदीयमिदंरक्षणंआअस्मदाभिमुख्येनभूत्भवतुवाजेषुसङ्ग्रामेषुयैषाऊतिः अतसाय्या योद्धृभिःप्रार्थ्याभवति ॥ त्यत्सुपांसुलुगितिद्वितीयायालुक् ।अर्णसातौऋगतौ बहुलवचनादौणादिकोनप्रत्ययः षणुदानेइत्यस्माद्भावेक्तिनिजनसनखनामित्यनुनासिकस्यात्वम् बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् यद्वा उदकेनुदचेत्यर्तेरसुन्प्रत्ययोनुडागमश्च पीवोपवसनादीनांछन्दसिलोपोवक्तव्यइतिसलोपः नित्त्वादाद्युदात्तत्व-

म् पूर्ववद्बहुव्रीहिस्वरः। स्वर्मीह्ळे स्वर्शब्दोन्यङ्स्वरौस्वरिताविति स्वरितः बहुव्रीहिस्वरेणस-एवशिष्यते। आजा सुपांसुलुगितिसप्तम्याडादेशः। स्वधावः मतुवसोरुरितिमतुपोरुत्वम्। अतसा-य्या अतसातत्यगमने औणादिकःसाय्यप्रत्ययः तस्याडागमश्च आगमानुदात्तत्वेमत्ययाद्युदा-त्तत्वम्। भूव् छन्दसिलुङ्लङ्लिटइतिप्रार्थनायांलुङि बहुलंछन्दस्यमाङ्योगेपीत्यडभावः ॥६॥

६. इन्द्र! जिस युद्ध में योद्धा लोग लाभ और धन पाते हैं, उसमें सहायता के लिए मनुष्य तुम्हें बुलाते हैं। बली इन्द्र! समर-क्षेत्र में तुम्हारा यह रक्षण-कार्य हमारी ओर प्रसारित हो। योद्धा लोग तुम्हारे रक्षा-पात्र हैं।

त्वंह॒त्यदि॑न्द्र॒स॒प्तयु॒ध्य॒न्पुरो॑वज्रि॒न्पु॒रु॒कुत्सा॑यदर्दः।
ब॒र्हिर्नयत्सु॒दासे॒वृथा॒वर्ग॒ंहोरा॑ज॒न्वरि॑वः॒पूर॒वे॑कः ॥७॥

त्वम्। ह॒। त्यत्। इ॒न्द्र॒। स॒प्त। यु॒ध्यन्। पुरः। व॒ज्रि॒न्।
पु॒रु॒ऽकुत्सा॑य। द॒र्द॒रिति॑ द॒र्दः। ब॒र्हिः। न। यत्। सु॒ऽदासे॑। वृथा॑।
वर्क्। अंहोः। रा॒ज॒न्। वरि॑वः। पू॒रवे॑। क॒रिति॑ कः ॥ ७ ॥

हेवज्रिन्वज्रवन्निन्द्र पुरुकुत्सायएतत्संज्ञायऋषयेयुध्यन्तदीयशत्रुभिःसहयुद्धंकुर्वाणस्त्व-मेव त्यवत्ताःसप्तपुरःतदीयानिसप्तसंख्यानिनगराणिदर्दःव्यदारयः अभैत्सीरित्यर्थः अपिच सुदा-सेएतत्संज्ञायराज्ञेअंहोःएतत्संज्ञस्यासुरस्यसम्बन्धियद्धनमस्तितत्वृथाअनायासेनबर्हिर्न बर्हिरि-ववर्क् अवृणक्अच्छिनइत्यर्थः तदनन्तरंपूरवे त्वांहविषापूरयतेतस्मैसुदासेहेराजन्स्वामिन्निन्द्र वरिवोधनं कःअकार्षीः॥ त्यत् सुपांसुलुगितिविभक्तेर्लुक्। दर्दः दृविदारणे अस्माद्यङ्लुगन्ताल्ल-ङिसुपिअदादिवच्चेतिवचनाच्छपोलुक् बाहुलकाद्धलादिशेषाभावः हल्ङ्याब्भ्यइतिसलोपः ब-हुलंछन्दस्यमाङ्योगेपीत्यडभावः। सुदासे शोभनंददातीतिसुदाः असुन् सुदाःकल्याणदानइवियास्कः। वर्क् वृजीवर्जने लङिसिपिबहुलंछन्दसीतिविकरणस्यलुक् लघूपधगुणेपूर्ववत्सलोपः अडभा-वश्च चोःकुरितिकुत्वम्। कः डुकृञ्करणे लुङिसिपिमन्त्रेघसेतिच्लेर्लुक् पूर्ववत्सलोपाडभावौ ॥७॥

७. वज्रिन्! तुमने, पुरुकुत्स नाम के ऋषि के सहायक होकर, उन सातों नगरो का ध्वंस किया था और सुदास नाम के राजा के लिए अंहा नाम के असुर का धन, यज्ञ-कुश की तरह, आसानी से विच्छिन्न किया था। अनन्तर, इन्द्र! उस हव्यदाता सुदास को वह धन दिया था।

त्वंत्यांनइन्द्रदेवचि॒त्रामिष॒मापो॒नपी॑पयः॒परि॑ज्मन्।
ययाशू॒र॒प्रत्य॒स्मभ्यं॒यंसि॒त्मन॒मूर्ज॒ंनवि॒श्वध॒क्षर॑ध्यै ॥८॥

---

१ नि० ६, २२।

त्वम् । त्याम् । नः । इन्द्र । देव । चित्राम् । इषम् । आपः । न ।
पीपयः । परिऽज्मन् । यया । शूर । प्रति । अस्मभ्यम् । यंसि ।
त्मनम् । ऊर्जम् । न । विश्वध । क्षरध्यै ॥ ८ ॥

हेदेवद्योतमानेन्द्र त्वंनोस्माकंचित्रांचायनीयांत्यांतामिषमन्नंपरिज्मन्परितोव्याप्तायांभूमौ पीपयः प्रवर्धयः यथासर्वाभूमिः अन्नेनपरिपूर्णाभवतितथाकुर्वित्यर्थः तत्रदृष्टान्तः—आपोन यथाआपोवृष्ट्युदकानिभूम्यांवर्षणेनप्रवर्धयसितद्वत् यद्वा भूमौवर्तमानानस्मान्यथाअपः प्रापयसितद्वत् चित्रानिषमपिपाययेतिभावः हेशूरेन्द्र ययाइषात्मनमात्मानंजीवंअस्मभ्यंप्रतियंसिप्रयच्छसि तत्रदृष्टान्तः—विश्वध विश्वतः सर्वतः क्षरध्यैक्षरितुंऊर्जंन उदकमिव यथास्मभ्यंबहुलमुदकंप्रयच्छसितद्वत्प्राणधारणरूपंजीवनमपिप्रयच्छसीतिभावः॥ आपः शसिप्राप्तेव्यत्ययेनजस् अप्तृन्नित्यादिनादीर्घः॥ पीपयः स्फायीओप्यायीवृद्धौ ण्यन्ताच्छान्दसेलुङि प्यायःपीतिव्यत्ययेन पीभावः णिश्रिद्रुस्रुभ्यइतिचेश्चङादेशः णिलोपादीनि यद्वा पीङ्पानेइत्यस्मात् लुङिचङिपूर्ववत् बहुलंछन्दस्यमाङ्योगेपीत्यडभावः । परिज्मन् जमतिर्गतिकर्मा अजगतिक्षेपणयोः आभ्यांपरिपूर्वाभ्यां श्वन्नुक्षन्नित्यादौकनिन्प्रत्ययान्तोनिपातितः सुपांसुलुगितिसप्तम्यालुक् । यंसि यमउपरमेबहुलंछन्दसीतिशपोलुक् । त्मनं आङोन्यत्रापिछन्दसिदृश्यतइत्यात्मनआकारलोपः संज्ञापूर्वकस्यविधेरनित्यत्वादुपधादीर्घाभावः । विश्वध विश्वशब्दात् तसिलःसकारलोपोधत्वंच पृषोदरादित्वात् । क्षरध्यै क्षरसञ्चलने तुमर्थेसेसेनित्यध्यैन्प्रत्ययः नित्त्वादाद्युदात्तत्वम् ॥ ८ ॥

८. तुम हमारा विलक्षण या संग्रहणीय धन, व्याप्त पृथिवी पर जल की तरह, वर्द्धित करो। वीर, जैसे चारों ओर जल को तुमने क्षरित किया है, उसी तरह उस अन्न-द्वारा हमें जीवन दिया है।

नवमीमृचमाह—

अकारितइन्द्रगोतमेभिर्ब्रह्माण्योक्तानमसाहरिभ्याम् ।
सुपेशसंवाजमाभरानःप्रातर्मक्षूधियावसुर्जगम्यात् ॥९॥५॥

अकारि । ते । इन्द्र । गोतमेभिः । ब्रह्माणि । आऽउक्ता । नमसा ।
हरिऽभ्याम् । सुऽपेशसम् । वाजम् । आ । भर । नः । प्रातः । मक्षु ।
धियाऽवसुः । जगम्यात् ॥ ९ ॥ ५ ॥

हेइन्द्र तेतवगोतमेभिर्गोतमैः एतत्संज्ञैःऋषिभिःअकारिस्तोत्रंकृतमित्यर्थः एतदेवस्पष्टीकरोति ब्रह्माणिमन्त्रजातानिनमसाहविर्लक्षणेनान्नेनसहहरिभ्यामश्वाभ्यांयुक्तायतुभ्यंओक्ताआभिमु-

ब्येनोक्तानि यद्वा मर्यादायामाकारः यथाशास्त्रंप्रयुक्तानि सत्वंसुपेशसं पेशइतिरूपनाम बहुविध-रूपयुक्तंवाजमन्नंनोस्मभ्यमाभरआहरदेहीतियावत् धियाबुद्ध्याकर्मणावाप्राप्तधनइन्द्रः प्रातः कालेअस्मद्रक्षणार्थंजगम्यात्आगच्छतु ॥ ओक्ता शेश्छन्दसिबहुलमितिशेर्लोपः। सुपेशसं पि-शअवयवे असुन् बहुव्रीहावाद्युदात्तंद्व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वम्। भर हृग्रहोर्भइतिभत्वम् द्व्यचोतस्तिङइतिसंहितायांदीर्घः ॥ ९ ॥

९. इन्द्र! तुम अश्व-सम्पन्न हो। तुम्हारे लिए गोतमवंशीयों ने भक्ति-पूर्वक मन्त्र कहे थे। तुम हमें नाना प्रकार के अन्न प्रदान करो।

॥ इतिप्रथमस्यपञ्चमेपञ्चमोवर्गः ॥ ५ ॥

वृष्णेशर्धायेतिपञ्चदशर्चंसप्तमंसूक्तं नोधसआर्षं मारुतं अन्त्यात्रिष्टुप् शिष्टाश्चतुर्दशजग-त्यः तथाचानुक्रान्तम्—वृष्णेपञ्चोनामारुतंत्रिष्टुबन्तमिति। चातुर्विंशिकेहन्याग्निमारुतेइदंमारुतनि-विद्धानीयंसूत्रितम्—प्रक्षस्यवृष्णोवृष्णेशर्धाययज्ञेनवर्धतेत्याग्निमारुतमिति। आभिप्लविकेपञ्चमे-हन्यप्येतदाग्निमारुतेमारुतंनिविद्धानीयं सूत्रितंच—प्रक्षस्यवृष्णोवृष्णेशर्धायनूचित्सहोजाइत्या-ग्निमारुतमिति।

तत्रप्रथमामृचमाह—

वृष्णेशर्धायसुमखायवेधसेनोधःसुवृक्तिंप्रभरामरुद्भ्यः।
अपोनधीरोमनसासुहस्त्योगिरःसमञ्जेविदथेष्वाभुवः ॥१॥

वृष्णे। शर्धाय। सुऽमखाय। वेधसे। नोधः। सुऽवृक्तिम्। प्र। भर। मरुत्ऽभ्यः। अपः। न। धीरः। मनसा। सुऽहस्त्यः। गिरः। सम्। अञ्जे। विदथेषु। आऽभुवः ॥ १ ॥

अत्रपूर्वार्धेनस्तुतौनोधाःप्रेर्यते हेनोधः वृष्णेकामानांवर्षित्रेसुमखायशोभनयज्ञायवेधसेपु-ष्पफलादीनांकर्त्रे वायौसतिहिपुष्पाणिफलानिचोत्पद्यन्ते एवंविधायमरुद्भ्यः विभक्तिव्यत्ययः मरु-तांमितराविणांशर्धायसमूहायसुवृक्तिं सुष्ठुआवर्जकं सुष्ठुप्रवृत्तंवास्तोत्रं प्रभरप्रेरयस्तुहीतियावत् स्तुतौप्रेरितोनोधाआह धीरोधीमान् सुहस्त्यः शोभनांगुलियुक्तः कृताञ्जलिरित्यर्थः एवम्भूतोहं मनसागिरःस्तुतिलक्षणावाचः समञ्जेसम्यग्व्यक्ताःकरोमि यागिरोविदथेषुयज्ञेषु आभुवःआङ्मर्या-दायां यथाशास्त्रं प्रयुक्ताभवन्तीत्याभुवः देवताभिमुखीकरणायसमर्थाः यज्ञयोग्यैःस्तोत्रैर्मनःपूर्वकंम-रुद्गणं स्तौमीतिभावः तत्रदृष्टान्तः—आपोन यथापर्जन्योयुगपदेवबहुप्रदेशेषुबहुशोजलानिवर्षति

वद्वत् ॥वृष्णे वृषसेचने कनिन्युवृषितक्षीत्यादिनाकनिन्प्रत्ययः किच्चाद्गुणाभावोनित्त्वादाद्युदात्तत्वम् चतुर्थ्येकवचनेअल्लोपोनइत्यकारलोपः । शर्धाय शृधुप्रसहने शर्ध्यतेप्रसह्यतेनेनपर्वतादिकमितिशर्धोमरुत्संघः करणेघञ् ञित्त्वादाद्युदात्तत्वम् । सुमखाय शोभनोमखोयस्य नञ्सुभ्यामितिप्राप्तेव्यत्ययेनपूर्वपदप्रकृतिस्वरत्वम् । नोधः पादादित्वात्षाष्ठिकमामन्त्रिताद्युदात्तत्वम् । सुहस्त्यः हस्तेभवोहस्त्यः भवेछन्दसीतियत् यतोनावइत्याद्युदात्तत्वम् । ततः सुशब्देनबहुव्रीहावाद्युदात्तंद्व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वम् ॥ १ ॥

१. हे नोधा ! वर्षक, शोभन-यज्ञ और पुष्प, फल आदि के कर्त्ता मरुद्गण को लक्ष्य कर सुन्दर स्तोत्र प्रेरण करो। जिन वाक्यों से, वृष्टि-धारा की तरह अर्थात् मेघों की विविध बूँदों की तरह, यज्ञ-स्थल में देवों को अभिमुख किया जाता है, उन्हीं वाक्यों को धीर और कृताञ्जलि होकर, मनोयोग-पूर्वक, प्रयुक्त करता हूँ।

तेजज्ञिरेदिवऋष्वासउक्षणोरुद्रस्यमर्याअसुराअरेपसः।
पावकासःशुचयःसूर्याइवसत्वानोनद्रप्सिनोघोरवर्पसः ॥२॥

ते । जज्ञिरे । दिवः । ऋष्वासः । उक्षणः । रुद्रस्य । मर्याः । असुराः । अरेपसः । पावकासः । शुचयः । सूर्याःऽइव । सत्वानः । न । द्रप्सिनः । घोरऽवर्पसः ॥ २ ॥

तेमरुतोदिवोन्तरिक्षाज्जज्ञिरे प्रादुर्बभूवुः कीदृशाः ऋष्वासःदर्शनीयाःउक्षणः सेक्तारोयुवानइत्यर्थः रुद्रस्यमर्याः मर्यशब्दोमनुष्यवाची इहमरुतांमर्त्यत्वासंभवात्पुत्राइत्यस्मिन्नर्थेपर्यवस्यति मरुतांरुद्रपुत्रत्वंचमन्त्रान्तरेस्पष्टम्—आतेपितर्मरुतांसुम्नमेत्विति । असुराः शत्रूणांनिरसितारः अरेपसःरेपइतिपापनाम पापरहिताः पावकासः सर्वेषांशोधकाः सूर्याइवशुचयोदीप्ताः सत्वानोन यथापरमेश्वरस्यभूतगणाः अतिशयेनबलपराक्रमाःतत्सदृशाइत्यर्थः सत्वानइतिभूतगणाउच्यन्ते—अथोयेअस्यसत्वानइत्यादौतथादर्शनात् । द्रप्सिनः वृष्टयुदकबिन्दुभिर्युक्ताः मरुतःसृष्टांनयन्तीतिश्रुतेः । घोरवर्पसःवर्पइतिरूपनाम घोररूपाः यथाभूतगणाभयंकररूपाः शत्रूणांभयंकररूपाइत्यर्थः यद्वा सत्वानोनघोरवर्पसः यथाभूतगणाभयंकररूपाः तद्वदेतेपीत्यर्थः ॥ ऋष्वासः ऋषीगतौ गत्यर्थाबुद्ध्यर्थाइति अत्रज्ञानार्थः सर्वनिघृष्वेत्यादौ वप्रत्ययान्तोनिपातितः आज्जसेरसुक् । उक्षणः वाषपूर्वस्यनिगमेइत्युपधादीर्घाभावः । अरेपसः बहुव्रीहौनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । सत्वानः षद्लृविशरणगत्यवसादनेषु प्रेईरसद्योस्तुट्चेतिविधीयमानः

१ ऋ० सं० २. ७. १६. । २ तै० सं० ४. ५. १. । ३ तै० सं० २. ४. १०.
* मरुतःसृष्टांवृष्टिंनयन्तीतिनिरुक्तम् नि०७. २४. ।

क्वनिप्प्रत्ययोबहुलवचनात्केवलादपिभवति प्रत्ययस्यपित्त्वादनुदात्तत्वेधातुस्वरःशिष्यते । घोरवर्पसः हन्तेरच्घुरचेतिहन्तेर्घुरादेशः अच् वृङ्धातोर्वृङ्शीङ्भ्यामित्यसुन् पुडागमः बहुव्रीहिस्वरः ॥ २ ॥

२. अन्तरिक्ष से मरुत् लोग उत्पन्न हुए हैं। वे दर्शनीय वीर्यशाली और रुद्र के पुत्र हैं। वे शत्रुजयी, निष्पाप, सबके शोधक सूर्य की तरह दीप्त, रुद्र के गण की तरह अथवा बहादुर की तरह बल-पराक्रमशाली, वृष्टि-बिन्दु-युक्त और घोर रूप हैं।

युवा॑नोरु॒द्राअ॒जरा॑अभो॒ग्घनो॑ववृक्षु॒रध्रि॑गावः॒पर्व॑ताइव ।
दृ॒ळ्हाचि॒द्विश्वा॒भुव॑नानि॒पार्थि॑वा॒प्रच्या॑वयन्तिदि॒व्यानि॑म॒ज्मना॑॥३॥

युवा॑नः । रु॒द्राः । अ॒जराः॑ । अ॒भो॒क्ऽहनः॑ । व॒व॒क्षुः । अध्रि॑ऽगावः । पर्व॑ताःऽइव । दृ॒ळ्हा । चि॒त् । विश्वा॑ । भुव॑नानि । पार्थि॑वा । प्र । च्य॒व॒य॒न्ति॒ । दि॒व्यानि॑ । म॒ज्मना॑ ॥ ३ ॥

युवानस्तरुणाःरुद्राः रुद्रपुत्राः अजराः जरारहिताः अभोग्घनः येदेवान् हविर्भिर्नभोजयन्तितेषांहन्तारः अध्रिगावः अधृतगमनाः परैरनिवारितगतयः पर्वताइवदृढाङ्गाः एवम्भूता मरुतः ववक्षुः स्तोतॄणामभिमतंप्रापयितुमिच्छन्ति अपिच विश्वासर्वाणिभुवनानिसद्भावंप्राप्तानिपार्थिवापृथिव्यांभवानिदिव्यानिदिविभवानिचवसूनिदृळ्हाचित् दृढान्यपिमज्मनेतिबलनाम मज्मनाशोधकेनबलेनप्रच्यावयन्तिप्रचालयन्ति ॥ अभोग्घनः भोजनयन्तीतिभोजःनभोजःअभोजःतेषां हन्तारः बहुलंछन्दसीतिहन्तेःक्विप् झयोहोन्यतरस्यामितिहकारस्यघत्वम् इन्हन्पूषार्यम्णांशाविशौतिनियमाद्दीर्घाभावः । ववक्षुः वहप्रापणेअस्मादिच्छासनिएकाचइतीट्प्रतिषेधः द्विर्भावः ढत्वकत्वषत्वानि सन्यतइतीत्वाभावश्छान्दसः लिटचुसिअमन्त्रेइतिनिषेधादाम्प्रत्ययाभावेअतोलोपइत्यकारलोपः प्रत्ययस्वरः पादादित्वान्निघाताभावः ॥ ३ ॥

३. रुद्र के पुत्र मरुद्गण तरुण और जरा-रहित हैं तथा जो देवों को हव्य नहीं देते, उनके नाशक हैं। वे अप्रतिहत-गति और पर्वत की तरह दृढ़ाङ्ग हैं। वे स्तोताओं को अभीष्ट देना चाहते हैं। पृथिवी और द्युलोक की सारी वस्तुएँ दृढ़ हैं, तो भी उनको मरुत लोग अपने बल से संचालित कर देते हैं।

चि॒त्रैर॒ञ्जिभि॒र्वपु॑षे॒व्य॑ञ्जते॒वक्षः॑सु॒रु॒क्माँ॒अधि॑येतिरेशु॒भे ।
अंसे॑ष्वेषां॒निमि॑मृक्षुर्ऋ॒ष्टयः॑सा॒कंज॑ज्ञिरेस्व॒धया॑दि॒वोनरः॑ ॥४॥

चि॒त्रैः । अ॒ञ्जिऽभिः॑ । वपु॑षे । वि । अ॒ञ्ज॒ते॒ । वक्षः॑ऽसु । रु॒क्मान् । अधि॑ । ये॒ति॒रे॒ । शु॒भे । अंसे॑षु । ए॒षा॒म् । नि । मि॒मृ॒क्षुः॒ । ऋ॒ष्टयः॑ । सा॒कम् । ज॒ज्ञि॒रे॒ । स्व॒धया॑ । दि॒वः । नरः॑ ॥ ४ ॥

वपुरितिरूपनाम वपुषेरूपायशोभार्थंमरुतः चित्रैर्नानाविधैः अञ्जिभीरूपाभिव्यञ्जनसमर्थैराभरणैःस्वशरीराणिव्यञ्जते व्यक्तंकुर्वन्तिअलङ्कुर्वन्तीत्यर्थः वक्षःसु भुजान्तरेषुरुक्मान्रोचमानान्हारान् अधियेतिरेउपरिचक्रिरे किमर्थंशुभेशोभार्थम् अपिच येषांमरुतामंसेषुस्कन्धेषुऋष्टयःआयुधानिनिमिम्रक्षुः निम्रष्टाः स्थिताःबभूवुः तैरायुधैःसहितानरोनेतारोमरुतः दिवोन्तरिक्षात्स्वधया स्वकीयेनवलेनसाकंसहजज्ञिरेप्रादुर्बभूवुः॥ येतिरे यतीप्रयत्ने लिटिअतएकहल्मध्येइत्येत्वाभ्यासलोपौ। शुभे शुभदीप्तौ सम्पदादिलक्षणोभावेक्विप् सावेकाचइतिचतुर्थ्याउदात्तत्वम्। मिम्रक्षुः म्रजूशुद्धौ सनि ऊदित्वादिडभावः हलन्ताच्चेतिसनःकित्त्वाद्गुणाभावः द्विर्वचनादि सन्यतइतीत्वम् लिट्युसि अतोलोपइत्याकारलोपः।जज्ञिरे जनीप्रादुर्भावे लिटिगमहनेत्यादिनोपधालोपः॥४॥

४. शोभा के लिए अनेक अलंकारों से मरुद्गण अपने शरीर को अलंकृत करते हैं। शोभा के लिए हृदय पर सुन्दर हार धारण करते हैं और अंग में आयुध पहनते हैं। नेतृस्थानीय मरुद्गण अन्तरिक्ष से अपने बल के साथ प्रादुर्भूत हुए थे।

ईशानकृतोधुनयोरिशादसोवातान्विद्युतस्तविषीभिरक्रत।
दुहन्त्यूधर्दिव्यानिधूतयोभूमिंपिन्वन्तिपयसापरिज्रयः॥५॥६॥

ईशानऽकृतः। धुनयः।रिशादसः। वातान्। विऽद्युतः। तविषीभिः। अक्रत। दुहन्ति। ऊधः। दिव्यानि। धूतयः। भूमिम्। पिन्वन्ति। पयसा। परिऽज्रयः॥ ५॥ ६॥

ईशानकृतःस्तोतारमीशानंधनाधिपतिंकुर्वाणाः धुनयःमेघादीनांकम्पयितारःरिशादसः रिशानांहिंसकानामत्तारः यद्वा रिशतांहिंसतांअसितारोनिरसितारः एवम्भूतामरुतः तविषीभिरात्मीयैर्बलैर्वातान् पुरोवातादीन्विद्युतः विद्योतमानास्तडितश्चाक्रतकुर्वन्ति कृत्वाचपरिज्रयः परितोगन्तारोधूतयःकम्पयितारोमरुतोदिव्यानिदिविभवानि ऊधः ऊधःस्थानीयान्यभ्राणिदुहन्ति रिक्तीकुर्वन्ति जलरहितानिकुर्वन्तीत्यर्थः तदनन्तरंभूमिंपयसामेघान्निर्गतेनोदकेनजलेनपिन्वन्ति सिञ्चन्ति॥ रिशादसः रिशहिंसायाम् इगुपधलक्षणःकः रिशन्तिहिंसन्तीतिरिशाःशत्रवः तानदन्तीतिरिशादसः असुन् नित्त्वादाद्युदात्तत्वम् कृदुत्तरपदप्रकृतिस्वरत्वम् यद्वा रिशाच्छब्दाद्वशान्तादसुक्षेपणेइत्यस्मात्क्विप् व्यत्ययेनपूर्वपदस्योपधादीर्घः अन्तोदात्तत्वंच। अक्रत करोतेश्छान्दसोवर्तमानेलुङ् मन्त्रेघसेतिच्लेर्लुक्। ऊधः सुपांसुलुगितिविभक्तेर्लुक्॥ ५॥

५. यजमानों को सम्पत्तिशाली, मेघावि को कम्पित और हिंसक को विनष्ट करके अपने बल-द्वारा मरुतों ने वायु और विद्युत् को बनाया। इसके अनन्तर, चारों दिशाओं में जाकर एवं सबको कम्पित कर द्युलोक के मेघ का दोहन किया तथा जल से भूमि को सींचा।

 ॥ इतिप्रथमस्यपञ्चमेषष्ठोवर्गः॥६॥

मरुत्वतीयशस्त्रेपिन्वन्त्यपइत्येपाधाय्या सूत्रितंच—अग्निर्नेतात्वंसोमक्रतुभिःपिन्वन्त्यपइतिधाय्याइति।

तामेतांसूक्तेषष्ठीमृचमाह—

पिन्वन्त्यपोमरुतःसुदानवःपयोघृतवद्विदथेष्वाभुवः।
अत्यंनमिहेविनयन्तिवाजिनमुत्संदुहन्तिस्तनयन्तमक्षितम्॥ ६॥

पिन्वन्ति। अपः। मरुतः। सुऽदानवः। पयः। घृतऽवत्। विदथेषु। आऽभुवः। अत्यम्। न। मिहे। वि। नयन्ति। वाजिनम्। उत्सम्। दुहन्ति। स्तनयन्तम्। अक्षितम्॥ ६॥

सुदानवः शोभनदानामरुतः पयःक्षीरवत् सारवतीरपःपिन्वन्तिसिञ्चन्ति आभुवः आभुवन्तीत्याभुवःऋत्विजः तेविदथेषुयज्ञेषुघृतवत्यथाघृतंसिञ्चन्तिएवंमरुतोपिवृष्टिंकुर्वन्तीति भावः वत्रहेतुमाह—अत्यंन यथाअश्वंसादिनोविनयन्ति युद्धार्थंशिक्षन्ति एवंमरुतोवाजिनंवेगवन्तंमेघंमिहेवर्षणायविनयन्तिस्वाधीनंकुर्वन्तीतिभावः विनीयचस्तनयन्तंगर्जन्तंअक्षितंअक्षीणंउत्संउत्सवन्त्यस्मादापइतिउत्सोमेघः तंदुहन्तिरिक्तीकुर्वन्ति॥ सुदानवः नुमत्ययान्तोदानुशब्दआद्युदात्तः बहुव्रीहावाद्युदात्तंद्व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वम्। मिहे मिहसेचने सम्पदादिलक्षणोभावेक्विप् सावेकाचइतिविभक्तेरुदात्तत्वम्। स्तनयन्तम् स्तनयशब्दश्चुरादिरदन्तः अतोलोपस्यस्थानिवद्भावाद्भ्वाद्यभावः॥ ६॥

६. जैसे यज्ञभूमि में ऋत्विक् लोग घी का सिंचन करते हैं, वैसे ही दान-परायण मरुत् लोग साररूप जल का सिंचन करते हैं। वे लोग घोड़े की तरह वेगवान् मेघ को बरसने के लिए विनम्र करते और गर्जनकारी तथा अक्षय्य मेघ का दोहन करते हैं।

महिषासोमायिनश्चित्रभानवोगिरयोनस्वतवसोरघुष्यदः।
मृगाइवहस्तिनःखादथावनायदारुणीषुतविषीरयुग्ध्वम्॥७॥

महिषासः। मायिनः। चित्रऽभानवः। गिरयः। न। स्वऽतवसः। रघुऽस्यदः। मृगाःऽइव। हस्तिनः। खादथ। वना। यत्। आरुणीषु। तविषीः। अयुग्ध्वम्॥ ७॥

महिषइतिमहन्नाम महिषासोमहान्तःमायेतिज्ञाननाम मायिनःप्राज्ञाःचित्रभानवःशोभनदीप्तयःगिरयोनस्वतवसःपर्वताइवस्वकीयेनबलेनयुक्तारघुष्यदः शीघ्रगमनाः हेमरुतःएवम्भूतगुणविशिष्टायूयं हस्तिनोहस्तवन्तोमृगाइवगजाइव वनावनानिवृक्षजातानिखादथभक्षयथ भञ्जयथेतियावत् यद्यस्मात्आरुणीषुअरुणवर्णासुवडवासुतविषीबलान्ययुग्ध्वंसंयोजितवन्तः तस्मात्प्रवतामिववाहनस्यापिप्रबलत्वात्तत्संयुक्ताभवन्तः सर्वंभजन्तीत्यर्थः ॥ रघुष्यदः स्यन्दूप्रस्रवणे रघुशीघ्रंस्यन्दन्तेगच्छन्तीतिरघुष्यदः क्विप्चेतिक्विप् अनिदितामितिनलोपः वाप्रमूलब्धलमितिलत्वविकल्पः कृदुत्तरपदप्रकृतिस्वरत्वम् । खादथ खादृभक्षणे । अयुग्ध्वं युजिर्योगे लुङि च्लेःसिच् एकाचइतीट्प्रतिषेधः धिचेतिसकारलोपः चोःकुरितिकुत्वम् अडागमउदात्तः यद्वृत्तयोगादनिघातः ॥ ७ ॥

७. मरुद्गण! तुम लोग महान्, बुद्धिशाली, सुन्दर, तेजोविशिष्ट, पर्वत की तरह बली और द्रुतगतिशील हो। तुम लोग करयुक्त गज की तरह वन का भक्षण करते हो; क्योंकि तुम लोगों ने अरुण-वर्ण वड़वा को बल प्रदान किया है।

अष्टमीमृचमाह—

सिंहाइवनानदतिप्रचेतसःपिशाइवसुपिशोविश्ववेदसः ।
क्षपोजिन्वन्तःपृषतीभिर्ऋष्टिभिःसमित्सबाधःशवसाहिमन्यवः ॥८

सिंहाःऽइव । नानदति । प्रऽचेतसः । पिशाःऽइव । सुऽपिशः ।
विश्वऽवेदसः । क्षपः । जिन्वन्तः । पृषतीभिः । ऋष्टिऽभिः । सम् ।
इत् । सऽबाधः । शवसा । अहिऽमन्यवः ॥ ८ ॥

प्रचेतसःप्रकृष्टज्ञानामरुतः सिंहाइवनानदतिभृशंशब्दंकुर्वन्ति यथासिंहाः गिरिगह्वरेषुगंभीरशब्दंकुर्वन्ति एवंमरुतस्त्वप्यागतेषुगम्भीरःशब्दउत्पद्यतइतिभावः तथासुपिशःशोभनावयवाःशोभनालङ्कारावा तत्रदृष्टान्तः—पिशाइव पेशइतिरूपनाम यथारुरवःस्वशरीरगतैःश्वेतबिन्दुभिःअलंकृतास्तद्वत् विश्ववेदसः सर्वज्ञाःक्षपःशत्रूणांक्षपयितारः जिन्वन्तः स्तोतृन्प्रीणयन्तःशवसाबलेनअहिमन्यवः आहननशीलामन्युयुक्ताःयद्विषयःकोपोजायतेतस्यहननेसमर्थाइत्यर्थः यद्वा मननंज्ञानं मन्युः अहीनज्ञानाः उत्कृष्टबुद्धयइत्यर्थः एवम्भूतामरुतःपृषतीभिः पृषत्यइतिमरुतांवाहनस्याख्या पृषत्यःश्वेतबिन्द्वङ्किताः मृग्यइत्यैतिहासिकाः । नानावर्णामेघमालाइतिनैरुक्ताः । ताभिःऋष्टिभिरायुधैश्चसहिताःसन्तःसबाधःशत्रुभिर्बाधितान्यजमानान्समित्समानमेवयुगपदेवर - क्षितुमागच्छन्तीतिशेषः ॥ नानदति णदअव्यक्तेशब्दे अस्माद्यङ्लुगन्ताल्लट् । पिशाइव पिशअवयवे इगुपधलक्षणःकः । सुपिशः सुपूर्वात्पिशअवयवेइत्यस्मात् क्विप्चेतिक्विप् । पृषतीभिः पृषुसेचने वर्तमानेपृषद्बृहन्महज्जगच्छतृवच्चेतिशतृवद्भावादुगितश्चेतिङीप् अतएवशतुरनुमइतिनद्याउदात्तत्वेमा-

मे बृहन्महतोरुपसंख्यानमितिनियमात्तस्याभावः ॥ ८ ॥

८. उच्च-ज्ञानशाली मरुद्गण सिंह की तरह निनाद करते हैं। सर्वज्ञाता मरुद्गण हिरण की तरह सुन्दर हैं। मरुत् लोग शत्रु-विनाशक, स्तोता के प्रीतिकारी और क्रुद्ध होने पर नाशकारी बल से सम्पन्न हैं। ऐसे मरुद्गण अपने वाहन मृग और हथियार के साथ शत्रु-द्वारा पीड़ित यजमान की रक्षा करने के लिए साथ ही आते हैं।

रोदसीआवदतागणश्रियोनृषाचःशूराःशवसाहिमन्यवः।
आवन्धुरेष्वमतिर्नदर्शताविद्युन्नतस्थौमरुतोरथेषुवः ॥९॥

रोदसी इति। आ। वदत। गणऽश्रियः। नृऽसाचः। शूराः। शवसा। अहिऽमन्यवः। आ। वन्धुरेषु। अमतिः। न। दर्शता। विऽद्युत्। न। तस्थौ। मरुतः। रथेषु। वः ॥ ९ ॥

हेगणश्रियः गणशःश्रयमाणाः सप्तगणरूपेणावस्थिताः नृषाचः नॄन्यजमानान् हविः-स्वीकरणायसेवमानाः शूराः शौर्योपेताः एवम्भूताः हेमरुतः शवसाबलेनअहिमन्यवः आहन-नस्वभावकोपयुक्ताःसन्तः रोदसीद्यावापृथिव्यौ आवदत आसमन्ताच्छब्दयत युष्मदागमनेस-तिभवदीयशब्देनद्यावापृथिव्यौपूर्णेकुरुतेतिभावः किञ्च हेमरुतः वोयुष्माकंतेजः वन्धुरेषुबन्धक-काष्ठनिर्मितंसारथेःस्थानंवन्धुरमित्युच्यते तद्युक्तेषुरथेष्वातस्थौआतिष्ठतिअवस्थितंसत्सर्वैर्दृश्य-ते तत्रदृष्टान्तद्वयमुच्यते—अमतिर्न अमतिरितिरूपनाम यथानिर्मलंरूपंसर्वैर्दृश्यते दर्शताविद्युन्न यथावादर्शनीयाविद्युत्मेघस्थासर्वैर्दृश्यतेएवंरथेवस्थितानांयुष्माकंज्योतिरपिसर्वैर्दृश्यतइत्यर्थः॥ वदत कचितुनुघेत्यादिनादीर्घः। नृषाचः पादादित्वादामन्त्रिताद्युदात्तत्वम्। अमतिः अमगत्यादिषु अमेरतिरित्यौणादिकोतिप्रत्ययः प्रत्ययाद्युदात्तत्वम्। दर्शता भृमृदृशीत्यादिनाअतच्प्रत्ययः चित्त्वादन्तोदात्तत्वम् ॥ ९ ॥

९. हे बल-बद्ध, मनुष्य-हितैषी और वीर्यशाली मरुद्गण! तुम लोग बल-द्वारा विध्वंसक क्रोध से युक्त होकर आकाश और पृथिवी को शब्दायमान करो। मरुद्गण! तुम लोगों का तेज विमल-स्वरूप अथवा दर्शनीय विद्युत् की तरह रथ के सारथिवाले स्थान पर अव-स्थान करता है।

विश्ववेदसोरयिभिःसमोकसःसम्मिश्लासस्तविषीभिर्विराप्शिनः।
अस्तारइषुंदधिरेगभस्त्योरनन्तशुष्मावृषखादयोनरः ॥१०॥७॥

विश्वऽवेदसः । रयिऽभिः । सम्ऽओकसः । सम्ऽमिश्लासः । तविषीभिः ।
विऽरप्शिनः । अस्तारः । इषुम् । दधिरे । गभस्त्योः । अनन्तऽशुष्माः ।
वृषऽखादयः । नरः ॥ १० ॥ ७ ॥

विश्ववेदसः सर्वज्ञाः रयिभिर्धनैःसमोकसः समाननिवासाः समवेतावाधनाधिपतयइत्यर्थः तविषीभिः बलैः संमिश्लासः संमिश्राः संयुक्ताइत्यर्थः विरप्शिनः महन्नामैतत् महान्तः अस्तारः शत्रूणांनिरसितारः अनन्तशुष्माः अनवच्छिन्नबलाः वृषखादयः वृषाइन्द्रः खादिरायुधस्थानीयोयेषांतेतथोक्ताः यद्वा वृषासोमःखादिःखाद्यःपेयोयेषांतेनरोनेतारः एवम्भूताः मरुतः गभस्तिरितिबाहुनाम गभस्त्योःबाह्वोःइषुंदधिरे शत्रूणांनिरसनायधनुर्बाणादिकंआयुधंधारयन्ति ॥ समोकसः उचसमवाये असुनिबहुलवचनात्कुत्वमितिओकउचःकइत्यत्रोक्तम् बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । संमिश्लासः कपिलकादित्वाल्लत्वम् । विरप्शिनः रपलपव्यक्तायां वाचि विपूर्वादस्मात् बहुलवचनात्शक्प्रत्ययः विविधंशब्दंरपन्तीतिविरप्शाःस्तोतारः तेएषांसन्तीतिविरप्शिनः यद्वा विविधंरपणंविरप्शं तदेषामस्तीति मरुतोहिविविधंशब्दंकुर्वतेइति प्रत्ययस्वरः । अस्तारः ताच्छीलिकस्तृन् इडभावश्छान्दसः नित्त्वादाद्युदात्तत्वम् । अनन्तशुष्माः नास्त्यन्तोस्येत्यनन्तः नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् अनन्तंशुष्मोबलंयेषां बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । वृषखादयः खादृभक्षणे उणादिकइन्प्रत्ययः वृषन्शब्दः कनिन्प्रत्ययान्तआद्युदात्तः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् ॥ १० ॥

१०. सर्वज्ञ, धनपति, बलशाली, शत्रु-नाशक, अमित-पराक्रमी, सोम-भक्षक और नेता मरुद्गण भुजाओं में हथियार धारण करते हैं।

एकादशीमृचमाह—

हिरण्ययेभिःपविभिःपयोवृधउज्जिघ्नन्तआपथ्योनपर्वतान् ।
मखाअयासःस्वसृतोध्रुवच्युतोदुध्रकृतोमरुतोभ्राजदृष्टयः ॥११॥

हिरण्ययेभिः । पविऽभिः । पयःऽवृधः । उत् । जिघ्नन्ते ।
आऽपथ्यः । न । पर्वतान् । मखाः । अयासः । स्वऽसृतः । ध्रुवऽच्युतः ।
दुध्रऽकृतः । मरुतः । भ्राजत्ऽऋष्टयः ॥ ११ ॥

मरुतःहिरण्ययेभिःसुवर्णमयैः यद्वा हितरमणीयैः पविभिःरथानांचक्रैःपर्वतान्पर्वतोमेघान् यद्वा शिलोच्चयान्उज्जिघ्नन्तेऊर्ध्वंगमयन्तिस्थानात्प्रच्यावयन्तीत्यर्थः तत्रदृष्टान्तः—पथ्योन यथा पथिगच्छन्रथःमार्गेःआस्थितंतृणवृक्षादिकंचूर्णीकृत्योर्ध्वंनयतिगमयति यद्वा यथासंयुक्तागजाः मार्गेस्थितंवृक्षादिकंभग्नंकुर्वन्ति कीदृशामरुतःपयोवृधःपयसोवृष्ट्युदकस्यवर्धयितारः यद्वा पृश्नेः

पयसावर्धमानाः वृष्णियैवैपयसोमरुतोजाताइतिहिश्रूयते[1]। मखाः मखइतियज्ञनाम तद्वन्तः अयासः देवयजनदेशंप्रतिगन्तारः स्वसृतः शत्रून्प्रतिस्वयमेवसरन्तोगच्छन्तः ध्रुवच्युतः ध्रुवाणांनिश्चलानांपर्वतादीनामपिच्यावयितारः दुध्रकृतः दुध्रंदुष्टानांधारयितारंआत्मानंकुर्वाणाः यद्वा दुर्धरमन्यैर्धर्तुमशक्यंआत्मानंकुर्वाणाः भ्राजदृष्टयः दीप्यमानायुधाः ॥ उज्जिघ्नन्ते हन्तेर्व्यत्ययेनात्मनेपदम् बहुलंछन्दसीतिशपःश्लुः बहुलंछन्दसीत्यभ्यासस्येत्वम् गमहनेत्यादिनोपधालोपः होहन्तेरितिघत्वम् व्यत्ययेनान्तादेशः। पथ्यः पथिभवः भवेछन्दसीतियत् नस्तद्धितेइतिटिलोपः व्यत्ययेनस्वरितत्वम् यद्वा छन्दसीवनिपावितिमत्वर्थीयईकारः उदात्तस्वरितयोर्यणइतिविभक्तेःस्वरितत्वम्। अयासः अयपयगतौ अयन्तइत्ययाः पचाद्यच् आज्जसेरसुक्। दुध्रकृतः अत्रदुःशब्देनदुष्टाःलक्ष्यन्ते धृञ्धारणे दुष्टान्धारयतीतिदुध्रः मूलविभुजादित्वात्कप्रत्ययः यद्वा ईषद्दुःसुष्वितिदुःशब्देउपपदेकर्मणिखल् गुणाभावश्छान्दसः तंकुर्वन्तीतिदुध्रकृतः करोतेः क्विप्चेतिक्विप् रेफलोपश्छान्दसः ॥ ११ ॥

११. वृष्टि-वर्द्धन-कर्त्ता मरुद्गण सोमे के रथ-चक्र-द्वारा मार्गस्थ तिमके और पेड़ की तरह मेघों को उनके स्थान से ऊपर उठा लेते हैं। वे यज्ञ-प्रिय देवों के यज्ञ-स्थल में गमन करते हैं। स्वयं शत्रुओं पर आक्रमण करते हैं। अचल पदार्थ का संचालन करते हैं। दूसरों के लिए अशक्य सम्पत् और प्रकाशशाली आयुध धारण करते हैं।

घृषुंपावकंवनिनंविचर्षणिंरुद्रस्यसूनुंहवसागृणीमसि।
रजस्तुरंतवसंमारुतंगणमृजीषिणंवृषणंसश्चतश्रिये ॥ १२ ॥

घृषुम्। पावकम्। वनिनम्। विऽचर्षणिम्। रुद्रस्य। सूनुम्। हवसा। गृणीमसि। रजःऽतुरम्। तवसम्। मारुतम्। गणम्। ऋजीषिणम्। वृषणम्। सश्चत। श्रिये ॥ १२ ॥

घृषुंशत्रूणांबलस्यघर्षकंविनाशयितारंपावकंसर्वेषांशोधकं वनिनं वनमित्युदकनाम उदकवन्तंवृष्टिमदमित्यर्थः विचर्षणिंविशेषेणसर्वस्यद्रष्टारं रुद्रस्यमहादेवस्यसूनुंपुत्रभूतंएवंविधंमरुतांसमूहंहवसाआह्वानसाधनेनस्तोत्रेणगृणीमसिशब्दयामःस्तुमइत्यर्थः हेऋत्विग्यजमानाः यूयमपिश्रियेऐश्वर्यायधनार्थंमारुतंगणंमरुतांसंघंसश्चतमामुत कीदृशंरजस्तुरंपार्थिवस्यपांसोःत्वरयितारंप्रेरकमित्यर्थः तवसं प्रवृद्धंऋजीषिणंतृतीयसवनेहिमरुतःस्तूयंते तत्रचऋजीषमभिषुण्वन्तीति ऋजीषसम्बन्धःश्रुतः अतस्तद्वन्तंवृषणंकामानांवर्षितारम् ॥ हवसा ह्वेञोसिमत्ययेबहुलंछन्दसीतिसम्प्रसारणम्। गृणीमसि गृशब्दे इदन्तोमसिः प्वादीनांह्रस्वइतिह्रस्वत्वम्। रजस्तुरं रजांसितु-

[1] तै० सं० २. २. ११.।

तोर्तीविरजस्तूः तुरत्वरणे क्विप्चेतिक्विप् । वृषणं वाषपूर्वस्यनिगमेइतिदीर्घाभावः । सश्चत ग्लुञ्चुष-स्जगतावित्यत्रसश्चिमप्येकेइतिधातुवृत्तावुक्तम् गतिकर्मसुचसश्चतीतिपठितम् । श्रिये सावेकाच-इतिविभक्तेरुदात्तत्वम् ॥ १२ ॥

१२. रिपु-विध्वंसक, सर्व-वस्तु-शोधक, वृष्टिदाता, सर्वद्रष्टा और रुद्र-पुत्र मरुद्गण की, हम स्तोत्र-द्वारा, स्तुति करते हैं। धूलिप्रेरक, शक्तिशाली, ऋजीष-युक्त और अभीष्टवर्षी मरुतों के पास, धन के लिए, जाओ।

प्रनूसमर्तःशवसाजनाँअतितस्थौवंऊतीमरुतोयमावत ।
अर्वद्भिर्वाजंभरतेधनानृभिरापृच्छ्यंक्रतुमाक्षेतिपुष्यति ॥१३॥

प्र । नु । सः । मर्तः । शवसा । जनान् । अति । तस्थौ । वः ।
ऊती । मरुतः । यम् । आवत । अर्वत्ऽभिः । वाजम् । भरते ।
धना । नृऽभिः । आऽपृच्छ्यम् । क्रतुम् । आ । क्षेति । पुष्यति ॥१३॥

समर्तःमनुष्यः शवसाबलेनजनान् जातानन्यान् पुरुषानतिअतीत्यनुक्षिप्रंतस्थौप्रति-ष्ठितोभवति हेमरुतोवोयुष्माकंऊतीऊत्यारक्षणेनयंपुरुषंआवतअरक्षतअपिचसपुरुषः अर्वद्भिरश्वैः साधनभूतैर्वाजमन्नंनृभिःस्वकीयैर्मनुष्यैः धनाधनानिचभरतेसम्पादयति तथाआपृच्छ्यं आप्रष्टव्यंशोभनंक्रतुंअग्निष्टोमादिकर्मआक्षेतिआप्नोति पुष्यतिप्रजापशुभिःपुष्टोभवतिच ॥ ऊती तृतीयायाःपूर्वसवर्णदीर्घत्वम् । नृभिः नृचान्यतरस्यामितिविभक्त्युदात्तत्वप्रतिषेधः । आपृच्छ्यं छन्दसिनिष्टर्क्येत्यादौआङ्पूर्वात्पृच्छतेःक्यप्प्रत्ययान्तोनिपात्यते ग्रहिज्यादिनास-म्प्रसारणम् प्रत्ययस्यपित्त्वादनुदात्तत्वेधातुस्वरःशिष्यते कृदुत्तरपदप्रकृतिस्वरत्वम् । क्षेति क्षिनिवासगत्योः बहुलंछन्दसीतिविकरणस्यलुक् । पुष्यति पुषपुष्टौ दिवादित्वाच्छ्यन् नित्त्वादा-द्युदात्तत्वम् तिङःपरत्वान्निघाताभावः ॥ १३ ॥

१३. मरुद्गण! तुम लोग जिसे आश्रय देते हुए रक्षित करते हो, वह पुरुष सबसे बली हो जाता और वह अश्व-द्वारा अन्न और मनुष्य-द्वारा धन प्राप्त करता है। वही बढ़िया यज्ञ करता और ऐश्वर्यशाली होता है।

चर्कृत्यंमरुतःपृत्सुदुष्टरंद्युमन्तंशुष्मंमघवत्सुधत्तन ।
धनस्पृतमुक्थ्यंविश्वचर्षणिंतोकंपुष्येमतनयंशतंहिमाः ॥१४॥

चर्कृत्यम् । मरुतः । पृत्ऽसु । दुस्तरम् । द्युऽमन्तम् । शुष्मम् ।
मघवत्ऽसु । धत्तन । धनऽस्पृतम् । उक्थ्यम् । विश्वऽचर्षणिम् ।
तोकम् । पुष्येम । तनयम् । शतम् । हिमाः ॥ १४ ॥

हेमरुतः मघवत्सुहविर्लक्षणधनयुक्तेषुयजमानेषुपुत्रंधत्तनस्थापयतदत्तेतियावत् कीदृशंपु- त्रं चर्कृत्यंकार्येषुपुनःपुनःपुरस्कर्तव्यं सर्वकर्मकुशलमित्यर्थः पृत्सुसङ्ग्रामेषुदुष्टरंदुःखेनतरित- व्यंअजेयमित्यर्थः द्युमन्तंदीप्तिमन्तंशुष्मंशत्रूणांशोषकं बलवन्तंधनस्पृतं धनानां स्पष्टारंधनैः प्रीतंवाउक्थ्यं उक्थं स्तोत्रंतदर्हंप्रशस्यमित्यर्थः विश्वचर्षणिंविशेषेणद्रष्टारंसर्वज्ञंएवंविधंतोकंपु- त्रंतनयंपौत्रंचशतंहिमाः हेमंतर्तूपलक्षितान्शतसंवत्सरान्जीवन्तःसन्तः पुष्येमपोषयेम अत्रहिम- शब्देनतद्युक्ताहेमन्तर्तवोभिधीयन्ते तथाचब्राह्मणमेवमाम्नायते—शतंहिमाइत्याह शतंत्वाहेमन्ता- निधिषीयेतिवावैतदाहेति[1] ॥ चर्कृत्यम् प्रकृतिग्रहणेयङ्लुगन्तस्यापिग्रहणमितिन्यायेनकरोतेर्य- ङ्लुगन्तात् विभाषाकृवृषोरितिक्यप् तुगागमः प्रत्ययस्यपित्त्वादनुदात्तत्वेधातुस्वरःशिष्यते। पृत्सु पदादिषुमांस्पृत्स्नूनामुपसंख्यानमितिपृतनाशब्दस्यपृदादेशः। दुष्टरं तॄप्लवनतरणयोः ईषद्दुःसुष्वि- तिखल् सुषामादेराकृतिगणत्वात्षत्वम् लित्स्वरेणप्रत्ययात्पूर्वस्योदात्तत्वम्। धत्तन तप्तनप्तनथना- श्चेतितस्यतनादेशः। हिमाः हन्तेर्हिंचेतिमक्प्रत्ययः अर्शआद्यच् वृषादित्वादाद्युदात्तत्वम्॥१४॥

१४. मघवृगण! तुम लोग यजमानों को सब कार्यों में निपुण, युद्ध में अजेय, दीप्तिमान्, शत्रु-विनाशक, धनवान्, प्रशंसा-भाजन और सर्वज्ञ पुत्र प्रदान करो। ऐसे पुत्र-पौत्रों को हम सौ वर्ष पोषित करना अर्थात् सौ वर्ष जीवित रखना चाहते हैं।

ऐकादशिनस्यमारुतस्यपशोर्वपायागस्यनूष्ठिरमित्येषायाज्या सूत्रितंच—शुचीवोहव्याम- रुतःशुचीनांनूष्ठिरंमरुतोवीरवन्तमिति।

तामेतांसूक्तेपञ्चदशीमृचमाह—

नूष्ठिरंमरुतोवीरवन्तमृतीषाहंरयिमस्मासुधत्त।
सहस्रिणंशतिनंशूशुवांसंप्रातर्मक्षूधियावसुर्जगम्यात्॥१५॥८॥

नु। स्थिरम्। मरुतः। वीरऽवन्तम्। ऋतिऽसहम्। रयिम्।
अस्मासु। धत्त। सहस्रिणम्। शतिनम्। शूशुऽवांसम्। प्रातः।
मक्षु। धियाऽवसुः। जगम्यात्॥ १५॥ ८॥

हेमरुतः स्थिरंस्थास्नुंवीरवन्तंवीरैःपुत्रैर्वर्धितं यद्वा वीर्योपेतंऋतीषाहंगन्तॄणांशत्रूणामभि- भवितारं एवंविधंरयिंपुत्रलक्षणंधनंअस्मासुधत्तस्थापयत सहस्रिणंशतिनंएतत्संख्याकधनवन्तं अतएवशूशुवांसंप्रवृद्धंअपिचास्माकं रक्षणायधियाबुद्ध्याकर्मणावाप्राप्तधनोमरुद्गणःप्रातःकाले जगम्यात्आगच्छतु॥ नूष्ठिरं ऋचितुनुघेत्यादिनादीर्घः पूर्वपदादितिषत्वम्। ऋतीषाहं ऋगतौ

---

1 तै० १.५.८.।

कर्तरिक्विप् षहअभिभवे छन्दसिसहइतिण्विप्रत्ययः अन्येषामपिदृश्यतइतिपूर्वपदस्यदीर्घत्वम् सुषामादित्वात्षत्वम् । शूशुवांसं टुओश्विगतिवृद्ध्योः लिटःक्वसुः विभाषाश्वेरितिसम्प्रसारणम् द्विर्वचने तुजादित्वादभ्यासस्यदीर्घत्वम् वस्वेकाजाद्घसामितिनियमादिडभावः प्रत्ययस्वरः॥१५॥

१५. मरुद्गण ! हमें स्थायी, वीर्यशाली और शत्रुजयी धन दो। इस प्रकार शत-सहस्र धन से युक्त होने पर हमारी रक्षा के लिए, जिन्होंने कर्म-द्वारा धन पाया है, वे मरुद्गण आगमन करें।

॥ इतिप्रथमस्यपञ्चमेष्टमोवर्गः ॥ ८ ॥

॥ इतिप्रथमेमण्डलेएकादशोनुवाकः ११ ॥

द्वादशेनुवाकेनवसूक्तानि तत्रपश्वेत्यादीनि षट्सूक्तानिद्विपदानि तेष्वध्ययनसमयेद्वेद्वेऋचौ चतुःपदामेकैकामृचंकृत्वासमाम्नायते अयुक्संख्यासुतुयान्त्यातिरिच्यतेसातथैवाम्नायते प्रायेणार्थोपिद्वयोर्द्विपदयोरेकएव प्रयोगेतुताःपृथक्शंसनीयाः सूत्र्यतेहि पश्वानतायुमितिद्विपदमिति। तत्रपश्वेतिदशर्चंप्रथमंसूक्तम् अत्रानुक्रम्यते—पश्वादशपराशरःशाक्त्योद्वैपदंतदिति । शक्तिपुत्रः पराशरऋषिः तत्पुत्रत्वंचस्मर्यते वसिष्ठस्यसुतःशक्तिःशक्तेःपुत्रःपराशरइति । द्विपदाविराट्छन्दः विंशतिकाद्विपदाविराजइतिहितल्लक्षणम् अग्निर्देवता परमाग्नेयमैन्द्रादितिपरिभाषितम् पश्वानतायुमित्यारभ्य इत्थाहीत्यतःप्राक्नवसूक्तजातंतत्सर्वमाग्नेयमितितस्यार्थः द्वैपदंतदित्युक्त्वादिदमादीनिषट्सूक्तानितुह्यादिपरिभाषयाद्विपदानि दशमेहनिवैश्वदेवशस्त्रेवैश्वदेवसूक्तात्पूर्वं एतद्द्वैपदंसूक्तंशंसनीयं सूत्रमुदाहृतम् ।

तत्रप्रथमामृचमाह—

प॒श्वान ता॒युं गुहा॒ चत॑न्तं॒ नमो॑ युजा॒नं नमो॒ वह॑न्तम् । (१)
स॒जोषा॒ धीराः॑ प॒दैरनु॑ ग्म॒न्नुप॑ त्वा सीद॒न्विश्वे॒ यज॑त्राः (२) ॥ १ ॥

प॒श्वा । न । ता॒युम् । गुहा॑ । चत॑न्तम् । नमः॑ । यु॒जा॒नम् । नमः॑ । वह॑न्तम् । (१) स॒ऽजोषाः॑ । धीराः॑ । प॒दैः । अनु॑ । ग्म॒न् । उप॑ । त्वा॒ । सी॒द॒न् । विश्वे॑ । यज॑त्राः (२) ॥ १ ॥

धीराः मेधाविनोदेवाः सजोषाःसमानप्रीतयःसन्तः हेअग्ने त्वांपदैर्मार्गैःपादकृतैर्लाञ्छनैः अनुग्मन्अन्वगमन् कीदृशंपश्वाअपहृतेनपशुनासहवर्तमानंतायुंन तायुरितिस्तेननाम यथास्तेनःपरकीयंपश्वादिधनमपहृत्यदुष्प्रवेशेगिरिगह्वरेवर्ततेतद्वत् गुहाचतन्तंअन्नूपायांगुहायांगच्छन्तंव-

र्तमानं चतति र्गतिकर्मा । तथाचतैत्तिरीयैःअग्नेरप्सुप्रवेशःसमाम्नायते—सनिलायत सोपःप्राविश-दिति।यद्वा अश्वत्थगुहायांगच्छन्तंवर्तमानं श्रूयतेच—अग्निर्देवेभ्योनिलायत।अश्वोरूपंकृत्वा सो-श्वत्थेसंवत्सरमतिष्ठदिति[3] । तथानमोयुजानंहविर्लक्षणमन्नमात्मनासंयुजानंनमोवहन्तंदेवेभ्यःप्र-त्तंहविर्वहन्तंयजत्राःयजनीयाः विश्वेसर्वेदेवाः हेअग्ने त्वात्वांउपसीदन्समीपंप्राप्नुवन्ददृशुरित्य-र्थः॥ पश्वा तृतीयैकवचनस्यजसादिषुछन्दसिवावचनमितिनाभावाभावः उदात्तयणइतिविभ-क्तेरुदात्तत्वम् । गुहा भिदादिषुपाठादङ्प्रत्ययान्तः वृषादिषुपाठादाद्युदात्तत्वम् सुपांसुलुगितिसप्त-म्यालुक् । युजानं शानचि बहुलंछन्दसीतिविकरणस्यलुक् । सजोषाः जुषीप्रीतिसेवनयोः समानंजुषन्तइतिसजोषसः समानस्यच्छन्दसीतिसभावः कृदुत्तरपदप्रकृतिस्वरत्वम् सुपांसुलुगि-तिजसःसुः । ग्मन् गमेर्लुङि मन्त्रेघसेतिच्लेर्लुक् गमहनेत्यादिनोपधालोपः बहुलंछन्दस्यमाङ्योगेपीत्यडभावः । यजत्राः अमिनक्षीत्यादिनात्रन्प्रत्ययः नित्त्वादाद्युदात्तत्वम् ॥ १ ॥

१. अग्नि ! पशु चुरानेवाले चोर की तरह तुम भी गुहा में अवस्थान करो। मेधावी और सवृश-प्रीति-सम्पन्न देवों ने तुम्हारे पद-चिह्नों को लक्ष्य कर अनुगमन किया था। तुम स्वयं हव्य सेवन करो और देवों के लिए हव्य वहन करो । यजनीय सारे देवगण तुम्हारे पास आये थे।

द्वितीयामृचमाह—

ऋतस्यदेवाअनुव्रतागुर्भुवत्परिष्टिर्द्यौर्नभूम ।(३)
वर्धन्तीमापःपन्वासुशिश्विमृतस्ययोनागर्भेसुजातम् (४)॥२॥

ऋतस्य । देवाः । अनु । व्रता । गुः । भुवत् । परिष्टिः । द्यौः । न । भूम । (३) वर्धन्ति । ईम् । आपः । पन्वा । सुऽशिश्विम् । ऋतस्य । योना । गर्भे । सुऽजातम् (४) ॥ २ ॥

उक्तएवार्थःस्पष्टीक्रियते देवाःऋतस्यगतस्यपलायितस्याग्नेः व्रताव्रतानिकर्माणिगमनाव-स्थानशयनादिरूपाणिअनुगुःअन्वेष्टुमगमन् तदनन्तरंपरिष्टिःपरितःसर्वतोन्वेषणंभुवदभवत् भू-मभूमिरपिअग्नेरन्वेष्टृभिर्देवैर्द्यौर्न स्वर्गइवाभूत् इन्द्रादयःसर्वेदेवाः अग्नेर्गवेषणायभूलोकंप्राप्ता-इत्यर्थः आपः अब्देवताः ईं एनंउदकेप्रविष्टमग्निंवर्धन्तिप्रवर्धयन्ति यथादेवानपश्यन्तितथाऽरक्ष-न्नित्यर्थः कीदृशं पन्वास्तोत्रेणसुशिश्विंसुष्ठुप्रवर्धितंऋतस्ययोना योनिरित्युदकनाम ऋतस्य यज्ञस्यान्नस्यवाकारणभूते जले गर्भेगर्भस्थानेमध्येसुजातंसुष्ठुप्रादुर्भूतं एवमप्सुवर्तमानंअग्निं दे-वेभ्यःमत्स्यःप्रावोचत् तदनन्तरंदेवास्तमज्ञासिषुरितिभावः तथाचतैत्तिरीयकम्—सनिलायत

---

१ नि० ३. २०. । २ तै० सं. २. २. ६. । ३ तै० ब्रा० १. १. ३. ।

सोपःप्राविशत्तंदेवाःप्रैषमैच्छन्तंमत्स्यःप्राब्रवीदिति ॥ व्रता शेश्छन्दसिबहुलमितिशेर्लोपः । गुः इण्गतौ इणोगालुङीतिगादेशः गातिस्थेतिसिचोलुक् आतइतिझेर्जुस्उस्यपदान्तादितिपररूपत्वम्। परिष्टिः इषइच्छायाम् क्तिनि तितुत्रेतीट्प्रतिषेधः शकन्ध्वादित्वात्पररूपत्वम् तादौचनितीतिगतेःप्रकृतिस्वरत्वम् । भूम सुपांसुलुगितिसोर्डादेशः ह्रस्वश्छान्दसः । वर्धन्ति छन्दस्युभयथेतिशपआर्धधातुकत्वात् णेरनिटीतिणिलोपः शपःपित्त्वादनुदात्तत्वम् तिङश्चलसार्वधातुकस्वरेणधातुस्वरःशिष्यते । पन्वा पनस्तुतौ औणादिकोभावेउप्रत्ययः । सुशिश्वि टुओश्विगतिवृद्ध्योः आदृगमहनजनइत्यत्रउत्सर्गश्छन्दसीतिवचनात्किप्रत्ययः वचिस्वपीत्यादिनासम्प्रसारणम् लिड्यङोश्चाबाधद्भिर्भविबहुलंछन्दसीत्युकारस्येत्वम् छान्दसोयणादेशः सुःपूजायामितिसोःकर्मप्रवचनीयत्वम् स्वतीपूजायामितिप्रादिसमासःअव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥ २ ॥

२. देवों ने भागे हुए अग्नि के पलायन-कार्य आदि का अन्वेषण किया था। अनन्तर चारों ओर अन्वेषण किया गया। तुम इन्द्र आदि सब देवों के आने पर स्वर्ग की तरह हुए थे अर्थात् अग्नि का अनुसन्धान करने सब देवता भूलोक आये थे। अग्नि यज्ञ के कारण-स्वरूप, जलगर्भ में प्रादुर्भूत और स्तोत्र-द्वारा प्रवर्द्धित हैं। अग्नि को छिपाने के लिए जल बढ़ गया था।

पुष्टिर्नरण्वाक्षितिर्नपृथ्वीगिरिर्नभुज्मक्षोदोनशम्भु । (५)
अत्योनाज्मन्त्सर्गप्रतक्तःसिन्धुर्नक्षोदःकईंवराते (६) ॥ ३॥

पुष्टिः । न । रण्वा । क्षितिः । न । पृथ्वी । गिरिः । न । भुज्म । क्षोदः । न । शम्ऽभु । (५) अत्यः । न । अज्मन् । सर्गऽप्रतक्तः । सिन्धुः । न । क्षोदः । कः । ईम् । वराते (६) ॥ ३ ॥

रण्वारमणीयासर्वेषांह्या पुष्टिर्न अभिमतफलानामभिवृद्धिरिव अग्निःसर्वेषांरमणीयः ऐहिकामुष्मिकसकलव्यवहारस्याग्न्यधीनत्वात् यद्वा पुष्टिरिवरण्वागन्तव्यः शब्दनीयः स्तुत्योवा यथापुष्टिःप्राप्यतेतद्वदग्निर्यज्ञेहविर्भिःप्राप्यतइतिभावः पृथ्वीविस्तीर्णाक्षितिर्न भूमिरिव अग्निरपिविस्तीर्णःसर्वेषुभूतेषुजाठररूपेणावस्थानात् गिरिर्न पर्वतइवभुज्मसर्वेषांभोजयिता यथागिरौविद्यमानंफलमूलादिकमाहृत्यसर्वेभुञ्जतेतद्वदग्नावपिपचन्तःसर्वेभुञ्जते यद्वा अग्नावाहुतिंहुत्वायजमानाःस्वर्गफलंभुञ्जते अथवागिरिर्यथादुर्भिक्षेसर्वान्प्राणिनोभुनक्ति स्वकीयमूलफलादिदानेनपालयतितद्वदयमपिपापादनुष्ठातॄन्प्रमुञ्चति तथाचाम्नायते—अग्निर्मातस्मादेनसःप्रमुञ्चत्विति । शम्भु सुखकरंक्षोदोन उदकमिव यथोदकंसुखंकरोतितद्वदग्निःसर्वेषांसुखकारीत्यर्थः अज्मन् सङ्ग्रामनामैतत् अज्मनिसङ्ग्रामेअत्योन सन्ततगमनशीलोजात्यश्वइवसर्गप्रतक्तः सर्गेणविसर्जनेनप्र-

१ तै० सं० २. २. ६. । २ तै० सं० १. ८. ५. ।

गमितः यथासादिनाप्रेषितोजात्यश्वोहन्तव्यसमीपमाशुगच्छति तद्वदग्निरपिस्तोतृभिःप्रेषितःस-न्शत्रून्हन्तुंशीघ्रंगच्छतीतिभावः अपिच सिन्धुर्नक्षोदः स्यन्दनशीलमुदकमिव अयमपिशीघ्रगामी यथानिम्नप्रदेशाभिमुखोजलप्रवाहोदुर्निवारः तद्वद्ध्वव्याभिमुखोग्निरपीत्यर्थः अतः यस्मादेवंतस्मा-त् ईं एनमग्निंकोवरातेकोवारयेत कोपिवारयितुंनशक्नोतीत्यर्थः ॥ रण्वा रविर्गत्यर्थः रण्व्यतेप्रा-प्यतेइतिरण्वः कृत्यल्युटोबहुलमितिबहुलवचनात्कर्मणिपचाद्यच् । भुज्म भुजपालनाभ्यवहार-योः इषियुधीन्धीतिविधीयमानोमक्बहुलवचनादस्मादपिभवति सुपांसुलुगितिसोर्लुक् । अज्मन् अजगतिक्षेपणयोः मनिनि वलादावार्धधातुकेविकल्पइष्यतइतिवचनाद्वीभावाभावः सुपांसुलुगि-तिसप्तम्यालुक् । सर्गप्रतक्तः सृजविसर्गेइत्यस्माद्घञन्तःसर्गशब्दआद्युदात्तः तक्षुगतौअस्माद-न्तर्भावितण्यर्थान्निष्ठायां यस्यविभाषेतीट्प्रतिषेधः अनिदितामितिनलोपः सर्गेणप्रतक्तः तृती-याकर्मणीतिपूर्वपदप्रकृतिस्वरत्वम् । वराते वृञ्वरणेअन्तर्भावितण्यर्थात् लेटि लेटोडाटावित्या-डागमः व्यत्ययेनशप् वैतोन्यत्रेत्यैत्वस्यविकल्पितत्वादभावः ॥

३. अभीष्ट फल की पुष्टि की तरह अग्नि रमणीय, पृथिवी की तरह विस्तीर्ण, पर्वत की तरह सबके भोजयिता और जल की तरह सुखकर हैं। अग्नि, युद्ध में परिचालित अश्व और सिन्धु की तरह, शीघ्रगामी हैं। ऐसे अग्नि का कौन निवारण कर सकता है ?

चतुर्थीमृचमाह—

जा॒मिः सिन्धू॑नां॒ भ्राते॑व॒ स्वस्रा॑मि॒भ्या॒न्न राजा॒ वना॑न्यत्ति । (७)
यद्वात॑जूतो॒ वना॒ व्यस्था॑द॒ग्निर्ह॑ दा॒ति रोमा॑ पृथि॒व्याः (८) ॥ ४ ॥

जा॒मिः । सिन्धू॑नाम् । भ्राता॑ऽइव । स्वस्रा॑म् । इभ्या॑न् । न । राजा॑ । वना॑नि । अ॒त्ति । (७) यत् । वात॑ऽजूतः । वना॑ । वि । अस्था॑त् । अ॒ग्निः । ह॒ । दा॒ति । रोम॑ । पृ॒थि॒व्याः (८) ॥ ४ ॥

सिन्धूनां स्यन्दनशीलानामपांअयमग्निः जामिःबन्धुः तासामुत्पादकत्वात् तथाचाम्ना-तम्—अग्नेरापइति । यद्वा देवेभ्यःपलायितोप्सुवर्तमानःसन् तासामपां बन्धुर्बभूवेत्यर्थः तत्रनिद-र्शनम्—स्वस्रांस्वसॄणांभ्रातेव यथाभ्राताअतिशयेनहितकरोभवत् तद्वत्तादृशोग्निः वनानिमहान्त्यर-ण्यानिअत्तिभक्षयतिदहतीत्यर्थः तत्रनिदर्शनम्—राजाइभ्यान्न भियंयन्तीतिनैरुक्तव्युत्पत्त्याइ-भ्याःशत्रवः तान्यथासमूलंहिनस्तितद्वत् यद्वा इभ्याःधनिनः तान्यथाधनमपहरन्राजाहिनस्ति तद्वदित्यर्थः अपिच यद्यदावातजूतो वातेनप्रेरितःसन्वनावनान्यरण्यानिव्यस्थात् उक्रमकारेणवि-विधमातिष्ठतिदग्धुंप्रवर्तते तदानींअग्निर्हअग्निरेवपृथिव्याभूमेःसम्बधीनिरोमाओषधिरूपाणिरो-

---

तै० आरण्यके अष्टमाध्याये ।

माणिदाविछिनत्ति भूम्यांओषधिवनस्पतिजातंयदस्तितत्सर्वंदहतीतिभावः॥ स्वसां आमोनुडभावश्छान्दसः । अस्थाव् लुङि गातिस्थेतिसिचोलुक् । दाति दाप्लवने अदादित्वाच्छपोलुक्॥४॥

४. जिस प्रकार भगिनी का हितैषी भ्राता है, उसी प्रकार सिन्धु के हितैषी अग्नि हैं। जैसे राजा शत्रु का विनाश करता है, वैसे ही अग्नि वन का भक्षण करते हैं। जिस समय वायुप्रेरित अग्नि वन जलाने में लगते हैं उस समय पृथिवी के सब ओषधि-रूप रोम छिन्न कर डालते हैं।

पञ्चमीमृचमाह—

श्वसित्यप्सुहंसोनसीदन्क्रत्वाचेतिष्ठोविशामुषर्भुत्। (९)
सोमोनवेधाऋतप्रजातःपशुर्नशिश्वाविभुर्दूरेभाः (१०)॥५॥९॥

श्वसिति। अप्ऽसु। हंसः। न। सीदन्। क्रत्वा। चेतिष्ठः। विशाम्। उषःऽभुत्। (९) सोमः। न। वेधाः। ऋतऽप्रजातः। पशुः। न। शिश्वा। विऽभुः। दूरेऽभाः (१०)॥ ५॥ ९॥

अयमग्निर्देवेभ्यःपलायितःसन्अप्सूदकेपुश्वसितिप्राणिति निगूढोवर्ततेइत्यर्थः तत्रदृष्टान्तः—हंसोनसीदन् उदकमध्येउपविशन्हंसइव कीदृशोग्निः क्रत्वाक्रतुनाज्ञानहेतुनाआत्मीयेन प्रकाशेनविशांप्रजानांचेतिष्ठः अतिशयेनचेतयिताज्ञापयिता रात्रौहिसर्वेजनाः अन्धकारावृतं सर्वंअग्नेःप्रकाशाज्जानन्ति उषर्भुत् उषसिउषःकालेअग्निहोत्रादौप्रबुद्धः सोमोनवेधाः सोमइवविधातास्रष्टा सोमोयथासकलमोषधिरूपंभोग्यजातंसृजति सोमोवाओषधीनाꣳराजेतिश्रुतेः। तथासकलंभोक्तृजातंसृजति अग्नेरेवभोक्तृरूपेणावस्थानात् तथाचतैत्तिरीयकम्—अग्निरन्नादोन्नपतिरिति[1]। वाजसनेयकेपिभोक्तृभोग्ययोरग्नीषोमात्मकत्वमाम्नातम्—एतावद्वाइदमन्नंचैवान्नादश्चसोमएवान्नमग्निरन्नादइति। ऋतप्रजातः ऋतमित्युदकनाम ऋतादुदकात्प्रादुर्भूतः पशुर्नशिश्वा उदकमध्येवर्तमानोग्निःशयानःपशुरिव तनूकृतः सङ्कुचितगात्रोभूत् ततःप्रादुर्भूतःसन् विभुःप्रभूतःसम्पन्नः यद्वा शिश्वाशिशुनागर्भस्थेनवत्सेनसहितागौरिव विभुः प्रभूतावयवोजातइत्यर्थः दूरेभाःदूरेविप्रकृष्टदेशेपिभाःप्रकाशोयस्यसतथोक्तः एवंभूतोग्निरप्सुश्वसितीतिपूर्वेणसम्बन्धः। श्वसिति श्वसप्राणने अदादित्वाच्छपोलुक् रुधादिभ्यःसार्वधातुकइतीडागमः तिपःपित्त्वादनुदात्तत्वेधातुस्वरःशिष्यते। क्रत्वा जसादिषुछन्दसिवावचनमितिनाभावाभावः। उषसिबुद्ध्यतइतिउषर्भुत् बुधअवगमने क्विप्चेतिक्विप् एकाचोबशइतिभष्भावः अहरादीनांपत्यादिषूपसंख्यानमितिसकारस्यरेफादेशः। शिश्वा शोतनूकरणे आदेचइत्यात्वम् श्शःकित्सन्वच्चेतिउगत्ययः सन्वद्भावाद्द्विर्भावेत्वे अतएवनित्त्वादाद्युदात्तत्वम् किद्वद्भावादातोलोपइटिचेत्याकारलोपः प्रथमप-

---

[1] तै० ब्रा० ३.९.१९.। [2] सत्यषाढसूत्रे.।

क्षे सुपांसुलुगितिसोराकारः द्वितीयेतुपूर्ववन्नाभावाभावः। दूरेभाः तत्पुरुषेकृतिबहुलमितिबहुव्रीहावपिबहुलवचनादलुक् बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्॥ ५॥

५. जल के भीतर बैठे हंस की तरह अग्नि जल के भीतर प्राण धारण करते हैं। उषा-काल में जागकर प्रकाश-द्वारा अग्नि सबको चेतना प्रदान करते हैं। सोम की तरह सारी ओषधियों को वर्द्धित करते हैं। अग्नि गर्भस्थ पशु की तरह जल के बीच संकुचित हुए थे। अनन्तर प्रवर्द्धित होने पर, अग्नि का प्रकाश दूर तक विस्तृत हुआ।

रयिरितिदशर्चंसूक्तंद्विपदम् अध्ययनतःपञ्चर्चं द्वितीयंसूक्तंपराशरस्यार्षम् आग्नेयं अनुक्रान्तंच—रयिरिति। विनियोगोलैङ्गिकः।

रयिर्नचित्रासूरोनसन्दृगायुर्नप्राणोनित्योनसूनुः। (१)
तक्वानभूर्णिर्वनासिषक्तिपयोनधेनुःशुचिर्विभावा (२)॥१॥

रयिः। न। चित्रा। सूरः। न। सम्ऽदृक्। आयुः। न। प्राणः। नित्यः। न। सूनुः। (१) तक्वा। न। भूर्णिः। वना। सिसक्ति। पयः। न। धेनुः। शुचिः। विभाऽवा (२)॥ १॥

अयमग्निः रयिर्धनमिवचित्राचायनीयःविचित्ररूपोवा सूरोन सूर्यइव सन्दृक्सन्द्रष्टासर्वेषांवस्तूनांदर्शयिताआयुर्नप्राणः आयुःमुखेसञ्चरन्प्राणःप्रश्वसनवायुरिवप्रियतमः यद्वा यथाप्राणवायुःआयुर्जीवनमवस्थापयति तथाचाम्नायते—यावद्ध्यस्मिञ्छरीरेप्राणोवसतितावदायुरिति। एवमग्निरपिजाठररूपेणायुषोवस्थापयिता नित्योनसूनुः नित्योध्रुवःपुत्रइवप्रियकारी यथा-औरसःपुत्रः पितुर्हितमेवाचरतितद्वदयमपिहितस्यस्वर्गस्यप्रापयिता तथाचाम्नायते—पुत्रःपित्रेलोककृज्जातवेदइति[२]।तक्वान गतिमानश्वइव भूर्णिःभर्ता यथाश्वउपर्यारूढंपुरुषंबिभर्तिधारयतिपोषयतीतिवातद्वदयमपीत्यर्थः पयोनधेनुःपयइवप्रीणयिता शुचिर्दीप्तःविभावाविशिष्टप्रकाशयुक्तःएवंगुणविशिष्टोग्निःवनावनान्यरण्यानिसिषक्तिदग्धुंसमवैति सेवतेवा॥ चित्रा सुपांसुलुगितिसोःपूर्वसवर्णदीर्घत्वम्। नित्यः नेर्ध्रुवइत्यप्प्रत्ययस्यपित्त्वादनुदात्तत्वेउपसर्गस्वरएवशिष्यते। तक्वा तकहसने गतिकर्मसुपठितत्वात् अत्रगत्यर्थः तकतिगच्छतीतितक्वा अन्येभ्योपिदृश्यन्तइतिवनिप्। भूर्णिः घृणिपृश्नीत्यादौभरतेर्निप्रत्ययान्तोनिपातितः॥१॥

१. अग्नि, धन की तरह विलक्षण, सूर्य की तरह सब पदार्थों के दर्शक, प्राणवायु की तरह जीवन-रक्षक और पुत्र की तरह हितकारी हैं। अग्नि अश्व की तरह लोक को वहन करते और दुग्धदात्री गौ की तरह उपकारी हैं। दीप्त और आलोक-युक्त अग्नि वन दग्ध करते हैं।

---

२ तै० ब्रा० १.२.१.।

द्वितीयामृचमाह—

दाधारक्षेममोकोनरण्वोयवोनपक्वोजेताजनानाम् । (३)
ऋषिर्नस्तुभ्वाविक्षुप्रशस्तोवाजीनप्रीतोवयोदधाति (४) ॥ २॥

दाधार । क्षेमम् । ओकः । न । रण्वः । यवः । न । पक्वः । जेता ।
जनानाम् । (३) ऋषिः । न । स्तुभ्वा । विक्षु । प्रऽशस्तः । वाजी ।
न । प्रीतः । वयः । दधाति (४) ॥ २ ॥

अयमग्निःक्षेमंलब्धस्यधनस्यरक्षणंदाधारधारयति स्तोतृभ्योदत्तस्यधनस्यरक्षणंकर्तुंशक्नोतीतिभावः ओकोन निवासस्थानंगृहमिव रण्वोरमणीयः यद्वा गन्तव्यःगृहवत्सर्वैःप्राप्यतइत्यर्थः यवोन यवइवपक्वः यथापक्वोयवःउपभोगयोग्योभवति तद्वदग्निरपिपाकादिकार्येहेतुतयाउपभोग्यइत्यर्थः जनानांजेताशत्रुजनानांमध्येभिभविता ऋषिर्न मन्त्रद्रष्टाऋषिरिव स्तुभ्वादेवानांस्तोता विक्षुयजमानलक्षणेषुमनुष्येषुप्रशस्तः प्रख्यातःवाजीन अश्वइवप्रीतोहर्षयुक्तः यथाश्वोहर्षयुक्तोयुद्धाभिमुखंगच्छतितद्वदयमपिदेवानांहविर्वहनेहर्षयुक्तोभवतीत्यर्थः एवंभूतोग्निःवयोन्नंदधातिदधातुअस्मभ्यंददात्वित्यर्थः वयइत्यन्ननाम वयःक्षद्मेतितन्नामसुपाठात् ॥ दाधार तुजादीनामित्यभ्यासस्यदीर्घत्वम् । क्षेमं क्षियतिनिवसत्यनेनेतिक्षेमः अर्तिस्तुस्वित्यादिनामन् नित्त्वादाद्युदात्तत्वम् । रण्वः रविरिविधविगत्यर्थाः अस्मात्कर्मणिक्वप्रत्ययः इदित्वान्नुम् । जेता तृन्नन्तआद्युदात्तः । जनानां यतश्चनिर्धारणमितिनिर्धारणेषष्ठी नेयंकर्मणिषष्ठीतिनलोकाव्ययनिष्ठेति षष्ठीप्रतिषेधोनभवति । स्तुभ्वा स्तोभतिःस्तुतिकर्मा अन्येभ्योपिदृश्यन्तइतिक्वनिप् ॥२॥

२. अग्नि, रमणीय घर की तरह, धन-रक्षा में समर्थ और पके जौ की तरह लोक-विजयी हैं। अग्नि, ऋषि की तरह, देवों के स्तोता और संसार में प्रशंसनीय तथा अश्व की तरह हर्ष-युक्त हैं। ऐसे अग्नि हमें अन्न प्रदान करें।

तृतीयामृचमाह—

दुरोकशोचिःक्रतुर्ननित्योजायेवयोनावरंविश्वस्मै । (५)
चित्रोयदभ्राट्श्वेतोनविक्षुरथोनरुक्मीत्वेषःसमत्सु (६) ॥३॥

दुरोकऽशोचिः । क्रतुः । न । नित्यः । जायाऽइव । योनौ । अरम् ।
विश्वस्मै । (५) चित्रः । यत् । अभ्राट् । श्वेतः । न । विक्षु । रथः ।
न । रुक्मी । त्वेषः । समत्ऽसु (६) ॥ ३ ॥

दुरोकशोचिः दुष्पापतेजाः क्रतुर्ननित्यःक्रतुःकर्मणांकर्तासइवध्रुवः यथासकर्मसुध्रुवोऽप्रमत्तःसन्जागर्ति तद्वदयमप्यग्निः कर्मसुरक्षसांदहनेध्रुवोजागर्तीत्यर्थः योनौगृहेवर्तमानाजायेव योषिदिव अग्निहोत्रादिगृहेवर्तमानोवह्निर्विश्वस्मैसर्वस्मै यष्टृजनायअरंअलंभूषणंभवति यथा जाययागृहमलङ्कृतंभवतितद्वदग्निनायज्ञगृहमप्यलंकृतंसदृश्यतइत्यर्थः चित्रश्चायनीयः विचित्रदीप्तिर्वा यद्यदाअयमग्निरभ्राट् भ्राजते तदानींश्वेतोनशुभ्रवर्णआदित्यइवभवति रात्रौहि' अहनिसूर्यइवअग्निःप्रकाशकोभवति विक्षुप्रजासुरथोन रथइवरुक्मीसुवर्णवद्रोचमानदीप्तियुक्तः समत्सुसंग्रामेषुत्वेषोदीप्तःएवंभूतोयदभ्राडितिपूर्वेणान्वयः ॥ दुरोकशोचिः उचसमवाये ईषद्दुःसुष्वितिकृच्छ्रार्थेखल् बहुलवचनात्कुत्वम् लित्स्वरेणप्रत्ययात्पूर्वस्योदात्तत्वम् दुरोकंशोचिस्तेजोयस्य बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । अरं वालमूलेत्यादिनालकारस्यरेफादेशः । अभ्राट् भ्राजृदीप्तौ लङिव्यत्ययेनपरस्मैपदम् बहुलंछन्दसीतिशपोलुक् व्रश्चादिषत्वेजश्त्वम् अडागमउदात्तः यद्वृत्तयोगादनिघातः । समत्सु समानंमाद्यन्त्येष्विति समदःसंग्रामाः औणादिकोधिकरणेक्विप् समानस्यच्छन्दसीतिसभावः यद्वा सम्यगत्तिभक्षयतिवीरानितिसमत् सम्पूर्वादत्तेः क्विप्चेविक्विप् ॥ ३ ॥

३. दुष्प्राप्य-तेजा अग्नि यज्ञकारी की तरह ध्रुव और गृहस्थित गृहिणी (जाया) की तरह घर के भूषण हैं। जिस समय अग्नि विचित्र-दीप्तियुक्त होकर प्रज्वलित होते हैं, उस समय वह शुभ्रवर्ण सूर्य की तरह हो जाते हैं। अग्नि, प्रजा के बीच में रथ की तरह दीप्ति युक्त और संग्राम में प्रभा युक्त हैं।

सेनेवसृष्टामंदधात्यस्तुर्नदिद्युत्त्वेषप्रतीका । (७)
यमोहजातोयमोजनित्वंजारःकनीनांपतिर्जनीनाम् (८) ॥ ४॥

सेनाऽइव । सृष्टा । अमम् । दधाति । अस्तुः । न । दिद्युत् ।
त्वेषऽप्रतीका । (७) यमः । ह । जातः । यमः । जनिऽत्वम् । जारः ।
कनीनाम् । पतिः । जनीनाम् (८) ॥ ४ ॥

सृष्टाप्रेरितासेनेवस्वामिनासहवर्तमानाभटसंहतिरिव अयमग्निः अमंशत्रूणांभयंदधाति विदधातिकरोतीत्यर्थः यद्वा सृष्टासेनेव अमंबलंदधातिसायथाबलवतीतद्वदग्निरपिबलवानित्यर्थः निदर्शनान्तरमुच्यते—दिद्युदितिवज्रनाम तेनचात्रेषुर्लक्ष्यते त्वेषप्रतीकादीप्तमुखाअस्तुर्नदिद्युत्क्षेप्तुः सम्बन्धिनीषुरिद सायथाभीषयतेतद्वदग्निरपिराक्षसादीन्भीषयतइत्यर्थः अत्रनिरुक्तम्—सेनेवसृष्टाभयंवाबलंवादधात्यस्तुरिवदिद्युत्त्वेषप्रतीकेत्यादि' । यच्छतिददातिस्तोतृभ्यःकामानितिय-

---

नि० १०. २१ ।

मोग्निरुच्यते यद्वा इन्द्राग्न्योर्युगपदुत्पन्नत्वादग्नेर्यमत्वम् अस्मिन्नर्थेयास्केनमन्त्रब्राह्मणेदर्शिते— यमोहजातइन्द्रेणसहसङ्गतः यमाविहेहमातरेत्यपिनिगमोभवतीति[1] । योजातउत्पन्नः भूतसंघः यच्चजनित्वम् जनयितव्यम् उत्पत्स्यमानंभूतजातंतदुभयमपि यमोहअग्निरेवसर्वेषांभावानांआ-हुतिद्वाराअग्न्यधीनत्वात् कनीनांकन्यकानांजारोजरयिता यतोविवाहसमयेअग्नौलाजादिद्रव्य-होमेकृतितासांकन्यात्वंनिवर्तते अतोजरयितेत्युच्यते तथाजनीनांजायानांकृतविवाहानांपतिर्भ-र्ता तथाचाख्यायते—अनुपजातपुरुषसम्भोगेच्छावस्थांस्त्रियंसोमोलेभे सचसोमईषदुपजातभोगे-च्छांतांविश्वावसवेगन्धर्वायप्रादात् सचगन्धर्वोविवाहसमयेअग्नयेप्रददौ अग्निश्चमनुजायभर्त्रेध-नपुत्रैःसहितामिमांप्रायच्छदिति । इममर्थंकाचिदृक्स्पष्टंब्रूते—सोमोददद्गन्धर्वायगंधर्वोददग्नये । रयिंचपुत्रांश्चादादग्निर्मह्यमथोइमामिति[2] । यास्कस्त्वाह—तृतीयोअग्निष्टेपतिरित्यपिनिगमोभवती-ति[3] । यद्वा जनीनांपालयिता यतोयमनुष्ठितैर्यागैःफलंप्रयच्छति ॥ सेनेव इनेनसहवर्ततइतिसे-ना वोपसर्जनस्येतिसभावः बहुव्रीहिस्वरः । जनित्वम् जनीप्रादुर्भावे कृत्यार्थेतवैकेनितिकर्मणि त्वन्प्रत्ययः इडागमः नित्त्वादाद्युदात्तत्वम् । जारः जारयतीतिजारः दारजारौकर्तरिणिलुक्चेतिनि-पात्यते । कनीनां कन्याशब्दात्षष्ठ्येकवचनेबहुलंछन्दसीतिबहुलग्रहणात्संप्रसारणम् परपू-र्वत्वम् । जनीनाम् जन्यन्तेआस्वितिजनयःस्त्रियः इन्सर्वधातुभ्यइतिइन्प्रत्ययः नित्त्वादाद्यु-दात्तत्वम् ॥ ४ ॥

४. स्वामी के द्वारा संचालित सेना अथवा धनुर्द्धारी के दीप्ति-मुख वाणे की तरह अग्नि शत्रुओं में भय संचार करते हैं। जो उत्पन्न हुआ है और जो उत्पन्न होगा, वह सब अग्नि है। अग्निदेव कुमारियों के जार हैं; (क्योंकि 'लाजा-होम' के अनन्तर ही कन्या विवाहिता समझी जाती है।) विवाहिता स्त्रियों के पति हैं; (क्योंकि विवा-हिता नारी अग्नि की सेवा करने में पुरुष को साहाय्य देती है।)

पञ्चमीमृचमाह—

तंवश्चराथावयंवसत्यास्तंनगावोनक्षन्तइद्धम् । (९)
सिन्धुर्नक्षोदःप्रनीचीरैनोन्नवन्तगावःस्व१र्दशीके (१०)॥५॥

तम् । वः । चराथा । वयम् । वसत्या । अस्तम् । न । गावः । नक्षन्ते इद्धम् । (९) सिन्धुः । न । क्षोदः । प्र । नीचीः । ऐनोत् । नवन्त । गावः । स्वः । दृशीके (१०) ॥ ५ ॥

वइतिव्यत्ययेनबहुवचनम् हेअग्ने तंत्वांचराथा चरतीतिचरथःपशुः तत्प्रभवैःहवयादिभिः साध्याआहुतिरपिचरथेत्युच्यते उपचारात्कार्येकारणशब्दः चराथा चरथयापशुप्रभवप्रदया-दिसाधनयाआहुत्यावसत्यावसतिनिवसतीतिस्थावरोव्रीह्यादिर्वसतिः पूर्ववत्तत्साध्याहुतिर्लक्ष्यते

१ नि० १०. २१. । २ ऋ० सं० ८. ३. २८. । ३ नि० १०. २१. ।

वसत्यापुरोडाशाद्याहुत्यांचवयंइद्धंप्रदीप्तमग्निंनक्षन्तेव्याप्नुयामः पुरुषव्यत्ययः तत्रदृष्टान्तः—अस्तंनगावः अस्तमितिगृहनाम यथागावोगृहंप्राप्नुवन्तितद्वत् अत्रयास्कः—तंवश्चंराथाचरन्त्यापश्वाहुत्यावसत्याचनिवसन्त्यौषधाहुत्यास्तंयथागावआप्नुवन्तितथाप्नुयामेति । अयमग्निःसिन्धुर्नक्षोदः स्यन्दनशीलमुदकमिव नीचीर्नितरांअञ्चतीःइतस्ततोनितरामुद्गच्छन्तीः ज्वालाःऐनोत्प्रेरयति यथाजलप्रवाहः निम्नदेशेशीघ्रंगच्छति तद्वदग्नेर्ज्वालादग्धव्यंप्रतिगच्छन्तीतिभावः स्वर्नभसिवर्तमानेदृशीकेदर्शनीयेतस्मिन्नग्नौ गावोगमनस्वभावारश्मयः नवन्तसंगच्छन्ते नवतिर्गतिकर्मा ॥ चराथा चरेरौणादिकोथक्प्रत्ययः दीर्घश्छान्दसः सुपांसुलुगितिविभक्तेराकारः । वसत्या वहिवस्यर्तिभ्यश्चिदितिअतिप्रत्ययः उदात्तयणइतिविभक्तेरुदात्तत्वम् । अस्तं अस्यतेस्मिन्सर्वमित्यस्तंगृहं असिहसीत्यादिनातन् तितुत्रेतीट्प्रतिषेधः निच्चादाद्युदात्तत्वम् । नक्षते नक्षतिर्व्याप्तिकर्मा नक्षगतौ व्यत्ययेनात्मनेपदम् चादिलोपेविभाषेतिनिघाताभावः । नीचीः निपूर्वादञ्चतेश्चोपसंख्यानमितिङीप् अचइत्यकारलोपः चाविवितिदीर्घत्वम् न्यधीचेतिगतेःप्रकृतिस्वरत्वम् । ऐनोत् इणूगतौ अन्तर्भावितण्यर्थाद्वच्छन्दसिलुङ्लङ्लिटइतिवर्तमानेलङ्व्यत्ययेनश्नुः आडागमोवृद्धिश्च । दृशीके दृशिर्प्रेक्षणे अनिदृशिभ्यांचेतिकीकन्प्रत्ययः निच्चादाद्युदात्तत्वम् ॥ ५ ॥

५. जिस प्रकार गायें घर में जाती हैं, उसी प्रकार हम जंगम और स्थावर अर्थात् पशु और धान्य आदि उपहार के साथ प्रदीप्त अग्नि के पास जाते हैं। जल-प्रवाह की तरह अग्नि इधर-उधर ज्वाला प्रेरित करते हैं। आकाश में दर्शनीय अग्नि की किरणें मिलित होती हैं।

॥ इतिप्रथमस्यपञ्चमेदशमोवर्गः ॥ १० ॥

वनेष्वितिद्वैपदंदशर्चं अध्ययनतःपंचर्चं तृतीयंसूक्तंपराशरस्यार्षंआग्नेयं वनेष्वित्यनुक्रान्तम्विनियोगोलैङ्गिकः ।

तत्रप्रथमामृचमाह—

वनेषुजायुर्मर्तेषुमित्रोवृणीतेश्रुष्टिंराजेवाजुर्यम् । (१)
क्षेमोनसाधुःक्रतुर्नभद्रोभुवत्स्वाधीर्होताहव्यवाट् (२) ॥१॥

वनेषु । जायुः । मर्तेषु । मित्रः । वृणीते । श्रुष्टिम् । राजाऽइव । अजुर्यम् । (१) क्षेमः । न । साधुः । क्रतुः । न । भद्रः । भुवत् । सुऽआधीः । होता । हव्यऽवाट् (२) ॥ १ ॥

---

१ नि० १०. २१. । २ नि० ३. २०. ।

वनेषुजायुः अरण्येषुजायमानः मर्तेषुमनुष्येषुमित्रः सखा सोयमग्निः श्रुष्टिंशुआशुअश्नुते कर्माणिव्याप्नोतीतिश्रुष्टिर्यजमानः क्षिप्रेणकर्मणामनुष्ठातेत्यर्थः तथाचयास्कः—श्रुष्टीतिक्षिप्रनामाशुअष्टीतिं । एवंभूतंयजमानंवृणीतेसम्भजते अनेनमत्तंहविःस्वीकृत्यरक्षतीतिभावः तत्रदृष्टान्तः—राजेवाजुर्यंअजुर्यंजरारहितंदृढाङ्गंसर्वकार्येषुशक्तमित्यर्थः एवंभूतंपुरुषंयथाराजावृणीतेतद्वत् क्षेमोन रक्षकइव साधुःसाधयिता क्रतुर्न क्रतुःकर्मणांकर्तासइवभद्रोभजनीयःकल्याणोवाहोतादेवानामाह्वाता हव्यवाट्हव्यवाहनोनामदेवानामग्निः तथाचाम्नायते—त्रयोवाअग्नयोहव्यवाहनोदेवानांकव्यवाहनःपितृणांसहरक्षाअसुराणामितिं । एवंभूतोग्निःस्वाधीःशोभनकर्मा शोभनाध्यानोवाभुवद्भवतु ॥ जायुः जिजये कृवापाजीत्युण् । अजुर्यं जृषूवयोहानौ भावे ण्यत् वृद्धौकृतायामाकारस्यव्यत्ययेनउकारः । जुर्यं जरानास्त्यस्येतिबहुव्रीहौनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । भुवत् भवतेर्लेटचडागमः बहुलंछन्दसीतिविकरणस्यलुक् भूसुवोस्तिङीतिगुणप्रतिषेधः ॥ १ ॥

१. जैसे राजा सर्व-कर्म-क्षम व्यक्ति का आदर करते हैं, वैसे ही अरण्य-जात और मनुष्यों के मित्र अग्नि यजमान पर अनुग्रह करते हैं। अग्नि पालक की तरह कर्म-साधक, कर्म-शील की तरह भद्र, देवों को बुलानेवाले और हव्य-वाहक हैं। अग्नि शोभन-कर्मा बनो।

हस्तेदधानोनृम्णाविश्वान्यमेदेवान्धाद्गुहानिषीदन् । (३)
विदन्तीमत्रनरोधियंधाहृदायत्तष्टान्मन्त्राँअशंसन् (४) ॥ २ ॥

हस्ते । दधानः । नृम्णा । विश्वानि । अमे । देवान् । धात् । गुहा । निऽसीदन् । (३) विदन्ति । ईम् । अत्र । नरः । धियम्ऽधाः । हृदा । यत् । तष्टान् । मन्त्रान् । अशंसन् (४) ॥ २ ॥

विश्वानिसर्वाणिनृम्णानृम्णानिहविर्लक्षणानि धनानिहस्तेस्वकीयेबाहौदधानोधारयन्नयमग्निर्गुहागुहायांअप्सुमध्येअश्वत्थादौवासंवृतप्रदेशेनिषीदन् निगूढोवर्तमानःसन्अमेभयेदेवान् धात् अस्थापयत् अग्नौहविर्भिःसहपलायितेसतिसर्वेदेवाअभैषुरित्यर्थः नरोनेतारःधियंधाःकर्मणांबुद्धीनांवाधारयितारोदेवाअत्रास्मिन्कालेईमेनमग्निंविदन्तिजानन्ति यद्यदाहृदाहृदयावस्थितयाबुद्ध्यातष्टान्निर्मितान्अग्निस्तुतिपरान्मन्त्रानशंसन् अस्तुवन् अवोचन्नित्यर्थः ॥ निषीदन् सदिरमतेरितिषत्वम् । विदन्ति विदज्ञाने अदादित्वाच्छपोलुक् प्रत्ययस्वरः । धियन्धाः आतोनुपसर्गेकइतिकः तत्पुरुषेकृतिबहुलमितिबहुलवचनाद्द्वितीयायाअप्यलुक् । तष्टान् तक्षूत्वक्षूतनूकरणे निष्ठा यस्यविभाषेतीट्प्रतिषेधः स्कोःसंयोगाद्योरितिकलोपः ॥ २ ॥

२. अग्नि सारा हव्यरूप धन अपने हाथ में धारण करके गुहा के बीच छिप गये। ऐसा होने पर देवता लोग डर गये। नेता और

कर्म-धारयिता देवों ने जिस समय हृदय-धृत मंत्र-द्वारा अग्नि की स्तुति की, उस समय उन्होंने अग्नि को प्राप्त किया।

अजोनक्षांदाधारपृथिवींतस्तम्भद्यांमन्त्रेभिःसत्यैः । (५)
प्रियापदानिपश्वोनिपाहिविश्वायुरग्नेगुहागुहंगाः (६) ॥ ३ ॥

अजः । न । क्षाम् । दाधार । पृथिवीम् । तस्तम्भ । द्याम् । मन्त्रेभिः । सत्यैः । (५) प्रिया । पदानि । पश्वः । नि । पाहि । विश्वऽआयुः । अग्ने । गुहा । गुहम् । गाः (६) ॥ ३ ॥

अजोन अजतिगच्छतीत्यजःसूर्यः यद्वा नजायतइत्यजःजन्मरहितइत्यर्थः सइवक्षां क्षेति-पृथिवीनाम क्षांभूमिंदाधारअयमग्निःप्रकाशकत्वेनधारयति पृथिवीत्यन्तरिक्षनाम पृथिवींअन्त-रिक्षंचधारयतीत्येवद्यांद्युलोकंसत्यैरवितथार्थैःमन्त्रेभिर्मन्त्रैः तस्तंभस्तभ्नाति यथाअधोनपतति उपर्येवतिष्ठतितथाकरोतीत्यर्थः मन्त्रैर्दिवोधारणंतैत्तिरीये समाम्नातम्—देवावाआदित्यस्यस्वर्ग-स्यलोकस्यपराचोतिपातादबिभयुस्तंछन्दोभिरदृंहन्धृत्याइति[1]। यद्वा सत्यैर्मन्त्रैःस्तूयमानोग्निःद्यां तस्तम्भेति हेअग्ने विश्वायुःविश्वंसर्वमायुरन्नंयस्यसत्वं पश्वःपशोःप्रियाप्रियाणिपदानिशोभनतृ-णोदकोपेतानिस्थानानि निपाहिनितरांपालय माधाक्षीरित्यर्थः तर्हिकुत्रनिवसामीतिचेत् तत्राह गुहागुहायाअपिगुहंगुहांगवांसंचारायोग्यस्थानंगाःगच्छ तत्रैवनिवसेत्यर्थः ॥ पश्वः जसादिषु-छन्दसिवावचनमितिवोर्ङितीतिगुणाभावेयणादेशः उदात्तयणइतिविभक्तेरुदात्तत्वम् । गुहा सुपांसुलुगितिपञ्चम्याआजादेशः चित्त्वादन्तोदात्तत्वम्।गुहं व्यत्ययेनह्रस्वत्वम्।गाः छान्दसो-लुङ् इणोगालुङीतिगादेशः॥ ३ ॥

३. सूर्य की तरह अग्नि पृथिवी और अन्तरिक्ष को धारण किये हुए हैं। साथ ही सत्य मंत्र-द्वारा आकाश को धारण करते हैं। विश्वायु या सर्वान्न अग्नि ! पशुओं की प्रिय भूमि की रक्षा करो और पशुओं के चरने की अयोग्य गुहा में जाओ।

यईंचिकेतगुहाभवन्तमायःससादधारामृतस्य । (७)
विये्चृतन्त्यृतासपन्तआदिद्वसूनिप्रववाचास्मै (८)॥४॥

यः । ईम् । चिकेत । गुहा । भवन्तम् । आ । यः । ससाद । धाराम् । ऋतस्य । (७) वि । ये । चृतन्ति । ऋता । सपन्तः । आत् । इत् । वसूनि । प्र । ववाच । अस्मै (८) ॥ ४ ॥

---

1 तै० ब्रा० १. २. ४.

यः पुमानीं एनं गुहा भवन्तं गुहायां सन्तं अग्निं चिकेत जानाति यश्च ऋतस्य सत्यस्य यज्ञस्य वा धारयितारमेनमग्निं आससाद आसीदति उपास्त इत्यर्थः ये च ऋता ऋतानि सत्यानि यज्ञान् वा सपन्तः समवयन्तः स्पृशन्तो वा पुरुषाः एतमग्निं वि चृतन्ति अग्निमुद्दिश्य स्तुतीर्ग्रथ्नन्ति कुर्वन्तीत्यर्थः आदिव स्तुत्यनन्तरमेव अस्मै सर्वस्मै स्तोतृजनाय वसूनि धनानि प्रववाच प्रकथयति ॥ चिकेत कित ज्ञाने लिटि णलि लित्स्वरः। चृतन्ति चृती हिंसाग्रन्थनयोः तौदादिकः लसार्वधातुकानुदात्तत्वे विकरणस्वरः शिष्यते। ववाच लिटि ब्रुवो वचिः लिट्यभ्यासस्योभयेषामिति अभ्यासस्य सम्प्रसारणम् सम्प्रसारणाच्चेति परपूर्वत्वस्य वाछन्दसीति विकल्पनाद्यणादेशः ॥ ४ ॥

४. जो पुरुष गुहास्थित अग्नि को जानता है और जो यज्ञ का धारयिता अग्नि के पास जाता है तथा जो लोग यज्ञ का अनुष्ठान करते हुए अग्नि की स्तुति करते हैं, ऐसे लोगों को अग्निदेव तुरत धन की बात बता देते हैं।

विर्योवी॒रुत्सु॒रोध॑न्महि॒त्वोत प्र॒जाउ॒त प्र॒सूष्व॒न्तः। (९)
चि॒त्तिर॒पांदमे॑वि॒श्वायुः॒सद्मे॑व॒धीराः॒स॒म्माय॑चक्रुः(१०)॥५॥११॥

वि। यः। वी॒रुत्ऽसु॑। रोध॑त्। म॒हि॒ऽत्वा। उ॒त। प्र॒ऽजाः। उ॒त। प्र॒ऽसूषु॑। अ॒न्तरिति॑। (९) चित्तिः॑। अ॒पाम्। दमे॑। वि॒श्वऽआ॑युः। सद्म॑ऽइव। धीराः॑। स॒म्ऽमाय॑। च॒क्रुः॒ (१०) ॥ ५ ॥ ११ ॥

योऽग्निः वीरुत्सु ओषधीषु महित्वा यानि महत्त्वानि सन्ति तानि विरोधत् विरुणद्धि विशेषेणावृणोति नावशेषयति उत अपि च प्रजाः प्रकर्षेणोत्पन्नाः पुष्पफलादिलक्षणाः प्रसूषु उत्पादयित्रीषु मातृस्थानीयास्वोषधीषु अन्तर्मध्ये विरुणद्धीत्येव द्वितीय उतशब्दः पदपूरणः तथा चित्तिश्चेतयिता ज्ञापयिता अपां दमे जलानां मध्यभूते गृहे विश्वायुः सर्वान्नो योऽग्निर्वर्तत इति शेषः तमग्निं धीरा मेधाविनः संमाय संमाननं पूजनं कृत्वा स्तुतिभिः स्तुत्वेत्यर्थः चक्रुः कर्माणि कुर्वन्ति तत्र दृष्टान्तः—सद्मेव यथा सदनं गृहं प्रथमतः सम्पूज्य पश्चात्तत्र कर्माण्याचरन्ति तद्वत् ॥ वीरुत्सु विपूर्वाद्रोहतेः क्विप् न्यंक्वादिषु वीरुध इति पठितत्वादुपसर्गस्य दीर्घो धकारश्चान्तादेशः उक्तं च—वीरुध ओषधयो भवन्ति। रोधत् रुधिर् आवरणे लेट्यडागमः इतश्च लोप इतीकारलोपः। संमाय माङ् माने शब्दे समासेऽनञ्पूर्वे क्त्वो ल्यप् न ल्यपीतीत्व प्रतिषेधः ॥ ५ ॥

५. जिन अग्नि ने ओषधियों में उनके गुण स्थापित किये हैं, और मातृ-रूप ओषधियों में उत्पद्यमान पुष्प, फल आदि निहित किये हैं, मेधावी पुरुष जलमध्यस्थ और ज्ञानदाता उन्हीं विश्वायु अग्नि की, सद्म की तरह, पूजा करके कर्म करते हैं।

श्रीणन्नितिद्विपदंदशर्चंचतुर्थंसूक्तम् तत्राध्ययनतःपञ्चर्चम् ऋष्याद्याःपूर्ववत् विनियोगोलैङ्गिकः।

तत्रप्रथमामृचमाह—

श्रीणन्नुपस्थाद्दिवंभुरण्युःस्थातुश्चरथमक्तून्व्यूर्णोत्। (१)
परियदेषामेकोविश्वेषांभुवद्देवोदेवानांमहित्वा (२) ॥१॥

श्रीणन्। उप। स्थात्। दिवम्। भुरण्युः। स्थातुः। चरथम्। अक्तून्। वि। ऊर्णोत्।(१) परि। यत्। एषाम्। एकः। विश्वेषाम्। भुवत्। देवः। देवानाम्। महिऽत्वा (२) ॥ १ ॥

भुरण्युःहविषांभर्ताधारयिता पयःप्रभृतिनाश्रयणद्रव्येणसोममिवतैर्हविर्भिःश्रीणन्मिश्रयन्दिवमुपस्थात्उपतिष्ठतिप्राप्नोतीत्यर्थः स्थातुःस्थावरंचरथंजङ्गमंतदुभयात्मकंजगदक्तून् सर्वारात्रीश्चव्यूर्णोत् स्वतेजसाविशेषेणाच्छादयति हविर्वहनंकुर्वन्सर्वमपिजगत्स्वभासाप्रकाशयतिस्मेतिभावः विश्वेषांसर्वेषांदेवानां दानादिगुणयुक्तानां इन्द्रादीनांमध्येदेवोद्योतमानः एकएवायमग्निः एषांपूर्वोक्तानां स्थावरादीनांमहित्वामहत्वानिमाहात्म्यानियद्यस्मात् परिभुवत्परिभवति परिगृह्णाति परितोव्याप्यवर्तते परिपूर्वोभवतिःपरिग्रहार्थः यद्वा एषांविश्वेषां स्थावरादीनां मध्येवर्तमानोयंदेवोग्निर्देवानांमहत्त्वानियद्यदापरिभुवत् परितोव्याप्नोति तदानीमितिपूर्वत्रान्वयः ॥ ऊर्णोत् ऊर्णुञ्आच्छादने ऊर्णोतेर्विभाषेतिवृद्धेर्विकल्पः ॥ १ ॥

१. हव्य-धारक अग्नि हव्य द्रव्य को मिलाकर आकाश में उपस्थित करते हैं तथा स्थावर-जंगम वस्तुओं और रात्रि को अपने तेज-द्वारा प्रकाशित करते हैं। सारे देवों में अग्नि प्रकाशमान और स्थावर, जंगम आदि में व्याप्त हैं।

द्वितीयामृचमाह—

आदित्तेविश्वेक्रतुंजुषन्तशुष्काद्यद्देवजीवोजनिष्ठाः। (३)
भजन्तविश्वेदेवत्वन्नामऋतंसपन्तोअमृतमेवैः (४)॥२॥

आत्। इत्। ते। विश्वे। क्रतुम्। जुषन्त। शुष्कात्। यत्। देव। जीवः। जनिष्ठाः। (३) भजन्त। विश्वे। देवऽत्वम्। नाम। ऋतम्। सपन्तः। अमृतम्। एवैः (४) ॥ २ ॥

हेदेवद्योतमानाग्ने जीवोजीवन्प्रज्वलन् शुष्कात् नीरसादरणिरूपात्काष्ठाद्यद्यदाजनिष्ठाः प्रादुर्भवसिमथनेनोत्पद्यसे आदित् अनन्तरमेवविश्वे सर्वेयजमानाः तेतुभ्यंक्रतुंकर्मजुषन्तसेवन्ते अनुतिष्ठन्ति तथानुष्ठायचविश्वेतेसर्वेनामनामकंऋतंअवितथंदेवत्वंदेवतात्वंभजन्तभजन्तेप्राप्नुवन्ति किंकुर्वन्तः अमृतंअमरणंत्वांएवैः त्वांगन्तृभिःस्तोत्रैः सपन्तःसमवयन्तः प्राप्नुवन्तइत्यर्थः ॥ जुषन्तेत्यादीनित्रीण्याख्यातानि छन्दसिलुङ्लङ्लिटइतिवर्तमानार्थानि । एवैः यन्तिस्तोतव्याभिमुख्येनगच्छन्तीतिएवानिस्तोत्राणि इणूशीङ्भ्यांवन् ॥ २ ॥

२. अग्निदेव! तुम्हारे सूखे काष्ठ से जलकर प्रकट होने पर सारे यजमान तुम्हारे कर्म का अनुष्ठान करते हैं। तुम अमर हो। स्तोत्र-द्वारा तुम्हारी सेवा करके वे सब प्रकृत देवत्व प्राप्त करते हैं।

ऋतस्यप्रेषाऋतस्यंधीतिर्विश्वायुर्विश्वेअपांसिचक्रुः । (५)
यस्तुभ्यंदाशाद्योवातेशिक्षात्तस्मैचिकित्वान्रयिंदयस्व (६)॥३॥

ऋतस्यं । प्रेषाः । ऋतस्यं । धीतिः । विश्वऽआयुः । विश्वे ।
अपांसि । चक्रुः । (५) यः । तुभ्यम् । दशात् । यः । वा । ते । शिक्षात् ।
तस्मै । चिकित्वान् । रयिम् । दयस्व (६) ॥ ३ ॥

ऋतस्यगतस्यदेवयजनंप्राप्तस्याग्नेःप्रेषाःप्रकर्षेणेष्यमाणाःस्तुतयःक्रियन्ते धीतिःधीयतेसोमःपीयतेस्मिन्निति धीतिर्यागः सोपिऋतस्यदेवयजनदेशंप्राप्तस्याग्नेरेवक्रियते अतःसोग्निर्विश्वायुः विश्वंसर्वमायुरन्नंयस्यसतथाविधोभवति अपिचास्मैविश्वेसर्वेयजमानाःअपांसिदर्शपूर्णमासादीनिकर्माणिचक्रुः कुर्वन्ति हेअग्ने तुभ्यंयोदाशाच्चरुपुरोडाशादीनिहवींषिददातियोवापि योन्योयजमानःतेशिक्षात्त्वदीयंकर्मकर्तुंशक्तोभूयासमितिइच्छति उभयविधायतस्मैयजमानायचिकित्वान्तत्कृतमनुष्ठानंजानन्त्वंरयिंदयस्वधनंदेहि ॥ दाशात् दाश्रृदाने लेट्याडागमः । शिक्षात् शकॢशक्तौ इच्छार्थेसन् सनिमीमाघुरभलभशकेतिअकारस्यइसादेशः अत्रलोपोभ्यासस्येतिअभ्यासलोपः स्कोःसंयोगाद्योरितिसकारलोपः पूर्ववल्लेट्याडागमः । चिकित्वान् कितज्ञाने लिटःक्वसुः । दयस्व दयदानगतिरक्षणहिंसादानेषु ॥ ३ ॥

३. अग्नि के यज्ञस्थल में आने पर उनकी स्तुति और यज्ञ किये जाते हैं। अग्नि विश्वायु हैं। सब यजमान अग्नि का यज्ञ करते हैं। अग्निदेव! जो तुम्हें हव्य देता है अथवा जो तुम्हारा कर्म करने को सीखता है, तुम उसके किये अनुष्ठान को जानकर उसे धन दो।

होतानिषत्तोमनोरपत्येसचिन्वासांपतीरयीणाम् । (७)
इच्छन्तरेतोमिथस्तनूषुसंजानतस्वैर्दक्षैरमूराः (८) ॥४॥

होता । निऽसत्तः । मनोः । अपत्ये । सः । चित् । नु । आसाम् । पतिः । रयीणाम् । (७) इच्छन्त । रेतः । मिथः । तनूषु । सम् । जानत । स्वैः । दक्षैः । अमूराः (८) ॥ ४ ॥

हेअग्ने त्वंमनोरपत्येयजमानस्वरूपायांप्रजायां होतादेवानामाह्वातासन् निषत्तोनिषण्णश्चा-मन्योहिप्रजाइतिहिब्राह्मणम्। सचिन्नुसएवत्वंआसांप्रजानांरयीणांगवादीनांधनानामधिपतिःस्वामी अतस्ताःप्रजास्तनूषुआत्मीयेषुशरीरेषुमिथःसंसृष्टमेकीभूतंपुत्ररूपेणपरिणतंरेतोवीर्यमिच्छन्त ऐच्छन्त्वदनुग्रहेणपुत्रमलभन्तेतियावत् लब्धपुत्राश्चताःप्रजाःअमूराःअमूढाःसत्यःस्वैःस्वकीयैःदक्षैः समर्थैःपुत्रैःसहसंजानत सम्यगवगच्छन्ति चिरकालंजीवन्तीत्यर्थः यद्वा दक्षशब्दःप्राणवाची प्राणोवैदक्षोपानःक्रतुरितिश्रुतेः। स्वैःदक्षैःस्वकीयैःप्राणैःअमूराःसन्तस्त्वयैवसर्वंजानन्ति॥ इच्छन्त व्यत्ययेनात्मनेपदम्। जानत छान्दसोलङ् झस्यादादेशे श्नाभ्यस्तयोरातइत्याकारलोपः। अमूराः मूराअमूरेत्यत्रयास्कएवंव्याचख्यौ—मूढावयंस्मोअमूढस्त्वमसीति[3]। अतोत्राप्यमूरशब्देनामूढत्वमुच्यते वर्णव्यापत्त्याढकारस्यरेफः यद्वा मुर्छामोहसमुच्छ्राययोः अस्मात्सम्पदादिलक्षणोभावे क्विप् राल्लोपइतिछलोपः रोमत्वर्थीयःनमूराअमूराः अथवा अगमत्यादिषु अस्मादौणादिक ऊ-रन्प्रत्ययः ॥ ४ ॥

४. हे अग्नि ! तुम मनु के पुत्रों में देवों के आह्वानकारी रूप से अवस्थान करते हो। तुम्हीं उनके धन के अधिपति हो। उन्होंने पुत्र उत्पन्न करने के लिए अपने शरीर में शक्ति की इच्छा की थी अर्थात् तुम्हारे अनुग्रह से उन्होंने पुत्र-प्राप्ति की थी। वे मोह का त्याग करके पुत्रों के साथ त्रिकाल तक जीवित रहें।

पितुर्नपुत्राःक्रतुंजुषन्तश्रोषन्येअस्यशासंतुरासः। (९)
विरायऔर्णोद्दुरःपुरुक्षुःपिपेशनाकंस्तृभिर्दमूनाः (१०)॥५॥१२॥

पितुः । न । पुत्राः । क्रतुम् । जुषन्त । श्रोषन् । ये । अस्य । शासम् । तुरासः । (९) वि । रायः । और्णोत् । दुरः । पुरुऽक्षुः । पिपेश । नाकम् । स्तृऽभिः । दमूनाः (१०) ॥ ५ ॥ १२ ॥

अस्याग्नेःशासंशासनंतुरासस्त्वरमाणाःसन्तोयेयजमानाः श्रोषन्शृण्वन्तितेसर्वेतेनानुशिष्टं क्रतुंकर्मजुषन्तसेवन्ते तत्रदृष्टान्तः—पितुर्नपुत्राः यथापुत्राः पुरुबहुलंत्रायकाः पुन्नाम्नोनरकाद्वारक्षकास्तनयाः पितुराज्ञांकुर्वन्तितद्वत् पुत्रःपुरुत्रायतेनिपरणाद्वापुंनरकंततस्त्रायतइतिवेतियास्कः।

---

1 तै० सं० ५. १. १५. । 2 तै० सं० २. ५. २. ।
3 नि० ६. ८. । 4 नि० २. ११. ।

पुरुक्षुः क्षुइत्यन्ननाम बह्वन्नः सोग्निः एषांयजमानानांदुरोद्वाराणियज्ञस्यद्वारभूतानिरायोधनानिव्यौर्णोत् विवृणोतिप्रकाशयतिददातीतियावत् अपिच दमूनाः दमेयज्ञगृहेमनोयस्यसोग्निः नास्मिन्चकंदुःखमस्तीतिनाकोद्युलोकःतं स्तृभिरितिनक्षत्रनाम स्तृभिर्नक्षत्रैः पिपेश अवयवीचकार नक्षत्रैर्युक्तमकरोदित्यर्थः॥ श्रोषन् श्रुश्रवणे लेटयडागमः सिब्बहुलंलेटीतिसिप् बहुलंछन्दसीतिविकरणस्यलुक् इतश्चलोपइतीकारलोपः संयोगान्तस्यलोपः। पिपेश पिशअवयवे॥ ५॥

५. जिस प्रकार पुत्र पिता की आज्ञा का पालन करता है, उसी प्रकार यजमान लोग तुरत अग्नि की आज्ञा सुनते और अग्नि-द्वारा आविष्ट कार्य करते हैं। अनन्त-धनशाली अग्नि यजमानों के यज्ञ के द्वार-रूप धन को प्रदान करते हैं। यज्ञ-रत गृह में अग्नि आसक्त हैं; और, उन्होंने ही आकाश को नक्षत्र-युक्त किया था।

शुक्रइतिद्विपदंदशर्चं अध्ययनतःपञ्चर्चं पञ्चमंसूक्तंपराशरस्यार्षं आग्नेयं शुक्रइत्यनुक्रान्तं विनियोगोलैङ्गिकः।

तत्रप्रथमामृचमाह—

शुक्रःशुशुक्वाँउषोनजारःपप्रासमीचीदिवोनज्योतिः। (१)
परिप्रजातःक्रत्वाबभूथभुवोदेवानांपितापुत्रःसन् (२)॥१॥

शुक्रः। शुशुक्वान्। उषः। न। जारः। पप्राः। समीची इति सम्ऽईची। दिवः। न। ज्योतिः। परि। (१) प्रऽजातः। क्रत्वा। बभूथ। भुवः। देवानाम्। पिता। पुत्रः। सन् (२)॥ १॥

शुक्रः शुभ्रवर्णोयमग्निः उषोनजारःउषसोजरयितासूर्यइवशुशुक्वान् शोचयितासर्वस्यप्रकाशयिताभवति तथासमीचीसंगतेद्यावापृथिव्यौदिवोनज्योतिः द्योतमानस्यसूर्यस्यज्योतिरिव पप्रा स्वतेजसापूरयिता हेअग्ने अतस्त्वंप्रजातः प्रादुर्भूतः सन्क्रत्वाकर्मणा यद्वा ज्ञानहेतुनाप्रकाशेनउक्तप्रकारेणसर्वंजगत्परिबभूथपरितोव्याप्नोषि दीव्यन्तीतिदेवाऋत्विजः तेषांपुत्रःसन् पुन्नाम्नोनरकात्त्रायकःसन् पिताभुवः पालयिताभवसि यद्वा देवानामिन्द्रादीनामेवपुत्रःसन्पुत्रइवदूतोभूत्वापिताहविर्भिःपालयिताभवसि॥ शुशुक्वान् शुचदीप्तौ लिटःक्वसुः व्यत्ययेनकुत्वम्। पप्रा पृपालनपूरणयोरित्यस्मादादृगमहनजनइतिकिप्रत्ययः सुपांसुलुगितिसोर्डादेशः। समीची सम्पूर्वादञ्चतेः ऋत्विगित्यादिनाक्विन् समःसमीतिसम्यादेशः अञ्चतेश्चेतिवक्तव्यमितिङीप् अचइत्यकारलोपेचावितिदीर्घत्वम् उदात्तनिवृत्तिस्वरेणङीपउदात्तत्वम् वाछन्दसीतिपूर्वसवर्णदीर्घत्वम्

यदितु सम् ईचीइतिपदविभागःक्रियते तर्हि उदईदितिविधीयमानमीत्वंसमउत्तरस्यापिद्रष्टव्यम्। बभूथ बभूथाततन्थेतिनिपातनादिड‍भावः ॥ १ ॥

१. शुक्लवर्ण अग्नि उषा-प्रेमी सूर्य की तरह सर्व-पदार्थ-प्रकाशक हैं। अग्नि, प्रकाशक सूर्य की ज्योति की तरह, अपने तेज से द्यौ और पृथिवी को एक साथ परिपूर्ण करते हैं। हे अग्निदेव! तुम प्रकट होकर अपने कर्म-द्वारा सारे जगत् को परिव्याप्त करो। तुम देवों के पुत्र होकर भी उनके पिता हो; क्योंकि पुत्र की तरह देवों के दूत हो और पिता की तरह देवों को हव्य देते हो।

वेधाअदृप्तोअग्निर्विजानन्नूधर्नगोनांस्वाद्मापितूनाम्। (३)
जनेनशेवआहूर्यःसन्मध्येनिषत्तोरण्वोदुरोणे (४)॥२॥

वेधाः। अदृप्तः। अग्निः। विऽजानन्। ऊधः। न। गोनाम्। स्वाद्म। पितूनाम्। (३)जनै। न। शेवः। आऽहूर्यः। सन्। मध्ये। निऽसत्तः। रण्वः। दुरोणे (४)॥ २ ॥

वेधाःमेधाविनामैतत् मेधावी यद्वा विधाता सर्वस्यकर्ताअदृप्तः दर्परहितःविजानन्कर्तव्याकर्तव्यविभागंजानन्नग्निःगोनांगवामूधर्न गोसम्बन्धिपयसआश्रयभूतंस्थानमिव पितूनामन्नानां स्वाद्मस्वादयितारसयिता यथागोरूधः पयःप्रदानेनसर्वाण्यन्नानिस्वादूनिकरोतितद्वदग्निरपिसम्यक्पाकेनसर्वाण्यन्नानिस्वादूनिकरोतीत्यर्थः अपिच एवम्भूतोग्निः जनेनशेवःजनपदेलोकेसुखकरः पुरुषइवमध्येयज्ञेषुमध्येआहूर्यःआह्वातव्यःसन् दुरोणेयज्ञगृहेनिषत्तोनिषण्णोरण्वोरमयितास्तुत्योवाभवति ॥ गोनां गोःपादान्तेइतिअपादान्तेपिनुट्। स्वाद्म स्वादआस्वादने अन्तर्भावितण्यर्थात्अन्येभ्योपिदृश्यन्तइतिमनिन्सुपांसुलुगितिसोर्लुक्। पितूनां नामन्यतरस्यामितिनामउदात्तत्वम्। आहूर्यः आङ्पूर्वाद्ध्वयतेरचोयदितियत् बहुलंछन्दसीतिसम्प्रसारणम् हलइतिदीर्घः रेफोपजनश्छान्दसः यतोनावइत्याद्युदात्तत्वम् ॥ २ ॥

२. मेधावी, निरहंकार और कर्माकर्म-ज्ञाता अग्नि, गौ के स्तन की तरह, सारा अन्न स्वादिष्ट करते हैं। संसार में हितैषी पुरुष की तरह अग्नि यज्ञ में आहूत होकर और यज्ञस्थल में आकर प्रीतिप्रदान करते हैं।

पुत्रोनजातोरण्वोदुरोणेवाजीनप्रीतोविशोवितारीत्। (५)
विशोयदह्वेन्नृभिःसनीळाअग्निर्देवत्वाविश्वान्यश्याः (६)॥३॥

पुत्रः। न। जातः। रण्वः। दुरोणे। वाजी। न। प्रीतः। विशः। वि। तारीत्। (५) विशः। यत्। अह्वे। नृऽभिः। सऽनीळाः। अग्निः। देवऽत्वा। विश्वानि। अश्याः (६)॥ ३ ॥

पुत्रोन पुत्रइव जातःप्रादुर्भूतोग्निःदुरोणेगृहेरण्वोरमयिताभवति वाजीन अश्वइव प्रीतोहर्षयुक्तःसन् विशः संग्रामेवर्तमानाःशत्रुभूताःप्रजाः वितारीत् विशेषेणतरति अतिक्रामति अपिच नृभिः ऋत्विग्लक्षणैर्मनुष्यैःसहितोहं सनीळाः समाननिवासस्थानाःविशोदेवीःप्रजायद्यदाअह्वे आह्वयामि तदानीमयमग्निर्विश्वानिसर्वाणिदेवत्वादेवत्वानिअश्याः अश्नुतेप्राप्नोतिस्वयमेवतत्तद्देवतारूपोभवतीत्यर्थः । तथाचमन्त्रान्तरमाम्नास्यते—त्वमग्नेवरुणोजायसेयत्त्वंमित्रोभवसियत्समिद्धइत्यादि[1] ॥ अश्याः अशूव्याप्तौ लिङ्व्यत्ययेनपरस्मैपदमध्यमौ बहुलंछन्दसीतिविकरणस्यलुक् ॥ ३ ॥

३. घर में पुत्र की तरह उत्पन्न होकर अग्नि आनन्द प्रदान करते हैं तथा अश्व की तरह हर्षान्वित होकर युद्ध में शत्रुओं को अतिक्रम करते हैं। जब मैं मनुष्यों के साथ में समान-निवासी देवों को बुलाता हूँ, तब तुम अग्नि! सब देवों का देवत्व प्राप्त करते हो।

नकिंष्टएताव्रतामिनन्तिनृभ्योयदेभ्यःश्रुष्टिंचकर्थ । (७)
तत्तुतेदंसोयदहन्त्समानैर्नृभिर्यद्युक्तोविवेरपांसि (८) ॥४॥

नकिः । ते । एता । व्रता । मिनन्ति । नृऽभ्यः । यत् । एभ्यः । श्रुष्टिम् । चकर्थ (७)। तत् । तु । ते । दंसः । यत् । अहन् । समानैः । नृऽभिः । यत् । युक्तः । विवेः । रपांसि (८)॥ ४ ॥

हेअग्ने तेतवसम्बन्धीनि एताव्रता एतानिपरिदृश्यमानानिदर्शपूर्णमासादीनिकर्माणि नकिर्मिनन्ति राक्षसादयोबाधकानहिंसन्ति यद्यस्मात्त्वंएभ्यः कर्मसुवर्तमानेभ्योनृभ्योयज्ञस्यनेतृभ्योयजमानेभ्यःश्रुष्टिंश्रुआशुअश्नुतेव्याप्नोतीतिश्रुष्टिः यज्ञफलरूपंसुखंतच्चकर्थकृतवानसि सतिहि तवव्रतानांबाधकेएतन्नोपपद्यतेअतोवगम्यतेतवव्रतानांहिंसकानसन्तीति हेअग्ने तेत्वदीयंतत्तुदंसः तदेवकर्मयद्यदिराक्षसादिरहन्हन्तिनाशयति तदानींसमानैःसप्तगणरूपेणसदृशैर्नृभिर्नेतृभिर्मरुद्भिर्युक्तस्त्वं रपांसिबाधकानिराक्षसादीनियद्यस्मात्त्वंविवेःगमयसिपलायनंप्रापयसितत्तस्मात्तव व्रतानिनहिंसन्तीतियोज्यम् ॥ मिनन्ति मीञ्हिंसायां क्र्यादिकः प्वादीनांह्रस्वइतिह्रस्वत्वम् । विवेःछन्दसिलुङ्लङ्लिटइतिवर्तमानेलङ् वीगत्यादिषु सिपिअदादित्वाच्छपोलुकिप्राप्ते बहुलंछन्दसीतिशपःश्लुः ॥ ४ ॥

४. राक्षसादि तुम्हारे व्रत आदि को ध्वंस नहीं करते; क्योंकि तुम उन व्रतादि में वर्त्तमान यजमानों को यज्ञ-फलरूप सुख प्रदान करते हो। यदि राक्षसादि तुम्हारे व्रत का नाश करें, तो अपने साथी नेता मरुतों के साथ तुम उन बाधकगणों को भगा देते हो।

---

[1] ऋ० सं० . ३. ८. १६. ।

पञ्चमीमृचमाह—

उषोनजारोविभावोस्रःसंज्ञातरूपश्चिकेतदस्मै। (९)
त्मनावहन्तोदुरोव्यृण्वन्नवन्तविश्वेस्वर्१दृशीके (१०) ॥५॥१३॥

उषः। न। जारः। विभाऽवा। उस्रः। संज्ञातऽरूपः। चिकेतत्। अस्मै। (९) त्मना। वहन्तः। दुरः। वि। ऋण्वन्। नवन्त। विश्वे। स्वः। दृशीके (१०)॥५॥१३॥

उषोनजारउषसोजरयिताआदित्यइव विभावाविशिष्टप्रकाशयुक्तः उस्रोनिवासयितासंज्ञातरूपःसर्वैःप्राणिभिरवगतस्वरूपः देवतान्तरवदप्रत्यक्षोनभवतीत्यर्थः एवम्भूतोग्निरस्मैयजमानायचिकेतत् जानातु अभिमतफलंददात्वित्यर्थः यद्वा विभक्तिव्यत्ययः अस्मैइदंसूक्तरूपंस्तोत्रंचिकेतत्जानातु तथाअस्यरश्मयःत्मनाआत्मनैवस्वयमेववहन्तोहविर्वहनंकुर्वन्तोदुरोयज्ञगृहद्वाराणिव्यृण्वन् विशेषेणगच्छन्तिव्याप्नुवन्तीत्यर्थः तदनन्तरंदृशीकेदर्शनीयेस्वःनभसिविश्वेसर्वेतेरश्मयोनवन्तगच्छन्ति नवतिर्गतिकर्मा देवान्प्राप्नुवन्तीत्यर्थः॥ उस्रः वसनिवासे स्फायितञ्चीत्यादिनारक् यजादित्वात्सम्प्रसारणम्। चिकेतत् कितज्ञाने जौहोत्यादिकः लेटचडागमः बहुलंछन्दसीतिविकरणस्यश्लुः द्विर्वचनाद्वाभ्यस्तस्याचिपितीतिलघूपधगुणप्रतिषेधाभावः अभ्यस्तानामादिरित्याद्युदात्तत्वम्। ऋण्वन् इविरिविरविधिविगत्यर्थाः इदित्त्वान्नुम् छान्दसोलुङ् व्यत्ययेनरेफस्य सम्प्रसारणम् यद्वा ऋणुगतौ तनोत्यादिः॥५॥

५. उषा-प्रेमी सूर्य की तरह अग्नि ज्योतिः-सम्पन्न और निवास-हेतु हैं। अग्नि का रूप संसार जानता है। अग्नि उपासक को जानें। अग्नि की किरण स्वयं हव्य वहन करके यज्ञ-गृह के द्वार पर फैलती हैं; तदनन्तर दर्शनीय आकाश में जाती हैं।

॥ इतिप्रथमस्यपञ्चमेत्रयोदशोवर्गः॥ १३॥

वनेमेतिद्विपदमेकादशर्चं अध्ययनतःषष्ठंचंषष्ठंसूक्तम् ऋष्याद्याःपूर्ववत् अनुक्रान्तंच— वनेमैकादशेति। विनियोगोलैङ्गिकः।

तत्रप्रथमामृचमाह—

वनेमपूर्वीरर्योमनीषाअग्निःसुशोकोविश्वान्यश्याः। (१)
आदैव्यानिव्रताचिकित्वानामानुषस्यजनस्यजन्म (२)॥१॥

---

१ नि० ३. २०.।

वनेम । पूर्वीः । अर्यः । मनीषा । अग्निः । सुऽशोकः । विश्वानि । अश्याः । (१) आ । दैव्यानि । व्रता । चिकित्वान् । आ । मानुषस्य । जनस्य । जन्म (२) ॥ १ ॥

पूर्वीः प्रभूताः इषोन्नानिवनेमसंभजेमहि अग्निस्तादृशान्नानिददात्वित्यर्थः मनीषामनीषयाबुद्ध्याअर्योगन्तव्यः प्राप्तव्यः यद्वा मनीषयाअर्यःस्वामीसुशोकः शोभनदीप्तिःएवम्भूतोग्निःविश्वानिसर्वाणिकर्माणिअश्याः अश्नुतेव्याप्नोति किंकुर्वन् दैव्यानिदेवेषुभवानिव्रतान्व्रतानिकर्माणिचिकित्वान्आसमन्तात्वजानन् तथामानुषस्यजनस्यमनुष्यजातस्यजन्मउत्पत्तिरूपंकर्मचिकित्वान् आभिमुख्येनजानन्द्यावापृथिव्योः सम्बन्धीनियानिकर्माणितानिसर्वाणिअवगच्छन् अवगत्यव्याप्नोतीत्यर्थः॥ वनेम वनषणसम्भक्तौ शपिप्राप्तेव्यत्ययेनशः आत्मनेपदंच अदुपदेशाल्लसार्वधातुकानुदात्तत्वेविकरणस्वरःशिष्यते । पूर्वीः पुरुशब्दाद्वोतोगुणवचनादितिङीष् हलिचेतिदीर्घः । मनीषा ईषाअक्षादित्वात् प्रकृतिभावः।सुशोकः शुचदीप्तौ भावेघञ् चजोःकुघिण्ण्यतोरितिकुत्वम् । शोभनःशोकोयस्य आद्युदात्तंद्व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वम् । अश्याः देवत्वाविश्वान्यश्योइतिवत् । चिकित्वान् कितज्ञानेलिटःक्वसुः ॥ १ ॥

१. जो शोभन दीप्ति से युक्त अग्नि ज्ञान के द्वारा प्रापणीय हैं, जो सारे देवों के कर्म और मनुष्यों के जन्मरूप कर्म के विषय समझकर सारे कार्यों में व्याप्त हैं, वैसे अग्नि से हम प्रभूत अन्न माँगते हैं ।

द्वितीयामृचमाह—

गर्भोयोअपांगर्भोवनानांगर्भश्चस्थातांगर्भश्चरथाम् । (३)
अद्रौचिदस्माअन्तर्दुरोणेविशांनविश्वोअमृतःस्वाधीः (४)॥२॥

गर्भः । यः । अपाम् । गर्भः । वनानाम् । गर्भः । च । स्थाताम् । गर्भः । चरथाम् । (३)अद्रौ । चित् । अस्मै । अन्तः । दुरोणे । विशाम् । न । विश्वः । अमृतः । सुऽआधीः (४) ॥ २ ॥

योग्निरपांगर्भोगर्भवदन्तर्वर्तीअपान्नपात्संज्ञः यश्चवनानांअरण्यानांगर्भःदावाग्निरूपेणतन्मध्येवर्तते यश्चस्थातांस्थावराणांकाष्ठादीनांगर्भोन्तरवस्थाता चरथांचरणवतांजङ्गमानां गर्भोजाठररूपेणदेहमध्येवतिष्ठते एवम्भूतायास्माअग्नयेदुरोणेदुस्तर्यंगृहेअद्रौचित्पर्वतेपिअन्तर्मध्येहविःप्रयच्छन्तीतिशेषः सोयंअमृतः अमरणधर्माग्निः स्वाधीः शोभनकर्मयुक्तःशोभनध्यानोवाअस्माकंभवत्वितिशेषःतत्रदृष्टान्तः—विश्वः निवेशयितासुखेनावस्थापयिताराजाविशांन प्र-

[1] ऋ० सं० १. ५. १३. ।

जानांयथारक्षणरूपशोभनकर्मयुक्तोभवतितद्वत् ॥ स्थातां तिष्ठतेःक्विपि छान्दसस्तुक् यद्वा औणादिकस्तुमत्ययः आमिअन्त्यलोपश्छान्दसः। चरथां शीङ्शपिरुगमीतिविधीयमानोथप्रत्ययोबहुलवचनाच्चरेरपिद्रष्टव्यः आगमानुशासनस्यानित्यत्वादामोनुडभावेसवर्णदीर्घः। विश्वः विशप्रवेशने अस्मादन्तर्भावितण्यर्थादशूप्रुषीत्यादिनाक्वन्प्रत्ययः नित्त्वादाद्युदात्तत्वम् ॥ २ ॥

२. जो अग्नि जल, वन, स्थावर और जंगम के बीच अवस्थान करते हैं, उन्हें यज्ञ-गृह और पर्वत के ऊपर लोग हवि प्रदान करते हैं। जैसे प्रजावत्सल राजा प्रजा के हित का कार्य करते हैं; वैसे ही अमर अग्नि हमारे हितकर कार्य का सम्पादन करें।

सहिक्षपावाँअग्नीरयीणांदाशद्योअस्माअरंसूक्तैः। (५)
एताचिकित्वोभूमानिपाहिदेवानांजन्ममर्ताँश्चविद्वान् (६) ॥३॥

सः। हि। क्षपाऽवान्। अग्निः। रयीणाम्। दाशत्। यः। अस्मै। अरम्। सुऽउक्तैः। (५) एता। चिकित्वः। भूम। नि। पाहि। देवानाम्। जन्म। मर्तान्। च। विद्वान् (६) ॥ ३ ॥

सहग्निःक्षपावान् क्षपेतिरात्रिनाम रात्रिमान् आग्नेयीवैरात्रिरितिश्रुतेः[1]। रात्रेरग्निसम्बन्धोपि अग्निर्ज्योतिर्ज्योतिरग्निःस्वाहेतिहूयमानत्वात्। यद्वा राक्षसादीनांक्षपणेन नाशनेनयुक्तः एवम्भूतोग्निः स्तोत्रेयजमानायरयीणांधनानिदाशत्दाशतिप्रयच्छति योयजमानःअस्माअग्नये सूक्तैः सुष्टूक्तैःयथाशास्त्रं प्रयुक्तैर्मन्त्रैःअरंअलंपर्याप्तं स्तोत्रंकरोतितस्माइत्यर्थः हेचिकित्वः चिकित्वांश्चेतनावानितियास्कः[2]। हेचेतनावन्सर्वज्ञ अग्ने त्वं देवानामिन्द्रादीनां जन्मजन्मानिमर्तान्मनुष्यांश्चविद्वान् जानन् एताएतानिभूमभूम्युपलक्षितानिभूतजातानिनिपाहिनितरांपालय यतस्त्वंदेवमनुष्यादीन् सर्वान् जानासिअतएवमुच्यसइत्यर्थः ॥ रयीणां क्रियाग्रहणंकर्तव्यमितिकर्मणःसम्प्रदानत्वाच्चतुर्थ्यर्थेषष्ठी। दाशत् दाश्रृदाने लेट्यडागमः। अरं वालमूलेत्यादिनालत्वविकल्पः। सूक्तैः सूपमानात्क्तइत्युत्तरपदान्तोदात्तत्वम्। चिकित्वः मतुवसोरितिनकारस्यरुत्वम्। भूम सुपांसुलुगितिभूमिशब्दादुत्तरस्याद्वितीयायाडादेशः पदकालेह्रस्वश्छान्दसः॥३॥

३. मंत्र-द्वारा जो यजमान अग्नि की यथेष्ट स्तुति करता है, उसे रात्रि में प्रदीप्त अग्नि धन देते हैं। हे सर्वज्ञाता अग्नि! तुम देवों और मनुष्यों के जन्म जानते हो; इसलिए समस्त जीवों का पालन करो।

वर्धान्यंपूर्वीःक्षपोविरूपाःस्थातुश्चरथमृतप्रवीतम्। (७)
अराधिहोतास्वर्निषत्तःकृण्वन्विश्वान्यपांसिसत्या (८) ॥४॥

---

[1] तै० ब्रा० १. १. ४.। [2] तै० ब्रा० २. १. ९.। [3] नि० २. ११.।

वर्धान् । यम् । पूर्वीः । क्षपः । विऽरूपाः । स्थातुः । च । रथम् । ऋतऽप्रवीतम् । (७) अराधि । होता । स्वः । निऽसत्तः । कृण्वन् । विश्वानि । अपांसि । सत्या (८) ॥ ४ ॥

पूर्वीर्बह्व्यःउषसःक्षपोनिशाश्चविरूपाः शुक्लकृष्णतयाविविधरूपाःसत्यःयमग्निंवर्धान्वर्धयन्ति यथास्थातुः स्थावरंवृक्षादिकं रथंरममाणंजङ्गमंमनुष्यादिकंचऋतप्रवीतं ऋतेनोदकेनसत्येनयज्ञेनवाप्रकर्षेणवेष्टितंयमग्निंवर्धयन्ति सोग्निःस्वःसुष्ठुअरणीयेदेवयजनेनिषत्तोनिषण्णः उपविष्टः सन् होतादेवानामाह्वाता अराधि संसिद्धोभूत् यद्वा ऋत्विग्भिरराधि आराधितइत्यर्थः किंकुर्वन् विश्वानिसर्वाणिसत्यासत्सुयजमानेषुभवानि यद्वा सत्यफलानिअपांसिकर्माणिकृण्वन्कुर्वन्॥ वर्धान् वृधेर्ण्यन्ताल्लेटयाडागमः छन्दस्युभयथेतिशपआर्धधातुकत्वाण्णिलोपः इतश्चलोपइतीकारलोपे संयोगान्तलोपः । ऋतप्रवीतं व्येञ्संवरणे अस्मात्कर्मणिनिष्ठा वचिस्वपीत्यादिनासम्प्रसारणं ह्रुह्रहणेगतिकारकपूर्वस्यग्रहणात् तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरत्वम् । अराधि राधसाधसंसिद्धौ कर्तरिलुङि व्यत्ययेनचिण् ॥ ४ ॥

४. विभिन्न-स्वरूप होकर भी उषा और रात्रि अग्नि को वर्द्धन करती हैं। स्थावर और जंगम पदार्थ यज्ञ-वेष्टित अग्नि को वर्द्धन करते हैं। देवों के आह्वानकारी वही अग्नि देव-पूजन-स्थान में बैठकर और सारे यज्ञ कर्मों को सत्य-फल-सम्पन्न करके पूजित होते हैं।

गोषुप्रशस्तिंवनेषुधिषेभरन्तविश्वेबलिंस्वर्णः । (९)
वित्वानरःपुरुत्रासपर्यन्पितुर्नजिव्रेर्विवेदोभरन्त (१०) ॥५॥

गोषु । प्रऽशस्तिम् । वनेषु । धिषे । भरन्त । विश्वे । बलिम् । स्वः । नः । (९) वि । त्वा । नरः । पुरुऽत्रा । सपर्यन् । पितुः । न । जिव्रेः । वि । वेदः । भरन्त (१०) ॥ ५ ॥

हेअग्ने त्वंवनेषुवननीयेषु सम्भजनीयेषुगोषुअस्मदीयेषुपशुषुप्रशस्तिं प्रशंसां धिषे दधिषे स्थापयसि अस्माकंप्रशस्ताःगवादिपशवोभवन्त्वित्यर्थः विश्वेसर्वेजनाः नोस्मभ्यं स्वःसुष्ठु अरणीयंबलिंउपायनरूपंधनंभरन्तआहरन्तु हेअग्ने त्वात्वांनरोमनुष्याः पुरुत्राबहुषुदेवयजनदेशेषुविसपर्यन् विविधंपूजयन्ति पूजयित्वाचवेदोधनंविभरन्त त्वत्तोविशेषेणहरन्तिगृह्णन्तीत्यर्थः तत्रदृष्टान्तः—जिव्रेर्जीर्णाद्वृद्धात्पितुर्नपितुरिव यथापुत्राःवृद्धात्पितुःसकाशाद्धनंहरन्तितद्वत् ॥ धिषे छान्दसोवर्तमानेलिट् द्विर्वचनप्रकरणेछन्दसिवेतिवक्तव्यमितिद्विर्वचनाभावः। भरन्त हृञ्हरणे के-

वल्लोपिसोपसर्गार्थोद्रष्टव्यः छान्दसोलङ् ह्मग्रहोर्भइतिभत्वम्।पुरुत्रा देवमनुष्यपुरुषपुरुमर्त्येत्या-दिनासप्तम्यर्थेत्राप्रत्ययः।जिव्रेः जृष्वयोहानौ जृशृस्तृजागृभ्यःक्विन् ऋतइद्धातोरितीत्वम् उणा-दयोव्युत्पन्नानिप्रातिपदिकानीतिजिव्रिः किर्योगिर्योरित्येवमादिषुदीर्घोनभवतीत्युक्तत्वात् हलि-चेतिदीर्घस्याभावःरेफवकारयोर्विपर्ययःउक्तंच—वर्णागमोवर्णविपर्ययश्चेति नित्त्वादाद्युदात्तत्वम्। वेदइतिधननाम विद्यतेलभ्यतइतिवेदः विद्लृलाभे कर्मण्यसुन् ॥ ५ ॥

५. अग्नि! हमारे काम में आने योग्य गौओं को उत्कृष्ट करो। सारा संसार हमारे लिए ग्रहण योग्य उपासना-रूप धन ले आवे। अनेक वेध-स्थानों में मनुष्यलोग तुम्हारी विविध प्रकार की पूजा करते तथा बूढ़े पिता के समीप से पुत्र की तरह तुम्हारे पास से धन प्राप्त करते हैं।

द्विपदास्वयुक्संख्यासुयान्त्यातिरिच्यतेसातथैवपठितव्येत्युक्तम् उत्तरातादृशीद्विपदा।

तामेतांषष्ठीमृचमाह—

साधुर्नगृध्नुरस्तेवशूरोयातेवभीमस्त्वेषःसमत्सु (११)॥६॥१४॥

साधुः। न। गृध्नुः। अस्ताऽइव। शूरः। याताऽइव। भीमः। त्वेषः। समत्ऽसु (११) ॥ ६ ॥ १४ ॥

अयमग्निः साधुर्नसाधकइवगृध्नुःगृहीता यथासाधकःसाध्यफलमाशुगृह्णाति तद्वदग्निर-पिसर्वस्वीकरोतीत्यर्थः तथायमग्निःअस्तेवशूरोयथाइषूणांक्षेप्ताधानुष्कः शत्रून्प्रेरयतितद्वदग्निर-पिदहन्सर्वंप्राणिजातंप्रेरयति तथायातेवभीमः यातायातयिताहिंसकः भीमःसर्वेषांभयंकरोभवति तद्वदग्निरपिदह्यमानेनसर्वेषांभयमुत्पादयति अतएवंविधोग्निः समत्सुसङ्ग्रामेषुत्वेषोदीप्तःसन् अस्माकंसहायोभवत्वित्यर्थः ॥ गृध्नुः गृधुअभिकांक्षायां त्रसिगृधिधृषिक्षिपेःक्नुः। शूरः शुग-तौ अन्तर्भावितण्यर्थादस्मात् शुषिचिमीनांदीर्घश्चेतिक्रन् ॥ ६ ॥

६. साधक की तरह अग्नि धन अधिकृत करते हैं। अग्नि धनुर्द्धर की तरह शूर, शत्रु की तरह भयंकर और युद्ध-क्षेत्र में प्रज्वलित हैं।

उपप्रेतिदशर्चंसप्तमंसूक्तम् अत्रानुक्रम्यते—उपप्रदशेति।ऋषिश्चान्यस्मादितिपरिभाषयाश-क्तिपुत्रःपराशरऋषिः अनादेशपरिभाषयात्रिष्टुप् परमाग्नेयमैन्द्राद्दितिपरिभाषितत्वादग्निर्देवता प्रा-तरनुवाकस्याग्नेयेक्रतौत्रैष्टुभेछन्दसीदमादीनित्रीणिसूक्तानि अथैतस्याइतिखण्डेतथैवसूत्रितम्—उपप्रजिन्वन्नितित्रीणिकातउपेतिरितिसूक्तेइति। आश्विनशस्त्रेपिप्रातरनुवाकातिदेशादिदमादीनि त्रीणिसूक्तानि तथैवसूत्र्यते—एतयाग्नेयंगायत्रमुपसन्तनुयात्प्रातरनुवाकन्यायेनेति।

तत्रप्रथमामृचमाह—

उपप्रजिन्वन्नुशतीरुशन्तंपतिंननित्यंजनयःसनीळाः ।
स्वसारःश्यावीमरुषीमजुष्रञ्चित्रमुच्छन्तीमुषसंनगावः ॥१॥

उप । प्र । जिन्वन् । उशतीः । उशन्तम् । पतिम् । न । नित्यम् ।
जनयः । सऽनीळाः । स्वसारः । श्यावीम् । अरुषीम् । अजुष्रन् ।
चित्रम् । उच्छन्तीम् । उषसम् । न । गावः ॥ १ ॥

उशतीरुशत्यःकामयमानाः सनीळाः नीळोनिवासस्थानंसमाननिवासस्थानाः एकपाण्यवस्थानात् स्वसारः स्वसारइत्यङ्गुलिनाम एवंभूताअङ्गुलयःउशन्तंकामयमानमग्निंजनयोजायानित्यंअसाधारणंपतिंन भर्तारमिवउपप्रजिन्वन्उपआगत्यहविःप्रदानादिकर्मणाप्रीणयन्ति प्रीणयित्वाच चित्रंचायनीयंपूजनीयंतमग्निंअञ्जलिबन्धनेनाजुष्रन्असेवन्त तत्रदृष्टान्तः—श्यावींश्यावरर्णांरात्रिसम्बन्धात्कृष्णांततउच्छन्तींसूर्यकिरणसम्बन्धात्तमोवर्जयन्तीं अतएवारुषींआरोचमानां यद्वा शुभ्ररूपयुक्तांउषसंनउषोदेवतांगावोरश्मयोयथासेवन्तेतद्वत् यथारश्मयउषसानित्यसम्बद्धाः एवं सर्वेषुयज्ञेषुअग्निपरिचरणेनअङ्गुलयोनित्यसम्बद्धाइतितात्पर्यार्थः ॥ जिन्वन् जिविप्रीणनार्थः इदित्त्वानुम् लेटचडागमः । उशतीः वाछन्दसीतिपूर्वसवर्णदीर्घत्वम् शतुरनुमइतिनद्याउदात्तत्वम् । स्वसारः असुक्षेपणेइत्यस्मात् सुञ्जिअसेर्ऋन्निविक्रन् नषट्स्वस्रादिभ्यइतिङीप्प्रतिषेधः नित्वादाद्युदात्तत्वम् ।श्यावीं श्यैङ्गतौ इणूशीङ्भ्यामितिवाहुलकाद्वन् शार्ङ्गरवादित्वान्ङीन् ।अरुषीं अरुषमितिरूपनाम ऋगतौ ऋहनिभ्यामुषन् छन्दसीवनिपाविितमत्वर्थीयईकारः व्यत्ययेनाद्युदात्तत्वम् । अजुष्रन् जुषीप्रीतिसेवनयोः तौदादिकः लङ्व्यत्ययेनपरस्मैपदम् रुडित्यनुवृत्तौबहुलंछन्दसीत्यन्तादेशस्यरुडागमः ॥ १ ॥

१. जैसे स्त्री स्वामी को प्रसन्न करती हैं, वैसे ही एक-स्थानवर्तिनी और आकांक्षिणी भगिनी-रूपिणी अँगुलियाँ अभिलाषी अग्नि को हव्य प्रदान-द्वारा प्रसन्न करती हैं। पहले उषा कृष्णवर्णा और पीछे शुभ्रवर्णा होती हैं, उन उषा की जैसे किरणें सेवा करती हैं, वैसे ही सारी अँगुलियाँ अग्नि की सेवा करती हैं।

द्वितीयामृचमाह—

वीळुचिद्दृळ्हापितरोनउक्थैरद्रिंरुजन्नङ्गिरसोरवेण ।
चक्रुर्दिवोबृहतोगातुमस्मेअहःस्वर्विविदुःकेतुमुस्राः ॥२॥

वीळु। चित्। दृळ्हा। पितरः। नः। उक्थैः। अद्रिम्। रुजन्।
अङ्गिरसः। रवेण। चक्रुः। दिवः। बृहतः। गातुम्। अस्मे इति।
अहः। विविदुः। केतुम्। उस्राः॥ २॥

नोस्माकंपितरोङ्गिरसः एतत्संज्ञाऋषयः उक्थैःशस्त्रैः अग्निंस्तुत्वा वीळुचिद्दृळ्हा वीळ्विति-बलनाम बलवन्तंदृढाङ्गमपिअद्रिमत्तारंपणिनामानमसुरं रवेणस्तुतिशब्दमात्रेणैवरुजन्अभञ्जन् तैःस्तुतोग्निस्तमसुरंहतवानित्यर्थः किञ्च बृहतोमहतोदिवोद्युलोकस्यगातुंमार्गंअस्मेअस्माकंचक्रुः कृतवन्तः आवरकस्यासुरस्य अग्निनाहतत्वावमार्गंकृत्वाचस्वःसुष्ठुअरणीयं असुरराहित्येनसुखे-नमाप्यंअहःदिवसंविविदुरजानन्लब्धवन्तोवा तथा केतुंअह्नांकेतयितारंज्ञापयितारमादित्यंउस्राः पणिनापहृतागाश्चविविदुरित्यनुषङ्गः॥वीळुसुपांसुलुगितिविभक्तेर्लुक्।दृळ्हा दृढःस्थूलबलयोरिति निपातितः सुपांसुलुगितिडादेशः। रुजन् रुजोभङ्गे तौदादिकः बहुलंछन्दस्यमाङ्योगेपीत्यडभा-वः। विविदुः विदज्ञाने विदुलाभेइतिवा लिटिउसिरूपम्॥ २॥

२. हमारे अङ्गिरा नाम के पितरों ने मंत्र-द्वारा अग्नि की स्तुति करके बली और दृढाङ्ग पणि असुर को स्तुति-शब्द-द्वारा ही नष्ट किया था तथा हमारे लिए महान् द्युलोक का मार्ग दिया था। अनन्तर उन्होंने सुखकर दिवस, आदित्य और पणि-द्वारा अपहृत गौओं को पाया था।

तृतीयामृचमाह—

दधन्नृतंधनयन्नस्यधीतिमादिदर्यो दिधिष्वो३ विभृत्राः।
अतृष्यन्तीरपसो यन्त्यच्छादेवाञ्जन्मप्रयसावर्धयन्तीः॥३॥

दधन्। ऋतम्। धनयन्। अस्य। धीतिम्। आत्। इत्।
अर्यः। दिधिष्वः। विऽभृत्राः। अतृष्यन्तीः। अपसः। यन्ति।
अच्छ। देवान्। जन्म। प्रयसा। वर्धयन्तीः॥ ३॥

ऋतंदेवयजनदेशंप्राप्तमग्निंअङ्गिरसोमहर्षयःदधन् गार्हपत्यादिरूपेणाधारयन् धारयित्वा चास्याग्नेर्धीतिंकर्मअग्निहोत्रादिलक्षणंधनयन्धनमकुर्वन् यथापुरुषाःधनंसंपादयन्तितद्वदग्निदे-वत्यंकर्मान्वतिष्ठन्नित्यर्थः आदिदअङ्गिरसामनुष्ठानानन्तरमेव अर्यःअर्याःधनस्यस्वामिन्यःदि-धिष्वःतेनधनेनअग्नीनांधारणंकुर्वत्यःकृताग्न्याधानाइत्यर्थः विभृत्राःआहितानग्नीनग्निहोत्रादि-कर्मणिविहरन्त्यः अतृष्यन्तीःविषयान्तरतृष्णारहिताः अतएवापसः अपसाकर्मणायुक्ताः ए-वंभूतायजमानलक्षणाःप्रजाःप्रयसाहविर्लक्षणेनान्नेनदेवान्इन्द्रादीन्जन्मजातान्मनुष्यांश्चवर्धय-

न्वीःवर्धयन्त्यःसत्यः एनमग्निंअच्छआभिमुख्येनयन्तिमाप्नुवन्तिपरिचरन्तीतियावत् ॥ दधन् दधधारणे लङिव्यत्ययेनपरस्मैपदम् बहुलंछन्दस्यमाङ्योगेपीत्यडभावः। धनयन् धनशब्दात्तत्करोतीतिणिच् इष्ठवण्णौप्रातिपदिकस्येतीष्ठवद्भावाट्टिलोपः लङिपूर्ववत्। अर्यः अर्यःस्वामिवैश्ययोरितिनिपातितः लिङ्गवचनव्यत्ययौ अर्यःस्वाम्याख्याचेदित्यन्तोदात्तत्वम्। दिधिष्वः डुधाञ्धारणपोषणयोः षोन्तकर्मणीत्याभ्यांअन्दूदृम्भूजम्बूकफेलूकर्कन्धूदिधिषूरितिकूप्रत्ययान्तोनिपातितः प्रत्ययस्वरः उदात्तस्वरितयोर्यणइतिजसःस्वरितत्वम् । विभृत्राः हृञ्हरणे विपूर्वादस्मादौणादिकःत्रन्प्रत्ययः हृग्रहोर्भइतिभत्वम्। अतृष्यन्तीः ञितृषापिपासायां जसिवाछन्दसीतिपूर्वसवर्णदीर्घस्यविकल्पितत्वात्पूर्वसवर्णदीर्घः अव्ययपूर्वपदप्रकृतिस्वरत्वम्। अपसः अपस्शब्दादुत्पन्नस्यमत्वर्थीयस्यविनोबहुलंछन्दसीतिबहुलवचनाल्लुक् विन्नन्तस्यनित्यलिङ्गत्वेननविषयाभावात्प्रातिपदिकस्वरेणान्तोदात्तत्वम् जन्म जायन्तइतिजन्मानोमनुष्याः अन्येभ्योपिदृश्यन्तइतिमनिन् सुपांसुलुगितिशसोलुक् ॥ ३ ॥

३. अङ्गिरोवंशीयों ने यज्ञ-रूप अग्नि को, धन की तरह, धारण किया था। अनन्तर जिन यजमानों के पास धन है और जो अन्य-विषयाभिलाष त्याग करके अग्नि को धारण करते एवं अग्नि की सेवा में रत रहते हैं, वे हव्य के द्वारा देवों और मनुष्यों की श्रीवृद्धि करके अग्नि के सामने जाते हैं।

मथीद्यदींविभृतोमातरिश्वागृहेगृहेश्येतोजेन्योभूत्।
आदींराज्ञेनसहीयसेसचासन्नादूत्यं१भृगवाणोविवाय ॥४॥

मथीत्। यत्। ईम्। विऽभृतः। मातरिश्वा। गृहेऽगृहे। श्येतः। जेन्यः। भूत्। आत्। ईम्। राज्ञे। न। सहीयसे। सचा। सन्। आ। दूत्यम्। भृगवाणः। विवाय ॥ ४ ॥

मातरिश्वाव्यानवृत्तिस्वरूपेणावस्थितोमुख्यःप्राणः ईमेनमग्निंयद्यदामथीत् अमथ्नात्अग्नेर्मन्थनस्यव्यानवायुसाध्यत्वम् अथयःप्राणापानयोःसन्धिःसव्यानइत्युपक्रम्यछन्दोगैराम्नातम्—अतोयान्यन्यानिवीर्यवन्तिकर्माणियथाग्नेर्मन्थनमाजेःसरणंदृढस्यधनुषआयमनमप्राणन्नपानस्तानिकरोतीति मन्त्रान्तरंचभवति—आन्यंदिवोमातरिश्वाजभारामथ्नादन्यंपरिश्येनोअद्रेरिति। कीदृशोमातरिश्वा विभृतःप्राणिषुप्राणापानादिपञ्चवृत्तिरूपेणविहृतोविभज्यस्थितः तदपिप्राणसंवादेवैरेवाम्नातम्—तान्वरिष्ठःप्राणउवाच मामोहमापद्यथाहमेवैतत्पंचधात्मानंप्रविभज्यैतद्बाणमवष्टभ्यविधारयामीति। मन्थनेनोत्पन्नोयमग्निःश्येतःशुभ्रवर्णोगृहेगृहेसर्वस्मिन्यज्ञगृहेयदाजेन्यःप्रादुर्भू-

---

१ ऋ० सं० १.६.२८.।

तोभूत् यद्वा रक्षसांजेन्योजेताअभिभविताभूत् तथाचतैत्तिरीयकम्—देवासुराःसंयत्ताआसन्तेदेवा-विभ्यतोग्निंप्राविशन् तस्मादाहुरग्निःसर्वादेवताइति। तेग्निमेववरूथंकृत्वासुराअभ्यभवन्निति।[1] ऐ-तरेयिणोप्याम्नन्ति—तेदेवाःप्रतिबुध्याग्निंपुरस्तात्प्रातःसवनेपर्यौहंस्तेग्निनैवपुरस्तात्प्रातःसवनेसुर-रक्षांस्यपाघ्नतेति।[2] आव् यज्ञगृहेप्रादुर्भावानन्तरं ईं एनमग्निं भृगवाणोभृगुर्ऋषिःसइवाचरन्यजमानो-दूत्यंदूतस्यकर्मआविवाय शास्त्रमर्यादयाप्रापयामास तत्रदृष्टान्तः-सचासन्सखाभवन्नन्योराजास-हीयसेअभिभवित्रेप्रबलायराज्ञेन यथाराज्ञेस्वपुरुषःदूतकर्मप्रापयतितद्वत् ॥ मथीत् मथेविलोडने लुङि ह्म्यन्तक्षणेतिवृद्धिप्रतिषेधः। जेन्यः जनीप्रादुर्भावे अस्मादौणादिकएन्यप्रत्ययः टिलोपश्चेति भट्टभास्करमिश्रः। यद्वा जिजयेइत्यस्मात्कृत्यल्युटोबहुलमितिबहुलवचनात्कर्तर्यर्थेचोयदितियत् तस्यनुडागमश्च यतोनावइत्याद्युदात्तत्वम्। दूत्यं दूतस्यकर्मदूत्यंदूतस्यभागकर्मणीइतियत् तित्स्व-रितमितिस्वरितत्वम् यतोनावइत्याद्युदात्तत्वंतु अनित्यमितिवीरवीर्यौचेत्यत्रज्ञापितम्। भृगवाणः भृगुरिवाचरन् सर्वप्रातिपदिकेभ्यःक्विब्वक्तव्यइतिक्विप् तदन्ताल्लटोव्यत्ययेनशानच् अदुपदेशाल्ल-सार्वधातुकानुदात्तत्वेप्रत्ययान्तधातोरन्तोदात्तत्वेप्राप्तेवृषादेराकृतिगणत्वादाद्युदात्तत्वम्। विवाय वीगत्यादिषु अस्मादन्तर्भावितण्यर्थाल्लिट् ॥ ४ ॥

४. मातरिश्वा या व्यान-वायु के विलोड़ित करने पर शुभ्रवर्ण होकर अग्नि समस्त यज्ञ-गृह में प्रकट होते हैं। उस समय जिस तरह मित्र राजा प्रबल राजा के पास अपने आदमी को दूत-कर्म में नियुक्त करता है, उसी तरह भृगु ऋषि की तरह यज्ञ-सम्पादक यजमान अग्नि को दूत-कर्म में नियोजित करता है।

महेयत्पित्रईंरसंदिवेकरवत्सरत्पृशन्यश्चिकित्वान्।
सृजदस्ताधृषतादिद्युमस्मैस्वायांदेवोदुहितरित्विषिंधात्॥५॥१५॥

मुहे। यत्। पित्रे। ईम्। रसम्। दिवे। कः। अव। त्सरत्।
पृशन्यः। चिकित्वान्। सृजत्। अस्ता। धृषता। दिद्युम्।
अस्मै। स्वायाम्। देवः। दुहितरि। त्विषिम्। धात्॥५॥१५॥

महे महतेपित्रेपालयित्रेदिवेद्योतमानायदेवगणायईंइमंरसंपृथिव्याःसारभूतंहविः यद्यदा-यजमानः कःकरोति तदानींपृशन्यःस्पर्शनकुशलोराक्षसादिश्चिकित्वान्हवींषिवहन्तं हेअग्ने त्वां जानन् अवत्सरत्स्वल्पञ्चयावपलायते अस्ता इषुक्षेपणशीलोग्निः धृषताधर्षकेणधनुषाअस्मैपलाय-मानायराक्षसादयेदिद्युंदीप्यमानंबाणंसृजत् विसृजति देवोदीप्यमानः उषःकालंप्राप्तोग्निः स्वायां स्वकीयायांदुहितरिदुहितृवत्समनन्तरभाविन्यांउषसित्विषिंस्वकीयांदीप्तिंधात्स्थापयति उषःका-

---

1 तै० सं० ६.२.२। 2 ऐ०ब्रा० ६.४।

लेहिसूर्यकिरणाःप्रादुर्भवन्ति तैःस्वकीयंप्रकाशमेकीकरोति तथाचतैत्तिरीयकम्—उद्यन्तंवा-वादित्यमग्निरनुसमारोहति तस्माद्धूमएवाग्नेर्दिवाददृश्रइति' । अतउपसिदीप्तिंनिदधातीत्युच्यते ॥ कः करोतेर्लुङि मन्त्रेघसेत्यादिनाच्लेर्लुक्।त्सरत् त्सरछद्मगतौ लेटयडागमः इतश्चेतीकारलोपः।पृ-शन्यः स्पृशसंस्पर्शने कृपृवृजीविविधीयमानःक्युप्रत्ययोबहुलवचनादस्मादपिभवति स्पृशनं स्पर्शः तत्रसाधुरितियत् सलोपश्छान्दसः तित्स्वरितमितिस्वरितत्वम् । दिद्युं दिद्युदितिवज्रनाम अन्त्यलोपश्छान्दसः । धाव् छान्दसोवर्तमानेलुङ् ॥ ५ ॥

५. जिस समय यजमान महान् और पालक देवता को हव्य-रूप रस देता है, उस समय, अग्निदेव ! स्पर्शन-कुशल राक्षस आदि तुम्हें हविर्वाहक जानकर भाग जाते हैं। बाणप्रक्षेपक अग्नि भागते हुए राक्षसों के प्रति अपने रिपु-संहारी धनुष से दीप्तिशाली बाण फेंकते हैं तथा प्रकाशशाली अग्नि अपनी पुत्री उषा में अपना तेज स्थापित करते हैं।

स्वआयस्तुभ्यंदमआविभातिनमोवादाशादुशतोअनुद्यून् ।
वर्धोअग्नेवयोअस्यद्विबर्हायासंद्रायासरथंयंजुनासि ॥६॥

स्वे । आ । यः । तुभ्यम् । दमे । आ । विऽभाति । नमः । वा । दाशात् । उशतः । अनु । द्यून् । वर्धो इति । अग्ने । वयः । अस्य । द्विऽबर्हाः । यासत् । राया । सऽरथम् । यम् । जुनासि ॥ ६ ॥

हेअग्ने तुभ्यं त्वांस्वेदमेस्वकीयेयज्ञगृहेयोयजमानः एकआकारोमर्यादायांयथाशास्त्रंआ-विभातिआसमन्तात् समिदादिभिःकाष्ठैःप्रज्वलयति अनुद्यून् अनुदिवसंउशतःकामयमानाय तुभ्यंनमोवादाशात् हविर्लक्षणमन्नंवादद्यात् अस्ययजमानस्य हेअग्ने द्विबर्हाः द्वयोर्मध्यमोत्त-मस्थानयोः बृंहितोवर्धितस्त्वं वयोन्नंवर्धोवर्धयैव सरथंरथेनसहितं युयुत्सुंयंपुरुषंजुनासि युद्धे प्रेरयसि सपुरुषः रायाधनेनयासत्संगच्छते ॥ तुभ्यं क्रियाग्रहणंकर्तव्यमितिकर्मणःसम्प्रदा-नत्वाच्चतुर्थी । दाशात् दाशृदाने लेटयाडागमः । उशतः शतुरनुमइतिविभक्तेरुदात्तत्वम् चतु-र्थ्यर्थे बहुलंछन्दसीतिषष्ठी । अनुद्यून् द्युरित्यहर्नाम लक्षणे अनोःकर्मप्रवचनीयत्वम् कर्मप्रवच-नीययुक्तेइतिद्वितीया।वर्धो वर्ध उ वृधेर्ण्यन्ताल्लोटिछन्दस्युभयथेतिशपआर्धधातुकत्वात्णेरनिटी-तिणिलोपः शपःपित्त्वादनुदात्तत्वेधातुस्वरःशिष्यते उआसहैकादेशेउञइतिप्रगृह्यत्वम् । यासत् यामापणे सिब्बहुलंलेटीतिसिप् लेटोडाटावित्यडागमः । जुनासि जुइतिगत्यर्थःसौत्रोधातुः शपि प्राप्तेव्यत्ययेनश्ना ॥ ३ ॥

६. अग्नि ! अपने, यज्ञ-गृह में, मर्यादा के साथ, जो यजमान तुम्हें चारों तरफ़ प्रज्वलित करता है; और, अनुदिन अभिलाष करके तुम्हें अन्न प्रदान करता है, हे द्विबर्हा या दो मध्यम-उत्तम स्थानों में-

वर्द्धित अग्नि ! तुम उनका अन्न वर्द्धित करते हो। जो युद्धार्थी पुरुष को, रथ के साथ, युद्ध में प्रेरण करता है, उसे धन प्राप्त हो।

अग्निंविश्वाअभिपृक्षःसचन्तेसमुद्रंनस्रवतःसप्तयह्वीः।
नजामिभिर्विचिकितेवयोनोविदादेवेषुप्रमतिंचिकित्वान् ॥७॥

अग्निम्। विश्वाः। अभि। पृक्षः। सचन्ते। समुद्रम्। न। स्रवतः। सप्त। यह्वीः। न। जामिऽभिः। वि। चिकिते। वयः। नः। विदाः। देवेषु। प्रऽमतिम्। चिकित्वान् ॥ ७॥

विश्वाःपृक्षःचरुपुरोडाशादीनिसर्वाण्यन्नानिअग्निंअंगनादिगुणयुक्तंएनं अभिवचन्ते आभिमुख्येन समवयन्तिप्राप्नुवन्ति तत्रदृष्टान्तः—स्रवतःसमुद्रंन यथास्रवतोनद्यःसमुद्रमभिगच्छन्तितद्वत् कीदृश्योनद्यः सप्त सप्तसंख्याकाः इमंमेगंगइत्यस्यामृचिसप्तहिनद्यःप्राधान्येनश्रूयन्ते यह्वीः महन्नामैतत् महत्यः जामिभिः जमन्त्येकस्मिन्पात्रेसहभुञ्जतइतिजामयोज्ञातयः तैर्नोस्मदीयंवयोन्नं नविचिकिते नज्ञायते तेभ्योदातुमस्माकंअन्नंप्रभूतंनास्तीतिभावः अतोहेअग्ने त्वंदेवेषु दीव्यन्तीतिदेवाःधनपतयः तेषुप्रमतिंप्रकर्षेणमननीयंधनंचिकित्वानवगच्छन्विदाःअस्मभ्यंलम्भय यद्वा प्रमतिंप्रकृष्टंस्तोत्रंदेवेषुविदाःवेदयज्ञापय पृक्षःअन्ननामैतत् पृचीसंपर्केइत्यस्मादौणादिकःकर्मणिक्विप् धातोःपुमागमश्च यद्वा असुनि सुपांसुलुगितिजसोलुक्। स्रवतः स्रुगतौ स्रवणंस्रवः तत्कुर्वन्ति सर्वप्रातिपदिकेभ्यःक्विब्वक्तव्यइतिक्विप् एतदन्ताद्धातोःक्विप्चेतिक्विप् ह्रस्वस्यपितीतितुक् क्विबन्ताद्धातोःसतिशिष्टत्वाद्धातुस्वरेणान्तोदात्तत्वम्। यह्वीः पिप्पल्यादिभ्यश्चेतिगौरादिषुपठितत्वात् तस्यचाकृतिगणत्वादत्रापिङीप् वाछन्दसीतिपूर्वसवर्णदीर्घत्वम्। चिकिते छान्दसोवर्तमानेकर्मणिलिट्। विदाः विदॢलाभे अन्तर्भावितण्यर्थाल्लेटिचाडागमः तुदादित्वाच्छ आगमानुशासनस्यानित्यत्वान्नुमभावः विकरणस्वरःशिष्यते यद्वा विदेर्ज्ञानार्थस्य लेटि व्यत्ययेनशः ॥ ७ ॥

७. जिस प्रकार विशाल सात नदियाँ समुद्राभिमुख धावित होती हैं, उसी प्रकार हव्य का अन्न अग्नि को प्राप्त होता है। हमारी ज्ञातिवाले हमारे अन्न का भाग नहीं पाते अर्थात् हमारे पास प्रचुर धन नहीं है; इसलिए हे अग्नि ! तुम प्रकृष्ट अन्न जानकर देवों को सूचित करो।

आयदिषेनृपतिंतेजआनट्शुचिरेतोनिषिक्तंद्यौरभीके।
अग्निःशर्धमनवद्यंयुवानंस्वाध्यंजनयत्सूदयच्च ॥८॥

आ । यत् । इषे । नृऽपतिम् । तेजः । आनट् । शुचि । रेतः ।
निऽसिक्तम् । द्यौः । अभीके । अग्निः । शर्धम् । अनवद्यम् ।
युवानम् । सुऽआध्यम् । जनयत् । सूदयत् । च ॥ ८ ॥

अग्नेर्यत्तेजोनृपतिंनृणामृत्विजांपालकंयजमानंआनट् जाठररूपेणआसमन्ताद्व्याप्नोति किमर्थंइषेन्नाय कीदृशंशुचिशुद्धं द्यौर्दीप्तं तेनतेजसापरिपक्कंअन्नरसरूपंरेतोवीर्यंअभीकेअक्त्यकेअभिगतेअभिप्राप्तेगर्भस्थानेनिषिक्तंनितरांसिक्तं अग्निःवक्ष्यमाणगुणविशिष्टपुत्ररूपेणजनयत् जनयतु शर्धंबलवन्तं अनवद्यं अवद्यरहितंयुवानंतरुणंजरारहितमित्यर्थः स्वाध्यं शोभनकर्माणंशोभनप्रज्ञंवाउत्पन्नंपुत्रंसूदयच्च यागादिकर्मसुप्रेरयतुच यद्वा रेतइत्युदकनाम निषिक्तंमेघेर्नवृष्टमुदकंइषेन्नायसस्यादिनिष्पत्तयेअग्नेर्यत्तेजःआनट्व्याप्नोत् वृष्टेनोदकेनभौमाग्नेः संयोगेसतिहिसस्यान्युत्पद्यन्ते कीदृशंतेजः नृपतिंनृणांरक्षकंशुचिदीप्तंवाद्दक्तेजसायुक्तोद्यौर्दीप्तोग्निःअभीकेआसन्नकालएवशर्धायगुणविशिष्टंपुत्रंजनयतुचप्रेरयतुयज्ञादौ॥ इषे सावेकाचइतिविभक्तेरुदात्तत्वम्। नृपतिं परादिश्छन्दसिबहुलमित्युत्तरपदाद्युदात्तत्वम्। आनट्अशूव्याप्तौ लङि व्यत्ययेनपरस्मैपदश्नमौआडागमः व्रश्चादिषत्वेष्टुत्वम्। निषिक्तं षिचिरक्षरणे कर्मणिनिष्ठा गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम् उपसर्गात्सुनोतीतिषत्वम्। अभीके अभिपूर्वादञ्चतेःपचाद्यचि पृषोदरादित्वाद्रूपसिद्धिः यद्वा इण्गतावित्यस्मादौणादिकः कक्प्रत्ययः उभयथापि दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वम्। स्वाध्यं एरनेकाचइतियणादेशः उदात्तस्वरितयोर्यणइतिस्वरितत्वम्। जनयत् जनेर्ण्यन्ताल्लेटचडागमः। सूदयत् षूदक्षरणे पूर्ववल्लेटचडागमः ॥ ८ ॥

८. अग्नि का विशुद्ध और दीप्तिमान् तेज अन्न-प्राप्ति के लिए मनुष्य-पालक या यजमान को व्याप्त हो। उसी तेज-द्वारा अग्नि गर्भ-निषिक्त वीर्य बलवान् प्रशस्य, युवक और शोभनकर्मा पुत्र उत्पन्न करें तथा यज्ञ आदि कर्म में प्रेरण करें।

नवमीमृचमाह—

मनोनयोध्वनःसद्यएत्येकःसत्रासूरोवस्वईशे।
राजानामित्रावरुणासुपाणीगोषुप्रियममृतंरक्षमाणा॥९॥

मनः । न । यः । अध्वनः । सद्यः । एति । एकः । सत्रा । सूरः ।
वस्वः । ईशे । राजाना । मित्रावरुणा । सुपाणी इति सुऽपाणी ।
गोषु । प्रियम् । अमृतम् । रक्षमाणा ॥ ९ ॥

यःसूरः सूर्यः एकःएकाकीअसहायःसन् अध्वनोदिव्यान्मार्गान्सद्यएतिआशुगच्छति असहायत्वंचश्रूयते—सूर्यएकाकीचरतीत्याह असौवाआदित्यएकाकीचरतीति[1] । शीघ्रगमनंचस्मर्यते—योजनानांसहस्रेद्वेद्वेशतेद्वेचयोजने । एकेननिमिषार्धेनक्रममाणनमोस्तुतइति ।शीघ्रगमनेदृष्टान्तः—मनोनयथामनःशीघ्रंगच्छति तद्वत् सचशूरःवस्वोधनस्यसत्रासहैवयुगपदेवईशेईष्टे योहि शीघ्रंगच्छति सबहुषुदेशेष्ववस्थितानिधनानिप्राप्नोति तथा राजाना राजमानौसुपाणीशोभनबाहू मित्रावरुणामित्रावरुणौअस्मदीयासुगोषुप्रियंसर्वेषांप्रीतिकरंअमृतंअमृतवत्स्वादुभूतंपयोरक्षमाणारक्षन्तौवर्तेते हेअग्ने तत्तद्रूपेणत्वमेवैवंवर्तसइतिभावः ॥ वस्वः लिङ्गव्यत्ययः जसादिषुछन्दसिवावचनमितिघेर्ङितीतिगुणाभावेयणादेशः । ईशे ईशऐश्वर्ये लोपस्तआत्मनेपदेष्विवितलोपः । मित्रावरुणा देवताद्वन्द्वेचेतिपूर्वपदस्यानङादेशः देवताद्वन्द्वेचेत्युभयपदप्रकृतिस्वरत्वम् ॥ ९ ॥

९. मन की तरह शीघ्रगामी जो सूर्य स्वर्गीय पथ में अकेले जाते हैं, वे तुरत ही विविध धन प्राप्त करते हैं। शोभन और सुबाहु मित्र और वरुण हमारी गौओं के प्रीतिकर और अमृत-तुल्य दूध की रक्षा करते हुए अवस्थान करें।

दशमीमृचमाह—

मानोअग्नेसख्यापित्र्याणिप्रमर्षिष्ठाअभिविदुष्कविःसन् ।
नभोनरूपंजरिमामिनातिपुरातस्याअभिशस्तेरधीहि ॥१०॥१६॥

मा । नः । अग्ने । सख्या । पित्र्याणि । प्र । मर्षिष्ठाः । अभि । विदुः । कविः । सन् । नभः । न । रूपम् । जरिमा । मिनाति । पुरा । तस्याः । अभिऽशस्तेः । अधि । इहि ॥ १० ॥ १६ ॥

हेअग्ने पित्र्याणिपितरंवसिष्ठमुपक्रम्यागतानि सख्यासखित्वानिमाप्रमर्षिष्ठाः माविनाशय अत्रमृष्यतेरुपसर्गवशादर्थान्तरेवृत्तिः यतस्त्वंकविः क्रान्तदर्शीसन् अभिआभिमुख्येनविदुः सर्वविद्वान्नभोनरूपं यथान्तरिक्षंरूपवन्तःसूर्यरश्मयःआच्छादयन्तितद्वदाच्छादयति जरिमा जरामिनातिमांसूक्तद्रष्टारंहिनस्ति अभिशस्तेर्हिंसाहेतोस्तस्याजरायाः पुराअधीहिमांबुध्यस्व सायथानप्राप्नोतितथाकुरु अमृतत्वंप्रयच्छेतियावत् ॥ सख्यासख्युर्भावःसख्यं सख्युर्यइतियः। पित्र्याणि पितृभ्यआगतानि पितुर्यच्चेतियत्प्रत्ययः रीङृतइतिरीङादेशः यस्येतिचेतीकारलोपः यतोनावइत्याद्युदात्तत्वम् । मर्षिष्ठाः मृषतितिक्षायां प्रार्थनायांछान्दसोलुङ् नमाङ्योगेइत्यडभावः । विदुः विदज्ञाने बहुलमन्यत्रापीत्युसिप्रत्ययः अतएवबहुलवचनाद्गुणाभावः छन्दसिवाप्राम्रे-

[1] तै० ब्रा० ३.९.५.।

डितयोरितिविसर्जनीयस्यषत्वम्।नभः नहेर्दिविभश्चेत्यसुन्।जरिमा जृष्वयोहानौ औणादिको-भावेइमनिच्प्रत्ययः। मिनाति मीञ्हिंसायां प्वादीनांह्रस्वइतिह्रस्वत्वम्। अभिशस्तेः अभि-शस्यतेहिंस्यतेनयेत्यभिशस्तिः करणेक्तिन् तादौचेतिगतेःप्रकृतिस्वरत्वम् । अधीहि इक्स्मरणे लोटिअदादित्वाच्छपोलुक् हेरपित्त्वेनङित्त्वाद्गुणाभावः ॥ १० ॥

१०. हे अग्नि! हमारी पैतृक मित्रता नष्ट नहीं करना; क्योंकि तुम भूतदर्शी और वर्त्तमान विषय-ज्ञाता हो। जैसे सूर्य की किरणें अन्तरिक्ष को ढक लेती हैं, वैसे ही जरा या बुढ़ापा हमारा विनाश करता है। विनाश-कारण जरा जिस प्रकार न आने पाये, वैसा करो।

निकाव्येतिदशर्चमष्टमंसूक्तं त्रैष्टुभमाग्नेयंपराशरस्यार्षं अनुक्रान्तश्च—निकाव्येति प्रातरनुवाकाश्विनशस्त्रयोरुक्तोविनियोगः।

निकाव्यावेधसःशश्वतस्कर्हस्तेदधानोनर्यापुरूणि।
अग्निर्भुवद्रयिपतीरयीणांसत्राचक्राणोअमृतानिविश्वा ॥१॥

नि। काव्या। वेधसः। शश्वतः। कः। हस्ते। दधानः।
नर्या। पुरूणि। अग्निः। भुवत्। रयिऽपतिः। रयीणाम्। सत्रा।
चक्राणः। अमृतानि। विश्वा ॥ १ ॥

शश्वतःशाश्वतस्यनित्यस्यवेधसोविधातुःब्रह्मणःसम्बन्धीनिकाव्याकाव्यानिमन्त्ररूपाणिस्तोत्राणि अयमग्निर्निकःनियमेनस्वात्माभिमुखंकरोति किंकुर्वन् नर्यानृभ्योहितानि नृषुसाधूनिवापुरूणिबहूनिधनानिहस्तेदधानोहस्तेधारयन् ईदृग्भूतमग्निमवलोक्यसर्वेजनाःस्तुवन्तीतिभावःस्तोतृभ्योधनेषुदत्तेष्वपिअग्नेर्धनंनक्षीयतइत्याह—अग्निरिति अयमग्निःरयीणांरयिपतिर्भुवत् धनानांमध्येयानिधनानिउत्कृष्टानितेषांस्वामीभवति किंकुर्वन् विश्वा विश्वानिसर्वाणिअमृतानि हिरण्यनामैतत् अमृतंवैहिरण्यमितिश्रुतेः। सर्वाणिहिरण्यानिस्तोतृभ्यःसत्रासहैवचक्राणःकुर्वन्युगपत्प्रयच्छन्नित्यर्थः॥ कः करोतेश्छान्दसोलुङ् मन्त्रेघसेतिच्लेर्लुक् हल्ङ्याब्भ्यइतितकारलोपः। नर्या नरशब्दाद्धितार्थेगवादिलक्षणोयत्प्रत्ययोद्रष्टव्यः यद्वा तत्रसाधुरितियत्। चक्राणः करोतेर्लटःशानच् बहुलंछन्दसीतिविकरणस्यश्लुः नन्वेवंसतिअभ्यस्तानामादिरित्याद्युदात्तत्वंप्राप्नोति एवंतर्हिलिटःकानजस्तु तस्यार्धधातुकत्वेनअभ्यस्ताद्युदात्तत्वाभावेचित्स्वरएवशिष्यते ॥ १ ॥

१. ज्ञाता और नित्य अग्नि की स्तुति आरम्भ करो अथवा नित्य ब्रह्मा के मंत्र अग्नि ग्रहण करते हैं। अग्नि मनुष्यों के हितसाधक धन हाथ में धारण करते हैं। अग्नि स्तुति-कर्त्ताओं को अमृत या हिरण्य प्रदान करते हैं। अग्नि ही सर्वोच्च धन के अधिपति हैं।

---

१ तै० ब्रा० १. २. ७.।

द्वितीयामृचमाह—

अस्मेवत्संपरिषन्तंनविन्दन्निच्छन्तोविश्वेअमृताअमूराः।
श्रमयुवःपदव्योधियंधास्तस्थुःपदेपरमेचार्वग्नेः ॥२॥

अस्मे इति। वत्सम्। परि। सन्तम्। न। विन्दन्। इच्छन्तः। विश्वे। अमृताः। अमूराः। श्रमऽयुवः। पदऽव्यः। धियम्ऽधाः। तस्थुः। पदे। परमे। चारु। अग्नेः ॥ २ ॥—

अस्मेअस्माकं वत्संवत्सवदत्यन्तंप्रियं यद्वा वत्सःपुत्रः पश्चादुत्पन्नत्वात् तद्वदग्निरप्यस्माकं पुत्रः पश्चादुत्पन्नत्वात् तथाचाम्नायते—ममैवसन्वहहव्यान्यग्ने पुत्रः पित्रेलोककृज्जातवेदइति। परिषन्तंपरितः सर्वत्रवर्तमानंदेवेभ्योनिर्गत्यअश्वत्थवेण्वादिषुनिलीनंसन्तमित्यर्थः एवंविधमग्निमिच्छन्तोविश्वे अमृताः सर्वेऽमरणधर्माणोदेवाः अमूराःअमूढाः मरुतश्चनविन्दन् तमग्निंनालभन्त अलभमानाश्च तेश्रमयुवः हव्यवाहनस्याभावेनहविषामभावात् तज्जन्येनश्रमेण क्लेशेनएकीभूताः तस्याग्नेरन्वेषणायपदव्यः पादैर्गच्छन्तः धियन्धाः धियांअग्नेः शयनासनस्थानादिलक्षणानांकर्मणांधारयितारः एवंविधाःसन्तः चारुचारूणिशोभने अग्नेःपरमेउत्तमेअन्त्येपदेयत्रह्यग्निर्निलीनोवर्ततेतनेत्यर्थः तस्मिन्पदेतस्थुः स्थितवन्तः बहुविधेनप्रयासेनअग्निंददृशुरित्यर्थः ॥ परिषन्तं उपसर्गप्रादुर्भ्यामस्तिर्यच्परइतिषत्वम्। श्रमयुवः युमिश्रणे श्रमेणयूयंतइतिश्रमयुवः क्विब्वचिप्रच्छीत्यादिना विधीयमानौक्विन्दीर्घौ अस्मादपिधातोर्भवतः तन्वादित्वादुवङ्। पदव्यः वीगत्यादिषु पादेन वियन्तिगच्छन्तीतिपदव्यः क्विप्चेतिक्विप्। धियन्धाःआतोनुपसर्गेकइतिकः तत्पुरुषेकतिबहुलमितिबहुलवचनात् द्वितीयायाअप्यलुक्। तस्थुः पादादित्वान्निघाताभावः। चारु सुपांसुलुगितिसप्तम्यालुक् ॥ २ ॥

२. सारे अमरण-धर्मा देवगण और मोह-रहित मरुद्गण, अनेक कामना करने पर भी हमारे प्रिय और सर्वव्यापी अग्नि को नहीं पा सके। पैदल चलते-चलते थककर और अग्नि के प्रकाश को लक्ष्य कर अन्त को वे लोग अग्नि के घर में उपस्थित हुए।

तृतीयामृचमाह—

तिस्रोयदग्नेशरदस्त्वामिच्छुचिंघृतेनशुचयःसपर्यान्।
नामानिचिद्दधिरेयज्ञियान्यसूदयन्ततन्वः[1]सुजाताः ॥३॥

---

१ तै० ब्रा० १.२.१.।

तिस्रः। यत्। अग्ने। शरदः। त्वाम्। इत्। शुचिम्। घृतेन। शुचयः। सपर्यान्। नामानि। चित्। दधिरे। यज्ञियानि। असूदयन्त। तन्वः। सुऽजाताः॥ ३॥

शुचयःशोधयितारोदीप्तावामरुतः हेअग्ने शुचिशुद्धंदीप्यमानंवात्वामित् देवेभ्योनिर्गतं त्वामेवोद्दिश्य तिस्रःशरदःत्रीन्संवत्सरान्घृतेनाज्येनयद्यदासपर्यान् पूजांकुर्युः तदानींत्वमाविरभूः तदनन्तरंतेमरुतःत्वयानुगृहीताःसन्तोयज्ञियानियज्ञार्हाणियज्ञेप्रयोक्तुंयोग्यानिनामानिचित् नामान्यपिदधिरेअधारयन् नामानिचतैत्तिरीयके समाम्नायन्ते—ईदृङ्चान्यादृङ्चैतादृङ्चप्रतिदृङ्चमितश्चसंमितश्चसभराइत्यादीनि[1] । एतैश्चाग्निचयनेमारुताःसप्तकपालाहूयन्ते नामानि धारयित्वाचसुजाताः पूर्वरूपंपरित्यज्यशोभनममृतत्वंप्राप्ताःसन्तः तन्वःस्वकीयानिशरीराणिअसूदयन्तस्वर्गंप्रापितवन्तः॥ तिस्रः शसि त्रिचतुरोःस्त्रियांतिसृचतसृ पूर्वसवर्णदीर्घत्वेप्राप्तेअचिरऋतइतिरेफादेशः त्रिशब्दःफिषित्यन्तोदात्तः तिस्रादेशस्यापिस्थानिवद्भावेनान्तोदात्तत्वेउदात्तयणोहल्पूर्वादितिशसउदात्तत्वम् । शरदः शॄहिंसायां शीर्यन्तेस्यामोषधयइतिशरत्संवत्सरः शृदृभसोदिरित्यदिप्रत्ययः उभयत्र कालाध्वनोरत्यन्तसंयोगेइतिद्वितीया। सपर्यान् सपरपूजायां कण्ड्वादिः लेटयाडागमः इतश्चलोपइतीकारलोपः । यज्ञियानि यज्ञर्त्विग्भ्यांघखञावित्यर्हार्थे घप्रत्ययः॥ ३॥

३. हे दीप्तिमान् अग्नि! दीप्तिमान् मरुतों ने तीन वर्ष तक तुम्हारी घृत से पूजा की थी। अनन्तर उन्हें यज्ञ में प्रयोग योग्य नाम और उत्कृष्ट अमर-शरीर प्राप्त हुआ।

चतुर्थीमृचमाह—

आरोदसीबृहतीवेविदानाःप्ररुद्रियाजभ्रिरेयज्ञियासः। विदन्मर्तोनेमधिताचिकित्वानग्निंपदेपरमेतस्थिवांसम्॥४॥

आ। रोदसी इति। बृहती इति। वेविदानाः। प्र। रुद्रिया। जभ्रिरे। यज्ञियासः। विदत्। मर्तः। नेमऽधिता। चिकित्वान्। अग्निम्। पदे। परमे। तस्थिऽवांसम्॥ ४॥

१ तै० सं० ४. ६. ५.।

बृहतीमहत्यौरोदसीद्यावापृथिव्यौ आवेविदानाः अत्यर्थंज्ञापयन्तः कुत्राग्निर्वर्ततइविपरस्परंवदन्तोद्यावापृथिव्योर्मध्येवर्तमानाइत्यर्थः यद्वा महत्योर्द्यावापृथिव्योर्मध्येआवेविदानाः अग्निमुपलभ्यमानाः एवंभूतायज्ञियासोयज्ञार्हादेवाः रुद्रियारुद्रोग्निर्देवानामसुरैःसहयुद्धसमये तैर्देवैःस्थापितंधनंअपहृत्यगतवन्तमग्निंदेवाआगत्यअग्निसकाशाद्बलेनतद्धनमगृह्णन् तदानींसोग्निःअरोदीत् तस्माद्रुद्रइत्याख्यायते तथाचतैत्तिरीयकम्—तदग्निर्न्यकामयत तेनापाक्रामत् तद्देवाविजित्यावरुरुत्समानाअन्वायन् तदस्यसहसादित्सन्तसोरोदीद्यदरोदीचद्रुद्रस्यरुद्रत्वमिति[1]। तस्यरुद्रस्यार्हाणिस्तोत्राणिप्रजभ्रिरेप्रजह्रिरेचक्रुरित्यर्थः नेमधिता नेमशब्दोर्धवचनः तथाचयास्कः—त्वोनेमइत्यर्धस्येति[2]। सर्वेषांदेवानामर्धभागेनधीयतेधार्यतेइतिनेमधितइन्द्रः सर्वेदेवाएकोर्धः इन्द्रएकएवापरोर्धइतियावत् तथाचतैत्तिरीयकम्—यत्सर्वेषामर्धमिन्द्रःप्रतितस्मादिन्द्रोदेवतानांभूयिष्ठभाक्तमइति[3]। तेनेन्द्रेणसहितोमर्तोमरुद्गणः परमेउत्तमेअन्त्येपदेस्थानेअश्वत्थादौतस्थिवांसंस्थितवन्तं तमग्निंचिकित्वान् जानन् विदत्अलभत॥ वेविदानाः विदेर्ज्ञानार्थाल्लाभार्थाद्वायङन्ताल्लटःशानच् बहुलंछन्दसीतिशपोलुक् छन्दस्युभयथेतिशानचआर्धधातुकत्वादतोलोपयलोपौ अभ्यस्तानामादिरित्याद्युदात्तत्वम्। विदत् विद्लृलाभे लुङ्लृदित्वात् च्लेरङादेशः। नेमधिता दधातेः कर्मणिनिष्ठा सुधितवसुधितनेमधितेतिधिभावोनिपात्यते तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरत्वम् सुपांसुलुगितितृतीयायाआकारः। तस्थिवांसं तिष्ठतेर्लिटः क्वसुः वस्वेकाजाद्घसामितीडागमः॥४॥

४. यज्ञार्ह देवों ने विशाल द्युलोक और पृथिवी में विद्यमान रहकर रुद्र या अग्नि के उपयुक्त स्तोत्र किया था। मरुतों ने इन्द्र के साथ उत्तम स्थान में निहित अग्नि को समझकर उसे प्राप्त किया था।

घर्माभिष्टवेसंजानानाइत्येषा अथोत्तरामेतिखण्डेसूत्रितम्—संजानानाउपसीदन्नभिज्ञुदशभिर्विवस्वतइति।

तामेतांसूक्तेपञ्चमीमृचमाह—

संजानानाउपसीदन्नभिज्ञुपत्नीवन्तोनमस्यंनमस्यन्।
रिरिक्वांसस्तन्वःकृण्वतस्वाःसखासख्युर्निमिषिरक्षमाणाः॥५॥१७

सम्ऽजानानाः। उप। सीदन्। अभिऽज्ञु। पत्नीऽवन्तः। नमस्यम्। नमस्यन्निति नमस्यन्। रिरिक्वांसः। तन्वः। कृण्वत। स्वाः। सखा। सख्युः। निऽमिषि। रक्षमाणाः॥ ५॥ १७॥

---

१ तै० सं० १.५.१. २ नि० ३.२०। ३ तै० सं ५.४.८.।

हेअग्ने त्वांसञ्जानानाःसम्यक्जानन्तोदेवाःउपसीदन्उपसीदन्तिप्राप्नुवन्ति उपसत्तिंकृत्वाच पत्नीवन्तः सपत्नीकाःसन्तः नमस्यंनमस्कारार्हंअभिज्ञुआभिमुख्येनावस्थितजानुयुक्तंत्वांनमस्यन्अपूजयन् पूजयित्वाचसख्युर्मित्रस्यतवनिमिषिदर्शनेनिमित्तभूतेसतिरक्षमाणाः त्वयापरिरक्ष्यमाणाः सखासखायोदेवाः स्वास्तन्वः स्वकीयानिशरीराणिरिरिक्वांसःअनशनादिरूपेणदीक्षानियमेनरिक्तीकुर्वन्तः शोषयन्तः कृण्वतयागानकुर्वन देवावैयज्ञमतन्वतेतिश्रुतेः ॥ नमस्यन् नमोवरिवश्चित्रङइतिपूजार्थेक्यच् लङिवहुलंछन्दस्यमाङ्योगेपीत्यडभावः। रिरिक्वांसः रिचिर् विरेचने लिटःक्वसुः। निमिषि मिषस्पर्धायां अत्रोपसर्गवशाद्दर्शनार्थः सम्पदादिलक्षणोभावे क्विप्। रक्षमाणास्त्वयापरिरक्ष्यमाणाः कर्मणिलटःशानच् यकिप्राप्तेव्यत्ययेनशप् ॥ ५ ॥

५. हे अग्निदेव! देवता तुम्हें अच्छी तरह जानकर बैठ गये और अपनी स्त्रियों के साथ सम्मुखस्थ जानुयुक्त अग्नि की पूजा की। अनन्तर मित्र अग्नि को देखकर, अग्नि-द्वारा रक्षित, मित्र देवों ने अग्नि के शरीर का शोषण कर यज्ञ किया।

॥ इतिप्रथमस्यपञ्चमेसप्तदशोवर्गः ॥ १७ ॥

षष्ठीमृचमाह—

त्रिःसप्तयद्गुह्यानित्वेइत्पदाविदन्निहितायज्ञियासः।
तेभीरक्षन्तेअमृतंसजोषाःपशूञ्चस्थातॄञ्चरथंचपाहि ॥६॥

त्रिः। सप्त। यत्। गुह्यानि। त्वे इति। इत्। पदा। अविदन्
निऽहिता। यज्ञियासः। तेभिः। रक्षन्ते। अमृतम्। सऽजोषाः।
पशून्। च। स्थातॄन्। चरथम्। च। पाहि ॥ ६ ॥

त्रिःसप्तएकविंशतिसंख्याकानिगुह्यानिरहस्यानिवेदैकसमधिगम्यानियज्ञानि पदापदानिपद्यतेगम्यतेस्वर्गएभिरितिव्युत्पत्त्यापदशब्देनात्रयज्ञाउच्यन्ते तेचएकविंशतिसंख्याकाः औपासनहोमवैश्वदेवादयःसप्तपाकयज्ञाः अग्न्याधेयदर्शपूर्णमासादयःसप्तहविर्यज्ञाः अग्निष्टोमात्यग्निष्टोमादयःसप्तसोमयज्ञाःएवमेकविंशतिसङ्ख्याकानियज्ञलक्षणानिपदानि हेअग्ने त्वेइत्त्वय्येवनिहिता स्थापितानि तेषांसर्वेषांत्वत्प्रधानत्वात् नह्यग्निमन्तरेणयागाअनुष्ठातुंशक्यन्ते यज्ञियासोयज्ञार्हाः अर्थित्वसामर्थ्यवैदुष्यादिभिरधिकारहेतुभिर्युक्ताः तथाचोक्तम्—अर्थीसमर्थोविद्वान्शास्त्रेणाप-

---

१ ऐ० ब्रा० ६. ४. ८. २ एषांपरिसंख्यापूर्वं (१८३) पृष्ठे तेनोरत्नानिधत्तेनेति १. २. २. मन्त्रभाष्यटिप्पण्यां दर्शिता.

युँदस्तः कर्मण्यधिकारीति। एवंविधलक्षणोपेतायजमानाःतानिपदान्यविदन्अलभंत लब्ध्वाच तेभिर्यज्ञलक्षणैःपदैरमृतममरणधर्माणंत्वांरक्षन्तेपालयन्तियजन्तीत्यर्थः सजोषास्तैर्यजमानैःसमानमीतिस्त्वं पशून्गवाश्वादिपशून्चरस्थातॄन्व्रीह्यादिस्थावराणि चरथंपशुव्यतिरिक्तंअन्यद्यत्प्राणिजातमस्तितंतच्चपाहिरक्ष तेषुहिरक्षितेषुत्वदीयायागाःकर्तुंशक्यन्ते नान्यथा अतस्त्वमेवमुच्यसइत्यर्थः ॥ यत् सुपांसुलुगितिविभक्तेर्लुक्। गुह्यानि गुहायांभवानि भवेछन्दसीतियत् यतोनावइत्याद्युदात्तत्वम्। त्वे सुपांसुलुगितिसप्तम्याःशेआदेशः। अविदन् विदॢलाभे लुदित्वादङ्। पशून्स्थातॄन् उभयत्रउभयथार्क्ष्वित्युभयथाभावान्नकारस्यरुत्वाभावः ॥६॥

६. अग्नि! तुम्हारे अन्दर निहित एकविंशति निगूढ़ पदों वा यज्ञों को यजमानों ने जाना है और उन्हीं से तुम्हारी पूजा करते हैं। तुम भी यजमानों के प्रति उसी प्रकार स्नेह-युक्त होकर उनके पशु और स्थावर-जंगम की रक्षा करो।

विद्वाँअग्नेवयुनानिक्षितीनांव्यानुषक्शुरुधोजीवसेधाः।
अन्तर्विद्वाँअध्वनोदेवयानानतन्द्रोदूतोअभवोहविर्वाट् ॥७॥

विद्वान्। अग्ने। वयुनानि। क्षितीनाम्। वि। आनुषक्। शुरुधः। जीवसे। धाः। अन्तःऽविद्वान्। अध्वनः देवऽयानान्। अतन्द्रः। दूतः। अभवः। हविःऽवाट्॥ ७॥

हेअग्नेवयुनानि ज्ञाननामैतत् इहतुज्ञातव्येवर्तते सर्वाणिज्ञातव्यानिविद्वान्जानंस्त्वं क्षितीनांयजमानलक्षणानां प्रजानां जीवसेजीवितुंशुरुधः क्षुद्रूपस्यशोधकस्यरोधयित्रीरिषोन्नानिआनुषक् अनुषक्तं सततंयथाभवतितथाविधाः विधेहिकुर्वित्यर्थः एवंयजमानानन्नसमृद्धान्कृत्वाअनन्तरंहविर्वाट्तैर्देवेभ्यः प्रत्तंहविर्वहन्दूतोभवः देवानांदूतः भवसि कीदृशस्त्वं अन्तर्विद्वान् द्यावापृथिव्योर्मध्येजानन् किंजानन्अध्वनोमार्गान् कीदृशान्देवयानान् देवाःयैर्मार्गैर्यन्तिगच्छन्तिताजानन्नित्यर्थः अतन्द्रः पुनःपुनर्हविर्वहनेपिअनलसः ॥ वयुनानि अजगतिक्षेपणयोः अजियमिशीङ्भ्यश्चेतिकर्मण्युनप्रत्ययः अजेर्व्यघञपोरितिवीभावः। क्षितीनां क्षियन्तिनिवसन्तीति क्षितयोमनुष्याः क्तिच्क्तौचसंज्ञायामितिकर्तरिक्तिच् अन्तोदात्तावह्रस्वान्तात्क्षितिशब्दादुत्तरस्यनामोनामन्यतरस्यामितिउदात्तत्वम्। शुरुधः शुचंरुन्धन्तीतिशुरुधः क्विप्चेतिक्विप् पूर्वपदस्यान्त्यलोपः पृषोदरादित्वात् ॥ ७॥

७. अग्नि! सारे जानने योग्य विषयों को जानकर प्रजाओं के जीवन-धारण के लिए क्षुधा-निवृत्ति करो। आकाश और पृथिवी पर जिस मार्ग से देवलोक जाते हैं, वह जानकर और आलस्य-रहित होकर, दूत-रूप से, हव्य वहन करो।

अष्टमीमृचमाह—

स्वाध्योदिवआसप्तयह्वीरायोदुरोव्यृतज्ञाअजानन्।
विदद्गव्यंसरमादृळ्हमूर्वंयेनानुकंमानुषीभोजतेविट् ॥८॥

सुऽआध्यः। दिवः। आ। सप्त। यह्वीः। रायः। दुरः। वि। ऋतऽज्ञाः।
अजानन्। विदत्। गव्यम्। सरमा। दृळ्हम्। ऊर्वम्। येन। नु।
कम्। मानुषी। भोजते। विट्॥ ८॥

स्वाध्यःशोभनकर्मयुक्ताःयह्वीःयह्व्योमहत्यःसप्त गङ्गाद्याःसप्तनद्यःदिवःद्युलोकात्आगत्य भूम्यांप्रवहन्तीतिशेषः हेअग्नेईदृग्विधानद्यःत्वयास्थापिताःअग्नौहोमेसतिहितेनतृप्तःसूर्योवृष्टिंकरोति तस्मिन्नर्थेस्तुतिःपूर्वमुदाहृता अतोवृष्टिद्वाराअग्निरेवनदीःकरोतीत्युच्यते तथाऋतज्ञाःऋतंयज्ञंजानन्तोङ्गिरसः रायोवलनाम्नासुरेणापहृतस्यगोरूपस्यधनस्यदुरोद्वाराणिगमनमार्गान्अजानन्त्वयाज्ञातवन्तः त्वत्साध्येनयागेनप्रीतइन्द्रोगवामन्वेषणायसरमांनामदेवशुनींप्रेषितवान्साचसरमागवांस्थानमवगत्येन्द्रस्यन्यवेदयत् इन्द्रश्चतानङ्गिरसोगाःप्रापयत् अतएतत्सर्वंत्वमेवकृतवान्अङ्गिरोभ्यःसकाशात्गव्यंगविभवंदृळ्हंस्थूलंबहुलमित्यर्थः एवंविधंपयोलक्षणंऊर्वंअन्नं सरमादेवशुनी विदद्लभत कमित्येतत्पदपूरणम् येननुयेनहिगव्येनमानुषीविट्मनोःसम्बन्धिनीप्रजाभोजते इदानींभुंक्ते तद्गव्यमपिपरम्परयाऽग्निरेवकरोति॥ स्वाध्यः सुआङ्पूर्वाद्धीशब्दात्जसिएरनेकाचइतियणादेशः। यह्वीः वाछन्दसीतिपूर्वसवर्णदीर्घत्वम्। गव्यं सर्वत्रगोरजादिप्रत्ययप्रसङ्गेयद्वक्तव्यइतिभवार्थेयत्। ऊर्वं उर्वीहिंसार्थः ऊर्वतिक्षुधंहिनस्तीत्यूर्वमन्नं पचाद्यच्। भोजते भुजपालनाभ्यवहारयोः श्नमिप्राप्तेव्यत्ययेनशप्॥ ८॥

८. शोभन-कर्म-सम्पन्ना विशाल सप्त नदियाँ द्युलोक से निकली हैं। ये सारी नदियाँ अग्नि-द्वारा स्थापित हैं। यज्ञज्ञाता अङ्गिरा लोगों ने असुरों-द्वारा चुराये हुए गोधन का गमन-मार्ग तुमसे जाना था। तुम्हारी कृपा से सरमा ने उनके पास से प्रचुर गोदुग्ध प्राप्त किया था। उसके द्वारा मनुष्य की रक्षा होती है।

आयेविश्वास्वपत्यानितस्थुःकृण्वानासोअमृतत्वायगातुम्।
मह्नामहद्भिःपृथिवीवितस्थेमातापुत्रैरदितिर्धायसेवेः ॥९॥

आ। ये। विश्वा। सुऽअपत्यानि। तस्थुः। कृण्वानासः।
अमृतऽत्वाय। गातुम्। मह्ना। महत्ऽभिः। पृथिवी। वि। तस्थे।
माता। पुत्रैः। अदितिः। धायसे। वेरितिवेः॥९॥

येआदित्याःअमृतत्वायअमरणत्वसिद्ध्ये गातुंमार्गमुपायंकृण्वानासःकुर्वाणाःसन्तःविश्वा विश्वानिसर्वाणिस्वपत्यानिशोभनान्यपतनहेतुभूतानिचतुर्दशरात्रषट्त्रिंशद्रात्रादित्यानामयनादीनिकर्माण्यातस्थुः आस्थितवन्तःकृतवन्तइत्यर्थः तथाचतैत्तिरीयकम्—आदित्याअकामयन्त-सुवर्गंलोकमियामेतीति तएतंषट्त्रिंशद्रात्रमपश्यन् तमाहरन्ततेनायजन्तेतिच । महद्भिःअनुष्ठानेन महानुभावैःतैःपुत्रैःसहितामाताजनयित्रीअदितिरदीनापृथिवीधायसेसर्वस्यजगतोधारणायमह्ना-स्वकीयेनमहत्त्वेनवितस्थेविशेषेणतिष्ठति हेअग्ने यतस्त्वंवेःआदित्यैरनुष्ठितेषुयागेषुचरुपुरोडाशादीनिहवींषिअभक्षयः अतएतत्सर्वंजातमित्यर्थः॥ कृण्वानासः कृविहिंसाकरणयोश्च व्यत्ययेनात्मनेपदम् धिन्विकृण्व्योरचेत्युप्रत्ययः तत्सन्नियोगेनअकारान्तादेशश्च तस्यातोलोपेसतिस्थानिवद्भावाद्गुणाभावः शानचश्चित्त्वादन्तोदात्तत्वम् आज्जसेरसुक् । मह्ना महिम्नेत्यस्यवर्णलोपश्छान्दसः । धायसे वहिहाधाञ्भ्यश्छन्दसीतिदधातेर्भावेऽसुन् णिदित्यनुवृत्तेरातोयुक्चिण्कृतोरितियुक् । वेः वीगतिव्याप्तिप्रजनकान्त्यसनखादनेषु लङिसिपिअदादित्वाच्छपोलुक् बहुलंछन्दस्यमाङ्योगेपीत्यडभावः । धायसे इत्यस्यवाक्यान्तरगतत्वादस्यनिघाताभावः ॥ ९ ॥

९. आदित्यगण ने अमरत्व-सिद्धि के लिए उपाय करके पतन-निरोध के लिए जो सारे कर्म किये थे, अदिति-रूपिणी जननी पृथ्वी ने सारे जगत् के धारण के लिए उन महानुभाव पुत्रों के साथ जो विशेष महत्त्व प्राप्त किया था, अग्निदेव ! तुमने हव्य भक्षण किया था, यही सबका कारण है ।

अधिश्रियंनिदधुश्चारुमस्मिन्दिवोयदक्षीअमृताअकृण्वन् ।
अधक्षरन्तिसिन्धवोनसृष्टाःप्रनीचीरग्नेअरुषीरजानन् ॥१०॥१८॥

अधि । श्रियम् । नि । दधुः । चारुम् । अस्मिन् । दिवः । यत् ।
अक्षी इति । अमृताः । अकृण्वन् । अध । क्षरन्ति । सिन्धवः ।
न । सृष्टाः । प्र । नीचीः । अग्ने । अरुषीः । अजानन् ॥ १० ॥ १८ ॥

अस्मिन्नग्नौचारुंशोभनांश्रियंपरिस्तरणपरिषेचनादिरूपांयज्ञसम्पदंअधिनिदधुः यजमानाः स्थापितवन्तः निधायचयद्यदाअक्षीयज्ञस्यआज्यभागलक्षणेचक्षुषीअकृण्वन्कुर्वन्ति चक्षुषीवाएतेयज्ञस्ययदाज्यभागावितिश्रुतेः।तदानींदिवःद्युलोकात्अमृताःअमरणधर्माणोदेवाःयागसमयोजाःइत्यवगम्यआगच्छन्तीतिशेषः अधअथआज्यभागानन्तरंसृष्टाःअग्नेरुत्पन्नाःसिन्धवोन शीघ्रंगच्छन्त्योनद्यइव नीचीःनितरांसर्वासुदिक्षुगच्छन्तीररुषीरारोचमानाः यद्वानिर्मलरूपाःहेअग्ने एवंभू-

---

१ तै० सं० ७. ४. ६. । २ तै० सं० ७. ४. ६. ।

तास्त्वदीयाज्वालाःउत्पन्नाःक्षरन्ति सञ्चलन्ति सर्वासुदिक्षुगच्छन्तीत्यर्थः आगतादेवाश्चप्राजानन्-अस्माकंहोमायईदृश्योज्वालाउत्पन्नाइतिहृष्टाःसन्तःप्रकर्षेणजानन्ति ॥ अक्षी परत्वान्नुमंबा-धित्वाईचद्विवचनेइतिअक्षिशब्दस्यईकारान्तादेशः सचोदात्तः ईत्वेकृतेसकृद्गतपरिभाषयापुनर्नु-म् नभवति सवर्णदीर्घः । नीचीः निपूर्वादञ्चतेः ऋत्विगित्यादिनाक्विन् अनिदितामितिनलोपः अञ्चतेश्चोपसङ्ख्यानमितिङीप् अचइत्यकारलोपेचाविितिदीर्घत्वम् न्यधीचेतिगतेःप्रकृतिस्वर-त्वम् । अरुषीः अरुषमितिरूपनाम ऋहनिभ्यामुषजितिअर्तेरुषच् छन्दसीवनिपावितिमत्वर्थी-यईकारः ॥ १० ॥

१०. इस अग्नि में यजमानों ने सुन्दर यज्ञ-सम्पत् स्थापित की थी एवं यज्ञ के चक्षुःस्वरूप घृत दिया था। अनन्तर देवता लोग आये। यह देखकर अग्निदेव ! तुम्हारी समुज्ज्वल शिखा, वेगवती नदी की तरह, सारी दिशाओं में फैली और देवों ने भी उसे जाना।

॥ इतिप्रथमस्यपञ्चमेष्टादशोवर्गः ॥ १८ ॥

रयिर्नेतिदशर्चंनवमंसूक्तंपराशरस्यार्षंत्रैष्टुभंआग्नेयं अनुक्रान्तंच—रयिर्नेति प्रातरनुवाका-श्विनशस्त्रयोरुक्तोविनियोगः ।

तत्रप्रथमामृचमाह—

र॒यिर्न यः पि॑तृवि॒त्तो व॑यो॒धाः सु॒प्रणी॑तिश्चिकि॒तुषो॒ न शा॒सुः ।
स्यो॒न॒शीरति॑थि॒र्न प्री॑णा॒नो होते॑व॒ सद्म॑ विध॒तो वि ता॑रीत् ॥१॥

र॒यिः । न । यः । पि॒तृ॒ऽवि॒त्तः । व॒य॒ऽधाः । सु॒ऽप्रनी॑तिः ।
चि॒कि॒तुषः॑ । न । शा॒सुः । स्यो॒न॒ऽशीः । अति॑थिः । न । प्री॒णा॒नः ।
होता॑ऽइव । सद्म॑ । वि॒ध॒तः । वि । ता॒री॒त् ॥ १ ॥

पितृवित्तःपितुःसकाशात्लब्धोरयिर्धनमिवयोग्निर्वयोधाःअन्नस्यदातायथापैतृकंधनंविस्रम्भेण व्यवह्रियमाणंसत्अन्नप्रदंभवति तद्वदग्निरपिसर्वेषुयज्ञेषुविस्रम्भेणव्यवहृतःसन्अन्नप्रदोभवतीत्य-र्थः चिकितुषोविदुषोधर्मशास्त्राभिज्ञस्यशासुःन शासनमिवसुप्रणीतिः सुखेनप्रणेतव्यः यथाविद्व-च्छासनंसर्वेष्वनुष्ठेयेषुतत्तत्संशयनिर्णयायनीयतेतद्वदग्निरपिसर्वेषुयज्ञेषुप्रणीयते यश्चस्योनशीःसुख-प्रदेगार्हपत्यायतनादौशयानोऽतिथिर्न सुखासनउपवेशितोर्घपाद्यादिभिः सत्कृतोतिथिरिव प्रीणा-नोहविर्भिस्तर्पणीयःसोग्निर्विधतःपरिचरतोयजमानस्यसद्मगृहंवितारीत् प्रवर्धयतिददातिवा तत्र दृष्टान्तः—होतेव होताहोमकर्ताध्वर्युस्त्वत्तत्कर्मकरणेनफलैर्यजमानस्यगृहंयथावर्धयतितद्वत्॥पितृ-वित्तः विद्लृलाभे कर्मणिनिष्ठा यस्यविभाषेतीट्प्रतिषेधः विभाषागमहनविदविशामितिक्वसावस्य-

धातोरिटोविकल्पितत्वात् तत्रापिविशिसाहचर्यात् तौदादिकएवविदिर्गृह्यतइत्युक्तम् वित्तोभोगप्रत्यययोरितिनिष्ठानत्वाभावोनिपातितः। वयोधाः डुधाञ्धारणपोषणयोः आतोमनिन्क्विनिविच्। सुप्रणीतिः प्रणीयतइतिप्रणीतिः कर्मणिक्तिन् तादौचेतिगतेःप्रकृतिस्वरत्वम् पुनःसुशब्देनसमासे कृद्ग्रहणेगतिकारकपूर्वस्यापिग्रहणात् कृदुत्तरपदप्रकृतिस्वरत्वम्। चिकितुषः लिटःक्वसुः षष्ठ्येकवचनेवसोःसम्प्रसारणमितिसम्प्रसारणम् शासिवसिघसीनांचेतिषत्वम्। शासुः शासुअनुशिष्टौ शॄस्वृस्निहीत्यादिनाविधीयमानउप्रत्ययोबहुलवचनादस्मादपिद्रष्टव्यः तत्रनिदित्यनुवृत्तेराद्युदात्तत्वम्। स्योनशीः स्योनमितिसुखनाम स्योनेसुखकरेगार्हपत्यादिस्थानेशेतेइतिस्योनशीः क्विप्चेतिक्विप्। प्रीणानः प्रीञ्तर्पणे कर्मणिशानच्व्यत्ययेनश्ना। विधतः विधविधाने विधतिः परिचरणकर्मेतिनैरुक्ताः। तुदादित्वाच्छप्रत्ययः शतुरनुमइतिविभक्तेरुदात्तत्वम्॥ १॥

१. पैतृक धन की तरह अग्नि अन्नदाता हैं; शास्त्रज्ञ व्यक्ति के शासन की तरह अग्नि नेता हैं; उपविष्ट अतिथि की तरह अग्नि प्रीतिपात्र हैं; और, होता की तरह अग्नि यजमान का घर वर्द्धित करते हैं।

द्वितीयामृचमाह—

देवोनयःसवितासत्यमन्माक्रत्वानिपातिवृजनानिविश्वा।
पुरुप्रशस्तोअमतिर्नसत्यआत्मेवशेवोदिधिषाय्योभूत्॥२॥

देवः। न। यः। सविता। सत्यऽमन्मा। क्रत्वा। निऽपाति। वृजनानि। विश्वा। पुरुऽप्रशस्तः। अमतिः। न। सत्यः। आत्माऽइव। शेवः। दिधिषाय्यः। भूत्॥ २॥

देवोनसविता द्योतमानः सर्वस्यप्रेरकः सूर्यइवयोग्निः सत्यमन्मासत्यज्ञानःयथार्थदर्शीसोग्निः क्रत्वाआत्मीयेनकर्मणाविश्वावृजनानिविभक्तिव्यत्ययः सर्वेभ्यःसंग्रामेभ्यः निपातिनितरां पालयति वर्ज्यन्तेहिंस्यन्तेस्मिन्निविवृजनंसङ्ग्रामः अपिचपुरुप्रशस्तः पुरुभिर्यजमानैः स्तुतोग्निः अमतिर्न रूपनामैतत् रूपमिव सत्योबाधरहितः रूप्यतइतिरूपंस्वरूपं यथापृथिव्यादेः स्वरूपं आगमापायिषुविशेषेषुसत्स्वपिस्वयमेकरूप्येणनित्यंभवति तद्वदग्निरपिउच्चावचेषुसर्वेषुकर्मसुस्वयंएकएवव्याप्यवर्तते सोग्निः शेवः सुखकरः तत्रदृष्टान्तः—आत्मेव परमप्रेमास्पदतयानिरतिशयानन्दस्वरूपआत्मायथा सर्वान्सुखयतिएतस्यैवानन्दस्यान्यानिभूतानिमात्रामुपजीवन्ति। एषह्येवानन्दयातीतिचश्रवणात्। तद्वदग्निरपिस्वर्गादिफलहेतुत्वयासुखयति एवंभूतोग्निर्दिधिषाय्योभूत् सर्वैर्यजमानैर्धारणीयोभवति परित्यागेहिवीरहत्यालक्षणोदोषोभवति तथाचतैत्तिरीयकम्—वीर-

१ नि० ३. १३। २ तै० आ० अष्टमप्रपाठके.

ह्वावाएषदेवानांयोग्निमुद्वासयतेइति ॥ सत्यमन्मा मननंमन्म मनज्ञाने अन्येभ्योपिदृश्यन्तइतिमनि-न् सत्यमवितथंमन्मयस्य बहुव्रीहिस्वरः । वृजनानि वृजीवर्जने कृपृवृजीत्यादिनाक्युप्रत्ययः।पु-रुप्रशस्तः तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरत्वेप्राप्तेप्रवृद्धादीनांचेत्युत्तरपदान्तोदात्तत्वम् सह्याकृ-तिगणइत्युक्तम्। अमतिः अमगत्यादिषु अमेरतिः। दिधिषाय्यः दधातेर्दिधिषाय्यइतिषाय्य-प्रत्ययान्तोनिपात्यते ॥ २ ॥

२. प्रकाशमान सूर्य की तरह यथार्थदर्शी अग्नि अपने कार्य-द्वारा समस्त दुःखों से रक्षा करते हैं। यजमानों के प्रशंसित अग्नि प्रकृति के स्वरूप की तरह परिवर्तन-रहित हैं। अग्नि आत्मा की तरह सुख-कर हैं। ऐसे अग्नि यजमानों-द्वारा धारणीय हैं।

देवोनयःपृथिवींविश्वधायाउपक्षेतिहितमित्रोनराजा ।
पुरःसदःशर्मसदोनवीराअनवद्यापतिजुष्टेवनारी ॥३॥

देवः । न । यः । पृथिवीम् । विश्वऽधायाः । उपऽक्षेति ।
हितऽमित्रः । न । राजा । पुरःऽसदः । शर्मऽसदः । न । वीराः ।
अनवद्या । पतिजुष्टाऽइव । नारी ॥ ३ ॥

देवोनद्योतमानःसूर्यइव योग्निःविश्वधायाःसर्वस्यजगतोधर्ता यथासूर्योवृष्ट्यादिप्रदानेन सर्वंजगद्धत्ते एवमग्निरपियज्ञादिसाधनेन कृत्स्नस्यजगतोधारयिता सोग्निः पृथिवीपृथिव्यां उप-क्षेतिसर्वेषांप्रियःसन्यज्ञगृहादौनिवसति तत्रदृष्टान्तः—हितमित्रोनराजा हितान्यनुकूलानिमित्राणि यस्यतादृशोराजायथासुखेननिवसतितद्वत् यथासर्वजनमित्रोराजा एवमग्निरपिसर्वजनमित्रइ-त्यर्थः- नह्यग्निंकश्चनद्विष्टे यस्याग्नेःपुरःसदः पुरस्तात्सीदन्तःउपविशन्तःपुरुषाःशर्मसदोनवीराः पितृगृहेवर्तमानाःपुत्राइववर्तन्ते पितापुत्रानिवाग्निःस्वस्यपरिचारकान् रक्षतीतिभावः सोयमग्निः अतिशयेनशुद्धःकर्मयोग्योभवति तत्रदृष्टान्तः—अनवद्याअनिन्दितापतिजुष्टेवनारीस्वपतिनासे-वितास्वीकृतायोषिदिव सायथापातिव्रत्येनशुद्धासतीसर्वकर्मयोग्याभवतिएवमग्निरपि ॥ विश्व-धायाः गतिकारकयोरपिपूर्वपदप्रकृतिस्वरत्वंचेतिवचनात् कारकपूर्वादपिदधातेःवहिहाधाञ्भ्य-श्छन्दसीत्यसुन् णिदित्यनुवृत्तेरातोयुक्चिण्कृतोरितियुक् मरुद्वृधादित्वात्पूर्वपदान्तोदात्तत्वम्। उपक्षेति क्षिनिवासगत्योः बहुलंछन्दसीतिविकरणस्यलुक् । अनवद्या बहुव्रीहौनञ्सुभ्यामित्यु-त्तरपदान्तोदात्तत्वम् । पतिजुष्टेव तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरत्वम् । नारी नृनरयोर्वृद्धिश्चे-तिशार्ङ्गरवादिषुपाठात् ङीनन्तआद्युदात्तः ॥३॥

३. द्युतिमान् सूर्य की तरह अग्नि समस्त संसार को धारण करते हैं। अनुकूल सुहृद्-से सम्पन्न राजा की तरह अग्नि पृथिवी पर निवास करते हैं। संसार अग्नि के सामने पितृ-गृह में पुत्र की तरह बैठता है। अग्नि पति-सेविता और अभिनन्दनीया स्त्री की तरह विशुद्ध हैं।

---

१ तै०सं० १.५.२।

चतुर्थीमृचमाह—

तन्त्वानरोदमआनित्यमिद्धमग्नेसचन्तक्षितिषुध्रुवासु ।
अधिद्युम्नंनिदधुर्भूर्यस्मिन्भवाविश्वायुर्धरुणोरयीणाम् ॥४॥

तम् । त्वा । नरः । दमे । आ । नित्यम् । इद्धम् । अग्ने । सचन्त ।
क्षितिषु । ध्रुवासु । अधि । द्युम्नम् । नि । दधुः । भूरि ।
अस्मिन् । भव । विश्वऽआयुः । धरुणः । रयीणाम् ॥ ४ ॥

हेअग्ने तंत्वापूर्वोक्तगुणविशिष्टं त्वांनरोयज्ञस्यनेतारोयजमानाःध्रुवासुक्षितिषुनिश्चलासुचलनरहितासुभूमिषुनिरुपद्रवेषुग्रामेष्वित्यर्थः दमेस्वकीयेयज्ञगृहेनित्यमिद्धंअनवरतंसमिद्भिःप्रज्वलितंकृत्वाआसचन्तआभिमुख्येनसेवन्ते किञ्च अस्मिन्नग्नौद्युम्नं हविर्लक्षणमन्नंभूरिचरुपुरोडाशादिरूपेण बहुविधंअधिनिदधुःस्थापितवन्तः एवंगुणविशिष्टोयोग्निःसत्वंविश्वायुःउक्तप्रकारेणसर्वान्नोभूत्वारयीणांधनानांधरुणोधारयिताभव अस्मभ्यंदातुंधनानिधारयेत्यर्थः ॥ सचन्त षचसमवाये छान्दसोवर्तमानेलङ् बहुलंछन्दस्यमाङ्योगेपीत्यडभावः । भव द्व्यचोतस्तिङइतिसंहितायांदीर्घः । धरुणः धारेर्णिलुक्चेत्युनप्रत्ययः ॥ ४ ॥

४. हे अग्नि ! संसार उपद्रव-शून्य स्थान पर अपने घर में, अनवरत काष्ठ से जलाकर, तुम्हारी सेवा करता है। साथ ही अनेक यज्ञों में अन्न भी प्रदान करता है। तुम विश्वायु या सर्वान्न होकर हमें धन दो।

पञ्चमीमृचमाह—

विपृक्षोअग्नेमघवानोअश्युर्विसूरयोददतोविश्वमायुः ।
सनेमवाजंसमिथेष्वर्योभागंदेवेषुश्रवसेदधानाः ॥५॥१९॥

वि । पृक्षः । अग्ने । मघऽवानः । अश्युः । वि । सूरयः । ददतः ।
विश्वम् । आयुः । सनेम । वाजम् । सम्ऽइथेषु । अर्यः । भागम् ।
देवेषु । श्रवसे । दधानाः ॥ ५ ॥ १९ ॥

हेअग्ने मघवानोहविर्लक्षणेनधनेनयुक्तायजमानाः पृक्षोन्नानिव्यश्युः व्याप्नुवन्तु त्वयानुगृहीताः सर्वाण्यन्नानिलभंतां येचसूरयोविद्वांसःत्वांस्तुवन्तिददतःयेचतुभ्यंहवींषिददतःप्रयच्छन्तोवर्तन्ते तेसर्वेविश्वमायुः सर्वंजीवितंव्यश्युः व्याप्नुवन्तु वयंचसमिथेषुसङ्ग्रामेषुअर्यःअरेःशत्रोः सम्बन्धिनंवाजमन्नंसनेमत्वदनुग्रहात् संभजेमहि तदनन्तरंदेवेषुत्वत्प्रमुखेषुइन्द्रादिषुश्रवसेयशा-

सेतदर्थंभागंहविर्भागंदधानाः स्थापयन्तोभूयास्मेतिशेषः॥ अश्युः अशूव्याप्तौ व्यत्ययेनपरस्मैपदम् बहुलंछन्दसीतिविकरणस्यलुक्। ददतः नाभ्यस्ताच्छतुरितिनुमागमप्रतिषेधः अभ्यस्तानामादिरित्याद्युदात्तत्वम्। सनेम वनषणसम्भक्तौ व्यत्ययेनशः। अर्यः अरिशब्दात्षष्ठ्येकवचनेजसादिषुछन्दसिवावचनमितिघेर्ङितीतिगुणाभावेयणादेशः अरिशब्दःअचइरितिइप्रत्ययान्तोन्तोदात्तः उदात्तयणइतिविभक्तेरुदात्तत्वम्। भागं कर्षात्वतइत्यन्तोदात्तत्वम्॥ ५॥

५. अग्निदेव! धनशाली यजमान अन्न प्राप्त करे। जो विद्वान् तुम्हारी स्तुति करते और तुम्हें हव्य-दान करते हैं, वे दीर्घ आयु प्राप्त करें। हम लड़ाई के मैदान में शत्रु का अन्न लाभ करें। अनन्तर यज्ञ के लिए देवों का अंश देवों को अर्पण करें।

॥ इतिप्रथमस्यपञ्चमेएकोनविंशोवर्गः॥१९॥

षष्ठीमृचमाह—

ऋतस्यहिधेनवोवावशानाःस्मदूध्नीःपीपयन्तद्युभक्ताः।
परावतःसुमतिंभिक्षमाणाविसिन्धवःसमयासस्रुरद्रिम्॥६॥

ऋतस्य। हि। धेनवः। वावशानाः। स्मत्ऽऊध्नीः। पीपयन्त। द्युऽभक्ताः। पराऽवतः। सुऽमतिम्। भिक्षमाणाः। वि। सिन्धवः। समया। सस्रुः। अद्रिम्॥ ६॥

ऋतस्यहिऋतंदेवयजनदेशं प्राप्तमग्निमेवधेनवः अग्निहोत्रादिहविषांदोग्ध्योगावःपीपयन्तक्षीरादिलक्षणंगव्यंअपाययन् कीदृश्योगावः वावशानाःअग्निंपुनःपुनःकामयमानाःस्मदूध्नीः स्मच्छब्दोनित्यशब्दसमानार्थः नित्यऊधसायुक्ताः सर्वदापयसःप्रदात्र्यइत्यर्थः द्युभक्ताः दिवाप्रकाशेन सम्भक्ताःसंश्लिष्टास्तेजस्विन्यइत्यर्थः अपिचसिन्धवः स्यन्दनशीलाःनद्यःसुमतिंअस्याग्नेःशोभनामनुग्रहात्मिकांबुद्धिंभिक्षमाणाः याचमानाः सत्यः अद्रिंसमयाअद्रेःपर्वतस्यसमीपेपरावतोदूरदेशाद्विसस्रुः विशेषेणगच्छन्तिप्रवहन्ति अग्नयेदातव्यानांहविषांनिष्पत्तयेप्रवहन्तीत्यर्थः॥ ऋतस्य क्रियाग्रहणंकर्तव्यमितिकर्मणःसम्प्रदानत्वाच्चतुर्थ्यर्थेषष्ठी। वावशानाः वशकान्तौ यङन्ताच्छानच् नवशइतिसम्प्रसारणप्रतिषेधः बहुलंछन्दसीतिशपोलुक् छन्दस्युभयथेतिशानचआर्धधातुकत्वात्अतोलोपयलोपौ अतएवलसार्वधातुकानुदात्तत्वाभावेचित्स्वरएवशिष्यते। स्मदूध्नीः स्मवनित्यानिऊधांसियासांताः ऊधसोनङित्यनङादेशःसमासान्तः संख्याव्ययादेर्ङीबितिङीप् भसंज्ञायामल्लोपोनइत्यल्लोपः ङीपःपित्त्वादनुदात्तत्वेबहुव्रीहिस्वरएवशिष्यते। पीपयन्त पापाने अस्माद्धेतुमतिणिच् शाच्छासाह्वेतियुक् ण्यन्ताल्लुङिच्लेश्चङादेशादि चङ्यन्यतर-

स्यामितिचङःपूर्वस्योदात्तत्वम् हिचेतिनिघातप्रतिषेधः । परावतः परागताद्दूरंहिपरागतंभ-वति अस्मिन्धात्वर्थेगम्यमानेउपसर्गाच्छन्दसिधात्वर्थेइतिवतिः ॥ ६ ॥

६. नित्य दुग्धशालिनी और तेजस्विनी गायें अग्नि की अभिलाषा करके यज्ञस्थान में अग्नि को दुग्ध पान कराती हैं। प्रवहमाना नदियाँ अग्नि के पास अनुग्रह की याचना करके, पर्वत के पास दूर देश से प्रवाहित होती हैं।

त्वेअ॑ग्नेसुम॒तिंभिक्ष॑माणादि॒विश्रवो॑दधिरेय॒ज्ञियासः ।
नक्ताचच॒क्रुरु॒षसा॒विरू॑पेकृ॒ष्णंचवर्ण॑मरु॒णंच॒संधुः ॥७॥

त्वे इति॑ । अ॒ग्ने॒ । सु॒ऽम॒तिम् । भिक्ष॑माणाः । दि॒वि । श्रवः॑ । द॒धि॒रे॒ । य॒ज्ञियासः । नक्ता॑ । च॒ । च॒क्रुः । उ॒षसा॑ । विरू॑पे॒इति॒विऽरू॑पे । कृ॒ष्णम् । च॒ । वर्ण॑म् । अ॒रु॒णम् । च॒ । सम् । धु॒रितिधुः ॥ ७ ॥

हेअग्नेसुमतिंशोभनामनुग्रहात्मिकांबुद्धिंभिक्षमाणाःयाचमानाःयज्ञियासोयज्ञार्हाः सर्वे देवाः दिविद्योतमानेत्वेत्वयिश्रवोहविर्लक्षणमन्नंदधिरेअस्थापयन् अग्निर्देवानामन्नादइति श्रुतेः। तदनन्तरंतादृशे हविर्युक्तायअनुष्ठानायविरूपेउषसाउषःकालोपलक्षितमहः नक्तंचनक्तं रात्रिंचचक्रुः अकुर्वन् एतदेवस्पष्टयति—कृष्णंचवर्णंरात्र्यांश्यामलवर्णमन्धकारं अह्निअरु-णमारोचनंश्वेतवर्णंतेजश्चसन्धुः सम्यक्स्थापितवन्तः ॥ त्वे सुपांसुलुगितिसप्तम्याःशेआदेशः। नक्ता तेनैवद्वितीयायाडादेशः। उषसा तेनैवविभक्तेराकारः। धुः डुधाञ्धारणपोषणयोः लुङि गातिस्थेतिसिचोलुक् आतइतिझेरुसादेशः बहुलंछन्दस्यमाङ्योगेपीत्यडभावः ॥ ७ ॥

७. हे द्युतिमान् अग्नि! यज्ञाधिकारी देवों ने तुम्हारे अनुग्रह की याचना करके तुम्हारे ऊपर हव्य स्थापन किया है। अनन्तर भिन्न-भिन्न अनुष्ठान के लिए उषा और रात्रि को भिन्नरूपिणी किया है। रात्रि को कृष्णवर्ण और उषा को अरुणवर्ण किया है।

यान्रा॒येमर्ता॒न्त्सुषू॑दोअग्नेतेस्या॑ममघवा॑नोव॒यंच॑ ।
छा॒येव॒विश्वं॒भुव॑नंसिसक्ष्यापप्रि॒वान्रोद॑सीअ॒न्तरि॑क्षम् ॥८॥
यान् । रा॒ये । मर्ता॑न् । सुसूद॑ः । अग्ने॒ । ते । स्या॒म॒ । म॒घऽवा॑नः । व॒यम् । च॒ । छा॒याऽइ॑व । विश्व॑म् । भुव॑नम् । सि॒स॒क्षि॒ । आ॒प॒प्रि॒ऽवान् । रोद॑सी॒ इति॑ । अ॒न्तरि॑क्षम् ॥८॥

हेअग्ने यान्मर्तान्मनुष्यानस्मान्रायेधनायसुषूदः अग्निहोत्रादिषुकर्मसुप्रेरयसि तेतादृशाव-यंचमघवानोधनिनः स्यामभवेम रोदसीद्यावापृथिव्यौ अन्तरिक्षंचआपप्रिवान्स्वतेजसाव्याप्नुवन्

केनवाआपूरितवांस्त्वंचविश्वंभुवनंसर्वंजगत्सिसक्षिसेवसे अनुगृह्यसर्वंरक्षसीत्यर्थः तत्रदृष्टान्तः-छायेव यथाछत्रादेश्छायाआतपादिजनितंक्लेशंनिवार्यरक्षतितद्वत् ॥ राये ऊडिदमितिविभक्तेरुदात्तत्वम्.। सुक्षुदः क्षूदमेरणे लेट्यडागमः बहुलंछन्दसीतिशपःश्लुः अभ्यस्तानामादिरित्याद्युदात्तत्वम् यद्वृत्तान्नित्यमितिनिघातप्रतिषेधः । सिसक्षि षचसमवाये बहुलंछन्दसीतिशपःश्लुः इदित्यनुवृत्तौ बहुलंछन्दसीत्यभ्यासस्येत्वम् । आपमिवान् माप्रूरणे लिटःक्वसुः वस्वेकाजाद्घसामितीडागमः आवोलोपइटिचेत्याकारलोपः द्विर्वचनेचीतिस्थानिवद्भावाद्द्विर्भावादि ॥ ८ ॥

८. तुम जो मनुष्यों को, अर्थ-लाभ के लिए, यज्ञ-कर्म में प्रेरित करते हो—वे और हम धनी होंगे। तुमने आकाश, पृथिवी और अन्तरिक्ष को परिपूर्ण किया है। साथ ही सारे संसार को, छाया की तरह, रक्षित करते हो।

अर्वद्भिरग्ने अर्वतो नृभिर्नॄन्वीरैर्वीरान्वनुयामा त्वोताः ।
ईशानासः पितृवित्तस्य रायो वि सूरयः शतहिमा नो अश्युः ॥ ९॥

अर्वत्ऽभिः । अग्ने । अर्वतः । नृऽभिः । नॄन् । वीरैः । वीरान् ।
वनुयाम । त्वाऽऊताः । ईशानासः । पितृऽवित्तस्य । रायः ।
वि । सूरयः । शतऽहिमाः । नः । अश्युः ॥ ९ ॥

हेअग्ने त्वोताः त्वयारक्षिताःसन्तोवयमर्वद्भिःअस्मदीयैरश्वैःअर्वतःशत्रुसम्बन्धिनोश्वान्नृभिरस्मदीयैर्भटैर्नॄन्शत्रोर्भटान्वीर्यांज्जायन्तइतिवीराःपुत्राःतैर्वीरान् पुत्रांश्चवनुयामहन्याम वनुष्यतिर्हन्तिकर्मा नवगतसंस्कारोभवतीतियास्कः । पितृवित्तस्यपित्रादिपरंपरयालब्धस्यरायोधनस्य ईशानासःस्वामिनःसूरयोविद्वांसःनोस्माकंपुत्राःशतंहिमाःशतंसंवत्सरान्जीवन्तःसन्तःव्यश्युःविशेषेणभुञ्जन्तां अस्मदीयानांपुत्राणांआरोग्यंदीर्घमायुश्चभवत्वित्यर्थः॥ त्वोताः त्वयाऊताः मत्ययोत्तरपदयोश्चेतिमपर्यन्तस्यत्वादेशः व्यत्ययेनात्वम् तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरत्वम् । शतहिमाः अत्रहिमशब्देनतद्वान्हेमन्तोलक्ष्यते ब्राम्हणंचभवति-शतंहिमाइत्याह शतंत्वाहेमन्तान्निंधिषीयेतिवावैतदाहेति । शतंहिमाःशतंहेमन्तर्तवोयेषांतेशतसंवत्सरजीविनइत्यर्थः । अश्युः अशभोजने बहुलंछन्दसीतिविकरणस्यलुक्॥ ९ ॥

९. अग्निदेव! तुम्हारे द्वारा सुरक्षित होकर हम अपने अश्व से शत्रु के अश्व का वध करेंगे। अपने योद्धाओं के द्वारा शत्रु के योद्धाओं को और अपने वीरों-द्वारा शत्रु के वीरों का वध करेंगे। हमारे विद्वान् पुत्र पैतृक धन के स्वामी होकर सौ वर्ष जीवन का भोग करें।

---

१ नि० ५. २. । २ तै० सं० १. ५. ७.

दशमीमृचमाह—

एताते॑अग्नउ॒चथा॑निवेधो॒जुष्टा॑निसन्तु॒मन॑से॒हृदे॑च ।
श॒केम॑रा॒यः सु॒धुरो॒यमं॒तेधि॒श्रवो॑दे॒वभ॑क्तं॒दधा॑नाः ॥१०॥२०॥

ए॒ता । ते॒ । अ॒ग्ने॒ । उ॒चथा॑नि । वे॒धः॒ । जुष्टा॑नि । स॒न्तु॒ । मन॑से ।
हृ॒दे । च॒ । श॒केम॑ । रा॒यः । सु॒ऽधुरः॑ । यम॑म् । ते॒ । अधि॑ ।
श्रवः॑ । दे॒वऽभ॑क्तम् । दधा॑नाः ॥ १० ॥ २० ॥

हेवेधः मेधाविनामैतत् मेधाविन्नग्ने एताउचथानिएतानि इदानींअस्माभिःप्रयुक्तानिस्तोत्राणि तेतवमनसेमनोवृत्तयेहृदेतद्वृत्तिमतेन्तःकरणायचजुष्टानिसन्तु प्रियाणिभवन्तु तेतवसम्बन्धिनः सुधुरः सुष्टुनिर्वाहकस्य यद्वाशोभनंधूर्वतिदारिद्र्यंहिनस्तीतिसुधूः ताहशस्यरायोधनस्ययमंनियमंकर्तुंशकेमशक्ताभूयास्म किंकुर्वन्तःदेवभक्तंदेवैःसंभजनीयंश्रवोहविर्लक्षणमन्नंअधिदधानाः अग्नेरुपरिधारयन्तः अग्नौहविर्भिर्होमंकुर्वन्तइत्यर्थः ॥ उचथानि वचपरिभाषणे रुदिविदिभ्यां किदितिविधीयमानोथप्रत्ययःकित्त्वंचबहुलवचनादस्मादपिभवति वच्यादिनासंप्रसारणम् । जुष्टानि जुष्टार्पितेचच्छन्दसि नित्यंमन्त्रेइत्याद्युदात्तत्वम् । हृदे पद्दन्नित्यादिनाहृदयशब्दस्यहृदादेशः । शकेम शकॢशक्तौ लिङ्याशिष्यङ् । सुधुरः धुर्वीहिंसार्थः क्विप्चेतिक्विप् राल्लोपइतिवकारलोपः नपूजनादितिसमासान्तप्रतिषेधः । देवैर्भक्तंदेवभक्तं तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरत्वम् ॥ १० ॥

१०. हे मेधावी अग्नि! हमारे सब स्तोत्र तुम्हारे मन और अन्तःकरण को प्रिय हों। देवों के संभोग योग्य अन्न तुम्हारे अन्दर स्थापित करके हम तुम्हारे दारिद्र्य-विनाशी धन की रक्षा कर सकें।

॥ इतिप्रथमस्यपञ्चमेविंशोवर्गः ॥ २० ॥

॥ इतिप्रथमेमण्डलेद्वादशोनुवाकः ॥ १२ ॥

त्रयोदशानुवाकेएकादशसूक्तानि तत्रोपप्रयन्तइतिनवर्चंप्रथमंसूक्तं तत्रानुक्रम्यते—उपप्रयन्तोनवगौतमोराहूगणोगायत्रंत्विति । अस्यायमर्थः—रहूगणनामाकश्चिदृषिः तस्यपुत्रोगोतमोस्यसूक्तस्यऋषिः गायत्रंत्वित्युक्तत्वादिदमुत्तरंचगायत्रीछन्दस्कं परमाग्नेयमैन्द्रादितिपरिभाषितत्वादग्निर्देवता प्रातरनुवाकस्याग्नेयेक्रतौगायत्रेछन्दस्येतदादिकेद्वेसूक्ते सूत्रितंच—आपोरेवतीः क्षयथाहिवस्वउपप्रयन्तइतिसूक्तेइति । आश्विनशस्त्रेप्येतेसूक्ते प्रातरनुवाकन्यायेनेत्यतिदेशात् पृष्ठ्यषडहस्यप्रथमेहन्येतदेवसूक्तमाज्यशस्त्रम् सूत्रितंच—उपप्रयन्तइतितुप्रथमेहन्याज्यमिति ।

तत्रप्रथमामृचमाह—

उपप्रयन्तोअध्वरंमन्त्रंवोचेमाग्नये। आरेअस्मेचंशृण्वते ॥ १ ॥

उपऽप्रयन्तः। अध्वरम्। मन्त्रम्। वोचेम। अग्नये। आरे। अस्मे इति। च। शृण्वते ॥ १ ॥

अध्वरंहिंसाप्रत्यवायरहितं अग्निष्टोमादियज्ञं उपप्रयन्तः उपेत्यप्रकर्षेणयन्तोगच्छन्तः प्रास्यविच्छेदेनसम्यगनुतिष्ठन्तइत्यर्थः तादृशावयमग्नयेअङ्गनादिगुणयुक्तायदेवायमन्त्रंमननसाधनं एतत्सूक्तरूपंस्तोत्रंवोचेम वक्तारोभूयास्मेत्याशास्यते कीदृशायाग्नये आरेअस्मेचशृण्वते चशब्दोप्यर्थेआरेशब्दात्परोद्रष्टव्यः आरेचदूरेपिस्थित्वाअस्माकंस्तुवीः शृण्वते अस्मासुप्रीत्यतिशयेनसर्वत्रवर्तमानोग्निःअस्मदीयमेवस्तोत्रंशृणोतीतिभावः ॥ वोचेम ब्रुवोवचिः लिङ्याशिष्यङ् वचउमित्युमागमः। शृण्वते शतुरनुमइतिविभक्तेरुदात्तत्वम् ॥ १ ॥

१. जो अग्नि दूर रहकर भी हमारी स्तुति सुनते हैं, यज्ञ में आगमनशील उन अग्नि की हम स्तुति करते हैं।

यःस्नीहितीषुपूर्व्यःसंजग्मानासुकृष्टिषु। अरंक्षद्दाशुषेगयम् ॥२॥

यः। स्नीहितीषु। पूर्व्यः। सम्ऽजग्मानासु। कृष्टिषु। अरंक्षत्। दाशुषे। गयम् ॥ २ ॥

पूर्व्यश्चिरन्तनोयोग्निः स्नीहितीषुवधकारिणीषुकृष्टिषुशत्रुभूतासुप्रजासुसंजग्मानासुसंगतासुसतीषु दाशुषेहवींषिदत्तवतेयजमानायगयंधनंअरक्षद्रक्षति तस्मैमन्त्रंवोचेमेतिपूर्वेणसम्बन्धः ॥ स्नीहितीषु ष्णिहस्नेहने चुरादिः स्नेहयतीतिवधकर्मसुपठितं स्नेहयन्तेहिंस्यन्तेप्रजाआभिरितिस्नेहितयः करणेक्तिन् तितुत्रेष्वग्रहादीनामितिवक्तव्य मितिवचनान्निगृहीतिर्निपठितिरितिवदिडागमः व्यत्ययेनएकारस्यईकारादेशःक्तिनोदीर्घश्च नित्त्वादाद्युदात्तत्वम्। सञ्जग्मानासु समोगम्यृच्छीत्यात्मनेपदं लिटःकानच् गमहनेत्यादिनोपधालोपः। अरक्षत् छन्दसिलुङ्लङ्लिटइतिवर्तमानेलङ् ॥ २ ॥

२. जो अग्नि, वधकारिणी शत्रुभूता प्रजाओं के बीच संगत होकर हविर्दानकारी यजमान के लिए धन की रक्षा करते हैं, उन अग्नि की हम स्तुति करते हैं।

अग्निमन्थने जातायांनुब्रूहीतिउक्ते उतब्रुवन्त्वित्येषानुवचनीया मातवैश्वदेव्यामितिखण्डेसूत्रितम्—शिष्टेनोत्तरामुतब्रुवन्तुजन्तवइति तथासाकमेधेषुमरुद्भ्यःक्रीळिभ्यःपुरोडाशमित्यस्यामिष्टौ एषैवप्रथमाज्यभागानुवाक्या सूत्रितंच—मरुद्भ्यःक्रीळिभ्यउत्तरोतब्रुवन्तुजन्तवइति ॥

तामेतांसूक्तेतृतीयामृचमाह—

उतब्रुवन्तुजन्तवउदग्निर्वृत्रहाजनि । धनंजयोरणेरणे ॥३॥

उत । ब्रुवन्तु । जन्तवः । उत् । अग्निः । वृत्रऽहा । अजनि ।
धनम्ऽजयः । रणेऽरणे ॥ ३ ॥

अग्निरुदजनि अरण्योः सकाशादुत्पन्नःउतानन्तरंजन्तवोजाताःसर्वेऋत्विजोब्रुवन्तु तमग्निंस्तुवन्तु कीदृशोग्निः वृत्रहावृत्राणामावरकाणांशत्रूणांहन्ता रणेरणेसर्वेषुसङ्ग्रामेषुधनंजयःशत्रुधनानांजेता ॥ धनंजयः संज्ञायांभृतृवृजीतिखच् अरुर्द्विषदजन्तस्येतिमुम् चित्स्वरेणान्तोदात्तत्वम् । रणेरणे रणशब्दार्थः रणन्तिदुन्दुभयोस्मिन्निति रणःसङ्ग्रामः वशिरण्योरुपसङ्ख्यानमित्यप् नित्यवीप्सयोरितिद्विर्वचनं आम्रेडितानुदात्तत्वम् ॥ ३ ॥

३. सारा लोक उत्पन्न होते ही अग्नि की स्तुति करे, अग्नि शत्रु-हन्ता और युद्ध में शत्रु-धन की जय करते हैं।

यस्यदूतोअसिक्षयेवेषिहव्यानिवीतये । दस्मत्कृणोष्यध्वरम् ॥४॥

यस्य । दूतः । असि । क्षये । वेषि । हव्यानि । वीतये । दस्मत् ।
कृणोषि । अध्वरम् ॥ ४ ॥

हेअग्ने यस्ययजमानस्यक्षयेदेवयजनलक्षणेगृहेदेवानांदूतस्त्वंअसिभवसि यस्यचहव्यानि चरुपुरोडाशादीनिहवींषिवीतयेदेवानांभक्षणायवेषिगमयसि यस्यचाध्वरंयज्ञंदस्मवत्सर्वैर्दर्शनीयंकृणोषिकरोषि तमित्सुहव्यमित्युत्तरयासम्बन्धः ॥ वेषि वीगत्यादिषु अन्तर्भावितण्यर्थाल्लट् अदादित्वाच्छपोलुक् पादादित्वान्निघाताभावः । दस्मत् दसिदंसनदर्शनयोः इषुयुधीन्धीत्यादिनामक् दस्ममित्यत्रमकारस्यवर्णव्यापत्त्यातकारः । कृणोषि कृविर्हिंसाकरणयोश्च धिन्विकृण्व्योरचेत्युप्रत्ययः तत्सन्नियोगेनवकारस्याकारः तस्यातोलोपेसतिस्थानिवद्भावाल्लघूपधगुणाभावः यस्येत्यनुषक्तान्निघाताभावः ॥ ४ ॥

४. अग्नि! जिस यजमान के यज्ञ-गृह में तुम देव-दूत होकर उनके भोजन के लिए हव्य वहन करते और यज्ञ शोभित करते हो—

पञ्चमीमृचमाह—

तमित्सुहव्यमङ्गिरःसुदेवंसहसोयहो । जनाआहुःसुबर्हिषम् ॥५॥२१

तम् । इत् । सुऽहव्यम् । अङ्गिरः । सुऽदेवम् । सहसः । यहो इति ।
जनाः । आहुः । सुऽबर्हिषम् ॥ ५ ॥ २१ ॥

हेसहसोयहोबलस्यपुत्र अङ्गिरःअङ्गनादिगुणयुक्ताग्ने योयजमानःपूर्वमुक्तः तमित्तमेव यजमानंसुहव्यंशोभनहविष्कं सुदेवंशोभनदैवतंसुबर्हिषं बर्हिरितियज्ञनाम शोभनयज्ञंच जनाः सर्वेमनुष्याआहुःकथयन्ति ॥ सुहव्यमित्यादिषुनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । सहसोयहो सुबामन्त्रितेइतिपराङ्गवद्भावात्षष्ठ्यामन्त्रितेसमुदायस्याष्टमिकमामन्त्रितानुदात्तत्वम् ॥ ५ ॥

५. हे बल के पुत्र अङ्गिरा (अग्नि)! उसी यजमान को सारे मनुष्य शोभन-देव-संयुक्त, शोभन-हव्य-सम्पन्न और शोभन-यज्ञयुक्त करते हैं।

आचवहासितॉँइहदेवॉँउपप्रशस्तये । हव्यासुश्चन्द्रवीतये ॥६॥

आ । च । वहासि । तान् । इह । देवान् । उप । प्रऽशस्तये ।

हव्या । सुऽचन्द्र । वीतये ॥ ६ ॥

हेसुश्चन्द्रशोभनाह्लादनाग्ने तान्देवानिहास्मिन्कर्मणि उप अस्मत्समीपंप्रशस्तयेस्तुतयेआव-हासिचआवहप्रापयच आगतेभ्यस्तेभ्योहव्याहव्यानिचरुपुरोडाशादीनिहवींषि वीतयेभक्षणाय प्रापयेत्यर्थः ॥ वहासि वहप्रापणे लेटचाडागमः । प्रशस्तये शंसुस्तुतौ भावेक्तिन् तितुत्रेतीट्प्रति-षेधः अनिदितामितिनलोपः तादौचेतिगतेःप्रकृतिस्वरत्वम् । सुश्चन्द्र ह्रस्वाच्चन्द्रोत्तरपदेमन्त्रेइ-तिसुट् ॥ ६ ॥

६. हे ज्योतिर्मय अग्नि! इस यज्ञ में, स्तुति ग्रहण करने के लिए देवों को हमारे समीप ले आओ और भोजन करने के लिए हव्य प्रदान करो।

नयोरुपब्दिरश्व्यःश्रृण्वेरथस्यकच्चन । यदग्नेयासिदूत्यम् ॥७॥

न । योः । उपब्दिः । अश्व्यः । श्रृण्वे । रथस्य । कत् । चन । यत् ।

अग्ने । यासि । दूत्यम् ॥ ७ ॥

हेअग्ने यद्यदादूत्यंदेवानांदूतत्वंयासिप्राप्नोषि कच्चनकदाचनतदानींसर्वदापियोःगच्छतः तवरथस्यअश्व्यःअश्वैरुत्पादितःउपब्दिःश्रवणार्हःशब्दोनश्रृण्वेनश्रूयते रथस्यशीघ्रगमनेनअ-स्माभिः शब्दोनोपलभ्यतइत्यर्थः ॥ योः याप्रापणेइत्यस्माद्योद्वेचेत्यौणादिकःकुप्रत्ययः बहुल-वचनाद्द्विर्भावाभावः । उपब्दिः इत्येतच्छ्रोतुमर्हस्यशब्दस्याख्या तथाचतैत्तिरीयाणांप्रातिशा ख्यम्—सशब्दमुपब्दिमदिति । श्रृण्वे श्रुश्रवणे कर्मणिलटिश्रुवःश्रृचेतिव्यत्ययेनश्रुः श्रृभावश्च लोपस्तआत्मनेपदेष्वितितलोपः हुश्नुवोःसार्वधातुकेइतियणादेशः ॥ ७ ॥

७. हे अग्नि! जिस समय तुम देवों के दूत बनकर जाते हो, उस समय तुम्हारे गतिशाली रथ के अश्व का शब्द नहीं सुनाई देता।

अष्टमीमृचमाह—

त्वोतो॑वा॒ज्यह्र॑यो॒भिपूर्व॑स्मा॒दप॑रः । प्रदा॒श्वाँ॑अ॑ग्ने॒अस्थात् ॥८॥

त्वाऽऊ॑तः । वा॒जी । अह्र॑यः । अ॒भि । पूर्व॑स्मात् । अप॑रः । प्र । दा॒श्वान् । अ॒ग्ने॒ । अ॒स्था॒त् ॥ ८ ॥

यःपुरुषःपूर्वस्मादस्मादधिकारादपरोनिकृष्टोभवति हेअग्ने सइदानींदाश्वानतुभ्यंहवींषिदा-वाचसन्त्वोतः त्वया ऊतोरक्षितः वाजी अन्नवानअह्रयोलज्जारहितःएवंभूतःसनअभिप्रास्थात् ऐश्वर्यमभिप्राप्यप्रतितिष्ठति सर्वोत्कृष्टोभवतीत्यर्थः॥अह्रयः ह्रीलज्जायां जिह्रेतीतिह्रयः नह्रयः अह्रयः अव्ययपूर्वपदप्रकृतिस्वरत्वम्। दाश्वान् दाशृदाने दाश्वान्साह्वान्मीढ्वांश्चेतिक्वसुप्रत्ययान्तो-निपातितः ॥ ८ ॥

८. जो पुरुष पहले निकृष्ट है, वह तुम्हें हव्य दान करके तुम्हारे द्वारा रक्षित और अन्न-युक्त होकर लज्जा-रहित (ऐश्वर्यशाली) बनता है।

उ॒तद्यु॒मत्सु॒वीर्यं॑बृ॒हद॑ग्नेविवासस‍ि । दे॒वेभ्यो॑देवदा॒शुषे॑ ॥९॥२२॥

उ॒त । द्यु॒ऽमत् । सु॒ऽवीर्य॑म् । बृ॒हत् । अ॒ग्ने॒ । वि॒वा॒स॒सि॒ । दे॒वेभ्यः॑ । दे॒व॒ । दा॒शुषे॑ ॥ ९ ॥ २२ ॥

उतअपिच हेदेवद्योतमानाग्ने देवेभ्योदाशुषेचरुपुरोडाशादीनिहवींषिदत्तवतेतस्मैयजमाना-य बृहत्प्रौढंधनंविवाससिगमयितुमिच्छसिप्रापयसीतियावत् कीदृशं द्युमत् अतिशयेनदीप्तं सुवीर्यं शोभनवीर्योपेतम्॥ सुवीर्यं वीरवीर्यौचेत्युत्तरपदाद्युदात्तत्वम्। विवाससि वागतिगन्धनयोः सनि-द्विर्भावेसन्यतइतीत्वम्। दाशुषे चतुर्थ्येकवचनेवसोःसम्प्रसारणमितिसम्प्रसारणम् शासिवसि-घसीनांचेतिषत्वम् ॥ ९ ॥

९. हे प्रकाशमान अग्नि! जो यजमान देवों को हव्य प्रदान करता है, उसे प्रभूत, दीप्त और वीर्यशाली धन दान करो।

॥ इतिप्रथमस्यपञ्चमेद्वाविंशोवर्गः ॥ २२ ॥

जुषस्वेतिपञ्चर्चंद्वितीयंसूक्तं अनुक्रान्तंच—जुषस्वपञ्चेति । ऋष्याद्याःपूर्ववत् प्रातर-नुवाकाश्विनशस्त्रयोःपूर्वसूक्तेनसहोक्तःसूक्तविनियोगः पशौस्तोकानुवचनेआद्याविनियुक्ता सूत्रितंच—प्रेषितःस्तोकेभ्योन्वाहजुषस्वसप्रथस्तममिति ।

तामेतांसूक्तेप्रथमामृचमाह—

जुषस्वसप्रथस्तमंवचोदेवप्सरस्तमम्। हव्याजुह्वानआसनि ॥१॥
जुषस्व। सप्रथःऽतमम्। वचः। देवप्सरःऽतमम्। हव्या। जुह्वानः।
आसनि ॥ १॥

हेअग्ने सप्रथस्तमंअतिशयेनविस्तीर्णवचःस्तोत्रलक्षणमस्मदीयंवचनंजुषस्व सेवस्व कीदृशं देवप्सरस्तमंदेवानांप्रीणयितृतमम् किंकुर्वन् आसनि त्वदास्येहव्याहव्यानिस्तोकलक्षणानिहवींषिजुह्वानःप्रक्षिपन् इमानिस्तोकलक्षणानिहवींषिवृथामाभूवन् ततसर्वत्वदीयेनमुखेनस्वीकुर्वित्यर्थः॥देवप्सरस्तमम् स्पृप्रीतिचलनयोः देवान्स्पृणोतिप्रीणयतीतिदेवप्सराः गतिकारकयोरपिपूर्वपदप्रकृतिस्वरत्वंच सकारपकारयोःस्थानविपर्ययः अतिशयेनदेवप्सराःदेवप्सरस्तमः। जुह्वानः जुहोतेर्व्यत्ययेनशानच् अभ्यस्तानामादिरित्याद्युदात्तत्वम्। आसनि पद्दन्नित्यादिनाआस्यशब्दस्यआसन्नादेशः ॥१॥

१. अग्निदेव! मुख में हव्य ग्रहण करके देवों को अतीव प्रसन्न करो और हमारा अतिविशाल स्तोत्र ग्रहण करो।

द्वितीयामृचमाह—

अथातेअङ्गिरस्तमाग्नेवेधस्तमप्रियम्। वोचेमब्रह्मसानसि ॥२॥
अथ। ते। अंगिरःऽतम। अग्ने। वेधःऽतम। प्रियम्। वोचेम।
ब्रह्म। सानसि॥ २॥

हेअङ्गिरस्तम अतिशयेनाङ्गनादिगुणयुक्त यद्वा अङ्गिरसांवरिष्ठवेधस्तम वेधाइतिमेधाविनाम अतिशयेनमेधाविन्नग्ने अथानन्तरंतेतुभ्यं सानसिसम्भजनीयंप्रियंप्रीतिकरंब्रह्मस्तोत्रंवोचेमवक्तारोभूयास्म॥वोचेम लिङ्याशिष्यङ् वचउमित्युमागमः। सानसि वनषणसंभक्तौ सानसिधर्णसीत्यादावसिचूप्रत्ययान्तोनिपात्यते॥ २॥

२. हे अङ्गिरा ऋषि के पुत्रों और मेधावियों में श्रेष्ठ! हम तुम्हारे ग्रहणयोग्य और प्रसन्नता-दायक स्तोत्र सम्पादन करते हैं।

तृतीयामृचमाह—

कस्तेजामिर्जनानामग्नेकोदाश्वध्वरः। कोहकस्मिन्नसिश्रितः॥३॥
कः। ते। जामिः। जनानाम्। अग्ने। कः। दाशुऽअध्वरः। कः।
ह। कस्मिन्। असि। श्रितः॥ ३॥

हेअग्ने जनानांमनुष्याणांमध्येतेतवकोजामिः कोबन्धुः त्वंसर्वैर्गुणैरधिकोसि तवानुरूपो-बन्धुर्नास्तीतिभावः कोदाश्वध्वरः दाशुर्दत्तोध्वरोयज्ञोयेनसतथोक्तः त्वां यष्टुमपिसमर्थःकोपि-नास्तीत्यर्थः कोहत्वं कथंभूतस्त्वमीदृग्रूपइतिसर्वैर्नज्ञायसइत्यर्थः कस्मिन्स्थानेश्रितआश्रि-तोसिवर्तसेतत्स्थानमपिनकेनचिवज्ञायते अतस्त्वमस्माभिर्मांसदृष्टिभिः कथमुपलब्धव्यइत्यग्निः प्रशस्यते ॥ दाश्वध्वरः दाशृदाने उणादयोबहुलमितिबहुलवचनात्कर्मण्युण्प्रत्ययः बहुव्रीहौपूर्व-पदप्रकृतिस्वरत्वम् यणादेशेउदात्तस्वरितयोर्यणःस्वरितोनुदात्तस्येतिस्वरितत्वम् ॥ ३ ॥

३. अग्नि! मनुष्यों में तुम्हारा योग्य बन्धु कौन है? तुम्हारा यज्ञ कौन कर सकता है? तुम कौन हो? कहाँ रहते हो?

त्वंजामिर्जनानामग्नेमित्रोअसिप्रियः । सखासखिभ्यईड्यः ॥४॥

त्वम् । जामिः । जनानाम् । अग्ने । मित्रः । असि । प्रियः । सखा । सखिऽभ्यः । ईड्यः ॥ ४ ॥

हेअग्ने त्वंउक्तप्रकारेणाचिन्त्यरूपोपिअनुगृहीतृतयासर्वेषांजनानांजामिर्बन्धुरसि तथा मि-यः प्रीणयितात्वंयजमानानांमित्रःप्रमीतेस्त्रायकोसि ईड्यः स्तुतिभिःस्तुत्यः त्वंसखिभ्यः समा-नख्यानेभ्यऋत्विग्भ्यः सखासखिवदत्यन्तंप्रियोसि ॥ जामिः जमुअदने जमन्तिसहैकस्मिन्पा-त्रे अदन्तीतिजामयोबन्धवः जनिघसिभ्यामिणितिविधीयमानोबहुलवचनादस्मादपिद्रष्टव्यः। ईड्यः ईडस्तुतौ ईडवन्दवृशंसदुहांण्यतइत्याद्युदात्तत्वम् ॥ ४ ॥

४. अग्नि! तुम सबके बन्धु हो, तुम प्रिय मित्र हो। तुम मित्रों के स्तुति-पात्र मित्र हो। पञ्चमीमृचमाह—

यजानोमित्रावरुणायजादेवाँऋतंबृहत् । अग्नेयक्षिस्वंदमम् ॥५॥२३॥

यज । नः । मित्रावरुणा । यज । देवान् । ऋतम् । बृहत् । अग्ने । यक्षि । स्वम् । दमम् ॥ ५ ॥ २३ ॥

हेअग्ने नोस्मदर्थंमित्रावरुणाएतत्संज्ञौदेवौयज हविषापूजय तथादेवानिन्द्रादीन्यजपूजय ऋतंसत्यंयथार्थफलंयज्ञंचयजेत्येव तदर्थंबृहत्प्रौढंस्वंस्वकीयंदमंयज्ञगृहंयक्षियज सङ्गच्छस्व त्व-यिअन्तर्विद्यमानेसतिहियज्ञगृहंपूज्यते ॥ यज द्व्यचोतस्तिङइतिसंहितायांदीर्घत्वम् । देवान् दीर्घा-दटिसमानपादेइतिसंहितायांनकारस्यरुत्वम् आतोटिनित्यमित्यनुनासिकआकारः यत्वलोपौ । यक्षि यजेर्बहुलंछन्दसीतिशपोलुक् ॥ ५ ॥

५. अग्नि! हमारे लिए मित्र और वरुण की अर्चना करो और देवों की पूजा करो। विशाल यज्ञ का सम्पादन करो और अपने यज्ञ-गृह में गमन करो।

॥ इतिप्रथमस्यपञ्चमेत्रयोविंशोवर्गः ॥ २३ ॥

कातइतिपञ्चर्चंसूक्तंतृतीयं कातइत्यनुक्रान्तम् राहूगणोगोतमऋषिः त्रिष्टुप्छन्दः अग्निर्देवता प्रातरनुवाकस्याग्नेयेक्रतौत्रैष्टुभेछन्दसीदमादिकेद्वेसूक्ते सूत्रितंच—उपप्रजिन्वन्नितित्रीणिकातउपेतिरितिसूक्तेइति आश्विनशस्त्रेप्येते प्रातरनुवाकातिदेशात् ।

तत्रप्रथमामृचमाह—

कातउपेतिर्मनसोवरायभुवदग्नेशंतमाकामनीषा ।
कोवायज्ञैःपरिदक्षंतआपकेनवातेमनसादाशेम ॥१॥

का । ते । उपऽइतिः । मनसः । वराय । भुवत् । अग्ने । शम्ऽतमा ।
का । मनीषा । कः । वा । यज्ञैः । परि । दक्षम् । ते । आप ।
केन । वा । ते । मनसा । दाशेम ॥ १ ॥

हेअग्ने तेतवमनसोवरायनिवारणायअस्मास्ववस्थापनायकाउपेतिर्भुवत् कीदृशमुपगमनं भवेत् नकाप्यस्ति तवोचितमुपगमनं वयंकर्तुंनशक्नुमइतिभावः मनीषास्तुतिः शंतमा तवातिशयेनसुखकरी का कीदृशीभवेत् तवोचितास्तुतिरपिनास्तीत्यर्थः कोवायजमानः यज्ञैः तवसम्बन्धिभिर्यागैः दक्षंवृद्धिंबलंवा पर्याप पर्याप्नोत् नकोपीत्यर्थः तवोचितान्यागाननुष्ठाय तैः फलं प्राप्यतइत्येतदपिदुर्घटमेवेतिभावः उपगमनादिकंतावदास्तां तस्यसर्वस्यसाधनभूतंमनएवास्माकंदुर्लभमित्याह केनेति हेअग्ने तेतुभ्यंकेनमनसाकीदृश्यानुद्ध्यादाशेमहवींषिप्रयच्छाम तवोपगमनाद्यनुरूपंमनोस्माकंनोत्पद्यतइत्यर्थः॥ उपेति तादौचेतिगतेःप्रकृतिस्वरत्वम् । वराय वृञ्वरणे अस्मादन्तर्भावितण्यर्थात् ग्रहवृदृनिश्चिगमश्चेत्यप् तस्यपित्त्वादनुदात्तत्वेधातुस्वरः । भुवत् लेटचडागमः बहुलंछन्दसीतिशपोलुक् भूसुवोस्तिङीतिगुणप्रतिषेधः । दक्षं दक्षवृद्धौ भावेकरणे वाघञ् ञित्त्वादाद्युदात्तत्वम् ॥ १ ॥

१. अग्नि! तुम्हारी मनस्तुष्टि करने का क्या उपाय है? तुम्हारी आनन्ददायिनी स्तुति कैसी है? तुम्हारी क्षमता का पर्याप्त यज्ञ कौन कर सकता है? कैसी बुद्धि के द्वारा तुम्हें हव्य प्रदान किया जाय?

द्वितीयामृचमाह—

एह्यग्नइहहोतानिषीदादब्धःसुपुरएताभवानः ।
अवतांत्वारोदसीविश्वमिन्वेयजामहेसौमनसायदेवान् ॥२॥

आ। इहि। अग्ने। इह। होता। नि। सीद। अदब्धः। सु। पुरःऽएता। भव। नः। अवताम्। त्वा। रोदसी इति। विश्वमिन्वे इति विश्वम्ऽइन्वे। यज। महे। सौमनसाय। देवान्॥ २॥

हेअग्ने एहिआगच्छ इहास्मिन्यज्ञेहोतादेवानामाह्वातासन् निषीदउपविश उपविश्य नोस्माकंपुरएतापुरतोगन्तासुभवसुष्ठुभव यस्मात्त्वंअदब्धः राक्षसादिभिरहिंस्योसि तादृशंत्वांविश्वमिन्वेसर्वव्याप्तुवंत्यौरोदसीद्यावापृथिव्यौत्वात्वामवतांरक्षतां आगत्योपविश्यचद्यावापृथिवीभ्यांरक्षितश्चसन् महेमहतेसौमनसायसौमनस्यायदेवान् दानादिगुणयुक्तानिन्द्रादीन्यजहविर्भिःपूजय॥ निषीद सदिरप्रतेरितिषत्वम्। सौमनसाय सुमनसोभावःसौमनसं तस्येदमितिसम्बन्धसामान्येइत्यण्प्रत्ययः सचात्रभावलक्षणेसम्बन्धविशेषेपर्यवस्यति यद्वा हायनान्तयुवादिभ्योणितिभावेअण् युवादिष्वस्यपाठोद्रष्टव्यः॥ २॥

२. अग्नि! इस यज्ञ में आओ। देवों को बुलाकर बैठो। तुम हमारे नेता बनो; क्योंकि कोई तुम्हारी हिंसा नहीं कर सकता। सारा आकाश और पृथिवी तुम्हारी रक्षा करें एवं तुम देवों को अत्यन्त प्रसन्न करने के लिए पूजा करो।

प्रसुविश्वान्रक्षसोधक्ष्यग्नेभवायज्ञानामभिशस्तिपावा।
अथावहसोमपतिंहरिभ्यामातिथ्यमस्मैचकृमासुदाव्ने॥३॥

प्र। सु। विश्वान्। रक्षसः। धक्षि। अग्ने। भव। यज्ञानाम्। अभिशस्तिऽपावा। अथ। आ। वह। सोमऽपतिम्। हरिऽभ्याम्। आतिथ्यम्। अस्मै। चकृम। सुऽदाव्ने॥ ३॥

हेअग्ने विश्वान्सर्वान्रक्षसोराक्षसान् प्रसुधक्षिप्रकर्षेणदह दग्ध्वाच यज्ञानांअस्माभिरनुष्ठेयानां यागानांअभिशस्तिपावा अभिशस्तेर्हिंसायाःपातारक्षिताभव अथानन्तरंसोमपतिंसर्वेषां सोमानांपालकं इन्द्रं हरिभ्यांतदीयाश्वाभ्यांआवह अस्मद्यज्ञंप्रापयआगतायास्मैसुदाव्नेशोभनस्यफलस्यदात्रेइन्द्रायआतिथ्यंअतिथ्यर्हंसत्कारंचकृमकुर्मः॥ धक्षि दहभस्मीकरणे बहुलंछन्दसीतिशपोलुक् ढत्वभष्भावकत्वषत्वानि। अभिशस्तिपावा शसुहिंसायां अस्मादभिपूर्वाद्भावे क्तिन् अभिशस्तेःपातीत्यभिशस्तिपावा पारक्षणे आतोमनिन्क्वनिब्वनिप्। सोमपतिं पत्यावैश्वर्येइतिपूर्वपदप्रकृतिस्वरत्वम्। सुदाव्ने पूर्ववद्ददातेर्वनिप् अल्लोपोनइत्यकारलोपः॥ ३॥

३. अग्नि! सारे राक्षसों को दहन करो तथा हिंसाओं से यज्ञ की रक्षा करो। सोम-रक्षक इन्द्र को, उनके हरि नाम के दोनों अश्वों के साथ, इस यज्ञ में ले आओ। हम सुफलदाता इन्द्र का आतिथ्य प्रदर्शन करेंगे।

चतुर्थीमृचमाह—

प्रजावंतावचंसावह्निंरासाचंहुवेनिचंसत्सीहदेवैः।
वेषिंहोत्रमुतपोत्रंयंजत्रबोधिप्रंयन्तर्जंनितर्वसूंनाम् ॥४॥

प्रजाऽवंता। वचंसा। वह्निंः। आसा। आ। च। हुवे। नि। च।
सत्सि। इह। देवैः। वेषिं। होत्रम्। उत। पोत्रम्। यजत्र। बोधि।
प्रऽयन्तः। जनितः। वसूंनाम्॥ ४॥

प्रजावतायजमानेभ्योदातव्यापत्यादिफलोपेतेनवचसास्तोत्रेणस्तुतःसन् योग्निःआसाआ-स्यस्थानीययाज्वालयावह्निःदेवेभ्योहविषांवोढातमग्निंआचहुवेआह्वयामि आहूतःसन्त्वं इहा-स्मिन्कर्मणिदेवैरन्यैःसहनिषत्सिचनिषीदचनिषद्यच हेयजत्रयजनीयाग्ने होत्रंहोत्राक्रियमाणं कर्म उतअपिच पोत्रंपोत्राकृतंकर्मचवेषिकामयस्व वसूनांधनानांप्रयन्तःप्रकर्षेणनियन्तः वसू-निअस्मदायत्तानिकुर्वन्जनितःआहुतिद्वारासर्वस्यजनयितरग्ने बोधि अस्मान् बोधय॥ आसा पद्दन्नित्यादिनाआस्यशब्दस्यासन्नादेशः सुपांसुलुगितितृतीयायाडादेशः टिलोपेउदात्तनिवृत्ति-स्वरेणविभक्तेरुदात्तत्वम्। हुवे ह्वेञोलटिबहुलंछन्दसीतिसंप्रसारणम् बहुलंछन्दसीतिशपोलुक् चवायोगेप्रथमेतिनिघातप्रतिषेधः। बोधि बुधअवगमने अस्माण्ण्यन्तात् छन्दस्युभयथेतिहे-रार्धधातुकत्वात् णेरनिटीतिणिलोपः हुझल्भ्योहेर्धिः धातोरन्त्यलोपश्छान्दसः हेरपित्त्वात्तस्यै-वस्वरःशिष्यते॥ ४॥

४. जो अग्नि मुख-द्वारा हव्य वहन करते हैं, उन्हें अपत्य आदि फलों से युक्त स्तोत्र-द्वारा आह्वान करते हैं। अग्नि! तुम अन्य देवों के साथ बैठो और हे यजनीय अग्नि! तुम होता और पोता के कार्य करो। तुम धन के नियामक और जन्मदाता होकर हमें जगाओ।

एकादशिनस्याग्नेयस्यपशोः यथाविप्रस्येत्येषापशुपुरोडाशस्ययाज्या सूत्रितंचप्रदानाना-मितिखण्डे—यथाविप्रस्यमनुषोहविर्भिःप्रकारवोमननावच्यमानाइति।

तामेतांसूक्तेपञ्चमीमृचमाह—

यथाविप्रंस्यमनुंषोहविर्भिर्देवाँअयंजःकविभिंःकविःसन्।
एवाहोतःसत्यतरत्वमद्याग्नेंमन्द्रयांजुह्वांयजस्व ॥५॥२४॥

यथा। विप्रंस्य। मनुंषः। हविःऽभिंः। देवान्। अयंजः। कविऽभिंः।
कविः। सन्। एव। होतरिति। सत्यऽतर। त्वम्। अद्य। अग्ने।
मन्द्रया। जुह्वा। यजस्व॥ ५॥ २४॥

कविः क्रान्तदर्शीसन्कविभिः मेधाविभिःऋत्विग्भिःसह विप्रस्यमेधाविनः मनुषोमनोर्यज्ञे हविर्भिः चरुपुरोडाशादिभिः हेअग्नेयथादेवानयजः एवमेवहोतः होमनिष्पादकसत्यतरअतिशयेनसत्सुसाधोअग्ने त्वं अद्यास्मिन्यज्ञेमन्द्रयाहर्षयित्र्याजुह्वाहोमसाधनभूतयास्रुचायजस्व देवान् हविर्भिःपूजय ॥ मनुषः मनज्ञाने बहुलमन्यत्रापीतिमनेरुसिप्रत्ययः ॥ ५ ॥

५. तुमने मेधावियों में मेधावी बनकर जैसे मेधावी मनु के यज्ञ में हव्य-द्वारा देवों की पूजा की थी, वैसे ही हे होम-निष्पादक सभ्य अग्नि! तुम इस यज्ञ में देवों की आनन्ददायक जुहू आस्रुक् से पूजा करो।

॥ इतिप्रथमस्यपञ्चमेचतुर्विंशोवर्गः ॥ २४ ॥

कथेतिपञ्चर्चंचतुर्थंसूक्तंत्रैष्टुभंगोतमस्यार्षआग्नेयम् अनुक्रान्तंच—कथेति । प्रातरनुवाकाश्विनशस्त्रयोः पूर्वसूक्तेनसहोक्तोविनियोगः ।

कथादाशेमाग्नयेकास्मैदेवजुष्टोच्यतेभामिनेगीः ।
योमर्त्येष्वमृतऋतावाहोतायजिष्ठइत्कृणोतिदेवान् ॥१॥

कथा । दाशेम । अग्नये । का । अस्मै । देवऽजुष्टा । उच्यते । भामिने । गीः । यः । मर्त्येषु । अमृतः । ऋतऽवा । होता । यजिष्ठः । इत् । कृणोति । देवान् ॥ १ ॥

अस्माअग्नयेकथादाशेम कथंहवींषिददाम अग्नेःअनुरूपंयज्ञंकर्तुंअशक्तावयमित्यर्थः अथवास्मैभामिनेतेजस्विनेअग्नयेदेवजुष्टासर्वैःदेवैःसेवितव्यावाक्स्तुतिरपिकाकीदृश्युच्यते तादृशीं स्तुतिमपिकर्तुंनशक्ताइत्यर्थः अमृतोमरणरहितः ऋतावाऋतवान् सत्यवान् यज्ञवान्वाहोतादेवानामाह्वाताहोमनिष्पादकोवायजिष्ठोऽतिशयेनयष्टाएवंभूतोयोग्निः मर्त्येषुमरणधर्मसुअस्मासुवर्तमानःसन्देवान् इत्कृणोति हविर्भिर्युक्तान्करोत्येव तादृशायाग्नयेकथादाशेमेतिपूर्वेणान्वयः॥ कथा थाहेतौचच्छन्दसीतिथाप्रत्ययः।भामिने भादीप्तौ अर्तिस्तुस्वित्यादिनामन्प्रत्ययः ततोमत्वर्थीयइनिः।ऋतावा छन्दसीवनिपाविितिमत्वर्थीयोवनिप् अन्येषामपिदृश्यतइतिदीर्घत्वम् ॥ १ ॥

१. जो अग्नि अमर, सत्यवान् देवाह्वानकारी और यज्ञ-सम्पादक हैं तथा जो मनुष्यों के बीच रहकर देवों को हवियुक्त करते हैं, उन अग्नि के हम अनुरूप हव्य कैसे प्रदान करेंगे? तेजस्वी अग्नि की, सब देवों के उपयुक्त, कैसी स्तुति करेंगे?

योअध्वरेषुशंतमऋतावाहोतातमूनमोभिराकृणुध्वम् ।
अग्निर्यद्वेर्मर्तायदेवान्त्सचाबोधातिमनसायजाति ॥२॥

यः । अध्वरेषु । शम्ऽतमः । ऋतऽवा । होता । तम् । ऊम् इति ।
नमःऽभिः । आ । कृणुध्वम् । अग्निः । यत् । वेः । मर्ताय ।
देवान् । सः । च । बोधाति । मनसा । यजाति ॥ २ ॥

योग्निःअध्वरेषुयागेषुशंतमः अतिशयेनसुखकारीऋतावासत्यवान्यथार्थदर्शीत्यर्थः होतादेवानामाह्वाताभवति हेऋत्विग्यजमानायूयंतमुतमेवाग्निंनमोभिःस्तोत्रैःआकृणुध्वमभिमुखीकुरुत यद्यदाअयमग्निः मर्तायमनुष्यायययजमानार्थंदेवान्वेः वेति गच्छति तदानींसोग्निःयष्टव्यान्सर्वान्देवान् बोधातिचजानातिच ज्ञात्वाच मनसानमसातान् यजातिच हविर्भिःपूजयति अतस्तमेवाग्निमाकृणुध्वमितियोज्यम् ॥ वेः वीगत्यादिषु छन्दसिलुङ्लङ्लिटइतिवर्तमानेलङ् तिङांतिङोभवन्तीतिप्रथमपुरुषैकवचनस्यमध्यमपुरुषैकवचनादेशः । बोधाति बुधअवगमने लेट्याडागमः शपःपित्त्वादनुदात्तत्वेधातुस्वरःशिष्यते चवायोगेप्रथमेतिनिघातप्रतिषेधः । मनसा मकारनकारयोःस्थानविपर्ययः ॥ २ ॥

१. जो अग्नि यज्ञ में अत्यन्त सुखकारी, यथार्थदर्शी और देवाह्वानकारी हैं, उन्हें स्तोत्र-द्वारा हमारे अभिमुख करो। जिस समय अग्नि मनुष्यों के लिए देवों के पास जाते हैं, उस समय वे देवों को जानते और मन या नमस्कार-द्वारा पूजा करते हैं।

तृतीयामृचमाह—

सहिक्रतुःसमर्यःससाधुर्मित्रोनभूदद्भुतस्यरथीः ।
तंमेधेषुप्रथमंदेवयन्तीर्विशउपब्रुवतेदस्ममारीः ॥३॥

सः । हि । क्रतुः । सः । मर्यः । सः । साधुः । मित्रः । न । भूत् ।
अद्भुतस्य । रथीः । तम् । मेधेषु । प्रथमम् । देवऽयन्तीः । विशः ।
उप । ब्रुवते । दस्मम् । आरीः ॥ ३ ॥

सह्यग्निःक्रतुःकर्मणांकर्तासएवमर्योमारयिताविश्वस्योपसंहर्ता साधुःसाधयितावुत्पादयितापिसएव अद्भुतस्याभूतस्यालब्धस्यधनस्यरथीःरंहयितामापयिता भूद्भवति तत्रदृष्टान्तः— मित्रोन यथासखाधनानिमापयति तद्वत् एवंभूतोयोग्निस्तमेवमेधेषुयज्ञेषुदेवयन्तीर्देवयन्त्योदेवानात्मनइच्छन्त्योविशःप्रजाःप्रथममुपब्रुवते स्तुतिभिरुपेत्यप्रधानभूतइतिकथयन्ति कीदृश्योविशःदस्मंदर्शनीयंतमग्निंआरीर्गच्छन्त्यःभजन्त्यइत्यर्थः॥ मर्यः मृङ्प्राणत्यागे अस्मादन्तर्भावितण्यर्थाद्वछन्दसिनिष्टक्र्यैत्यादौनिपातनाद्यत् कृत्यल्युटोबहुलमितिबहुलवचनात्कर्तरिद्रष्टव्यः यतोनावइत्याद्युदात्तत्वम् । देवयन्तीः वाछन्दसीतिपूर्वसवर्णदीर्घत्वम् । आरीः ऋगतौ जनिघसि-

ण्यामिणिति बहुलग्रहणादस्मादपिइण्प्रत्ययः कृदिकारादक्तिनइतिङीष् वाछन्दसीतिपूर्वसवर्णदीर्घत्वम् व्यत्ययेनाद्युदात्तत्वम्॥ ३ ॥

३. अग्नि यज्ञ-कर्त्ता हैं, अग्नि संसार के उपसंहारक और जनयिता हैं। सखा की तरह अग्नि अलब्ध धन देते हैं। देवाभिलाषी प्रजागण उन दर्शनीय अग्नि के समीप जाकर अग्नि को ही यज्ञ का प्रथम देवता मानकर स्तुति करते हैं।

सनोनृणांनृतमोरिशादाअग्निर्गिरोवसावेतुधीतिम्।
तनाचयेमघवानःशविष्ठावाजप्रसूताइषयन्तमन्म ॥४॥

सः। नः। नृणाम्। नृऽतमः। रिशादाः। अग्निः। गिरः। अवसा।
वेतु। धीतिम्। तना। च। ये। मघऽवानः। शविष्ठाः।
वाजऽप्रसूताः। इषयन्त। मन्म ॥ ४ ॥

नृणांयज्ञस्यनेतॄणांमध्येनृतमोऽतिशयेननेतारिशादाःरिशानांशत्रूणांअत्ताभक्षयिता यद्वा रिशतांहिंसतांअसितानिरसिता एवंविधःसोग्निःनोस्माकंगिरःस्तुतीःअवसाहविर्लक्षणेनान्नेनयुक्तांधीतिंकर्मचवेतुकामयतां अपिचयेयजमानाः तनाधननामैतत् विस्तृतेनधनेनमघवानोधनवन्तः शविष्ठाःअतिशयेनबलिनश्चसन्तः वाजप्रसूताः प्रसूतंप्रेरितंवाजोहविर्लक्षणमन्नंयैः तादृशाभूत्वामन्म अग्नेर्मननरूपंस्तोत्रं इषयन्त एषयन्ति ऋत्विग्भिःकारयितुमिच्छन्ति तेषामपिस्तुतिंअग्निःकामयतामितिभावः॥ नृणां नृचेत्युभयथाभावाद्दीर्घाभावः नामन्यतरस्यामितिनामउदात्तत्वम्। तना तनुविस्तारे पचाद्यच् तृतीयैकवचनस्यसुपांसुलुगित्याकारः वृषादेराकृतिगणत्वादाद्युदात्तत्वम्। शविष्ठाः शवइतिबलनाम अस्मायामेधेतिमत्वर्थीयोविनिः ततआतिशायनिकइष्ठन् विन्मतोर्लुगितिविनोलुक् टेरितिटिलोपः इष्ठनोनित्त्वादाद्युदात्तत्वम्। इषयन्त इषइच्छायां अस्माण्ण्यन्ताच्छान्दसोलङ् संज्ञापूर्वकस्यविधेरनित्यत्वाण्णौ लघूपधगुणाभावः अदुपदेशाल्लसार्वधातुकानुदात्तत्वेणिचएवस्वरः शिष्यते ॥ ४ ॥

४. अग्नि नेताओं के बीच उत्कृष्ट नेता और शत्रुओं के विनाशकारी हैं। अग्नि हमारी स्तुति और अन्नयुक्त यज्ञ की अभिलाषा करें तथा जो धनशाली और बलशाली यजमान लोग अन्न प्रदान करके अग्नि के मननीय स्तोत्र की इच्छा करते हैं, अग्नि उन लोगों की स्तुति की भी इच्छा करें।

एवाग्निर्गोतमेभिर्ऋतावाविप्रेभिरस्तोष्टजातवेदाः।
सएषुद्युम्नंपीपयत्सवाजंसपुष्टिंयातिजोषमाचिकित्वान्॥५॥२५॥

एव । अ॒ग्निः । गोत॑मेभिः । ऋ॒तऽवा॑ । विप्रे॑भिः । अ॒स्तो॒ष्ट ।
जा॒तऽवे॑दाः । सः । ए॒षु॒ । द्यु॒म्नम् । पी॒प॒य॒त् । सः । वाज॑म् । सः ।
पु॒ष्टिम् । या॒ति॒ । जोष॑म् । आ । चि॒कि॒त्वान् ॥ ५ ॥ २५ ॥

ऋतावाऋतवान्यज्ञवान्जातवेदाः जातधनोजातप्रज्ञोवायमग्निः विप्रेभिः मेधाविभिर्गोतमेभिर्गोतमैर्ऋषिभिरेवमुक्तेनप्रकारेणास्तोष्टस्तुतोभूत् स्तुतश्चसोग्निः एषुगोतमेषुद्युम्नंद्योतमानंसोमं पीपयत् अपिबत् यद्वा तानृपीनपाययत् तथासोग्निर्वाजंहविर्लक्षणमन्नंपीपयदित्येव एवंसोमलक्षणंचरुपुरोडाशादिलक्षणंहविश्चस्वीकृत्यसोग्निः जोषंअस्माभिः कृतंसेवनंआचिकित्वान् आसमन्तात् जानन् पुष्टिंयातिपोषंमाप्नोतु यद्वा अस्माकंधनानिपोषंप्रापयतु ॥ गोतमेभिः ऋष्यन्धकवृष्णिकुरुभ्यश्चेतिविहितस्याणः अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्चेतिबहुषुलुक् । अस्तोष्ट स्तौतेःकर्मणिलुङि चिणभावश्छान्दसः । पीपयत् पापाने ण्यन्तात् लुङिचङ्श्चरत्वादि । जोषं जुषीप्रीतिसेवनयोः भावेघञ् ञित्वादाद्युदात्तत्वम् ॥ ५ ॥

५. यज्ञयुक्त और सर्वज्ञ अग्नि इसी प्रकार मेधावी गोतम आदि ऋषियों-द्वारा स्तुत हुए थे। अग्नि ने भी उन्हें प्रकाशमान सोमरस का पान और भोजन कराया था। हमारी सेवा जानकर अग्नि पुष्टि प्राप्त करें।

इतिप्रथमस्यपञ्चमेपञ्चविंशोवर्गः ॥ २५ ॥

अभित्वेतिपञ्चर्चंपञ्चमंसूक्तं गोतमस्यार्षमाग्नेयंगायत्रं तथाचानुक्रान्तम्—अभित्वागायत्रंत्विति विनियोगोलैङ्गिकः ।

अ॒भि त्वा॒ गोत॑मा गि॒रा जात॑वेदो॒ विच॑र्षणे । द्यु॒म्नैर॒भि प्र णो॑नुमः ॥ १ ॥

अ॒भि । त्वा॒ । गोत॑माः । गि॒रा । जात॑ऽवेदः । वि॒ऽच॒र्षणे । द्यु॒म्नैः ।
अ॒भि । प्र । नो॒नु॒मः ॥ १ ॥

हेजातवेदोजातानांवेदितः विचर्षणेविशेषेणसर्वस्यद्रष्टः एवंभूताग्नेत्वात्वांगोतमाअस्यसूक्तस्यद्रष्टागोतमऋषिः ऋषेरेकत्वेपिपूजार्थंबहुवचनं गिरास्तोत्रलक्षणयावाचाअभिआभिमुख्येन अस्तौदितिशेषः तद्वद्वयमपित्वांद्युम्नैः त्वदीयगुणप्रकाशकैर्मन्त्रैः अभिप्रणोनुमः आभिमुख्येनपुनःपुनःस्तुमः ॥ नोनुमः णुस्तुतौ अस्माद्यङ्लुगन्ताल्लट् उपसर्गादसमासेपीतिणत्वम् ॥ १ ॥

१. हे उत्पन्नज्ञाता और सर्वद्रष्टा अग्नि! गोतम-वंशीयों ने तुम्हारी स्तुति की है। द्युतिमान् स्तोत्र-द्वारा हम तुम्हारी स्तुति करते हैं।

द्वितीयामृचमाह—

तमुत्वागोतमोगिरारायस्कामोदुवस्यति। द्युम्नैरभिप्रणोनुमः ॥२॥

तम्। ऊम् इति। त्वा। गोतमः। गिरा। रायःऽकामः। दुवस्यति।
द्युम्नैः। अभि। प्र। नोनुमः॥ २ ॥

रायस्कामोधनकामोगोतमोयमग्निंगिरास्तुत्यादुवस्यतिपरिचरति तमु तमेवत्वांद्युम्नैर्द्योतमानैःस्तोत्रैः आभिमुख्येनपुनःपुनःस्तुमः ॥ रायस्कामः रायोधनानिकामयतइतिरायस्कामःकर्मण्यण् तत्पुरुषेकृतिबहुलमितिबहुलवचनादलुक् ऊडिदमित्यादिनापूर्वपदस्यविभक्तेरुदात्तत्वम् दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वम् अतःकृकमिकंसकुम्भेतिविसर्जनीयस्यसत्वम्। दुवस्यति दुवसउपतापे परिचरणेकण्ड्वादिः॥ २ ॥

२. धनाकाङ्क्षी होकर गोतम जिन अग्नि की स्तुति-द्वारा सेवा करते हैं, उन्हीं की, गुण-प्रकाशक स्तोत्र-द्वारा, हम बार-बार स्तुति करते हैं।

तृतीयामृचमाह—

तमुत्वावाजसातममङ्गिरस्वद्धवामहे। द्युम्नैरभिप्रणोनुमः ॥३॥

तम्। ऊम् इति। त्वा। वाजऽसातमम्। अङ्गिरस्वत्। हवामहे।
द्युम्नैः। अभि। प्र। नोनुमः॥ ३ ॥

हेअग्ने वाजसातमंवाजानामन्नानामतिशयेनसनितारंदातारंतमेवत्वांअङ्गिरस्वत् अङ्गिरसइवहवामहेआह्वयामः शिष्टंगतम् ॥ वाजसातमम् षणुदाने जनसनखनक्रमगमोविट् विड्वनोरनुनासिकस्यादित्यात्वम् अतिशयेनवाजसाःवाजसातमः तमपःपित्त्वादनुदात्तत्वेकृदुत्तरपदप्रकृतिस्वरएवशिष्यते। अङ्गिरस्वत् तेनतुल्यमितिवतिः नभोंगिरोमनुषांवत्युपसंख्यानमितिभत्वेपदत्वाभावाद्रुत्वाद्यभावः॥ ३ ॥

३. अङ्गिरा की तरह सर्वापेक्षा अधिकतर अन्नदाता अग्नि को हम बुलाते हैं और द्युतिमान् स्तोत्र-द्वारा स्तुति करते हैं।

तमुत्वावृत्रहन्तमंयोदस्यूँरवधूनुषे। द्युम्नैरभिप्रणोनुमः ॥४॥

तम्। ऊम् इति। त्वा। वृत्रहन्ऽतमम्। यः। दस्यून्। अवऽधूनुषे।
द्युम्नैः। अभि। प्र। नोनुमः॥ ४ ॥

हेअग्ने दस्यूनङ्गपक्षपयितॄनराक्षसादीन्यस्त्वम वधूनुषेअवचाल्यसि स्थानात्प्रच्यावयसि वृत्रहन्तमंवृत्राणांपाप्मनांअतिशयेनहन्तारंतमुत्वातमेवत्वांद्युम्नैरित्यादिपूर्ववत्॥ वृत्रहन्तमं अतिशयेनवृत्रहावृत्रहन्तमः पदसंज्ञायांनलोपेनाद्धस्येतितमपोनुट्। दस्यून् दीर्घादटिसमानपादेइति नकारस्यरुत्वम् अत्रानुनासिकःपूर्वस्यतुवेतिऊकारःसानुनासिकः ॥ ४ ॥

४. हे अग्निदेव ! तुम दस्युओं, अनार्यों या शत्रुओं को स्थान-भ्रष्ट करो। तुम सर्वापेक्षा शत्रु-हन्ता हो। द्युतिमान् स्तोत्र-द्वारा हम तुम्हारी स्तुति करते हैं।

अवो॑चा॒म॒रहू॑गणाअ॒ग्नये॒मधु॑म॒द्वचः॑। द्यु॒म्नैर॒भिप्रणो॑नुमः॥५॥२६॥

अवो॑चाम। रहू॑गणाः। अ॒ग्नये॑। मधु॑ऽमत्। वचः॑। द्यु॒म्नैः। अ॒भि। प्र। नो॒नु॒मः॥ ५ ॥ २६ ॥

ऋषिःकृतंस्तोत्रंअनयोपसंहरति रहूगणाःरहूगणस्यपुत्रावयंगोतमाः अग्नयेअङ्गनादिगुणयुक्तायदेवायमधुमद्वचः माधुर्योपेतंवचनंअवोचाममावादिष्म तद्वचनरूपैर्द्युम्नैर्द्योतमानैःस्तोत्रैःपुनःपुनरग्निंवयमभिप्रणोनुमः आभिमुख्येनप्रकर्षेणस्तुमः ॥ ५ ॥

५. हम रहूगण-वंशीय हैं। हम अग्नि के लिए माधुर्ययुक्त वाक्य का प्रयोग करते और द्युतिमान् स्तोत्र-द्वारा स्तुति करते हैं।

इतिप्रथमस्यपञ्चमेषड्विंशोवर्गः ॥ २६ ॥

हिरण्यकेशइतिद्वादशर्चंषष्ठंसूक्तंरहूगणपुत्रस्यगोतमस्यार्षं अत्रानुक्रम्यते—हिरण्यकेशोद्वादशाद्यौतृचौत्रैष्टुभौष्णिहौपूर्वोग्नयेवामध्यमायेतिपूर्वत्रगायत्रंत्वित्युक्तत्वादिदमपिगायत्रंसूक्तं एतावांस्तुविशेषः आद्यस्तृचस्त्रैष्टुभः द्वितीयस्त्वौष्णिहः प्रथमतृचस्यमध्यमस्थानोवैद्युतोग्निःशुद्धाग्निर्वादेवता शिष्टानवर्चःकेवलाग्निदेवताकाः प्रातरनुवाकस्याग्नेयेक्रतौत्रैष्टुभेछन्दसिआश्विनशस्त्रे चाद्यस्तृचः सूत्रितंच—हिरण्यकेशइतितिस्रोपश्यमस्यमहतइतिसूक्तेइति। कारीर्यामग्नेर्धामच्छदः हिरण्यकेशइतिद्वेऋचौयाज्यानुवाक्ये सूत्रितंच—हिरण्यकेशोरजसोविसारइतिद्वे त्वंत्याचिदच्युताधामन्तेविश्वंभुवनमधिश्रितमितिवेति।

तत्रप्रथमामृचमाह—

हि॒र॑ण्यकेशो॒रज॑सोविसा॒रेहि॒र्धुनि॒र्वात॑इव॒ध्रजी॑मान्। शुचि॑भ्राजाउ॒षसो॒नवे॑दा॒यश॑स्वतीरप॒स्युवो॒नस॒त्याः॥१॥

हिर॑ण्यऽकेशः। रज॑सः। वि॒ऽसा॒रे। अहिः॑। धुनिः॑। वातः॑ऽइव। ध्रजी॑मान्। शुचि॑ऽभ्राजाः। उ॒षसः॑। नवे॑दाः। यश॑स्वतीः। अ॒प॒स्युवः॑। न। स॒त्याः। १ ॥

हिरण्यकेशः हितरमणीयाः केशस्थानीयाज्वालायस्यसतथोक्तः सुवर्णवद्रोचमानज्वालो-वाअहिः आगत्यहन्तामेघानांधुनिः तेषांकम्पयिता वातइववायुरिवध्रजीमान्शीघ्रगतियुक्तः एवं-भूतोवैद्युतोग्निः रजसउदकस्यविसारेविसरणेमेघान्निर्गमनेनिमित्तभूतेसति शुचिभ्राजाः शोभन-दीप्तिःसन्मेघाज्जलानिनिर्गमयितुंजानाति उषसः उषोदेवताः नवेदाः नविदन्तीतिनवेदाः मेघादु-दकस्यनिःसारणंअग्निरेवजानाति उषसस्तुनजानन्तीत्यर्थः अज्ञानेदृष्टान्तः—यशस्वतीः अन्न-युक्ताः अन्नवत्यः अपस्युवः अपः कर्मआत्मनइच्छन्त्यः सत्याः अवितथारंभान एवंभूताःप्र-जाइव अत्रोषसामज्ञानेनअग्निः प्रशस्यते नतुतानिन्द्यन्ते नहिनिंदानिन्द्यंनिन्दितुंअपितुस्तुत्यंस्तो-तुमितिन्यायात् ॥ ध्रजीमान् ध्रजगतौ इन्सर्वधातुभ्यइतिभावेइन्प्रत्ययः ततोमतुप् तस्यापित्त्वा-दनुदात्तत्वेइनोनित्त्वात्प्रातिपदिकस्याद्युदात्तत्वम् । नवेदाः नञ्पूर्वाद्विदेःपचाद्यच् नभ्राण्नपादि-त्यादिनानञःप्रकृतिभावः । अपस्युवः अपस्शब्दात्सुपआत्मनःक्यच् क्याच्छन्दसीत्युप्रत्ययः तन्वादीनांछन्दसिबहुलमुपसंख्यानमितिउवङ् ॥ १ ॥

१. सुवर्ण केशवाले अग्नि (विद्युत्-रूप में) हननशील मेघ को कम्पित करते और वायु की तरह शीघ्रगामी हैं। वे सुन्दर दीप्ति से युक्त होकर मेघ से वारि-वर्षण करना जानते हैं। उषा यह बात नहीं जानती। उषा अन्नशाली, सरल और निजकार्य-परायण प्रजा की तरह है।

आ ते॑ सु॒प॒र्णा अ॑मिनन्तँ॒ एवैः॑ कृ॒ष्णो नो॑नाव वृष॒भो यदी॒दम्।
शि॒वाभि॒र्न स्मय॑माना॒भि॒रागा॒त्पत॑न्ति॒ मिहः॑ स्त॒नय॑न्त्य॒भ्रा ॥२॥

आ । ते॒ । सु॒ऽप॒र्णाः । अ॒मि॒न॒न्त॒ । एवैः॑ । कृ॒ष्णः । नो॒ना॒व॒ । वृ॒ष॒भः । यदि॑ । इ॒दम् । शि॒वाभिः॑ । न । स्मय॑मानाभिः । आ । अ॒गा॒त् । पत॑न्ति । मिहः॑ । स्त॒नय॑न्ति । अ॒भ्रा ॥ २ ॥

हेअग्नेतेतवसुपर्णाः शोभनपतनारश्मयः एवैर्गन्तृभिर्मरुद्भिःसहामिनन्त आसमन्ता-न्मेघं हिंसन्ति वर्षणार्थंताडयन्ति महतश्च कृष्णः कृष्णवर्णोवृषभोवर्षितामेघःनोनावभृशंश-ब्दमकरोत् यदियदाइदमीदृशंकर्म तदानींशिवाभिःसुखकारिणीभिःस्मयमानाभिःहसनवतीभिः कान्तिभिरिवशुभ्रवर्णाभिःफेनयुक्ताभिरिवाद्भिर्विद्युद्भिर्वासहअगात् वैद्युताग्निप्रेरितःपर्जन्यआ-गच्छतितदनन्तरमिहआपःपतन्ति दिवःसकाशात्प्रवृष्टाभवन्ति अभ्राअभ्राणिअद्भिःपूर्णामेघाः स्त नयन्ति इतस्ततःशब्दंकुर्वन्ति ॥ अमिनन्त मीञ्हिंसायां क्रैयादिकः व्यत्ययेनान्तादेशःईषाअ-क्षादित्वात्प्रकृतिभावःअणोप्रगृह्यस्येतिवैकल्पिकमवसानेविधीयमानमनुनासिकत्वम् व्यत्ययेना-त्रसंहितायामपिद्रष्टव्यम्। नोनाव नौतेर्यङ्लुगन्तात्लिटिअमन्त्रेइतिनिषेधादाम्प्रत्ययाभावः।स्म-यमानाभिः ष्मिङ्ईषद्धसने शपःपित्त्वादनुदात्तत्वं शानचोलसार्वधातुकस्वरेणधातुस्वरःशिष्यते।

स्तनयन्ति स्तनशब्दे चुरादिरदन्तः पतन्तिस्तनयन्तीत्यनयोःपादादित्वाद्वाक्यादित्वाच्चनि-घाताभावः ॥ २ ॥

२. अग्नि! तुम्हारी सुन्दर और पतनशील किरण, मरुतों के साथ, मेघ को ताड़ित करती हैं। कृष्णवर्ण और वर्षणशील मेघ गरजा है। मेघ सुखकर और हास्य-युक्त वृष्टि-बिन्दु के साथ आता है। पानी गिर रहा है, मेघ गरज रहा है।

यदीमृतस्यपयसापियानोनयन्नृतस्यपथिभीरजिष्ठैः।
अर्यमामित्रोवरुणःपरिज्मात्वचंपृञ्चन्त्युपरस्ययोनौ ॥३॥

यत्। ईम्। ऋतस्य। पयसा। पियानः। नयन्। ऋतस्य।
पथिऽभिः। रजिष्ठैः। अर्यमा। मित्रः। वरुणः। परिऽज्मा।
त्वचम्। पृञ्चन्ति। उपरस्य। योनौ ॥ ३ ॥

यदींयदायमग्निः ऋतस्योदकस्यपयसापयोवत्सारभूतेनरसेनपियानोजगदाप्यायनंकुर्वन् आ-प्यायितंचजगदृतस्योदकस्यसम्बन्धिभिःरजिष्ठैःऋजुतमैःपथिभिर्मार्गैःस्नानपानादिभिःनयन्प्रा-पयन्वर्तते तदानींअर्यमामित्रोवरुणश्चपरिज्मापरितोगन्तामरुद्गणश्चउपरस्यमेघस्ययोनौवृष्ट्यु-दकोत्पत्तिस्थानेत्वचंपृञ्चन्ति वृष्ट्युदकस्याच्छादकंमदेशंस्वकीयैरायुधैःसंयोजयंति उद्घाटयन्ती-तियावत्॥ पियानः स्फायीओप्यायीवृद्धौ बहुलंछन्दसीतिशपोलुक् धातोर्व्यत्ययेनपीभावः अ-नुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वेधातुस्वरःशिष्यते। रजिष्ठैः ऋजुशब्दादिष्ठनि विभाषर्जोश्छन्दसी-तिऋकारस्यरत्वम् टेरितिटिलोपः। पृञ्चन्ति पृचीसंपर्के रौधादिकः ॥ ३ ॥

३. जिस समय अग्नि, वृष्टि-जल-द्वारा, संसार को पुष्ट करते हैं तथा जल के व्यवहार का सरल उपाय (स्नान, पान आदि) दिखा देते हैं, उस समय अर्यमा, मित्र, वरुण और समस्त दिग्गामी मरुद्गण मेघ के जलोत्पत्ति-स्थान का आच्छादन उद्घाटित कर देते हैं।

प्रातरनुवाकस्याग्नेयेक्रतौऔष्णिहेछन्दसिआश्विनशस्त्रेचाग्नेवाजस्येत्याद्यास्तिस्रऋचः सू-त्रितंच—अग्नेवाजस्येतितिस्रःपुरुत्वादामग्नइति।

अग्नेवाजस्यगोमतईशानःसहसोयहो।
अस्मेधेहिजातवेदोमहिश्रवः ॥ ४ ॥

अग्ने। वाजस्य। गोऽमतः। ईशानः। सहसः। यहो इति।
अस्मे इति। धेहि। जातऽवेदः। महि। श्रवः ॥४॥

हेसहसोयह्वो बलस्यपुत्राग्ने गोमतोबहुभिर्गोभिर्युक्तस्य वाजस्यान्नस्य ईशानईश्वरस्त्वमसि अतोस्मे अस्मासुहेजातवेदोजातधनजातानांवेदितर्वाग्ने महिमभूतंश्रवोन्नं धेहिस्थापय ॥ सहसोयह्वो पराङ्गवद्भावादामन्त्रितस्यचेतिषष्ठ्यामन्त्रितसमुदायोनिहन्यते । अस्मे सुपांसुलुगितिसप्तम्याः शेआदेशः ॥ ४ ॥

४. हे बल-पुत्र अग्नि ! तुम प्रभूत गो-युक्त अन्न के मालिक हो। हे सर्वभूतज्ञाता ! हमें तुम बहुत धन दो।

सईधानोवसुष्कविरग्निरीळेन्योगिरा । रेवदस्मभ्यंपुर्वणीकदीदिहि ॥ ५ ॥

सः । इधानः । वसुः । कविः । अग्निः । ईळेन्यः । गिरा ।
रेवत् । अस्मभ्यम् । पुरुऽअनीक । दीदिहि ॥ ५ ॥

सोग्निः इधानोदीपनशीलः वसुर्निवासयितासर्वेषांकविः क्रान्तदर्शनोमेधावीवा गिरास्तोत्ररूपयावाचाईळेन्यः स्तोतव्योभवति हेपुर्वणीक अनीकंमुखंपुरुभिर्बह्वीभिरनीकस्थानीयाभिर्ज्वालाभिर्युक्ताग्ने अस्मभ्यं रेवद्धनयुक्तमन्नं यथाभवतितथादीदिहिदीप्यस्व ॥ इधानः ञिइन्धीदीप्तौ ताच्छीलिकश्चानश् बहुलंछन्दसीतिशपोलुक् । ईळेन्यः ईडस्तुतौ औणादिकएन्यप्रत्ययः । रेवत् रयेर्मतौबहुलमितिसम्प्रसारणम् छन्दसीरइतिमतुपोवत्वम् रेशब्दाच्चमतुपउदात्तत्वंवक्तव्यमितिमतुपउदात्तत्वम् । दीदिहि दीदेतिश्छान्दसोदीप्तिकर्मा ॥ ५ ॥

५. दीप्तियुक्त, निवास-स्थानदाता और मेधावी अग्नि स्तोत्र-द्वारा प्रशंसनीय हैं। हे बहुमुख अग्नि ! जिस प्रकार हमारे पास धन-युक्त अन्न हो, उसी प्रकार दीप्ति प्रकाशित करो।

षष्ठीमृचमाह—

क्षपोराजन्नुतत्मनाग्नेवस्तोरुतोषसः ।
सतिग्मजम्भरक्षसोदहप्रति ॥ ६ ॥२७ ॥

क्षपः । राजन् । उत । त्मना । अग्ने । वस्तोः । उत । उषसः ।
सः । तिग्मऽजम्भ । रक्षसः । दह । प्रति ॥ ६ ॥ २७ ॥

हेराजन् राजनशीलाग्ने क्षपःक्षपय राक्षसादीन्स्वकीयैःपुरुषैर्बाधस्व उत अपिच त्मना नकेवलमन्यैरेवआत्मनाचवान् बाधस्व कदेतिचेत् उच्यते वस्तोः सर्वाण्यहानि उतअपिच उषसः उषःकालोपलक्षितारात्रीः अत्यन्तसंयोगेद्वितीया सर्वेष्वहस्सुसर्वासुरात्रिषुचेत्यर्थः हेतिग्मजम्भ तीक्ष्णमुखाग्ने रक्षसोराक्षसान् उक्तंमकारेणक्षपयित्वासएवत्वं प्रतिदहप्रत्येकंदह नकिंचिद्दग्धव्यमित्युदारस्वेत्यर्थः ॥ क्षपः क्षपक्षान्त्यां लोडर्थेछान्दसोलङ् छन्दस्युभयथेतिशपआर्धधातुकत्वात्

णेरनिटीतिणिलोपः उदात्तनिवृत्तिस्वरेणशपउदात्तत्वम् । त्मना मन्त्रेष्वाङ्यादेरात्मनइत्याकार-लोपः । रक्षसः रक्षपालने रक्षितव्यमस्मादितिरक्षः भीमादित्वादपादाने असिमत्ययः क्षरतेर्वाण्यन्तादसिमत्ययेणिलोपः वर्णविपर्ययश्च अस्यच रक्षःशब्दस्य असिमत्ययान्तत्वात्मत्ययस्वरएव-शिष्यते ॥ ६ ॥

६. उज्ज्वल अग्नि ! दिन अथवा रात्रि में स्वयं या प्रजा-द्वारा राक्षसादि को विताड़ित करो। हे तीक्ष्ण-मुख अग्नि ! राक्षस को दहन करो।

॥ इतिप्रथमस्यपञ्चमेसप्तविंशोवर्गः ॥ २७ ॥

प्रातरनुवाकस्याग्नेयेक्रतौगायत्रेछन्दसिअवानोअग्नइत्याद्याः षळृचः सूत्रितंच—अवानोअग्नइतिषळग्निमीळेग्निंदूतमिति आश्विनशस्त्रेचैताःशंसनीयाः प्रातरनुवाकातिदेशात् ।

षट्सुप्रथमांसूक्तेसप्तमीमृचमाह—

अवानोअग्नऊतिभिर्गायत्रस्यप्रभर्मणि । विश्वासुधीषुवन्द्य ॥ ७ ॥

अव । नः । अग्ने । ऊतिऽभिः । गायत्रस्य । प्रऽभर्मणि ।
विश्वासु । धीषु । वन्द्य ॥ ७ ॥

विश्वासुधीषुसर्वेषुकर्मसुवन्द्यस्तुत्य हेअग्ने गायत्रस्यगायत्रसाम्नः गायत्रीछन्दस्कस्यसूक्तस्यवाप्रभर्मणिप्रभरणेसम्पादनेनिमित्तभूतेसति नोस्मानूतिभिःत्वदीयैः पालनैः अवरक्ष॥ अव द्व्यचोतस्तिङइतिसंहितायांदीर्घत्वम् ॥ ७ ॥

७. अग्निदेव ! तुम सारे यज्ञों में स्तुति-भाजन हो। हमारी गायत्री-द्वारा तुष्ट होकर, रक्षण-कार्य-द्वारा, हमें पालित करो।

आनोअग्नेरयिंभरसत्रासाहंवरेण्यम् । विश्वासुपृत्सुदुष्टरम् ॥ ८ ॥

आ । नः । अग्ने । रयिम् । भर । सत्राऽसहम् । वरेण्यम् । विश्वासु ।
पृत्ऽसु । दुस्तरम् ॥ ८ ॥

हेअग्ने रयिंधनंनोस्मभ्यंआभरप्रयच्छ कीदृशं सत्रासाहंसत्रासहयुगपदेवदारिद्र्यस्यनाशकं वरेण्यंसर्वैर्वरणीयंविश्वासुपृत्सुसर्वेषुसङ्ग्रामेषुदुष्टरंशत्रुभिस्तरीतुमशक्यम् ॥ सत्रासाहं छन्दसिसहइतिण्विः । वरेण्यं वृञएण्यः । पृत्सु पदादिषुमांस्पृत्स्नूनामुपसंख्यानमितिपृतनाशब्दस्यपृद्भावः सावेकाचइतिविभक्तेरुदात्तत्वम् ॥ ८ ॥

८. अग्नि ! हमें दारिद्र्य-विनाशी, सबके स्वीकार योग्य और सारे संग्रामों में धन दो।

आयुष्कामेष्ट्यांप्रथमस्याज्यभागस्यानुवाक्या आनोअग्नइति सूत्रितंच—आयुष्कामेष्ट्यां जीवातुमन्त्वावानोअग्नेसुचेतुनेति। महापितृयज्ञेप्येषैवप्रथमाज्यभागस्यानुवाक्या सूत्रितंच—जीवातुमन्तौसम्पोत्तर्युपस्थाइति।

तामेतांसूक्तेनवमीमृचमाह—

आनोअग्नेसुचेतुनांरयिंविश्वायुंपोषसम्। मार्डीकंधेहिजीवसें॥९॥

आ। नः। अग्ने। सुऽचेतुना। रयिम्। विश्वायुंऽपोषसम्।
मार्डीकम्। धेहि। जीवसें॥ ९॥

हेअग्ने नोस्माकंजीवसे जीवनायसुचेतुनाशोभनेनज्ञानेनयुक्तंरयिंधनं आधेहि आस्थापय कीदृशंमार्डीकं मृडीकंसुखं तद्धेतुभूतं विश्वायुपोषसंसर्वस्मिन्नायुषिदेहादेःपोषकं यावज्जीवमस्मदुपभोगपर्याप्तमित्यर्थः॥ सुचेतुना चितीसंज्ञाने औणादिकउप्रत्ययः कृदुत्तरपदप्रकृतिस्वरत्वम्। विश्वायुपोषसं विश्वमायुरस्मिन्शरीरादौवद्विश्वायुः बहुव्रीहौविश्वंसंज्ञायामितिपूर्वपदान्तोदात्तत्वम् तत्पुष्णातीतिविश्वायुपोषाः गतिकारकयोरपिपूर्वपदप्रकृतिस्वरत्वंचेत्यसुन् पूर्वपदप्रकृतिस्वरत्वंच सकारलोपश्छान्दसः दीर्घायुत्वायवर्चसइतियथा॥ ९॥

९. अग्नि! हमारे जीवन के लिए सुन्दर ज्ञानयुक्त, सुख-हेतुभूत और सारी आयु का पुष्टि-कारक धन प्रदान करो।

दशमीमृचमाह—

प्रपूतास्तिग्मशोचिषेवाचोगोतमाग्नये। भरस्वसुम्नयुर्गिरः॥ १०॥

प्र। पूताः। तिग्मऽशोचिषे। वाचः। गोतम। अग्नये।
भरस्व। सुम्नऽयुः। गिरः॥ १०॥

हेगोतमसूक्तद्रष्टः सुम्नयुःसुम्नंधनमात्मनइच्छंस्त्वंतिग्मशोचिषेतीक्ष्णज्वालायाग्नयेपूताः शुद्धावाचःअग्नेर्गुणान्सम्यगभिदधतीः गिरःस्तुतीः प्रभरस्व प्रकर्षेणसम्पादय॥ तिग्मशोचिषे तिजनिशाने युजिरुजितिजांकुत्वंचेतिमक् तिग्मानिशोचींषियस्य बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्। सुम्नयुः सुम्नशब्दात्क्यचिनच्छन्दस्युपुत्रस्येतिईत्वदीर्घयोःप्रतिषेधः क्याच्छन्दसीत्युप्रत्ययः॥१०

१०. हे धनाभिलाषी गोतम! तीक्ष्ण-ज्वालायुक्त अग्नि की विशुद्ध स्तुति करो।

एकादशीमृचमाह—

योनो॑अग्नेभि॒दास॒त्यन्ति॑दू॒रेप॑दी॒ष्टसः। अ॒स्माक॒मिद्वृ॒धेभ॑व ॥ ११॥

यः। नः॒। अ॒ग्ने॒। अ॒भि॒ऽदास॑ति। अन्ति॑। दू॒रे। प॒दी॒ष्ट। सः। अ॒स्माक॑म्। इत्। वृ॒धे। भ॒व ॥ ११ ॥

हेअग्ने नोऽस्मान् अन्ति अन्तिकेसमीपेदूरेविप्रकृष्टदेशेवस्थितःसन् यःशत्रुरभिदासति उपक्षपयतिसशत्रुःपदीष्टपततुनश्यतु त्वंच अस्माकमित् अस्माकमेववृधेवर्धनायभव ॥ अभिदासति दसुउपक्षये अस्माण्ण्यन्ताल्लटिछन्दस्युभयथेतिशप् आर्धधातुकत्वात् णेरनिटीतिणिलोपः अन्तिकादिलोपोबहुलमितिवक्तव्यमितिअन्तिकशब्दस्यककारलोपः। वृधे वृधुवृद्धौ सम्पदादिलक्षणोभावेक्विप् सावेकाचइतिविभक्तेरुदात्तत्वम् ॥ ११ ॥

११. अग्नि! हमारे पास या दूर रहकर जो शत्रु हमारी हानि करता है, वह विनष्ट हो। तुम हमारा वर्द्धन करो।

स॒ह॒स्रा॒क्षोवि॑चर्षणिर॒ग्नीरक्षां॑सिसेधति। होता॑गृणीतउ॒क्थ्यः॑॥१२॥२८॥

स॒ह॒स्र॒ऽअ॒क्षः। वि॒ऽच॑र्षणिः। अ॒ग्निः। रक्षां॑सि। से॒ध॒ति॒। होता॑। गृ॒णी॒ते॒। उ॒क्थ्यः॑॥ १२ ॥ २८ ॥

सहस्राक्षः असंख्यातज्वालःविचर्षणिःविशेषेणसर्वस्यद्रष्टायमग्निः रक्षांसिसेधतिप्रतिषेधति यज्ञान्निर्गमयति सचाग्निरुक्थ्यःउक्थैःशस्त्रैरस्माभिः स्तूयमानःसन् होतादेवानामाह्वाताभूत्वागृणीते तान्स्तौति ॥ सहस्राक्षः बहुव्रीहौसक्थ्यक्ष्णोरितिषच्समासान्तः सतिशिष्टत्वात्तस्यैवस्वरःशिष्यते। सेधति षिधुगत्यां अत्रकेवलोपिसोपसर्गार्थोद्रष्टव्यः। गृणीते गृशब्दे प्वादीनांह्रस्वइतिह्रस्वत्वम् ॥ १२ ॥

१२. सहस्राक्ष या असंख्य-ज्वाला-सम्पन्न और सर्व-दर्शी अग्नि राक्षसों को ताड़ित करते हैं। हमारी ओर से स्तुत होकर देवों के आह्वानकारी अग्नि उनकी स्तुति करते हैं।

॥ इतिप्रथमस्यपञ्चमेष्टाविंशोवर्गः ॥ २८ ॥

इत्येतिषोडशर्चंसप्तमंसूक्तंगौतमस्यार्षमैन्द्रंपंक्तिछन्दस्कम् अनुक्रान्तंच-इत्थाषोळशैन्द्रंपाङ्क्तंहि हिशब्दप्रयोगाचुह्यादिपरिभाषयाइदमुत्तरेचद्वेपङ्क्तिछन्दस्के पृष्ठ्यषडहस्यपञ्चमेऽहनिमरुत्वतीयेइदंसूक्तं सूत्रितंच—अविवासीत्थाहीन्द्रपिबतुभ्यमितिमरुत्वतीयमिति। चतुर्विंशेहन्यच्छावाकस्याद्यस्तृचोवैकल्पिकोनुरूपः होत्रकाणामितिखण्डेसूत्रितम्—इत्थाहिसोमइन्मदइभेपदि-

न्द्ररोदसीइति । महाव्रतेनिष्केवल्यस्यदक्षिणपक्षेइत्थाहीत्येका तथैवपञ्चमारण्यकेसूत्रितम्—इ-
त्थाहिसोमइन्मदइतिपङ्क्तिरिति ।

तामेतांसूक्तेप्रथमामृचमाह—

इत्थाहिसोमइन्मदेब्रह्माचकारवर्धनम् ।
शविष्ठवज्रिन्नोजसापृथिव्यानिःशशाअहिमर्चन्ननुस्वराज्यम् ॥ १ ॥

इत्था । हि । सोमे । इत् । मदे । ब्रह्मा । चकार । वर्धनम् ।
शविष्ठ । वज्रिन् । ओजसा । पृथिव्याः । निः । शशाः । अहिम् ।
अर्चन् । अनु । स्वऽराज्यम् ॥ १ ॥

हेशविष्ठ अतिशयेनबलवन् वज्रिन्वज्रवन्निन्द्र इत्थाहिइत्थमेवअनेनशास्त्रोक्तप्रकारेणैवम-
देमदकरेहर्षकरेसोमेत्वयापीतेसति ब्रह्माब्राह्मणः स्तोतावर्धनंतववृद्धिकरंस्तोत्रंचकार अनेनसू-
क्तेनकृतवान् इदित्येतत्पदपूरणं अतस्त्वंओजसाबलेनपृथिव्याःसकाशादहिंआगत्यहन्तारंवृत्रंनिः
शशाःनिःशेषेणअशाःमाबाधस्वेति शासनंकृत्वापृथिव्याःसकाशान्निरगमयइत्यर्थः किंकुर्वन्, स्व-
राज्यं स्वस्यराज्यंराजत्वंअनुअनुलक्ष्यअर्चन्पूजयन्स्वस्यस्वामित्वंप्रकटयन्नित्यर्थः ॥ शशाः शा-
सुअनुशिष्टौ लङ्लिलुकिमाप्ते बहुलंछन्दसीतिशपःश्लुः । स्वराज्यं राज्ञोभावःकर्मवाराज्यम् पत्यंत-
पुरोहितादिभ्योयगितियक् तत्रहिराजासइतिपठ्यते स्वस्यराज्यंस्वराज्यम् अकर्मधारयेराज्यं
इत्युत्तरपदाद्युदात्तत्वम् ॥ १ ॥

१. हे बलशाली और वज्रधर इन्द्र! तुम्हारे इस हर्षकारी सोमरस का पान करने पर स्तोता ने तुम्हारी वृद्धिकारिणी स्तुति की थी। तुमने बल-द्वारा पृथिवी पर से अहि को ताड़ित किया था तथा अपना प्रभुत्व या स्वराज्य प्रकट किया था।

द्वितीयामृचमाह—

सत्वामदद्वृषामदःसोमःश्येनाभृतःसुतः ।
येनावृत्रंनिरद्भ्योजघन्थवज्रिन्नोजसार्चन्ननुस्वराज्यम् ॥ २ ॥

सः । त्वा । अमदत् । वृषा । मदः । सोमः । श्येनऽआभृतः । सुतः ।
येन । वृत्रम् । निः । अत्ऽभ्यः । जघन्थ । वज्रिन् । ओजसा ।
पृथिव्याः । निः । शशाः । अहिम् । अर्चन् । अनु ।
स्वऽराज्यम् ॥ २ ॥

हेइन्द्र त्वात्वांससोमःअमदत्अमदयत् हर्षमापयत् कीदृशःसोमःवृषा सेचनस्वभावःमदः मदकरोहर्षकारीश्येनाभृतःश्येनरूपमापन्नयापक्ष्याकारयागायत्र्या दिवःसकाशात्आहृतःसुतःअभिषुतः हेइन्द्रवज्रिन् वज्रवन् येनपीतेनसोमेन ओजसाबलकरेणअद्भ्योन्तरिक्षसकाशात्वृत्रंनिर्जघन्थहतवानसि अन्यत्पूर्ववत् ॥ अमदत् मदीहर्षेअस्माण्णिचि मदीहर्षग्लेपनयोरितिघटादिषुपाठात् मित्त्वेसतिमितांह्रस्वइतिह्रस्वत्वम् लुङि छन्दस्युभयथेतिशपआर्धधातुकत्वाण्णेरनिटीतिणिलोपः। अद्भ्यः आपइत्यन्तरिक्षनाम अपोभीतिपकारस्यतत्वम् । जघन्थ क्रादिनियमप्राप्तस्येटः उपदेशेत्वतइतिप्रतिषेधः अभ्यासाच्चेतिहकारस्यघत्वम् लितीतिप्रत्ययात्पूर्वस्योदात्तत्वम् यद्वृत्तयोगादनिघातः ॥ २ ॥

२. इन्द्रदेव ! सेचन-स्वभाव, हर्षकर और श्येन पक्षी-द्वारा आनीत तथा अभिषुत सोमरस ने तुम्हें प्रसन्न किया था। वज्रिन् ! अपने बल-द्वारा अन्तरीक्ष के पास से तुमने वृत्र का विनाश किया था तथा अपना प्रभुत्व प्रकट किया था।

प्रेह्यभीहिधृष्णुहिनतेवज्रोनियंसते ।
इन्द्रनृम्णंहितेशवोहनोवृत्रंजयाअपोर्चन्ननुस्वराज्यम् ॥ ३ ॥

प्र । इहि । अभि । इहि । धृष्णुहि । न । ते । वज्रः । नि । यंसते । इन्द्र । नृम्णम् । हि । ते । शवः । हनः । वृत्रम् । जयाः । अपः । अर्चन् । अनु । स्वऽराज्यम् ॥ ३ ॥

हेइन्द्र प्रेहि प्रकर्षेणगच्छ अभीहि हन्तव्यान्शत्रूनाभिमुख्येनप्राप्नुहि प्राप्यचधृष्णुहि तान्शत्रूनभिभव ते तववज्रोननियंसतेशत्रुभिर्ननियम्यते अप्रतिहतगतिरित्यर्थः यथातेशवःत्वदीयंबलं नृम्णंनृणांपुरुषाणांनामकंअभिभावकंहि यस्मादेवंतस्माद्वृत्रमसुरंमेघं वा हनःजहि ततोनन्तरंतेननिरुद्धाअपः उदकानि जयाः जय वृत्रंहत्वातेनावृतमुदकं लभस्वेत्यर्थः अन्यत्समानम् ॥ यंसते यमेः कर्मणिलेटिसिब्बहुलमितिसिप् लेटोडाटावित्यडागमः। हनः लोडर्थेछान्दसोलङ् बहुलं छन्दसीतिशपोलुग्भावः शपःपित्त्वादनुदात्तत्वेधातुस्वरःशिष्यते पूर्वपदस्यासमानवाक्यस्थत्वान्निघाताभावः। जयाः जयतेर्लेट्याडागमः पूर्ववत्स्वरः ॥ ३ ॥

३. हे इन्द्र ! जाओ, शत्रुओं का सामना करो और उन्हें पराजित करो। तुम्हारे वज्र का वेग कोई रोकनेवाला नहीं है। तुम्हारा बल पुरुष-विजयी है। इसलिए तुम वृत्र का वध करो। वृत्र-द्वारा रोका हुआ जल प्राप्त करो और अपना प्रभुत्व प्रकट करो।

निरिन्द्रभूम्याअधिवृत्रंजघन्थनिर्दिवः ।
सृजामरुत्वतीरवजीवधन्याइमाअपोर्चन्ननुस्वराज्यम् ॥ ४॥

निः । इन्द्र । भूम्याः । अधि । वृत्रम् । जघन्थ । निः । दिवः ।
सृज । मरुत्वतीः । अव । जीवऽधन्याः । इमाः । अपः । अर्चन् ।
अनु । स्वऽराज्यम् ॥ ४ ॥

हेइन्द्र भूम्याअधि भूलोकस्योपरिवृत्रंनिर्जघन्थ निःशेषेणहतवानसि तथादिवोद्युलोकात्रिर्जघन्थ हत्वाचइमाःअपोवृष्ट्युदकानिअवसृज अधःपातय कीदृशीरपःमरुत्वतीः मरुद्भिः संयुक्ताः जीवधन्याः जीवाः प्राणिनोधन्यातृप्तायाभिस्ताः अन्यत्समानम् ॥ ४ ॥

४. इन्द्र! तुमने भूलोक और द्युलोक—दोनों लोकों में वृत्र का वध किया है। मरुतों से संयुक्त और जीवों के तृप्तिकर वृष्टि-जल गिराकर अपना प्रभुत्व प्रकट करो।

इन्द्रोवृत्रस्यदोधतःसानुंवज्रेणहीळितः ।
अभिक्रम्यावजिघ्नतेपःसर्मायचोदयन्नर्चन्ननुस्वराज्यम् ॥५॥२९॥

इन्द्रः । वृत्रस्य । दोधतः । सानुम् । वज्रेण । हीळितः । अभिऽक्रम्य ।
अव । जिघ्नते । अपः । सर्माय । चोदयन् । अर्चन् । अनु ।
स्वऽराज्यम् ॥ ५ ॥ २९ ॥

हीळितः क्रुद्धइन्द्रः अभिक्रम्यआभिमुख्येनगत्वादोधतः भृशंकम्पयमानस्यवृत्रस्यसानुं समुच्छ्रितंहनुप्रदेशंवज्रेण अवजिघ्नतेप्रहरति किंकुर्वन् अपोवृष्ट्युदकानिसर्मायसरणायनिर्गमनायचोदयन्प्रेरयन् ॥दोधतः धूञ्कम्पने अस्माद्यङ्लुगन्ताच्छतरिअन्त्यलोपश्छान्दसः अभ्यस्तानामादिरित्याद्युदात्तत्वम् । हीळितः हेडृहोडृअनादरे हेळतइत्येतत्क्रुध्यतिकर्मसुपठितम् अस्मान्निष्ठायांवर्णव्यापत्त्याईकारः। जिघ्नते हन्तेर्लेटिव्यत्ययेनात्मनेपदं बहुवचनंच बहुलंछन्दसीतिशपःश्लुः इदित्यनुवृत्तौबहुलंछन्दसीत्यभ्यासस्येत्वम् गमहनेत्यादिनोपधालोपः । सर्माय सृगतौ अर्तिस्तुस्वित्यादिनाभावेमन्प्रत्ययः नित्त्वादाद्युदात्तत्वम् ॥ ५ ॥

५. क्रुद्ध इन्द्र ने सामना करके कम्पमान वृत्र के उन्नत हनु-प्रवेश पर प्रहार किया, वृष्टि का जल बहने दिया और अपना प्रभुत्व प्रकट किया।

॥इतिप्रथमस्यपञ्चमेएकोनत्रिंशोवर्गः॥ २९॥

षष्ठीमृचमाह—

अधिसानौनिजिघ्नतेवज्रेणशतपर्वणा ।
मन्दानइन्द्रोअन्धसःसखिभ्योगातुमिच्छत्यर्चन्ननुस्वराज्यम् ॥६॥

अधि । सानौ । नि । जिघ्नते । वज्रेण । शतऽपर्वणा । मन्दानः ।
इन्द्रः । अन्धसः । सखिऽभ्यः । गातुम् । इच्छति । अर्चन् ।
अनु । स्वऽराज्यम् ॥ ६ ॥

इन्द्रः शतपर्वणा शतसङ्ख्याकपर्वधाराभिर्युक्तेनवज्रेणसानावधिनिजिघ्नते अधिःसप्तम्यर्थानुवादी समुच्छ्रितेवृत्रस्यकपोलादौस्थानेनितरांहिनस्ति सचेन्द्रोमन्दानोमन्दमानः स्तूयमानःसन् सखिभ्यः समानख्यानेभ्यः स्तोतृभ्योन्धसोन्नस्यगातुंमार्गमुपायमिच्छति अन्यत्पूर्ववत् ॥ मन्दानः मदिस्तुतौ कर्मणिशानचियक् छन्दस्युभयथेतिशानचआर्धधातुकत्वादतोलोपयलोपौ अनुदात्तेतःपरत्वाच्छानचोलसार्वधातुकानुदात्तत्वेसतियकएवोदात्तत्वम् अनुदात्तेशानचितस्ययकोलोपेसति उदात्तनिवृत्तिस्वरेणशानचउदात्तत्वंमामोति एवंतर्हिशानचआर्धधातुकत्वादेवलसार्वधातुकानुदात्तत्वाभावेचित्स्वरएवावशिष्यते ॥ ६ ॥

६. शतधाराओंवाले वज्र से इन्द्र ने वृत्रासुर के कपोल-देश पर आघात किया। इन्द्र ने प्रसन्न होकर स्तोताओं के लिए अन्न को जुटाने की इच्छा की और अपना प्रभुत्व प्रकट किया।

इन्द्रतुभ्यमिदद्रिवोनुत्तंवज्रिन्वीर्यम् ।
यद्धत्यंमायिनंमृगंतमुत्वंमाययावधीरर्चन्ननुस्वराज्यम् ॥ ७ ॥

इन्द्र । तुभ्यम् । इत् । अद्रिऽवः । अनुत्तम् । वज्रिन् । वीर्यम् ।
यत् । ह । त्यम् । मायिनम् । मृगम् । तम् । ऊम् इति । त्वम् ।
मायया । अवधीः । अर्चन् । अनु । स्वऽराज्यम् ॥ ७॥

अद्रिरितिमेघनाम हेअद्रिवः वाहनरूपमेघयुक्तवज्रिन्वज्रवन्निन्द्र तुभ्यमित्वषष्ठ्यर्थेचतुर्थी तवैववीर्यसामर्थ्यं अनुत्तंशत्रुभिरतिरस्कृतंयद्ध यस्माद्येनवीर्येणखलुमायिनंमायाविनंत्यं तंमसिद्धंवञ्चयितारंलोकोपद्रवकारिणमित्यर्थः मृगं मृगरूपमापन्नं तंवृत्रं त्वमपिमाययैवावधीः हतवानसि ॥अनुत्तं नसत्तनिषत्तेतिनिपातनान्निष्ठानत्वाभावः । अवधीः हन्तेर्लुङिचेतिवधादेशः सचादन्तः तस्यातोलोपेसतिस्थानिवद्भावात्तिचिवृद्ध्यभावः ॥ ७ ॥

७. हे मेघ-वाहन और वज्रधर इन्द्र! शत्रु लोग तुम्हारी क्षमता की अवहेलना नहीं कर सकते; क्योंकि तुम मायावी हो, माया-द्वारा तुमने मृग-रूप-धारी वृत्र का वध किया था और अपना प्रभुत्व प्रकट किया था।

अष्टमीमृचमाह—

वितेवज्रासोअस्थिरन्नवतिन्नाव्या३अनु ।
महत्तइन्द्रवीर्यंबाह्वोस्तेबलंहितमर्चन्ननुस्वराज्यम् ॥ ८ ॥

वि । ते । वज्रासः । अस्थिरन् । नवतिम् । नाव्याः । अनु । महत् । ते । इन्द्र । वीर्यम् । बाह्वोः । ते । बलम् । हितम् । अर्चन् । अनु । स्वऽराज्यम् ॥ ८ ॥

हेइन्द्र तेतववज्रासोवज्राः त्वत्सकाशान्निर्गतान्यायुधानिनाव्याःनावातार्याःनवतिं नवतिसङ्ख्याकाः वृत्रेणनिरुद्धानदीरनु उपलक्ष्यव्यस्थिरन् विविधमस्थिषत सर्वत्रव्याप्यवर्तमानंवृत्रंहन्तुंतववज्रःएकोपिअनेकइवासीदित्यर्थः किञ्च इन्द्र तेतववीर्यंमहत्प्रभूतं अन्यैरजेयमित्यर्थः तथाते बाह्वोः त्वदीययोर्हस्तयोर्बलंहितंनिहितं त्वदीयौबाहूअपि अतिशयेनबलिनावित्यर्थः अन्यत्पूर्ववत् ॥ अस्थिरन् तिष्ठतेर्लुङि समवप्रविभ्यःस्थइत्यात्मनेपदम् मन्त्रेघसेतिच्लेर्लुक् स्थाघ्वोरिच्चेतीत्वम् व्यत्ययेनझस्यरन्नादेशः । नाव्याः नौवयोधर्मेत्यादिनायत् यतोनावइतिपर्युदासात्तित्स्वरितमितिस्वरितत्वम् । बाह्वोः उदात्तयणइतिविभक्त्युदात्तत्वम् ॥ ८ ॥

८. इन्द्र ! तुम्हारे वज्र नब्बे नदियों के ऊपर विस्तृत हुए थे। इन्द्र ! तुम्हारा वीर्य यथेष्ट है। तुम्हारी भुजायें बहुबलधारिणी हैं। अपना प्रभुत्व प्रकट करो।

नवमीमृचमाह—

सहस्रंसाकमर्चतपरिष्टोभतविंशतिः ।
शतैनमन्वनोनवुरिन्द्रायब्रह्मोद्यतमर्चन्ननुस्वराज्यम् ॥ ९ ॥

सहस्रम् । साकम् । अर्चत । परि । स्तोभत । विंशतिः । शता । एनम् । अनु । अनोनवुः । इन्द्राय । ब्रह्म । उत्ऽयतम् । अर्चन् । अनु । स्वऽराज्यम् ।

सहस्रंसहस्रसङ्ख्याकामनुष्याः साकमर्चत एनमिन्द्रंयुगपदेवापूजयन् तथा विंशतिः षोडशर्त्विजः यजमानःपत्नीच सदस्यःशमिताचेतिविंशतिसङ्ख्याकास्तेषांयाविंशतिःसङ्ख्यापरिष्टोभत परितःसर्वतोस्तौत् तथाचशताशतसङ्ख्याकाऋषयः एनमिन्द्रमन्वनोनवुःपुनःपुनः अस्तुवन् अस्माएवेन्द्रायब्रह्महविर्लक्षणमन्नं उद्यतंदातुमूर्ध्वंधृतमतएवंविधइन्द्रः वृत्रमहन्नित्यर्थः अन्यत्पूर्ववत् ॥ परिष्टोभत स्तोभतिःस्तुतिकर्मा उपसर्गात्सुनोतीतिषत्वम् । अनोनवुः णुस्तुतौ

अस्माद्यङ्लुगन्ताल्लुङि सिजभ्यस्तविदिभ्यश्चेतिझेरुसादेशः। उद्यतं यमउपरमे उत्पूर्वादस्मात्कर्मणिनिष्ठा अनुदात्तोपदेशेत्यादिनानुनासिकलोपः गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम्॥ ९॥

९. एक साथ हज़ार मनुष्यों ने इन्द्र की पूजा की थी। बीस मनुष्यों (१६ ऋत्विक्, सस्त्रीक यजमान, सदस्य और शमिता—२०) ने इन्द्र की स्तुति की थी। सौ ऋषियों ने इन्द्र की बार-बार स्तुति की थी। इन्द्र के लिए हव्य अन्न ऊपर रखा गया था। इन्द्र ने अपना प्रभुत्व प्रकट किया था।

इन्द्रो॑वृ॒त्रस्य॒तवि॑षीं॒निर॑ह॒न्सह॑सा॒सहः॑।
म॒हत्तद॑स्य॒पौंस्यं॑वृ॒त्रंज॑घ॒न्वाँअ॑सृज॒दर्च॒न्ननु॒स्व॒राज्य॑म्॥ १०॥ ३०॥

इन्द्रः॑। वृ॒त्रस्य॑। तवि॑षीम्। निः। अ॒ह॒न्। सह॑सा। सहः॑। म॒हत्। तत्। अ॒स्य॒। पौंस्य॑म्। वृ॒त्रम्। ज॒घ॒न्वान्। अ॒सृ॒ज॒त्। अर्च॑न्। अनु॑। स्व॒ऽराज्य॑म्॥ १०॥ ३०॥

इन्द्रःवृत्रस्यासुरस्यतविषींबलं स्वकीयेनबलेननिरहन् हतवान्सहसासहनेनाभिभवसाधनेनायुधेनसहःअभिभवसाधनम् वृत्रायुधंनिरहन् हतवान् अस्येन्द्रस्यतत्पौंस्यंबलंमहत्अतिप्रौढंयस्मादयंवृत्रंजघन्वान्हतवान् हत्वाच तन्निरुद्धाअपः असृजत् तस्माद्वृत्रान्निरगमयत् अन्यत्पूर्ववत्॥ पौंस्यं पुंसअभिवर्धने चुरादिः अचोयदितियत् यतोनावइत्याद्युदात्तत्वम्। जघन्वान् हन्तेर्लिटःक्वसुः विभाषागमहनविदेतिइटोविकल्पादिडभावः अभ्यासाच्चेत्यभ्यासादुत्तरस्यहन्तेर्हकारस्यघत्वम्॥ १०॥

१०. इन्द्र ने अपने बल से वृत्र के बल का विनाश किया था। पराभूत करनेवाले शस्त्र से उन्होंने वृत्र का शस्त्र विनष्ट किया था। इन्द्र के पास असीम शक्ति है; क्योंकि उन्होंने वृत्र का वध करके, वृत्र-द्वारा रोका गया, जल निर्गत किया था। इन्द्र ने अपना प्रभुत्व प्रकट किया था।

इ॒मेचि॒त्तव॑म॒न्यवे॒वेपे॑तेभि॒यसा॑म॒ही।
यदि॑न्द्रवज्रि॒न्नोज॑सावृ॒त्रंम॒रुत्वाँ॒अव॑धी॒रर्च॒न्ननु॒स्व॒राज्य॑म्॥ ११॥

इ॒मे इति॑। चि॒त्। तव॑। म॒न्यवे॑। वेपे॑ते॒ इति॑। भि॒यसा॑। म॒ही इति॑। यत्। इ॒न्द्र॒। व॒ज्रि॒न्। ओज॑सा। वृ॒त्रम्। म॒रुत्वा॑न्। अव॑धीः। अर्च॑न्। अनु॑। स्व॒ऽराज्य॑म्॥ ११॥

महीमहत्यौ इमेद्यावापृथिव्यौअपि हेइन्द्र तवमन्यवेत्वदीयकोपात् भियसाभीत्यावेपेते कम्पेते हेवज्रिन्वज्रवन्निन्द्र मरुत्वान्मरुद्भिर्युक्तस्त्वं ओजसाबलेनयद्यदावृत्रमवधीः तदानीं

द्यावापृथिव्यावपिभयेनअकम्पिषातामित्यर्थः ॥ वेपेते टुवेपृकम्पने । भियसा ञिभीभये औ-णादिकःकसिप्रत्ययः ॥ ११ ॥

११. वज्रधारी इन्द्र ! तुम्हारे डर के मारे यह आकाश और पृथिवी कम्पित हुए थे; क्योंकि तुमने मरुतों से मिलकर वृत्र का वध किया तथा अपना प्रभुत्व प्रकट किया था।

नवेपसानतन्यतेन्द्रंवृत्रोविबीभयत् ।
अभ्येनंवज्रआयसःसहस्रभृष्टिरायतार्चन्ननुस्वराज्यम् ॥ १२ ॥

न। वेपसा। न। तन्यता। इन्द्रम्। वृत्रः। वि। बीभयत्। अभि। एनम्। वज्रः। आयसः। सहस्रऽभृष्टिः। आयत। अर्चन्। अनु। स्वऽराज्यम् ॥ १२ ॥

वृत्रःइन्द्रंवेपसास्वकीयेनवेपनेनकम्पनेन नविबीभयत् भीतंनाकरोत् तथातन्यतास्वकी-येनघोरेणगर्जनशब्देननविबीभयत् अपिचेन्द्रेणविसृष्टआयसः अयोमयःसहस्रभृष्टिः अनेका-भिर्धाराभिर्युक्तोवज्रः एनंवृत्रंअभ्यायत हन्तुमाभिमुख्येनागच्छत् अन्यत्पूर्ववत् ॥ तन्यता स्तन-शब्दे ऋतन्यञ्जीत्यादिनावनोतेर्विधीयमानोयतुच्बहुलवचनादस्मादपिभवति अतएवसलोप-श्च सुपांसुलुगितितृतीयायाडादेशः उदात्तनिवृत्तिस्वरेणतस्योदात्तत्वम् । बीभयत् ञिभीभये हेतुमतिणिच् अत्रवेपनस्तन्यतुभ्यांभयं नहेतोःवृत्रादितिहेतुभयाभावाद्भिभेतेर्हेतुभयइत्यात्वाभा-वः ण्यन्ताल्लुङिचङ्युश्ङादि । आयत अयपयगतौ भौवादिरात्मनेपदी ॥ १२ ॥

१२. अपने कम्पन या गर्जन से वृत्र इन्द्र को नहीं डरा सका। इन्द्र के लौहमय और सहस्रधारायुक्त वज्र ने वृत्र को आक्रान्त किया और इन्द्र ने अपना प्रभुत्व प्रकट किया।

यद्वृत्रंतववचाशनिंवज्रेणसमयोधयः ।
अहिमिन्द्रजिघांसतोदिविवेबद्धधेशवोर्चन्ननुस्वराज्यम् ॥ १३ ॥

यत्। वृत्रम्। तव। च। अशनिम्। वज्रेण। समऽअयोधयः। अहिम्। इन्द्र। जिघांसतः। दिवि। ते। बद्धधे। शवः। अर्चन्। अनु। स्वऽराज्यम् ॥ १३॥

हेइन्द्र यद्यदावृत्रंतवहननार्थंतेनसृष्टामशनिंवज्रंवज्रेणसमयोधयः सम्यक्प्राहार्षीः तदा-नीमहिमागत्यहन्तारंवृत्रंजिघांसतोहन्तुमिच्छतस्तेतवशवोबलंदिविबद्बधेबद्धमनुस्यूतं व्याप्तमा-

सीव् शिष्टंपूर्ववत्॥ जिघांसतः हन्तेरिच्छार्थेसनि अज्झनगमांसनीत्युपधादीर्घत्वम्। बद्धधे बधबन्धने कर्मणिलिटिव्यत्ययेनहलादिशेषाभावः॥ १३॥

१३. इन्द्र! जिस समय तुमने वृत्र पर प्रहार किया था, उस समय, तुम्हारे अहि के वध के लिए, कृतसंकल्प होने पर तुम्हारा बल आकाश में व्याप्त हुआ था। तुमने अपना प्रभुत्व प्रकट किया था।

अभिष्टनेतेअद्रिवोयत्स्थाजगच्चरेजते।
त्वष्टाचित्तवमन्यवइन्द्रवेविज्यतेभियार्चन्ननुस्वराज्यम्॥ १४॥

अभिऽस्तने। ते। अद्रिऽवः। यत्। स्थाः। जगत्। च। रेजते। त्वष्टा। चित्। तव। मन्यवे। इन्द्र। वेविज्यते। भिया। अर्चन्। अनु। स्वऽराज्यम्॥ १४॥

हेअद्रिवोवज्रिन्निन्द्र तेतव अभिष्टनेसिंहनादेसतिस्थाः स्थावरंजगत् जंगमंचयदस्तितदुभयंरेजतेकम्पते त्वष्टाचित् वज्रनिर्मातात्वष्टाचतवमन्यवेत्वदीयायकोपायभियाभीत्यावेविज्यते भृशंकम्पते अन्यत्समानम्॥ स्थाः तिष्ठतेःक्विप्चेतिक्विप्। वेविज्यते ओविजीभयचलनयोः अस्मात्क्रियासमभिहारेयङ् सन्यङोरितिद्विर्भावः अदुपदेशाल्लसार्वधातुकानुदात्तत्वेयङएवस्वरः शिष्यते। इन्द्रेत्यस्यपादादौवर्तमानस्यामन्त्रितंपूर्वमविद्यमानवदित्यविद्यमानवत्त्वेसति अस्यपादादित्वादपादादावितिपर्युदासान्निघाताभावः॥ १४॥

१४. वज्रधारी इन्द्र! तुम्हारे गर्जन करने पर स्थावर और जंगम कांप जाते हैं। वज्र-निर्माता त्वष्टा भी तुम्हारे कोप-भय से कम्पित हो जाते हैं। तुमने अपना प्रभुत्व प्रकट किया है।

नहिनुयादधीमसीन्द्रंकोवीर्यापरः।
तस्मिन्नृम्णमुतक्रतुंदेवाओजांसिसंदधुरर्चन्ननुस्वराज्यम्॥१५॥

नहि। नु। यात्। अधिऽइमसि। इन्द्रम्। कः। वीर्या। परः। तस्मिन्। नृम्णम्। उत। क्रतुम्। देवाः। ओजांसि। सम्। दधुः। अर्चन्। अनु। स्वऽराज्यम्॥ १५॥

यावयान्तंसर्वत्रव्याप्यवर्तमानमिन्द्रंनहिन्वधीमसि वयंनखलुगच्छामः यतोवयमल्पाः परइत्येतत्सकारान्तमव्ययंवैदूर्यमाचष्टे परोदिवापरएनेतियथापरः परस्तात् अतिदूरेमनुष्यैः अन-

वगाह्येस्थानेवीर्यावीर्येणसामर्थ्येनवर्तमानमिन्द्रंकोमनुष्योजानीयात् नकोपीत्यर्थः कस्मादिति चेदन्नाह तस्मिन्निति यस्मात् तस्मिन्निन्द्र देवाः नृम्णंधनं उत अपिच क्रतुंवीर्यंकर्म ओजांसिबलानिचसन्दधुः स्थापयाञ्चक्रुः तस्मादित्यर्थः ॥ यात् याप्रापणे अस्माल्लटःशतृ सुपांसुलुगितिद्वितीयायालुक् । अधीमसि इण्गतौ इदन्तोमसिः । वीर्या सुपांसुलुगितितृतीयायाआकारः ॥ १५ ॥

१५. सर्व-व्यापक इन्द्र को हम नहीं जान सकते। अत्यन्त दूर में अवस्थित इन्द्र को अपने सामर्थ्य से कौन जान सकता है? इन्द्र में देवों ने धन, वीर्य और बल स्थापित किया था। इन्द्र ने अपना प्रभुत्व प्रकट किया था।

यामथर्वामनुष्पितादध्यङ्धियमत्नत ।
तस्मिन्ब्रह्माणिपूर्वथेन्द्रउक्थासमग्मतार्चन्ननुस्वराज्यम् ॥ १६ ॥

याम् । अथर्वा । मनुः । पिता । दध्यङ् । धियम् । अत्नत । तस्मिन् । ब्रह्माणि । पूर्वऽथा । इन्द्रे । उक्था । सम् । अग्मत । अर्चन् । अनु । स्वऽराज्यम् ॥ १६ ॥ ३१ ॥

अथर्वाएतत्संज्ञकऋषिः पितासर्वासांप्रजानांपितृभूतोमनुश्चदध्यङ् अथर्वणःपुत्रएतत्संज्ञकऋषिश्चयांधियमत्नत यत्कर्मातन्वत अकुर्वन् तस्मिन्कर्मणियानिब्रह्माणिहविर्लक्षणान्यन्नानि उक्था शस्त्ररूपाणिस्तोत्राणिचयानिसन्ति तानिसर्वाणितस्मिन्निन्द्रेसमग्मतसमगच्छन्त तत्रदृष्टान्तः—पूर्वथा पूर्वेषामन्येषांवसिष्ठादीनांयज्ञेषुयथाहवींषिस्तोत्राणिचइन्द्रेणसङ्गच्छन्ते तद्वत्ऽयइन्द्रः स्वराज्यंस्वस्यराजत्वं अन्वर्चन् अनुपूजयन् वृत्रवधादिरूपेणकर्मणास्वकीयमधिपतित्वंप्रकटयन्नित्यर्थः॥ अत्नत तनुविस्तारे बहुलंछन्दसीतिविकरणस्यलुक् तनिपत्योश्छन्दसीत्युपधालोपः। पूर्वथा प्रत्नपूर्वविश्वेमात्थाल्छन्दसीतिइवार्थेपूर्वशब्दात्थाल्प्रत्ययः लित्स्वरेणप्रत्ययात्पूर्वस्योदात्तत्वम्। उक्था शेश्छन्दसिबहुलमितिशेर्लोपः। समग्मत समोगम्यृच्छीत्यात्मनेपदम् लुङि मन्त्रेघसेतिच्लेर्लुक् गमहनेत्यादिनोपधालोपः ॥ १६ ॥

१६. अथर्वा नामक ऋषि, समस्त प्रजा के पितृ-भूत मनु और अथर्वा के पुत्र दध्यङ ऋषि ने जितने यज्ञ किये, सबमें प्रयुक्त हव्य, अन्न और स्तोत्र, प्राचीन यज्ञों की तरह, इन्द्र को ही प्राप्त हुए थे।

॥ इतिप्रथमस्यपञ्चमेएकत्रिंशोवर्गः ॥ ३१ ॥

वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन्। पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणाचार्येणविरचितेमाधवीयेवेदार्थप्रकाशेऋक्संहिताभाष्येप्रथमाष्टकेपञ्चमोध्यायःसमाप्तः ॥५॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् । निर्ममे तमहं वन्दे विद्यातीर्थं महेश्वरम् ॥ १ ॥

दाशतय्या पञ्चमोऽयमध्यायो व्याकृतः पुरा । धीमता सायणार्येण षष्ठोऽध्यायोऽथ वर्ण्यते ॥ १ ॥

प्रथममण्डले त्रयोदशानुवाके सप्त सूक्तानि व्याकृतानि इन्द्रो मदायेति नवर्चमष्टमं सूक्तम् अत्रानुक्रम्यते-इन्द्रो नवेति ऋषिश्चान्यस्मादृषेरिति परिभाषया रहूगणपुत्रस्य गोतमस्यानुवृत्तेरस्य सूक्तस्य स ऋषिः पूर्वसूक्ते पाङ्क्तं हीत्युक्तत्वात् तुह्यादिपरिभाषया इदमुत्तरं च सूक्तं पाङ्क्तं अनादेशपरिभाषयेन्द्रो देवता पृष्ठ्यस्य पञ्चमेऽहनि निष्केवल्यशस्त्रे इदं सूक्तम् सूत्रितं च-प्रेदं ब्रह्मेन्द्रो मदाय सत्रा मदास इति निष्केवल्यमिति आरंभणीये चातुर्विंशिकेऽहनि माध्यन्दिने सवने ब्राह्मणाच्छंसिनः शस्त्रे इन्द्रो मदायेति आद्यस्तृचो वैकल्पिकस्तोत्रियः होत्रकाणामिति खण्डे सूत्रितम्—इन्द्रो मदाय वावृधे मदेमदे हि नो ददिरिति । महाव्रते निष्केवल्ये उत्तरपक्षे इन्द्रो मदायेत्येका शंसनीया तथैव पञ्चमारण्यके सूत्रितम्-इन्द्रो मदाय वावृध इति पङ्क्तिः सूददोहा इति ।

तामेतां सूक्ते प्रथमामृचमाह—

ओम् इन्द्रो॒ मदा॑य वावृधे॒ शव॑से वृत्र॒हा नृभि॑ः ।
तमिन्म॒हत्स्वा॒जिषू॒तेमर्भे॑ हवामहे॒ स वाजे॑षु॒ प्र नो॑ऽविषत् ॥ १ ॥

इन्द्र॑ः । मदा॑य । व॒वृ॒धे॒ । शव॑से । वृ॒त्र॒ऽहा । नृऽभि॑ः । तम् । इत् ।
म॒हत्ऽसु॑ । आ॒जिषु॑ । उ॒त । ई॒म् । अर्भे॑ । ह॒वा॒म॒हे॒ । सः । वाजे॑षु ।
प्र । न॒ः । अ॒वि॒ष॒त् ॥ १ ॥

वृत्रहा वृत्रस्यावरकस्य वृष्टिनिरोधकस्य मेघस्यासुरस्य वा हन्ता यद्वा आवरकाणां शत्रूणां हन्ता इन्द्रः मदाय हर्षार्थं शवसे बलनामैतत् बलार्थं च नृभिर्यज्ञस्य नेतृभिर्ऋत्विग्भिः ववृधे स्तोत्रशस्त्ररूपाभिः स्तुतिभिः प्रवर्धितो बभूव स्तुत्या हि देवता आप्तबला सती प्रवर्धते तमित् तमेवेन्द्रं महत्सु प्रभूतेषु आजिषु संग्रामेषु हवामहे अस्माकं रक्षणाय आह्वयामहे उत अपि च ईम् एनम् अर्भेऽल्पे संग्रामे हवामहे अस्माभिराहूतः स चेन्द्रो वाजेषु सङ्ग्रामेषु नोऽस्मान् प्राविषत् प्रावतु प्रकर्षेण रक्षतु ॥ ववृधे वृधेः कर्मणि-

लिट् संहितायामभ्यासस्य अन्येषामपिदृश्यतइतिदीर्घत्वम् तुजादित्वेहितुतुजानइ विवत्पदकाले दीर्घःश्रूयते । नृभिः सावेकाचइतिप्राप्तस्यविभक्त्युदात्तत्वस्यनृचान्यतरस्यामितिप्रतिषेधः । हवामहे ह्वयतेर्लटिह्वइत्यनुवृत्तौबहुलंछन्दसीतिसंप्रसारणम् शपिगुणावादेशौ । अविषत् अवरक्षणे लेट्यडागमः इतश्चलोपइतीकारलोपः सिब्बहुलंलेटीतिसिप् तस्यार्धधातुकत्वाद्वलादिलक्षणइट् ॥१॥

१. वृत्र-हन्ता इन्द्र मनुष्यों की स्तुति-द्वारा बल और हर्ष से प्रवर्द्धित हुए थे। उन्हीं इन्द्र को हम महान् और क्षुद्र संग्रामों में बुलाते हैं। इन्द्र हमारी संग्राम में रक्षा करें।

असि॒हि वी॑र॒ सेन्यो॒ऽसि॒ भूरि॑ पराद॒दिः ।
असि॑ द॒भ्रस्य॑ चिद्वृ॒धो यज॑मानाय शिक्षसि सु॒न्व॒ते भूरि॑ ते॒ वसु॑ ॥ २॥

असि॑ । हि । वी॒र॒ । सेन्यः॑ । असि॑ । भूरि॑ । प॒रा॒ऽद॒दिः । असि॑ । द॒भ्रस्य॑ । चि॒त् । वृ॒धः । यज॑मानाय । शि॒क्ष॒सि॒ । सु॒न्व॒ते । भूरि॑ । ते॒ । वसु॑ ॥ २ ॥

हेवीर शत्रुक्षेपणकुशलेन्द्र त्वंसेन्योऽसि सेनार्होभवसि त्वमेकोऽपिसेनासदृशोभवसीत्यर्थः हियस्मादेवंतस्माद्भूरिप्रभूतंशत्रूणांधनंपराददिः परादाताशत्रूणांपराङ्मुखंयथाभवतितथाआदातासिभवसि दभ्रस्यचित् अल्पनामैतत् अल्पस्यापितवस्तोतुःवृधोवर्धयितासि तथायजमानाययागंकुर्वतेसुन्वतेसोमाभिषवंकुर्वतेपुरुषायशिक्षसि अपेक्षितंधनंददासि शिक्षतिर्दानकर्मा यस्मात्तेतववसुधनंभूरिबहुलंअक्षयंविद्यते तस्माद्ददासीतिभावः ॥ पराददिः डुदाञ्दाने आदृगमहनजनइतिकिप्रत्ययः लिड्वद्भावाद्द्विर्वचनेह्रस्वत्वम् आतोलोपइटिचेत्याकारलोपः । वृधः वृधेरन्तर्भावितण्यर्थात् इगुपधलक्षणःकः । सुन्वते शतुरनुमइतिविभक्तेरुदात्तत्वम् ॥ २ ॥

२. वीर इन्द्र! एकाकी होने पर भी तुम सेना-सदृश हो। तुम प्रभूत शत्रुओं का धन दान कर देते हो। तुम क्षुद्र स्तोता को भी वर्द्धित करते हो। सोमरसदाता यजमान को तुम धन प्रदान करते हो; क्योंकि तुम्हारे पास अक्षय धन है।

यदु॒दीर॑त आ॒जयो॑ धृ॒ष्णवे॑ धीयते॒ धना॑ ।
यु॒क्ष्वा म॑द॒च्युता॒ हरी॒ कं हनः॒ कं वसौ॑ दधो॒ऽस्माँ इ॑न्द्र॒ वसौ॑ दधः ॥३॥

यत् । उ॒त्ऽईर॑ते । आ॒जयः॑ । धृ॒ष्णवे॑ । धी॒य॒ते॒ । धना॑ । यु॒क्ष्व । म॒द॒ऽच्युता॑ । हरी॒ इति॑ । कम् । हनः॑ । कम् । वसौ॑ । द॒धः॒ । अ॒स्मान् । इ॒न्द्र॒ । वसौ॑ । द॒धः॒ ॥ ३ ॥

---

१ नि० १.७.।

अत्रेदमाख्यानम्—रहूगणपुत्रोगोतमःकुरुसृञ्जयानांराज्ञांपुरोहितआसीत् तेषांराज्ञांपरैःसहयुद्धेसति सक्तपिरनेनसूक्तेनेन्द्रंस्तुत्वास्वकीयानांजयंमार्थयामासेति । तस्यचतत्पुरोहितत्वंवाजसनेयिभिराम्नातम्—गोतमोहवैराहूगणउभयेषांकुरुसृञ्जयानांपुरोहितआसीदिति । यद्यदाआजयःसङ्ग्रामाःउदीरतेउद्गच्छन्ति उत्पद्यन्ते तदानींधनाधनंधृष्णवे योधृष्णुः धर्षयिता शत्रूणांजेताभवति तस्मैधीयतेनिधीयते जयतोधनंभवतीत्यर्थः हेइन्द्र त्वंतादृशेषुयुद्धेषु प्रवृत्तेषुमदच्युताशत्रूणांमदस्यगर्वस्यच्यावयितारौहरीत्वदीयावश्वौयुक्ष्वरथेयोजय योजयित्वाच कं कंचिद्राजानंतवपरिचरणमकुर्वन्तं हनः हन्याः कंचनत्वांपरिचरन्तं वसौवसुनिधनेदधःस्थापयसि अतोजयपराजययोस्त्वमेवकारयितासि तस्मात् हेइन्द्र अस्मानस्मदीयान् राज्ञोवसौधने दधःस्थापय ॥ उदीरते ईरगतौ आदादिकः अनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वेधातुस्वरएवशिष्यते यद्वृत्तयोगादनिघातः । धना सुपांसुलुगितिडादेशः । युक्ष्व युजिर्योगे अन्तर्भावितण्यर्थाल्लोटि बहुलंछन्दसीतिविकरणस्यलुक् द्व्यचोतस्तिङइतिसंहितायांदीर्घत्वम् । हनः हन्तेर्लेटिसिप्यडागमः हनश्चदधश्चेतिचार्थमतीतेश्चादिलोपेविभाषेतिमथमायास्तिङ्विभक्तेर्निघातमतिषेधः वसौलिङ्गव्यत्ययः । दधः दधधारणे लेटिव्यत्ययेनपरस्मैपदम् ॥ ३ ॥

३. जिस समय युद्ध होता है, उस समय शत्रुओं का विजेता ही धन प्राप्त करता है। इन्द्र! रथ में शत्रुओं के गर्वनाशकारी अश्व संयोजित करो। किसी का नाश करो, किसी को धन दो। इन्द्र! हमें तुम धनशाली करो।

चतुर्थीमृचमाह—

क्रत्वामहाँअनुष्वधंभीमआवावृधेशवः ।
श्रियऋष्वउपाकयोर्निशिप्रीहरिवान्दधेहस्तयोर्वज्रमायसम् ॥४॥

क्रत्वा । महान् । अनुऽस्वधम् । भीमः । आ । ववृधे । शवः । श्रिये । ऋष्वः । उपाकयोः । नि । शिप्री । हरिऽवान् । दधे । हस्तयोः । वज्रम् । आयसम् ॥ ४ ॥

क्रत्वाकर्मणाप्रज्ञयावा महान्सर्वाधिकः भीमः शत्रूणांभयंकरः इन्द्रः अनुष्वधं स्वधेत्यन्ननाम स्वधायां विभक्त्यर्थेऽव्ययीभावः सोमलक्षणस्यान्नस्यपानेसतीत्यर्थः शवः आत्मीयंबलं आववृधे आभिमुख्येनमावर्धयत् तदनन्तरं ऋष्वोदर्शनीयः शिप्री शिप्रेहनूनासिकेवा तद्युक्तः हरिवान् हरिनामकाश्वोपेतइन्द्र उपाकयोः अन्तिकनामैतत् समीपवर्तिनोर्हस्तयोर्बाह्वोः आयसं अयोमयं वज्रं श्रिये संपदर्थंनिदधेनिदधाति स्थापयति सोमपानेनहृष्टःप्रबलइन्द्रः शत्रूणांहन-

नायहस्तेवज्रंगृह्णातीतितात्पर्यार्थः ॥ ऋत्वा जसादिषुछन्दसिवावचनमितीनाभावस्यविकल्पि-
तत्वादभावः। आयसं तस्यविकारइत्यण्प्रत्ययः ॥ ४ ॥

४. यज्ञ-द्वारा इन्द्र विशाल और भयंकर हैं और सोम-पान-द्वारा इन्द्र ने अपना बल बढ़ाया है। इन्द्र दर्शनीय नासिका से युक्त तथा हरि नाम के अश्वों से सम्पन्न हैं। इन्द्र ने हमारी सम्पद् के लिए बलिष्ठ हाथों में लौहमय वज्र धारण किया है।

आपप्रौपार्थिवंरजोबद्बधेरोचनादिवि।
नत्वावाँइन्द्रकश्चननजातोनजनिष्यतेतिविश्वंववक्षिथ ॥५॥१॥

आ। पप्रौ। पार्थिवम्। रजः। बद्बधे। रोचना। दिवि। न।
त्वाऽवान्। इन्द्र। कः। चन। न। जातः। न। जनिष्यते। अति।
विश्वम्। ववक्षिथ ॥ ५ ॥ १ ॥

इन्द्रः स्वतेजसापार्थिवं पृथिव्याःसंबन्धिवस्तुजातं रजोऽन्तरिक्षलोकंचआपप्रौआपूरयति तथादिविद्युलोकेरोचनारोचमानानिदीप्तानिनक्षत्राणिबद्बधेबबंध स्थापितवान् अतोहेइन्द्र त्वावान् त्वत्सदृशःकश्चननजातोनोत्पन्नोऽस्ति नचजनिष्यतेउत्पत्स्यमानोऽपिनास्ति तादृशस्त्वंविश्वंसर्वंरक्षितव्यंजगत् अतिववक्षिथअतिशयेनवोढुमिच्छसि सर्वस्यजगतोनिर्वाहकोभवसीत्यर्थः ॥ पप्रौ प्रापूरणे लिटि आतऔणलइत्यौकारादेशः। पार्थिवं पृथिव्याञाञावित्यञ्प्रत्ययः ञित्त्वादाद्युदात्तत्वम्। रजः रजन्त्यस्मिन्गन्धर्वादयइतिरजोऽन्तरिक्षं रञ्जरागे असुनिरजकरजनरजस्सूपसंख्यानमितिनलोपः। बद्बधे बधबन्धने लिटिव्यत्ययेनहलादिशेषाभावः एकहल्मध्यगतत्वाभावादेत्वाभ्यासलोपावपिनस्तः पादादित्वान्निघाताभावः। त्वावान् वतुप्प्रकरणे युष्मदस्मद्भ्यांछन्दसिसादृश्यउपसंख्यानमितिवतुप् आसर्वनाम्नइत्यात्वम्। ववक्षिथ वहप्रापणे अस्मादिच्छासनि सन्यतइतीत्वस्यसर्वेविधयश्छन्दसिविकल्प्यन्तइत्यभावः सन्नन्ताल्लिटि अमन्त्रेइतिप्रतिषेधादाम्प्रत्ययाभावः ॥ ५ ॥

५. अपने तेज से इन्द्र ने पृथिवी और अन्तरिक्ष को परिपूर्ण किया है। द्युलोक में चमकते नक्षत्र स्थापित किये हैं। इन्द्रदेव तुम्हारे समान न कोई हुआ, न होगा। तुम विशेष रूप से सारे जगत् को धारण करो।

षष्ठीमृचमाह—

योअर्यौमर्तभोजनंपराददातिदाशुषे।
इन्द्रोअस्मभ्यंशिक्षतुविभजाभूरितेवसुभक्षीयतवराधसः ॥६॥

यः । अर्यः । मर्तऽभोजनम् । पराऽददाति । दाशुषे । इन्द्रः ।
अस्मभ्यम् । शिक्षतु । वि । भज । भूरि । ते । वसु । भक्षीय ।
तव । राधसः ॥ ६ ॥

अर्यःस्वामीपालयितायइन्द्रः मर्तभोजनंसर्वैर्मनुष्यैरुपभोज्यमन्नंदाशुषेचरुपुरोडाशादीनि दत्तवतेयजमानायपराददातिप्रयच्छति सइन्द्रोऽस्मभ्यंशिक्षतु तादृशमन्नंददातु अवशिष्टपादद्वयंमत्यक्षकृतं हेइन्द्रअस्मभ्यंदातुंधनंविभज विभक्तंकुरु यतस्तेतववसुधनंभूरिबहुलमसंख्यातं अतस्तवराधसोधनस्यएकदेशंभक्षीयभजेय प्राप्नुयाम् ॥ पराददाति अभ्यस्तानामादिरित्याद्युदात्तत्वम् तिङ्ङिचोदात्तवतीतिंगतेरनुदात्तत्वम् । दाशुषे दाश्ृदाने दाश्वान्साह्वानितिक्वसुप्रत्ययान्तोनिपात्यते चतुर्थ्येकवचनेवसोःसंप्रसारणमितिसंप्रसारणम् शासिवसिघसीनांचेतिषत्वम् । भक्षीय भजसेवायां प्रार्थनायांलिङि तस्यछन्दस्युभयथेत्यार्धधातुकत्वाच्छवभावः सलोपाभावश्च एकाचइतीट्प्रतिषेधः आगमानुदात्तत्वेप्रत्ययस्वरएवशिष्यते पूर्वपदस्यासमानवाक्यगतत्वान्निघाताभावः समानवाक्येनिघातयुष्मदस्मदादेशावक्तव्याइतिवचनात् ॥ ६ ॥

६. जो पालक इन्द्र यजमान को मनुष्योपभोग्य अन्न प्रदान करते हैं, वे हमें वैसा ही अन्न दें। इन्द्र! तुम्हारे पास असंख्य धन है; इसलिए हमारे लिए धन का विभाग कर दो, ताकि हम उसका एक अंश प्राप्त करें।

चातुर्विंशिकेऽहनिमाध्यन्दिनसवनेब्राह्मणाच्छंसिनोमदेमदेहिनोददिरितिवैकल्पिकोनुरूपस्तृचः होत्रकाणामितिखण्डेसूत्रितम्—मदेमदेहिनोददिः सुरूपकृत्नुमूतयइति ।

तृचेप्रथमांसूक्तेसप्तमीमृचमाह—

मदेमदे॒हिनो॑द॒दिर्यू॒था गवा॑मृजु॒क्रतुः॑ ।
सं॒गृ॑भा॒य पु॒रू श॒तोभ॑याह॒स्त्या वसु॑ शिशी॒हि रा॒य आ भ॑र ॥७॥

मदेऽमदे । हि । नः । द॒दिः । यूथा । गवा॑म् । ऋ॒जुऽक्र॑तुः । सम् ।
गृ॒भा॒य । पु॒रु । श॒ता । उ॒भ॒या॒ह॒स्त्या । वसु॑ । शि॒शी॒हि । रा॒यः ।
आ । भ॒र ॥ ७ ॥

मदेमदेसोमपानेनहर्षेहर्षेसति ऋजुक्रतुःऋजुकर्मासइन्द्रोनोऽस्मभ्यंगवांयूथानिददिःहि गोयूथानांदाताखलु हेइन्द्र सत्वंपुरु पुरूणिप्रभूतानि शताशतसंख्याकानि अपरिमितानीत्यर्थः वसुवसूनि धनानिउभयाहस्त्या उभाभ्यांहस्ताभ्यां संगृभायअस्मभ्यंदातुं सम्यक् गृहाण शिशीहि अस्मांस्तीक्ष्णीकुरु निशितबुद्धियुक्तान्कुर्वित्यर्थः रायोधनानिहस्तयोःस्थितानिआभर

आहरमयच्छ ॥ ददिः डुदाञ्दाने आदृगमहनजनइतिकिप्रत्ययः । यूथा शेश्छन्दसिबहुलमितिशेर्लोपः। गवां सावेकाचइतिप्राप्तस्यनगोश्वन्त्सावर्णेतिप्रतिषेधः। गृभाय ग्रहउपादाने लोटिहौ छन्दसिशायजपीतिश्नाप्रत्ययस्यशायजादेशः हग्रहोर्भइतिभत्वम् । उभयाहस्त्या उभयहस्तशब्दादुत्तरस्यतृतीयाद्विवचनस्यसुपांसुलुगितिडाचादेशः अन्येषामपिदृश्यतइतिपूर्वपदस्यदीर्घत्वम् समासान्तोदात्तत्वेउदात्तनिवृत्तिस्वरेणविभक्तेरुदात्तत्वम् । वसु सुपांसुलुगितिविभक्तेर्लुक् । शिशीहि शोतनूकरणे बहुलंछन्दसीतिविकरणस्यश्लुः आदेचइत्यात्वं इदित्यनुवृत्तौ बहुलंछन्दसीत्यभ्यासस्येत्वं ईहल्यघोरितिधातोरीत्वं पादादित्वान्निघाताभावः । रायः ऊडिदमितिविभक्तेरुदात्तत्वम् ॥ ७ ॥

७. सोम पान कर हृष्ट होने पर सरलकर्मा इन्द्र हमें गो-समूह देते हैं। इन्द्र! हमें देने के लिए बहु-शत-संख्यक या अपरिमेय अन्न अपने दोनों हाथों में ग्रहण करो। हमें तीक्ष्ण बुद्धि से युक्त और धन प्रदान करो।

मादयस्वसुतेसचाशवसेशूरराधसे।
विद्माहित्वापुरूवसुमुपकामान्त्ससृज्महेथानोविताभव ॥८॥

मादयस्व । सुते । सचा । शवसे । शूर । राधसे । विद्म । हि । त्वा । पुरुऽवसुम् । उप । कामान् । ससृज्महे । अथ । नः । अविता । भव ॥ ८ ॥

हेशूरशौर्यवन्निन्द्र सुते सोमेअभिषुतेसतिआगत्य सचास्माकंसखासन्मादयस्व तेनसोमेनतृप्तोभव किमर्थं शवसेबलार्थंराधसेस्माकंधनार्थंच त्वात्वांपुरूवसुंबहुधनंविद्माहिवयं जानीमःखलु अतोऽस्मदीयान्कामान् मात्रागवावत्सानिव त्वयाउपससृज्महेहि त्वया खल्वेकीकुर्मः अथानन्तरं नोऽस्माकं अविताअभिलषितफलप्रदानेनरक्षिताभव ॥ मादयस्व मदतृप्तियोगे चुरादिरात्मनेपदी अदुपदेशाल्लसार्वधातुकानुदात्तत्वेणिचएवस्वरःशिष्यते । ससृज्महे सृजविसर्गे बहुलंछन्दसीतिविकरणस्यश्लुः प्रत्ययाद्युदात्तत्वम् अत्रापिशब्दानुषङ्गात् छन्दस्यनेकमपिसाकांक्षमितिनिघातप्रतिषेधः॥ ८ ॥

८. शूर! हमारे बल और धन के लिए हमारे साथ सोम-रस पान करके तृप्त बनो। तुम्हें हम बहु-धन-शाली जानते और अपनी अभिलाषा ज्ञात कराते हैं। तुम हमारी रक्षा करो।

एतेतइन्द्रजन्तवोविश्वंपुष्यन्तिवार्यम्।
अन्तर्हिख्योजनानामर्योवेदोअदाशुषांतेषांनोवेदआभर ॥९॥ २॥

एते । ते । इन्द्र । जन्तवः । विश्वम् । पुष्यन्ति । वार्यम् । अन्तः । हि । ख्यः । जनानाम् । अर्यः । वेदः । अदाशुषाम् । तेषाम् । नः । वेदः । आ । भर ॥ ९ ॥ २ ॥

हेइन्द्र तेतवस्वभूताएतेजन्तवोयजमानलक्षणाजनाः विश्वंसर्ववार्यं सर्वैःसंभजनीयंहविः पुष्यन्तिवर्धयन्ति अदाशुषां हविषामदातॄणांजनानांअन्तर्मध्येविद्यमानंवेदोधनं अर्यःसर्वेषांस्वामीत्वंख्योहि पश्यसिहि जानासीत्यर्थः तेषामयजमानानांवेदोधनंनोस्मभ्यंआभर आहरमयच्छेतियावत् अयजमानेषुविद्यमानंधनंयागानुपयुक्तत्वाद्व्यर्थमेवभवेत् अतस्तस्यधनस्य सार्थकत्वायतदीयंधनमपहृत्य यजमानेभ्यःप्रयच्छेतितात्पर्यार्थः ॥ ख्यः ख्याप्रकथने अयंदर्शनार्थोपि वर्तमानेछान्दसोलुङ् अस्यतिवक्तीत्यादिनाच्लेरङादेशः आतोलोपइटिचेत्याकारलोपः बहुलंछन्दस्यमाङ्योगेऽपीत्यडभावः हिचेतिनिघातप्रतिषेधः ॥ ९ ॥

९. इन्द्र! ये तुम्हारे ही सब मनुष्य सबके ग्रहण योग्य में हव्य वर्द्धित करते हैं। जो लोग हव्य नहीं प्रदान करते, हे अखिलपति! हे इन्द्र! उनका धन तुम जानते हो। उनका धन हमें दो।

॥ इतिप्रथमस्यषष्ठेद्वितीयोवर्गः ॥ २ ॥

उपोष्वितिषळृचंनवमंसूक्तम् गोतमस्यार्षमैन्द्रं अन्त्याजगती आद्याःपङ्क्तयः अनुक्रान्तंच—उपोषुषड्जगत्यन्तमिति । सूक्तविनियोगोलैङ्गिकः षोडशिशस्त्रे आद्यासुसंदृशमित्यादिकेद्वेऋचौ चविनियुज्यन्ते अथषोडशीतिखण्डेसूत्रितम्—उपोषुशृणुहीगिरःसुसंदृशंत्वावयंमघवन्नित्येकाद्वेचपङ्क्तीइति ।

तत्रप्रथमामृचमाह—

उपोषुशृणुहीगिरोमघवन्मातथाइव ।
यदानःसूनृतावतःकरआदर्थयासइद्योजान्विन्द्रतेहरी ॥१॥

उपोऽइति । सु । शृणुहि । गिरः । मघऽवन् । मा । अतथाःऽइव । यदा । नः । सूनृताऽवतः । करः । आत् । अर्थयासे । इत् । योज । नु । इन्द्र । ते । हरी इति ॥ १ ॥

हेमघवन्धनवन्निन्द्र गिरःअस्मदीयाःस्तुतीः उपोउपैवसुशृणुहि उपगत्यसम्यक्शृणु अतथाइवपूर्वंयथाविधस्त्वंतद्विपरीतोमाभूः अस्मासुपूर्वंयथाअनुग्रहबुद्धियुक्तः तथाविधएवभवेत्यर्थः अपिचनोऽस्मान्सूनृतावतः प्रियसत्यात्मिकावाक्सूनृता तयास्तुतिरूपयावाचायुक्तान्

यदाकरःकरोषि आवअनन्तरंत्वमपिअर्थयासेइव अर्थयसएव याचयसएवनतदास्से अस्माभिः प्रयुक्तास्तुतीः त्वमपिस्वीकरोषीत्यर्थः अतोहेइन्द्र तेहरीत्वदीयावश्वौनुक्षिप्रंयोजरथेयोजय ॥ श्रृणुहि उतश्चप्रत्ययाच्छन्दसिवावचनमितिवचनात्उतश्चप्रत्ययादितिहेर्लुगभावः । अतथाइव तथेवाचरतितथाति सर्वप्रातिपदिकेभ्यइत्येकइतिक्विप् तथातेरप्रत्ययः नतथाइवअतथाइव अव्ययपूर्वपदप्रकृतिस्वरत्वम् । करः डुकृञ्करणे लुङि कृमृदृरुहिभ्यश्छन्दसीतिच्लेरङादेशः ननुअङः सतिशिष्टत्वात्तित्स्वरेणान्तोदात्तेनभवितव्यम् तर्हिलङिव्यत्ययेनशप् ननुकृञ्करणेइतिभ्वादौ पठ्यते अतोव्यत्ययःकस्मात्क्रियतेइतिचेत् मैवम् यस्मादस्यधातोस्तत्रपाठःअनार्षः तथाहिकः करत्करतीत्यत्रयदाहतुर्न्यासकारहरदत्तौव्यत्ययेनशबिति तस्मादस्यधातोर्भ्वादौपाठोनास्तीति गम्यते किंच यद्ययंपठ्येत करदित्येवमादिरूपसिद्ध्यर्थंकृमृदृरुहिभ्यश्छन्दसीतिकरोतेरङ्विधानमनर्थकंस्यात् अस्माल्लङिशपिअस्यरूपसिद्धेः लुङ्लङोरर्थभेदात् लुङ्येतद्रूपसिद्ध्येकर्तव्यमङ्विधानमितिचेत् न छन्दसिलुङ्लङ्लिटइतिलुङादीनामेकत्रविधानेनार्थभेदाभावादिति अनेनप्रकारेणास्माभिर्धातुवृत्तावयंधातुर्निराकृतः अतोव्यत्ययेनेतिसिद्धम् । अर्थयासेअर्थयाच्ञायां चुरादिरात्मनेपदी लेटयाडागमः । योज युजिर्योगे ण्यन्ताल्लोटि छन्दस्युभयथेतिशपआर्धधातुकत्वाण्णेरनिटीतिणिलोपः द्व्यचोतस्तिङइतिसंहितायांदीर्घत्वम् ॥ १ ॥

१. धनशाली इन्द्र! पास आकर हमारी स्तुति सुनो। इस समय तुम पहले से भिन्न-प्रकृति मत होना। तुमने ही हमें प्रिय और सत्य वाक्य से युक्त किया है। उसी वाक्य से हम तुमसे याचना करते हैं। इसलिए अपने दोनों अश्व शीघ्र योजित करो।

द्वितीयामृचमाह—

अक्ष॒न्नमी॑मदन्त॒ह्यव॑प्रि॒या अ॑धूषत ।
अस्तो॑षत॒स्वभा॑नवो॒विप्रा॒नवि॑ष्ठयाम॒तीयोजा॒न्विं॑न्द्र॒ते॒हरी॑ ॥२॥

अक्ष॑न् । अमी॑मदन्त । हि । अव॑ । प्रि॒याः । अ॒धू॒ष॒त । अस्तो॑षत । स्वऽभा॑नवः । विप्राः॑ । नवि॑ष्ठया । म॒ती । योज॑ । नु । इ॒न्द्र॒ । ते॒ । हरी॒ इति॑ ॥ २ ॥

हेइन्द्र त्वयादत्तान्यन्नानिअक्षन् यजमानाभुक्तवन्तः भुक्त्वाचअमीमदन्तहि तृप्ताश्चासन् प्रियाः स्वकीयास्तनूः अवाधूषत अकंपयन् अतिशयिततरसास्वादनेनवक्तुमशक्नुवन्तः शरीराण्यकंपयन् तदनन्तरंस्वभानवः स्वायत्तदीप्तयोविप्राः मेधाविनस्ते नविष्ठयानवितृतमया मतीमत्या स्तुत्या अस्तोषतास्तुवन् अन्यत्पूर्ववद्योज्यम् ॥ अक्षन् अदेर्लुङि लुङ्सनोर्घस्लृइतिघस्लादेशः मन्त्रेघसेत्यादिनाच्लेर्लुक् गमहनेत्यादिनोपधालोपः खरिचेतिचर्त्वं शासिवसिघसीनांचेतिषत्वम् अडागमउदात्तः । अमीमदन्त मदतृप्तियोगे चुरादिरात्मनेपदी लुङिच्लेश्चङिणिलोपोपधाह-

स्वद्विर्भावसन्वद्भावेत्वदीर्घाः। अधूषत धूञ्कंपने लुङिसिचिव्यत्ययेनगुणाभावः यद्वा छन्दस्युभयथेतिसिचःसार्वधातुकत्वेनङित्त्वात् ग्क्ङितिचेतिप्रतिषेधः अथवा धूविधूनने तौदादिकः कुटादिः अस्मात्कर्मणिलुङि गाङ्कुटादिभ्यइतिसिचोङित्त्वाद्गुणाभावः। नविष्ठया णुस्तुतौ करणभूतायाअपिस्तुतेःस्वव्यापारेकर्तृत्वात्तृच् तदन्तात्तुश्छन्दसीतीष्ठन्प्रत्ययः तुरिष्ठेमेयःस्वितितृलोपः। मती सुपांसुलुगितितृतीयायाःपूर्वसवर्णदीर्घत्वम् मन्त्रेवृषेषपचमनविदेतिक्तिनउदात्तत्वम् ॥ २ ॥

२. तुम्हारा दिया हुआ भोजन करके यजमान लोग परितृप्त हुए हैं एवं अतिशय रसास्वादन से अपना प्रिय शरीर कम्पित किया है। दीप्तिमान् मेधावियों ने अभिनव स्तुति-द्वारा तुम्हारी स्तुति की है। इन्द्रदेव! अपने दोनों अश्व शीघ्र योजित करो।

महापितृयज्ञेसुसंदृशमित्येषाआहवनीयोपस्थानेविनियुक्ता सूत्रितंच—आहवनीयंसुसंदृशंत्वेतिपंक्त्येति।

सुसन्दृशंत्वावयंमघवन्वन्दिषीमहि।
प्रनूनंपूर्णवन्धुरस्तुतोयाहिवशाँअनुयोजान्विन्द्रतेहरी ॥३॥

सुऽसन्दृशम्। त्वा। वयम्। मघऽवन्। वन्दिषीमहि। प्र। नूनम्। पूर्णऽवन्धुरः। स्तुतः। याहि। वशान्। अनु। योज। नु। इन्द्र। ते। हरी इति ॥ ३ ॥

हेमघवन्निन्द्र सुसंदृशंसुष्ठुअनुग्रहदृष्ट्यासर्वस्यद्रष्टारंत्वात्वां वयंवन्दिषीमहिस्तवामहिस्तुतिकर्तारोभूयास्मेत्याशास्यते अस्माभिर्वन्दिभिःस्तुतस्त्वं पूर्णवन्धुरःस्तोतृभ्योदेयैर्धनैःपूरितेन रथेनयुक्तःसन् वशान् अनुकामयमानान् अन्यान् यजमानान्प्रति नूनंप्रयाहिअवश्यंप्रतिष्ठस्व योजेत्यादिपूर्ववत्॥ वन्दिषीमहि वदिअभिवादनस्तुत्योः आशीर्लिङ् लिङाशिषीतितस्यार्धधातुकत्वेनलसार्वधातुकस्वराभावेप्रत्ययाद्युदात्तत्वम्। मघवन्नित्यस्यामन्त्रितंपूर्वमविद्यमानवदित्यविद्यमानवत्त्वेसतिपादादित्वान्निघाताभावः ॥ ३ ॥

३. मघवन्! तुम सबको कृपा-पूर्ण दृष्टि से देखते हो। हम तुम्हारी स्तुति करते हैं। स्तुत होकर तथा स्तोताओं-द्वारा देय धन से पूरित रथ-युक्त होकर उन यजमानों के पास जाओ, जो तुम्हारी कामना करते हैं। इन्द्र! अपने दोनों घोड़े रथ में संयुक्त करो।

सघातंवृषणंरथमधितिष्ठातिगोविदम्।
यःपात्रंहारियोजनंपूर्णमिन्द्रचिकेतनियोजान्विन्द्रतेहरी ॥४॥

सः । घ । तम् । वृषणम् । रथम् । अधि । तिष्ठाति । गोऽविदम् । यः । पात्रम् । हारिऽयोजनम् । पूर्णम् । इन्द्र । चिकेतति । योज । नु । इन्द्र । ते । हरी इति ॥ ४ ॥

सघ सखल्विन्द्रः वृषणंकामाभिवर्षकंगोविदंगवांलंभयितारं तंरथंअधितिष्ठातिईदृशंरथं अधितिष्ठतु आरूढोभवतु हेइन्द्र योरथः हारियोजनं एतत्संज्ञकंधानामिश्रितंपूर्णंसोमेनपूर्णंपात्रं चिकेतति ज्ञापयति तंरथंअधितिष्ठेतिपूर्वेणान्वयः अधिष्ठायच त्वदीयावश्वौक्षिप्रंयोजय॥ घ ऋचितुनुघेतिदीर्घः । रथं अधिशीङ्स्थासांकर्मेत्यधिकरणस्यकर्मसंज्ञा । तिष्ठाति तिष्ठतेर्लेट्याडागमः। चिकेतति कितज्ञाने लेट्यडागमः जुहोत्यादित्वाच्छपःश्लुः बहुलंछन्दसीतिवक्तव्यमितिवचनात् नाभ्यस्तस्याचिपितीतिलघूपधगुणप्रतिषेधोनभवति ॥ ४ ॥

४. जो रथ अभीष्ट वस्तु का वर्षण करता है, गाय देता तथा धान्य से मिश्रित (सोमरस से) पूर्ण पात्र देता है, इन्द्र! उसी रथ पर चढ़ो। अपने घोड़े शीघ्र योजित करो।

युक्तस्तेअस्तुदक्षिणउतसव्यःशतक्रतो।
तेनजायामुपप्रियांमन्दानोयाह्यन्धसोयोजान्विन्द्रतेहरी ॥५॥

युक्तः । ते । अस्तु । दक्षिणः । उत । सव्यः । शतक्रतो इति शतऽक्रतो । तेन । जायाम् । उप । प्रियाम् । मन्दानः । याहि । अन्धसः । योज । नु । इन्द्र । ते । हरी इति ॥ ५ ॥

हेशतक्रतोबहुकर्मवन्निन्द्र त्वेत्वदीयेरथेदक्षिणोदक्षिणपार्श्वस्थोऽश्वोयुक्तोऽस्तु उतअपिच सव्यः वामपार्श्वस्थोपियुक्तोऽस्तु तेनरथेन अन्धसः सोमलक्षणस्यान्नस्यपानेनमन्दानोमत्तस्त्वं प्रियांप्रीणयित्रींजायामुपयाहि सायत्रवर्ततेतत्रगच्छेत्यर्थः तदर्थंहेइन्द्र त्वदीयावश्वौरथेक्षिप्रंयोजयअनयोत्तरयाचपीतसोमस्येन्द्रस्यस्वगृहंप्रतिप्रस्थानंप्रतिपाद्यते ॥ मन्दानः मदिस्तुतिमोदमदस्वप्नकान्तिगतिषु लिटःकानच् द्विर्वचनप्रकरणे छन्दसिवेतिवक्तव्यमितिद्विर्वचनाभावः।अन्धसः अदभक्षणे अदेर्नुम्धश्चेत्यसुन् धातोर्नुमागमोधकारान्तादेशश्च ॥ ५ ॥

५. शतयज्ञकर्त्ता इन्द्र! तुम्हारे रथ के दाहिने और बायें अश्व संयुक्त हों। सोमपान से हृष्ट होकर तुम उस रथ-द्वारा अपनी प्रिय पत्नी के पास जाओ। अपने घोड़े संयोजित करो।

अन्त्येष्वहःसुहारियोजनस्ययुनज्मात्येषायाज्या सूत्रितंच—युनज्मितेब्रह्मणाकेशिनाहरीइतियाज्यानुवाक्येअन्त्येष्वहःस्विति ।

तामेतांसूक्तेषष्ठीमृचमाह--

युनज्मितेब्रह्मणाकेशिनाहरीउपप्रयाहिदधिषेगभस्त्योः।
उत्त्वासुतासोरभसाअमन्दिषुःपूषण्वान्वंज्रिन्त्समुपत्न्यामदः ॥६॥३॥

युनज्मि। ते। ब्रह्मणा। केशिना। हरी इति। उप। प्र। याहि। दधिषे। गभस्त्योः। उत्। त्वा। सुतासः। रभसाः। अमन्दिषुः। पूषण्ऽवान्। वज्रिन्। सम्। ऊम् इति। पत्न्या। अमदः ॥ ६ ॥ ३ ॥

हेइन्द्र केशिनाकेशयुक्तौशिखावन्तौतेहरीत्वदीयावश्वौ ब्रह्मणास्तोत्ररूपेणमन्त्रेणयुनज्मि रथेसंयोजयामि तेनरथेनउपप्रयाहि त्वद्गृहमुपगच्छ गभस्त्योःबाहुनामैतत् बाह्वोःअश्वबन्धकान् रश्मीन्दधिषेधारयस्व त्वात्वांसुतासोयज्ञेऽभिषुताःसोमाः रभसाः वेगवन्तःतीव्राः क्षिप्रंमदकारिण-इत्यर्थः उदमन्दिषुः उत्कृष्टमदयुक्तमकार्षुः हेवज्रिन् अतस्त्वंस्वगृहंगत्वापूषण्वान् अत्रपूषन्शब्दःपुष्टौवर्तते पुष्टिर्वैपूषा पुष्टिमेवावरुन्धइतिश्रुतेः। सोमपानजनितयापुष्ट्यायुक्तःसन्पत्न्या स्वभार्ययासहसमुअमदः सम्यगेवतृप्तोभव ॥ केशिना केशशब्दान्मत्वर्थीयइनिः सुपांसुलुगिति विभक्तेराकारः। रभसाः अर्शआदित्वादच्। अमन्दिषुः व्यत्ययेनपरस्मैपदम्। पूषण्वान् पुषपुष्टौ श्वन्नुक्षन्नित्यादौपूषन्नितिनिपात्यते तच्चात्रभावसाधनंद्रष्टव्यम् पूषाअस्यास्तीतिपूषण्वान् मादुपधाया-इतिमतुपोवत्वम् नलोपेऽनोनुडितिनुट् ह्रस्वनुड्भ्यांमतुपउदात्तत्वम्। अमदः मदीहर्षे छन्दसिलुङ्-लङ्लिटइतिप्रार्थनायांलङ् श्यनिप्राप्तेव्यत्ययेनशप् ॥ ६॥

६. तुम्हारे केश-सम्पन्न दोनों घोड़ों को मैं स्तोत्र-द्वारा रथ में संयोजित करता हूँ। अपनी दोनों भुजाओं में घोड़े को बांधनेवाली रश्मि धारण करके घर जाओ। इस अभिषुत तीक्ष्ण सोमरस ने तुम्हें हृष्ट किया है। वज्रिन्! तुम सोमपान से उत्पन्न तुष्टि से युक्त होकर अपनी पत्नी के साथ भलीभाँति हर्ष प्राप्त करो।

॥ इतिप्रथमस्यषष्ठेतृतीयोवर्गः ॥ ३ ॥

अश्वावतीतिषड्चंदशमंसूक्तम् गोतमस्यार्षमैन्द्रंजागतम् तथाचानुक्रान्तम्—अश्वावतिजागतमिति। अतिरात्रेतृतीयेपर्यायेब्राह्मणाच्छंसिशस्त्रइदंसूक्तम् सूत्रितंच—अश्वावतिमोम्रांपीतिंवृष्णइयर्मिसत्यामितियाज्येति।

तत्रप्रथमामृचमाह—

अश्वावतिप्रथमोगोषुगच्छतिसुप्रावीरिन्द्रमर्त्यस्तवोतिभिः।
तमित्पृणक्षिवसुनाभवीयसासिन्धुमापोयथाभितोविचेतसः ॥१॥

१ तै० ब्रा० २.७.२.

अश्वंऽवति । प्रथमः । गोषु । गच्छति । सुप्रऽअवीः । इन्द्र । मर्त्यः ।
तव । ऊतिऽभिः । तम् । इत् । पृणक्षि । वसुना । भवीयसा ।
सिन्धुम् । आपः । यथा । अभितः । विऽचैतसः ॥ १ ॥

हेइन्द्र योमर्त्योमनुष्यः तवोतिभिः त्वदीयैरक्षणैः सुप्रावीः सुष्ठुप्ररक्षितोभवति समर्त्यः अश्वावतिबहुभिरश्वैर्युक्तेगृहेवर्तमानः गोषुप्राप्तव्येषुप्रथमोगच्छति सर्वेभ्योयजमानेभ्यःपूर्वमेवगोमान्भवतीत्यर्थः त्वंतमित् तमेवपुरुषंभवीयसाबहुतरेणभवितृतमेनवाशतसहस्रादिसंख्यायुक्तेन वसुनाधनेनपृणक्षि संपृक्तं संपूर्णंकरोषि तत्रदृष्टान्तः—विचेतसः विशिष्टज्ञानहेतुभूताआपोयथा अभितः सर्वासुदिक्षुसिन्धुंसमुद्रंपूरयन्ति तद्वत् ॥ अश्वावति मन्त्रेसोमाश्वेतिमतौदीर्घत्वम् । सुप्रावीः अवितृस्तृतन्त्रिभ्यईरित्यवतेरीकारप्रत्ययः । ऊतिभिः ऊतियूतीत्यादिनाक्तिनउदात्तत्वम् । पृणक्षि पृचीसंपर्के रौधादिकः । भवीयसा बहुशब्दादीयसुनिबहोर्लोपोभूचबहोरितिबहुशब्दस्य भूभावः ईयसुनईकारलोपश्च अत्रतुछान्दसत्वादीकारलोपोनक्रियते भूभावश्चक्रियते अथवाभवितृशब्दात् तुश्छन्दसीतीयसुन् तुरिष्ठेमेयःस्वितितृलोपः ॥ १ ॥

१. इन्द्र! तुम्हारी रक्षा-द्वारा जो मनुष्य रक्षित है, वह अश्ववाले घर में रहकर सर्व-प्रथम गौ प्राप्त करता है। जैसे विशिष्ट ज्ञान-दाता नदियाँ चारों ओर से समुद्र को परिपूर्ण करती हैं, वैसे ही तुम भी अपने रक्षित मनुष्य को यथेष्ट धन से परिपूर्ण करते हो।

अपोनप्त्रीयेहोतृचमसेद्भिःपूर्यमाणेआपोनदेवीरित्येषानुवक्तव्या सूत्रितंच—आपोनदेवीरुपयन्तिहोत्रियमितिसमाप्येति । ब्राह्मणंच—आपोनदेवीरुपयन्तिहोत्रियमितिहोतृचमसेसमवनीयमानास्वन्वाहेति[1] ।

तामेतांद्वितीयामृचमाह—

आपोनदेवीरुपयन्तिहोत्रियमवःपश्यन्तिविततंयथारजः ।
प्राचैर्देवासःप्रणयन्तिदेवयुंब्रह्मप्रियंजोषयन्तेवराइव ॥२॥

आपः । न । देवीः । उप । यन्ति । होत्रियम् । अवः । पश्यन्ति ।
विऽततम् । यथा । रजः । प्राचैः । देवासः । प्र । नयन्ति । देवऽयुम् ।
ब्रह्मऽप्रियम् । जोषयन्ते । वराःऽइव ॥ २ ॥

---

1 ऐ० ब्रा० २. २०. ।

होत्रियं होतुःस्वभूतं चमसंदेवीर्देव्योद्योतमानाआपोन यथाआपःउपयन्ति उपगच्छन्ति तद्वदुपरिवर्तमानादेवासःदेवाःएतमेवचमसंअवः अवस्तात्पश्यन्ति होतृचमसे अस्माकंसोमाभिषवायापःपूरिताइतितेषांदृष्टिरप्यस्मिन्संलग्नाभूत् तत्रदृष्टान्तः—विततंविस्तीर्णं रजोज्योतिः सूर्यसंबन्धियथानिरन्तरमवस्तावपततितद्वद्देवयुं देवान्कामयमानमेतंचमसंप्राचैः प्राचीनं यद्वा प्रांचनैःप्रगमनैः उत्तरवेद्यभिमुखंहोमकालेप्रणयन्ति होमार्थेप्रणीतंब्रह्मप्रियं ब्रह्मणासोमलक्षणेनान्नेनप्रीतंसंतृप्तंपूरितमित्यर्थः जोषयन्ते सर्वेदेवास्तंचमसंसेवन्ते वराइवकन्यकां यथावराममेयंभविष्यतिममेयंभविष्यतिइतिकन्यकांसेवन्ते एवंदेवाअपिममायंसोमः ममायंसोमइति अस्यपार्श्वेवर्तन्तइत्यर्थः एवमपोनन्नीयविनियोगानुसारेणयोजितम् मन्त्रस्यानुष्ठेयार्थप्रकाशकत्वात् यदातुरात्रिपर्यायेस्याःविनियोगस्तदात्वेवंव्याख्येयम्—हेइन्द्र देव्यआपोयथानिम्नदेशं उपगच्छन्ति एवंदेवास्त्वदीयंस्तोत्रंशुश्रूषमाणाः होत्रियंहोतृसंबन्धिधिष्ण्यंस्थानंउपगच्छन्ति उपगत्यच अवस्तात्पश्यन्तिविततंज्योतिरिवदेवयुंदेवानात्मनइच्छन्तमेतंशंसितारं आगताःसर्वे देवाः प्राचीनंप्रणयन्ति अग्रतोधारयन्ति ब्रह्मप्रियंस्तोत्रप्रियंत्वांशंसन्तं वराः कन्यकाइवसेवन्ते ॥ होत्रियं होतृशब्दात्तस्येदमर्थेघप्रत्ययः ।अवः पूर्वाधरावराणामसिपुरधवश्चैषामित्यसिप्रत्ययान्तोन्तोदात्तः। प्राचैः उच्चैर्नीचैरितिवदव्ययम् यद्वा प्रपूर्वादञ्चतेर्घञर्थेकविधानं स्थास्नापाव्यधिहनियुध्यर्थमितिपरिगणनस्योपलक्षणार्थत्वात्क्वावेकप्रत्ययः अनिदितामितिनलोपः । जोषयन्ते जुषीप्रीतिसेवनयोः स्वात्मनःप्रयोज्यत्वाद्धेतुमतिणिच् ॥ २ ॥

२. जैसे द्युतिमान् जल यज्ञ-पात्र में जाता है, वैसे ही ऊपर रहनेवाले देवता लोग यज्ञ-पात्र को देखते हैं। उनकी दृष्टि, सूर्य-किरण की तरह, व्यापक है। जैसे अनेक-वर एक ही कन्या को ब्याहने की इच्छा करते हैं, वैसे ही देवता लोग सोम-पूर्ण और देवाभिलाषी पात्र को, उत्तर वेदी के सम्मुख लाकर, चाहते हैं।

प्रवर्ग्याभिष्टवे अधिद्वयोरित्येषा स्पृष्ट्वोदकमितिखण्डेसूत्रितम्—अधिद्वयोरदधाउक्थ्यंवचःशुक्रन्तेअन्यद्यजतन्तेअन्यदिति । हविर्धानप्रवर्तनेप्येषा सूत्रितंच—यमेइवयतमानेयदैतमधिद्वयोरदधाउक्थ्यंवचइत्यर्धर्चेआरभेदिति ।

अधि॒द्वयो॒रद॑धाउ॒क्थ्यं१॒ वचो॒यत॑स्रुचामिथु॒नाया॒सप॒र्य॑तः ।
अ॒संय॑त्तोव्र॒तेते॑क्षेति॒पुष्य॑तिभ॒द्राश॒क्तिर्यज॑मानाय॒सुन्व॒ते ॥३॥

अधि॑ । द्व॒योः॑ । अ॒द॒धाः॒ । उ॒क्थ्य॑म् । वचः॑ । य॒तऽस्रु॑चा । मि॒थु॒ना । या । स॒प॒र्यतः॑ । अस॑म्ऽयत्तः । व्र॒ते । ते॒ । क्षे॒ति॒ । पुष्य॑ति । भ॒द्रा । श॒क्तिः । यज॑मानाय । सु॒न्व॒ते ॥ ३ ॥

हेइन्द्र द्वयोर्हविर्धानयोः उक्थ्यंउक्थंशस्त्रं तद्योग्यंवचः युजे वामित्यादिमन्त्ररूपं वचनंअध्यदधाः निहितवानसि ननुहविर्धानयोर्द्वयोः कथमेकमेववचोधिनिधीयते इत्याशंक्य ब्राह्मणेनैवं व्याख्यातम्-अधिद्वयोरदधाउक्थ्यंवचइतिद्वयोर्ह्येतत्तृतीयंछदिरधिनिधीयतउक्थ्यंवचइतियदाह यज्ञियंवैकर्मोक्थ्यंवचोयज्ञमेवैतेनसमर्धयतीति[1]। तत्रयथाहविर्धानद्वयेएकमेवतृतीयंछदिरधिनिधीयते एवंस्तोत्रमप्युभयोरेकंयुक्तम् उक्थंनामयज्ञसंबन्धिशस्त्रंतद्योग्यंवचनमपियज्ञियंकर्म तस्यायज्ञरूपयोर्हविर्धानयोर्यज्ञत्वसंपादनायाधिनिधानाद्यज्ञोपिसमृद्धोभवति कीदृशयोर्हविर्धानयोः यतस्रुचा यताःसंबद्धाःस्रुचःग्रहचमसादिलक्षणानिपात्राणिययोः तेमिथुनायुगलरूपेणवर्तमाने या येहविर्धाने त्वांसपर्यतःपूजयतः तयोरित्यर्थः किञ्च ईदृग्रूपहविर्धानयुक्तोयजमानः असंयत्तः शत्रुभिःसहयुद्धार्थमनभिगतःसन् तेव्रते त्वदीयेकर्मणिक्षेतिनिवसति पुष्यतिचप्रजयापशुभिश्चपुष्टोभवतिच सुन्वते त्वद्देवत्येयागेसोमाभिषवंकुर्वतोयजमानस्यभद्राकल्याणीशक्तिः उत्कृष्टंबलंभवति एतत्सर्वंहविर्धानयोःउक्थ्यस्यवचसोनिधानेनत्वयाकृतमित्यर्थः॥ यतस्रुचा यमउपरमे निष्ठायांअनुदात्तोपदेशेत्यादिनानुनासिकलोपः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् इदमादिषुनिषुपदेषुसुपांसुलुगितिविभक्तेराकारः। सपर्यत सपरपूजायां कण्ड्वादिभ्योयक् अदुपदेशाल्लसार्वधातुकानुदात्तत्वे तस्यैवस्वरःशिष्यते। क्षेति क्षिनिवासगत्योः बहुलंछन्दसीतिविकरणस्य लुक्। सुन्वते यजमानाय षष्ठ्यर्थेचतुर्थीवक्तव्येतिचतुर्थी शतुरनुमइतिविभक्तेरुदात्तत्वम्॥ ३॥

३. इन्द्र! जो हव्य और धान्य यज्ञ-पात्र में तुम्हें समर्पित किया गया है, उसमें तुमने मंत्र-वचन संयुक्त किया है। यजमान, युद्ध में न जाकर, तुम्हारे काम में लगा रहता एवं पुष्टि प्राप्त करता है; क्योंकि सोमाभिषव-दाता बल-लाभ करता ही है।

चतुर्थीमृचमाह—

आदङ्गिराःप्रथमंदधिरेवयइद्धाग्नयःशम्यायेसुकृत्यया।
सर्वंपणेःसमविन्दन्तभोजनमश्वावन्तंगोमन्तमापशुंनरः॥४॥

आत्। अङ्गिराः। प्रथमम्। दधिरे। वयः। इद्धऽअग्नयः। शम्या। ये। सुऽकृत्यया। सर्वम्। पणेः। सम्। अविन्दन्त। भोजनम्। अश्वऽवन्तम्। गोऽमन्तम्। आ। पशुम्। नरः॥ ४॥

यदापणिभिर्गावोपहृतास्तदानींअङ्गिराः अङ्गिरसः प्रथमंपूर्वंअग्रतः वयोहविर्लक्षणमन्नंदधिरे इन्द्रार्थंसंपादितवन्तः आत्अनन्तरं तादृशायेंगिरसः इद्धाग्नयः प्रज्वलिताग्नियुक्ताः

[1] ऐ० ब्रा० १. २९।

सन्तः सुकृत्यया शोभनकरणोपेतया शम्याकर्मणाशोभनेनयागेनइन्द्रमयजन्निविशेषः तेनरोयज्ञस्यनेतारोङ्गिरसः पणेः एतन्नाम्नोसुरस्यसंबन्धिसर्वंभोजनंधनंसमविन्दन्त समलभन्त कीदृशं अश्वावन्तं अश्वैर्युक्तम् गोमन्तंगोभिर्युक्तम् आकारःसमुच्चये गवाश्वव्यतिरिक्तं अन्यत्पशुं पशुजातंचसमविन्दन्त ॥ अङ्गिराः सुपांसुलुगितिजसःसुः। शम्या शमीतिकर्मनाम शाम्यत्यनया क्रिययादोषजातमितिशमी करणेवञ् नोदात्तोपदेशस्यमान्तस्यानाचमेरितिवृद्धिप्रतिषेधः गौरादित्वात्ङीष् व्यत्ययेनाद्युदात्तत्वम्। सुकृत्यया शोभनंकृत्यंकरणंयस्यांसातथोक्ता नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् ॥ ४ ॥

४. पहले अङ्गिरा लोगों ने इन्द्र के लिए अन्न सम्पादित किया था। अनन्तर उन्होंने अग्नि जलाकर सुन्दर योग-द्वारा इन्द्र की पूजा की थी। यज्ञ-नेता अङ्गिरोवंशीयों ने अश्व, गौ और अन्य पशुओं से युक्त सारा धन प्राप्त किया था।

यज्ञैरथर्वाप्रथमःपथस्तंतेततःसूर्योव्रतपावेनआजनि।
आगाआजदुशनाकाव्यःसचायमस्यंजातममृतंयजामहे ॥५॥

यज्ञैः। अथर्वा। प्रथमः। पथः। तते। ततः। सूर्यः। व्रतऽपाः। वेनः। आ। अजनि। आ। गाः। आजत्। उशना। काव्यः। सचा। यमस्य। जातम्। अमृतम्। यजामहे ॥ ५ ॥

पणिभिरपहृतासुगोषु अथर्वाएतत्संज्ञऋषिः यज्ञैरिन्द्रदेवत्यैःअनुष्ठितैर्यागैःपथःगोसंबन्धिनोमार्गान्प्रथमस्ततेतनुते सर्वेभ्यऋषिभ्यःपूर्वमेवकृतवानित्यर्थः ततस्तदनन्तरं व्रतपाः व्रतानां कर्मणांपालयितावेनःकान्तः सूर्यःसूर्यरूपइन्द्रः आजनि गवांप्रदर्शनायआविरभूत् ततोथर्वातागाआजत्आभिमुख्येनप्राप्नोत् तादृशस्येन्द्रस्यकाव्यःकवेःपुत्रउशनाभृगुःसचाअसुरनिरसनाय सहायोऽभूत् यमस्यअसुराणांनियमार्थंजातंप्रादुर्भूतंअमृतंमरणरहितंतमिन्द्रंयजामहे हविर्भिः पूजयामः ॥ पथः शसिभस्यटेर्लोपइतिटेर्लोपः उदात्तनिवृत्तिस्वरेणविभक्तेरुदात्तत्वम्। तते तनु विस्तारे बहुलंछन्दसीतिविकरणस्यलुक् अनुदात्तोपदेशेत्यादिनाअनुनासिकलोपः ॥ अजनि जनीप्रादुर्भावे दीपजनबुधेत्यादिनाकर्तरिलुङि च्लेश्चिण्। आजत् अजगतिक्षेपणयोः ॥ ५ ॥

५. अथर्वा नाम के ऋषि ने, पहले यज्ञ-द्वारा चुराई हुई गायों का मार्ग प्रदर्शित किया था। अनन्तर व्रत-पालक और कान्ति-विशिष्ट सूर्य-रूप इन्द्र आविर्भूत हुए थे। गौओं को अथर्वा ने प्राप्त किया। कवि के पुत्र उशना या भृगु ने इन्द्र की सहायता की थी। असुरों के दमन के लिए उत्पन्न और अमर इन्द्र की हम पूजा करते हैं।

बर्हिर्वायत्स्वपत्यायवृज्यतेर्कोवाश्लोकमाघोषतेदिवि।
ग्रावायत्रवदतिकारुरुक्थ्य१स्तस्येदिन्द्रोअभिपित्वेषुरण्यति ॥६॥४॥

बर्हिः । वा । यत् । सुऽअपत्याय । वृज्यते । अर्कः । वा ।
श्लोकम् । आऽघोषते । दिवि । ग्रावा । यत्र । वदति । कारुः ।
उक्थ्यः । तस्य । इत् । इन्द्रः । अभिऽपित्वेषु । रण्यति ॥६॥४॥

स्वपत्यायशोभनापतनहेतुभूतायकर्मणेबर्हिर्वायद्यदावृज्यतेछिद्यतेअध्वर्युणायागार्थमाह्रियतेअर्कोवास्तोत्रनिष्पादकोहोतावाश्लोकंस्तुतिरूपांवाचंदिविद्योतमानेयज्ञेयदाआघोषते उच्चारयति यत्रयस्मिन्कालेग्रावाअभिषवार्थमवृत्तउपलः वदतिशब्दंकरोति तत्रदृष्टान्तः—कारुरुक्थ्यः लुप्तोपममेतत् उक्थस्यशस्त्रस्यशंसिताकारुः स्तोतायथाअभिमतशब्दंकरोतितद्वत् तस्येत्पूर्वोक्तस्यसर्वस्यअभिपित्वेषुअभिप्राप्तिषुइन्द्रोरण्यतिरमते यद्वा पूर्वोक्तानांबर्हिरादीनां अभिप्राप्तिषुसतीषुइन्द्रोरण्यति अस्मदीयोयागोभविष्यतीतिहर्षशब्दंकरोति॥ वृज्यते वृजीवर्जने अदुपदेशाल्लसार्वधातुकानुदात्तत्वेयकएवस्वरःशिष्यते निपातैर्यद्यदिहन्तेतिनिघातप्रतिषेधः । आघोषते घुषिर्विशब्दने भौवादिकः अत्रापियदित्यस्यनिपातस्यानुषङ्गान्निघाताभावः । रण्यति रमुक्रीडायां व्यत्ययेनश्यन्परस्मैपदंच अन्त्यविकारश्छान्दसः यद्वा रणशब्दार्थः व्यत्ययेनश्यन् ॥ ६ ॥

६. सुन्दर-फल-युक्त यज्ञ के लिए जिस समय कुश का छेदन किया जाता है, उस समय स्तोत्र-सम्पादक होता द्युतिमान् यज्ञ में स्तोत्र उद्घोषित करता है। जिस समय सोम-निस्यन्दी प्रस्तर, शास्त्रीय स्तवनकारी स्तोता की तरह, शब्द करता है, उस समय इन्द्र प्रसन्न होते हैं।

॥ इतिप्रथमस्यषष्ठेचतुर्थोवर्गः ॥४॥

असावीतिविंशत्यृचमेकादशंसूक्तम् अत्रानुक्रम्यते—असाविविंशतिःषळनुष्टुभऔष्णिहपाङ्क्तगायत्रत्रैष्टुभास्तृचाःप्रगाथइति । आदितःषळनुष्टुभः सप्तम्याद्यास्तिस्रउष्णिहः दशम्याद्यास्तिस्रःपङ्क्तयः त्रयोदश्याद्यास्तिस्रोगायत्र्यः षोडश्याद्यास्तिस्रस्त्रिष्टुभः एकोनविंशीबृहती विंशीसतोबृहती अनुवर्तनाद्गोतमऋषिः अनादेशपरिभाषयेन्द्रोदेवता सूक्तविनियोगोलिङ्गादवगन्तव्यः अविहतषोडशिशस्त्रेआद्यौतृचौस्तोत्रियानुरूपौ सूत्रितंच—अथषोडश्यसाविसोमइन्द्रवइतिस्तोत्रियानुरूपाविति । आभिप्लविकेषूक्थ्येषुतृतीयसवनेच्छावाकस्यइमावेवतृचौवैकल्पिकौ स्तोत्रियानुरूपौ एह्यूष्वितिखण्डेसूत्रितम्—असाविसोमइन्द्रतइममिन्द्रसुतंपिबेति ।

तत्रप्रथमामृचमाह—

असाविसोमइन्द्रतेशविष्ठधृष्णवागहि ।
आत्वापृणक्त्विन्द्रियंरजःसूर्योनरश्मिभिः ॥१॥

असावि । सोमः । इन्द्र । ते । शविष्ठ । धृष्णो इति । आ ।
गहि । आ । त्वा । पृणक्तु । इन्द्रियम् । रजः । सूर्यः । न ।
रश्मिऽभिः ॥ १ ॥

हेइन्द्र तेत्वदर्थंसोमःअसाविअभिषुतोऽभूव हेशविष्ठअतिशयेनबलवन् अतएवधृष्णो शत्रूणांधर्षयितः इन्द्रआगहि देवयजनदेशमागच्छ आगतंचत्वात्वांइन्द्रियंसोमपानेनोत्पन्नं प्रभूतंसामर्थ्यं आपृणक्तुआपूरयतु रजोन्तरिक्षंरश्मिभिःकिरणैःसूर्योन यथासूर्यःपूरयतितद्वत् ॥ शविष्ठ शवस्विन्शब्दादिष्ठनिविन्मतोर्लुक् टेरितिटिलोपः पादादित्वान्निघाताभावः । गहि गमेर्लोटि बहुलंछन्दसीतिशपोलुक् अनुदात्तोपदेशेत्यादिनानुनासिकलोपः तस्यासिद्धवदत्राभादित्यसिद्धवत्त्वाद्धेर्लुगभावः ॥ १ ॥

१. इन्द्र ! तुम्हारे लिए सोमरस तैयार है । हे बलिष्ठ और शत्रु-दमन इन्द्र ! आओ । जैसे सूर्य किरण-द्वारा, अन्तरिक्ष को पूर्ण करते हैं, वैसे ही प्रभूत शक्ति तुम्हें पूरित करे ।

इन्द्रमिद्धरीवहतोप्रतिधृष्टशवसम् ।
ऋषीणांचस्तुतीरुपयज्ञंचमानुषाणाम् ॥२॥

इन्द्रम् । इत् । हरी इति । वहतः । अप्रतिधृष्टऽशवसम् ।
ऋषीणाम् । च । स्तुतीः । उप । यज्ञम् । च । मानुषाणाम् ॥ २ ॥

अप्रतिधृष्टशवसंकेनाप्यप्रतिधर्षितबलंआहिंसितबलमित्यर्थः इन्द्रमित्इन्द्रमेवऋषीणांवसिष्ठादीनांमानुषाणांअन्येषांमनुष्याणांच स्तुतीर्यज्ञंचहरीअश्वौउपवहतः समीपंप्रापयतः यत्रयत्रस्तुवन्तियत्रयत्रयजन्तेतत्रतत्रसर्वत्रेन्द्रमश्वौप्रापयतइत्यर्थः ॥ मानुषाणां मनोर्जातावितिमनुशब्दादञ्षुगागमश्च ॥ २ ॥

२. इन्द्र के दोनों हरिनाम के घोड़े हिंसा-विरहित बलवाले इन्द्र को वसिष्ठ आदि ऋषियों और मनुष्यों की स्तुति और यज्ञ के समीप वहन करें ।

तृतीयामृचमाह—

आतिष्ठवृत्रहन्रथंयुक्तातेब्रह्मणाहरी ।
अर्वाचीनंसुतेमनोग्रावाकृणोतुवग्नुना ॥ ३ ॥

आ । तिष्ठ । वृत्रऽहन् । रथम् । युक्ता । ते । ब्रह्मणा । हरी इति ।
अर्वाचीनम् । सु । ते । मनः । ग्रावा । कृणोतु । वग्नुना ॥ ३ ॥

हेवृत्रहन् शत्रूणांहन्तरिन्द्र रथमातिष्ठआरोह यस्मात्तेहरीत्वदीयावश्वौ ब्रह्मणास्तोत्रलक्ष-णेनमन्त्रेणयुक्तारथेऽस्माभिर्योजितौतस्मात्त्वंरथमातिष्ठ तेमनःत्वदीयंमनश्चग्रावाअभिषवार्थंमवृ-चःपाषाणः वग्नुनावचनीयेनाभिषवशब्देनअर्वाचीनं अस्मदभिमुखंसुकृणोतु सुष्ठुकरोतु ॥ युक्ता सुपांसुलुगित्याकारः । वग्नुना वचेर्गश्चेतिनुमत्ययः गकारश्चान्तादेशः ॥ ३ ॥

३. हे वृत्र-हन्ता इन्द्र! रथ पर चढ़ो; क्योंकि तुम्हारे दोनों घोड़े मंत्र-द्वारा रथ में हमारे द्वारा संयोजित किये गये हैं। सोम-चुआनेवाले प्रस्तर-द्वारा अपना मन हमारी ओर करो।

चतुर्थीमृचमाह—

इममिन्द्रसुतंपिबज्येष्ठममर्त्यंमदम् ।
शुक्रस्यत्वाभ्यक्षरन्धाराऋतस्यसादने ॥४॥

इमम् । इन्द्र । सुतम् । पिब । ज्येष्ठम् । अमर्त्यम् । मदम् ।
शुक्रस्य । त्वा । अभि । अक्षरन् । धाराः । ऋतस्य । सदने ॥ ४ ॥

हेइन्द्र सुतमभिषुतमिमंसोमंपिब कीदृशंज्येष्ठंअतिशयेनप्रशस्यं मदंमदकरम् अमर्त्यंम-मारकम् सोमपानजन्योमदोमदान्तरवन्मादकोनभवतीत्यर्थः तथाऋतस्ययज्ञस्यसंबन्धिनिसदने गृहेवर्तमानाः शुक्रस्यदीप्तस्यास्यसोमस्यधाराः त्वात्वामभ्यक्षरन्आभिमुख्येनसंचलन्ति त्वांमा-प्नुवन्ति स्वयमेवागच्छन्तीत्यर्थः॥ज्येष्ठं प्रशस्यशब्दादिष्ठनि ज्यचेतिज्यादेशः । अक्षरन् क्षरसं-चलने छान्दसोलङ् ॥ ४ ॥

४. इन्द्र! तुम इस अतीव प्रशस्त, हर्ष-दायक या मादक और अमर सोमरस का पान करो। यज्ञ-गृह में यह दीप्तिमान् सोमधारा तुम्हारी ओर बहती है।

इन्द्रायनूनमर्चतोक्थानिचब्रवीतन ।
सुताअमत्सुरिन्दवोज्येष्ठंनमस्यतासहः ॥५॥५॥

इन्द्राय । नूनम् । अर्चत । उक्थानि । च । ब्रवीतन । सुताः ।
अमत्सुः । इन्दवः । ज्येष्ठम् । नमस्यत । सहः ॥ ५ ॥ ५ ॥

हेऋत्विजः इन्द्रायनूनं क्षिप्रमर्चतपूजनंकुरुत एतदेवस्पष्टीक्रियते—उक्थानिअप्रगीतम-न्त्रसाध्यानिस्तोत्राणिचब्रवीतनब्रूत सुताअभिषुताइन्दवःसोमाश्चअमत्सुःआगतमेनमिन्द्रंमत्तंकु-र्वन्तु अनन्तरंज्येष्ठंप्रशस्यतमंसहःसहस्विनंबलवन्तंतमिन्द्रंनमस्यत नमस्कुरुत ॥ ब्रवीतन ब्रवी-तेर्लोटितप्तनप्तनथनाश्चेतितनबादेशः । अमत्सुः मदीहर्षे छान्दसःप्रार्थनायांलुङ् आगमानुशास-

नस्यानित्यत्वादिडभावः । नमस्यत नमोवरिवश्चित्रङइतिक्यच् । सहः लुगकारेकाररेफाश्चवक्तव्याइतिमत्वर्थीयस्यलुक् ॥ ५ ॥

५. इन्द्र की तुरत पूजा करो; उनकी स्तुति करो; अभिषुत सोमरस इन्द्र को प्रसन्न करे; प्रशंसनीय और बलवान् इन्द्र को प्रणाम करो।

॥ इतिप्रथमस्यषष्ठेपञ्चमोवर्गः ॥ ५ ॥

षष्ठीमृचमाह—

नकिष्ट्वद्रथीतरोहरीयदिन्द्रयच्छसे ।
नकिष्ट्वानुमज्मनानकिःस्वश्वआनशे ॥६॥

नकिः । त्वत् । रथिऽतरः । हरी इति । यत् । इन्द्र । यच्छसे । नकिः । त्वा । अनु । मज्मना । नकिः । सुऽअश्वः । आनशे ॥ ६ ॥

हेइन्द्र यद्यस्मात्त्वं हरीएतत्संज्ञावश्वौयच्छसेरथेयोजयसि तस्मात्त्वत् त्वत्तोऽन्यः कश्चिद्रथीतरः अतिशयेनरथवान्नकिःनास्ति अन्येषामीदृगश्वयुक्तरथाभावात् त्वा त्वामनुलक्ष्यमज्मना बलनामैतत् बलेनसदृशोऽपिनकिर्नहस्ति स्वश्वःशोभनाश्वोन्यश्चत्वांनकिरानशेनप्राप इन्द्रस्य बलाश्वयोरसाधारणत्वादिन्द्रसदृशबलवानश्ववान्लोकेकश्चिदपिनास्तीत्यर्थः ॥ नकिष्ट्वद् युष्मत्ततक्षुष्वन्तःपादमितिषत्वम् । रथीतरः अतिशयेनरथी तरपि ईद्रथिनइतीकारान्तादेशः अवग्रहसमयेछान्दसंह्रस्वत्वम् । यच्छसे यमेर्व्यत्ययेनात्मनेपदम् । स्वश्वः बहुव्रीहावाद्युदात्तंद्व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वम् । आनशे अश्नोतेश्चेतिअभ्यासादुत्तरस्यनुट् ॥ ६ ॥

६. इन्द्र! जिस समय तुम रथ में अपने घोड़े जोत देते हो, उस समय तुमसे बढ़कर रथी कोई नहीं रहता। तुम्हारे बराबर न तो कोई बली है और न सुशोभन अश्वोंवाला।

आभिप्लविकेषूक्थ्येषुतृतीयसवनेब्राह्मणाच्छंसिनोयएकइद्विदयतइतिवैकल्पिकःस्तोत्रियस्तृचः एवूष्विति खण्डेसूत्रितम्—सखायआशिषामहियएकइद्विदयतइति । महाव्रतेऽपिनिष्केवल्ये औष्णिहतृचाशीतावयंतृचोविनियुक्तः तथैवपञ्चमारण्यकेसूत्र्यते—यएकइद्विदयतआयाह्यद्रिभिःसुतमिति ।

तृचेप्रथमांसूक्तेसप्तमीमृचमाह—

यएकइद्विदयतेवसुमर्तायदाशुषे ।
ईशानोअप्रतिष्कुतइन्द्रोअङ्ग ॥ ७ ॥

यः । एकः । इत् । विऽदयते । वसु । मर्ताय । दाशुषे । ईशानः ।

अप्रतिऽस्कुतः । इन्द्रः । अङ्ग ॥ ७ ॥

यइन्द्रः एकइत् एकएवदाशुषे हविर्दत्तवतेमर्तायमनुष्याययजमानायवसुधनंविदयतेविशेषेण ददाति अङ्गेतिक्षिप्रनाम अप्रतिष्कुतः परैरप्रतिशब्दितः प्रतिकूलशब्दरहितइत्यर्थः एवंभूतः सइन्द्रः क्षिप्रंईशानः सर्वस्यजगतःस्वामीभवति ॥ विदयते दयदानगतिरक्षणहिंसादानेषु शपःपित्वादनुदात्तत्वम् तिङश्चलसार्वधातुकस्वरेणधातुस्वरएवशिष्यते यद्वृत्तयोगादनिघातः । अप्रतिष्कुतः कुशब्दे प्रतिकूलं कूयतेशब्द्यतइतिप्रतिष्कुतः पारस्करादेराकृतिगणत्वात्सुट् सुषामादित्वात्षत्वम् नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥ ७ ॥

७. जो इन्द्र केवल हव्य-दाता यजमान को हव्य प्रदान करते हैं, वह समस्त संसार के शीघ्र स्वामी हो जाते हैं।

अष्टमीमृचमाह—

कदामर्तमराधसंपदाक्षुम्पमिवस्फुरत् । कदानःशुश्रवद्गिरइन्द्रोअङ्ग ॥ ८ ॥

कदा । मर्तम् । अराधसम् । पदा । क्षुम्पम्ऽइव । स्फुरत् ।

कदा । नः । शुश्रवत् । गिरः । इन्द्रः । अङ्ग ॥ ८ ॥

अराधसंहविर्लक्षणेनराधसाधनेनरहितम् अयष्टारमित्यर्थः एवंविधंमर्तंमनुष्यं इन्द्रः पदापादेनक्षुंपमिवअहिच्छत्रकमिव कदास्फुरत् स्फुरिष्यति बाधिष्यति यथा अहिच्छत्रंमण्डलाकारेणशयानंकश्चिदनायासेनहन्ति एवमिन्द्रोऽपि कदास्मच्छत्रून्हनिष्यतीत्यर्थः स्फुरतिर्वधकर्मा स्फुरतिस्फुलतीतिवधकर्मसुपठितत्वात् नोऽस्माकंयष्टॄणांगिरः स्तुतिलक्षणावाचःइन्द्रः कदाकस्मिन्कालेअङ्गक्षिप्रं शुश्रवत् श्रोष्यतीतिवितर्क्यते अत्रनिरुक्तम्—क्षुंपमहिच्छत्रकंभवतियत्क्षुभ्यते । कदामर्तमनाराधयन्तंपादेनक्षुंपमिवावस्फुरिष्यति कदानःश्रोष्यतिगिरइन्द्रोअङ्गाङ्गेतिक्षिप्रनामेति[1] ॥ पदा पादशब्दस्यपद्दन्नित्यादिनापदादेशः ऊडिदमितिविभक्तेरुदात्तत्वम् । क्षुंपमिव क्षुभसंचलने अस्मात्कर्मणिघञ्बहुलवचनाद्धातोर्नुमागमः वर्णव्यापत्त्याभकारस्यपकारः । स्फुरत् स्फुरसंचलने छन्दसिलुङ्लङ्लिटइतिलृडर्थेलङ् बहुलंछन्दस्यमाङ्योगेऽपीत्यडभावः । शुश्रवत् श्रुश्रवणे लेट्यडागमः बहुलंछन्दसीतिशपःश्लुः ॥ ८ ॥

८. जो हव्य नहीं देता, उसे मण्डलाकार सर्प की तरह इन्द्र कब पैरों से रौंदेंगे? इन्द्र कब हमारी स्तुति सुनेंगे?

नवमीमृचमाह—

यश्चिद्धित्वाबहुभ्यआसुतावाँआविवासति ।

उग्रंतत्पत्यतेशवइन्द्रोअङ्ग ॥ ९ ॥

---

[1] नि० ५. १६–१७.

यः । चित् । हि । त्वा । बहुऽभ्यः । आ । सुतऽवान् । आऽविवासति ।
उग्रम् । तत् । पत्यते । शवः । इन्द्रः । अङ्ग ॥ ९ ॥

बहुभ्योमनुष्येभ्यःसकाशाद्यश्चिद्धियएवखलुयजमानः सुतावान् अभिषुतसोमयुक्तःसन् हेइन्द त्वात्वां आविवासतिपरिचरति विवासतिःपरिचरणकर्मा तस्मैयजमानायतदुग्रमुदूर्णं शवोबलंइन्द्रः अङ्गक्षिप्रंपत्यतेपातयतिप्रापयति॥ तव सुपांसुलुगितिचतुर्थ्यांलुक् । पत्यते पतॄगतौ अस्मादन्तर्भावितण्यर्थाद्व्यत्ययेनश्यन् ॥ ९ ॥

९. इन्द्र ! जो अभिषुत सोम-द्वारा तुम्हारी सेवा करता है, उसे तुम शीघ्र धन देते हो।

चातुर्विंशिकेहनिमाध्यंदिनेसवनेच्छावाकस्यस्वादोरित्थाविषूवतइतिवैकल्पिकःस्तोत्रियस्तृचः होत्रकाणामितिखण्डेसूत्रितम्—यःसत्राहाविचर्षणिःस्वादोरित्थाविषूवतइति पृष्ठ्यस्यपञ्चमेहनिनिष्केवल्येऽप्ययंतृचोनुरूपः स्तोमेवर्धमानइतिखण्डेसूत्रितम्—स्वादोरित्थाविषूवतउपनोहरिभिःसुतमिति ।

तृचेप्रथमांसूक्तेदशमीमृचमाह—

स्वादोरित्थाविषूवतोमध्वःपिबन्तिगौर्यः ।
याइन्द्रेणसयावरीर्वृष्णामदन्तिशोभसेवस्वीरनुस्वराज्यम् ॥१०॥६॥

स्वादोः । इत्था । विषुऽवतः । मध्वः । पिबन्ति । गौर्यः । याः ।
इन्द्रेण । सऽयावरीः । वृष्णा । मदन्ति । शोभसे । वस्वीः । अनु ।
स्वऽराज्यम् ॥ १० ॥ ६ ॥

स्वादोः स्वादुभूतस्य रसयुक्तस्यइत्थाविषूवतः इत्थमनेनप्रकारेणसर्वेषुयज्ञेषु व्याप्तियुक्तस्य मध्वोमधुररसस्यसोमस्य क्रियाग्रहणंकर्तव्यमितिकर्मणःसंप्रदानत्वाच्चतुर्थ्यर्थेषष्ठी एवंविधंसोमंगौर्योगौरवर्णागावः पिबन्ति यागावः शोभसेशोभार्थं वृष्णाकामाभिवर्षकेणेन्द्रेण सयावरीः सहयान्त्योगच्छन्त्यःसत्योमदन्तिंहृष्टाभवन्ति ताःइन्द्रपीतस्यसोमस्यशेषंपिबन्तीत्यर्थः वस्वीःपयःप्रदानेननिवासकारिण्यस्तागावः स्वराज्यंस्वकीयस्येन्द्रस्ययद्राज्यंराजत्वं तदनुलक्ष्यावस्थिताइतिशेषः॥ विषूवतः विष्लृव्याप्तौ अस्मादौणादिकःकुप्रत्ययः ततोमतुप् ह्रस्वनुड्भ्यांमतुबितिमतुपउदात्तत्वम् अन्येषामपिदृश्यतइतिसंहितायांदीर्घः व्यत्ययेनमतोर्वत्वम् । मध्वः जसादिषुछन्दसिवावचनमितिघेर्ङितीतिगुणाभावे यणादेशः। गौर्यः षिद्गौरादिभ्यश्चेतिङीषूजसिय-

णादेशे उदात्तस्वरितयोर्यणइतिपरस्यानुदात्तस्यस्वरितत्वम्।सयावरीः यामापणे आतोमनिन्क्विप्‌वनिप् वनोरचेतिङीन्रेफौ।मदन्ति मदीहर्षे श्यनिमाप्तेव्यत्ययेनशप्।वस्वीःवसनिवासे शृस्वृस्निहीत्यादिनावसेरुप्रत्ययः धान्येनिदित्यनुवृत्तेराद्युदात्तत्वम् वोतोगुणवचनादित्यत्रवसुशब्दाद्गुणवचनावङीप् आद्युदात्तार्थंइतिवचनाद्वसुशब्दावङीपियणादेशः जसिवाछन्दसीतिपूर्वसवर्णदीर्घत्वम्।स्वस्यराज्यंस्वराज्यं अकर्मधारयेराज्यमित्युत्तरपदाद्युदात्तत्वम्॥ १०॥

१०. गौर वर्ण गायें सुस्वादु एवं सब यज्ञों में व्याप्त मधुर सोमरस का पान करती हैं। शोभा के लिए वे गायें अभीष्टदाता इन्द्र के साथ गमन करके प्रसन्न होती हैं। ये सब गायें इन्द्र का राजत्व या 'स्वराज्य' लक्ष्य कर अवस्थित हैं।

ताअस्यपृशनायुवःसोमंश्रीणन्तिपृश्नयः।
प्रियाइन्द्रस्यधेनवोवज्रंहिन्वन्तिसायकंवस्वीरनुस्वराज्यम् ॥११॥

ताः। अस्य। पृशनऽयुवः। सोमम्। श्रीणन्ति। पृश्नयः। प्रियाः। इन्द्रस्य। धेनवः। वज्रम्। हिन्वन्ति। सायकम्। वस्वीः। अनु। स्वऽराज्यम्॥ ११॥

ताः पूर्वोक्ताअस्येन्द्रस्यपृशनायुवः स्पर्शनकामाः पृश्नयोनानावर्णागावः इन्द्रेणपातव्यं सोमंपयसाश्रीणन्ति मिश्रीकुर्वन्ति इन्द्रस्यप्रियाः प्रीतिहेतुभूतास्ताधेनवः सायकंशत्रूणामन्तकारकं वज्रमायुधंहिन्वन्ति शत्रुषुप्रेरयन्ति इन्द्रोयथाशत्रुषुवज्रंप्रेरयति तथेन्द्रस्यमदमुत्पादयन्तीत्यर्थः अन्यत्पूर्ववत्॥ हिन्वन्ति हिविःप्रीणनार्थः इदित्त्वान्नुम्। सायकं षोन्तकर्मणि ण्वुलिआत्येयुगागमः॥ ११॥

११. इन्द्रदेव की स्पर्शाभिलाषिणी उक्त नाना वर्ण की गायें सोम के साथ अपना दुग्ध पिलाती हैं। इन्द्र की प्यारी गायें शत्रुओं पर सर्व-शत्रु-संहारी वज्र प्रेरित करती हैं। ये गायें इन्द्र का राजत्व लक्ष्य कर अवस्थान करती हैं।

ताअस्यनमसासहःसपर्यन्तिप्रचेतसः।
व्रतान्यस्यसश्चिरेपुरूणिपूर्वचित्तयेवस्वीरनुस्वराज्यम् ॥१२॥

ताः। अस्य। नमसा। सहः। सपर्यन्ति। प्रऽचेतसः। व्रतानि। अस्य। सश्चिरे। पुरूणि। पूर्वऽचित्तये। वस्वीः। अनु। स्वऽराज्यम् ॥ १२॥

प्रचेतसः प्रकृष्टज्ञानास्तागावःअस्येन्द्रस्य सहोवलंनमसास्वकीयेनपयोरूपेणान्नेनसपर्य-न्तिपरिचरन्ति पुरूणिवहूनि अस्येन्द्रस्यव्रतानि शत्रुवधादिरूपाणि वीर्यकर्माणिसश्चिरे सिषेवि-रे ज्ञापयन्तइत्यर्थः किमर्थं पूर्वचित्तये युयुत्सूनांशत्रूणांपूर्वमेवप्रज्ञापनाय अनेनयुध्यमानावृत्रा-दयःसर्वेमरणंप्राप्ताः किमर्थंभवद्भिःप्राणास्त्यज्यन्तेइतितेषांवोधनायेत्यर्थः अन्यत्पूर्ववत् ॥ सश्चिरे सश्चगतौ व्यत्ययेनात्मनेपदम्। पूर्वचित्तये चितीसंज्ञाने भावेक्तिन् मरुद्वृधादित्वात् पूर्व-पदान्तोदात्तत्वम् ॥ १२ ॥

१२. ये प्रकृष्ट-ज्ञान-युक्त गायें अपने दुग्ध-रूप अन्न-द्वारा इन्द्र के बल की पूजा करती हैं। ये गायें युद्धकामी शत्रुओं को पहले से ही, परिज्ञान के लिए, इन्द्र के शत्रु-विनाश आदि अनेक कार्यों को घोषित करती हैं। ये गायें इन्द्र का राजत्व लक्ष्य कर अवस्थित हैं।

चातुर्विंशिकेहनिप्रातःसवने ब्राह्मणाच्छंसिनःशस्त्रे इन्द्रोदधीचइतिषळहस्तोत्रियसंज्ञक-स्तृचः सूत्रितंच—आदहस्वधामन्विन्द्रोदधीचोअस्थभिरिति।

तृचेप्रथमांसूक्तेत्रयोदशीमृचमाह—

इन्द्रो॑ द॒धी॒चो अ॒स्थभि॑र्वृ॒त्राण्यप्र॑तिष्कुतः। ज॒घान॑ नव॒तीर्नव॑ ॥१३॥

इन्द्रः॑। द॒धी॒चः। अ॒स्थऽभिः॑। वृ॒त्राणि॑। अप्र॑तिऽस्कुतः। ज॒घान॑। न॒व॒तीः। नव॑ ॥ १३ ॥

अत्रशाट्यायनिनइतिहासमाचक्षते—आथर्वणस्यदधीचोजीवतोदर्शनेनअसुराःपराबभूवुः अथतस्मिन्स्वर्गते असुरैःपूर्णापृथिव्यभवत् अथेन्द्रस्तैरसुरैःसहयोद्धुमशक्नुवंस्तमृषिमन्विच्छन् स्वर्गंगतइतिशुश्राव अथपप्रच्छतत्रत्यान् नेहकिमस्याकिंचित्परिशिष्टमङ्गमस्तीति तस्मैअवोच-न् अस्त्येतदाश्वंशीर्षं येनशिरसाअश्विभ्यांमधुविद्यांप्राब्रवीत् तत्तुनविद्मयत्राभवदिति। पुनरि-न्द्रोऽब्रवीत् तदन्विच्छतेति तद्धान्वेषिषुः तच्छर्यणावत्यनुविद्याजह्रुः शर्यणावद्धवैनामकुरुक्षेत्र-स्यजघनार्धेसरःस्यन्दते तस्यशिरसोऽस्थिभिरिन्द्रोऽसुरान्जघानेति। अप्रतिष्कुतः परैरप्रतिशब्दि-तः प्रतिकूलशब्दरहितः इन्द्रःआथर्वणस्यदधीचः एतत्संज्ञकस्यऋषेः अस्थभिःअश्वशिरःसंब-न्धिभिरस्थिभिः नवतीर्नवनवसंख्याकानवतीःदशोत्तराष्टशतसंख्याकाः तथाहिलोकत्रयवर्तिनो-देवान्जेतुंआदावासुरीमायात्रिधासंपद्यते त्रिविधाअतीतानागतवर्तमानकालभेदेनतत्कालवर्तिनो-देवान्जेतुंपुनरपिप्रत्येकंत्रिगुणिताभवति एवंनवसंपद्यते पुनरपिउत्साहादिशक्तित्रयरूपेणत्रैगुण्ये सतिसप्तविंशतिःसंपद्यते पुनःसात्विकादिगुणत्रयभेदेनत्रैगुण्येसतिएकोत्तराअशीतिःसंपद्यते ए-वंचतुर्भिस्त्रिकैर्गुणितायामायायाः दशसुदिक्षुप्रत्येकमवस्थानेसति नवनवतयः संपद्यन्ते एवंवि-धानिमायारूपाणिवृत्राणिआवरकाणिअसुरजातानिजघानहतवान् ॥ दधीचः दधिअञ्चतीति

दध्यङ् अञ्चतेर्ऋत्विगित्यादिनाक्विन् अनिदितामितिनलोपः षष्ठ्येकवचनेअचइत्यकारलोपे चावितिदीर्घत्वम् उदात्तनिवृत्तिस्वरेणविभक्त्युदात्तत्वेप्राप्तेतदपवादतया चावितिपूर्वपदस्यान्तोदात्तत्वंप्राप्तम् अञ्चेश्छन्दस्यसर्वनामस्थानमितिपुनर्विभक्त्युदात्तत्वविधानेनतद्बाध्यते। अस्थभिः छन्दस्यपिदृश्यतइतिअनजादावपिअस्थिशब्दस्यानङादेशः सचोदात्तः ॥ १३ ॥

१३. अप्रतिद्वन्द्वी इन्द्र ने दधीचि ऋषि की हड्डियों से वृत्र आदि असुरों को नवगुण-नवति या ८१० बार मारा था।

इच्छन्नश्वस्य यच्छिरः पर्वतेष्वपश्रितम्। तद्विदच्छर्यणावति॥१४॥

इच्छन्। अश्वस्य। यत्। शिरः। पर्वतेषु। अपऽश्रितम्। तत्। विदत्। शर्यणाऽवति॥ १४॥

पर्वतेषुपर्ववत्सुगिरिषु अपश्रितं अपगत्यश्रितं अश्वस्यअश्वसंबन्धिदधीचोयच्छिरः इच्छन्निन्द्रोवर्तते शर्यणावतिएतत्संज्ञकेसरसितच्छिरोविदत् अज्ञासीत् ज्ञात्वातदाहृत्यतदीयैरस्थिभिर्वृत्राणिजघानेतिपूर्वस्यामृचिसंबन्धः॥ इच्छन् इषइच्छायां तुदादित्वाच्छप्रत्ययः। विदत् वेत्तेर्लुङिव्यत्ययेनच्लेरङादेशः। शर्यणावति शर्यणानामदेशाः तेषामदूरभवंसरः शर्यणावत् मध्वादिषुशर्यणाशब्दस्यपाठात् मध्वादिभ्यश्चेतिचातुरर्थिकोमतुप् संज्ञायामितिमतुपोवत्वम् मतौबह्वचोनजिरादीनामितिदीर्घः॥ १४॥

१४. पर्वत में छिपे हुए दधीचि के अश्व-मस्तक को पाने की इच्छा से इन्द्र ने उस मस्तक को शर्यणावति नाम के सरोवर में प्राप्त किया।

अतिमूर्तिनाम्न्येकाहेकर्तव्येपूर्वमेवैकंमासंसूर्याचन्द्रमसीभ्यामिष्टिभ्यांयष्टव्यम् तत्रपूर्वपक्षे चान्द्रमसीष्टिः अत्राहगोरितितस्यांप्रधानस्यानुवाक्या अतिमूर्तिनेतिखण्डेसूत्रितम्—अत्राहगोरमन्वतनवोनवोभवविजायमानइति।

तामेतांसूक्तेपञ्चदशीमृचमाह—

अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम्। इत्था चन्द्रमसो गृहे॥१५॥७॥

अत्र। अह। गोः। अमन्वत। नाम। त्वष्टुः। अपीच्यम्। इत्था। चन्द्रमसः। गृहे॥ १५॥ ७॥

अत्राहअस्मिन्नेवगोर्गन्तुश्चन्द्रमसोगृहेमण्डले त्वष्टुर्दीप्तस्यसंबन्धिअपीच्यं रात्रावन्तर्हितंस्वकीयंयन्नामतेजःतदादित्यरश्मयः इत्थाइत्थमनेनप्रकारेणअमन्वतअजानन् उदकमयेस्वच्छेच-

न्द्रबिम्बे सूर्यकिरणाःप्रतिफलन्ति तत्रप्रतिफलिताःकिरणाः सूर्येयादृशींसंज्ञांलभन्ते तादृशींच-न्द्रेऽपिवर्तमानालभन्तइत्यर्थः एतदुक्तंभवति यद्वात्रावन्तर्हितंसौरंतेजस्तच्चन्द्रमण्डलंप्रविश्यअ-तीवनैशंतमोनिवार्यसर्वंप्रकाशयति ईदृग्भूततेजसायुक्तःसूर्यश्चेन्द्रएव द्वादशस्वादित्येष्विन्द्रस्या-पिपरिगणितत्वात् अतोहोरात्रयोःप्रकाशकइन्द्रएवेतिइन्द्रस्तुतेःप्रतीयमानत्वादिन्द्रोदेवतेत्येतदु-पपन्नंभवति ईदृग्भूतस्यतेजसः आश्रयत्वेनचन्द्रमसःप्राधान्यविवक्षयाचान्द्रमस्यामिष्टौविनि-योगोऽप्युपपद्यते अत्रनिरुक्तम्—अथाप्यस्यैकोरश्मिश्चन्द्रमसंप्रतिदीप्यतेतदेतेनोपेक्षितव्यमादि-त्यतोस्यदीप्तिर्भवतीतिसुषुम्नःसूर्यरश्मिश्चन्द्रमागन्धर्वइत्यपिनिगमोभवति सोऽपिगौरुच्यतेअत्रा-हगोरमन्वतेति।अत्रैहगोःसममंसतादित्यरश्मयःस्वन्नामापीच्यमपचितमपगतमपहृतमनन्तर्हितंवे-ति ॥अमन्वत मनुअवबोधने ।अपीच्यम् अपिपूर्वाच्चिनोतेरघ्न्यादयश्चेतिनिपातनाद्यत् अतएवा-भिमतरूपसिद्धिः यद्वा अपिपूर्वादञ्चतेर्ऋत्विगित्यादिनाक्विन् अनिदितामितिनलोपः अपिगतेनि-गतेभवमपीच्यं भवेछन्दसीतियत् अचइत्यकारलोपेचावितिदीर्घत्वम् तित्स्वरितः अपीच्योप्रका-शइतिभट्टभास्करमिश्रः। इत्था इदम्शब्दात्थाहेतौचच्छन्दसीतिप्रकारवचनेथाप्रत्ययः यदित्रे-दम्शब्दोनानुवर्तते तदानीमिदमस्थमुरितिथमुप्रत्ययः अव्ययादाप्सुपइतिसुब्लुकंबाधित्वासुपां-सुलुगितिडादेशः। चन्द्रमसः चन्द्रमाह्लादनंमिमीतेनिर्मिमीतइतिचन्द्रमाः चन्द्रेमोडिदित्यसिप्र-त्ययः दासीभारादिषुपठितत्वात्पूर्वपदप्रकृतिस्वरत्वम् पूर्वपदंच स्फायितञ्चीत्यादिनारक्प्रत्यया-न्तमन्तोदात्तम् ॥ १५ ॥

१५. इस गमनशील चन्द्रमण्डल में अन्तर्हित जो त्वष्टृ-तेज या सूर्य-तेज है, वह आदित्य-रश्मि ही है—ऐसा जानो।

॥ इतिप्रथमस्यषष्ठेसप्तमोवर्गः ॥ ७ ॥

सर्वपृष्ठायामिष्टौकायस्यहविषः कोअद्येतिद्वेऋचौयाज्यानुवाक्ये सूत्रितंच—कायंदशमंको-अद्ययुंक्तेधुरिगाऋतस्येतिद्वेइति।

तत्रप्रथमांसूक्तेषोडशीमृचमाह—

कोअ॒द्य यु॑ङ्क्ते धु॒रि गा ऋ॒तस्य॒ शिमी॑वतो भा॒मिनो॑ दुर्हृणा॒यून्।
आ॒सन्नि॑षून्हृ॒त्स्वसो॑ मयो॒भून्य ए॑षां भृ॒त्यामृ॒णध॒त्स जी॑वात् ॥ १६ ॥

---

१ नि० २.६.।   २ नि० ४.२५.।

कः । अद्य । युङ्क्ते । धुरि । गाः । ऋतस्य । शिमीऽवतः । भामिनः ।
दुःऽहृणायून् । आसन्ऽइषून् । हृत्सुऽअसः । मयःऽभून् । यः ।
एषाम् । भृत्याम् । ऋणधत् । सः । जीवात् ॥ १६ ॥

अद्यास्मिन्कर्मणिऋतस्यगच्छतइन्द्रसंबन्धिनोरथस्यधुरिअश्ववहनप्रदेशेगाः गतिमतो-ऽश्वान्कोयुङ्क्ते कोनामनियोक्तुंशक्नोति नकोपीत्यर्थः कीदृशानश्वान् शिमीवतः वीर्यकर्मोपेता-न्भामिनः तेजसायुक्तान् दुर्हृणायून् परैर्दुःसहेनक्रोधेनयुक्तान् हृणीयतिःक्रुध्यतिकर्मा आसन्नि-षून् येषामासन्यास्येमुखप्रदेशेशत्रूणांप्रहरणार्थमिषवोबाणाबद्धास्तान् हृत्स्वसः हृत्सुशत्रूणांहृद-येषुअस्यन्तिस्वकीयंपादंक्षिपन्तीतिहृत्स्वसः मयोभून्मयसःसुखस्यभावयितॄन्स्वकीयानांसुखप्रदा-नित्यर्थः योयजमानएषामीदृशानामश्वानांभृत्यांभरणक्रियांरथवाहनक्रियां ऋणधत्समर्धयति स्तौतीतियावत् सयजमानःजीवात्जीवनवान्भवेत् यद्वा कइतिप्रजापतिरुच्यते कोहवैनाम-प्रजापतिरितिश्रुतेः । ऋतस्ययज्ञस्यधुरिनिर्वाहे गाः वेदरूपान्वाग्विशेषान्अद्यइदानींयुङ्क्ते संयो-जयति कीदृशान्शिमीवतः प्रतिपाद्यैःकर्मभिर्युक्तान् भामिनःउज्ज्वलान् दुर्हृणायून् हृणीयति-र्हानिकर्मा हातुंअशक्यान् वेदाध्ययनस्यनित्यत्वात् आसन्निषून् आसन्यास्येइषुरेषणंगमनमुच्चा-रणंयेषांतान् हृत्स्वसः हृत्सुहृदयेषुदीप्यमानान्प्रकाशमानानित्यर्थः मयोभून्मयसः अध्ययन-प्रभवस्यसुखसाधनस्यादृष्टस्यभावयितॄन्योयजमानः एषांवचसांभृत्यांभरणक्रियां ऋणधत् ऋ-द्धिमतींकरोति सजीवात् सएवजीवेत् अन्येजीवन्मृताइत्यर्थः॥ दुर्हृणायून् हृणीङ्लज्जायां कण्ड्वा-दित्वाद्यक् बहुलवचनादस्मादुण्प्रत्ययः अतोलोपेसतिवर्णव्यत्ययेनाकारः मृगय्वादिर्वाद्रष्ट-व्यः । आसन्निषून् पद्न्नित्यादिनाआस्यशब्दस्यासन्नादेशः इषगतावित्यस्मादिषेःकिच्चेत्युप्र-त्ययः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । हृत्स्वसः असुक्षेपणे असगतिदीप्त्यादानेषु क्विप्चेतिक्विप् तत्पुरुषेकृतिबहुलमित्यलुक् कृदुत्तरपदप्रकृतिस्वरत्वम् । मयोभून् व्यत्ययेनह्रस्वत्वं यद्वा मितद्र्वा-दिभ्यउपसंख्यानमितिडुप्रत्ययः । भृत्यां भृञ्भरणे संज्ञायांसमजनिषदेतिक्यप् उदात्तइत्यनुवृ-त्तेःप्रत्ययस्योदात्तत्वम् । ऋणधत् ऋधुवृद्धौ लेटिव्यत्ययेनश्नम् लेटोडाटावित्यडागमः इतश्चलो-पइतीकारलोपः । जीवात् जीवप्राणधारणे पूर्ववल्लेट्चाडागमः ॥ १६ ॥

१६. आज इन्द्र की गतिशील रथ-धुरी में वीर्य-युक्त, तेजोमय, दुःसह क्रोध-सम्पन्न घोड़े को कौन संयोजित कर सकता है? उन घोड़ों के मुख में बाण आबद्ध हैं। कौन शत्रुओं के हृदयों में पाद-क्षेप और मित्रों को सुख प्रदान करते हैं—अर्थात् वे ही अश्व, जो इन अश्वों के कार्यों की प्रशंसा करते हैं। वे दीर्घ जीवन प्राप्त करते हैं।

कईषतेतुज्यतेकोबिभायकोमंसतेसन्तमिन्द्रंकोअन्ति ।
कस्तोकायकइभायोतरायेधिब्रवत्तन्वेकोजनाय ॥ १७ ॥

कः । ईषते । तुज्यते । कः । बिभाय । कः । मंसते । सन्तम् । इन्द्रम् । कः । अन्ति । कः । तोकाय । कः । इभाय । उत । राये । अधि । ब्रवत् । तन्वे । कः । जनाय ॥ १७ ॥

अनुग्रहीतरीन्द्रेआगतेसतिकईषते शत्रोर्भीतःसन्कोनिर्गच्छतिनकोऽपीत्यर्थः कस्तुज्यतेकोहिंस्यते शत्रुभिर्हिंस्योऽपिकश्चिन्नास्तीत्यर्थः कोयजमानोबिभायबिभेति इन्द्रेरक्षकेसति भयमपिनोत्पद्यते दूरेतस्यशत्रुकृताहिंसा अन्ति अन्तिकेसमीपे सन्तंअस्माकंरक्षकत्वेनवर्तमानमिन्द्रंकःपुरुषोमंसतेजानाति वयमेवजानीमोनान्यइत्यर्थः एकःकःपूरकः युद्धेसहायार्थमिन्द्रेआगतेसति कोयजमानः तोकायपुत्रायअधिब्रवत् हेइन्द्रास्मदीयंपुत्रंरक्षेत्येवंरूपं अधिवचनं पक्षपातेनवचनंब्राह्मणायाधिब्रूयात् इतियथा एवंरूपमधिवचनंकोयजमानःकुर्यात् स्वयमेवेन्द्रोरक्षतीतिभावः इभायगजायकोऽधिब्रवत् उतअपिचराये शत्रुभिरपह्रियमाणायधनायकोऽधिब्रवत् अपह्रियमाणमस्मदीयंधनंरक्षेत्यधिवचनमपि कोयजमानःकुर्यात् नकोपीत्यर्थः अपिचतन्वेस्वकीयायशरीरायजनायपरिजनायचकोधिब्रवत् स्वशरीररक्षार्थंपरिजनरक्षार्थंचेन्द्रस्याधिवचनंनापेक्षितम् स्तुत्याप्रीतइन्द्रः स्वयमेवरक्षतीत्यर्थः यदातु कशब्दाभिधेयस्यप्रजापतेःसंबन्धिनिकर्मणिविनियोगः तदानींपरमैश्वर्ययोगात् इन्द्रशब्देनप्रजापतिरेवाभिधीयते यथाऐन्द्र्यागार्हपत्यमुपतिष्ठतइतिविनियोगानुसारेणकदाचनेत्यस्यामृचिविद्यमानइन्द्रोगार्हपत्यपरतयानीयतेतद्वत् ॥ ईषते ईषगतिहिंसादर्शनेषु भौवादिकआत्मनेपदी । तुज्यते तुजहिंसायां कर्मणियक् अदुपदेशाल्लसार्वधातुकानुदात्तत्वेयकएवस्वरःशिष्यते अतिङीतिपर्युदासान्निघाताभावः । मंसते लेट्यडागमः सिब्बहुलंलेटीतिसिप् । अन्ति अन्तिकस्यकादिलोपोबहुलमिति कलोपः । ब्रवत् ब्रवीतेर्लेट्यडागमः । तन्वे तनुशब्दाच्चतुर्थ्येकवचनेजसादिषुछन्दसिवावचनमितिघेर्ङितीतिगुणाभावेयणादेशः उदात्तस्वरितयोर्यणइतिविभक्तेःस्वरितत्वम् ॥ १७ ॥

१७. शत्रुओं के डर से कौन निकलेगा ? शत्रुओं के द्वारा कौन नष्ट होता है ? समीपस्थ इन्द्र को कौन रक्षक-रूप से जानता है ? कौन पुत्र के लिए, अपने लिए, धन के लिए, शरीर की रक्षा के लिए अथवा परिजन की रक्षा के लिए इन्द्र के पास प्रार्थना करता है ?

अष्टादशीमृचमाह—

कोअग्निमीट्टे हविषाघृतेनस्रुचायजातामृतुभिर्ध्रुवेभिः ।
कस्मैदेवाआवहानाशुहोमकोमंसतेवीतिहोत्रःसुदेवः ॥१८॥

कः। अग्निम्। ईट्टे। हविषा। घृतेन। स्रुचा। यजातै। ऋतुऽभिः। ध्रुवेभिः। कस्मै। देवाः। आ। वहान्। आशु। होम। कः। मंसते। वीतिऽहोत्रः। सुऽदेवः॥ १८॥

कोयजमानोऽग्निमीट्टे इन्द्रार्थंहविर्निरूप्य अग्निंस्तौतिइन्द्रायहविर्निर्वापोऽपि सम्यक्कर्तुंन शक्यते इन्द्रस्यदुर्विज्ञानत्वात् कोवाइन्द्रयागार्थंअग्निंस्रुचाजुहुयाध्रुवेभिः ध्रुवैर्नित्यैः ऋतुभिःवसन्तादिकालैः उपलक्षितेनघृतेन हविषायजातै यजेत् यद्वा ऋतवः प्रयाजदेवताः ऋतवोवैप्रयाजाइतिश्रुतेः। ताभिर्ध्रुवैःप्रकृतावनुष्ठेयतयानिश्चलैर्ऋतुभिःसहअग्निं आज्यभागदेवतांघृतेनहविषाकोयजेत् नकोऽपीत्यर्थः कस्मैयजमानाय होमह्वातव्यंप्रशस्यंधनं आशुशीघ्रंदेवाः आवहान्आवहन्ति प्रयच्छन्तिनकस्माअपीत्यर्थः इन्द्रएवधनस्यदातानान्येदेवाइतिइन्द्रःस्तूयते वीतिहोत्रः प्राप्तयज्ञः सुदेवःशोभनदेवताकः कोयजमानोमंसते इन्द्रंसम्यक्जानाति नकोपीत्यर्थः बहुविधेनस्तोत्रेणचिरकालोपासनेनचेन्द्रःप्रत्यक्षोभवति नान्येनप्रकारेणेतितात्पर्यार्थः॥ ईट्टे ईडस्तुतौ अदादित्वाच्छपोलुक्। स्रुचा सावेकाचइतिविभक्तेरुदात्तत्वम्। यजातै यजतेर्लेट्याडागमः वैतोन्यत्रेत्यैकारः। वहान् वहतेर्लेटयाडागमः इतश्चलोपइतीकारलोपः संयोगान्तस्येतितकारलोपः। होम ह्वयतेःकृतात्वस्यआतोमनिन्क्विनिप्वनिप्चेतिमनिन् ह्वइत्यनुवृत्तौबहुलंछन्दसीति संप्रसारणं यद्वा नामन्सीमन्नित्यादौहोमन्शब्दोमनिन्प्रत्ययान्तोनिपात्यते। मंसते मनज्ञाने लेटयडागमः सिब्बहुलंलेटीतिसिप्। वीतिहोत्रः वीगत्यादिषु अस्मात्कर्मणिमन्त्रेवृषेत्यादिना क्तिन् सचोदात्तः होत्रंहोमः हुयामाश्रुभसिभ्यस्त्रन् इतित्रन्प्रत्ययः वीतिः प्राप्तोहोमोयेन बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्। सुदेवः नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्॥ १८॥

१८. इन्द्र के लिए अग्नि की स्तुति कौन करता है? वसन्त आदि नित्य ऋतुओं को उपलक्ष्य कर पात्र-स्थित हव्यघृत-द्वारा कौन पूजा करता है? इन्द्र को छोड़कर अन्य कौन देवता किस यजमान को तुरत प्रशंसनीय धन प्रदान करते हैं? यज्ञ-निरत और देव-प्रसाद-सम्पन्न कौन यजमान इन्द्र को अच्छी तरह जानता है?

एकोनविंशीमृचमाह—

त्वमङ्गप्रशंसिषोदेवःशविष्ठमर्त्यम्।
नत्वदन्योमघवन्नस्तिमर्डितेन्द्रब्रवीमितेवचः॥१९॥

त्वम्। अङ्ग। प्र। शंसिषः। देवः। शविष्ठ। मर्त्यम्। न। त्वत्। अन्यः। मघऽवन्। अस्ति। मर्डिता। इन्द्र। ब्रवीमि। ते। वचः॥१९

---

१ तै० सं० १. ६. ११.।

अङ्गेत्यभिमुखीकरणे अङ्गशविष्ठ हेबलवत्तमइन्द्र देवोद्योतमानस्त्वं मर्त्यंमरणधर्माणं त्वां स्तुवन्तंपुरुषं प्रशंसिषः सम्यगनेनस्तुतमितिप्रशंस हेमघवन्धनवन्निन्द्र त्वदन्यस्त्वत्तोऽन्यः कश्चिन्मर्डितासुखयितानास्ति अतःकारणात्तेतुभ्यं इदंस्तुतिलक्षणंवचोब्रवीमिउच्चारयामि ॥ शंसिषः शंसुस्तुतौ लेटिसिप्यडागमः सिब्बहुलंलेटीतिविकरणस्यसिप् तस्यार्धधातुकत्वादिडागमः । शविष्ठ अतिशयेनशवस्वीशविष्ठः इष्ठनिविन्मतोर्लुक् टेरितिटिलोपः । मर्डिता मृडसुखने तृचइडागमः ॥ १९ ॥

१९. हे बलिष्ठ देव इन्द्र! स्तुति-परायण मनुष्य की तुम प्रशंसा करो। हे मघवन्! तुम्हें छोड़कर और कोई सुखदाता नहीं है। इसलिए मैं तुम्हारी स्तुति करता हूँ।

मातेराधांसिमातऊतयोवसोस्मान्कदाचनादभन्।
विश्वाचनउपमिमीहिमानुषवसूनिचर्षणिभ्यआ ॥२०॥८॥

मा। ते। राधांसि। मा। ते। ऊतयः। वसो इति। अस्मान्। कदा। चन। दभन्। विश्वा। च। नः। उपऽमिमीहि। मानुष। वसूनि। चर्षणिऽभ्यः। आ ॥ २० ॥ ८ ॥

हेवसोनिवासयितः इन्द्र तेतवसंबन्धीनिराध्नोत्येभिरितिराधांसिभूतानिअस्मान् कदाचन कदाचिदपिमादभन्माविनाशयन्तु तथाऊतयोगन्तारः यद्वा धूतयइत्यत्रवर्णलोपः धूतयः कंपयितारः तेत्वदीयामरुतश्चमादभन् हेमानुषमनुष्यहितेन्द्र चर्षणिभ्यः मन्त्रद्रष्टृभ्यः नोऽस्मभ्यंविश्वा विश्वानिसर्वाणिवसूनिधनानिचआउपमिमीहि सर्वतआहृत्यअस्मत्समीपेकुरु सर्वत्रवर्तमानंधनमस्मभ्यंप्रयच्छेत्यर्थः ॥ कदा किंशब्दात्सर्वैकान्यकिंयत्तदःकालेदेतिदाप्रत्ययः किमःकइतिकादेशः व्यत्ययेनाद्युदात्तत्वम् । दभन् दंभुदंभे लोडर्थे छान्दसेलङि बहुलंछन्दसीतिविकरणस्यलुक् नमाङ्योगेइत्यडभावः। मिमीहि माङ्मानेशब्देच व्यत्ययेनपरस्मैपदं जुहोत्यादित्वाच्छ्लुः भृञामिदित्यभ्यासस्येत्वम् हेर्ङित्वाद्घुमास्थेतीत्वम् ॥ २० ॥

२०. हे निवास-स्थान-दाता इन्द्र! तुम्हारे भूतगण और सहायक रूप शत्रुगण या मरुद्गण हमारा कभी विनाश नहीं करें। हे मनुष्य-हितैषी इन्द्र! हम मंत्रद्रष्टा हैं; तुम हमारे लिए धन ला दो।

॥ इतिप्रथमेमण्डलेत्रयोदशोनुवाकः ॥ १३ ॥

चतुर्दशानुवाकेनवसूक्तानि तत्रप्रयइतिद्वादशर्चंप्रथमंसूक्तम् गोतमस्यार्षं पञ्चमीद्वादश्यौ त्रिष्टुभौ शिष्टाजगत्यः मरुतोदेवताः तथाचानुक्रान्तम्—प्रयेद्वादशमारुतंहपञ्चम्यन्तेत्रिष्टुभाविति।

हशब्दप्रयोगादिदमादीनिचत्वारिसूक्तानिमरुद्देवत्यानि। अभिप्लवषडहस्यचतुर्थेहनिआग्निमारुतेएतत्सूक्तंमारुतनिविद्धानीयम् सूत्रितंच—प्रयेशुंभन्तेजनस्यगोपाइत्याग्निमारुतमिति।

तत्रप्रथमामृचमाह—

प्रयेशुंभन्तेजनयोनसप्तयोयामन्रुद्रस्यसूनवःसुदंससः।
रोदसीहिमरुतश्चक्रिरेवृधेमदन्तिवीराविदथेषुघृष्वयः॥१॥

प्र। ये। शुंभन्ते। जनयः। न। सप्तयः। यामन्। रुद्रस्य। सूनवः। सुऽदंससः। रोदसी इति। हि। मरुतः। चक्रिरे। वृधे। मदन्ति। वीराः। विदथेषु। घृष्वयः॥ १ ॥

येमरुतः यामन्यामनिगमनेनिमित्तभूतेसति प्रशुंभन्ते प्रकर्षेणस्वकीयान्यङ्गान्यलंकुर्वन्ति जनयोन जायाइव यथायोषितः स्वकीयान्यङ्गान्यलंकुर्वन्तितद्वत् कीदृशामरुतः सप्तयः सर्पणशीलाः रुद्रस्यसूनवः रोदयतिसर्वमन्तकालेइतिरुद्रःपरमेश्वरः तस्यपुत्राः सुदंससः शोभनकर्माणः एतदेवोपपादयति हियस्मान्मरुतोरोदसीद्यावापृथिव्यौवृधेवृष्टिप्रदानादिनावर्धनायचक्रिरेकृतवन्तः अतःसुदंससइत्यर्थः वीराःविशेषेणशत्रुक्षेपणशीलाः घृष्वयःघर्षणशीलाः महीरुहशिलोच्चयादेर्भञ्जकाइत्यर्थः एवंभूतास्तेमरुतोविदथेषु विदन्त्येषुयष्टव्यतयादेवानितिविदथायज्ञाः तेषुमदन्तिसोमपानेनहृष्यन्ति॥ शुंभन्ते शुभशुंभदीप्तौ भौवादिकः। जनयः जायन्ते आस्वपत्यानीतिजनयोजायाः इन्सर्वधातुभ्यइतीन्प्रत्ययः। यामन् यामापणे कृत्यल्युटोबहुलमितिवहुलवचनादातोमनिन्नितिभावेमनिन् सुपांसुलुगितिसप्तम्यालुक्। सुदंससः दंसइतिकर्मनाम शोभनंदंसोयेषां सोर्मनसीअलोमोषसीइत्युत्तरपदाद्युदात्तत्वम्। चक्रिरे हिचेतिनिघातप्रतिषेधः। वृधे वृधुवृद्धौ संपदादिलक्षणोभावेक्विप् सावेकाचइतिविभक्तेरुदात्तत्वम्। मदन्ति मदीहर्षे श्यनिप्राप्तेव्यत्ययेनशप् पादादित्वान्निघाताभावः। विदथेषु विदज्ञाने रुदिविदिभ्यांकिदितिअथप्रत्ययः। घृष्वयः घृषुसंघर्षे कुविघृष्वीत्यादिनाविन्प्रत्ययान्तोनिपात्यते॥१॥

१. गमन-वेला में मरुत् लोग, स्त्रियों की तरह, अपने शरीर को सजाते हैं; वे गतिशील रुद्र के पुत्र हैं। उन्होंने हितकर कार्य-द्वारा आकाश और पृथिवी को वर्द्धित किया है। वीर और घर्षणशील मरुद् गण यज्ञ में सोमपान-द्वारा आनन्द प्राप्त करते हैं।

द्वितीयामृचमाह—

तउक्षितासोमहिमानमाशतदिविरुद्रासोअधिचक्रिरेसदः।
अर्चन्तोअर्कंजनयन्तइन्द्रियमधिश्रियोदधिरेपृश्निमातरः॥२॥

ते । उक्षितासः । महिमानम् । आशत । दिवि । रुद्रासः । अधि । चक्रिरे । सदः । अर्चन्तः । अर्कम् । जनयन्तः । इन्द्रियम् । अधि । श्रियः । दधिरे । पृश्निऽमातरः ॥ २ ॥

येपूर्वोक्तगुणविशिष्टास्तेमरुतः उक्षितासोदेवैरभिषिक्ताःसन्तोमहिमानंमहत्त्वं आशत आप्नुवन् रुद्रासोरुद्रस्यपुत्राः उपचाराज्जन्येजनकशब्दः तेरुद्रपुत्रामरुतः दिविद्योतमानेनभसि सदःसदनंस्थानंअधिचक्रिरेअधिकंसर्वोत्कृष्टंकृतवन्तः अर्कमर्चनीयमिन्द्रं अर्चन्तः पूजयन्तः इन्द्रियंइन्द्रस्यलिङ्गंवीर्यंजनयन्तः महरभगवोजहिवीरयस्वेत्येवंरूपेणवाक्येनोत्पादयन्तः पृश्निमातरः पृश्नेर्नानारूपायाभूमेःपुत्रामरुतः श्रियः ऐश्वर्याणिअधिदधिरे आधिक्येनाधारयन् ॥ उक्षितासः उक्षसेचने कर्मणिनिष्ठा आज्जसेरसुक्। महिमानं महच्छब्दात्पृथ्वादिलक्षणइमनिच् टेरितिटिलोपः।आशत अशूव्याप्तौ लङिबहुलंछन्दसीतिविकरणस्यलुक्। इन्द्रियं इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमितिघच्प्रत्ययान्तोनिपात्यते । पृश्निमातरः प्राश्नुतेसर्वाणिरूपाणीतिपृश्निर्भूमिः श्रूयतेच—इयंवैपृश्निः । घृणिपृश्निरित्यादौनिपातनादभिमतरूपसिद्धिः पृश्निर्मातायेषांतेतथोक्ताः नद्यृतश्छन्दसीतिसमासान्तस्यकपःप्रतिषेधः ॥ २ ॥

२. ये मरुद्गण देवों-द्वारा अभिषिक्त होकर महत्त्व प्राप्त कर चुके हैं। रुद्र पुत्रों ने आकाश में स्थान-प्राप्त किया है। पूजनीय इन्द्र की पूजा करके तथा इन्द्र को वीर्यशाली करके पृश्णि या पृथिवी के पुत्र मरुतों ने ऐश्वर्य प्राप्त किया था।

तृतीयामृचमाह—

गोमातरोयच्छुभयन्तेअञ्जिभिस्तनूषुशुभ्रादधिरेविरुक्मतः । बाधन्तेविश्वमभिमातिनमपवर्त्मान्येषामनुरीयतेघृतम् ॥ ३ ॥

गोऽमातरः । यत् । शुभयन्ते । अञ्जिऽभिः । तनूषु । शुभ्राः । दधिरे । विरुक्मतः । बाधन्ते । विश्वम् । अभिऽमातिनम् । अप । वर्त्मानि । एषाम् । अनु । रीयते । घृतम् ॥ ३ ॥

गोमातरः गोरूपाभूमिर्मातायेषांतेमरुतः अञ्जिभिः रूपाभिव्यञ्जकैराभरणैर्यद्यदाशुभयन्ते स्वकीयान्यङ्गानिशोभायुक्तानिकुर्वन्ति तदानींशुभ्रादीप्तामरुतः तनूषुस्वकीयेषुशरीरेषु विरुक्मतोविशेषेणरोचमानानलङ्कारान्दधिरेधारयन्ति अपिचविश्वंसर्वंअभिमातिनंशत्रुंआबाधन्तेहिंसन्ति एषांमरुतांवर्त्मानिमार्गाननुसृत्यघृतंक्षरणशीलमुदकंरीयतेस्रवति यत्रमरुतोगच्छन्तिवृष्ट्यु-

---

१ तै० ब्रा० १. ४. १.

दकमपितदनुसारेणतत्रगच्छतीत्यर्थः॥ शुभयन्ते संज्ञापूर्वकस्यविधेरनित्यत्वाल्लघूपधगुणाभावः। अञ्जिभिः अञ्जूव्यक्तिम्रक्षणकान्तिगतिषु खनिकष्यज्यसिवसिध्वनिस्तनिवनिसनिग्रन्थिचरिभ्यश्चेतिइप्रत्ययः। शुभ्राः शुभदीप्तौ स्फायितञ्चीत्यादिनारक्। विरुक्मतः विशिष्टारुक्विरुक् तद्वन्तोविरुक्मन्तः मतुपिअयस्मयादित्वेनपदत्वात्कुत्वं भत्वाज्जश्त्वाभावः। रीयते रीङ्स्रवणे दैवादिकः॥३॥

३. गौ या पृथिवी के पुत्र मरुद्गण जब अलंकारों-द्वारा अपने को शोभा-सम्पन्न करते हैं, तब दीप्त मरुद्गण अपने शरीर में उज्ज्वल अलंकार धारण करते हैं। वे सारे शत्रुओं का विनाश करते हैं और मरुतों के मार्ग का अनुगमन करके वृष्टि होती है।

वियेभ्राजन्तेसुमखासऋष्टिभिंःप्रच्यावयन्तोअच्युताचिदोजसा। मनोजुवोयन्मरुतोरथेष्वावृषव्रातासःपृषतीरयुग्ध्वम् ॥ ४ ॥

वि। ये। भ्राजन्ते। सुऽमखासः। ऋष्टिऽभिः। प्रऽच्यवयन्तः। अच्युता। चित्। ओजसा। मनःऽजुवः। यत्। मरुतः। रथेषु। आ। वृषऽव्रातासः। पृषतीः। अयुग्ध्वम् ॥ ४ ॥

सुमखासः शोभनयज्ञाःयेमरुतःऋष्टिभिरायुधैर्विभ्राजन्ते विशेषेणदीप्यन्ते तेमरुतःअच्युता चित् च्यावयितुमशक्यानिदृढानिपर्वतादीन्यपि ओजसास्वकीयेनबलेनप्रच्यावयन्तः प्रकर्षेणच्यावयितारः प्रेरयितारोभवन्ति उत्तरार्धःप्रत्यक्षकृतः हेमरुतःमनोजुवः मनोवद्वेगगतयः वृषव्रातासः वृष्ट्युदकसेचनसमर्थसप्तसंघात्मकाः यूयंरथेषुआत्मीयेषुपृषतीः पृषत्यइतिमरुद्वाहनानांसंज्ञा पृषत्योमरुतामित्युक्तत्वात् पृषद्भिःश्वेतबिन्दुभिःयुक्तामृगीःयद्यदाअयुग्ध्वंआभिमुख्येननियुक्ताअकुरुध्वम् तदानींपर्वतादिकंप्रच्यवतइत्यर्थः॥ सुमखासः सर्वेविधयश्छन्दसिविकल्प्यन्तइति नञ्सुभ्यामित्युत्तरपदस्यप्रवृत्त्यभावे बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्। अच्युता शेश्छन्दसिबहुलमितिशेर्लोपः। मनोजुवः जुइतिसौत्रोधातुर्गत्यर्थः क्विब्वचीत्यादिनाक्विब्दीर्घौ। अयुग्ध्वं युजिर्योगे झलोझलीतिसकारलोपः॥ ४ ॥

४. सुन्दर यज्ञ से युक्त मरुद्गण आयुध के द्वारा विशेष रूप से दीप्तिमान् होते हैं। वे स्वयं स्थिर होकर पर्वत आदि को भी अपने बल-द्वारा उत्पादित करते हैं। जिस समय तुम लोग रथ में बिन्दु-चिह्नित मृग संयोजित करते हो, उस समय हे मरुद्गण! तुम लोग मन की तरह वेगवान् और वृष्टि-सेचन-कार्य में नियुक्त होते हो।

प्रयद्रथेषुपृषतीरयुग्ध्वंवाजेअद्रिंमरुतोरंहयन्तः। उतारुषस्यविष्यन्तिधाराश्चर्मेवोदभिर्व्युन्दन्तिभूम ॥५॥

प्र । यत् । रथेषु । पृषतीः । अयुग्ध्वम् । वाजे । अद्रिम् ।
मरुतः । रंहयन्तः । उत । अरुषस्य । वि । स्यन्ति । धाराः ।
चर्मऽइव । उदऽभिः । वि । उन्दन्ति । भूम ॥ ५ ॥

हेमरुतः पृषतीः यद्यथारथेषुमायुग्ध्वं मायूयुजन् किंकुर्वन्तः वाजेअन्नेनिमित्तभूतेसति अद्रिमेघंरंहयन्तः वर्षणार्थमेरयन्तः उततदानीं अरुषस्य आरोचमानस्यसूर्यस्यवैद्युताग्नेर्वासकाशात् वृष्ट्युदकधाराः भवन्तोविष्यन्तिविमुञ्चन्ति विमुक्तास्ताश्चधाराः उदभिरुदकैश्चर्मेवपरिमितमल्पंचर्मयथाअप्रयत्नेनक्लेद्यते एवंभूम सर्वांभूमिंव्युन्दन्तिविशेषेणआर्द्राकुर्वन्ति ॥ रंहयन्तः रहिगतौ। विष्यन्ति षोऽन्तकर्मणि दैवादिकः ओतःश्यनीत्योकारलोपः उपसर्गात्सुनोतीतिषत्वम् । उन्दन्ति पद्दन्नित्यादिनाउदकशब्दस्यउदन्नादेशः । व्युन्दन्ति उन्दीक्लेदने । भूम सुपांसुलुगिति भूमिशब्दादुत्तरस्यामोडादेशः छान्दसंह्रस्वत्वम् ॥ ५ ॥

५. अन्न के लिए मेघ को वर्षणार्थ प्रेरण करके बिन्दुचिह्नित मृग को रथ में लगाओ। उस समय उज्ज्वल सूर्य के पास से वारि-धारा छूटती है तथा जल से सारी भूमि भींग जाती है।

तृतीयसवनेआवोवहन्त्वितिपोतुःप्रस्थितयाज्या सूत्रितंच—आवोवहन्तुसप्तयोरघुष्यदोऽमेवनःसुहवाआहिगन्तनेति ।

आवोवहन्तुसप्तयोरघुष्यदोरघुपत्वानःप्रजिगातबाहुभिः ।
सीदताबर्हिरुरुवःसदस्कृतंमादयध्वंमरुतोमध्वोअन्धसः ॥६॥१॥

आ । वः । वहन्तु । सप्तयः । रघुऽस्यदः । रघुऽपत्वानः । प्र ।
जिगात । बाहुऽभिः । सीदत । आ । बर्हिः । उरु । वः । सदः ।
कृतम् । मादयध्वम् । मरुतः । मध्वः । अन्धसः ॥ ६ ॥ १ ॥

हेमरुतो वोयुष्मान्सप्तयः सर्पणशीलाः अश्वाः आवहन्तु अस्मद्यज्ञंमापयन्तु कीदृशाः सप्तयः रघुष्यदः लघुशीघ्रंस्यन्दमानाः वेगेनगच्छन्तइत्यर्थः रघुपत्वानः लघुशीघ्रंपतन्तोगच्छन्तोयूयं बाहुभिःस्वकीयैःहस्तैःअस्मभ्यंदातव्यंधनमाहत्यप्रजिगातप्रकर्षेणगच्छत हेमरुतोवोयुष्माकंसदःसदनंवेदिलक्षणंस्थानंउरुविस्तीर्णंकृतं तत्रयदास्तीर्णंबर्हिस्तदासीदत तस्मिन्बर्हिष्युपविशत उपविश्यचमध्वोमधुरस्यअन्धसः सोमलक्षणस्यान्नस्यपानेनमादयध्वंहृष्टाभवत ॥ रघुष्यदः रघुस्यन्दन्तइतिरघुष्यदः स्यन्दूप्रस्रवणे क्विप्चेतिक्विप् अनिदितामितिनलोपः कृदुत्तरपदप्रकृतिस्वरत्वम् । रघुपत्वानः पतॢगतौ अन्येभ्योऽपिदृश्यन्तइतिवनिप् । जिगात गास्तुतौ जौहोत्यादिकः जिगातीतिगतिकर्मसुपाठात् अत्रगत्यर्थः लोण्मध्यमबहुवचनस्य तप्तनप्तनथनाश्चेतितबादेशः तस्यपित्त्वेनङित्त्वाभावादीहल्यघोरितीत्वाभावः । सदः अतःकृकमीतिविसर्जनीयस्यसत्वम् । मादयध्वं मदतृप्तियोगे चुरादिरात्मनेपदी ॥६ ॥

६. मरुतो ! तुम्हारे वेगवान् और शीघ्रगामी घोड़े तुम्हें इस यज्ञ में ले आवें। तुम लोग शीघ्र-गन्ता हो—हाथ में धन लेकर आओ। मरुतो ! बिछाये हुए कुशों पर बैठो और मधुर सोमरस का पान कर तृप्त बनो।

तेवर्धन्तस्वतवसोमहित्वनानाकंतस्थुरुरुचक्रिरेसदः ।
विष्णुर्यद्धावद्वृषणंमदच्युतंवयोनसीदन्नधिबर्हिषिप्रिये ॥७॥

ते । अवर्धन्त । स्वऽतवसः । महिऽत्वना । आ । नाकम् । तस्थुः ।
उरु । चक्रिरे । सदः । विष्णुः । यत् । ह । आवत् । वृषणम् ।
मदऽच्युतम् । वयः । न । सीदन् । अधि । बर्हिषि । प्रिये ॥ ७ ॥

तेमरुतः अवर्धन्तवृद्धिंगताः कीदृशाःस्वतवसःस्वाश्रयबलाःनान्यस्यकस्यचित् बलमपेक्षन्ते वृद्धिंप्राप्यच महित्वनामहिम्नामहत्त्वेननाकंस्वर्गंआतस्थुः आस्थितवन्तःसदःसदनंनभोलक्षणंस्थानंचस्वकीयनिवासायउरुविस्तीर्णंचक्रिरे यद्येभ्योमरुद्भ्यः यदर्थंवृषणंकामाभिवर्षकं मदच्युतंमदस्यहर्षस्यआसेकारंयज्ञंविष्णुर्हावत् विष्णुरेवागत्यरक्षति तेमरुतःवयोनपक्षिणो यथा शीघ्रमागच्छन्ति एवंशीघ्रमागत्यबर्हिष्यधि अस्मदीययज्ञेप्रियेप्रीतिकरेसीदन्सीदन्तु उपविशन्तु ॥ तेवर्धन्त स्वरितोवानुदात्तेपदादावित्येकादेशस्यस्वरितत्वम्। महित्वना भावप्रत्ययादुत्तरस्याङ्गेव्यत्ययेननाभावः उदात्तत्वंच यद्वा सुपांसुलुगितिआजादेशोनकारोपजनश्च। तस्थुः नाकमातस्थुश्चसदश्चविस्तीर्णंचक्रिरइतिचार्थप्रतीतेश्चादिलोपेविभाषेतिप्रथमायास्तिङ्विभक्तेर्निघातप्रतिषेधः। यत् सुपांसुलुगितिचतुर्थ्यालुक्। आवत् छान्दसोवर्तमानेलङ्। वृषणं वाषपूर्वस्यनिगमेइतिउपधादीर्घाभावः। मदच्युतं मदंच्योततीतिमदच्युत् च्युतिर्‌आसेचने क्विप्चेतिक्विप्। सीदन् लिङर्थेलेट्चडागमः ॥ ७॥

७. मरुद्गण अपने बल पर बढ़े हैं। अपनी महिमा के कारण स्वर्ग में स्थान प्राप्त कर चुके हैं। इसी प्रकार वास-स्थान विस्तीर्ण कर चुके हैं। जिनके लिए विष्णु मनोरथदाता और आह्लादकर यज्ञ की रक्षा करते हैं, वे ही मरुत् लोग, पक्षियों की तरह, शीघ्र आकर इस प्रसन्नता-दायक कुश पर बैठें।

शूराइवेद्युयुधयोनजग्मयःश्रवस्यवोनपृतनासुयेतिरे ।
भयन्तेविश्वाभुवनामरुद्भ्योराजानइवत्वेषसंदृशोनरः ॥८॥

शूराःऽइव । इत् । युयुधयः । न । जग्मयः । श्रवस्यवः । न ।
पृतनासु । येतिरे । भयन्ते । विश्वा । भुवना । मरुत्ऽभ्यः ।
राजानःऽइव । त्वेषऽसंदृशः । नरः ॥ ८ ॥

इदित्येतत्समुच्चये शूराइवेत् शौर्योपेतायुयुत्सवः पुरुषाइवच युयुधयोन शत्रुभिर्युध्यमानाः पुरुषाइवच जग्मयःशीघ्रंगच्छन्तोमरुतः श्रवस्यवोनश्रवोन्नमात्मनइच्छन्तःपुरुषाइव पृतनासु सङ्ग्रामेषुयेतिरे प्रयतन्ते वृत्रादिभिर्युद्धेव्याप्रियन्ते ताद्दशेभ्योमरुद्भ्योविश्वाभुवनासर्वाणिभूतजातानि भयन्ते बिभ्यति येनरोवृष्ट्यादेर्नेतारोमरुतः राजानइव राजमानानृपतयइवत्वेषसंदृशः दीप्तसंदर्शनाउग्ररूपतयाद्रष्टुमशक्याभवन्तितेभ्यइत्यर्थः ॥ युयुधयः युधसंप्रहारे आदृगमहनजनइत्यत्रोत्सर्गश्छन्दसीतिवचनात्किन्प्रत्ययः लिड्वद्भावाद्द्विर्भावादि कित्त्वाद्गुणाभावः नित्त्वादाद्युदात्तत्वम् । जग्मयः तेनैवसूत्रेणकिन्प्रत्ययः गमहनेत्यादिनोपधालोपः स्थानिवद्भावाद्द्विर्भावादि । श्रवस्यवः श्रवइच्छतिश्रवस्यति क्याच्छन्दसीत्युप्रत्ययः । येतिरे यतीप्रयत्ने छन्दसिलुङ्लङ्लिटइतिवर्तमानेलिट् । भयन्ते ञिभीभये बहुलंछन्दसीतिशपःश्लोरभावः । त्वेषसंदृशः त्विषदीप्तौ पचाद्यच् दृशिर्प्रेक्षणे संपूर्वादस्मात्संपदादिलक्षणोभावेक्विप् बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् ॥ ८ ॥

८. शूरों, युद्धार्थियों तथा कीर्त्ति या अन्न के प्रेमी पुरुषों की तरह शीघ्रगामी मरुद्गण संग्राम में लिप्त हुए हैं। सारा विश्व उन मरुतों से डरता है । ये नेता हैं एवं राजा की तरह उग्र-रूप हैं।

नवमीमृचमाह—

त्वष्टायद्वज्रंसुकृतंहिरण्ययंसहस्रभृष्टिंस्वपाअवर्तयत् ।
धत्तइन्द्रोनर्यपांसिकर्तवेहन्वृत्रंनिरपामौब्जदर्णवम् ॥ ९ ॥

त्वष्टा । यत् । वज्रम् । सुऽकृतम् । हिरण्ययम् । सहस्रऽभृष्टिम् ।
सुऽअपाः । अवर्तयत् । धत्ते । इन्द्रः । नरि । अपांसि । कर्तवे ।
अहन् । वृत्रम् । निः । अपाम् । औब्जत् । अर्णवम् ॥ ९ ॥

स्वपाः शोभनकर्मा त्वष्टाविश्वनिर्माता यद्वज्रं अवर्तयत् इन्द्रंप्रत्यगमयत् दत्तवानित्यर्थः कीदृशंसुकृतंसम्यङ्निष्पादितं हिरण्ययं सुवर्णमयंसहस्रभृष्टिंअनेकाभिर्धाराभिर्युक्तं तद्वज्रंइन्द्रोधत्ते धारयति किमर्थं नरिअस्मन्नृसंबन्धाय नृशब्देनसंग्रामोऽभिधीयते संग्रामेअपांसि शत्रुहननादिलक्षणानिकर्माणिकर्तवेकर्तुं एवंवज्रंधृत्वा तेनवज्रेणवृत्रंवृष्ट्युदकस्यावरकं अर्णवं अर्णसोदकेनयुक्तंमेघंअहनअवधीत् अपां तेननिरुद्धाअपश्च निरौब्जत्निःशेषेणाधोमुखंअपातयत् प्रवृद्धाअकरोदित्यर्थः ॥ सुकृतं सुपूर्वात्करोतेःकर्मणिनिष्ठा गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम् । हिरण्ययं हिरण्यशब्दादुत्तरस्यमयटोमकारस्यलोपः ऋत्व्यवास्त्व्यवास्त्वेत्यादिनानिपात्यते।

स्वपाः सोर्मनसीअलोमोषसीइत्युत्तरपदाद्युदात्तत्वम्। कर्तवे तुमर्थेसेसेनितिकरोतेस्तवेन्प्रत्ययः। अपां क्रियाग्रहणंकर्तव्यमितिकर्मणःसंप्रदानत्वाच्चतुर्थ्यर्थेषष्ठी ऊडिदमितिविभक्तेरुदात्तत्वम्। औजव् उब्जआर्जवे। अर्णवं अर्णसोलोपश्चेतिमत्वर्थीयोवः सलोपश्च ॥ ९ ॥

९. शोभन-कर्मा त्वष्टा ने जो सुनिर्मित, सुवर्णमय और अनेक-धारा-सम्पन्न वज्र इन्द्र को दिया था, उसे ही इन्द्र ने लड़ाई में कार्य-साधन करने के लिए लेकर जल-युक्त मेघ या वृत्र को वध किया था तथा वारि-धारा गिराई थी।

ऊर्ध्वंनुनुद्रेवतंतओजसादादृहाणंचिद्बिभिदुर्विपर्वतम्।
धमन्तोवाणंमरुतःसुदानवोमदेसोमस्यरण्यानिचक्रिरे ॥१०॥

ऊर्ध्वम्। नुनुद्रे। अवतम्। ते। ओजसा। दादृहाणम्। चित्। बिभिदुः। वि। पर्वतम्। धमन्तः। वाणम्। मरुतः। सुऽदानवः। मदे। सोमस्य। रण्यानि। चक्रिरे ॥ १० ॥

अत्रेयमाख्यायिका—गोतमऋषिःपिपासयापीडितःसन्मरुतःउदकंययाचे तदनन्तरं मरुतोदूरस्थंकूपमुद्धृत्ययत्रसगोतमऋषिस्तिष्ठतितांदिशंनीत्वाऋषिसमीपेकूपमवस्थाप्य तत्पार्श्वे आहावंचकृत्वा तस्मिन्नाहावेकूपमुत्सिच्यतमृषिंतेनोदकेनतर्पयांचक्रुः अयमर्थोनयोत्तरयाचप्र-तिपाद्यते—तेमरुतः अवतं अवस्तावत्ततोभवतीतिअवतःकूपः कूपनामसुच अवतःअवटइतिप-ठितम् तमूर्ध्वंउपरियथाभवतितथाओजसास्वकीयेनबलेन नुनुद्रेप्रेरितवन्तः उत्खातवन्तइत्य-र्थः एवंकूपमुत्खायऋषेराश्रमंप्रतिनयन्तोमरुतः मार्गमध्येदादृहाणंप्रवृद्धंगतिनिरोधकं पर्वतंचिव् पर्ववन्तंशिलोच्चयमपिविबिभिदुःविशेषेणबभंजुः सुदानवःशोभनदानास्तेमरुतः वाणंशतसं-ख्याभिस्तन्त्रीभिर्युक्तंवीणाविशेषंधमन्तोवादयन्तः सोमस्यमदे सोमपानेनहर्षेसति रण्यानिस्तु-त्यानिरमणीयानिधनानिचक्रिरे स्तोतृभ्यःकुर्वन्ति ॥ नुनुद्रे णुदप्रेरणे लिटि इरयोरेइतिरे-आदेशः। दादृहाणं दृहदृहिवृद्धौ लिटःकानच्। धमन्तः ध्माशब्दाग्निसंयोगयोः पाघ्रेत्या-दिनाधमादेशः। वाणं अणरणवणशब्दार्थाः कर्मणिघञ्. कर्षात्वतइत्यन्तोदात्तत्वम्। रण्यानि रणवेर्भावे वशिरण्योरुपसंख्यानमित्यप् ततोभवेछन्दसीतियत् यतोनावइत्याद्युदात्तत्वम्॥ १०॥

१०. मरुतों ने अपने बल पर कूप को ऊपर उठाकर पथनिरोधक पर्वत को भिन्न किया था। शोभन-दानशील मरुतों ने वीणा बाजा बजाकर तथा सोमपान से प्रसन्न होकर रमणीय धन दिया था।

जिह्मंनुनुद्रेवतंतयादिशासिञ्चन्नुत्संगोतमायतृष्णजे।
आगच्छन्तीमवसाचित्रभानवःकामंविप्रस्यतर्पयन्तधामभिः ॥११॥

जिह्मम् । नुनुद्रे । अवतम् । तया । दिशा । असिंञ्चन् । उत्सम् ।
गोतमाय । तृष्णऽजे । आ । गच्छन्ति । ईम् । अवसा ।
चित्रऽभानवः । कामम् । विप्रस्य । तर्पयन्त । धामऽभिः ॥ ११ ॥

मरुतः अवतंउद्धृतंकूपंयस्यांदिशिऋषिर्वसतितयादिशाजिह्मंवक्रं तिर्यञ्चंनुनुद्रे प्रेरितवन्तः एवंकूपंनीत्वाऋष्याश्रमेवस्थाप्यतृष्णजेतृषितायगोतमायऋषयेतदर्थंउत्संजलप्रवाहंकूपादुद्धृत्य असिञ्चन्आहावेअवानयन् एवंकृत्वा ईमेनंस्तोतारमृषिंचित्रभानवः विचित्रदीप्तयस्तेमरुतः अवसाईदृशेनरक्षणेनसहआगच्छन्तितत्समीपंप्राप्नुवन्ति प्राप्यचविप्रस्यमेधाविनोगोतमस्यकाम-मभिलाषंधामभिरायुषोधारकैरुदकैस्तर्पयन्तअतर्पयन् ॥ तया नगोश्वन्त्सावववर्णेतिसावेकाचइ-तिप्राप्तस्यविभक्त्युदात्तस्यप्रतिषेधः । दिशा सावेकाचइतिविभक्तेरुदात्तत्वम् । तृष्णजे ञितृ-षापिपासायां स्वपितृषोर्नजिङ् प्रत्ययाद्युदात्तत्वम् पदकारस्यशाकल्यस्यत्वयमभिप्रायः अ-न्येभ्योपिदृश्यतइतिदृशिग्रहणात् केवलादपिजनेर्डप्रत्ययः तृष्णाजातायस्यसतथोक्तः ङ्यापोःसं-ज्ञाछन्दसोर्बहुलमितिह्रस्वत्वं बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । धामभिः दधातेरातोमनिन्निति म-निन् ॥ ११ ॥

११. मरुतों ने उन गोतम की ओर कूप को टेढ़ा किया तथा पिपासित गोतम ऋषि के लिए जल का सिंचन किया। विलक्षण दीप्ति से युक्त मरुत् लोग रक्षा के लिए आये एवं जीवनोपाय जल-द्वारा मेधावी गोतम की तृप्ति की।

मारुतेपशौयावःशर्मेतिहविषोयाज्या प्रदानानामितिखण्डेसूत्रितम्—अराइवेदचरमाअहे-वयावःशर्मशशमानायसन्तीति ।

यावःशर्मशशमानायसन्तित्रिधातूनिदाशुषेयच्छताधि ।
अस्मभ्यंतानिमरुतोवियन्तरयिंनोधत्तवृषणःसुवीरम् ॥१२॥ १०॥

या । वः । शर्म । शशमानाय । सन्ति । त्रिऽधातूनि । दाशुषे ।
यच्छत । अधि । अस्मभ्यम् । तानि । मरुतः । वि । यन्त । रयिम् ।
नः । धत्त । वृषणः । सुऽवीरम् ॥ १२ ॥ १० ॥

हेमरुतः वोयुष्माकंसंबन्धीनि या यानिशर्मशर्माणिसुखानिगृहाणिवा कीदृशानि त्रिधातू-निपृथिव्यादिषुत्रिषुस्थानेष्ववस्थितानि शशमानायुष्मान्स्तुतिभिःभजमानायदातुंसंपादितानि

पूर्वोक्तलक्षणानिशर्माणियानिसन्ति यानिचदाशुषेहविर्दत्तवतेयजमानायअधियच्छतअधिकंप्रयच्छथ हेमरुतः तानिसर्वाणिशर्माण्यस्मभ्यंवियन्त विशेषेणप्रयच्छत किञ्च हेवृषणः कामानांवर्षितारोमरुतः नोऽस्मभ्यंसुवीरंशोभनैर्वीरैःपुत्रादिभिर्युक्तंरयिंधनंधत्त दत्त॥ या शेश्छन्दसिबहुलमितिशेर्लोपः। शर्म सुपांसुलुगितिजसोलुक्। शशमानाय शशप्लुतगतौ ताच्छील्यकश्चानश्। यच्छत छान्दसेलङिबहुलंछन्दस्यमाङ्योगेपीत्यडभावः। यन्त यमेर्लोटिबहुलंछन्दसीतिशपोलुक् तप्तनप्तनथनाश्चेतितस्यतबादेशः अतस्तस्यपित्त्वेनङित्त्वाभावादनुदात्तोपदेशेत्यादिनानुनासिकलोपोनभवति। वृषणः वापपूर्वस्यनिगमेइत्युपधादीर्घाभावः। सुवीरं बहुव्रीहौवीरवीर्यौचेत्युत्तरपदाद्युदात्तत्वम्॥ १२ ॥

१२. मरुतो! पृथिवी आदि तीनों लोकों में अपने स्तोताओं को देने लायक़ जो तुम्हारे पास सुख है, उसे तुम लोग हव्यदाता को प्रदान करो। वह सब हमें दो। हे अभीष्टफलप्रद! हमें वीर-पुत्र आदि से युक्त धन दो।

॥ इतिप्रथमस्यषष्ठेदशमोवर्गः ॥ १० ॥

मरुतोयस्येतिदशर्चंद्वितीयंसूक्तम् गोतमस्यार्षंगायत्रंमरुद्देवताकं अनुक्रम्यतेच-मरुतोदशगायत्रमिति। व्यूढेतृतीयेछन्दोमेआग्निमारुतशस्त्रेएतत्सूक्तं तृतीयस्यागन्ममहेतिखण्डेसूत्रितम्—मरुतोयस्यहिमाग्नयेवाचमित्याग्निमारुतमिति। ऐन्द्रामारुत्यांप्रधानस्यहविषोमरुतोयस्येत्येषानुवाक्या सूत्रितंच—ऐन्द्रामारुतींभेदकामामरुतोयस्यहिक्षयइति। एषैववरुणप्रघासेमारुत्याआमिक्षायाअनुवाक्या सूत्रितंच—मरुतोयस्यहिक्षयेराइवेदचरमाअहेवेति। तथाप्रातःसवनेपोतुरेषाप्रस्थितयाज्या सूत्रितंच—मरुतोयस्यहिक्षयेऽग्नेपत्नीरिहावहेति।

मरुतोयस्यहिक्षयेपाथादिवोविमहसः। ससुगोपातमोजनः ॥१॥

मरुतः। यस्य। हि। क्षये। पाथ। दिवः। विऽमहसः। सः। सुऽगोपातमः। जनः ॥१॥

हेविमहसोविशिष्टप्रकाशामरुतः दिवोन्तरिक्षलोकादागत्य यस्यहियस्यखलुयजमानस्य क्षयेयज्ञगृहेपाथ सोमंपिबथ सजनोजातोयजमानःसुगोपातमः शोभनैःपालकैरत्यन्तंयुक्तोभवति॥ पाथ पापाने लेटि बहुलंछन्दसीतिशपोलुक् यद्धृत्तयोगादनिघातः। विमहसः विशिष्टंमहस्तेजोयेषांवितयोक्ताः। सुगोपातमः शोभनोगोपाः रक्षकोयस्यससुगोपाः अतिशयेनसुगोपाः सुगोपतमः तमपःपित्त्वादनुदात्तत्वेसति बहुव्रीहौनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वमेवशिष्यते॥ १ ॥

१. हे उज्ज्वल मरुद्गण! अन्तरिक्ष से आकर तुम जिसके यज्ञ-गृह में सोमपान करते हो, वह मनुष्य शोभन रक्षकों से युक्त होता है।

द्वितीयामृचमाह—

यज्ञैर्वायज्ञवाहसोविप्रस्यवामतीनाम् । मरुतःश्रृणुताहवम् ॥ २ ॥

यज्ञैः । वा । यज्ञऽवाहसः । विप्रस्य । वा । मतीनाम् । मरुतः ।
श्रृणुत । हवम् ॥ २ ॥

हेयज्ञवाहसः यज्ञस्यवोढारोमरुतः यूयं यज्ञैर्वा वाशब्दःसमुच्चये यज्ञैश्चयजमानस्यमतीनांस्तुतीनांसंबन्धिनोविप्रस्यवा अयजमानस्यमेधाविनश्चहवमाह्वानंश्रृणुत यज्ञवतोयजमानस्ययागरहितस्यस्तोतुश्चाह्वानंअवश्यंभवद्भिःश्रोतव्यं यतोभवन्तोयज्ञस्यवोढारः स्तुतिप्रियाश्चेतिभावः ॥ यज्ञवाहसः गतिकारकयोरपिपूर्वपदप्रकृतिस्वरत्वंचेतिवचनात् वहिहाधाञ्भ्यश्छन्दसीतिकारकपूर्वाद्वहतेरसुन् णिदित्यनुवृत्तेरुपधावृद्धिः। मतीनां मनज्ञाने अस्मात्करणेक्तिन् नामन्यतरस्यामितिनामउदात्तत्वम्। शृणुत श्रुवःश्रृचेतिश्नुः सतिशिष्टस्वरबलीयस्त्वमन्यत्रविकरणेभ्यइतिवचनात्तिङएवस्वरःशिष्यते मरुतइत्यस्यामन्त्रितस्यामन्त्रितंपूर्वमविद्यमानवदित्यविद्यमानवत्त्वेनपदादपरत्वान्निघाताभावः। हवं भावेनुपसर्गस्येतिह्वयतेरप् संप्रसारणंच ॥ २ ॥

२. हे यज्ञवाहक मरुद्गण ! यज्ञ-परायण यजमान की स्तुति अथवा मेधावी का आह्वान सुनो ।

उतवायस्यवाजिनोनुविप्रमतक्षत । सगन्तागोमतिव्रजे ॥३॥

उत । वा । यस्य । वाजिनः । अनु । विप्रम् । अतक्षत । सः ।
गन्ता । गोऽमति । व्रजे ॥ ३ ॥

उतवाअपिच यस्ययजमानस्यवाजिनोहविर्लक्षणान्नोपेताऋत्विजः विप्रंमेधाविनंमरुद्गणंअन्वतक्षत हविःप्रदानादिनातीक्ष्णीकुर्वन्ति सयजमानः गोमति गोभिर्बहुभिर्युक्तेव्रजेगोष्ठे गन्तागमनशीलोभवति ॥ अतक्षत तक्षूत्वक्षूतनूकरणे छान्दसोलङ् व्यत्ययेनमध्यमः। गन्ता गमेस्ताच्छीलिकस्तृन् ॥ ३ ॥

३. यजमान के ऋत्विक् लोगों ने मरुतों को, हव्य-प्रदान-द्वारा उत्साहित किया है। वह यजमान नाना गौओंवाले गोष्ठ में जाता है।

चतुर्थीमृचमाह—

अस्यवीरस्यबर्हिषिसुतःसोमोदिविष्टिषु। उक्थंमदश्चशस्यते॥४॥

अस्य । वीरस्य । बर्हिषि । सुतः । सोमः । दिविष्टिषु । उक्थम् ।
मदः । च । शस्यते ॥ ४ ॥

दिविष्टिषुयजनीयदिवसेषु बर्हिषियज्ञे वीरस्यशत्रुक्षेपणकुशलस्यास्यमरुद्गणस्ययागाय सोमःसुतः ऋत्विग्भिरभिषुतोभवति उक्थंमरुद्देवताकंशस्त्रं मदश्चमदिधातुनायुक्तामरुत्वोदेवाः सोमस्यमत्सन्नित्यादिकामारुतीनिविच्च अस्यमरुद्गणस्यहर्षायशस्यतेहोत्रापठ्यते ॥ अस्य ऊडिदमितिविभक्तेरुदात्तत्वम्। दिविष्टिषु इष्टयएषणानिगमनानि दिवोद्योतमानस्यसूर्यस्य इष्टयोयेषुदिवसेषुतेतथोक्ताः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् व्यत्ययेनोत्वाभावः ॥ ४ ॥

४. यज्ञ के दिनों में वीर मरुतों के लिए यज्ञ में सोम तैयार किया जाता है एवं मरुतों की प्रसन्नता के लिए स्तोत्र पठित होता है।

पञ्चमीमृचमाह—

अस्यश्रोषन्त्वाभुवोविश्वायश्चर्षणीरभि। सूरंचित्सस्रुषीरिषः॥५॥११

अस्य। श्रोषन्तु। आ। भुवः। विश्वाः। यः। चर्षणीः। अभि। सूरम्। चित्। सस्रुषीः। इषः॥ ५॥ ११॥

अस्ययजमानस्यस्तुतिंमरुतः आआभिमुख्येनश्रोषन्तु शृण्वन्तु योमरुद्गणःविश्वाः चर्षणीः सर्वान्शत्रुभूतान्मनुष्यान् अभिभुवः अभिभवतितादृग्गणाकारामरुतः शृण्वन्त्वित्यर्थः सूरंचित् सूरं स्तुतेःप्रेरयितारंयजमानमपि इषोमरुद्भिःप्रत्तान्यन्नानि सस्रुषीः प्राप्तानिभवन्तु॥श्रोषन्तु श्रुश्रवणे लेटिसिब्बहुलंलेटीतिबहुलवचनात्सिप्। भुवः भवतेर्लेटि तिपस्तिङांतिङोभवन्तीतिसिप् लेटोडाटावित्यडागमः बहुलंछन्दसीतिशपोलुक् भूसुवोस्तिङीतिगुणप्रतिषेधः। सूरं षूप्रेरणे सुसूधागृधिभ्यःक्रन्निनितिक्रन्प्रत्ययः। सस्रुषीः सृगतौ अस्माल्लिटःक्वसुः उगितश्चेतिङीप् भसंज्ञायां वसोःसंप्रसारणमितिसंप्रसारणं शासिवसिघसीनांचेतिषत्वम् जसि वाछन्दसीतिपूर्वसवर्णदीर्घत्वम् ॥ ५॥

५. सर्व-शत्रु-जेता मरुद्गण स्तोता की स्तुति सुनें एवं स्तोता अन्न प्राप्त करें।

॥ इतिप्रथमस्यषष्ठेएकादशोवर्गः ॥ ११ ॥

षष्ठीमृचमाह—

पूर्वीभिर्हिददाशिमशरद्भिर्मरुतोवयम्। अवोभिश्चर्षणीनाम् ॥६॥

पूर्वीभिः। हि। ददाशिम। शरत्ऽभिः। मरुतः। वयम्। अवःऽभिः। चर्षणीनाम्॥ ६॥

हेमरुतः पूर्वीभिर्बह्वीभिः शरद्भिः संवत्सरैः चर्षणीनां सर्वस्य द्रष्टॄणां सर्वज्ञानां भवतां संबन्धिभिरवोभिः रक्षणैर्युक्ताः सन्तो वयं ददाशिम युष्मभ्यं हवींषि दत्तवन्तः हि यस्मादर्थे यस्मादेवं तस्मादिदानीमप्यस्मदीयहविःस्वीकरणायागच्छतेत्यर्थः॥ पूर्वीभिः पुरुशब्दाद्वोतोगुणवचनादिति ङीष् यणादेशे हलिचेति दीर्घत्वम्। ददाशिम दाशृ दाने लिटि इडागमः हिचेति निघातप्रतिषेधः। चर्षणीनां नामन्यतरस्यामिति नाम उदात्तत्वम्॥ ६॥

६. मरुद्गण! हम सर्व-ज्ञाता मरुतों या तुम्हारे द्वारा रक्षित होकर तुम्हें अनेक वर्षों से हव्य देते हैं।

सप्तमामृचमाह—

सुभगः सप्रयज्यवो मरुतो अस्तु मर्त्यः। यस्य प्रयांसि पर्षथ॥७॥

सुऽभगः। सः। प्रऽयज्यवः। मरुतः। अस्तु। मर्त्यः। यस्य। प्रयांसि। पर्षथ॥ ७॥

हे प्रयज्यवः प्रकर्षेण यष्टव्या मरुतः स मर्त्यो मनुष्यो यजमानः सुभगोस्तु शोभनधनयुक्तो भवतु यस्य यजमानस्य प्रयांसि हविर्लक्षणान्यन्नानि पर्षथ आत्मनि सिञ्चथ स्वीकुरुथेत्यर्थः॥ सुभगः भग इति धननाम शोभनो भगो यस्य क्रत्वादयश्चेत्युत्तरपदाद्युदात्तत्वम्। पर्षथ पृषु वृषु मृषु सेचने भौवादिकः यद्वृत्तान्नित्यमिति निघातप्रतिषेधः॥ ७॥

७. यजनीय मरुद्गण! जिसका हव्य तुम ग्रहण करते हो, वह सौभाग्यशाली है।

अष्टमीमृचमाह—

शशमानस्य वा नरः स्वेदस्य सत्यशवसः। विदा कामस्य वेनतः॥८॥

शशमानस्य। वा। नरः। स्वेदस्य। सत्यऽशवसः। विद। कामस्य। वेनतः॥ ८॥

हे सत्यशवसः अवितथबलाः नरो नेतारो मरुतः शशमानस्य युष्मान् स्तुतिभिः संभजमानस्य स्वेदस्य स्तावकमन्त्रोच्चारणजनितश्रमेण स्विद्यमानगात्रस्य वेनतः वेनतिः कान्तिकर्मा कामयमानस्य वा शब्दः समुच्चये एवंभूतस्य स्तोतुश्च कामस्य काममभिलाषं विद लंभयत प्रयच्छतेत्यर्थः॥ शशमानस्य शशप्लुतगतौ ताच्छीलिकश्चानश्। स्वेदस्य ञिष्विदा गात्रप्रक्षरणे अन्तर्भावितण्यर्थात् कर्मणि घञ् ञित्त्वादाद्युदात्तत्वम्। विद विद्लृ लाभे लोटि मध्यमपुरुषस्य बहुवचनस्य व्यत्ययेन झादेशः बहुलं छन्दसीति विकरणस्य लुक् झस्यादादेशः लोपस्त आत्मनेपदेष्विति तलोपः प्रत्यया-

द्युदात्तत्वम् पादादित्वान्निघाताभावः द्व्यचोतस्तिङइतिसंहितायांदीर्घः। कामस्य वृषादिषुपाठा-दाद्युदात्तत्वम् क्रियाग्रहणंकर्तव्यमितिकर्मणःसंप्रदानत्वाच्चतुर्थ्यर्थेषष्ठी ॥ ८॥

८. हे प्रकृत-बल-सम्पन्न नेता मरुद्गण! तुम्हारे स्तुति-तत्पर और मंत्र उच्चारण करने के कारण परिश्रम से उत्पन्न स्वेद सम्पन्न एवं अपने अभिलाषी स्तोताओं की अभिलाषा समझो।

नवमीमृचमाह—

यूयंतत्संत्यशवसआविष्कर्तमहित्वना। विध्यंताविद्युतारक्षः॥९॥

यूयम्। तत्। सत्यऽशवसः। आविः। कर्त। महिऽत्वना। विध्यत। विऽद्युता। रक्षः॥ ९॥

हेसत्यशवसः सत्यबलाः अन्यैरप्रधृष्यबलामरुतोयूयं तद्वृत्रवधादिषुप्रसिद्धंयुष्मदीयंमाहात्म्यंआविष्कर्तआविष्कुरुतप्रकाशयत विद्युताविद्योतमानेनमहित्वना तेनमहत्त्वेनमाहात्म्येनरक्षः अस्माकमुपद्रवकारिणंराक्षसादिकंविध्यतताडयत नाशयतेत्यर्थः॥ कर्त करोतेर्लोटि बहुलंछन्दसीतिविकरणस्यलुक् तप्तनप्तनथनाश्चेतितबादेशः गुणः इदुदुपधस्यचाप्रत्ययस्येतिआविःशब्दविसर्जनीयस्यषत्वम्। महित्वना भावप्रत्ययादुत्तरस्याङोव्यत्ययेननाभावः उदात्तत्वंच यद्वा सुपांसुलुगितितृतीयायाआजादेशः नकारोपजनश्च। विध्यत व्यधताडने श्यनिग्रहिज्यादिनासंप्रसारणम् तशब्दस्यसार्वधातुकमपिदितिङित्त्वेसतिऋचितुनुघमक्षुतङितिसंहितायांदीर्घः॥ ९॥

९. सत्य-बल-सम्पन्न मरुद्गण! तुम उज्ज्वल माहात्म्य प्रकट करो तथा उसके द्वारा राक्षस आदि को विनष्ट करो।

गूहतागुह्यंतमोवियातविश्वमत्रिणम्। ज्योतिष्कर्तायदुश्मसि॥१०॥१२॥

गूहत। गुह्यम्। तमः। वि। यात। विश्वम्। अत्रिणम्। ज्योतिः। कर्त। यत्। उश्मसि॥ १०॥ १२॥

हेमरुतः गुह्यंगुहायांस्थितंसर्वत्रव्याप्यवर्तमानं तमोन्धकारंगूहतसंवृतंकुरुत यथास्माभिर्नदृश्यते तथाअदर्शनंप्रापयत विनाशयतेत्यर्थः विश्वंसर्वंअत्रिणंअत्तारंराक्षसादिकंवियातविविधंयापयत अस्मत्सकाशान्निर्गमयत यज्ज्योतिः सूर्यादिकंवयमुश्मसिकामयामहे तत्कर्तकुरुत यद्वा गुह्यंगुहायां शरीरान्तर्गतगुहारूपेहृदयेभवंतमोभावरूपाज्ञानंतद्गूहत विनाशयत अत्रिणंपुरुषार्थस्यात्तारंकामक्रोधादिकंसर्वंविनिर्गमयत यत्तज्ज्योतिः परतत्वसाक्षात्काररूपंज्ञानंकामयामहे माणापानादिपञ्चवृत्तिरूपाहेमरुतः तत्कर्तकुरुत॥ गूहत गुहूसंवरणे शपिलघूपधगुणे ऊदुपधायागोहइतिउपधायाऊकारः। यात यामापणे अस्मादन्तर्भावितण्यर्थाल्लोट्। अत्रिणं अदेस्त्रिनि-

चेतिविनिप्रत्ययः । उश्मसि वशकान्तौ इदन्तोमसिः अदादित्वाच्छपोलुक् ग्रहिज्यादिनासंप्रसारणम् ॥ १० ॥

१०. सार्वभौम अन्धकार को हटाओ; राक्षस आदि सब भक्षकों को दूर करो; जो अभीष्ट ज्योति हमें चाहिए, उसे प्रकाशित करो ।

॥ इतिप्रथमस्यषष्ठेद्वादशोवर्गः ॥ १२ ॥

प्रत्वक्षसइतिषळृचंतृतीयंसूक्तम् गोतमस्यार्षंजागतंमारुतंतथाचानुक्रान्तम्—प्रत्वक्षसःषड्जागतमिति अग्निष्टोमेआग्निमारुतशस्त्रेइदंसूक्तंमारुतनिविद्धानं अथयथेतमितिखण्डेसूत्रितम्—प्रत्वक्षसःप्रतवसोयज्ञायज्ञावोअग्नयइति ।

तत्रप्रथमामृचमाह—

प्रत्वक्षसःप्रतवसोविरप्शिनोनानताअविथुराऋजीषिणः ।
जुष्टतमासोनृतमासोअञ्जिभिर्व्यानज्रेकेचिदुस्राइवस्तृभिः ॥ १ ॥

प्रऽत्वक्षसः । प्रऽतवसः । विऽरप्शिनः । अनानताः । अविथुराः ।
ऋजीषिणः । जुष्टऽतमासः । । नृऽतमासः । अञ्जिऽभिः । वि ।
आनज्रे । के । चित् । उस्राःऽइव । स्तृऽभिः ॥ १ ॥

प्रत्वक्षसः शत्रूणांप्रकर्षेणतनूकर्तारः शत्रुघातिनइत्यर्थः यतःप्रतवसः प्रकृष्टबलोपेताः अतएवविरप्शिनः विविधेनजयघोषेणोपेताः यद्वा बहुनामैतत् महान्तोहिविविधैःशब्दैःप्रशस्यन्ते अतएवानानताः आनतिरहिताः सर्वोत्कृष्टाइत्यर्थः अविथुराःअवियुक्ताः सप्तगणरूपेणसंघीभूताइत्यर्थः ऋजीषिणः तृतीयसवनेऋजीषस्याभिषवात् तत्रचमरुतःस्तूयन्तइतितेषांऋजीषित्वम् यद्वा ऋजीषिणः प्रार्जयितारोरसानां जुष्टतमासःअतिशयेनयष्टृभिःसेविताः नृतमासःअतिशयेनमेघादेर्नेतारः एवंभूतामरुतः स्तृभिःस्वशरीरस्याच्छादकैः अञ्जिभिःरूपाभिव्यञ्जकैराभरणैः व्यानज्रेनभसिव्यक्ताःदृश्यन्ते तत्रदृष्टान्तः—केचिदुस्राइव येकेचनसूर्यरश्मयोयथानभसिदीप्यन्तेतद्वत् ॥ प्रत्वक्षसः प्रकर्षेणत्वक्षन्तेतनूकुर्वन्तीतिप्रत्वक्षसः तक्षूत्वक्षूतनूकरणे गतिकारकयोरपिपूर्वपदप्रकृतिस्वरत्वंचेत्यसुन्पूर्वपदप्रकृतिस्वरत्वंच । प्रतवसः तवइतिबलनाम प्रकृष्टंतवोयेषां बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । विरप्शिनः रपलपव्यक्तायांवाचि विरपणंविरप्शः औणादिकः शक्प्रत्ययः तद्वन्तोविरप्शिनः । अनानताः आनताअवनताः प्रह्वीभूताः नआनताःअनानताः अव्ययपूर्वपदप्रकृतिस्वरत्वम् । अविथुराः व्यथभयसंचलनयोः व्यथेःसंप्रसारणंधःकिच्चेत्युरच्-

त्ययः अन्तुबहुलवचनाद्धत्वंनक्रियते पूर्ववत्समासस्वरौ। जुष्टतमासः नित्यंमन्त्रेइतिजुष्टशब्दआ-द्युदात्तः ततआतिशायनिकस्यतमपःपित्त्वादनुदात्तत्वेसएवस्वरःशिष्यते । आनञ्जे अञ्जूव्य-क्तिम्रक्षणकान्तिगतिषु कर्मणि छन्दसिलुङ्लङ्लिटइतिवर्तमानेलिट् अतआदेरित्यभ्यासस्यात्वम् तस्मान्नुड्द्विहलइतिनुट् व्यत्ययेनउपधालोपः इरयोरे। स्तृभिः स्तृञ्आच्छादने क्विप् आगमा-नुशासनस्यानित्यत्वात्तुगभावः ॥ १ ॥

१. मरुद्गण शत्रु-घातक, प्रकृष्ट-बल-सम्पन्न, जय-घोष-युक्त, सर्वो-त्कृष्ट, संघीभूत, अवशिष्ट (ऋजीष)-सोम-पायी, यजमानों-द्वारा सेवित और मेघ आदि के नेता हैं। मरुद्गण आभरण-द्वारा सूर्य-किरणों की तरह प्रकाशित हुए।

उपह्वरेषुयदचिंध्वंययिंवयइवमरुतःकेनचित्पथा।
श्चोतन्तिकोशाउपवोरथेष्वाघृतमुक्षतामधुवर्णमर्चते ॥२॥

उपऽह्वरेषु। यत्। अचिंध्वम्। ययिम्। वयःऽइव। मरुतः। केन। चित्। पथा। श्चोतन्ति। कोशाः। उप। वः। रथेषु। आ। घृतम्। उक्षत। मधुऽवर्णम्। अर्चते ॥ २ ॥

हेमरुतः उपह्वरेषुउपह्वर्तव्येषुगन्तव्येषुअस्माकंसन्निकृष्टेषु नभसःप्रदेशेषुयद्यदाययिंगति-मन्तंमेघंअचिध्वं वर्षणसामर्थ्येनोपचितंकुरुथ किंकुर्वन्तः वयइवपक्षिणइवकेनचित्पथाकेनचि-दाकाशमार्गेणशीघ्रंगच्छन्तः नभसिशीघ्रंवर्षणार्थंप्रवर्तमानैर्मरुद्भिः मेघाउपचीयन्तइत्यर्थः त-दानींकोशाः मेघनामैतत् वोयुष्माकंरथेषु आसक्तामेघाश्चोतन्ति जलंमुञ्चन्ति यस्मादेवंतस्मात् हे मरुतः यूयंअर्चतेयुष्मान्हविर्भिःपूजयतेमह्यंयजमानायमधुवर्णंमधुसदृशरूपंस्वच्छंघृतंवृष्ट्यु-दकं आसमन्तात् उक्षतसिञ्चत अस्मदभिलषितांवृष्टिंकुरुतेत्यर्थः ॥ उपह्वरेषु ह्वृकौटिल्ये उप-ह्वरन्तिकौटिल्येनतिर्यग्गच्छन्त्येष्वित्युपह्वरानभःप्रदेशाः पुंसिसंज्ञायांघःप्रायेणेत्यधिकरणेघः । अचिध्वं चिनोतेर्वर्तमानेलङ्बहुलंछन्दसीतिविकरणस्यलुक्। ययिं यामापणे आदृगमहनजनइति किमत्ययः। पथा आङि भस्यटेर्लोपइतिटिलोपः उदात्तनिवृत्तिस्वरेणविभक्तेरुदात्तत्वम्। श्चोत-न्ति श्चुतिर्क्षरणे छान्दसोयलोपः। उक्षत उक्षसेचने लोटितशब्दस्यङित्त्वेसतिक्ङितिचेतुनुघेत्यादि-नासांहितिकोदीर्घः ॥२॥

२. मरुद्गण! जिस समय पक्षी की तरह किसी मार्ग से शीघ्र दौड़कर पास के आकाशमण्डल में तुम लोग गतिशील मेघों को एकत्र करते हो, उस समय सब मेघ तुम्हारे रथों में आसक्त होकर वारिवर्षण करते हैं; इसलिए तुम अपने पूजक के ऊपर मधु के समान स्वच्छ जल का सिंचन करो।

प्रैषामज्मेषुविथुरेवरेजतेभूमिर्यामेषुयद्धयुञ्जतेशुभे।
तेक्रीळयोधुनयोभ्राजदृष्टयःस्वयंमहित्वंपनयन्तधूतयः ॥२॥

प्र। एषाम्। अज्मेषु। विथुराऽइव। रेजते। भूमिः। यामेषु।
यत्। ह। युञ्जते। शुभे। ते। क्रीळयः। धुनयः। भ्राजत्ऽऋष्टयः।
स्वयम्। महिऽत्वम्। पनयन्त। धूतयः॥ २॥

यद्ध यदाखलु एतेमरुतः शुभेशोभनाय वृष्ट्युदकाययुञ्जते मेघान्सज्जीकुर्वन्ति तदानीं अज्मेषु मेघानामुत्क्षेपकेषुएषांमरुतां संबन्धिषुयामेषु मेघानांनियमनेषुसत्सु भूमिःपृथिवी प्ररेजतेप्रकर्षेणकम्पते यद्वा यदाखलुमरुतः स्वकीयान्रथान्युञ्जते अश्वैर्योजयन्ति तदानीं एषांरथानां संबन्धिषु पर्वतादेरुत्क्षेपकेषुयामेषुगमनेषुसत्सुभूमिर्भीत्याकम्पते तत्रदृष्टान्तः—विथुरेव यथाभर्त्रावियुक्ताजायाराजोपद्रवादिषुसत्सुनिरालंबासतीकम्पतेतद्वत्. तेतादृशाःक्रीळयः विहारशीलाः धुनयः चलनस्वभावाः भ्राजदृष्टयः दीप्यमानायुधाः एवंभूतामरुतः धूतयः पर्वतादीन्धुन्वन्तः सन्तः महित्वंस्वकीयं महिमानंस्वयमेवपनयन्त व्यवहरन्ति प्रकटयन्तीत्यर्थः॥ अज्मेषु अजगतिक्षेपणयोः अर्तिस्तुस्वित्यादिनाविधीयमानोमन्बहुलवचनादस्मादपिद्रष्टव्यः वलादावार्धधातुकेविकल्पइष्यतइतिवचनादजेर्व्यघञपोरितिवीभावाभावः नित्त्वादाद्युदात्तत्वम्।रेजते रेजृकम्पने भ्यसतेरेजतइतिभयवेपनयोरितियास्कः।यामेषु यमउपरमे भावेघञ् कर्षात्वतइत्यन्तोदात्तत्वेप्राप्तेवृषादिषुपाठादाद्युदात्तत्वम् यद्वा यामापणेइत्यस्मादर्तिस्तुस्वित्यादिनामन्प्रत्ययः। शुभे शुभदीप्तौ संपदादिलक्षणःकर्मणिक्विप् सावेकाचइतिविभक्तेरुदात्तत्वम्। पनयन्त पनव्यवहारे गुपूधूपविच्छीत्यायः अस्माच्छान्दसोलङ् व्यत्ययेनह्रस्वत्वम्॥ २॥

२. मंगल-विधायिनी-वृष्टि की तरह जिस समय मरुत् लोग मेघों को तैयार करते हैं, उस समय मरुद्गण-द्वारा उत्क्षिप्त मेघों को नियमित हुए देखकर, पति-रहिता स्त्री की तरह पृथिवी काँपने लगती है। ऐसे विहरणशील, गति-विशिष्ट और प्रदीप्तायुध मरुद्गण पर्वत आदि को कम्पित करके अपनी महिमा प्रकट करते हैं।

सहिस्वसृत्पृषदश्वोयुवागणो३ऽयाईशानस्तविषीभिरावृतः।
असिसत्यऋणयावानेद्योस्याधियःप्राविताथावृषागणः ॥४॥

सः। हि। स्वऽसृत्। पृषत्ऽअश्वः। युवा। गणः। अया। ईशानः।
तविषीभिः। आऽवृतः। असि। सत्यः। ऋणऽयावा। अनेद्यः।
अस्याः। धियः। प्रऽअविता। अथ। वृषा। गणः॥ ४॥

---

१ नि०३.२१.।

सहि सखलुमरुद्गणः अया अस्य सर्वस्य जगतः ईशानः ईश्वरशीलोभवति कीदृशः स्वसृ-वस्वयमेवसरन् नहन्यःकश्चिदस्यमरुद्गणस्यप्रेरकोऽस्ति पृषदश्वः पृषत्यःश्वेतबिन्द्वंकितामृग्यो-श्वस्थानीयायस्यसतथोक्तः युवानित्यतरुणः तविषीभिरन्येषामसाधारणैर्बलैरावृतः परिवेष्टि-तः सत्यःसत्कर्माहः ऋणयावास्तोतॄणामृणस्यापगमयिताबहुलस्यधनस्यदातेत्यर्थः अनेद्यः प्र-शस्यनामैतव् सर्वैरनिन्दितः वृषा जलानांवर्षिता एवंभूतोमरुद्गणः अस्याधियः अस्मदीयस्यास्य कर्मणः अथानन्तरंप्राविताप्रिमकर्षेणरक्षिताभवति ॥ अया सुपांसुलुगितिषष्ठ्यायाजादेशः ह-लिलोपइतीदमइद्रूपस्यलोपः । ईशानः ईशऐश्वर्येइत्यस्मात्ताच्छीलिकश्चानश् तस्यलसार्व-धातुकत्वाभावेनचित्स्वरेणान्तोदात्तत्वम् । अया ईशानइत्यत्र ईषाअक्षादित्वात्प्रकृतिभावः । अ-सि पुरुषव्यत्ययः । ऋणयावा यामापणेइत्यस्मादन्तर्भावितण्यर्थाद्दातोर्मनिन्क्विपिवनिप् । अनेद्यः णिदिकुत्सायां ऋहलोर्ण्यदितिण्यत् आगमानुशासनस्यानित्यत्वान्नुमभावेलघूपधगुणः नञ्स-मासेव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥ ४ ॥

४. मरुद्गण स्वयमेव संचालित हैं। श्वेत-बिन्दु-युक्त मृग मरुतों का अश्व है। मरुत् लोग तरुण, वीर्यशाली और क्षमता-सम्पन्न हैं। मरुतो, तुम सत्यरूप हो, ऋण से मुक्त करते हो। तुम निन्दा-रहित और जलवर्षण करनेवाले हो। तुम हमारे यज्ञ के रक्षक हो।

पञ्चमीमृचमाह—

पितुःप्रत्नस्यजन्मनावदामसिसोमस्यजिह्वाप्रजिगातिचक्षसा ।
यदीमिन्द्रंशम्यृक्वाणआशतादिन्नामानियज्ञियानिदधिरे ॥५॥

पितुः । प्रत्नस्य । जन्मना । वदामसि । सोमस्य । जिह्वा । प्र ।
जिगाति । चक्षसा । यत् । ईम् । इन्द्रम् । शमि । ऋक्वाणः ।
आशत । आत् । इत् । नामानि । यज्ञियानि । दधिरे ॥ ५ ॥

प्रत्नस्यचिरन्तनस्यपितुः अस्माकंजनकस्यरहूगणस्य सकाशात्जन्मना यज्जन्मतेनवयं वदामसिब्रूमः वक्ष्यमाणंवृत्तान्तं अस्माकंपिताउपदिष्टवान् अतोवयंब्रूमइत्यर्थः कोसौवृत्तान्त-इतिचेदुच्यते—सोमस्ययज्ञेष्वभिषुतस्यसोमद्रव्यस्यचक्षसाप्रकाशमानयाहुत्यासहिताजिह्वा स्तु-तिरूपावाक् प्रजिगाति मरुद्गणंप्रकर्षेणगच्छति यज्ञेषुसोमाहुतिःस्तुतिश्चमरुद्भ्यःक्रियते यद्यस्मा-दीमेनमिन्द्रं शमिवृत्रवधादिरूपेकर्मणि ऋक्वाणः प्रहरभगवोजहिवीरयस्वेत्येवंरूपयास्तुत्यायु-क्ताःसन्तःआशतआप्नुवन् नपर्यत्याक्षुः आदित् एवमिन्द्रमाप्यनन्तरमेवयज्ञियानियज्ञार्हाणिईदृ-चान्यादृक्चेत्येवमादीनिनामानि इन्द्रसकाशाल्लब्ध्वा दधिरेधृतवन्तः तस्मादेषांयज्ञेसोमाहुतिःस्तु-तिश्चक्रियते ॥ शमि शमीविकर्मनाम सप्तम्येकवचनेछान्दसईकारलोपः । ऋक्वाणः ऋचस्तुतौ संप-

दादिलक्षणोभावेक्विप् छन्दसीवनिपाविविमत्वर्थीयोवनिप् अन्त्यविकारश्छान्दसः यद्वा अयस्मयादिषुकचिदुभयंभवतीत्युक्तत्वात् सत्सुष्टुभासऋक्वतेत्यादाविवपदत्वात्कुत्वम् भत्वाज्जश्त्वाभावः। आशत लङिबहुलंछन्दसीतिविकरणस्यलुक्। यज्ञियानि यज्ञर्त्विग्भ्यांघखञाविति‌अर्हार्थेघः॥ ५॥

५. अपने पूर्वजों-द्वारा उपदिष्ट होकर हम कहते हैं कि सोम की आहुति के साथ मरुतों को स्तुति-वाक्य प्राप्त होता है। मरुत्‌लोग, वृत्र-वध-कार्य में इन्द्र की स्तुति करते हुए उपस्थित थे और इस तरह यज्ञ-योग्य नाम धारण किया था।

श्रियसेकंभानुभिःसंमिमिक्षिरेतेरश्मिभिस्तऋक्वभिःसुखादयः।
तेवाशीमन्तइष्मिणोअभीरवोविद्रेप्रियस्यमारुतस्यधाम्नः॥६॥१३॥

श्रियसे। कम्। भानुऽभिः। सम्। मिमिक्षिरे। ते। रश्मिऽभिः।
ते। ऋक्वऽभिः। सुऽखादयः। ते। वाशीऽमन्तः। इष्मिणः।
अभीरवः। विद्रे। प्रियस्य। मारुतस्य। धाम्नः॥ ६ ॥ १३ ॥

तेपूर्वोक्ताःमरुतः भानुभिःभानुशब्दैर्दीप्यमानैःसूर्यरश्मिभिःसह कंवृष्ट्युदकं श्रियसेश्रयितुंप्राणिभिःसेवितुं संमिमिक्षिरे सम्यक्मेढुमिच्छन्ति पृथिवींवृष्ट्युदकेन सम्यक्सेक्तुमिच्छन्ति एवंवृष्टिमुत्पाद्य तेमरुतः ऋक्वभिः स्तुतिमद्भिःऋत्विग्भिःसह सुखादयः शोभनस्यहविषोभक्षयितारोभवन्ति वाशीमन्तः वाशीतिवाङ्नाम शोभनयास्तुतिलक्षणयावाचोपेताः इष्मिणोगतिमन्तः अभीरवोभयरहितास्तेमरुतः प्रियस्यसर्वाभिमतस्यमारुतस्यमरुत्संबन्धिनोधाम्नःस्थानस्यसर्वाभिमतंमरुत्संबद्धंविशिष्टंस्थानं विद्रे लब्धवन्तः॥ श्रियसे तुमर्थेसेसेनितिकसेन्प्रत्ययः। मिमिक्षिरे मिहसेचने अस्मादिच्छासन्नन्ताल्लिटिअमन्त्रइतिप्रतिषेधादामभावः व्यत्ययेनात्मनेपदम्। सुखादयः खादृभक्षणे औणादिकइप्रत्ययः शोभनाखादिर्भक्षणंयेषां नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्। इष्मिणः इषगतौ इषियुधीन्धीत्यादिनामक् ततोमत्वर्थीयइनिः। विद्रे विद्लृलाभे लिटिद्विर्वचनप्रकरणेछन्दसिचेतिवक्तव्यमितिद्विर्वचनाभावः इरयोरेइतिइरेचोरेभावः॥ ६॥

६. जीवों के उपभोग के लिए वे मरुद्‌गण दीप्तिमान् सूर्य की किरणों के साथ वारि-वर्षण करना चाहते हैं। वे स्तुतिवाले ऋत्विकों के साथ आनन्द-दायक हव्य का भक्षण करते हैं। स्तुति-युक्त, वेगवान् और निर्भीक मरुद्‌गण ने सर्वप्रिय मरुद्‌गण-सम्बन्ध-विशिष्ट स्थान को प्राप्त किया है।

आविद्युन्मद्भिरितिषळृचंचतुर्थंसूक्तम् अत्रानुक्रम्यते—आविद्युन्मद्भिराद्यान्त्येप्रस्तारपङ्क्ती पञ्चमीविराड्रूपेवि पूर्ववदृषिदेवते आद्याषष्ठीचद्वेप्रस्तारपङ्क्ती आद्यौपादौजागतौतृतीयचतुर्थौ

गायत्रौयस्याः सामस्तारपङ्क्तिः सूत्रितंच—प्रस्तारपंक्तिःपुरतइति अस्यायमर्थः जागतौगायत्रौचे-त्यनुवर्तते यदिपुरतःपुरस्ताद्द्वौजागतौपादौस्यातांअन्त्यौगायत्रौसाप्रस्तारपङ्क्तिरिति एवत्त्यदित्ये-षापञ्चमीविराड्रूपाआदितस्त्रयः पादाएकादशकाः अन्त्योष्टकः साविराड्रूपेत्युच्यते विनियोगोलैङ्गिकः ।

तत्रप्रथमामृचमाह—

आविद्युन्मद्भिर्मरुतःस्वर्कैरथेभिर्यातऋष्टिमद्भिरश्वपर्णैः ।
आवर्षिष्ठयानइषावयोनपप्ततासुमायाः ॥१॥

आ । विद्युन्मत्ऽभिः । मरुतः । सुऽअर्कैः । रथेभिः । यात ।
ऋष्टिमत्ऽभिः । अश्वऽपर्णैः । आ । वर्षिष्ठया । नः । इषा । वयः ।
न । पप्तत । सुऽमायाः ॥ १ ॥

हेमरुतः मितंनिर्मितमन्तरिक्षं प्राप्यरुवन्ति शब्दंकुर्वन्ति इतिमरुतः यद्वा अमितं भृशं शब्दकारिणः अथवामितंस्वैर्निर्मितंमेघंप्राप्यविद्युदात्मनारोचमानाः अथवा महत्यन्तरिक्षेद्रवन्तीति मरुतः येमध्यमस्थानेदेवगणाः समाम्नातास्तेसर्वेमरुतआख्यायन्ते तथाचाहुः—सर्वास्त्रीमध्यमस्थानापुमान्वायुश्चसर्वगः।गणाश्चसर्वेमरुतइतिवृद्धानुशासनमिति।पौराणिकास्त्वाचक्षते—मारीचात्कश्यपात्सप्तगणात्मकाएकोनपञ्चाशत्संख्याकामरुतोजज्ञिरइति।एवंभूताहेमरुतः रथेभिःआत्मीयैरथैःआयातअस्मदीयंयज्ञमागच्छत कीदृशैरथैर्विद्युन्मद्भिः विद्योतनंविद्युत् विशिष्टदीप्तियुक्तैः स्वर्कैःस्वर्चनैःशोभनगमनयुक्तैः यद्वा शोभनमर्कोर्चनंस्तुतिर्येषामस्तितादृशैः अथवाशोभनदीप्तियुक्तैः ऋष्टिमद्भिः ऋष्टयःशक्तिरूपाण्यायुधानि स्थूणाइत्यन्ये तद्वद्भिःअश्वपर्णैः अश्वानां पतनंगमनंएषामस्तितादृशैः यद्वा रंहणशीलामेघारथास्तैःसहान्तरिक्षेवर्षणार्थमागच्छत कीदृशैर्विद्युन्मद्भिः विद्युत्तडित्तद्वद्भिः स्वर्कैः शोभनगमनैः ऋष्टिमद्भिः अर्षणंगमनं तत्स्वभावनीरयुक्तैः अश्वपर्णैः अश्वंव्याप्तंपर्णपतनंगमनंयेषां अन्तरिक्षंव्याप्यवर्तमानैरित्यर्थः हेसुमायाः मायेतिकर्मणोज्ञानस्यचनामधेयम् शोभनकर्माणः शोभनप्रज्ञावामरुतः वर्षिष्ठयाप्रवृद्धयाइषाअस्मभ्यंदातव्येनान्नेनसहनोऽस्मान्प्रतिवयोनपक्षिणइव शीघ्रं आपप्तत आपततआगच्छतेत्यर्थः अत्रनिरुक्तम्—अथातोमध्यस्थानादेवगणास्तेषांमरुतःप्रथमागामिनोभवन्ति

मरुतोमितराविणोवामितरोचिनोवामहद्भवन्तीतिवेति । विद्युन्मद्भिर्मरुतःस्वर्कैःस्वश्चनैरितिवास्वर्चनैरितिवास्वर्चिभिरितिवारथैरायातऋष्टिमद्भिरश्वपर्णैरश्वपतनैर्वर्षिष्ठेनचनोन्नेनवयइवापततसुमायाःकल्याणकर्माणोवाकल्याणप्रज्ञावेति ॥ विद्युन्मद्भिः यवादेराकृतिगणत्वेनविद्युच्छब्दस्ययवाद्यन्तर्भावादयवादिभ्यइत्यत्रानुवृत्तेर्झयइतिमतुपोवत्वंनप्रवर्तते । ऋष्टिमद्भिः ह्रस्वनुड्भ्यांमतुबितिमतुपउदात्तत्वम् ।अश्वपर्णैः अशूव्याप्तौ अशूप्रुषीत्यादिनाक्वन्प्रत्ययः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । वर्षिष्ठया वृद्धशब्दादातिशायनिकेइष्ठनिप्रियस्थिरेत्यादिनावर्षादेशः । पप्तत पतॢगतौ लुङि लृदित्वात् च्लेरङादेशः पतःपुमितिपुमागमः ॥ १ ॥

१. मरुद्गण, तुम बिजली या दीप्ति से युक्त, शोभन गमनवाले, शस्त्रशाली और अश्व-संयुक्त मेघ या रथ पर आरोहण करके आओ। शोभनकर्मा इन्द्र ! प्रभूत अन्न के साथ, पक्षी की तरह हमारे पास आओ।

तेऽरुणेभिर्वरमापिशङ्गैःशुभेकंयान्तिरथतूर्भिरश्वैः ।
रुक्मोनचित्रःस्वधितीवान्पव्यारथस्यजंघनन्तभूम ॥२॥

ते । अरुणेभिः । वरम् । आ । पिशङ्गैः । शुभे । कम् । यान्ति । रथतूःऽभिः । अश्वैः । रुक्मः । न । चित्रः । स्वधितिऽवान् । पव्या । रथस्य । जंघनन्त । भूम ॥ २ ॥

तेपूर्वोक्तामरुतः अरुणेभिररुणवर्णैः पिशङ्गैःपिङ्गलवर्णैःउभयवर्णोपेतैः रथतूर्भिः रथस्य प्रेरयितृभिः अश्वैः वरंदेवानांवरीतारंकंशब्दयितारंस्तुवन्तंयजमानंआयान्ति आगच्छन्ति किमर्थं शुभेतस्यशोभांकर्तुं अथवा शुभेउदकायवृष्ट्यर्थमित्यर्थः तेषांमरुतांगणः रुक्मोन रोचमानं सुवर्णमिवचित्रःअतिशयेनदर्शनीयः स्वधितीवान्स्वधितिरितिवज्रनाम शत्रूणांखण्डकेनायुधेनोपेतः एवंविधगणरूपास्तेमरुतः रथस्यपव्याचक्रधारया भूमभूमिंजंघनंतअत्यर्थंघ्नन्तिस्तोतृरक्षणार्थमागतानांतेषांमरुतांभारमसहमानाभूमिरतिपीडिताबभूवेत्यर्थः ॥ वरं व्रियन्तेदेवाअनेनेतिवरः ग्रहवृदृनिश्चिगमश्चेत्यप् । कं कैगैशब्दे कायतीतिकः बहुलवचनात्कप्रत्ययः । रथतूर्भिः तुरत्वरणे रथंतुतुरतित्वरायुक्तंकुर्वन्तीतिरथतुरः क्विप्चेतिक्विप् भिसिहलिचेतिदीर्घत्वम् । पव्या पवीरथनेमिर्भवतीतियास्कः।पूङ्पवने अस्मादचइरितिइप्रत्ययः उदात्तयणइतिविभक्तेरुदात्तत्वम् । जंघनन्त हन्तेर्यङन्ताद्वर्तमानेछान्दसोलङ् छन्दस्युभयथेतिशपआर्धधातुकत्वादतोलोपयलोपौ । भूम भूमिशब्दादुत्तरस्यामःसुपांसुलुगितिडादेशः छान्दसंह्रस्वत्वम् ॥२॥

२. मरुद्गण अरुण और पिङ्गलवाले रथ-प्रेरक घोड़ों-द्वारा किस स्तोता का कल्याण करने के लिए आते हैं ? सोने की तरह दीप्तिमान् और शत्रु-नाशकारी तथा शस्त्रशाली मरुद्गण रथ-चक्र-द्वारा भूमि को पीड़ित करते हैं।

---

१ नि० ११. १३.। २ नि० ११. १४.। ३ नि० ५. ५.।

तृतीयामृचमाह—

श्रियेकंवोअधितनूषुवाशीर्मेधावनानकृणवन्तऊर्ध्वा ।
युष्मभ्यंकंमरुतःसुजातास्तुविद्युम्नासोधनयन्तेअद्रिम् ॥३॥

श्रिये । कम् । वः । अधि । तनूषु । वाशीः । मेधा । वना । न ।
कृणवन्ते । ऊर्ध्वा । युष्मभ्यम् । कम् । मरुतः । सुऽजाताः ।
तुविऽद्युम्नासः । धनयन्ते । अद्रिम् ॥ ३ ॥

हेमरुतोवोयुष्माकं तनूषुशरीरेषु अंसप्रदेशेषुवाशीः शत्रूणामाक्रोशकमाराख्यमायुधंअधिश्रिये कं ऐश्वर्यार्थंवर्ततइतिशेषः कमित्येतत्पदपूरणं तदुक्तम्—अथापिपदपूरणाःकमीमिद्विती[1] । तादृशामरुतः वनान उच्छ्रितान्वृक्षसमूहानिव मेधायज्ञान् ऊर्ध्वाऊर्ध्वान् एकाहाहीनसत्ररूपेणोच्छ्रितान् कृणवन्तेयजमानैःकारयन्ति हेसुजाताः शोभनजननयुक्तामरुतः युष्मभ्यं युष्मदर्थं कंसुखकरं अद्रिंसोमाभिषवेप्रवृत्तंग्रावाणं तुविद्युम्नासः प्रभूतधनायजमानाः धनयन्तेधनंकुर्वन्ति युष्माकंयागायग्रावभिरभिषुण्वन्तीत्यर्थः ॥ वाशीः शत्रूणांभयोत्पादनेनाक्रोशशब्दकरणंवाशः ततश्छन्दसीवनिपाविवितिमत्वर्थीयईकारः व्यत्ययेनाद्युदात्तत्वम् । मेधा सु ांसुलुगितिशसोडादेशः । वना शेश्छन्दसिबहुलमितिशेर्लोपः । कृणवन्ते कृविहिंसाकरणयोश्च लटि व्यत्ययेनात्मनेपदं धिन्विकृण्व्योरचेत्युप्रत्ययः पुनरपिव्यत्ययेनान्तादेशः छन्दस्युभयथेत्यार्धधातुकत्वेनझस्याङित्त्वाद्गुणेअवादेशः । ऊर्ध्वा पूर्ववड्डादेशः । धनयन्ते धनशब्दात् तत्करोतीतिणिच् ॥ ३ ॥

३. मरुद्गण, ऐश्वर्य-प्राप्ति के लिए तुम्हारे शरीर में शत्रुओं का संहारक शस्त्र है। मरुद्गण वन, वृक्ष आदि की तरह यज्ञ को ऊपर करते हैं। सुजन्मा मरुद्गण, तुम्हारे लिए प्रभूत-धन-शाली यजमान लोग सोम पीसनेवाले पत्थर को धन-सम्पन्न करते हैं।

चतुर्थीमृचमाह—

अहानिगृध्राःपर्यावआगुरिमांधियंवार्कार्यांचदेवीम् ।
ब्रह्मकृण्वन्तोगोतमासोअर्कैरूर्ध्वंनुनुद्रउत्सधिंपिबध्यै ॥४॥

अहानि । गृध्राः । परि । आ । वः । । आ । अगुः । इमाम् ।
धियम् । वार्कार्याम् । च । देवीम् । ब्रह्म । कृण्वन्तः । गोतमासः ।
अर्कैः । ऊर्ध्वम् । नुनुद्रे । उत्सऽधिम् । पिबध्यै ॥४॥

---

[1] नि० १.९ ।

तृषितैर्गोतमैः स्तुतामरुतस्तेभ्योगोतमेभ्योदेशान्तरेवर्तमानं कूपमुत्खायानीयमददुः एतद्दृष्ट्वाकश्चिदृषिर्ब्रूते हेगोतमाः गृध्राः जलाभिकाङ्क्षायुक्तान्वोयुष्मान्अहानिशोभनोदकोपेतानिदिनानिपर्यागुः पर्यागतानिपरितः आभिमुख्येनप्राप्तानि प्राप्यच इमांवार्कार्यांवार्भिरुदकैर्निष्पाद्यां धियं ज्योतिष्टोमादिलक्षणंकर्मचदेवींद्योतमानंअकुर्वन् येष्वहस्सुनलहविर्लक्षणं अन्नं,अर्कैर्मंत्रसाध्यैःस्तोत्रैःसहकृण्वन्तोमरुद्भ्यःकुर्वन्तोगोतमासोगोतमाऋषयः उत्सधिंउत्सोजलप्रवाहोस्मिन्धीयतइतिउत्सधिःकूपः तंपिबध्यैस्वकोयपानायऊर्ध्वंनुनुदेनुनुदिरे देशान्तरे वर्तमानंकूपंउत्खातवन्तः एवदीयस्तोत्रैःस्तुतामरुतःकूपंउत्खातवन्तः इतियत् तदेवतदीयस्तोत्रकारितमित्येतेषुउपचर्यते ॥ गृध्राः गृधुअभिकांक्षायां सुसूधागृधिभ्यःक्रन्नितिक्रन्प्रत्ययः सुपांसुपोभवन्तीतिशसोजस् नित्त्वादाद्युदात्तत्वम्। अगुः एतेर्लुङि इणोगालुङीतिगादेशः आतइतिझेर्जुस्। वार्कार्यां डुकृञ्करणे ऋहलोर्ण्यत् वार्भिःकार्यावार्कार्या त्रिचक्रादित्वादुत्तरपदान्तोदात्तत्वम्। नुनुद्रे णुदप्रेरणे इरयोरेइतिरेआदेशः। उत्सधिं कर्मण्यधिकरणेचेतिदधातेरधिकरणेकिप्रत्ययः । पिबध्यै पापाने तुमर्थेसेसेनितिशध्यैन्प्रत्ययः पाघ्रेत्यादिनापिबादेशः ॥ ४ ॥

४. जलाभिलाषी गोतमगण, तुम्हारे सुख के दिन आये हैं और आकर जलनिष्पाद्य यज्ञ को द्युतिमान् किया है। गोतमों ने स्तुति के साथ हव्यदान करके जलपानार्थ कूप को उठाया था।

पञ्चमीमृचमाह—

एतत्त्यन्नयोजनमचेतिसस्वर्हयन्मरुतोगोतमोवः।
पश्यन्हिरण्यचक्रानयोदंष्ट्रान्विधावतोवराहून् ॥ ५ ॥

एतत्। त्यत्। न। योजनम्। अचेति। सस्वः। ह। यत्। मरुतः। गोतमः। वः। पश्यन्। हिरण्यऽचक्रान्। अयःऽदंष्ट्रान्। विऽधावतः। वराहून् ॥ ६ ॥ १४ ॥

हेमरुतः एतद्योजनंयुज्यतेनेनदेवतेतियोजनमेतत्सूक्तसाध्यंस्तोत्रं त्यत्न त्यत्प्रसिद्धंअन्यदुत्कृष्टंस्तोत्रमिव अचेतिसर्वैर्ज्ञायते वोयुष्मदर्थं यद्यदेतत्सूक्तरूपंस्तोत्रंगोतमऋषिः सस्वर्हउच्चारितवान्खलु किंकुर्वन् हिरण्यचक्रान् हिरणमयचक्ररथारूढान् हितरमणीयकर्मयुक्तान्वा अयोदंष्ट्रान्दशतीतिदंष्ट्राचक्रधारा अयोमयीभिः चक्रधाराभिर्युक्तान् यद्वा दंशनसाधनाऋष्टयोदंष्ट्राः अयोमयाऋष्टयोयेषांतान् विधावतःविविधमितस्ततःप्रवर्तमानान्वराहून्वरस्योत्कृष्टस्यशत्रोर्हंतॄन् यद्वा उत्कृष्टस्यवृष्ट्युदकस्याहर्तॄन् यद्वा उत्कृष्टानांदेवानांआह्वातॄन् वरस्यहविषोभक्षयि-

तृत्वा एवंभूतान्मरुतः पश्यन्सम्यग्ज्ञानन् गोतमोयत्स्तोत्रंकृतवान् तदेतत्सर्वोत्कृष्टंसदस्माभिःस-वैरुपलभ्यतइत्यर्थः अत्रनिरुक्तम्—अथाप्येतेमाध्यमिकादेवगणावराहवउच्यन्तेपश्यन्हिरण्यच-क्रानिति[1] ॥ अचेति चितीसंज्ञाने छान्दसोवर्तमानेकर्मणिलुङ् । सस्वः स्वृशब्दोपतापयोः लङि तिपिबहुलंछन्दसीतिशपःश्लुः गुणोहल्ङ्याब्भ्यइतितलोपः धातुस्वरेणान्तोदात्तत्वम् । वराहून् वरशब्दोपपदादाङ्पूर्वाद्धन्तेर्वाहरतेर्वाह्वयतेर्वाजुहोतेरदनार्थाद्वाहुइत्येतस्यनिष्पत्तिरितिस्कन्दस्वा मीअस्यच पृषोदरादित्वादभिमतसिद्धिः ॥ ५ ॥

५. मरुद्गण हिरण्मयचक्र-रथ पर आरूढ़, लौहमय चक्र-धारा से युक्त, इधर-उधर दौड़नेवाले और प्रबल शत्रु-हन्ता हैं। उन्हें देखकर गोतम ऋषि ने जिस स्तोत्र का उच्चारण किया था, वह यही स्तुति है।

एषास्यावोमरुतोनुभर्त्रीप्रतिष्टोभतिवाघतोनवाणी ।
अस्तोभयद्वृथासामनुस्वधांगभस्त्योः ॥६ ॥ १४॥

एषा । स्या । वः । मरुतः । अनुऽभर्त्री । प्रति । स्तोभति । वाघतः । न । वाणी । अस्तोभयत् । वृथा । आसाम् । अनु । स्वधाम् । गभस्त्योः ॥ ६ ॥ १४ ॥

हेमरुतः स्या सैषा अस्मदीयास्तुतिः वोयुष्माकमनुभर्त्रीयुष्माननुहरन्ती युष्मद्गुणसदृशी प्रतिष्टोभति प्रत्येकंस्तौति स्तोभतिःस्तुतिकर्मा तथावाघतोनवाणी नशब्दःसंप्रत्यर्थे तदुक्तंया-स्केन—अस्त्युपमार्थस्यसंप्रत्यर्थेप्रयोगइति । इदानीमृत्विग्संबन्धिनीवागपिवृथाअनायासेन आसांआभिर्ऋग्भिरस्तोभयत् अस्तौत् इदानीमित्युक्तेकदेत्याह गभस्त्योरस्मदीययोर्बाह्वोः स्व-धांअन्ननामैतत् यदाबहुविधंअन्नंमरुतःस्थापयन्तितामनुलक्ष्येत्यर्थः ॥ अनुभर्त्री हृञ्हरणे तृच् ऋन्नेभ्यइतिङीप् उदात्तयणोहल्पूर्वादितिनद्याउदात्तत्वम् ॥ ६ ॥

६. मरुद्गण, तुम लोगों में से प्रत्येक को योग्य स्तुति स्तव करती है। ऋषियों की वाणी ने इस समय, अनायास, इन ऋचाओं से तुम्हारी स्तुति की है; क्योंकि तुम लोगों ने हमारे हाथ पर बहु-विध अन्न स्थापित किया है।

॥ इतिप्रथमस्यषष्ठेचतुर्दशोवर्गः ॥ १४ ॥

आनोभद्राइतिदशर्चंपञ्चमंसूक्तम् गोतमस्यार्षंवैश्वदेवं आदितःपञ्चर्चःसप्तमीचजगत्यः षष्ठीस्वस्तिनइन्द्रइत्येषाविराट्स्थाना नवकौवैराजस्त्रैष्टुभश्चेत्युक्तलक्षणयोगात् अष्टम्याद्यास्तिस्र-स्त्रिष्टुभः तथाचानुक्रान्तम्—आनोदशवैश्वदेवंतुपञ्चाद्याःसप्तमीचजगत्यःषष्ठीविराट्स्थानेति अ-ग्निष्टोमेवैश्वदेवशस्त्रेउत्तमावर्जमेतत्सूक्तंवैश्वदेवनिविद्धानीयं सातुप्रकृतौविकृतौचवैश्वदेवशस्त्र-

१ नि० ५. ४. । २ नि० ७. ३१. ।

स्यपरिधानीया तथाचसूत्रितम्—आनोभद्राःक्रतवोयन्तुविश्वतइतिनववैश्वदेवमिति अदिति-र्द्यौरदितिरन्तरिक्षमिति परिदध्यात्सर्वत्रवैश्वदेवइतिच।ब्राह्मणंचभवति—सदैवपञ्चजनीययापरि-दध्यादिति। महाव्रतेनिष्केवल्येएतत्सूक्तम् तथापञ्चमारण्यकेसूत्र्यते—आनोभद्रीयंचतस्य-स्थानइति।

तत्रप्रथमामृचमाह—

आनोभद्राःक्रतवोयन्तुविश्वतोदब्धासोअपरीतासउद्भिदः।
देवानोयथासदमिद्वृधेअसन्नप्रायुवोरक्षितारोदिवेदिवे॥ १॥

आ। नः। भद्राः। क्रतवः। यन्तु। विश्वतः। अदब्धासः।
अपरिऽइतासः। उत्ऽभिदः। देवाः। नः। यथा। सदम्। इत्।
वृधे। असन्। अप्रऽआयुवः। रक्षितारः। दिवेऽदिवे॥ १॥

नोऽस्मान्क्रतवोऽग्निष्टोमादयोमहायज्ञाविश्वतः सर्वस्मादपिदिग्भागात् आयन्तुआगच्छ-न्तु कीदृशाः क्रतवः भद्राःसमीचीनफलसाधनत्वेनकल्याणाः भजनीयावा अदब्धासः असुरैर-हिंसिताः अपरीतासः शत्रुभिरपरिगताः अप्रतिरुद्धाइत्यर्थः उद्भिदः शत्रूणामुद्भेत्तारः कीदृशाः क्रतवः अस्मांस्तथाआगच्छन्तु यथा अप्रायुवः अपगच्छन्तः स्वकीयंरक्षितव्यंअपरित्यजन्तः अतएवदिवेदिवेप्रतिदिवसंरक्षितारोरक्षांकुर्वन्तः एवंगुणविशिष्टाःसर्वेदेवानोऽस्माकंसदमित् सदै-व वृधे वर्धनायअसन्भवन्तु॥ अदब्धासः दंभुदंभे दंभोर्हिंसा निष्ठायांयस्यविभाषेतीट्प्रतिषेधः नञ्समासेव्ययपूर्वपदप्रकृतिस्वरत्वम्।अपरीतासः इण्गतौ पूर्ववत्कर्मणिनिष्ठा उभयत्राज्जसेरसुक् वृधे वृधुवृद्धौ संपदादिलक्षणोभावेक्विप् सावेकाचइतिविभक्तेरुदात्तत्वम्। असन् अस्भुवि लेटचडा-गमः बहुलंछन्दसीतिशपोलुगभावः तस्याङित्त्वात् श्नसोरल्लोपइत्यकारलोपाभावः।अप्रायुवः इण् गतौ अस्मात्प्रपूर्वाच्छन्दसीणइतिउण्प्रत्ययः नञ्समासेव्ययपूर्वपदप्रकृतिस्वरत्वम् जसि ज-सादिषुछन्दसिवावचनमितिगुणस्यविकल्पितत्वात् अभावेतन्वादित्वादुवङ्॥ १॥

१. कल्याणवाही, अहिंसित, अप्रतिरुद्ध और शत्रु-नाशक समस्त यज्ञ चारों ओर से हमें प्राप्त हों या हमारे पास आवें। जो हमें न छोड़कर प्रतिदिन हमारी रक्षा करते हैं वे ही देवता सदा हमें परिवर्द्धित करें।

द्वितीयामृचमाह—

देवानांभद्रासुमतिर्ऋजूयतांदेवानांरातिरभिनोनिवर्तताम्।
देवानांसख्यमुपसेदिमावयंदेवानआयुःप्रतिरन्तुजीवसे॥ २॥

---

१ ऐ० ब्रा० ३. ३१।

देवानाम् । भद्रा । सुऽमतिः । ऋजुऽयताम् । देवानाम् । रातिः ।
अभि । नः । नि । वर्तताम् । देवानाम् । सख्यम् । उप । सेदिम ।
वयम् । देवाः । नः । आयुः । प्र । तिरन्तु । जीवसे ॥ २ ॥

भद्रासुखयित्रीभजनीयावा देवानांसुमतिः शोभनामतिरनुग्रहात्मिकाबुद्धिरस्माकं अस्त्विति शेषः कीदृशानां ऋजूयतां ऋजुं आर्जवयुक्तंसम्यगनुष्ठातारंयजमानं आत्मनइच्छतां तथादेवानांरातिर्दानंनोऽस्मान्आभिमुख्येननितरांवर्ततां तदभिमतफलप्रदानमपिअस्माकंभवत्वित्यर्थः वयंचतेषांदेवानांसख्यंसखित्वं सख्युःकर्मवा उपसेदिमप्राप्नुवाम तादृशादेवानोस्माकमायुर्जीवसे जीवितुंप्रतिरन्तु वर्धयन्तु ॥ भद्रा भदिकल्याणेसुखेच ऋज्रेन्द्राग्रेत्यादौरक्प्रत्ययान्तोनिपातितः[1]। ऋजूयतां ऋजुमात्मनइच्छतिऋजूयति सुपआत्मनःक्यच् तदन्ताल्लटःशतृ शतुरनुमइतिअजादिविभक्तेरुदात्तत्वम् । रातिः रादाने मन्त्रेवृषेतिक्तिनउदात्तत्वम् । सख्यं सख्युर्यइतिभावेकर्मणिवायमत्ययः । सेदिम षद्लृविशरणगत्यवसादनेषु छन्दसिलुङ्लङ्लिटइतिवर्तमानेप्रार्थनायांलिट् सत्वस्यानैमित्तिकत्वेनलिटिपरतआदेशादित्वाभावात् अतएकहल्मध्यइत्येत्वाभ्यासलोपौ अन्येषामपिदृश्यतइतिसंहितायांदीर्घत्वम् । प्रतिरन्तु प्रपूर्वस्तिरतिर्वर्धनार्थः तथाचयास्कोव्याचख्यौ—देवानांसख्यमुपसादिमवयंदेवानआयुःप्रवर्धयन्तुचिरंजीवनायेति[1] ॥ २ ॥

२. यजमान-प्रिय देवता लोग कल्याण-वाहक अनुग्रह हमारे सामने ले आवें और उनका दान भी हमारे सामने आवे। हम उन देवों का अनुग्रह प्राप्त करें और वे हमारी आयु बढ़ावें।

तृतीयामृचमाह—

तान्पूर्वयानिविदाहूमहेवयंभगंमित्रमदितिंदक्षमस्रिधम् ।
अर्यमणंवरुणंसोमम॒श्विनासरस्वतीनःसुभगामयस्करत् ॥ ३ ॥

तान् । पूर्वया । निऽविदा । हूमहे । वयम् । भगम् । मित्रम् ।
अदितिम् । दक्षम् । अस्रिधम् । अर्यमणम् । वरुणम् । सोमम् ।
अश्विना । सरस्वती । नः । सुऽभगा । मयः । करत् ॥ ३ ॥

तान्विश्वान्देवान् पूर्वयापूर्वकालीनयानित्ययानिविदावेदात्मिकयावाचा निविदितिवाङ्नाम यद्वा निविदा विश्वेदेवाःसोमस्यमत्सन्नित्यादिकयावैश्वदेव्यानिविदावयंहूमहेआह्वयामः देवानिवियत्सामान्येनोक्तंतदेवविवियते भगंभजनीयंद्वादशानामादित्यानामन्यतमंमित्रंप्रमीतेस्त्रायकंअ-

1 नि० १२.३९. । 2 निविदाध्यायेसप्तमखण्डे. ।

हरभिमानिनंदेवं मैत्रंवाअहरितिश्रुतेः। अदितिंअखण्डनीयामदीनांवादेवमातरं दक्षंसर्वस्यजगतो-निर्माणेसमर्थंप्रजापतिं यद्वा प्राणरूपेणसर्वेषुप्राणिषुव्याप्यवर्तमानंहिरण्यगर्भं प्राणोवैदक्षइतिश्रु-तेः। अस्रिधंशोषणरहितं सर्वदाऐकरूपेणवर्तमानं मरुद्गणंअर्यमणंअरीन्मन्देहादीनसुरान्यच्छ-तिनियच्छतीत्यर्यमासूर्यः असौवाआदित्योर्यमेतिश्रुतेः। तंवरुणंवृणोतिपापकृतःस्वकीयैःपाशै-रावृणोतीतिरात्र्यभिमानीदेवोवरुणः श्रूयतेच—वारुणीरात्रिरिति। सोमंद्वेधाआत्मानंविभज्यपृ-थिव्यांलतारूपेण दिविचचन्द्रात्मनादेवतारूपेणवर्तमानं अश्विना अश्ववन्तौ यद्वा सर्वं व्याप्नु-वन्तौ तथाचयास्कः—अश्विनौयद्व्यश्नुवातेसर्वंरसेनान्योज्योतिषान्योश्वैरश्विनावित्यौर्णवाभस्त-त्कावश्विनौद्यावापृथिव्यावित्येकेऽहोरात्रावित्येकेसूर्याचन्द्रमसावित्येकेराजानौपुण्यकृतावित्यै-तिहासिकाइति। एवंभूतान्सर्वान्देवान् अस्मद्रक्षणार्थमाह्वयामइतिपूर्वत्रसंबन्धः अस्माभिराहू-तासुभगाशोभनधनोपेतासरस्वतीनोऽस्मभ्यंमयः सुखंकरत् करोतु॥ हूमहे ह्वेञोलटिह्वइत्यनुवृ-त्तौबहुलंछन्दसीतिसंप्रसारणम् परपूर्वत्वेहलइतिदीर्घत्वं बहुलंछन्दसीतिशपोलुक्। अस्रिधं स्रि-धुशोषणे संपदादिलक्षणोभावेक्विप् बहुव्रीहौनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्। मयस्करत् करोतेर्लेटचडागमः बहुलंछन्दसीतिविकरणस्यलुक् अतःकृकमीतिविसर्जनीयस्यसत्वम्॥ ३॥

३. उन देवों को पूर्व के वेदात्मक वाक्य-द्वारा हम बुलाते हैं। भग, मित्र, अदिति, दक्ष, अस्रिध या मरुद्गण, अर्यमा, वरुण, सोम और अश्विद्वय को बुलाते हैं। सौभाग्यशालिनी सरस्वती हमारे सुख का सम्पादन करे।

चतुर्थीमृचमाह—

तन्नोवातोमयोभुवातुभेषजंतन्मातापृथिवीतत्पिताद्यौः।
तद्ग्रावाणःसोमसुतोमयोभुवस्तदश्विनाशृणुतंधिष्ण्यायुवम्॥४॥

तत्। नः। वातः। मयःऽभु। वातु। भेषजम्। तत्। माता।
पृथिवी। तत्। पिता। द्यौः। तत्। ग्रावाणः। सोमऽसुतः।
मयःऽभुवः। तत्। अश्विना। शृणुतम्। धिष्ण्या। युवम्॥ ४॥

वातोवायुः तद्भेषजमौषधंनोऽस्मान्वातुप्रापयतु यद्भेषजं मयोभु मयसःसुखस्यभावयितृ मातासर्वेषांजननीपृथिवीभूमिरपि तद्भेषजंअस्मान्प्रापयतु पितावृष्टिप्रदानेनसर्वेषांरक्षिता द्यौर्द्यु-लोकोपि तद्भेषजंअस्मान्प्रापयतु सोमसुतः सोमाभिषवंकृतवन्तः मयोभुवः मयसोयागफलभूत-

---

१ तै०ब्रा० १.७.९.। २ तै०सं० २.५.२। ३ तै० सं० २.४.४.।
४ तै० ब्रा० १.७.९.। ५ नि० १२.१.।

स्यसुखस्यभावयितारोग्रावाणः अभिषवसाधनाः पाषाणाश्च तद्भेषजमस्मान्प्रापयन्तु हेधिष्ण्या धिषणाबुद्धिः तदर्हावश्विनौ युवंयुवांतद्भेषजंश्रृणुतं आकर्णयतं यद्भेषजमस्माभिर्वांय्वादिषु प्रार्थ्यते तद्भेषजं देवानांभिषजौयुवां अस्माकमनुकूलंयथाभवतितथाजानीतमित्यर्थः ॥ मयोभु ह्रस्वोनपुंसकेप्रातिपदिकस्येतिह्रस्वत्वम्। वातु वागतिगन्धनयोः अन्तर्भावितण्यर्थात्प्रार्थनायां लोट्। सोमसुतः सोमेसुञइतिभूतेक्विप्। धिष्ण्या धिषणाशब्दादर्हार्थेछन्दसिचेतियः वर्णलोपश्छान्दसः सुपांसुलुगित्याकारः ॥ ४ ॥

४. हमारे पास वायुदेव कल्याण-वाहक भेषज ले आवें; माता मेदिनी और पिता द्युलोक भी ले आवें। सोम चुआनेवाले और सुखकर प्रस्तर भी उस औषध को ले आवें। ध्यान करने योग्य अश्विनीकुमारद्वय, तुम लोग हमारी याचना सुनो।

तमीशा॑नं॒जग॑तस्त॒स्थुष॒स्पतिं॑धियंजि॒न्वमव॑सेहूमहे॒वयम् ।
पू॒षानो॒यथा॒वेद॑सा॒मस॑द्वृ॒धेर॑क्षि॒ता पा॒युरद॑ब्धः स्व॒स्तये॑ ॥५॥१५॥

तम्। ईशा॑नम्। जग॑तः। त॒स्थुषः॑। पति॑म्। धि॒यम्ऽजि॒न्वम्।
अव॑से। हू॒म॒हे॒। व॒यम्। पू॒षा। नः॒। यथा॑। वेद॑साम्। अस॑त्।
वृ॒धे। र॒क्षि॒ता। पा॒युः। अद॑ब्धः। स्व॒स्तये॑ ॥ ५ ॥ १५ ॥

पूर्वार्धेनेन्द्रःस्तूयते अपरार्धेनपूषा ईशानंऐश्वर्यवन्तं अतएवजगतोजङ्गमस्यप्राणिजातस्यतस्थुषःस्थावरस्यचपतिंस्वामिनं धियंजिन्वं धीभिःकर्मभिःप्रीणयितव्यं एवंभूतंतमिन्द्रंअवसेरक्षणायवयंहूमहेआह्वयामः पूषानोऽस्माकंवेदसांधनानांवृधेवर्धनायरक्षिता यथाअसत् येनप्रकारेणभवति तेनैवप्रकारेण अदब्धःकेनाप्यहिंसितःपूषा स्वस्तयेऽस्माकंअविनाशाय पायुःरक्षिताभवतु ॥ तस्थुषः तिष्ठतेर्लिटःक्वसुः षष्ठ्येकवचनेवसोःसंप्रसारणमितिसंप्रसारणं शासिवसिघसीनांचेतिषत्वं षष्ठ्याःपतिपुत्रेतिविसर्जनीयस्यसत्वम्। धियंजिन्वं जिविःप्रीणनार्थः कृत्यल्युटोबहुलमितिबहुलवचनात्खच् इचएकाचोम्प्रत्ययवच्चेतिअमागमः।असत् असभुवि लेटचडागमः बहुलंछन्दसीतिशपोलुगभावः।पायुः पारक्षणे कृवापाजीत्युण्। स्वस्तये सुपूर्वादस्तेर्भावेक्तिन् छन्दस्युभयथेतितस्यसार्वधातुकत्वात् अस्तेर्भूरितिभूभावाभावइतिवृत्तावुक्तम् ॥५॥

५. उस ऐश्वर्यशाली, स्थावर और जंगम के अधिपति और यज्ञतोष इन्द्र को, अपनी रक्षा के लिए, हम बुलाते हैं। जैसे पूषा हमारे धन की वृद्धि के लिए रक्षण-शील हैं, वैसे ही अहिंसित पूषा हमारे मंगल के लिए रक्षक हों।

॥ इतिप्रथमस्यषष्ठेपञ्चदशोवर्गः ॥ १५॥

षष्ठीमृचमाह—

स्वस्तिनइन्द्रोवृद्धश्रवाःस्वस्तिनःपूषाविश्ववेदाः ।
स्वस्तिनस्तार्क्ष्योअरिष्टनेमिःस्वस्तिनोबृहस्पतिर्दधातु ॥६॥

स्वस्ति । नः । इन्द्रः । वृद्धऽश्रवाः । स्वस्ति । नः । पूषा । विश्वऽवेदाः ।
स्वस्ति । नः । तार्क्ष्यः । अरिष्टऽनेमिः । स्वस्ति । नः । बृहस्पतिः ।
दधातु ॥ ६ ॥

वृद्धश्रवाः वृद्धंप्रभूतंश्रवःश्रवणंस्तोत्रंहविर्लक्षणमन्नंवायस्य तादृशइन्द्रोनोऽस्माकं स्वस्तीत्यविनाशिनाम स्वस्तिअविनाशंदधातुविदधातुकरोतु विश्ववेदाःविश्वानिवेत्तीतिविश्ववेदाः यद्वा विश्वानिसर्वाणि वेदांसिज्ञानानिधनानिवायस्यतादृशःपूषापोषकोदेवः नोऽस्माकंस्वस्ति विदधातु अरिष्टनेमिः नेमिरित्यायुधनाम अरिष्टोऽहिंसितोनेमिर्यस्य यद्वा रथचक्रस्यधारानेमिः यत्संबन्धिनोरथस्यनेमिर्नहिंस्यतेसोरिष्टनेमिः एवंभूतस्तार्क्ष्यः तृक्षस्यपुत्रोगरुत्मान् नोऽस्माकं स्वस्तिअविनाशंविदधातु तथाबृहस्पतिः बृहतांदेवानांपालयितानोऽस्माकंस्वस्तिअविनाशंविदधातु ॥ वृद्धश्रवाः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । विश्ववेदाः विदज्ञाने विद्लृलाभेआभ्यामसुन्प्रत्ययान्तोवेदस्शब्दः बहुव्रीहौविश्वंसंज्ञायामितिपूर्वपदान्तोदात्तत्वम् । तार्क्ष्यः तृक्षस्यापत्यं गर्गादिभ्योयञ् ञित्वादाद्युदात्तत्वम् । अरिष्टनेमिः नरिष्टाअरिष्टा अव्ययपूर्वपदप्रकृतिस्वरत्वंअरिष्टानेमिर्यस्यसतथोक्तः । बृहस्पतिः तद्बृहतोःकरपत्योरितिसुट्तलोपौ उभेवनस्पत्यादिष्विति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम् ॥ ६ ॥

६. अपरिमेय-स्तुति-पात्र इन्द्र और सर्वज्ञ पूषा हमें मंगल दें। तृक्ष के पुत्र अरिष्टनेमि (कश्यप) या अहिंसित रथनेमियुक्त गरुड़ तथा बृहस्पति हमें मंगल प्रदान करें।

सप्तमीमृचमाह—

पृषदश्वामरुतःपृश्निमातरःशुभंयावानोविदथेषुजग्मयः ।
अग्निजिह्वामनवःसूरचक्षसोविश्वेनोदेवाअवसागमन्निह ॥७॥

पृषत्ऽअश्वाः । मरुतः । पृश्निऽमातरः । शुभम्ऽयावानः । विदथेषु ।
जग्मयः । अग्निऽजिह्वाः । मनवः । सूरऽचक्षसः । विश्वे । नः ।
देवाः । अवसा । आ । गमन् । इह ॥ ७ ॥

पृषदश्वाः पृषद्भिः श्वेतबिन्दुभिर्युक्ताअश्वायेषांतेतथोक्ताः पृश्निमातरः पृश्निर्नानावर्णा गौःमातायेषां शुभंयावानः शुभंशोभनंयान्तिगच्छन्तीतिशुभंयावानः शोभनगतयइत्यर्थः विदथेषुयज्ञेषुजग्मयोगन्तारः अग्निजिह्वाःअग्नेर्जिह्वायांवर्तमानाः सर्वेहिदेवाः हविःस्वीकरणायअग्नेर्जिह्वायांवर्तन्ते तात्स्थ्यात्ताच्छब्द्यं मनवः सर्वस्यमन्तारः सूरचक्षसः सूर्यप्रकाशइवचक्षःप्रकाशोयेषांते एवंभूतामरुतः मरुत्संज्ञकाविश्वेदेवाः सर्वेदेवाः नोऽस्मान् इहास्मिन्काले अवसारक्षणेनसहआगमन्आगच्छन्तु॥ शुभंयावानः याप्रापणे आतोमनिन्क्वनिब्वनिप् तत्पुरुषेकृतिबहुलमितिबहुलवचनाद्द्वितीयायाअप्यलुक् । गमन् गमेःप्रार्थनायांलेटचडागमः इतश्चलोपइतीकारलोपः बहुलंछन्दसीतिशपोलुक् ॥ ७ ॥

७. श्वेतबिन्दु-चिह्नित अश्ववाले, पृश्नि (पृथिवी या गौ) के पुत्र, शोभन-गति-शाली, यज्ञगामी, अग्नि-जिह्वा पर अवस्थित, बुद्धि-शाली और सूर्य के समान प्रकाशशाली मरुत् देव हमारी रक्षा के लिए यहाँ आवें।

अस्तिसौम्यचरुस्तृतीयसवने तेनचरुणादेवताइष्ट्वा इष्टशेषेतस्मिन्बहुघृतमवनीयतस्मिन्वषट्कर्त्तास्वकीयाछायाद्रष्टव्या सायदिनदृश्येततदानींभद्रमित्येकापठितव्या त्वंसोमइतिखण्डे तथैवसूत्रितम्—राज्ञासोमेनतद्वयमस्मासुधारयामसिभद्रंकर्णेभिःश्रृणुयामदेवाइतिचेति । महानाम्नीव्रतेप्येषाभूमिस्पर्शनेजप्या सूत्रितंचएतद्विदमिखण्डे—भद्रंकर्णेभिःश्रृणुयामदेवाःशन्नइन्द्राग्नीभवतामवोभिरिति ।

तामेतांसूक्तेअष्टमीमृचमाह—

भ॒द्रंकर्णे॑भिःश्रृणुयामदेवाभ॒द्रंप॑श्येमा॒क्षभि॑र्यजत्राः ।
स्थि॒रैरङ्गै॑स्तुष्टु॒वांस॑स्त॒नूभि॒र्व्यशे॑मदे॒वहि॑तं॒यदायुः॑ ॥८॥

भ॒द्रम् । कर्णे॑भिः । श्रृ॒णु॒या॒म॒ । दे॒वाः॒ । भ॒द्रम् । प॒श्ये॒म॒ । अ॒क्षऽभिः॑ । य॒ज॒त्राः॒ । स्थि॒रैः । अङ्गैः॑ । तु॒स्तु॒ऽवांसः॑ । त॒नूभिः॑ । वि । अ॒शे॒म॒ । दे॒वऽहि॑तम् । यत् । आयुः॑ ॥ ८ ॥

हेदेवाःदानादिगुणयुक्ताः सर्वेदेवाःकर्णेभिरस्मदीयैःश्रोत्रैर्भद्रंभजनीयं कल्याणवचनंश्रृणुयाम युष्मत्प्रसादाच्छ्रोतुंसमर्थाःस्याम अस्माकं बाधिर्यंकदाचिदपिमाभूत् हेयजत्राः यागेषु चरुपुरोडाशादिभिर्यष्टव्याः देवाः अक्षभिः अक्षिभिरात्मीयैश्चक्षुर्भिः भद्रंशोभनंपश्येम द्रष्टुंसमर्थाःस्याम अस्माकंदृष्टिप्रतिघातोऽपिमाभूत् स्थिरैर्दृढैरङ्गैर्हस्तपादादिभिरवयवैः तनूभिः शरीरैश्चयुक्तावयं तुष्टुवांसः युष्मांस्तुवन्तः यदायुःषोडशाधिकशतप्रमाणं विंशत्यधिकशतप्रमाणंवादेवहितं

देवेनप्रजापतिनास्थापितं तद्व्यशेमप्राप्नुयाम ॥ कर्णेभिः बहुलंछन्दसीतिभिसऐसभावः । अक्षभिः छन्दस्यपिदृश्यतइत्यनङ् सचोदात्तः । यजत्राः अमिनक्षीत्यादिनायजेरत्रन्प्रत्ययः । तुष्टुवांसः ष्टुञ्स्तुतौ लिटःक्वसुः शर्पूर्वाःखयइतितकारःशिष्यते । अशेम अशूव्याप्तौ लिङ्याशिष्यङ् यदितुतत्रपरिगणनं अन्यव्यावृत्त्यर्थं तदानींलिङिव्यत्ययेनशप् । देवहितं तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरत्वम् ॥ ८ ॥

८. देवगण, हम कानों से मंगल-प्रद वाक्य सुनें, यजनीय देवगण, हम आँखों से मंगलवाहक वस्तु देखें, हम दृढ़ाङ्ग शरीर से सम्पन्न होकर तुम्हारी स्तुति करके प्रजापति-द्वारा निर्दिष्ट आयु प्राप्त करें ।

शतमिन्नुशरदोअन्तिदेवायत्रानश्चक्राजरसंतनूनाम् ।
पुत्रासोयत्रपितरोभवन्तिमानोमध्यारीरिषतायुर्गन्तोः ॥९॥
शतम् । इत् । नु । शरदः । अन्ति । देवाः । यत्र । नः । चक्र ।
जरसम् । तनूनाम् । पुत्रासः । यत्र । पितरः । भवन्ति । मा । नः ।
मध्या । रिरिषत । आयुः । गन्तोः ॥ ९ ॥

हेदेवाः अन्तिअन्तिके मनुष्याणांसमीपे आयुष्ट्वेनभवद्भिःकल्पिताःशरदःसंवत्सराः शतमिन्नु शतंखलु यस्मात्सृष्टिकाले मनुष्याणांशतंसंवत्सराआयुरितियुष्माभिःपरिकल्पितं तस्मान्नोस्माकमायुर्गन्तोः कृत्स्नस्यायुषोगमनात्पूर्वं मध्या मध्येमारीरिषत माहिंसिष्ट कीदृशान् नोऽस्माकं तनूनांशरीराणांजरसंजरांयत्रयस्यामवस्थायांचक्र कृतवन्तोयूयं यत्रचपुत्रासःपुत्राः पितरोऽस्माकंरक्षितारोभवन्ति ईदृग्दशापन्नानित्यर्थः ॥ अन्ति अन्तिकशब्दस्यकादिलोपोबहुलमितिवक्तव्यमितिकलोपः । यत्र ऋचितुनुघमक्षुतङ्कुत्रोरुष्याणामितिसंहितायांदीर्घः । चक्र लिटिमध्यमबहुवचनस्यकित्त्वाद्गुणाभावेयणादेशः द्व्यचोतस्तिङइतिसंहितायांदीर्घत्वम् । जरसं जरायाजरसन्यतरस्यामितिजरसादेशः । मध्या सुपांसुलुगितिसप्तम्याडादेशः । रीरिषत रुषरिषहिंसायां अस्माण्ण्यन्तान्माङिलुङिमध्यमबहुवचने चेश्चङिणिलोपोपधाह्रस्वत्वद्विर्वचनहलादिशेषसन्वद्भावदीर्घाः छान्दसःपदकालीनोह्रस्वः । गन्तोः भावलक्षणेस्थेणितिगमेस्तोसुन्प्रत्ययः ॥ ९ ॥

९. देवगण, मनुष्यों के लिए (आप लोगों के द्वारा) १०० वर्ष की आयु ही कल्पित है। इसी बीच तुम लोग शरीर में बुढ़ापा उत्पन्न करते हो और इसी बीच पुत्र लोग पिता हो जाते हैं। उस निर्दिष्ट आयु के बीच हमें विनष्ट नहीं करना।

अदितिर्द्यौरित्येषा अदितिदेवताकेपशौ हविषोयाज्या सूत्रितंच—अदितिर्द्यौरदितिरन्तरिक्षंनतेविष्णोजायमानोनजातइति ।

तामेतांसूक्तेदशमीमृचमाह—

अदि॑ति॒र्द्यौरदि॑तिर॒न्तरि॑क्ष॒मदि॑तिर्मा॒तास॒पि॒तास॒पु॒त्रः।
विश्वे॑दे॒वाअदि॑ति॒ःपञ्च॒जना॒अदि॑तिर्जा॒तमदि॑ति॒र्जनि॑त्वम्॥१०॥१६॥

अदि॑तिः। द्यौः। अदि॑तिः। अ॒न्तरि॑क्षम्। अदि॑तिः। मा॒ता। सः।
पि॒ता। सः। पु॒त्रः। विश्वे॑। दे॒वाः। अदि॑तिः। पञ्च॑। जना॑ः।
अदि॑तिः। जा॒तम्। अदि॑तिः। जनि॑ऽत्वम् ॥१०॥ १६॥

अदितिरदीनाअखण्डनीयावापृथिवीदेवमातावा सैवद्यौः द्योतनशीलोनाकः सैवान्तरिक्षं अन्तराद्यावापृथिव्योर्मध्येईक्ष्यमाणंव्योम सैवमातानिर्मात्रीजगतोजननी सैवपिताउत्पादकः ता-तश्च सपुत्रःमातापित्रोर्जातःपुत्रोपिसैव विश्वेदेवाः सर्वेऽपिदेवाः अदितिरेव पञ्चजनानिषादपञ्चमा-श्चत्वारोवर्णाः यद्वा गन्धर्वाःपितरोदेवाअसुरारक्षांसीति तदुक्तंयास्केन—गन्धर्वाःपितरोदेवाअ-सुरारक्षांसीत्येकेचत्वारोवर्णानिषादःपञ्चमइत्यौपमन्यवइति। ब्राह्मणेत्वेवमाम्नातम्—सर्वेषांवा-एतत्पञ्चजनानामुक्थंदेवमनुष्याणांगन्धर्वाप्सरसांसर्पाणांचपितॄणांचेति। तत्रगन्धर्वाप्सरसामै-क्यात्पञ्चजनत्वं एवंविधाःपञ्चजनाअप्यदितिरेव जातंजननंप्रजानामुत्पत्तिः साप्यदितिरेव ज-नित्वं जन्माधिकरणंतदप्यदितिरेव एवंसकलजगदात्मनाअदितिःस्तूयते उक्तंचयास्केन—इत्यदि-तेर्विभूतिमाचष्टइति॥ अदितिः दोअवखण्डने अस्मात्कर्मणिक्तिनि द्यतिस्यतिमास्थामितीत्वम् यास्कपक्षेतु दीङ्क्षयेइत्यस्मात्क्तिनि व्यत्ययेनह्रस्वत्वं नञ्समासेव्ययपूर्वपदप्रकृतिस्वरत्वम्। सपिता निर्दिश्यमानयोरेकतामापादयन्तिसर्वनामानिपर्यायेणतल्लिङ्गतामुपाददतइत्युद्देश्यलिङ्ग-तयापुँल्लिङ्गत्वम्। जनित्वं जनेरौणादिकस्त्वन्प्रत्ययः॥ १०॥

१०. अदिति (अदीना वा अखण्डनीया पृथिवी या देवमाता) आकाश, अन्तरिक्ष, माता, पिता और समस्त देव हैं। अदिति पंचजन है और अदिति जन्म और जन्म का कारण हैं।

॥ इतिप्रथमस्यपष्ठेषोडशोवर्गः॥ १६॥

ऋजुनीतीतिनवर्चंषष्ठंसूक्तम् गोतमस्यार्षं अत्रानुक्रम्यते—ऋजुनीतीतिनवगायत्रमन्त्यानुष्टुबि-ति।पूर्वत्रवैश्वदेवंत्वित्युक्तत्वात् तुह्यादिपरिभाषयाइदमपिसूक्तंबहुदेवताकं सूक्तविनियोगोलैङ्गि-कः चातुर्विंशिकेऽहनिप्रातःसवनेमैत्रावरुणस्यऋजुनीतीनइत्येषारंभणीया चतुर्विंशइतिखण्डेसू-

१ नि० ३.८.। २ ऐ० ब्रा० ३.३१.। ३ नि० ४.२३.।

त्रितम्—ऋजुनीतीनोवरुणइन्द्रंवोविश्वतस्परीति । अहर्गणेषुद्वितीयादिष्वहःस्वपिएषारंभणीया शंसनीया सूत्रितंच—आरंभणीयाःपर्यासात्कद्ववोहरहःशस्यानीतिहोत्रकाद्वितीयादिष्वेवेति ।

तामेतांसूक्तेप्रथमामृचमाह—

ऋजुनीतीनोवरुणोमित्रोनयतुविद्वान् । अर्यमादेवैःसजोषाः ॥१॥

ऋजुऽनीती । नः । वरुणः । मित्रः । नयतु । विद्वान् । अर्यमा । देवैः । सऽजोषाः ॥ १ ॥

अहरभिमानीदेवोमित्रःवरुणोरात्र्यभिमानी मित्रश्चवरुणश्चविद्वान् नेतव्यमुत्तमंस्थानं जानन्नोऽस्मान् ऋजुनीती ऋजुनीत्या ऋजुनयनेनकौटिल्यरहितेनगमनेननयतु अभिमतंफलंमापयतु तथादेवैरन्यैरिन्द्रादिभिः सजोषाः समानप्रीतिरर्यमा अहोरात्रस्यविभागकर्तासूर्यश्चास्मानृजुगमनेनाभिमतंस्थानंमापयतु ॥ ऋजुनीती सुपांसुलुगितितृतीयायाःपूर्वसवर्णदीर्घत्वम् ॥ १ ॥

१. वरुण (निशाभिमानी देव) और मित्र (दिवाभिमानी देव) उत्तम मार्ग पर अकुटिल गति से हमें ले जायँ तथा देवों के साथ समान प्रेम से युक्त अर्यमा भी हमें ले जायें।

तेहिवस्वोवसवानास्तेअप्रमूरामहोभिः । व्रतारक्षन्तेविश्वाहा ॥२॥

ते । हि । वस्वः । वसवानाः । ते । अप्रऽमूराः । महःऽभिः । व्रता । रक्षन्ते । विश्वाहा ॥ २ ॥

तेहिपूर्वोक्तामित्रादयः वस्वोवसुनोधनस्यवसवानावासकाः आच्छादयितारः सर्वंजगद्धनेन आच्छादयन्तीत्यर्थः अतस्तेमित्रादयः अप्रमूराः अप्रमूर्छिताः अमूढाः प्राज्ञाःसन्तोमहोभिरात्मीयैस्तेजोभिर्विश्वाहासर्वाण्यहानि अत्यन्तसंयोगेद्वितीया सर्वेष्वप्यहःसु व्रताव्रतानि जगन्निर्वाहरूपाणिस्वकीयानिकर्माणि रक्षन्तेपालयन्ति ॥ वस्वः आगमानुशासनस्यानित्यत्वान्नुमभावेजसादिषुछन्दसिवावचनमितिघेर्ङितीतिगुणस्यविकल्पनादभावेयणादेशः । वसवानाः वस आच्छादने अस्मादन्तर्भावितण्यर्थाल्लटःशानच् बहुलंछन्दसीतिशपोलुगभावः वर्णव्यापत्त्यामकारस्यवकारः । अप्रमूराः मुर्छामोहसमुच्छ्राययोः अस्मात्संपदादिलक्षणोभावेक्विप् राल्लोपइतिछकारलोपः प्रकृष्टामूः प्रमूः ततोमत्वर्थीयोरः रोरीतिरेफलोपः नप्रमूराः अप्रमूराः अव्ययपूर्वपदप्रकृतिस्वरत्वम् । रक्षन्ते रक्षपालने व्यत्ययेनतङ् ॥ २ ॥

२. वे धन देते हैं। वे मूढ़ता-शून्य होकर अपने तेज-द्वारा सदा अपने कार्य की रक्षा करते हैं।

तृतीयामृचमाह—

तेअस्मभ्यंशर्मयंसन्नमृतामर्त्येभ्यः । बाधमानाअपद्विषः ॥३॥

ते । अस्मभ्यम् । शर्म । यंसन् । अमृताः । मर्त्येभ्यः । बाधमानाः । अप । द्विषः ॥ ३ ॥

अमृताः अमरणधर्माणः तेविश्वेदेवाः मर्त्येभ्यः मरणधर्मभ्योऽस्मभ्यमनुष्ठातृभ्यःशर्मअमृतलक्षणंसुखं यंसन् यच्छन्तु प्रयच्छन्तु किंकुर्वन्तः द्विषोऽस्मदीयान् पापलक्षणाञ्छत्रूनपबाधमानाःविनाशंमापयन्तः ॥ यंसन् यमउपरमे लेटचडागमः सिब्बहुलंलेटीतिसिप् । अमृताः मृतं मरणंयेषांनास्तीत्यमृताः नञोजरमरमित्रमृताइत्युत्तरपदाद्युदात्तत्वम् ॥ ३ ॥

३. वे अमरगण हमारे शत्रुओं का विनाश करके हम मर्त्यों को सुखप्रदान करें।

चतुर्थीमृचमाह—

विनःपथःसुवितायचियन्त्विन्द्रोमरुतः । पूषाभगोवन्द्यासः ॥४॥

वि । नः । पथः । सुवितायं । चियन्तु । इन्द्रः । मरुतः । पूषा । भगः । वन्द्यासः ॥ ४ ॥

वन्द्यासः सर्वैर्वन्दनीयाः स्तोतव्याःनमस्कर्तव्यावाइन्द्रादयोदेवानोऽस्माकंपथोमार्गान् विचियन्तु विचिन्वन्तु अशोभनेभ्योमार्गेभ्यःसकाशात्पृथक्कुर्वन्तु किमर्थं सुवितायसुष्ठुमाप्तव्याय स्वर्गादिफलाय ॥ पथः शसिभस्यटेर्लोपइतिटिलोपःउदात्तनिवृत्तिस्वरेणशसउदात्तत्वम् । सुविताय इण्गतावित्यस्मात्कर्मणिनिष्ठा तन्वादीनांछन्दसिबहुलमुपसंख्यानमितिउवङ् गतिरनन्तरइतिपूर्वपदप्रकृतिस्वरत्वेप्राप्ते सूपमानात्क्तइत्युत्तरपदान्तोदात्तत्वम् । चियन्तु चिञ्चयने बहुलंछन्दसीतिविकरणस्यलुक् इयङ् पादादित्वान्निघाताभावः । वन्द्यासः वदिअभिवादनस्तुत्योः ऋहलोर्ण्यत् ईडवन्दवृशंसदुहांण्यतइत्याद्युदात्तत्वम् आज्जसेरसुक् ॥ ४ ॥

४. वन्दनीय इन्द्र, मरुद्गण, पूषा और भग देवगण उत्तम बल-लाभ के लिए हमें पथ दिखायें।

आद्योर्यमेसन्तिचत्वार्यतिरिक्तोक्थानि तत्रचतुर्थेअच्छावाकातिरिक्तोक्थेउतनोधियइत्येषानुरूपतृचस्यवैकल्पिकीतृतीया सूत्रितंच—उतनोधियोगोअग्राइतिवानुरूपस्योत्तमेति ।

तामेतांसूक्तेपञ्चमीमृचमाह—

उतनोधियोगोअंग्राःपूषन्विष्णवेवयावः । कर्तानःस्वस्तिमतः ॥५॥१७

उत । नः । धियः । गोऽअंग्राः । पूर्षन् । विष्णो इति । एवंऽयावः ।
कर्त । नः । स्वस्तिऽमतः ॥ ५ ॥ १७ ॥

हेपूषन्पोषकदेव हेविष्णोव्यापनशीलदेव हेएवयावः एवैर्गन्तृभिरश्वैर्यातिगच्छतीत्येवया-वामरुद्गणः हेमरुद्गण तेसर्वेयूयं नोऽस्माकंधियः आप्तोर्यामलक्षणानिकर्माणि गोअग्राःपश्वग्राणि पशुप्रमुखानिअस्मत्सकाशाद्भ्रष्टैः पशुभिर्युक्तानिकर्तंकुरुत आप्तोर्यामकर्मणश्चपशुप्राप्तिहेतुत्वमाम्नायते—यस्मात्पशवःप्रप्रेवभ्रंशेरन् सएतेनयज्ञेनयजेतेति[1] । उतापिचनोस्मान्स्वस्तिमतः अविनाशिनः कुरुत ॥ एवयावः इण्गतौ इण्शीङ्भ्यांवन्निितिवन्प्रत्ययः अस्मिन्नुपपदे यामापणेइ-त्यस्मादातोमनिन्क्विनितिवनिप् संबुद्धौवनउपसंख्यानमितिवकारस्यरुत्वम् ॥ ५ ॥

५. पूषन, विष्णु और मरुद्गण, हमारा यज्ञ गो-प्रधान करो और हमें विनाश-शून्य बनाओ।

॥ इतिप्रथमस्यषष्ठेसप्तदशोवर्गः ॥ १७ ॥

ऋत्विगाद्यर्थमाहतंमधुपर्कंमधुवाताइतितृचेनऋत्विगादिःप्रतिग्रहीतावेक्षेत तथाचसूत्र्यते—मधुवाताइतितृचेनावेक्ष्येति ।

तृचेप्रथमांसूक्तेषष्ठीमृचमाह—

मधुवाताऋतायतेमधुंक्षरन्तिसिन्धवः । माध्वीर्नःसन्त्वोषधीः ॥ ६ ॥

मधुं । वाताः । ऋतऽयते । मधुं । क्षरन्ति । सिन्धवः । माध्वीः ।
नः । सन्तु । ओषधीः ॥ ६ ॥

ऋतायतेऋतंयज्ञमात्मनइच्छतेयजमानाय वातावायवः मधुमाधुर्योपेतंकर्मफलंक्षरन्त्विवर्षन्ति प्रयच्छन्तीत्यर्थः तथा सिन्धवःस्यन्दनशीलानद्यः समुद्रावामधुमाधुर्योपेतंस्वकीयंरसंक्षरन्ति एवंनोस्मभ्यंओषधीः फलपाकान्ताओषधयः ताश्चमाध्वीर्माधुर्योपेताःसन्तुभवन्तु ॥ मधु अस्मादुत्तरस्यमत्वर्थीयस्यलुगकारेकाररेफाश्चवक्तव्याइतिलुक् । ऋतायते ऋतमात्मनइच्छति सुपआत्मनःक्यच् नच्छन्दस्यपुत्रस्येतिइत्वदीर्घयोर्निषेधः अन्येषामपीतिसंहितायांदीर्घत्वम् क्यजन्ताल्लटःशतृ शतुरनुमइतिविभक्तेरुदात्तत्वम् । माध्वीः मधोरञ्चेतिमत्वर्थीयोञ्प्रत्ययः ऋत्व्यवास्त्व्येत्यादौअञि यणादेशोनिपात्यते वाछन्दसीतिपूर्वसवर्णदीर्घत्वम् । ओषधीःओषःपाकआसुधीयतइत्योषधयः कर्मण्यधिकरणेचेतिकिप्रत्ययः कृदिकारादक्तिनइतिङीप् जसिपूर्ववत्पूर्वस-

[1] तै० ब्रा० २.७.१४.।

वर्णदीर्घः दासीभारादिषुपठितत्वात्पूर्वपदप्रकृतिस्वरत्वम् तच्चघञन्तमाद्युदात्तम् ॥ ६॥

६. यजमान के लिए समस्त वायु और नदियाँ मधु (या कर्मफल) वर्षण करें। सारी ओषधियाँ भी माधुर्य-युक्त हों।

सप्तमीमृचमाह—

मधुनक्तमुतोषसोमधुमत्पार्थिवंरजः । मधुद्यौरस्तुनःपिता ॥७॥

मधु । नक्तम् । उत । उषसः । मधुऽमत् । पार्थिवम् । रजः । मधु । द्यौः । अस्तु । नः । पिता ॥ ७ ॥

नक्तंरात्रिर्नोऽस्माकं मधुमधुमतीमाधुर्योपेतफलप्रदाभवतु उतअपिच उषसःउषःकालोपलक्षितान्यहानिचमधुमन्तिभवन्तु पार्थिवंरजः पृथिव्याःसंबन्धीलोकः अस्माकंमधुमत् माधुर्यविशिष्टफलयुक्तोभवतु पितावृष्टिप्रदानेनसर्वेषांपालयिताद्यौर्द्युलोकोपिमधुमधुयुक्तोभवतु॥ पार्थिवं पृथिव्यात्राञावितिप्राग्दीव्यतीयोऽञ्प्रत्ययः । रजः रजःशब्दोलोकवाची लोकारजांस्युच्यन्तइतियास्कः । रजन्त्यस्मिञ्जनाइतिरजः असुनिरजकरजनरजःसूपसंख्यानमितिरञ्जेर्नलोपः॥७॥

७. हमारी रात्रि और उषा मधुर या मधुर-फल-दाता हों । पृथ्वी की रज उत्तम फलदायक हो । सबका रक्षक आकाश भी सुखदायक हो ।

मधुमान्नोवनस्पतिर्मधुमाँअस्तुसूर्यः । माध्वीर्गावोभवन्तुनः ॥८॥

मधुऽमान् । नः । वनस्पतिः । मधुऽमान् । अस्तु । सूर्यः । माध्वीः । गावः । भवन्तु । नः ॥ ८ ॥

नोऽस्माकंवनस्पतिः वनानांपालयितायूपाभिमानीदेवः मधुमान्माधुर्योपेतफलवानस्तु तादृशंफलमस्मभ्यंप्रयच्छत्वित्यर्थः सूर्यःसर्वस्यप्रेरकःसविताचमधुमानस्तु गावःअग्निहोत्राद्यर्थाधेनवश्चनोऽस्माकंमाध्वीः माधुर्योपेतेनपयसायुक्ताभवन्तु ॥ वनस्पतिः वनानांपतिर्वनस्पतिः पारस्करादित्वात्सुट् वनपतिशब्दावाद्युदात्तौ उभेवनस्पत्यादिषुयुगपदितिपूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम् ॥ ८ ॥

८. हमारे लिए समस्त वनस्पतियाँ सुखदायक हों। सूर्य सुखदायक हों। सारी गायें सुखदायक हों।

शंनोमित्रःशंवरुणःशंनोभवत्वर्यमा ।

शंनइन्द्रोबृहस्पतिःशंनोविष्णुरुरुक्रमः ॥९॥१८॥

---

१ नि० ४. १९.।

शम् । नः । मित्रः । शम् । वरुणः । शम् । नः । भवतु । अर्यमा ।
शम् । नः । इन्द्रः । बृहस्पतिः । शम् । नः । विष्णुः । उरुऽक्रमः ॥ ९ ॥ १८ ॥

अहरभिमानीमित्रोदेवोनोऽस्माकंशंसुखकरोभवतु यद्वा अस्मदीयानामुपद्रवाणांशमयिताभवतु रात्र्यभिमानीवरुणश्चशंसुखकरोभवतु अर्यमाअहोरात्रयोःख्यापयितासूर्यश्चनोऽस्माकंशंसुखकरोभवतु बृहस्पतिः बृहतांदिवानांपालयिताइन्द्रश्चनोऽस्माकंशंसुखकरोभवतु उरुक्रमःउरुविस्तीर्णंक्रामतिपादौविक्षिपतीत्युरुक्रमः विष्णुर्हिवामनावतारेपृथिव्यादीन्लोकान्पदत्रयरूपेणाक्रान्तवान् अतउरुक्रमोविष्णुश्चनोऽस्माकंशंसुखकरः उपद्रवाणांशमयितावाभवतु ॥ उरुक्रमः क्रमुपादविक्षेपे पचाद्यच् यद्वा उरून्क्रामतीत्युरुक्रमः कर्मण्यण् नोदात्तोपदेशस्यमान्तस्येतिवृद्धिप्रतिषेधः ॥ ९ ॥

९. मित्र, वरुण, अर्यमा, इन्द्र, बृहस्पति और विस्तीर्ण-पाद-क्षेपी विष्णु हमारे लिए सुखकर हों।

॥ इतिप्रथमस्यषष्ठेष्टादशोवर्गः ॥ १८ ॥

त्वंसोमेतित्रयोविंशत्यृचंसप्तमंसूक्तम् गोतमस्यार्षंसोमदेवताकं पञ्चम्याद्याः षोडश्यन्त्याः द्वादशर्चोगायत्र्यः सप्तदशीउष्णिक् शिष्टादशत्रिष्टुभः तथाचानुक्रान्तम्—त्वंसोमत्र्यधिकासौम्यंपञ्चम्यादिगायत्र्योद्वादशोष्णिक्चेति । सूक्तविनियोगोलैङ्गिकः एकादशिनस्यसौम्यस्यपशोर्वपापुरोडाशयोस्त्वंसोमेतिद्वेऋचावनुवाक्ये सूत्रितंच—त्वंसोमप्रचिकितोमनीषेतिद्वेइति । महापितृयज्ञेएकैकस्यहविषोद्वेद्वेअनुवाक्ये तत्रसोमस्यपितृमतस्त्वंसोमेत्येषाप्रथमानुवाक्या दक्षिणाग्नेरग्निमितिखण्डेसूत्रितम्—त्वंसोमप्रचिकितोमनीषासोमोधेनुमिति । एषैवप्रायणीयेष्टौसौम्यस्यानुवाक्या तदहःप्रायणीयेष्टिरित्यत्रसूत्रितम्—त्वंसोमप्रचिकितोमनीषायातेधामानिदिवियापृथिव्यामिति ।

तामेतांसूक्तेप्रथमामृचमाह—

त्वंसोमप्रचिकितोमनीषात्वंरजिष्ठमनुनेषिपन्थाम् ।
तवप्रणीतीपितरोनइन्दोदेवेषुरत्नमभजन्तधीराः ॥ १ ॥

त्वम् । सोम । प्र । चिकितः । मनीषा । त्वम् । रजिष्ठम् । अनु ।
नेषि । पन्थाम् । तव । प्रऽनीती । पितरः । नः । इन्दो इति । देवेषु ।
रत्नम् । अभजन्त । धीराः ॥ १ ॥

हेसोम त्वंमनीषा मनीषयाअस्मदीययाबुद्ध्याप्रचिकितः प्रकर्षेणज्ञातोऽसि वयंत्वांस्तुतिभिरज्ञासिष्मेत्यर्थः अतस्त्वंरजिष्ठं ऋजुतममकुटिलं पन्थांपन्थानंकर्मफलावाप्तिहेतुभूतंमार्गंअनुनेषि अस्माननुक्रमेणप्रापयसि किञ्च हेइन्दोउन्दनशील सर्वंजगदमृतेन क्लेदयितःसोम तवप्रणीतीप्रणीत्या त्वत्कर्तृकेनप्रकृष्टनयनेनधीराः धीमन्तः कर्मवन्तः प्रज्ञावन्तोनोऽस्माकं पितरोदेवेष्विन्द्रादिषु रत्नंरमणीयं धनमभजन्तअसेवन्त प्राप्नुवन् अतोऽस्मानपितादृशंधनंप्रापयेत्यर्थः॥ प्रचिकितः कितज्ञाने अस्मात्कर्मणिनिष्ठा छान्दसंद्विर्वचनं यद्वा यङ्लुगन्तान्निष्ठा संज्ञापूर्वकस्यविधेरनित्यत्वाद्गुणोयङ्लुकोरित्यभ्यासस्यगुणाभावः यद्वा छन्दस्युभयथेतिनिष्ठायाःसार्वधातुकसंज्ञायांशप् जुहोत्यादित्वात्तस्यश्लुः श्लाविति द्विर्वचनं गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम्। मनीषा सुपांसुलुगितितृतीयायाडादेशः। रजिष्ठं ऋजुशब्दादिष्ठनि विभाषर्जोश्छन्दसीतिरत्वम् टेरितिटिलोपः।नेषि नयतेर्लेटि बहुलंछन्दसीतिशपोलुक्। पन्थां पथिमथ्यृभुक्षामादित्यसावपिव्यत्ययेनात्वम् पथिमथोःसर्वनामस्थानेइत्याद्युदात्तत्वम्। प्रणीती तादौचेतिगतेःप्रकृतिस्वरत्वम् सुपांसुलुगितितृतीयायाःपूर्वसवर्णदीर्घत्वम् ॥ १ ॥

१. सोमदेव! अपनी बुद्धि से हम तुम्हें अच्छी तरह जानते हैं। तुम हमें सरल मार्ग से ले जाता। इन्द्र अर्थात् हे सोम, तुम्हारे द्वारा लाये जाकर हमारे पितरों ने देवों के बीच रत्न प्राप्त किया था।

अग्निष्टोमेमरुत्वतीयेत्वंसोमक्रतुभिरित्येषाधाय्या सूत्रितंच—अग्निर्नेतात्वंसोमक्रतुभिःपिन्वन्त्यपइतिधाय्याइति।

तामेतांसूक्तेद्वितीयामृचमाह—

त्वंसो॑म॒क्रतु॑भिः सु॒क्रतु॑र्भू॒स्त्वंदक्षैः॑सु॒दक्षो॑वि॒श्ववे॑दाः।
त्वंवृषा॑वृष॒त्वेभि॑र्महि॒त्वाद्यु॒म्नेभि॑र्द्यु॒म्न्य॑भवोनृ॒चक्षाः॑॥ २ ॥

त्वम्। सो॒म॒। क्रतु॑ऽभिः। सु॒ऽक्रतुः॑। भूः। त्वम्। दक्षैः॑। सु॒ऽदक्षः॑। वि॒श्वऽवे॑दाः। त्वम्। वृषा॑। वृ॒ष॒ऽत्वेभिः॑। म॒हि॒ऽत्वा। द्यु॒म्नेभिः॑। द्यु॒म्नी। अ॒भ॒वः॒। नृ॒ऽचक्षाः॑॥ २ ॥

हेसोम त्वंक्रतुभिः त्वत्संबन्धिभिरग्निष्टोमादिकर्मभिरात्मीयैर्ज्ञानैर्वा सुक्रतुः शोभनकर्माशोभनप्रज्ञोवाभूर्भवसि तथा विश्ववेदाः सर्वधनस्त्वं दक्षैरात्मीयैर्बलैः सुदक्षःशोभनबलोभवसि तथा त्वंवृषत्वेभिः वृषत्वैःकामाभिवर्षणैः महित्वामहत्त्वेनमाहात्म्येनचवृषाकामानांवर्षितामहांश्चभवसि तथात्वंनृचक्षाः नृणांयज्ञस्यनेतॄणांयजमानानां अभिमतफलस्यदर्शयितासन् द्युम्नेभिःद्युम्नैःतैर्दत्तैःहविर्लक्षणैरन्नैर्द्युम्न्यभवः प्रभूतान्नोभवसि ॥ सुक्रतुः बहु-

व्रीहौक्रत्वादयश्चेत्युत्तरपदाद्युदात्तत्वम्। सुदक्षः दक्षवृद्धौ दक्ष्यतेअनेनेतिदक्षोबलम् करणेघञ् ञित्त्वादाद्युदात्तत्वम् सुशब्देनबहुव्रीहावाद्युदात्तंद्व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वम्। विश्ववेदाः विश्वानिवेदांसियस्यासौ बहुव्रीहौविश्वंसंज्ञायामितिपूर्वपदान्तोदात्तत्वम्। वृषत्वेभिः वृष्णोभावोवृषत्वं बहुलंछन्दसीतिभिसऐसभावः। महित्वा महेरौणादिकइन्प्रत्ययः भावप्रत्ययान्तात्सुपांसुलुगितिविभक्तेराकारः॥ २॥

२. सोम, अपने यज्ञ के द्वारा शोभन यज्ञ से संयुक्त और अपने बल-द्वारा शोभन बल से युक्त हो। तुम सर्वज्ञ हो। तुम अभीष्ट फल के वर्षण से वर्षणकारी हो; और तुम महिमा में महान् यजमान के अभिमत फल का प्रदर्शन करके, यजमान के द्वारा दिये गये अन्न से तुम बहुल अन्न से सम्पन्न हो।

राज्ञोनुतेवरुणस्यव्रतानिबृहद्गभीरन्तवसोमधाम।
शुचिष्ट्वमसिप्रियोनमित्रोदक्षाय्योअर्यमेवासिसोम॥३॥
राज्ञः। नु। ते। वरुणस्य। व्रतानि। बृहत्। गभीरम्। तव। सोम। धाम। शुचिः। त्वम्। असि। प्रियः। न। मित्रः। दक्षाय्यः। अर्यमाऽइव। असि। सोम॥ ३॥

हेसोम राज्ञः ब्राह्मणानांस्वामिनः सोमोऽस्माकंब्राह्मणानां राजेतिश्रुतेः[1]। वरुणस्ययागार्थमाहृतः क्रीतोवस्त्रेणावृतः सोमोवरुणः वरुणोसिधृतव्रतइतिमन्त्रलिङ्गात् क्रीतस्यतेनुतवसंबन्धीनि हिव्रतानिसर्वाण्यग्निष्टोमादीनिकर्माणि अतःसर्वेषुयागेषुत्वमेवकरणभूतोभवसीत्यर्थः अतस्तव धाम त्वदीयंतेजः बृहत्प्रमहद्विस्तीर्णंगभीरंगांभीर्योपेतंच यद्वा नुइत्येतदुपमार्थे तदुक्तंयास्केन—अथाप्युपमार्थेभवतिवृक्षस्यनुतेपुरुहूतवयाइति[2]। राज्ञोराजमानस्यवरुणस्यनुवरुणस्येव हेसोम ते तवव्रतानिकर्माणिलोकहितकारीणि शिष्टंसमानम् हेसोम त्वंशुचिः सर्वेषांशोधकोऽसि तत्रदृष्टान्तः—प्रियोनमित्रः यथासर्वेषां अनुकूलोऽहरभिमानीमित्रोदेवःशोधयिताभवतितद्वत् तथात्वं अर्यमेव अस्माभिर्दृश्यमानःसूर्यइवदक्षाय्योऽसि सर्वेषांवर्धकोभवसि यथा अहनिसूर्यः प्रकाशेनसर्वंवर्धयति एवंनिशिअमृतमयैःसोमकिरणैः प्यायमानंसवस्थावरजङ्गमात्मकंसर्वजगद्वर्धते॥ शुचिष्ट्वं युष्मत्तत्ततक्षुष्वन्तःपादमितिविसर्जनीयस्यषत्वम्। दक्षाय्यः दक्षवृद्धौ श्रुदक्षिस्पृहिगृहिभ्यआय्यइतिआय्यप्रत्ययः॥ ३॥

३. सोम (चन्द्र), वरुण राजा के सारे कार्य तुम्हारे ही हैं। तुम्हारा तेज विस्तीर्ण और गम्भीर है। प्रिय बन्धु के समान तुम सबके संस्कारक हो। अर्यमा की तरह तुम सबके वर्द्धक हो।

---

[1] तै० सं० १.८.१०.। [2] तै० सं० १.२.१०.। [3] नि० १.४.।

आग्रयणेष्टौसौम्यस्यहविषोयातेधामानीतियाज्या आग्रयणंव्रीहिश्यामाकयवानामिति खण्डेसूत्रितम्—सोमयास्तेमयोभुवोयातेधामानिदिवियापृथिव्यामिति । एवैवैकादशिनस्यसौम्यस्यपशोर्वपायांयाज्या सूत्रितंच—यातेधामानिदिवियापृथिव्यामषाढंयुत्सुपृतनासुपप्रिमिति। प्रायणीयेष्टावप्येषैवसौम्यस्ययाज्या सूत्रितंच—त्वंसोमप्रचिकितोमनीषायातेधामानिदिवियापृथिव्यामिति ।

तामेतांसूक्तेचतुर्थीमृचमाह—

यातेधामानिदिवियापृथिव्यांयापर्वतेष्वोषधीष्वप्सु ।
तेभिर्नोविश्वैःसुमनाअहेळन्राजन्त्सोमप्रतिहव्यागृभाय ॥४॥

या । ते । धामानि । दिवि । या । पृथिव्याम् । या । पर्वतेषु । ओषधीषु । अप्ऽसु । तेभिः । नः । विश्वैः । सुऽमनाः । अहेळन् । राजन् । सोम । प्रति । हव्या । गृभाय ॥ ४ ॥

हेसोम तेतवदिविद्युलोकेयायानिधामानितेजांसिवर्तन्ते तथा पृथिव्यांभूमौयायानिवर्तन्ते तथापर्वतेषुपर्वतवत्सुशिलोच्चयेषुयानिवर्तन्ते तथा व्रीह्याद्योषधीषुअप्सुचयानिवर्तन्ते तेभिर्विश्वैस्तैः सर्वैस्तेजोभिर्युक्तः सुमनाःशोभनमनाअहेळन्नक्रुध्यन् हेराजन्सोम राजमानसोम एवंभूतस्त्वं नः हव्याअस्माभिःप्रत्तानिहवींषिप्रतिगृभाय प्रतिगृहाण ॥ या शेश्छन्दसिबहुलमितिशेर्लोपः। पृथिव्यां उदात्तयणइतिविभक्तेरुदात्तत्वम् । ओषधीषु ओषधेश्चविभक्तावप्रथमायामितिदीर्घः । अप्सु ऊडिदमित्यादिनाविभक्तेरुदात्तत्वम् । सुमनाः सोर्मनसीअलोमोषसीइत्युत्तरपदाद्युदात्तत्वम् । गृभाय ग्रहउपादाने छन्दसिशायजपीतिहेर्श्नाप्रत्ययस्यशायजादेशः ॥ ४ ॥

४. सोम, द्युलोक, पृथिवी, पर्वत, ओषधि और जल में तुम्हारा जो तेज है, उसी तेज से युक्त होकर सुमना और क्रोध-रहित राजन्, हमारा हव्य ग्रहण करो।

पौर्णमासेष्टौसौम्यस्याज्यभागस्यत्वंसोमेत्येषानुवाक्या सूत्रितंच—अग्निर्वृत्राणिजंघनदितिपूर्वस्याज्यभागस्यानुवाक्यात्वंसोमासिसत्पतिरित्युत्तरस्येति । एवंयत्रयत्रवार्त्रघ्नावाज्यभागौवत्रसर्वत्रास्याविनियोगः प्रातःकालीनायामुपसदिप्रधानस्यसौम्यस्यैषानुवाक्या आपराह्णिक्यामुपसदिसैवयाज्या सूत्रितंच—त्वंसोमासिसत्पतिर्गयस्फानोअमीवहेति विपर्यासोयाज्यानुवाक्यानामितिच ।

तामेतांसूक्तेपञ्चमीमृचमाह—

त्वंसोमासिसत्पतिस्त्वंराजोतवृत्रहा। त्वंभद्रोअसिक्रतुः॥५॥१९॥

त्वम्। सोम। असि। सत्ऽपतिः। त्वम्। राजा। उत। वृत्रऽहा।

त्वम्। भद्रः। असि। क्रतुः॥ ५ ॥ १९ ॥

हेसोम त्वंसत्पतिरसि सतांकर्मसुवर्तमानानांब्राह्मणानांअधिपतिर्भवसि तस्मात्सोमराजानो-ब्राह्मणाइतिश्रुतेः। यद्वा सन्तःस्वानादयःपतयःपालकायस्यसोमस्यतादृशोभवसि तथाचाम्ना-यते—स्वानभ्राजेत्याहैतेवाअमुष्मिँल्लोकेसोममरक्षन्निति। उतअपिचराजा राजमानस्त्वं वृत्रहावृ-त्रस्यासुरस्यशत्रोर्वाहन्तासि भद्रःशोभनः क्रतुः योयमग्निष्टोमादियागः त्वमेवतद्रूपोभवसि त्व-त्साध्यत्वाद्यागानाम्॥ सत्पतिः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् तत्पुरुषपक्षेतुपत्यावैश्वर्येइतिपूर्व-पदप्रकृतिस्वरत्वम्॥ ५ ॥

५. सोम, तुम सत्कर्म में वर्त्तमान ब्राह्मण के अधिपति हो। तुम राजा हो। तुम शोभन यज्ञ हो।

॥ इतिप्रथमस्यषष्ठेएकोनविंशोवर्गः॥ १९ ॥

साग्निचित्येक्रतौअग्नीषोमीयस्यपशुपुरोडाशमनु अष्टौदेवसुवांहवींषिनिरूप्यन्ते तत्रसोम-स्यवनस्पतेर्हविषः त्वंचसोमेत्येषानुवाक्या अथाग्नीषोमीयेणेतिखण्डेविसूत्रितम्—त्वंचसोमनो-वशोब्रह्मादेवानांपदवीःकवीनामिति।

तामेतांषष्ठीमृचमाह—

त्वंचसोमनोवशोजीवातुंनमरामहे। प्रियस्तोत्रोवनस्पतिः॥६॥

त्वम्। च। सोम। नः। वशः। जीवातुम्। न। मरामहे।

प्रियऽस्तोत्रः। वनस्पतिः॥ ६ ॥

हेसोम नोऽस्माकं स्तोतृणांजीवातुं जीवनौषधं त्वंच त्वंचेद्वशः कामयेथाः तदानींवयंनम-रामहे नम्रियामहे कीदृशस्त्वं प्रियस्तोत्रः प्रियाणिस्तोत्राणियस्यसतथोक्तः बहुभिःस्तोतव्यइ-त्यर्थः वनस्पतिः वनानामोषधिवनस्पतिरूपाणांपतिः पालयितासि सोमोवाओषधीनांराजेतिश्रु-तेः॥ वशः वशकान्तौ लेटिसिप्यडागमः आगमानुदात्तत्वेधातुस्वरःशिष्यते त्वंचेति चशब्दः च-णितिनिपातान्तरं चेदर्थम् तद्योगान्निपातैर्यद्यदिहन्तेतिनिघातप्रतिषेधः। जीवातुं जीवप्राणधा-रणे जीवेरातुः। मरामहे मृङ्प्राणत्यागे व्यत्ययेनशप्॥ ६ ॥

६. स्तुति-प्रिय और सारी ओषधियों के पालक सोम, यदि तुम हमारे जीवनौषध की अभिलाषा करो, तो हम मृत्युरहित हो जायें।

---

१ तै० ब्रा० १.७.६.। २ तै० सं० ६.१.१०.।

आयुष्कामेष्ट्यांद्वितीयस्याज्यभागस्यत्वंसोममहेभगमित्येषानुवाक्या अथकाम्याइतिख-ण्डेसूत्रितम्–आनोअग्नेसुचेतुनात्वंसोममहेभगमिति।

तामेतांसप्तमीमृचमाह–

त्वंसोममहेभगंत्वंयूनऋतायते। दक्षंदधासिजीवसे ॥७॥

त्वम्। सोम। महे। भगम्। त्वम्। यूने। ऋतऽयते। दक्षम्। दधासि। जीवसे ॥ ७॥

हेसोम त्वंमहेमहतेवृद्धायऋतायते ऋतंयज्ञमात्मनइच्छतेपुरुषाय जीवसेजीवितुं दक्षंउपभो-गसमर्थंभगं धनंददासि विदधासिकरोषि तथात्वंयूनेतरुणायचऋतायते जीवितुंधनंकरोषि ॥ म-हे महते अच्छन्दलोपश्छान्दसः बृहन्महतोरुपसंख्यानमितिविभक्तेरुदात्तत्वम्। यूने श्वयुवमघो-नामतद्धितेइतिसंप्रसारणम्। ऋतायते ऋतंआत्मनइच्छति सुपआत्मनःक्यच् नच्छन्दस्यपुत्रस्येती-त्वदीर्घयोर्निषेधः अन्येषामपिदृश्यतइतिसांहितिकोदीर्घः क्यजन्ताल्लटःशतृ शतुरनुमोनद्यजादी-इतिविभक्तेरुदात्तत्वम्। जीवसे जीवप्राणधारणे तुमर्थेसेसेनितिअसेप्रत्ययः ॥ ७ ॥

७. सोम, तुम वृद्ध और तरुण याजक को, उसके जीवन के उप-योग योग्य धन देते हो।

स्वस्त्ययन्यांद्वितीयस्याज्यभागस्य त्वंनःसोमेत्येषानुवाक्या सूत्रितंच–स्वस्त्ययन्यांरक्षि-तवन्तावग्नेरक्षाणोअंहसस्त्वंनःसोमविश्वतइति।

तामेतांसूक्तेअष्टमीमृचमाह–

त्वंनःसोमविश्वतोरक्षाराजन्नघायतः। नरिष्येत्त्वावतःसखा ॥८॥

त्वम्। नः। सोम। विश्वतः। रक्ष। राजन्। अघऽयतः। न। रिष्येत्। त्वाऽवतः। सखा ॥ ८ ॥

हेसोमराजन् राजनशील त्वंअघायतःअघंपापंतद्धेतुकंदुःखंअस्माकंकर्तुमिच्छतःविश्व-तःसर्वस्मादपिपुरुषान्नोऽस्मान्रक्षपालय त्वावतः त्वत्सदृशस्यसखासख्यंप्राप्तः पुरुषःनरिष्येत् नहिविनश्येत् किमुवक्तव्यंत्वत्सखानविनश्यतीति ॥ अघायतः अघंपापंपरेषांइच्छतीतिअघायन् छन्दसिपरेच्छायामपीतिक्यच् अश्वाघस्यादित्यात्वम्। रिष्येत् रुषरिषहिंसायाम्। त्वावतः वतुप्प्रकरणेयुष्मदस्मद्भ्यांछन्दसिसादृश्यउपसंख्यानमितिवतुप् प्रत्ययोत्तरपदयोश्चेतिमपर्यन्त-स्यत्वादेशः आसर्वनाम्नइत्यात्वम् ॥ ८ ॥

८. हे राजा सोम, हमें दुःख देने के अभिलाषी लोगों से बचाओ। तुम्हारे जैसे का मित्र कभी विनष्ट नहीं होता।

सोमप्रवहणेसोमयास्तइतितृचोनुवक्तव्यः सूत्रितंच—सोमयास्तेमयोभुवइतितिस्रइति। आग्रयणेसौम्यस्यसोमयास्तइत्येषानुवाक्या सूत्रितंच—सोमयास्तेमयोभुवोयातेधामानिदिविगापृथिव्यामिति। अश्वमेधेपिपौष्ण्यामिष्टौद्वितीयस्याज्यभागस्यैषानुवाक्या सूत्रितंच—त्वमग्नेसप्रथाअसिसोमयास्तेमयोभुवइतिसद्वन्ताविति

तामेतांसूक्तेनवमीमृचमाह—

सोमयास्तेमयोभुवऊतयःसन्तिंदाशुषे। ताभिर्नोविताभव ॥९॥

सोम। याः। ते। मयःऽभुवः। ऊतयः। सन्ति। दाशुषे। ताभिः। नः। अविता। भव ॥ ९ ॥

हेसोम तेतवसंवन्धिन्योदाशुषेचरुपुरोडाशादीनिदत्तवतेयजमानाय मयोभुवः मयसः सुखस्य भावयित्र्योयाऊतयोरक्षाःसन्तिविद्यन्ते ताभीरक्षाभिर्नोऽस्माकंअवितारक्षिताभव ॥ मयोभुवः अस्येतिविशेषणत्वेनस्त्रीलिङ्गत्वेभुवश्चेतिङीष्प्राप्नोति तद्वोतोगुणवचनादित्यस्मादुतइतितपरकरणस्यानुवर्तनान्नभवति ॥ ९ ॥

९. सोम, तुम्हारे पास यजमानों के लिए सुखकर रक्षण हैं, उनके द्वारा हमारी रक्षा करो।

दशमीमृचमाह—

इमंयज्ञमिदंवचोजुजुषाणउपागहि। सोमत्वंनोवृधेभव॥१०॥२०

इमम्। यज्ञम्। इदम्। वचः। जुजुषाणः। उपऽआगहि। सोम। त्वम्। नः। वृधे।। भव ॥ १० ॥ २० ॥

हेसोम त्वंइमंअस्माभिःक्रियमाणंयज्ञंइदंवचःइदानींक्रियमाणंस्तुतिलक्षणंवचनंजुजुषाणः सेवमानःसन्उपागहिउपागच्छ प्राचीनवंशलक्षणंगृहंप्राप्नुहि प्राप्यचनोऽस्माकं वृधेयज्ञस्यवर्धमायभव ॥ जुजुषाणः जुषीप्रीतिसेवनयोः छन्दसिलिट् लिटःकानच् चितइत्यन्तोदात्तत्वम्। उपागहि गमेर्लोटिबहुलंछन्दसीतिशपोलुक् अनुदात्तोपदेशेत्यादिनामकारलोपः असिद्धवदत्राभादित्यस्यासिद्धत्वाद्धेर्लुगभावः गतिर्गतावितिपूर्वस्यगतेर्निघातः ॥ १० ॥

१०. सोम, तुम हमारा यह यज्ञ और स्तुति ग्रहण करके आओ और हमें वर्द्धित करो।

॥ इतिप्रथमस्यषष्ठेविंशोवर्गः ॥ २० ॥

---

१ गहीत्यस्यआङासमासेउत्तरपदस्योदात्तत्वं शून्यत्वेनआङुदात्तः पुनरपि उपेनसमासे गतिकारकोपपदादितिउत्तरपदप्रकृतिस्वरेणसएवोदात्तः।

दर्शयागेसौम्यस्याज्यभागस्यसोमगीर्भिरित्येषानुवाक्या सूत्रितंच—अग्निःप्रत्नेनमन्मना सोमगीर्भिष्ट्वावयमिति। अन्यत्रापियत्रवृधन्वन्तावाज्यभागौतत्रैषाद्वितीयाज्यभागानुवाक्या।

तामेतांसूक्तेएकादशीमृचमाह—

सोमगीर्भिष्ट्वावयंवर्धयामोवचोविदः। सुमृळीकोनआविश॥११॥

सोम। गीःऽभिः। त्वा। वयम्। वर्धयामः। वचःऽविदः।
सुऽमृळीकः। नः। आ। विश॥ ११ ॥

हेसोम त्वात्वां वचोविदः स्तुतिलक्षणानांवचसांवेदितारोवयमनुष्ठातारोगीर्भिःस्तुतिलक्षणैर्वचोभिः वर्धयामः प्रवृद्धंकुर्मः तादृशस्त्वंचनोऽस्माकं सुमृडीकःशोभनंसुखंकुर्वन्सन् आविश आगच्छ॥ सुमृळीकः मृडसुखने मृडेःकीकन्कंकनाविति भावेकीकन्प्रत्ययः शोभनंमृडीकंयस्येतिबहुव्रीहौ नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्॥ ११ ॥

११. सोम, हम लोग स्तुति-ज्ञाता हैं; स्तुति-द्वारा तुम्हें र्वाद्धत करते हैं। सुखद होकर तुम आओ।

सन्तिपवमानेष्टयस्तिस्रः तत्रतृतीयस्यामिष्टौउत्तरस्याज्यभागस्यगयस्फानइत्येषानुवाक्या सूत्रितंच—पुष्टिमन्तावग्निनारयिमश्नवद्गयस्फानोअमीवहेति। एषैवप्रातःकालीनोपसदिसौम्ययागस्ययाज्या सायंकालीनायांत्वनुवाक्या सूत्रितंच अथोपसदितिखण्डे—त्वंसोमासिसत्पतिर्गयस्फानोअमीवहेति।

तामेतांद्वादशीमृचमाह—

गयस्फानोअमीवहावसुवित्पुष्टिवर्धनः। सुमित्रःसोमनोभव॥१२

गयऽस्फानः। अमीवऽहा। वसुऽवित्। पुष्टिऽवर्धनः। सुऽमित्रः।
सोम। नः। भव॥ १२॥

गयस्फानः गयइतिधननाम धनस्यवर्धयिता अमीवहा अमीवानांरोगाणांहन्ता वसुवित्स्तोतॄणांधनस्यलंभयितापापयिता पुष्टिवर्धनः पुष्टेःसंपदोवर्धयिता सुमित्रः शोभनानिमित्राणिसखायोयस्यसतथोक्तः हेसोम त्वंनोऽस्माकमेवंगुणविशिष्टोभव॥ गयस्फानः स्फायीवृद्धौअन्तर्भावितण्यर्थात् ल्युटि व्यत्ययेनयलोपः इदमादिषुचतुर्षुपदेषुकृदुत्तरपदप्रकृतिस्वरत्वम्। सुमित्रः नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्॥ १२॥

१२. सोम, तुम हमारे धन-वर्द्धक, रोग-हन्ता, धन-दाता, सम्पद्वर्द्धक और सुमित्र-युक्त होओ।

त्रयोदशीमृचमाह—

सोमं रारन्धि नो हृदि गावो न यवसेष्वा । मर्यइव स्व ओक्ये ॥१३॥

सोम । ररन्धि । नः । हृदि । गावः । न । यवसेषु । आ । मर्यःऽइव । स्वे । ओक्ये ॥ १३ ॥

हेसोम त्वंनोऽस्माकं हृदिहृदयेररन्धिरमस्व तत्रनिदर्शनद्वयमुच्यते—गावोन यथागावः यवसेषुशोभनतृणेषुआभिमुख्येनरमन्ते मर्यइव यथावामर्योमरणधर्मामनुष्यःस्वेओक्येस्वकीयेओकसिगृहेपुत्रादिभिःसहरमते तद्वदस्माभिर्दत्तेनहविषातृप्तःसन् अस्मास्वेवअवतिष्ठस्व नान्यत्रगच्छेतिनिदर्शनद्वयस्यतात्पर्यार्थः ॥ ररन्धि रमुक्रीडायां व्यत्ययेनपरस्मैपदं बहुलंछन्दसीतिशपःश्लुः छन्दस्युभयथेतिहेरार्धधातुकत्वेनङित्त्वाभावादङितश्चेतिहेर्धिः अतएवङित्त्वादनुनासिकलोपाभावः सेर्ह्यपिच्चेतिहेरपित्त्वात्तस्यैवस्वरःशिष्यते छान्दसमभ्यासस्यदीर्घत्वम् आमन्त्रितंपूर्वमविद्यमानवदितिपूर्वस्यामन्त्रितस्याविद्यमानवत्त्वात्पदादपरत्वेननिघातः। मर्यइव छन्दसिनिष्टक्र्येत्यादौमर्यशब्दोयतप्रत्ययान्तोनिपात्यते यतोनावइत्याद्युदात्तत्वम्। ओक्ये उचसमवाये उच्यतेसमवेयतेप्राप्यतइत्योक्यंगृहं ऋहलोर्ण्यत् चजोःकुघिण्ण्यतोरितिकुत्वं तित्स्वरितः॥१३॥

१३. सोम, जैसे गाय सुन्दर तृण से तृप्त होती है, जैसे मनुष्य अपने घर में तृप्त होता है उसी प्रकार तुम भी हमारे हृदय में तृप्त होकर अवस्थान करो।

यः सोम सख्ये तव रारणद्देव मर्त्यः । तं दक्षः सचते कविः ॥१४॥

यः । सोम । सख्ये । तव । ररणत् । देव । मर्त्यः । तम् । दक्षः । सचते । कविः ॥ १४ ॥

हेदेव द्योतमानसोम तवसख्येत्वदीयेसखित्वेनिमित्तभूतेसति योमर्त्योमरणधर्मायजमानः ररणत्रणति एतत्सूक्तरूपेणस्तोत्रेणत्वांस्तौति तंयजमानंकविःक्रान्तदर्शीदक्षः सर्वकार्यसमर्थः त्वंसचतेसेवसे अनुगृह्णासीत्यर्थः॥ ररणत् रणशब्दार्थः लेटचडागमः बहुलंछन्दसीतिशपः श्लुः इतश्चलोपइतीकारलोपः छन्दस्युभयथेत्यार्धधातुकत्वात् अच्यनिटीतिसार्वधातुकेविधीमानस्याभ्यस्ताद्युदात्तत्वस्याभावेधातुस्वरःशिष्यते। सचते षचसमवाये पुरुषव्यत्ययः॥१४॥

१४. सोमदेव, जो मनुष्य बन्धुता के कारण तुम्हारी स्तुति करता है, हे अतीत-ज्ञाता और निपुण सोम, तुम उस पर अनुग्रह करते हो।

---

१ इदंसांहितिकमेव अन्यथापदकालेऽल्पपाठः अयुक्तःस्यात्। २ पूर्ववत्सांहितिकोदीर्घः।

पञ्चदशीमृचमाह—

उरुष्याणोअभिशस्तेःसोमनिपाह्यंहसः। सखासुशेवएधिनः॥१५॥२१

उरुष्य। नः। अभिऽशस्तेः। सोम। नि। पाहि। अंहसः। सखा। सुऽशेवः। एधि। नः॥ १५॥ २१॥

हेसोम त्वंनोऽस्मान् अभिशस्तेःअभिशंसनात् अभिशापरूपान्निन्दनात् उरुष्यरक्ष उरुष्यतीरक्षाकर्मेतियास्कः।तथा अंहसःअस्मत्कृतात्पापाच्चनिपाहि नितरांपालय एवंनः अस्मदीयं पापंपरिहृत्य सुशेवःअस्मभ्यंदातव्येनशोभनेनसुखेनयुक्तःसन् सखाएधिहितकारीभव॥ अभिशस्तेः शंसुस्तुतौ अस्माद्भावेक्तिन् तादौचेतिगतेःप्रकृतिस्वरत्वम्। एधि असभुवि लोटिसेर्हिः तस्यङित्त्वात् श्नसोरल्लोपइत्यकारलोपः घ्वसोरेद्धावभ्यासलोपश्चेतिसकारस्यैत्वम् तस्यासिद्धवदत्राभादित्यसिद्धत्वात् हुझल्भ्योहेर्धिरितिहेर्धिरादेशः॥ १५॥

१५. सोम, हमें अभिशाप या निन्दन से बचाओ। पाप से बचाओ हमें सुख देकर हमारे हितैषी बनो।

॥ इतिप्रथमस्यषष्ठेएकविंशोवर्गः॥ २१॥

ग्रावस्तोत्रेआप्यायस्वसमेतुतइतितृचोविनियुक्तः सूत्रितंच—आप्यायस्वसमेतुतइतितिस्रोमृजन्वित्वादशक्षिपइति। पत्नीसंयाजेषु सौम्यस्याप्यायस्वेत्येषानुवाक्या सूत्रितंच—आप्यायस्वसमेतुतेसन्तेपयांसिसमुयन्तुवाजाइति। चमसाप्यायनेप्येषाविनियुक्ता सूत्रितंच—आप्यायस्वसमेतुतेसन्तेपयांसिसमुयन्तुवाजाइतिचमसानाप्योपाद्यानिति।

तामेतांसूक्तेषोडशीमृचमाह—

आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यम्। भवावाजस्यसंगथे॥१६

आ। प्यायस्व। सम्। एतु। ते। विश्वतः। सोम। वृष्ण्यम्। भव। वाजस्य। सम्ऽगथे॥ १६॥

हेसोम त्वंआप्यायस्व वर्धस्व तेतववृष्ण्यंवृषत्वंवीर्यंसामर्थ्यं विश्वतःसर्वतः समेतु संगच्छतां त्वयासंयुक्तंभवतु एवंभूतस्त्वंवाजस्यान्नस्यसंगथेसंगमनेभव अस्माकंअन्नप्रदोभवेत्यर्थः॥ वृष्ण्यं वृषसेचने कनिन्युवृषीत्यादिनाकनिन् वृष्णिभवंवृष्ण्यं भवेछन्दसीतियत् अ-

१ नि० ५. २३.

छोपोनइत्यकारलोपः येचाभावकर्मणोरितिप्रकृतिभावस्तुव्यत्ययेननमवर्तते यवोनावइत्याद्युदात्तत्वम्। भव द्व्यचोतस्तिङइतिसंहितायांदीर्घत्वम्। संगथे पातृतुदिवचीत्यादिनाविधीयमानस्थकप्रत्ययोबहुलवचनाद्गमेरपिभवति थाथादिनोत्तरपदान्तोदात्तत्वम्॥ १६॥

१६. सोम, तुम वर्द्धित हो, तुम्हारी शक्ति चारों ओर से तुम्हें प्राप्त हो। तुम हमारे अन्नदाता बनो।

सप्तदशीमृचमाह—

आप्यायस्वमदिन्तमसोमविश्वेभिरंशुभिः।
भवानःसुश्रवस्तमःसखावृधे ॥१७॥

आ। प्यायस्व। मदिन्ऽतम। सोम। विश्वेभिः। अंशुऽभिः। भव। नः। सुश्रवःऽतमः। सखा। वृधे॥ १७॥

हेमदिन्तम अतिशयेनमदवन् सोम विश्वेभिःसर्वैरंशुभिः लतावयवैराप्यायस्व आसमन्ताद्वृद्धोभव सत्वंसुश्रवस्तमः अतिशयेनशोभनान्नयुक्तःसन्नोस्माकंवृधेवर्धनायसखाभव मित्रीभव ॥ मदिन्तम मदोहर्षस्तद्वान्मदी अतिशयेनमदीमदिन्तमः नाद्धस्येतितमपोनुट्। सुश्रवस्तमः श्रवइत्यन्ननाम श्रूयतइतिसतइतियास्कः। शोभनंश्रवोयस्यसतथोक्तः अतिशयेनसुश्रवाः सुश्रवस्तमः तमपःपित्वादनुदात्तत्वे सोर्मनसीअलोमोषसीइत्युत्तरपदाद्युदात्तत्वमेवशिष्यते॥ १७॥

१७. अतीव मद से युक्त सोम, सारे लतावयवों द्वारा वर्द्धित हो। शोभन अन्न से युक्त होकर तुम हमारे सखा बनो।

पत्नीसंयाजेषुसोमस्यसन्तेपयांसीतियाज्या सूत्रितंच—सन्तेपयांसिसमुयन्तुवाजाइहत्वष्टारमग्रियमिति। चमसाप्यायनेप्येषा सूत्रितंच—सन्तेपयांसिसमुयन्तुवाजाइतिचमसानाप्याययन्ति।

तामेतांसूक्तेष्टादशीमृचमाह—

संतेपयांसिसमुयन्तुवाजाःसंवृष्ण्यान्यभिमातिषाहः।
आप्यायमानोअमृतायसोमदिविश्रवांस्युत्तमानिधिष्व ॥१८॥

सम्। ते। पयांसि। सम्। ऊम् इति। यन्तु। वाजाः। सम्। वृष्ण्यानि। अभिमातिऽसहः। आऽप्यायमानः। अमृताय। सोम। दिवि। श्रवांसि। उत्ऽतमानि। धिष्व॥ १८॥

मि० १०: २।

हेसोम अभिमातिषाहः अभिमातीनांशत्रूणांहन्तुस्तेतवएवंभूतंत्वांपयांसिश्रपणार्थानि क्षीराणिसंयन्तु संगच्छन्तां तथा वाजाउ हविर्लक्षणान्यन्नानिचत्वांसंगच्छन्तां वृष्ण्यानिवीर्याणिचसंगच्छन्तां हेसोम त्वंअमृताय अस्माकंअमृतत्वाय अमरणत्वाय आप्यायमानः आसमन्ताद्वर्धमानःसन् दिविनभसि स्वर्गेउत्तमानिउद्गततमानि उत्कृष्टानिश्रवांसिअन्नानि अस्माभिर्भोक्तव्यानि हविर्लक्षणानिवा धिष्व धारय॥ते क्रियाग्रहणंकर्तव्यमितिकर्मणः संप्रदानत्वाच्चतुर्थ्यर्थेषष्ठी। अभिमातिषाहः षहअभिभवे छन्दसिसहइतिण्विप्रत्ययः सुषामादित्वात्षत्वम्। अमृताय नञोजरमरमित्रमृताइत्युत्तरपदाद्युदात्तत्वम्। उत्तमानि उच्छब्दात्ससाधनक्रियावचनादातिशायनिकस्तमप् उत्तमशश्वत्तमौसर्वत्रेत्युञ्छादिषुपाठादन्तोदात्तत्वम्। धिष्व सुधितवसुधितनेमधितधिष्वधिषीयचेतिधिभावोनिपात्यते॥ १८॥

१८. सोम, तुम शत्रु-नाशक हो। तुममें रस, यज्ञान्न और वीर्य संयुक्त हों। तुम वर्द्धित होकर हमारे अमरत्व के लिए स्वर्ग में उत्कृष्ट अन्न धारण करो।

सोमप्रवहणेयातेधामानीत्येषा सूत्रितंच—यातेधामानिहविषायजन्तीमांधियंशिक्षमाणस्यदेवेतिनिहितेपरिदध्यादिति। एकादशिनस्यसौम्यस्यपशोर्हविषएषैवयाज्या प्रदानानामितिखण्डेसूत्रितम्—अषाह्ळंयुत्सुपृतनासुपप्रिंयातेधामानिहविषायजन्तीति।

तामेतांसूक्तेएकोनविंशीमृचमाह—

या ते॒ धामा॑नि ह॒विषा॒ यज॑न्ति॒ ता ते॒ विश्वा॑ परि॒भूर॑स्तु य॒ज्ञम्।
ग॒य॒स्फान॑ः प्र॒तर॑णः सु॒वीरो॒ऽवीर॑हा॒ प्र च॑रा सोम॒ दुर्या॑न्॥ १९॥

या। ते॒। धामा॑नि। ह॒विषा॑। यज॑न्ति। ता। ते॒। विश्वा॑। प॒रि॒ऽभूः। अ॒स्तु। य॒ज्ञम्। ग॒य॒ऽस्फान॑ः। प्र॒ऽतर॑णः। सु॒ऽवीर॑ः। अवी॑रऽहा। प्र। च॒र। सो॒म॒। दुर्या॑न्॥ १९॥

हेसोम तेत्वदीयानि यानिधामानि द्युप्रभृतिष्ववस्थितानि तेजांसि हविषाचरुपुरोडाशादिनायजन्ति यजमानाःपूजयन्ति तातेविश्वा त्वदीयानितानिसर्वाणिधामानियज्ञं अस्मदीयं अध्वरंपरिभूरस्तु परितोभावयितॄणिपरितःप्राप्तानिसन्तु यद्वा त्वदीयानांतेषां सर्वेषांधाम्नां अस्मदीयोयजमानः परिभूः यज्ञंप्रतिपरिग्रहीतायागेनस्वीकर्तास्तुभवतु परिपूर्वोभवतिःपरिग्रहार्थः तादृशैर्धामभिरुपेतस्त्वं दुर्यान्प्राचीनवंशादिलक्षणानस्मदीयान्गृहान् गृहावैदुर्याइतिश्रुतेः[1]। प्रचर प्रकर्षेणगच्छ कीदृशस्त्वं गयस्फानः गयस्यगृहस्यधनस्यवावर्धयि-

1 तै० सं० ६.२.९.।

ता प्रतरणः प्रकर्षेणदुरिताक्तारयिता सुवीरःशोभनैर्वीरैःपुरुषैरुपेतः अवीरहावीर्याज्जायन्तइ-तिवीराःपुत्राः तेषामहन्ता ॥ परिभूः भूमासौ अस्माक्किप्चेतिक्किप् व्यत्ययोबहुलमितिलिङ्गव-चनव्यत्ययौ । अस्तु व्यत्ययेनैकवचनम् । गयस्फानः गयइतिगृहस्यधनस्यचनामधेयं तेषां स्फायितावर्धयिता कृत्यल्युटोबहुलमितिकर्तरिल्युटिछान्दसोयलोपः । अवीरहा वीराणां ह-न्तावीरहा नवीरहाअवीरहा ॥ १९ ॥

१९. यजमान लोग हव्य-द्वारा जो तुम्हारे तेज की पूजा करते हैं, वह समस्त तेज हमारे यज्ञ को व्याप्त करे। धनवर्द्धक, पाप-त्राता, वीर पुरुषों से युक्त और पुत्र-रक्षक सोम, तुम हमारे घर में आओ।

महापितृयज्ञेसोमस्यपितृमतोयागे सोमोधेनुमित्येषाद्वितीयानुवाक्या तत्रह्येकैकस्यहवि-षोद्वेद्वेअनुवाक्येसमुच्चयेनविहिते तथैव दक्षिणाग्नेरितिखण्डेसूत्रितम्—सोमोधेनुंसोमोअर्वन्तमा-शुंत्वंसोमपितृभिःसंविदानइति ।

सोमो॑धे॒नुंसोमो॒अर्व॑न्तमा॒शुंसोमो॑वी॒रंक॑र्म॒ण्यं॑ददाति ।
सा॒द॒न्यं॑विद॒थ्यं॑स॒भेयं॑पितृ॒श्रव॑णं॒योददा॑शदस्मै ॥ २० ॥ २२ ॥

सोमः॑ । धे॒नुम् । सोमः॑ । अर्व॑न्तम् । आ॒शुम् । सोमः॑ । वी॒रम् । क॒र्म॒ण्य॑म् । द॒दा॒ति । स॒द॒न्य॑म् । वि॒द॒थ्य॑म् । स॒भेय॑म् । पि॒तृ॒ऽश्रव॑णम् । यः । ददा॑शत् । अ॒स्मै ॥ २० ॥ २२ ॥

योयजमानः ददाशत् सोमायहविर्लक्षणान्यन्नानिदद्यात्तस्मैयजमानायसोमोधेनुं सवत्सां दोग्ध्रींगांददाति तथाअर्वन्तंआशुं शीघ्रगामिनंअश्वंददाति प्रयच्छति तथावीरंपुत्रं अस्मैयज-मानायददाति कीदृशंपुत्रं कर्मण्यंलौकिककर्मसुकुशलं सदन्यं सदनंगृहंतदर्हं गृहकार्यकुशलमि-त्यर्थः विदथ्यंविदन्त्येषुदेवानितिविदथायज्ञाः तदर्हं दर्शपूर्णमासादियागानुष्ठानतत्परमित्यर्थः सभेयंसभायांसाधुं सकलशास्त्राभिज्ञमित्यर्थः पितृश्रवणं पिताश्रूयतेमख्यायतेयेनपुत्रेणतादृश-म् ॥ कर्मण्यं कर्मसुसाधुःकर्मण्यः तत्रसाधुरितियत् येचाभावकर्मणोरितिप्रकृतिभावः तित्स्वरि-तमितिस्वरितत्वं एवमुत्तरत्रापियत्प्रत्ययः । सभेयम् ढश्छन्दसीतितत्रसाधुरित्यर्थेढप्रत्ययः । ददा-शत् दाशृदाने लेटयडागमः बहुलंछन्दसीतिशपःश्लुः ॥ २० ॥

२०. जो सोमदेव को हव्य देता है, उसे सोम गो और शीघ्रगामी अश्व देते हैं; और, उसे लौकिक-कार्य-दक्ष, गृहकार्य-परायण, यज्ञानुष्ठानतत्पर माता-द्वारा आवृत और पिता का नाम उज्ज्वल करनेवाला पुत्र प्रदान करते हैं।

एकादशिनस्यसौम्यस्यपशोः पुरोडाशस्यअषाह्ळंयुत्स्वित्येषायाज्या प्रदानानामितिखण्डे सूत्रितम्—अषाह्ळंयुत्सुपृतनासुपप्रिंयातेधामानिहविषायजन्तीति ।

तामेतामेकविंशीमृचमाह—

अषाळ्हंयुत्सुपृतनासुपप्रिंस्वर्षामप्सांवृजनस्यगोपाम्।
भरेषुजांसुक्षितिंसुश्रवसंजयन्तंत्वामनुमदेमसोम ॥२१॥

अषाळ्हम्। युत्ऽसु। पृतनासु। पप्रिम्। स्वःऽसाम्। अप्साम्। वृजनस्य। गोपाम्। भरेषुऽजाम्। सुऽक्षितिम्। सुऽश्रवसम्। जयन्तम्। त्वाम्। अनु। मदेम। सोम ॥ २१ ॥

युत्सुयुद्धेषु अषाळ्हंशत्रुभिरनभिभवनीयं तथापृतनासुसेनासुपप्रिं जयस्यपूरयितारं स्वर्षां स्वर्गस्यसनितारंदातारम् अप्सामपांवृष्टिलक्षणानामुदकानांदातारम् यद्वा अप्सांअप्सातृकंभक्षकरहितंसर्वेषामनुग्राहकमित्यर्थः वृजनस्यगोपां वृज्यतेअनेनेतिवृजनंबलं तस्यगोपांगोपायितारंरक्षितारं भरेषुजां भ्रियन्तएषुहवींषीतिभरायागाः तेषुप्रादुर्भवन्तं सुक्षितिंशोभननिवासस्थानं सुश्रवसंशोभनयशस्कं जयन्तंशत्रूनभिभवन्तं हेसोम ईदृग्भूतंत्वां अनुलक्ष्यमदेम हर्षयुक्ताभवेम ॥ अषाळ्हं षहअभिभवे साढ्यैसाढ्वासाढेतिनिगमेइतिनिपातनात्सहिवहोरोदवर्णस्येत्योत्वाभावः सहेःसाडःसइतिषत्वम्। पप्रिं पृपालनपूरणयोः आदृगमहनजनइतिकिन्प्रत्ययः। स्वर्षां स्वःस्वर्गंसनोतीतिस्वर्षाः षणुदाने जनसनखनेतिविट् विड्वनोरनुनासिकस्यादित्यात्वम्। अप्सां अप्शब्दोपपदात्सनोतेःपूर्ववद्विट् यद्वा प्साभक्षणे प्सातिभक्षयतीतिप्साः क्विप्चेतिक्विप् नविद्यतेप्साअस्येति बहुव्रीहौनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्। भरेषुजां जनीप्रादुर्भावे पूर्ववद्विट् आत्वंच। मदेम मदीहर्षे व्यत्ययेनशप्॥ २१ ॥

२१. सोम, तुम युद्ध में अजय हो, सेना के बीच विजयी हो, स्वर्ग के प्रापयिता हो। तुम वृष्टि-दाता, बल-रक्षक, यज्ञ में अवस्थाता, सुन्दर निवास और यश से युक्त और जयशील हो। तुम्हें लक्ष्य कर हम प्रफुल्ल हों।

द्वाविंशीमृचमाह—

त्वमिमाओषधीःसोमविश्वास्त्वमपोअजनयस्त्वंगाः।
त्वमाततन्थोर्व१न्तरिक्षंत्वंज्योतिषावितमोववर्थ ॥२२॥

त्वम्। इमाः। ओषधीः। सोम। विश्वाः। त्वम्। अपः। अजनयः। त्वम्। गाः। त्वम्। आ। ततन्थ। उरु। अन्तरिक्षम्। त्वम्। ज्योतिषा। वि। तमः। ववर्थ ॥ २२ ॥

हेसोम त्वंइमाःभून्यांवर्तमानाविश्वाः सर्वाओषधीःअजनयः उत्पादितवानसि तथात्वं अपः तासामोषधीनांकारणभूतानिवृष्टयुदकानिअजनयः तथात्वं गाःसर्वान्पशूनुदपादयः उरु विस्तीर्णंअन्तरिक्षं त्वंआततन्थ विस्तारितवानसि तस्मिन्नन्तरिक्षेयत्तमः अस्मद्दृष्टिनिरोधकंअ-न्धकारंतदपि त्वं ज्योतिषाआत्मीयेनप्रकाशेनविववर्थ विवृतंविश्लिष्टंविनष्टंकृतवानसि ॥ त-तन्थ तनुविस्तारे ववर्थ वृञ्वरणे उभयत्रलिटस्थलि बभूथाततन्थजगृभ्मववर्थेतिनिगमेइति निपात्यते ॥ २२ ॥

२२. सोम, तुमने सारी ओषधियाँ, वृष्टि, जल और सारी गायें बनाई हैं। तुमने इस व्यापक अन्तरिक्ष को विस्तृत किया है और ज्योति-द्वारा उसका अन्धकार विनष्ट किया है।

देवेनंनोमनंसादेवसोमरायोभागंसंहसावन्नभियुध्य ।
मात्वातंनदीशिषेवीर्यंस्योभयेभ्यःप्रचिंकित्सागविंष्टौ॥२३॥२३॥

देवेनं । नः । मनंसा । देव । सोम । रायः । भागम् । सहसाऽवन् ।
अभि । युध्य । मा । त्वा । आ । तनत् । ईशिषे । वीर्यस्य ।
उभयेभ्यः । प्र । चिकित्स । गोऽइष्टौ ॥ २३ ॥ २३ ॥

हेदेव द्योतमान सहसावन्बलवन् सोम देवेनमनसाद्योतमानयात्वदीययाबुद्ध्या रायोभा-गंधनस्यांशंनोऽस्मानभिलक्ष्ययुध्यप्रेरय यद्वा नोस्माकं रायोधनस्यभागंभक्तारं अपहर्तारंशत्रुं अभियुध्यआभिमुख्येनसम्यक्प्रहर त्वा तादृशंत्वांकश्चिदपिशत्रुः माआतनत् क्लेशेनआवर्तमाका-र्षीत् माहिंसीदित्यर्थः उभयेभ्यःउभयेषां युध्यमानानांसंबन्धिनोवीर्यस्यबलस्यत्वमीशिषे ईश्वरो-भवसि सत्वंगविष्टौसंग्रामेप्रचिकित्सअस्मदीयमुपद्रवंपरिहर ॥ रायः ऊडिदमितिविभक्तेरुदात्त-त्वम् । भागं भजतेःकर्मणिघञ् कृत्यल्युटोबहुलमितिबहुलवचनात्कर्तरिवा कर्षात्वतइत्यन्तो-दात्तत्वम् । सहसावन् सहःशब्दान्मतुपिछान्दसआकारोपजनः । युध्य युधसंप्रहारे व्यत्ययेनप-रस्मैपदम् । तनत् तनुविस्तारे व्यत्ययेनशप् नमाङ्योगेइत्यडभावः । ईशिषे ईशःसेइतीडागमः । चिकित्स कितज्ञाने गुप्तिज्किद्भ्यःसन् । गविष्टौ गवांबाणानांइष्टयःएषणानिगमनानियेष्विति बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् ॥ २३ ॥

२३. बलशाली सोम, अपनी कान्तिमय बुद्धि-द्वारा हमें धन का अंश प्रदान करो। कोई शत्रु तुम्हारी हिंसा न करे। लड़ाई करनेवाले दोनों पक्षों में तुम्हीं बलशाली हो। लड़ाई में हमें दुष्वता से बचाओ।

॥ इतिप्रथमस्यषष्ठेत्रयोविंशोवर्गः ॥ २३ ॥

एताउत्याइत्यष्टादशर्चंअष्टमंसूक्तम् गोतमस्यार्षं आदितश्चतस्रोजगत्यः त्रयोदश्याद्याः ष-ड्डुचउष्णिहः शिष्टाअष्टौत्रिष्टुभः उषादेवता अश्विनावर्तिरित्यन्त्यस्तृचोश्विदेवत्यः तथाचानुक्रा-

न्तम्—एताउत्याद्यानोषस्यंचतुर्जगत्यादिषळुष्णिगन्तंतृचोन्त्यआश्विनइति । सूक्तविनियोगोलै-ङ्गिकः प्रातरनुवाकेउषस्येक्रतौजागतेछन्दसिआश्विनशस्त्रेचएताउत्याइतिचतस्रोविनियुक्ताः सू-त्रितंच—एताउत्याइतिचतस्रोजागतमिति ।

तत्रप्रथमामृचमाह—

एताउत्याउषसःकेतुमक्रतपूर्वेअर्धेरजसोभानुमञ्जते ।
निष्कृण्वानाआयुधानीवधृष्णवःप्रतिगावोरुषीर्यन्तिमातरः ॥१॥

एताः । ऊम् इति । त्याः । उषसः । केतुम् । अक्रत । पूर्वे । अर्धे ।
रजसः । भानुम् । अञ्जते । निःऽकृण्वानाः । आयुधानिऽइव ।
धृष्णवः । प्रति । गावः । अरुषीः । यन्ति । मातरः ॥ १ ॥

उइत्येतत्पदपूरणः त्याः ताएताउषसः प्रभातकालाभिमानिन्योदेवताः केतुं अन्धकारावृतस्यसर्वस्यजगतःप्रज्ञापकं प्रकाशंअक्रत अकुर्वत कृतवत्यः यस्मादेवंतस्मादुषसोरजसोन्तरिक्षलोकस्यपूर्वेअर्धेप्राचीनदिग्भागे भानुंप्रकाशंअञ्जतेव्यक्तीकुर्वन्ति धृष्णवोधर्षणशीलायोद्धारः आयुधानीव यथाअसिप्रभृतीन्यायुधानिसंस्कुर्वन्ति एवंनिष्कृण्वानाः स्वभासा जगत् संस्कुर्वाणाः गावः गमनस्वभावाः अरुषीः आरोचमानाः मातरः सूर्यप्रकाशस्यनिर्मात्र्यः जगज्जनन्योवाउषसः प्रतियन्तिप्रतिदिवसंगच्छन्ति एवंविधाउषसोऽस्मान्रक्षन्त्वित्यर्थः । अत्र निरुक्तम्—एतास्ताउषसःकेतुमकृषतप्रज्ञानमेकस्याएवपूजनार्थेबहुवचनंस्यात्पूर्वेर्धेन्तरिक्षलोकस्य समञ्जतेभानुनानिष्कृण्वानाआयुधानीवधृष्णवः निरित्येषसमित्येतस्यस्थाने एमीदेषां निष्कृतंजारिणीवेत्यपिनिगमोभवति प्रतियन्तिगावोगमनादरुषीरारोचनान्मातरोभासोनिर्मात्र्यइति ॥ अक्रत करोतेर्लुङि मन्त्रेघसेतिच्लेर्लुक् । निष्कृण्वानाः कृविर्हिंसाकरणयोश्च अस्मात्ताच्छीलिकश्चानश् धिन्विकृण्व्योरचेत्युप्रत्ययः इदुदुपधस्यचाप्रत्ययस्येतिविसर्जनीयस्यषत्वम् कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ १ ॥

१. उषा देवताओं ने आलोक-द्वारा प्रकाश किया है और वे अन्तरिक्ष की पूर्व दिशा में प्रकाश करते हैं। जैसे अपने सारे शस्त्रों को योद्धा लोग परिमार्जित करते हैं, वैसे ही अपनी दीप्ति के द्वारा संसार का संस्कार करके गमनशीला, दीप्तिमती और मातायें (उषा) प्रतिदिन गमन करती हैं।

---

१ नि० १२. ७. । १ ऋ० सं० ७. ८. ३. ।

द्वितीयामृचमाह—

उदपप्तन्नरुणा भानवो वृथा स्वायुजो अरुषीर्गा अयुक्षत ।
अक्रन्नुषासो वयुनानि पूर्वथा रुशन्तं भानुमरुषीरशिश्रयुः ॥२॥

उत् । अपप्तन् । अरुणाः । भानवः । वृथा । सुऽआयुजः । अरुषीः । गाः । अयुक्षत । अक्रन् । उषसः । वयुनानि । पूर्वऽथा । रुशन्तम् । भानुम् । अरुषीः । अशिश्रयुः ॥ २ ॥

अरुणा आरोचमाना भानवः औषस्योदीप्तयः वृथा अनायासेन स्वयमेवोदपप्तन् उदगमन् तदनन्तरं उषसश्च स्वायुजः सुखेन रथे आयोक्तुं शक्याः अरुषीः शुभ्रवर्णा गाः पूर्वमुत्थितान् रश्मीन् ईदृशीः स्ववाहनभूता श्चतुष्पदीर्गा एव वा अयुक्षत स्वरथे अयोजयन् उक्तं च—अरुण्यो गाव उषसामिति । एवं गोभिर्युक्तं रथमारुह्य उषसः पूर्वथा पूर्वेषु अतीतेष्वहःस्विव वयुनानि सर्वेषां प्राणिनां ज्ञानानि अक्रन् अकार्षुः उषःकाले जाते हि सर्वे प्राणिनो ज्ञानयुक्ता भवन्ति तदनन्तरमरुषीः आरोचमानास्ता उषसः रुशन्तं रुशदिति वर्णनाम रोचतेर्ज्वलतिकर्मणः इति यास्कः । शुभ्रवर्णं भानुं सूर्यमशिश्रयुः असेवन्त तेन सहैकीभवन्तीत्यर्थः ॥ अपप्तन् पत्लृ गतौ लुङि लृदित्वात् च्लेरङादेशः पतः पुमिति धातोः पुमागमः । अक्रन् मन्त्रे घसेत्यादिना च्लेर्लुक् । पूर्वथा प्रत्नपूर्वविश्वेमात्थाल् छन्दसीतीवार्थे थाल् प्रत्ययः । अशिश्रयुः श्रिञ् सेवायां बहुलं छन्दसीति शपः श्लुः सिजभ्यस्तविदिभ्यश्चेति झेर्जुस् जुसि चेति गुणः ॥ २ ॥

२. अरुण भानु-रश्मियाँ (उषायें) उदित हुईं। अनन्तर रथ में जोतने योग्य शुभ्रवर्ण रश्मियों को उषाओं ने रथ में लगाया एवं पूर्व की तरह सारे प्राणियों को ज्ञान-युक्त बनाया। इसके पश्चात् दीप्तिमती उषाओं ने श्वेतवर्ण सूर्य को आश्रित किया।

अर्चन्ति नारीरपसो न विष्टिभिः समानेन योजनेना परावतः ।
इषं वहन्तीः सुकृते सुदानवे विश्वेदह यजमानाय सुन्वते ॥३॥

अर्चन्ति । नारीः । अपसः । न । विष्टिऽभिः । समानेन । योजनेन । आ । पराऽवतः । इषम् । वहन्तीः । सुऽकृते । सुऽदानवे । विश्वा । इत् । अह । यजमानाय । सुन्वते ॥ ३ ॥

---

१ नि० २. २०.।

नारीर्नृम्णउपसः विष्टिभिर्निवेशकैःस्वकीयैस्तेजोभिः समानेनयोजनेन एकेनैवोद्योगेन आपरावतः आदूरदेशाव आपश्चिमदिग्भागाव अर्चन्ति नभःप्रदेशंपूजयन्ति कृत्स्नंजगद्युगपदेवव्याप्नुवन्तीत्यर्थः तत्रदृष्टान्तः—अपसोन युद्धकर्मणोपेताःपुरुषाःयथास्वकीयैरायुधैर्धाटीमुखेनसर्वदिशंव्याप्नुवन्तितद्वव किंकुर्वत्यः सुकृतेशोभनस्यकर्मणःकर्त्रे सुन्वते सोमाभिषवं कुर्वते सुदानवे कल्याणींदक्षिणामृत्विग्भ्योददतेयजमानाय विश्वेदह सर्वमेव इषमन्नंवहन्तीरावहन्त्यः प्रयच्छन्त्यइत्यर्थः ॥ नारीः नृनयने ऋदोरप् नृनरयोर्वृद्धिश्चेतिशार्ङ्गरवादिषुपाठाव ङीव् जसि वाछन्दसीतिपूर्वसवर्णदीर्घत्वम् । अपसः अपसुशब्दादर्शआदिभ्योजित्यच् सुपांसुलुगितिजसःसुः व्यत्ययेनप्रत्ययात्पूर्वस्योदात्तत्वम् । विष्टिभिः विशप्रवेशने विशन्तिप्रविशन्तीतिविष्टयःकिरणाः क्तिच्क्तौचसंज्ञायामितिक्तिच् । विश्वा सुपांसुलुगितिअमोडादेशः ॥३॥

३. नेत-स्थानीया उषायें उज्ज्वल अस्त्रधारी योद्धाओं की तरह हैं और उद्योग-द्वारा ही दूर देशों तक को अपने तेज से व्याप्त करती हैं। वे शोभन-कर्म-कर्त्ता, सोमदाता और दक्षिणा-दाता यजमान को सारा अन्न देती हैं।

चतुर्थीमृचमाह—

अधिपेशांसिवपतेनृतूरिवापोर्णुतेवक्षउस्रेवबर्जहम् ।
ज्योतिर्विश्वस्मैभुवनायकृण्वतीगावोनव्रजंव्युषाआवर्तमः ॥४॥

अधि । पेशांसि । वपते । नृतूःऽइव । अप । ऊर्णुते । वक्षः ।
उस्राऽइव । बर्जहम् । ज्योतिः । विश्वस्मै । भुवनाय । कृण्वती ।
गावः । न । व्रजम् । वि । उषाः । आवरित्यावः । तमः ॥ ४ ॥

उषाःपेशांसि जगत्स्वाश्लिष्टानिकृष्णवर्णानितमांसिअधिआधिक्येनवपतेछिनत्ति तत्रदृष्टान्तः—नृतूरिव नृंस्तूर्वतिकेशेनरिक्तीकरोतीतिनृतूर्नापितः सयथाकेशान्निःशेषेणछिनत्ति एवमुषा अप्यन्धकारंसमूलंहिनस्तीत्यर्थः यद्वा नृतूरिव नृत्यन्तीयोषिदिव पेशांसिरूपनामैतव सर्वैर्दर्शनीयानिरूपाणिउषाअधिवपते स्वात्मनिअधिकंधारयति एवंप्रथमतोऽन्धकारंस्वकिरणैर्निरस्य वक्षः स्वकीयमुरःप्रदेशंअपोर्णुतेतमसाअनाच्छादितंकरोति स्वयमाविर्भवतीत्यर्थः बर्जहं पयसउत्पत्तिस्थानंदोहनसमयेउस्रेव उस्रागौर्यथाआविष्करोतितद्वव किंकुर्वती गावोनव्रजं यथागावःस्वकीयंगोष्ठंस्वयमेवशीघ्रंव्याप्नुवन्ति एवंस्वयमेवप्राचींदिशंप्राप्य विश्वस्मैभुवनायसर्वलोकायज्योतिष्कृण्वतीप्रकाशंकुर्वती एवमुक्तेनप्रकारेणउषास्तमोन्धकारंव्यावः विवृतमपश्लिष्टमकरोव ॥ नृतूरिव तुर्वीहिंसार्थः क्विप्चेतिक्विप् राल्लोपइतिवलोपः वोरुपधायाइतिदीर्घत्वम् यद्वा नृतीगात्रविनामे नृतिगृध्योःकूरितिकूप्रत्ययः । बर्जहं वृहुसंभक्तौ वृणीतेसंभजवेगामितिबः पयः

विच् तज्जहातीतिविवर्जहः ओहाकृत्यागे स्वश्मकरणे वातशुनीतिलशर्षेष्वजघेट्तुदजहातिभ्यउप-संख्यानमित्यशर्धशब्दोपपदादपिकृत्यल्युटोबहुलमितिबहुलवचनात्खश् तस्यसार्वधातुकत्वेनकर्त-रिशपि जुहोत्यादित्वाच्छ्लुः द्विर्वचनादि बवयोरभेदइतिबत्वम् दिवोदासादित्वात्पूर्वपदाद्युदात्तत्वम्। आवः वृञ्वरणे लुङि मन्त्रेघसेतिच्लेर्लुक् गुणे हल्ङ्याब्भ्यइतितिलोपः छन्दस्यपिदृश्यतइत्या-डागमः॥ ४॥

४. नर्त्तकी की तरह उषायें अपने रूप को प्रकाशित करती हैं; और जैसे दोहन-काल में गायें अपना अधस्तन भाग प्रकट करती हैं, उसी प्रकार उषायें भी अपना वक्ष प्रकट करती हैं। जैसे गायें गोष्ठ में शीघ्र जाती हैं, उसी प्रकार उषाओं ने भी पूर्व दिशा में जाकर समस्त भुवनों को प्रकाश करके अन्धकार को विमुक्त किया।

प्रातरनुवाकस्योषस्येक्रतौप्रत्यर्चिरित्यष्टावनुवक्तव्याःआश्विनशस्त्रेच तथाचसूत्रितम्—प्रत्यर्चिरित्यष्टौ व्युषाआवोदिविजाइतिषळितित्रैष्टुभमिति।

प्रत्यर्चीरुशदस्याअदर्शिवितिष्ठतेबाधतेकृष्णमभ्वम्।
स्वरुंनपेशोविदथेष्वञ्जञ्चित्रंदिवोदुहिताभानुमश्रेत् ॥५॥२४॥

प्रति। अर्चिः। रुशत्। अस्याः। अदर्शि। वि। तिष्ठते। बाधते। कृष्णम्। अभ्वम्। स्वरुम्। न। पेशः। विदथेषु। अञ्जन्। चित्रम्। दिवः। दुहिता। भानुम्। अश्रेत्॥ ५॥ २४॥

अस्याउषसः रुशत् दीप्यमानंअर्चिः तेजः प्रत्यदर्शि सर्वैःपूर्वस्यांदिशिप्रथमतोदृश्यते वि-तिष्ठतेसर्वासुदिक्षुविविधमवतिष्ठते व्याप्नोतीत्यर्थः सर्वांदिशोव्याप्यच अभ्वं महन्नामैतत् अतिश-येनविपुलंकृष्णं कृष्णवर्णमन्धकारं बाधते अपसारयति विदथेषु यज्ञेषु स्वरुंन स्वरुनाम्नाश-कलेनयुक्तंयूपंयथाआज्येनअध्वर्यवःअञ्जन्अञ्जन्ति तद्वन्नभसिस्वकीयंपेशःरूपंउषाअनक्ति संश्लिष्टंकरोति तदनन्तरंचित्रं चायनीयं भानुंसूर्यं दिवोदुहिता द्युलोकादुत्पन्नाउषाअश्रेत् असेवत॥ वितिष्ठते समवप्रविभ्यइत्यात्मनेपदम्। अश्रेत् श्रिञ्सेवायां लुङि बहुलंछन्दसी-तिशपोलुक्॥ ५॥

५. पहले उषा का उज्ज्वल तेज पूर्व दिशा में दिखाई देता है, अनन्तर सारी दिशाओं में व्याप्त होता और अन्धकार को दूर करता है। जैसे पुरोहित यज्ञ में आज्य-द्वारा यूप-काष्ठ को प्रकट करता है, उसी प्रकार उषायें अपना रूप प्रकट करती हैं। स्वर्ग-पुत्री उषायें दीप्तिमान् सूर्य की सेवा करती हैं।

अतारिष्मतमसस्पारमस्योषाउच्छन्तीवयुनाकृणोति।
श्रियेछन्दोनस्मयतेविभातीसुप्रतीकासौमनसायाजीगः॥६॥

अतारिष्म । तमसः । पारम् । अस्य । उषाः । उच्छन्ती । वयुना । कृणोति । श्रिये । छन्दः । न । स्मयते । विऽभाती । सुऽप्रतीका । सौमनसाय । अजीगरिति ॥ ६ ॥

अस्यनैशस्यतमसोन्धकारस्यपारंसमाप्तिप्रदेशं अतारिष्म उत्तीर्णाअभूम अनन्तरं उच्छन्तीनैशंतमोवर्जयन्ती उषाः वयुनावयुनानि सर्वेषांप्राणिनांज्ञानानि कृणोति निर्मिमीते श्रिये संपदर्थंछन्दोनस्मयते यथाउपच्छन्दयिता वशीकरणेसमर्थःपुरुषः आढ्यसमीपंप्राप्य तदर्थीत्यर्थं स्मयते हसति एवंविभातीविशिष्टप्रकाशंकुर्वन्तीउषाः स्वकीययानिर्मलदीप्त्याहसन्तीवदृश्यते एवंसुप्रतीकाविशिष्टप्रकाशरूपत्वेनशोभमानासती सौमनसायसर्वेषांसौमनस्यायअजीगः अन्धकारंभक्षितवती ॥ अतारिष्म तॄप्लवनतरणयोः लुङिसिचिवृद्धिः । तमसः षष्ठ्याःपतिपुत्रेति विसर्जनीयस्यसंहितायांसत्वम् । स्मयते ष्मिङ्ईषद्धसने भौवादिकः । अजीगः गॄनिगरणे लङि बहुलंछन्दसीतिशपःश्लुः बहुलंछन्दसीत्यभ्यासत्येत्वम् तुजादीत्यादिनादीर्घः ॥ ६ ॥

६. हम रात्रि के अन्धकार को पार कर चुके हैं। उषाओं ने सारे प्राणियों के ज्ञान को प्रकाशित किया है। प्रकाशमयी उषायें प्रीति प्राप्त करने के लिए अपनी दीप्ति के द्वारा मानो हँस रही हैं। आलोक-विलसिताङ्गी उषाओं ने हमारे सुख के लिए अन्धकार का विनाश किया है।

भास्वतीनेत्रीसूनृतानांदिवस्तवेदुहितागोतमेभिः ।
प्रजावतोनृवतोअश्वबुध्यानुषोगोअग्राँउपमासिवाजान् ॥७॥

भास्वती । नेत्री । सूनृतानाम् । दिवः । स्तवे । दुहिता । गोतमेभिः । प्रजाऽवतः । नृऽवतः । अश्वऽबुध्यान् । उषः । गोऽअग्रान् । उप । मासि । वाजान् ॥ ७ ॥

भास्वती तेजस्विनी सूनृतेतिवाङ्नाम सूनृतानांप्रियसत्यात्मिकानां नेत्रीप्रणेत्रीकारयित्री उषसिहिजातायांमनुष्यप्रमुखाःप्राणिनः स्वस्वव्यापारायइतस्ततःशब्दंकुर्वन्ति एवंभूतादिवोदुहिता द्युलोकात्सकाशादुत्पन्नाउषाः गोतमेभिर्ऋषिभिरस्माभिः स्तवेस्तूयते हेउषः अस्माभिःस्तुतात्वं वाजान् अन्नानिउपमासि प्रयच्छ कीदृशान्वाजान्प्रजावतः प्रजाभिःपुत्रपौत्रादिभिर्युक्तान् नृवतः दासलक्षणैर्नृभिरुपेतान्अश्वबुध्यान्अश्वाबुध्याविद्यमानत्वेनबोद्धव्यायेषुवाजेषुतान् यद्वा अश्वबुध्नान् वर्णव्यापत्त्यायकारः अश्वमूलान् अश्वैर्हिराजानोधनान्यन्नानिचलभन्ते अवोन्नानांतन्मूलत्वम् गोअग्रान् गावःअग्रेप्रमुखेयेषांतादृशान् ॥ भास्वती भादीप्तौ असुन् तदोमतुप् मादुपधाया-

इतिमतुपोवत्वं उगितश्चेतिङीप्। नेत्री ऋन्नेभ्योङीप् उदात्तयणोहल्पूर्वादितिङीपउदात्तत्वम्। स्तवे ष्टुञ्स्तुतौ कर्मणिलिङि बहुलंछन्दसीतिबहुलग्रहणाद्यकोपिलुक् लोपस्तआत्मनेपदेष्वितितलोपः छन्दस्युभयथेत्येकारस्यार्धधातुकत्वेनङित्त्वाभावाद्गुणावादेशौ। नृवतः व्यत्ययेनमतोर्वत्वं ह्रस्वनुड्भ्यांमतुबितिमतुपउदात्तत्वम्। मासि मामाने आदादिकः ॥७॥

७. दीप्तिमती और सत्य बचनों की उत्पादयित्री आकाश-पुत्री (उषा) की गोतमवंशीय लोग स्तुति करते हैं। उषे, तुम हमें पुत्र-पौत्र, दास-परिजन, अश्व और गौ से युक्त अन्न दो।

उषस्तमश्यांयशसंसुवीरंदासप्रवर्गंरयिमश्वबुध्यम्।
सुदंससाश्रवसायाविभासिवाजप्रसूतासुभगेबृहन्तम् ॥ ८ ॥

उषः। तम्। अश्याम्। यशसम्। सुऽवीरम्। दासऽप्रवर्गम्। रयिम्। अश्वऽबुध्यम्। सुऽदंससा। श्रवसा। या। विऽभासि। वाजऽप्रसूता। सुऽभगे। बृहन्तम् ॥ ८ ॥

हेउषः उषोदेवते तंरयिंधनमश्यांमाप्नुयाम् कीदृशं यशसं यशसाकीर्त्यायुक्तं सर्वैःप्रशस्यमित्यर्थः सुवीरंशोभनैर्वीरैःपुत्रादिभिर्युक्तं दासप्रवर्गं प्रकृष्टोवर्गःसंघःप्रवर्गः दासानांकर्मकराणांप्रवर्गोयस्मिन्तस्मिन् तं अनेकैर्भृत्यैरुपेतमित्यर्थः अश्वबुध्यं अश्वाबुध्याबोद्धव्यायेनधनेनतादृशं हेसुभगेशोभनधनेउषः सुदंससाशोभनेनकर्मणायुक्तेन श्रवसाश्रवणीयेनस्तोत्रेण प्रीतात्वंवाजप्रसूता अस्मभ्यंदत्ताम्नासती बृहन्तंप्रौढं या यां रयिं विभासि विशेषेणप्रकाशयसि तमश्यामितिपूर्वेणसंबन्धः ॥ अश्यां अशूव्याप्तौ व्यत्ययेनपरस्मैपदं बहुलंछन्दसीतिविकरणस्यलुक्। यशसं अर्शआदित्वान्मत्वर्थीयोच् व्यत्ययेनप्रत्ययात्पूर्वस्योदात्तत्वम्। दासप्रवर्गं दासयत्युपक्षयतिशत्रूनिति दासोभृत्यः दसुउपक्षये अस्माण्ण्यन्तात्पचाद्यच् चित्त्वादन्तोदात्तत्वं तदेवबहुव्रीहिस्वरेणशिष्यते। सुदंससा सोर्मनसीअलोमोषसीइतिबहुव्रीहावुत्तरपदाद्युदात्तत्वम्। या सुपांसुलुगितिअमोडादेशः॥ ८ ॥

८. हे उषे, हम यश, वीर (सहायक), दास और अश्व से संयुक्त धन प्राप्त करें। सुभगे, तुम सुन्दर यज्ञ में स्तोत्र-द्वारा प्रीत होकर, हमें अन्न देकर, वही यथेष्ट धन प्रकट करो।

नवमीमृचमाह—

विश्वानिदेवीभुवनाभिचक्ष्याप्रतीचीचक्षुरुर्वियाविभाति।
विश्वंजीवंचरसेबोधयन्तीविश्वस्यवाचमविदन्मनायोः ॥ ९ ॥

विश्वा॑नि । दे॒वी । भुव॑ना । अ॒भि॒ऽचक्ष्य॑ । प्र॒ती॒ची । चक्षुः॑ । उ॒र्वि॒या । वि । भा॒ति॒ । विश्व॑म् । जी॒वम् । । च॒रसे॑ । बो॒धय॑न्ती । विश्व॑स्य । वाच॑म् । अ॒वि॒द॒त् । म॒ना॒योः ॥ ९ ॥

देवीद्योतमानोषाः विश्वाविश्वानिसर्वाणिभुवनानि भूतजातानि अभिचक्ष्य अभिप्रकाश्य प्रकाशवन्तिकृत्वा अनन्तरंप्रतीचीप्रत्यङ्मुखीसती चक्षुःप्रकाशकेनतेजसाउर्वियाउर्वीविस्तीर्णासतीविभातिप्रकाशते अपिच विश्वंजीवंसर्वंप्राणिजातंचरसेचरणायस्वस्वव्यापारेषुप्रवर्तनायबोधयन्ती निद्रातःसकाशादुद्बोधयन्तीउषाः विश्वस्यसर्वस्यमनायोः मनसायुक्तस्यवाग्व्यवहारसमर्थस्यप्राणिजातस्ययावागस्तितांवाचमविदत्अलभत अतएवोषसः सूनृतावतीतिसंज्ञोपपन्नाभवति ॥ अभिचक्ष्य चक्षिङ्व्यक्तायांवाचि अयंप्रकाशनार्थोऽपि समासेनञ्पूर्वेइतिक्त्वाप्रत्ययस्यल्यबादेशः । प्रतीचीप्रतिपूर्वादञ्चतेर्ऋत्विगित्यादिनाक्विन् अनिदितामितिनलोपः अञ्चतेश्चोपसंख्यानमितिङीप् अचइत्यकारलोपेचाविति दीर्घत्वम् उदात्तनिवृत्तिस्वरेणङीपउदात्तत्वम् । उर्विया उर्वीशब्दादुत्तरस्यसोः इयाडियाजीकाराणांचोपसंख्यानमितिडियाजादेशः आदेशसामर्थ्यात्तस्य लोपोनभवति । मनायोः मनआत्मनइच्छतिमनस्यति सुपआत्मनःक्यच् क्याच्छन्दसीत्युः वर्णव्यापत्त्यासकारेआकारः यद्वा कर्तुःक्यङ्सलोपश्चेतिक्यङ्सकारलोपश्च अकृत्सार्वधातुकयोरितिदीर्घः ॥ ९ ॥

९. उज्ज्वल उषायें सारे भुवनों को प्रकाशित करके, आलोकद्वारा, पश्चिम दिशा में विस्तृत होकर, दीप्तिमती हो रही हैं। उषायें सारे जीवों को अपने-अपने कार्यों में लगाने के लिए जगा देती हैं। उषायें बुद्धिमान् लोगों की बातें सुनती हैं।

दशमीमृचमाह—

पुनः॑पुन॒र्जाय॑माना पु॒रा॒णी स॑मा॒नं वर्ण॑म॒भि शुम्भ॑माना ।
श्व॒घ्नीव॑ कृ॒त्नुर्विज॑ आमिना॒ना मर्त॑स्य दे॒वी ज॒रय॒न्त्यायुः॑ ॥ १० ॥ २५ ॥

पुनः॑ऽपुनः । । जाय॑माना । पु॒रा॒णी । स॒मा॒नम् । वर्ण॑म् । अ॒भि । शुम्भ॑माना । श्व॒घ्नीऽइ॑व । कृ॒त्नुः । विजः॑ । आ॒ऽमि॒ना॒ना । मर्त॑स्य । दे॒वी । ज॒रय॑न्ती । आयुः॑ ॥ १० ॥ २५ ॥

पुनःपुनर्जायमाना प्रतिदिवसंसूर्योदयात्पूर्वं प्रादुर्भवन्ती पुराणीचिरन्तनीनित्येत्यर्थः यस्मात्समानंवर्णं एकमेवरूपं अभिप्राप्यशुंभमानाशोभमाना भिन्नेष्वपिदिवसेषुअस्याएकरूपेणावस्थानमितप्रसिद्धमित्यर्थः एवंगुणविशिष्टादेवी देवनशीलोषाः मर्तस्यमर्त्यस्य मरणधर्मणःसर्व-

स्यप्राणिजातस्यायुर्जीवनंजरयन्तीऊनयन्तीवर्तते बह्वीपूषःस्वतीतासुहिसर्वेषामायुर्हीयते उषाश्च पुनःपुनर्जायमानेत्युक्तं अतः सैवायुर्जरयति तत्रदृष्टान्तः—कृत्नुः कर्तनशीलाश्वघ्नीव व्याधस्त्रीव सायथाविजश्चलतःपक्षिणः आमिनाना पक्षादिच्छेदनेनाहिंसन्ती तेषामायुर्जरयति तद्वत् ॥ पुराणी पुरेत्यस्मादव्ययात्सायंचिरंप्राह्णेइत्यादिनाभवार्थेट्युप्रत्ययः पुराणप्रोक्तेषुब्राह्मणकल्पेष्विति निपातनात्तुडभावः योरनादेशः टित्त्वाद्ङीप् व्यत्ययेनान्तोदात्तत्वम् । शुंभमाना शुंभदीप्तौ शपःपित्त्वादनुदात्तत्वम् शानचोलसार्वधातुकस्वरेणधातुस्वरःशिष्यते । श्वघ्नी शुनाश्वगान्हन्तवान्श्वहा बहुलंछन्दसीतिवचनाद्ब्रह्मादिव्यतिरिक्तेऽप्युपपदेहन्तेःक्विप् ऋन्नेभ्योङीबितिङीप् अल्लोपोनइत्यकारलोपः होहन्तेरितिघत्वम् उदात्तनिवृत्तिस्वरेणङीपउदात्तत्वम्। कृत्नुः कृतीछेदने औणादिकःक्नुप्रत्ययः। विजः ओविजीभयचलनयोः विजन्तिचलन्तीतिविजःपक्षिणः।आमिनाना मीञ्हिंसायां क्रैयादिकः प्वादीनांह्रस्वइतिह्रस्वत्वम् शानचश्चित्त्वादन्तोदात्तत्वम्॥१०॥

१०. जैसे व्याध-स्त्री उड़ती चिड़िया का पक्ष काटकर हिंसा करती है, उसी प्रकार पुनः पुनः आविर्भूत, नित्य और एक-रूप-धारिणी उषायें देवी अनुदिन सारे प्राणियों के जीवन का ह्रास करती हैं।

॥ इतिप्रथमस्यषष्ठेपञ्चविंशोवर्गः ॥ २५ ॥

एकादशीमृचमाह—

व्यूर्ण्वती दिवो अन्ताँ अबोध्यप स्वसारं सनुतर्युयोति ।
प्रमिनती मनुष्या युगानि योषा जारस्य चक्षसा वि भाति ॥११॥

विऽऊर्ण्वती । दिवः । अन्तान् । अबोधि । अप । स्वसारम् । सनुतः । युयोति । प्रऽमिनती । मनुष्या । युगानि । योषा । जारस्य चक्षसा । वि । भाति ॥११॥

दिवोनभसोऽन्तान्प्रान्तान्व्यूर्ण्वतीविवृतान् तमसावियुक्तान्कुर्वतीयषाः अबोधिसर्वैःप्राणिभिरज्ञायिज्ञाताभूत् तदनन्तरंस्वसारंउषसःप्रादुर्भावेसति स्वयमेवसरन्तींनिशांसनुतः अन्तर्हितनामैतत् अन्तर्हितप्रदेशेअपयुयोति अपगमय्यपृथक्करोति मनुष्यामनुष्याणांसंबन्धीनियुगानिकृतत्रेतादीनि प्रमिनती स्वगमनागमनाभ्यांप्रकर्षेणाहिंसन्ती जारस्यरात्रेर्जरयितुः सूर्यस्ययोषाजाया उषाः चक्षसाआलोकेनप्रकाशेनविभाति विशेषेणप्रकाशते॥ व्यूर्ण्वती ऊर्णुञ्आच्छादने विपूर्वादस्माल्लटःशतृ उगितश्चेतिङीप् शतुरनुमइतिनद्याउदात्तत्वम् । सनुतः एतदन्तोदात्तत्वंस्वरादिषुनिपातितम् अतोव्ययसंज्ञायां अव्ययादाप्सुपइतिसप्तम्यालुक् । युयोति युमिश्रणामिश्रणयोः बहुलंछन्दसीतिशपःश्लुः । मनुष्या सुपांसुलुगितिषष्ठयाडादेशः । युगानि युजेःकरणेकर्मणिवा

वञ् चजोःकुघिण्ण्यतोरितिकुत्वम् उञ्छादिषुकालविशेषेरथाद्युपकरणेचयुगशब्दपाठाल्लघूपधगुणाभावः उञ्छादीनांचेत्यन्तोदात्तत्वम्।जारस्यदारजारौकर्तरिणिलुक्चेतिघञन्तोनिपात्यते॥११॥

११. आकाश को, अन्धकार से हटाकर, सबके पास उषायें जीवों-द्वारा विदित होती हैं। उषायें गमनकारिणी अथवा भगिनी रात्रि को अन्तर्हित करती हैं। प्रणयी (सूर्य) की स्त्री उषायें अनुदिन मनुष्यों की आयु का ह्रास करके, विशेष रूप से, प्रकाशित होती हैं।

पशून्नचित्रासुभगाप्रथानासिन्धुर्नक्षोदउर्विया व्यश्वैत्।
अमिनतीदैव्यानिव्रतानिसूर्यस्यचेतिरश्मिभिर्दृशाना ॥१२॥
पशून्। न। चित्रा। सुऽभगा। प्रथाना। सिन्धुः। न। क्षोदः।
उर्विया। वि। अश्वैत्। अमिनती। दैव्यानि। व्रतानि। सूर्यस्य।
चेति। रश्मिऽभिः। दृशाना ॥१२॥

सुभगाशोभनधनाचित्राचायनीयापूजनीयोषाः पशून्न यथापशून्गोपालकोरण्येविस्तारयति तथाप्रथानातेजांसिविस्तारयन्ती उर्विया उर्वीमहतीएवंभूतासाव्यश्वैत् सर्वंजगद्व्याप्नोत् तत्रदृष्टान्तः—सिन्धुर्नक्षोदः यथास्यन्दनशीलमुदकं निम्नदेशेअचिरादेवव्याप्नोति तद्वत् सैवोषाः सूर्यस्यरश्मिभिःकिरणैःसहदृशाना दृश्यमानासती चेति प्रज्ञातासीत् किंकुर्वती दैव्यानिदेवसंबन्धीनि व्रतानिदर्शपूर्णमासादीनिकर्माणि अमिनती अहिंसती अनुष्ठानेयजमानान्प्रवर्तयन्तीत्यर्थः उषसः प्रादुर्भावानन्तरंहिअग्निहोत्रादीनिसर्वाणिकर्माण्यनुष्ठीयन्तेनरात्रौ नसायमस्तिदेवयाअजुष्टमितिश्रुतेः[1]॥ प्रथाना प्रथप्रख्याने अस्मादन्तर्भावितण्यर्थात्ताच्छीलिकश्चानश् बहुलंछन्दसीतिशपोलुक्। सिन्धुः स्यन्दूप्रस्रवणे स्यन्देःसंप्रसारणंधश्चेत्युप्रत्ययः निदित्यनुवृत्तेराद्युदात्तत्वम्। अश्वैत् टुओश्विगतिवृद्ध्योः लुङि अङ्चङोर्विकल्पितत्वात् च्लेःसिच् आगमानुशासनस्यानित्यत्वादिडभावः सिचिवृद्धिः अनिडादित्वात् ह्म्यन्तक्षणेतिवृद्धिप्रतिषेधाभावः बहुलंछन्दसीतीडागमाभावः स्कोःसंयोगाद्योरितिसलोपः। चेति चितीसंज्ञाने कर्मणिलुङि बहुलंछन्दस्यमाङ्योगेपीत्यडभावः। दृशाना दृशेःकर्मणिलटःशानच् बहुलंछन्दसीतिविकरणस्यलुक्॥ १२॥

१२. जैसे पशु-पालक पशुओं को चराता है, वैसे ही सुभगा और पूजनीया उषायें अपना तेज विस्तृत करती हैं और नदी की तरह विशाल उषायें सारे जगत् को व्याप्त करती हैं। उषायें देवों के यज्ञ का अनुष्ठान कराकर, सूर्य-रश्मि के साथ, दृष्ट होती हैं।

प्रातरनुवाकस्योषस्येक्रतौ औष्णिहेछन्दसि उषस्तच्चित्रमितितिस्रोविनियुक्ताः आश्विनशस्त्रेच अथोषस्यइतिखण्डेसूत्रितम्—उषस्तच्चित्रमाभरेतितिस्रऔष्णिहइति।

---

[1] ऋ० सं० ४.४-१८.

तत्रप्रथमांसूक्तेत्रयोदशीमृचमाह—

उषस्तच्चित्रमाभरास्मभ्यंवाजिनीवति। येनतोकंचतनयंचधामहे ॥१३

उषः। तत्। चित्रम्। आ। भर। अस्मभ्यम्। वाजिनीऽवति।
येन। तोकम्। च। तनयम्। च। धामहे ॥ १३ ॥

हेवाजिनीवति वाजोहविर्लक्षणमन्नं तद्युक्ताक्रियावाजिनी तयाक्रियययायुक्ते उषःउषोदेवते अस्मभ्यं चित्रंचायनीयं तद्धनंआभर आहर प्रयच्छ येनधनेनतोकंपुत्रंचतनयं तत्पुत्रंच धामहे दध्महे धारयामः अत्रनिरुक्तम्—उषस्तच्चित्रंचायनीयंधनमाहरास्मभ्यमन्नवतियेनपुत्रांश्चपौत्रांश्चदधीमहीतिं ॥ धामहे दधातेर्लेटि बहुलंछन्दसीतिशपोलुक् व्यत्ययेनाद्युदात्तत्वम् यद्वा लोटि आडुत्तमस्यपिच्चेत्याडागमः प्रत्ययस्यपिद्वद्भावश्च अतःप्रत्ययस्यपित्त्वादनुदात्तत्वेधातुस्वरःशिष्यते अस्मिन्पक्षे एतऐ इतिऐत्वाभावोव्यत्ययेनद्रष्टव्यः यद्वृत्तयोगादनिघातः॥ १३ ॥

१३. अन्नयुक्त उषे, हमें विचित्र धन प्रदान करो, जिसके द्वारा हम पुत्रों और पौत्रों का पालन कर सकें।

चतुर्दशीमृचमाह—

उषोअद्येहगोमत्यश्वावतिविभावरि। रेवदस्मेव्युच्छसूनृतावति ॥१४॥

उषः। अद्य। इह। गोऽमति। अश्वऽवति। विभाऽवरि।
रेवत्। अस्मे इति। वि। उच्छ। सूनृताऽवति ॥ १४ ॥

हेगोमतिअस्मभ्यंदातव्यैर्गोभिर्युक्ते तथा अश्वावति अश्वैर्युक्ते विभा[illegible]रिविशिष्टप्रकाशोपेते सूनृतावति प्रियसत्यात्मिकावाक्सूनृता तादृश्यावाचायुक्ते एवंभूतेहेउष उषोदेवते अद्य इदानींप्रभातसमये इहास्मिन्देशे अस्मे अस्माकंरेवद्धनयुक्तंकर्मयथाभवतितथाव्युच्छ नैशंतमोनिवारय ॥ अश्वावति मन्त्रेसोमाश्वेन्द्रियेतिमतौदीर्घत्वं पादादित्वादामन्त्रितस्या[illegible]मिकनिघाताभावः। रेवत् रयेर्मतौबहुलमितिसंप्रसारणं छन्दसीरइतिमतुपोवत्वं रेशब्दाच्चमतुपउदात्तत्वंवक्तव्यमितिमतुपउदात्तत्वम्। उच्छ उच्छीविवासे विवासोवर्जनम्॥ १४ ॥

१४. गौ, अश्व और सत्य वचन से युक्त तथा दीप्तिमती उषे, आज यहाँ हमारा धनयुक्त यज्ञ जैसे हो, वैसे प्रकाशित हो।

---

१ नि० १२ ६।

पञ्चदशीमृचमाह—

युङ्क्ष्वाहिवाजिनीवत्यश्वाँअद्यारुणाँउषः ।
अथानोविश्वासौभगान्यावह ॥१५॥२६॥

युङ्क्ष्व । हि । वाजिनीऽवति । अश्वान् । अद्य । अरुणान् ।
उषः । अथ । नः । विश्वा । सौभगानि । आ । वह ॥ १५ ॥ २६ ॥

हेवाजिनीवति हविर्लक्षणान्नवति उषः उषोदेवते अरुणान् अरुणवर्णानश्वान् अश्वस्थानीयान्गोविशेषान् अद्यास्मिन्कालेयुङ्क्ष्वाहियोजयैव हिर्निर्धारणे अथानन्तरंरथमारुह्य विश्वासर्वाणिसौभगानिसौभाग्यानिनोऽस्मभ्यमावह आनय ॥ अश्वान् दीर्घादटिसमानपादेइतिसंहितायांनकारस्यरुत्वम् आतोटिनित्यमितिसानुनासिकआकारः । सौभगानि सुभगान्मन्त्रे इत्युद्गात्रादिषुपाठाद्भावकर्मणोरर्थयोः प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योञित्यञ् प्रत्ययः हृद्भगसिन्ध्वन्तेपूर्वपदस्यचेत्युभयपदवृद्धौप्राप्तायां सर्वविधीनांछन्दसिविकल्पितत्वादुत्तरपदवृद्धिर्नभवतीत्युक्तम् ॥ १५ ॥

१५. अन्नयुक्त उषे, आज अरुण-वर्ण घोड़े या गौ योजित करो और हमारे लिए सारा सौभाग्य लाओ।

॥ इतिप्रथमस्यषष्ठेषड्विंशोवर्गः ॥२६॥

प्रातरनुवाकस्याश्विनेक्रतौऔष्णिहेछन्दसि अश्विनावर्तिरित्ययंतृचः आश्विनशस्त्रेच तथाचसूत्रितम्—अश्विनावर्तिरस्मदा अश्विनावेहगच्छतमितितृचाविति ।

तृचेप्रथमांसूक्तेषोडशीमृचमाह—

अश्विनावर्तिरस्मदागोमद्दस्राहिरण्यवत् ।
अर्वाग्रथंसमनसानियच्छतम् ॥१६॥

अश्विना । वर्तिः । अस्मत् । आ । गोऽमत् । दस्रा । हिरण्यऽवत् ।
अर्वाक् । रथम् । सऽमनसा । नि । यच्छतम् ॥१६॥

उषःसाहचर्याद्बुद्धिस्थावश्विनाविदमादिकेनतृचेनस्तूयेते हेअश्विना अश्ववन्तौ व्यापनशीलौवादेवौ दस्राशत्रूणामुपक्षयितारौ अस्मदस्माकंवर्तिः वर्तनहेतुभूतंगृहं आसमन्ताद्गोमत् बहुभिर्गोभिर्युक्तम् हिरण्यवत् हितरमणीयधनयुक्तंचयथाभवति तथासमनसासमानमन-

स्कौसन्तौ युवांयुष्मदीयंरथंअर्वाक् अर्वाचीनमस्मदीयगृहमभिमुखंनियच्छतं आवर्तयतम् ॥ अश्विना सुपांसुलुगित्याकारः। वर्तिः वर्ततेस्मिन्निति वर्तिर्गृहं औणादिकइसिप्रत्ययः। अस्मद् सुपांसुलुगितिषष्ठ्याङ्लुक्। समनसा समानंमनोययोस्तौ समानस्यच्छन्दसीतिसभावः॥१६॥

१६. शत्रु-मर्दक अश्विनीकुमारो, हमारे घर को गौ और रमणीय धन से युक्त करने के लिए समान-मनोयोगी होकर अपने रथ को हमारे घर की ओर ले चलो।

सप्तदशीमृचमाह—

याविृत्थाश्लोकमादिवोज्योतिर्जनायचक्रथुः।
आनऊर्जंवहतमश्विनायुवम् ॥१७॥

यौ। इत्था। श्लोकम्। आ। दिवः। ज्योतिः। जनाय। चक्रथुः।
आ। नः। ऊर्जम्। वहतम्। अश्विना। युवम्॥ १७॥

हेअश्विनौ यौयुवां दिवोद्युलोकात्श्लोकं उपश्लोकनीयंप्रशंसनीयंज्योतिस्तेजः इत्थाइत्थंभूतमस्माभिरनुभूयमानेनप्रकारेणचक्रथुः कृतवन्तौ केषांचिन्मतेन सूर्याचन्द्रमसौअश्विनावुच्येते तदुक्तंयास्केन—तत्कावश्विनौद्यावापृथिव्यावित्येकेहोरात्रावित्येकेसूर्याचन्द्रमसावित्येकइति। तथाचप्रकाशकत्वंतयोरुपपन्नं तौयुवंयुवांनोऽस्मभ्यं ऊर्जंबलप्रदमन्नं आवहतं आनयतम् प्रयच्छतम्॥ श्लोकं श्लोकृसंघाते अयंस्तुत्यर्थोऽपि कर्मणिघञ् ञित्वादाद्युदात्तत्वम्॥१७॥

१७. अश्विद्वय, तुम लोगों ने आकाश से प्रशंसनीय ज्योति प्रेरित की है। तुम हमारे लिए शक्तिशाली अन्न ले आओ।

अष्टादशीमृचमाह—

एहदेवामयोभुवादस्राहिरण्यवर्तनी।
उषर्बुधोवहन्तुसोमपीतये ॥१८॥२७॥

आ। इह। देवा। मयःऽभुवा। दस्रा। हिरण्यवर्तनी इति हिरण्यऽवर्तनी। उषःऽबुधः। वहन्तु। सोमऽपीतये॥ १८॥२७॥

उषर्बुधः उषसिप्रबुद्धाअश्वाः इह अस्मिन्यागेसोमपीतयेसोमपानायदस्राशत्रूणामुपक्षयितारौअश्विनौआवहन्तुआनयन्तु कीदृशौ देवा देवनशीलौदानादिगुणयुक्तौवा मयोभुवा मयसः आरोग्यप्रदस्यसुखस्यभावयितारौ अश्विनौवैदेवानांभिषजावितिश्रुतेः। हिरण्यवर्तनी वर्त्ते-

१ नि० १२.१.। २ ऐ० ब्रा० १.१८.।

नेनेतिव्युत्पत्त्यावर्तनिशब्देनरथउच्यते सुवर्णमयोवर्तनिर्ययोस्तौ ॥ देवेत्यादिषुत्रिषु सुपांसुलु-गित्याकारः। सोमपीतये पापाने भावेक्तिनिघुमास्थेतीत्वम्। सोमपीतये सोमस्यपीतिःसोमपीतिः दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वम्॥ १८॥

१८. प्रकाशमान, आरोग्य-प्रद, सुवर्ण-रथ-युक्त एवं शत्रु-विजयी अश्विनीकुमारों को, सोमपान कराने के लिए, उषाकाल में उनके घोड़े जागकर यहाँ ले आयें।

॥ इतिप्रथमस्यषष्ठेसप्तविंशोवर्गः॥ २७॥

अग्नीषोमावितिद्वादशर्चंनवमंसूक्तम् गोतमस्यार्षं आदितस्तिस्रोऽनुष्टुभः नवम्याद्यास्तिस्रोगायत्र्यः अष्टमीजगतीत्रिष्टुब्वा शिष्टाःपञ्चत्रिष्टुभः अग्नीषोमौदेवता तथाचानुक्रान्तम्—अग्नीषोमौद्वादशाग्नीषोमीयमाद्यास्तिस्रोऽनुष्टुभउपान्त्यास्तिस्रोगायत्र्योऽष्टमीजगतीवेति। अग्नीषोमीयस्यपशोर्वपापुरोडाशहविषांआदितस्तिस्रऋचःक्रमेणानुवाक्याः सूत्रितंच—अग्नीषोमाविमंसुमेयुवमेतानिदिविरोचनानीतितृचाविति।

अग्नीषोमाविमंसुमेश्रृणुतंवृषणाहवम्।
प्रतिसूक्तानिहर्यतंभवतंदाशुषेमयः॥१॥

अग्नीषोमौ। इमम्। सु। मे। श्रृणुतम्। वृषणा। हवम्। प्रति।
सुऽउक्तानि। हर्यतम्। भवतम्। दाशुषे। मयः॥ १॥

वृषणावृषणौकामानांवर्षितारौ हेअग्नीषोमौ इमंइदानींप्रयुज्यमानं मेमदीयंहवंआह्वानंसुश्रृणुतंसम्यगवगच्छतं सूक्तानिशोभनानिस्तुतिलक्षणानि अस्माभिःकृतानिवचांसिप्रतिहर्यतंप्रत्येकंकामयेथां तदनन्तरंदाशुषेचरुपुरोडाशादीनिदत्तवतेयजमानाय मयः मयसःसुखस्यदातारौ भवतम्॥ अग्नीषोमौ अग्निश्चसोमश्च द्वन्द्वे ईदग्नेःसोमवरुणयोरितीत्वं अग्नेःस्तुत्स्तोमसोमाइतिषत्वम् देवताद्वन्द्वेचेत्युभयपदप्रकृतिस्वरेप्राप्ते आमन्त्रितस्यचेत्याद्युदात्तत्वम्। वृषणा सुपांसुलुगित्याकारः वाषपूर्वस्येतिविकल्पनादुपधायादीर्घाभावः। हवं भावेनुपसर्गस्येतिह्वयतेरप्संप्रसारणंच। सूक्तानि सुपूर्वाद्वक्तेःकर्मणिनिष्ठा सूपमानात्क्तइत्युत्तरपदान्तोदात्तत्वम्। हर्यतं हर्यगतिकान्त्योः भौवादिकः॥ १॥

१. अभीष्टवर्षी अग्नि और सोम, मेरे इस आह्वान को सुनो, स्तुति ग्रहण करो और हव्य-दाता को सुख प्रदान करो।

यदापौर्णमास्यामग्नीषोमावुपांशुयाजस्यदेवता तदानींअग्नीषोमायोअद्येतितस्यानुवाक्या सूत्रितंचउक्तादेवताइतिखण्डे—अग्नीषोमायोअद्यवामान्यंदिवोमातरिश्वाजभारेति।

तामेतांद्वितीयामृचमाह—

अग्नीषोमायोअद्यवामिदंवचःसपर्यति।
तस्मैधत्तंसुवीर्यंगवांपोषंस्वश्व्यम् ॥२॥

अग्नीषोमा। यः। अद्य। वाम्। इदम्। वचः। सपर्यति। तस्मै।
धत्तम्। सुऽवीर्यम्। गवाम्। पोषम्। सुऽअश्व्यम् ॥ २ ॥

हेअग्नीषोमौ योयजमानःअद्यास्मिन्कर्मणिवांयुवाभ्यां युष्मदर्थंइदंस्तुतिलक्षणंवचोवाक्यं सपर्यति पूजितंकरोति तस्मैयजमानायगवांपशूनांपोषंअभिवृद्धिंधत्तंप्रयच्छतं कीदृशंपोषं सुवीर्यं शोभनेनवीर्येणसामर्थ्येनोपेतं स्वश्व्यंशोभनैरश्वैर्युक्तम् ॥ गवां सावेकाचइतिप्राप्तस्यविभक्त्युदात्तत्वस्य नगोश्वन्साववर्णेतिप्रतिषेधः ॥ २ ॥

२. अग्नि और सोम, जो तुम्हें स्तुति समर्पण करता है, उसे बलवान् गौ और सुन्दर अश्व दान करो।

तृतीयामृचमाह—

अग्नीषोमायआहुतिंयोवांदाशाद्धविष्कृतिम्।
सप्रजयासुवीर्यंविश्वमायुर्व्यश्नवत् ॥३॥

अग्नीषोमा। यः। आऽहुतिम्। यः। वाम्। दाशात्। हविःऽकृतिम्।
सः। प्रऽजया। सुऽवीर्यम्। विश्वम्। आयुः। वि। अश्नवत् ॥ ३ ॥

हेअग्नीषोमौ योयजमानः आहुतिंआज्याहुतिंवांयुवाभ्यांदाशात्दद्यात् अथवा हविष्कृतिंहविषाचरुपुरोडाशादिनाकृतामाहुतिंयोयजमानोदद्यात् सयजमानः प्रजयापुत्रपौत्रादिनायुक्तं सुवीर्यंशोभनवीर्ययुक्तं विश्वंसर्वंआयुर्जीवनं व्यश्नवत्व्याप्नोतु ॥ आहुतिं जुहोतेःक्तिनि तादौचेतिगतेःप्रकृतिस्वरत्वम्। दाशात् दाशृदाने लेटयाडागमः यद्वृत्तयोगादनिघातः। हविष्कृतिं हविषःकृतिःकरणंयस्यामाहुतौ बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वं नित्यंसमासेनुत्तरपदस्थस्येतिविसर्जनीयस्यषत्वम्। अश्नवत् अश्नोतेर्व्यत्ययेनपरस्मैपदम् लेटयडागमः ॥ ३ ॥

३. अग्नि और सोम, जो तुम लोगों को आहुति और हव्य प्रदान करता है, वह पुत्र-पौत्रादि के साथ सारी वीर्यशाली आयु प्राप्त हो।

चतुर्थीमृचमाह—

अग्नीषोमाचेतितद्वीर्यंवांयदमुष्णीतमवसंपणिंगाः।
अवातिरतंबृसयस्यशेषोविन्दतंज्योतिरेकंबहुभ्यः ॥४॥

अग्नीषोमा । चेति । तत् । वीर्यम् । वाम् । यत् । अमुष्णीतम् ।
अवसम् । पणिम् । गाः । अव । अतिरतम् । बृसयस्य । शेषः ।
अविन्दतम् । ज्योतिः । एकम् । बहुऽभ्यः ॥ ४ ॥

हेअग्नीषोमौ वांयुवयोः तद्वक्ष्यमाणंवीर्यंसामर्थ्यंचेतिअस्माभिर्ज्ञातमभूत् यत् येनवीर्येण गाःअवसंगोरूपंअन्नं पणिंपणेः विभक्तिव्यत्ययः एतन्नाम्नोऽसुरात्अमुष्णीतं अपाहार्ष्टम् तथा बृसयस्यबृसिर्वेष्टनार्थः बृसयतिसर्वंवेष्टयतीतिबृसयोसुरःत्वष्टा तस्यासुरस्यशेषःअपत्यं शेषइत्यपत्यनाम शिष्यतेःप्रयतइतियास्कः ।[1] त्वष्टुःसकाशादुत्पन्नंवृत्रंअवातिरतं अवधिष्टं अवतिरतिर्वधकर्मा । प्राणापानरूपयोर्युवयोर्वृत्रेणावस्थानात्समरणंप्राप्तः तथाचाम्नायते—तस्माज्जंजभ्यमानादग्नीषोमौनिरक्रामतांप्राणापानौवाएनंतदजहितामिति[2] । ततोवृत्रवधानन्तरंज्योतिर्द्योतमानंसूर्यंएकंनभसिगच्छन्तंबहुभ्योजनेभ्यः बहूनामर्थायअविन्दतं अलभ्साथां एतत्सर्वंयेनवीर्येणक्रियते तदस्माभिर्ज्ञातमित्यर्थः ॥ चेति चितीसंज्ञाने लुङि चिण्भावकर्मणोरितिच्लेश्चिणादेशः चिणोलुगितितशब्दस्यलुक् । अमुष्णीतं मुषस्तेये क्रैयादिकः । अवसं अवतेरौणादिकोऽसच् । शेषः सुपांसुलुगितिद्वितीयायाःसुः । एकं इणूगतौ इणूभीकापाशल्यतिमर्चिभ्यःकन्नितिकन्प्रत्ययः नित्वादाद्युदात्तत्वम् ॥ ४ ॥

४. अग्नि और सोम, तुमने जिस वीर्य के द्वारा पणि के पास से गो-रूप अन्न, अपहृत किया था, जिस वीर्य के द्वारा बृसय के पुत्र (वृत्र) का वध करके, सबके उपकार के लिए, एकमात्र ज्योतिःपूर्ण सूर्य को प्राप्त किया था, वह सब हमें विदित है।

अग्नीषोमीयस्यपशोर्वपापुरोडाशहविषांयुवमेतानीत्याद्यास्तिस्रऋचःक्रमेणयाज्याः सूत्रं तुपूर्वमेवोदाहृतम् पौर्णमासयागेग्नीषोमीयस्यपुरोडाशस्ययुवमेतानीत्येषायाज्या उक्तादेवताइतिखण्डेसूत्रितम्—युवमेतानिदिविरोचनानीन्द्राग्नीअवसागतमिति ।

तामेतांसूक्तेपञ्चमीमृचमाह—

युवमेतानिदिविरोचनान्यग्निश्चसोमसक्रतूअधत्तम् ।
युवंसिन्धूँरभिशस्तेरवद्यादग्नीषोमावमुञ्चतंगृभीतान् ॥ ५ ॥

युवम् । एतानि । दिवि । रोचनानि । अग्निः । च । सोम । सक्रतू इति सऽक्रतू । अधत्तम् । युवम् । सिन्धून् । अभिऽशस्तेः । अवद्यात् । अग्नीषोमौ । अमुञ्चतम् ॥ गृभीतान् ॥ ५ ॥

---

[1] नि० ३. २. । [2] तै० सं० २. ५. २. ।

हेसोम त्वमग्निश्च सक्रतूसमानकर्माणौसन्तौयुवंयुवां रोचनानिरोचमानानि दीप्यमानानि एतान्यस्माभिर्निशिद्दश्यमानानिताराग्रहादीनिज्योतींषि दिवियुलोके अधत्तं अधारयतम् उत्तरार्धस्येयमाख्यायिका—इन्द्रोवृत्रंहत्वाब्रह्महत्यायाभीतःसन् पृथिव्यांवृक्षेषुस्त्रीष्वप्सुचतांब्रह्महत्यां न्यमार्क्षीत् तासामपांशुद्धिरग्नीषोमाभ्यांजातेति । ब्रह्महत्यांशेनपापेन गृभीतान्गृहीतानाक्रान्तान्सिन्धून्नदीविशेषान् हेअग्नीषोमौ युवंयुवां अभिशस्तेःअभिशस्यमानादभितःप्रकटितादवद्याच्चस्मात्पापात्अमुञ्चतं मुक्तवन्तौ यद्वा वृत्रः इन्द्रेणहतःसन् नदीषुपपात ततोमृतेनवृत्रशरीरेणनद्यः सर्वादुष्टाबभूवुः तथाचतैत्तिरीयकम्—इन्द्रोवृत्रमहन्सो१पो१भ्यम्रियततासांयन्मेध्यंयज्ञियंसदेवमासीत्तदपोदक्रामदिति[1]। तेनदोषेणगृहीतानदीस्तस्माद्दोषादग्नीषोमौमुक्तवन्तौ॥रोचनानि रुचदीप्तौ अनुदात्तेतश्चहलादेरितियुच् । सिन्धून् दीर्घादटिसमानपादेइतिनकारस्यरुत्वम् अत्रानुनासिकंइत्यनुनासिकः । गृभीतान् हृग्रहोर्भइतिभत्वम् ॥ ५ ॥

५. अग्नि और सोम, समान-कर्म-सम्पन्न होकर, आकाश में, तुमने इन उज्ज्वल नक्षत्र आदि को धारण किया है, तुमने दोषाक्रान्त नदियों को प्रकाशित दोष से मुक्त किया है या संशोधित किया है।

अग्नीषोमीयस्योपांशुयाजस्यआन्यंदिवइत्येषायाज्या अग्नीषोमायोअद्यवामित्यत्रसूत्रमुदाहृतम् ।

दामेतांषष्ठीमृचमाह—

आन्यंदिवोमातरिश्वाजभारामथ्नादन्यंपरिश्येनोअद्रेः ।
अग्नीषोमाब्रह्मणावावृधानोरुंयज्ञायचक्रथुरुलोकम् ॥६॥२८॥

आ । अन्यम् । दिवः । मातरिश्वा । जभार । अमथ्नात् । अन्यम् । परि । श्येनः । अद्रेः । अग्नीषोमा । ब्रह्मणा । ववृधाना । उरुम् । यज्ञाय । चक्रथुः । ऊम् इति । लोकम् ॥ ६ ॥ २८ ॥

हेअग्नीषोमौ युवयोर्मध्येअन्यमेकमग्निं मातरिश्वावायुर्दिवोद्युलोकादाजभार भृगवेयजमानायआजहार तथाचमन्त्रान्तरम्—द्विजन्मानंरयिमिवप्रशस्तंरातिंभरद्भृगवेमातरिश्वेति[2] । श्येनः शंसनीयगतिमान् पक्षीपक्ष्याकारागायत्री अन्यं सोमंअद्रेःपरि मेरोरुपरि अवस्थितात् स्वर्गात्अमथ्नात् बलादाहृतवती एवंमहानुभावौयुवां ब्रह्मणास्मद्गुणमन्त्ररूपेणस्तोत्रेणहविर्लक्षणेनान्नेन वा ववृधाना वर्धमानौयुवांयज्ञायअन्येषदेवानां यागायउरुविस्तीर्णंलोकंस्थानं चक्रथुः कृतव-

---

१ तै० सं० ६. १. १. । २ ऋ० सं० १. ४. २६. ।

न्तौ उइत्येतत्पदपूरणं आज्यभागदेवतयोरग्नीषोमयोरुत्तरार्धदक्षिणार्धयोर्हूयते तन्मध्येअन्यदेवत्यानिसर्वाणिहवींषिहूयन्ते तन्मध्यमंस्थानमग्नीषोमकृतं तथाचतैत्तिरीयकम्—राजानौवाएतौदेवतानांयदग्नीषोमावन्तरादेवताइज्येते देवतानांविधृत्याइति[1]॥ ववृधाना वृधेर्लिटिकानच् छान्दसमभ्यासस्यदीर्घत्वं सुपांसुलुगित्याकारः॥ ६ ॥

६. अग्नि और सोम, तुममें से अग्नि को मातरिश्वा (वायु) आकाश से लाये हैं और सोम को अद्रि (पर्वत) के ऊपर से श्येन पक्षी (बाज) बल-पूर्वक लाया है। स्तोत्रों के द्वारा वर्द्धित होकर, यज्ञ के लिए, तुम लोगों ने भूमि विस्तीर्ण की है।

अग्नीषोमाहविषःप्रस्थितस्यवीतंहर्यतंवृषणाजुषेथाम् ।
सुशर्माणास्ववसाहिभूतमथाधत्तंयजमानायशंयोः ॥७॥

अग्नीषोमा । हविषः । प्रऽस्थितस्य । वीतम् । हर्यतम् । वृषणा । जुषेथाम् । सुऽशर्माणा । सुऽअवसा । हि । भूतम् । अथ । धत्तम् । यजमानाय । शम् । योः ॥ ७ ॥

हेअग्नीषोमौ प्रस्थितस्यहोमार्थमाहवनीयसमीपंप्राप्तस्यहविषः इदंहविःवीतंभक्षयतं तदनन्तरंच हर्यतं अस्मान्कामयेथां हेवृषणा कामानांवर्षितारौजुषेथांअस्मदीयंपरिचरणंसेवेथां तदनन्तरंसुशर्माणाशोभनसुखौ स्ववसाहि शोभनरक्षणौचभूतं अस्माकंभवतं अथानन्तरंहविर्दत्तवतेयजमानाय शं शमनीयानांरोगाणांशमनं योः पृथक्कर्तव्यानांभयानांयावनंपृथक्करणंचधत्तंविधत्तंकुरुतं उक्तंचयास्केन—शमनंचरोगाणांयावनंचभयानामिति[2] ॥ हविषः क्रियाग्रहणंकर्तव्यमितिकर्मणः संप्रदानत्वाच्चतुर्थ्यर्थेषष्ठी। वीतं वीगतिव्याप्तिप्रजनकान्त्यसनखादनेषु थसस्तं अदादित्वाच्छपोलुक् वीतंचहर्यतंचेतिचार्थप्रतीतेश्चादिलोपेविभाषेतिप्रथमायास्तिङ्विभक्तेर्निघातप्रतिषेधः हर्यतं पादादित्वान्निघाताभावः। जुषेथां वृषणेत्यामन्त्रितस्यामन्त्रितंपूर्वमित्यविद्यमानवत्त्वेसतितिङःपरत्वान्निघाताभावः। सुशर्माणा स्ववसा उभयत्रबहुव्रीहौ सोर्मनसीअलोमोषसीइत्युत्तरपदाद्युदात्तत्वम्। भूतं लोटि बहुलंछन्दसीतिशपोलुक् ॥ ७ ॥

७. अग्नि और सोम, प्रदत्त अन्न भक्षण करो; हमारे ऊपर अनुग्रह करो। अभीष्टवर्षी, हमारी सेवा ग्रहण करो। हमारे लिए सुख-प्रद और रक्षण-युक्त बनो एवं यजमान का रोग और भय हटाओ।

योअग्नीषोमाहविषासपर्याद्देवद्रीचामनसायोघृतेन ।
तस्यव्रतंरक्षतंपातमंहसोविशेजनायमहिशर्मयच्छतम् ॥८॥

---

[1] तै० सं० २. ६. २.। [2] नि० ४. २१.।

यः । अ॒ग्नीषोमा॑ । ह॒विषा॑ । स॒प॒र्या॑त् । दे॒व॒द्रीचा॑ । मन॑सा । यः ।
घृ॒तेन॑ । तस्य॑ । व्र॒तम् । र॒क्ष॒त॒म् । पा॒त॒म् । अंह॑सः । वि॒शे । जना॑य ।
महि॑ । शर्म॑ । य॒च्छ॒त॒म् ॥ ८ ॥

योयजमानः अग्नीषोमा अग्नीषोमौ देवद्रीचादेवानञ्चतादेवतापरायणेनश्रद्धायुक्तेन मनसान्तःकरणेनयुक्तःसन्हविषा चरुपुरोडाशादिनासपर्यात् सपर्यतिपरिचरति यश्चयजमानो-घृतेनाज्येनाग्नीषोमौपरिचरति तस्ययजमानस्यव्रतंकर्मरक्षतं अंहसः पापात्तंचयजमानं पातंरक्ष-तम् विशेयागेषुप्रविशते तस्मैजनाययजमानाय महिमहत्प्रभूतं शर्मसुखंयच्छतंदत्तम् ॥ अग्नी-षोमा देवताद्वन्द्वेचेत्युभयपदप्रकृतिस्वरत्वम् । सपर्यात् सपरपूजायां कण्ड्वादिः लेटचाडागमः । देवद्रीचा देवान् अञ्चतीतिदेवद्र्यङ् अञ्चतेर्ऋत्विगित्यादिनाक्विन् अनिदितामितिनलोपः विष्व-ग्देवयोश्चटेरद्र्यञ्चतौवप्रत्ययेइति देवशब्दस्यटेरद्र्यादेशः तृतीयैकवचने अचइत्यकारलोपेचा-वितिदीर्घत्वम् कृदुत्तरपदप्रकृतिस्वरत्वेप्राप्ते अद्रिसध्र्योरन्तोदात्तनिपातनंकृत्स्वरनिवृत्त्यर्थमि-तिवचनाददर्याादेशोऽन्तोदात्तोनिपातितः । विशे सावेकाचइतिविभक्तेरुदात्तत्वम् ॥ ८ ॥

८. अग्नि और सोम, जो यजमान देवता-परायण चित्त से हव्य-द्वारा अग्नि और सोम की पूजा करता है, उसके व्रत की रक्षा करो। उसे पाप से बचाओ तथा उस यज्ञ-रत व्यक्ति को प्रभूत सुख दो।

पौर्णमासयागेऽग्नीषोमीयस्ययागस्यअग्नीषोमेत्येषानुवाक्या तथाचसूत्रितंउक्तादेवता-इतिखण्डे—अग्नीषोमासवेदसायुवमेतानिदिविरोचनानीति ।

अग्नी॑षोमा॒सवे॑दसा॒सहू॑तीवनतं॒गिरः॑ । सं॒दे॑व॒त्राब॑भूवथुः ॥९॥

अग्नी॑षोमा । स॒ऽवे॑दसा । सहू॑ती॒ इति॒ स॒ऽहू॑ती । व॒न॒त॒म् । गिरः॑ ।
सम् । दे॒व॒ऽत्रा । ब॒भू॒व॒थुः ॥ ९ ॥

हेअग्नीषोमौ युवांसवेदसा समानेनएकेनवेदसाहविर्लक्षणेनधनेनयुक्तौसहूतीसमानाह्वानौ चसन्तौ गिरः अस्मदीयाः स्तुतीर्वनतं संभजेथां देवत्रा देवेषुसर्वेषु योयुवांसंबभूवथुः संभूतौ संभावितौप्रशस्तौस्थः राजानौवाएतौदेवतानांयदग्नीषोमाविति श्रुतेः[1] ॥ सवेदसा समानंवेदोय-योः समानस्यच्छन्दसीति सभावः । वनतं वनषणसंभक्तौ । देवत्रा देवमनुष्यपुरुषपुरुमर्त्येत्या-दिनासप्तम्यर्थेत्राप्रत्ययः ॥ ९ ॥

९. अग्नि और सोम, तुम सारे देवों में प्रशंसनीय, समान-धन-युक्त और एकत्र आह्वान-योग्य हो। तुम हमारी स्तुति सुनो।

---

[1] तै० सं० २. ६. २.।

दशमीमृचमाह—

अग्नीषोमावनेनवांयोवांघृतेनदाशति। तस्मैदीदयतंबृहत् ॥१०॥

अग्नीषोमौ। अनेन। वाम्। यः। वाम्। घृतेन। दाशति। तस्मै। दीदयतम्। बृहत् ॥ १० ॥

हेअग्नीषोमौ वांयुवयोःसंबन्धीयोयजमानः अनेनघृतेनउत्पवनादिभिःसंस्कृतेनाज्येनयुक्तंहविः वांयुवाभ्यांदाशतिमयच्छति तस्मैयजमानायबृहत्प्रभूतंधनंदीदयतंप्रकाशयतंप्रयच्छतमित्यर्थः॥दाशति दाशृदाने शप्तिपोःपित्त्वादनुदात्तत्वेधातुस्वरः यद्वृत्तयोगादनिघातः। दीदयतम् दीदयतिर्दीप्तिकर्मा ॥ १० ॥

१०. अग्नि और सोम, जो तुम्हें घृत प्रदान करता है, उसे प्रभूत धन दो।

एकादशीमृचमाह—

अग्नीषोमाविमानिनोयुवंहव्याजुजोषतम्। आयातमुपनःसचा॥११॥

अग्नीषोमौ। इमानि। नः। युवम्। हव्या। जुजोषतम्। आ। यातम्। उप। नः। सचा ॥ ११ ॥

हेअग्नीषोमौ युवंयुवांनोऽस्मदीयानीमानिहव्याहवींषिजुजोषतंसेवेथाम् तदर्थंनोऽस्मान्सचासह युवामुपायातंउपगच्छतम्॥ जुजोषतं जुषीप्रीतिसेवनयोः लोटिव्यत्ययेनशप् छान्दसंद्विर्वचनम् यद्वा विकरणस्यबहुलंछन्दसीतिश्लुः ततोव्यत्ययेनशप् बहुलंछन्दसीतिवक्तव्यमिति वचनात् नाभ्यस्तस्याचिपितीतिलघूपधगुणप्रतिषेधाभावः॥ ११ ॥

११. अग्नि और सोम, हमारा यह हव्य ग्रहण करो और एकत्र आगमन करो।

द्वादशीमृचमाह—

अग्नीषोमापिपृतमर्वतोनआप्यायन्तामुस्रियाहव्यसूदः।
अस्मेबलानिमघवत्सुधत्तंकृणुतंनोअध्वरंश्रुष्टिमन्तम्॥१२॥२९॥

अग्नीषोमा। पिपृतम्। अर्वतः। नः। आ। प्यायन्ताम्। उस्रियाः। हव्यऽसूदः। अस्मे इति। बलानि। मघवत्ऽसु। धत्तम्। कृणुतम्। नः। अध्वरम्। श्रुष्टिऽमन्तम् ॥ १२ ॥ २९ ॥

हेअग्नीषोमौ नोऽस्माकं अर्वतोऽश्वान्पिपृतंपालयतम् हव्यसूदः क्षीरादिहविषांउत्पादयित्र्यः उस्रियाअस्मदीयागावश्चआप्यायन्तां आप्यायिताःप्रवृद्धाःसन्तु मघवत्सुहविर्लक्षणधनयुक्तेषु अस्मे अस्मासुबलानिधत्तंस्थापयतम् तथानोऽस्माकंअध्वरंयागंश्रुष्टिमन्तंधनयुक्तंकृणुतंकुरुतम् ॥ पिपृतं पृपालनपूरणयोः पृइत्येके जुहोत्यादित्वाच्छपःश्लुः अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वम् । हव्यसूदः हव्यंसूदन्तेक्षरन्तीतिहव्यसूदः षूदक्षरणे क्विप्चेतिक्विप् । अस्मे सुपांसुलुगितिसप्तम्याःशेआदेशः । श्रुष्टिमन्तं श्रुष्टीतिधननाम शुआशुअश्यतेव्याप्यतेइतिश्रुष्टिः पृषोदरादिः ह्रस्वनुड्भ्यांमतुबितिमतुपउदात्तत्वम् ॥ १२ ॥

१२. अग्नि और सोम, हमारे अश्वों की रक्षा करो। हमारी क्षीर आदि हव्य की उत्पादिका गायें वर्द्धित हों। हम धनशाली हों; हमें बल प्रदान करो। हमारा यज्ञ धन-युक्त हो।

॥ इतिप्रथमस्यषष्ठेएकोनत्रिंशोवर्गः ॥ २९ ॥

॥ इतिप्रथमेमण्डलेचतुर्दशोनुवाकः ॥ १४ ॥

पञ्चदशेऽनुवाकेद्वादशसूक्तानि तत्रेमंस्तोममितिषोडशर्चंप्रथमंसूक्तम् आङ्गिरसस्यकुत्सस्यार्षम् पञ्चदशीषोडश्यौत्रिष्टुभौ शिष्टाजगत्यः अग्निर्देवता पूर्वोदेवाभवतुसुन्वतोरथइतित्रयः पादादेवदेवत्याः तन्नोमित्रइत्यर्धर्चोलिङ्गोक्तमित्रावरुणादिषड्देवत्यः अथवा तस्याप्यग्निरेवदेवता मित्रावरुणादयस्तुनिपातभाक्त्वेनाप्रधानाः एतत्सर्वमनुक्रान्तम्—इमंषोडशकुत्सआग्नेयंतद्धित्रिष्टुबन्तं पूर्वोदेवास्त्रयःपादादैवास्तन्नोमित्रोऽर्धर्चोलिङ्गोक्तदेवतोयदैवत्यंवासूक्तमिति । प्रातरनुवाकस्याग्नेयेक्रतौजागतेछन्दस्येतत्सूक्तं आश्विनशस्त्रेच तथाचसूत्रितम्—इमंस्तोममर्हतेसंजागृवद्भिरिति । आभिप्लविकेषष्ठेहनि आग्निमारुतेप्येतत्सूक्तंजातवेदस्यनिविद्धानं सूत्रितंच—प्रयज्यवइमंस्तोममित्याग्निमारुतमिति । तृतीयसवनेइमंस्तोममित्येषाग्नीध्रःप्रस्थितयाज्या सूत्रितंच—इमंस्तोममर्हतेजातवेदसइतिवार्तीयसवनिक्यइति ।

तामेतांसूक्तेप्रथमामृचमाह—

इमंस्तोममर्हतेजातवेदसेरथमिवसंमहेमामनीषया ।
भद्राहिनःप्रमतिरस्यसंसद्यग्नेसख्येमारिषामावयंतव ॥१॥

इमम् । स्तोमम् । अर्हते । जातऽवेदसे । रथम्ऽइव । सम् । महेम । मनीषया । भद्रा । हि । नः । प्रऽमतिः । अस्य । सम्ऽसदि । अग्ने । सख्ये । मा । रिषाम । वयम् । तव ॥ १ ॥

अर्हतेपूज्याय जातवेदसेजातानांउत्पन्नानांविदित्रेजातप्रज्ञायजातधनायवाऽग्नये मनीषयानि-शितयाबुद्ध्या इमंएतत्सूक्तरूपंस्तोमंस्तोत्रंरथमिव यथातक्षारथंसंस्करोति तथासंमहेमसम्यक्पूजितं कुर्मः अस्याग्नेः संसदिसंभजनेनोऽस्माकं प्रमतिः प्रकृष्टाबुद्धिः भद्राहि कल्याणीसमर्थाखलु अवस्तया बुद्ध्यास्तुमइत्यर्थः हेअग्ने तवसख्येऽस्माकंत्वयासहसखित्वेसति वयंमारिषाम हिंसितानभवाम अ-स्मात्क्षेत्यर्थः ॥ अर्हते अर्हपूजायां अर्हः प्रशंसायामितिलटः शत्रादेशः शपःपित्त्वादनुदात्तत्वम् शतुश्चादुपदेशाल्लसार्वधातुकस्वरेणधातुस्वरःशिष्यते। महेम महपूजायाम्। रिषाम रिषहिंसायां व्यत्ययेनशः। तव युष्मदस्मदोर्ङसीत्याद्युदात्तत्वम् ॥ १ ॥

१. हम पूजनीय और सर्व-भूतज्ञ अग्नि की रथ की तरह, बुद्धि-द्वारा, इस स्तुति को प्रस्तुत करते हैं। अग्नि की अर्चना से हमारी बुद्धि उत्कृष्ट होती है। हे अग्नि, तुम्हारे हमारे मित्र रहने पर हम हिंसित नहीं होंगे।

यस्मैत्वमायजसेससाधत्यनर्वाक्षेतिदधतेसुवीर्यम्।
सतूतावनैनमश्नोत्यंहतिरग्नेसख्येमारिषामावयंतव ॥२॥

यस्मै। त्वम्। आऽयजसे। सः। साधति। अनर्वा। क्षेति।
दधते। सुऽवीर्यम्। सः। तूताव। न। एनम्। अश्नोति। अंहतिः।
अग्ने। सख्ये। मा। रिषाम। वयम्। तव ॥ २ ॥

यस्मैयजमानाय हेअग्ने त्वंआयजसे देवानाभिमुख्येनयजसि सयजमानः साधतिस्वाभिलषि-तंसाधयति प्राप्नोतीत्यर्थः किञ्च सयजमानः अनर्वाशत्रुभिरप्रत्यृतःसन् क्षेतिनिवसति तथासुवी-र्यंशोभनवीर्योपेतंधनंदधतेधारयतिप्राप्नोतीत्यर्थः धृत्वाचसयजमानःतूताव वर्धतेएनंयजमानं अंहतिः अर्तिर्दारिद्र्यंनाश्नोतिनप्राप्नोति अन्यत्पूर्ववत् ॥ साधति षिधुसंराद्धौ णिचि सिध्यतेरपा-रलौकिकेइत्यात्वम् छन्दस्युभयथेतिशपआर्धधातुकत्वात् णेरनिटीतिणिलोपः। क्षेति क्षिनिवास-गत्योः बहुलंछन्दसीतिविकरणस्यलुक्। दधते दधधारणे भौवादिकः। तूताव तुइतिवृद्ध्यर्थःसौ-त्रोधातुः अस्माच्छान्दसोलिट् तुजादित्वादभ्यासस्यदीर्घत्वम्। अश्नोति व्यत्ययेनपरस्मैपदम्। अंहतिः हन्तेरंहचेतिअतिप्रत्ययः चिदित्यनुवृत्तेरन्तोदात्तत्वम् ॥ २ ॥

२. अग्नि, जिसके लिए तुम यज्ञ करते हो, उसकी अभिलाषा पूर्ण होती है और वह उत्पीड़ित न होकर निवास करता, महाशक्ति धारण करता और वर्द्धित होता है। उसे कभी दरिद्रता नहीं मिलती। हे अग्नि, तुम्हारे हमारे बन्धु होने पर हम हिंसित नहीं होंगे।

शकेमत्वासमिधंसाधयाधियस्त्वेदेवाहविरदन्त्याहुतम्।
त्वमादित्याँआवहतान्ह्यु१श्मस्यग्नेसख्येमारिषामावयंतव ॥३॥

१ धातुस्वरावशेषेणाद्युदात्तत्वं इतिपाठः।

शकेम । त्वा । सम्ऽइधम् । साधय । धियः । त्वे इति । देवाः ।
हविः । अदन्ति । आऽहुतम् । त्वम् । आदित्यान् । आ । वह ।
तान् । हि । उश्मसि । अग्ने । सख्ये । मा । रिषाम । वयम् । तव ॥३॥

हेअग्ने त्वात्वांसमिधंसम्यगिद्धंकर्तुंशकेम शक्ताभूयास्म त्वंच धियःअस्मदीयानिदर्शपूर्णमासादीनिकर्माणिसाधयनिष्पादय त्वयाहिसर्वेयागानिष्पाद्यन्ते यस्मात्त्वे त्वय्यग्नावाहुतंऋत्विग्भिःप्रक्षिप्तंचरुपुरोडाशादिकंहविःदेवाअदन्तिभक्षयन्तितस्मात्त्वंसाधयेत्यर्थः अपिच त्वं आदित्यान् अदितेःपुत्रान्सर्वान्देवानावह अस्मद्यज्ञार्थमानय तान्हिइदानीमेववयमुश्मसि कामयामहे अन्यत्पूर्ववत् ॥ शकेम शक्लृशक्तौ लिङ्याशिष्यङ् अदुपदेशाल्लसार्वधातुकानुदात्तत्वेअङएवस्वरःशिष्यते।समिधं ञिइन्धीदीप्तौ अस्मात्संपदादिलक्षणःकर्मणिक्विप्।त्वे सुपांसुलुगिति सप्तम्येकवचनस्यशेआदेशः। उश्मसि वशकान्तौ इदन्तोमसिः अदादित्वाच्छपोलुक् ग्रहिज्येत्यादिनासंप्रसारणम्॥ ३ ॥

३. अग्नि, हम तुम्हें अच्छी तरह प्रज्वलित कर सकें। तुम हमारा यज्ञ साधन करो; क्योंकि तुममें फेंका हुआ हव्य देवता लोग खाते हैं। तुम आदित्यों को ले आओ। उन्हें हम चाहते हैं। अग्नि, तुम्हारे मित्र होने पर हम हिंसित नहीं होंगे।

भरामेध्मंकृणवामाहवींषितेचितयन्तःपर्वणापर्वणावयम्।
जीवातवेप्रतरंसाधयाधियोग्नेसख्येमारिषामावयंतव ॥४॥
भराम । इध्मम् । कृणवाम । हवींषि । ते । चितयन्तः ।
पर्वणाऽपर्वणा । वयम् । जीवातवे । प्रऽतरम् । साधय । धियः ।
अग्ने । सख्ये । मा । रिषाम । वयम् । तव ॥ ४ ॥

हेअग्ने त्वद्यागार्थं इध्मंइन्धनसाधनं एकविंशतिदार्वात्मकं समित्समूहं भराम संपादयाम तदनन्तरंतेतुभ्यंहवींषिचरुपुरोडाशलक्षणान्यन्नानिवयंकृणवाम करवाम किंकुर्वन्तः पर्वणापर्वणा प्रतिपक्षमावृत्ताभ्यांदर्शपूर्णमासाभ्यां चितयन्तः त्वांप्रज्ञापयन्तः सत्वंजीवातवे अस्माकंजीवनौषधाय चिरकालावस्थानाय धियःकर्माणि अग्निहोत्रादीनि प्रतरं प्रकृष्टतरं साधयनिष्पादय अन्यत्समानम्॥ चितयन्तः चितीसंज्ञाने. संज्ञापूर्वकस्यविधेरनित्यत्वाल्लघूपधगुणाभावः। पर्वणापर्वणा नित्यवीप्सयोरितिवीप्सायांद्विर्भावः तस्यपरमाम्रेडितमितिपरस्याम्रेडितसंज्ञायां अनुदात्तंचेत्यनुदात्तत्वम्।प्रतरं तरबन्तात्प्रशब्दात्क्रियाप्रकर्षेवर्तमानादमुचच्छन्दसीत्यमुप्रत्ययः॥४॥

४. अग्नि, हम इन्धन इकट्ठा करते हैं। तुम्हें ज्ञात कराकर हव्य देते हैं। हमारी आयुर्वृद्धि के लिए तुम यज्ञ सम्पन्न करो। अग्नि, तुम्हारे मित्र रहने पर हम हिंसित नहीं होंगे।

पञ्चमीमृचमाह—

विशांगोपाअस्यचरन्तिजन्तवोद्विपच्चयदुतचतुष्पदक्तुभिः।
चित्रःप्रकेतउषसोमहाँअस्यग्नेसख्येमारिषामावयंतव ॥ ५ ॥ ३० ॥

विशाम्। गोपाः। अस्य।। चरन्ति। जन्तवः। द्विऽपत्। च।
यत्। उत। चतुःऽपत्। अक्तुऽभिः। चित्रः। प्रऽकेतः। उषसः।
महान्। असि। अग्ने। सख्ये। मा। रिषाम। वयम्। तव ॥ ५ ॥ ३० ॥

अस्याग्नेर्जन्तवोजातारश्मयोविशांसर्वेषांप्राणिनांगोपाः गोपायितारोरक्षकाःसन्तः चरन्ति उद्गच्छन्ति तदनन्तरं यच्चद्विपद्द्विपान्मनुष्यादिकमस्ति उत अपिच चतुष्पद् चतुष्पाद् गवादिकंयदस्ति तदुभयंअंकुभिःअक्तैः अस्यरश्मिभिः अक्तमाश्लिष्टमभूत् हेअग्ने चित्रोविचित्रदीप्तियुक्तः प्रकेतःरात्रावन्धकारावृतानांसर्वेषांप्रज्ञापयितामदर्शयिता उषसः उषोदेवतायाअपिमहान्गुणैरधिकोऽसिभवसि उषास्तुरात्रेश्चरमभागेप्रकाशयति अग्निस्तुसर्वस्यांरात्रौप्रकाशयतीतितस्यगुणाधिक्यम् ॥ गोपाः गुपूरक्षणे गुपूधूपविच्छीत्यायप्रत्ययः अस्मात्क्विप् अतोलोपः वेरपृक्तलोपाद्वलिलोपोबलीयानितिपूर्वंवलिलोपः नचातोलोपस्यस्थानिवत्त्वं नपदान्तेत्यादिनायलोपंप्रतितन्निषेधात्। द्विपद् द्वौपादावस्येतिबहुव्रीहौ संख्यासुपूर्वस्येतिपादशब्दस्यान्त्यलोपःसमासान्तः अयस्मयादित्वेनभत्वेनपादःपदितिपद्भावः एकदेशविकृतस्यानन्यवत्त्वात् द्वित्रिभ्यांपादन्मूर्धस्वितिउत्तरपदान्तोदात्तत्वम्। चतुष्पद् पूर्ववत्समासान्तःपद्भावश्च इदुदुपधस्यचाप्रत्ययस्येतिविसर्जनीयस्यषत्वम् त्रःसंख्यायाइतिचतुरशब्दआद्युदात्तः सएवबहुव्रीहिस्वरेणशिष्यते ॥ ५ ॥

५. उन (अग्नि) की किरणें प्राणियों की रक्षा करती हुई विचरण करती हैं। द्विपद और चतुष्पद जन्तु उन (अग्नि) की किरणों में विचरण करते हैं। तुम विचित्र दीप्ति से युक्त और सारी वस्तुएँ प्रदर्शित करते हो। तुम उषा से भी महान् हो। अग्नि, तुम्हारे मित्र रहने पर हम हिंसित नहीं होंगे।

षष्ठीमृचमाह—

त्वमध्वर्युरुतहोतासिपूर्व्यःप्रशास्तापोताजनुषापुरोहितः।
विश्वाविद्वाँआर्त्विज्याधीरपुष्यस्यग्नेसख्येमारिषामावयंतव ॥ ६ ॥

त्वम्। अध्वर्युः। उत। होता। असि। पूर्व्यः। प्रऽशास्ता। पोता।
जनुषा। पुरःऽहितः। विश्वा।। विद्वान्। आर्त्विज्या। धीर।
पुष्यसि। अग्ने। सख्ये। मा। रिषाम। वयम्। तव ॥ ६ ॥

हेअग्ने त्वं अध्वर्युः अध्वरस्ययागस्यनेतादेवान्प्रतिप्रेरयिता यद्वा यागेआध्वर्यवस्यकर्ताभवसि अध्वर्यौमनुष्येजाठररूपेणवांगिन्द्रियाधिष्ठातृत्वेनवावस्थाय यागनिष्पादकोऽसि उत अपिच पूर्व्यःमुख्योहोतादेवानामाह्वातापूर्ववद्धोतर्यवस्थायहौत्रस्यकर्मणःकर्तासिभवसि मानुषोहोताअमुख्यः तदपेक्षयास्यमुख्यत्वम् तथाप्रशास्ताप्रकर्षेणशास्तासर्वेषांशिक्षकोऽसि यद्वा होतर्यजपोतर्यजेत्यादिनाप्रैषेणशास्तीतिमित्रावरुणःप्रशास्ता पूर्ववत्तस्मिन्नवस्थाययागनिष्पादकोऽसि पोता यज्ञस्यपावयिताशोधयितासि यद्वा पोतृनामकस्यर्त्विजः पूर्ववदधिष्ठायागनिष्पादकोऽसि तथा जनुषाजन्मनास्वाभाव्येनपुरोहितः पुरस्तादागामिनिस्वर्गेहितः अनुकूलाचरणोऽसि यद्वा सर्वेषुकर्मसु पूर्वस्यांदिश्याहवनीयेस्थापितोऽसि अथवापुरोहितोब्रह्मा देवपुरोहितस्यबृहस्पतेः प्रतिनिधित्वात् तथाचमन्त्रान्तरम्—बृहस्पतिर्देवानांब्रह्माअहंमनुष्याणामिति । अतस्तस्मिन्ब्रह्मणिपूर्ववदवस्थायतद्रूपःसन्विश्वा सर्वाणि आर्त्विज्या ऋत्विजःकर्माण्याध्वर्यवादीनिविद्वान्जानंस्त्वं हेधीर मात्राग्ने पुष्यसि न्यूनाधिकभावराहित्येनसंपूर्णानिकरोषि अन्यत्समानम् ॥ जनुषा जनेरुसिः । पुरोहितः दधातेः कर्मणिनिष्ठा पूर्वाधरेत्यादिना असिप्रत्ययान्तःपुरस्शब्दोऽन्तोदात्तः तद्धितश्चासर्वविभक्तिरित्यव्ययसंज्ञायां पुरोव्ययमितिगतित्वाद्गतिरनन्तरइतिपूर्वपदप्रकृतिस्वरत्वम् । आर्त्विज्या ब्राह्मणादित्वात्ष्यञ् ञित्त्वादाद्युदात्तत्वम् ॥ ६ ॥

६. अग्नि, तुम अध्वर्यु, मुख्य होता, प्रशास्ता, पोता और जन्म से ही पुरोहित हो। ऋत्विक् के सारे कार्यों से तुम अवगत हो। इसलिए तुम यज्ञ सम्पूर्ण करो। अग्नि, तुम्हारे मित्र रहने पर हम हिंसित नहीं होंगे। सप्तमीमृचमाह—

योविश्वतःसुप्रतीकःसदृङ्ङसिदूरेचित्सन्तळिदिवातिरोचसे ।
राञ्याश्चिदन्धोअतिदेवपश्यस्यग्नेसख्येमारिषामावयंतव ॥७॥

यः । विश्वतः । सुऽप्रतीकः । सऽदृङ् । असि । दूरे । चित् । सन् । तळित्ऽइव । अति । रोचसे । राञ्याः । चित् । अन्धः । अति । देव । पश्यसि । । अग्ने । सख्ये । मा । रिषाम । वयम् । तव ॥ ७॥

हेअग्ने यस्त्वंसुप्रतीकः शोभनाङ्गःसन्विश्वतः सर्वस्मादपिसदृङ्ङसि अन्यूनःसदृङ्शोभवसि सत्वंदूरेचित्सन्दूरेऽपिवर्तमानःसन् तळिदिव अन्तिकनामैतत् अन्तिकेवर्तमानइव अतिरोचसे

१ त्वमिन्द्रियाधिष्ठातृत्वेनेतिवापाठः । २ तै०ब्रा० ३.७.६. ।

अतिशयेनदीप्यसे तदुक्तंयास्केन—दूरेऽपिसन्नन्तिकइवसंदृश्यसइति¹। रात्र्याश्चित् रात्रेरपि रा-त्रेःसंबन्धिनमन्धः बहुलमन्धकारमपि हेदेव द्योतमानाग्ने अतिपश्यसिअतीत्यप्रकाशसे अन्यत्पू-र्ववत्॥ सुप्रतीकः शोभनंप्रतीकोऽङ्गंयस्य क्त्वादयश्चेत्युत्तरपदाद्युदात्तत्वम्। सदृङ् समानान्य-योश्चेतिवक्तव्यमितिसमानोपपदाद्दृशेःक्विन् दृग्दृशवतुष्विति समानस्यसभावः दृक्स्ववःस्वतवसां छन्दसीतिनुम् संयोगान्तलोपः क्विन्प्रत्ययस्यकुरितिकुत्वं कृदुत्तरपदप्रकृतिस्वरत्वम्। रात्र्याः रात्रेश्चाजसाविति ङीप्॥ ७॥

७. अग्नि, तुम सुन्दर हो, तो भी सबके समान हो। तुम दूर-स्थित हो, तो भी पास ही दीप्यमान हो। अग्निदेव, तुम रात के अन्धकार को मर्दन करके प्रकाशित होते हो। अग्नि, तुम्हारे मित्र रहने पर हम हिंसित नहीं होंगे।

पूर्वोदेवाभवतुसुन्वतोरथोस्माकंशंसोअभ्यस्तुदूढ्यः।
तदाजानीतोतपुष्यतावचोग्नेसख्येमारिषामावयंतव॥८॥

पूर्वः। देवाः। भवतु। सुन्वतः। रथः। अस्माकम्। शंसः। अभि। अस्तु। दुःऽध्यः। तत्। आ। जानीत। उत। पुष्यत। वचः। अग्ने। सख्ये। मा। रिषाम। वयम्। तव॥ ८॥

हेदेवाः अग्न्यवयवभूताःसर्वेदेवाः सुन्वतः सोमाभिषवंकुर्वतोयजमानस्यरथः पूर्वःअन्ये-षामयजमानानांरथेभ्योमुख्योभवतु अपिचास्माकंशंसः शंसनीयंअभिशापरूपंपापं दूढ्यः दुर्धि-यः पापबुद्धीन् अस्मदनिष्टाचरणपरान्शत्रून् अभ्यस्तुअभिभवतु तान्बाधतां तदिदंमद्वाक्यं हेदे-वाः आजानीतआभिमुख्येनावगच्छत उत अपिच तद्वचोऽस्मदीयंवचनंतदर्थाचरणेनपुष्यतप्रव-र्धयत हेसर्वदेवात्मकाग्ने सख्येइत्यादिपूर्ववत्॥ सुन्वतः शतुरनुमइतिविभक्तेरुदात्तत्वम्। शंसः शंस्य-तेकीर्त्यतेइतिशंसोभिशापः कर्मणिघञ् ञित्त्वादाद्युदात्तत्वम्। दूढ्यः दुष्टंध्यायन्तीतिदुर्धियः ध्यै-चिन्तायामित्यस्मात्क्विप्चेतिक्विप् दृशिग्रहणानुवृत्तेः तस्यचविध्यन्तरोपसंग्रहार्थत्वात्संप्रसारणं पृषोदरादिषु ध्यैचेतिपाठाद्दुरोरेफस्योत्वं उत्तरपदादेष्टुत्वंच॥ ८॥

८. अग्नि के अङ्गभूत देव, सोम का अभिषव करनेवाले यजमान का रथ सबसे आगे करो। हमारा अभिशाप शत्रुओं को परास्त करे। हमारी यह स्तुति समझो और हमें प्रवृद्ध करो। अग्नि, तुम्हारे मित्र रहने पर हम हिंसित नहीं होंगे।

वधैर्दुःशंसाँअपदूढ्योजहिदूरेवायेअन्तिवाकेचिदत्रिणः।
अथायज्ञायगृणतेसुगंकृध्यग्नेसख्येमारिषामावयंतव॥९॥

¹ नि० ३. ११.।

वधैः । दुःऽशंसान् । अप । दुःऽध्यः । जहि । दूरे । वा । ये । अन्ति । वा । के । चित् । अत्रिणः । अथ । यज्ञाय । गृणते । सुऽगम् । कृधि । अग्ने । सख्ये । मा । रिषाम । वयम् । तव ॥ ९ ॥

हेअग्ने त्वंवधैः हननसाधनैरायुधैः दुःशंसान् दुःखेनकीर्तनीयान् दूढ्यःदुर्धियः पापबुद्धीन् अपजहि वधंमापय येकेचिद्येकेचनदूरेविप्रकृष्टदेशेवा अन्ति अन्तिके समीपदेशेवावर्तमानाः अत्रिणोचारोराक्षसादयोविद्यन्ते तान्दुर्धियोपजहीत्यर्थः अथानन्तरं यज्ञाययज्ञपतये गृणते त्वांस्तुवतेयजमानायसुगंशोभनंमार्गंकृधिकुरु अन्यत्पूर्ववत् ॥ वधैः हनश्चवधइतिहन्तेः करणेअप् वधादेशश्च सचादन्तोन्तोदात्तः तस्यातोलोपेसतिउदात्तनिवृत्तिस्वरेणप्रत्ययस्योदात्तत्वम् । दुःशंसान् ईषद्दुःसुष्वितिकर्मणिखल् लितीतिप्रत्ययात्पूर्वस्योदात्तत्वम् । जहि लोटिहिः हन्तेर्जइतिजादेशः तस्यासिद्धवदत्राभादित्यसिद्धत्वाद्धेर्लुगभावः । अन्ति अन्तिकस्यकादिलोपोबहुलमितिकलोपः । अत्रिणः अदेस्त्रिनिचेतित्रिनिप्रत्ययः इकारोनकारपरित्राणार्थः । गृणते शतुरनुमइति विभक्तेरुदात्तत्वम् । सुगं सुदुरोरधिकरणेइतिगमेर्डः । कृधि श्रुशृणुपृकृवृभ्यश्छन्दसिइति हेर्धिः बहुलंछन्दसीतिविकरणस्यलुक् ॥ ९ ॥

९. सांघातिक अस्त्र-द्वारा तुम दुष्टों और बुद्धि-विहीनों का विनाश करो। दूरवर्ती और निकटस्थ शत्रुओं का विनाश करो। अनन्तर अपने स्तुति-कर्त्ता यजमान के लिए सुगम मार्ग कर दो। अग्नि, तुम्हारे मित्र रहने पर हम हिंसित नहीं होंगे।

दशमीमृचमाह—

यदयुंक्थाअरुषारोहितारथेवातंजूतावृषभस्येवतेरवः ।
आदिन्वसिवनिनोधूमकेतुनाग्नेसख्येमारिषामावयंतव ॥ १० ॥ २१ ॥

यत् । अयुक्थाः । अरुषा । रोहिता । रथे । वातऽजूता । वृषभस्यऽइव । ते । रवः । आत् । इन्वसि । वनिनः । धूमऽकेतुना । अग्ने । सख्ये । मा रिषाम । वयम् । तव ॥ १० ॥ २१ ॥

हेअग्ने अरुषा रोचमानौ रोहिता लोहितवर्णौ रोहितइतिअग्नेरश्वस्याख्या रोहितोग्नेरितिदर्शनात् रोहितेनत्वाग्निर्देवतांगमयत्वितिमन्त्रवर्णाच्च । एतेवैदेवाश्वइतिहितत्रव्याख्यातम् वातजूतावातस्यवायोर्जूतंजवोवेगइववेगोययोस्तौ ईदृशावश्वौरथेयदा अयुक्थाः अयोजयः तदानीं वनानिदहतस्तेतव रवःशब्दोवृषभस्येव दृप्तस्यमहोक्षस्यशब्दइवगंभीरोभवति आदनन्तरंवनि-

१ तै० सं० १. ६. ४.

नोवनसंबद्धान् वृक्षान्धूमकेतुनाधूमःकेतुःप्रज्ञापकोयस्यतादृशेनरश्मिनाइन्वसि व्याप्नोषि अन्यत्पूर्ववत् ॥ अयुक्थाः युजिर्योगे लुङि झलोझलीतिसकारलोपः । अरुषेत्यादिषुद्विवचनेषु सुपांसुलुगित्याकारः । रवः रुशब्दे ऋदोरबितिभावेऽप् । इन्वसि इविव्याप्तौ भौवादिकः इदित्वान्नुम् ॥ १० ॥

१०. अग्नि, जिस समय तुम दीप्यमान, लोहितवर्ण और वायुगति दोनों घोड़ों को रथ में संयुक्त करते हो, उस समय तुम वृषभ की तरह शब्द करते हो और वन के सारे वृक्षों को धूमरूप केतु (पताका) द्वारा व्याप्त करते हो। अग्नि, तुम्हारे बन्धु होने पर हम हिंसित नहीं होंगे।

अधस्वनादुतबिभ्युःपतत्रिणोद्रप्सायत्तेयवसादोव्यस्थिरन् ।
सुगंतत्तेतावकेभ्योरथेभ्योऽग्नेसख्येमारिषामावयंतव ॥११॥

अध । स्वनात् । उत । बिभ्युः । पतत्रिणः । द्रप्साः । यत् । ते । यवसऽअदः । वि । अस्थिरन् । सुऽगम् । तत् । ते । तावकेभ्यः । रथेभ्यः । अग्ने । सख्ये । मा । रिषाम । वयम् । तव ॥ ११ ॥

हेअग्ने अध दग्धुंवनप्रवेशानन्तरं स्वनात्त्वदीयात्पूर्वोक्तगंभीरशब्दादुतशब्दोऽप्यर्थः पतत्रिणः पक्षिणोऽपिबिभ्युः बिभ्यतिभयंप्राप्नुवन्ति उत्पतनेनदेशान्तरंगन्तुंसमर्थाःपक्षिणोऽपि यदाभयंप्राप्नुवन्ति किमुवक्तव्यमन्येषांतत्रत्यानांवृकादीनांभीतिर्जायतइति अतस्त्वयिवनंप्रविशति सर्वेप्राणिनोभयंप्राप्नुवन्तीत्यर्थः तादृशस्यतेतवद्रप्साः ज्वालैकदेशाः यवसादः यवसानामरण्येवर्तमानानांतृणानामत्तारःसन्तोयद्यदाव्यस्थिरन् विविधमवतिष्ठन्ते तत्तदातेतवसर्वमरण्यं सुगंसुखेनगन्तुंशक्यं अतस्तावकेभ्यस्त्वदीयेभ्योरथेभ्यश्च तदरण्यंसुगंभवति पूर्वंप्रवृत्तैर्ज्वालाग्रैस्तृणादिषुदग्धेषुसत्सुत्वदीयारथाः प्रतिबन्धमन्तरेणपश्चाद्गच्छन्तीतिभावः अन्यत्समानम् ॥ बिभ्युः ञिभीभये छान्दसोलिट् एरनेकाचइतियण् । व्यस्थिरन् समवप्रविभ्यइतितिष्ठतेरात्मनेपदम् लुङिव्यत्ययेनझस्यरन् स्थाघ्वोरिच्चेतीत्वम् ह्रस्वादङ्गादितिसलोपः । तावकेभ्यः तवकममकावेकवचनेइतियुष्मदस्तवकादेशः ॥ ११ ॥

११. तुम्हारे शब्द सुनकर चिड़ियां भी उड़ती हैं। जिस समय तुम्हारी शिखायें तिनके जलाकर चारों दिशाओं में विस्तृत होती हैं, उस समय सारा वन तुम्हारे और तुम्हारे रथ के लिए सुगम हो जाता है। अग्नि, तुम्हारे मित्र होने पर हम हिंसित नहीं होंगे।

अयंमित्रस्यवरुणस्यधायसेवयातांमरुतांहेळोअद्भुतः ।
मृळासुनोभूत्वेषांमनःपुनरग्नेसख्येमारिषामावयंतव ॥१२॥

अयम् । मित्रस्य । वरुणस्य । धायसे । अवऽयाताम् । मरुताम् ।
हेळः । अद्भुतः । मृळ । सु । नः । भूतु । एषाम् । मनः । पुनः ।
अग्ने । सख्ये । मा । रिषाम । वयम् । तव ॥ १२ ॥

अयमग्नेःस्तोतामित्रस्य अहरभिमानिनोदेवस्य वरुणस्यरात्र्यभिमानिनश्च संबन्धिनेधायसेधारणाय अवस्थापनायभवतु मित्रावरुणाविममग्नेःस्तोतारंधारयतामित्यर्थः अवयातांअवस्तादृच्छतांस्वर्गलोकस्याधस्तादन्तरिक्षेवर्तमानानां मरुतांएतत्संज्ञानां देवानांहेळः क्रोधः अद्भुतः महान्भवति अद्भुतइत्येतन्महन्नाम तस्मात्क्रोधादिममग्नेःस्तोतारंमित्रावरुणौरक्षतामितिशेषः अपिच नोऽस्मान् हेअग्ने सुमृळसुष्ठुसुखय सुखय एषांमरुतांमनश्च पुनर्भूतु पुनरपिप्रसन्नंभवतु अन्यत्समानम् ॥धायसे दधातेर्हिधाञ्ञ्यश्छन्दसीतिभावेसुन् णिदित्यनुवृत्तेरातोयुक्चिण्कृतोरिति युक् । अवयातां यामापणे अस्मादवपूर्वाल्लटःशतृ शतुरनुमइतिविभक्तेरुदात्तत्वम् । मृळ मृडसुखने छन्दस्युभयथेतिशपआर्धधातुकत्वात् णेरनिटीतिणिलोपः द्व्यचोवस्तिङइतिसंहितायांदीर्घत्वम् । भूतु बहुलंछन्दसीतिशपोलुक् ॥ १२ ॥

१२. इस स्तोता को मित्र और वरुण धारण करें। अन्तरिक्षचारी मरुतों को क्रोध अत्यधिक होता है। हमें सुखी करो और इन महान् मरुतों का मन प्रसन्न हो। अग्नि, तुम्हारे बन्धु रहने पर हम हिंसित नहीं होंगे।

त्रयोदशीमृचमाह—

देवोदेवानामसिमित्रोअद्भुतोवसुर्वसूनामसिचारुरध्वरे ।
शर्मन्त्स्यामतवसप्रथस्तमेग्नेसख्येमारिषामावयंतव ॥१३॥

देवः । देवानाम् । असि । मित्रः । अद्भुतः । वसुः । वसूनाम् । असि ।
चारुः । अध्वरे । शर्मन् । स्याम । तव । सप्रथःऽतमे । अग्ने । सख्ये ।
मा । रिषाम । वयम् । तव ॥ १३ ॥

हेअग्ने देवोद्योतमानस्त्वं देवानांसर्वेषां अद्भुतोमहान्मित्रोऽसि मेढःसखाभवसि तथाचारुः शोभनस्त्वं अध्वरेयज्ञे वसूनांसर्वेषांधनानांवसुरसि निवासयिताभवसि अतोऽस्माकंवसूनिदेही-

त्यर्थः किञ्च समथस्तमेसर्वतःपृथुतमेअतिशयेनविस्तीर्णे तव त्वत्संबन्धिनिशर्मन्शर्मणियज्ञगृहेस्यामवर्तमानाभवेम अन्यत्पूर्ववत् ॥ शर्मन् सुपांसुलुगितिसप्तम्यालुक् ॥ १३ ॥

१३. द्युतिमान् अग्नि, तुम सारे देवों के परम बन्धु हो। तुम सुशोभन और यज्ञ के सारे धनों के निवास-स्थान हो। तुम्हारे विस्तृत यज्ञ-गृह में हम अवस्थान करें। अग्नि, तुम्हारे बन्धु रहने पर हम हिंसित नहीं होंगे।

तत्तेभद्रंयत्समिद्धःस्वेदमेसोमाहुतोजरसेमृळयत्तमः ।
दधासिरत्नंद्रविणंचदाशुषेग्नेसख्येमारिषामावयंतव ॥१४॥

तत् । ते । भद्रम् । यत् । सम्ऽइद्धः । स्वे । दमे । सोमऽआहुतः । जरसे । मृळयत्ऽतमः । दधासि । रत्नम् । द्रविणम् । च । दाशुषे । अग्ने । सख्ये । मा । रिषाम । वयम् । तव ॥ १४ ॥

हेअग्ने तेत्वत्संबन्धितत्खलुभद्रंभजनीयंप्रशस्तमित्यर्थः किंपुनस्तत् स्वेदमेस्वकीयेउत्तरवेदिलक्षणेनिवासस्थाने तस्यैषस्वोलोकोयदुत्तरवेदीनाभिरितिश्रुतेः । तस्यामुत्तरवेद्यांसमिद्धः सम्यगिद्धःप्रज्वलितः सोमाहुतोहुतेनसोमरसेनसंतर्पितःसन् जरसेऋत्विग्भिःस्तूयसे इतियदस्ति तद्भद्रमित्यर्थः एवंप्रशस्तस्त्वंमृळयत्तमः अतिशयेनास्माकंसुखयिताभूत्वा रत्नंरमणीयंकर्मफलं वाद्रविणंधनंच दाशुषेहविर्दत्तवतेयजमानायदधासिप्रयच्छसि अन्यत्समानम् ॥ समिद्धः त्रिइन्धीदीप्तौ कर्मणिनिष्ठा श्वीदितोनिष्ठायामितीट्प्रतिषेधः गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम् । सोमाहुतः सोमेनाहुतः तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरत्वम् । जरसे जरतिःस्तुतिकर्मा व्यत्ययेन कर्मणिकर्तृप्रत्ययः यद्वृत्तयोगादनिघातः । दधासि अनुदात्तेचेत्यभ्यस्तस्याद्युदात्तत्वम् ॥ १४ ॥

१४. अपने स्थान पर प्रज्वलित सोमरस-द्वारा आहूत होकर जिस समय तुम पूजित होते हो, उस समय तुम सुखकर उपभोग करते हो। तुम हमारे लिए सुखकर होकर हव्यदाता को रमणीय फल और धन दान करो। अग्नि, तुम्हारे बन्धु रहने पर हम हिंसित नहीं होंगे।

पञ्चदशीमृचमाह—

यस्मैत्वंसुद्रविणोददाशोनागास्त्वमदितेसर्वताता ।
यंभद्रेणशवसाचोदयासिप्रजावताराधसातेस्याम ॥१५॥

---

१ ऐ० ब्रा० १.२८. । २ नि० १०.८. ।

यस्मै । त्वम् । सुऽद्रविणः । ददाशः । अनागाःऽत्वम् । अदिते ।
सर्वऽताता । यम् । भद्रेण । शवसा । चोदयासि । प्रजाऽवता ।
राधसा । ते । स्याम ॥ १५ ॥

हेसुद्रविणः शोभनधन अदितेअखण्डनीयाग्ने सर्वतातासर्वासुकर्मततिषु यद्वा सर्वेषुयज्ञेषुवर्तमानाय यस्मैयजमानाय अनागास्त्वंअपापत्वंपापराहित्येनकर्माहतांत्वंददाशः प्रयच्छसि सयजमानःसमृद्धोभवति यंचयजमानं भद्रेणभजनीयेनकल्याणेनशवसाबलेनचोदयासिसंयोजयसि सोऽपिसमृद्धोभवति वयंचस्तोतारः प्रजावताप्रजाभिःपुत्रपौत्रैर्युक्तेन ते राधसा त्वयादत्तेनधनेनयुक्ताःस्याम भवेम ॥ सुद्रविणः शोभनानिद्रविणानिधनानियस्य द्रुगतौ द्रुदक्षिभ्यामिनन् द्रविणशब्दस्यान्तेसकारोपजनश्छान्दसः । ददाशः दाश्रृदाने लेटचडागमः बहुलंछन्दसीतिशपःश्लुः अभ्यस्तानामादिरित्याद्युदात्तत्वम् । सर्वताता सर्वदेवात्तातिलितिस्वार्थेतातिल्प्रत्ययः यास्कपक्षेतु सर्वास्ततयोयेषुयागेषुइति बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् वर्णव्यापत्त्या आत्वं उभयत्रापिसुपांसुलुगितिसप्तम्याडादेशः । चोदयासि चुदप्रेरणे लेटचाडागमः ॥ १५ ॥

१५. शोभन धन से युक्त और अखण्डनीय अग्नि, सब यज्ञों में वर्त्तमान जिस यजमान को तुम पाप से उद्धार करते और कल्याणवाही बल प्रदान करते हो, वह समृद्ध होता है। हम भी तुम्हारे स्तोता हैं। हम भी पुत्र-पौत्रादि के साथ तुम्हारे धन से सम्पन्न हों।

षोडशीमृचमाह—

सत्वमग्नेसौभगत्वस्यविद्वानस्माकमायुःप्रतिरेहदेव ।
तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीउतद्यौः ॥१६॥३२॥

सः । त्वम् । अग्ने । सौभगऽत्वस्य । विद्वान् । अस्माकम् । आयुः ।
प्र । तिर । इह । देव । तत् । नः । मित्रः । वरुणः । ममहन्ताम् ।
अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥ १६ ॥ ३२ ॥

हेदेव दानादिगुणयुक्ताग्ने सपूर्वोक्तगुणविशिष्टस्त्वं सौभगत्वस्यसुभगत्वंसौभाग्यंविद्वान्जानन् इहास्मिन्कर्मणि अस्माकमायुःप्रतिर प्रवर्धय प्रपूर्वस्तिरतिर्वर्धनार्थः त्वयाप्रवर्धितंनोऽस्माकं यदायुः मित्रादयःषड्देवताः ममहन्तांपूजयन्तां रक्षन्त्वित्यर्थः मित्रःप्रमीतेस्त्रातावरुणः अवशिष्टानांनिवारयिता अदितिःअदीना अखण्डनीयावादेवमाता सिन्धुः स्यन्दनशीलोदकात्मादेवता पृथिवीम-

थिवाभूदेवता उतेतिसमुच्चये द्यौःप्रकाशमानाद्युलोकात्मादेवता एताश्चसर्वाअग्निनाप्रवर्धितमायुर्म-महन्वामितिपूर्वत्रान्वयः ॥ सौभगत्वस्य सुभगस्यभावःसौभगं सुभगान्मन्त्रेइतिउद्गात्रादिषुपाठाव् भावे अञ् पुनरपिभावप्रत्ययोर्त्पत्तिश्छान्दसी। ममहन्तां महपूजायां भौवादिकः लोटि बहुलं छन्दसीतिशपःश्लुः तुजादित्वादभ्यासस्यदीर्घत्वम् ॥ १६ ॥

१६. अग्निदेव, तुम सौभाग्य जानते हो। इस कार्य में तुम हमारी आयु बढ़ाओ। मित्र, वरुण, अदिति, सिन्धु, पृथ्वी और आकाश हमारी उस आयु की रक्षा करें।

॥ इतिप्रथमस्यषष्ठेद्वात्रिंशोवर्गः ॥ ३२ ॥

वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन्। पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणाचार्येणविरचितेमाधवीयेवेदार्थप्रकाशेऋक्संहिताभाष्येप्रथमाष्टकेषष्ठोध्यायः समाप्तः ॥ ६ ॥

॥ श्रीगणेशायनमः ॥

यस्यनिःश्वसितंवेदायोवेदेभ्योखिलंजगत्। निर्ममेतमहंवन्देविद्यातीर्थमहेश्वरम् ॥ १ ॥

प्रथमेमण्डलेपञ्चदशेनुवाकेप्रथमंसूक्तंव्याख्यातम् द्वेविरूपइत्येकादशर्चंद्वितीयंसूक्तम् तत्रानुक्रम्यते–द्वेएकादशौषसायवाग्नेयेइति ऋषिश्चान्यस्मादितिपरिभाषयाकुत्सस्यानुवृत्तेराङ्गिरसःकुत्सऋषिः अनादेशपरिभाषयात्रिष्टुप्छन्दः उषसिप्रातःकालेहविर्भाग्योग्निरस्तिसदेवता यद्वा आग्नेयंतदितिपूर्वत्रोक्तत्वात् तुह्यादिपरिभाषयाइदमादीनिपञ्चसूक्तानिकेवलाग्निदेवत्यानि अतोस्यसूक्तस्यऔषसगुणविशिष्टोग्निः शुद्धोग्निर्वादेवतेतिवाशब्दार्थः प्रातरनुवाकस्याग्नेयेक्रतौत्रैष्टुभेछन्दसि इदमादिकेद्वेसूक्ते तथाचसूत्रितंअथैतस्याइतिखण्डे–द्वेविरूपेइतिसूक्तेइति। आश्विनशस्त्रेचैवेमातरनुवाकन्यायेनतस्यैवसमाम्नायस्येत्यतिदिष्टत्वात्।

तत्रप्रथमामृचमाह–

ॐम् द्वेविरू॑पेचरत॒ःस्वर्थे॑अ॒न्यान्या॑व॒त्समुप॑धापयेते ।
हरि॑र॒न्यस्यां॒भव॑तिस्व॒धावा॑ञ्छु॒क्रोअ॒न्यस्यां॑ददृशेसु॒वर्चाः॑ ॥१॥

द्वे इति॑। विरू॑पे॒ इति॒ विऽरू॑पे। च॒रत॑ः। स्व॒र्थे इति॑ सुऽअ॒र्थे॑।
अ॒न्याऽअ॑न्या। व॒त्सम्। उप॑। धा॒प॒ये॒ते॒ इति॑। हरि॑ः। अ॒न्यस्या॑म्।
भव॑ति। स्व॒धाऽवा॑न्। शु॒क्रः। अ॒न्यस्या॑म्। द॒दृ॒शे॒। सु॒ऽवर्चा॑ः ॥१॥

स्वर्थेस्वरणेशोभनगमनागमने यद्वा अर्थःप्रयोजनंशोभनप्रयोजनोपेते विरूपेविषमरूपे शुक्लकृष्णतयानानारूपेद्वेअहोरात्रेचरतः पुनःपुनःपर्यावर्तेते तेचाहोरात्रेअग्नेःसूर्यस्यचजनन्यौतत्ररात्रेःपुत्रःसूर्यःसहिगर्भवद्रात्रावन्तर्हितःसन्तस्याश्चरमभागादुत्पद्यते अह्नःपुत्रोग्निः सहितत्रविद्यमानोपिप्रकाशराहित्येनासत्कल्पःसन्तस्मादह्नःसकाशान्निर्मुक्तःप्रकाशमानंस्वात्मानंलभते अनयोरेतयोःपुत्रत्वंचतैत्तिरीयैराम्नायते– तयोरेतौवत्सौ अग्निश्चादित्यश्च रात्रेर्वत्सःश्वेतआदित्यः अह्नोग्निस्ताम्रोरुणइति[1]। तेचाहोरात्रेवत्संस्वंस्वंपुत्रंअन्यान्यापरस्परव्यतिहारेणोपधापयेते स्वकीयंरसंपाययतः यद्वाऽन्याकर्तव्यंस्वपुत्रस्यादित्यस्यरसस्यपायनंतदहःकरोति यदह्नाकर्तव्यं

---

१ तै० आ० प्रथमप्रपाठके.

स्वपुत्रस्याग्नेः रसस्यपायनंतद्वाविःकरोति एतच्चसायंप्रातःकालीनाहुत्यभिप्रायम् श्रूयतेच—तस्मा-
अग्नयेसायंहूयतेसूर्यायप्रातरिति[1]। यस्मादेवंतस्मादन्यस्यांस्वजनन्याअन्यस्यामहरात्मिकायां
अग्नेर्जनन्यांहरिःरसहरणशीलआदित्यःस्वधावानन्नहविर्लक्षणान्नवान्भवति शुक्रःनिर्मलदीप्तिरग्निः
स्वजनन्याअन्यस्यांरात्र्यामादित्यस्यजनन्यांसुवर्चाःशोभनदीप्तियुक्तःसन्ददृशेदृश्यते॥स्वर्थे ऋग-
तौ उषिकुषिगार्तिभ्यस्थनितिभावेकर्मणिवाथन्प्रत्ययः नित्त्वादाद्युदात्तत्वम् शोभनोर्थोययोस्ते आ-
द्युदात्तंद्व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वम्। अन्यान्या कर्मव्यतिहारेसर्वनाम्नोद्वेभवतइतिवक्तव्यं स-
मासवच्चबहुलमितिद्विर्भावः बहुलग्रहणात्समासवद्भावाभावेतस्यपरमाम्रेडितमितिपरस्यांम्रेडितसं-
ज्ञायामनुदात्तंचेत्याम्रेडितानुदात्तत्वम्। धापयेते धेट्पाने आदेचइत्यात्वम् ततोहेतुमतिणिच् अ-
र्तिह्रीत्यादिनाधातोःपुगागमः तत्रहि लक्षणप्रतिपदोक्तपरिभाषानास्तीतिज्ञापितम् शाच्छासाह्वा-
व्येतिकृतात्वानांनिर्देशेन सहिपुक्प्राप्तिख्यापनार्थः यदितत्रलक्षणप्रतिपदोक्तपरिभाषयापुक्नप्रा-
प्नोतिसोनर्थकःस्यात् तस्माद्ध्यापयतीत्यादाविवधापयेतेइत्यत्रापिपुगागमःसिद्धः निगरणचल-
नार्थेभ्यश्चेतिप्राप्तस्यपरस्मैपदस्य पादिषुधेटउपसंख्यानमितिप्रतिषेधादात्मनेपदम्। हरिः हृञ्हरणे
औणादिकइन्प्रत्ययः ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वम्। भवति एकान्याभ्यांसमर्थाभ्यामिति
प्रथमायास्तिङ्विभक्तेर्निघातप्रतिषेधः। ददृशे दृशेः छन्दसिलुङ्लङ्लिटइतिवर्तमानेलिट्। सुव-
र्चाः शोभनंवर्चस्तेजोयस्य सोर्मनसीअलोमोषसीइत्युत्तरपदाद्युदात्तत्वम् ॥१॥

१. विभिन्न रूपों से संयुक्त दोनों समय (दिन और रात), शोभन प्रयोजन के कारण, विचरण करते हैं। दोनों, दोनों के वत्स की रक्षा करते हैं। एक (रात्रि) के पास से सूर्य अन्न प्राप्त करते और दूसरे (दिन) के पास से शोभन दीप्ति से युक्त होकर प्रकाशित होते हैं।

दशेमंत्वष्टुर्जनयन्तगर्भमतन्द्रासोयुवतयोविभृत्रम्।
तिग्मानीकंस्वयशसंजनेषुविरोचमानंपरिषींनयन्ति ॥२॥

दश। इमम्। त्वष्टुः। जनयन्त। गर्भम्। अतन्द्रासः। युवतयः। विऽभृत्रम्। तिग्मऽअनीकम्। स्वऽयशसम्। जनेषु। विऽरोचमानम्। परि। सीम्। नयन्ति॥ २॥

अतन्द्रासः स्वकार्येजगतः पोषणेअनलसाः आलस्यरहिताः जागरूकाइत्यर्थः युवतयः
नित्यतरुण्यः अजरामरणाइत्यर्थः एवम्भूतादश प्राच्याद्यादशसङ्ख्याकादिशः गर्भमि-
वेषुगर्भरूपेणान्तर्वर्तमानं त्वष्टुर्दीप्तान्मध्यमाद्वायोः सकाशाज्जनयन्त वैद्युतमग्निंउत्पादयन्ति यद्वा

[1] तै० ब्रा० २.१.२।

दशसङ्ख्याकाअङ्गुलयः त्वष्टुर्दीप्तस्यवायोः गर्भंस्वकारणभूतेवायौगर्भरूपेणवर्तमानं अग्नेर्हिवायुःकारणं वायोरग्निरितिश्रुतेः। एवंभूतमिममग्निंअरण्योःसकाशाज्जनयन्तउत्पादयन्ति कीदृश्योङ्गुलयःअतन्द्रासः पुनःपुनःकर्मकरणेआलस्यरहिताः युवतयः अपृथक्कृत्यवर्तमानाः एकस्मिन्पाणौसंहत्यावस्थिताइत्यर्थः कीदृशमग्निं विभृत्रंसर्वेषुभूतेषुविहृतंजाठररूपेणविभज्यवर्तमानमित्यर्थः तिग्मानीकं तीक्ष्णमुखंतीक्ष्णतेजसं अतएवहिवैद्युताग्निदर्शनेदृष्टिःप्रतिहन्यते स्वयशसंस्वायत्तयशस्कं अतिशयेनयशस्विनमित्यर्थः जनेषुजनपदेषुसर्वेषुदेशेषुविरोचमानंविशेषेणदीप्यमानं बहूनामुपकारकमित्यर्थः एवंभूतंसीं एनमग्निंपरिपरितः सर्वतोनयन्ति स्वस्वोपकारायसर्वेजनाः स्वकीयंदेशंमापयन्ति ॥ त्वष्टुः त्विषदीप्तौ नप्तृनेष्टृत्वष्टृक्षत्तृइत्यादिनाउणादिषुतृजन्तोनिपातितः अतोनित्त्वादाद्युदात्तत्वम्। विभृत्रं हृञ्हरणे अस्मात्कर्मणिनिष्ठा छान्दसोरेफोपजनःगतिरनन्तरतिगतेःप्रकृतिस्वरत्वम् हृग्रहोर्भइतिभत्वम् यद्वा औणादिकःक्रप्रत्ययः। तिग्मानीकं तिजनिशाने युजिरुजितिजांकुत्वंचेतिमक् अनप्राणने अनिहृषिभ्यांचेतिकीकन् तिग्मंतीक्ष्णमनीकंयस्य बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्। परिषीं पूर्वपदादितिषत्वम् ॥ २ ॥

२. दसों अँगुलियाँ इकट्ठी होकर अनवरत काष्ठ-घर्षण करके वायु के गर्भ-स्वरूप और सब भूतों में वर्त्तमान अग्नि को उत्पन्न करती हैं। यह अग्नि तीक्ष्ण-तेजा, यशस्वी और सारे लोक में दीप्यमान हैं। इन अग्नि को सारे स्थानों में ले जाया जाता है।

त्रीणिजानापरिभूषन्त्यस्यसमुद्रएकंदिव्येकमप्सु।
पूर्वामनुप्रदिशंपार्थिवानामृतून्प्रशासद्विदधावनुष्ठु ॥३॥

त्रीणि। जाना। परि। भूषन्ति। अस्य। समुद्रे। एकम्। दिवि। एकम्। अप्ऽसु। पूर्वाम्। अनु। प्र। दिशम्। पार्थिवानाम्। ऋतून्। प्रऽशासत्। वि। दधौ। अनुष्ठु ॥ ३ ॥

अस्याग्नेस्त्रीणित्रिसंख्याकानि जाना जननानिजन्मानिपरिभूषन्ति परितःसर्वतोलंकुर्वन्ति यद्वा परीत्येषसमित्येतस्यस्थाने अस्याग्नेस्त्रीणिजन्मानिसंभवन्ति समुद्रे अब्धौवडवानलरूपेणैकंजन्म दिविद्युलोकेआदित्यात्मनाएकं अप्सुआपइत्यन्तरिक्षनाम अन्तरिक्षेवैद्युताग्निरूपेणैकं एवमग्निस्त्रिधात्मानंविभज्यत्रिषुस्थानेषुवर्ततइत्यर्थः तत्रादित्यात्मनावर्तमानःसोग्निर्ऋतून्वसन्ताद्यान्षड्तून्प्रशासत्प्रकर्षेणविभक्ततयाज्ञापयन् पार्थिवानांपृथिव्याःसम्बन्धिनां सर्वेषांप्राणिनांपूर्वांप्राचींप्रदिशंप्रकृष्टांककुभं अनुष्ठु इत्येतदव्ययंसम्यक्शब्दसमानार्थं सुष्ठुइतिवत्था सम्यगनुक्रमेणविदधौकृतवान् स्वतोभेदरहितयोरखण्डयोर्दिक्कालयोः प्राच्यादिभेदोवसन्ता-

दिभेदश्चसूर्यगत्यानिष्पाद्यते अतःसूर्यएवतयोःकर्तेत्यर्थः ॥ जाना जनीप्रादुर्भावे भावेघञ् कर्षात्वतइत्यन्तोदात्तत्वेप्राप्ते वृषादेराकृतिगणत्वादाद्युदात्तत्वम् शेश्छन्दसिबहुलमितिशेर्लोपः। भूषन्ति भूषअलंकारे भौवादिकः यद्वा भवतेर्लेटिसिब्बहुलंलेटीतिसिप् आगमानुशासनस्यानित्यत्वादिडभावः संज्ञापूर्वकस्यविधेरनित्यत्वाद्गुणाभावश्च। दिवि अप्सु उभयत्र ऊडिदमिति विभक्तेरुदात्तत्वम्। पार्थिवानां पृथिव्याञाञावितिप्राग्दीव्यतीयोञ्प्रत्ययः। प्रशासत् शासुअनुशिष्टौ अस्माल्लटःशतृ जक्षित्यादयःषडितिअभ्यस्तसंज्ञायां नाभ्यस्ताच्छतुरितिनुम्प्रतिषेधः कृदुत्तरपदप्रकृतिस्वरत्वम् । अनुष्ठु अपदुःसुषुस्थइतिविधीयमानःकुप्रत्ययोबहुलवचनात्तिष्ठतेरनुपूर्वादपिभवति ॥ ३ ॥

३. इन अग्नि के तीन जन्म-स्थान हैं—(१) समुद्र, (२) आकाश और (३) अन्तरिक्ष। अग्नि ने (सूर्य-रूप से) ऋतुओं का विभाग करके पृथिवी के सारे प्राणियों के हित के लिए पूर्व दिशा का यथाक्रम निष्पादन किया है अर्थात् सूर्य-काल (ऋतु) और दिक्—दोनों को बनाया है।

क इ॒मं वो॑ नि॒ण्यमा चि॑केत व॒त्सो मा॒तॄर्ज॑नयत स्व॒धाभिः॑ ।
ब॒ह्वी॒नां गर्भो॑ अ॒पसा॑मु॒पस्था॑न्म॒हान्क॒विर्निश्च॑रति स्व॒धावा॑न् ॥४॥

कः । इ॒मम् । वः॒ । नि॒ण्यम् । आ । चि॒के॒त । व॒त्सः । मा॒तॄः । ज॒न॒य॒त॒ । स्व॒धाभिः॑ । ब॒ह्वी॒नाम् । गर्भः॑ । अ॒प॒साम् । उ॒पऽस्था॑त् । म॒हान् । क॒विः । निः । च॒र॒ति॒ । स्व॒धाऽवा॑न् ॥ ४ ॥

हेऋत्विग्यजमानाः निण्यं निर्णीतांतर्हितनामैतत् अबादिषुगर्भरूपेणान्तर्हितं तथाचमन्त्रान्तरम्—गर्भोयोअपांगर्भोवनानांगर्भश्चस्थातांगर्भश्चरथामिति[1]। एवंभूतमिममग्निंवोयुष्माकंमध्येकआचिकेतकोजानाति नकोपीत्यर्थः सोयमग्निर्वत्सःमेघस्थानामपांवैद्युताग्निरूपेणपुत्रस्थानीयःसन्मातॄःतस्यमातृस्थानीयानिवृष्ट्युदकानिस्वधाभिर्हविर्लक्षणैरन्नैःजनयतउत्पादयति तथाचस्मर्यते—अग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठते आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइति। अपिच बह्वीनांमेघस्थानामपांगर्भःवैद्युतरूपेणगर्भस्थानीयः सोग्निःअपसामुपस्थात्समुद्रान्निश्चरति औषसाग्निरूपेणादित्यःसन्निर्गच्छति कीदृशः महान् तेजसाप्रौढः कविःक्रान्तदर्शी स्वधावान्हविर्लक्षणान्नवान् एकएवाग्निर्होमनिष्पादकलक्षणेनपार्थिवरूपेणवैद्युतात्मनाऔषसरूपेणादित्यात्मनाचविभज्यवर्ततइत्यर्थः॥ चिकेत कितज्ञाने छान्दसोलिट्। जनयत जनीपृ्ऋसुरञ्जोमन्ताश्चेतिमित्त्वान्मितांह्रस्वइतिह्रस्वत्वम् पूर्ववच्छान्दसोलङ्। बह्वीनां नित्यंछन्दसी

[1] ऋ० सं० १. ५. १४.

तिबहुशब्दावङीप् ङ्याच्छन्दसिबहुलमितिनामउदात्तत्वम् । अपसां आप्नृव्याप्तौ आपःकर्माख्या- यांह्रस्वश्चनुट्चवेतिबहुलवचनादकर्माख्यायामपिआप्नोतेरसिप्रत्ययोह्रस्वश्च । उपस्थात् उपति- ष्ठन्त्यांपोन्नेत्युपस्थः आतश्चोपसर्गेइतिकृत्यल्युटोबहुलमितिबहुलवचनादधिकरणेकप्रत्ययः मरु- द्वृधादित्वात्पूर्वपदान्तोदात्तत्वम् ॥ ४ ॥

४. जल, वन आदि में अन्तर्हित अग्नि को तुममें से कौन जानता है? पुत्र होकर भी विद्युद्रूप अग्नि अपनी माताओं (जल-रूपिणी) को हव्य-द्वारा जन्म दान करते हैं। महान् मेधावी और हव्य-युक्त अग्नि अनेक जलों के गर्भ (सन्तान)-रूप हैं। सूर्य-रूप अग्नि समुद्र से निकलते हैं।

आविष्ट्यो॑वर्धते॒चारु॑रासु॒जि॒ह्माना॑मू॒र्ध्वः स्वय॑शाउ॒पस्थे॑ ।
उ॒भेत्वष्टु॑र्बिभ्यतु॒र्जाय॑मानात्प्रती॒चीसिं॒हंप्रति॑जोषयेते ॥५॥१॥

आ॒विः॒ऽत्यः॑ । व॒र्धते॒ । चारुः॑ । आ॒सु॒ । जि॒ह्माना॑म् । ऊ॒र्ध्वः॑ । स्वऽय॑शाः । उ॒प॒ऽस्थे॑ । उ॒भे इति॑ । त्वष्टुः॑ । बि॒भ्य॒तुः॒ । जाय॑मानात् । प्र॒ती॒ची इति॑ । सिं॒हम् । प्रति॑ । जो॒ष॒ये॒ते॒ इति॑ ॥ ५ ॥ १ ॥

आसुमेघस्थास्वप्सु वैद्युतात्मनावर्तमानोग्निः चारुःशोभनदीप्तिःसन् आविष्ट्योवर्धतेआ- विर्भूतः प्रकाशमानोवृद्धिंप्राप्नोति किंकुर्वन् जिह्मानांकुटिलानांमेघेषुतिर्यगवस्थितानांवासामपामु- पस्थेउत्सङ्गेस्वयशाः स्वायत्तयशस्कोग्निः ऊर्ध्वः ऊर्ध्वज्वलनःसन् अकारणास्वप्सुतिर्यगवस्थि- तास्वपिस्वयमूर्ध्वज्वलन्नित्यर्थः तदुक्तंवैशेषिकैः—अग्नेरूर्ध्वज्वलनंवायोस्तिर्यक्पवनंअणुमनसो- राद्यंकर्मैतान्यदृष्टकारितानीति । अपिच उभेद्यावापृथिव्यौत्वष्टुर्दीप्ताज्जायमानादुत्पद्यमानाच्चस्माद- ग्नेर्बिभ्यतुः भयंमापतुः तदनन्तरंउतपन्नंसिंहंसहनशीलंअभिभवनशीलंतमग्निंप्रतीची प्रत्यञ्चन्त्यौ प्रतिगच्छन्त्यौ आभिमुख्येनप्राप्नुवन्त्यौप्रतिजोषयेतेसेवेते यास्कस्त्वाह—आविरावेदनात्तत्योव- र्धतेचारुरासुचारुचरतेर्जिह्मंजिहीतेरूर्ध्वंउच्छ्रितोभवतिस्वयशाआत्मयशाउपस्थउपस्थानेउभे त्वष्टुर्बिभ्यतुर्जायमानात्प्रतीचीसिंहंप्रतिजोषयेतेद्यावापृथिव्याववितिवाहोरात्रेइतिवारणीइतिवा- पिचैनेप्रत्युकेसिंहंसहनंप्रत्यासेवेतेइति[1] ॥ आविष्ट्यः आविःशब्दात् छन्दसीतिशैषिकस्त्यप् ह्रस्वात्तादौतद्धितइतिषत्वम् । आसु इदमोन्वादेशेशत्यशादेशोनुदात्तः विभक्तिश्चसुत्वादनुदात्तेति सर्वानुदात्तत्वम् नचोडिदमितिविभक्तेरुदात्तत्वंशङ्कनीयम् अन्तोदात्तादिदम्शब्दाद्धितद्विधीयते । प्रतीची प्रतिपूर्वादञ्चतेर्ऋत्विगित्यादिनाक्विन् अनिदितामितिनलोपः अञ्चतेश्चोपसंख्यानमितिङी-

---

1 नि० ८. १५.

प् अचइत्यकारलोपेचाविति दीत्वर्म् उदात्तनिवृत्तिस्वरेणङीपउदात्तत्वम् वाछन्दसीतिपूर्वसवर्ण-दीर्घः। जोषयेते जुषीप्रीतिसेवनयोः स्वार्थेणिच् ॥ ५ ॥

५. कुटिल (मेघ-जल के) पार्श्ववर्ती यशस्वी अग्नि ऊपर जलकर, शोभन दीप्ति के साथ, प्रकाशित होकर बढ़ते हैं। अग्नि के दीप्त या त्वष्टा के साथ उत्पन्न होने पर उभय (काष्ठ) भीत होते और सिंह या सहनशील के सामने आकर उसकी सेवा करते हैं।

उभेभद्रेजोषयेतेनमेनेगावोनवाश्राउपतस्थुरेवैः।
सदक्षाणांदक्षपतिर्बभूवाञ्जन्तियंदक्षिणतोहविर्भिः ॥६॥

उभे इति। भद्रे इति। जोषयेते इति। न। मेने इति। गावः। न। वाश्राः। उप। तस्थुः। एवैः। सः। दक्षाणाम्। दक्षऽपतिः। बभूव। अञ्जन्ति। यम्। दक्षिणतः। हविःऽभिः ॥ ६ ॥

उभेअहश्चरात्रिश्च यद्वा द्यावापृथिव्यौ अरणीवा भद्रेभजनीयेशोभनांग्यौमेनेस्त्रियौजोषये-तेन सेवेतेइव यथाशोभनेस्त्रियौचमरहस्तेराजानंउभयतःसेवेते एवंद्यावापृथिव्यौएनमग्निंउभ-यतःसेवेतेइत्यर्थः अपिच वाश्राः हंभारवंकुर्वन्त्यः गावोन गावोयथा एवैः स्वकीयै-श्चरित्रैःआदरातिशयेनस्वकीयान्वत्सानुपतस्थुः संगच्छन्ते तथेममग्निंद्यावापृथिव्यावुपस्थिते भवतः पूर्वंसेवनमात्रमुक्तं इदानींपुनः गोनिदर्शनेनतत्रैवादरातिशयोद्योत्यते अतःसोग्निर्द-क्षाणांसर्वेषांबलानांदक्षपतिर्बभूवआसीत् बलानांमध्येयदतिशयितंबलंतस्याधिपतिर्बभूवेत्यर्थः यमग्निंदक्षिणतः आहवनीयस्यदक्षिणभागेवस्थिताऋत्विजः हविर्भिश्चरुपुरोडाशादिभिः अञ्जन्ति आर्द्रीकुर्वन्तितर्पयन्ति सोग्निरितिपूर्वेणान्वयः॥ वाश्राः वाश्रृशब्दे स्फायितञ्चीत्या-दिनारक्। एवैः इणूगतौ इणूशीङ्भ्यांवन् इतिभावेवन्प्रत्ययः ॥ ६ ॥

६. उभय (काष्ठ या दिवारात्रि) सुन्दरी स्त्री की तरह उन (अग्नि) की सेवा करते और बोलती हुई गौ की तरह, पास में रहकर, उनको वत्स की तरह पालित करते हैं। दक्षिण भाग में अव-स्थित ऋत्विक् लोग हव्य-द्वारा जिस अग्नि का सेवन करते हैं, वह सब बलों के बीच बलाधिपति हुए हैं।

उद्यंयमीतिसवितेवबाहूउभेसिचौयततेभीमऋञ्जन्।
उच्छुक्रमत्कमजतेसिमस्मान्नवामातृभ्योवसनाजहाति ॥७॥

उत्। यंयमीति। सविताऽइव। बाहू इति। उभे इति। सिचौ। यतते। भीमः। ऋञ्जन्। उत्। शुक्रम्। अत्कम्। अजते। सिमस्मात्। नवा। मातृऽभ्यः। वसना। जहाति ॥ ७ ॥

सवितेवसर्वस्यप्रेरकः आदित्योयथाबाहूबाहुस्थानीयान्रश्मीनुद्गमयति तथा अयमौषसोग्निः स्वकीयानितेजांसिउद्यंयमीति भृशं उद्यतानिऊर्ध्वाभिमुखानिकरोति तदनन्तरं भीमः सर्वेषांभयंकरोग्निः उभेसिचौ उभेद्यावापृथिव्यौ ऋञ्जन्प्रसाधयन्स्वतेजसाअलङ्कुर्वन्यततेस्वव्यापारे प्रयतते तदनन्तरंसिमस्मात्सर्वस्मात्भूतजातात् शुक्रंदीप्तंअत्कंसारभूतंरसंउदजतेरश्मिभिरूर्ध्वंमादत्ते अपिच मातृभ्यःस्वमातृस्थानीयेभ्योवृष्ट्युदकेभ्यःसकाशान्नवा नवानिप्रत्यग्राणिवसनासर्वस्यजगतः आच्छादकानितेजांसिजहातिउद्गमयति॥ यंयमीति यमउपरमे अस्माद्यङ्लुकि नुगतोनुनासिकान्तस्येतिअभ्यासस्यनुगागमः एतच्चानुस्वारोपलक्षणार्थम्। सिचौ षिचिर्क्षरणे सिंञ्चतः फलेनसंयोजयतइतिसिचौद्यावापृथिव्यौ क्विप्चेतिक्विप् ।यततेयतीप्रयत्ने । अत्कम् अतसातत्यगमने इण्भीकापाशल्यतिमर्चिभ्यःकन् इतिकन् नित्त्वादाद्युदात्तत्वम् । सिमस्मात् सिमशब्दःसर्वशब्दपर्यायः । नवा वसना उभयतः शेश्छन्दसिबहुलमितिशेर्लोपः । जहाति ओहाक् त्यागे जौहोत्यादिकः ॥ ७ ॥

७. अग्नि, सूर्य की तरह, अपनी किरण-रूपिणी भुजाओं को बार-बार विस्तृत करते हैं तथा वही भयंकर अग्नि उभय (दिवारात्रि) को अलंकृत करके निज-कर्म साधित करते हैं। वे सारी वस्तुओं से दीप्त और साररूप रस ऊपर खींचते हैं। वे माताओं (जलों) के पास से आच्छादक अभिनव रस बनाते हैं।

त्वेषंरूपंकृणुतउत्तरंयत्संपृञ्चानःसदनेगोभिरद्भिः ।
कविर्बुध्नंपरिमर्मृज्यतेधीःसादेवतातासमितिर्बभूव ॥८॥

त्वेषम् । रूपम् । कृणुते । उत्ऽतरम् । यत् । सम्ऽपृञ्चानः ।
सदने । गोभिः । अत्ऽभिः । कविः । बुध्नम् । परि । मर्मृज्यते ।
धीः । सा । देवऽताता । सम्ऽइतिः । बभूव ॥८॥

सदनेन्तरिक्षेगोभिर्गन्त्रीभिरद्भिःमेघस्थाभिःसहसंपृञ्चानःवैद्युतरूपेणसंयुक्तःसन् त्वेषंदीप्तंसर्वैर्द्रष्टुमशक्यंउत्तरंउत्कृष्टतरंरूपंवैद्युतंप्रकाशंयद्यदाकृणुतेकरोति तदानींकविःक्रान्तदर्शीधीः सर्वेषांधारकःसोग्निःबुध्नंसर्वस्योदकस्यमूलभूतमन्तरिक्षंपरिमर्मृज्यतेपरितोमार्ष्टिस्वतेजसाआच्छादयतितस्याग्नेःसादेवताता देवेनदेवनशीलेनाग्निना तताविस्तारितादीप्तिःअस्माभिःस्तुवासतीसमितिर्बभूव तेजसांसंहतिर्भवति ॥ संपृञ्चानः पृचीसंपर्के रौधादिकःअस्माल्लटःशानच् श्नसोरल्लोपइत्यकारलोपः।सदने सीदन्त्यस्मिन्गन्धर्वादयइतिसदनमन्तरिक्षं अधिकरणेल्युट्। मर्मृज्यते मृजूशुद्धौ अस्माद्यङि मर्मृज्यतेमर्मृज्यमानासइतिचोपसङ्ख्यानमितिनिपातनादभ्यासस्यरुगाग-

भः । देवताता देवेनततादेवताता तनोतेःकर्मणिनिष्ठा अनुदात्तोपदेशेत्यादिनानुनासिकलोपः व्यत्ययेनात्वम् तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरत्वम् ॥ ८ ॥

८. जिस समय अग्नि अन्तरिक्ष में गमनशील जल द्वारा संयुक्त होकर दीप्त और उत्कृष्ट रूप धारण करते हैं, उस समय वह मेधावी और सर्वलोक-धारक अग्नि (सारे जलों के) मूलभूत (अन्तरिक्ष को) तेज द्वारा आच्छादित करते हैं। उज्ज्वल अग्नि द्वारा विस्तरित वह दीप्ति तेजःपुञ्ज हुई थी।

उरुतेज्रयःपर्येतिबुध्नंविरोचमानंमहिषस्यधाम ।
विश्वेभिरग्नेस्वयशोभिरिद्धोदब्धेभिःपायुभिःपाह्यस्मान् ॥९॥

उरु । ते । ज्रयः । परि । एति । बुध्नम् । विऽरोचमानम् । महिषस्य । धाम । विश्वेभिः । अग्ने । स्वयशःऽभिः । इद्धः । अदब्धेभिः । पायुऽभिः । पाहि । अस्मान् ॥ ९ ॥

महिषस्यमहतः ते तव ज्रयःराक्षसादीनामभिभावुकंविरोचमानंविशेषेणदीप्यमानं उरुविस्तीर्णधामतेजःबुध्नमपांमूलभूतंअन्तरिक्षंपर्येतिपरितोव्याप्नोति. हेअग्ने इद्धः अस्माभिःप्रज्वलितः सन् विश्वेभिःसर्वैःस्वयशोभिःस्वकीयैरात्मीयैस्तेजोभिरस्मान्पाहिरक्ष कीदृशैःअदब्धेभिःराक्षसादिभिरहिंसितैः पायुभिःपालनशक्तैः॥ ज्रयः जिज्रिअभिभवे असुन्। अदब्धेभिः दम्भुदम्भे निष्ठायां यस्यविभाषेतीट्प्रतिषेधः अनिदितामितिनलोपः झषस्तथोर्धोधइतिधत्वम् नञ्समासेव्ययपूर्वपदप्रकृतिस्वरत्वम् बहुलंछन्दसीतिभिसऐसभावः ॥ ९ ॥

९. अग्नि, तुम महान् हो। सबको पराजित करनेवाला तुम्हारा दीप्यमान और विस्तीर्ण तेज अन्तरिक्ष को व्याप्त किये हुए है। अग्नि, हमारे द्वारा प्रज्वलित होकर अपने अहिंसित और पालन-क्षमतेज-द्वारा हमारा पालन करो।

धन्वन्त्स्रोतःकृणुतेगातुमूर्मिंशुक्रैरूर्मिभिरभिनक्षतिक्षाम् ।
विश्वासनानिजठरेषुधत्तेन्तर्नवासुचरतिप्रसूषु ॥१०॥

धन्वन् । स्रोतः । कृणुते । गातुम् । ऊर्मिम् । शुक्रैः । ऊर्मिऽभिः । अभि । नक्षति । क्षाम् । विश्वा । सनानि । जठरेषु । धत्ते । अन्तः । नवासु । चरति । प्रऽसूषु ॥ १० ॥

धन्वन्धन्वनि भसि गातुंगमनशीलमूर्मिमुदकसंघंअयमग्निःस्रोतःकृणुते स्रोतसांप्रवाहरूपेणकुरुते शुक्रैर्निर्मलैरूर्मिभिः वैर्जलसंघैःक्षांभूमिंअभिनक्षति अभिव्याप्नोति स्वतेजोभिरन्तरिक्षेजलसंघमुत्पाद्यतेनसर्वांभूमिमभिवर्षतीत्यर्थः पश्चात्विश्वासर्वाणिसनानि अन्नानामेतत् सर्वाण्यन्ना-

निजठरेषुधत्ते अवस्थापयति तदर्थंनवासुवृष्ट्यनन्तरमुत्पन्नासु प्रसूषुसर्वेषामन्नानांप्रसविश्रीष्वोषधीषु पाकार्थमन्तश्चरतिमध्येवर्तते अन्तरवस्थितेनभौमाग्निनासर्वाओषधयःपच्यन्ते ॥ धन्वन् रिविरविधविगत्यर्थाः इदित्त्वान्नुम् कनिन्युवृषीत्यादिनाकनिन् सुपांसुलुगितिसप्तम्यालुक् धन्वान्तरिक्षंधन्वन्त्यस्मादापइतियास्कः । नित्त्वादाद्युदात्तत्वम् । गातुं गाङ्गतौ कमिमनिजनीत्यादिनातुप्रत्ययः । ऊर्मिम् अर्तेरूच्चेतिसिप्रत्ययः । नक्षति नक्षगतौ ॥ १० ॥

१०. आकाशगामी जल-संघ को प्रवाहरूप में अग्नियुक्त करते और उसी निर्मल जल-संघ-द्वारा पृथिवी को व्याप्त कर डालते हैं। अग्नि जठर में अन्न को धारण करते और इसी लिए (वृष्टिजात) अभिनव शस्य के बीच में निवास करते हैं।

एवानोअग्नेसमिधावृधानोरेवत्पावकश्रवसेविभाहि ।
तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीउतद्यौः॥११॥२

एव । नः । अग्ने । सम्ऽइधा । वृधानः । रेवत् । पावक । श्रवसे । वि ।
भाहि । तत् । नः । मित्रः । वरुणः । ममहन्ताम् । अदितिः ।
सिन्धुः । पृथिवी । उत । द्यौः ॥ ११ ॥ २ ॥

हेपावक शोधकाग्ने समिधाअस्माभिर्दत्तेनसमिदादिद्रव्येण एव एवमुक्तप्रकारेणवृधानोवर्धमानःसन् रेवत् रयिमतेधनयुक्तायनोस्माकंश्रवसेन्नायविभाहि विशेषेणदीप्यस्वअस्माकंतादृशमन्नंप्रयच्छेत्यर्थः नोस्माकंतदन्नंमित्रादयोममहन्तांपूजयन्तांरक्षन्त्वित्यर्थः उतशब्दःसमुच्चये पृथिवीचद्यौश्चेत्यर्थः॥ एव निपातस्यचेतिसंहितायांदीर्घः। वृधानः वृधेरन्तर्भावितण्यर्थात्ताच्छीलिकश्चानश् बहुलंछन्दसीतिशपोलुक् चानशःसार्वधातुकत्वेनङित्त्वाल्लघूपधगुणाभावः लसार्वधातुकत्वाभावेनअनुदात्तत्वाभावेचित्स्वरएवशिष्यते । रेवत् रयिशब्दान्मतुप् रयेर्मतौबहुलमितिसम्प्रसारणम् छन्दसीरइतिमतुपोवत्वम् रेशब्दाच्चेतिमतुपउदात्तत्वम् सुपांसुलुगितिचतुर्थ्यालुक् ॥ ११ ॥

११. विशुद्धकारी अग्नि, काष्ठों द्वारा वृद्धि प्राप्त कर हमें धन-युक्त अन्न देने के लिए दीप्तिमान् बनो। मित्र, वरुण, अदिति, सिन्धु, पृथिवी और आकाश हमारे उस अन्न की पूजा करें।

॥ इतिप्रथमस्यसप्तमेद्वितीयोवर्गः ॥ २ ॥

समन्नथेतिनवर्चंतृतीयंसूक्तं कुत्सस्यार्षंत्रैष्टुभं द्रविणोदस्त्वगुणविशिष्टोग्निः शुद्धाग्निर्वादेवता तथाचानुक्रान्तम्—समन्नथानवद्रविणोदसइति । प्रातरनुवाकाश्विनशस्त्रयोः पूर्वसूक्तेनसहो-

१ नि० ५, ५ ।

कः सूक्तविनियोगः व्यूढस्यदशरात्रस्य षष्ठेहन्याग्निमारुतेइदंसूक्तंजातवेदस्यनिविद्धानं व्यूह्ळेदितिखण्डेसूत्रितम्—सप्रत्नथेत्याग्निमारुतमिति। सप्रत्नथासहसाजायमानइतिजातवेदस्यं समानोदर्कमित्यादिब्राह्मणम्। महापितृयज्ञेस्विष्टकृत्स्थानीयस्यकव्यवाहनस्यसप्रत्नथेत्येषायाज्या दक्षिणाग्निरितिखण्डेसूत्रितम्—सप्रत्नथासहसाजायमानइत्यग्निःस्विष्टकृत्कव्यवाहनइति।

तामेतांसूक्तेप्रथमामृचमाह—

सप्रत्नथासहसाजायमानःसद्यःकाव्यानिबळधत्तविश्वा।
आपश्चमित्रंधिषणाचसाधन्देवाअग्निंधारयन्द्रविणोदाम् ॥१॥

सः। प्रत्नऽथा। सहसा। जायमानः। सद्यः। काव्यानि। बट्। अधत्त। विश्वा। आपः। च। मित्रम्। धिषणा। च। साधन्। देवाः। अग्निम्। धारयन्। द्रविणःऽदाम् ॥ १ ॥

सहसाबलेनजायमानोनिर्मथनेनोत्पद्यमानःसोग्निः सद्यस्तदानीं उत्पत्त्यनन्तरमेव प्रत्नथाप्रत्नइव चिरन्तनइवविश्वाविश्वानिसर्वाणिकाव्यानिकवेःक्रान्तदर्शिनःमगल्भस्यकर्माणि बट् सत्यं अधत्तअधारयत् पूर्वंविद्यमानइवअग्निरुत्पत्तेःसमकालमेवस्वकीयंहविर्वहनादिकं सर्वकार्यमकरोदित्यर्थः इममग्निंवैद्युतरूपेणवर्तमानंमेघेष्ववस्थिताआपश्च धिषणाच या माध्यमिकावाक् साच मित्रंसखिभूतंसाधन्साधयन्ति कुर्वन्ति तमिमंद्रविणोदां द्रविणस्यधनस्यदातारमग्निंदेवाऋत्विजोधारयन्गार्हपत्यादिरूपेणधारयन्ति यद्वा देवाएवेन्द्रादयइममग्निं द्रविणोदां हविर्लक्षणस्यधनस्यदातारंकृत्वा दूत्येधारयन् धारयन्ति ॥ प्रत्नथा प्रत्नपूर्वविश्वेमात्थाल्छन्दसीतिइवार्थेथाल्प्रत्ययः। काव्यानि कवेःकर्मकाव्यं गुणवचनब्राह्मणादिभ्यइति ष्यञ् ञित्त्वादाद्युदात्तत्वम्। साधन् षिधुसंराद्धौ णिचि सिध्यतेरपारलौकिकेइत्यात्वम् लेटचडागमः इतश्चलोपइतीकारलोपः छन्दस्युभयथेतिशपआर्धधातुकत्वात् णेरनिटीतिलोपः। द्रविणोदां द्रविणानिददातीतिद्रविणोदाः द्रुगतौ द्रुदक्षिभ्यामिनन् छान्दसःपूर्वपदस्यलुक् अन्येभ्योपिदृश्यन्तइतिददातेर्विच् सकारान्तंतु असुनिकृतेनिष्पद्यते ॥ १ ॥

१. बल या काष्ठ-घर्षण-द्वारा उत्पन्न अग्नि तुरत ही, पुरातन की तरह, सत्य ही सारे मेधावियों का यज्ञ ग्रहण करते हैं। जल और शब्द उस विद्युद्रूप अग्नि को मित्र जानते हैं। देवों ने उन धन-दाता अग्नि को दूत-रूप से नियुक्त किया था।

---

१ ऐ० ब्रा० ५. १५.

द्वितीयामृचमाह—

सपूर्व्वयानिविदाकव्यतायोरिमाःप्रजाअंजनयन्मनूनाम् ।
विवस्वताचक्षसाद्यामपश्चदेवाअग्निंधारयन्द्रविणोदाम् ॥२॥

सः । पूर्व्वया । निऽविदा । कव्यता । आयोः । इमाः । प्रऽजाः ।
अजनयत् । मनूनाम् । विवस्वता । चक्षसा । द्याम् । अपः । च ।
देवाः । अग्निम् । धारयन् । द्रविणःऽदाम् ॥ २ ॥

सोग्निः पूर्व्वयाप्रथमयाअग्निर्देवेद्धइत्यादिकयानिविदाकव्यता गुणिनिष्ठगुणाभिधानलक्षणास्तुतिःकुर्वताआयोर्मनोः सम्बन्धिनाउक्थेनचस्तूयमानः सोग्निर्मनूनांसम्बन्धिनीरिमाः प्रजाअजनयत् उदपादयत् मनुनास्तुतःसन् मानवीःसर्वाःप्रजाअजनयदित्यर्थः तथाविवस्वताविवासनवताविशेषेणाच्छादयताचक्षसाआत्मीयेनतेजसाद्यांद्युलोकंअपश्चान्तरिक्षंचव्याप्नोतीतिशेषः अन्यत्समानम् ॥ कव्यता कुशब्दे अचोयदितिभावेयत् कव्यंकवनंस्तुतिंकरोति तत्करोतीतिणिच् तदन्तात्क्विप् बहुलमन्यत्रापिसंज्ञाछन्दसोरितिणिलुक् ततस्तुक् धातुस्वरेणान्तोदात्तत्वम्। आयोः इण्गतौ छन्दसीणइत्युण्प्रत्ययः॥ २ ॥

२. अग्नि ने अयु या मनु के प्राचीन और स्तुति-गर्भ मंत्र से तुष्ट होकर मानवी प्रजा की सृष्टि की थी। उन्होंने आच्छादक तेज-द्वारा आकाश और अन्तरिक्ष को व्याप्त किया है। देवों ने उन धन-दाता अग्नि को दूत-रूप से नियुक्त किया था।

तमीळतप्रथमंयज्ञसाधंविशआरीराहुतमृञ्जसानम् ।
ऊर्जःपुत्रंभरतंसृप्रदानुंदेवाअग्निंधारयन्द्रविणोदाम् ॥३ ॥

तम् । ईळत । प्रथमम् । यज्ञऽसाधम् । विशः । आरीः । आऽहुतम् ।
ऋञ्जसानम् । ऊर्जः । पुत्रम् । भरतम् । सृप्रऽदानुम् । देवाः ।
अग्निम् । धारयन् । द्रविणःऽदाम् ॥ ३ ॥

हेविशः सर्वेमनुष्याः आरीः आर्ग्निस्वामिनंगच्छन्त्योयूयंतंअग्निमीळतस्तुध्वम्. कीदृशं प्रथमं सर्वेषुदेवेषुमुख्यं यज्ञसाधं यज्ञस्यदर्शपूर्णमासादेःसाधकंनिष्पादकं आहुतंहविर्भिस्तर्पितं

ऋञ्जसानं स्तोत्रैःप्रसाध्यमानं ऊर्जोन्नस्यपुत्रंभुक्तेनान्नेनजाठराग्नेर्वर्धनात्अग्नेरन्नपुत्रत्वम् भ-रतं हविषोभर्तारं यद्वा प्राणरूपेणसर्वासांप्रजानांभर्तारं श्रूयतेच—स्वदेहवाएषप्राणोभूत्वाप्रजा-बिभर्तितस्मादेषभरतइति । सुप्रदानुं सर्पणशीलदानयुक्तं अविच्छेदेनधनानिप्रयच्छन्तमित्य-र्थः ॥ देवाइत्यादिगतम् । ईळत ईडस्तुतौ लोटिव्यत्ययेनपरस्मैपदम् बहुलंछन्दसीतिशपोलुग-भावः । यज्ञसाधं यज्ञंसाधयतीतियज्ञसाद् साधयतेःक्विप् णेरनिटीतिणिलोपः । आरीः ऋगतौ सृघिसृत्रीत्यादिनायङ् यङोचिचेतिचशब्देनबहुलग्रहणादनैमित्तिकोलुक् प्रत्ययलक्षणेनद्विर्भा-वेउरदत्वहलादिशेषौ रुग्रिकौचलुकीतिरुक् यङ्लुगन्तादौणादिकःकिप्रत्ययः यणादेशेरोरी-तिरेफलोपः ढ्रलोपेपूर्वस्येतिदीर्घत्वम् कृदिकारादक्तिनइतिङीष् जसि वाछन्दसीतिपूर्वसवर्ण-दीर्घत्वम् व्यत्ययेनाद्युदात्तत्वम् । ऋञ्जसानं ऋञ्जतिःप्रसाधनकर्मा ऋञ्जिवृधिमन्दिसहिभ्यः किद् इतिकर्मण्यसानच् । भरतं भृञ्भरणे भृमृदृशीत्यादिनाअतच् । सुप्रदानुं सृप्लृगतौ स्फायि-तञ्चीत्यादिनारक् सुप्रोदानुर्दानंयस्य बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् ॥ ३ ॥

३. मनुष्यो, स्वामी अग्नि के पास जाकर उनकी स्तुति करो। वे देवों में मुख्य यज्ञ-साधक हैं। वे हव्य-द्वारा आहूत और स्तोत्र-द्वारा तुष्ट होते हैं। वे अन्न के पुत्र, प्रजा-पोषक और दानशील हैं। देवों ने उन धनद अग्नि को दूत नियुक्त किया था।

स मा॒त॒रिश्वा॑ पु॒रु॒वार॑पुष्टिर्वि॒दद्गा॒तुं तन॑याय स्व॒र्वित् ।
वि॒शां गो॒पा ज॑नि॒ता रोद॑स्योर्दे॒वा अ॒ग्निं धा॑रयन्द्रविणो॒दाम् ॥४॥

सः । मा॒त॒रिश्वा॑ । पु॒रु॒वार॑ऽपुष्टिः । वि॒दत् । गा॒तुम् । तन॑याय । स्वः॒ऽवित् । वि॒शाम् । गो॒पाः । ज॒नि॒ता । रोद॑स्योः । दे॒वाः । अ॒ग्निम् । धा॒र॒य॒न् । द्र॒वि॒णः॒ऽदाम् ॥ ४ ॥

सोग्निस्तनयायअस्मदीयायपुत्रायगातुंअनुष्ठानमार्गंविदत् लंभयतु कीदृशः मातरिश्वा मातरिसर्वस्यजगतोनिर्मातर्यन्तरिक्षेश्वसन् वर्तमानः पुरुवारपुष्टिः पुरुभिर्बहुभिर्वारावरणीयापु-ष्टिरभिवृद्धिर्यस्यसतथोक्तः स्वर्वित् स्वः स्वर्गस्ययागद्वारेणलंभयिताविशांसर्वासांप्रजानांगो-पागोपायितारक्षिता रोदस्योर्द्यावापृथिव्योर्जनिताजनयिताउत्पादयिता ॥ देवाइत्यादिगतम् । मातरिश्वा श्वन्नुक्षन्नित्यादौमातृशब्दोपपदात् श्वसप्राणनेइत्यस्मात् कनिन्प्रत्ययान्तोनिपात्य-ते । विदत् विदॢलाभे अस्मादन्तर्भावितण्यर्थात् छान्दसोलुङ् लृदित्वात् च्लेरङादेशः पादादित्वा-न्निघाताभावः । जनिता जनितामन्त्रेइति णिचिणिलोपोनिपात्यते ॥ ४ ॥

४. वे अन्तरिक्षस्थ अग्नि अनेक वरणीय पुष्टि प्रदान करते हैं। अग्नि स्वर्ग-दाता, सर्वलोक-रक्षक और द्यावा-पृथिवी के उत्पादक हैं। अग्नि हमारे पुत्र को अनुष्ठान-मार्ग दिखा दें। देवों ने उन धन-प्रदाता अग्नि को दूत बनाया था।

पञ्चमीमृचमाह—

नक्तोषासावर्णमामेम्यानेधापयेतेशिशुमेकंसमीची ।
द्यावाक्षामांरुक्मोअन्तर्विभातिदेवाअग्निंधारयन्द्रविणोदाम् ॥५॥३॥

नक्तोषसा । वर्णम् । आमेम्याने इत्याऽमेम्याने । धापयेते इति ।
शिशुम् । एकम् । समीची इति सम्ऽईची । द्यावाक्षामा । रुक्मः ।
अन्तः । वि । भाति । देवाः । अग्निम् । धारयन् । द्रविणःऽदाम् ॥५॥३॥

नक्तोषसा रात्रिरहश्च वर्णंस्वकीयंरूपं आमेम्यानेपरस्परंपुनःपुनर्हिंसन्त्यौ समीची सङ्गते संश्लिष्टे एवम्भूते अहस्त्रियामे एकंशिशुं अह्नःपुत्रमग्निंधापयेते हवींषिपाययेते रुक्मोरोचमानः सोग्निः द्यावाक्षामाद्यावापृथिव्योरन्तर्मध्येविभातिविशेषेणप्रकाशते अन्यत्पूर्ववत् ॥ नक्तोषसा नक्तेतिरात्रिनाम नक्ताउषाश्चनक्तोषसा सुपांसुलुगितिविभक्तेराकारः अन्येषामपीतिसांहितिकमुपधादीर्घत्वम् देवताद्वन्द्वेचेतिपूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम् । आमेम्याने मीञ्हिंसायां अस्माद्यङ्लुगन्ताद्व्यत्ययेनशानच् अदादिवच्चेतिवचनाच्छपोलुक् एरनेकाचइतियण् अभ्यस्तामामादिरित्याद्युदात्तत्वम् कृदुत्तरपदप्रकृतिस्वरत्वम् । धापयेते धेट्पाने अस्माण्ण्यन्ताच्चिगरणचलनेतिप्राप्तस्यपरस्मैपदस्यपादिषुधेटउपसंख्यानमितिवचनाद्नपादम्याङ्यमेतिप्रतिषेधः अदुपदेशाल्लसार्वधातुकानुदात्तत्वेणिचएवस्वरःशिष्यते पादादित्वान्निघाताभावः । समीची सम्पूर्वादञ्चतेर्ऋत्विगित्यादिनाक्विन् अनिदितामितिनलोपः समःसमीतिसम्यादेशः अञ्चतेश्चोपसंख्यानमितिङीप् अचइत्यकारलोपः चावितिदीर्घत्वम् उदात्तनिवृत्तिस्वरेणङीपउदात्तत्वम् पदकारस्यत्वयमभिप्रायः उदईदितिविधीयमानमीत्वंसमउत्तरस्याप्यञ्चतेर्व्यत्ययेनभवतीति वाछन्दसीतिपूर्वसवर्णदीर्घत्वम् । द्यावाक्षामा दिवोद्यावेतिद्यावादेशः सुपांसुलुगितिषष्ठ्याडादेशः देवताद्वन्द्वेचेतिपूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम् ॥ ५ ॥

५. दिवारात्रि परस्पर रूपों का वार-वार परस्पर विनाश करके भी ऐक्य भाव से एक ही शिशु (अग्नि) को पुष्ट करते हैं। वे दीप्तिमान् अग्नि आकाश और पृथिवी में प्रभा विकसित करते हैं। देवों ने उन धनद अग्नि को दूत नियुक्त किया था।

॥ इतिप्रथमस्यसप्तमेतृतीयोवर्गः ॥ ३ ॥

षष्ठीमृचमाह—

रायोबुध्नःसङ्गमनोवसूनांयज्ञस्यकेतुर्मन्मसाधनोवेः ।
अमृतत्वंरक्षमाणासएनंदेवाअग्निंधारयन्द्रविणोदाम् ॥६॥

रायः। बुध्नः। सम्ऽगमनः। वसूनाम्। यज्ञस्य। केतुः। मन्मऽसाधनः। वेरितिवेः। अमृतऽत्वम्। रक्षमाणासः। एनम्। देवाः। अग्निम्। धारयन्। द्रविणःऽदाम्॥ ६॥

योग्निः रायोधनस्यबुध्नोमूलभूतः आहुतिद्वारासर्वेषांधनानांकारणत्वाद्वसूनांनिवासहेतूनांधनानांसङ्गमनः सङ्गमयितास्तोतॄणांमापयिता यज्ञस्यदर्शपूर्णमासादेःकेतुःकेतयिताज्ञापयिता वेःआत्मानमभिगच्छतःपुरुषस्यमन्मसाधनःमननीयस्याभिलषितस्यसाधयिता अमृतत्वंस्वकीयामरणत्वंरक्षमाणासःपालयन्तोदेवाः एनंधनस्यदातारमग्निंधारयन्ति॥ रायः ऊडिदंमिति विभक्तेरुदात्तत्वम्। सङ्गमनः नन्द्यादिलक्षणोल्युः। वेः वीगत्यादिषु अस्मादौणादिकइप्रत्ययः टिलोपश्च॥ ६॥

६. अग्नि धन-मूल, निवास-हेतु, अर्थ-दाता, यज्ञ-केतु और उपासक की अभिलाषा के सिद्धि-कर्त्ता हैं। अमर देवों ने उन धन-दाता अग्नि को दूत बनाया था।

नूचंपुराचसदनंरयीणांजातस्यचजायमानस्यचक्षाम्।
सतश्चगोपांभवतश्चभूरेर्देवाअग्निंधारयन्द्रविणोदाम्॥ ७॥

नु। च। पुरा। च। सदनम्। रयीणाम्। जातस्य। च। जायमानस्य। च। क्षाम्। सतः। च। गोपाम्। भवतः। च। भूरेः। देवाः। अग्निम्। धारयन्। द्रविणःऽदाम्॥ ७॥

नूचेतिनिपातसमुदायः अद्येत्यस्यार्थे नूचिदितिनिपातः पुराणनवयोर्नूचेतिचेतियास्कः। नूच अद्यास्मिन्कालेपुराच रयीणांसर्वेषांधनानांसदनमावासस्थानंजातस्योत्पन्नस्यकार्यजातस्यचजायमानस्योत्पद्यमानस्यच क्षां निवासयितारंसतश्चसर्वत्रविद्यमानस्वभावस्यनित्यस्यचाकाशादेर्भवतश्चसद्भावंप्राप्नुवतोभूरेः असंख्यातस्यान्यस्यचभूतजातस्यगोपांगोपायितारंरक्षितारं द्रविणोदां धनप्रदमेवंगुणविशिष्टमग्निंदेवाधारयन्हविर्वोढृत्वेनधारयन्ति॥ नूच ऋचितुनुघेतिदीर्घः। रयीणां नामन्यतरस्यामितिनामउदात्तत्वम्। क्षां क्षिनिवासगत्योः अस्माण्णिच् वृद्ध्यायादेशौ ण्यन्ताद्क्विप् णेरनिटीतिणिलोपः वेरपृक्तलोपाद्वलिलोपोबलीयानितिपूर्वंलोपोव्योर्वलीतियलोपः नचणिलोपस्यस्थानिवत्त्वम् नपदान्तद्विर्वचनवरेयलोपेतिप्रतिषेधात् यद्वा क्षैजैक्षये अस्मात्क्विप् आदेचइत्यात्वम्। सतः अस्तेःशतरिअदादित्वाच्छपोलुक् श्नसोरल्लोपइत्यकारलोपः शतुरनुम इतिविभक्तेरुदात्तत्वम्॥ ७॥

७. पहले और इस समय अग्नि सारे धनों का आवास-स्थान हैं। जो कुछ उत्पन्न हुआ है या होगा, उसके निवास-स्थान हैं। जो कुछ

है और भविष्यत् में जो अनेकानेक पदार्थ उत्पन्न होंगे, उनके रक्षक हैं। देवों ने उन धनद अग्नि को दूत-रूप से नियुक्त किया है।

द्रविणोदाद्रविणसस्तुरस्यंद्रविणोदाःसनरस्यप्रयंसत्।
द्रविणोदावीरवतीमिषंनोद्रविणोदारासतेदीर्घमायुः ॥ ८॥

द्रविणःऽदाः। द्रविणसः। तुरस्य। द्रविणःऽदाः। सनरस्य। प्र। यंसत्। द्रविणःऽदाः। वीरऽवतीम्। इषम्। नः। द्रविणःऽदाः। रासते। दीर्घम्। आयुः ॥ ८ ॥

द्रविणोदाः द्रविणस्यधनस्यबलस्यवादाताग्निःतुरस्यत्वरमाणस्य चलतोजङ्गमस्यद्रविणसोधनस्यबलस्यवाएकदेशंप्रयंसत् अस्मभ्यंप्रयच्छतु तथाद्रविणोदाः सनरस्यसननीयस्यसंभजनीयस्यस्थावररूपस्यधनस्यैकदेशंप्रयच्छतुअपिचद्रविणोदाःवीरवतींवीरैःपुत्रादिभिर्युक्तांइषमन्नंनोस्मभ्यंप्रयच्छतु तथाद्रविणोदादीर्घमायुःअस्मभ्यंरासतेप्रयच्छतु॥ तुरस्य तुरत्वरणे इगुपधलक्षणःकः। सनरस्य वनषणसंभक्तौ ऊदरादयश्चेत्यरन्प्रत्ययः। यंसत् यमउपरमे लेट्यडागमः सिब्बहुलंलेटीतिसिप्। रासते रादाने पूर्ववल्लेटिसिप् व्यत्ययेनात्मनेपदम् ॥ ८ ॥

८. धनदाता अग्नि जंगम धन का भाग हमें दान करें। धनद अग्नि स्थावर धन का अंश हमें दें। धनद अग्नि हमें वीरों से युक्त अन्न दान करें। धनद अग्नि हमें दीर्घ आयु दान करें।

एवानोअग्नेसमिधावृधानोरेवत्पावकश्रवसेविभाहि।
तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीउतद्यौः॥९॥४॥

एव। नः। अग्ने। सम्ऽइधा। वृधानः। रेवत्। पावक। श्रवसे। वि। भाहि। तत्। नः। मित्रः। वरुणः। ममहन्ताम्। अदितिः। सिन्धुः। पृथिवी। उत। द्यौः॥ ९ ॥ ४ ॥

व्याख्यातेयंपूर्वसूक्ते अक्षरार्थस्तु हेशोधकाग्ने एवमस्माभिर्दत्तेनसमिदादिद्रव्येणवृधानोवर्धमानःसन् नोस्माकंधनयुक्तायान्नायविशेषेणप्रकाशस्व अस्माकंतदन्नंमित्रादयोममहन्तांपूजयन्तां रक्षन्त्वित्यर्थः तथासिन्धुः अब्देवताद्यावापृथिव्यौचममहन्ताम् ॥ ९ ॥

९. विशुद्ध कर्त्ता अग्नि, इस प्रकार काष्ठों से वृद्धि प्राप्त कर तुम हमें धन-युक्त अन्न देने के लिए प्रभा प्रकाशित करो। मित्र, वरुण, अदिति, सिन्धु, पृथिवी और आकाश हमारे उस अन्न की पूजा करें।

॥ इतिप्रथमस्यसप्तमेचतुर्थोवर्गः ॥ ४ ॥

अपनइत्यष्टर्चंचतुर्थंसूक्तंकुत्सस्यार्षंगायत्रं शुचिगुणकोग्निःशुद्धोग्निर्वादेवता तथाचानुक्रान्तम्—अपनोष्टौशुचयेगायत्रमिति । विनियोगोलैङ्गिकः अत्रेदमाख्यानम्—दीर्घजिह्वीनामराक्षसीसर्वान्यज्ञान्बबाधे तांहन्तुमिन्द्रोऽशक्तःसन्सर्वस्यमित्रभूतंकुत्समब्रवीत् एषात्वयाहन्तव्येति सचावधीत् तंवागभ्यवदत् अनुचितमिदंत्वयाचरितंयत्त्वंसर्वेषांमित्रभूतःसन्क्रूरमकार्षीरिति तमृषिंशोकःप्रापोत्सऋषिरनेनसूक्तेनअग्निंस्तुत्वाशोकमपागमयत् तथाचताण्डकम्—दीर्घजिह्वीनामराक्षसीयज्ञानवलिहन्त्यचरत् तामिन्द्रःकयाचमाययाहंतुंनाशंसत् अथहसुमित्रःकुत्सःकल्याणआसतमब्रवीदिति । तस्मादेतत्सूक्तंशुगपनयनायविनियोज्यं अतएवहिसूत्रकारेणभारद्वाजेनदशमेहनिकर्तव्येशान्तिकर्मणियजुर्वेदेपठितमेतत्सूक्तंविनियुज्यते—नवचस्रुवाहुतीरपनःशोशुचदघमिति ।

तत्रप्रथमामृचमाह—

अप॑ नः॒ शोशु॑चद॒घमग्ने॑ शुशु॒ग्ध्या र॒यिम् । अप॑ नः॒ शोशु॑चद॒घम् ॥१॥

अप॑ । नः॒ । शोशु॑चत् । अ॒घम् । अग्ने॑ । शु॒शु॒ग्धि । आ । र॒यिम् ।
अप॑ । नः॒ । शोशु॑चत् । अ॒घम् ॥ १ ॥

हेअग्ने नोस्माकमघंपापमपशोशुचत् अस्मत्तोनिर्गत्य अस्मदीयशत्रुंशोचयतु यद्वा अस्मदीयंपापंशोशुचत् शोकग्रस्तंसद्विनश्यतु अपिचास्माकंरयिंधनं आसमन्तात् शुशुग्धिप्रकाशय उक्तार्थमपिवाक्यं आदरातिशयद्योतनायपुनःपठ्यते अवश्यमस्माकमघंविनश्यत्विति॥शोशुचत् शुचशोके अस्माद्यङ्लुगन्तात् लेटचडागमः अदादिवच्चेतिवचनाच्छपोलुक् अभ्यस्तानामादिरित्याद्युदात्तत्वम्। अघं शोशुचच्चरयिंशुशुग्धिचेतिचार्थप्रतीतेश्चादिलोपेविभाषेतिनिघातप्रतिषेधः। शुशुग्धि शुचदीप्तौ लोटि बहुलंछन्दसीतिशपःश्लुः हुझल्भ्योहेर्धिः चोःकुरितिकुत्वम् ॥१॥

१. अग्नि, हमारे पाप नष्ट हों। हमारा धन प्रकाश करो। हमारे पाप नष्ट हों।

द्वितीयामृचमाह—

सु॒क्षे॒त्रि॒या सु॑गातु॒या व॑सू॒या च॑ यजामहे । अप॑ नः॒ शोशु॑चद॒घम् ॥२॥

सु॒ऽक्षे॒त्रि॒या । सु॒गा॒तु॒ऽया । व॒सु॒ऽया । च॒ । य॒जा॒म॒हे॒ । अप॑ । नः॒ ।
शोशु॑चत् । अ॒घम् ॥ २ ॥

सुक्षेत्रिया शोभनक्षेत्रेच्छया सुगातुया शोभनमार्गेच्छया वसूयावधनेच्छयांनिमित्तभूत-याच यजामहे अग्निंहविर्भिःपूजयामः यद्वा सुक्षेत्रियादेवयजनलक्षणशोभनदेशसम्बन्धिनाइवि-षा अग्निंयजामहे नोस्माकमघं अपशोशुचत् विनश्यतु॥ सुक्षेत्रिया शोभनंक्षेत्रंसुक्षेत्रं तद्विषयाइ-च्छासुक्षेत्रिया सुप्आत्मनःक्यच् नच्छन्दस्यपुत्रस्येतीत्वदीर्घयोर्निषेधः व्यत्ययेनेत्वम् क्यजन्ता-दमत्ययादितिभावे अकारमत्ययः ततष्टाप् सुपांसुलुगितितृतीयायालुक् एवमुत्तरत्रापि यद्वा शो-भनंक्षेत्रमस्यास्तीतिसुक्षेत्रिया इयाडियाजीकाराणामुपसंख्यानमितितृतीयायाडियाजादेशः ॥ २ ॥

२. शोभनीय क्षेत्र, शोभन मार्ग और धन के लिए तुम्हारी पूजा करते हैं। हमारे पाप विनष्ट हों।

तृतीयामृचमाह—

प्रयद्भन्दिष्ठएषांप्रास्माकांसश्चसूरयः। अपनःशोशुचदघम् ॥३॥

प्र। यत्। भन्दिष्ठः। एषाम्। प्र। अस्माकांसः। च। सूरयः। अप। नः। शोशुचत्। अघम् ॥ ३ ॥

यद्यथा एषांस्तोतॄणांमध्ये अयंकुत्सःप्रभंदिष्ठःप्रकर्षेणस्तोतृतमःएवमस्माकासःआस्माकीनाः सूरयःस्तोतारश्चप्रकर्षेणस्तोतृतमाभवन्ति अन्यत्समानम्॥ भन्दिष्ठः भन्दतिःस्तुतिकर्मा भदिक-ल्याणेसुखेचेतितुधातुः अस्मात्तृजन्तात्तुश्छन्दसीतीष्ठन् तुरिष्ठेमेयःस्विवितृलोपः। अस्माकासः अस्माकंसम्बन्धिनआस्माकाः तस्मिन्नणिचयुष्माकास्माकावितिअस्माकादेशः छान्दसोनञ्प्र-त्ययस्यलोपः संज्ञापूर्वकस्यविधेरनित्यत्वाद्वृद्ध्यभावः आज्जसेरसुक् स्थानिवदादेशेपिमकारा-त्परस्याकारस्योदात्तत्वम् यद्वा षष्ठीबहुवचने अस्माकंशब्दस्यमध्योदात्तस्यदृष्टत्वात् सएवाचा-र्येणातिदिश्यते॥ ३ ॥

३. इन स्तोताओं में जैसे कुत्स उत्कृष्ट स्तोता हैं, उसी तरह हमारे स्तोता भी उत्कृष्ट हैं। हमारे पाप नष्ट हों।

चतुर्थीमृचमाह—

प्रयत्तेअग्नेसूरयोजायेमहिप्रतेवयम्। अपनःशोशुचदघम् ॥ ४ ॥

प्र। यत्। ते। अग्ने। सूरयः। जायेमहि। प्र। ते। वयम्। अप। नः। शोशुचत्। अघम् ॥ ४ ॥

हेअग्ने यद्यस्मात्तेतवसूरयः स्तोतारः प्रजायन्ते पुत्रपौत्रादिरूपेणबहुविधाभवन्ति ततोवयं च ते तवस्तोतारःसन्तः प्रजायेमहि पुत्रपौत्रादिभिरुपेताभवेम ॥ जायेमहि प्रार्थनायांलिङ् श्यनि ज्ञाजनोर्जेतिजादेशः अदुपदेशाल्लसार्वधातुकानुदात्तत्वे श्यनोनित्त्वादाद्युदात्तत्वम् ॥ ४ ॥

४. अग्नि, तुम्हारे स्तोता पुत्र-पौत्रादि प्राप्त करते हैं; इसलिए हम भी तुम्हारी स्तुति करके पुत्र-पौत्रादि लाभ करेंगे। हमारे पाप नष्ट हों।

पञ्चमीमृचमाह—

प्रयद॒ग्नेः सह॑स्वतो वि॒श्वतो॒ यन्ति॑ भा॒नवः॑ । अप॑ नः॒ शोशु॑चद॒घम् ॥५॥

प्र । यत् । अ॒ग्नेः । सह॑स्वतः । वि॒श्वतः॑ । यन्ति॑ । भा॒नवः॑ । अप॑ । नः॒ । शोशु॑चत् । अ॒घम् ॥ ५ ॥

सहस्वतः सहनवतः शत्रूनभिभवतोग्नेर्भानवोदीप्तयः विश्वतः सर्वतः सर्वस्मादपिप्रदेशात् प्रयन्ति प्रकर्षेणोद्गच्छन्ति यद्यस्मादेवंतस्मात्तेनाग्नितेजसा अस्मदीयं अघंनश्यतु ॥ यन्ति इणोयणितियणादेशः ॥ ५ ॥

५. शत्रु-विजयी अग्नि की दीप्तियाँ सर्वत्र जाती हैं; इसलिए हमारे पाप नष्ट हों।

षष्ठीमृचमाह—

त्वंहि वि॑श्वतोमुख वि॒श्वतः॑ परि॒भूरसि॑ । अप॑ नः॒ शोशु॑चद॒घम् ॥ ६ ॥

त्वम् । हि । वि॒श्व॒तः॒ऽमु॒ख॒ । वि॒श्वतः॑ । प॒रि॒ऽभूः । असि॑ । अप॑ । नः॒ । शोशु॑चत् । अ॒घम् ॥ ६ ॥

हेअग्ने त्वंहि त्वंखलु विश्वतोमुखसर्वतोज्वाल तवमुखस्थानीयानां ज्वालानांनकुत्रापिप्रतिहतिरस्ति अतोहेविश्वतोमुखाग्ने विश्वतःसर्वतः सर्वस्मादपिउपद्रवजातात्परिभूरसिअस्माकंपरिग्रहीतासि परिग्रहीताभव रक्षकोभवेत्यर्थः अन्यत्समानम् ॥ ३ ॥

६. अग्नि, तुम्हारा मुख (शिखा) चारों ओर है। तुम हमारे रक्षक बनो। हमारे पाप नष्ट हों।

द्विषो॑ नो विश्वतोमुखाति॑ ना॒वेव॑ पारय । अप॑ नः॒ शोशु॑चद॒घम् ॥ ७ ॥

द्विषः॑ । नः॒ । वि॒श्व॒तः॒ऽमु॒ख॒ । अति॑ । ना॒वाऽइ॑व । पा॒र॒य॒ । अप॑ । नः॒ । शोशु॑चत् । अ॒घम् ॥ ७ ॥

हेविश्वतोमुख सर्वतोमुखाग्ने नावेव नावानदीमिव द्विषःशत्रून्नोस्मानतिपारय अतिक्रमय्य शत्रुरहितंप्रदेशंप्रापय ॥ नावाइव सावेकाचइतिविभक्तेरुदात्तत्वम्। पारय पारतीरकर्मसमाप्तौ ॥ ७ ॥

७. सर्वतोमुख अग्नि, जैसे नौका से नदी को पार किया जाता है, वैसे ही हमारे शत्रुओं से हमें पार करा दो। हमारे पाप नष्ट हों।

अष्टमीमृचमाह—

सनःसिन्धुमिवनावयातिपर्षास्वस्तये। अपनःशोशुचदघम्॥ ८ ॥५॥

सः। नः। सिन्धुम्ऽइव। नावया। अति। पर्ष। स्वस्तये। अप। नः। शोशुचत्। अघम् ॥ ८॥ ५ ॥

पूर्वोक्तएवार्थःपुनरपिदार्ढ्यायप्रार्थ्यते हेअग्ने सत्वंनोस्मान्नावयानावासिन्धुमिव नदीमिव स्वस्तयेक्षेमार्थं अतिपर्ष शत्रून् अतिक्रमय्यपालय शत्रुरहितं प्रदेशं अस्मान्प्रापयेत्यर्थः त्वत्प्रसादान्नोस्माकंअघंपापंच अपशोशुचत् अस्मत्तोपक्रम्यास्मच्छत्रुःशोकयुक्तोभवतु ॥ नावया आङ्याजयारामुपसंख्यानमितितृतीयायाअयारादेशः उपोत्तमंरितीत्यकारस्योदात्तत्वम्। पर्ष पृ पालनपूरणयोः लोटि बहुलंछन्दसीतिशपःश्लोरभावः सिब्बहुलंलेटीतिबहुलवचनात्सिप् गुणः द्व्यचोतस्तिङइतिदीर्घत्वम् ॥ ८ ॥

८. नदी-पार की तरह हमारे कल्याण के लिए तुम हमें शत्रु से पार कराकर हमें पालन करो। हमारे पाप नष्ट हों।

इतिप्रथमस्यसप्तमेपञ्चमोवर्गः ॥ ५ ॥

वैश्वानरस्येति तृचंपञ्चमंसूक्तम् कुत्सस्यार्षं त्रैष्टुभं वैश्वानरगुणकोग्निः शुद्धोग्निर्वादेवता तथाचानुक्रान्तम्—वैश्वानरस्यतृचंवैश्वानरीयमिति। व्यूह्ळस्यचतुर्थेहन्याग्निमारुते इदंसूक्तंवैश्वानरीयनिविद्धानम् व्यूह्ळश्चेदितिखण्डेसूत्रितम्—वैश्वानरस्यसुमतौकईव्यकाइति।

तत्रप्रथमामृचमाह—

वैश्वानरस्यसुमतौस्यामराजाहिकंभुवनानामभिश्रीः।
इतोजातोविश्वमिदंविचष्टेवैश्वानरोयततेसूर्येण ॥ १ ॥

वैश्वानरस्य। सुऽमतौ। स्याम। राजा। हि। कम्। भुवनानाम्। अभिऽश्रीः। इतः। जातः। विश्वम्। इदम्। वि। चष्टे। वैश्वानरः। यतते। सूर्येण ॥ १ ॥

वैश्वानरस्यविश्वेषांनराणांलोकान्तरनेतृत्वेनस्वामित्वेनवासम्बन्धिनोग्नेः सुमतौशोभनायामनुग्रहात्मिकायांबुद्धौस्याम अनुग्राह्यत्वेनवर्तमानाभवेम हिकिमित्येतद्धिशब्दार्थे सहिवैश्वानरःअभिश्रीःअभिश्रयणीयः आभिमुख्येनसेवितव्यःसन् भुवनानांसर्वेषांभूतजातानांराजास्वामीभवति योवैश्वानरोग्निः इतोस्मादरणिद्वयाज्जातः जातमात्रएव विश्वंइदंसर्वंजगद्विचष्टे विशेषेणपश्यति प्रातरुद्यवासूर्येणचयततेसंयततेसंगच्छते उद्यन्तंवावादित्यमग्निरनुसमारोहतीतितैत्तिरीयकम्।यद्वा पार्थिवस्याग्नेस्तेजांसिउद्गच्छन्ति सूर्यकिरणाश्चाधोमुखंप्रसरन्ति तयोःसङ्गमनंदृष्ट्वावैश्वानरोयततेसूर्येणेत्यृषिर्ब्रूते तथाचयास्कः—अमुतोमुष्यरश्मयःप्रादुर्भवन्तीतोस्यार्चिषस्तयोर्भासोः संसङ्गंदृष्ट्वैवमवक्ष्यदिति । एवंभूतस्यमहानुभावस्यवैश्वानरस्यसुमतौस्यामेतिसम्बन्धः ॥ वैश्वानरस्य विश्वेषांनराणांसम्बन्धी नरेसंज्ञायामितिपूर्वपदस्यदीर्घत्वम् तस्येदमित्यण्।सुमतौ शोभनामतिःसुमतिः तादौचेतिगतेःप्रकृतिस्वरेप्राप्ते मन्क्तिन्नित्यादिनोत्तरपदान्तोदात्तत्वम् ननु तत्रकारकादित्यनुवृत्तेर्गतेरुत्तरस्यक्तिनोनप्राप्नोति एवंतर्हि मतिर्मननं भावेक्तिन् शोभनंमननंयस्यांबुद्धौ सासुमतिः नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । चष्टे चक्षिङ्व्यक्तायांवाचि अयंपश्यतिकर्मापि अदादित्वाच्छपोलुक् स्कोःसंयोगाद्योरितिकलोपः । यतते यतीप्रयत्ने ॥ १ ॥

१. हम वैश्वानर अग्नि के अनुग्रह में रहें। वे सारे भुवनों-द्वारा पूजनीय राजा हैं। इन दो काष्ठों से उत्पन्न होकर ही वैश्वानर ने संसार को देखा और सूर्य के साथ एकत्र गमन किया।

चातुर्मास्यान्वारंभणीयावैश्वानरपार्जन्या तस्यांवैश्वानरस्यहविषःपृष्टोदिवीतियाज्या चातुर्मास्यानीतिखण्डेसूत्रितम्—पृष्टोदिविपृष्टोअग्निःपृथिव्यांपर्जन्यायप्रगायतेति ।

तामेतांद्वितीयामृचमाह—

पृ॒ष्टो दि॒वि पृ॒ष्टो अ॒ग्निः पृ॑थि॒व्यां पृ॒ष्टो विश्वा॒ ओष॑धी॒रा वि॑वेश ।
वै॒श्वा॒न॒रः सह॑सा पृ॒ष्टो अ॒ग्निः स नो॒ दिवा॒ स रि॒षः पा॑तु॒ नक्त॑म् ॥ २ ॥

पृ॒ष्टः । दि॒वि । पृ॒ष्टः । अ॒ग्निः । पृ॒थि॒व्याम् । पृ॒ष्टः । विश्वाः॑ ।
ओष॑धीः । आ । वि॒वे॒श॒ । वै॒श्वा॒न॒रः । सह॑सा । पृ॒ष्टः । अ॒ग्निः । सः ।
नः॒ । दिवा॑ । सः । रि॒षः । पा॒तु॒ । नक्त॑म् ॥२॥

---

१ तै० ब्रा० २. १. २. । २ नि० ७. २३. ।

अयंवैश्वानरोग्निः दिविद्युलोकेआदित्यात्मनापृष्टः संस्पृष्टः यद्वा निषिक्तोनिहितोवर्त्तते तथापृथिव्यांभूमौगार्हपत्यादिरूपेणपृष्टः संस्पृष्टोनिहितोवा तथाविश्वाः सर्वाओषधीः पृष्टः संस्पृष्टः सोग्निः आविवेश पाकार्थमन्तःप्रविष्टवान् अन्तःप्रविष्टेनपार्थिवाग्निनाहिसर्वाओषधयः पच्यन्ते सहसापरेषामसाधारणेनबलेनपृष्टःसंस्पृष्टः वैश्वानरः नोस्मान् दिवाअह्नि रिषोहिंसतःशत्रोः पातुरक्षतु तथासवैश्वानरोनक्तंरात्रावप्यस्मान् हिंसकात्पातु॥ पृष्टः स्पृशसंस्पर्शने छान्दसः सकारलोपः यद्वा पृषुसेचने निष्ठायांयस्यविभाषेतीट्प्रतिषेधः। दिवि ऊडिदमितिविभक्तेरुदात्तत्वम्। पृथिव्याम् उदात्तयणइतिविभक्तिरुदात्ता। रिषः रिषहिंसायां क्विप्चेतिक्विप् सावेकाचइतिपञ्चम्याउदात्तत्वम्॥ २॥

२. सूर्य-रूप से आकाश में और गार्हपत्यादि-रूप से पृथिवी में अग्नि वर्त्तमान हैं। अग्नि ने सारे शस्यों में रहकर, उन्हें पकाने के लिए, उनमें प्रवेश किया है। वे ही बलशाली वैश्वानर अग्नि दिन और रात्रि में हमें शत्रु से बचावें।

वैश्वानरतवतत्सत्यमस्त्वस्मान्रायोमघवानःसचन्ताम्॥
तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीउतद्यौः॥ ३॥ ६॥

वैश्वानर। तव। तत्। सत्यम्। अस्तु। अस्मान्। रायः।
मघऽवानः। सचन्ताम्। तत्। नः। मित्रः। वरुणः। ममहन्ताम्।
अदितिः। सिन्धुः। पृथिवी। उत। द्यौः॥ ३॥ ६॥

हेवैश्वानर तवतत्त्वदीयंतत् अस्माभिः क्रियमाणंकर्मसत्यमस्तु अवितथफलंभवतु ततोस्मान्मघवानोधनवन्तोरायोधनवदतिप्रियाःपुत्राःसचन्तां सेवन्ताम् एवंयदस्माभिःप्रार्थितंनोस्मदीयंतत्मित्रोहरभिमानीदेवोवरुणोरात्र्यभिमानी अदितिः अदीनादेवमाता सिन्धुःस्यन्दनशीलोदकाभिमानीदेवः उतशब्दःसमुच्चये एतेसर्वेमित्रादयोममहन्तां पूजयन्तांपालयन्तामित्यर्थः॥ ३॥

३. वैश्वानर, तुम्हारे सम्बन्ध में यह यज्ञ सफल हो। हमें बहुमूल्य धन प्राप्त हों। मित्र, वरुण, अदिति, सिन्धु, पृथिवी और आकाश हमारे उस धन की पूजा करें।

जातवेदसइत्येकर्चंषष्ठंसूक्तम् मरीचिपुत्रस्यकश्यपस्यार्षंत्रैष्टुभं जातवेदोगुणकोग्निःशुद्धोग्निर्वादेवता तथाचानुक्रान्तम्—जातवेदसएकाजातवेदस्यं एतदादीन्येकभूयांसिसूक्तसहस्रमेतत्तुकश्यपार्षमिति। अहर्गणेषुद्वितीयादिष्वहस्सुआग्निमारुते जातवेदसनिविद्धानात्पूर्वमेषा शंसनीया सूत्रितंच—जातवेदसेसुनवामसोममित्याग्निमारुतेजातवेदस्यानामिति।

तामेतांप्रथमामृचमाह—

जातवेदसेसुनवामसोममरातीयतोनिर्दहातिवेदः ।
सनःपर्षदतिदुर्गाणिविश्वानावेवसिन्धुंदुरितात्यग्निः ॥ १ ॥ ७ ॥

जातऽवेदसे । सुनवाम । सोमम् । अरातिऽयतः । नि । दहाति ।
वेदः । सः । नः । पर्षत् । अति । दुःऽगानि । विश्वा । नावाऽइव ।
सिन्धुम् । दुःऽइता । अति । अग्निः ॥ १ ॥ ७ ॥

जातवेदसे जातानां उत्पत्तिमतांसर्वेषांवेदित्रे यद्वा जातैःसर्वैःप्राणिभिः ज्ञायमानाय जातधनायजातप्रज्ञायवाग्नये त्वारूपं सोमंसुनवामअभिषुणवाम जातवेदोगुणकमग्निंयष्टुंसोमाभिषवंकरवामेत्यर्थः सोग्निः अरातीयतः अरातिंशत्रुमिवास्मानाचरतः शत्रोर्वेदोधनंनिदहाति नितरां दहतुभस्मीकरोतु अपिचसोग्निर्नोस्मान् विश्वा विश्वानिसर्वाणिदुर्गाणिदुर्गमनानि भोक्तुमशक्यानिदुःखानिअतिपर्षत् अतिपारयतु अतिक्रमय्यदुःखरहितंसुखंप्रापयतु तत्रदृष्टान्तः—नावेवसिन्धुं यथाकश्चित्कर्णधारः ग्राहादिभिर्दुष्टसत्त्वैराकुलितांनदींनावातारयति तद्वत् तथादुरितादुरितानि दुःखहेतुभूतानिपापानिअस्मानग्निरतिपारयतु दुःखनिमित्तात्पापादप्यस्मानुत्तारयत्वित्यर्थः । अत्रनिरुक्तम्—जातवेदाःकस्माज्जातानिवेदजातानिवैनंविदुर्जातेजाते विद्यतइतिवाजातवित्तोवाजातधनोजातविद्योवाजातप्रज्ञानोयत्तज्जातःपशूनविन्दतेतितज्जातवेदसोजातवेदस्त्वमितिहिब्राह्मणमित्यादि[1] ॥ जातवेदसे जातानिवेत्तीतिजातवेदाः गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वंचेतिवचनात्कारकपूर्वाद्वेत्तेरसुन् पूर्वपदप्रकृतिस्वरत्वम् । अरातीयतः नंविद्यतेरातिर्दानमस्मिन्नित्यरातिःशत्रुः तमिवास्मानाचरति उपमानादाचारेइत्युपमानभूतात् कर्मणःक्यच् क्यजन्ताल्लटःशतृ शतुरनुमइतिशसउदात्तत्वम् । दहाति दहभस्मीकरणे लेटयाडागमः । वेदः विद्यतेलभ्यतेइतिवेदोधनं विद्लृलाभे औणादिकःकर्मण्यसुन् । पर्षत् पृपालनपूरणयोः अस्मादन्तर्भावितण्यर्थाल्लेटयडागमः सिब्बहुलंलेटीतिसिप् । दुर्गाणि दुःखेन गम्यन्तएष्विति सुदुरोरधिकरणेइतिगमेर्डः ॥ १ ॥

१. हम सर्वभूतज्ञ अग्नि को उद्देश्य कर सोम का अभिषव करते हैं। जो हमारे प्रति शत्रु की तरह आचरण करते हैं, उनका धन अग्नि दहन करें। जैसे नौका से नदी पार की जाती है, उसी तरह वे हमें सारे दुःखों से पार करा दें। अग्नि हमें पापों से पार करा दें।

॥ इतिप्रथमस्यसप्तमेसप्तमोवर्गः ॥ ७ ॥

---

1 नि० ७. १९. ।

सयोवृषेत्येकोनविंशत्यृचंसप्तमंसूक्तम् तत्रानुक्रम्यते—सयोवृषैकोनावार्षागिराऋज्राश्वाम्बरीषसहदेवभयमानसुराधसइति । वृषागिरोमहाराजस्यपुत्रभूताः ऋज्राश्वादयःपञ्चराजर्षयः सहेदंसूक्तंददृशुः अवस्तेअस्यसूक्तस्यऋषयः उक्तंह्यार्षानुक्रमण्याम्—सूक्तंसयोवृषेत्येतत्पञ्चवार्षागिराविदुः । नियुक्तानामधेयैःस्वैरपिचैतत्यदित्यृचीति । अनादेशपरिभाषयात्रिष्टुप् इन्द्रोदेवता दशरात्रस्यषष्ठेहनिमरुत्वतीयेइदंसूक्तम् तथाचसूत्रितम्—यंत्वंरथमिन्द्रसयोवृषेन्द्रमरुत्वइतितिस्रइतिमरुत्वतीयइति ।

तत्रप्रथमामृचमाह—

सयोवृषावृष्ण्येभिःसमोकामहोदिवःपृथिव्याश्चसम्राट् ।
सतीनसत्वाहव्योभरेषुमरुत्वान्नोभवत्विन्द्रऊती ॥ १ ॥

सः । यः । वृषा । वृष्ण्येभिः । सम्ऽओकाः । महः । दिवः । पृथिव्याः । च । सम्ऽराट् । सतीनऽसत्वा । हव्यः । भरेषु । मरुत्वान् । नः । भवतु । इन्द्रः । ऊती ॥१॥

यइन्द्रोवृषाकामानांवर्षिता वृष्ण्येभिर्वृष्णिभवैर्वीर्यैःसमोकाःसम्यक्समवेतःसङ्गतःमहोमहतोदिवोद्युलोकस्यपृथिव्याःप्रथितायाभूमेश्चसम्राडीश्वरः सतीनसत्वा सतीनमित्युदकनाम उदकस्यसत्वासादयितागमयिता भरेषुसङ्ग्रामेषुहव्यःसर्वैःस्तोतृभिराह्वातव्यःएवंभूतोमरुत्वान् मरुद्भिर्युक्तःसइन्द्रोनोस्माकंऊतीऊतयेरक्षणायभवतु॥ वृष्ण्येभिः वृषन्शब्दाद्भवेछन्दसीतियत् अल्लोपोनस्त्यकारलोपःयेचाभावकर्मणोरितिप्रकृतिभावस्तुव्यत्ययेननभवति। महः महपूजायां क्विप् यद्वा महच्छब्देअच्छब्दलोपः सावेकाचइतिविभक्तेरुदात्तत्वम् । सम्राट् मोराजिसमःक्वाविति राजतौ क्विबन्तेउत्तरपदेसमोमकारस्यमकारादेशः मकारस्यचमकारवचनमनुस्वारबाधनार्थम् । सतीनसत्वा षद्लृविशरणगत्यवसादनेषु मेघेषुनिषीदतीतिसतीनंवृष्ट्युदकं औणादिकईनप्रत्ययस्तकारान्तादेशश्च यद्वा सतीमाध्यमिकावाक्साइनाईश्वरायस्यतत्सतीनं व्यत्ययेनपुंवद्भावाभावः तत्सत्वा सदेरन्तर्भावितण्यर्थात्मईरसद्योस्तुट्चेत्यौणादिकोवनिप्तुडागमश्च मरुद्वृधादित्वात्पूर्वपदान्तोदात्तत्वम् । मरुत्वान् झयइतिमतुपोवत्वम् । ऊती ऊतियूतीत्यादिनाक्तिनउदात्तत्वम् सुपांसुलुगितिचतुर्थ्याःपूर्वसवर्णदीर्घः ॥ १ ॥

१. जो इन्द्र अभीष्टवर्षी, वीर्यशाली, दिव्य लोक और पृथिवी के सम्राट् और वृष्टि-दाता तथा रणक्षेत्र में आह्वान के योग्य हैं, वे मरुतों के साथ, हमारी रक्षा में तत्पर हों।

द्वितीयामृचमाह—

यस्यानाप्तःसूर्यस्येवयामोभरेभरेवृत्रहाशुष्मोअस्ति ।
वृषन्तमःसखिभिःस्वेभिरेवैर्मरुत्वान्नोभवत्विन्द्रऊती ॥ २ ॥

यस्य । अनाप्तः । सूर्यस्यऽइव । यामः । भरेऽभरे । वृत्रऽहा ।
शुष्मः । अस्ति । वृषन्ऽतमः । सखिऽभिः । स्वेभिः । एवैः ।
मरुत्वान् । नः । भवतु । इन्द्रः । ऊती ॥ २ ॥

यस्येन्द्रस्ययामोगतिःअनाप्तःपरैरप्राप्तःसूर्यस्येव यथासूर्यस्यगतिःअन्यैर्नप्राप्तुंशक्यते तद्व-त्स्वेभिरात्मीयैरेवैर्गमनशीलैःसखिभिर्मित्रभूतैर्मरुद्भिःसह वृषन्तमःअतिशयेनकामानांवर्षिताभरे-भरेसर्वेषुसंग्रामेषुवृत्रहाशत्रूणांहन्ता शुष्मःसर्वेषामसुराणांशोषकः एवंभूतोयइन्द्रोस्तिविद्यतेसमरु-त्वानिन्द्रोनोस्माकंरक्षणायभवतु ॥ यामः यामापणे आर्तिस्तुस्वित्यादिनाभावेमन्प्रत्ययः नित्त्वादा-द्युदात्तत्वम् । शुष्मः शुषशोषणे अविषिविशुषिभ्यःकिदितिमन्प्रत्ययः नित्त्वादाद्युदात्तत्वम् । अस्ति यद्वृत्तयोगादनिघातः । वृषन्तमः वृषन्शब्दादुत्तरस्यतमपोनाद्धस्येतिनुट् । एवैः इणूगतौ इणशीङ्भ्यांवन् ॥ २ ॥

२. सूर्य की तरह जिनकी गति, दूसरे के लिए, अप्राप्य है, जो संग्राम में शत्रु-हन्ता और रिपु-शोषक हैं और जो, अपने गमनशील सखा मरुतों के साथ, यथेष्ट परिमाण में अभीष्ट द्रव्य दान करते हैं, वे इन्द्र, मरुतों के साथ, हमारी रक्षा में तत्पर हों।

दिवोनयस्यरेतसोदुघानाःपन्थासोयन्तिशवसापरीताः ।
तरद्द्वेषाःसासहिःपौंस्येभिर्मरुत्वान्नोभवत्विन्द्रऊती ॥ ३ ॥

दिवः । न । यस्य । रेतसः । दुघानाः । पन्थासः । यन्ति । शवसा ।
अपरिऽइताः । तरत्ऽद्वेषाः । ससहिः । पौंस्येभिः । मरुत्वान् । नः ।
भवतु । इन्द्रः । ऊती ॥ ३ ॥

यस्येन्द्रस्यपन्थासोरश्मयः रेतसोवृष्ट्युदकानिदुघानाः दुहन्तःप्रवर्षन्तःयन्तिनिर्गच्छन्ति द्युलोकादितस्ततः प्रसरन्ति तत्रदृष्टान्तः—दिवोन यथाद्योतमानस्यसूर्यस्यकिरणावृष्टिंकुर्वन्तो-नभःस्थलान्निर्गच्छन्तितद्वत् कीदृशारश्मयः शवसाबलेनसहिताः अपरीताः परैरनभिगताःदु-ष्प्रापाइत्यर्थः सोयमिन्द्रस्तरद्द्वेषाः द्वेषांसिशत्रूंस्तरन्जितशत्रुकइत्यर्थः पौंस्येभिर्बलैः सासहिः शत्रूणामभिभविता एवंभूतोमरुत्वानिन्द्रोनोस्माकं रक्षणायभवतु ॥ रेतसः रेतइत्युदकनाम री-

यतेगच्छतीतिरितः रीगतिरेषणयोः सुरीभ्यांतुट्चेतिअसुन् तुडागमश्च शसोव्यत्ययेनङसादेशः। दुघानाः दुहप्रपूरणे कर्तरिलट् शानच् अदादित्वाच्छपोलुक् व्यत्ययेनघत्वम् वृषादेराकृतिगणत्वाद्याद्युदात्तत्वम्। पन्थासः पतन्तीतिपन्थानोरश्मयः पतेस्थचेतिइनिप्रत्ययः थकारान्तादेशश्च जसिपथिमथ्यृभुक्षामादितिव्यत्ययेनात्वम् आज्जसेरसुक् यद्वा पन्थानइत्यत्रवर्णव्यापत्त्यानकारस्यसकारः पथिमथोःसर्वनामस्थानेइत्याद्युदात्तत्वम्। सासहिः षहअभिभवे उत्सर्गश्छन्दसीतिवचनात् आदृगमहनइतिकिप्रत्ययः लिड्वद्भावाद्विर्वचनम्॥ ३॥

३. सूर्य-किरणों की तरह जिनकी सतेज और दुष्प्रापणीय किरणें वृष्टि-जल का दोहन करके चारों ओर फैल जाती हैं, वे ही शत्रु-पराजयी और अपने पौरुष से लब्ध-विजय इन्द्र, मरुतों के साथ हमारी रक्षा में तत्पर हों।

सोअङ्गिरोभिरङ्गिरस्तमोभूद्वृषावृषभिःसखिभिःसखासन्।
ऋग्मिभिर्ऋग्मीगातुभिर्ज्येष्ठोमरुत्वान्नोभवत्विन्द्रऊती ॥ ४ ॥

सः। अङ्गिरःऽभिः। अङ्गिरःऽतमः। भूत्। वृषा। वृषऽभिः।
सखिऽभिः। सखा। सन्। ऋग्मिऽभिः। ऋग्मी। गातुऽभिः।
ज्येष्ठः। मरुत्वान्। नः। भवतु। इन्द्रः। ऊती॥ ४॥

सइन्द्रः अङ्गिरोभिः अङ्गन्तिगच्छन्तीत्यङ्गिरसोगन्तारः तेभ्योप्यङ्गिरस्तमोभूत् अतिशयेनगन्ताभवति वृषभिर्वृषा वर्षितृभ्योप्यतिशयेनवर्षिता सखिभिः समानख्यानेभ्योमित्रभूतेभ्योपिसखाअतिशयेनहितकारी एवंभूतःसन् ऋग्मिभिरर्चनीयेभ्योपिऋग्मी अर्चनीयोभवति गातुभिः गातव्येभ्यः स्तोतव्येभ्योपिज्येष्ठः अतिशयेनस्तोतव्यः एवंगुणविशिष्टोमरुत्वानिन्द्रोरक्षणायभवतु ॥ अङ्गिरोभिः अगिरगिलगिगत्यर्थाः अङ्गिराअप्सराइत्यौणादिकोऽसुन्प्रत्ययोनिपात्यते इदमादिषुसर्वत्रपञ्चम्यर्थेतृतीया। ऋग्मिभिः ऋचस्तुतौ संपदादिलक्षणोभावे क्विप् मत्वर्थीयोमिनिः पदत्वात्कुत्वम् जश्त्वंच। गातुभिः गास्तुतौ कमिमनिजनीत्यादिनाकर्मणितुप्रत्ययः॥ ४॥

४. वे गमनशील लोगों में अत्यन्त शीघ्रगामी, अभीष्ट-दाताओं में प्रधान अभीष्ट-दाता और मित्रों में उत्तम मित्र होकर पूजनीयों में विशेष पूजा-पात्र और स्तुति-पात्रों में श्रेष्ठ हुए हैं। वे मरुतों के साथ हमारे रक्षण में तत्पर हों।

ससूनुभिर्नरुद्रेभिर्ऋभ्वानृषाह्येसासह्वाँअमित्रान्।
सनीळेभिःश्रवस्यानितूर्वन्मरुत्वान्नोभवत्विन्द्रऊती ॥ ५॥ ८॥

सः । सूनुऽभिः । न । रुद्रेभिः । ऋभ्वा । नृऽसह्ये । ससह्वान् ।
अमित्रान् । सऽनीळेभिः । श्रवस्यानि । तूर्वन् । मरुत्वान् । नः ।
भवतु । इन्द्रः । ऊती ॥ ५ ॥ ८ ॥

सूनुभिर्न पुत्रैरिव रुद्रेभिः रुद्रपुत्रैर्मरुद्भिर्युक्तः ऋभ्वामहान् एवंभूतः सइन्द्रः नृषाह्येनृभिः पुरुषैःसोढव्येसङ्ग्रामे अमित्रान् शत्रून्ससह्वानभिभूतवान् अपिच सनीळेभिः समाननिलयैर्मरुद्भिः सह श्रवस्यानिश्रवइत्यन्ननाम तद्धेतुभूतान्युदकानितूर्वन्मेघात्प्रच्यावयन् मरुत्वानिन्द्रोस्माकंरक्षणायभवतु ॥ नृषह्ये षहमर्षणे शकिसहोश्चेतिकर्मणियत् अन्येषामपिदृश्यतइतिसंहितायांधात्वकारस्यदीर्घत्वम् यतोनावइत्याद्युदात्तत्वेकृदुत्तरपदप्रकृतिस्वरत्वम् । ससह्वान् षहअभिभवे लिटःक्वसुः अभ्यासदीर्घत्वंछान्दसम् । अमित्रान् मित्राण्येषुनसन्तीत्यमित्राः नञोजरमरमित्रमृताइत्युत्तरपदाद्युदात्तत्वम् । समानंनीळंयेषान्तेसनीळाः समानस्यच्छन्दसीतिसभावः ॥ ५ ॥

५. इन्द्र, रुद्र-पुत्र मरुतों की सहायता से, बलशाली होकर, मनुष्यों के संग्राम में शत्रुओं को परास्त करके तथा अपने सहवासी मरुतों की अन्नोत्पादक वृष्टि भेजकर, मरुतों के साथ, हमारी रक्षा में तत्पर बनो । ॥ इतिप्रथमस्यसप्तमेष्टमोवर्गः ॥ ८ ॥

षष्ठीमृचमाह—

समन्युमीःसमदनस्यकर्तास्माकेभिर्नृभिःसूर्यंसनत् ।
अस्मिन्नहन्सत्पतिःपुरुहूतोमरुत्वान्नोभवत्विन्द्रऊती ॥ ६ ॥

सः । मन्युऽमीः । सऽमदनस्य । कर्ता । अस्माकेभिः । नृऽभिः ।
सूर्यम् । सनत् । अस्मिन् । अहन् । सत्ऽपतिः । पुरुऽहूतः ।
मरुत्वान् । नः । भवतु । इन्द्रः । ऊती ॥ ६ ॥

शत्रुभिरपहृतासुगोषु तैःसहयुद्धार्थंविनिर्गताऋज्राश्वादयोयेनसूक्तेनेन्द्रमस्तुवन् सइन्द्रः मन्युमीः मन्योःकोपस्यनिर्माता यद्वा अभिमन्यमानस्यशत्रोर्हिंसकः अपिच समदनस्यसङ्ग्रामस्य कर्तासत्पतिः सतांपालयितापुरुहूतः बहुभिर्यजमानैः आहूतः एवंगुणविशिष्टःसःअस्मिन्नहन् अस्मिन्दिवसेअस्माकेभिः अस्माकैः अस्मदीयैः नृभिःपुरुषैः सूर्यंसूर्यप्रकाशंसनत् संभक्तंकरोतु शत्रुपुरुषैस्तुदृष्टिनिरोधकमन्धकारंसंयोजयतु सचमरुत्वानिन्द्रोस्माकंरक्षणायभवतु ॥ मन्युमीः मन्युंमिनातीतिमन्युमीः मीञ्हिंसायां क्विप् । समदनस्य सहमाद्यन्त्यस्मिन्नितिसमदनःसङ्ग्रामः मदीहर्षे अधिकरणेल्युट् सहस्यसःसंज्ञायामितिसभावः । अस्माकेभिः तस्मिन्नणिचयुष्माका-

स्माकावित्यणिअस्मच्छन्दस्यास्माकादेशः संज्ञापूर्वकस्यविधेरनित्यत्वाद्वृध्यभावः बहुलंछन्दसीतिभिसऐसभावः स्वरस्तुमास्माकासश्चसूरयइत्यत्रोक्तः। सनव वनषणसंभक्तौ लेटचडागमः। अहन् सुपांसुलुगितिसप्तम्यालुक्। सत्पतिः पत्यावैश्वर्येइतिपूर्वपदप्रकृतिस्वरत्वम् ॥ ६ ॥

६. शत्रु-हन्ता, संग्राम-कर्त्ता, सल्लोकाधिपति और बहुत लोकों-द्वारा आहूत इन्द्र हम ऋषियों को आज सूर्य का आलोक या प्रकाश भोग करने दें (और शत्रुओं को अन्धकार दें) और वे मरुतों के साथ, हमारी रक्षा में परायण हों।

तमूतयोरणयञ्छूरसातौतंक्षेमस्यक्षितयःकृण्वतत्राम्।
सविश्वस्यकरुणस्येशएकोमरुत्वान्नोभवत्विन्द्रऊती ॥ ७॥

तम्। ऊतयः। रणयन्। शूरऽसातौ। तम्। क्षेमस्य। क्षितयः।
कृण्वत। त्राम्। सः। विश्वस्य। करुणस्य। ईशे। एकः।
मरुत्वान्। नः। भवतु। इन्द्रः। ऊती ॥ ७॥

तमिन्द्रंशूरसातौ शूरैर्वीरपुरुषैःसम्भजनीयेसङ्ग्रामे ऊतयोगन्तारोमरुतः रणयन्रमयन्ति यद्वा प्रहरभगवोजहिवीरयस्वेत्येवंरूपंशब्दमिन्द्रमुद्दिश्यकुर्वन्ति अपिच क्षितयोमनुष्याः तमिन्द्रंक्षेमस्यरक्षणीयस्यसर्वस्यधनस्य त्रां त्रातारंकृण्वत कुर्वन्ति देवतान्तरादस्यकोतिशयइतिचेदुच्यते सइन्द्रोविश्वस्यसर्वस्यकरुणस्यअभिमतफलनिष्पादनरूपस्यकर्मणएकोऽसहायएवईशेईष्टेअन्यत्पूर्ववत्॥ ऊतयः अवतेर्गत्यर्थात्कृत्यल्युटोबहुलमितिकर्तरिक्तिन् तितुत्रेतीट्प्रतिषेधः ज्वरत्वरेत्यादिनावकारस्योपधायाश्चऊठ् ऊतियूतीत्यादिनाक्तिनउदात्तत्वम् यद्वा कर्तरिक्तिच्। रणयन् रमतेर्हेतुमण्णिजन्ताद्वर्तमानेछान्दसोलङ् अन्त्यविकारश्छान्दसः यद्वा रणशब्दार्थः अस्माण्णिजन्तात्पूर्ववल्लङ्। त्राम् त्रैङ्पालने त्रायतेइतित्रां क्विप्चेतिचशब्देनदृशिग्रहणानुकर्षणान्निरुपपदादपिक्विप्। करुणस्य डुकृञ्करणे कृवृदारिभ्यउनन्नितिभावेउनन् व्यत्ययेनमत्ययाद्युदात्तत्वम्। ईशे ईशऐश्वर्ये लोपस्तआत्मनेपदेष्वितितलोपः ॥७॥

७. सहायक मरुत् संग्राम में इन्द्र को, शब्द-द्वारा, उत्तेजित करते हैं। मनुष्य इन्द्र को धन-रक्षक बनावें। इन्द्र सर्वफल-दायी कर्मों के ईश्वर हैं। वे मरुतों के साथ, हमारे रक्षण-परायण हों।

तमप्सन्तशवसउत्सवेषुनरोनरमवसेतंधनाय।
सोअन्धेचित्तमसिज्योतिर्विदन्मरुत्वान्नोभवत्विन्द्रऊती ॥ ८॥

तम् । अप्सन्त । शवसः । उत्ऽसवेषु । नरः । नरम् । अवसे । तम् ।
धनाय । सः । अन्धे । चित् । तमसि । ज्योतिः । विदत् ।
मरुत्वान् । नः । भवतु । इन्द्रः । ऊती ॥ ८ ॥

नरोनेतारःस्तोतारः शवसोबलस्यसंबन्धिषुउत्सवेषुसङ्ग्रामेषुनरं जयस्यनेतारंतमिन्द्रंअप्सन्त आप्नुवन्ति किमर्थं अवसे अन्नार्थंरक्षणार्थंवा तथाधनायधनार्थंचतमिन्द्रंमाप्नुवन्ति तस्मात्सइन्द्रः तमसिदृष्टिप्रतिबन्धकेअन्धेचिदाध्यानरहितेचित्तव्यामोहकरेपिसङ्ग्रामे ज्योतिःविजयलक्षणंप्रकाशंविदत् लंभयति तस्मात्तमेवमाप्नुवन्तीत्यर्थः अन्यत्समानम्॥ अप्सन्त आप्लृव्याप्तौ लङि व्यत्ययेनात्मनेपदम् व्यत्ययेनक्सप्रत्ययः व्यत्ययेनधातोर्ह्रस्वत्वम्। विदत् विद्लृलाभे छन्दसिलुङ्लङ्लिटइतिवर्तमानेछान्दसोलुङ् लृदित्वात् च्लेरङादेशः बहुलंछन्दस्यमाङ्योगेपीत्यडभावः ॥८॥

८. लड़ाई के मैदान में, रक्षा और धन की प्राप्ति के लिए, नेता लोग इन्द्र की शरण ग्रहण करते हैं; क्योंकि, इन्द्र दृष्टि-प्रतिबन्धक अन्धकार में आलोक प्रदान करते अथवा संग्राम में विजय देते हैं। इन्द्र, मरुतों के साथ, हमारी रक्षा में परायण हों।

सस॒व्येन॑यमति॒व्राध॑तश्चि॒त्सद॑क्षि॒णेसंगृ॑भीता॒कृता॑नि ।
सकी॒रिणा॑चि॒त्सनि॑ता॒धना॑निम॒रुत्वा॑न्नोभवत्विन्द्र॑ऊ॒ती ॥ ९ ॥
सः । स॒व्येन॑ । य॒म॒ति॒ । व्राध॑तः । चि॒त् । सः । द॒क्षि॒णे ।
सम्ऽगृ॑भीता । कृ॒तानि॑ । सः । की॒रिणा॑ । चि॒त् । सनि॑ता । धना॑नि ।
म॒रुत्वा॑न् । न॒ः । भ॒व॒तु॒ । इन्द्र॑ः । ऊ॒ती ॥ ९ ॥

सइन्द्रः सव्येनवामहस्तेनैकहस्तेनव्राधतश्चिद्हिंसतोमहतः शत्रूनपियमतिनियमयति तथासइन्द्रः दक्षिणेनदक्षिणपार्श्वस्थेनहस्तेनैकेन यजमानैःकृतानिहवींषिसंगृभीतासंगृहीतासंगृह्णाति अपिचसइन्द्रः कीरिणाचित् कीर्तयित्रास्तोत्राचस्तुतःसन् धनानिसनिता प्रदानशीलोभवति हविःप्रदातॄणामिवस्तोतॄणामपिधनंप्रयच्छतीत्यर्थः शिष्टंस्पष्टम्। यमति यमउपरमे णिचि अमन्तत्वान्मित्वे ह्रस्वइतिह्रस्वत्वम् छन्दस्युभयथेतिशपआर्धधातुकत्वाण्णेरनिटीतिणिलोपः। व्राधतः वृधुवृद्धौ अस्मादतिप्रत्ययऔणादिकआमागमश्च वृषादित्वादाद्युदात्तत्वम्। संगृभीता ग्रहउपादाने लिङि बहुलंछन्दसीतिविकरणस्यलुक् लिङःसलोपइतिसलोपः ग्रहिज्यादिनासंप्रसारणम् हृग्रहोर्भइतिभत्वम् ग्रचोतस्तिङइतिदीर्घः। सनिता षणुदाने ताच्छीलिकस्तृन्। धनानि नलोकाव्ययेतिषष्ठीप्रतिषेधः ॥ ९ ॥

९. इन्द्र वाम हस्त द्वारा हिंसकों को निवारण करते और दक्षिण हस्त-द्वारा यजमान का हव्य ग्रहण करते हैं। वे स्तोत्र-द्वारा स्तुत होकर धन प्रदान करते हैं। इन्द्र, मरुतों के साथ, हमारी रक्षा में तत्पर हों।

दशमीमृचमाह—

सग्रामेभिः सनिता सरथेभिर्विदे विश्वाभिः कृष्टिभिर्न्व१द्य।
सपौंस्येभिरभिभूरशस्तीर्मरुत्वान्नो भवत्विन्द्र ऊती ॥ १० ॥ ९ ॥

सः। ग्रामेभिः। सनिता। सः। रथेभिः। विदे। विश्वाभिः।
कृष्टिऽभिः। नु। अद्य। सः। पौंस्येभिः। अभिऽभूः। अशस्तीः।
मरुत्वान्। नः। भवतु। इन्द्रः। ऊती ॥ १० ॥ ९ ॥

सइन्द्रः ग्रामेभिः मरुत्संघैःसह सनिता फलानांप्रदाताभवति सचाद्यास्मिन्नहनि नुक्षिप्रंविश्वाभिः कृष्टिभिः सर्वैर्मनुष्यैरथेभिरिन्द्रसंबन्धिभीरथैः करणभूतैर्विदे विज्ञायते अपिचसइन्द्रः पौंस्येभिः स्वकीयैर्बलैः अशस्तीः अशंसनीयान् शत्रून् अभिभूः अभिभवन्वर्तते मरुत्वान्सइन्द्रोनोस्माकंरक्षणायभवतु ॥ ग्रामेभिः बहुलंछन्दसीतिभिसऐसभावः ग्रामादीनांचेत्याद्युदात्तत्वम्। विदे विदज्ञाने कर्मणिलट् बहुलंछन्दसीतिविकरणस्यलुक् लोपस्तआत्मनेपदेष्वितितलोपः ॥ १० ॥

१०. वे अपने सहायक मरुतों के साथ धन दान करते हैं। आज इन्द्र, अपने रथ-द्वारा, सारे मनुष्यों से परिचित हो रहे हैं। इन्द्र ने अपने पराक्रम से, दुष्ट शत्रुओं को अभिभूत किया है। वे मरुतों के साथ, हमारी रक्षा में तत्पर हों।

॥ इतिप्रथमस्यसप्तमेनवमोवर्गः ॥ ९ ॥

एकादशीमृचमाह—

सजामिभिर्यत्समजाति मीळ्हेऽजामिभिर्वा पुरुहूत एवैः।
अपांतोकस्य तनयस्य जेषे मरुत्वान्नो भवत्विन्द्र ऊती ॥ ११ ॥

सः। जामिऽभिः। यत्। सम्ऽअजाति। मीळ्हे। अजामिऽभिः।
वा। पुरुऽहूतः। एवैः। अपाम्। तोकस्य। तनयस्य। जेषे।
मरुत्वान्। नः। भवतु। इन्द्रः। ऊती ॥ ११ ॥

पुरुहूतोबहुभिर्यजमानैराहूतःसइन्द्रः मीळ्हेसङ्ग्रामे मीळ्हमितिधननाम तद्धेतुत्वात्सङ्ग्रामोपिमीळ्हशब्देनोच्यते जामिभिः बन्धुभिः अजामिभिर्वाबान्धवरहितैर्वाएवैर्युद्धार्थंमरुद्भिःसहयद्यदासम-

जातिसङ्गच्छते तेषामुभयविधानामपांइन्द्रंप्राप्नुवतांपुरुषाणांतोकस्यपुत्रस्यतनयस्यतत्पुत्रस्यचजेषे जयप्राप्तयेसइन्द्रोभवति किमुवक्तव्यंअस्माकंस्तोतॄतमानांजयोभवतीति अन्यत्समानम्॥ समजाति अजगतिक्षेपणयोः लेटयाडागमः। जेषे जिजये औणादिकःसप्रत्ययः चतुर्थ्यर्थेसप्तमी यद्वा जेषुणेषूमेषृगतौ क्विप्चेतिक्विप् सावेकाचइतिविभक्तेरुदात्तत्वम्॥ ११॥

११. अनेक लोगों-द्वारा आहूत होकर बन्धुओं के संग मिलकर या जो बन्धु नहीं हैं, उनको साथ लेकर समर-क्षेत्र में इन्द्र जाते हैं तथा उन शरणागत पुरुषों और उनके पुत्र-पौत्रों का जय-साधन करते हैं। वे मरुतों के साथ हमारी रक्षा में तत्पर हों।

सवंज्रभृद्दस्युहाभीमउग्रःसहस्रचेताःशतनीथऋभ्वा।
चम्रीषोनशवसापाञ्चजन्योमरुत्वान्नोभवत्विन्द्रऊती॥ १२॥

सः। वज्रऽभृत्। दस्युऽहा। भीमः। उग्रः। सहस्रऽचेताः।
शतऽनीथः। ऋभ्वा। चम्रीषः। न। शवसा। पाञ्चऽजन्यः।
मरुत्वान्। नः। भवतु। इन्द्रः। ऊती॥ १२॥

सइन्द्रोवज्रभृत्अन्यैर्भर्तुमशक्यस्यवज्रस्यभर्ता दस्युहा दस्यूनामुपक्षपयितॄणामसुराणांहन्ता भीमः सर्वेषांभयहेतुः उग्रःउद्गूर्णतेजाः सहस्रचेताःबहुविधज्ञानः सर्वज्ञइत्यर्थः शतनीथः बहुस्तुतिर्बहुविधमापणोवा ऋभ्वाउरुभासमानोमहान्वा चम्रीषोन चम्वांचमसेरसात्मनाअवस्थितः सोमइव शवसाबलेनपाञ्चजन्यःगन्धर्वाअप्सरसोदेवाअसुरारक्षांसिपञ्चजनाः निषादपञ्चमाश्चत्वारोवर्णावा तेषुरक्षकत्वेनभवः एवंभूतः समरुत्वानिन्द्रोनोस्माकंरक्षणायभवतु॥ दस्युहा बहुलंछन्दसीतिहन्तेःक्विप्। भीमः ञिभीभये भीमादयोपादानेभियःषुग्वेतिमक्। शतनीथः णीञ् प्रापणे हनिकुषिनीरमिकाशिभ्यःक्थन्नितिक्थन्प्रत्ययः। चम्रीषः इषगतौ चम्वांइष्यतिगच्छतीतिचम्रीषः इगुपधलक्षणःकः वर्णव्यापत्त्यारेफोदीर्घश्च यद्वा चमेरौणादिकईषन्प्रत्ययः पूर्ववद्रेफः। पाञ्चजन्यः भवार्थे बहिर्देवपञ्चजनेभ्यश्चेतिवक्तव्यमितिञ्यप्रत्ययः ञित्त्वादाद्युदात्तत्वम्॥ १२॥

१२. इन्द्र वज्र-धारी, दस्यु-हन्ता, भीम, उग्र, सहस्र-ज्ञान-युक्त, बहु-स्तुति-भाजन और महान् हैं। इन्द्र, सोम-रस की तरह, बल-द्वारा पञ्च श्रेणी (चार वर्ण और पञ्चम वर्ण निषाद) के रक्षक हैं। वे मरुतों के साथ हमारे रक्षण-परायण हों।

तस्यवज्रःक्रन्दतिस्मत्स्वर्षादिवोनत्वेषोरवथःशिमीवान्।
तंसचन्तेसनयस्तंधनानिमरुत्वान्नोभवत्विन्द्रऊती॥ १३॥

तस्य॑ । वज्रः॑ । क्रन्द॑ति । स्मत् । स्वः॒ऽसाः । दि॒वः । न । त्वे॒षः ।
र॒वथः॑ । शिमी॑ऽवान् । तम् । स॒च॒न्ते॒ । स॒नयः॑ । तम् । धना॑नि ।
म॒रुत्वा॑न् । नः॒ । भ॒व॒तु॒ । इन्द्रः॑ । ऊ॒ती ॥१३॥

तस्येन्द्रस्यवज्रः कुलिशः स्मत्भृशंक्रन्दति शत्रूनाक्रन्दयति रोदयतीत्यर्थः यइन्द्रःस्वर्षाः शोभनस्योदकस्यदाता दिवोन दिवःसम्बन्धीसूर्यइव त्वेषः त्विषदीप्तौ रवथः शब्दस्यगर्जनलक्षणस्यकर्ता शिमीवान् शिमीतिकर्मनाम लोकानुग्राहकेणकर्मणायुक्तस्तमिन्द्रंसनयोधनस्यदानानिसचन्तेसेवन्ते तथातंधनानिचसेवन्ते समरुत्वानिन्द्रोनोस्माकंरक्षणायभवतु ॥ क्रन्दति कदिक्रदिक्लदिआह्वानेरोदनेच छन्दस्युभयथेतिशपआर्धधातुकत्वात् णेरनिटीतिणिलोपः । स्वर्षाः सुपूर्वादर्तेर्विच् सुष्ठुअर्तिगच्छतीतिस्वरुदकं तत्सनोतीतिस्वर्षाः षणुदाने जनसनखनक्रमगमोविट् विड्वनोरनुनासिकस्यादित्यात्वम् सनोतेरनइतिषत्वम् । त्वेषः त्विषदीप्तौ पचाद्यच् । रवथः रुशब्दे शीङ्शपिरुगमिवञ्चिजीविप्राणिभ्योथइत्यथप्रत्ययः गुणावादेशौ । सनयः सनोतेर्भावेऔणादिकइप्रत्ययः ॥ १३ ॥

१३. इन्द्र का वज्र शत्रुओं को रुलाता है। इन्द्र शोभन जलदान करते हैं। वे सूर्य की तरह दीप्तिमान् हैं। वे गरजते हैं। वे सामयिक कर्म में रत रहते हैं। धन और धन-दान इन्द्र की सेवा करते हैं। मरुतों के साथ वे हमारी रक्षा में तत्पर हों।

यस्याज॑स्रं॒शव॑सा॒मान॑मु॒क्थंप॑रिभु॒जद्रोद॑सीवि॒श्वतः॑सीम् ।
सपा॑रिष॒त्क्रतु॑भिर्मन्दसा॒नोम॒रुत्वा॑न्नोभव॒त्विन्द्र॑ऊ॒ती ॥ १४ ॥

यस्य॑ । अज॑स्रम् । शव॑सा । मान॑म् । उ॒क्थम् । प॒रि॒ऽभु॒जत् ।
रोद॑सी॒ इति॑ । वि॒श्वतः॑ । सी॒म् । सः । पा॒रि॒ष॒त् । क्रतु॑ऽभिः ।
म॒न्द॒सा॒नः । म॒रुत्वा॑न् । नः॒ । भ॒व॒तु॒ । इन्द्रः॑ । ऊ॒ती ॥ १४ ॥

– यस्येन्द्रस्यउक्थंप्रशस्यं शवसा मानं बलेनसर्वस्यपरिच्छेदकंसर्वेषांबलस्योपमानभूतंवा रोदसी द्यावापृथिव्यौ विश्वतःसींअजस्रमनवरतं परिभुजत् परितःसर्वतोभुनक्ति पालयति सइन्द्रः क्रतुभिरस्माभिःकृतैर्यागैर्मन्दसानोमोदमानःसन् पारिषत्अस्मान्दुरितात्पारयतु ॥ उक्थं वचपरिभाषणे पातॄतुदिवचीत्यादिनाकर्मणिथक् वचिस्वपीत्यादिनासंप्रसारणम् । परिभुजत् भुजपालनाभ्यवहारयोः लेट्यडागमः व्यत्ययेनशः । परिषत् पारतीरकर्मसमाप्तौ लेट्यडागमः सिब्बहुलंलेटीतिसिप् तस्यार्धधातुकत्वादिट् व्यत्ययेनणिलोपः । मन्दसानः मदिस्तुतिमोदमदस्वप्नकान्तिगतिषु ऋञ्जिवृधिमन्दिसहिभ्यःकिदित्यसानच्प्रत्ययः ॥ १४ ॥

१४. सारे बलों का उपमानभूत जिनका बल उभय (पृथिवी और अन्तरिक्ष) लोकों का सदा, चारों ओर से, पालन करता है, वे हमारे यज्ञ से परितुष्ट होकर हमारे पापों से हमें पार करा दें। वे मरुतों के साथ हमारी रक्षा में तत्पर हों।

नयस्यदेवादेवतानमर्ताआपश्चनशवसोअन्तमापुः।
सप्ररिक्वात्वक्षसाक्ष्मोदिवश्चमरुत्वान्नोभवत्विन्द्रऊती ॥ १५ ॥ १० ॥

न। यस्य। देवाः। देवता। न। मर्ताः। आपः। चन। शवसः।
अन्तम्। आपुः। सः। प्रऽरिक्वा। त्वक्षसा। क्ष्मः। दिवः। च।
मरुत्वान्। नः। भवतु। इन्द्रः। ऊती ॥ १५ ॥ १० ॥

देवतादेवस्यदानादिगुणयुक्तस्ययस्येन्द्रस्यशवसोबलस्यान्तमवसानं देवाःवस्वाद्यादेवगणाः नापुः नानशिरे तथामर्ताः मनुष्याआपश्चन आपोपिनमापुः सतादृशइन्द्रः त्वक्षसा शत्रूणांतनूकर्त्राआत्मीयेनबलेनक्ष्मः पृथिव्याः दिवश्चस्वर्गस्यच प्ररिक्वाप्रकर्षेणरेचकोभवति लोकद्वयादप्यस्यबलंअतिरिच्यतइत्यर्थः मरुद्भिर्युक्तःसइन्द्रोनोस्माकमूतीऊतयेरक्षणायभवतु ॥ देवता देवएवदेवता देवात्तलितिस्वार्थेतल् सुपांसुलुगितिषष्ठ्यालुक्। मर्ताः मृङ्प्राणत्यागे असिहसीत्यादिनातन्प्रत्ययः नित्त्वादाद्युदात्तत्वम्। प्ररिक्वा रिचिर्विरेचने अन्येभ्योपिदृश्यन्तइतिक्वनिप् अन्त्यविकारश्छान्दसः। त्वक्षसा तक्षूत्वक्षूतनूकरणे असुन् नित्त्वादाद्युदात्तत्वम्। क्ष्मः क्ष्मेतिपृथिवीनाम आतोधातोरित्यत्रआतइतियोगविभागादिष्टसिद्धिरित्यभिधानात् ङसिभसंज्ञायामाकारलोपः यद्वा क्ष्मायीविधूनने अस्मात् क्विप्चेतिक्विप् वेरपृक्तलोपात्पूर्वंवलिलोपः अन्यत्समानम् उदात्तनिवृत्तिस्वरेणविभक्तेरुदात्तत्वम्॥ १५ ॥

१५. देव, मनुष्य या जल-समूह जिन देव (इन्द्र) के बल का अन्त नहीं पाते, वे अपने बल-द्वारा पृथिवी और आकाश से भी अधिक हो गये हैं। वे मरुतों के साथ, हमारी रक्षा में परायण हों।

रोहिच्छ्यावासुमदंशुर्ललामीर्द्युक्षाराय‌ऋज्राश्वस्य।
वृषण्वन्तंबिभ्रतीधूर्षुरथंमन्द्राचिकेतनाहुषीषुविक्षु ॥ १६ ॥

रोहित्। श्यावा। सुमत्ऽअंशुः। ललामीः। द्युक्षा। राये।
ऋज्रऽअश्वस्य। वृषण्ऽवन्तम्। बिभ्रती। धूःऽसु। रथम्। मन्द्रा।
चिकेत। नाहुषीषु। विक्षु ॥ १६ ॥

रोहित् रोहितवर्णा श्यावा श्यामवर्णा उभयोः पार्श्वयोरुभयविधवर्णयुक्तेत्यर्थः सुमदंशुः सुमवस्वतःमांशुः उक्तंचयास्केन—सुमवस्वयमित्यर्थः अतिदीर्घावयवा ललामीः पुंस्त्ववती अश्वभूषणयुक्तावा द्युक्षा दिविद्युलोकेकृतनिवासा ऋज्राश्वस्यएतत्संज्ञस्यराजर्षेःरायेधनार्थं वृषण्वन्तं वृष्णासेक्त्रेन्द्रेणयुक्तंरथं धूर्षुयुगसम्बन्धिषुवहनप्रदेशेषुबिभ्रतीवहन्ती मन्द्रासर्वेषामाह्लादकरी अश्वपंक्तिः नाहुषीषु नहुषामनुष्याः तत्संबन्धिनीषु विक्षुसेनालक्षणासुप्रजासु चिकेतज्ञायते ईदृश्याश्वपंक्त्यायुक्तः इन्द्रः संग्रामेषुअनुग्राहकतयाप्रादुर्भवतीत्यर्थः ॥ ललामीः ललामशब्दात् छन्दसीवनिपाविति मत्वर्थीयईकारः अङ्यन्तत्वात्सुलोपाभावः। द्युक्षा क्षिनिवासगत्योः औणादिकोडप्रत्ययः ततष्टाप्। ऋज्राश्वस्य ऋजगतिस्थानार्जनोपार्जनेषु ऋजेन्द्रेत्यादिनारकप्रत्ययान्तोनिपातितः ऋज्रागतिमन्तोश्वायस्य बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्। वृषण्वन्तं अनोनुडिति मतुपोनुट्। चिकेत कितज्ञाने छन्दसिलुङ्लङ्लिटइतिवर्तमानेकर्मणिलिट् व्यत्ययेनतिप्॥१६॥

१६. दीर्घावयव, अलङ्कारधारी, आकाशवासी और रोहितवर्ण एवं श्यामवर्ण दोनों इन्द्र के घोड़े, ऋजाश्व नामक राजर्षि को धन देने के लिए, अभीष्टदाता इन्द्र से युक्त, रथ का सम्मुख भाग धारण करके प्रसन्न-वदन मनुष्य-सेना-द्वारा परिचित होते हैं।

सप्तदशीमृचमाह—

एतत्त्यत्तइन्द्रवृष्णउक्थंवार्षागिराअभिगृणन्तिराधः।
ऋज्राश्वःप्रष्टिभिरम्बरीषःसहदेवोभयमानःसुराधाः॥ १७॥

एतत्। त्यत्। ते। इन्द्र। वृष्णे। उक्थम्। वार्षागिराः। अभि। गृणन्ति। राधः। ऋज्रऽअश्वः। प्रष्टिऽभिः। अम्बरीषः। सहऽदेवः। भयमानः। सुऽराधाः॥ १७॥

हेइन्द्र वृष्णःकामानांवर्षितुस्तेतवत्यत्तदेतत् उक्थंस्तोत्रंराधःसंराधकंत्वत्प्रीतिहेतुं वार्षागिरावृषागिरोराज्ञःपुत्राऋज्राश्वादयः अभिगृणन्ति आभिमुख्येनवदन्ति वार्षागिराइत्येतत्विवृणोति ऋज्राश्वःएतत्संज्ञोराजर्षिःप्रष्टिभिः पार्श्वस्थैरन्यैर्ऋषिभिःसह इन्द्रमस्तौत् केते पार्श्वस्थाः अम्बरीषादयश्चत्वारोराजर्षयः॥ वार्षागिराः तस्यापत्यमित्यण्प्रत्ययः। गृणन्ति गॄशब्दे प्वादीनां ह्रस्वइतिह्रस्वत्वम्। राधः राधसाधसंसिद्धौ राध्नोतिसमृद्धोभवत्यनेनेतिराधः करणेअसुन्। ऋज्राश्वः ऋज्रागतिमन्तोश्वायस्यसतथोक्तः। अम्बरीषःअविशब्दे औणादिकईषन्प्रत्ययः। सहदेवः देवैःसहवर्ततइति वोपसर्जनस्येतिविकल्पनात्सभावाभावः। भयमानः ञिभीभये असमादन्त-

१ नि० ६.२२। २ पुंश्त्ववतीत्यपिपाठः।

भाँवितण्यर्थाद्व्यत्ययेनशानच् बहुलंछन्दसीतिशपःश्लोरभावः अदुपदेशाल्लसार्वधातुकानुदात्तत्वेधातुस्वरएवशिष्यते। सुराधाः राधइतिधननाम शोभनंराधोयस्य सोर्मनसीअलोमोषसीइत्युत्तरपदाद्युदात्तत्वम् ॥ १७ ॥

१७. अभीष्ट-दाता इन्द्र, वृषागिर के पुत्र ऋजाश्व, अम्बरीष, सहदेव, भयमान और सुराधा तुम्हारी प्रीति के लिए तुम्हारा यह स्तोत्र उच्चारण करते हैं।

दस्यूञ्छिम्यूँश्चपुरुहूतएवैर्हत्वापृथिव्यांशर्वानिबर्हीत्।
सनत्क्षेत्रंसखिभिःश्वित्न्येभिःसनत्सूर्यंसनदपःसुवज्रः ॥ १८ ॥

दस्यून्। शिम्यून्। च। पुरुऽहूतः। एवैः। हत्वा। पृथिव्याम्। शर्वा। नि। बर्हीत्। सनत्। क्षेत्रम्। सखिऽभिः। श्वित्न्येभिः। सनत्। सूर्यम्। सनत्। अपः। सुऽवज्रः ॥ १८ ॥

पुरुहूतः बहुभिर्यजमानैराहूतइन्द्रः एवैर्गमनशीलैर्मरुद्भिर्युक्तःसन् पृथिव्यां भूमौवर्तमानान्दस्यूनुपक्षपयितॄन्शत्रून् शिम्यूंश्चशमयितॄन्वधकारिणोराक्षसादींश्चहत्वाप्रहत्य तदनन्तरंशर्वाहिंसकेनवज्रेणनिबर्हीत् अवधीत् निबर्हयतिर्वधकर्मा एवंशत्रून्निरस्यश्वित्न्येभिः श्वेतवर्णैः अलङ्कारेणदीप्ताङ्गैः सखिभिर्मित्रभूतैर्मरुद्भिःसह क्षेत्रंशत्रूणांस्वभूतांभूमिंसनत्समभाक्षीत् तथावृत्रेणतिरोहितंसूर्यंतस्यवृत्रस्यहननेनसमत् अभजत प्राप्तवानित्यर्थः तथासुवज्रः शोभनवज्रयुक्तइन्द्रः वृत्रेणनिरुद्धाआपोवृष्ट्युदकानिसनत्समभजत् ॥ दस्यून् दसुउपक्षये यजिमनिशुन्धिदसिजनिभ्योयुः वृषादित्वादाद्युदात्तत्वम्। शिम्यून् शमउपशमे शमयति सर्वंतिरस्करोतीतिराक्षसादिःशिम्युः औणादिकोयुन्प्रत्ययः वर्णव्यापत्त्याअकारस्येत्वम्। शर्वा शॄहिंसायाम् अन्येभ्योपिदृश्यन्तइतिवनिप् सुपांसुलुगितितृतीयायाडादेशः। सनत् वनषणसंभक्तौ लङिबहुलंछन्दस्यमाङ्योगेपीत्यडभावः। श्वित्न्येभिः श्विताँवर्णे औणादिकोनक्प्रत्ययः श्वित्नंशुक्लवर्णमर्हन्तीति श्वित्न्याः छन्दसिचेतियः। सुवज्रः आद्युदात्तंद्व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वम् ॥ १८ ॥

१८. इन्द्र ने, अनेक लोगों-द्वारा आहूत होकर और गतिशील मरुतों से युक्त होकर, पृथिवी-निवासी दस्युओं या शत्रुओं और शिम्युओं या राक्षसों को प्रहार करके, हननशील वज्र-द्वारा वध किया। अनन्तर श्वेतवर्ण मित्रों या अलंकार-द्वारा दीप्ताङ्ग मरुतों के साथ क्षेत्रों का भाग कर लिया। शोभन-वज्र-युक्त इन्द्र सूर्य एवं जल-समूह को प्राप्त हुए।

विश्वाहेन्द्रोअधिवक्तानोअस्त्वपरिह्वृताःसनुयामवाजम्।
तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीउतद्यौः ॥ १९ ॥ १ ॥

विश्वाहा । इन्द्रः । अधिऽवक्ता । नः । अस्तु । अपरिऽह्वृताः ।
सनुयाम । वाजम् । तत् । नः । मित्रः । वरुणः । ममहन्ताम् । अदितिः ।
सिन्धुः । पृथिवी । उत । द्यौः ॥ १९ ॥११॥

विश्वाहासर्वकालंनोस्माकमिन्द्रः अधिवक्तास्तु अधिवचनंपक्षपातेनवचनं यथोक्तंब्राह्मणायाधिब्रूयादितिसर्वदास्माकमिन्द्रःपक्षपातवचनयुक्तोभवतु वयंचअपरिह्वृताःअकुटिलगतयःसंतोवाजं हविर्लक्षणमन्नं सनुयाम संभजामहे यदनेनसूक्तेनास्माभिःप्रार्थितंतन्मित्रादयोममहन्तां पूजितंकुर्वन्तु ॥ विश्वाहा विश्वान्यहानिविश्वाहानि अत्यन्तसंयोगेद्वितीया शेश्छन्दसिबहुलमितिशेर्लोपः उपधादीर्घत्वम् नलोपः मरुद्वृधादित्वात्पूर्वपदान्तोदात्तत्वम् । अपरिह्वृताः ह्वृकौटिल्ये निष्ठायां अपरिह्वृताश्चेतिनिपातनाद्वहुभावाभावः अव्ययपूर्वपदप्रकृतिस्वरत्वम् । सनुयाम षणुदाने लिङ्गितनादित्वादुप्रत्ययः वनषणसंभक्तावित्यस्माद्व्यत्ययेनउप्रत्ययः ॥ १९ ॥

१९. सब कालों में वर्त्तमान इन्द्र हमारे पक्ष से बोलें। हम भी अकुटिलगति होकर अन्न भोग करें। मित्र, वरुण, अदिति, सिन्धु, पृथिवी और आकाश उन्हें पूजें।

॥ इतिप्रथमस्यसप्तमेएकादशोवर्गः ॥ ११ ॥

प्रमन्दिनइतिएकादशर्चमष्टमंसूक्तम् आङ्गिरसस्यकुत्सस्यार्षं अष्टम्याद्यास्तस्रस्त्रिष्टुभःशिष्टाःसप्तजगत्यः इन्द्रोदेवता तथाचानुक्रान्तम्—प्रमन्दिनएकादशकुत्सआद्यागर्भस्राविण्युपनिषत् चतुस्त्रिष्टुबन्तमिति । दशरात्रस्यनवमेहनिमरुत्वतीयएतत्सूक्तं विश्वजितइतिखण्डेसूत्रितम्—प्रमन्दिनइमाउत्वेतिमरुत्वतीयमिति ।

तत्रप्रथमामृचमाह—

प्रमन्दिनेपितुमदर्चतावचोयःकृष्णगर्भानिरहन्नृजिश्वना ।
अवस्यवोवृषणंवज्रदक्षिणंमरुत्वन्तंसख्यायहवामहे ॥ १ ॥

प्र । मन्दिने । पितुऽमत् । अर्चत । वचः । यः । कृष्णऽगर्भाः ।
निःऽअहन् । ऋजिश्वना । अवस्यवः । वृषणम् । वज्रऽदक्षिणम् ।
मरुत्वन्तम् । सख्याय । हवामहे ॥ १ ॥

हेऋत्विजः मन्दिनेस्तुतिमतेस्तोतव्यायेन्द्राय पितुमद्धविर्लक्षणेनान्नेनोपेतंवचःस्तुतिलक्षणं वचनं प्रार्चतप्रकर्षेणोच्चारयत यइन्द्रःऋजिश्वनाएतत्संज्ञकेनराज्ञासख्यासहितःसन्कृष्णगर्भाः कृष्णोनामकश्चिदसुरः तेननिषिक्तगर्भाः तदीयाःभार्याःनिरहन्अवधीत् कृष्णमसुरंहत्वापुत्राणाम-

प्युतस्त्यर्थंगर्भिणीस्तस्यभार्याअपिअवधीदित्यर्थः अवस्यवोरक्षणेच्छवोवयंवृषणंकामानां वर्षितारं वज्रदक्षिणंवज्रयुक्तेनदक्षिणहस्तेनोपेतंतंमरुत्वन्तंइन्द्रं सख्यायसख्युःकर्मणेहवामहेआ-ह्वयामहे॥मन्दिने मदिस्तुतिमोदमदस्वमकान्तिगतिषु औणादिकइनिप्रत्ययः तदुक्तंयास्केन—म-न्दीमन्दतेःस्तुतिकर्मणइति। पितुमद हृस्वनुड्भ्यांमतुबितिमतुपउदात्तत्वम्। कृष्णगर्भाः कृष्णेन निषिक्तागर्भायासुतास्तथोक्ताः परादिश्छन्दसिबहुलमितिपूर्वपदान्तोदात्तत्वम्। अवस्यवः अ-वेरौणादिकोभावेअसुन् अवइच्छत्यवस्यति सुपआत्मनःक्यच् क्याच्छन्दसीत्युप्रत्ययः। वृषणं वाषपूर्वस्यनिगमेइतिविकल्पनाद्दीर्घाभावः। सख्याय सख्युःकर्मसख्यं सख्युर्यइतियप्रत्ययः। हवामहे ह्वेञोलटिबहुलंछन्दसीतिसंप्रसारणम्॥ १॥

१. जिन इन्द्र ने ऋजिश्वा राजा के साथ कृष्ण नाम के असुर की गर्भवती स्त्रियों को निहत किया था, उन्हीं हृष्ट इन्द्र के उद्देश से, अन्न के साथ, स्तुति अर्पित करो। हम रक्षण पाने की इच्छा से उन अभीष्ट-दाता और दक्षिण हाथ में वज्र-धारी इन्द्र को, मरुतों के साथ, अपना सखा होने के लिए, आह्वान करते हैं।

यो व्यंसं जाहृषाणेन मन्युना यः शम्बरं यो अहन्पिप्रुमव्रतम्।
इन्द्रो यः शुष्णमशुषं न्यावृणङ्मरुत्वन्तं सख्याय हवामहे ॥ २ ॥

यः। विऽअंसम्। जहृषाणेन। मन्युना। यः। शम्बरम्। यः। अहन्। पिप्रुम्। अव्रतम्। इन्द्रः। यः। शुष्णम्। अशुषम्। नि। अवृणक्। मरुत्वन्तम्। सख्याय। हवामहे ॥ २ ॥

यइन्द्रः जहृषाणेन प्रवृद्धेनमन्युना क्रोधनव्यंसं विगतभुजं वृत्रंअहन्नवधीत् अपिच यइन्द्रः शंबरंएतत्संज्ञमसुरंचावधीत् तथाअव्रतं व्रतस्ययागादेः कर्मणोविरोधिनं पिप्रुं एतत्संज्ञं चासुरंयइन्द्रः अवधीत् किञ्च यइन्द्रः अशुषं शोषकरहितं शुष्णंसर्वस्यजगतःशोषकं एतत्सं-ज्ञमसुरं न्यवृणक् न्यवर्जयत् समूलंहतवानित्यर्थः तंमरुत्वन्तंइन्द्रं सख्यायाह्वयामहे॥ व्यंसं विगतोंसोयस्मात् बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् यणि उदात्तस्वरितयोर्यणइतिपरस्यानुदात्त-स्यस्वरितत्वम्। जहृषाणेन हृषतुष्टौ अत्रवृद्ध्यर्थः छन्दसिलिट् लिटःकानज्वेतितस्यकान-आदेशः अन्येषामपिदृश्यतइतिसंहितायामभ्यासस्यदीर्घत्वम् चित्त्वादन्तोदात्तत्वम्। अ-शुषं शुषशोषणे इगुपधलक्षणःकः शुषाः शोषकानसन्त्यस्येत्यशुषः परादिश्छन्दसिबहुलमि-तिउत्तरपदाद्युदात्तत्वम्। अवृणक् वृजीवर्जने रौधादिकः॥ २॥

२. प्रवृद्ध क्रोध के साथ जिन इन्द्र ने विगत-भुज वृत्र या व्यंस नामक असुर का वध किया था। जिन्होंने शम्बर और यज्ञ-रहित पिप्रु का वध किया था और जिन्होंने दुर्जन शुष्ण का समूल नाश किया था, उन्हीं इन्द्र को, मरुतों के साथ, अपना सखा होने के लिए, हम बुलाते हैं।

तृतीयामृचमाह–

यस्यद्यावापृथिवीपौंस्यंमहद्यस्यंव्रतेवरुणोयस्यसूर्यः।
यस्येन्द्रस्यसिन्धवःसश्चंतिव्रतंमरुत्वन्तंसख्यायंहवामहे ॥ ३ ॥

यस्यं। द्यावापृथिवी इतिं। पौंस्यंम्। महत्। यस्यं। व्रते। वरुणः। यस्यं। सूर्यः। यस्यं। इन्द्रस्य। सिन्धवः। सश्चंति। व्रतम्। मरुत्वन्तम्। सख्यायं। हवामहे ॥ ३ ॥

यस्येन्द्रस्यमहद् विपुलंपौंस्यंबलं द्यावापृथिवी द्यावापृथिव्यावनुवर्तेते यस्यचेन्द्रस्यव्रतेनियमरूपेकर्मणिवरुणोवर्तते वरुणोपीन्द्रस्यनियमनंनातिक्रामतीत्यर्थः अपिच सूर्योपियस्येन्द्रस्य व्रतेवर्तते तथायस्येन्द्रस्यव्रतंकर्मसिन्धवोनद्यः सश्चति वचनव्यत्ययः गच्छन्ति सश्चतिर्गतिकर्मा। इन्द्रेणानुशिष्टाःप्रवहन्तीत्यर्थः तंमरुत्वन्तमिन्द्रंसख्यायाह्वयामहे ॥ द्यावापृथिवी द्यौश्चपृथिवीचद्यावापृथिव्यौ दिवोद्यावेतिद्यावादेशः सचाद्युदात्तोनिपातितः पृथिवीशब्दोङीष्प्रत्ययान्तोन्तोदात्तः देवताद्वन्द्वेचेत्युभयपदप्रकृतिस्वरत्वम् वाछन्दसीतिपूर्वसवर्णदीर्घः ॥ ३ ॥

३. जिनके विपुल बल का द्यौ और पृथिवी अनुधावन करती हैं, जिनके नियम से वरुण और सूर्य चलते हैं और जिनके नियम के अनुसार नदियाँ प्रवाहित हैं, उन्हीं इन्द्र को, मरुतों के साथ, अपना सखा होने के लिए, हम बुलाते हैं।

चतुर्थीमृचमाह–

योअश्वानांयोगवांगोपतिर्वशीयआरितःकर्मणिकर्मणिस्थिरः।
वीळोश्चिदिन्द्रोयोअसुन्वतोवधोमरुत्वन्तंसख्यायंहवामहे ॥ ४ ॥

यः। अश्वानाम्। यः। गवाम्। गोऽपतिः। वशी। यः। आरितः। कर्मणिऽकर्मणि। स्थिरः। वीळोः। चित्। इन्द्रः। यः। असुन्वतः। वधः। मरुत्वन्तम्। सख्यायं। हवामहे ॥ ४ ॥

यइन्द्रः अश्वानांपतिरधिपतिः तथायइन्द्रोगोपतिः नकेवलमेकस्यागोः किन्तु सर्वासामित्याह गवामिति सर्वासांगवामधिपतिर्भवति वशी अपराधीनःस्वतन्त्रइत्यर्थः अपिच यइन्द्रःकर्म-

---

१ नि० ३. ९.।

णिकर्मणिसर्वेषुकर्मसुस्थिरोनैश्चल्येनावतिष्ठमानः आरितः स्तुतिभिः प्रत्यृतः प्राप्तोनभवति आरितःप्रत्यृतःस्तोमानितिनिरुक्तम्। यइन्द्रः असुन्वतः सुन्वतांयागानुष्ठातृणांविरोधिनोवीळोश्चित दृढस्यापिशत्रोःवधःहन्ता तंमरुत्वन्तंइन्द्रं सख्यायाह्वयामहे ॥ गवां नगोश्वन्त्साववर्णे-तिविभक्त्युदात्तत्वस्यप्रतिषेधः। गोपतिः पत्यावैश्वर्येइतिपूर्वपदप्रकृतिस्वरत्वम्। आरितः ऋगतौ अस्माण्ण्यन्तान्निष्ठा आगमानुशासनस्यानित्यत्वात्पुगभावः यद्वा सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतीनामितिविहितस्ययङः यङोचिचेत्यत्रचशब्देनबहुलग्रहणानुकर्षणादनैमित्तिकेलुकिप्रत्ययलक्षणेनसन्यङोरितिऋइत्येतस्यद्विर्वचनेउरदत्वहलादिशेषयोःसतोः रुग्रिकौचलुकीतिरुक् ततोनिष्ठायांछान्दसइडागमः ऋकारस्ययणादेशः रोरीत्यभ्यासरेफलोपः ढ्रलोपेपूर्वस्यदीर्घोणइतिदीर्घः। वधः कृत्यल्युटोबहुलमितिबहुलवचनात् हनश्चवधइतिकर्तर्यप्वधादेशश्च सचादन्तः अतोलोपेउदात्तनिवृत्तिस्वरेण प्रत्ययस्योदात्तत्वम् ॥ ४ ॥

४. जो अश्वों के अधिपति, गोपों के ईश, स्वतंत्र, स्तुति प्राप्त कर जो सारे कर्मों में स्थिर और अभिषव-शून्य दुर्द्धर्ष शत्रुओं के हन्ता हैं, उन्हीं इन्द्र को, मरुतों के साथ, अपना सखा होने के लिए, हम बुलाते हैं।

योविश्वस्यजगतःप्राणतस्पतियोब्रह्मणेप्रथमोगाअविन्दत्।
इन्द्रोयोदस्यूँरधराँअवातिरन्मरुत्वन्तंसख्यायहवामहे ॥ ५ ॥

यः। विश्वस्य। जगतः। प्राणतः। पतिः। यः। ब्रह्मणे। प्रथमः। गाः। अविन्दत्। इन्द्रः। यः। दस्यून्। अधरान्। अवऽअतिरत्। मरुत्वन्तम्। सख्याय। हवामहे ॥ ५ ॥

यइन्द्रः विश्वस्यजगतोगच्छतः प्राणतःप्रश्वसतःप्राणिजातस्यपतिः स्वामी यश्चब्रह्मणे ब्राह्मणजातिभ्योङ्गिरोभ्यः प्रथमःअन्येभ्योदेवेभ्यःपूर्वभावीसन्पणिभिरपहृतागाः अविन्दत् अलभत अन्येभ्योदेवेभ्यः पूर्वमेवतैरसुरैर्युद्धागाःस्वयमलभतेत्यर्थः अपिचयइन्द्रोदस्यूनुपक्षपयितॄन् असुरानधरान्निकृष्टान्कृत्वा अवातिरत् अवधीत् अवतिरतिर्वधकर्मा। तंमरुत्वन्तमिन्द्रं सख्यायाह्वयामहे। जगतः गम्लृसृपृगतौ वर्तमानेपृषद्बृहन्महज्जगच्छतृवच्चेतिअतिप्रत्ययान्तोनिपात्यते जगच्छब्दआद्युदात्तः। प्राणतः श्वसमाणने अनच अस्माल्लटःशतृ अदादित्वाच्छपोलुक् शतुरनुमइतिविभक्तेरुदात्तत्वम् षष्ठ्याःपतिपुत्रेतिविसर्जनीयस्यसत्वम् ॥ ५ ॥

५. जो गतिशील और निश्वास-सम्पन्न जीवों के अधिपति हैं और जिन्होंने अङ्गिरा आदि ब्राह्मणों के लिए पणि-द्वारा अपहृत गौ का सर्व-प्रथम उद्धार किया था तथा जिन्होंने दस्युओं को निकृष्ट करके वध किया था, उन्हीं इन्द्र को, मरुतों के साथ, अपना बन्धु होने के लिए, हम बुलाते हैं।

---

१ नि० ५. १५.। २ नि० ३. ९.।

षष्ठीमृचमाह—

यःशूरेभिर्हव्योयश्चभीरुभिर्योधावद्भिर्हूयतेयश्चजिग्युभिः।
इन्द्रंयंविश्वाभुवनाभिसंदधुर्मरुत्वन्तंसख्यायहवामहे ॥६॥१२॥

यः । शूरेभिः । हव्यः । यः । च । भीरुऽभिः । यः । धावत्ऽभिः । हूयते । यः । च । जिग्युऽभिः । इन्द्रम् । यम् । विश्वा । भुवना । अभि । सम्ऽदधुः । मरुत्वन्तम् । सख्याय । हवामहे ॥ ६ ॥ १२ ॥

यइन्द्रः शूरेभिःशौर्योपेतैःपुरुषैःहव्यःयोद्धुमाह्वातव्यः यश्चभीरुभिः भयशीलैः कातरैःपुरुषैः सहायार्थमाह्वातव्यः अपिच यइन्द्रोधावद्भिः पराजयेनपलायमानैःहूयते रक्षार्थआहूयते यश्च जिग्युभिःप्राप्तजयैराहूयते यंचेन्द्रंविश्वाभुवना सर्वाणिभूतजातानिस्वेषुकार्येषुअभिसन्दधुः आभिमुख्येन स्थापयन्ति तंमरुत्वन्तमिन्द्रंसख्यायाह्वयामहे ॥ शूरेभिः बहुलंछन्दसीतिभिसऐसभावः ।हव्यःह्वयतेरचोयदितियत् ह्वइत्यनुवृत्तौ बहुलंछन्दसीतिसंप्रसारणम् गुणः धातोस्तन्निमित्तस्यैवेत्यवादेशः। भीरुभिः भियःक्रुक्लुकनावितिक्रुप्रत्ययः।धावद्भिः सृगतौ सर्तेर्वेगितायां शपि पाघ्रेत्यादिनाधावादेशःशपःपित्त्वादनुदात्तत्वम् शतुश्चलसार्वधातुकस्वरेणधातुस्वरःशिष्यते।जिग्युभिःजिजये लिटःक्वसुः द्विर्वचने सन्लिटोर्जेरितिअभ्यासादुत्तरस्यजकारस्यकुत्वम् भिसि अयस्मयादित्वेनभत्वात् वसोःसम्प्रसारणं इतिसम्प्रसारणम् छान्दसोन्त्यलोपः ॥ ६ ॥

६. जो शत्रुओं और भीरुओं के आह्वान योग्य हैं, जिन्हें समर से भागनेवाले और समर में विजयी, दोनों ही आह्वान करते हैं तथा जिन्हें सारे प्राणी, अपने-अपने कार्यों के सम्मुख, स्थापित करते हैं, उन्हीं इन्द्र को, मरुतों के साथ, सखा होने के लिए, हम बुलाते हैं।

सप्तमीमृचमाह—

रुद्राणामेतिप्रदिशाविचक्षणोरुद्रेभिर्योषातनुतेपृथुज्रयः।
इन्द्रंमनीषाअभ्यर्चतिश्रुतंमरुत्वन्तंसख्यायहवामहे ॥ ७ ॥

रुद्राणाम् । एति । प्रऽदिशा । विऽचक्षणः । रुद्रेभिः । योषा । तनुते । पृथु । ज्रयः । इन्द्रम् । मनीषा । अभि । अर्चति । श्रुतम् । मरुत्वन्तम् । सख्याय । हवामहे ॥ ७ ॥

विचक्षणः सूर्यात्मनाप्रकाशमानइन्द्रः रुद्रपुत्राणां अध्यात्मंप्राणरूपेणवर्तमानानांमरुतां यद्वा रोदयितॄणांप्राणानां प्राणाहिशरीरान्निर्गताःसन्तोबन्धुजनान्रोदयन्ति प्रदिशाप्रदेशनेनम-नुष्येभ्यःप्रदानेनसहएत्यन्तरिक्षेगच्छति तथाचाम्नायते—योसौतपन्नुदेति ससर्वेषांभूतानांप्रा-णानादायोदेतीति[1]। अपिच रुद्रेभिः अधिभूतंवर्तमानैरुद्रपुत्रैर्मरुद्भिर्योषामाध्यमिकावाक्पृथुवि-स्तीर्णं ज्रयोवेगंतनुतेविस्तारयति प्रसङ्गादत्रमरुतांस्तुतिः तैर्मरुद्भिःसहवर्तमानं श्रुतंप्रख्यातं सू-र्यात्मानमिन्द्रंमनीषास्तुतिलक्षणावाक्अभ्यर्चतिआभिमुख्येनस्तौति तंमरुत्वन्तमिदंवयंसख्या-याह्वयामहे॥प्रदिशा दिशअतिसर्जने सम्पदादिलक्षणोभावेक्विप्।ज्रयः जिज्रिअभिभवे जीयते अभिभूयतेनेनेतिज्रयोवेगः करणेअसुन्। मनीषा ईषाअक्षादित्वात्प्रकृतिभावः॥ ७॥

७. सूर्य-रूप आलोकमय इन्द्र सारे प्राणियों के प्राण-स्वरूप रुद्र-पुत्र मरुतों को ग्रहण कर उदित होते हैं और उन्हीं रुद्र-पुत्र मरुतों-द्वारा वाक्य-वेग-युक्त होकर विस्तारित होते हैं। प्रख्यात इन्द्र को स्तुति-लक्षण वाक्य पूजित करते हैं। उन्हीं इन्द्र को, मरुतों के साथ, सखा होने के लिए, हम आह्वान करते हैं।

यद्वांमरुत्वःपरमेसधस्थेयद्वावमेवृजनेमादयासे।
अतआयाह्यध्वरंनोअच्छात्वायाहविश्चकृमासत्यराधः॥ ८॥

यत्। वा। मरुत्वः। परमे। सधऽस्थे। यत्। वा। अवमे। वृजने। मादयासे। अतः। आ। याहि। अध्वरम्। नः। अच्छ। त्वाऽया। हविः। चकृम। सत्यऽराधः॥ ८॥

हेमरुत्वः मरुद्भिर्युक्तेन्द्र परमेउत्कृष्टेसधस्थेसहस्थानेगृहे यद्वा यदिवा मादयासे हृष्टोव-र्तसे यद्वा यदिवा अवमेअर्वाचीने वृजने वृज्यतेरिक्तीक्रियतेऽस्मिन्धनमितिवृजनंगृहं त-स्मिन्मादयासे अतोस्मादुभयविधावस्थानान्नोस्माकमध्वरंयज्ञमच्छाभिमुख्येनायाहि आगच्छ हेसत्यराधः सत्यधन त्वाया त्वत्कामनया वयं हविश्चकृमकृतवन्तः॥मरुत्वः मतुवसोरुरितिसं-बुद्धौनकारस्यरुत्वम्। सधस्थे सुपिस्थइतिकप्रत्ययः सधमादस्थयोश्छन्दसीतिसहस्यसधा-देशः। मादयासे मदतृप्तियोगे चुरादिरात्मनेपदी लेट्याडागमः। त्वाया त्वामात्मनइच्छति सु-पआत्मनःक्यच् प्रत्ययोत्तरपदयोश्चेतिमपर्यन्तस्यत्वादेशः व्यत्ययेनदकारस्यात्वम् अप्रत्यया-दितिअकारप्रत्ययः सुपांसुलुगितितृतीयायालुक्॥ ८॥

८. मरुत्संयुक्त इन्द्र, तुम उत्कृष्ट घर में ही हृष्ट हो अथवा सामान्य स्थान में ही हृष्ट हो हमारे यज्ञ में आगमन करो। सत्यधन इन्द्र, तुम्हारे लिए उत्सुक होकर हम हव्य प्रदान करते हैं।

---

1 तै० आ० प्रथमप्रपाठके.।

नवमीमृचमाह—

त्वायेन्द्रसोमंसुषुमासुदक्षत्वायाहविश्चकृमाब्रह्मवाहः।
अधानियुत्वःसगणोमरुद्भिरस्मिन्यज्ञेबर्हिषिमादयस्व ॥ ९ ॥

त्वाऽया। इन्द्र। सोमम्। सुसुम। सुऽदक्ष। त्वाऽया। हविः।
चकृम। ब्रह्मऽवाहः। अध। नियुत्वः। सऽगणः। मरुत्ऽभिः।
अस्मिन्। यज्ञे। बर्हिषि। मादयस्व ॥ ९ ॥

हेसुदक्ष शोभनबलेन्द्र त्वाया त्वत्कामनयासोमंसुषुम अभिषुतवन्तोवयं हेब्रह्मवाहःब्रह्मणामन्त्ररूपेणस्तोत्रेणोह्यमानप्राप्यमाणइन्द्र त्वायात्वत्कामनया संवनीयेपुरोडाशलक्षणंहविश्चकृमकृतवन्तः हेनियुत्वः नियुतोश्वाः तद्वन्निन्द्र अध अथानन्तरं मरुद्भिःसप्तगणरूपैः एतत्संज्ञैर्देवैः सगणःगणसहितःसन् अस्मिन्वर्तमानेयज्ञेबर्हिषिआस्तीर्णेदर्भेउपविश्यमादयस्व तृप्तोभव ॥ सुषुम षुञ्अभिषवे लिटिक्रादिनियमप्राप्तस्येटः अनित्यमागमशासनमितिवचनादभावः ॥ ९ ॥

९. शोभन बल से युक्त इन्द्र, हम तुम्हारे लिए उत्सुक होकर सोम का अभिषव करते हैं। तुम्हें स्तुति-द्वारा पाया जाता है। हम, तुम्हारे उद्देश से, हव्य प्रदान करते हैं। अश्व-युक्त इन्द्र, मरुतों के साथ दलबद्ध होकर इस यज्ञ-कुश पर बैठकर हृष्ट बनो।

दशमीमृचमाह—

मादयस्वहरिभिर्येतइन्द्रविष्यस्वशिप्रेविसृजस्वधेने।
आत्वासुशिप्रहरयोवहन्तूशन्हव्यानिप्रतिनोजुषस्व ॥ १० ॥

मादयस्व। हरिऽभिः। ये। ते। इन्द्र। वि। स्यस्व। शिप्रे इति।
वि। सृजस्व। धेने इति। आ। त्वा। सुऽशिप्र। हरयः। वहन्तु।
उशन्। हव्यानि। प्रति। नः। जुषस्व ॥ १० ॥

हेइन्द्र हरिभिरश्वैःसहमादयस्वतृप्तोभव येतेतवस्वभूतास्तदर्थंशिप्रेहनूसंहते विष्यस्व सोमपानार्थंविवृतेकुरु तथाधेनेपानसाधनभूतेजिह्वेमजिह्विकेविसृजस्व सोमपानार्थंविश्लिष्टेकुरु हे सुशिप्र शिप्रेहनूनासिकेवा। शोभनशिप्रेन्द्र त्वात्वां हरयोश्वाआवहन्तु अस्मदीयंयज्ञंप्रापयन्तु त्वंच उशन्अस्मान्कामयमानोनोस्माकं हव्यानिहवींषि प्रतिजुषस्व प्रत्येकंसेवस्व माउदासिष्ठाः॥

---

१ हवनीयेइत्यपिपाठः। २ नि० ६. १७.।

विष्यस्व षोन्तकर्मणि व्यत्ययेनात्मनेपदं दिवादित्वाच्श्यन् ओतःश्यनीत्योकारलोपः उपसर्गात्सुनोतीतिषत्वम् ॥ १० ॥

१०. इन्द्र, अपने घोड़ों के साथ प्रसन्न हो अपने दोनों शिप्र, हनु या जबड़े खोलो; सोमपान के लिए अपनी जिह्वा और उपजिह्वा खोलो। हे सुशिप्र वा सुनासिक इन्द्र, तुम्हें यहाँ घोड़े ले आवें। तुम हमारे प्रति तुष्ट होकर हमारा हव्य ग्रहण करो।

मरुत्स्तोत्रस्यवृजनस्यगोपावयमिन्द्रेणसनुयामवाजम् ।
तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीउतद्यौः ॥ ११ ॥ १३ ॥

मरुत्ऽस्तोत्रस्य । वृजनस्य । गोपाः । वयम् । इन्द्रेण । सनुयाम ।
वाजम् । तत् । नः । मित्रः । वरुणः । ममहन्ताम् । अदितिः ।
सिन्धुः । पृथिवी । उत । द्यौः ॥ ११ ॥ १२ ॥

मरुत्स्तोत्रस्य मरुद्भिःसहस्तोत्रंयस्यसमरुत्स्तोत्रः तस्यवृजनस्यशत्रूणांक्षेप्तुरिन्द्रस्यसंबन्धिनोगोपाः गोपायनीयाःरक्षणीयावयं तेनेन्द्रेणवाजमन्नंसनुयाम लभेमहि यदेतदस्माभिःप्रार्थितंनोस्मदीयंतन्मित्रादयोद्यावापृथिव्यौचममहन्तांपूजितंकुर्वन्तु ॥ वृजनस्य वृजीवर्जने कृपृवृजिमन्दिनिधाञ्भ्यःक्युरितिक्युप्रत्ययः ॥ ११ ॥

११. जिन इन्द्र का, मरुतों के साथ, स्तोत्र है, उन शत्रु-हन्ता इन्द्र-द्वारा रक्षित होकर तुम उनसे अन्न प्राप्त करो। मित्र, वरुण, अदिति, सिन्धु, पृथिवी और आकाश हमारे उस अन्न की पूजा करें।

इमांतइत्येकादशर्चंनवमंसूक्तं कुत्सस्यार्षमैन्द्रं अन्त्यात्रिष्टुप् शिष्टादशजगत्यः तथाचानुक्रान्तम्—इमांतेन्त्यात्रिष्टुबिति विनियोगोलैङ्गिकः।

तत्रप्रथमामृचमाह—

इमांतेधियंप्रभरेमहोमहीमस्यस्तोत्रेधिषणायत्तआनजे ।
तमुत्सवेचप्रसवेचसासहिमिन्द्रंदेवासःशवसामदन्ननु ॥ १ ॥

इमाम् । ते । धियम् । प्र । भरे । महः । महीम् । अस्य । स्तोत्रे ।
धिषणा । यत् । ते । आनजे । तम् । उत्ऽसवे । च । प्रऽसवे ।
च । ससहिम् । इन्द्रम् । देवासः । शवसा । अमदन् । अनु ॥ १ ॥

हेइन्द्र महोमहतस्तेतव इमांइदानींक्रियमाणांमहींमहतीं अत्यन्तोत्कृष्टांधियंस्तुतिंमभरे प्रकर्षेणसंपादयामि तेतव धिषणात्वदीयाबुद्धिः अस्यममस्तोतुः स्तोत्रेस्तुतौयद्यस्मादानजे अस-कासंश्लिष्टासीव तस्मात्त्वमियांस्तुतिंकरोमीत्यर्थः उत्तरोर्धर्चःपरोक्षकृतः ससहिं शत्रूणामभि-भवितारंपूर्वोक्तंतमिन्द्रंदेवासः कर्मसुदीव्यन्तऋत्विजः शवसास्तुतिभिःकीर्तनेनबलेन अन्वमदन् अनुक्रमेणहर्षमापयन् किमर्थं उत्सवेच उत्सवार्थंअभिवृद्ध्यर्थं प्रसवेचधनानांवृष्ट्युदकानांवा-उत्पत्त्यर्थंच ॥ आनजे अञ्जूव्यक्तिम्रक्षणकान्तिगतिषु अस्मात्कर्मणिलिट् द्विर्वचनहलादिशेषौ अतआदेरित्यभ्यासस्यात्वम् तस्मान्नुड्द्विहलइतिनुट् व्यत्ययेनोपधानकारलोपः। उत्सवे प्र-सवे षूप्रेरणे ऋदोरपितिभावेअप् निमित्तात्कर्मयोगेइतिसप्तमी थाथादिनोत्तरपदान्तोदात्तत्वम्। ससहिं षहअभिभवे आदृगमहनइत्यत्रउत्सर्गश्छन्दसीतिवचनात्किप्रत्ययः लिड्वद्भावाद्द्विर्वच-नं अन्येषामपीतिसंहितायामभ्यासस्यदीर्घत्वम्। अमदन् मदीहर्षे हेतुमतिणिच् मदीहर्षग्ले-पनयोरितिघटादिषुपाठान्मितांह्रस्वइतिह्रस्वत्वम् छन्दस्युभयथेतिशपआर्धधातुकत्वाण्णेर-निटीतिणिलोपः ॥ १ ॥

१. तुम महान् हो। तुम्हारे उद्देश से मैं इस महती स्तुति को सम्पादन करता हूँ; क्योंकि तुम्हारा अनुग्रह मेरी स्तुति पर निर्भर करता है। ऋत्विकों ने सम्पत्ति और धन लाभ के लिए स्तुति बल-द्वारा उन शत्रु-विजयी इन्द्र को हृष्ट किया है।

द्वितीयामृचमाह—

अस्यश्रवोनद्यःसप्तबिभ्रतिद्यावाक्षामापृथिवीदर्शतंवपुः।
अस्मेसूर्याचन्द्रमसाभिचक्षेश्रद्धेकमिन्द्रचरतोवितर्तुरम् ॥ २ ॥

अस्य। श्रवः। नद्यः। सप्त। बिभ्रति। द्यावाक्षामा। पृथिवी। दर्शतम्। वपुः। अस्मे इति। सूर्याचन्द्रमसा। अभिऽचक्षे। श्रध्दे। कम्। इन्द्र। चरतः। विऽतर्तुरम् ॥ २ ॥

अस्येन्द्रस्य श्रवोयशः कीर्तिं सप्त इमंमेगङ्गेइत्यस्यामृचिप्राधान्येनप्रतिपादितागङ्गाद्याःसप्त-सङ्ख्याकानद्योबिभ्रतिधारयन्ति वृत्रहननेनइन्द्रस्ययद्वृष्टेःप्रदातृत्वंतत्प्रभूतजलोपेतानद्यः प्रक-टयन्तीत्यर्थः अपिच द्यावाक्षामा द्यावापृथिव्यौ पृथिवीत्यन्तरिक्षनाम अन्तरिक्षंच अस्यसूर्या-त्मनावर्तमानस्येन्द्रस्यदर्शतंसर्वैःप्राणिभिर्दर्शनीयंवपुः रूपनामैतत् प्रकाशात्मकंरूपंधारयन्ति किं-च हेइन्द्र अस्मे अस्माकं अभिचक्षेद्रष्टव्यानांपदार्थानामाभिमुख्येनप्रकाशनार्थंश्रद्धेकंश्रद्धार्थं चक्षुषादृष्टेहिवस्तुनि इदंसत्यमितिश्रद्धोत्पद्यते कमित्येतत्पदपूरणं तदुभयार्थंसूर्याचन्द्रमसौवितर्तुरं परस्परंव्यतिहारेणतरणंपुनःपुनर्गमनंयथाभवति तथाचरतोवर्तेते त्वमेवतद्रूपःसन्वर्तसइत्यर्थः ॥ अस्य ऊडिदमितिविभक्तेरुदात्तत्वम्। द्यावाक्षामा द्यौश्चक्षामाच दिवोद्यावेतिद्यावादेशः सुपां-

सुलुगितिविभक्तेर्डादेशः देवताद्वन्द्वेचेत्युभयपदप्रकृतिस्वरत्वम्। दर्शतंभृष्टदर्शीत्यादिना अतच्। सूर्याचन्द्रमसा सूर्यश्चचन्द्रमाश्च देवताद्वन्द्वेचेतिपूर्वपदस्यानङादेशः सुपांसुलुगितिविभक्तेराकारः चन्द्रमस्शब्दोदासीभारादित्वात् पूर्वपदप्रकृतिस्वरेणमध्योदात्तः अतोदेवताद्वन्द्वेचेतिप्राप्तस्य उभयपदप्रकृतिस्वरस्य नोत्तरपदेनुदात्तादावपृथिवीतिप्रतिषेधः। अभिचक्षे चक्षेःप्रकाशनार्थात्संपदादिलक्षणोभावेक्विप् तादर्थ्येचतुर्थी। श्रद्धे दृशिग्रहणाद्धातेर्भावेविच् चतुर्थ्येकवचने आतोधातोरित्याकारलोपः उदात्तनिवृत्तिस्वरेणविभक्तेरुदात्तत्वम्। वितर्तुरं तरतेर्यङ्लुगन्तादौणादिकःकुरच् बहुलंछन्दसीत्युत्वम्॥ २॥

२. सात नदियाँ इन्द्र की कीर्त्ति धारण करती हैं। आकाश, पृथ्वी और अन्तरिक्ष उनका दर्शनीय रूप धारण करते हैं। इन्द्र, सूर्य और चन्द्र हमारे सामने, प्रकाश देने और हमारा विश्वास उत्पन्न करने के लिए, बार-बार एक के बाद एक विचरण करते हैं।

तंस्मारथंमघवन्प्रावसातयेजैत्रंयंतेअनुमदामसंगमे।
आजानइन्द्रमनसापुरुष्टुतत्वायद्भ्योमघवञ्छर्मयच्छनः॥ ३॥
तम्। स्म। रथम्। मघऽवन्। प्र। अव। सातये। जैत्रम्।
यम्। ते। अनुऽमदाम। सम्ऽगमे। आजा। नः। इन्द्र। मनसा।
पुरुऽस्तुत। त्वायत्ऽभ्यः। मघऽवन्। शर्म। यच्छ। नः॥ ३॥

हेमघवन् धनवन्निन्द्र सातये अस्माकंधनलाभायतंस्म तमेवरथंप्राव प्रेरय वर्तय नोस्माकंमनसाबुद्ध्यापुरुष्टुत बहुशःस्तुतेन्द्र तेतव स्वभूतंजैत्रंजयशीलंयंरथंसङ्गमे शत्रुभिःसहसङ्गमेआजायुद्धेसतिअनुमदाम वयमनुक्रमेणस्तुमः अपिच हेमघवन् त्वायद्भ्यः त्वांकामयमानेभ्योनोस्मभ्यंशर्मसुखंप्रयच्छदेहि॥ अव अवरक्षणगतिकान्तीत्युक्तत्वादवतिरत्रगत्यर्थः। सङ्गमे ग्रहवृदनिश्चिगमश्चेतिकर्मण्यण् थाथादिनोत्तरपदान्तोदात्तत्वम्। आजा सुपांसुलुगितिसप्तम्याडादेशः। त्वायद्भ्यः सुपआत्मनःक्यच् प्रत्ययोत्तरपदयोश्चेतिमपर्यन्तस्यत्वादेशः व्यत्ययेनदकारस्यात्वं क्यजन्ताल्लटःशतृ अदुपदेशाल्लसार्वधातुकानुदात्त्वेसति क्यचासहैकादेशउदात्तेनेतितस्योदात्तत्वम्॥ ३॥

३. इन्द्र, अपने अन्तःकरण से हम तुम्हारी बहुत स्तुति करते हैं। तुम्हारे जिस विजयी रथ को शत्रुओं के युद्ध में देखकर हम प्रसन्न होते हैं, हमारे धन-लाभ के लिए उसी रथ को प्रेरण करो। मघवन्, हम तुम्हारी कामना करते हैं। हमें सुख दो।

वयंजयेमत्वयायुजावृतमस्माकमंशमुदवाभरेभरे।
अस्मभ्यमिन्द्रवरिवःसुगंकृधिप्रशत्रूणांमघवन्वृष्ण्यारुज॥ ४॥

वयम् । जयेम । त्वया । युजा । वृतम् । अस्माकम् । अंशम् । उत् ।
अव । भरेऽभरे । अस्मभ्यम् । इन्द्र । वरिवः । सुऽगम् । कृधि ।
प्र । शत्रूणाम् । मघऽवन् । वृष्ण्या । रुज ॥ ४ ॥

हेइन्द्र युजा अस्माभिर्युक्तेनसहायभूतेनत्वयावृतंआवृण्वन्तंशत्रुंवयंस्तोतारोजयेम अभिभवेम अपिच भरेभरे सङ्ग्रामेसङ्ग्रामे अस्माकमंशमस्मदीयंभागमुदव शत्रुकृतपीडापरिहारेणोत्कर्षंरक्ष तथा हेइन्द्र वरिवोधनं अस्मभ्यंसुगंसुगमंसुप्रापंकृधिकुरु तथा हेमघवन् शत्रूणां अस्मदुपद्रवकारिणांवृष्ण्यावृष्ण्यानिवीर्याणि प्ररुजप्रभङ्धि बाधस्वेत्यर्थः॥ वृतं वृञ्वरणे क्विप्चेतिक्विप् तुगागमः । सुगं सुदुरोरधिकरणेइतिगमेर्डप्रत्ययः । कृधि श्रुशृणुपृकृवृभ्यइतिहेर्धिः । रुज रुजोभङ्गे तौदादिकः ॥ ४ ॥

४. तुम्हें सहायक पाकर हम अवरोधक शत्रुओं को परास्त करेंगे। संग्राम में हमारे अंश की रक्षा करो। मघवन्, हम सरलता से धन पा सकें---ऐसा उपाय कर दो। शत्रुओं की शक्ति तोड़ दो।

नानाहित्वाहवमानाजनाइमेधनानांधर्तरवसाविपन्यवः ।
अस्माकंस्मारथमातिष्ठसातयेजैत्रंहीन्द्रनिभृतंमनस्तव॥५॥१४॥

नाना । हि । त्वा । हवमानाः । जनाः । इमे । धनानाम् ।
धर्तः । अवसा । विपन्यवः । अस्माकम् । स्म । रथम् । आ । तिष्ठ ।
सातये । जैत्रम् । हि । इन्द्र । निऽभृतम् । मनः । तव ॥ ५ ॥ १४ ॥

हेधनानांधर्तः गोहिरण्यादिरूपाणांद्रव्याणांधारयितःइन्द्र विपन्यवः स्तोतृनामैतत् स्तोतारइमेजनाः अवसारक्षणेनहेतुनात्वाहवमानाःत्वामाह्वयन्तः नानाहि विभिन्नाःखलु तेषांमध्ये अस्माकंस्म अस्माकमेवसातयेधनदानायरथमातिष्ठ आरोह हेइन्द्र निभृतं अव्याकुलंतवमनश्चित्तंजैत्रंहि जयशीलंखलु शत्रून्जित्वाअस्मभ्यंधनंदातुंसमर्थमित्यर्थः ॥ सातये षणुदाने क्तिनिजनसनखनांसञ्झलोरित्यात्वम् ॥ ५ ॥

५. धनाधिपति, ये जो अपनी रक्षा के लिए तुम्हारी स्तुति करते हैं और तुम्हें बुलाते हैं, वे नाना प्रकार के हैं। इनमें हमें ही, धन देने के लिए, रथ पर चढ़ो। इन्द्र, तुम्हारा मन व्याकुलता-रहित और जय-शील है।

गोजिताबाहूअमितक्रतुःसिमःकर्मन्कर्मञ्छतमूतिःखजंकरः ।
अकल्पइन्द्रःप्रतिमानमोजसाथाजनाविह्वयन्तेसिषासवः ॥ ६ ॥

गोऽजिता । बाहू इति । अमितऽक्रतुः । सिमः । कर्मन्ऽकर्मन् ।
शतम्ऽऊतिः । खजम्ऽकरः । अकल्पः । इन्द्रः । प्रतिऽमानम् ।
ओजसा । अथ । जनाः । वि । ह्वयन्ते । सिसासवः ॥ ६ ॥

हेइन्द्र तवबाहूहस्तौ गोजिता जयेनगवांलम्भयितारौ त्वंच अमितक्रतुः अपरिच्छिन्नज्ञानः सिमःश्रेष्ठः तथाचशाट्यायनकम्—सिमइतिवैश्रेष्ठमाचक्षतइति। यद्वा सिमःशत्रूणांबन्धकः कर्मन्कर्मन् स्तोतॄणां कर्मणिकर्मणि उपस्थिते शतमूतिः बहुविधरक्षणोपेतः खजङ्करः खजतिमथ्नातिपुरुषानितिखजःसङ्ग्रामः तस्यकर्ता अकल्पः कल्पेनान्येनरहितः स्वतन्त्रइत्यर्थः ओजसा सर्वेषांप्राणिनांयदोजोबलमस्ति तेनसर्वेण प्रतिमानं प्रतिनिधित्वेनमीयमानः यस्मादेवंगुणविशिष्टः इन्द्रः अथ अतःकारणात् सिषासवोधनंलब्धुकामाः जनाविह्वयन्ते विविधमाह्वयन्ति ॥ गोजिता गाःजयतइतिगोजितौ सुपांसुलुगितिविभक्तेराकारः। सिमः षिञ्बन्धने अस्मादौणादिकोमक् । खजङ्करः खजमन्थे पचाद्यच् क्षेमप्रियमद्रेण्चेतिचशब्दस्यानुक्तसमुच्चयार्थत्वात्खजशब्दोपपदादपिकरोतेःखच् अरुर्द्विषदजन्तस्येतिमुम् कृदुत्तरपदप्रकृतिस्वरत्वम् । अकल्पः नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । सिषासवः वनषणसंभक्तौ सनि सनीवन्तर्धेतिविकल्पनादिडभावः जनसनखनांसञ्झलोरित्यात्वम् द्विर्वचनादि सनाशंसभिक्षउरित्युप्रत्ययः सतिशिष्टत्वात्तस्यैवस्वरःशिष्यते ॥ ६ ॥

६. तुम्हारी भुजायें, जय-द्वारा, गौ के लिए लाभकारी हैं या गौ को जय करनेवाली हैं। तुम्हारा ज्ञान असीम है। तुम श्रेष्ठ हो और पुरोहितों के कार्यों में सैकड़ों रक्षण-कार्य करते हो। इन्द्र युद्ध-कर्त्ता और स्वतंत्र हैं। वे सारे प्राणियों के बल के परिमाण-स्वरूप हैं। इसी लिए धन-लाभार्थी मनुष्य इन्द्र को विविध प्रकार से बुलाते हैं।

उत्तेशतान्मघवन्नुच्चभूयसउत्सहस्राद्रिरिचेकृष्टिषुश्रवः।
अमात्रंत्वाधिषणातित्विषेमह्यधावृत्राणिजिघ्नसेपुरन्दर ॥ ७ ॥

उत् । ते । शतात् । मघऽवन् । उत् । च । भूयसः । उत् । सहस्रात् ।
रिरिचे । कृष्टिषु । श्रवः । अमात्रम् । त्वा । धिषणा । तित्विषे ।
मही । अध । वृत्राणि । जिघ्नसे । पुरम्ऽदर ॥ ७ ॥

हेमघवन् धनवन्निन्द्र कृष्टिषु स्तोतृषुमनुष्येषु ते त्वयादीयमानंश्रवोयदन्नमस्ति तव शतात् शतसंख्याकात् धनात् उद्रिरिचे उद्रिक्तमधिकंभवति अपिच भूयसः शतसङ्ख्याकादपिबहुत-

राद्धनात् उद्रिरिचे अधिकंभवति किंबहुना सहस्रात् सहस्रसङ्ख्याकादप्युद्रिरिचे त्वयादत्तंत-दन्नमक्षयमित्यर्थः अपिच अमात्रं मात्रया इयत्तयारहितं परिगणितुमशक्यैःसर्वैर्गुणैरधिकं त्वा त्वां महीमहतीधिषणा अस्मदीयास्तुतिलक्षणावाक् तित्विषे दीपयति त्वत्संबन्धिनोगुणान्प्रका-शयति हेपुरन्दर शत्रूणांपुरां दारयितरिन्द्र अध स्तुत्यनन्तरं वृत्राणि आवरकान्शत्रून् जिघ्न-से हंसिविनाशयसि ॥ रिरिचे रिचिर्विरेचने कर्मणिलिट् । तित्विषे त्विषदीप्तौ । जिघ्नसे हन्ते-र्लेटि व्यत्ययेनात्मनेपदम् लेटोडाटावित्यडागमः बहुलंछन्दसीतिशपःश्लुः गमहनेत्यादिनोप-धालोपः स्थानिवद्भावाद्विर्वचनादि बहुलंछन्दसीत्यभ्यासस्येत्वम् । पुरन्दर पूःसर्वयोर्दारिस-होरितिखच् खचिह्रस्वइतिह्रस्वत्वम् वाचंयमपुरन्दरौचेतिनिपातनादम् ॥ ७ ॥

७. इन्द्र, तुम मनुष्य को जो अन्नदाता करते हो, वह शतसंख्यक धन से भी अधिक है अथवा उससे भी अधिक है वा सहस्रसंख्यक धन से भी अधिक है। तुम परिमाण-रहित हो। हमारे स्तुति-वचनों ने तुम्हें दीप्त किया है। पुरन्दर, तुमने शत्रुओं को हनन किया है।

अष्टमीमृचमाह—

त्रिविष्टिधातुप्रतिमानमोजसस्तिस्रोभूमीर्नृपतेत्रीणिरोचना ।
अतीदंविश्वंभुवनंववक्षिथाशत्रुरिन्द्रजनुषासनादसि ॥ ८ ॥

त्रिविष्टिऽधातु । प्रतिऽमानम् । ओजसः । तिस्रः । भूमीः । नृऽपते ।
त्रीणि । रोचना । अति । इदम् । विश्वम् । भुवनम् । ववक्षिथ ।
अशत्रुः । इन्द्र । जनुषा । सनात् । असि ॥ ८ ॥

हेनृपते नृणांपालयितरिन्द्र त्वं ओजसःसर्वेषांप्राणिनांबलस्यप्रतिमानंप्रतिनिधिरसि की-दृशंप्रतिमानं त्रिविष्टिधातु धातुशब्दोरज्जुभागवचनः यथा त्रिधातुपञ्चधातुवाशुल्बंकरोतीति[1]। यथात्रिविष्टिः त्रिगुणितारज्जुर्दृढीयसी एवमिन्द्रोपिदृढतरइत्यर्थः किञ्च त्वं तिस्रोभूमीः त्रीन् लोकान्त्रीणिरोचना त्रीणितेजांसि दिव्यादित्याख्यं अन्तरिक्षेवैद्युतरूपंआग्निं पृथिव्यामाहवनी-यादिरूपेणवर्तमानं पार्थिवमग्निं एवंत्रीन्लोकान्त्रीणितेजांसिच अतिववक्षिथ अतिश-येनवोढुमिच्छसि अपिच इदंविश्वंसर्वंभुवनंभूतजातंच अतिवोढुमिच्छसि सर्वस्यजगतःपाल-नेनत्वमेवसर्वेषांनिर्वाहकोभवसीत्यर्थः यस्मादेइन्द्र त्वंसनाच्चिरकालादारभ्य जनुषाजन्मना जन्मप्रभृति अशत्रुः सपत्नरहितोसि ॥ त्रिविष्टिधातु त्रिधात्रिमकारेणविष्टयामवेशनेनविधीय-

---

१ बौधायनसूत्रेप्रथमाध्याये।

वेक्रियतइतित्रिविष्टिधातु त्रिगुणितारज्जुः विशेर्भवेक्विन् धाञःसिवनिगमिमसीत्यादिनाकर्मे-णितुन्प्रत्ययः कृदुत्तरपदप्रकृतिस्वरत्वम् अत्रदृढरज्जुवाचकःशब्दस्तद्वत्तंदाढर्यंलक्षयित्वात्-द्वतिप्रतिमानेवर्तते यथामाणवकेग्निशब्दः तिस्रःशसि त्रिचतुरोःस्त्रियामितितिस्रादेशोन्तोदात्तः अचिरऋतइतिरेफादेशे उदात्तयणोहल्पूर्वादितिविभक्तेरुदात्तत्वम् ।ववक्षिथ वहमापणेइत्यस्मा-दिच्छासनि ढत्वकत्वषत्वानि सन्यतइतीत्वाभावश्छान्दसः छान्दसेलिटि अमन्त्रेइतिनिषेधादाम्प्र-त्ययाभावः। जनुषा जनेरुसिः॥ ८॥

८. नर-रक्षक इन्द्र, तुम तिगुनी हुई रस्सी की तरह सारे प्राणियों के बल के परिमाण-स्वरूप हो। तुम तीनों लोकों में तीन प्रकार (सूर्य, विद्युत् और अग्नि) के तेज हो। तुम इस संसार को चलाने में पूर्ण समर्थ हो; क्योंकि, इन्द्र, तुम बहुत समय से, जन्मावधि, शत्रु-शून्य हो।

त्वांदेवेषुप्रथमंहवामहेत्वंबभूथपृतनासुसासहिः ।
सेमन्नःकारुमुपमन्युमुद्भिदमिन्द्रःकृणोतुप्रसवेरथंपुरः ॥ ९॥

त्वाम्। देवेषु। प्रथमम्। हवामहे। त्वम्। बभूथ। पृतनासु।
ससहिः। सः। इमम्। नः। कारुम्। उपऽमन्युम्। उत्ऽभिदम्।
इन्द्रः। कृणोतु। प्रऽसवे। रथम्। पुरः॥ ९॥

हेइन्द्र देवेषुप्रथमंश्रेष्ठंत्वांहवामहे यागार्थमाह्वयामहे तथा त्वं पृतनासुसंग्रामेषुसासहिर्बभू-थ शत्रूणामभिभविवासि उत्तरार्धःपरोक्षकृतः सइन्द्रोनोस्माकंकारुंस्तुतीनांकर्तारंउपमन्युं उपमन्तारं सर्वज्ञं उद्भिदंशत्रूणामुद्भेत्तारं इममेवंगुणविशिष्टंपुत्रंकृणोतुकरोतु अपिच प्रसवे युद्धोत्सवे अस्मदीयंरथंपुरः अन्येभ्योरथेभ्यःपुरतोवर्तमानंकरोतु यद्वा कारुमित्यादीनिरथवि-शेषणानि कारुंयुद्धस्यकर्तारंउपमन्युं उपगतेनभासेनमन्युनाक्रोधेनयुक्तं उद्भिदं मार्गेवस्थितानां वृक्षादीनांउद्भेत्तारं अतिशयेनभंक्तारम्॥ बभूथ बभूथाततन्थजगृभ्मववर्थेतिनिगमेइतिनिपात-नादिडभावः। सेमं सोचिलोपेचेत्पादपूरणमितिसुलोपः। प्रसवे षूङ्प्राणिप्रसवे ऋदोरप् थाथा-दिनोत्तरपदान्तोदात्तत्वम्॥ ९॥

९. तुम देवों में प्रथम हो। तुम संग्राम में शत्रु-जयी हो। हम तुम्हें बुलाते हैं। वे इन्द्र हमारे युद्ध-योग्य, तेजस्वी और विभेद-कारी रथ को संग्राम में अन्य रथों के आगे कर दें।

त्वंजिगेथनधनारुरोधिथार्भेष्वाजामघवन्महत्सुच ।
त्वामुग्रमवसेसंशिशीमस्यथानइन्द्रहवनेषुचोदय ॥ १०॥

त्वम् । जिगेथ । न । धना । रुरोधिथ । अर्भेषु । आजा ।
मघऽवन् । महत्ऽसु । च । त्वाम् । उग्रम् । अवसे । सम् ।
शिशीमसि । अथ । नः । इन्द्र । हवनेषु । चोदय ॥ १० ॥

हेइन्द्र त्वंजिगेथ शत्रून्जयसि तथा धनाशत्रुभ्योपहृतानिधनानिनरुरोधिथ नावरुणत्सि स्तोतृभ्यःप्रयच्छसीत्यर्थः हेमघवन् धनवन्निन्द्र अर्भेष्वल्पेषु आजा आजिषुसंग्रामेषुमहत्सुचप्रौढेषुसंग्रामेषुअवसे अस्माकंरक्षणार्थं उग्रं उद्गूर्णं अधिकबलंत्वांसंशिशीमसि स्तोत्रैस्तीक्ष्णीकुर्मः अथानन्तरं हेइन्द्र त्वंहवनेषुयुद्धार्थमाह्वानेषुसत्सु आगत्यनोस्मान्चोदयसंग्रामेषुप्रेरय जयंप्रापयेत्यर्थः ॥ जिगेथ जिजये लिटिथलि क्रादिनियमात्प्राप्तस्येटः अचस्तास्वत्थल्यनिटोनित्यमिति प्रतिषेधः सन्लिटोर्जेरित्यभ्यासादुत्तरस्यजकारस्यकुत्वम् । रुरोधिथ क्रादिनियमादिट् । आजा सुपांसुलुगितिसप्तमीबहुवचनस्यडादेशः । शिशीमसि शोतनूकरणे बहुलंछन्दसीतिविकरणस्यश्लुः आदेचइत्यात्वम् द्विर्वचनेबहुलंछन्दसीत्यभ्यासस्येत्वम् ईहल्यघोरितीकारान्तादेशः इदन्तोमसिः ॥ १० ॥

१०. तुम जय प्राप्त करते हो और विजित धन को छिपाकर रखते नहीं। धनद इन्द्र, तुम उग्र हो। क्षुद्र और विशाल युद्ध में, रक्षा के लिए, स्तोत्र-द्वारा हम तुम्हें तीव्र करते हैं। इसलिए इन्द्र, हमें युद्ध के लिए आह्वान में उत्तेजित करो।

विश्वाहेन्द्रोअधिवक्तानोअस्त्वपरिह्वृताःसनुयामवाजम् ।
तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीउतद्यौः॥१९॥१५॥

विश्वाहा । इन्द्रः । अधिऽवक्ता । नः । अस्तु । अपरिऽह्वृताः ।
सनुयाम । वाजम् । तत् । नः । मित्रः । वरुणः । ममहन्ताम् ।
अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥ ११ ॥ १५ ॥

व्याख्यातेयंरोहिच्छ्यावेविवर्गे इन्द्रःसर्वेष्वहस्सु अस्माकंपक्षपातेनवक्ताभवतु वयंचाकुटिलगतयःसन्तः इन्द्रेणदत्तमन्नंलभामहे यदस्माभिःप्रार्थितं अस्मदीयंतन्मित्रादयःपूजितंकुर्वन्तु ॥ ११ ॥

११. सदा वर्तमान इन्द्र हमारे पक्ष से बोलें। हम भी अकुटिल-गति होकर अन्न भोग करें। मित्र, वरुण, अदिति, सिन्धु, पृथिवी और आकाश उन्हें पूजें।

॥ इतिप्रथमस्यसप्तमेपञ्चदशोवर्गः ॥ १५ ॥

तत्तइत्यष्टर्चंदशमंसूक्तं कुत्सस्यार्षमैन्द्रंत्रैष्टुभम् तथाचानुक्रान्तम्—तत्तेष्टाविति । तृतीयेछन्दोमेनिष्केवल्ये इदंसूक्तंनिविद्धानं विश्वजितइतिखण्डेसूत्रितम्—तत्तइन्द्रियमितिनिष्केवल्यमिति।

तत्रप्रथमामृचमाह—

तत्तंइन्द्रियंपरमंपराचैरधारयन्तकवयःपुरेदम् ।
क्षमेदमन्यद्दिव्य१न्यदस्यसमीपृच्यतेसमनेवकेतुः ॥ १ ॥

तत् । ते । इन्द्रियम् । परमम् । पराचैः । अधारयन्त । कवयः ।
पुरा । इदम् । क्षमा । इदम् । अन्यत् । दिवि । अन्यत् । अस्य ।
सम् । ईमिति । पृच्यते । समनाऽइव । केतुः ॥ १ ॥

हेइन्द्र ते त्वदीयं परममुत्कृष्टं तत्प्रसिद्धमिदंवर्तमानमिन्द्रियंबलं पुरापूर्वस्मिन्कालेकवयःक्रान्तदर्शिनःस्तोतारः पराचैःपराचीनंपराङ्मुखं यद्वा पराचैःपराञ्चनैः परागमनैर्युक्तंयुद्धाभिमुखमेव अधारयन्तधृतवन्तः अपिचास्येन्द्रस्य अन्यदेकं इदमग्न्याख्यंज्योतिःक्षमाक्षमायांभूमौवर्तते अन्यदेकंसूर्याख्यंदिविद्युलोके ईम् तदिदमुभयविधमिन्द्रस्यज्योतिः संपृच्यते परस्परंसंयुज्यते रात्रावादित्योग्निनासंयुक्तोभवति अग्निंवादित्यःसायंप्रविशति तस्मादग्निर्दूरान्नक्तंददृशेइतिश्रुतेः । अहनित्वग्निःसूर्येणसंगच्छते उद्यन्तंवावादित्यमग्निमनुसमारोहइतितस्माद्धूमएवाग्नेर्दिवाददृशेइतिश्रुतेः । अनयोःपरस्परंसङ्गमनेदृष्टान्तः—समनेवकेतुः समनशब्दः संग्रामवाची यथासमनेसंग्रामेयुद्ध्यमानयोरुभयोः केतुर्ध्वजोध्वजान्तरेणसंयुज्यतेतद्वत्।इन्द्रियं इन्द्रस्यलिङ्गंबलं इन्द्रियमिन्द्रलिङ्गमितिघच्प्रत्ययान्तोनिपात्यते । पराचैः अव्ययमेतत् उच्चैर्नीचैरितियथा यास्कस्त्वाह—पराचैःपराञ्चनैरिति । क्षमा सुपांसुलुगितिसप्तम्यालुक् ईमोमलोपःसांहितिकश्छान्दसः। समनाइव षमष्टमअवैकृव्ये अन्येभ्योपिदृश्यतइतियुच् सुपांसुलुगितिसप्तम्याआकारः इवेन विभक्त्यलोपःपूर्वपदप्रकृतिस्वरत्वंचेतिसमासः ॥ १ ॥

१. इन्द्र, पहले मेधावियों ने तुम्हारे इस प्रसिद्ध परम बल को साक्षात् धारण किया था। इन्द्र की अग्नि-रूप एक ज्योति पृथिवी पर और दूसरी सूर्य-रूप आकाश में है। युद्ध में दोनों पक्षों की ध्वजायें जैसे मिलती हैं, उसी तरह उक्त उभय ज्योतियाँ संयुक्त होती हैं।

सधारयत्पृथिवींपप्रथंच्चवज्रेणहत्वानिरपःससर्ज ।
अहन्नहिमभिनद्रौहिणंव्यहन्व्यंसंमघवाशचीभिः ॥ २ ॥

---

१ तै० ब्रा० २, १. २. । २ तै० ब्रा० २, १. २. । ३ नि० ११. २५. ।

सः । धारयत् । पृथिवीम् । पप्रथंत् । च । वज्रेंण । हत्वा । निः ।
अपः । ससर्ज । अहंन् । अहिंम् । अभिंनत् । रौहिणम् । वि ।
अहंन् । विऽअंसम् । मघऽवां । शचींभिः ॥ २ ॥

सइन्द्रः पृथिवीं असुरैःपीडितांभूमिंधारयत् धृतवान् पीडाराहित्येनस्थितामकरोदित्यर्थः तदनन्तरं पप्रथच्च तांभूमिंविस्तीर्णामकरोत् अपिचवज्रेणायुधेनहन्तव्यान्वृत्रादीन्हत्वा अपोवृष्ट्युदकानि निःससर्जमेघान्निर्गमयामास एतदेवस्पष्टीक्रियते—अहिमन्तरिक्षेवर्तमानंमेघं अहन्वज्रेण वर्षणार्थमताडयत् रौहिणंरौहिणोनामकश्चिदसुरःतंव्यभिनत्व्यदारयत् अपिच मघवाधनवानिन्द्रः शचीभिःआत्मीयैर्युद्धकर्मभिर्व्यंसंविगतभुजंवृत्रासुरं अहन् अवधीत्॥ पप्रथत् पृथुंकरोतिप्रथयति तत्करोतीतिणिच् णाविष्ठवत्प्रातिपदिकस्यकार्यमितिवचनात् रऋतोहलादेर्लघोरितिऋकारस्यरत्वम् टेरितिटिलोपः तस्यस्थानिवद्भावाद्वृद्ध्यभावः प्रथयतेर्लुङि चङि णिलोपः द्विर्वचनं चङ्यन्यतरस्यामितिचङःपूर्वस्योदात्तत्वम् नचणिलोपस्यस्थानिवत्त्वम् नपदान्तेत्यादिनास्वरविधिंप्रतितन्निषेधात् पूर्वपदस्यासमानवाक्यस्थत्वान्निघाताभावः ॥ २ ॥

२. इन्द्र ने पृथिवी को धारण और विस्तृत किया है। इन्द्र ने वज्र-द्वारा वृत्र का वधकर वृष्टि-जल बाहर किया है। अहि को मारा है। रौहिण नामक असुर का विदारण किया है। इन्द्र ने अपने कार्य-द्वारा विगत-भुज वृत्र का नाश किया, है।

तृतीयामृचमाह—

सजातूभर्माश्रद्दधानओजःपुरोविभिन्दन्नचरद्विदासीः ।
विद्वान्वज्रिन्दस्यवेहेतिमस्यार्यंसहोवर्धयाद्युम्नमिन्द्र ॥ ३ ॥

सः । जातूऽभर्मा । श्रत्ऽदधानः । ओजः । पुरः । विऽभिन्दन् ।
अचरत् । वि । दासीः । विद्वान् । वज्रिन् । दस्यवे । हेतिम् ।
अस्य । आर्यम् । सहः । वर्धय । द्युम्नम् । इन्द्र । ३ ॥

जातूभर्मा जातूइत्यशनिमांचक्षते भर्मायुधंअशनिरूपमायुधंयस्यसतथोक्तः यद्वा जातानांप्रजानांभर्ता ओजः ओजसाबलेननिष्पाद्यंकार्यंश्रद्दधानःआदरातिशयेनकामयमानः एवंभूतः सइन्द्रः दासीःदस्युसंबन्धीनिपुरः पुराणिविभिन्दन् विनाशयन् व्यचरत् विविधमगच्छत् हेवज्रिन्वज्रवन्निन्द्र विद्वान्स्तुतीर्विजानंस्त्वं अस्यस्तोतुर्दस्यवे उपक्षयकारिणेशत्रवेहेतिमायुधंविसृजेतिशेषः अपिच हेइन्द्र आर्यंसहःआर्याविद्वांसःस्तोतारस्तदीयंबलंवर्धय अतिवृद्धंकुरु तथाद्युम्नंतदीयंयशश्चवर्धय॥ जातूभर्माजनीप्रादुर्भावे अन्येष्वपिदृश्यतइतिदृशिग्रहणस्यसर्वोपाधिव्यभिचारार्थ-

त्वात्केवलादपिडप्रत्ययः जांस्तूर्वतीतिजातूः तुर्वीहिंसार्थः क्विपि राल्लोपइतिवलोपः भ्रियतइति भर्म अन्येभ्योपिदृश्यन्तइतिमनिन् जातूभर्मयस्य छान्दसोरेफलोपः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् पक्षान्तरेतु जनेर्निष्ठा जनसनखनामित्यात्वम् जातंसर्वंभर्मभर्तव्यंयेन बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् वर्णव्यापत्त्याअकारस्यऊकारः ॥ ३ ॥

३. उन्होंने वज्र-स्वरूप अस्त्र लेकर वीर्य कार्य में उत्साह-पूर्ण होकर दस्युओं के नगरों का विनाश करके विचरण किया था। वज्रधर इन्द्र, हमारी स्तुति जानकर दस्युओं के प्रति अस्त्र निक्षेप करो। इन्द्र, आर्यों का वल और यश बढ़ाओ।

तदूचुषेमानुषेमायुगानिकीर्तेन्यंमघवानामबिभ्रत् ।
उपप्रयन्दस्युहत्यायवज्रीयद्धसूनुःश्रवसेनामदधे ॥ ४ ॥

तत् । ऊचुषे । मानुषा । इमा । युगानि । कीर्तेन्यम् । मघऽवा । नाम । बिभ्रत् । उपऽप्रयन् । दस्युऽहत्याय । वज्री । यत् । ह । सूनुः । श्रवसे । नाम । दधे ॥ ४ ॥

नाम शत्रूणांनामकं तदिन्द्रस्यबलं ऊचुषे उक्तवतेस्तुवतेयजमानायकीर्तेन्यं कीर्तनीयंस्तुत्यंनामकं तद्बलंबिभ्रत् धारयन्मघवाधनवानिन्द्रः मानुषामनुष्याणांसंबन्धीनि इमाइमानिदृश्यमानानि युगानिअहोरात्रसंघनिष्पाद्यानि कृतत्रेतादीनि सूर्यात्मनानिष्पादयतीतिशेषः किंपुनस्तन्नाम दस्युहत्याय दस्यूनांवृत्रादीनांहननाय उपप्रयन् गृहसमीपान्निर्गच्छन्वज्रीवज्रवान् सूनुः शत्रूणांप्रेरयितेन्द्रः यद्ध यत्खलु नाम शत्रूणांनामकंश्रवसेजयलक्षणाययशसेदधेधृतवान् ॥ ऊचुषे ब्रूञ्व्यक्तायांवाचि ब्रुवोवचिः लिटःक्वसुः वचिस्वपीत्यादिनासंप्रसारणं चतुर्थ्येकवचनेभसंज्ञायां वसोः संप्रसारणमितिसंप्रसारणं शासिवसिघसीनांचेतिषत्वम् क्वसुप्रत्ययाद्युदात्तत्वम्। कीर्तेन्यं कृतसंशब्दने कृत्यार्थेतवैकेनितिकेन्यप्रत्ययः। मघवा मघशब्दात् छन्दसीवनिपावितिमत्वर्थीयोवनिप्। बिभ्रत् डुभृञ्धारणपोषणयोः शतरि जुहोत्यादित्वात् शपःश्लुः भृञामिदित्यभ्यासस्येत्वम् नाभ्यस्ताच्छतुरितिनुमागमप्रतिषेधः अभ्यस्तानामादिरित्याद्युदात्तत्वम् ॥ ४ ॥

४. वज्रधर और अरिमर्दन इन्द्र, दस्युओं के विनाश के लिए निकलकर, यश के लिए, जो बल धारण किया था, कीर्त्तन-योग्य उस बल को धारण कर धनवान् इन्द्र, स्तोता यजमानों के लिए मनुष्यों के युगों का, सूर्य-रूप से, निष्पादन करते हैं।

तदस्येदंपश्यताभूरिपुष्टंश्रदिन्द्रस्यधत्तनवीर्याय ।
सगाअविन्दत्सोअविन्ददश्वान्त्सओषधीःसोअपःसवनानि॥५॥१६॥

---

१ जांस्तूर्वतीतिपाठः ।

तत् । अस्य । इदम् । पश्यत । भूरि । पुष्टम् । श्रत् । इन्द्रस्य ।
धत्तन । वीर्याय । सः । गाः । अविन्दत् । सः । अविन्दत् । अश्वान् ।
सः । ओषधीः । सः । अपः । सः । वनानि ॥ ५ ॥ १६ ॥

हेऋत्विग्यजमानलक्षणाजनाः अस्येन्द्रस्य तदिदंवीर्यं पुष्टंप्रवृद्धं अतएवभूरिविस्तीर्णंपश्यत आलोकयत तस्मैचवीर्याय श्रद्धत्तन बहुमानंकुरुत किंपुनस्तद्वीर्यमितिचेद उच्यते—सइन्द्रः पणिभिरपहृतागाः येनवीर्येणाविन्दद् अलभत तथा तैरपहृतानश्वान् सइन्द्रोयेनाविन्दद् अपिच सइन्द्रःओषधीः ओषध्युपलक्षितांसर्वांभूमिंयेनवीर्येणालभत तथा वृत्रेणनिरुद्धाअपोवृष्ट्युदकानिसइन्द्रोयेनालभत तथा वनानिवननीयानिसंभजनीयानिधनानिसइन्द्रोयेनवीर्येणप्रामोद॥ धत्तन तप्तनप्तनथनाश्चेतितस्यतनादेशः । अविन्दद् विदॢलाभे शेमुचादीनामितिनुम् ॥ ५॥

५. इन्द्र के इस प्रवृद्ध और विस्तीर्ण वीर्य को देखो। उनकी शक्ति पर श्रद्धा करो। उन्होंने गौ और अश्व प्राप्त किया उन्होंने ओषधियों, जलों और वनों को प्राप्त किया।

भूरिकर्मणेवृषभायवृष्णेसत्यशुष्मायसुनवामसोमम् ।
यआदृत्यापरिपन्थीवशूरोऽयज्वनोविभजन्नेतिवेदः ॥ ६ ॥

भूरिऽकर्मणे । वृषभाय । वृष्णे । सत्यऽशुष्माय । सुनवाम ।
सोमम् । यः । आऽदृत्य । परिपन्थीऽइव । शूरः । अयज्वनः ।
विऽभजन् । एति । वेदः ॥ ६ ॥

भूरिकर्मणे बहुविधेनशत्रुवधादिरूपेणकर्मणायुक्तायवृषभाय वृषभवद् सर्वेषुदेवेषुश्रेष्ठाय वृष्णेसेचनसमर्थाय सत्यशुष्माय अवितथबलायेन्द्रायतदर्थंसोमंसुनवाम होमार्थंरसरूपंकरवाम शूरःशौर्योपेतोयइन्द्रः आदृत्य धनविषयमादरंकृत्वा अयज्वनोऽयजमानस्यवेदोधनंविभजन् तस्मादयजमानाद्विभक्तंकुर्वन् अपहरन् एति यजमानेभ्यस्तद्धनंदातुंगच्छति तत्रदृष्टान्तः—परिपन्थीव यथामार्गनिरोधकश्चोरः गच्छतांपुण्यपुरुषाणांधनंबलात्कारेणापहृत्यगच्छतितद्वद् ॥ आदृत्य दृङ्आदरे समासेनञ्पूर्वेक्त्वोल्यप् तस्यस्थानिवद्भावेनकृत्त्वेसति ह्रस्वस्यपितिकृतीति तुक् । परिपन्थीव छन्दसिपरिपन्थिपरिपरिणौपर्यवस्थातरीतीनिप्रत्ययान्तोनिपात्यते ॥ ६॥

६. प्रभूत-कर्मा, श्रेष्ठ, अभीष्टदाता और सत्य-बल इन्द्र को लक्ष्य कर हम सोम अभिषव करते हैं। जैसे पथ-निरोधक चोर पथिकों के पास से धन ले लेता है, वैसे ही वीर इन्द्र धन का आदर करके यज्ञ-हीन मनुष्यों के पास से उस धन का भाग कर यज्ञ-परायण मनुष्यों के पास ले जाते हैं।

सप्तमीमृचमाह—

तदि॑न्द्र॒ प्रेव॑ वी॒र्यं॑ चक॒र्थ॒ यत्स॒सन्तं॒ वज्रे॒णाबो॑धयो॒ऽहि॑म् ।
अनु॑ त्वा॒ पत्नी॑र्हृषि॒तं वय॑श्च॒ विश्वे॑ दे॒वासो॑ अमद॒न्ननु॑ त्वा ॥ ७ ॥

तत् । इ॒न्द्र॒ । प्रऽइ॑व । वी॒र्य॑म् । च॒क॒र्थ॒ । यत् । स॒सन्त॑म् । वज्रे॑ण ।
अबो॑धयः । अहि॑म् । अनु॑ । त्वा॒ । पत्नीः॑ । हृ॒षि॒तम् । वयः॑ ।
च॒ । विश्वे॑ । दे॒वासः॑ । अ॒म॒द॒न् । अनु॑ । त्वा॒ ॥ ७ ॥

हेइन्द्र तद्वीर्यंवीरकर्म प्रेवचकर्थ प्रख्यातमिवाकार्षीः किंपुनस्तद्वीर्यं ससन्तंस्वपन्तं मदोन्मत्तमहिंवृत्रंवज्रेणकुलिशेनयद्येनवीर्येणत्वमबोधयः प्रबुद्धःसन्मयासहयुद्धंकरोत्विति जागरितवानसि हृषितं तादृशस्यवृत्रस्यहननेनप्राप्तहर्षंत्वात्वांअनुपश्चात्पत्नीर्देवपत्न्यः अमदन्हर्षंप्राप्ताः अपिच वयश्चगमनशीलाः मरुतोपि तथाविश्वेदेवासः अन्येचसर्वेदेवाः त्वात्वामनुपश्चादमदन् अमाद्यन् ॥ ससन्तं षसस्वप्ने अदादित्वाच्छपोलुक् । पत्नीः वाछन्दसीतिपूर्वसवर्णदीर्घत्वम् । अमदन् मदीहर्षे व्यत्ययेनशप् ॥ ७ ॥

७. इन्द्र, तुमने वह प्रसिद्ध वीर-कार्य किया था। उस निद्रित अहि को वज्र-द्वारा जागरित किया था। उस समय देव-रमणियों ने तुम्हें हृष्ट देखकर हर्ष प्राप्त किया था। गतिशील मरुद्गण और सारे देवगण तुम्हें हृष्ट देखकर हृष्ट हुए थे।

अष्टमीमृचमाह—

शुष्णं॒ पिप्रुं॒ कुय॑वं वृ॒त्रमि॑न्द्र य॒दाव॑धी॒र्वि पुरः॒ शम्ब॑रस्य ।
तन्नो॑ मि॒त्रो वरु॑णो मामहन्ता॒मदि॑तिः॒ सिन्धुः॑ पृथि॒वी उ॒त द्यौः ॥ ८ ॥ १७ ॥

शुष्ण॑म् । पिप्रु॑म् । कुय॑वम् । वृ॒त्रम् । इ॒न्द्र॒ । य॒दा । अव॑धीः ।
वि । पुरः॑ । शम्ब॑रस्य । तत् । नः॒ । मि॒त्रः । वरु॑णः । म॒म॒ह॒न्ता॒म् ।
अदि॑तिः । सिन्धुः॑ । पृ॒थि॒वी । उ॒त । द्यौः ॥ ८ ॥ १७ ॥

हेइन्द्र त्वंशुष्णादीन्चतुरोसुरान् यदावधीःहतवानसि तदानींशम्बरस्यासुरस्यपुरः नगराणि विदारितवानसि असुराणांमुख्येषुहतेषुअन्यान्यपिअसुरपुराणिविदीर्णान्यासन्नित्यर्थः यदनेनसूक्तेनप्रार्थितंअस्मदीयंतन्मित्रादयोममहन्तां पूजितंकुर्वन्तु ॥ शुष्णं शुषशोषणे अन्तर्भावितण्यर्थात् तृषिशुषिरसिभ्यःकिच्चेतिनप्रत्ययः नित्दित्यनुवृत्तेराद्युदात्तत्वम् । पिप्रुं पृपालनपूरणयोः प्रइत्येके औणादिकःकुप्रत्ययः छन्दस्युभयथेतितस्यसार्वधातुकत्वेशप् जुहोत्यादित्वाच्श्लुः

अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वम्। कुयवं यवोयवनंमिश्रणं कुत्सितंयवनमस्य बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्। शम्बरस्य शमयतीतिशम्बः आयुधम् शमेर्वन् ततोमत्वर्थीयोरप्रत्ययः ॥ ८ ॥

८. इन्द्र, तुमने शुष्ण, पिप्रु, कुयव और वृत्र का वध किया है और शम्बर के नगरों का विनाश किया था। अतएव मित्र, वरुण, अदिति, सिन्धु, पृथिवी और आकाश हमारी उस प्रार्थित वस्तु को पूजित करें।

॥ इतिप्रथमस्यसप्तमेसप्तदशोवर्गः ॥ १७ ॥

योनिरितिनवर्चमेकादशंसूक्तंकुत्सस्यार्षंत्रैष्टुभमैन्द्रं योनिर्नवेत्यनुक्रान्तम् सूक्तविनियोगो लैङ्गिकः ॥

योनिष्टइन्द्रनिषदेअकारितमानिषीदस्वानोनार्वा।
विमुच्यावयोवसायाश्वान्दोषावस्तोर्वहीयसःप्रपित्वे ॥ १ ॥

योनिः। ते। इन्द्र। निऽसदे। अकारि। तम्। आ। नि। सीद। स्वानः। न। अर्वा। विऽमुच्य। वयः। अवऽसाय। अश्वान्। दोषा। वस्तोः। वहीयसः। प्रऽपित्वे ॥ १ ॥

हेइन्द्र योनिः वेद्याख्यंस्थानं तेतवनिषदेनिषदनायोपवेशनायअकारिकृतं अस्माभिःप्रकल्पितमभूत् तंयोनिंआनिषीद शीघ्रमागत्यतत्रोपविश शीघ्रागमनेदृष्टान्तः—स्वानोनार्वा अर्वेत्यश्वनाम यथाअश्वः स्वानः हेषाशब्दंकुर्वन्स्वकीयंस्थानंशीघ्रमागच्छति तद्वत् किंकृत्वावयः अश्वबन्धनार्थान्रश्मीन् विमुच्यरथाद्विश्लिष्य तथाअश्वान्रथेयोजितांश्चतुरगानवसायविमुच्य अत्रनिरुक्तम्—अवसायाश्वानितिस्यतिरुपसृष्टोविमोचनेइति[1]। कीदृशानश्वान् प्रपित्वेयागकालेप्राप्ते प्रपित्वेप्राप्तेभीकेश्यंक्तइतियास्कः[2]। दोषारात्रौवस्तोरहनिच वहीयसः आदरातिशयेनवोढ्न् ॥ निषदे सदेःसंपदादिलक्षणोभावेक्विप्। स्वानः स्यमुस्वनध्वनशब्दे बहुलवचनात्कर्तरिघञ् कर्षात्वतइत्यन्तोदात्तत्वम्। वयः वियन्ति रथेनसहसंगच्छन्तइतिविशब्देनरश्मयउच्यन्ते वीगत्यादिषु औणादिकइप्रत्ययः टिलोपश्च द्वितीयार्थेप्रथमा। अवसाय षोन्तकर्मणि आदेचइत्यात्वम् समासेनञ्पूर्वेक्त्वोल्यपितिक्त्वोल्यबादेशः। वहीयसः वहप्रापणे तृजन्ताद्वोढृशब्दात्तुश्छन्दसीतीयसुन् तुरिष्ठेमेयःस्वितितृलोपेकर्तव्येढत्वधत्वष्टुत्वढलोपानामसिद्धत्वात्तदाश्रितस्यौत्वस्याप्यभावेतृलोपएवक्रियते ॥ १ ॥

१. इन्द्र, तुम्हारे बैठने के लिए जो वेदी प्रस्तुत हुई है, उस पर शब्दायमान अश्व की तरह बैठो। अश्वों को बांधनेवाली रस्सियों को छुड़ाकर अश्वों को मुक्त कर दो। वे अश्व, यज्ञ-काल आने पर, दिन-रात, तुम्हें वहन करते हैं।

[1] नि० १. १७.। [2] नि० ३. २०.।

द्वितीयामृचमाह—

ओत्येनरइन्द्रमूतयेगुर्नूचित्तान्त्सद्योअध्वनोजगम्यात् ।
देवासोमन्युंदासस्यश्चम्नन्तेनआवक्षन्त्सुवितायवर्णम् ॥ २ ॥

ओ इति । त्ये । नरः । इन्द्रम् । ऊतये । गुः । नु । चित् । तान् । सद्यः । अध्वनः । जगम्यात् । देवासः । मन्युम् । दासस्य । श्चम्नन् । ते । नः । आ । वक्षन् । सुविताय । वर्णम् ॥ २ ॥

त्येतेनरोयज्ञस्यनेतारोयजमानाः ऊतयेरक्षणाय इन्द्रं ओ आउइतिनिपातद्वयसमुदायआकारार्थः आगुः आगच्छन्ति सचेन्द्रः आगतांस्तान्नूचिदक्षिमंसद्यस्तदानीमेवअध्वनोनुष्ठानमार्गान् जगम्यात्गमयतुमापयतु देवासः सर्वेदेवाः दासस्यउपक्षपयितुरसुरस्यमन्युंक्रोधंश्चम्नन्च भक्षयन्तु हिंसन्त्वित्यर्थः अपिच तेदेवानोस्माकंसुवितायसुष्ठुमासव्याययज्ञाय वर्णंअनिष्टनिवारकमिन्द्रं आवक्षन्आवहन्तुआनयन्तु ॥ जगम्यात् गमेरन्तर्भावितण्यर्थात् लिङि बहुलंछन्दसीतिशपः श्लुः । श्चम्नन् चमुअदने लेटिव्यत्ययेनश्ना शकारोपजनश्छान्दसः यद्वा श्चम्नातिःप्रकृत्यन्तरंहिंसार्थंद्रष्टव्यम् । वक्षन् वहमापणे लेटि सिब्बहुलंलेटीतिसिप् ढत्वकत्वषत्वानि । सुविताय सुपूर्वादेतेः कर्मणिनिष्ठा तन्वादित्वादुवङ् सपमानावक्कइत्युत्तरपदान्तोदात्तत्वम् । वर्णम् वृञ्वरणेअस्मादन्तर्भावितण्यर्थात् कृवृजृसिद्रुपन्यनिस्वपिभ्योनित्चेतिनमत्ययः नित्त्वादाद्युदात्तत्वम् ॥ २ ॥

२. रक्षण के लिए ये मनुष्य इन्द्र के निकट आये हैं। इन्द्र उन्हें तुरत, उसी समय, अनुष्ठान-मार्ग में जाने देते हैं। देवता लोग दस्युओं का क्रोध विनष्ट करें और हमारे सुख-साधन-स्वरूप यज्ञ में अनिष्ट-निवारक इन्द्र को आने दें।

तृतीयामृचमाह—

अवत्मनाभरतेकेतवेदाअवत्मनाभरतेफेनमुदन् ।
क्षीरेणस्नातःकुयवस्ययोषेहतेतेस्यातांप्रवणेशिफायाः ॥ ३ ॥

अव । त्मना । भरते । केतऽवेदाः । अव । त्मना । भरते । फेनम् । उदन् । क्षीरेण । स्नातः । कुयवस्य । योषे इति । हते इति । ते इति । स्याताम् । प्रवणे । शिफायाः ॥ ३ ॥

केतवेदाः केतंज्ञातं वेदःपरेषांधनंयेनसतादृशः कुयवनामासुरः त्मना आत्मना स्वयमेवावभरते ज्ञातंपरेषांधनंचअपहरति अपिचसोसुरः उदन्नुदके अन्तर्वर्तमानःसन् फेनं फेनयुक्तमुदकं त्मना आत्मनास्वयमेवावभरते अपहरति क्षीरेणक्षरणशीलेनतेनापहृतेनोदकेन कुयवस्यासुरस्ययोषेभार्ये स्नातःस्नानंकुर्वाते ते तादृश्यौ स्त्रियौ शिफायाः शिफानामनदी तस्याःप्रवणेनिम्नेप्रवेष्टुमशक्येअगाधप्रदेशे हतेनष्टे स्यातां भवेतां हेइन्द्र त्वंपरेषांधनमपहृत्य अन्यैर्दुरवगाहे उदकस्यमध्येवर्तमानंकुयवं सकुटुम्बं अवधीरित्यर्थः ॥ त्मना मन्त्रेष्वाङ्यादेरात्मनइतिआकारलोपः । भरते हृञ्हरणे हृग्रहोर्भइतिभत्वम् । केतवेदाः कितज्ञाने कर्मणि घञ् बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । उदन् पद्दन्नित्यादिनाउदकशब्दस्यउदन्नादेशः सुपांसुलुगितिसप्तम्यालुक् ॥ ३ ॥

३. कुयव नामक असुर दूसरे के धन का पता जानकर स्वयं अपहरण करता है। वह जल में रहकर स्वयं फेनयुक्त जल को चुराता है। कुयव की दो स्त्रियाँ उसी जल में स्नान करती हैं। वे स्त्रियाँ शिफा नामक नदी के गम्भीर निम्नतल में विनष्ट हों।

युयोप नाभिरुपरस्यायोः प्र पूर्वाभिस्तिरते राष्टि शूरः ।
अञ्जसी कुलिशी वीरपत्नी पयो हिन्वाना उदभिर्भरन्ते ॥ ४ ॥

युयोप । नाभिः । उपरस्य । आयोः । प्र । पूर्वाभिः । तिरते । राष्टि । शूरः । अञ्जसी । कुलिशी । वीरऽपत्नी । पयः । हिन्वानाः । उदऽभिः । भरन्ते ॥ ४ ॥

उपरस्य उदकस्यमध्येसुप्तस्यावस्थितस्य आयोः परेषामुपद्रवार्थं इतस्ततोगच्छतः कुयवस्यासुरस्य नाभिः सन्नद्धमावसनस्थानं युयोपगूढमासीत् यथाअन्यैर्नदृश्यतेसोसुरस्तथाअकरोदित्यर्थः अपिच पूर्वाभिः पूरयित्रीभिरात्मनाअपहृताभिरद्भिः प्रतिरते सोसुरः प्रवर्धते सचशूरः शौर्योपेतोराष्टि राजतेच आत्मीयेन शौर्येणलोकेप्रख्यातोभवतीत्यर्थः तं इममसुरं अञ्जसीआञ्जस्योपेता कुलिशी कूलं शातयन्ती वीरपत्नी वीरस्य पालयित्री एतत्संज्ञिकास्तिस्रोनद्यः पयः पयसातत्संबन्धिनासारभूतेनोदकेन हिन्वानाः प्रीणयन्त्यः उदभिरात्मीयैरुदकैर्भरन्ते धारयन्ति ॥ युयोप युपविमोहने । नाभिः नहोभश्चेतीञ्प्रत्ययः । राष्टि राजृदीप्तौ बहुलंछन्दसीतिशपोलुक् व्रश्चादिनाषत्वेष्टुत्वम् । पयः सुपांसुलुगितितृतीयायालुक् । हिन्वानाः हिविःप्रीणनार्थः इदित्त्वान्नुम् अस्माताच्छीलिकश्चानश् आगमानुशासनस्यानित्यत्वान्नुगभावः चानशोलसार्वधातुकत्वाभावाचत्स्वराभावेचित्स्वरएवशिष्यते॥४॥

४. असु या उपद्रव के लिए इधर-उधर जानेवाला कुयव जल के बीच रहता है। उसका निवास-स्थान गुप्त था। वह शूर, पूर्व-अपहृत जल के साथ, वृद्धि प्राप्त करता और दीप्त होता है। अंजसी, कुलिशी

और वीर-पत्नी नाम की तीनों नदियाँ स्वकीय जल से उसे प्रीत करके, जल-द्वारा, उसे धारण करती हैं।

प्रति॒यत्स्यानीथादर्शि॒दस्यो॒रोको॒नाच्छा॒सद॑नंजान॒तीगा॑त् ।
अध॑स्मानोमघवञ्चर्कृ॒तादिन्मानो॑म॒घेव॑निष्ष॒पीपरा॑दाः ॥ ५॥१८॥

प्रति॑ । यत् । स्या । नीथा॑ । अद॑र्शि । दस्यो॑ः । ओकः॑ । न । अच्छ॑ । सद॑नम् । जा॒न॒ती । गा॒त् । अध॑ । स्म॒ । नः॒ । म॒घ॒ऽव॒न् । च॒र्कृ॒तात् । इत् । मा । नः॒ । म॒घाऽइ॑व । नि॒ष्ष॒पी । परा॑ । दाः॒ ॥ ५ ॥ १८ ॥

यद्यदानीथानयनहेतुभूता या सापदवीप्रत्यदर्शि अस्माभिर्दृष्टाभूत् साचपदवीदस्योः उपक्षपयितुः कुयवस्यासुरस्यसदनंगृहमच्छाभिमुख्येनगात्गतामाप्ता तत्रदृष्टान्तः—जानतीस्वकीयंवत्समभिजानतीगौः ओकोन निवासस्थानंस्वकीयंगोष्ठंयथाऋजुमाप्नोति तद्वन्मार्गोपिअसुरगृहंप्राप्तइत्यर्थः अधस्म अथानन्तरमेव हेमघवन् धनवन्निन्द्र चर्कृतात् पुनःपुनस्तेनासुरेणकृतादुपद्रवान्नोस्मान्रक्षेतिशेषः इदित्यवधारणे अस्मान्रक्षैव नोस्मान्मापरादाः मापरित्याक्षीः अस्माभिर्ज्ञातेनमार्गेणगत्वाअस्मदुपद्रवकारिणंअसुरंजहीतितात्पर्यार्थः तत्रव्यतिरेकेदृष्टान्तोभिधीयते—मघेवनिःषपी यथाविनिर्गतपसोविनिर्गतशेपोयथेष्टचारीदासीपतिः मघाइव यथाधनानिअस्थानेपरित्यजतितथाअस्मान्मापरित्याक्षीरित्यर्थः अत्रनिरुक्तम्—निष्षपीस्त्रीकामोभवति विनिर्गतपसाः[1] पसःसपतेःस्पृशतिकर्मणोमानोमघेवनिष्षपीपरादाः सयथाधनानिविभजति मानस्त्वंतथापरादाइति[2] ॥ नीथा णीञ्प्रापणे हनिकुषिनीरमिकाशिभ्यःक्थन्निति करणेक्थन्प्रत्ययः । गात् एतेर्लुङि इणोगालुङीतिगादेशः गातिस्थेतिसिचोलुक् बहुलंछन्दस्यमाङ्योगेपीत्यडभावः । चर्कृतात् करोतेर्यङ्लुगन्तात् निष्ठेतिक्तप्रत्ययः । मघाइवशेश्छन्दसीतिशेर्लोपः । निष्षपी षपसमवाये सपतिस्समवैतियोन्यासङ्गच्छतइतिसपःशेपः पचाद्यच् निर्गतोनित्योद्भूतः सपःशेपोयस्यसस्त्रीव्यसनीनिष्षपः वर्णव्यापत्त्याईकारः । दाः डुदाञ्दाने लुङि गातिस्थेतिसिचोलुक् नमाङ्योगइत्यडभावः ॥ ५ ॥

५. वत्स-प्रिय गौ जैसे अपनी शाला या गोष्ठ का पथ जानती है, उसी प्रकार हमने भी उस असुर के घर की ओर गये हुए रास्ते को देखा है। उस असुर के बार-बार किये गये उपद्रव से हमें बचाओ। जैसे कामुक धन का त्याग करता है, उसी प्रकार हमें नहीं छोड़ना।

॥ इतिप्रथमस्यसप्तमेष्टादशोवर्गः ॥ १८ ॥

---

१ क्वचित्निरुक्तपुस्तके "विनिर्गतसपः, सपःसपतेःस्पृशतिकर्मणः" इतिपाठः 'अयमेवयुक्तइतिभाति'। निरुक्तवृत्तौतु "विनिर्गतपसाः, स्पशः स्पशतेःस्पृशतिकर्मणः" इत्यपिपाठः। २ नि० ५. १६.

षष्ठीमृचमाह—

सत्वंनंइन्द्रसूर्येसोअप्स्वनागास्त्वआभंजजीवशंसे ।
मान्तरांभुजमारीरिषोनःश्रद्धितंतेमहतइन्द्रियार्य ॥६ ॥

सः । त्वम् । नः । इन्द्र । सूर्ये । सः । अप्ऽसु । अनागाःऽत्वे । आ । भज । जीवऽशंसे । मा । अन्तराम् । भुजम् । आ । रिरिषः । नः । श्रद्धितम् । ते । महते । इन्द्रियार्य ॥ ६ ॥

हेइन्द्र सत्वंनोस्मान्सूर्येसर्वस्यप्रेरकेआदित्येआभजआभाजय आभिमुख्येनभक्तान्संभक्तान्कुरु तथा सत्वंअप्सुअब्देवतासुअस्मानाभाजय अपिचजीवशंसे जीवैःप्राणिभिःशंसनीये कामयितव्येअनागास्त्वेअपापत्वेपापराहित्येअस्मानाभाजय अपिचनोस्माकं अन्तरांगर्भरूपेणान्तर्वर्तमानांभुजंपालयित्रींप्रजांआसमन्तात्मारिरिषः माहिंसीः तेतवमहतेप्रभूतायइन्द्रियाय बलायश्रद्धितंअस्माभिःश्रद्धानंकृतं त्वदीयंबलं बहुमानपूर्वकंस्तुमइत्यर्थः तस्मात्तादृशबलयुक्तस्त्वंमारिरिषइतिपूर्वेणसंबन्धः ॥ अनागास्त्वे नविद्यतेआगः पापंयस्यसोनागाः तस्यभावस्तत्त्वम् छान्दसउपधादीर्घः। जीवशंसे शंसुस्तुतौ कर्मणिघञ् थाथादिनोत्तरपदान्तोदात्तत्वम्। भुज भुनक्तिपालयतीतिभुक् प्रजा क्विप्। रिरिषः रिषहिंसायां स्वार्थण्यन्तादस्माल्लुङिचङिणिलोपेउपधाह्रस्वत्वादीनि छान्दसंपदकालीनमभ्यासह्रस्वत्वम्। श्रद्धितम् श्रच्छब्दस्य ऊर्यादित्वेनगतित्वाद्गतिरनन्तरइतिपूर्वपदप्रकृतिस्वरत्वम् ॥ ६ ॥

६. इन्द्र, हमें सूर्य और जल-समूह के प्रति भक्ति-पूर्ण करो। जो लोग, पाप-शून्यता के लिए, जीव-मात्र के प्रशंसनीय हैं, उनके प्रति भक्ति-पूर्ण करो। हमारी गर्भ-स्थित सन्तान को हिंसित नहीं करना। हम तुम्हारे महान् बल पर श्रद्धा करते हैं।

सप्तमीमृचमाह—

अधामन्येश्रत्तेअस्माअधायिवृषाचोदस्वमहतेधनाय ।
मानोअकृतेपुरुहूतयोनाविन्द्रक्षुध्यद्भ्योवयआसुतिंदाः ॥ ७ ॥

अध । मन्ये । श्रत् । ते । अस्मै । अधायि । वृषा । चोदस्व । महते । धनाय । मा । नः । अकृते । पुरुऽहूत । योनौ । इन्द्र । क्षुध्यत्ऽभ्यः । वयः । आऽसुतिम् । दाः ॥ ७ ॥

हेइन्द्र अध अथानन्तरंमन्ये त्वांमनसाजानामि तेतवास्मैबलायश्रदधायि अस्माभिःश्रद्धाकृता त्वदीयबलविषयमादरातिशयेनस्तोत्रंकृतमित्यर्थः वृषा कामानांवर्षिता सत्वंमहतेमौ- ह्रायधनायचोदयस्व अस्मान् प्रेरय हेपुरुहूत पुरुभिर्बहुभिर्यजमानैराहूतेन्द्र अकृते अनिष्पादितेधनशून्येयोनौ गृहनामैतत् गृहे नोस्मान्माधाः मानिधेहि धनधान्यपूर्णेगृहेस्मान्वासयेत्यर्थः अपिच हेइन्द्र क्षुध्यद्भ्योबुभुक्षितेभ्योन्येभ्योपिस्तोतृभ्यः वयोन्नं आसुतिंपेयंक्षीरादिकंचदाः देहि ॥ अधायि दधातेःकर्मणि लुङि चिण् आतोयुक्चिण्कृतोरितियुक् क्षुध्यद्भ्यः क्षुध बुभुक्षायाम् दिवादित्वाच्छ्यन् नित्त्वादाद्युदात्तत्वम् ॥ ७ ॥

७. अन्तःकरण से हम तुम्हें जानते हैं। तुम्हारे उस बल पर हमने श्रद्धा की है। तुम अभीष्ट-दाता हो; हमें प्रभूत धन प्रदान करो। इन्द्र तुम बहुत लोगों के द्वारा आहूत हो। हमें धन-विहीन घर में नहीं रखना। भूखों को अन्न और जल दो।

मानोवधीरिन्द्रमापरादामानःप्रियाभोजनानिप्रमोषीः ।
आण्डामानोमघवञ्छक्रनिर्भेन्मानःपात्राभेत्सहजानुषाणि ॥ ८ ॥

मा । नः । वधीः । इन्द्र । मा । परा । दाः । मा । नः । प्रिया । भोजनानि । प्र । मोषीः । आण्डा । मा । नः । मघऽवन् । शक्र । निः । भेत् । मा । नः । पात्रा । भेत् । सहऽजानुषाणि ॥ ८ ॥

हेइन्द्र नोस्मान्मावधीः माहिंसीः सर्वदारक्षेत्यर्थः अपिचमापरादाः मापरित्याक्षीः परादानं परित्यागः अस्मत्कृतांपूजांसदागृहाणेत्यर्थः अपिचनोस्माकं प्रिया प्रियाणिईप्सितानिभोजनानि उपभोग्यानिधनानिमाप्रमोषीः मापहार्षीः अस्मास्वेवधनानियथास्युः तथाकुर्वित्यर्थः तथाहेमघवन् धनवन् शक्र सर्वकार्यशक्तेन्द्र नोस्माकं आण्डा अण्डसंबन्धीनिगर्भरूपेणनिषिक्तान्यपत्यानिमानिर्भेत् माभिनः गर्भरूपेणावस्थितानस्मत्पुत्रान् रक्षेत्यर्थः माचनःपात्रा पतन्ति गच्छन्तिगमनसमर्थानियानितान्यपत्यानिपात्राणितानिचमाभेत् माभिदः सहजानुषाणि जानुभ्यांयानिभूमिंसनन्तिगच्छन्तीत्यर्थः तानिजानुषाणि तैः सहितानिमाविनीनशः यद्वा नोस्माकंसहजानुषाणि आधानेसहोत्पन्नानि पात्रापात्राणिस्रुवादीनि मानिर्भेत् माभिनः ॥ वधीः हन्तेर्माङिलुङिचेतिवधादेशः सचादन्तः सिचू अतोलोपइत्यकारलोपः तस्यस्थानिवद्भावादतोहलादेरितिवृद्ध्यभावः इटईटीतिसिचोलोपः । मोषीः मुषस्तेये लुङि सिचइट् नेटीतिवृद्धिप्रतिषेधः । भेत् भिदिर्विदारणे लङिसिपि बहुलंछन्दसीतिविकरणस्यलुक् लघूपधगुणः हल्ङ्याभ्यइतिसिचोलोपः ॥ ८ ॥

८. इन्द्र, हमें नहीं मारना। हमें नहीं छोड़ना। हमारे प्रिय भक्ष्य, उपभोग आदि नहीं लेना। हे समर्थ धनपति इन्द्र, हमारे गर्भ-स्थित अपत्यों को नष्ट नहीं करना। घुटने के बल चलनेवाले अपत्यों को नष्ट नहीं करना।

माध्यन्दिनेसवनेर्वाङेहीत्येषापोतुःप्रस्थितयाज्या सूत्रितंच—अर्वाङेहिसोमकामंत्वाहु-स्तवायंसोमस्त्वमेह्यर्वाङिति ।

तामेतांसूक्तेनवमीमृचमाह—

अर्वाङेहिसोमकामंत्वाहुरयंसुतस्तस्यपिबामदाय ।
उरुव्यचाजठरआवृषस्वपितेवनःशृणुहिहूयमानः ॥ ९ ॥ १९ ॥

अर्वाङ् । आ । इहि । सोमऽकामम् । त्वा । आहुः । अयम् ।
सुतः । तस्य । पिब । मदाय । उरुऽव्यचाः । जठरे । आ । वृषस्व ।
पिताऽइव । नः । शृणुहि । हूयमानः ॥ ९ ॥ १९ ॥

हेइन्द्र त्वंअर्वाङ् अस्मदभिमुखःसन् एहि आगच्छ किंकारणमितिचेत् यस्मात्त्वात्वांसोम-विषयाभिलाषमाहुः पुराविदःकथयन्ति अयमस्मदीयःसोमःसुतःऋत्विग्भिरभिषुतः अतआ-गच्छेत्यर्थः आगत्यचमदायहर्षार्थंतस्यतमस्मदीयमभिषुतंसोमंपिब एतदेवस्पष्टीक्रियते उरु-व्यचाः उरुविस्तीर्णंव्यचोव्यापनंयस्य तादृशोमहावयवोभूत्वाजठरेआत्मीयेउदरेआवृषस्व सोम-मासिञ्च आसमन्तात्पूरयेत्यर्थः एवंभूतस्त्वंहूयमानः स्तुतिभिराहूयमानःसन् पितेवपुत्राणां वाक्यानिशृणोति तथानोस्माकंवाक्यानिशृणुहिशृणु ॥ सोमकामं सोमविषयःकामोभिलाषो-यस्य बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । आहुः ब्रुवःपञ्चानामादितआहोब्रुवइतिझेरुसादेशोधा-तोराहादेशश्च तस्य क्रियाग्रहणंकर्तव्यमितिकर्मणःसंप्रदानत्वाच्चतुर्थ्यर्थेषष्ठी । मदाय म-दीहर्षे मदोनुपसर्गेइतिभावेअप् । उरुव्यचाः व्यचव्याजीकरणे औणादिकोसिप्रत्ययः व्यचेः कुटादित्वमनसीतिवचनात् ङित्वाभावेनसंप्रसारणाभावः परादिश्छन्दसिबहुलमित्युत्तरपदा-द्युदात्तत्वम् यद्वा उरुविचतिव्याप्नोतीति उरुव्यचाः कृदुत्तरपदप्रकृतिस्वरत्वम् । वृषस्व वृषसे-चने व्यत्ययेनात्मनेपदशप्रत्ययौ । शृणुहि श्रुशृणुपृकृवृभ्यइतिसेर्हिः ॥ ९ ॥

९. हमारे सामने आओ। लोगों ने तुम्हें सोम-प्रिय बना डाला है। सोम तैयार है; इसे पान कर हृष्ट बनो। विस्तीर्णाङ्ग होकर जठर में सोम-रस की वर्षा करो। जैसे पिता पुत्र की बात सुनता है, उसी प्रकार हमारे द्वारा आहूत होकर हमारी बातें सुनो।

॥ इतिप्रथमस्यसप्तमेएकोनविंशोवर्गः ॥१९॥

---

१ कर्मणायमभिप्रैति (पा० १. ४. ३२) इतिसूत्रे क्रिययायमभिप्रैतीतिव्याख्यानात् तमित्यस्य संप्रदानत्वं संप्रदानत्वाच्चतुर्थी चतुर्थ्यर्थेषष्ठी तस्य तस्मै तमित्यर्थः ।

चन्द्रमाइत्येकोनविंशत्यृचंसूक्तंद्वादशम् अपांपुत्रस्यत्रितस्यकूपेपतितस्यकुत्सस्यवार्षम् त-थाचोभयोःकूपपातआम्नायते त्रितःकूपेवहितः । कार्टेनिंबाह्ळऋषिरह्वदूतयइतिच । त्रि-तस्यचापांपुत्रत्वंतैत्तिरीयाःस्पष्टमामनन्ति—तेतएकतोजायत सद्वितीयमभ्यपातयत् ततोद्वितो-जायत सतृतीयमभ्यपातयत् ततस्त्रितोजायत यदद्भ्योजायन्त तदाप्त्यानामाप्त्यत्वमिति । तमे-तमाप्त्यंत्रितस्तद्वेदाप्त्यइतितकारोपजनेनवयमधीमहेइति । अन्त्यात्रिष्टुप् संमातपन्तीत्येषायवम-ध्यामहाबृहती आद्यौद्वावष्टाक्षरौपादौ द्वादशाक्षरस्तृतीयः ततोद्वावष्टाक्षरौसायवमध्या महाबृह-तीचत्वारोष्टकाजागतश्चमहाबृहतीत्युक्त्वामध्येचेद्यवमध्येत्युक्तलक्षणोपेतत्वात् शिष्टाःपङ्क्तयः विश्वेदेवादेवता तथाचानुक्रान्तम्—चन्द्रमाएकोनाप्त्यस्त्रितोवावैश्वदेवंहिपाङ्क्तमन्त्यात्रिष्टुबष्टमीम-हाबृहतीयवमध्येति । हीत्यभिधानादिदमादीनित्रीणिसूक्तानिवैश्वदेवानि विनियोगः अत्रशा-ट्यायनिनइतिहासमाचक्षते—एकतोद्वितस्त्रितइतिपुरात्रयऋषयोबभूवुः तेकदाचिन्मरुभूमावरण्ये वर्तमानाः पिपासयासन्तप्तगात्राःसन्तः एकंकूपमविन्दन् तत्रत्रिताख्यएकोजलपानायकूपंप्रा-विशत् स्वयंपीत्वाइतरयोश्चकूपादुदकमुद्धृत्यप्रादात् तौउदकंपीत्वात्रितंकूपेपातयित्वातदीयंध-नंसर्वमपहृत्यकूपंचरथचक्रेणपिधायप्रास्थिषातां ततःकूपेपतितःसत्रितः कूपादुत्तरीतुंअशक्नु-वन्सर्वेदेवामामुद्धरन्त्वितिमनसासस्मार ततस्तेषांस्तावकमिदंसूक्तंददर्श तत्रात्रौकूपस्यान्त-श्चन्द्रमसोरश्मीन् पश्यन्परिदेवयते ।

तत्रप्रथमामृचमाह—

चन्द्रमाअप्स्व१न्तरासुपर्णोधावतेदिवि ।
नवोहिरण्यनेमयःपदंविन्दन्तिविद्युतोवित्तंमेअस्यरोदसी ॥१॥

चन्द्रमाः । अप्ऽसु । अन्तः । आ । सुऽपर्णः । धावते । दिवि ।
न । वः । हिरण्यऽनेमयः । पदम् । विन्दन्ति । विऽद्युतः । वित्तम् ।
मे । अस्य । रोदसी इति ॥ १ ॥

---

१ ऋ० सं० १. ७. २३. । २ ऋ० सं० १. ७. २४. । ३ तै० ब्रा० ३. २. ८. ।
४ सर्वानुक्रमपरिभाषायांनवमखण्डे. ।

अप्सुआन्तरिक्ष्यासुउदकमयेमण्डलेअन्तर्मध्येवर्तमानःसुपर्णः शोभनपतनः यद्वा सुपर्णइतिरश्मिनाम सुषुम्नाख्येनसूर्यरश्मिनायुक्तश्चन्द्रमाः दिविद्युलोकेआधावते आङ्मर्यादायां एकेनैवप्रकारेणधावते,शीघ्रंगच्छति तादृशस्यचन्द्रमसःसंबन्धिनोहेहिरण्यनेमयः सुवर्णसदृशपर्यन्ताः यद्वा हितरमणीयमान्ताः विद्युतोविद्योतमानारश्मयः वोयुष्माकंपदंपादस्थानीयमग्रं नविन्दन्ति मदीयानीन्द्रियाणिकूपेनावृतत्वान्नलभन्ते अतइदमनुचितम् तस्मात्कूपान्मामुत्तारयतेत्यर्थः अपिच हेरोदसीद्यावापृथिव्यौ मेमदीयं अस्यइदंस्तोत्रंविचंजानीतं यद्वा मदीयंकूपपतनरूपंयदिदंदुःखंतदवगच्छतं मदीयंस्तोत्रंश्रुत्वामदीयंदुःखंज्ञात्वावाअस्मात्कूपान्मामुत्तारयतमित्यर्थः ॥ चन्द्रमाः चन्द्रमाह्लादनंसर्वस्यजगतोनिर्मिमीतइतिचन्द्रमाः चन्द्रेमोडिदित्यसुन् दासीभारादिषुपाठात्पूर्वपदप्रकृतिस्वरत्वम् । धावते सृगतौ पाघ्रेत्यादिनावेगितायांधावादेशः व्यत्ययेनात्मनेपदम् । वित्तं विदज्ञाने लोटिअदादित्वाच्छपोलुक् पादादित्वात्तिङ्ङतिङइतिनिघाताभावः । अस्य क्रियाग्रहणंकर्तव्यमितिकर्मणःसंप्रदानत्वाच्चतुर्थ्यर्थेषष्ठी ऊडिदमितिविभक्तेरुदात्तत्वम् ॥ १ ॥

१. जलमय अन्तरिक्ष में वर्त्तमान चन्द्रमा, सुन्दर चन्द्रिका के साथ आकाश में दौड़ते हैं। सुवर्ण-नेमिरश्मियो, कूप में पतित हमारी इन्द्रियाँ तुम्हारा पद नहीं जानतीं। द्यावा-पृथिवी, हमारे इस स्तोत्र को जानो।

द्वितीयामृचमाह–

अर्थमिद्वाउअर्थिनआजायायुवतेपतिम् ।
तुञ्जातेवृष्ण्यंपयःपरिदायरसंदुहेवित्तंमेअस्यरोदसी ॥२॥

अर्थम् । इत् । वै । ऊम् इति । अर्थिनः । आ । जाया । युवते ।
पतिम् । तुञ्जाते इति । वृष्ण्यम् । पयः । परिऽदाय । रसम् । दुहे ।
वित्तम् । मे । अस्य । रोदसी इति ॥ २ ॥

अर्थिनोधनमपेक्षमाणाः पुरुषाः अर्थमिद्वैअपेक्षितं धनंमाप्नुवन्त्येव नाहंमाप्नोमि उइत्येतत्पदपूरणम् अपिचजायान्यदीयाभार्यापतिं स्वपतिंआयुवते आभिमुख्येनप्राप्नोति मदीयातुमद्विरहाद्वतासीव् अपिचसंयुक्तौतौजायापती वृष्ण्यं वीर्यरूपंपयउदकं तुञ्जाते प्रजननायान्योन्यसंघट्टनेनप्रेरयतः तदनन्तरं रसंपुरुषस्यसारभूतंवीर्यं परिदायगर्भाशयेनादायगर्भरूपेण धृत्वादुहेदुग्धे पुत्ररूपेणजनयति ममतुपुत्रोपिनोत्पद्यते अतइदंमदीयंदुःखं हेद्यावापृथिव्यौ जानीतम् ॥ उ उञइतिशाकल्यस्यमतेनप्रगृह्यत्वात्प्लुतप्रगृह्याअचीतिप्रकृतिभावः । युवते यु-

मिश्रणे व्यत्ययेनात्मनेपदं शब्लुकिमाप्तेव्यत्ययेनशः। तुआते तुजिपिजिहिंसाबलादाननिकेत-नेषु इदित्त्वान्नुम् व्यत्ययेनश्नम् श्नान्नलोपः । दुहे दुहप्रपूरणे लोपस्तआत्मनेपदेष्वितित-लोपः ॥ २ ॥

२. धनाभिलाषी निश्चय ही धन पाता है। स्त्री पास ही पति को पाती है, सहवास करती है; और, गर्भ से सन्तान उत्पन्न होती है। द्यावा-पृथिवी, हमारे इस दुःख को जानो अर्थात् पूर्वोक्त प्रकार से रहित हमारे कष्ट को समझो।

मोषुदेवाअदःस्व१रवपादिदिवस्परि।
मासोम्यस्यशंभुवःशूनेभूमकदाचनवित्तंमेअस्यरोदसी ॥३॥

मो इति। सु। देवाः। अदः। स्वः। अव। पादि। दिवः। परि। मा। सोम्यस्य। शम्ऽभुवः। शूने। भूम। कदा। चन। वित्तम्। मे। अस्य। रोदसी इति ॥ ३ ॥

हेदेवाः स्वःस्वर्गेवर्तमानंअदः तदस्मदीयंपितृपितामहप्रपितामहात्मकंसन्तानं दिवस्परिदि-वश्चोपरिवर्तमानं मोषुमैवावपादि अवपन्नंविपन्नंभ्रष्टंमाभूत् ममपुत्राभावात् पुत्रेलोकान्जयति ना-पुत्रास्यलोकोस्तीतिश्रुतेः। अतोवयंसोम्यस्यसोमपानार्हस्यपितृगणस्यशंभुवः सुखस्यभावयितुः पुत्रस्यशूनेअपगमनेकदाचनकदाचिदपिमाभूम युष्मत्प्रसादात्ममपुत्राजायन्ताम् अतोमामस्मा दुःखादुत्तारयतेत्यर्थःहेद्यावापृथिव्यौ युवांचमदीयंविज्ञापनंजानीतम् मोमाउइतिनिपातद्वयसमुदा-योमैवेत्यस्यार्थे सुइत्येतदवधारणे सुञइतिषत्वम्। पादि पदगतौ चण्तेपदइनिकर्तरिलुङ्चि-ण्णादेशः। दिवः ऊडिदमितिविभक्तेरुदात्तत्वम् पञ्चम्याःपरावध्यर्थेइतिविसर्जनीयस्यसत्वम् सोम्यस्य सोममर्हतियइतियप्रत्ययः। शंभुवः भवतेरन्तर्भावितण्यर्थात्क्विप्। शूने टुओश्विग-तिवृद्ध्योः भावेनिष्ठा श्वीदितोनिष्ठायामितीट्प्रतिषेधः वचिस्वपीत्यादिनासंप्रसारणम् ओदित-श्चेतिनिष्ठानत्वं व्यत्ययेनाद्युदात्तत्वम् वृषादिर्वाद्रष्टव्यः ॥ ३ ॥

३. देवगण, हमारे स्वर्गस्थ पूर्व पुरुष स्वर्ग से च्युत न हों; हम कहीं सोम-पायी पितरों के सुख के लिए पुत्र से निराश न हों। द्यावा-पृथिवी, मेरी यह बात जानो।

यज्ञंपृच्छाम्यवमंसतद्दूतोविवोचति।
क्वऋतंपूर्व्यंगतंकस्तद्बिभर्तिनूतनोवित्तंमेअस्यरोदसी॥४॥

---

१ ऐ० ब्रा० ७. १२.।

यज्ञम् । पृच्छामि । अवमम् । सः । तत् । दूतः । वि । वोचति ।
क्व । ऋतम् । पूर्व्यम् । गतम् । कः । तत् । बिभर्ति । नूतनः ।
वित्तम् । मे । अस्य । रोदसी इति ॥ ४ ॥

यज्ञंयजनीयंअवमंसर्वेषां देवानामादिभूतं अग्निर्मुखंप्रथमोदेवतानामितिश्रुतेः। अग्निर्वैदेवानामवमइतिब्राह्मणाच्च। तमग्निंपृच्छामि यन्मयापृष्टंतद्देवानांदूतःसोग्निर्विवोचति विविच्यकथयतु किंपुनस्त्वं पृच्छ्यतइति तदुच्यते हेअग्ने त्वदीयंपूर्व्यंपूर्वकालीनंऋतंभद्रंस्तोतृभ्यः कृतंश्रेयः क्वगतं कुत्रेदानींवर्तते नूतनोनवतरस्त्वत्तोन्यःकःपुरुषः तद्भद्रंबिभर्तिधारयति यदित्वय्यवर्तिष्यतममेदृशीदशापिनाभविष्यत् अतस्तत्क्वगतमितिकथय॥ वोचति वचपरिभाषणे लेटचडागमः वचउमितिव्यत्ययेनधातोरुमागमः। क्व किमोदितिसप्तम्यर्थेअत् क्वातीतिकिमःक्वादेशः तित्स्वरितमितिस्वरितत्वम् परेणसहऋत्यकइतिप्रकृतिभावः॥ ४ ॥

४. देवों में सर्व-प्रथम यज्ञार्ह अग्नि की मैं याचना करता हूं। वह दूत-रूप से मेरी याचना देवों को बतावें। अग्नि, तुम्हारी पहले की वदान्यता कहाँ गई? इस समय कौन नूतन पुरुष उसे धारण करते हैं? हे द्यावा-पृथिवी, मेरा यह विषय जानो।

अमीयेदेवास्थनत्रिष्वारोचनेदिवः।
कद्वऋतंकदनृतंक्वप्रत्नावआहुतिर्वित्तंमेअस्यरोदसी ॥५॥२०॥

अमी इति । ये । देवाः । स्थन । त्रिषु । आ । रोचने । दिवः ।
कत् । वः । ऋतम् । कत् । अनृतम् । क्व । प्रत्ना । वः । आऽहुतिः ।
वित्तम् । मे । अस्य । रोदसी इति ॥ ५ ॥ २० ॥

हेदेवाः त्रिषुपृथिव्यादिषुत्रिषुस्थानेषु येमीयूयंस्थनवर्तमानाभवथ यानिस्थानानिदिवोद्योतमानस्यसूर्यस्यआरोचनेदीप्तिविषयेवर्तन्ते सूर्यप्रकाश्येषुतेषुस्थानेष्वित्यर्थः तेषांवोयुष्माकं संबन्धिस्तोतृविषयमृतंसत्यंकत्कस्मिन्देशेवर्तते अनृतंद्वेष्टृविषयमसत्यंचकत्कुत्रगतं अपिचप्रत्नाचिरकालीनावोयुष्माकंसंबन्धिनीआहुतिः मयापूर्वमनुष्ठितोयागः क्वकुत्रासीत् ईदृग्भूतदुःखानुभवेनमयापूर्वमनुष्ठितोयागसमूहोयुष्मान् नप्रामोदित्यनुमिमे अन्यत्पूर्ववत्॥ स्थन तप्तनप्तनथनाश्चेतितशब्दस्यथनादेशः। कत् कशब्दस्यवर्णव्यापत्त्याकद्भावः॥ ५ ॥

५. सूर्य-द्वारा प्रकाशित इन तीनों लोकों में ये देववृन्द रहते हैं। हे देवगण, तुम्हारा सत्य कहाँ है और असत्य कहाँ है? तुम्हारी प्राचीन आहुति कहाँ है? द्यावा-पृथिवी, मेरा यह विषय समझो।

---

१ ऐ० ब्रा० १. ४। २ तै० ब्रा० १. १।

षष्ठीमृचमाह—

कद्वऋतस्यधर्णसिकद्वरुणस्यचक्षणम् ।
कदर्यम्णोमहस्पथातिक्रामेमदूढ्योंवित्तंमेअस्यरोदसी ॥ ६॥

कत् । वः । ऋतस्य । धर्णसि । कत् । वरुणस्य । चक्षणम् ।
कत् । अर्यम्णः । महः । पथा । अति । क्रामेम । दुःऽध्यः । वित्तम् ।
मे । अस्य । रोदसी इति ॥ ६ ॥

हेदेवाः वोयुष्माकंसंबन्धिनः ऋतस्यसत्यस्याभिमतफलप्रापणस्यधर्णसि धारणंकत्कु-त्रगतम् वरुणस्यानिष्टनिवारकस्यदेवस्यचक्षणंअनुग्रहदृष्ट्यादर्शनंकत्क्वगतम् महोमहतोमहानुभावस्य अर्यम्णःअरीणांनियन्तुरेतत्संज्ञकस्यदेवस्यसंबन्धिना यथाशोभनमार्गेणइष्टदेशप्रापणंकत्क्वगतम् एतत्सर्वंयुष्मास्वेववर्तते नकुत्रापिगतम् अतोवयंदूढ्यः दुर्धियः पापबुद्धीन् अस्मदनिष्टाचरणपरान्शत्रून् अतिक्रामेम अतितरेम तैःकृतादस्मात्कूपपातलक्षणाद्दुःखाद्वय-मुत्तीर्णाभवेम हेद्यावापृथिव्यौ मदीयमिदंजानीतम् ॥ धर्णसि धृञ्धारणे सानसिधर्णसिपर्णसी-त्यादिनाअसिच्प्रत्ययान्तोनिपात्यते । अर्यम्णः षष्ठ्येकवचने अल्लोपोनइत्यकारलोपः उदात्त-निवृत्तिस्वरेणविभक्तेरुदात्तत्वम् । महः महतोच्छब्दलोपश्छान्दसः यद्वा महपूजायाम् क्विप् उभयथापिसावेकाचइतिविभक्तेरुदात्तत्वम् । दूढ्यः पृषोदरादिः ध्यैचेतितत्रपाठाद्दुरोरेफस्योत्वम् उत्तरपदादेःष्टुत्वंच उदात्तस्वरितयोर्यणइतिस्वरितत्वम् ॥ ६ ॥

६. तुम्हारा सत्य-पालन कहाँ है ? वरुण की अनुग्रह-दृष्टि कहाँ है ? महान् अर्यमा का वह मार्ग कहाँ है, जिसके द्वारा हम पाप-मति व्यक्तियों का अतिक्रम कर सकें ? द्यावा-पृथिवी, मेरी यह अवस्था या दुःख जानो अर्थात् दुःख-महोदधि में पतित मेरे लिए ये सब वस्तुएँ लुप्त-सी हो गई हैं—इस बात के द्यावा-पृथिवी साक्षी हैं ।

अहंसोअस्मियःपुरासुतेवदामिकानिचित् ।
तंमाव्यन्त्याध्यो३ वृकोनतृष्णजंमृगंवित्तंमेअस्यरोदसी ॥ ७॥

अहम् । सः । अस्मि । यः । पुरा । सुते । वदामि । कानि । चित् ।
तम् । मा । व्यन्ति । आऽध्यः । वृकः । न । तृष्णऽजम् । मृगम् ।
वित्तम् । मे । अस्य । रोदसी इति ॥ ७ ॥

हेदेवाः पुरापूर्वस्मिन्कालेसुते युष्मद्यागार्थं सोमेअभिषुते कानिचिद् कतिपयानिस्तोत्राणि योहंवदामिउक्तवानस्मि सएवाहमस्मि नत्वन्यःकश्चिद् तस्मात्किमर्थंमांपरित्यजथ तंतादृशंमामांआध्यः अभिलषितपुत्राद्यप्राप्त्या जनितामानस्योव्यथाः व्यन्तिभक्षयन्ति तत्रदृष्टान्तः—तृष्णजं जाततृष्णं पिपासन्तं उदकंप्रतिगच्छन्तंमृगंवृकोन यथारण्यश्वामध्येमार्गेगच्छन्तं भक्षयति तद्वत् अन्यद्गतम् ॥ व्यन्ति वीगत्यादिषु अदादित्वाच्छपोलुक् तन्वादीनांछन्दसिबहुलमुपसंख्यानमितिबहुलवचनाद्यण् । आध्यः आधीयतेमनसिस्थाप्यतइत्याधिः उपसर्गेघोःकिः आतोल्लोपइटिचेत्याकारलोपः जसादिषु छन्दसिवावचनमितिजसिचेतिगुणस्यविकल्पनादभावेयणादेशः । तृष्णजम् तृषपिपासायाम् स्वपितृषोर्नजिङ्गितिनजिङ् पदकारस्त्वेवंमन्यते अन्येष्वपिदृश्यतइतिदृशिग्रहणस्य सर्वोपाधिव्यभिचारार्थत्वात् केवलादपिजनेर्डप्रत्ययः तृष्णाजातायस्य ङ्यापोःसंज्ञाछन्दसोर्बहुलमितिह्रस्वत्वम् ॥ ७ ॥

७. मैं वही हूं जिसने प्राचीन समय में सोम अभिषुत होने पर कतिपय स्तोत्र उच्चारण किये थे। जैसे पिपासित मृग को व्याघ्र खा जाता है, वैसे ही मुझे दुःख खा रहा है। द्यावा-पृथिवी, मेरा यह विषय जानो।

अष्टमीमृचमाह—

संमा॑तपन्त्य॒भितः॑स॒पत्नी॑रिव॒पर्श॑वः ।
मूषो॒नशि॒श्नाव्य॑दन्ति॒मा॒ध्यः॑स्तो॒तारं॑तेशतक्रतोवि॒त्तंमे॑अ॒स्यरो॑दसी ॥८

सम् । मा॒ । त॒प॒न्ति॒ । अ॒भितः॑ । स॒पत्नीः॑ऽइव । पर्श॑वः । मूषः॑ ।
न । शि॒श्ना । वि । अ॒द॒न्ति॒ । मा॒ । आ॒ऽध्यः॑ । स्तो॒तार॑म् । ते॒ ।
श॒त॒क्र॒तो॒ इति॑ शतऽक्रतो । वि॒त्तम् । मे॒ । अ॒स्य । रो॒द॒सी॒ इति॑ ॥ ८ ॥

ऐन्द्र्येषा हेइन्द्र पर्शवःपार्श्वास्थीनिअत्रसामर्थ्यात्पर्शुस्थानीयाःकूपभित्तयः मामांअभितः सर्वतः सन्तपन्ति सम्यक्पीडयन्ति तत्रदृष्टान्तः—सपत्नीरिव समानःएकःपतिर्यासांताः सपत्न्योयथाएकं पतिंअभितःपीडयन्ति परस्परंवा पीडयन्ते हेशतक्रतो बहुविधप्रज्ञवेन्द्र तेतवस्तोतारंमामांआध्यः असंपाद्यमानैर्यागदानादिभिरुत्पादिवाः मानस्यःपीडाःव्यदन्ति विविधंभक्षयन्ति तत्र दृष्टान्तः—मूषोन यथामूषिकाः शिश्नाशिश्नानि कुविन्देनवायितानि अन्नरसेनालिप्तानिसूत्राणिभक्षयन्ति यद्वाशिश्नशब्देनप्रजननमेवोच्यते तच्चोपचारात्पुच्छेवर्तते तथास्वकीयानिपुच्छानिघृततैलादिभाण्डेप्रक्षिप्य ऊर्ध्वमुत्कृष्यव्यदन्तिलिहन्तीत्यर्थः एवंमांआधयोभक्षयन्ति नचैधव हेइन्द्र तवस्तोतुर्न्याय्यम् तस्मात्कूपान्मामुचारय अन्यत्समानम् अत्रनिरुक्तम्—सन्तपन्तिमामभितःसपत्न्यः

इवेमाःपर्शवःकूपपर्शवोमूषिकाइवास्नातानिसूत्राणिव्यदन्तिस्वाङ्गाभिधानंवास्याच्छिन्नानिव्यद-न्तीतिवेति ॥ सपत्नीः नित्यंसपत्न्यादिष्विति पतिशब्दस्यनकारान्तादेशः ङीप् वाछन्दसीतिपूर्वसवर्णदीर्घत्वम् । मूषः मुषस्तेये क्विपिछान्दसोदीर्घःतथाचयास्कः—मूषोमूषिकाइत्यर्थोमूषिकाःपुनर्मुष्णातेर्मूषोप्येतस्मादेवेति । शिश्ना श्नाशौचे घञर्थेकविधानमितिकः स्थास्नागापाव्यधिहनियुद्ध्यर्थमितिकः वर्णव्यापत्त्यासकारस्यशकारः ऋत्नादीनांकेद्वेभवतइतिवक्तव्यमितिद्विर्वचनम् बहुलंछन्दसीत्यभ्यासस्येत्वम् ॥ ८ ॥

८. जैसे दो सपत्नियाँ (सौतें) दोनों ओर खड़ी होकर स्वामी को सन्ताप देती हैं, वैसे ही कुएँ की दीवारें मुझे सन्ताप दे रही हैं। जैसे चूहा सूता काटता है, हे शतक्रतो, वैसे ही तुम्हारे स्तोत्ता को—मुझे दुःख काटता है। द्यावा-पृथिवी, मेरी यह बात जानो।

अमीयेसप्तरश्मयस्तत्रामेनाभिरातता ।
त्रितस्तद्वेदाप्त्यःसजामित्वायरेभतिवित्तंमेअस्यरोदसी ॥९॥

अमी इति । ये । सप्त । रश्मयः । तत्र । मे । नाभिः । आऽतता ।
त्रितः । तत् । वेद । आप्त्यः । सः । जामिऽत्वाय । रेभति ।
वित्तम् । मे । अस्य । रोदसी इति ॥ ९ ॥

येमीद्युलोकेवर्तमानाः सप्तसंख्याकारश्मयःसूर्यस्यकिरणाःसन्ति तत्रतेषुसूर्यरश्मिषुअध्यात्मंसप्तप्राणरूपेणवर्तमानेषु मेमदीयानाभिराततासंबद्धा ऋषिरात्मानमेवपरोक्षतयानिर्दिशतित्रितस्तीर्णतमस्तिरस्कृताज्ञानआप्त्यः अपांपुत्रऋषिः तत्पूर्वोक्तंवृत्तान्तंवेद विजानातिनान्यः सजानन्नृषिः जामित्वायकूपान्निर्गन्तृत्वायरेभति तान्रश्मीनस्तौति अन्यत्समानम् ॥ आतता तनोतेःकर्मणिनिष्ठा अनुदात्तोपदेशेत्यादिनानुनासिकलोपः गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम् । जामित्वाय जमतिर्गतिकर्मा । जमतिगच्छतीतिजामिः औणादिकइण्प्रत्ययः तस्यभावस्तत्त्वम् । रेभति रेभृशब्दे भौवादिकः ॥ ९ ॥

९. ये जो सूर्य की सात किरणें हैं, उनमें मेरी नाभि, मर्मातिम या वासस्थान है। यह बात आप्त्यत्रित जानते हैं तथा कुएँ से निकलने के लिए रश्मि-समूह की स्तुति करते हैं। द्यावा-पृथिवी, मेरा यह विषय जानो।

अमीयेपञ्चोक्षणोमध्येतस्थुर्महोदिवः ।
देवत्रानुप्रवाच्यंसध्रीचीनानिवावृतुर्वित्तंमेअस्यरोदसी ॥१०॥२१

---

१ नि० ४. ६. । २ नि० ४. ५. । ३ नि० ३. ९. ।

अमी इति । ये । पञ्च । उक्षणः । मध्ये । तस्थुः । महः ।
दिवः । देवऽत्रा । नु । प्रऽवाच्यम् । सध्रीचीनाः । नि । ववृतुः ।
वित्तम् । मे । अस्य । रोदसी इति ॥ १० ॥ २१ ॥

उक्षणः सेकारः कामाभिवर्षकाः पञ्च तन्नेइन्द्रस्तद्वरुणस्तदग्निरित्यर्धर्चेनप्रतिपादिताः पञ्चसंख्याकादेवाः यद्वा अग्निर्वायुःसूर्यश्चन्द्रमाविद्युदित्येवंपञ्चसंख्याकाः तथाचशाट्यायनम्—एतान्येवपञ्चज्योतींषियान्येषुलोकेषुदीप्यन्ते अग्निःपृथिव्यां वायुरन्तरिक्षे आदित्योदिवि चन्द्रमानक्षत्रे विद्युदप्स्विति । नक्षत्रेनक्षत्रलोके अप्सुमेघस्थोदकेषु । तैत्तिरीयेप्येवमाम्नातम्—अग्निःपृथिव्यांवायुरन्तरिक्षेसूर्योदिविचन्द्रमादिक्षुनक्षत्राणिस्वर्लोकेइति । येमीपञ्चसंख्याकादेवाः महोदिवोमहतोविस्तीर्णस्यद्युलोकस्यमध्येतस्थुः तिष्ठन्ति आसते देवत्रादेवेषुनुक्षिप्रंप्रवाच्यं प्रशंसनीयंदेवानांयोग्यंमदीयंस्तोत्रंप्रतिसध्रीचीनाः सहाञ्चन्तोयुगपदागच्छन्तस्तेदेवाः मदीयंपरिचरणंस्वीकुर्वन्ति तदनन्तरंनिववृतुः तृप्ताःसन्तोनिवर्तन्तेच अन्यत्समानम् ॥ उक्षणः वाषपूर्वस्यनिगमेइत्युपधादीर्घाभावः । देवत्रा देवमनुष्येत्यादिनासप्तम्यर्थेत्राप्रत्ययः । प्रवाच्यम् वाचयतेरचोयदितियत् णेरनिटीतिणिलोपः यतोनावइत्याद्युदात्तत्वेकृदुत्तरपदप्रकृतिस्वरत्वम् । सध्रीचीनाः सहाञ्चन्तीतिसध्र्यञ्चः तएवसध्रीचीनाः सहपूर्वादञ्चतेर्ऋत्विगित्यादिनाक्विन् अनिदितामितिनलोपः सहस्यसध्रिरितिसध्र्यादेशः विभाषाञ्चेरदिक्स्त्रियामितिस्वार्थेखप्रत्ययः । ववृतुः वृतुवर्तने छन्दसिलुङ्लङ्लिटइतिवर्तमानेलिट् व्यत्ययेनपरस्मैपदम् अन्येषामपिदृश्यतएतिसंहितायामभ्यासस्यदीर्घत्वम् ॥ १० ॥

१०. विशाल आकाश में ये जो अग्नि, वायु, सूर्य, इन्द्र और विद्युत् आदि पाँच अभीष्ट-दाता हैं, वे मेरे इस प्रशंसनीय स्तोत्र को शीघ्र देवों के पास ले जाकर लौट आवें। द्यावा-पृथिवी, मेरी यह बात जानो।

॥ इतिप्रथमस्यसप्तमेएकविंशोवर्गः ॥ २१ ॥

एकादशीमृचमाह—

सुपर्णाएतआसतेमध्यआरोधनेदिवः ।
तेसेधन्तिपथोवृकंतरन्तंयह्वतीरपोवित्तंमेअस्यरोदसी ॥११॥

---

१ ऋ० सं० १.७.२५ ।

सुऽपर्णाः । एते । आसते । मध्ये । आऽरोधने । दिवः । ते ।
सेधन्ति । पथः । वृकम् । तरन्तम् । यह्वतीः । अपः । वित्तम् ।
मे । अस्य । रोदसी इति ॥ ११ ॥

सुपर्णाः रश्मिनामैतत् शोभनपतनाएतेसूर्यरश्मयः आरोधनेसर्वस्यावरके व्याप्तेदिवोन्तरिक्षस्यमध्येआसतेवर्तन्ते तेसूर्यरश्मयः पथोमार्गात्वृकमरण्यश्वानंसेधन्तिनिषेधन्ति निवारयन्ति कीदृशं यह्वतीर्महतीरपः तरन्तंअतिक्रामन्तंकूपपतनात्पूर्वंत्रितंदृष्ट्वाएनंभक्षयितुंकश्चिदरण्यश्वा महतींनदींतितीर्षुराजगाम सचसूर्यरश्मीन्दृष्ट्वाअयमवसरोनभवतीतिनिववृते अतोरश्मयोवृकंनिषेधन्तीत्युच्यते यास्कपक्षेतुआपइत्यन्तरिक्षनाम यह्वतीरपोमहदन्तरिक्षंपथः पथाद्वादशरश्म्यात्मनामार्गेणतरन्तंवृकंचन्द्रमसंसूर्यरश्मयोनिषेधन्ति अहनिसूर्यरश्मिभिर्निरुद्धश्चन्द्रमाः निष्प्रभोदृश्यते अतोनिष्प्रभंकुर्वन्तीत्यर्थः ॥ आरोधने आरुध्यते आध्रियतेनेनेत्यारोधनं करणेल्युट् । सेधन्ति षिधुगत्याम् अयंकेवलोपिनिपूर्वार्थेद्रष्टव्यः । पथः पञ्चम्येकवचनेभस्यटेर्लोपः इतिटिलोपःउदात्तनिवृत्तिस्वरेणविभक्तेरुदात्तत्वम् यास्कपक्षेतु तृतीयार्थेव्यत्ययेनपञ्चमी। यह्वतीः यह्वइतिमहन्नाम अस्मादाचारार्थेसर्वप्रातिपदिकेभ्यइतिक्विप् ततोलटःशतृ उगितश्चेतिङीप् आगमानुशासनस्यानित्यत्वान्नुमभावः शतुरनुमइतिनदीस्वरोव्यत्ययेनप्रवर्तते ॥ ११ ॥

११. सर्वव्यापी आकाश में सूर्य की रश्मियाँ हैं। विशाल जलराशि पार करते समय, मार्ग में, सूर्य-रश्मियाँ अरण्यकुक्कुर या वृक को निवारण करती हैं। द्यावा-पृथिवी, मेरा यह विषय जानो।

द्वादशीमृचमाह—

नव्यंतदुक्थ्यंहितंदेवासःसुप्रवाचनम् ।
ऋतमर्षन्तिसिन्धवःसत्यंतातानसूर्योवित्तंमेअस्यरोदसी ॥ १२ ॥

नव्यम् । तत् । उक्थ्यम् । हितम् । देवासः । सुऽप्रवाचनम् ।
ऋतम् । अर्षन्ति । सिन्धवः । सत्यम् । ततान । सूर्यः । वित्तम् ।
मे । अस्य । रोदसी इति ॥ १२ ॥

हेदेवासोदेवाः नव्यंनवतरंउक्थ्यंप्रशस्यंस्तुत्यर्हं सुप्रवाचनं सुष्ठुऋत्विग्भिर्वाचयितुंशक्यं एवंभूतंतद्भवदीयंबलंहितंयुष्मासुनिहितं अतोयुष्मदीयेनबलेनसिन्धवः स्यन्दनशीलानद्यः ऋतमुदकंअर्षन्ति आलस्यराहित्येनसर्वदाप्रेरयन्ति अशोष्याःसत्यः प्रवहन्तीत्यर्थः तथासूर्यः सत्यंसर्वदाविद्यमानंस्वकीयंतेजः ततानआतनोति विस्तारयति अन्यत्समानम् ॥ सुप्रवाचनं वच-

परिभाषणे अस्माण्ण्यन्तात् अन्येभ्योपिदृश्यतइतिखलर्थेयुच् । अर्षन्ति अर्तेर्लेटिसिब्बहुलंले-टीतिसिप् गुणः । ततान अन्येषामपिदृश्यतइतिसंहितायामभ्यासस्यदीर्घत्वम् ॥ १२ ॥

१२. देवगण, तुम्हारे भीतर वह नव्य, प्रशंसनीय और सुवाच्य बल है। उसके द्वारा वहनशील नदियाँ सदा जल-संचालन करतीं और सूर्य अपना सर्वदा विद्यमान आलोक विस्तार करते हैं। द्यावा-पृथिवी, मेरा यह विषय जानो।

अग्नेतवत्यदुक्थ्यंदेवेष्वस्त्याप्यम् ।
सनःसत्तोमनुष्वदादेवान्यक्षिविदुष्टरोवित्तंमेअस्यरोदसी ॥१३॥

अग्ने । तव । त्यत् । उक्थ्यम् । देवेषु । अस्ति । आप्यम् ।
सः । नः । सत्तः । मनुष्वत् । आ । देवान् । यक्षि । विदुःऽतरः ।
वित्तम् । मे । अस्य । रोदसी इति ॥ १३ ॥

हेअग्ने तवउक्थ्यंप्रशस्यं त्यत् श्रुतिषुप्रसिद्धम् आप्यं आपिर्बन्धुः तस्यभावः बांधवम् देवेषुदानादिगुणयुक्तेष्विन्द्रादिषु अस्तिविद्यते तस्मात्सत्वादृशोविदुष्टरोविद्वत्तरस्त्वं नोस्माकंयज्ञे सत्तोनिषण्णःसन् देवांस्तानिन्द्रादीन्आशास्त्रमर्यादयायक्षि यज हविर्भिःपूजय तत्रदृष्टा-न्तः—मनुष्वत् यथा मनुनायज्ञेतद्वत् अन्यत्पूर्ववत् ॥ आप्यं आप्लृव्याप्तौ अस्माण्ण्यन्तादचइ-रितिइप्रत्ययः ब्राह्मणादित्वात्ष्यञ् । सत्तः नसत्तनिषत्तेतिनिपातनात्निष्ठानत्वाभावः छान्द-सोतिशब्दलोपोद्रष्टव्यः । मनुष्वत् मनेरौणादिकउसिप्रत्ययः तत्रतस्येवेतिषष्ठ्यर्थेवतिः नभो-ङ्गिरोमनुषांवत्युपसंख्यानमितिभत्वेसतिपदत्वाभावाद्रुत्वाद्यभावः । यक्षि बहुलंछन्दसीतिशपोलुक् व्रश्चेतिषत्वम् कुत्वषत्वे । विदुष्टरः विद्वस्शब्दात्तरपिअयस्मयादित्वेनभत्वाद्वसोःसंप्रसारण मितिसंप्रसारणम् शासिवसिघसीनांचेतिषत्वम् ॥ १३ ॥

१३. अग्नि, देवों के साथ तुम्हारा वही प्रशंसनीय बन्धुत्व है। तुम अत्यन्त विद्वान् हो। मनु के यज्ञ की तरह हमारे यज्ञ में बैठकर देवों का यज्ञ करो। द्यावा-पृथिवी, मेरा यह विषय जानो।

सत्तोहोतामनुष्वदादेवाँअच्छाविदुष्टरः ।
अग्निर्हव्यासुषूदतिदेवोदेवेषुमेधिरोवित्तंमेअस्यरोदसी ॥ १४ ॥

सत्तः । होता । मनुष्वत् । आ । देवान् । अच्छ । विदुःऽतरः ।
अग्निः । हव्या । सुसूदति । देवः । देवेषु । मेधिरः । वित्तम् ।
मे । अस्य । रोदसी इति ॥ १४ ॥

मनुष्वत् मनोरिवास्माकंयज्ञेसत्तोनिषण्णोहोतादेवानामाह्वाता विदुष्टरोविद्वत्तरः देवोदानादिगुणयुक्तः देवेषुसर्वेष्विन्द्रादिषुमध्येमेधिरोमेधावी एवंभूतोग्निः तान्देवान्अच्छाभिमुख्येनइव्या हव्यान्यस्मदीयानिहवींषि मर्यादायामाकारः शास्त्रमर्यादयायथाशास्त्रं सुषूदति प्रेरयतु अन्यत्समानम्॥ सुषूदति षूदक्षरणे लेटयडागमः बहुलंछन्दसीतिशपःश्लुः। मेधिरः मेधारथाभ्यामिरन्नीरचावक्तव्याइतिमत्वर्थीयइरन्॥ १४ ॥

१४. मनु के यज्ञ की तरह हमारे यज्ञ में बैठकर देवों के आह्वानकारी, अतिशय विद्वान् और देवों में मेधावी अग्निदेव देवों को हमारे हव्य की ओर शास्त्रानुसार प्रेरणा करें। द्यावा-पृथिवी, मेरा यह विषय जानो।

ब्रह्माकृणोतिवरुणोगातुविदंतमीमहे ।
व्यूर्णोतिहृदामतिंनव्योजायतामृतंवित्तंमेअस्यरोदसी ॥१५॥ २२॥

ब्रह्म । कृणोति । वरुणः । गातुऽविदम् । तम् । ईमहे । वि ।
ऊर्णोति । हृदा । मतिम् । नव्यः । जायताम् । ऋतम् ।
वित्तम् । मे । अस्य । रोदसी इति ॥ १५ ॥ २२ ॥

योवरुणः अनिष्टस्यनिवारयितादेवः ब्रह्मपरिवृढंतद्रक्षणरूपंकर्मकृणोतिकरोति तंवादृशं गातुविदंगातोर्मार्गस्यदुःखान्निवारकस्यलंभयितारंवरुणंईमहे अभिमतफलंयाचामहे ईमहइतियाच्ञाकर्मा तस्मैवरुणायअयमस्मदीयःस्तोता हृदाहृदयेनमतिंमननीयांस्तुतिंव्यूर्णोति विवृणोति प्रकाशयति उच्चारयतीत्यर्थः सोयंनव्यःस्तुत्योवरुणः अस्माकमृतंजायतां सत्यभूतोस्तु ॥ ब्रह्म अन्येषामपिदृश्यतइतिसांहितिकोदीर्घः। गातुविदम् विद्लृलाभे अन्तर्भावितण्यर्थात्क्विप्। ईमहे ईङ्गतौ बहुलंछन्दसीतिविकरणस्यलुक्। हृदा पद्दन्नित्यादिनाहृदयशब्दस्यहृदादेशः॥ १५॥

१५. वरुण रक्षा-कार्य करते हैं। उन (वरुण) मार्ग-दर्शक के पास हम याचना करते हैं। अन्तःकरण से स्तोता वरुण को लक्ष्य कर मननीय स्तुति का प्रचार करता है। वही स्तुति-पात्र वरुण हमारे सत्य-स्वरूप हों। द्यावा-पृथिवी, मेरा यह विषय जानो।

षोडशीमृचमाह—

असौयःपन्थाआदित्योदिविप्रवाच्यंकृतः ।
नसदेवाअतिक्रमेतंमर्तासोनपश्यथवित्तंमेअस्यरोदसी ॥ १६ ॥

असौ । यः । पन्थाः । आदित्यः । दिवि । प्रऽवाच्यम् । कृतः ।
न । सः । देवाः । अतिऽक्रमे । तम् । मर्तासः । न । पश्यथ ।
वित्तम् । मे । अस्य । रोदसी इति ॥ १६ ॥

पन्थाः सततगामी यद्वा ब्रह्मलोकंगच्छतामुपासकानांमार्गभूतः सूर्यद्वारेणतेविरजाः प्रयान्तीतिश्रुतेः । एवंभूतोयोसावादित्योदिविद्युलोकेप्रवाच्यं प्रकर्षेणवचनंयथाभवति तथाकृतः निर्मितः यथासर्वैःप्राणिभिर्दृश्यते तथावर्तमानइत्यर्थः हेदेवाः सोयमादित्योयुष्माभिरपिनअतिक्रमे अतिक्रमितुंनशक्यः युष्मज्जीवनस्य तदायत्तत्वात् सतिहिसूर्ये वसन्तादयःकालानिष्पद्यन्ते कालेषुचयागाःक्रियन्ते यागेषुचसत्सुभवतांजीवनं अतोयुष्माभिरपिअसौनातिक्रमितव्यः एवंचसति हेमर्तासः पापकृतोमनुष्याः तंमहानुभावंसूर्यं नपश्यथ सूर्यंनजानीथ एतच्चकूपेपातयित्वानिर्गतावेकतद्वितौ प्रतिनिन्दनंअहमेवमप्यद्रष्टा तंसूर्यंजानामि पापकृतौयुवांनजानीथइति ॥ पन्थाः पतॢगतौ पतेस्थचइतिइनिप्रत्ययः पथिमथ्यृभुक्षामादित्यात्वम् इतोत्सर्वनामस्थानेइत्यत्वं इकारस्यलोपः थोन्थः पथिमथोःसर्वनामस्थानेइत्याद्युदात्तत्वम् । प्रवाच्यम् वक्तेर्ण्यन्तादचोयदितिभावेयत् यतोनावइत्याद्युदात्तत्वम्। अतिक्रमे क्रमुपादविक्षेपे कृत्यार्थेतवैकेनितिकेन्प्रत्ययः नित्त्वादाद्युदात्तत्वम् ॥ १६ ॥

१६. यह जो सूर्य, आकाश में, सर्व-सिद्ध पथ-स्वरूप हैं, देवगण, उन्हें तुम लोग नहीं लांघ सकते। मनुष्यगण, तुम लोग नहीं उन्हें जानते। द्यावा-पृथिवी, मेरा यह विषय जानो।

सप्तदशीमृचमाह—

त्रितःकूपेवहितोदेवान्हवतऊतये ।
तच्छुश्रावबृहस्पतिःकृण्वन्नंहूरणादुरुवित्तंमेअस्यरोदसी ॥१७॥

त्रितः । कूपे । अवऽहितः । देवान् । हवते । ऊतये । तत् ।
शुश्राव । बृहस्पतिः । कृण्वन् । अंहूरणात् । उरु । वित्तम् ।
मे । अस्य । रोदसी इति ॥ १७ ॥

कूपेअवहितः पातितस्त्रितः एतत्संज्ञऋषिः ऊतयेरक्षणाय देवान् हवते स्तुतिभिराकारयति यदेतत् त्रितस्याह्वानं बृहस्पतिर्बृहतांमहतांदेवानां रक्षकएतत्संज्ञकोदेवः तदाह्वानं शुश्रावश्रुतवान् किंकुर्वन् अंहूरणात् अंहसःपापरूपादस्मात् कूपपातादुत्तीर्य उरुविस्तीर्णं शोभनं कृण्वन्कुर्वन् ॥ हवते ह्वयतेर्लटिबहुलंछन्दसीतिसंप्रसारणम् शपगुणा-

वादेशाः । ऊतये ऊतियूतीत्यादिनाक्तिनउदात्तत्वम् । बृहस्पतिः तद्बृहतोःकरपत्यो-रितिपारस्करादिषुपाठात्सुट्तलोपौ उभेवनस्पत्यादिष्वितिपूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम् । अंहूरणात् अहिगतौ इदित्त्वान्नुम् खर्जिपिञ्जादिभ्यऊरोलचावितिभावेऊरप्रत्ययः दुःखप्रा-प्तिहेतुभावागविरस्यास्तीतिपामादिलक्षणोमत्वर्थीयोनः आङ्पूर्वाद्धन्तेर्वारूपमुन्नेयम् ॥ १७ ॥

१७. कुएँ में गिरकर त्रित ने, रक्षा के लिए, देवों का आह्वान किया। बृहस्पति ने त्रित का पाप-रूप कुएँ से उद्धार करके उसका आह्वान सुना था। द्यावा-पृथिवी, मेरा यह विषय जानो।

अष्टादशीमृचमाह—

अ॒रु॒णोमा॑स॒कृद्वृकः॑प॒थायन्तं॑द॒दर्श॒हि ।
उज्जिहीतेनि॒चाय्या॒तष्टे॑वपृष्ट्या॒म॒यीवि॒त्तंमे॑अ॒स्यरो॑दसी ॥ १८ ॥

अ॒रु॒णः । मा॒ । स॒कृत् । वृकः॑ । प॒था । यन्त॑म् । द॒दर्श॑ । हि ।
उत् । जि॒ही॒ते॒ । नि॒ऽचाय्य॑ । तष्टा॑ऽइव । पृ॒ष्टि॒ऽआ॒म॒यी ।
वि॒त्तम् । मे॒ । अ॒स्य । रो॒द॒सी॒ इति॑ ॥ १८ ॥

अरुणः अरुणवर्णोलोहितवर्णः वृकोरण्यःश्वा सकृदेकवारंपथायन्तंमार्गेणगच्छन्तंमा-मांददर्शहि दृष्टवान् हिःपादपूरणः निचाय्यदृष्ट्वाच मांजिघृक्षुःसन् उज्जिहीते उद्गच्छतिस्म तत्रदृ-ष्टान्तः—तष्टेवपृष्टयामयी यथातक्षणजनितपृष्ठक्लेशः तष्टावर्धकिः तदपनोदनायऊर्ध्वाभिमुखोभ-वतितद्वत् हेद्यावापृथिव्यौ मदीयंदुःखंवित्तंजानीतम् यद्वा वृकइतिविवृतज्योतिष्कश्चन्द्रमाउच्यते अरुणःआरोचमानः कृत्स्नस्यजगतःप्रकाशकः मासकृत्मासार्धमासर्त्वयनसंवत्सरादीन्कालवि-शेषान्कुर्वन् तिथिविभागज्ञानस्यचन्द्रगत्यधीनत्वात्सचन्द्रमाआकाशमार्गेयन्तंगच्छन्तंनक्षत्रगणं ददर्श हिरवधारणे नक्षत्रगणमेवददर्श नकूपपतितंमामित्यनादरोव्यज्यते यदिमांपश्येत्तउद्धरेत्कू-पात् निचाय्य नक्षत्रगणंदृष्ट्वाचउज्जिहीते येननक्षत्रेणसंयुज्यते तेनसहोद्गच्छति नमामभिगच्छ-तीत्यर्थः अन्यत्पूर्ववत् अत्रमासकृदितियास्कः एकंपदंमन्यते शाकल्यस्तुपदद्वयं तस्मिन्पक्षेऽय-मर्थः—दक्षप्रजापतेर्दुहितृभूताःस्वभार्याअश्विन्याद्यास्तारकाःपुनःपुनर्ददर्शमांसकृदेवपश्यतीति स-कृद्दृष्ट्वाचउज्जिहीते ताराभिःसहऊर्ध्वमेवगच्छति नमांकूपादुत्तारयति अतइदमनुचितम् हेद्या-वापृथिव्यौ मदीयमिमंवृत्तान्तंजानीतम् अत्रनिरुक्तम्[1]—वृकश्चन्द्रमाभवतिविवृतज्योतिष्कोवावि-कृतज्योतिष्कोवाविक्रान्तज्योतिष्कोवा अरुणआरोचनोमासकृन्मासानांचार्धमासानांचकर्ताभ-वतिचन्द्रमावृकःपथायन्तंददर्शनक्षत्रगणमभिजिहीतेनिचाय्ययेनयेनयोक्ष्यमाणोभवतिचन्द्रमा-

---

१ नि० ५. २०. ।

स्तक्ष्णुवन्निवपृष्ठरोगीति¹। सकृद् एकस्यसकृच्चेतिक्रियाभ्यावृत्तिगणनेनिपातितः। वृकः वृञ्‌-वरणे सृवृभूशुषिमुषिभ्यःकिदितिकप्रत्ययः। जिहीते ओहाङ्गतौ जौहोत्यादिकः भृञामिदित्यभ्यासस्येत्वम्। निचाय्य चायृपूजानिशामनयोः अत्रदर्शनार्थः धातूनामनेकार्थत्वात्समासेनञ्पूर्वेक्त्वोल्यप्। पृष्ट्यामयी स्पृशसंस्पर्शने पृष्टिःपृष्ठं स्पृश्यतेअनेनेतिपृष्टिः छान्दसोवर्णलोपः पृष्टौआमयः पृष्ट्यामयः तद्वान्पृष्ट्यामयी ॥ १८ ॥

१८. अरुण-वर्ण वृक ने, एक समय, मुझे मार्ग में जाते देखा था। जैसे अपना कार्य करते-करते, पीठ पर वेदना होने पर, कोई उठ खड़ा होता है, वैसे ही मुझे देखकर वृक भी उठ खड़ा हुआ था। द्यावा-पृथिवी, मेरा यह विषय जानो।

एनाङ्गूषेणवयमिन्द्रवन्तोभिष्यामवृजनेसर्ववीराः।
तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीउतद्यौः॥१९॥२३॥

एना। आङ्गूषेण। वयम्। इन्द्रऽवन्तः। अभि। स्याम। वृजने। सर्वऽवीराः। तत्। नः। मित्रः। वरुणः। ममहन्ताम्। अदितिः। सिन्धुः। पृथिवी। उत। द्यौः॥ १९॥ २३॥

एनाअनेनाङ्गूषेणआघोषणयोग्येनस्तोत्रेणहेतुभूतेन इन्द्रवन्तः अनुग्राहकेणेन्द्रेणयुक्ताः सर्ववीराः सर्वैर्वीरैः पुत्रैःपौत्रादिभिश्चोपेताःसन्तोवयं वृजनेसंग्रामेअभिष्याम शत्रूनभिभवेम तदिदमस्मदीयंवचनम् मित्रादयोममहन्तां पूजयन्तु पालयन्त्वित्यर्थः उतशब्दोदेवतासमुच्चये अत्रयास्कः—आङ्गूषस्तोमआघोषः अनेनस्तोमेनवयमिन्द्रवन्तइति² । एना द्वितीयाटौस्स्वेनइतिद्वितीयायामिदमएनादेशः सुपांसुलुगितिविभक्तेराजादेशः चित्स्वरेणान्तोदात्तत्वम्। आङ्गूषेण आङ्पूर्वाद्घुषेःकर्मणिघञ् आङोङकारस्यलोपाभावश्छान्दसः घोषशब्दस्यगूषभावश्चपृषोदरादित्वात् थाथादिनोत्तरपदान्तोदात्तत्वम्। स्याम अस्तेःप्रार्थनायांलिङि श्नसोरल्लोपइत्यकारलोपः उपसर्गप्रादुर्भ्यामस्तिर्यच्परइतिषत्वम् ॥ १९ ॥

१९. इस घोषणा-योग्य स्तोत्र के द्वारा इन्द्र को पाकर हम लोग, वीरों के साथ मिलकर, समर में शत्रुओं को परास्त करेंगे। मित्र, वरुण, अदिति, सिन्धु, पृथिवी और आकाश, हमारी यह प्रार्थना पूजित करें।

॥ इतिप्रथमस्यसप्तमेत्रयोविंशोवर्गः ॥ २३ ॥

॥ इतिप्रथमेमण्डलेपञ्चदशोनुवाकः ॥ १५ ॥

---

१ नि० ५. २०। २ नि० ५. ११।

षोडशेनुवाकेदशसूक्तानि तत्रेन्द्रमितिसप्तर्चंप्रथमंसूक्तम् अत्रानुक्रम्यते इन्द्रंमित्रंसप्तत्रि-ष्टुबन्तमिति अनुवर्तमानत्वात्कुत्सऋषिः त्रितस्तुवाविशिष्टत्वात् तत्रैवविकल्पितोनानुवर्तते अ-न्त्यात्रिष्टुप् शिष्टास्त्रिष्टुबन्तपरिभाषयाजगत्यः विश्वेदेवादेवतेत्युक्तम् विनियोगोलैङ्गिकः।

इन्द्रंमित्रंवरुणमग्निमूतयेमारुतंशर्धोअदितिंहवामहे ।
रथंनदुर्गाद्वसवःसुदानवोविश्वस्मान्नोअंहसोनिष्पिपर्तन ॥ १ ॥

इन्द्रम् । मित्रम् । वरुणम् । अग्निम् । ऊतये । मारुतम् । शर्धः ।
अदितिम् । हवामहे । रथम् । न । दुःऽगात् । वसवः । सुऽदानवः ।
विश्वस्मात् । नः । अंहसः । निः । पिपर्तन ॥ १ ॥

ऊतये रक्षणाय वयमिन्द्रादीन्मारुतंशर्धोमरुत्समूहरूपंबलंचहवामहे आह्वयामहे वसवो-निवासयितारः सुदानवः शोभनदानाइन्द्रादयः विश्वस्मात्सर्वस्मादंहसः पापान्नोस्मान्निष्पिपर्त-न निर्गमय्यपालयत तत्रदृष्टान्तः—रथंनदुर्गात् गन्तुमशक्यात् निम्नोन्नतात् स्थानात् सारथयोय-थारथंपालयन्तितद्वत् ॥ पिपर्तन पृइत्येके लोटि तप्तनप्तनथनाश्चेतितस्यतनबादेशः पित्त्वेनङि-त्त्वाभावाद्गुणः आर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वम् ॥ १ ॥

१. रक्षा के लिए हम इन्द्र, मित्र, वरुण, अग्नि और मरुद्गण को बुलाते हैं। जैसे संसार में लोग रथ को दुर्गम पथ से उद्धार कर लाते हैं, वैसे ही दानशील और वास-गृह-दाता देवता लोग हमें, पापों से उद्धार कर, पालन करें।

तआदित्याआगतासर्वतातयेभूतदेवावृत्रतूर्येषुशंभुवः ।
रथंनदुर्गाद्वसवःसुदानवोविश्वस्मान्नोअंहसोनिष्पिपर्तन ॥ २ ॥

ते । आदित्याः । आ । गत । सर्वऽतातये । भूत । देवाः ।
वृत्रऽतूर्येषु । शम्ऽभुवः । रथम् । न । दुःऽगात् । वसवः ।
सुऽदानवः । विश्वस्मात् । नः । अंहसः । निः । पिपर्तन ॥ २ ॥

हेआदित्याःअदितेःपुत्रादेवाः तेयूयंसर्वतातये सर्वैर्वीरपुरुषैस्तताय विस्तारिताययुद्धाययु-द्धेअस्माकंसाहाय्यंकर्तुमित्यर्थः आगतआगच्छत अपिचवृत्रतूर्येषु संग्रामनामैतत् संग्रामेषुशंभु-वः सुखस्यभावयितारोभूतभवत ॥ गत गमेर्लोटिबहुलंछन्दसीतिशपोलुक् ॥ २ ॥

२. आदित्यगण, युद्ध में हमारी सहायता के लिए, तुम लोग आओ और युद्ध में हमारी विजय के कारण बनो। जैसे संसार में लोग रथ को दुर्गम पथ से उद्धार कर लाते हैं, वैसे ही दानशील और वास-गृह-दाता देवगण, हमें, पापों से उद्धार कर, पालन करें।

तृतीयामृचमाह—

अवन्तुनःपितरःसुप्रवाचनाउतदेवीदेवपुत्रेऋतावृधा।
रथंनदुर्गाद्वसवःसुदानवोविश्वस्मान्नोअंहसोनिष्पिपर्तन ॥ ३ ॥

अवन्तु । नः । पितरः । सुऽप्रवाचनाः । उत । देवी इति ।
देवपुत्रे इति देवऽपुत्रे । ऋतऽवृधा । रथम् । न । दुःऽगात् ।
वसवः । सुऽदानवः । विश्वस्मात् । नः । अंहसः । निः । पिपर्तन ॥ ३ ॥

नोस्मान् पितरोग्निष्वात्तादयोवन्तुरक्षन्तु कीदृशाः सुप्रवाचनाः सुखेनप्रवक्तुंस्तोतुंशक्याः उतअपिचदेवपुत्रे देवाःसर्वेपुत्रस्थानीयाययोस्ते ऋतावृधा ऋतस्यसत्यस्ययज्ञस्यवावर्धयित्र्यौदेवी देवनादिगुणयुक्तेद्यावापृथिव्यौ अस्मान्रक्षताम् अन्यत्समानम् ॥ देवी वाछन्दसीतिपूर्वसवर्णदीर्घत्वम् । ऋतावृधा वृधेरन्तर्भावितण्यर्थात्क्विप् सुपांसुलुगितिविभक्तेराकारः॥३॥

३. जिनकी स्तुति सुख-साध्य है, वे पितृगण हमारी रक्षा करें। देवों की पितृ-मातृ-स्वरूपा और यज्ञ-वर्द्धयित्री द्यावा-पृथिवी हमारी रक्षा करें। जैसे संसार में लोग रथ को दुर्गम पथ से उद्धार कर लाते हैं, वैसे ही दानशील और वास-गृह दाता देवगण, हमें, पापों से उद्धार कर, पालन करें।

चतुर्थीमृचमाह—

नराशंसंवाजिनंवाजयन्निहक्षयद्वीरंपूषणंसुम्नैरीमहे।
रथंनदुर्गाद्वसवःसुदानवोविश्वस्मान्नोअंहसोनिष्पिपर्तन ॥ ४ ॥

नराशंसम् । वाजिनम् । वाजयन् । इह । क्षयत्ऽवीरम् । पूषणम् ।
सुम्नैः । ईमहे । रथम् । न । दुःऽगात् । वसवः । सुऽदानवः ।
विश्वस्मात् । नः । अंहसः । निः । पिपर्तन ॥ ४ ॥

नराशंसं नरैःशंसनीयं वाजिनंअन्नवन्तमग्निं वाजयन् उपह्वयन्प्रज्वलयन्निहास्मिन्कालेस्तौमीतिशेषः तथा क्षयद्वीरम् अतिबलिनम् यस्मिन्सर्वेवीराःक्षीयन्ते एवंरूपंपूषणंपोषकंदेवंसुम्नैः सुखकरैःस्तोत्रैर्हेतुभूतैःईमहेयाचामहे अभीष्टंप्रार्थयामहे ॥ नराशंसं उभेवनस्पत्यादिष्वितियुगपदुभयपदप्रकृतिस्वरत्वम् नरशब्दःऋदोरबित्यबन्तआद्युदात्तः निपातनादीर्घः शंसशब्दोघञन्तआद्युदात्तः। वाजयन् वजव्रजगतौ अस्माण्णिच् । क्षयद्वीरम् क्षिक्षये लटःशतृ शपिप्राप्तेव्यत्ययेनश्नः तस्य छन्दस्युभयथेत्यार्धधातुकत्वेनङित्त्वाभावाद्गुणादेशौ अदुपदेशाल्लसार्वधातु-

क्षय-
कानुदात्तत्वेविकरणस्वरः अतोगुणेईतिपरपूर्वरूपत्वेएकादेशउदात्तेनेतिएकादेशउदात्तः।
न्तोवीरायस्मिन् बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् ॥ ४ ॥

४. मनुष्यों के प्रशंसनीय और अन्नवान् अग्नि को इस समय हम बुलाकर स्तुति करते हैं। वीर और विजयी पूषा के पास, सुखकर स्तोत्र-द्वारा, याचना करते हैं। जैसे संसार में लोग रथ को दुर्गम पथ से उद्धार कर लाते हैं, वैसे ही दानशील और वास-गृह-दाता देवगण, हमें, पापों से उद्धार कर, पालन करें।

बृहस्पतेसदमिन्नःसुगंकृधिशंयोर्यत्तेमनुर्हितंतदीमहे ।
रथंनदुर्गाद्वसवःसुदानवोविश्वस्मान्नोअंहसोनिष्पिपर्तन ॥ ५ ॥

बृहस्पते । सदम् । इत् । नः । सुऽगम् । कृधि । शम् । योः ।
यत् । ते । मनुःऽहितम् । तत् । ईमहे । रथम् । न । दुःऽगात् । वसवः ।
सुऽदानवः । विश्वस्मात् । नः । अंहसः । निः । पिपर्तन ॥५॥

बृहस्पते सदमिव् सदैवनोस्माकं सुगं सुखनामैतत् सुखंकधिकुरु अपिच तेतवस्वभूतं शं
शमनीयानांरोगाणांउपशमनं योः पृथक्कर्तव्यानांभयानांयावनं पृथक्करणं मनुर्हितंमनुनाब्रह्म-
णाहितंव्यवस्थापितम् यद्वा मनुष्याणामनुकूलं एवंविधशमनंयावनंचयदस्तितदीमहे याचाम-
हे ॥ सुगं सुष्ठुगम्यतेस्मिन्नितिसुगम् सुदुरोरधिकरणेइतिगमेर्डः। शंयोरित्येतत्पदद्वयंयास्केनैवं
व्याख्यातम्—शमनंचरोगाणांयावनंचभयानामिति[1] । मनुर्हितम् मनेरौणादिकउसिन्प्रत्ययः तृ-
तीयाकर्मणीतिपूर्वपदप्रकृतिस्वरत्वम् ॥ ५॥

५. बृहस्पतिदेव, हमें सदा सुख प्रदान करो। मनुष्यों के रोगों के उपशम और भयों के दूरीकरण की जो उपकारिणी क्षमता तुममें है, उसकी भी हम याचना करते हैं। जैसे संसार में लोग रथ को दुर्गम पथ से उद्धार कर लाते हैं, वैसे ही दानशील और वास-गृह-दाता देवगण, हमें, पापों से उद्धार कर, पालन करें।

इन्द्रंकुत्सोवृत्रहणंशचीपतिंकाटेनिबाळ्ह्ऋषिरह्वदूतये ।
रथंनदुर्गाद्वसवःसुदानवोविश्वस्मान्नोअंहसोनिष्पिपर्तन ॥ ६ ॥

इन्द्रम् । कुत्सः । वृत्रऽहनम् । शचीऽपतिम् । काटे । निऽबाळ्हः ।
ऋषिः । अह्वत् । ऊतये । रथम् । न । दुःऽगात् । वसवः ।
सुऽदानवः । विश्वस्मात् । नः । अंहसः । निः । पिपर्तन ॥ ६ ॥

काटइतिकूपनाम तस्मिन्निबाळ्होनिपतितः कुत्सऋषिः ऊतयेरक्षणायइन्द्रंअह्वत् आह्वय-
तेस्म कीदृशं वृत्रहणं वृत्राणांशत्रूणांहन्तारं शचीपतिम् शचीतिकर्मनाम सर्वेषांकर्मणांपालयि-

---

1 नि० ४. २१.।

तारम् यद्वा शच्यादेव्याभर्तारम् ॥ शचीपतिम् वनस्पत्यादिषुपाठादुभयपदप्रकृतिस्वरत्वम् शचीशब्दः शार्ङ्गरवादिङीनन्तआद्युदात्तः । निबाह्वः बाहृप्रयत्ने नीत्युपसर्गवशात्पतनेवर्तते निष्ठायामनित्यमागमशासनमितीडभावः ढत्वधत्वादीनि यद्वा क्षुब्धस्वान्तेत्यादौभृशार्थेइडभावोनिपात्यते अत्रचबाढशब्दोभृशत्वोपेतेपतनेसामर्थ्याद्वर्तते गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम् । अह्वत् लिपिसिचिह्वश्चेतिलुङ्च्लेरङादेशः आतोलोपइटिचेत्याकारलोपः ॥ ६ ॥

६. कूप में पतित कुत्स ऋषि ने, बचने के लिए, वृत्र-हन्ता और शचीपति इन्द्र का आह्वान किया था। जैसे संसार में लोग रथ को दुर्गम पथ से उद्धार कर लाते हैं, वैसे ही दानशील और वास-गृह-दाता देवगण हमें पापों से उद्धार कर पालन करें।

देवैर्नोदेव्यदितिर्निपातुदेवस्त्रातात्रायतामप्रयुच्छन् ।
तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीउतद्यौः ॥ ७ ॥ २४ ॥

देवैः । नः । देवी । अदितिः । नि । पातु । देवः । त्राता । त्रायताम् । अप्रऽयुच्छन् । तत् । नः । मित्रः । वरुणः । ममहन्ताम् । अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥ ७ ॥ २४ ॥

देवीदानादिगुणयुक्तादितिरखण्डनीया अदीनावादेवमाता देवैर्दानादिगुणयुक्तैःस्वकीयैःपुत्रैःसह नोस्मान्निपातुनितरांरक्षतु देवोदीप्यमानस्त्रातासर्वेषांरक्षकः सविता अप्रयुच्छन् अप्रमाद्यन् अस्मद्रक्षणेजागरूकःसन्त्रायतामस्मान्पालयतु यदनेनसूक्तेनास्माभिःप्रार्थितंनोस्मदीयंतन्मित्राद्यःषड्देवताःममहन्तां पूजयन्तु ॥ त्रायतां त्रैङ्पालने भौवादिकः । अप्रयुच्छन् युच्छप्रमादे अस्माल्लटःशतृ नञ्समासेव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥ ७ ॥

७. देवों के साथ अदिति देवी हमारा पालन करें। सबके रक्षक दीप्यमान सविता जागरूक होकर हमारी रक्षा करें। मित्र, वरुण, अदिति, सिन्धु, पृथिवी और आकाश हमारी यह प्रार्थना पूजित करें।

यज्ञोदेवानामितितृचंद्वितीयंसूक्तंकुत्सस्यार्षंत्रैष्टुभंवैश्वदेवं यज्ञस्तृचमित्यनुक्रान्तम् विनियोगोलैङ्गिकः ।

तत्रप्रथमामृचमाह—

यज्ञोदेवानांप्रत्येतिसुम्नमादित्यासोभवतामृळयन्तः ।
आवोर्वाचीसुमतिर्ववृत्यादंहोश्चिद्यावरिवोवित्तरासत ॥ १ ॥

यज्ञः । देवानाम् । प्रति । एति । सुम्नम् । आदित्यासः । भवत । मृळयन्तः । आ । वः । अर्वाची । सुऽमतिः । ववृत्यात् । अंहोः । चित् । या । वरिवोवित्ऽतरा । असत् ॥ १ ॥

अस्मदायोयज्ञोदेवानामिन्द्रादीनां सुम्नंसुखंप्रत्येतिप्राप्नोतु अपिच हेआदित्यासः आदित्याः मृडयन्तोस्मान्सुखयन्तोभवत तथावोयुष्माकंसुमतिः शोभनामतिःभक्तानुग्रहपराबुद्धिःअर्वाची अस्मदभिमुखीआववृत्याव आवर्ततामू यामतिःअंहोश्चिद दारिद्र्यंप्राप्तस्यापिपुरुषस्यवरिवोवित्तरा वरिवइतिधननाम अतिशयेनधनस्यलंभयित्रीअसत्भवेद सैषामतिरस्मान्रक्षितुंवर्ततामित्यर्थः ॥ भवत आमन्त्रितंपूर्वमविद्यमानवदितिआदित्यासइतिपादादौवर्तमानस्यामन्त्रितस्याविद्यमानवत्त्वेनअस्यपादादित्वादपादादावितिपर्युदासान्निघाताभावः । मृळयन्तः मृडसुखने ण्यन्ताल्लटःशतृ छन्दस्युभयथेतिशतुरार्धधातुकत्वेनादुपदेशाल्लसार्वधातुकानुदात्तत्वाभावेशतुःस्वरःशिष्यते । ववृत्याद् वृतुवर्तने लिङिव्यत्ययेनपरस्मैपदम् बहुलंछन्दसीतिशपःश्लुः । अंहोः अहिगतौ इदित्त्वान्नुम् औणादिकउप्रत्ययः । वरिवोवित्तरा विद्लृलाभे अस्मादन्तर्भावितण्यर्थात्क्विप् ततआतिशायनिकस्तरप् । असत् अस्भुवि लेटचडागमः ॥१॥

१. हमारा यज्ञ देवों को सुखी करे। आदित्यगण, तुष्ट हों। तुम्हारा अनुग्रह हमारी ओर प्रेरित हो और वही अनुग्रह दरिद्र मनुष्य के लिए प्रभूत धन का कारण हो।

द्वितीयामृचमाह—

उपनोदेवाअवसागमन्त्वङ्गिरसांसामभिःस्तूयमानाः ।
इन्द्रइन्द्रियैर्मरुतोमरुद्भिरादित्यैर्नोअदितिःशर्मयंसत् ॥ २ ॥

उप । नः । देवाः । अवसा । आ । गमन्तु । अङ्गिरसाम् । सामऽभिः स्तूयमानाः । इन्द्रः । इन्द्रियैः । मरुतः । मरुत्ऽभिः । आदित्यैः । नः । अदितिः । शर्म । यंसत् ॥ २ ॥

देवादानादिगुणयुक्ताःसर्वेदेवाः अवसारक्षणेनअस्मभ्यंदातव्येनान्नेनवायुक्ताः नोस्मान् स्तोतॄन् उपागमन्तु उपागच्छन्तुप्राप्नुवन्तु कथंभूताः अंगिरसांएतत्संज्ञकानामृषीणांसंबन्धिभिः सामभिः प्रगीतैर्मन्त्रैः स्तूयमानाः अपिचेन्द्रः इन्द्रियैः धननामैतत् स्वसंबन्धिभिरस्मभ्यंदातव्यैर्धनैःसहास्मानागच्छतु तथामरुतःसप्तगणरूपाएकोनपञ्चाशत्संख्याकाःईदृङ्चान्यादृङ्चेत्येवमादिनामानोदेवाः मरुद्भिः स्वावयवभूतैःप्राणापानादिरूपेणवर्तमानैर्वायुभिःसह अस्मानागच्छन्तु अथादितिः अखण्डनीयाअदीनावादेवमाता आदित्यैःस्वकीयैःपुत्रैःसह नोस्म-

भ्यं शर्मंसुखंयंसत् यच्छतु ॥ गमन्तु लेटि बहुलंछन्दसीतिशपोलुक् छन्दस्युभयथेतिङेराधंधा-तुकत्वेनङित्त्वाभावाद्गमहनेत्यादिनाउपधालोपाभावः । यंसत् यमउपरमे लेटयडागमः सिब्बहुलं-लेटीतिसिप् ॥ २ ॥

२. अङ्गिरा ऋषियों-द्वारा गाये गये मंत्रों से स्तुत होकर देवगण, रक्षा के लिए, हमारे पास आवें। धन लेकर इन्द्र, प्राणवायु के साथ मरुत् लोग तथा आदित्यों को लेकर अदिति हमें सुख प्रदान करें।

तन्नइन्द्रस्तद्वरुणस्तदग्निस्तदर्यमातत्सविताचनोधात् ।
तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीउतद्यौः ॥३॥२५॥

तत् । नः । इन्द्रः । तत् । वरुणः । तत् । अग्निः । तत् । अर्यमा । तत् । सविता । चनः । धात् । तत् । नः । मित्रः । वरुणः । ममहन्ताम् । अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥ ३ ॥ २५ ॥

यदस्माभिःप्रार्थ्यमानमन्नमस्ति चनइत्यन्नामैतत् तादृशंचनोन्नं नः अस्मभ्यं इन्द्रोधात् दधातुददातु एवंतद्वरुणइत्यादावपियोज्यम् तदिदमिन्द्रादिभिर्दत्तमस्मदीयमन्नं मित्रादयोममह-न्तां पूजयन्तु पालयन्त्वित्यर्थः॥चनः चायृपूजानिशामनयोः चायतेरन्नेह्रस्वश्चेत्यसुन् नुडागम-श्च धातोर्ह्रस्वत्वंच वलिलोपः नित्त्वादाद्युदात्तत्वम् । धात् छन्दसिलुङ्लङ्लिटइतिप्रार्थनायांलुङ् गातिस्थेतिसिचोलुक् ॥ ६ ॥

३. जिस अन्न के लिए हम याचना करते हैं, उसे इन्द्र, वरुण, अग्नि, अर्यमा और सविता हमें दें। मित्र, वरुण, अदिति, सिन्धु, पृथिवी और आकाश हमारे उस अन्न की पूजा करें।

यइन्द्राग्नीइतित्रयोदशर्चंतृतीयंसूक्तम् कुत्सस्यार्षंत्रैष्टुभमैन्द्राग्नम् तथाचानुक्रान्तम्—यइ-न्द्राग्नीसप्तोनैन्द्राग्नंत्विति विनियोगोलैङ्गिकः ।

तत्रप्रथमामृचमाह—

यइन्द्राग्नीचित्रतमोरथोवामभिविश्वानिभुवनानिचष्टे ।
तेनायातंसरथंतस्थिवांसाथासोमस्यपिबतंसुतस्य ॥ १ ॥

यः । इन्द्राग्नी इति । चित्रऽतमः । रथः । वाम् । अभि । विश्वानि । भुवनानि । चष्टे । तेन । आ । यातम् । सऽरथम् । तस्थिऽवांसा । अथ । सोमस्य । पिबतम् । सुतस्य ॥ १ ॥

हेइन्द्राग्नी चित्रतमः अतिशयेन चायनीयः वांयुवयोःसंबन्धीयोरथः विश्वानिभुवनानिभूतजातानि अभिचष्टे आभिमुख्येनपश्यति सुवर्णमयत्वात् रत्नखचितत्वाच्चस्वप्रभाभिःकृत्स्नंजगद्भासयतीत्यर्थः तेनरथेनायातमस्मद्यज्ञमागच्छतम् तत्किं पर्यायेणनेत्याह सरथं समानमेकंरथंतस्थिवांसा युगपदेवास्थितवन्तौयुवामागच्छतं नपर्यायेणेत्यर्थः अथागमनानन्तरं सुतस्य ऋत्विग्भिरभिषुतं सोमस्य सोमंस्वांशलक्षणंतदेकदेशंवापिबतम् ॥ वां युष्मदस्मदोःषष्ठीचतुर्थीद्वितीयास्थयोरित्यादिनाद्विवचनस्यवामादेशः सर्वानुदात्तत्वम् । चष्टे चक्षिङ्व्यक्तायांवाचि अत्रप्रकाशनार्थः अदादित्वाच्छपोलुक् स्कोःसंयोगाद्योरितिकलोपः तास्यनुदात्तेदितिलसार्वधातुकानुदात्तत्वेधातुस्वरःशिष्यते यद्वृत्तान्नित्यमितिनिघातप्रतिषेधः । सरथम् समानश्चासौरथश्चसरथः समानस्यच्छन्दसीतिसभावः परादिश्छन्दसिबहुलमित्युत्तरपदाद्युदात्तत्वम् । तस्थिवांसा ष्ठागतिनिवृत्तौ लिटःक्वसुः द्विर्वचनम् शर्पूर्वाःखयः वस्वेकाजाद्घसामितीडागमः आतोलोपइटिचेत्याकारलोपः सुपांसुलुगित्याकारः । सोमस्य क्रियाग्रहणंकर्तव्यमितिकर्मणःसंप्रदानत्वाच्चतुर्थ्यर्थेषष्ठी ॥ १ ॥

१. इन्द्र और अग्नि, तुम लोगों के जिस अतीव विचित्र रथ ने सारे भुवन को उज्ज्वल किया है, उसी रथ पर एक साथ बैठकर आओ; अभिषुत सोम पान करो।

द्वितीयामृचमाह—

यावदिदंभुवनंविश्वमस्त्युरुव्यचावरिमतागभीरम् ।
तावाँअयंपातवेसोमोअस्त्वरमिन्द्राग्नीमनसेयुवभ्याम् ॥ २ ॥

यावत् । इदम् । भुवनम् । विश्वम् । अस्ति । उरुऽव्यचा । वरिमता । गभीरम् । तावान् । अयम् । पातवे । सोमः । अस्तु । अरम् । इन्द्राग्नी इति । मनसे । युवऽभ्याम् ॥ २ ॥

विश्वंसर्वमिदंभुवनंजगत् यावदस्ति यावत्प्रमाणंभवति कीदृशं उरुव्यचा विस्तीर्णव्यापनं सर्वव्यापकमित्यर्थः तथावरिमता वरिम्णाउरुत्वेनआत्मीयेनगौरवेणगभीरं गांभीर्योपेतं हेइन्द्राग्नी पातवेयुवाभ्यांपातुं अयंसोमस्तावानस्तु तावत्प्रमाणोभवतु तथा मनसेयुवयोरन्तःकरणायअरं सोमः पर्याप्तोभवतु ॥ उरुव्यचा व्यचव्याजीकरणे असुन् व्यचेःकुटादित्वमनसीतिवचनावङित्त्वाभावेनसंप्रसारणाभावः स्वमोर्नपुंसकादितिसोर्लुकिप्राप्तेसुपांसुलुगितिव्यत्ययेनडादेशः । वरिमता पृथ्वादिभ्यइमनिज्वेतिउरुशब्दात्तस्यभावइत्यर्थेइमनिच् प्रियस्थिरेत्यादिनाउरुशब्दस्यवरादेशः पुनरपिभावमत्ययोत्पत्तिश्छान्दसी सुपांसुलुगितितृतीयायालुक् यद्वा तृतीया-

याश्छान्दसस्तुडागमः । तावान् तत्परिमाणस्ययत्तदेतेभ्यःपरिमाणेवतुप् आसर्वनाम्नइत्यात्वम् । पातवे पापाने तुमर्थेसेसेनितितवेन्प्रत्ययः नित्त्वादाद्युदात्तत्वम् । अरं वालमूलळघ्वलमंगुलीनांवा-ळोरत्वमापद्यतइतिवक्तव्यमितिलत्वविकल्पः । युवभ्याम् व्यत्ययेनात्वाभावेशेषेलोपइतिदकार-लोपः ॥ २ ॥

२. इस बहुव्यापक और अपनी गुरुता से गम्भीर जो सारे भुवन का परिमाण है, इन्द्र और अग्नि, तुम लोगों के पीने योग्य सोम वही परिमाण हो; तुम लोगों की अभिलाषा अच्छी तरह पूर्ण करे ।

चक्राथेहिसध्र्य१ङ्नामभद्रंसध्रीचीनावृत्रहणाउतस्थः ।
ताविन्द्राग्नीसध्र्यञ्चानिषद्यावृष्णःसोमस्यवृषणावृषेथाम् ॥ ३ ॥

चक्राथे इति । हि । सध्र्यक् । नाम । भद्रम् । सध्रीचीना ।
वृत्रऽहनौ । उत । स्थः । तौ । इन्द्राग्नी इति । सध्र्यञ्चा । निऽसद्य ।
वृष्णः । सोमस्य । वृषणा । आ । वृषेथाम् ॥ ३ ॥

हेइन्द्राग्नी भद्रंकल्याणंनामस्वकीयंनामधेयंसध्र्यक्सहगतंइन्द्राग्नीइत्येवंसंयुक्तंचक्राथे हि युवांकृतवन्तौ उतअपिच हेवृत्रहणौ वृत्रस्यासुरस्यहन्ताराविन्द्राग्नी सध्रीचीनासहाञ्चन्तौवृ-त्रवधार्थंसङ्गतौस्थोभवथः हियस्मादेवंतस्मात् हेवृषणाकामानांवर्षिताराविन्द्राग्नी तौयुवांसध्र्य-ञ्चासहितावेवसन्तौ निषद्यवेद्यामुपविश्य वृष्णःसेक्तुःसोमस्यआत्मीयंभागंआवृषेथां स्वकीयेउदरे आसिञ्चेथाम् ॥ सध्र्यक् सहशब्दोपपदादञ्चतेर्ऋत्विगित्यादिनाक्विन् अनिदितामितिनलोपः सहस्यसध्रिः अद्रिसध्र्योरन्तोदात्तनिपातनंकृत्स्वरनिवृत्त्यर्थमितिवचनात्सध्र्यादेशोन्तोदात्तः यणादेशेउदात्तस्वरितयोर्यणइतिस्वरितत्वम् । सध्रीचीना विभाषाञ्चेरदिक्स्त्रियामितिस्वार्थेखः सुपांसुलुगितिविभक्तेराजादेशः । वृत्रहणौ संहितायामावादेशे लोपःशाकल्यस्येतिवलोपः । वृषेथाम् वृषसेचने व्यत्ययेनशः आत्मनेपदंच ॥ ३ ॥

३. तुम लोगों ने अपना कल्याणवाही नाम-द्वय एकत्र किया है। वृत्र-हन्तृ-द्वय, वृत्र-वध के लिए, तुम लोग एक साथ हुए थे। अभीष्ट-दाता इन्द्र और अग्नि, तुम लोग एकत्र होकर और बैठकर अभिषुत सोम, अपने उदरों में, सेचन करो ।

चतुर्थीमृचमाह—

समिद्धेष्वग्निष्वानजानायतस्रुचाबर्हिरुतिस्तिराणा ।
तीव्रैःसोमैःपरिषिक्तेभिरर्वागेन्द्राग्नीसौमनसाययातम् ॥ ४ ॥

समऽइंद्धेषु । अग्निषु । आनजाना । यतऽस्रुचा । बर्हिः ।
ऊम् इति । तिस्तिराणा । तीव्रैः । सोमैः । परिऽसिक्तेभिः ।
अर्वाक् । आ । इन्द्राग्नी इति । सौमनसाय । यातम् ॥ ४ ॥

अग्निषुगार्हपत्यादिषु अन्वाधानादिनासमिद्धेषुसम्यगिद्धेषुदीप्तेषुसत्सु आनजाना हवींषि आज्येनाञ्जन्तौ यतस्रुचा तदनन्तरंयागार्थंगृहीतस्रुचौ बर्हिःउ वेद्यांबर्हिरपितिस्तिराणाआस्तीर्णंकृतवन्तौ अध्वर्युंरमतिमस्थातारौएवंभूतावभूताम् तथासति हेइन्द्राग्नी तीव्रैःक्षिप्रंमदकरैः परिषिक्तेभिःपरितःसर्वैर्ग्रहचमसादिषुआसक्तैःसोमैः हेतुभूतैः अर्वाक् अस्मदभिमुखमायातमागच्छतम् किमर्थं सौमनसाय सौमनस्यायअस्माकमनुग्रहायेत्यर्थः॥आनजाना अञ्जूव्यक्तिम्रक्षणकान्तिगतिषु लिटःकानच् अनिदितामितिनलोपः द्विर्भावेअतआदेरित्यभ्यासस्यदीर्घः तस्मान्नुड्द्विहलइति अद्विहलोपिव्यत्ययेननुट् । तिस्तिराणा स्तृञ्आच्छादने पूर्ववत्कानच् ऋतइद्धातोरितीत्वम् द्विर्वचनेशर्पूर्वाःखयः सुपांसुलुगितिसर्वत्रविभक्तेराकारः चित्त्वादन्तोदात्तत्वम् ॥ ४ ॥

४. अग्नि के अच्छी तरह प्रज्वलित होने पर दोनों अध्वर्युओं ने पात्र से घृत सेचन करके कुश विस्तार किया है। इन्द्र और अग्नि, चारों ओर अभिषुत तीव्र सोम-रस-द्वारा आकृष्ट होकर, कृपा के लिए हमारी ओर आओ।

यानींन्द्राग्नीचक्रथुर्वीर्याणियानिरूपाण्युतवृष्ण्यानि ।
यावांप्रत्नानिसख्याशिवानितेभिःसोमस्यपिबतंसुतस्य ॥५॥२६॥

यानि । इन्द्राग्नी इति । चक्रथुः । वीर्याणि । यानि । रूपाणि ।
उत । वृष्ण्यानि । या । वाम् । प्रत्नानि । सख्या । शिवानि ।
तेभिः । सोमस्य । पिबतम् । सुतस्य ॥ ५ ॥ २६ ॥

हेइन्द्राग्नी यानिवीर्याणिवृत्रवधादिरूपाणिचक्रथुः कृतवन्तौ युवांयानिचरूपाणिनिरूप्यमाणानिगवाश्वादीनिभूतजातानिकृतवन्तौ इन्द्राग्निभ्यांहिसर्वंजगत्सृज्यते इन्द्रःसूर्यात्मनावृष्टिंसृजति धाराद्वारावृष्ट्युत्पादकः वृष्टेःसकाशात्सर्वेप्राणिनउत्पद्यन्ते उतअपिच यानिवृष्ण्यानि वृष्णिभवानि वृष्टिप्रदानादिरूपाणिकर्माणिकृतवन्तौ तथा वांयुवयोःसंबन्धीनि प्रत्नानिचिरन्तनानि शिवानिशोभनानि यायानिसख्यासखित्वानिसन्ति तेभिःतैःसर्वैःसहितौयुवांसुतस्यसोमस्याभिषुतंसोमंपिबतम् ॥ सख्या सख्युर्भावःसख्यम् सख्युर्यइतियप्रत्ययः शेश्छन्दसिबहुलमितिशेर्लोपः । तेभिः बहुलंछन्दसीतिभिसऐसभावः सावेकाचइतिप्राप्तस्यविभक्त्युदात्तस्य नगोश्वन्त्सावर्वर्णेतिप्रतिषेधः ॥ ५ ॥

५. इन्द्र और अग्नि, तुम लोगों ने जो कुछ वीर-कार्य किया है, जितने रूप-विशिष्ट जीवों की सृष्टि की है, जो कुछ वर्षण किया है तथा

तुम लोगों का जो कुछ प्राचीन कल्याणकर बन्धुत्व है, वह सब ले आकर अभिषुत सोम पीओ।

यदब्रवंप्रथमंवांवृणानोऽयंसोमोअसुरैर्नोविहव्यः।
तांसत्यांश्रद्धामभ्याहियातमथासोमस्यपिबतंसुतस्य ॥ ६ ॥

यत्। अब्रवम्। प्रथमम्। वाम्। वृणानः। अयम्। सोमः। असुरैः। नः। विऽहव्यः। ताम्। सत्याम्। श्रद्धाम्। अभि। आ। हि। यातम्। अथ। सोमस्य। पिबतम्। सुतस्य ॥ ६ ॥

हेइन्द्राग्नी प्रथमंकर्मोपक्रमएववांयुवांवृणानः संभजमानः यदब्रवं सोमेनप्रीणयिष्यामीतियदवोचं सत्यांयथार्थांतांश्रद्धां श्रद्धयाआदरातिशयेनकृतामुक्तिंअभिअभिलक्ष्य आहि यातं आगच्छतमेव नोदासाथाम् अथागमनान्तरंअभिषुतंसोमंपिबतम् तथासति असुरैःहविषांप्रक्षेपकैर्ऋत्विग्भिरयंनोस्माकंसोमोविहव्योविशेषेणहोतव्योभवति इतरथाव्यर्थःस्याव तस्मादिन्द्राग्नीआगच्छतमित्यर्थः ॥ वृणानः वृङ्संभक्तौ लटःशानच् श्राभ्यस्तयोरातइत्याकारलोपः। असुरैः असुक्षेपणे असेरुरन्नित्युरन्प्रत्ययः। विहव्यः हुदानादनयोः अचोयत् गुणः धातोस्तन्निमित्तस्यैवेत्यवादेशः यतोनावइत्याद्युदात्तत्वं कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ ६ ॥

६. पहले ही कहा था कि, तुम दोनों को वरण करके तुम्हें सोम-द्वारा प्रसन्न करूँगा, वही अकपट श्रद्धा देखकर आओ; अभिषुत सोम पान करो। यह सोम हमारे ऋत्विकों की विशेष आहुति के योग्य हो।

यदिन्द्राग्नीमदथःस्वेदुरोणेयद्ब्रह्मणिराजनिवायजत्रा।
अतःपरिवृषणावाहियातमथासोमस्यपिबतंसुतस्य ॥ ७ ॥

यत्। इन्द्राग्नी इति। मदथः। स्वे। दुरोणे। यत्। ब्रह्मणि। राजनि। वा। यजत्रा। अतः। परि। वृषणौ। आ। हि। यातम्। अथ। सोमस्य। पिबतम्। सुतस्य ॥ ७ ॥

यजत्रायष्टव्यौ हेइन्द्राग्नी स्वेदुरोणेस्वकीयेगृहेनिवासस्थानेयवयदिमदथःहृष्यथः यद्यदिब्रह्मणिब्राह्मणेअन्यस्मिन् यजमाने हविःस्वीकरणायआगत्यहृष्यथः यदिवाराजनिक्षत्रिये युद्धेसाहाय्यंकर्तुंआगत्यहृष्यथः अतःपरि परितोस्मात्सर्वस्मात् स्थानात् हेवृषणौ कामानांव-

षिताराविन्द्राग्नीआयातंहि आगच्छतमेव औदासीन्यंमाकार्ष्ट अन्यत्पूर्ववत् ॥ मदथः मदीहर्षे व्यत्ययेनशप् । यजत्रा अमिनक्षीत्यादिनायजतेःकर्मण्यत्रन् सुपांसुलुगितिविभक्तेराकारः ॥७॥

७. यज्ञ-पात्र इन्द्र और अग्नि, यदि अपने घर में प्रसन्न होकर रहते हो, यदि पूजक वा राजा के प्रति तुष्ट होकर रहते हो, तो हे अभीष्ट-दातृ-द्वय, इन सारे स्थानों से आकर अभिषुत सोम पान करो।

यदिन्द्राग्नीयदुंषुतुर्वशेषुयद्द्रुह्युष्वनुंषुपूरुषुस्थः ।
अतःपरिंवृषणावाहियातमथासोमस्यपिबतंसुतस्यं ॥ ८ ॥

यत् । इन्द्राग्नी इतिं । यदुंषु । तुर्वशेषु । यत् । द्रुह्युषुं ।
अनुंषु । पूरुषुं । स्थः । अतः । परिं । वृषणौ । आ । हि ।
यातम् । अर्थ । सोमस्य । पिबतम् । सुतस्यं ॥ ८ ॥

अत्रयदुष्वित्यादीनिपञ्चमनुष्यनामानि हेइन्द्राग्नी यद्यदियदुषुनियतेषुपरेषामहिंसकेषु मनुष्येषुस्थोभवथोवर्तेथे यदिवा तुर्वशेषुहिंसकेषुमनुष्येषुवर्तेथे यद्यदिवाद्रुह्युषुद्रोहंपरेषामुपद्रव-मिच्छत्सुमनुष्येषुवर्तेथे यदिवाअनुषुप्राणत्सुसफलैःप्राणैर्युक्तेषुज्ञातृष्वनुष्ठातृषुमनुष्येषु अन्येषांहिप्राणानिष्फलाः ज्ञानहीनत्वात् अनुष्ठानाभावाच्च तेषुयदिभवथः तथापूरुषुकामैःपूरयितव्ये-ष्वन्येषुस्तोतृजनेषुयदिभवथः अतःसर्वस्मात्स्थानात्हेकामांभिवर्षकाविन्द्राग्नी आगच्छतम् अनन्तरमभिषुतंसोमंपिबतम् ॥ यदुषु यमउपरमे नियम्यन्तेइन्द्रियाण्येभिरितियदवः यमेर्दुक्-चेतिकुप्रत्ययोदुगागमश्च अनुदात्तोपदेशेत्यादिनानुनासिकलोपः । तुर्वशेषु तुर्वीहिंसार्थः औ-णादिकःअशप्रत्ययः । द्रुह्युषु द्रुहजिघांसायां संपदादिलक्षणोभावेक्विप् द्रुहंपरेषामिच्छन्ति छ-न्दसिपरेच्छायामपीतिक्यच् क्याच्छन्दसीत्युप्रत्ययः।अनुषु अनप्राणने अनश्चेतिविधीयमानउप्र-त्ययोबहुलवचनादस्मादपिभवति निदित्यनुवृत्तेराद्युदात्तत्वम् । पूरुषु पूरीआप्यायने पुर्यन्तइ-तिपूरवः औणादिकउप्रत्ययः ॥ ८ ॥

८. इन्द्र और अग्नि, यदि तुम लोग तुर्वश, द्रुह्य, अनु और पुरु-गण के बीच रहते हो, तो हे अभीष्ट-दातृ-द्वय, उन सब स्थानों से आकर अभिषुत सोम पान करो।

नवमीमृचमाह—

यदिन्द्राग्नीअवमस्यांपृथिव्यांमध्यमस्यांपरमस्यांमुतस्थः ।
अतःपरिंवृषणावाहियातमथासोमस्यपिबतंसुतस्यं ॥ ९ ॥

यत्। इन्द्राग्नी इति। अवमस्याम्। पृथिव्याम्। मध्यमस्याम्।
परमस्याम्। उत। स्थः। अतः। परि। वृषणौ। आ। हि। यातम्।
अथ। सोमस्य। पिबतम्। सुतस्य॥ ९॥

हेइन्द्राग्नी अवमस्यांपृथिव्यां सन्निकृष्टायामस्यां भूम्यां यद्यदिस्थोवर्तमानौभवथः यदिवामध्यमस्यांपृथिव्यां अन्तरिक्षलोके अत्रपृथिवीशब्दस्त्रिष्वपिलोकेषुवर्तते यथा योद्वितीयस्यांतृतीयस्यांपृथिव्यामस्यायुषानाम्नेति[१] उतअपिच परमस्यांउत्कृष्टायांदूरेवर्तमानायांपृथिव्यांद्युलोकेयदिवावर्तेथे अतःसर्वस्मात्स्थानात् हेवृषणावागच्छतं आगमनानन्तरंसुतंसोमंपिबतम्। अवमस्यां अवमशब्दादुत्तरस्यङेर्व्यत्ययेनस्याडागमः एवमुत्तरत्रापि॥ ९॥

९. इन्द्राग्नी, यदि तुम लोग निम्न पृथिवी, अन्तरिक्ष अथवा आकाश में रहते हो, तो हे अभीष्ट-दातृ-द्वय, उन सारे स्थानों से आकर अभिषत सोम पान करो।

यदिन्द्राग्नीपरमस्यांपृथिव्यांमध्यमस्यामवमस्यामुतस्थः।
अतःपरिवृषणावाहियातमथासोमस्यपिबतंसुतस्य॥ १०॥

यत्। इन्द्राग्नी इति। परमस्याम्। पृथिव्याम्। मध्यमस्याम्।
अवमस्याम्। उत। स्थः। अतः। परि। वृषणौ। आ। हि।
यातम्। अथ। सोमस्य। पिबतम्। सुतस्य॥ १०॥

पूर्ववद्व्याख्येयं एतावांस्तुविशेषः पूर्वंभूम्यादिषुत्रिषुलोकेषुयाविन्द्राग्नीतावागच्छतमित्युक्तम् इदानींतुद्युप्रभृतिषुअवरोहक्रमेणवर्तमानेषुत्रिषुलोकेषुयाविन्द्राग्नीवर्तेते तावागच्छतमितिप्रार्थ्यते॥१०॥

१०. इन्द्राग्नी, तुम लोग यदि उच्च पृथिवी (आकाश), मध्य पृथिवी (अन्तरिक्ष) अथवा निम्न पृथिवी पर अवस्थान करते हो, तो हे अभीष्ट-दातृ-द्वय, उन सब स्थानों से आकर अभिषुत सोम पान करो।

यदिन्द्राग्नीदिविष्ठोयत्पृथिव्यांयत्पर्वतेष्वोषधीष्वप्सु।
अतःपरिवृषणावाहियातमथासोमस्यपिबतंसुतस्य॥ ११॥

यत्। इन्द्राग्नी इति। दिवि। स्थः। यत्। पृथिव्याम्। यत्।
पर्वतेषु। ओषधीषु। अप्ऽसु। अतः। परि। वृषणौ।
आ। हि। यातम्। अथ। सोमस्य। पिबतम्। सुतस्य॥ ११॥

---

१ तै० सं० १. २. १२।

हेइन्द्राग्नी दिविद्युलोकेयद्यदिस्थोभवथःयदिवापृथिव्यांभूलोके यदिवापर्वतेषुमेर्वादिषुमेघेषुवा तथा ओषधीषु तिलमाषव्रीह्यादिषु अप्सुउदकेषुचअनुग्राहकतयायदिवास्थः हेकामाभिवर्षकौ युवां अतःसर्वस्मात्स्थानादागच्छतम् आगत्यचाभिषुतंसोमंपिबतम् ॥ पृथिव्याम् उदात्तयणइतिविभक्तेरुदात्तत्वम्। ओषधीषु ओषःपाकः आसुधीयतइतिऔषधयः कर्मण्यधिकरणेचेतिकिप्रत्ययः दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वम् तच्चघञन्तमाद्युदात्तम् ओषधेश्चविभक्तावप्रथमायामितिदीर्घः ॥ ११ ॥

११. इन्द्र और अग्नि, यदि तुम आकाश, पृथ्वी, पर्वत, शस्य अथवा जल में अवस्थान करते हो, तो हे अभीष्ट-दातृ-द्वय, उन सब स्थानों से आकर अभिषुत सोम पान करो।

यदिन्द्राग्नीउदितासूर्यस्यमध्येदिवःस्वधयामादयेथे ।
अतःपरिवृषणावाहियातमथासोमस्यपिबतंसुतस्य ॥ १२ ॥

यत्। इन्द्राग्नी इति। उत्ऽइता। सूर्यस्य। मध्ये। दिवः। स्वधया। मादयेथे इति। अतः। परि। वृषणौ। आ। हि। यातम्। अथ। सोमस्य। पिबतम्। सुतस्य ॥ १२ ॥

हेइन्द्राग्नी उदिता उदितस्यउदयंप्राप्तस्यसूर्यस्यादित्यस्यसंबन्धिनोदिवोद्योतमानस्यान्तरिक्षस्यमध्येमध्यभागे स्वधया आत्मीयेनतेजसाहविर्लक्षणेनान्नेनवा यद्यस्मात्कारणात् मादयेथे तृप्तौभवथः तस्मात्कारणादतःसर्वस्मादन्तरिक्षभागात् हेकामाभिवर्षकाविन्द्राग्नी आगच्छतम् आगमनानन्तरमभिषुतंसोमंपिबतम् ॥ उदिता सुपांसुलुगितिषष्ठ्याडादेशः। दिवः ऊडिदमितिविभक्तेरुदात्तत्वम्। मादयेथे मदतृप्तियोगे चुरादिरात्मनेपदी ॥ १२ ॥

१२. इन्द्र और अग्नि, सूर्य के उदित होने पर दीप्तिमान् अन्तरिक्ष में यदि तुम लोग अपने तेज से हृष्ट होते हो, तो हे अभीष्ट-दातृ-द्वय, उन सारे स्थानों से आकर अभिषुत सोम पान करो।

त्रयोदशीमृचमाह—

एवेन्द्राग्नीपपिवांसासुतस्यविश्वास्मभ्यंसंजयतंधनानि ।
तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीउतद्यौः ॥ १३ ॥ २७ ॥

एव। इन्द्राग्नी इति। पपिऽवांसा। सुतस्य। विश्वा। अस्मभ्यम्। सम्। जयतम्। धनानि। तत्। नः। मित्रः। वरुणः। ममहन्ताम्। अदितिः। सिन्धुः। पृथिवी। उत। द्यौः ॥ १३ ॥ २७ ॥

हेइन्द्राग्नी सुतस्याभिषुतंसोमंएवएवंपपिवांसापीतवन्तौयुवांअस्मभ्यं विश्वासर्वाणिधनानि संजयतंमयच्छतम् यदनेनसूक्तेनप्रार्थितं तन्मित्रादयोममहन्तां पूजयन्तु ॥ पपिवांसा पापाने लिटःक्वसुः वस्वेकाजाद्घसामितीडागमः ॥ १३ ॥

१३. इन्द्र और अग्नि, इस तरह अभिषुत सोम पान करके हमें समस्त धन दान करो। मित्र, वरुण, अदिति, सिन्धु, पृथिवी और आकाश हमारे इस प्रार्थित धन की पूजा करें।

इतिप्रथमस्यसप्तमेसप्तविंशोवर्गः ॥ २७ ॥

विहीत्यष्टर्चंचतुर्थसूक्तम् अनुक्रान्तञ्च—विह्यष्टाविति । ऋष्याद्याःपूर्ववत् सूक्तविनियोगोलैङ्गिकः ।

विह्यख्यंमनसावस्यइच्छन्निन्द्राग्नीज्ञासउतवासजातान् ।
नान्यायुवत्प्रमतिरस्तिमह्यंसवांधियंवाजयन्तीमतक्षम् ॥ १ ॥

वि । हि । अख्यम् । मनसा । वस्यः । इच्छन् । इन्द्राग्नी इति ।
ज्ञासः । उत । वा । सऽजातान् । न । अन्या । युवत् । प्रऽमतिः ।
अस्ति । मह्यम् । सः । वाम् । धियम् । वाजऽयन्तीम् । अतक्षम् ॥ १ ॥

हेइन्द्राग्नी वस्यः प्रशस्तंधनंइच्छन्कामयमानोहं ज्ञासोज्ञातीन् उतवाअपिवा सजातान् समानजन्मानोज्ञातिव्यतिरिक्तान्बान्धवांस्तांश्च मनसाबुद्ध्याविह्यख्यं युवामेवज्ञातिरूपेणबन्धुरूपेण चव्यज्ञासिषम् तेहिधनस्यदातारोभवन्ति अपिच युवत्युवाभ्यां अन्याअन्येनकेनचित् मह्यं दत्ताप्रमतिःप्रकृष्टाबुद्धिर्नास्ति मदीयायैषाप्रकृष्टाबुद्धिः सायुवाभ्यामेवदत्ता सतादृश्याबुद्ध्यायुक्तोहं वांयुवयोः संबन्धिनींवाजयन्तींअन्नमस्मभ्यमिच्छन्तींधियं ध्यानेननिष्पन्नांस्तुतिं अतक्षं अकार्षम् ॥ अख्यम् लुङि अस्यतिवक्तिख्यातिभ्योङितिच्लेरङादेशः । वस्यः वसुशब्दादीयसुन् टेरितिटिलोपः छान्दसईकारलोपः । ज्ञासः सुखदुःखादिकंसाम्येनजानन्तीति ज्ञासोज्ञातयः ज्ञाअवबोधने औणादिकःअसुन् व्यत्ययेनविभक्तेरुदात्तत्वम् । युवत् सुपांसुलुगितिविभक्तेर्लुक् ङ्यर्थाभिधायकत्वात् युवावौद्विवचनइतियुष्मदस्मदोर्मपर्यन्तस्ययुवादेशः ॥ १ ॥

१. इन्द्र और अग्नि, मैं धन की इच्छा करके तुम लोगों को ज्ञाति वा बन्धु की तरह जानता हूँ। तुमने ही मुझे प्रकृष्ट बुद्धि दी है; अन्य किसी ने भी नहीं। फलतः मैंने ध्यान-निष्पन्न और अन्नेच्छा-सूचक स्तुति, तुम्हें उद्देश कर, की है।

अश्रवंहिभूरिदावत्तरावांविजामातुरुतवाघास्यालात् ।
अथासोमस्यप्रयतीयुवभ्यामिन्द्राग्नीस्तोमंजनयामिनव्यम् ॥ २ ॥

अश्रवम् । हि । भूरिदावत्ऽतरा । वाम् । विऽजामातुः । उत । वा । घ । स्यालात् । अथ । सोमस्य । प्रऽयंती । युवऽभ्याम् । इन्द्राग्नी इति । स्तोमम् । जनयामि । नव्यम् ॥ २ ॥

हेइन्द्राग्नी वांयुवांभूरिदावत्तरा अतिशयेनबहुधनस्यदातारावित्यश्रवंहि अश्रौषंखलु कस्मा- त्पुरुषाद विजामातुः श्रुताभिरूप्यादिभिर्गुणैर्विहीनोजामातायथाकन्यावतेबहुधनंमयंच्छति कन्यालाभार्थंततोप्यतिशयेनदातारविन्द्राग्नीइत्यर्थः उतवाअपिच स्यालाद् स्यंशूर्पं तस्माल्लाजा- नावपतिविवाहकालइतिस्यालःकन्याभ्राता सयथाभगिनीमीत्यर्थंबहुधनंमयच्छति ततोप्य- तिशयेनदातारविन्द्राग्नी घेतिपदपूरणः तथाचसति अथानन्तरंहेइन्द्राग्नी युवभ्यां युवाभ्यां सोमस्यप्रयती अभिषुतस्यसोमस्यप्रदानेनसहनव्यंनवतरंमत्यग्रंस्तोमंस्तोत्रंजनयामि निष्पाद यामि अत्रनिरुक्तम्—अश्रौषंहिबहुदातृतरौवांविजामातुरसुसमाप्ताज्जामातुर्विज ामातेतिशश्वद्दा- क्षिणाजाःक्रीतापतिमाचक्षतेसुसमाप्तइववरोभिमेतोजामाताजाअपत्यंतन्निर्मातेतवाघास्यालाद- पिचस्यालात्स्यालआसन्नःसंयोगेनेतिनैदानाःस्याल्लाजानावपतीतिवालाजालाजतेःस्यंशूर्पंस्यतेः- शूर्पमशनपवनंश्रृणातेःशन्नातेर्वाथसोमस्यप्रदानेनयुवाभ्यामिन्द्राग्नीस्तोमंजनयामिनव्यं नवतर मिति ॥ अश्रवं श्रुश्रवणे लङिउत्तमपुरुषैकवचनेबहुलंछन्दसीतिविकरणस्यलुक् । भूरिदा- वत्तरा डुदाञ्दानेआवोमनिन्क्वनिविवनिप् अतिशयेनभूरिदावाभूरिदावत्तरः भूरिदाव्नस्तुड्वक्तव्यइ- तितरपस्तुट् पदसंज्ञायांनलोपः सुपांसुलुगितिविभक्तेराकारः । घ ऋचितुनुघेत्यादिनासंहितायां दीर्घत्वम् । अथ निपातस्यचेति । प्रयती यमउपरमे क्विनिअनुदात्तोपदेशेत्यादिनानुनासिकलो- पः तादौचेतिगतेःप्रकृतिस्वरत्वम् । युवभ्याम् सर्वेविधयश्छन्दसिविकल्प्यन्तइतियुष्मदस्मदो- रनादेशेहत्यात्वाभावेशेषेलोपइतिदकारस्यलोपः ॥ २ ॥

२. इन्द्र और अग्नि, तुम लोग अयोग्य जामाता अथवा श्यालक की अपेक्षा भी अधिक, बहुविध, धन दान करते हो—ऐसा सुना है। इसलिए हे इन्द्र और अग्नि, तुम्हारे सोम-प्रदान-काल में पठनीय एक नया स्तोत्र निष्पादन करता हूं।

तृतीयामृचमाह—

माच्छेद्मरश्मींरितिनाधमानाःपितृणांशक्तीरनुयच्छमानाः । इन्द्राग्निभ्यांकंवृषणोमदन्तिताह्यद्रीधिषणायाउपस्थे ॥ ३ ॥

---

१ मि० ६.९.।

मा । छेद्म । रश्मीन् । इति । नाधमानाः । पितॄणाम् । शक्तीः ।
अनुऽयच्छमानाः । इन्द्राग्निऽभ्याम् । कम् । वृषणः । मदन्ति ।
ता । हि । अद्री इति । धिषणायाः । उपऽस्थे ॥ ३ ॥

रश्मीन् रश्मिशब्दोरज्जुवाची यथारश्मयोदीर्घाअविच्छिन्नाभवन्ति एवमविच्छिन्नान्पुत्र-पौत्रादीन्माच्छेद्म माविच्छिन्नान्कुर्मः इतिबुद्ध्या नाधमानाःइन्द्राग्न्योःसकाशात्तथाविधान् पुत्रादीन्याचमानाः तदनन्तरंपितॄणांशक्तीः शक्त्युत्पादकान्वीर्योत्पादकांस्तान्पुत्रादीन्अनुय-च्छमानाः अनुक्रमेणनियतान्कुर्वन्तः वृषणःसेक्तारःपुत्रोत्पादनसमर्थाः सपत्नीकाइत्यर्थः एवं-भूतायजमानाःइन्द्राग्निभ्यांकंसुखंयथाभवतितथामदन्तिस्तुवन्ति हियस्मात् अद्रीशत्रूनाहंण-न्तौहिंसन्तौविदारयन्तौताविन्द्राग्नी धिषणायाःस्तुत्याउपस्थेउपस्थानेसमीपेभवतः तस्मात्तत्सा-न्निध्यायस्तुवन्तीतिभावः यद्वा निपातानामनेकार्थत्वाद्धिशब्दोयदेत्यर्थे यदाताविन्द्राग्नीउद्दि-श्यअद्रीअभिषवसाधनभूताग्रावाणः धिषणायाउपस्थे धिषणाअधिषवणचर्म तस्योपरिष्टात् इन्द्राग्न्यर्थंसोममभिषुण्वन्ति तदातदायजमानाः स्तुवन्तीतियोजनीयम्॥ छेद्म छिदिर्द्वैधीकरणे लङिबहुलंछन्दसीतिविकरणस्यलुक् छन्दस्युभयथेत्यार्धधातुकत्वेनङित्त्वाभावाल्लघूपधगुणः नमाङ्योगइत्यडभावः। रश्मीन् दीर्घादटिसमानपादइतिसंहितायांनकारस्यरुत्वम् अत्रानुनासि-कःपूर्वस्यतुवेतिईकारःसानुनासिकः। नाधमानाः नाधृयाच्ञायाम्। पितॄणाम् नामन्यतरस्यामि-तिनामउदात्तत्वम्। मदन्ति मदिस्तुतौ आगमानुशासनस्यानित्यत्वान्नुमभावः व्यत्ययेनपरस्मै-पदम्॥ ३ ॥

३. हम पुत्र-पौत्रादि-रूप रज्जु कभी न काटें—ऐसी प्रार्थना करके और पितरों की तरह शक्तिशाली पुत्र आदि उत्पादन करके उत्पादन-समर्थ यजमान इन्द्र और अग्नि की सुख-पूर्वक स्तुति करते हैं। शत्रु-हिंसक इन्द्र और अग्नि स्तुति के पास उपस्थित रहते हैं।

युवाभ्यांदेवीधिषणामदायेन्द्राग्नीसोममुशतीसुनोति ।
तावश्विनाभद्रहस्तासुपाणीआधावतंमधुनापृङ्क्तमप्सु ॥ ४ ॥

युवाभ्याम् । देवी । धिषणा । मदाय । इन्द्राग्नी इति । सोमम् ।
उशती । सुनोति । तौ । अश्विना । भद्रहस्ता । सुपाणी इति
सुऽपाणी । आ । धावतम् । मधुना । पृङ्क्तम् । अप्ऽसु ॥ ४ ॥

हेइन्द्राग्नी युवाभ्यांमदाययुवयोःहर्षाय देवीद्योतमानाउशतीयुवांकामयमानाधिषणा मन्त्ररूपावाक्सोमंसुनोतिअभिषुणोति यद्वा धिषणाअधिषवणचर्म द्योतमानं तद्युवयोर्मदंका-

मयमानंसव्सोमंअभिषुणोति ग्रावभिःस्वस्मिन्नभिषवावतस्याभिषवकर्तृत्वम् अश्विनाअश्व-वन्तौभद्रहस्ताशोभनदोर्दण्डौ सुपाणीमणिबन्धादूर्ध्वभागःपाणिःशोभनपाणी एवंभूतौहेइन्द्राग्नी तौयुवांआधावतं शीघ्रमागच्छतम् आगत्यचअप्सुउदकेषुवर्तमानेनमधुना माधुर्योपेतेन सारांशेनपृं-कंअस्मदीयंसोमंसंयोजयतम् यद्वाअप्सुवसतीवरीषुमधुनामाधुर्यंसंयोजयतम् विभक्तिव्यत्ययः॥ युवाभ्याम् षष्ठ्यर्थेचतुर्थी । उशती वशकान्तौ अदादित्वाच्छपोलुक् ग्रहिज्यादिनासंप्रसारणम् उगितश्चेतिङीप् शतुरनुमइतिनद्याउदात्तत्वम् । पृंक्तम् पृचीसंपर्के रौधादिकः लोटिथसस्तम् श्न-सोरल्लोपः अनुस्वारपरसवर्णौ नवाअचःपरस्मिन्नित्यल्लोपस्यस्थानिवत्त्वम् नपदान्तेत्यादिनानि-षेधात् ॥ ४ ॥

४. इन्द्र और अग्नि, तुम्हारे लिए दीप्तिमती प्रार्थना की कामना करके तुम्हारे हर्ष के लिए सोमरस का अभिषव करते हैं। तुम अश्व-सम्पन्न शोभन-बाहु-युक्त और सुपाणि हो। तुम लोग शीघ्र आकर उदकस्थ माधुर्य-द्वारा हमारा सोम-रस संयुक्त करो।

युवामिन्द्राग्नीवसुनोविभागेतवस्तमाशुश्रव वृत्रहत्यै ।
तावासद्यांबर्हिषियज्ञेअस्मिन्प्रचर्षणीमादयेथांसुतस्य ॥५॥२८॥

युवाम् । इन्द्राग्नी इति । वसुनः । विऽभागे । तवःऽतमा । शुश्रव । वृत्रऽहत्ये । तौ । आऽसद्य । बर्हिषि । यज्ञे । अस्मिन् । प्र । चर्षणी इति । मादयेथाम् । सुतस्य ॥ ५ ॥ २८ ॥

हेइन्द्राग्नी वसुनोधनस्यविभागेस्तोतृभ्योदातुंविभजनेतात्पर्येणवर्तमानौयुवां वृत्रहत्येवृत्र-स्यासुरस्यहननेतवस्तमा अतिशयेनबलिनौमवृद्धतमौवांशुश्रव अश्रौषम् हेचर्षणी सर्वस्यद्रष्टा-राविन्द्राग्नी तौयुवामस्मदीयेस्मिन्यज्ञेबर्हिषि वेद्यामास्तीर्णेदर्भे आसद्योपविश्य सुतस्याभिषुत-स्यसोमस्यपानेनप्रमादयेथां प्रकर्षेणतृप्तौभवतम् । विभागे भजसेवायाम् भावेघञ् चजोःकु-घिण्ण्यतोरितिकुत्वम् थाथादिनोत्तरपदान्तोदात्तत्वम् । तवस्तमा तवइतिबलनाम लुप्तमत्वर्थी-यादेतस्मादातिशायनिकस्तमप् यद्वा तवतिर्वृद्ध्यर्थःसौत्रोधातुः तस्मादौणादिकःकर्तरिअसिप्र-त्ययः सुपांसुलुगितिविभक्तेःपूर्वसवर्णदीर्घत्वम् । वृत्रहत्ये हनस्तचेतिहन्तेर्भावेक्यप् तत्सन्नि-योगेनतकारान्तादेशश्च कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ ५ ॥

५. इन्द्र और अग्नि, स्तोताओं के बीच धन-विभाग में रत रहकर वृत्र-हनन में अतीव बल-प्रकाश किया था—यह सुना है। सर्व-दर्शि-द्वय, तुम लोग हमारे इस यज्ञ में कुश पर बैठकर तथा अभिषुत सोम-पान करके हृष्ट बनो।

ऐन्द्राग्नस्यपशोर्हविषःप्रचर्षणिभ्यइत्येषायाज्या प्रदानानामितिखण्डेसूत्रितम्—प्रचर्षणि-भ्यःपृतनाहवेष्वादेवोयातुसवितासुरत्नइति ।

तामेतांसूक्तेषष्ठीमृचमाह–

प्रचर्षणिभ्यःपृतनाहवेषुप्रपृथिव्यारिरिचाथेदिवश्च ।
प्रसिन्धुभ्यःप्रगिरिभ्योमहित्वाप्रेन्द्राग्नीविश्वाभुवनात्यन्या ॥ ६ ॥

प्र । चर्षणिऽभ्यः । पृतनाऽहवेषु । प्र । पृथिव्याः । रिरिचाथे इति । दिवः । च । प्र । सिन्धुऽभ्यः । प्र । गिरिऽभ्यः । महिऽत्वा । प्र । इन्द्राग्नी इति । विश्वा । भुवना । अति । अन्या ॥ ६ ॥

पृतनाहवेषु पृतनासुसङ्ग्रामेषुरक्षणार्थंआह्वानेषुसत्सु हेइन्द्राग्नीआगतवन्तौयुवांचर्षणिभ्यः सर्वेभ्योपिमनुष्येभ्यः महित्वामहत्त्वेनप्ररिरिचाथे अतिरिच्येथे सर्वाधिकौभवथइत्यर्थः अत्रोपसर्ग वशाद्धातुःस्वाभिधेयविपरीतमर्थमाचष्टे यथाप्रस्मरणंप्रस्थानमिति तथापृथिव्याःसर्वस्याभूमे- श्चप्ररिरिचाथे एवंदिवः द्युप्रभृतिभ्योपिसिन्धवःस्यन्दनशीलाःआपः गिरयःपर्वताः अपिच हेइन्द्रा- ग्नी विश्वाभुवना सर्वाणिभूतजातानिअन्याउक्तव्यतिरिक्तानियानिसन्ति तान्यतीत्यप्ररिरिचा- थे अधिकौभवथः ॥ पृतनाहवेषु पृतनासुहवः पृतनाहवः ह्वेञोभावेनुपसर्गस्येत्यप् संप्रसारणं- च व्यत्ययेनथाथादिस्वराभावेकृदुत्तरपदप्रकृतिस्वरत्वम् । रिरिचाथे रिचिर्विरेचने छन्दसि- लुङ्लङ्लिटइतिवर्तमानेलिट् यद्वा लटचेवबहुलंछन्दसीतिविकरणस्यश्लुः । महित्वा महपूजाया- म् औणादिकइन्प्रत्ययः तस्यभावोमहित्वम् सुपांसुलुगितितृतीयायाडादेशः ॥ ६ ॥

६. युद्ध के समय बुलाने पर तुम लोग आकर अपने महत्त्व-द्वारा सारे मनुष्यों में बड़े बनो। पृथिवी, आकाश, नदी और पर्वत आदि की अपेक्षा बड़े बनो । इन्द्र और अग्नि, तुम अन्य सारे भुवनों की अपेक्षा बड़े हो।

पूर्वोक्तेएवपशौआभरतमित्येषापुरोडाशस्यानुवाक्या सूत्रितंच–आभरतंशिक्षतंवज्रबा- हूउभावामिन्द्राग्नीआहुवध्याइतीति ।

तामेतांसप्तमीमृचमाह–

आभरतंशिक्षतंवज्रबाहूअस्माँइन्द्राग्नीअवतंशचीभिः ।
इमेनुतेरश्मयःसूर्यस्ययेभिःसपित्वंपितरोनआसन् ॥ ७ ॥

आ । भरतम् । शिक्षतम् । वज्रबाहू इति वज्रऽबाहू । अस्मान् । इन्द्राग्नी इति । अवतम् । शचीभिः । इमे । नु । ते । रश्मयः । सूर्यस्य । येभिः । सऽपित्वम् । पितरः । नः । आसन् ॥ ७ ॥

हेवज्रबाहू वज्रहस्ताविन्द्राग्नी आभरतं अस्मदर्थं धनमाहरतम् आहृत्यचशिक्षतं अस्मभ्यंदत्तं शिक्षतिर्दानकर्मा अपिचास्माननुष्ठातॄन् शचीभिः कर्मनामैतत् आत्मीयैः कर्मभिरवतं रक्षतं किञ्चसूर्यात्मनइन्द्रस्य येभिरश्मिभिः यैरर्चिभिर्नोस्माकंपितरःपूर्वंपुरुषाः सपित्वंसहप्राप्तव्यंस्थानं आसन् ब्रह्मलोकमगच्छन् अर्चिरादिमार्गेणहिब्रह्मलोकमुपासकागच्छन्ति तथाचश्रूयते—तेर्चिषमभिसंभवन्त्यर्चिषोहरिति । यद्वा येभीरश्मिभिः सपित्वंसमवेतत्वमध्यगच्छन् तेरश्मयः इमेनुइदानीमस्माभिर्दृश्यमानातएवखलु सूर्यस्य सूर्यात्मनइन्द्रस्य येरश्मयस्तएवाग्नेरपि तथाचश्रूयते—अग्निंवावादित्यःसायंप्रविशतितस्मादग्निर्दूरान्नक्तंददृशे-इति । तस्मात्सूर्यरश्मीनां स्तवनेन इन्द्राग्न्योरुभयोरपिस्तुतिःसिद्धा ॥ भरतम् हृग्रहोर्भ इतिभत्वम् । शिक्षतम् शिक्षविद्योपादाने अदुपदेशाल्लसार्वधातुकानुदात्तत्वेशपःपित्त्वादनुदात्तत्वम् धातुस्वरःशिष्यते तिङःपरत्वान्निघाताभावः । सपित्वम् आप्लृव्याप्तौ अस्मात्सशब्दोपपदात् कृत्यार्थे तवैकेनितित्वन्प्रत्ययः पृषोदरादित्वाद्धातोःपिभावः यद्वा षपसमवाये इन्सर्वधातुभ्यइतीन् सपेर्भावःसपित्वम् । आसन् असगतिदीप्त्यादानेषु लङि आडागमउदात्तः यद्वृत्तान्नित्यमितिनिघाताभावः ॥ ७ ॥

७. वज्र-हस्त इन्द्र और अग्नि, धन ले आओ, हमें दो और कार्य-द्वारा हमारी रक्षा करो । सूर्य की जिन रश्मियों के द्वारा हमारे पूर्व पुरुष इकट्ठे हुए थे, वे ये ही हैं।

पुरंदराशिक्षतंवज्रहस्तास्माँइन्द्राग्नीअवतंभरेषु ।
तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीउतद्यौः॥८॥२९॥

पुरम्ऽदरा । शिक्षतम् । वज्रऽहस्ता । अस्मान् । इन्द्राग्नी इति ।
अवतम् । भरेषु । तत् । नः । मित्रः । वरुणः । ममहन्ताम् ।
अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥ ८ ॥ २९ ॥

हेवज्रहस्ता हस्तेनगृहीतवज्रौ पुरन्दरा असुरपुराणांदारयिताराविन्द्राग्नी शिक्षतम् अस्मदपेक्षितंधनं प्रयच्छतं अपिच भरेषुसंग्रामेषु अस्मानवतंरक्षतं यदनेनसूक्तेन प्रार्थितं तदस्मदीयंमित्रादयोममहन्तां पूजयन्तु ॥ पुरन्दरा पूःसर्वयोर्दारिसहोरितिखच् वाचंयमपुरंदरौचेतिनिपातनादम् सुपांसुलुगितिविभक्तेराकारः ॥ ८ ॥

८. वज्रहस्त[1] पुरन्दर इन्द्र और अग्नि, हमें धनवान करो। लड़ाई में हमें बचाओ। मित्र, वरुण, अदिति, सिन्धु, पृथिवी और आकाश हमारी यह प्रार्थना पूजित करें।

॥ इतिप्रथमस्यसप्तमेएकोनत्रिंशोवर्गः ॥२९॥

---

१ छांदोग्योपनिषदि. । २ तै० ब्रा० २. १. २.

ततंमइतिनवर्चंपञ्चमंसूक्तम् कुत्सस्यार्षंऋभुदेवताकम् पञ्चमीनवम्यौत्रिष्टुभौ शिष्टाःसप्त-जगत्यः तथाचानुक्रान्तम्—ततंनवार्भवन्तुपञ्चम्यन्त्येत्रिष्टुभौइति । अभिप्लवषळहस्यचतुर्थेह-नि वैश्वदेवशस्त्रेइदमार्भवनिविद्धानम् सूत्रितंचतृतीयस्येतिखण्डे—ततंमेअपइतिवैश्वदेवमिति ।

तत्रप्रथमामृचमाह—

ततंमेअपस्तदुंतायतेपुनःस्वादिष्ठाधीतिरुचथांयशस्यते ।
अयंसमुद्रइहविश्वदेव्यःस्वाहाकृतस्यसमुतृप्णुतऋभवः ॥ १ ॥

ततम् । मे । अपः । तत् । ऊम् इति । तायते । पुनरिति । स्वादिष्ठा ।
धीतिः । उचथाय । शस्यते । अयम् । समुद्रः । इह । विश्वऽदेव्यः ।
स्वाहाऽकृतस्य । सम् । ऊम् इति । तृप्णुत । ऋभवः ॥ १ ॥

हेऋभवः मेमयाअपः अग्निष्टोमादिरूपंकर्म ततंविस्तारितं बहुशःपूर्वमनुष्ठितम् तदुतदेव पुनस्तायते विस्तार्यते अनुष्ठीयतइत्यर्थः तत्रस्वादिष्ठास्वादुतमा अतिशयेनप्रीतिकरीधीतिः स्तुतिश्च उचथायस्तुत्याय शस्यतेपठ्यते अपिचइहास्मिन्यागेसमुद्रः समुन्दनशीलोयंसोमरसः विश्वदेव्यः सर्वेभ्योदेवेभ्यःपर्याप्तोयथाभवतितथासंपादितः तस्यस्वाहाकृतस्यस्वाहाकारेणाग्नौप्रक्षिप्तस्यसोमस्यपानेनसमुतृप्णुत सम्यगेवतृप्ताभवत ॥ ततम् तनुविस्तारे निष्ठायांयस्यविभाषेतीट्प्रतिषेधः अनुदात्तोपदेशेत्यादिनानुनासिकलोपः । अपः आप्लृव्याप्तौ आपःकर्माख्यायांह्रस्वोनुट्चवाइत्यसुन् धातोर्ह्रस्वश्च । तायते तनोतेर्यकीत्यात्वम् । स्वादिष्ठा स्वादुशब्दादातिशायनिकइष्ठन् टेरितिटिलोपः । उचथाय वचपरिभाषणे औणादिकः अथक्प्रत्ययः वचिस्वपीत्यादिनासंप्रसारणम् । समुद्रः उन्दीक्लेदने स्फायितञ्चीत्यादिनारक् अनिदितामितिनलोपः । विश्वदेव्यः देवार्होभागोदेव्यः छन्दसिचेतियः विश्वेसर्वेदेव्यायस्मिन्सोमे बहुव्रीहौविश्वंसंज्ञायामितिव्यत्ययेनासंज्ञायामपिपूर्वपदान्तोदात्तत्वम् । स्वाहाकृतस्य स्वाहाशब्दस्यऊर्यादित्वेनगतित्वाद्गतिरनन्तरइतिपूर्वपदप्रकृतिस्वरत्वम् । तृप्णुत तृपप्रीणने स्वादिभ्यःश्नुः ऋभवइत्यनेनसंहितायामृत्यकइतिप्रकृतिभावः ॥ १ ॥

१. ऋभुगण, पहले मैंने बार-बार यज्ञानुष्ठान किया है; इस समय फिर करता हूँ एवं उसमें तुम्हारी प्रशंसा के लिए अत्यन्त मधुर स्तोत्र पढ़ा जाता है। यहाँ सारे देवों के लिए यह सोम-रस प्रस्तुत हुआ है। स्वाहा शब्द के उच्चारण के साथ, अग्नि में उस रस के अर्पित होने पर, उसे पान कर तृप्त बनो।

आभोगयंप्रयदिच्छन्तऐतनापाकाःप्राञ्चोममकेचिदापयः ।
सौधन्वनासश्चरितस्यभूमनागच्छतसवितुर्दाशुषोगृहम् ॥ २ ॥

आऽभोगयम् । प्र । यत् । इच्छन्तः । ऐतन । अपाकाः । प्राञ्चः । मम । के । चित् । आपयः । सौधन्वनासः । चरितस्य । भूमना । अगच्छत । सवितुः । दाशुषः । गृहम् ॥ २ ॥

हेऋभवः अपाकाः परिपक्वज्ञानाः प्राञ्चःपूर्वकालीनाममआपयः प्रापयितारोमदीयाज्ञातयःकेचित् एवंभूतायेकेचनयूयंआभोगयंउपभोग्यंसोमं इच्छन्तः यद्यदाप्रैतन तपश्चरितुमरण्यंगतवन्तः ऋभवोहिसुधन्वनआङ्गिरसस्यपुत्राः तदुक्तंयास्केन—ऋभुर्विभ्वावाजइतिसुधन्वनआङ्गिरसस्यत्रयःपुत्राबभूवुरिति । कुत्सोप्याङ्गिरसः अतस्तेनमदीयाज्ञातयइत्युक्तम् हेसौधन्वनासः सुधन्वनःपुत्राः तदानींचरितस्यसमुपार्जितस्यतपसः भूमनाभूम्नाबहुत्वेनदाशुषः हवींषिदत्तवतः सवितुःसोमाभिषवंकुर्वतोयजमानस्यसंबन्धियज्ञगृहमगच्छत तपसालब्धसोमाःसन्तः कृतपानायूयंगतवन्तः यद्वा दाशुषः प्रातःसवनादिष्वग्न्यादिभिरपसारितेभ्यऋभुभ्यः सोमपानंदत्तवतः सवितुर्गृहंनिवासस्थानं तृतीयसवनाख्यंअगच्छतप्राप्ताः एतत्सर्वमार्भवंशंसंतीत्यादौविस्पष्टमाम्नातम् ॥ आभोगयम् आसमन्तात् भोगआभोगः तदर्हआभोगयः छन्दसिचेतियः यस्येति लोपाभावश्छान्दसः व्यत्ययेनप्रत्ययात्पूर्वस्योदात्तत्वम् यद्वा आङ्पूर्वाद्भुजेरौणादिकःकर्मणिअप्रत्ययः कुत्वंच अमिव्यत्ययेनगुणः । ऐतन इण्गतौ लङिमध्यमबहुवचनस्यथस्यतादेशः तप्तनप्तनथनाश्चेतितस्यतनबादेशः आडागमोवृद्धिश्च । आपयः आप्नोतेरौणादिकइप्रत्ययः । भूमना बहुशब्दात्पृथ्वादिलक्षणइमनिच् बहोरितीकारलोपोबहोर्भूभावश्च संज्ञापूर्वकस्यविधेरनित्यत्वादल्लोपाभावः ॥ २ ॥

२. ऋभुगण, तुम मेरे जाति-भ्राता हो। जिस समय तुम लोगों का ज्ञान अपरिपक्व था, उस पूर्वतन समय में तुम लोगों ने उपभोग्य सोमरस की इच्छा की थी। हे सुधन्वा के पुत्र, उस समय अपने कर्म या तपस्या के महत्त्व-द्वारा तुम लोग हविर्दानशील सविता के घर आये थे।

तृतीयामृचमाह—

तत्सविता वोऽमृतत्वमासुवदगोह्यं यच्छ्रवयन्त ऐतन ।
त्यंचिच्चमसमसुरस्य भक्षणमेकं सन्तमकृणुता चतुर्वयम् ॥ ३ ॥

तत् । सविता । वः । अमृतऽत्वम् । आ । असुवत् । अगोह्यम् । यत् । श्रवयन्तः । ऐतन । त्यम् । चित् । चमसम् । असुरस्य । भक्षणम् । एकम् । सन्तम् । अकृणुत । चतुःऽवयम् ॥ ३ ॥

---

१ नि० ११. १६. । २ ऐ० ब्रा० ३. ३०. ।

हेऋभवः तत्इदानींसवितासर्वस्यप्रेरकोदेवोवोयुष्माकंअमृतत्वंदेवत्वंआसुवत् आभिमुख्येनप्रेरितवान् दत्तवानित्यर्थः यद्यदायूयंअगोह्यंगूहितुमशक्यं सर्वैर्दृश्यमानंसवितारंश्रवयन्तः अपेक्षितंसोमपानंविज्ञापयन्तःसन्तः ऐतनआगच्छत तदानीमितिपूर्वेणान्वयः यस्माद्यूयंदेवैराज्ञापिताःसन्तः असुरस्यत्वष्टुः संबन्धिनंतेननिर्मितमित्यर्थःभक्षणंसोमपानसाधनं त्यंतंचमसंएकं चित्असहायमेवसन्तंचतुर्वयंचतुर्व्यूहंअकृणुतकृतवन्तः सृष्ट्यादौत्वष्टाकृतंचमसंहोतृचमसादिमुख्यचमसचतुष्टयरूपेणऋभवःकृतवन्तइत्यर्थः ॥ असुवत् षूप्रेरणे तौदादिकः । श्रवयंतः श्रुश्रवणे छान्दसोवृद्ध्यभावः । ऐतन लङ्मिध्यमबहुवचनस्यतादेशेतप्तनप्तनथनाश्चेतितनबादेशः भक्षणम् करणेल्युट् । अकृणुत कृविहिंसाकरणयोश्च लङ्मिध्यमबहुवचने धिन्विकृण्व्योरचेत्युप्रत्ययः । चतुर्वयम् वयाअवयवाः चत्वारःअवयवायस्यसतथोक्तः ॥ ३ ॥

३. जिस समय तुम लोग प्रकाशमान सविता को अपने सोम-पान की इच्छा बता आये थे तथा त्वष्टा के बनाये उस एक सोम-पात्र के चार टुकड़े किये थे, उस समय सविता ने तुम्हें अमरता प्रदान की थी।

चतुर्थीमृचमाह—

विष्ट्वीशमीतरणित्वेनंवाघतोमर्तासःसन्तोअमृतत्वमानशुः ।
सौधन्वनाऋभवःसूरंचक्षसःसंवत्सरेसमंपृच्यन्तधीतिभिः ॥ ४ ॥

विष्ट्वी । शमी । तरणिऽत्वेन । वाघतः । मर्तासः । सन्तः । अमृतऽत्वम् ।
अनशुः । सौधन्वनाः । ऋभवः । सूरऽचक्षसः । संवत्सरे । सम् ।
अपृच्यन्त । धीतिऽभिः ॥ ४ ॥

वाघतः ऋत्विङ्नामैतत् अत्रचसामर्थ्याद्वहन्तोलक्ष्यन्ते ऋत्विग्भिरुपेताऋभवः शमी कर्मनामैतत् यागदानादीनिकर्माणि अन्यान्यपि एकंचमसंचतुरःकृणोतनेत्यादिर्नादेवैरुक्तानिकर्माणितरणित्वेन तरणिरितिक्षिप्रनाम क्षिप्रत्वेनशैघ्र्येण विष्ट्वीयद्यप्येतत्कर्मनाम तथाप्यत्रक्रियापरं व्याप्यकृत्वेत्यर्थः एवंकर्माणिकृत्वामर्तासोमनुष्याअपिसन्तः अमृतत्वंदेवत्वंआनशुः आनशिरे कृतैःकर्मभिर्लेभिरे देवत्वंप्राप्यचसौधन्वनाः सुधन्वनःपुत्राः सूरचक्षसःसूर्यसमानप्रकाशाः सूर्यसदृशज्ञानावा तेऋभवःसंवत्सरेसंवत्सरावयवभूतेवसन्तादिकाले अनुष्ठेयैर्धीतिभिरग्निष्टोमादिकर्मभिः समपृच्यन्त संयुक्ताअभवन् हविर्भागार्हाबभूवुरित्यर्थः अत्रनिरुक्तम्—कृत्वाकर्माणिक्षिप्रत्वेनवोढारोमेधाविनोवामर्तासःसन्तोअमृतत्वमानशिरेसौधन्वनाऋभवःसूरख्यानावासूरप्रज्ञावासंवत्सरेसमपृच्यन्तधीतिभिःकर्मभिर्ऋभुर्विभ्वावाजइतिसुधन्वनआङ्गिरसस्यत्रयःपुत्राबभूवुरि-

---

१ ऋ० सं० २. ३. ४. ।

ति[1] ॥ विष्ट्वी विषॢ व्याप्तौ स्नात्व्यादयश्चेतिक्त्वाप्रत्ययस्यईकारान्तादेशः। शमी सुपांसुलुगिति शसोलुक्। आनशुः अशू व्याप्तौ व्यत्ययेनपरस्मैपदम् अश्नोतेश्चेत्यभ्यासादुत्तरपदस्यनुडागमः। अपृच्यन्त पृचीसंपर्के कर्मणिलङ् ॥ ४ ॥

४. ऋभुओं ने शीघ्र कर्मानुष्ठान किया था एवं ऋत्विकों के साथ मिले थे; इसलिए मनुष्य होकर भी अमरत्व प्राप्त किया था। उस समय सुधन्वा के पुत्र ऋभु लोग सूर्य की तरह दीप्तिमान् होकर, सांवत्सरिक यज्ञों में, हव्याधिकारी हुए।

क्षेत्रंमिवविमंमुस्तेजनेनँएकंपात्रंमृभवोजेहंमानम्।
उपंस्तुताउपमंनाधंमानाअमंर्त्येषुश्रवंइच्छमांनाः ॥ ५ ॥ ३० ॥

क्षेत्रंम्। इव। वि। ममुः। तेजंनेन। एकंम्। पात्रंम्। ऋभवंः। जेहंमानम्। उपंऽस्तुताः। उपऽमम्। नाधंमानाः। अमंर्त्येषु। श्रवंः। इच्छमांनाः ॥ ५ ॥ ३० ॥

उपस्तुताःसमीपस्थैर्ऋषिभिःस्तुताःऋभवः जेहमानंहोमक्रियांप्रतिप्रयतमानंएकमद्वितीयं पात्रंपानसाधनंत्वष्ट्रानिर्मितंचमसं मानदण्डेनक्षेत्रमिवभूमिमिवतेजनेनतीक्ष्णेनशस्त्रेणचमसचतुष्टयरूपेणकर्तुंविममुः विशेषेणमानंकृतवन्तः किमिच्छन्तम् उपमंसर्वेषामुपमानभूतं प्रशस्तंसोमलक्षणमन्नं नाधमानाः याचमानाः एतदेवविवृणोति अमर्त्येषुमरणरहितेषुदेवेषुमध्ये श्रवोहविर्लक्षणमन्नंइच्छमानाः इच्छन्तोदेवैःसहसोमपानंकामयमानाः तल्लाभायचतुरश्चमसानकार्षुरित्यर्थः ॥ ममुः माङ्माने शब्देच व्यत्ययेनपरस्मैपदम्। तेजनेन अणोप्रगृह्यस्यानुनासिक इत्यनवसानेव्यत्ययेनाकारस्यानुनासिक्यम ईषाअक्षादित्वात्प्रकृतिभावः। जेहमानम् वेहृजेहबाहृप्रयत्ने भौवादिकः अनुदात्तेत्त्वादात्मनेपदम्। उपस्तुताः गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम्. उपमम् माङ्माने आतश्चोपसर्गेइतिकप्रत्ययः। इच्छमानाः व्यत्ययेनात्मनेपदम् ॥ ५ ॥

५. ऋभुगण ने पार्श्व-वर्त्तियों के स्तुति-पात्र होकर उत्कृष्ट सोमरस की आकांक्षा करके, और देवों में हव्य की कामना करके उसी प्रकार तीक्ष्ण अस्त्र-द्वारा एक यज्ञ-पात्र को चार भागों में विभक्त किया था, जिस प्रकार मान-दण्ड लेकर खेत मापा जाता है।

आमंनीषामन्तरिंक्षस्यनृभ्यंःस्रुचेवंघृतंजुंहवामविद्मनां।
तरणित्वायेपितुरंस्यसश्चिरऋभवोवाजंमरुहन्दिवोरजंः ॥ ६ ॥

---

[1] नि० ११. १६.।

आ । मनीषाम् । अन्तरिक्षस्य । नृऽभ्यः । स्रुचाऽइव । घृतम् ।
जुहवाम । विद्मना । तरणिऽत्वा । ये । पितुः । अस्य । सश्चिरे ।
ऋभवः । वाजम् । अरुहन् । दिवः । रजः ॥ ६ ॥

अन्तरिक्षस्यअन्तरिक्षलोकस्यमध्यमस्थानस्यसंबन्धिभ्योनृभ्यः यज्ञस्यनेतृभ्यः ऋभुभ्यः ऋभवोहियज्ञस्यनेतारः तेनहिदेवत्वंप्राप्ताः यद्वा अन्तरिक्षस्यलोकस्यनेतृभ्यः मध्यमेस्थानेह्येतेपठ्यन्ते तादृशेभ्यः स्रुचेव यथास्रुचाजुह्वाघृतंक्षरणशीलाज्योपेतंहविः आजुहवाम मर्यादायामाकारः यथाशास्त्रंप्रयच्छाम एवमेवमनीषांस्तुतिंविद्मनावेदनेनज्ञानेनकुर्मइतिशेषः अपिच येऋभवः पितुः सर्वस्यजगतः पालकस्यास्यसूर्यस्यतरणित्वा तरणित्वानितरणकौशलानिसश्चिरेसूर्यरश्मिभूताःसन्तःप्रापुः तदुक्तम्—आदित्यरश्मयोप्यृभवउच्यन्तेइति। तेऋभवः दिवोरजःरजःशब्दोलोकवाची द्योतमानस्यस्वर्गाख्यस्यलोकस्यसंबन्धिनंवाजंसोमलक्षणमन्नंअरुहन् यागदानादिभिःकर्मभिः अन्यैश्चवेदोक्तैश्चमसचतुष्टयकरणादिकैःप्राप्नुवन् ॥ स्रुचाइव सावेकाचइतिविभक्तेरुदात्तत्वम् । जुहवाम हुदानादनयोः लोटिआडुत्तमस्यपिच्चेतिआडागमः । विद्मना विदज्ञाने औणादिकोमनिः नसंयोगाद्वमन्तादित्यल्लोपाभावः । तरणित्वा तॄप्लवनतरणयोः अर्तिसृभृधृधम्यश्यवितॄभ्योनिरितिकर्तरिनिप्रत्ययः तस्यभावस्तरणित्वम् शेश्छन्दसिबहुलमितिशेर्लोपः। सश्चिरे ग्लुञ्चुषस्जगतावित्यत्रसश्चिमप्येकेपठन्ति व्यत्ययेनात्मनेपदम् द्विर्वचनप्रकरणे छन्दसिवेतिवक्तव्यमितिवचनात् द्विर्वचनाभावः इरेचश्चित्त्वादन्तोदात्तत्वम् यद्वृत्तान्नित्यमितिनिघातप्रतिषेधः। अरुहन् रुहबीजजन्मनिप्रादुर्भावेच लुङि कृमृदृरुहिभ्यश्छन्दसीतिच्लेरङादेशः। दिवः ऊडिदमित्यादिनाविभक्तेरुदात्तत्वम्।रजः रञ्जरागे रजन्त्यस्मिन्नितिरजोलोकः तदुक्तम्—लोकारजांस्युच्यन्तइति । औणादिकोधिकरणेसुन् रजकरजनरजस्सूपसंख्यानमितिनलोपः सुपांसुलुगितिषष्ठ्यालुक् ॥ ६ ॥

हम अन्तरिक्ष के नेता ऋभुओं को पात्र-स्थित घृत अर्पित करते एवं ज्ञान-द्वारा स्तुति करते हैं। ऋभुओं ने एक सूर्य की तरह क्षिप्र-कारिता और दिव्य लोक का यज्ञान्न प्राप्त किया था।

सप्तमीमृचमाह—

ऋभुर्नइन्द्रःशवसानवीयानृभुर्वाजेभिर्वसुभिर्वसुर्ददिः ।
युष्माकंदेवाअवसाहंनिप्रियेऽभितिष्ठेमपृत्सुतीरसुन्वताम् ॥ ७ ॥

१ नि० ११. १६. । २ नि० ४. १९. ।

ऋभुः । नः । इन्द्रः । शवसा । नवीयान् । ऋभुः । वाजेभिः । वसुऽभिः । वसुः । ददिः । युष्माकम् । देवाः । अवसा । अहनि । प्रिये । अभि । तिष्ठेम । पृत्सुतीः । असुन्वताम् ॥ ७ ॥

ऋभुर्विभ्वावाजइतित्रयःसुधन्वनःपुत्राः तत्रशवसाबलेननवीयान्नवतरः प्रशस्ततरःऋभुर्नोस्माकंइन्द्रःपरमेश्वरः अस्माकंरक्षकइत्यर्थः यद्वेन्द्रएवप्रसङ्गादुरुभातीति नैरुक्तव्युत्पत्त्याऋभुरिवस्तूयते अपिच वाजेभिः वाजैःअस्मभ्यंदातव्यैरन्नैःवसुभिःनिवासहेतुभिः धनैश्चऋभुर्वसुरस्माकंनिवासयिता अतएवददिःतेषामन्नानांधनानांचदाताभवतु परोक्षेर्चःप्रत्यक्षकृतः हेदेवाः दानादिगुणयुक्ताःऋभुप्रभृतयः युष्माकंसंबन्धिनाअवसारक्षणेनयुक्तेप्रियेअस्माकमनुकूलेअहनिदिवसेवर्तमानावयं असुन्वतांसुन्वद्यजमानविरोधिनांशत्रूणांपृत्सुतीःसेनाःअभितिष्ठेम॥ नवीयान् नवशब्दादातिशायनिकईयसुन् । वाजेभिः बहुलंछन्दसीतिभिसऐसभावः।वसु वसनिवासे अस्मादन्तर्भावितण्यर्थाद्वशृस्वृस्निहीत्यादिनाउप्रत्ययः निदित्यनुवृत्तेराद्युदात्तत्वम्। ददिः डुदाञ्दाने आदृगमहनइतिकिप्रत्ययः लिड्वद्भावाद्द्विर्भावादि आतोलोपइटिचेत्याकारलोपः॥ ७ ॥

७. नव-बलशाली ऋभु लोग हमारे रक्षक हैं। अन्न और धान्न-गृह के दाता ऋभु लोग हमारे निवास-हेतु हैं; इसलिए ऋभुगण हमें वरदान दें। ऋभु आदि देववृन्द, हम लोग तुम्हारी रक्षा प्राप्त कर, अनुकूल दिन में, अभिषव-विहीन शत्रुओं की सेना को परास्त करें।

निश्चर्मणऋभवोगामपिंशतसंवत्सेनासृजतामातरंपुनः ।
सौधन्वनासःस्वपस्ययानरोजिव्रीयुवानापितराकृणोतन ॥ ८ ॥

निः । चर्मणः । ऋभवः । गाम् । अपिंशत । सम् । वत्सेन । असृजत । मातरम् । पुनरिति । सौधन्वनासः । सुऽअपस्यया । नरः । जिव्री इति । युवाना । पितरा । अकृणोतन ॥ ८ ॥

पुराकस्यचिदृषेर्धेनुर्मृता सऋषिस्तस्याधेनोर्वत्संदृष्ट्वाऋभून्स्तुष्टाव ऋभवस्तत्सदृशीमन्यां धेनुंकृत्वा तदीयेनचर्मणासंवीय तेनवत्सेनसमयोजयन्निति अयमर्थःपूर्वार्धेनप्रतिपाद्यते हेऋभवः यूयं चर्मणःचर्मणात्वचा तृतीयार्थेषष्ठी गांधेनुंनिरपिंशत निःशेषेणाश्लिष्टांसंयुक्तामकुरुत तदनन्तरंमातरंतांगांपुनर्वत्सेनसमसृजत संश्लिष्टामकुरुत समगमयतेतियावत् अपिच हेसौधन्वनासः सुधन्वनःआङ्गिरसस्यपुत्राः नरोयज्ञस्यनेतारऋभवः स्वपस्ययाशोभनकर्मेच्छया यागदानाद्या-

१ नि० ११. १५.।

चरणेनेतियावत् जिव्रीजीर्णौवृद्धौ पितरा मातापितरौ युवानापुनर्यौवनोपेतौ अकृणोतन यूयम-कुरुतम् ॥ अपिंशत पिशअवयवे तौदादिकः शेमुचादीनामितिनुम् । सौधन्वनासः सुधन्वनः पु-त्राः सौधन्वनाः अन्नितिप्रकृतिभावः आज्जसेरसुक् आमन्त्रितस्यचेत्याद्युदात्तत्वम् । स्वपस्य-या शोभनमपःस्वपः तदिच्छास्वपस्या सुपआत्मनःक्यच् अमत्ययादितिभावेअकारप्रत्ययः । जिव्री जॄष्वयोहानौ जॄशॄस्तृजागृभ्यःक्विन् ऋतइद्धातोरितीत्वम् रेफवकारयोःस्थानविपर्य-यः बहुलवचनाद्धलिचेतिदीर्घाभावः नित्त्वादाद्युदात्तत्वम् । युवाना सुपांसुलुगितिविभक्तेराका-रः । पितरा पिताचमाताचपितरौ पितामात्रेतिपिताशिष्यते पूर्ववद्विभक्तेराकारः । अकृणोतन कृविहिंसाकरणयोश्च इदित्त्वान्नुम् धिन्विकृण्व्योरचेत्युप्रत्ययः तत्सन्नियोगेनवकारस्यचाकारः अतोलोपेसतितस्यस्थानिवद्भावाल्लघूपधगुणाभावः लङ्मध्यमबहुवचनस्यतशब्दस्यतप्तनप्तनथना-श्चेतितनबादेशः तस्यपित्त्वेनङित्त्वाभावाद्गुणः ॥ ८ ॥

८. ऋभुगण, तुमने चमड़े से गौ को आच्छादित किया था और उस गौ के साथ बछड़े का फिर योग कर दिया था। सुधन्वा के पुत्र और यज्ञ के नेता शोभन कर्म-द्वारा तुमने वृद्ध माता-पिता को फिर युवा कर दिया था।

नवमीमृचमाह—

वाजेभिर्नोवाजसातावविड्ढ्यृभुमाँइन्द्रचित्रमादर्षिराधः ।
तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीउतद्यौः॥९॥३१॥

वाजेभिः । नः । वाजऽसातौ । अविड्ढि । ऋभुऽमान् । इन्द्र । चित्रम् ।
आ । दर्षि । राधः । तत् । नः । । मित्रः । वरुणः । ममहन्ताम् ।
अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥ ९ ॥ ३१ ॥

हेइन्द्र ऋभुमानृभुर्विभ्वावाजइतित्रयोप्यृभुशब्देनोपचारादत्रोच्यन्ते तैर्युक्तस्त्वंवाजसा-तौ वाजस्यान्नस्यसंभजनेनिमित्तभूतेसति वाजेभिरन्नैरविड्ढिअस्मान्व्याप्नुहि यद्वा वाजसातावि-तिसङ्ग्रामनाम वाजसातौसंग्रामे वाजेभिर्वेजनयुक्तैरश्वैः अविड्ढिअस्मान्रक्ष अपिच चित्रंचाय-नीयंराधोधनंआदर्षि अस्मभ्यंदातुमादियस्व तृतीयसवनेऋभुभिःसहेन्द्रस्यावस्थानात् प्रस-ङ्गादत्रेन्द्रस्तुतिः यदेतदस्माभिःप्रार्थितं अस्मदीयंतन्मित्रादयोममहन्तांपूजयन्तु ॥ वाजसा-तौ वनषणसंभक्तौ भावेक्तिन् जनसनखनांसञ्झलोरित्यात्वम् वाजानां सातिर्यस्मिन् बहुव्री-हौपूर्वपदप्रकृतिस्वरत्वम् । अविड्ढि विष्लृव्याप्तौ लोटोहिः बहुलंछन्दसीतिशपोलुक् हुझल्भ्योहेर्धिः

ष्टुत्वजश्त्वे छन्दस्यपिदृश्यतेइतिदृशिग्रहणात् लेटचडागमः यद्वा अवर्तेर्लेटि सिब्बहुलंलेटीति-बहुलवचनात्विकरणःसिप् तस्यार्धधातुकत्वादिट् आदेशप्रत्यययोरितिषत्वम् धित्वादिपूर्ववत्। ऋभुमान् ह्रस्वनुड्भ्यांमतुबितिमतुपउदात्तत्वम्। दर्षि दृङ्आदरे लोटि व्यत्ययेनपरस्मैपदम् बहुलंछन्दसीतिविकरणस्यलुक् ॥ ९ ॥

९. इन्द्र, ऋभुओं के साथ मिलकर अन्न-दान के समय हमें अन्न-दान करते हो—विचित्र धन-दान करते हो। मित्र, वरुण, अदिति, सिन्धु, पृथिवी और आकाश हमारे उस धन को पूजित करें।

॥ इतिप्रथमस्यसप्तमेएकत्रिंशोवर्गः ॥ ३१ ॥

तक्षन्नितिपञ्चर्चंषष्ठंसूक्तम् कुत्सस्यार्षमार्भवम् पञ्चमीत्रिष्टुप् शिष्टाश्चतस्रोजगत्यः सथाचानुक्रान्तम्—तक्षन्पञ्चान्त्यात्रिष्टुप्। अग्निष्टोमेवैश्वदेवशस्त्रेइदंसूक्तमार्भवंनिविद्धानम् सूत्रितंच—तक्षन्रथमयंवेनश्चोदयत्पृश्निगर्भाइति।

तत्रप्रथमामृचमाह—

तक्षन्रथंसुवृतंविद्मनापसस्तक्षन्हरीइन्द्रवाहावृषण्वसू।
तक्षन्पितृभ्यामृभवोयुवद्वयस्तक्षन्वत्सायमातरंसचाभुवम् ॥ १ ॥

तक्षन्। रथम्। सुऽवृतम्। विद्मनाऽअपसः। तक्षन्। हरी इति। इन्द्रऽवाहा। वृषण्वसू इति वृषण्ऽवसू। तक्षन्। पितृऽभ्याम्। ऋभवः। युवत्। वयः। तक्षन्। वत्साय। मातरम्। सचाऽभुवम् ॥१॥

विद्मनापसः उत्कृष्टेनज्ञानेननिष्पाद्यकर्माणोलाभवत्कर्माणोवाऋभवः रथंअश्विनोरारोहणार्थं सुवृतं शोभनवर्तनं सुचक्रंवातक्षन्अकुर्वन् तथाइन्द्रवाहाइन्द्रस्य वाहनभूतौ हरीहरणशीलौ एतत्संज्ञकावश्वौ तक्षन्कृतवन्तः कीदृशौ वृषण्वसू सेचनसमर्थेनदृढतरेणधनेनबलेनवायुक्तौ अपिचपितृभ्यां स्वकीयाभ्यां मातापितृभ्यांवृद्धाभ्यांयुवद्यौवनोपेतंवयःआयुःऋभवस्तक्षन्कृतवन्तः तथावत्सायमातरंगां सचाभुवंसहभुवंसहवर्तमानातक्षन्नकुर्वन् ॥ तक्षन् तक्षूत्वक्षूतनूकरणे लङि बहुलंछन्दस्यमाङ्योगेपीत्यडभावः। सुवृतं शोभनंवर्ततइतिसुवृत् वृतुवर्तने क्विप्चेति क्विप्। विद्मनापसः विदज्ञाने अन्येभ्योपिदृश्यन्तइतिदृशिग्रहणात् भावेमनिन् संज्ञापूर्वकस्यविधेरनित्यत्वाद्गुणाभावः बहुलवचनाद्विभक्त्यलुक् परादिश्छन्दसीतिस्वरः यद्वा विद्लृलाभे औणादिकोभावेमक् ततः पामादिलक्षणोनमत्ययः विद्मनं लाभवदपःकर्मयेषाम् बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् छान्दसंपूर्वसवर्णदीर्घत्वम्। इन्द्रवाहा इन्द्रं वहतइतीन्द्रवाहौ वहश्चेतिण्विप्रत्ययः

अतउपधायाइतिवृद्धिः सुपांसुलुगितिविभक्तेराकारः । वृषणवसू वृषसेचने कनिन्युवृषितक्षी-त्यादिनाकनिन् नित्वादाद्युदात्तत्वम् वृषणवस्वश्वयोरुपसंख्यानमितिवसुशब्देउत्तरपदेवृषण्-भावः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । युवद् अत्रयुवनशब्दः सामर्थ्यात्प्रवृत्तिनिमित्तंयुवत्वमात्र-माचष्टे तदस्मिन्नस्तीतियुवद् छान्दसोवर्णलोपः ॥ १ ॥

१. उत्तम-ज्ञानशाली और शिल्पी ऋभुओं ने अश्विनीकुमारों के लिए सुनिर्मित रथ प्रस्तुत किया था और इन्द्र के वाहक हरि नाम के बलवान् दोनों घोड़ों को बनाया था। ऋभुओं ने अपने माता-पिता को यौवन और बछड़े को सहचरी गौ का दान किया था।

आनोयज्ञायतक्षतऋभुमद्वयःक्रत्वेदक्षायसुप्रजावतीमिषम् ।
यथाक्षयामसर्ववीरयाविशातन्नःशर्धायधासथास्विन्द्रियम् ॥ २ ॥

आ । नः । यज्ञायं । तक्षत । ऋभुऽमत् । वयः । क्रत्वे । दक्षाय । सुऽप्रजावतीम् । इषम् । यथा । क्षयाम । सर्वऽवीरया । विशा । तत् । नः । शर्धाय । धासथ । सु । इन्द्रियम् ॥ २ ॥

हेऋभवः नोस्माकंयज्ञाययज्ञार्थंऋभुमद्उरुभासमानयुक्तंवयोहविर्लक्षणमन्नंआतक्षत आ-समन्तादुत्पादयत एतदेवविवियते—क्रत्वेक्रतवे अस्मदीयायकर्मणे दक्षायबलायच तादर्थ्येचतुर्थी एतदुभयार्थंसुप्रजावतीं शोभनाभिः पुत्रपौत्रादिलक्षणाभिः प्रजाभिर्युक्तामिषंअन्नंआतक्षतेति-शेषः अपिचसर्ववीरयासर्वैर्वीरैः पुत्रादिभिरुपेतयाविशाप्रजयासह यथायेनप्रकारेणक्षयाम सु-खेननिवसाम तत्तादृशमिन्द्रियं धननामैतत् धनंनोस्मभ्यंशर्धायबलार्थंसुधासथ सुष्ठुधत्त प्रयच्छ-तेत्यर्थः ॥ ऋभुमत् उरुभातीतिनैरुक्तव्युत्पत्त्याऋभुशब्दःप्रकाशमात्रवाची ह्रस्वनुड्भ्यांमतु-बितिमतुपउदात्तत्वम् । क्रत्वे जसादिषुछन्दसिवावचनमितिघेर्ङितीतिगुणाभावेयणादेशः।क्षयाम क्षिनिवासगत्योः व्यत्ययेनशप् । धासथ धात्रोलेट्चडागमः सिब्बहुलंलेटीतिसिप् अन्येषा-मपिदृश्यतइतिसंहितायांदीर्घत्वम् ॥ २ ॥

२. हमारे यज्ञ के लिए उज्ज्वल अन्न प्रस्तुत करो। हमारे यज्ञ और बल के लिए सन्तान-हेतु-भूत अन्न प्रस्तुत करो, जिससे हम सारी वीर सन्ततियों के साथ आनन्द से रहें। हमारे बल के लिए ऐसा ही अन्न दो।

आतक्षतसातिमस्मभ्यमृभवःसातिंरथायसातिमर्वतेनरः ।
सातिंनोजैत्रींसंमहेतविश्वहाजामिमजामिंपृतनासुसक्षणिम् ॥ ३ ॥

आ। तक्षत। सातिम्। अस्मभ्यम्। ऋभवः। सातिम्। रथाय।
सातिम्। अर्वते। नरः। सातिम्। नः। जैत्रीम्। सम्। महेत।
विश्वहा। जामिम्। अजामिम्। पृतनासु। सक्षणिम्॥ ३॥

हेनरोयज्ञस्यनेतारऋभवः अस्मभ्यमनुष्ठातृभ्यः सातिंसंभजनीयंधनंआतक्षत आसम-न्तावकुरुत तथा अस्मदीयायरथायरंहणशीलायपुत्रादयेरथायैवसातिं संभजनीयंधनंआतक्ष-त तथा अर्वतेअश्वायसातिंसंभजनीयमन्नंधनंवाअश्वयोग्यंआतक्षतेत्येव किञ्च विश्वहास-र्वेष्वहस्सुनोस्माकं जैत्रींजयशीलांअपरिमितत्वेनसर्वाधिकांसातिंसंभजनीयंधनंसंमहेत सर्वोज-नः सम्यक्पूजयतु वयंच पृतनासुसंग्रामेषु जामिंसहजातंअजामिंसहाजातंसहानुत्पन्नमशत्रुं-वासक्षणिंअस्मानभिभवन्तंयुष्मत्प्रसादादभिभवेमेतिशेषः॥ सातिं ऊतियूतिजूतिसातीत्या-दिनाक्तिनउदात्तत्वम्। महेत महपूजायाम्। सक्षणिं सहअभिभवे औणादिकःसनिप्रत्ययः रत्वकत्वषत्वानि॥ ३॥

३. नेता ऋभुगण, हमारे लिए अन्न प्रस्तुत करो। हमारे रथ के लिए धन तैयार करो। हमारे घोड़े के लिए अन्न प्रस्तुत करो। संसार हमारे जयशील धन की प्रतिदिन पूजा करे और हम संग्राम में, अपने बीच उत्पन्न या अनुत्पन्न, शत्रुओं को परास्त कर सकें।

ऋभुक्षणमिन्द्रमाहुवऊतयऋभून्वाजान्मरुतःसोमपीतये।
उभामित्रावरुणानूनमश्विनातेनोहिन्वन्तुसातयेधियेजिषे॥ ४॥

ऋभुक्षणम्। इन्द्रम्। आ। हुवे। ऊतये। ऋभून्। वाजान्।
मरुतः। सोमऽपीतये। उभा। मित्रावरुणा। नूनम्। अश्विना।
ते। नः। हिन्वन्तु। सातये। धिये। जिषे॥ ४॥

ऋभुक्षणं महन्नामैतत् महांतमिन्द्रमाहुवे आह्वयामि किमर्थम् ऊतयेरक्षणार्थम् तथाऋभून् वाजान् ऋभुर्विभ्वावाजइतित्रयःसुधन्वनःपुत्राः तत्रप्रथमोत्तमवाचकशब्दाभ्यांमध्यमोपिलक्ष्यते ततः शब्दद्वयेनत्रयोप्युच्यन्ते तदुक्तंयास्केन—प्रथमोत्तमाभ्यांबहुवन्निगमाभवन्तिनमध्यमेनेति। एवंविधानृभून्मरुतश्च सोमपीतयेसोमपानायआह्वयामि तथाउभायुगलरूपेणसंहत्यवर्तमानौद्वौमि-त्रावरुणौअश्विनौचनूनमवश्यंसोमपानायाह्वयामीतिशेषः अपिच आहूतास्तेइन्द्रादयोनोस्मान् हिन्वन्तु प्रेरयन्तु गमयन्त्वित्यर्थः किमर्थंसातयेसंभजनीयायधनाय धियेधनसाध्यायकर्मणेजिषे

१ शत्रुंवेत्यपिपाठः २ नि० ११. १६.।

येतुंशत्रूणांजयार्थंच ॥ ऋभुक्षणम् उरुभासमानेस्थानेक्षियतिनिवसतीत्यृभुक्षाः उरुपूर्वात् भावे-ऽङ्गम्यादयश्चेतिकुप्रत्ययः आतोलोपइटिचेत्याकारलोपः पूर्वपदस्यऋभावश्च ऋभुशब्दोपपदात् क्षिनिवासगत्योरित्यस्मात् पतेस्थचेतिविधीयमानइनिप्रत्ययोबहुलवचनाद्भवति टिलोपः इ-तोत्सर्वनामस्थानेइत्यत्वमिकारस्य वाषपूर्वस्यनिगमेइतिविकल्पनादुपधादीर्घाभावः यद्वा अर्दे-र्भुक्षिनक् किच्चाद्गुणाभावः अतएवनावगृह्यते । सोमपीतये पापाने स्थागापापचोभावइतिभावेक्ति न् घुमास्थेतीत्वम् दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वम् । हिन्वन्तु हिगतौवृद्धौच अस्माद-न्तर्भावितण्यर्थात् लोटिस्वादित्वाच्छ्नुः । जिषे जिजये तुमर्थेसेसेनितिक्सेप्रत्ययः ॥ ४ ॥

४. अपनी रक्षा के लिए महान् इन्द्र को तथा ऋभु, विभु, वाज और मरुतों को, सोम-पानार्थ, हम बुलाते हैं। मित्र, वरुण और अश्विनी-कुमारों को भी बुलाते हैं। वे हमारे धन, यज्ञ, कर्म और विजय को सिद्ध कर दें।

ऋभुर्भरा॑य॒सं शि॑शातु सा॒तिं स॑मर्य॒जिद्वाजो॑ अ॒स्माँ अ॑विष्टु ।
तन्नो॑ मि॒त्रो वरु॑णो मामहन्ता॒मदि॑तिः॒ सिन्धुः॑ पृथि॒वी उ॒त द्यौः ॥५॥३२॥

ऋ॒भुः । भरा॑य । सम् । शि॒शा॒तु॒ । सा॒तिम् । स॒म॒र्य॒ऽजित् । वाजः॑ । अ॒स्मान् । अ॒वि॒ष्टु॒ । तत् । नः॒ । मि॒त्रः । वरु॑णः । म॒म॒ह॒न्ता॒म् । अदि॑तिः । सिन्धुः॑ । पृ॒थि॒वी । उ॒त । द्यौः ॥ ५ ॥ ३२ ॥

ऋभुः प्रथमोस्माकंसातिंसंभजनीयंधनंभरायसङ्ग्रामार्थंसंशिशातु सम्यक् तीक्ष्णीकरोतु सङ्ग्रामोचितंधनमस्मभ्यंप्रयच्छत्वित्यर्थः तथासमर्यजित् मर्यामनुष्यास्तैःसहवर्ततइतिसमर्यः सङ्ग्रामः तत्रशत्रूणांजेता वाजः एतत्संज्ञस्तृतीयश्च अस्मान् स्तोतॄन्अविष्टुअवतु। सङ्ग्रामाद्रक्षत्वित्य-र्थः यदनेनसूक्तेनप्रार्थितं अस्मदीयंतन्मित्रादयोममहन्तांपूजयन्तु ॥ शिशातु शोतनूकरणे ब-हुलंछन्दसीतिविकरणस्यश्लुः आदेचइत्यात्वम् द्विर्भावः ह्रस्वत्वेनबहुलंछन्दसीत्यभ्यासस्येत्व-म्। अविष्टु अवतेर्लोटि सिब्बहुलंलेटीतिबहुलग्रहणात्सिप् इडागमः षत्वष्टुत्वे ॥ ५॥

५. संग्राम के लिए हमें ऋभु धन दें। समर-विजयी वाज हमारी रक्षा करें। मित्र, वरुण, अदिति, सिन्धु, पृथिवी और आकाश हमारी यह प्रार्थना पूजित करें।

॥ इतिप्रथमस्यसप्तमेद्वात्रिंशोवर्गः ॥ ३२ ॥

ईळइतिपञ्चविंशत्यृचंसप्तमंसूक्तमाङ्गिरसस्यकुत्सस्यार्षम् चतुर्विंशीपञ्चविंश्यौत्रिष्टुभौ शिष्टास्त्रयोविंशतिर्जगत्यः आद्यःपादोद्यावापृथिव्यः द्वितीयआग्नेयः शिष्टंसूक्तमाश्विनम् त-थाचानुक्रान्तम्—ईळेपञ्चाधिकाश्विनमाद्यौपादौलिङ्गोक्तदेवतावन्त्येत्रिष्टुभाविति । प्रवर्ग्येभिष्ट-वेप्येतत्सूक्तम् सूत्रितंच—ग्रावाणेवेळेद्यावापृथिवीइतीति। प्रातरनुवाकेचाश्विनेक्रतौजागतेछन्दस्ये-

तत्सूक्तं सूत्रितंच—अगन्ममहातारिष्मेळेद्यावापृथिवीइतिजागतमिति । आश्विनशस्त्रेप्येतत् प्रातर-नुवाकन्यायेनेत्यतिदेशात् । तथाग्नोर्यमिसन्तिचत्वार्यतिरिक्तोक्थानि तत्राच्छावाकातिरिक्तोक्थे-एतत्सूक्तं यस्यपशवइतिखण्डेसूत्रितम्—ईळेद्यावापृथिवीउभाउनूनमिति ।

तत्रप्रथमामृचमाह—

ईळे॒द्यावा॑पृथि॒वी पू॒र्वचि॑त्तयेऽ॒ग्निं घ॒र्मं सु॒रुचं॒ याम॑न्नि॒ष्टये॑ ।
याभि॒र्भरे॑का॒रमंशा॑य॒ जिन्व॑थ॒स्ताभि॑रू॒ षुऊ॒तिभि॑रश्विना॒गतम् ॥ १ ॥

ईळे॑ । द्यावा॑पृथि॒वी इति॑ । पू॒र्वऽचि॑त्तये । अ॒ग्निम् । घ॒र्मम् । सु॒ऽरुच॑म् । याम॑न् । इ॒ष्टये॑ । याभिः॑ । भरे॑ । का॒रम् । अंशा॑य । जिन्व॑थः । ताभिः॑ । ऊ॒म् इति॑ । सु । ऊ॒तिऽभिः॑ । अ॒श्वि॒ना॒ । आ । ग॒त॒म् ॥ १ ॥

हेद्यावापृथिवीद्यावापृथिव्यौ ईळेस्तौमि किमर्थंपूर्वचित्तये पूर्वमेवाश्विनोःप्रज्ञापनाय तदाश्विनोःप्रत्यासन्ने यद्वा द्यावापृथिवीअश्विनौस्तौमि पूर्वचित्तयेअन्यदीयात्स्तोत्रात्पूर्वमेतास्म-दीयस्यस्तोत्रस्यप्रबोधनाय तथाचोक्तम्—तत्कावश्विनौद्यावापृथिव्यावित्येकइति । अपिच यामन्यामनिअश्विनोरागमनेसति इष्टयेतदीययागार्थं आहवनीयरूपेणस्थापितमग्निंस्तौमीतिशेषः कीदृशमग्निं घर्मंप्रवृञ्जनेनदीप्तं सुरुचंअतएवशोभनकान्तियुक्तम् हेअश्विनाअश्विनौभरे सं-ग्रामनामैतत् संग्रामेअंशाययुष्मदीयभागायजयप्राप्त्यर्थंयाभिरूतिभिः पालनैःसहागत्य कारं कारशब्दः शंखवाची तेनह्यभियुक्ताः संगिरन्ते कारंशब्दकारिणंशंखंजिन्वथःमुखेनापूरयथः ता-भिःतादृशैःऊतिभिः पालनैःसह उइतिसमुच्चये अस्मानपिसुष्ठुआगतमागच्छतम् ॥ ईळे ईडस्तुतौ उत्तमैकवचनमिट् अदादित्वाच्छपोलुक् अनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वेधातुस्वरः । द्यावापृ-थिवी द्यौश्चपृथिवीच दिवोद्यावेतिद्यावादेशआद्युदात्तोनिपातितः पृथिवीशब्दोङीषन्तोन्तोदात्तःदे-वताद्वन्द्वेचेत्युभयपदप्रकृतिस्वरत्वम् अपृथिवीतिपर्युदासात् नोत्तरपदेनुदात्तादावितिनिषेधाभावः वाछन्दसीतिपूर्वसवर्णदीर्घत्वम् । पूर्वचित्तये चितीसंज्ञाने अस्मादन्तर्भावितण्यर्थात्भावेक्तिन् म-रुद्वृधादित्वात्पूर्वपदान्तोदात्तत्वम् । सुरुचम् रुचदीप्तावभिप्रीतौच संपदादिलक्षणोभावेक्विप् शो-भनारुक्यस्य नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । यामन् यामापणे आतोमनिन्नितिक्वनिप्ल्यु-टोबहुलमितिबहुलवचनात्भावेमनिन् । कारं क्रियतेनेनेतिकारः करणेघञ् कर्षात्वतइत्यन्तो-

दात्तत्वम् । जिन्वथः जिविप्रीणनार्थः अन्नप्रीणनहेतुभूतमापूरणंलक्ष्यते धनेनापूरितोहिपुरुषः प्रीतोभवति इदित्वान्नुम् भौवादिकः शपःपित्त्वादनुदात्तत्वम् तिङोदुपदेशाल्लसार्वधातुकस्वरेणधातुस्वरःशिष्यते यद्वृत्तान्नित्यमितिनिघातप्रतिषेधः तत्रहिव्यवहितेपिकार्यमिष्यतइत्युक्तम् । ऊषु इकःसुञीतिदीर्घत्वम् सुञइतिषत्वम् ईषाअक्षादित्वात्सुञउकारस्यप्रकृतिभावः । ऊतिभिः अवतेर्भावेक्तिन् ज्वरत्वरेत्यादिनावकारस्योपधायाश्चऊठ् ऊतियूतीत्यादिनानिपातनात्क्तिनउदात्तत्वम् । गतं गमेर्लोटि बहुलंछन्दसीतिविकरणस्यलुक् अनुदात्तोपदेशेत्यादिनानुनासिकलोपः ॥ १ ॥

१. मैं अश्विनीकुमारों को पहले बताने के लिए द्यावा-पृथिवी की स्तुति करता हूँ। अश्वि-द्वय के आने पर उनकी पूजा के लिए प्रदीप्त और शोभन कान्ति से युक्त अग्नि की स्तुति करता हूँ। अश्वि-द्वय, तुम लोग संग्राम में अपना भाग पाने के लिए जिन सब उपायों के साथ शंख बजाते हो, उन सब उपायों के साथ आओ।

युवोर्दानाय॑सुभरा॑असश्चतो॒रथ॒मात॑स्थुर्व॑च॒सं॑नमन्त॑वे ।
याभि॒र्धियोव॑थः॒कर्म॑न्नि॒ष्टये॒ताभि॑रू॒षुऊ॒तिभि॑रश्विनाग॑तम् ॥ २॥

यु॒वोः । दा॒नाय॑ । सु॒ऽभराः॑ । अ॒स॒श्चतः॑ । रथ॑म् । आ । त॒स्थुः॒ ।
व॒च॒सम् । न । मन्त॑वे । याभिः॑ । धियः॑ । अव॑थः । कर्म॑न् । इ॒ष्टये॑ ।
ताभिः॑ । ऊम् इति॑ । सु । ऊ॒तिऽभिः॑ । अ॒श्वि॒ना॒ । आ । ग॒त॒म् ॥ २ ॥

सुभराः शोभनस्तोत्रभरणाः असश्चतः अन्यत्रानासक्ताः स्तोतारःहेअश्विनौ युवोर्युवयोः रथमातस्थुः आतिष्ठन्ति प्राप्नुवन्ति किमर्थं दानाय युष्मत्कर्तृकदानार्थंधनलाभायेत्यर्थः तत्र-दृष्टान्तः—वचसंन यथान्यायोपेतेनवचसावाक्येनयुक्तंविपश्चितं मन्तवेबुभुत्सितार्थप्रतिपत्तये स्तोतारः प्राप्नुवन्तितद्वत् अपिच कर्मन्कर्मणिइष्टयेयागार्थंप्रवृत्तान् धियःध्यातॄन्विशिष्टज्ञानोपेतान् याभिरूतिभिः पालनैः अवथः युवांरक्षथः ताभिरित्यादिपूर्ववत् ॥ वचसं अर्शआदित्वादमत्वर्थीयोच् । मन्तवे मनज्ञाने कमिमनिजनीत्यादिनातुप्रत्ययः। धियः ध्यायन्तीतिधियःस्तोतारः ध्यैचिन्तायाम् क्विप्चेतिक्विप् चशब्देनदृशिग्रहणानुकर्षणात्संप्रसारणम् । कर्मन् सुपांसुलुगितिसप्तम्यालुक् नङिसंबुध्योरितिनलोपप्रतिषेधः ॥ २ ॥

२. जैसे न्याय-वाक्यों से युक्त पण्डित के पास शिक्षा के लिए खड़े होते हैं, हे अश्वि-द्वय, वैसे ही अन्य देवों में अनासक्त स्तोता लोग, शोभन स्तुति के साथ, अनुग्रह-प्राप्ति की आशा में, तुम्हारे रथ के पास खड़े होते हैं। अश्वि-द्वय, तुम लोग जिन उपायों के साथ यज्ञ-सम्पादन के लिए सुमति लोगों की रक्षा करते हो, उन उपायों के साथ, आओ।

युवंतासांदिव्यस्यंप्रशासनेविशांक्षयथोअमृतस्यमज्मनां। याभिं धेनुमस्वं पिन्वथोनरानाभिरूषुऊतिभिरश्विनागतम्॥ ३॥

युवम्। तासाम्। दिव्यस्य। प्रऽशासने। विशाम्। क्षयथः। अमृतस्य। मज्मनां। याभिः। धेनुम्। अस्वम्। पिन्वथः। नरा। ताभिः। ऊम् इति। सु। ऊतिऽभिः। अश्विना। आ। गतम्॥ ३॥

हेनरानेतारावश्विनौ दिव्यस्यदिविभवस्यस्वर्गसमुत्पन्नस्यअमृतस्यसोमस्यपानेनोत्पन्नेन मज्म-नावलेनयुक्तौयुवंयुवां तासांयास्त्रिषुलोकेषुवर्तन्ते तासांसर्वासांविशां प्रजानांप्रशासनेप्रकृष्टानुशास-नेशिक्षणेक्षयथः ऐश्वर्यकर्मायम् ईशाथेसमर्थौभवथः यद्वा मज्मना अन्येषामसाधारणेनबले-नविशांप्रजानांदिविभवस्यअमृतस्यवृष्ट्युदकस्यप्रशासनेप्रदानेनक्षयथः ईश्वरौभवथः अपिच याभिरूतिभीरक्षाभिः अस्वंप्रसवासमर्थां धेनुं गां शंयुनाम्ने ऋषयेपिन्वथःसिञ्चथः पयसां पूरितवन्तावित्यर्थः ताभिरूतिभिरित्यादिपूर्ववत्॥ अस्वम् षूङ्प्राणिगर्भविमोचने सवनंसूः संप-दादिलक्षणोभावेक्विप् नास्तिसूःअस्यामित्यसूः नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् अमि ओःसुपीतियणादेशः उदात्तस्वरितयोर्यणइतिपरस्यानुदात्तस्यस्वरितत्वम्। पिन्वथः पिविसेच-ने भौवादिकः इदित्वान्नुम्॥ ३॥

३. हे नेतृ-द्वय, तुम लोग स्वर्गीय-अमृत-लब्ध बल-द्वारा तीनों भुवनों में रहनेवाले मनुष्यों का शासन करने में समर्थ हो। जिन सब उपायों-द्वारा तुमने प्रसव-रहित शत्रु की गौओं को दुग्धवती किया था, अश्वि-द्वय, उन उपायों के साथ, आओ।

याभिःपरिज्मातनयस्यमज्मनांद्विमातातूर्षुतरणिर्विभूषति। याभिंस्त्रिमन्तुरभवद्विचक्षणस्ताभिरूषुऊतिभिरश्विनागतम्॥४॥

याभिः। परिऽज्मा। तनयस्य। मज्मनां। द्विऽमाता। तूर्षु। तरणिः। विऽभूषति। याभिः। त्रिऽमन्तुः। अभवत्। विऽचक्षणः। ताभिः। ऊम् इति। सु। ऊतिऽभिः। अश्विना। आ। गतम्॥ ४॥

परिज्मा परितोगन्तावायुः तनयस्यआत्मीयस्यपुत्रस्याग्नेः अग्निर्हिव्यानवृत्त्यात्मनावर्त-मानेन वायुनामथ्यमानःसन् जायते तथाचश्रूयते—अथयःप्राणापानयोःसन्धिःसव्यानः। अतोयान्यन्यानिवीर्यवन्तिकर्माणि यथाग्नेर्मन्थनमाजेःसरणं दृढस्यधनुषआयमनमप्राणन्नपा-नंस्तानिकरोतीति। यद्वा स्रष्टधादौवायुसकाशादुत्पन्नत्वादग्नेर्वायुपुत्रत्वम् आम्नायतेच—

वायोरग्निरिति । एवंस्वपुत्रस्याग्नेर्मज्मनाबलेनयुक्तःसन् द्विमाता द्वयोर्लोकयोर्निर्माताग्निः पृथिवीस्थानवायुरन्तरिक्षस्थानउभयोर्मिलितयोरुभयनिर्मातृत्वमुपपन्नम् यद्वा द्विमातेतितनयस्य विशेषणम् सुपांसुलुगितिषष्ठ्याःलुः द्विमातृकस्यद्वाभ्यामरणिभ्यांजातस्यएवंभूतोवायुः हेअश्विनौ याभिःऊतिभिर्हेतुभूतैःपालनैः तूर्षुतरीतृषुधावत्सुमध्येतरणिः अतिशयेनतरीता शीघ्रगामीविभूषतिविभवविव्याप्तोभवति यद्वा विशेषेणसर्वमलंकरोति अपिचत्रिमन्तुः त्रयाणांमन्तात्रिविधेषुपाकयज्ञहविर्यज्ञसोमयज्ञेषुआसादितज्ञानः कक्षीवान्याभिर्युष्मदीयाभिरूतिभिर्विचक्षणः विशिष्टज्ञानयुक्तोभवत् ताभिःसर्वाभिरूतिभिः अस्मानागच्छतम् ॥ परिज्मा परिपूर्वादजगतिक्षेपणयोरित्यस्मात् श्वन्नुक्षन्नित्यादौनिपात्यते । तूर्षु तृप्लवनतरणयोः बहुलंछन्दसीत्युत्वम् हलिचेतिदीर्घः यद्वा त्वरतेः क्विप् ज्वरत्वरेत्यादिनावकारोपधयोरूठ् सावेकाचइतिविभक्तेरुदात्तत्वम् । विभूषति भवतेर्लेटचडागमः सिब्बहुलंलेटीतिसिप् यद्वा भूषअलंकारे भौवादिकः । विचक्षणः अनुदात्तेतश्चहलादेरितियुच् ॥ ४ ॥

४. चारों ओर विचरण करनेवाले वायु अपने पुत्र और द्विमातृक अग्नि के बलद्वारा युक्त होकर और शीघ्रगामियों के बीच अतीव शीघ्रगन्ता होकर जिन सारे उपायों-द्वारा सारे स्थानों में व्याप्त हुए हैं तथा जिन सब उपायों-द्वारा कक्षीवान् ऋषि विशिष्ट-ज्ञान युक्त हुए थे, उन उपायों के साथ, आओ।

याभी॑रे॒भं निवृ॑तं सि॒तम॒द्भ्य उद्वन्द॑न॒मैर॑यतं॒ स्व॑र्दृ॒शे ।
याभि॒ः कण्वं॒ प्र सिषा॑सन्त॒माव॑तं॒ ताभि॑रू॒ षु ऊ॒तिभि॑रश्विना ग॑तम् ॥५॥२३॥

याभि॑ः । रे॒भम् । निऽवृ॑तम् । सि॒तम् । अ॒त्ऽभ्यः । उत् । वन्द॑नम् । ऐर॑यतम् । स्व॑ः । दृ॒शे । याभि॑ः । कण्व॑म् । प्र । सिसा॑सन्तम् । आव॑तम् । ताभि॑ः । ऊ॒म् इति॑ । सु । ऊ॒तिऽभि॑ः । अ॒श्वि॒ना॒ । आ । ग॒त॒म् ॥ ५ ॥ २३ ॥

हेअश्विनौ याभिरूतिभिः रेभंएतत्संज्ञंऋषिं निवृतं असुरैः कूपेमुनिवारितं सितंतदीयैःपाशैर्बद्धम् एवंभूतमृषिंअद्भ्यःसकाशात्उदैरयतं उदगमयतम् तथावन्दनंएतत्संज्ञमृषिंचतथाभूतमुदैरयतम् किमर्थं स्वः स्वरादित्यंदृशेद्रष्टुं अपिच कण्वंअसुरैरन्धकारेप्रक्षिप्तंसिषासन्तंआलोकं संभक्तुमालोकमिच्छन्तंयाभिरूतिभिः प्रावतं प्रकर्षेणरक्षतम् ताभिरित्यादिसमानम् ॥

---

१ तै० आ० अष्टमप्रपाठके. ।

रेभम् रेभृशब्दे रेभतेस्तौतीतिरेभः पचाद्यच् । निवृतं वृञ्वरणे अस्मादन्तर्भावितण्यर्थात्कर्मणिनिष्ठा गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम् । सितम् षिञ्बन्धने । अद्भ्यः ऊडिदमित्यादिनाविभक्तेरुदात्तत्वम् । वन्दनं वदिअभिवादनस्तुत्योः वन्दतेस्तौतीतिवन्दनः नन्द्यादिलक्षणोल्युः लित्स्वरेणप्रत्ययात्पूर्वस्योदात्तत्वम् । स्वरित्येतद्दिवश्चादित्यस्यचसाधारणनामधेयम् तदुक्तंयास्केन—स्वरादित्योभवतिसुअरणःसुईरणइति । स्वरादिनिपातमित्यव्ययत्वात्सुपोलुक् । दृशे दृशेविख्येचेतिदृशिस्तुमर्थेकेप्रत्ययान्तोनिपात्यते । सिषासन्तम् वनषणसंभक्तौ सनि सनीवन्तर्धेत्यादिनाविकल्पनादिडभावः जनसनखनांसञ्झलोरित्यात्वम् द्विर्भावेभ्यासस्यह्रस्वत्वम् सन्यतइतीत्वम् ॥ ५ ॥

५. जिन उपायों से तुम लोगों ने असुरों-द्वारा कूप में फेंके हुए और पाश से बाँधे हुए रेभ नामक ऋषि को जल से बचाया था एवं इसी प्रकार वन्दन नाम के ऋषि को भी जल से बचाया था तथा जिन उपायों-द्वारा असुरों-द्वारा अन्धकार में निःक्षिप्त आलोकेच्छु कण्व ऋषि की रक्षा की थी, अश्वि-द्वय, उन उपायों के साथ, आओ ।

याभिरन्तकंजसमानमारणेभुज्युंयाभिरव्यथिभिर्जिजिन्वथुः ।
याभिःकर्कन्धुंवय्यंचजिन्वथस्ताभिरूषुऊतिभिरश्विनागतम् ॥ ६ ॥

याभिः । अन्तकम् । जसमानम् । आऽअरणे । भुज्युम् । याभिः । अव्यथिऽभिः । जिजिन्वथुः । याभिः । कर्कन्धुम् । वय्यम् । च । जिन्वथः । ताभिः । ऊम् इति । सु । ऊतिऽभिः । अश्विना । आ । गतम् ॥ ६ ॥

आरणमगाधंकूपादि तत्रासुरैःप्रक्षिप्तंजसमानंतैर्हिंस्यमानंअन्तकंशत्रूणामन्तकरंएतत्संज्ञंराजर्षिं हेअश्विनौ याभिरूतिभिःअवथोरक्षथः तथा भुज्युंसर्वस्यपालकमेतत्संज्ञंसमुद्रमध्येनिमग्नं तुग्र्यंतुग्रस्यपुत्रंराजर्षिं याभिरूतिभीरक्षणहेतुभूताभिः अव्यथिभिः व्यथारहिताभिः नौभिः जिजिन्वथुः युवामतर्पयतम् एतच्चमन्त्रान्तरे—तुग्रोहभुज्युमश्विनोदमेघइत्यादिकेविस्पष्टयिष्यते अपिच कर्कन्धुं वय्यं चएतत्संज्ञकौचासुरैः पीड्यमानौयाभिरूतिभिः जिन्वथःप्रीणयथः गतमन्यत् ॥ जसमानम् जसिहिंसायाम् यकिमाक्षेव्यत्ययेनशप् । आरणे आङ्पूर्वादर्तेर्ल्युट् । जिजिन्वथुः जिविप्रीणनार्थः लिटथुसिरूपम् ॥ ६ ॥

६. कूप में फेंककर असुर लोग जिस समय अन्तक नाम के राजर्षि की हिंसा कर रहे थे, उस समय तुम लोगों ने जिन उपायों-द्वारा उनकी रक्षा की थी, जिन सब व्यथा-शून्य नौका-रूप उपायों के द्वारा समुद्र में निमग्न तुग्र-पुत्र भुज्यु की रक्षा की थी और जिन सब उपायों-द्वारा असुरों-द्वारा पीड्यमान कर्कन्धु और वय्य नाम के मनुष्यों की रक्षा की थी, उनके साथ, आओ ।

सप्तमीमृचमाह—

याभिः शुचन्तिं धनसां सुषंसदं तप्तं घर्ममोम्यावन्तमत्रये ।
याभिः पृश्निगुं पुरुकुत्समावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥ ७ ॥

याभिः । शुचन्तिम् । धनऽसाम् । सुऽसंसर्दम् । तप्तम् । घर्मम् ।
ओम्याऽवन्तम् । अत्रये । याभिः । पृश्निऽगुम् । पुरुऽकुत्सम् ।
आवतम् । ताभिः । ऊम् इति । सु । ऊतिऽभिः । अश्विना । आ ।
गतम् ॥ ७ ॥

हेअश्विनौ धनसां धनस्यसंभक्तारम् शुचन्तिंएतन्नामानंसुषंसदं सीदत्यस्मिन्निति संसद्गृहम् शोभनसंसदंयाभिरूतिभिरकुरुतम् तथाअत्रयेयाभिश्चोतिभिस्तप्तंमवृजनेनसंतप्तंघर्मम् महावीरम् ओम्यावन्तम् सुखयुक्तम् सुखेनस्प्रष्टुंशक्यंअकुरुतम् यद्वा शतद्वारेयन्त्रगृहे असुरैःपीड्यमाना-यघर्मंदीप्तंपीडासाधनमग्निंवप्तंतप्तकारिणं ओम्यावन्तंसुखवन्तमकुरुतम् यथास्मैसुखंभवति तथा-हिमेनोदकेनतमग्निमवारयेथाम् यास्कपक्षेतु अत्रयेहविषामत्रेअग्नयेहविरुतत्त्यर्थंसूर्यकिरणसंतप्तंघर्मंनैदाघमहः ओम्यावन्तंतृप्तिहेतुवृष्ट्युदकोपेतंकृतवन्ताविति योज्यम् अपिच याभिरूतिभिः पृश्निगुंपुरुकुत्संचआवतमरक्षतम् ताभिःसर्वाभिरूतिभिः अस्मानागच्छतम्॥ शुचन्तिम् शुचदीप्तौ औणादिकोझिच् । धनसाम् जनसनखनक्रमगमोविट् विड्वनोरनुनासिकस्यादित्यात्वम्॥ सुषंसदम् शोभनंसंसद्यस्य नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । ओम्यावन्तम् अवतेरन्येभ्योपिदृश्यन्तइतिमनिन् ज्वरत्वरेत्यादिनावकारस्योपधायाश्चऊठ् गुणः छन्दसिचेत्यर्हार्थेयप्रत्ययः न-स्तद्धितइतिटिलोपः येचाभावकर्मणोरितिप्रकृतिभावस्तुव्यत्ययेननप्रवर्तते । पृश्निगुम् पृश्नयोनानावर्णागावोयस्यसतथोक्तः गोस्त्रियोरुपसर्जनस्येतिगोशब्दस्यह्रस्वत्वम् ॥ ७ ॥

७. जिन उपायों-द्वारा शुचन्ति नामक व्यक्ति को धनवान् और शोभन-गृह-सम्पन्न किया था, जिन उपायों-द्वारा असुरों-द्वारा शतद्वार नाम के घर में प्रक्षिप्त और अग्नि-द्वारा दह्यमान अत्रि के गात्र-वाही उत्ताप को भी सुखकर किया था और जिन उपायों-द्वारा पृश्निगु और पुरुकुत्स नामक व्यक्तियों की रक्षा की थी, अश्विद्वय, उनके साथ, आओ।

याभिः शचीभिर्वृषणा परावृजं प्रान्धं श्रोणं चक्षस एतवे कृथः ।
याभिर्वर्तिकां ग्रसिताममुञ्चतं ताभिरू षु ऊतिभिरश्विना गतम् ॥८॥

याभिः । शचीभिः । वृषणा । पराऽवृजम् । प्र । अन्धम् । श्रोणम् । चक्षसे । एतवे । कृथः । याभिः । वर्तिकाम् । ग्रसिताम् । अमुञ्चतम् । ताभिः । ऊम् इति । सु । ऊतिऽभिः । अश्विना । आ । गतम् ॥ ८ ॥

हेवृषणाकामानांवर्षितारावश्विनौ याभिःशचीभिःकर्मभिः प्रज्ञाभिर्वा परावृजं एतन्नामकमृषिंपङ्गुंसन्तमपङ्गुमकुरुतम् तथाअन्धंदृष्टिरहितंसन्तमृज्राश्वमृषिंचक्षसेप्रकाशायसम्यक्चक्षुषादर्शनाय याभिरूतिभिःप्रकृथःप्रकर्षेणकुरुथः याभिश्चश्रोणंविगुणजानुकमेवसन्तमृषिंएतवेगन्तुंप्रकृथः प्रकर्षेणकृतवन्तौ अपिच याभिरूतिभिः वर्तिकांचटकसदृशस्यपक्षिणःस्त्रियंग्रसितां वृकेणग्रस्तांअमुंचतं वृकास्यान्निर्मुक्तामकुरुतम् यास्कपक्षेतु वृकेणविवृतज्योतिष्केणसूर्येणयाभिर्ग्रस्तां वर्तिकांप्रत्यहमावर्तमानामुषसंतस्मादमोचयतमितियोज्यम् ताभिःसर्वाभिरूतिभिरस्मानप्यागच्छतम् ॥ वृषणा वृषसेचने कनिन्युवृषीत्यादिनाकनिन् । परावृजम् वृजीवर्जने परावृणक्तितपसापापंविनाशयतीतिपरावृक् क्विप्चेतिक्विप् कृदुत्तरपदप्रकृतिस्वरत्वम् । एतवे तुमर्थेसेसेनितिएतेस्तवेन्प्रत्ययः । कृथः डुकृञ्करणे बहुलंछन्दसीतिविकरणस्यलुक् ॥ ८ ॥

८. अभीष्ट-वर्षिद्वय, जिन सब कर्मों-द्वारा पंगु परावृज ऋषि को गमन-समर्थ किया था, अन्ध ऋजाश्व को दृष्टि समर्थ किया था और भग्नजानु श्रोण को गमन-समर्थ किया था तथा जिन कार्यों-द्वारा वृक से गृहीत वर्त्तिका नाम की स्त्री-पक्षी को मुक्त किया था, अश्विद्वय, उन उपायों से आओ।

नवमीमृचमाह—

याभिःसिन्धुंमधुमन्तमसश्चतंवसिष्ठंयाभिरजरावजिन्वतम् ।
याभिःकुत्संश्रुतर्यंनर्यमावतंताभिरूषुऊतिभिरश्विनागतम् ॥९॥

याभिः । सिन्धुम् । मधुऽमन्तम् । असश्चतम् । वसिष्ठम् । याभिः । अजरौ । अजिन्वतम् । याभिः । कुत्सम् । श्रुतर्यम् । नर्यम् । आवतम् । ताभिः । ऊम् इति । सु । ऊतिऽभिः । अश्विना । आ । गतम् ॥ ९ ॥

१ नि० ५. २०.।

हेअश्विनौ सिन्धुंस्यन्दनशीलांनदीं मधुमन्तंमधुसदृशेनोदकेनपूर्णां याभिरूतिभिः असश्चतं अगमयतं प्रवाहयतमित्यर्थः हेअजरौजरारहितावश्विनौ वसिष्ठमृषिं याभिरूतिभिः अजिन्वतं अप्रीणयतम् याभिश्चकुत्सादींस्त्रीनृषीनावतमरक्षतं ताभिःसर्वाभिरूतिभिः अस्मानपिसुष्ठुआगच्छतम् ॥ मधुमन्तम् मधुशब्दादभून्निमतुप् लिङ्गव्यत्ययः। असश्चतम् सश्चतिर्गतिकर्मा अस्मादन्तर्भावितण्यर्थाल्लुङ् ॥ ९ ॥

९. अजर अश्विनीकुमारद्वय, जिन उपायों-द्वारा मधुमयी नदी को प्रवाहित किया था, जिन उपायों-द्वारा वसिष्ठ को प्रीत और कुत्स, श्रुतर्य तथा नर्य नाम के ऋषियों की रक्षा की थी, अश्विद्वय, उनके साथ आओ।

याभिर्विश्पलां धनसामथर्व्यं सहस्रमीळ्ह आजावजिन्वतम् ।
याभिर्वशमश्व्यं प्रेणिमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥ १० ॥ ३४ ॥

याभिः । विश्पलाम् । धनऽसाम् । अथर्व्यम् । सहस्रऽमीळ्हे । आजौ ।
अजिन्वतम् । याभिः । वशम् । अश्व्यम् । प्रेणिम् । आवतम् । ताभिः ।
ऊम् इति । सु । ऊतिऽभिः अश्विना । आ । गतम् ॥ १० ॥ ३४ ॥

हेअश्विनौ धनसां धनंसंभजमानां अथर्व्यं अगच्छन्तींछिन्नजङ्घात्वेनगन्तुमसमर्थां थर्वतिर्गतिकर्मा विश्पलामेतत्संज्ञामगस्त्यपुरोहितस्यखेलस्यसंबन्धिनींसहस्रमीळ्हे मीळ्हमितिधननाम बहुधनोपेतेआजौसङ्ग्रामे याभिरूतिभिः अजिन्वतं गन्तुं समर्थामकुरुतम् एतद् चरित्रं हिवेरिवाच्छेदिपर्णमित्यत्रविस्पष्टयिष्यते याभिश्चअश्व्यंअश्वाख्यस्यपुत्रं प्रेणिं स्तुतेःप्रेरयितारं वशंएतत्संज्ञमृषिंआवतमरक्षतम् ताभिःसर्वाभिरूतिभिः सहास्मानप्यागच्छतम् ॥ प्रेणिम् प्रेणृगतिप्रेरणश्लेषणेषु औणादिकइप्रत्ययः ॥ १० ॥

१०. जिन उपायों-द्वारा धनवती और जंघा टूटने के कारण चलने में असमर्थ, अगस्त्य-पुरोहित खेल ऋषि की पत्नी, विश्पला को बहुधन-युक्त समर में जाने में समर्थ किया था तथा जिन उपायों-द्वारा अश्व ऋषि के पुत्र और स्तोत्र-तत्पर वश ऋषि की रक्षा की थी, उनके साथ आओ।

याभिः सुदानू औशिजाय वणिजे दीर्घश्रवसे मधु कोशो अक्षरत् ।
कक्षीवन्तं स्तोतारं याभिरावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥ ११ ॥

---

१ ऋ० सं० १.८.१०.।

याभिः। सुदानू इति सुऽदानू। औशिजाय। वणिजे। दीर्घऽश्रवसे। मधु। कोशः। अक्षरत्। कक्षीवन्तम्। स्तोतारम्। याभिः। आवतम्। ताभिः। ऊम् इति। सु। ऊतिऽभिः। अश्विना। आ। गतम् ॥११॥

उशिक्संज्ञादीर्घतमसःपत्नी तस्याः पुत्रोदीर्घश्रवानामकश्चिदृषिः अनावृष्ट्यां जीवनार्थमकरोद्वाणिज्यम् सचवर्षणार्थंअश्विनौतुष्टाव तौचाश्विनौमेघंप्रेरितवन्तौ अयमर्थःपूर्वार्धे प्रतिपाद्यते हेसुदानूशोभनदानावश्विनौ औशिजायउशिक्पुत्रायवणिजे वाणिज्यंकुर्वते दीर्घश्रवसे एतत्संज्ञायऋषयेयाभिर्युष्मदीयाभिरूतिभिः हेतुभूताभिः कोशोमेघोमधुमाधुर्योपेतं वृष्टिजलंअक्षरत् असिञ्चत् युष्मत्प्रसादादपेक्षितावृष्टिर्जातेत्यर्थः अपिचउशिजः पुत्रं स्तोतारं कक्षीवन्तंएतत्संज्ञमृषिंयाभिरूतिभिरावतमरक्षतम् ताभिःसर्वाभिरूतिभिःसहास्मानप्यागच्छतम् ॥ कक्षीवन्तम् कक्ष्यारज्जुरश्वस्य तयायुक्तः कक्षीवान् आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वदितिनिपातनान्मतुपोवत्वम् संप्रसारणम् ॥ ११ ॥

११. दानशील अश्विद्वय, जिन उपायों-द्वारा दीर्घतमा की उशिज् नामक स्त्री के पुत्र वणिक्-वृत्ति दीर्घश्रवा को मेघ से जल दिया था तथा उशिज् के पुत्र स्तोता कक्षीवान् की रक्षा की थी, उनके साथ आओ।

द्वादशीमृचमाह—

याभी रसां क्षोदसोद्नः पिपिन्वथुरनश्वं याभी रथमावतं जिषे।
याभिस्त्रिशोक उस्रिया उदाजत ताभिरू षु ऊतिभिरश्विना गतम् ॥१२॥

याभिः। रसाम्। क्षोदसा। उद्नः। पिपिन्वथुः। अनश्वम्। याभिः। रथम्। आवतम्। जिषे। याभिः। त्रिऽशोकः। उस्रियाः। उत्ऽआजत। ताभिः। ऊम् इति। सु। ऊतिऽभिः। अश्विना। आ। गतम् ॥१२॥

रसानदीभवतिरसतेःशब्दकर्मणइतियास्कः[1]। हेअश्विनौ याभिरूतिभिःहेतुभूताभिःरसां नदीं अनावृष्ट्याजलरहितांक्षोदसाकूलानिसंपिषताउद्नः उदकेनपिपिन्वथुः युवांपूरितवन्तौ तथाअनश्वं अश्वैर्वियुक्तंआत्मीयंरथंजिषेजेतुंयाभिरूतिभिरावतमवगमयतम् अपिच याभिरूतिभिःकण्वपु-

---

1 नि० ११.२५।

त्रिशोकऋषिःउस्रियाःअपहृतागाः उदाजतउदगमयत् असुरसकाशाल्लेभे ताभिः सर्वाभिरूतिभिःसहास्मानप्यागच्छतम् ॥ क्षोदसा क्षुदिर्संपेषणे औणादिकोसुन्। उद्नः तृतीयैकवचनस्यसुपांसुपोभवन्तीतिशसादेशः पद्दन्नित्यादिनाउदकशब्दस्योदन्भावः भसंज्ञायां अल्लोपोनइत्यकारलोपः। पिपिन्वथुः पिविसेचने इदित्त्वान्नुम्। जिषे जिजये तुमर्थेसेसेनितिक्सेप्रत्ययः। उदाजत अजगविक्षेपणयोः ॥ १२ ॥

१२. जिन उपायों-द्वारा नदियों के तटों को जल-पूर्ण किया था, अपने अश्व-रहित रथ को, विजय के लिए, चलाया था तथा तुम्हारे जिन उपायों से कण्वपुत्र त्रिशोक नामक ऋषि ने अपनी अपहृत गौ का उद्धार किया था, अश्विद्वय, उन उपायों के साथ आओ।

याभिःसूर्यंपरियाथःपरावतिमन्धातारंक्षैत्रपत्येष्वावतम् ।
याभिर्विप्रंप्रभरद्वाजमावतंताभिरूषुऊतिभिरश्विनागतम् ॥१३॥

याभिः। सूर्यम्। परिऽयाथः। पराऽवति। मन्धातारम्। क्षैत्रऽपत्येषु। आवतम्। याभिः। विप्रम्। प्र। भरत्ऽवाजम्। आवतम्। ताभिः। ऊम् इति। सु। ऊतिऽभिः। अश्विना। आ। गतम् ॥१३॥

हेअश्विनौ परावतिदूरदेशेस्थितंसूर्यंतमोरूपेणस्वर्भानुनावृतमादित्यं तस्मात्तमसोमोचयितुं याभिरूतिभिः परियाथःयुवांपरितोगच्छथः तथामन्धातारमृषिं क्षैत्रपत्येषुक्षेत्राणांपतिः अधिपतिः क्षेत्रपतिःतत्संबन्धिषुकर्मसुआवतमरक्षतम् अपिचयाभिरूतिभिर्विप्रंमेधाविनंभरद्वाजमृषिंअन्नप्रदानेनप्रावतंप्रकर्षेणरक्षतम् ताभिःसर्वाभिरूतिभिःसहरक्षणार्थमस्मानप्यागच्छतम् ॥ क्षैत्रपत्येषु ब्राह्मणादेराकृतिगणत्वात्कर्मण्यर्थेष्यञ् ॥ १३ ॥

१३. जिन उपायों-द्वारा दूरवर्त्ती सूर्य के पास, उन्हें ग्रहण के अन्धकार से मुक्त करने के लिए जाते हो यथा क्षेत्रपति के कार्य में मान्धाता राजर्षि की रक्षा की थी और जिन उपायों-द्वारा अन्नदान कर भरद्वाज ऋषि की रक्षा की थी, उनके साथ आओ।

याभिर्महामतिथिग्वंकशोजुवंदिवोदासंशम्बरहत्यआवतम् ।
याभिःपूर्भिद्येत्रसदस्युमावतंताभिरूषुऊतिभिरश्विनागतम् ॥१४॥

याभिः। महाम्। अतिथिऽग्वम्। कशःऽजुवम्। दिवःऽदासम्। शम्बरऽहत्ये। आवतम्। याभिः। पूःऽभिद्ये। त्रसदस्युम्। आवतम्। ताभिः। ऊम् इति। सु। ऊतिऽभिः। अश्विना। आ। गतम् ॥ १४॥

हेअश्विनौ महांमहान्तंअतिथिग्वंअथिथिभिर्गन्तव्यंकशोजुवंअसुरभीत्याउदकंप्रवेष्टुंगन्तारम् एवंभूतंदिवोदासंएतत्संज्ञकंराजर्षिंशंबरहत्येशंबरआयुधंतद्युक्तःशंबरोसुरः तस्यहननेविषयभूतेसति याभिरूतिभिरावतमरक्षतम् अपिच याभिरूतिभिः पूर्भिद्ये पुराणिनगराणिभिद्यन्तेस्मिन्नितिपूर्भिद्यःसङ्ग्रामः तस्मिन्त्रसदस्युंएतत्संज्ञकमृषिंपुरुकुत्सपुत्रंआवतमरक्षतं ताभिरित्यादिपूर्ववत् ॥ महां महान्तमित्यस्यछान्दसोवर्णलोपः । कशोजुवम् कशइत्युदकनाम कशगतिशासनयोः असुन् कशांस्युदकानिजवतइतिकशोजूः जुइतिसौत्रोधातुर्गत्यर्थः क्विवचीत्यादिनाक्विप्दीर्घौ । दिवोदासम् दिवश्चदासे षष्ठ्याअलुग्वक्तव्यइत्यलुक् दिवोदासादीनांछन्दस्युपसंख्यानमितिपूर्वपदाद्युदात्तत्वम् । शंबरहत्ये हनस्तचेतिहन्तेर्भावेक्यप् तत्सन्नियोगेनतकारान्तादेशश्च कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ १४ ॥

१४. जिन उपायों-द्वारा महान्, अतिथि-वत्सल और असुरों के डर से जल में पैठे हुए दिवोदास को, शम्बर असुर के हनन-काल में, बचाया था तथा जिन उपायों-द्वारा नगर-विनाश-रूप समर में पुरुकुत्स-पुत्र त्रसदस्यु ऋषि की रक्षा की थी, अश्विद्वय, उनके साथ आओ।

पञ्चदशीमृचमाह—

याभि॑र्व॒म्रं वि॑पि॒पान॒मु॑पस्तु॒तं क॒लिं याभि॑र्वि॒त्तजा॑निं दुव॒स्यथः॑ ।
याभि॒र्व्य॑श्वमु॒त पृथि॒माव॑तं॒ ताभि॒रू॒ षु ऊ॒तिभि॑रश्विना ग॑तम् ॥ १५ ॥ ३५ ॥

याभिः॑ । व॒म्रम् । वि॒ऽपि॒पान॑म् । उप॑ऽस्तु॒तम् । क॒लिम् । याभिः॑ । वि॒त्तऽजा॑निम् । दु॒व॒स्यथः॑ । याभिः॑ । विऽअ॑श्वम् । उ॒त । पृथि॑म् । आव॑तम् । ताभिः॑ । ऊ॒म् इति॑ । सु । ऊ॒तिऽभिः॑ । अ॒श्वि॒ना॒ । आ । ग॒त॒म् ॥ १५ ॥ ३५ ॥

हेअश्विनौ वम्रंविखनसःपुत्रंएतत्संज्ञमृषिं विपिपानंविशेषेणपार्थिवंरसंपिबतम् याभिरूतिभिररक्षतम् कीदृशंउपस्तुतंसमीपस्थैः सम्यक्स्तुतमितिस्तूयमानं तथा वित्तजानिंलब्धभार्यं कलिंएतत्संज्ञकमृषिंयाभिरूतिभिः दुवस्यथःरक्षथः उतअपिच व्यश्व्यं विगताश्वंपृथिंएतत्संज्ञवैन्यंराजर्षिंयाभिरूतिभिरावतमरक्षतम् अन्यत्पूर्ववत् ॥ विपिपानम् पापाने ताच्छीलिकश्चानश् बहुलंछन्दसीतिशपःश्लुः बहुलंछन्दसीत्यभ्यासस्येत्वम् । उपस्तुतम् स्तौतेः कर्मणिनिष्ठा प्रवृद्धादित्वादुत्तरपदान्तोदात्तत्वम् । वित्तजानिम् वित्तालब्धाजायायेनसतथोक्तः जायायानिङ् इतिसमासान्तोनिङादेशः लोपोव्योर्वलीतियलोपः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । व्यश्वम् विग-

तोश्वीयस्मात्वस्तथोकः बहुव्रीहिस्वरेणपूर्वपदस्योदात्तत्वेउदात्तस्वरितयोर्यणइतिपरस्यानुदात्तस्यस्वरितत्वम् ॥ १५॥

१५. जिन उपायों-द्वारा पानरत और स्तुति-पात्र विश्वकःपुत्र वश की रक्षा की थी, स्त्री पा जाने पर कलि नाम के ऋषि की रक्षा की थी और जिन उपायों-द्वारा अश्व-शून्य पृथि नाम के वैन राजर्षि की रक्षा की थी, अश्विद्वय, उनके साथ आओ।

याभिर्नरा शयवे याभिरत्रये याभिः पुरा मनवे गातुमीषथुः ।
याभिः शारीराजतं स्यूमरश्मये ताभिरू षु ऊतिभिरश्विना गतम् ॥ १६ ॥

याभिः । नरा । शयवे । याभिः । अत्रये । याभिः । पुरा । मनवे । गातुम् । ईषथुः । याभिः । शारीः । आजतम् । स्यूमऽरश्मये । ताभिः । ऊम् इति । सु । ऊतिऽभिः । अश्विना । आ । गतम् । १६ ।

हेनरानेतारावश्विनौ पुरापूर्वस्मिन्काले शयवे एतत्संज्ञकायऋषये गातुंदुःखान्निर्गमनलक्षणं मार्गयाभिरूतिभिःईषथुः युवांवाञ्छितवन्तौ कृतवन्तावित्यर्थः किंवत्सामर्थ्यात् शयवेचिन्नासत्याशचीभिरित्यस्यामृचिप्रतिपादितम् तथाअत्रयेऋषयेशतद्वारेयन्त्रगृहे असुरैःपीड्यमानायसन्तापकारिणोग्नेः शीवेनोदकेनशीतकरणलक्षणंगातुंदुःखनिर्गमनहेतुभूतंमार्गयाभिरूतिभिः युवामिष्टवन्तौ एतच्च हिमेनाग्निंघ्रंसमवारयेथांमित्यादौप्रसिद्धम्। तथामनवे एतन्नाम्नेराजर्षयेयाभिरूतिभिर्यवादिधान्यवापनादिरूपंगातुंदारिद्र्यनिर्गमनहेतुभूतंमार्गंयुवांकृतवन्तौ. तथाचमन्त्रान्तरम्—यवंवृकेणाश्विनावपन्तेति। अपिचस्यूमरश्मये स्यूतःसंबद्धोरश्मिर्दीप्तिर्यस्यतस्मैतत्संज्ञकायऋषये याभिरूतिभिःशारीः शरोनामवेणुविशेषः तद्विकारभूताइषूः आजतं शत्रून्प्रतिप्रेरयतम् ताभिरूतिभिरित्यादिसमानम्॥ नरा नृनये ऋदोरप् सुपांसुलुगितिविभक्तेराकारः। शयवे शीङ्स्वप्ने भृमृदृशीतृचरीत्यादिनाउप्रत्ययः। ईषथुः इषइच्छायाम् लिट्यथुसि असवर्णेइतिपर्युदासादभ्यासस्येयङादेशाभावेसवर्णदीर्घः। शारीः विकारार्थेशरशब्दात्अनुदात्तादेश्चेत्यञ् टिड्ढाणञितिङीप्। स्यूमरश्मये षिवुतन्तुसन्ताने सिवेरौणादिकोमन्प्रत्ययः छ्वोःशूडित्यूठ् बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् ॥ १६ ॥

१६. नेतृद्वय, जिन उपायों-द्वारा शयु, अग्नि और पहले मनु को गमन-मार्ग दिखाने की इच्छा की थी और स्यूमरश्मि ऋषि के लिए उनके शत्रु के ऊपर तीर चलाया था, अश्विद्वय, उन उपायों के साथ आओ।

---

१ ऋ० सं० १.८.१२। २ ऋ० सं० १.८.९। ३ ऋ० सं० १.८.१७।

सप्तदशीमृचमाह—

याभिः पठर्वा जठरस्य मज्मनाग्निर्नादीदेच्चित इद्धो अज्मन्ना।
याभिः शर्यातमवथो महाधने ताभिरू षु ऊतिभिरश्विना गतम्॥१७॥

याभिः। पठर्वा। जठरस्य। मज्मना। अग्निः। न। अदीदेत्।
चितः। इद्धः। अज्मन्। आ। याभिः। शर्यातम्। अवथः।
महाऽधने। ताभिः। ऊम् इति। सु। ऊतिऽभिः। अश्विना।
आ। गतम्॥ १७॥

हेअश्विनौ जठरस्य जठरंभवतिजग्धमस्मिन्ध्रियतइतियास्कः। जठरोपलक्षितस्यशरीरस्यमज्मनाबलेनयुक्तःसन् पठर्वाएतत्संज्ञोराजर्षिः अज्मना संग्रामनामैतत् अज्मनिसंग्रामेयुष्मदीयाभिरूतिभिरासमन्तात्अदीदेत् अदीप्यत तत्रदृष्टान्तः—चितःकाष्ठैरभिचितइद्धः यज्ञगृहे ऋत्विग्भिःप्रज्वालितः अग्निर्न यथाग्निःप्रकाशतेतद्वदित्यर्थः अपिच शर्यातंमानवंइन्द्रेणसहस्पर्धमानंमहाधने संग्रामनामैतत् महताधनेनोपेतेसंग्रामेयाभिरूतिभिरवथोरक्षथः ताभिरित्यादिगतम्॥ अदीदेत् दीदेतिश्छान्दसोदीप्तिकर्मा। अज्मन् अजगतिक्षेपणयोः अजन्तिक्षिपन्त्यस्मिन्बाणानिति अधिकरणेऔणादिकोमनिन् वलादावार्धधातुकेविकल्पइष्यतइतिवचनाद्वीभावाभावः सुपांसुलुगितिसप्तम्यालुक्। महाधने आन्महतइत्यात्वम्॥१७॥

१७. जिन उपायों-द्वारा पठर्वा नाम के राजर्षि शरीर-बल से संग्राम में काष्ठ-युक्त प्रज्वलित अग्नि की तरह दीप्तिमान् हुए थे और जिन उपायों द्वारा युद्ध-क्षेत्र में शर्यात राजा की रक्षा की थी, अश्विद्वय, उन उपायों के साथ आओ।

अष्टादशीमृचमाह—

याभिरङ्गिरो मनसा निरण्यथोऽग्रं गच्छथो विवरे गोअर्णसः।
याभिर्मनुं शूरमिषा समावतं ताभिरू षु ऊतिभिरश्विना गतम्॥१८॥

याभिः। अङ्गिरः। मनसा। निःऽरण्यथः। अग्रम्। गच्छथः।
विऽवरे। गोऽअर्णसः। याभिः। मनुम्। शूरम्। इषा। सम्ऽआवतम्।
ताभिः। ऊम् इति। सु। ऊतिऽभिः। अश्विना। आ। गतम्॥१८॥

---

१ नि० ४.७.।

अङ्गिरइत्येतदामन्त्रितवाक्यादवहिर्भूतं तेनचात्मानंसंबोध्यस्तुतावृषिंमेरयति हेअङ्गिरःअङ्गिरसांगोत्रज त्वमश्विनौ स्तुहि हेअश्विना मनसामननीयेनस्तोत्रेणप्रीतौसन्तौ युवांयाभिरूतिभिः निरण्यथःस्तोतृन्नितरांरमयथः यद्वा मनसैवकरणभूतेनरमयथः तथागोअर्णसोगोरूपस्य अरणीयस्यधनस्यपणिभिर्गुहायांनिहितस्यविवरेविवरणेगुहाद्वारस्योद्घाटनेनमकाशनेनमकाशने विषयभूतेसति याभिरूतिभिःसहयुवामग्रंसर्वेभ्योदेवेभ्यःपुरस्ताद्गच्छथः अपिचशूरंवीर्यवन्तं मनुंइषापृथिव्यामुप्तेनयवादिधान्यरूपेणान्नेनयाभिरूतिभिः समावतंसम्यगरक्षतम् ताभिः सर्वाभिरूतिभिःसहास्मानप्यागच्छतम् ॥ निरण्यथः निरमयथइत्यस्यवर्णव्यापत्त्याएतद्रूपम् । विवरे ग्रहवृद्दनिश्चिगमश्चेतिभावेअप् थाथादिनोत्तरपदान्तोदात्तत्वम् ॥ १८ ॥

१८. अङ्गिरा, अश्विनीकुमारों की स्तुति करो। अश्विद्वय, जिन उपायों से तुम लोग अन्तःकरण से प्रसन्न हुए थे, जिनसे पणि-द्वारा अपहृत गौ के प्रच्छन्न स्थान में सारे देवों से पहले गये थे और जिनसे अन्न देकर शूर मनु की रक्षा की थी, अश्विद्वय, उन उपायों के साथ आओ।

याभिः पत्नीर्विमदाय न्यूहथुरा घ वा याभिररुणीरशिक्षतम् ।
याभिः सुदास ऊहथुः सुदेव्यं१ ताभिरू षु ऊतिभिरश्विना गतम् ॥ १९ ॥

याभिः । पत्नीः । विऽमदाय । निऽऊहथुः । आ । घ । वा । याभिः । अरुणीः । अशिक्षतम् । याभिः । सुऽदासे । ऊहथुः । सुऽदेव्यम् । ताभिः । ऊम् इति । सु । ऊतिऽभिः अश्विना । आ । गतम् ॥ १९ ॥

हेअश्विनौ विमदायएतन्नाम्नेऋषये याभिर्युष्मदीयाभिरूतिभिःपत्नीःभार्याःपुरुमित्रस्यदुहितरंन्यूहथुः नितरांवावांयुवांप्रापितवन्तौ घेतिपदपूरणः तथायाभिरूतिभिररुणीःअरुणवर्णाआरोचमानाः गाःआभिमुख्येनाशिक्षतंअदत्तम् तथा पिजवनपुत्रायसुदासेकल्याणदानायराज्ञेसुदेव्यंप्रशस्तंधनंयाभिरूतिभिरूहथुःमापितवन्तौ ताभिरित्यादिगतम् ॥ पत्नीः अमोव्यत्ययेनशसादेशः। न्यूहथुः वहमापणे अथुसि यजादित्वात्संप्रसारणम् द्विर्वचनादि। सुदासे शोभनंददातीतिसुदाः असुन्। सुदेव्यम् दिगादित्वाद्यत् तित्स्वरितमितिस्वरितत्वम् ॥ १९ ॥

१९. जिन उपायों से विमद ऋषि को भार्या दी थी, जिनसे अरुणवर्ण गायें प्रदान की थीं और जिनसे पिजवन-पुत्र सुदास राजा को उत्कृष्ट धन दिया था, अश्विद्वय, उनके साथ आओ।

याभिः शन्ताती भवथो ददाशुषे भुज्युं याभिरवथो याभिरध्रिगुम् ॥
ओम्यावतीं सुभरामृतस्तुभं ताभिरू षु ऊतिभिरश्विना गतम् ॥ २० ॥ ३६ ॥

याभिः। शन्ताती इति शम्ऽताती। भवथः। ददाशुषे। भुज्युम्। याभिः। अवथः। याभिः। अध्रिऽगुम्। ओम्याऽवतीम्। सुऽभराम्। ऋतऽस्तुभम्। ताभिः। ऊम् इति। सु। ऊतिऽभिः। अश्विना। आ। गतम्॥ २०॥ ३६॥

हेअश्विनौ ददाशुषेहवींषिदत्तवतेयजमानाययाभिरूतिभिः शंताती सुखस्यकर्तारौभवथः याभिश्चोतिभिः भुज्युंतुग्रस्यपुत्रमवथः याभिश्चाध्रिगुं अध्रिगुर्देवानांशमिता अध्रिगुश्चापश्च उ-भौदेवानांशमितारावितिश्रुतेः। अपिच ऋतस्तुभं ऋतंसत्यंस्तोभत्युच्चारयतीत्यृतस्तुप् एतत्संज्ञ-मृषिंओम्यावतीं ओम्येतिसुखनाम तद्युक्तांसुभरांसुखेनभरणीयामिषं याभिरूतिभिः प्रापयथः ताभिःसर्वाभिरूतिभिःसहास्मानप्यागच्छतम्॥ शंताती शिवशमरिष्टस्यकरेइतिताति्लप्रत्ययः लितीतिप्रत्ययात्पूर्वस्योदात्तत्वम्। ददाशुषे दाश्टदाने लिटःक्वसुः वसोःसंप्रसारणमितिसं-प्रसारणम् शासिवसिघसीनंचेतिषत्वम्॥ २०॥

२०. जिन उपायों से हव्य-दाता को सुख प्रदान करते हो, जिनसे तुग्र-पुत्र भुज्यु और देवों के शमिता अध्रिगु की रक्षा की थी तथा जिनसे ऋतस्तुभ ऋषि को सुखकर और पुष्टिकर अन्न दिया था, उनके साथ आओ।

॥ इतिप्रथमस्यसप्तमेषट्त्रिंशोवर्गः॥ ३६॥

एकविंशीमृचमाह—

याभिःकृशानुमसनेदुवस्यथोजवेयाभिर्यूनोअर्वन्तमावतम्। मधुंप्रियंभरथोयत्सरड्भ्यस्ताभिरूषुऊतिभिरश्विनागतम्॥२१॥

याभिः। कृशानुम्। असने। दुवस्यथः। जवे। याभिः। यूनः। अर्वन्तम्। आवतम्। मधु। प्रियम्। भरथः। यत्। सरट्ऽभ्यः। ताभिः। ऊम् इति। सु। ऊतिऽभिः। अश्विना। आ। गतम्॥२१॥

स्वानादिषुसोमपालेषुमध्येकृशानुरेकःसोमपालः तथाचतैत्तिरीयकम्—हस्तसुहस्तकृशा-नवेतेवःसोमक्रयणाइति[२]। तंकृशानुं असने इषवःअस्यन्तेस्मिन्निति असनःसंग्रामः तस्मिन्संग्रामे हेअश्विनौ याभिरूतिभिर्दुवस्यथोरक्षथः तथायाभिश्चजवेवेगेप्रवृत्तंयूनस्तरुणस्यपुरुकुत्सस्यअ-

१ ऐ० ब्रा० २.७। २ तै० सं० १.२.७।

वंतमश्वंआवतमरक्षतम् अपिचयन्मधुक्षौद्रंप्रियंसर्वेषामनुकूलवेद्यं तत्सरड्भ्यः मधुमक्षिकाभ्यःयाभिश्चोतिभिर्भरथः संपादयथः ताभिःसर्वाभिरूतिभिःसहास्मानप्यागच्छतम्॥ असने अनुक्षेपणे करणाधिकरणयोश्चेत्यधिकरणेल्युट्। सरड्भ्यः सृगतौ सर्तेररटिः॥ २१॥

२१. जिन उपायों-द्वारा सोमपाल कृशानु की, युद्ध में, रक्षा की थी, जिनसे युवा पुरुकुत्स के अश्व को वेग प्रदान किया था और मधुमक्षिकाओं को मधु दिया था, अश्विद्वय, उनके साथ आओ।

याभिर्नरंगोषुयुधंनृषाह्येक्षेत्रस्यसातातनयस्यजिन्वथः।
याभीरथाँअवथोयाभिरर्वतस्ताभिरूषुऊतिभिरश्विनागतम्॥ २२॥

याभिः। नरम्। गोषुऽयुधम्। नृऽसह्ये। क्षेत्रस्य। साता।
तनयस्य। जिन्वथः। याभिः। रथान्। अवथः। याभिः। अर्वतः।
ताभिः। ऊम् इति। सु। ऊतिऽभिः। अश्विना। आ। गतम्॥२२॥

हेअश्विनौ गोषुयुधंगोविषयं युद्धं कुर्वन्तंनरंयज्ञस्यनेतारं यजमानंयाभिरूतिभिः नृषाह्ये शत्रुभिः सोढव्येसंग्रामे जिन्वथः प्रीणयथोरक्षथइत्यर्थः तथा क्षेत्रस्यगृहादिरूपस्य तनयशब्दोधनवाची तनयस्यधनस्यचसाता सातयेसंभजनार्थं याभिरूतिभिर्यजमानंरक्षथः याभिश्चयजमानानांरथान्रक्षथः तदीयानर्वतोश्वांश्च याभिरवथस्ताभिःसर्वाभिरूतिभिःसहास्मानप्यागच्छतम्॥ गोषुयुधम् युधसंप्रहारे गोषुयुध्यतइतिगोषुयुध् तत्पुरुषेकृतिबहुलमित्यलुक्। नृषाह्ये षहमर्षणे शकिसहोश्चेतियत् अन्येषामपिदृश्यतइतिसांहितिकोदीर्घः कृदुत्तरपदप्रकृतिस्वरत्वम्। साता वनषणसंभक्तौ भावेक्तिन् जनसनखनांसञ्झलोरित्यात्वम् ऊतियूतीत्यादिना क्तिनउदात्तत्वंनिपातितम् सुपांसुलुगितिचतुर्थ्याडादेशः। जिन्वथः जिविप्रीणनार्थः भौवादिकः इदित्त्वान्नुम्। रथान् दीर्घादटिसमानपादेइतिनकारस्यरुत्वम् आतोटिनित्यमितिसानुनासिकआकारः॥ २२॥

२२. गौ की प्राप्ति के लिए जिन उपायों-द्वारा युद्ध-काल में मनुष्य की रक्षा करते हो और जिनसे क्षेत्र और धन की प्राप्ति में सहायता करते हो तथा जिन उपायों से मनुष्य या यजमान के रथों और अश्वों की रक्षा करते हो, अश्विद्वय, उन उपायों के साथ आओ।

याभिःकुत्समार्जुनेयंशतक्रतूप्रतुर्वीतिंप्रचदभीतिमावतम्।
याभिर्ध्वसन्तिंपुरुषन्तिमावतंताभिरूषुऊतिभिरश्विनागतम्॥२३॥

याभिः । कुत्सम् । आर्जुनेयम् । शतक्रतू इति शतऽक्रतू । प्र ।
तुर्वीतिम् । प्र । च । दभीतिम् । आवतम् । याभिः । ध्वसन्तिम् ।
पुरुऽसन्तिम् । आवतम् । ताभिः । ऊम् इति । सु । ऊतिऽभिः ।
अश्विना । आ । गतम् ॥ २३ ॥

हेशतक्रतूबहुविधकर्माणौअश्विनौ आर्जुनेयं अर्जुनइतीन्द्रस्यनाम तथाचवाजसनेयकम्—एतद्वाइन्द्रस्यगुह्यंनामयदर्जुनइति । तस्यपुत्रंकुत्संयाभिरूतिभिः प्रावतंमकर्षेणारक्षतम् तथातुर्वीतिंदभीतिंचयाभिरूतिभिः प्रावतम् अपिचयाभिर्ध्वसन्तिंएतत्संज्ञंपुरुषन्तिंएतन्नामानंचऋषिंआवतंअरक्षतम् ताभिःसर्वाभिरूतिभिःसहास्मानपिसुष्ठुआगच्छतम्।।आर्जुनेयम् शुभ्रादिभ्यश्चेतिचशब्दोनुक्तसमुच्चयार्थइत्युक्तत्वाढ्ढक् ।तुर्वीतिं तुर्वीहिंसार्थः शत्रूंस्तुर्वतीतितुर्वीतिः औणादिकईतिप्रत्ययः । दभीतिम् दंभुदंभे औणादिकःकीतिप्रत्ययः।ध्वसंतिम् ध्वंसुगतौच औणादिकोझिच्प्रत्ययः अनिदितामितिनलोपः झोन्तः । पुरुषन्तिम् पुरुसनोतिददातीतिपुरुषन्तिः क्रिच्कौचसंज्ञायामितिक्रिच् नक्तिचिदीर्घश्चेतिअनुनासिकलोपोपधादीर्घयोर्निषेधः ॥ २३ ॥

२३. शतक्रतु अश्विद्वय, जिन उपायों से अर्जुन अर्थात् इन्द्र के पुत्र कुत्स, तुर्वीति और दधीति की रक्षा की थी तथा जिन उपायों-द्वारा ध्वसन्ति और पुरुषन्ति नाम के ऋषियों को बचाया था, उन उपायों के साथ आओ।

चतुर्विंशीमृचमाह—

अप्नस्वतीमश्विनावाचमस्मेकृतंनोदस्रावृषणामनीषाम् ।
अद्यूत्येवसेनिह्वयेवांवृधेचनोभवतंवाजसातौ ॥ २४ ॥

अप्नस्वतीम् । अश्विना । वाचम् । अस्मे इति । कृतम् । नः ।
दस्रा । वृषणा । मनीषाम् । अद्यूत्ये । अवसे । नि । ह्वये ।
वाम् । वृधे । च । नः । भवतम् । वाजऽसातौ ॥ २४ ॥

हेअश्विनौ अस्मेअस्माकंवाचंअप्नस्वतीम् अप्नइतिकर्मनाम विहितैःकर्मभिःसंयुक्तांकृतं कुरुतम् तथानोस्माकंमनीषांबुद्धिं हेवृषणाकामानांवर्षकौ दस्राशत्रूणामुपक्षपयितारावश्विनौ वेदार्थज्ञानसमर्थांकुरुतम् अपिच यस्माद्युवामेवंगुणविशिष्टौ तस्माद्वांयुवांअवसेरक्षणायनिह्वये नितरामाह्वये कदा अद्यूत्ये द्योतनरहिते प्रकाशनरहिते रात्रेःपश्चिमेयामे तस्मिन्काले

हिमातरनुवाकाश्विनशस्त्रयोरिदंसूक्तंपठ्यते आहूतौचयुवांवाजसातौवाजस्यान्नस्यसंभजने यद्वा सङ्ग्रामनामैतत् सङ्ग्रामेनोस्माकंवृधेवर्धनायभवतम्॥ अप्नस्वतीम् आपःकर्माख्यायांह्रस्वोनुट्च वेतिअसुन्नुडागमश्च तदस्यास्तीतिमतुप् मादुपधायाइतिमतुपोवत्वम् तसौमत्वर्थेइतिभत्वे- नपदत्वाभावात् रुत्वाद्यभावः। अस्मे सुपांसुलुगितिषष्ठ्याःशेआदेशः। कृतम् करोतेर्लोटिबहुलं छन्दसीतिविकरणस्यलुक्। अद्यूत्ये द्युतदीप्तौ ऋहलोर्ण्यदितिभावेण्यत् वर्णव्यापत्त्याऊकारः द्यूत्यंप्रकाशनमस्मिन्नास्तीतिबहुव्रीहौव्यत्ययेनान्तस्वरितत्वम्। निह्वये निसमुपविभ्योह्वइत्या- त्मनेपदम्। वृधम् वृधुवृद्धौ संपदादिलक्षणोभावेक्विप् सावेकाचइतिविभक्तेरुदात्तत्वम्॥ २४॥

२४. अश्विद्वय, हमारे वाक्य को विहित-कर्म-युक्त करो; अभीष्ट-वर्षी दस्रद्वय, हमारी बुद्धि को वेद-ज्ञान-समर्थ करो। हम आलोक-विहीन रात्रि के शेष-प्रहर में, रक्षा के लिए, तुम्हें बुलाते हैं। हमारे अन्न-लाभ में वृद्धि कर दो।

द्युभि॑र॒क्तुभि॒ः परि॑ पातम॒स्मानरि॑ष्टेभिरश्विना॒ सौभ॑गेभिः।
तन्नो॑ मि॒त्रो वरु॑णो मामहन्ता॒मदि॑तिः॒ सिन्धु॑ः पृथि॒वी उ॒त द्यौः ॥२५॥३७॥

द्युऽभि॑ः। अ॒क्तुऽभि॑ः। परि॑। पा॒त॒म्। अ॒स्मान्। अरि॑ष्टेभिः।
अ॒श्वि॒ना॒। सौभ॑गेभिः। तत्। नः॒। मि॒त्रः। वरु॑णः। म॒म॒ह॒न्ता॒म्।
अदि॑तिः। सिन्धु॑ः। पृ॒थि॒वी। उ॒त। द्यौः॥ २५॥ ३७॥

हेअश्विनौ द्युभिर्दिवसैः अक्तुभीरात्रिभिश्चअस्मान्स्तोतॄन्परिपातम् परितोरक्षतम् सर्व- दास्मान्रक्षतमित्यर्थः तथाअरिष्टेभिः अहिंसितैःसौभगेभिःसुभगत्वैः सुभगत्वापादकैः धनै- रस्मान्रक्षतम यदस्माभिःप्रार्थितंनोस्मदीयंतन्मित्रादयःषट्देवताममहन्तांपूजयन्तु उतश- ब्दःसमुच्चये ॥ द्युभिः दिवउदित्युत्वम् दिवोझलितिसावेकाचइतिप्राप्तस्यविभक्त्युदात्तत्वस्य प्रतिषेधः। अरिष्टेभिः रिषहिंसायाम् निष्ठेतिक्तः नञ्समासेव्ययपूर्वपदप्रकृतिस्वरत्वम बहुलं- छन्दसीतिभिसऐसभावः। अश्विना सुपांसुलुगितिविभक्तेराकारः आमन्त्रितस्यचेतिसर्वानुदात्त- त्वम । सौभगेभिः शोभनोभगःश्रीर्यस्यासौसुभगः तस्यभावःसौभगम् सुभगान्मन्त्रेइत्युद्गा- त्रादिषुपाठादञ्प्रत्ययः हृद्भगसिन्ध्वन्तेपूर्वपदस्यचेतिउभयपदवृद्धिर्नभवति तस्यसर्वेविधयश्छ- न्दसिविकल्प्यन्तइतिविकल्पितत्वात् पूर्ववदैसभावः ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वम्॥ २५॥

२५. अश्विनीकुमारद्वय, दिन और रात में हमें विनाश-रहित सौभाग्य-द्वारा बचाओ। मित्र, वरुण, अदिति, सिन्धु, पृथिवी और आकाश हमारी इस प्रार्थना को पूजित करें।

॥ इतिप्रथमस्यसप्तमेसप्तत्रिंशोवर्गः॥ ३७॥

वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन्। पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इतिश्रीराजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुकभूपालसाम्राज्यधुरन्धरेणसायणाचार्येणविरचितेमाधवीयेवेदार्थप्रकाशेऋक्संहिताभाष्येप्रथमाष्टकेसप्तमोऽध्यायः ॥ ७ ॥

॥ श्रीगणेशायनमः ॥

यस्यनिःश्वसितंवेदायोवेदेभ्योखिलंजगत् । निर्ममेतमहंवन्देविद्यातीर्थमहेश्वरम् ॥ १ ॥

इत्थंसप्तममध्यायंव्याख्यायअष्टमाध्यायोव्याख्यातुमारभ्यते । प्रथमेमण्डलेषोडशेनुवाकेसप्तसूक्तानिगतानि इदमितिविंशत्यृचमष्टमंसूक्तम् अत्रानुक्रम्यते—इदंविंशतिरुषस्यंद्वितीयोर्धर्चोरात्र्यश्चेति । ऋषिश्चान्यस्मादितिपरिभाषयानुवृत्तेराङ्गिरसःकुत्सऋषिः अनादेशपरिभाषया त्रिष्टुपछंदः उषोदेवता द्वितीयार्धर्चस्यरात्रिरपि प्रातरनुवाकेउषस्येक्रतौत्रैष्टुभेछन्दस्येतत्सूक्तम् सूत्रितंच—इदंश्रेष्ठंपृथूरथइतिसूक्तेइति आश्विनशस्त्रेचेदंसूक्तं प्रातरनुवाकातिदेशात् ।

तत्रप्रथमामृचमाह—

ओम् इ॒दं श्रेष्ठं॒ ज्योति॑षां॒ ज्योति॒राग॑च्चि॒त्रः प्र॑के॒तो अ॑जनिष्ट॒ विभ्वा॑ ।
यथा॒ प्रसू॑ता सवि॒तुः स॒वायँ॑ ए॒वा रात्र्यु॒षसे॒ योनि॑मारैक् ॥ १ ॥

इ॒दम् । श्रेष्ठ॑म् । ज्योति॑षाम् । ज्योतिः॑ । आ । अ॒गा॒त् । चि॒त्रः ।
प्र॒ऽके॒तः । अ॒ज॒नि॒ष्ट॒ । विऽभ्वा॑ । यथा॑ । प्रऽसू॑ता । स॒वि॒तुः ।
स॒वाय॑ । ए॒व । रात्री॑ । उ॒षसे॑ । योनि॑म् । अ॒रै॒क् ॥ १ ॥

ज्योतिषांग्रहनक्षत्रादीनांद्योतमानानांमध्येइदंउषआख्यंज्योतिःश्रेष्ठंप्रशस्यतमं अस्यकोतिशयइतिचेत् उच्यते—नक्षत्रादिकंज्योतिःस्वात्मानमेवप्रकाशयतिनान्यत् चन्द्रस्तुयद्यप्यन्यत्प्रकाशयति तथापि अविस्पष्टप्रकाशः औषसंतुज्योतिर्युगपदेवसर्वस्यजगतोन्धकारनिराकरणेनविशेषेणप्रकाशकम् अतःप्रशस्यतममित्यर्थः तादृशंज्योतिःआगात् पूर्वस्यांदिश्यागमत् आगतेचतस्मिन् चित्रश्चायनीयः प्रकेतःअन्धकारावृतस्यसर्वस्यपदार्थस्यविज्ञापकस्तदीयोरश्मिः विश्वाविभुर्व्याप्तःसन्नजनिष्ट प्रादुरभूत् किञ्च यथारात्रीरात्रिःस्वयंसवितुःसूर्यसकाशात् प्रसूता उत्पन्ना सूर्योह्यस्तंगच्छन्रात्रिंजनयति तस्मिन्ननस्तमितेरात्रेरुत्पत्त्यभावात् एवमेवरात्रिरपिउष-

सेसवायउषसउत्पत्तयेतदर्थंयोनिंस्थानंस्वकीयापरभागलक्षणंअरैक्आरेचितवती कल्पितवती-त्यर्थः यद्वाप्रसूतारात्रिसकाशादुत्पन्नाउषाः सवितुःसूर्यस्यसवायप्रसवायजन्मनियथाभवति एवं रात्रिरपिउषसेउषसोयज्जन्मतदर्थंयोनिंस्वापरभागलक्षणंस्थानंकृतवती । अत्रनिरुक्तम्—इदंश्रेष्ठंज्योतिषांज्योतिरागमच्चित्रंप्रकेतनंप्रज्ञाततममजनिष्टविभूततमंयथाप्रसूतासवितुःप्रसवायरात्रिरादित्यस्यैवंरात्र्युषसेयोनिमरिचत्स्थानमिति[1] ॥ श्रेष्ठं प्रशस्यशब्दादातिशायनिकइष्ठन् प्रशस्यस्यश्रइतिश्रादेशः प्रकृत्यैकाजितिप्रकृतिभावाट्टिलोपाभावः । अगाव एतेर्लुङिइणोगालुङीति गादेशः गातिस्थेतिसिचोलुक् । प्रकेतः कितज्ञाने अन्तर्भावितण्यर्थात् कर्मणिघञ् थाथादिनोत्तरपदान्तोदात्तत्वम् । अजनिष्ट जनीप्रादुर्भावे लुङिसिचइडागमः । विभ्वा विप्रसंभ्योड्वसंज्ञायामितिभवतेर्डुप्रत्ययः सुपांसुलुगित्यादिनासोराकारादेशः ओःसुपीतियणादेशस्यनभूसुधियोरितिप्रतिषेधेप्राप्तेछन्दस्युभयथेतियणादेशः व्यत्ययेनाद्युदात्तत्वम् यद्वा विपूर्वाद्भवतेरौणादिकोडुन्प्रत्ययः नित्त्वादाद्युदात्तत्वम् । प्रसूता षूङ्प्राणिप्रसवे कर्मणिनिष्ठा गतिरनन्तरइतिगतेः प्रकृतिस्वरत्वम् ।सवाय छन्दसिजवसवौवक्तव्यावितिनिपातनादप् चित्त्वादन्तोदात्तत्वम् अणोप्रगृह्यस्यानुनासिकइतिसंहितायामकारःसानुनासिकः।एव निपातस्यचेतिसंहितायांदीर्घः।रात्रिः रात्रेश्चाजसावितिङीप् यस्येतिचेतीकारलोपः । अरैक् रिचिर्विरेचने लङिबहुलंछन्दसीतिविकरणस्यलुक् लघूपधगुणेहल्ङ्याब्भ्यइतितिलोपः वर्णव्यापत्त्याव्यत्ययेनएकारस्यऐकारः॥१॥

१. ज्योतियों में श्रेष्ठ यह ज्योति (उषा) आई हैं। उषा की विचित्र और जगत्प्रकाशक रश्मि भी व्याप्त होकर प्रकाशित हुई है। जैसे रात्रि सविता-द्वारा प्रसूत हैं, वैसे ही रात्रि ने भी उषा की उत्पत्ति के लिए जन्म-स्थान की कल्पना की हं अर्थात् रात्रि सूर्य की सन्तान हैं और उषा रात्रि की सन्तान हैं।

द्वितीयामृचमाह—

रुशद्वत्सारुशतीश्वेत्यागादारैगुकृष्णासदनान्यस्याः ।
समानबन्धूअमृतेअनूचीद्यावावर्णंचरतआमिनाने ॥ २ ॥

रुशत्ऽवत्सा । रुशती । श्वेत्या । आ । अगात् । अरैक् । ऊम् इति । कृष्णा । सदनानि । अस्याः । समानबन्धू इति समानऽबन्धू । अमृते इति । अनूची इति । द्यावा । वर्णम् । चरतः । आमिनाने इत्याऽमिनाने ॥ २ ॥

---

1 नि० २. १९. ।

श्वेत्येत्युषसोनामधेयं रुशतीदीप्ताश्वेत्याश्वेतवर्णोषाः रुशद्वत्सा रुशद्दीप्तःसूर्योवत्सो-यस्याःसातथोक्ता यथामातुःसमीपेवत्सःसञ्चरति एवंउषसःसमीपेसूर्यस्यनित्यमवस्थानात्तद्द्-त्सत्वम् अथवा यथावत्सोमातुःस्तन्यंरसंपिबन्हरति एवमुषसोवश्यायाख्यंरसंपिबन्वत्सइत्युच्य-ते तादृशीसतीआगात् आगतवती आगतायाअस्याउषसः कृष्णाकृष्णवर्णारात्रिः सदनानि स्थानानिस्वकीयान्यार्धयामलक्षणानिआरैक् आरेचितवती कल्पितवती दत्तवतीत्यर्थः उइत्ये-तदपूरणम् अपिचैतेरात्र्युषसौसमानबन्धूसमानेनएकेनसूर्याख्येनबन्धुनासख्यायुक्ते यद्वा सूर्ये-णसहसंबद्धे यथाउषाउदेष्यतासूर्येणसंबद्धा एवंरात्रिरपिअस्तंयतासूर्येणसंबद्धा अमृतेमरणर-हिते कालात्मकतयानित्यत्वात् अनूचीअन्वञ्चन्त्यौ प्रथमंरात्रिःपश्चादुषाइत्यनेनक्रमेणगच्छन्त्यौ यद्वा सूर्यगत्यनुसारेणगच्छन्त्यौ एवंभूतेवर्णंसर्वेषांप्राणिनांरूपंआमिनानेजरयन्त्यौ यद्वा . स्व-कीयंरूपंहिंसन्त्यौ उषसानैशंतमोनिवर्त्यते प्रकाशात्मकमुषसोरूपंरात्र्याएवंविधेसत्यौद्यावाद्यो-तमानेचरतः प्रतिदिवसमावर्तेते यद्वा द्यावानभसांतरिक्षमार्गेणचरतः प्रतिदिवसंगच्छतः अत्रनि-रुक्तम्—रुशद्वत्सासूर्यवत्सारुशदितिवर्णनामरोचतेर्ज्वलतिकर्मणःसूर्यमस्यावत्समाहसाहचर्याद्रस-हरणाद्वारुशतीश्वेत्यागाद्श्वेत्याश्वेततेररिचत्कृष्णासदनान्यस्याःकृष्णवर्णारात्रिःकृष्णंकृष्यतेर्नि-कृष्टोवर्णोथैनेसंस्तौतिसमानबन्धूसमानबन्धनेअमृतेअमरणधर्माणावनूचीअनूच्यावितीतरेतरम-भिप्रेत्यद्यावावर्णंचरतस्तेएवद्यावौद्योतनादपिवाद्यावाचरतस्तयासहचरतइतिस्यादामिनानेआमि-नानेअन्योन्यस्याध्यात्मंकुर्वाणेइति॥ श्वेत्या श्विता वर्णे अस्मात् ण्यन्तादचोयदितिभावेयत् णि-लोपः अर्शआदित्वान्मत्वर्थीयोच्। अमृते मृतंमरणमनयोर्नास्तीतिबहुव्रीहौनञोजरमरमित्रमृ-ताइत्युत्तरपदाद्युदात्तत्वम्। अनूची अनुपूर्वादञ्चतेर्ऋत्विगित्यादिनाक्विन् अनिदितामितिनलोपः अञ्चतेश्चोपसङ्ख्यानमितिङीप् अचइत्यकारलोपेचावितिदीर्घत्वम् अनुदात्तस्यचयत्रोदात्तलो-पइतिङीपउदात्तत्वम्. सुपांसुलुगितिविभक्तेर्लुक्। आमिनाने मीञ्हिंसायाम् क्रैयादिकः शान-चि मीनातेर्निगमेइतिह्रस्वत्वम्॥ २ ॥

२. दीप्तिमती शुभ्रवर्णा सूर्य-माता उषा आई हैं। कृष्णवर्णा रात्रि अपने स्थान को गई हैं। रात्रि और उषा दोनों ही सूर्य की बन्धुत्व-सम्पन्ना और मरण-रहिता हैं। एक दूसरे के पीछे आती हैं और एक दूसरे का वर्ण-विनाश करती हैं।

तृतीयामृचमाह—

समानोअध्वास्वस्रोरनन्तस्तमन्यान्याचरतोदेवशिष्टे।
नमेथेतेनतस्थतुःसुमेकेनक्तोषासासमनसाविरूपे ॥ ३ ॥

---

१ नि० ६. १३.।

समानः । अध्वा । स्वस्रोः । अनन्तः । तम् । अन्याऽअन्या । चरतः । देवशिष्टे इति देवऽशिष्टे । न । मेथेते इति । न । तस्थतुः । सुमेके इति सुऽमेके । नक्तोषसा । सऽमनसा । विरूपे इति विऽरूपे ॥ ३ ॥

स्वस्रोर्भगिन्योः रात्र्युषसोः अध्वासञ्चरणसाधनभूतोमार्गः समानएकएव येनैवाकाशमार्गेणउषानिर्गच्छति तेनैवरात्रिरपि सचमार्गोनन्तः अवसानरहितः तंमार्गंदेवशिष्टेदेवेनद्योतमानेनसूर्येणानुशिष्टेशिक्षितेसत्यौ अन्याअन्याएकैकाचरतः क्रमेणागच्छतः अपिच सुमेकेशोभनमेहनेसर्वेषामुत्पादकत्वात्‌शोभनप्रजनने नक्तोषसारात्रिरुषाश्चविरूपे तमःप्रकाशलक्षणाभ्यांविरुद्धरूपाभ्यांयुक्तेअपि समनसासमानमनस्के ऐकमत्यंप्राप्तेसत्यौनमेथेते परस्परंनहिंस्तः तथा नतस्थतुः क्वचिदपिनतिष्ठतः सर्वदालोकानुग्रहार्थंगच्छथइत्यर्थः॥ अन्याअन्या कर्मव्यतिहारेसर्वनाम्नोद्वेभवतइतिवक्तव्यम्‌ समासवच्चबहुलमित्यन्याशब्दस्यद्विर्भावः तस्यपरमाम्रेडितमित्याम्रेडितसंज्ञायां अनुदात्तंचेत्याम्रेडितानुदात्तत्वम्‌। देवशिष्टे शासुअनुशिष्टौ अस्मात्कर्मणिनिष्ठा यस्यविभाषेतीट्प्रतिषेधः शासइदङ्‌ हलोरित्युपधायाइत्वम्‌ शासिवसिघसीनांचेतिषत्वम्‌ तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरत्वम्‌। मेथेते मेथृमेधृमेधाहिंसनयोः भौवादिकः अनुदात्तेत्‌। सुमेके मिहसेचने भावे-घञ्‌ शोभनोमेहोययोस्ते व्यत्ययेनककारः उत्तरपदस्यञ्नित्स्वरेणाद्युदात्तत्वादाद्युदात्तंद्व्यच्छन्दसीत्युत्तरपदाद्युदात्तत्वम्‌। नक्तोषसा सुपांसुलुगितिविभक्तेराकारः अन्येषामपिदृश्यतइतिसंहितायामुपधायादीर्घः ॥ ३ ॥

३. इन दोनों भगिनियों (उषा और रात्रि) का एक ही अनन्त सञ्चरण-मार्ग दीप्तिमान् सूर्य-द्वारा आदिष्ट है। वे दोनों एक के पश्चात् एक उसी मार्ग पर विचरण करती हैं। सारे पदार्थों की उत्पादयित्री रात्रि और उषा, विभिन्न रूप धारण करने पर भी, समानमनःसम्पन्ना हैं। वे परस्पर को बाधा नहीं देतीं और कभी स्थिर होकर अवस्थिति नहीं करतीं।

भास्वतीनेत्रीसूनृतानामचेतिचित्राविदुरोनआवः ।
प्राप्यीजगद्व्युनोरायोअख्यदुषाअजीगर्भुवनानिविश्वा ॥ ४ ॥

भास्वती । नेत्री । सूनृतानाम् । अचेति । चित्रा । वि । दुरः । नः । आवरित्यावः । प्रऽअर्प्य । जगत् । वि । ऊम् इति । नः । रायः । अख्यत् । उषाः । अजीगः । भुवनानि । विश्वा ॥ ४ ॥

भास्वतीविशिष्टप्रकाशनयुक्ता सूनृतेतिवाङ्नाम सूनृतानांवाचांनेत्रीउत्पादयित्रीउषसःप्रादुर्भावानन्तरंहिपशुपक्षिमृगादयःसर्वेशब्दंकुर्वन्ति एवंभूताउषाः अचेति अस्माभिरज्ञायि चित्रा-

चोदनीया ज्ञात्वासानोस्माकं दुरोद्वाराणि तमसातिरोहितानिव्यावः व्यवृणोत् यथास्माभिर्दृश्य-न्ते तथातमोनिवार्य प्रकाशयन्तीत्यर्थः अपिचजगत्सर्वंभुवनंप्रार्प्यप्रकाशंगमयित्वा नोस्माकंरा-योधनानिव्यख्यत् विशिष्टप्रकाशनयुक्तान्यकरोत् उइत्येतत्पदपूरणम् सैषोषाः विश्वाभुवनानि सर्वाणिभुवनानितमसातिरोहितत्वेनाविद्यमानकल्पानिअजीगः उद्गिरति स्वमुखान्निर्गमयति स्व-कीयेनप्रकाशेनतमोनिःसार्यपुनरुत्पन्नानीवकरोतीत्यर्थः ॥ नेत्री णीञ्प्रापणे तृच् ऋन्नेभ्यो-ङीप् उदात्तयणोहल्पूर्वादितिङीपउदात्तत्वम्। अचेति चितीसंज्ञाने। दुरः द्वारशब्दस्यरये-मंवौबहुलमितिबहुलवचनात्संप्रसारणम्। आवः वृञ्वरणे लुङि मन्त्रेघसेतिच्लेर्लुक् गुणः हल्-ङ्याब्भ्यइतिलोपः छन्दस्यपिदृश्यतइत्याडागमः। प्रार्प्य ऋगतौ णौ अर्तिह्रीत्यादिनायुक् स-मासेनञ्पूर्वेक्त्वोल्यप्। अख्यत् ख्याप्रकथने लुङि अस्यतिवक्तीत्यादिनाच्लेरङादेशः। अजी-गः गॄनिगरणे लुङि तिपि बहुलंछन्दसीतिविकरणस्यश्लुः द्विर्वचनोरदत्वहलादिशेषाः अर्ति-पिपर्त्योश्च बहुलंछन्दसीत्यभ्यासस्येत्वम् छान्दसईकारः यद्वा अस्माण्ण्यन्तात् लुङि चङि द्विर्भावसन्वद्भावेत्वदीर्घाः छान्दसश्चङोलोपः ॥ ४ ॥

४. हम प्रभा-संयुक्ता सूनृत-वाक्य-नेत्री विचित्रा उषा को जानते हैं; उन्होंने हमारा द्वार खोल दिया है। उन्होंने सारे संसार को आलोक-पूर्ण करके हमारे धन को प्रकाशित कर दिया है। उन्होंने सारे भुवनों को प्रकाशित किया है।

पञ्चमीमृचमाह—

जिह्मश्येऽ३चरितवेमघोन्याभोगयइष्टयैरायउत्वम्।
दभ्रंपश्यद्भ्यउर्वियाविचक्षउषाअजीगर्भुवनानिविश्वा ॥ ५ ॥१॥

जिह्मऽश्ये। चरितवे। मघोनी। आऽभोगये। इष्टये। राये। ऊम् इति। त्वम्। दभ्रम्। पश्यत्ऽभ्यः। उर्विया। विऽचक्षे। उषाः। अजीगः। भुवनानि। विश्वा ॥ ५ ॥ १ ॥

मघोनीत्युषसोनामधेयं मघोनीधनवतीउषाः जिह्मश्ये जिह्मंवक्रंशयनायपुरुषायचरि-तवेचरितुंशयनादुत्थायस्वापेक्षितंप्रतिगन्तुंव्युच्छन्तीभवति त्वम् अयंएकशब्दपर्यायःसर्वनाम-शब्दः यदाह—त्वइतिविनिग्रहार्थीयंसर्वमानुदात्तमिति। त्वमेकंप्रतिआभोगयेआभोग्यायशब्दा-दिविषयार्थंतथाअपरंप्रतिइष्टयेयागार्थं तथाअन्यंप्रतिरायेधनार्थंचव्युच्छन्तीतिशेषः उशब्द-श्चार्थे अपिचदभ्रंअल्पंपश्यद्भ्यःअन्धकारावृतत्वेनईषद्द्रष्टृभ्योमनुष्येभ्यः विचक्षेविशिष्टप्रकाशा

---

१ नि० १.७।

यव्युच्छन्ती उर्विया उर्वीविस्तीर्णाउषाःसर्वाणिभूतजातानितमसातिरोहितानिप्रकाशदानेनोद्गीर्णानीवकरोति॥ जिह्मश्ये शीङ्स्वप्ने जिह्मंश्येतेइतिजिह्मशीः क्विप्चेतिक्विप् कृदुत्तरपदप्रकृतिस्वरत्वम् एरनेकाचइतियण् उदात्तस्वरितयोर्यणइतिविभक्तेःस्वरितत्वम्। आभोगये आभोगशब्दाच्चतुर्थ्येकवचनेयकारोपजनः यद्वाआङ्पूर्वाद्भुजेर्बहुलवचनादौणादिकःक्विप्रत्ययःकुत्वंच । उर्विया इयाडियाजीकाराणामुपसंख्यानमितिउर्वीशब्दादुत्तरस्यसोर्डियाजादेशः । विचक्षे चक्षिङ् व्यक्तायांवाचि विपूर्वादस्मात्संपदादिलक्षणोभावेक्विप् ॥ ५ ॥

५. जो लोग टेढ़े होकर सोये थे, उनमें से किसी को भोग के लिए, किसी को यज्ञ के लिए और किसी को धन के लिए---सबको अपने-अपने कर्मों के लिए उषा ने जागरित किया है। जो थोड़ा देख सकते हैं, उनकी विशेष रूप से दृष्टि के लिए उषा अन्धकार दूर करती हैं। विस्तीर्ण उषा ने सारे भुवनों को प्रकाशित कर दिया है।

क्षत्रायत्वंश्रवसेत्वंमहीयाइष्टयेत्वमर्थमिवत्वमित्यै ।
विसदृशाजीविताभिप्रचक्षउषाअजीगर्भुवनानिविश्वा ॥ ६ ॥

क्षत्राय । त्वम् । श्रवसे । त्वम् । महीयै । इष्टये । त्वम् । अर्थम्ऽइव । त्वम् । इत्यै । विऽसदृशा । जीविता । अभिऽप्रचक्षे । उषाः । अजीगः । भुवनानि । विश्वा ॥ ६ ॥

क्षत्राय धननामैतत् धनार्थंत्वंएकंप्रतिउषाव्युच्छन्तीविशेषः तथा श्रवसेअन्नार्थंत्वंएकंप्रतिव्युच्छन्ती तथात्वमेकंप्रतिमहीयैमहत्यैइष्टयेअग्निष्टोमादिमहायज्ञार्थंत्वमेकंप्रतिव्युच्छन्ती तथार्थमिवअपेक्षितमर्थंप्रतिइत्यैगमनार्थंव्युच्छन्ती अपिच विसदृशाविलक्षणानिनानारूपाणिजीविताजीवितानिजीवनोपायभूतानिकृषिवाणिज्यादीनिअभिप्रचक्षेआभिमुख्येनप्रकाशयितुंव्युच्छन्तीउषाः सर्वाणिभूतजातानितमसानिगीर्णान्यजीगः प्रकाशनेनउद्गीर्णानीवाकरोत्॥ त्वम् त्वसमसिमनेमेत्यनुच्चानीतिसर्वानुदात्तत्वम्। महीयै मह्यै महेरिन्सर्वधातुभ्यइतीन्प्रत्ययः कृदिकारादक्तिनइतिङीष् उदात्तयणइतिविभक्तेरुदात्तत्वम् छान्दसईकारोपजनः यद्वामहीशब्दादुत्तरस्यचतुर्थ्येकवचनस्ययाडापइतिव्यत्ययेनयाडागमः छान्दसमन्तोदात्तत्वम् । विसदृशा त्यदादिषुदृशोनालोचनेकञ्चेत्यत्रसमानान्ययोश्चेतिवचनाद्दृशेःकञ् समानस्यच्छन्दसीतिसभावः विगतसादृश्यानिविसदृशानि शेश्छन्दसिबहुलमितिशेर्लोपः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्। अभिप्रचक्षे चक्षेस्तुमर्थेसेसेनितिसेन्प्रत्ययः स्कोःसंयोगाद्योरितिकलोपः कत्वषत्वे ॥

६. किसी को धन के लिए, किसी को अन्न के लिए, किसी को महायज्ञ के लिए और किसी को अभीष्ट-प्राप्ति के लिए उषा जगाती हैं। उन्होंने विविध जीविकाओं के प्रकाश के लिए सारे भुवनों को प्रकाशित किया है।

सप्तमीमृचमाह—

एषादिवोदुहितामत्यदर्शिव्युच्छन्तीयुवतिःशुक्रवासाः।
विश्वस्येशानापार्थिवस्यवस्वउषोअद्येहसुभगेव्युच्छ ॥ ७ ॥

एषा । दिवः । दुहिता । प्रति । अदर्शि । विऽउच्छन्ती । युवतिः । शुक्रऽवासाः । विश्वस्य । ईशाना । पार्थिवस्य । वस्वः । उषः । अद्य । इह । सुऽभगे । वि । उच्छ ॥ ७ ॥

दिवोदुहिताव्योम्नोदुहितृस्थानीया तस्यहिपूर्वार्धेउषाउत्पद्यते सैषाव्युच्छन्तीतमोवर्जयन्ती प्रत्यदर्शि सर्वैःप्राणिभिर्दृष्टाभूत् कीदृशीसायुवतिः यावयित्रीफलानांपुरुषैःप्रापयित्री नित्ययौवनोपेतावाशुक्रवासाः श्वेतवसनानिर्मलदीप्तिर्वा तथा विश्वस्यसर्वस्यपार्थिवस्यपृथिव्याः संबन्धिनोवस्वोधनस्यईशानाईश्वरी हेसुभगेशोभनधनेउषः तादृशीत्वम् अद्यास्मिन्काले इहअस्मिन्देवयजनदेशेव्युच्छ तमांसिविवासय वर्जयेत्यर्थः ॥ दिवः ऊडिदमितिविभक्तेरुदात्तत्वम् । व्युच्छन्ती उच्छीविवासे विवासोवर्जनम् तौदादिकः । युवतिः यूनस्तिः । शुक्रवासाः वसआच्छादने वस्तेसर्वमाच्छादयतीतिप्रकाशोवासः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । ईशाना ईशऐश्वर्ये अदादित्वाच्छपोलुक् अनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वेधातुस्वरः । पार्थिवस्य पृथिव्याञाञावितिप्राग्दीव्यतीयोञ्प्रत्ययः । वस्वः लिंगव्यत्ययः घेर्ङितीतिगुणस्य जसादिषुछन्दसिवावचनमितिविकल्पितत्वादभावेयणादेशः ॥ ७ ॥

७. वह नित्य-यौवन-सम्पन्ना, शुभ्रवसना, आकाश-पुत्री उषा अन्धकार दूर करती हुई मनुष्यों के दृष्टिगोचर हुई हैं। वह सारे पार्थिव धनों की अधीश्वरी हैं। सुभगे, तुम आज यहाँ अन्धकार दूर करो।

अष्टमीमृचमाह—

परायतीनामन्वेतिपाथआयतीनांप्रथमाशश्वतीनाम् ।
व्युच्छन्तीजीवमुदीरयन्त्युषामृतंकंचनबोधयन्ती ॥ ८ ॥

पराऽयतीनाम् । अनु । एति । पाथः । आऽयतीनाम् । प्रथमा । शश्वतीनाम् । विऽउच्छन्ती । जीवम् । उत्ऽईरयन्ती । उषाः । मृतम् । कम् । चन । बोधयन्ती ॥ ८ ॥

परायतीनांपरागच्छन्तीनामतीतानामुषसांसंबन्धिपाथः अन्तरिक्षैकदेशलक्षणंस्थानं पाथोन्तरिक्षंपथाव्याख्यातमितियास्कः। अद्यतनीउषाः अन्वेत्यनुगच्छति अतीताउषसोयथाव्युष्टा एवमेवैषापिव्युच्छतीत्यर्थः तथाआयतीनामागच्छन्तीनां शश्वतीनां बह्वीनामुषसांआद्याप्रथमाभवति एषायथावर्तते एवमेवागामिन्योव्युषसइत्यर्थः तादृशीव्युच्छन्तीतमोवर्जयन्तीजीवंप्राणिनांजीवात्मानंउदीरयन्ती शयनादूर्ध्वमेरयन्तीउषाः मृतंस्वापसमयेप्रलीनेन्द्रियत्वान्मृतमिवसन्तंकंचनकमपिपुरुषंबोधयन्तीपुनरिन्द्रियप्रवेशेनचेतनंकुर्वन्तीप्रवर्ततइतिशेषः ॥ परायतीनां इण्गतौ लटःशतृ इणोयण् उगितश्चेतिङीप् ङ्याश्छन्दसिबहुलमितिनामउदात्तत्वम् ॥ ८ ॥

८. पहले की उषायें जिस अन्तरिक्ष-मार्ग से गई हैं, उसी से उषा जाती हैं और आगे अनन्त उषायें भी उसी पथ का अनुधावन करेंगी। उषा अन्धकार को दूर करके तथा प्राणियों को जाग्रत् करके मृतवत् संज्ञा-शून्य लोगों को चैतन्य प्रदान करती हैं।

उषोयदग्निंसमिधेचकर्थवियदावश्चक्षसासूर्यस्य ।
यन्मानुषान्यक्ष्यमाणाँअजीगस्तद्देवेषुचकृषेभद्रमप्नः ॥ ९ ॥

उषः । यत् । अग्निम् । सम्ऽइधे । चकर्थ । वि । यत् । आवः । चक्षसा । सूर्यस्य । यत् । मानुषान् । यक्ष्यमाणान् । अजीगरिति । तत् । देवेषु । चकृषे । भद्रम् । अप्नः ॥ ९ ॥

हेउषः त्वंअग्निंगार्हपत्यादिरूपंसमिधेसमिन्धनायप्रज्वलनार्थयच्चकर्थकृतवती उषःकालेह्यग्नयोहोमार्थंउपसमिध्यन्ते अपिचतमसातिरोहितं जगत्सूर्यस्यचक्षसाप्रकाशेनयद्व्यावः व्यवृणोः तमसाविश्लिष्टमकरोः तथामानुषामानुषान् मनोःपुत्रान्मनुष्यान्यक्ष्यमाणान्यागंकरिष्यतः यत्त्वंअजीगः पूर्वंतमसाग्रस्तान्प्रकाशनेनोद्गीर्णानिवाकरोः हेउषः देवेषुमध्येत्वमेवभद्रंभजनीयं तदेतत्त्रिविधमप्नः कर्मचकृषेकृतवती ॥ आवः वृञ्वरणे दुङिमन्त्रेघसेतिच्लेर्लुक् गुणे हल्ङ्याब्भ्यइतिसिलोपः छन्दस्यपिदृश्यतइत्याडागमः । मानुषान् मनोर्जातावञ्यतौषुक्चेतिअञ्षुगागमश्च ॥ ९ ॥

९. उषा, तुमने होमार्थ अग्नि प्रज्वलित की है, सूर्य के आलोक से अन्धकार को दूर कर दिया है और यज्ञरत मनुष्यों को अन्धकार से मुक्त कर दिया है; इसलिए तुमने देवों का उपकारी कार्य किया है।

दशमीमृचमाह—

कियात्यायत्समयाभवातियाव्यूषुर्याश्चनूनंव्युच्छान्।
अनुपूर्वाःकृपतेवावशानाप्रदीध्यानाजोषमन्याभिरेति ॥१०॥२॥

कियति । आ । यत् । समया । भवाति । याः । विऽऊषुः । याः ।
च । नूनम् । विऽउच्छान् । अनु । पूर्वाः । कृपते । वावशाना ।
प्रऽदीध्याना । जोषम् । अन्याभिः । एति ॥ १० ॥ २ ॥

समयेत्यव्ययं समीपवचनम् उषाःसमयाभवाति समीपस्थाभवति इतियदेतत् तत्कियतिकालेमवृत्तंपरिसमाप्तंचेत्याकारःप्रश्नार्थः एतदुक्तंभवति उषाःयेनकालेनसंयुक्तासकालःकियान् तस्य कालस्यकिंपरिमाणमिति अनेनोषसोनन्तत्वमुक्तम्. तदेवस्पष्टीकरोति पुरायाउषसोव्यूषुःव्युष्टाः सञ्जाताः नूनंचअवश्यंइतःपरंयाश्चोषसोव्युच्छान् व्युच्छन्तिव्युष्टाभविष्यन्ति तत्रपूर्वाःव्युष्टाअतीताउषसः वावशानाःकामयमानाइदानींवर्तमानोषाः अनुकृपतेअनुकल्पते समर्थाभवति अतीताउषसोयथाप्रकाशमकुर्वन् तद्वदेषापिप्रकाशंकरोतीत्यर्थः तथाप्रदीध्यानाप्रकर्षेणदीप्यमानोषाः अन्याभिरागामिनीभिरुषोभिर्जोषंसहएतिसंगच्छते आगामिन्योप्येतदीयंप्रकाशंअनुकुर्वन्तीत्यर्थः ॥ कियति किंपरिमाणमस्य किमिदंभ्यांवोघइतिघत्वविधानसामर्थ्यात्किम्शब्दादपि परिमाणार्थेवतुप् वकारस्यघत्वम्. इदंकिमोरीश्कीतिकिमःकीआदेशः घस्येयादेशेयस्येतिलोपः प्रत्ययाद्युदात्तत्वम् छान्दसःसांहितिकोदीर्घः । भवाति लेटचाडागमः । व्यूषुः विपूर्वोवसतिः व्युच्छनेवर्तते लिटचुसिकित्त्वेयजादित्वात्संप्रसारणम् द्विर्वचनादि । व्युच्छान् उच्छीविवासे विवासोवर्जनम् लेटचाडागमः संयोगान्तस्यलोपः। कृपते कृपूसामर्थ्ये व्यत्ययेनशः । वावशाना वशकान्तौ अस्माद्यङ्लुगन्ताच्छीलिकश्चानश् । प्रदीध्याना दीधीङ्दीप्तिदेवनयोः लटःशानच् अदादित्वाच्छपोलुक् जक्षित्यादयःषडित्यभ्यस्तसंज्ञायां अभ्यस्तानामादिरित्याद्युदात्तत्वम् गतिसमासेकृदुत्तरपदप्रकृतिस्वरत्वम् ॥ १० ॥

१०. कब से उषा उत्पन्न होती हैं और कब तक उत्पन्न होंगी ? वर्त्तमान उषा पूर्व की उषाओं का साग्रह अनुकरण करती हैं और आगामिनी उषायें इन दीप्तिमती उषा का अनुधावन करेंगी ।

॥ इतिप्रथमस्याष्टमेद्वितीयोवर्गः ॥ २ ॥

एकादशीमृचमाह—

ईयुष्टेयेपूर्वतरामपश्यन्व्युच्छन्तीमुषसंमर्त्यासः ।
अस्माभिरूनुप्रतिचक्ष्याभूदोतेयन्तियेअपरीषुपश्यान् ॥ ११ ॥

ईयुः । ते । ये । पूर्वऽतराम् । अपश्यन् । विऽउच्छन्तीम् । उषसम् ।
मर्त्यासः । अस्माभिः । ऊम् इति । नु । प्रतिऽचक्ष्या । अभूत् ।
ओ इति । ते । यन्ति । ये । अपरीषु । पश्यान् ॥ ११ ॥

येमर्त्यासोमरणधर्माणोमनुष्याव्युच्छन्तीं विवासयन्तींपूर्वतरांअतिशयेनपूर्वांविप्रकृष्टांउषसंअपश्यन्दृष्टवन्तः तेमनुष्याईयुर्गताः तथाअस्माभिरपिनुइदानींप्रतिचक्ष्याप्रकर्षेणद्रष्टव्याअभूज्जाता तथाअपरीषुभाविनीषुरात्रिषुयेमनुष्याएनामुषसंपश्यान्पश्यन्ति ते आउइतिनिपातद्वयसमुदायः तत्रउदित्येतदवधारणे एवयन्तिआगच्छन्त्येव कालत्रयेप्येषाव्याप्यवर्ततइत्यर्थः॥ ईयुः इण्गतौ लिट्युसिइणोयणितियणादेशः द्विर्वचनेचीतितस्यस्थानिवद्भावाद्द्विर्भावे दीर्घइणः कितीतिअभ्यासस्यदीर्घत्वम्। ते युष्मत्तत्ततक्षुष्वितिसकारस्यषत्वंष्टुत्वंच। मर्त्यासः आज्जसेरसुक्॥ ११ ॥

११: जिन मनुष्यों ने अतीव प्राचीन समय में, आलोक प्रकाशित करते हुए उषा को देखा था, वे इस समय नहीं हैं। हम उषा को देखते हैं; आगे जो लोग उषा को देखेंगे, वे आ रहे हैं।

द्वादशीमृचमाह—

यावयद्द्वेषाऋतपाऋतेजाःसुम्नावरीसूनृताईरयन्ती ।
सुमङ्गलीर्बिभ्रतीदेववीतिमिहाद्योषःश्रेष्ठतमाव्युच्छ ॥ १२ ॥

यवयत्ऽद्वेषाः । ऋतऽपाः । ऋतेऽजाः । सुम्नऽवरी । सूनृताः ।
ईरयन्ती । सुऽमङ्गलीः । बिभ्रती । देवऽवीतिम् । इह । अद्य । उषः ।
श्रेष्ठऽतमा । वि । उच्छ ॥ १२ ॥

यावयद्द्वेषाःयावयन्तिअस्मत्तः पृथक्कृतानिद्वेषांसिद्वेष्टॄणिराक्षसादीनिययासातथोक्ता नह्युषसिजातायांराक्षसादयोवतिष्ठन्ते यतस्तेनिशाचराः ऋतपाःऋतस्यसत्यस्ययज्ञस्यवापालयित्री ऋतेजाःयज्ञार्थंप्रादुर्भूतासत्यामुषसिअहनियागाअनुष्ठीयन्तेअतोयज्ञार्थंजातेत्युच्यते सुम्नावरी सुम्नमितिसुखनाम तद्वती सूनृता वाङ्नामैतत् पशुपक्षिमृगादीनांवचांसिईरयन्तीप्रेरयन्तीउत्पादयन्ती सुमङ्गलीःसौमङ्गल्योपेता पत्याकदाचिदपिनवियुक्तेत्यर्थः देववीतिं देवैःकाम्यमानंयज्ञंबिभ्रती

धारयन्ती हेउषः श्रेष्ठतमाउक्तेनमकारेणअतिप्रशस्तात्वं इहअस्मिन्देवयजनदेशे अद्यअ-स्मिन्यागसमये व्युच्छ विवासय ॥ यावयद्द्वेषाः युमिश्रणामिश्रणयोः अस्माण्ण्यन्ताल्लटःशतृ तस्य छन्दस्युभयथेत्यार्धधातुकत्वात् अदुपदेशाल्लसार्वधातुकानुदात्तत्वाभावात् प्रत्ययस्वर-एवशिष्यते पुनर्बहुव्रीहौसएवस्वरः छान्दसःपदकालीनोह्रस्वः । ऋतपाः ऋतंपातिरक्षती-त्यृतपाः पारक्षणे विच् । ऋतेजाः ऋतेनिमित्तभूतेजायतइत्यृतेजाः जनीप्रादुर्भावे जनसनखनक्र-मगमोविट् विड्वनोरनुनासिकस्यादित्यात्वम् तत्पुरुषेकृतिबहुलमितिसप्तम्याअलुक् । सुम्नावरी छ-न्दसीवनिपावितिमत्वर्थीयोवनिप् वनोरचेतिङीप् नकारस्यरेफादेशश्च अन्येषामपिदृश्यतइतिदी-र्घः व्यत्ययेनप्रत्ययस्याद्युदात्तत्वम् । सुमंगलीः सुमंगलात्संज्ञायामितिगौरादिषुपाठात्ङीष् सर्वे-विधयश्छन्दसिविकल्प्यन्तइतिहल्ङ्याब्भ्यइतिसुलोपस्यविकल्पितत्वादभावेरुत्वविसर्गौ । देव-वीतिं वीगतिव्याप्तिप्रजनकान्त्यसनखादनेषु देवैर्वीयतेकाम्यतइतिदेववीतिर्यज्ञः कर्मणिक्तिन् दा-सीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वम् ॥ १२ ॥

१२. उषा विद्वेषी निशाचरों को दूर करती हैं, यज्ञ का पालन करती हैं, यज्ञ के लिए आविर्भूत होती हैं, सुख देती हैं और सूनृत शब्द प्रेरण करती हैं। उषा कल्याण-वाहिनी हैं और देवों का वाञ्छित यज्ञ धारण करती हैं। उषा, तुम उत्तम रूप से आज इस स्थान पर आलोक प्रकाशित करो।

त्रयोदशीमृचमाह—

शश्वत्पुरोषाव्युवासदेव्यथोअद्येदंव्यावोमघोनी ।
अथोव्युच्छादुत्तराँअनुद्यूनजरामृताचरतिस्वधाभिः ॥ १३ ॥

शश्वत् । पुरा । उषाः । वि । उवास । देवी । अथो इति । अद्य ।
इदम् । वि । आवः । मघोनी । अथो इति । वि । उच्छात् ।
उत्ऽतरान् । अनु । द्यून् । अजरा । अमृता । चरति । स्वधाभिः ॥ १३

देवीदेवनशीलोषाः पुरापूर्वस्मिन्कालेशश्वत् नित्यंसततंव्युवास व्यौच्छत् अथोअनन्तरं अथास्मिन्कालेमघोनीधनवतीउषाः तमसातिरोहितमिदंसर्वंजगद्व्यावः विवासितंप्रकाशनेनतम-साविमुक्तमकरोत् अथोअनन्तरंउत्तरानूर्ध्वतरान् भाविनः द्यून्दिवसान् अनुलक्ष्यआगामिष्व-पिदिवसेषुव्युच्छात् व्युच्छति विवासति अतःकालत्रयव्यापिनीसोषाः अजराजरारहितासर्वदैक-रूपाअमृतामरणरहिताचसती स्वधाभिः आत्मीयैस्तेजोभिःसहचरतिवर्तते ॥ उवास वसनिवासे लिट्यभ्यासस्योभयेषामित्यभ्यासस्यसंप्रसारणम् । आवः तस्मादेवधातोर्लङ्बहुलंछन्दसीति विकरणस्यलुक् हल्ङ्याब्भ्यइतितिलोपः छन्दस्यपिदृश्यतइत्याडागमः । उच्छात् लेटयाडाग-मः । उत्तरान् दीर्घादटिसमानपादेइतिनकारस्यरुत्वम् आतोटिनित्यमितिसानुनासिकआकारः ।

अनु अनुर्लक्षणेइतिअनोःकर्मप्रवचनीयत्वम्। अजरा अमृता नञाबहुव्रीहौनञोजरमरमित्रमृ-ताइत्युत्तरपदाद्युदात्तत्वम्॥१३॥

१३. पहले उषा प्रतिदिन उदित होती थीं; आज भी धनवती उषा इस जगत् को अन्धकार-मुक्त करती हैं; इसी प्रकार आगे भी दिन-दिन उदित होंगी; क्योंकि वे अजरा और अमरा होकर अपने तेज से विचरण करती हैं।

व्यं१ञ्जिभिर्दिवआतास्वद्यौदपंकृष्णांनिर्णिजंदेव्यावः।
प्रबोधयन्त्यरुणेभिरश्वैरोषायातिसुयुजारथेन॥१४॥

वि। अञ्जिऽभिः। दिवः। आतासु। अद्यौत्। अप। कृष्णाम्। निःऽनिर्जम्। देवी। आवरित्यावः। प्रऽबोधयन्ती। अरुणेभिः। अश्वैः। आ। उषाः। याति। सुऽयुजा। रथेन॥१४॥

दिवोनभसः संबन्धिनीषुआतासु दिङ्नामैतत् आवतासुविस्तीर्णासुदिक्षु उषाः अञ्जिभिः व्यञ्जकैः प्रकाशकैस्तेजोभिः व्यद्योत् विद्योतते प्रकाशते सोषादेवीदेवनशीलाकृष्णांनिर्णिजम् निर्णिगितिरूपनाम रात्रिकृतंकृष्णंरूपं अपावःअपावृणोत् प्रकाशेनतिरस्कृतवती अपिच अरुणेभिः अरुणैर्लोहितवर्णैः अश्वैर्व्यापनशीलैःस्वकीयैःकिरणैः तुरगैर्वा सुयुजासम्यक्युक्तेनरथेन उषायाति आगच्छति किंकुर्वती प्रबोधयन्ती सुप्तान्प्राणिनःप्रबुद्धान् कुर्वती॥ अद्यौत् द्युतदीप्तौ लुङ् द्युद्भ्योलुङीतिपरस्मैपदम् व्यत्ययेनच्लेर्लुक् गुणेप्राप्तेवृद्धिश्छान्दसी यद्वा द्युअभिगमने आदादिकः उतोवृद्धिर्लुकिहलीतिवृद्धिः॥१४॥

१४. आकाश की विस्तृत दिशाओं को आलोक-पूर्ण तेज द्वारा उषा दीप्तिमान् करती हैं। उषा ने रात्रि के काले रूप को दूर किया है। सोये हुए प्राणियों को जगाकर उषा अरुण अश्ववाले रथ से आ रही हैं।

देवीनांहविष्षुआवहन्त्येषोषसोयाज्या सूत्रितंच—आद्यांवनोषिरश्मिभिरावहन्तीपोष्यावार्याणिनताअर्वरिणुककाटोअश्रुतइति।

आवहन्तीपोष्यावार्याणिचित्रंकेतुंकृणुतेचेकिताना।
ईयुषीणामुपमाशश्वतीनांविभातीनांप्रथमोषाव्यश्वैत्॥१५॥३॥

आऽवहन्ती। पोष्या। वार्याणि। चित्रम्। केतुम्। कृणुते। चेकिताना। ईयुषीणाम्। उपऽमा। शश्वतीनाम्। विऽभातीनाम्। प्रथमा। उषाः। वि। अश्वैत्॥१५॥३॥

पोष्यायावज्जीवपोषणसमर्थानि वार्याणिवरणीयानिधनानि आवहन्ती अस्मभ्यंआनयन्ती चेकितानासर्वंजनंप्रज्ञापयन्तीउषाःचित्रंविचित्रंआश्चर्यभूतंचायनीयंवाकेतुंप्रज्ञापकंरश्मिं कृत्स्नंजगत्प्रकाशनसमर्थंकृणुते स्वात्मनःप्रकाशावकुरुते सैषाईयुषीणांगमनवतीनांपूर्वनिष्पन्नानां शश्वतीनांबह्वीनांउषसांउपमाउपसमीपेनिर्मिताउपमानभूतावा विभातीनांविशेषेणप्रकाशमानानांआगामिनीनांउषसांप्रथमाआद्या एवंभूतोषाःव्यश्वैत् तेजसाप्रवृद्धासीत् ॥ पोष्या पुषपुष्टौ पोषणंपोषःभावेघञ् तत्रभवानि भवेछन्दसीतियत् यतोनावइत्याद्युदात्तत्वं शेश्छन्दसि बहुलमितिशेर्लोपः। वार्याणि वृङ्संभक्तौ ऋहलोर्ण्यत् ईडवन्दवृशंसदुहांण्यतइत्याद्युदात्तत्वम्। चेकिताना कितज्ञाने अस्माद्यङन्ताल्लटःशानच् छन्दस्युभयथेतितस्यार्धधातुकत्वादतोलोपयलोपौ अभ्यस्तानामादिरित्याद्युदात्तत्वम्। ईयुषीणाम् इणगतौ लिटःक्वसुः द्विर्भावादि उगितश्चेतिङीप् वसोःसंप्रसारणम् इणोयणितियणादेशः दीर्घइणःकितीत्यभ्यासस्यदीर्घत्वम् शासिवसिघसीनांचेतिषत्वम् ङीप्सुपौपित्त्वादनुदात्तौ। विभातीनाम् भादीप्तौ अस्माच्छत्रन्तात्पूर्ववङ्ङीप् ङ्याश्छन्दसिबहुलमितिनामउदात्तत्वम्। अश्वैत् टुओश्विगतिवृद्ध्योः लङि बहुलंछन्दसीतिविकरणस्यलुक् गुणेकृतेव्यत्ययेनैत्वम् ॥ १५ ॥

१५. उषा पोषक और वरणीय धन लाकर और सबको चैतन्य देकर विचित्र रश्मि प्रकाशित करती हैं। वह पहले की उषाओं की उपमा-रूपिणी हैं और आगामिनी प्रभावती उषाओं की प्रारम्भ-स्वरूपिणी। वह किरण प्रकाश करती हैं।

॥ इतिप्रथमस्याष्टमेतृतीयोवर्गः ॥ ३ ॥

षोडशीमृचमाह—

उदीर्ध्वंजीवोअसुर्नआगादपप्रागात्तमआज्योतिरेति ।
आरैक्पन्थांयातवेसूर्यायागन्मयत्रप्रतिरन्तआयुः ॥ १६ ॥

उत् । ईर्ध्वम् । जीवः । असुः । नः । आ । अगात् । अप । प्र । अगात् । तमः । आ । ज्योतिः । एति । अरैक् । पन्थाम् । यातवे । सूर्याय । अगन्म । यत्र । प्रऽतिरन्ते । आयुः ॥ १६ ॥

हेमनुष्याः उदीर्ध्वंशयनंपरित्यज्यउद्गच्छत नोस्माकंअसुःशरीरस्यप्रेरयिताजीवोजीवात्माआगातआगतवान् तमःअपप्रागातअपक्रान्तं उषसःप्रकाशेसतिसर्वजीवव्यापारयोगः तस्मात्परमात्मरूपतयासचजीवस्तदेवज्योतिरेतिआगच्छति सूर्यायसूर्यस्यपन्थांमार्गंआरैक्विविक्तीकरोति यातवेगमनायतस्मिन्देशेगच्छामः अत्रयस्मिन्देशेआयुः अन्ननामैतत् अन्नंप्रतिरन्ते प्रपूर्वस्तिरतिर्वर्धनार्थः उदाराःदानेनप्रवर्धयन्ति ॥ ईर्ध्वम् ईरगतौ आदादिकोनुदात्तेत्। आरैक्

१ सर्वजनीनव्यापारयोगःइतिपाठः।

रिचिर्विरेचने लङि बहुलंछन्दसीतिविकरणस्यलुक् गुणेव्यत्ययेनैत्वम् । पन्थाम् द्विती-यायामपिपथिमथ्यृभुक्षामात्इतिव्यत्ययेनात्वम् ।अगन्म गमेर्लङिबहुलंछन्दसीतिविकरणस्यलुक् म्वोश्चेतिमकारस्यनकारः ॥ १६ ॥

१६. मनुष्यो, उठो; हमारा शरीर-संचालक जीवन आगया है। अन्धकार गया; आलोक आया। उषा ने सूर्य को जाने के लिए मार्ग बना दिया है। उषा, जिस देश में अन्नदान करके वर्द्धन करती हो, वहाँ हम जायँगे।

स्यूमंनावाचउदियर्तिवह्निस्तवानोरेभउषसोविभातीः ।
अद्यातदुंच्छगृणतेमंघोन्यस्मेआयुर्निदिदीहिप्रजावंत् ॥ १७ ॥
स्यूमंना । वाचः । उत् । इयर्ति । वह्निः । स्तवानः । रेभः । उषसः । विऽभातीः । अद्य । तत् । उच्छ । गृणते । मघोनि । अस्मे इति । आयुः । नि । दिदीहि । प्रजाऽवंत् ॥ १७ ॥

वह्निः स्तोत्राणांवोढा रेभः स्तोतृनामैतत् स्तोताउषसोविभातीः तमसोपनोदनेनप्रका-शमानाउषोदेवतास्तवानःस्तुवन् वाचोवेदरूपायाःसंबन्धीनिस्यूमनास्यूमानिअनुस्यूतानिसंव-तान्युक्थानिउदियर्तिउद्गमयतिउच्चारयति अतोहेमघोनिमघवत्युषः अद्यास्मिन्समये गृणते स्तुवते तस्मैपुरुषायतदुच्छ वृष्टिनिरोधकतयाप्रसिद्धंनैशंतमोविवासय वर्जय अस्मेअस्मभ्यंचप्र-जावत्प्रजाभिःपुत्रपौत्रादिभिर्युक्तंआयुरन्नंनिदिदीहि नितरांप्रकाशय दीदेतिश्छान्दसोदीप्तिकर्मा प्रयच्छेत्यर्थः ॥ स्यूमना षिवुतन्तुसन्ताने अन्येभ्योपिदृश्यन्तइतिदृशिग्रहणस्यसर्वोपाधिव्यभि-चारार्थत्वात्कर्मणिमनिन् छ्वोःशूडितिऊठ् आङ्याजयारांचोपसंख्यानमितिविभक्तेराङादेशः यद्वा औणादिकोभावेमक् पामादिलक्षणोमत्वर्थीयोनः बन्धनयुक्तानीत्यर्थः शेश्छन्दसिबहुल-मितिशेर्लोपः व्यत्ययेनाद्युदात्तत्वम् । वाचः सावेकाचइतिङसउदात्तत्वम् । इयर्ति ऋगतौ जौ-होत्यादिकः श्लुः अर्तिपिपर्त्योश्चेतिअभ्यासस्येत्वम् । स्तवानः ष्टुञ्स्तुतौ शानचिअदादित्वा-च्छपोलुक् तस्य छन्दस्युभयथेत्यार्धधातुकत्वेनङित्त्वाभावाद्गुणावादेशौ व्यत्ययेनाद्युदात्तत्वम्। विभातीः शतुरनुमोनद्यजादीइतिङीपउदात्तत्वम् । गृणते गृशब्दे क्रैयादिकः प्वादीनांह्रस्वः पू-र्वोक्तेनसूत्रेणविभक्तेरुदात्तत्वम् । अस्मे सुपांसुलुगितिचतुर्थ्याःशेआदेशः ॥ १७ ॥

१७. स्तुति-वाहक स्तोता प्रभावती उषा की स्तुति करके सुग्रथित वेद-वाक्य उच्चारण करते हैं। धनवती उषा, आज उस स्तोता का अन्धकार नष्ट करो और उसे सन्तति-युक्त अन्न दान करो।

याम्रोमंतीरुषसःसर्ववीराव्युच्छन्तिदाशुषेमर्त्याय ।
वायोरिवसूनृतानामुदर्केताअंश्वदाअंश्नवत्सोमसुत्वा ॥ १८ ॥

याः । गोऽमंतीः । उषसः । सर्वऽवीराः । विऽउच्छन्ति । दाशुषे । मर्त्याय । वायोःऽइव । सूनृतानाम् । उत्ऽअर्के । ताः । अश्वऽदाः । अश्नवत् । सोमऽसुत्वा ॥ १८ ॥

दाशुषेहवींषिदत्तवतेमर्त्यायमनुष्याययजमानाय गोमतीः गोमत्योबहुभिर्गोभिर्युक्ताः सर्ववीराः सर्वैःशरणसमर्थैःवीरैः शूरैर्युक्ताः याउषसोव्युच्छन्तितमोवर्जयन्ति वायोरिव वायुवच्छीघ्रंवर्तमानानां सूनृतानां स्तुतिरूपाणां वाचां उदर्के समाप्तौ अश्वदाअश्वानां दात्रीस्ताउषसः सोमसुत्वासोमानामभिषोता यजमानः अश्नवद्व्याप्नोतु ॥ दाशुषे दाशृदाने दाश्वान्साह्वानिति क्वसुप्रत्ययान्तोनिपात्यते चतुर्थ्येकवचनेवसोःसंप्रसारणमितिसंप्रसारणम् शासिवसिघसीनांचेतिषत्वम् । अश्नवत् अशूव्याप्तौ व्यत्ययेनपरस्मैपदम् लेटचडागमः इतश्चलोपइतीकारलोपः । सोमसुत्वा षुञ्अभिषवे अन्येभ्योपिदृश्यन्तइतिक्वनिप् ह्रस्वस्यपितीतितुक् ॥ १८ ॥

१८. जो गौ-संयुक्त और सर्व-वीर-सम्पन्न उषायें वायु की तरह शीघ्र सूनृत स्तुति के समाप्त होने पर हव्यदाता मनुष्य का अन्धकार विनष्ट करती हैं, वे ही अश्व-दात्री उषायें सोमाभिषव-कारी के प्रति प्रसन्न हों।

एकोनविंशीमृचमाह—

मातादेवानामदितेरनीकंयज्ञस्यकेतुर्बृहतीविभाहि ।
प्रशस्तिकृद्ब्रह्मणेनोव्यु१च्छानोजनेजनयविश्ववारे ॥ १९ ॥

माता । देवानाम् । अदितेः । अनीकम् । यज्ञस्य । केतुः । बृहती । वि । भाहि । प्रशस्तिऽकृत् । ब्रह्मणे । नः । वि । उच्छ । आ । नः । जने । जनय । विश्वऽवारे ॥ १९ ॥

हेउषः त्वंदेवानांमाताजननी उषसिसर्वेदेवाःस्तुत्याप्रबोध्यन्ते अतःसातज्जननवतीत्युच्यते अतएवअदितेर्देवानांमातुरनीकंप्रत्यनीकंप्रतिस्पर्धिनीत्वमित्यर्थः यद्वा दीव्यन्तीतिदेवारश्मयः तेषांनिर्मात्रीअदितिरखण्डनीयायाभूमेरनीकंमुखं यथाइन्द्रियाश्रयत्वात्मुखं प्रकाशकं एवमुषाः भूमेः प्रकाशयित्रीत्यर्थः यज्ञस्यकेतुः यज्ञस्यकेतयित्री ज्ञापयित्रीबृहतीमहतीसतीविभाहि प्रकाशस्व अपिचप्रशस्तिकृत् सम्यक्स्तुतमितिप्रशंसनंकुर्वतीनोस्मदीयाय ब्रह्मणेमन्त्ररूपायस्तोत्रायव्युच्छविवासय तदनन्तरं हेविश्ववारेसर्वैर्वरणीयेउषः नोस्मान्जनेजनपदेआजनय आभिमुख्येन प्रादुर्भावय अवस्थापयेत्यर्थः॥ बृहती बृहन्महतोरुपसंख्यानमितिङीपउदात्तत्वम् । प्रशस्तिकृत् शंसुस्तुतौ भावेक्तिन् तितुत्रेतीट्प्रतिषेधः अनिदितामितिनलोपः तस्मिन्नुपपदेकरोतेःक्विप्चेति-

क्विप् । जनय जनीमादुर्भावे णिच्युपधावृद्धिः जनीजृष्क्नसुरञ्जोऽमन्ताश्चेतिमित्त्वे मितांह्रस्वइति ह्रस्वत्वम् ॥ १९ ॥

१९. उषा, तुम देवों की माता हो, अदिति की प्रतिस्पर्द्धिनी हो। तुम यज्ञ का प्रकाश करो; विस्तीर्ण होकर किरणदान करो। हमारे स्तोत्र की प्रशंसा करके हमारे ऊपर उदित हो। सबको वरणीया उषे, हमें जनपद में आविर्भूत करो।

यच्चित्रमप्नंउषसोवहन्तीजानायशशमानायभद्रम् ।
तन्नोमित्रोवरुणोमामहन्तामदितिःसिन्धुःपृथिवीउतद्यौः॥२०॥४॥

यत् । चित्रम् । अप्नः । उषसः । वहन्ति । ईजानाय । शशमानाय । भद्रम् । तत् । नः । मित्रः । वरुणः । ममहन्ताम् । अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥ २० ॥ ४ ॥

चित्रंचायनीयंअप्नः आप्तव्यंयद्धनंउषसोवहन्तिआनयन्ति ततईजानायहविर्भिरिष्टवते शशमानायस्तुतिभिःसंभजमानायपुरुषायभद्रं भजनीयंतद्भवतीतिशेषः यदनेनसूक्तेनास्माभिः प्रार्थितंतन्मित्रादयःषड्देवताममहन्तां पूजितंकुर्वन्तु ॥ अप्नः आप्लृव्याप्तौ आपःकर्माख्यायांह्रस्वोनुट्चवेतिबहुलग्रहणादकर्माख्यायामपिअसुन् धातोर्ह्रस्वोनुडागमश्च । ईजानाय यजेश्छन्दसिलिट् लिटःकानज्वा वचिस्वपीत्यादिनासंप्रसारणद्विर्वचनादि । शशमानाय शशप्लुतगतौ ताच्छीलिकश्चानश् तस्यलसार्वधातुकत्वाभावाददुपदेशाल्लसार्वधातुकस्वराभावेचित्स्वरएवशिष्यते ॥ २० ॥

२०. उषायें जो कुछ विचित्र और ग्रहण-योग्य धन लाती हैं, वह यज्ञ-सम्पादक स्तोता के कल्याण-स्वरूप है। मित्र, वरुण, अदिति, सिन्धु, पृथिवी और आकाश हमारी इस प्रार्थना को पूजित करें।

इमारुद्रायेत्येकादशर्चंनवमंसूक्तम् कुत्सस्यार्षं दशम्येकादश्यौत्रिष्टुभौ शिष्टानवजगत्यः रुद्रोदेवता तथाचानुक्रान्तम्—इमाएकादशरौद्रंद्वित्रिष्टुबन्तमिति । शूलगवादिषुरुद्रदेवत्येषुकर्मसुअनेनसूक्तेनदिगुपस्थेया तथाचसूत्रितम्—कद्रुद्रायेमारुद्रायातेपितरिमारुद्रायस्थिरधन्वनइति सर्वेषुरुद्रयज्ञेषुदिशामुपस्थानमिति ।

तत्रप्रथमामृचमाह—

इमारुद्रायतवसेकपर्दिनेक्षयद्वीरायप्रभरामहेमतीः ।
यथाशमसद्द्विपदेचतुष्पदेविश्वंपुष्टंग्रामेअस्मिन्ननातुरम् ॥ १ ॥

इ॒माः । रु॒द्राय॑ । त॒वसे॑ । क॒प॒र्दिने॑ । क्ष॒यत्ऽवी॑राय । प्र । भ॒रा॒म॒हे॒ । म॒तीः । यथा॑ । शम् । अस॑त् । द्वि॒ऽपदे॑ । चतु॑ःऽपदे । विश्व॑म् । पु॒ष्टम् । ग्रामे॑ । अ॒स्मिन् । अना॑तु॒रम् ॥ १ ॥

रुद्राय रोदयतिसर्वमन्तकालेइतिरुद्रः यद्वा रुत्संसाराख्यंदुःखंतद्द्रावयति अपगमयति विनाशयतीतिरुद्रः यद्वा रुतः शब्दरूपाउपनिषदः ताभिर्द्रूयतेगम्यतेप्रतिपाद्यतइतिरुद्रः यद्वा रुत्शब्दात्मिकावाणीतत्प्रतिपाद्यात्मविद्यावा तामुपासकेभ्योरातिददातीतिरुद्रः यद्वा रुण-द्धिआवृणोतीतिरुत् अन्धकारादि तंद्दणातिविदारयतीतिरुद्रः यद्वा कदाचिद्देवासुरसंग्रामे अ-ग्न्यात्मकोरुद्रःदेवैर्निक्षिप्तंधनमपहृत्यनिरगात् असुरान्जित्वादेवाएनमन्विष्यद्दृष्ट्वाधनमहरन् तदा-नीमरुदत् तस्माद्रुद्रइत्याख्यायते तथाचतैत्तिरीयकम्—सोरोदीद्यदरोदीत्तद्रुद्रस्यरुद्रत्वमिति[1] ।त-स्मैरुद्रायमतीः मननीयाइमाःस्तुतीःप्रभरामहे प्रकर्षेणनिष्पादयामःकीदृशाय तवसेप्रवृद्धाय क-पर्दिनेजटिलाय क्षयद्वीरायक्षयन्तोविनश्यन्तोवीरायस्मिन्तादृशाय यद्वा क्षयतिरैश्वर्यकर्मा क्ष-यन्तः प्राप्तैश्वर्यावीरामरुद्गणाःपुत्रायस्य तस्मै यथायेनप्रकारेण शंशमनीयानांरोगाणांउपशम-नं द्विपदे अस्मदीयायमनुष्याय चतुष्पदेगवाश्वप्रभृतयेचअसत्भवेत् तेनप्रकारेणस्तुतीःकुर्मइ-त्यर्थः अतोस्मिन्नस्मदीयेग्रामेवर्तमानंविश्वंसर्वप्राणिजातंअनातुरंआतुराःरुग्णाः तैरहितंसत् पुष्टं प्रवृद्धंभवतु ॥ रुद्राय रोदेर्णिलुक्चेतिरक् । तवसे तवतिर्वृद्ध्यर्थःसौत्रोधातुः औणादिकोऽसि-प्रत्ययः । क्षयद्वीराय क्षिक्षये लटःशतृ छन्दस्युभयथेतिशतुरार्धधातुकत्वेनअदुपदेशाल्लसार्वधातु-कानुदात्तत्वात्तस्यैवस्वरःशिष्यते बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । असत् अस्भुवि लेट्यडागमः इतश्चलोपइतीकारलोपः । द्विपदे द्वौपादावस्य संख्यासुपूर्वस्येतिपादशब्दस्यान्त्यलोपःसमासा-न्तः चतुर्थ्येकवचनेभसंज्ञायांपादःपदितिपद्भावः एकदेशविकृतस्यानन्यत्वाद्द्वित्रिभ्यांपाद्दन्मूर्ध-सुबहुव्रीहावित्युत्तरपदाद्युदात्तत्वम् । चतुष्पदे स्वरवर्जंपूर्ववत् बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् पूर्व-पदंच त्रःसंख्यायाइत्याद्युदात्तम् ॥ १ ॥

१. महान् कपर्दी या जटाधारी और वीरों के विनाश-स्थान रुद्र को हम यह मननीय स्तुति अर्पण करते हैं, ताकि द्विपद और चतुष्पद सुस्थ रहें और हमारे इस ग्राम में सब लोग पुष्ट और रोग-शून्य रहें।

रुद्रदेवत्येपशौवपापुरोडाशयोर्मृळानोरुद्रेत्यादिकेद्वेअनुवाक्ये तथाचसूत्रितम्—मृळानो-रुद्रोतनोमयस्कृधीतिद्वेआतेपितर्मरुतांसुम्नमेत्विति ।

---

१ तै० सं० २. ५. १. १.

तयोराद्यांसूक्तेद्वितीयामृचमाह—

मृळानोरुद्रोतनोमयंस्कृधिक्षयद्वीरायनमसाविधेमते ।
यच्छंचयोश्चमनुरायेजेपितातदश्यामतवरुद्रप्रणीतिषु ॥ २ ॥

मृळ । नः । रुद्र । उत । नः । मयः । कृधि । क्षयत्ऽवीराय । नमसा । विधेम । ते । यत् । शम् । च । योः । च । मनुः । आऽयेजे । पिता । तत् । अश्याम । तव । रुद्र । प्रऽनीतिषु ॥ २ ॥

हेरुद्र नोस्मभ्यंअस्मदर्थंमृळ त्वंसुखयिताभव उतअपिचतदनन्तरंनोस्माकंमयःसुखंकृधि कुरु वयंचक्षयद्वीरायक्षयितसर्ववीरंमाक्षिप्यवैर्यैमरुद्भिर्युक्तंवा तेत्वांनमसाहविर्लक्षणेनान्नेननमस्कारेणवाविधेम परिचरेम विधतिःपरिचरणकर्मा अपिच पिताउत्पादकोमनुः स्वकीयाभ्यःप्रजाभ्यः शंरोगाणांशमनंयोश्चभयानांयावनञ्च यदेतद्द्वयंआयेजे देवेभ्यःसकाशात्प्राप्यदत्तवान् हेरुद्र तवप्रणीतिषुप्रकृष्टनयनेषुसत्सुतद्द्वयंअश्यामव्याप्नुयाम ॥ मृळ मृडसुखने तौदादिकः द्व्यचोतस्तिङ इतिसंहितायांदीर्घः । कृधि करोतेर्लोटिबहुलंछन्दसीतिविकरणस्यलुक् श्रुशृणुपृकृवृभ्यश्छन्दसीतिहेर्धिः अतःकृकमीतिमयसोविसर्जनीयस्यसत्वम् । क्षयद्वीराय क्रियाग्रहणंकर्तव्यमिति कर्मणःसंप्रदानत्वाच्चतुर्थी । विधेम विधविधाने तौदादिकः । आयेजे यजदेवपूजासंगतिकरणदानेषु लिटिसंज्ञापूर्वकस्यविधेरनित्यत्वात्संप्रसारणाभावेएत्वाभ्यासलोपौ । अश्याम अशूव्याप्तौ व्यत्ययेनपरस्मैपदम् बहुलंछन्दसीतिविकरणस्यलुक् ॥ २ ॥

२. रुद्र, तुम सुखी हो; हमें सुखी करो। तुम वीरों के विनाशक हो। हम नमस्कार के साथ तुम्हारी परिचर्या करते हैं। पिता या उत्पादक मनु ने जिन रोगों से उपशम और जिन भयों से उद्धार पाया था; रुद्र, तुम्हारे उपदेश से हम भी वह पावें।

अश्यामतेसुमतिंदेवयज्ययाक्षयद्वीरस्यतवरुद्रमीढ्वः ।
सुम्नायन्निद्विशोअस्माकमाचरारिष्टवीराजुहवामतेहविः ॥ ३ ॥

अश्याम । ते । सुऽमतिम् । देवऽयज्यया । क्षयत्ऽवीरस्य । तव । रुद्र । मीढ्वः । सुम्नऽयन् । इत् । विशः । अस्माकम् । आ । चर । अरिष्टऽवीराः । जुहवाम । ते । हविः ॥ ३ ॥

हेमीढ्वः सेक्तः कामाभिवर्षकनित्यतरुणवारुद्र क्षयद्वीरस्यक्षयितमतिपक्षस्यमरुद्भिर्युक्तस्यवा तवसुमतिंशोभनांकल्याणींअनुग्रहात्मिकांबुद्धिं तेत्वत्संबन्धिनोवयंदेवयज्यया देवयागेन त्वद्देवत्येनयज्ञेनअश्यामव्यामवाम त्वंचास्माकंविशःप्रजाअभिलक्ष्यआचरआगच्छ किंकुर्वन् सुम्नायन्निव् सुम्नमितिसुखनाम तासांप्रजानांसुखमिच्छन्नेवसुखप्रदएवभवेत्यर्थः ततोवयंअरिष्टवीरा वीर्याज्जायन्तइतिवीराःप्रजाः अरिष्टाअहिंसितावीरायेषांतथाभूताःसन्तः तेतुभ्यंहविः चरुपुरोडाशादिकंजुहवाम चोदितेआधारेप्रक्षिपाम॥ सुमतिं मतिर्मननं शोभनंमननंयस्यां बुद्धौसासुमतिः नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्। देवयज्यया छन्दसिनिष्टक्र्येत्यादौयजेर्यप्रत्ययोनिपात्यते स्त्रीलिङ्गत्वाच। मीढ्वः मिहसेचने दाश्वान्साह्वान्मीढ्वानितिक्वसुप्रत्ययान्तोनिपातितः संबुद्धौमतुवसोरुरितिरुत्वम्। सुम्नायन् सुम्नंपरेषामिच्छति छन्दसिपरेच्छायामपीतिक्यच् नच्छन्दस्यपुत्रस्येतीत्वदीर्घयोर्निषेधः देवसुम्नयोर्यजुषिकाठकेइतिविधीयमानमात्वंव्यत्ययेनात्रापिद्रष्टव्यम्॥ ३॥

३. अभीष्ट-दाता रुद्र, तुम वीरों के क्षयकारी अथवा ऐश्वर्यशाली मरुतों से युक्त हो। हम देव-यज्ञ-द्वारा तुम्हारा अनुग्रह प्राप्त करें। हमारी सन्तानों के सुख की कामना करके उनके पास आओ। हम भी प्रजा का हित देखकर तुम्हें हव्य देंगे।

त्वेषंवयंरुद्रंयज्ञसाधंवंकुंकविमवसेनिह्वयामहे।
आरेअस्मद्दैव्यंहेळोअस्यतुसुमतिमिद्वयमस्यावृणीमहे॥ ४॥

त्वेषम्। वयम्। रुद्रम्। यज्ञऽसाधम्। वंकुम्। कविम्। अवसे। नि। ह्वयामहे। आरे। अस्मत्। दैव्यम्। हेळः। अस्यतु। सुऽमतिम्। इत्। वयम्। अस्य। आ। वृणीमहे॥ ४॥

अवसेरक्षणाय रुद्रंमहादेवंनिह्वयामहे नितरामाह्वयामः कीदृशंत्वेषंदीप्तम् यज्ञसाधंयज्ञस्यसाधयितारं एषहियज्ञंस्विष्टंकरोति तथाचतैत्तिरीयकेदेवावैयज्ञाद्रुद्रमन्तरायन्नित्युपक्रम्याम्नातम्—स्विष्टंवैनइदंभविष्यतियदिमंराधयिष्यामइतितत्स्विष्टकृतःस्विष्टकृत्त्वमिति[1]। वंकुंकुटिलगन्तारं कविंक्रान्तदर्शिनम् सचरुद्रः दैव्यंदेवस्यद्योतमानस्य संबन्धिनंहेळः क्रोधं अस्मदारेअस्मत्तोदूरदेशेअस्यतुप्रेरयतु अस्यमहादेवस्यसुमतिमित्शोभनामनुग्रहरूपांबुद्धिमेववयमावृणीमहे आभिमुख्येनसंभजामहे॥ यज्ञसाधं यज्ञंसाधयतीतियज्ञसाध् षिधुसंराद्धौ सिध्यतेरपारलौकिकेइत्यात्वम् यद्वा राधसाधसंसिद्धौ अस्माण्ण्यन्ताक्विप्। वंकुं वकि-

---

[1] तै० सं० २. ६. ८.।

कौटिल्ये औणादिकउप्रत्ययः । निह्वयामहे निसमुपविभ्योह्वइत्यात्मनेपदम्। दैव्यं देवाद्यञावितिप्राग्दीव्यतीयोयञ् । अस्यतु असुक्षेपणे दैवादिकः । वृणीमहे वृङ्संभक्तौ क्रैयादिकः ॥ ४ ॥

४. रक्षण के लिए हम दीप्तिमान्, यज्ञ-साधक, कुटिलगति और मेधावी रुद्र का आह्वान करते हैं। वह हमारे पास से अपना क्रोध दूर करें। हम उनका अनुग्रह चाहते हैं।

दि॒वोव॑रा॒हम॑रु॒षंक॑प॒र्दिनं॑त्वे॒षंरू॒पंनम॑सा॒निह्व॑यामहे ।
हस्ते॒बिभ्र॑द्भेष॒जावार्या॑णि॒शर्म॒वर्म॑च्छ॒र्दिर॒स्मभ्यं॑यंसत् ॥५॥५॥

दि॒वः । व॒रा॒हम् । अ॒रु॒षम् । क॒प॒र्दिन॑म् । त्वे॒षम् । रू॒पम् । नम॑सा । नि । ह्व॒या॒म॒हे॒ । हस्ते॑ । बिभ्र॑त् । भे॒ष॒जा । वार्या॑णि । शर्म॑ । वर्म॑ । छ॒र्दिः ।अ॒स्मभ्य॑म् । य॒ंस॒त् ॥ ५ ॥ ५ ॥

वराहं वराहारमुत्कृष्टभोजनं यद्वा वराहवद्दृढाङ्गं अरुषम्आरोचमानं कपर्दिनंजटाभिर्युक्तं त्वेषं तेजसादीप्यमानं रूपं निरूपणीयं वेदान्तैरधिगम्यं एवंभूतं रुद्रंनमसा हविर्लक्षणेनान्नेन नमस्कारेणवा दिवोद्युलोकसकाशान्निह्वयामहे नितरामाह्वयामः सआहूतोरुद्रः हस्तेस्वकीये बाहौवीर्याणिसर्वैर्वरणीयानि भेषजा भैषज्यानिरोगशमनहेतुभूतानिबिभ्रत् धारयन्अस्मभ्यंस्तोतृभ्यः शर्म आरोग्यलक्षणंसुखं वर्मआयुधानांनिवारकंकवचं छर्दिः गृहनामैतत् गृहंतस्मयच्छतु ॥ बिभ्रत् डुभृञ्धारणपोषणयोः जौहोत्यादिकः लटःशतृ भृञामिदित्यभ्यासस्येत्वम् । भेषजा भिषजचिकित्सायाम् कण्ड्वादिः पचाद्यच् अतोलोपयलोपौ सुमङ्गलभेषजाच्चेतिनिपातनाद्रूपसिद्धिः शेश्छन्दसिबहुलमितिशेर्लोपः । वार्याणि वृङ्संभक्तौ ऋहलोर्ण्यत् ईडवन्देत्याद्युदात्तत्वम् । छर्दिः उछृदिर्दीप्तिदेवनयोः छृद्यतेदीप्यतेसुवर्णादिभिर्धनैःप्रकाश्यते इतिछर्दिर्गृहं अर्चिशुचिहुसृपिछादिछर्दिभ्यइस् । यंसत् यमउपरमे लेटचडागमः सिब्बहुलंलेटीतिसिप् इतश्चलोपइतीकारलोपः ॥ ५ ॥

५. हम उन स्वर्गीय उत्कृष्ट वराह की तरह दृढ़ाङ्ग, अरुणवर्ण, कपर्दी, दीप्तिमान् और उज्ज्वल रूप धर रुद्र को नमस्कार-द्वारा बुलाते हैं। हाथ में वरणीय भेषज धारण करके वे हमें सुख, वर्म और गृह प्रदान करें।

इ॒दंपि॒त्रेम॒रुता॑मुच्यते॒वचः॑स्वा॒दोः॑स्वादीयो॒रु॒द्राय॒वर्ध॑नम् ।
रास्वा॑चनोअमृतमर्त॒भोज॑नं॒त्मने॑तो॒काय॒तन॑यायमृळ ॥ ६ ॥

इदम् । पित्रे । मरुताम् । उच्यते । वचः । स्वादोः । स्वादीयः । रुद्राय ।
वर्धनम् । रास्व । च । नः । अमृत । मर्तऽभोजनम् । त्मने ।
तोकाय । तनयाय । मृळ ॥ ६ ॥

इदंस्तुतिलक्षणंवचः मरुतां एकोनपञ्चाशत्संख्यानां देवविशेषाणां पित्रे जनकायरुद्रायेश्वरायउच्यते उच्चारयति कीदृशं स्वादोः स्वादीयः रसवतोमधुघृतादेरपिस्वादुतरं अतिशयेनहर्षजनकमित्यर्थः वर्धनंस्तुत्यस्यप्रवर्धकं स्तोत्रेणहिदेवताहृष्टासतीवर्धते रुद्रस्यचमरुतां पितृत्वमेवमाम्नायते—पुराकदाचिदिन्द्रोअसुरान्जिगाय तदानींदितिरसुरमाता इन्द्रहननसमर्थंपुत्रंकामयमाना तपसाभर्तुःसकाशाद्गर्भंलेभे इमंवृत्तान्तमवगच्छन्इन्द्रोवज्रहस्तःसन् सूक्ष्मरूपोभूत्वातस्याउदरंमविश्यतंगर्भंसप्तधाविभेद पुनरप्येकैकंसप्तखण्डमकरोत् तेसर्वेगर्भैकदेशाः योनेर्निर्गत्यारुदन् एतस्मिन्नवसरेलीलार्थंगच्छन्तौ पार्वतीपरमेश्वरौ इमान्ददृशतुः महेशंमति पार्वत्येवमवोचत् इमेमांसखण्डाः यथाप्रत्येकंपुत्राःसंपद्यन्तां एवंत्वयाकार्यंमयिचेत्प्रीतिरस्तीति सचमहेश्वरस्तान् समानरूपान् समानवयसः समानालङ्कारान् पुत्रान्कृत्वागौर्यैप्रददौ तवेमेपुत्राः सन्त्विति अतःसर्वेषुमारुतेषुसूक्तेषुमरुतोरुद्रपुत्राइतिस्तूयन्ते रौद्रेषुचमरुतांपितारुद्रइति अपिच हे अमृतमरणरहितरुद्र मर्तभोजनंमर्तानांमनुष्याणां भोगपर्याप्तमन्नंनोस्मभ्यंरास्व प्रयच्छ तथात्मने आत्मने द्वितीयार्थेचतुर्थी मां तोकायतोकं पुत्रं तनयं तत्पुत्रंचमृळ सुखय ॥ पित्रे उदात्तयणइतिविभक्तेरुदात्तत्वम् । रास्व रादाने व्यत्ययेनात्मनेपदम् । त्मने मन्त्रेष्वाङ्यादेरात्मनइत्यत्रान्यत्रापिच्छन्दसिदृश्यतइतिवचनादात्मनआकारलोपः ॥ ६ ॥

६. मधु से भी अधिक मधुर यह स्तुति-वाक्य मरुतों के पिता रुद्र के उद्देश से उच्चारित किया जाता है। इससे स्तोता की वृद्धि होती है। मरण-रहित रुद्र, मनुष्यों का भोजन-रूप अन्न हमें प्रदान करो। मुझे, मेरे पुत्र को और पौत्र को सुख दान करें।

मानोमहान्तमुतमानोअर्भकंमानउक्षन्तमुतमानउक्षितम्।
मानोवधीःपितरंमोतमातरंमानःप्रियास्तन्वोरुद्ररीरिषः ॥ ७ ॥

मा । नः । महान्तम् । उत । मा । नः । अर्भकम् । मा । नः ।
उक्षन्तम् । उत । मा । नः । उक्षितम् । मा । नः । वधीः । पितरम् ।
मा । उत । मातरम् । मा । नः । प्रियाः । तन्वः । रुद्र । रिरिषः ॥ ७ ॥

हेरुद्र नोस्माकंमध्येमहान्तंवृद्धंमावधीः माहिंसीः उतअपिच नोस्माकंअर्भकंबालंमाहिंसीः तथानोस्माकंमध्येउक्षन्तंसेक्तारंमध्यवयस्कंयुवानंमावधीः उतअपिचनोस्माकमुक्षितंगर्भरूपेणस्त्रीषुनिषिक्तमपत्यंमावधीः तथानोस्माकंपितरंजनकंमावधीः उतअपिचमातरंजननींमावधीः तथानोस्माकंप्रियाःस्नेहविषयास्तन्वः शरीराणि तनूषुभवाःप्रजावा हेरुद्र मारीरिषःमाहिंसीः ॥ वधीः हन्तेर्माङि लुङिचेतिवधादेशः सचादन्तः सिचइट् अतोलोपस्यस्थानिवद्भावाद्वृद्ध्यभावः। रीरिषः रिषहिंसायाम् ण्यन्ताल्लुङिचङिणिलोपोपधाह्रस्वत्वादीनि छान्दसःपदकालीनोभ्यासह्रस्वः॥ ७॥

७. रुद्र, हममें से बूढ़े को नहीं मारना, बच्चे को नहीं मारना, सन्तानोत्पादक युवक को नहीं मारना तथा गर्भस्थ शिशु को भी नहीं मारना। हमारे पिता का वध नहीं करना, माता की हिंसा नहीं करना तथा हमारे प्रिय शरीर में आघात नहीं करना।

मानस्तोकेतनयेमानआयौमानोगोषुमानोअश्वेषुरीरिषः।
वीरान्मानोरुद्रभामितोवधीर्हविष्मन्तःसदमित्त्वाहवामहे ॥ ८ ॥

मा। नः। तोके। तनये। मा। नः। आयौ। मा। नः। गोषु। मा। नः। अश्वेषु। रिरिषः। वीरान्। मा। नः। रुद्र। भामितः। वधीः। हविष्मन्तः। सदम्। इत्। त्वा। हवामहे ॥ ८ ॥

हेरुद्र नोस्माकंतोकादिविषयेमारीरिषः माहिंसीः तोकशब्दःपुत्रवाची तनयस्तत्पुत्रः आयुरित्यन्तोदात्तंमनुष्यनाम पुत्रपौत्रव्यतिरिक्तोयोस्मदीयोमनुष्यस्तस्मिन्हिंसांमाकृथाः तथा हेरुद्र वीरान्विक्रान्तान्शौर्योपेतान्अस्मदीयान्भामितःक्रुद्धःसन्मावधीः माहिंसीः वयंचहविष्मन्तोहविर्भिर्युक्ताःसन्तःसदमिवसर्वदैव त्वांहवामहेआह्वयामहे ॥ आयौ इण्गतौ छन्दसीणइत्युण्प्रत्ययः। भामितः भामक्रोधे क्रोधिकरणेचेतिकर्तरिक्तः। हवामहे ह्वेञोलटिबहुलंछन्दसीतिसंप्रसारणम्॥ ८॥

८. रुद्र, हमारे पुत्र, पौत्र, मनुष्य, गौ और अश्व को नहीं मारना। रुद्र, क्रुद्ध होकर हमारे वीरों की हिंसा नहीं करना; क्योंकि हव्य लेकर हम सदा ही तुम्हें बुलाते हैं।

देवस्वांहविषुरुद्रस्यपशुपतेर्यागेउपतेस्तोमानित्यादिकेयाज्यानुवाक्ये सूत्रितंच—उपतेस्तोमान्पशुपाइवाकरमितिद्वेइति।

उपतेस्तोमान्पशुपाइवाकरंरास्वापितर्मरुतांसुम्नमस्मे।
भद्राहितेसुमतिर्मृळयत्तमाथावयमवइत्तेवृणीमहे ॥ ९ ॥

उप । ते । स्तोमा॑न् । प॒शु॒पाःऽइ॑व । आ । अ॒क॒र॒म् । रास्व॑ । पि॒तः । म॒रु॒ता॒म् । सु॒म्नम् । अ॒स्मे इति॑ । भ॒द्रा । हि । ते॒ । सु॒ऽम॒तिः । मृ॒ळ॒यत्ऽत॑मा । अथ॑ । व॒यम् । अवः॑ । इत् । ते॒ । वृ॒णी॒म॒हे॒ ॥९॥

हेरुद्र स्तोमान्स्तुतिरूपान्मन्त्रान्तेतुभ्यंउपाकरम् उपकरोमिसमर्पयामि तत्रदृष्टान्तः— यथा पशूनांपालयितागोपः प्रातःकालेस्वस्मैसमर्पितान्पशून्सायंकालेस्वामिभ्यःप्रत्यर्पयति एवंत्वत्सकाशाल्लब्धान्स्तुतिरूपान्मंत्रान्स्तुतिसाधनत्वयातुभ्यंप्रत्यर्पयामीत्यर्थः हेमरुतांपितः मरुत्संज्ञानांदेवानामुत्पादकरुद्र नोस्मभ्यंसुम्नंसुखंरास्वदेहि अपिच तेत्वदीयासुमतिः कल्याणी बुद्धिः मृळयत्तमाअतिशयेनसुखयितृतमा अतएवभद्राभजनीया हियस्मादेवंतस्मात् अथानन्तरंवयंतेत्वदीयमवोरक्षणंवृणीमहेसंभजामहे ॥ अकरं छन्दसिलुङ्लङ्लिटइतिवर्तमानेलङ् कृमृदृरुहिभ्यइतिच्लेरङादेशः ऋदृशोङिगुणः । पितर्मरुतां परमपिच्छन्दसीतिपरस्याःषष्ठ्याःपूर्वामन्त्रितानुप्रवेशेसत्यामन्त्रितस्यचेतिपदद्वयमनुदात्तम् । अस्मे सुपांसुलुगितिचतुर्थी बहुवचनस्यशे आदेशः । मृळयत्तमा मृडसुखने अस्माण्ण्यन्ताल्लटःशतृ तस्य छन्दस्युभयथेत्यार्धधातुकत्वाल्लसार्वधातुकानुदात्तत्वाभावेप्रत्ययस्वरःशिष्यते॥ ९ ॥

९. जैसे चरवाहे सायंकाल अपने स्वामी के पास पशुओं को लौटा देते हैं, रुद्र, वैसे ही मैं तुम्हारा स्तोत्र तुम्हें अर्पण करता हूं। मरुतों के पिता, हमें सुख दो। तुम्हारा अनुग्रह अत्यन्त सुखकर और कल्याणदायी हो। हम तुम्हारा रक्षण चाहते हैं।

आ॒रे ते॑ गो॒घ्नमु॒त पू॑रुष॒घ्नं क्षय॑द्वीर सु॒म्नम॒स्मे ते॑ अस्तु ।
मृ॒ळा च॑ नो॒ अधि॑ च ब्रूहि दे॒वाधा॑ च नः॒ शर्म॑ यच्छ द्वि॒बर्हाः॑ ॥ १० ॥

आ॒रे । ते॒ । गो॒ऽघ्नम् । उ॒त । पु॒रु॒ष॒ऽघ्नम् । क्षय॑त्ऽवीर । सु॒म्नम् । अ॒स्मे इति॑ । ते॒ । अ॒स्तु॒ । मृ॒ळ । च॒ । नः॒ । अधि॑ । च॒ । ब्रू॒हि॒ । दे॒व॒ । अध॑ । च॒ । नः॒ । शर्म॑ । य॒च्छ॒ । द्वि॒ऽबर्हाः॑ ॥ १० ॥

हेक्षयद्वीर क्षपितसर्वशत्रुजनरुद्र तेत्वदीयं गोघ्नंगवांहननं यद्वा गोहननसाधनमायुधं उतअपिच पुरुषघ्नं पुरुषहननं तत्साधनमायुधंवातदुभयं आरेदूरेअस्मत्तोविप्रकृष्टदेशेभवतु अस्मेअस्मासुतेत्वदीयंसुम्नं सुखंअस्तुभवतु अपिचनोस्माकंमृळसुखसिध्यर्थंपरत्वोभव हे देवद्योतमानरुद्र नोस्मान् अधिब्रूहिच अधिवचनंपक्षपातेनवचनं ब्राह्मणायाधिब्रूयादितिवचन अधच अथानन्तरञ्च द्विबर्हाः द्वयोःस्थानयोःपृथिव्यामन्तरिक्षेचपरिवृढः यद्वा द्वयोर्ज्ञानकर्मणोः पर-

मार्गयोर्ज्ञानकर्मणोर्वापरिवृढःस्वामी सत्वंनोस्मभ्यंशर्मसुखंयच्छदेहि ॥ गोघ्नं हनहिंसागत्योः अस्मात्घञर्थेकविधानमितिभावेकरणेवाकप्रत्ययः गमहनेत्युपधालोपः होहन्तेरितिघत्वम् । द्विबर्हाः दृहिवृहिवृद्धौ द्वयोःस्थानयोःबर्हतेप्रवर्धतइतिद्विबर्हाः असुन् कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ १० ॥

१०. वीरों के विनाशक रुद्र, तुम्हारा गो-हनन-साधन और मनुष्य-हनन-साधन अस्त्र दूर रहे। हम तुम्हारा दिया सुख पावें। हमें सुखी करो। दीप्तिमान् रुद्र, हमारे पक्ष में कहना। तुम पृथिवी और अन्तरिक्ष के अधिपति हो। हमें सुख दो।

अवो॑चाम॒नमो॑अस्माअव॒स्यवः॑शृ॒णोतु॑नो॒हवं॑रु॒द्रोम॒रुत्वा॑न् ।
तन्नो॑मि॒त्रोवरु॑णोमामहन्ता॒मदि॑ति॒ःसिन्धु॑ःपृथि॒वीउ॒तद्यौः ॥ ११ ॥ ६ ॥

अवो॑चाम । नमः॑ । अ॒स्मै । अ॒व॒स्यवः॑ । शृ॒णोतु॑ । न॒ः । हव॑म् ।
रु॒द्रः । म॒रुत्वा॑न् । तत् । न॒ः । मि॒त्रः । वरु॑णः । म॒म॒ह॒न्ता॒म् ।
अदि॑तिः । सिन्धु॑ः । पृ॒थि॒वी । उ॒त । द्यौः ॥ ११ ॥ ६ ॥

अवस्यवःअवोरक्षणंवाइच्छन्तोवयंअवोचाम एतत्सूक्तरूपंस्तोत्रंअवादिष्म अस्मैरुद्रायनमोनमस्कारोस्तु मरुत्वान्मरुद्भिःस्वकीयैःपुत्रैर्युक्तोरुद्रश्चनोस्माकंहवमाह्वानंशृणोतुस्वीकरोतु यदस्माभिरुक्तंनोस्मदीयंतत्सर्वंमित्रादयःषड्देवताःममहन्तांपूजयन्तु उतशब्दोप्यर्थे ॥ अवोचाम ब्रूञ्व्यक्तायांवाचि लुङि ब्रुवोवचिः अस्यतिवक्तिख्यातीत्यादिनाच्लेरङादेशः वचउमित्युमागमः । अवस्यवः अवरक्षणे भावेअसुन् सुपआत्मनःक्यच् क्याच्छन्दसीत्युप्रत्ययः । हवम् भावेनुपसर्गस्येत्यप्संप्रसारणंच । मरुत्वान् झयइतिमतुपोवत्वं तसौमत्वर्थेइतिभत्वेनपदत्वाभावात्जश्त्वाभावः ॥ ११ ॥

११. हमने रक्षा-कामना करके कहा है। उन रुद्र देव को नमस्कार है। मरुतों के साथ रुद्र हमारा आह्वान सुनें। मित्र, वरुण, अदिति, सिन्धु, पृथिवी और आकाश हमारी इस प्रार्थना को पूजित करें।

चित्रमितिषड्चंसूक्तं कुत्सस्यार्षंत्रैष्टुभंसूर्यदेवताकं तथाचानुक्रान्तं—चित्रंषट्सौर्यमिति आश्विनशस्त्रेसूर्योदयादूर्ध्वंसौर्याणिसूक्तानिशंसनीयानि तत्रेदंसूक्तंशंसनीयं सूत्रितंच—चित्रंदेवानांनमोमित्रस्येति । आदितस्तिस्रऋचः सौर्यस्यपशोर्वपापुरोडाशहविषांक्रमेणानुवाक्याः ततोद्वेवपापुरोडाशयोर्याज्ये तथाचसूत्रितं—चित्रंदेवानामुदगादनीकमितिपञ्चशंनोभवचक्षसाशंनोअह्नेति । अतिमूर्तिनाम्न्येकाहेशुनासीरीयेपर्वणिचसूर्यस्यहविषश्चित्रंदेवानामित्येषायाज्या सूत्रितंच—तरणिर्विश्वदर्शतश्चित्रंदेवानामुदगादनीकमितियाज्यानुवाक्या ।

तामेतांप्रथमामृचमाह—

चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः ।
आप्राद्यावापृथिवीअन्तरिक्षंसूर्यआत्माजगतस्तस्थुषश्च॥१॥

चित्रम् । देवानाम् । उत् । अगात् । अनीकम् । चक्षुः । मित्रस्य । वरुणस्य । अग्नेः । आ । अप्राः । द्यावापृथिवी इति । अन्तरिक्षम् । सूर्यः । आत्मा । जगतः । तस्थुषः । च ॥ १ ॥

देवानां दीव्यन्तीतिदेवारश्मयः तेषांदेवजनानामेववा अनीकंतेजःसमूहरूपं चित्रंआश्चर्यकरं सूर्यमण्डलंउदगात्उदयाचलंप्राप्तमासीत् कीदृशं मित्रस्यवरुणस्याग्नेश्चउपलक्षणमेतत् एतदुपलक्षितानांजगतांचक्षुःप्रकाशकं चक्षुरिन्द्रियस्थानीयंचउदयंप्राप्यचद्यावापृथिवी दिवंपृथिवींअन्तरिक्षंचआप्राः स्वकीयेनतेजसाआसमन्तादपूरयत् ईदृग्भूतमण्डलान्तर्वर्तीसूर्यःअन्तर्यामितयासर्वस्यप्रेरकःपरमात्मा जगतोजङ्गमस्यतस्थुषःस्थावरस्यचआत्मास्वरूपभूतःसहिसर्वस्य स्थावरजङ्गमात्मकस्यकार्यवर्गस्यकारणं कारणाच्चकार्यंनातिरिच्यते तथाचपारमर्षंसूत्रम्—तदनन्यत्वमारंभणशब्दादिभ्यइति यद्वा स्थावरजङ्गमात्मकस्यसर्वस्यप्राणिजातस्यजीवात्मा उदितेहिसूर्येमृतप्रायंसर्वंजगत्पुनश्चेतनयुक्तंसदुपलभ्यते तथाचश्रूयते—योसौतपन्नुदेतिससर्वेषांभूतानां प्राणानादायोदेतीति ॥ आप्राः प्रापूरणे लङिपुरुषव्यत्ययः अदादित्वाच्छपोलुक् । जगतः गमेर्द्वेचितिक्विप् द्विर्वचनम् गमःक्वावित्यनुनासिकलोपः । तस्थुषः तिष्ठतेर्लिटःक्वसुः द्विर्वचनेशर्पूर्वाःखयः षष्ठ्येकवचने वसोःसंप्रसारणमितिसंप्रसारणं आतोलोपइटिचेत्याकारलोपः शासिवसिघसीनांचेतिषत्वम् ॥ १ ॥

१. विचित्र तेजःपुञ्ज तथा मित्र, वरुण और अग्नि के चक्षुःस्वरूप सूर्य उदित हुए हैं। उन्होंने द्यावा-पृथिवी और अन्तरिक्ष को अपनी किरणों से परिपूर्ण किया है। सूर्य जंगम और स्थावर—दोनों की आत्मा हैं।

द्वितीयामृचमाह—

सूर्योदेवीमुषसंरोचमानांमर्योनयोषामभ्येतिपश्चात् ।
यत्रानरोदेवयन्तोयुगानिवितन्वतेप्रतिभद्रायभद्रम् ॥ २ ॥

---

१ तै० आ० प्रथमाध्याये.

सूर्यः । देवीम् । उषसम् । रोचमानाम् । मर्यः । न । योषाम् ।
अभि । एति । पश्चात् । यत्र । नरः । देवऽयन्तः । युगानि ।
विऽतन्वते । प्रति । भद्राय । भद्रम् ॥ २ ॥

सूर्योदेवींदानादिगुणयुक्तांरोचमानांदीप्यमानामुषसंपश्चादभ्येति उषसःप्रादुर्भावानन्तरं तांअभिलक्ष्यगच्छति तत्रदृष्टान्तः—मर्योनयोषां यथाकश्चिन्मनुष्यःशोभनावयवांगच्छन्तींयुवतिंस्त्रियंसततंअनुगच्छति तद्वत् यत्रयस्यांउषसिजातायांदेवयन्तोदेवंद्योतमानंसूर्यंयष्टुमिच्छन्तोनरोयज्ञस्यनेतारोयजमानाः युगानि युगशब्दःकालवाची तेनचतत्रकर्तव्यानिकर्माणिलक्ष्यन्ते यथादर्शपूर्णमासाविति । अग्निहोत्रादीनिकर्माणिवितन्वतेविस्तारयन्ति यद्वा देवयन्तोदेवयागार्थंधनमात्मनइच्छन्तोयजमानपुरुषाः युगानिहलावयवभूतानिकर्षणायवितन्वतेप्रसारयन्ति तामुषसंअनुगच्छन्तीत्यर्थः एवंविधंभद्रंकल्याणंसूर्यंभवि भद्रायकल्याणरूपायकर्मफलायस्तुमइतिशेषः यद्वा देवकामायजमानाः युगानियुग्मानिभूत्वापत्नीभिःसहिताःसन्तोभद्रंकल्याणं अग्निहोत्रादिकंकर्मभद्रायतत्फलार्थंप्रतिप्रत्येकंयस्यांउषसिप्रवृत्तायांवितन्वतेविस्तारयन्ति॥ मर्यः मृङ्प्राणत्यागे छन्दसिनिष्टक्र्येत्यादौयत्प्रत्ययान्तोनिपात्यते यतोनावइत्याद्युदात्तत्वम् । युगानि युजेःकर्मणिघञ् युगशब्दःकालविशेषेरथाद्युपकरणेचेत्युञ्छादिषुपाठात् गुणाभावोन्तोदात्तत्वं च । वितन्वते तनुविस्तारे तनादिकृञ्भ्यउः सहेतियोगविभागात्तिङोपसर्गस्यसमासेसति समासस्येत्यन्तोदात्तत्वम् ॥ २ ॥

२. जैसे पुरुष स्त्री का अनुगमन करता है, वैसे ही सूर्य भी दीप्तिमती उषा के पीछे-पीछे आते हैं। इसी समय देवाभिलाषी मनुष्य बहु-युग-प्रचलित यज्ञ-कर्म का विस्तार करते हैं; सुफल के लिए कल्याण-कर्म को सम्पन्न करते हैं। तृतीयामृचमाह—

भद्राअश्वाहरितःसूर्यस्यचित्राएतग्वाअनुमाद्यासः ।
नमस्यन्तोदिवआपृष्ठमस्थुःपरिद्यावापृथिवीयन्तिसद्यः ॥ ३ ॥

भद्राः । अश्वाः । हरितः । सूर्यस्य । चित्राः । एतऽग्वाः ।
अनुऽमाद्यासः । नमस्यन्तः । दिवः । आ । पृष्ठम् । अस्थुः । परि ।
द्यावापृथिवी इति । यन्ति । सद्यः ॥३॥

भद्राः कल्याणाअश्वाएतग्वाइत्येतदुभयमश्वनाम तत्रैकंक्रियापरंयोजनीयं अश्वाः तुरगाः व्यापनशीलावाहरितोहर्तारः चित्राविचित्रावयवाः अनुमाद्यासः अनुक्रमेणसर्वैस्तुत्यामादनीयाःएवंभूताः सूर्यस्यएतग्वाअश्वाः यद्वा एतंएतव्यंगन्तव्यंमार्गंगन्तारोश्वाः एतंशबलवर्णंनी-

लवर्णांवाप्राप्नुवन्तोऽश्वाः नमस्यन्तः अस्माभिर्नमस्यमानाःसन्तः दिवोन्तरिक्षस्यपृष्ठंउपरिप्रदेशं पूर्वभागलक्षणंआअस्थुः आतिष्ठन्ति प्राप्नुवन्ति यद्वा हरितोरसहरणशीलारश्मयःभद्रादिविशेषणविशिष्टाःदिवः पृष्ठंनभस्तलंआतिष्ठन्ति आस्थायच द्यावापृथिवीद्यावापृथिव्यौसद्यस्तदानीमेवएकेनाह्नापरियन्तिपरितोगच्छन्ति व्याप्नुवन्तीत्यर्थः॥ अश्वाः अशूव्याप्तौ अशूपुषीत्यादिना क्वन्। एतग्वाः इण्गतौ असिहसीत्यादिनाकर्मणितन्प्रत्ययः गमेरौणादिकोभावेड्वप्रत्ययः एतव्यंमति ग्वोगमनंयेषांतेतथोक्ताः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्। अनुमाद्यासः मदिस्तुतौ अस्माण्ण्यन्तादचोयत् यतोनावइत्याद्युदात्तत्वम्। नमस्यन्तः नमोवरिवइतिपूजार्थेक्यच् व्यत्ययेनकर्मणिकर्तृप्रत्ययः। अस्थुः तिष्ठतेश्छान्दसोवर्तमानेलुङ् गातिस्थेतिसिचोलुक् आतइतिझेर्जुस्॥ ३॥

३. सूर्य के कल्याण-रूप हरि नाम के विचित्र घोड़े इस पथ से जाते हैं। वे सबके स्तुति-भाजन हैं। हम उनको नमस्कार करते हैं। वे आकाश के पृष्ठ-देश में उपस्थित हुए हैं। वे घोड़े तुरत ही द्यावा-पृथिवी—चारों दिशाओं का परिभ्रमण कर डालते हैं।

तत्सूर्यस्यदेवत्वंतन्महित्वंमध्याकर्तोर्विततंसंजभार।
यदेदयुक्तहरितःसधस्थादाद्रात्रीवासस्तनुतेसिमस्मै॥ ४॥

तत्। सूर्यस्य। देवऽत्वम्। तत्। महिऽत्वम्। मध्या। कर्तोः।
विऽततम्। सम्। जभार। यदा। इत्। अयुक्त। हरितः।
सधऽस्थात्। आत्। रात्री। वासः। तनुते। सिमस्मै॥ ४॥

सूर्यस्यसर्वप्रेरकादित्यस्य तद्देवत्वमीश्वरत्वम् स्वातंत्र्यमितियावत् महित्वं महत्वम् माहात्म्यं चतदेव तच्छब्दश्रुतेर्यच्छब्दाध्याहारः यत्कर्तोः कर्मनामैतत् प्रारब्धापरिसमाप्तस्य कृष्यादिलक्षणस्यकर्मणोमध्यामध्येअपरिसमाप्तेएवतस्मिन्कर्मणिविततंविस्तीर्णंस्वकीयंरश्मिजालंअस्तंगच्छन्सूर्यः संजभार अस्माल्लोकात्स्वात्मनि उपसंहरति कर्मकरश्चप्रवृत्तं अपरिसमाप्तमेवविसृजति अस्तंयन्तंसूर्यं दृष्ट्वा ईदृशं स्वातंत्र्यंमहिमाचसूर्यव्यतिरिक्तस्यकस्यास्ति नकस्यापि सूर्यएवेदृशंस्वातंत्र्यंमहिमानंचावगाहते अपिच इदित्यवधारणे यदेत् यस्मिन्नेवकाले हरितोरसहरणशीलान् स्वरश्मीन् हरितवर्णानश्वान्वासधस्थात्सहस्थानादस्मात्पार्थिवाल्लोकादादायअयुक्तअन्यत्र संयुक्तान्करोति यद्वा युजिःकेवलोपिविपूर्वोद्रष्टव्यः यदैवासौस्वरश्मीन् अश्वान्वा सधस्थात् सहतिष्ठत्यस्मिन्नितिसधस्थोरथः तस्मादयुक्त अमुञ्चत् आत्अनन्तरमेवरात्रीनिशा वासः आच्छादयितृ तमः सिमस्मै सिमशब्दःसर्वशब्दपर्यायः सप्तम्यर्थेचतुर्थी सर्वस्मिन्लोकेतनुतेविस्तारयति यद्वा वासोवासरमहस्तत्सर्वस्मादस्माल्लोकादानीयरात्री

तमस्तनुते अत्रनिरुक्तम्—तत्सूर्यस्यदेवत्वंतन्महित्वंमध्येयत्कर्मणांक्रियमाणानांविततंसंह्रियते-यदासावयुङ्क्तहरणानादित्यरश्मीन्हरितोश्वानितिवाथरात्रीवासस्तनुतेसिमस्मैवेसरमहरवयुवती-सर्वस्मादिति[1] ॥ महित्वम् महपूजायाम् औणादिकइन्प्रत्ययः तस्यभावस्त्वतलौ । मध्या मध्यशब्दात्सप्तम्येकवचनस्यसुपांसुलुगितिडादेशः । कर्तोः करोतेरौणादिकस्तोसुन्प्रत्ययः । विततं विपूर्वात्तनोतेःकर्मणिनिष्ठा उदित्त्वेन क्त्वाप्रत्ययेइटोविकल्पनात् यस्यविभाषेतीट्प्रतिषेधः गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम् । जभार हृग्रहोर्भश्छन्दसीतिभत्वम् । अयुक्त युजेर्लुङि झलोझलीतिसिचोलोपः । सधस्थात् घञर्थेकविधानमितिअधिकरणेकप्रत्ययः सधमादस्थयोश्छन्दसीतिसधादेशः दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वम् । रात्री रात्रेश्चाजसावितिङीप् ॥ ४ ॥

४. सूर्यदेव का ऐसा ही देवत्व और माहात्म्य है कि वे मनुष्यों के कर्म समाप्त होने के पहले ही अपने विशाल किरण-जाल का उपसंहार कर डालते हैं। जिस समय सूर्य अपने रथ से हरि नाम के घोड़ों को खोलते हैं, उस समय सारे लोकों में रात्रि अन्धकार-रूप आवरण विस्तृत करती है।

तन्मित्रस्यवरुणस्याभिचक्षेसूर्योरूपंकृणुतेद्योरुपस्थे ॥
अनन्तमन्यद्रुशदस्यपाजःकृष्णमन्यद्धरितःसंभरन्ति ॥ ५ ॥

तत् । मित्रस्य । वरुणस्य । अभिऽचक्षे । सूर्यः । रूपम् । कृणुते । द्योः । उपऽस्थे । अनन्तम् । अन्यत् । रुशत् । अस्य । पाजः । कृष्णम् । अन्यत् । हरितः । सम् । भरन्ति ॥ ५ ॥

तत्तदानींउदयसमये मित्रस्य वरुणस्य एतदुभयोपलक्षितस्य सर्वस्यजगतः अभिचक्षे आभिमुख्येन द्योर्नभसउपस्थे उपस्थानेमध्ये सूर्यःसर्वस्यप्रेरकः सवितारूपं सर्वस्यनिरूपकंप्रकाशकं तेजः कृणुतेकरोति अपिचास्यसूर्यस्य हरितोरसहरणशीलारश्मयः हरिद्वर्णाअश्वावा अनन्तं अवसानरहितं कृत्स्नस्य जगतोव्यापकं रुशद्दीप्यमानंश्वेतवर्णम् पाजः बलनामैतत् अविबलस्यापिनैशस्यतमसोनिवारणेसमर्थं अन्यत्तमसोविचक्षणंतेजःसंभरन्ति अहनि स्वकीयगमनेननिष्पादयन्ति तथाकृष्णं कृष्णवर्णं अन्यत्तमः स्वकीयापगमनेन रात्रौअस्यरश्मयोऽप्येवंकुर्वन्ति किमुवक्तव्यं तस्यमाहात्म्यमितिसूर्यस्यस्तुतिः ॥ अभिचक्षे संपदादिलक्षणोभावेक्विप् कृदुत्तरपदप्रकृतिस्वरत्वम् । द्योः ङसिङसोश्चेतिपूर्वरूपता । उपस्थे घञर्थेकविधानमितिकप्रत्ययः

---

1 नि० ४. ११.।

स्वामी निष्कंटक घर में प्रवेश करता है, मैं भी वैसे ही नेत्रों से स्पष्ट देखकर और दीर्घ आयु भोगकर बुढ़ापा पाऊँ।

मध्वः सोमस्याश्विना मदाय प्रत्नो होता विवासते वाम्।
बर्हिष्मती रातिर्विश्रिता गीरिषा यातं नासत्योप वाजैः ॥ १ ॥

मध्वः। सोमस्य। अश्विना। मदाय। प्रत्नः। होता। आ। विवासते। वाम्। बर्हिष्मती। रातिः। विऽश्रिता। गीः। इषा। यातम्। नासत्या। उप। वाजैः ॥ १ ॥

अश्विना हेअश्विनौ मध्वोमधुमाधुर्योपेतेनसोमस्यसोमेनमदाययुवयोर्मदार्थंप्रत्नश्चिरंतनो-होताहोमनिष्पादकोयजमानः वांयुवांआविवासते विवासतिःपरिचरणकर्मा आङ्मर्यादायाम् यथाशास्त्रंपरिचरति अपिचरातिर्दातव्यंहविः बर्हिष्मतीआस्तीर्णेनबर्हिषायुक्तंयुष्मदर्थंबर्हिष्या-सादितमित्यर्थः तथागीः स्तुतिलक्षणावाक्च विश्रिताऋत्विक्षुसमवेता तैःस्तुतिरपिक्रियतइत्य-र्थः अतोहेनासत्यावश्विनौ इषाअस्मभ्यंदातव्येनान्नेन वाजैर्बलैश्चसहयुवां उपयातंअस्मत्समीपं प्राप्नुतम् ॥ मध्वः सुपांसुपोभवन्तीतितृतीयार्थेषष्ठी जसादिषुछन्दसिवावचनमितिघेर्ङितीतिगु-णाभावेयणादेशः । मदाय मदीहर्षे मदोनुपसर्गेइत्यप् । रातिः रादाने कर्मणिक्तिन् मन्त्रेवृषेत्या-दिनातस्योदात्तत्वम् । विश्रिता श्रिञ्सेवायाम् कर्मणिनिष्ठा गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम् ॥ १ ॥

१. अश्विद्वय, तुम्हारे चिरन्तन होता तुम्हारे हर्ष के लिए मधुर सोमरस के साथ तुम्हारी अर्चना करता है। कुश के ऊपर हव्य स्थापित किया हुआ है; ऋत्विकों-द्वारा स्तुत और प्रस्तुत हुआ है। नासत्यद्वय, अन्न और बल लेकर पास आओ।

द्वितीयामृचमाह—

यो वामश्विना मनसो जवीयान्रथः स्वश्वो विश आजिगाति।
येन गच्छथः सुकृतो दुरोणं तेन नरा वर्तिरस्मभ्यं यातम् ॥ २ ॥

यः। वाम्। अश्विना। मनसः। जवीयान्। रथः। सुऽअश्वः। विशः। आऽजिगाति। येन। गच्छथः। सुऽकृतः। दुरोणम्। तेन। नरा। वर्तिः। अस्मभ्यम्। यातम् ॥ २ ॥

तत्रप्रथमामृचमाह—

नासत्याभ्यांबर्हिरिवप्रवृंजेस्तोमाँइयर्म्यभ्रियेववातः ।
यावर्भगायविमदायजायांसेनाजुवान्यूहतूरथेन ॥ १ ॥

नासत्याभ्याम् । बर्हिःऽइव । प्र । वृञ्जे । स्तोमान् । इयर्मि ।
अभ्रियाऽइव । वातः । यौ । अर्भगाय । विऽमदाय । जायाम् ।
सेनाऽजुवा । निऽऊहतुः । रथेन ॥ १ ॥

बर्हिरिव यथाकश्चिद्यजमानोयागार्थं बर्हिःप्रवृंजेप्रकर्षेणअन्यूनातिरिक्तंयागायपर्याप्तंदर्भं वृक्तेछिनत्ति संपादयतीतियावत् एवमहंनासत्याभ्यां अश्विभ्यांस्तोमान्स्तुतीः इयर्मिसंपादयामि एतदेवविशदीक्रियते अभ्रियेव यथाअभ्रियाणिअभ्रेषुमेघेषुअवस्थितानि उदकानिवातोवायुर्वर्षणार्थंबहुशःप्रेरयति एवमहंअश्विभ्यांस्तोत्राणिइयर्मि बहुशःप्रेरयामि कीदृशावश्विनौ अर्भगायबालायस्वयंवरलब्धभार्यायविमदायएतत्संज्ञायराजर्षये मध्येमार्गंस्वयंवरार्थंमागतैस्तामलभमानैरन्यैर्नृपैः सहयोद्धुमशक्नुवतेपितस्मैसेनाजुवाशत्रुसेनायाःप्रेरकेणशत्रुभिर्दुष्प्रापेणरथेनयावश्विनौजायांभार्यांपरैरनाक्रान्तांन्यूहतुः शत्रून्निहत्यतदीयंगृहंप्रापयाम्।सतुः ताभ्यामित्यर्थः॥ नासत्याभ्यां सत्सुभवौसत्यौनसत्यौअसत्यौनअसत्यौनासत्यौ नभ्राण्नपादित्यादिनानञःप्रकृतिभावः अव्ययपूर्वपदप्रकृतिस्वरत्वम् । वृञ्जे वृजीवर्जने आदादिकः इदित्वान्नुम् लोपस्तआत्मनेपदेष्वितितलोपः । इयर्मि ऋगतौ जौहोत्यादिकः अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वम् अभ्यासस्यासवर्णेइतीयङ् । अभ्रियाइव समुद्राभ्राद्घइतिभवार्थेघः घस्येयादेशः छन्दसिबहुलमितिशेर्लोपः । अर्भगाय अर्तिगृभ्यांभन्इत्यर्तेर्भन् अर्भएवार्भकः संज्ञायांकन् छान्दसोगकारः अपरआह अर्भमल्पंगायतीत्यर्भकः कैगैशब्दे गापोष्टक् आतोलोपइटिचेत्याकारलोपः तदेतत्पदकृतः शाकल्यस्याभिमतम् । सेनाजुवा जुइतिसौत्रोधातुर्गत्यर्थः अस्मादन्तर्भावितण्यर्थात् क्विब्वचिप्रच्छीत्यादिनाक्विप्दीर्घौ तन्वादित्वादुवङ् । न्यूहतुः वहप्रापणे लिट्यतसियजादित्वात्संप्रसारणम् यद्वृत्तान्नित्यमितिनिघातप्रतिषेधः ॥ १ ॥

१. यज्ञ के लिए जिस प्रकार यजमान कुश का विस्तार करता है तथा वायु मेघ को नाना दिशाओं में प्रेरित करती है, उसी प्रकार मैं नासत्यद्वय या अश्विद्वय को प्रभूत स्तोत्र प्रेरित करता हूँ। अश्विनीकुमारों ने शत्रु-सेना-द्वारा दुष्प्राप्य रथ-द्वारा युवक विमद राजर्षि की, स्वयंवर में प्राप्त, स्त्री को विमद के पास पहुँचा दिया था।

वीळुपत्मभिराशुहेमभिर्वादेवानांवाजूतिभिःशाशदाना ।
तद्रासभोनासत्यासहस्रमाजायमस्यप्रधनेजिगाय ॥ २ ॥

वी॒ळुप॑त्मऽभिः । आ॒शु॒हेम॑ऽभिः । वा॒ । दे॒वाना॑म् । वा॒ । जू॒तिऽभिः॑ । शाश॑दाना । तत् । रास॑भः । ना॒स॒त्या॒ । स॒हस्र॑म् । आ॒जा । य॒मस्य॑ । प्र॒ऽध॒ने । जि॒गा॒य॒ ॥ २ ॥

वीळुपत्मभिः वीळुइतिबलनाम बलवदुत्पतनैः आशुहेमभिः शीघ्रगमनैः वाशब्दःसमुच्चये हेनासत्याअश्विनौ एवंभूतैरश्वैश्चदेवानांइन्द्रादीनांजूतिभिः प्रेरणैश्च शाशदानाशाशद्यमानयोः अत्यर्थंप्रेर्यमाणयोर्युवयोः वाहनभूतोयोरासभःप्रजापतिनादत्तः सयमस्यवैवस्वतस्यप्रीतिकरेप्र- धने प्रकीर्णधनोपेते आजा आजौसंग्रामेतवशत्रूणांसहस्रंजिगायजितवान् वैवस्वतोहिबहूनांमर- णहेतुनासंग्रामेणतुष्टोभवति यद्वा जेतव्यत्वेनप्रजापतिनानिहितमृक्सहस्रंशीघ्रगमनयुक्तोरासभः जिगायजयेनालभत अन्येभ्योदेवेभ्यःपूर्वमेवाजिंप्राप्ययुवांजयंप्रापयामास तथाचास्मिन्नर्थे- प्रजापतिर्वैसोमायराज्ञेदुहितरंप्रायच्छदित्यादिकंब्राह्मणमनुसन्धेयम्[1] ॥ वीळुपत्मभिः वीळुबल- वत्पतन्तीतिवीळुपत्मानः । आशुहेमभिः आशुशीघ्रंहिन्वन्तिगच्छन्तीत्याशुहेमानस्तैः हिगतौवृ- द्धौच अन्येभ्योपिदृश्यन्तइतिमनिन् कृदुत्तरपदप्रकृतिस्वरत्वम् । जूतिभिः ऊतियूतिजूतीत्यादि- नाक्तिनउदात्तत्वम् । शाशदाना शद्लृशातने अत्रगत्यर्थः धातूनामनेकार्थत्वात् अस्माद्यङन्ताल्लटः शानच् तस्यछन्दस्युभयथेत्यार्धधातुकत्वाद्यक्यनभावः अतोलोपयलोपौ अभ्यस्तानामादि- रित्याद्युदात्तत्वम् सुपांसुलुगितिविभक्त्याःपूर्वसवर्णदीर्घः । आजा तेनैवसूत्रेणडादेशः । जिगाय जिजये सन्लिटोर्जेरित्यभ्यासादुत्तरस्यकुत्वं गकारः ॥ २ ॥

२. नासत्यद्वय, तुम लोग बलवान् और शीघ्रगामी अश्व-द्वारा प्रीति और देवों के उत्साह से उत्साहित हुए थे। तुम्हारे रथ-वाहक गर्दभ ने यम के प्रिय सहस्र युद्धों में जय-लाभ किया था ।

तृतीयामृचमाह—

तुग्रो॑ ह भु॒ज्युम॑श्विनोदमे॒घे र॒यिं न कश्चि॑न्ममृ॒वाँ अवा॑हाः ।
तमू॑हथुर्नौ॒भिरा॑त्म॒न्वती॑भिरन्तरिक्ष॒प्रुद्भि॒रपो॑दकाभिः ॥ ३ ॥

तुग्रः॑ । ह॒ । भु॒ज्युम् । अ॒श्वि॒ना॒ । उ॒द॒ऽमे॒घे । र॒यिम् । न । कः । चि॒त् । म॒मृ॒ऽवान् । अव॑ । अ॒हाः॒ । तम् । ऊ॒ह॒थुः॒ । नौ॒भिः । आ॒त्म॒न्ऽवती॑भिः । अ॒न्त॒रि॒क्ष॒प्रुत्ऽभिः॑ । अप॑ऽउदकाभिः ॥ ३ ॥

अत्रेयमाख्यायिका तुग्रोनामअश्विनोःप्रियःकश्चिद्राजर्षिः सचद्वीपान्तरवर्तिभिःशत्रु- भिरत्यन्तमुपद्रुतःसन्तेषांजयायस्वपुत्रंभुज्युंसेनयासहनावाप्राहैषीत् साचनौर्मध्येसमुद्रमतिदू-

---

१ ऐ० ब्रा० ४. ७. ।

रंगतावायुवशेनभिन्नासीत् तदानींसभुज्युः शीघ्रमश्विनौतुष्टाव स्तुतौचतौसेनयासहितंआत्मी-यासुनौषुआरोप्यपितुस्तुग्रस्यसमीपंत्रिभिरहोरात्रैःप्रापयामासतुरिति । अयमर्थइदमादिकेनऋ-चेनप्रतिपाद्यते हशब्दःप्रसिद्धौ तुग्रःखलुपूर्वंशत्रुभिःपीडितःसन्तज्जयार्थंउदमेघे उदकैर्मिह्यतेसि-च्यतइत्युदमेघःसमुद्रः तस्मिन् भुज्युंएतत्संज्ञंप्रियंपुत्रंअवाहाः नावागन्तुंपर्यत्याक्षीत् तत्रदृष्टा-न्तः—ममृवान्म्रियमाणःसन्धनलोभीकश्चिन्मनुष्यः रयिंन यथाधनंपरित्यजतितद्वत् हेअश्विनौ तंचभुज्युंमध्येसमुद्रंनिमग्नंनौभिःपितृसमीपंऊहथुः युवांप्रापितवन्तौ कीदृशीभिः आत्मन्वतीभिः आत्मीयाभिः युवयोःस्वभूताभिरित्यर्थः यद्वा धृतिरात्मा धारणवतीभिरित्यर्थः अन्तरिक्षप्रुद्भिः अतिस्वच्छत्वात्अन्तरिक्षेजलस्योपरिष्टाद्देवगन्त्रीभिःअपोदकाभिः सुश्लिष्टत्वादपगतोदकाभिः अप्रविष्टोदकाभिरित्यर्थः ॥ उदमेघे मिहसेचने कर्मणिघञ् न्यंक्वादीनांचेतिकुत्वम् उदकस्योदः संज्ञायाम् थाथादिनोत्तरपदान्तोदात्तत्वम्। ममृवान् मृङ्प्राणत्यागे लिटःक्वसुः क्रादिनिय-मात्प्राप्तस्येटोवस्वेकाजाद्घसामितिनियमादभावः । अहाः ओहाक्त्यागे लुङितिपि च्लेःसिच् आगमानुशासनस्यानित्यत्वात्सगिटौनक्रियेते बहुलंछन्दसीतिईडभावः हल्ङ्याब्भ्यइतिति-लोपः रुत्वविसर्गौ यद्वा मन्त्रेघसेतिच्लेर्लुक् च्लेर्लुक्त्वादिण्नक्रियते । नौभिः सावेकाचइति विभक्तेरुदात्तत्वम्। आत्मन्वतीभिः आत्मनोमतुप् मादुपधायाइतिवत्वम् अनोनुडितिनुट् नलो-पः ह्रस्वनुड्भ्यांमतुबितिमतुपउदात्तत्वम्। अन्तरिक्षप्रुद्भिः प्रुङ्गतौ क्विप्चेतिक्विप् ॥ ३ ॥

३. जैसे कोई म्रियमाण मनुष्य धन का त्याग करता है, वैसे ही तुग्र नाम के राजर्षि ने बड़े कष्ट से अपने पुत्र भुज्यु को, सेना के साथ, शत्रु-जय के लिए, नौका-द्वारा समुद्र (स्थित द्वीप) में भेजा। मध्य-समुद्र में निमग्न भुज्यु को, अश्विद्वय, तुमने अपनी नौका-द्वारा उग्र के पास पहुँचाया था। तुम्हारी नौका जल के ऊपर अन्तरिक्ष में चलनेवाली और अप्रविष्ट जलवाली है अर्थात् तुम्हारी नौका में जल नहीं पैठता।

तिस्रःक्षपस्त्रिरहातिव्रजद्भिर्नासत्याभुज्युमूहथुःपतङ्गैः ।
समुद्रस्यधन्वन्नार्द्रस्यपारेत्रिभीरथैःशतपद्भिःषळश्वैः ॥ ४ ॥

तिस्रः । क्षपः । त्रिः । अहा । अतिव्रजत्ऽभिः । नासत्या । भुज्युम् । ऊहथुः । पतङ्गैः । समुद्रस्य । धन्वन् । आर्द्रस्य । पारे । त्रिऽभिः । रथैः । शतपत्ऽभिः । षट्ऽअश्वैः ॥ ४ ॥

हेनासत्यानासत्यौ सेनयासहोदकेनिमग्नंभुज्युंतिस्रःक्षपःत्रिसंख्याकारात्रीःत्रिरहात्रिवारमा-वृत्तानित्र्यहानिचअतिव्रजद्भिः अतिक्रम्यगच्छद्भिः एतावन्तंकालंअतिव्याप्यवर्तमानैःपतङ्गैः पतद्भिःत्रिभिःत्रिसंख्याकैःरथैःऊहथुः युवांऊढवन्तौ क्वेतिचेदुच्यते समुद्रस्य अंबुराशेर्मध्येधन्वन् धन्वनिजलवर्जितप्रदेशे आर्द्रस्यउदकेनआर्द्रीभूतस्यसमुद्रस्यपारेतीरदेशेच कथंभूतैःरथैःशतपद्भिः

शतसंख्याकैश्चक्रलक्षणैःपादैरुपेतैः षडश्वैःषड्भिरश्वैर्युक्तैः॥तिस्रः त्रिचतुरोः स्त्रियामितित्रिशब्दस्य तिसृआदेशः सचान्तोदात्तः अचिरऋतइतिरेफादेशेउदात्तयणोहल्पूर्वादितिविभक्तेरुदात्तत्वम्। क्षपः विभक्त्यन्तस्यछान्दसंह्रस्वत्वं यद्वा शसिआतइतियोगविभागादधातोरप्याकारलोपः। अह्ना शेश्छन्दसिबहुलमितिशेर्लोपः। पतंगैः पतॢगतौ पतेरंगच्। धन्वन् धविर्गत्यर्थः इदित्त्वान्नुम् क-निन्युवृषीत्यादिनाकनिच् सुपांसुलुगितिसप्तम्यालुक्। शतपद्भिः शतंपादायेषांति संख्यासुपूर्वस्ये-तिपादशब्दस्यान्त्यलोपःसमासान्तः अयस्मयादित्वेनभत्वात् पादःपदितिपद्भावः यद्वा पादसमा-नार्थःपच्छब्दःप्रकृत्यन्तरंद्रष्टव्यम्॥ ४॥

४. नासत्यद्वय, तुमने शीघ्रगामी शतचक्र-विशिष्ट और छः अश्वों से युक्त रथ-त्रय पर भुज्यु को वहन किया था। वह रथ तीन दिन, तीन रात तक अर्द्ध सागर के जल-शून्य प्रदेश में लाये थे।

अनारम्भणेतदवीरयेथामनास्थानेअग्रभणेसमुद्रे।
यदश्विनाऊहथुर्भुज्युमस्तंशतारित्रांनावमातस्थिवांसम्॥५॥८॥

अनारम्भणे। तत्। अवीरयेथाम्। अनास्थाने।
अग्रभणे। समुद्रे। यत्। अश्विनौ। ऊहथुः। भुज्युम्। अस्तम्।
शतऽअरित्राम्। नावम्। आतस्थिऽवांसम्॥ ५॥ ८॥

हेअश्विना अश्विनौ अनारंभणेआलंबनरहितेसमुद्रेतत्कर्मअवीरयेथां विक्रान्तंकृतव-न्तौयुवां अनारंभणत्वमेवस्पष्टीकरोति अनास्थानेआस्थीयतेस्मिन्निति आस्थानोभूप्रदेशः तद्रहितेस्थातुमशक्येजलेइत्यर्थः अग्रभणे अग्रहणे हस्तेनग्राह्यंशाखादिकमपियत्रनास्तितस्मि-न्नित्यर्थः किंपुनस्तत्कर्म भुज्युंसमुद्रेमग्नंशतारित्रांबह्वरित्रांयैःकाष्ठैःपार्श्वतोबद्धैःजलालोडनेस-तिनौःशीघ्रंगच्छति तान्यरित्राणि ईदृशांनावंआतस्थिवांसंआस्थितवन्तंआरूढवन्तंकृत्वा अस्तं गृहनामैतत् पितुस्तुग्रस्यगृहंप्रतियदूहथुः तत्प्रापणमन्यैर्दुःशक्यं युवां समुद्रमध्येकृतवन्ता-वित्यर्थः॥अनारंभणे आरभ्यतइत्यारंभणम् कृत्यल्युटोबहुलमितिकर्मणिल्युट् नञ्सुभ्यामित्यु-त्तरपदान्तोदात्तत्वम्। अवीरयेथां शूरवीरविक्रान्तौ चुरादिरात्मनेपदी। अनास्थानाग्रभणयोः पूर्ववल्ल्युट्स्वरौ अयंतुविशेषः हृग्रहोर्भइतिभत्वम्। अस्तं अस्यतेअस्मिन्सर्वमित्यस्तंगृहम् असिहसीत्यादिनातन्प्रत्ययः। शतारित्रां ऋगतौ अर्तिलूधूसूखनसहइतिकरणेइत्रप्रत्ययः बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्॥ ५॥

५. अश्विद्वय, तुम लोगों ने अवलम्बन-शून्य, भूप्रदेश-रहित, ग्रहणीय शाखादि-वस्तु-रहित सागर में यह कार्य किया था। सौ डाँड़ोंवाली नौका में भुज्यु को बैठाकर तुग्र के पास लाये थे।

॥ इतिप्रथमस्याष्टमेष्टमोवर्गः॥ ८॥

षष्ठीमृचमाह—

यमश्विनाददथुःश्वेतमश्वमघाश्वायशश्वदित्स्वस्ति।
तद्वांदात्रंमहिकीर्तेन्यंभूत्पैद्वोवाजीसदमिद्धव्योअर्यः ॥ ६ ॥

यम्। अश्विना। ददथुः। श्वेतम्। अश्वम्। अघऽअश्वाय। शश्वत्।
इत्। स्वस्ति। तत्। वाम्। दात्रम्। महि। कीर्तेन्यम्। भूत्।
पैद्वः। वाजी। सदम्। इत्। हव्यः। अर्यः ॥ ६ ॥

अत्रेदमाख्यायते—पेदुर्नामकश्चित् सचाश्विनौतुष्टाव तस्मैप्रीतौकंचित्श्वेतवर्णं अश्वं दत्तवन्तौ सचाश्वः प्रौढंजयंचकारेति एतदत्रप्रतिपाद्यते—हेअश्विनाअश्विनौ युवांअघाश्वायअहन्तव्याश्वायपेदुनाम्ने राजर्षये यंश्वेतवर्णंअश्वंददथुः दत्तवन्तौ सोश्वः तस्मैस्वस्तिजयलक्षणं मङ्गलं शश्वदित् नित्यमेवचकार वांयुवयोस्तद्दात्रंदानं महिमहत् अतिगभीरं अतएवकीर्तेन्यं सर्वैःकीर्तनीयंप्रशस्यं भूत्अभूत् तस्मात् पैद्वः पेदोःसंबन्धीपतनशीलः शीघ्रगामीवा अर्यः शत्रूणमीरयितायुद्धेषुप्रेरयितव्योवा वाजीवेजनवान्सोश्वः सदमित् सदैवहव्यः अस्माभिरप्याह्वातव्यः॥ दात्रं ददातेर्भावेऔणादिकस्त्रप्रत्ययः। महि महपूजायाम् इन्सर्वधातुभ्यइतीन्। कीर्तेन्यम् कृतसंशब्दने कृत्यार्थेतवैकेन्केन्यत्वनइतिकेन्यप्रत्ययः ऋतइद्धातोरितीत्वम्। भूत् बहुलंछन्दस्यमाङ्योगेपीत्यडभावः। पैद्वः पेदोःसंबन्धी तस्येदमित्यण्प्रत्ययः छान्दसोवर्णलोपः। हव्यः ह्वयतेरचोयदितियत् बहुलंछन्दसीतिसंप्रसारणम् गुणःधातोस्तन्निमित्तस्यैवेत्यवादेशः। अर्यः ऋगतौ अर्यादयश्चेत्यौणादिकोयत् व्यत्ययेनान्तोदात्तत्वम् ॥ ६ ॥

६. अश्विद्वय, अवध्य अश्व के पति पेदु नाम के राजर्षि को तुमने जो श्वेतवर्ण अश्व दिया था, उस अश्व ने पेदु का नित्यप्रति जय-रूप मंगल साधन किया था। तुम्हारा वह दान महान् और कीर्तनीय हुआ था। पेदु का वह उत्तम अश्व हमारा सदा पूजनीय है।

सप्तमीमृचमाह—

युवंनरास्तुवतेपज्रियायकक्षीवतेअरदतंपुरंन्धिम्।
कारोतराच्छफादश्वस्यवृष्णःशतंकुंभाँअसिञ्चतंसुरायाः ॥ ७॥

युवम्। नरा। स्तुवते। पज्रियाय। कक्षीवते। अरदतम्। पुरम्ऽधिम्।
कारोतरात्। शफात्। अश्वस्य। वृष्णः। शतम्। कुम्भान्।
असिञ्चतम्। सुरायाः ॥ ७ ॥

अत्रेयमाख्यायिका—कक्षीवानृषिः पुरातमसातिरोहितज्ञानःसन् ज्ञानार्थमश्विनौतुष्टाव तस्मैअश्विनौप्रभूतांधियंदत्तवन्ताविविततदाह—हेनरा नेतारावश्विनौ युवंयुवांपज्रियाय पज्राइत्यङ्गिरसामाख्या पज्रावाअङ्गिरसइत्याम्नातत्वात्। तेषांकुलेजातायकक्षीवते कक्ष्यारज्जुरश्वस्य तद्वतेतत्संज्ञायस्तुवतेयुवयोःस्तुतिंकुर्वतेमहांपुरन्धिंप्रभूतांधियंबुद्धिंअरदतंव्यलिखतम् यथासर्वार्थगोचराभवति तथाकृतवन्तावित्यर्थः अपिचकारोतरात् कारोतरोनामवेदलश्वर्मवेष्टितोभाजनविशेषः यस्मिन्सुरायाःस्रावणंक्रियते लुप्तोपममेतत् कारोतरात् यथासुरायाःसंपादकाः तांस्रावयन्ति एवमेवयुवांवृष्णःसेचनसमर्थस्ययुष्मदीयस्याश्वस्यशफात् खुरात्सुरायाः शतंकुम्भान् असंख्यातान् सुराघटानअसिञ्चतम् अक्षारयतम् यद्वा सिञ्चतिःपूरणार्थः कारोतरस्थानीयात् युष्मदीयाश्वखुराद्यासुराप्रवहतितयाअसंख्यातान् घटान् असिञ्चतंअपूरयतम् येजनाः सौत्रामण्यादिकर्मणियुष्मद्यागायसुरांयाचन्तेतेषामित्यर्थः॥ स्तुवते स्तौतेर्लटःशतृ अदादित्वाच्छपोलुक् शतुरनुमइतिविभक्तेरुदात्तत्वम्। पज्रियाय पज्रशब्दात् शैषिकोघच्। कक्षीवते आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवदितिनिपातनात्कक्ष्यशब्दस्यसंप्रसारणंवत्वंच । अरदतम् रदविलेखने। पुरन्धिम् पुरन्धिर्बहुधीरितियास्कः। पृषोदरादित्वात्पुरन्धिभावः यद्वा पुरंपूरयितव्यं सर्वंविषयजातमस्यांधीयतेअवस्थाप्यतइतिपुरन्धिर्बुद्धिः कर्मण्यधिकरणेचेतिदधातेःकिःप्रत्ययः तत्पुरुषेकृतिबहुलमितिवचनादलुक् इदंतुव्युत्पत्तिमात्रम् वस्तुतःपृषोदरादिरेव । असिञ्चतम् षिचिर्क्षरणे तौदादिकः शेमुचादीनामितिनुम्॥ ७॥

७. नेतृद्वय, तुमने अङ्गिरा के कुल में उत्पन्न कक्षीवान् को, स्तुति करने पर, प्रचुर बुद्धि दी थी। सुरापात्र के आधार से जैसे सुरा निकाली जाती है, वैसे ही तुम्हारे सेचन-समर्थ अश्व के खुर से तुमने शतकुम्भ सुरा का सिञ्चन किया था।

अष्टमीमृचमाह—

हिमेनाग्निंघ्रंसमवारयेथांपितुमतीमूर्जमस्माअधत्तम्।
ऋबीसेअत्रिमश्विनावनीतमुन्निन्यथुःसर्वगणंस्वस्ति॥ ८॥

हिमेन। अग्निम्। घ्रंसम्। अवारयेथाम्। पितुऽमतीम्। ऊर्जम्। अस्मै। अधत्तम्। ऋबीसे। अत्रिम्। अश्विना। अवऽनीतम्। उत्। निन्यथुः। सर्वऽगणम्। स्वस्ति॥ ८॥

१ नि० ६.१३.।

अत्रेदमाख्यानम्—अत्रिमृषिमसुराः शतद्वारेपीडायन्त्रगृहेप्रवेश्यतुषाग्निनाअबाधिषत तदानींतेनऋषिणास्तुतौअश्विनौअग्निमुदकेनोपशमय्यतस्मात्पीडागृहादविकलेन्द्रियवर्गंसन्तंनिरगमयतामिति तदेतत्प्रतिपाद्यते—अश्विनाहेअश्विनौ हिमेनहिमवत्शीतोदकेनघ्रंसंदीप्यमानंअत्रेर्बाधनार्थंअसुरैःप्रक्षिप्तंतुषाग्निंअवारयेथांयुवांनिवारितवन्तौ शीतीकृतवन्तावित्यर्थः अपिचास्मैअसुरपीडयाकार्श्यंप्राप्तायात्रये पितुमतीं पितुरित्यन्ननाम अन्नयुक्तंऊर्जंबलप्रदंरसात्मकंक्षीरादिकंअधत्तंपुष्ट्यर्थंप्रायच्छतम् ऋबीसे अपगतप्रकाशेपीडायन्त्रगृहेअवनीतंअवाङ्मुखतयाअसुरैःप्रापितंअत्रिंसर्वगणं गणःसमूहः सर्वेषांइन्द्रियाणांपुत्रादीनांवागणेनोपेतं स्वस्तिअविनाशोयथाभवतितथाउन्निन्यथुः तस्माद्गृहादुद्गमय्ययुवांस्वगृहंप्रापितवन्तौ यद्वा हिमेनशीतेनवृष्ट्युदकेन अग्निंअग्निवत्तीक्ष्णं घ्रंसंअहर्नामैतत् सामर्थ्याद्वनिदाघकालीनंअहः अवारयेथां तस्याह्नस्तैक्ष्ण्यंनिवारितवन्तौ अपिचास्मैअग्नयेपितुमतींचरुपुरोडाशादिलक्षणान्नोपेतंऊर्जंबलकरं रसात्मकंउपस्तरणाभिघारणात्मकंघृतंअधत्तम् वृष्ट्युत्पादनेनाग्नेर्यागार्थंहवींषिनिष्पादितवन्तावित्यर्थः ऋबीसे अपगततेजस्केपृथिवीद्रव्येअवनीतंओषधीनांउत्पादनायअवस्तान्नीतंपार्थिवाग्निनापरिपक्वाउदकेनक्लिन्नात्द्योषधिवनस्पतयोविरोहन्ति अत्रिंहविषांअत्तारंओषधिवनस्पत्यादीनांवाएवंविधं अग्निंसर्वगणं व्रीह्याद्योषधिगणोपेतं हेअश्विनौयुवांस्वस्तिअविनाशोयथाभवतितथाउन्निन्यथुः व्रीह्याद्योषधिवनस्पतिरूपेणभूमेरुपरिष्टान्नीतवन्तौ कारणात्मनापार्थिवाग्नौवर्तमानंसर्वमोषधिवनस्पत्यादिकंअश्विनौप्रवर्षणेनव्यक्तीकृतवन्तावित्यर्थः अयंपक्षोयास्केनंहिमेनोदकेनेत्यादिनोक्तः ॥ पितुमतीम् ह्रस्वनुड्भ्यांमतुबितिमतुपउदात्तत्वम्। ऋबीसे अत्रयास्कः—ऋबीसमपगतभासमपचितभासमपहृतभासमनन्तर्हितभासंगतभासंवेति । पृषोदरादित्वादभिमतरूपस्वरसिद्धिः । अत्रिं अदभक्षणे अदेस्त्रिनिश्चेतिचशब्दात्त्रिप्। अवनीतम् गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम्। स्वस्ति असभुवि भावेक्तिन् छन्दस्युभयथेतिसार्वधातुकत्वादस्तेर्भूभावाभावः ॥ ८ ॥

८. तुमने हिम या जल-द्वारा शतद्वार-पीड़ा-यंत्र-गृह में फँसे हुए अत्रि की, चारों ओर की, असुरों-द्वारा प्रज्वालित और दीप्यमान अग्नि का निवारण किया था तथा अग्नि को अन्नयुक्त और बल-प्रद खाद्य दिया था। अश्विनीकुमारद्वय, अत्रि जो निम्नाभिमुख होकर अन्धकारमय पीड़ा-यंत्र-गृह में प्रक्षिप्त हुए थे, उन्हें तुमने संगियों के साथ सुख से वहाँ से उठाया था।

परांवतंनासत्यानुदेथामुच्चाबुध्नंचक्रथुर्जिह्मबारम्।
क्षरन्नापोनपायनायरायेसहस्रायतृष्यतेगोतमस्य ॥ ९ ॥

---

१ नि० ६. ३६. । २ नि० ६. ३५. ।

परां। अवतम्। नासत्या। अनुदेथाम्। उच्चाऽबुध्नम्। चक्रथुः। जिह्मऽबारम्। क्षरन्। आपः। न। पायनाय। राये। सहस्राय। तृष्यते। गोतमस्य॥ ९॥

अत्रेदमाख्यानम्—कदाचिन्मरुभूमौवर्तमानस्यस्तोतुर्गोतमस्यऋषेःसमीपं देशान्तरेवर्तमानं कूपंउत्खायाश्विनौप्रापयेताम् प्रापय्यचतंकूपंस्नानपानादिसौकर्यायउपरिमूलंअधोबिलंअवस्थापयतामिति। तदेतदाह—हेनासत्यासत्यस्वभावौसत्यस्यनेतारौनासिकाप्रभवौवा एतत्संज्ञावश्विनौ युवांअवतम् कूपनामैतत् अवस्तात्तंकूपंपरानुदेथां गोतमस्यऋषेःसमीपेप्रेरितवन्तौ। अनन्तरंतंकूपंउच्चाबुध्नं उच्चैरुपरिष्टाद्बुध्नोमूलंयस्यसतथोक्तः जिह्मबारं जिह्मंअधस्ताद्वर्तमानं वक्रंबारंद्वारंयस्यसतथोक्तः एवंगुणविशिष्टंचक्रथुः युवामकुरुथां तस्मात्कूपात्तृष्यतेपिपासवेगोतमस्य पायनायपानार्थं आपोन आपश्च अयंनशब्दश्चार्थे क्षरन्प्रवाहरूपेणनिरगमन् कीदृशस्य रायेहवींषिदत्तवते सहस्राय सहनशीलाय यद्वा सहस्रसंख्यायराये धनाय एतत्संख्यधनलाभार्थंचाक्षरन्॥ अनुदेथाम् णुदप्रेरणे तौदादिकः। जिह्मबारम् द्वारशब्दस्य पृषोदरादित्वात् बारादेशः। क्षरन् क्षरसञ्चलने बहुलंछन्दस्यमाङ्योगेपीत्यडभावः शपःपित्त्वादनुदात्तत्वम् तिङोलसार्वधातुकस्वरेणधातुस्वरः। पायनाय हेतुमतिणिच् शाच्छासाह्वेतियुक् भावेल्युट्। राये रादाने रातिददातीतिराः रायैऽैः ऊडिदमितिविभक्तेरुदात्तत्वम्। तृष्यते ञितृषापिपासायाम् श्यन् लटःशत् श्यनोनित्त्वादाद्युदात्तत्वम् षष्ठ्यर्थेचतुर्थीवक्तव्येतिचतुर्थी॥ ९॥

९. नासत्यद्वय, तुम मरुभूमि में गोतम ऋषि के पास कूप उठा लाये थे और कूप का तल-भाग ऊपर तया मुख-भाग नीचे किया था। उस कूप से तृष्णातुर गोतम के पान और सहस्र धन लाभ के लिए जल निर्गत हुआ था।

जुजुरुषोनासत्योतवव्रिंप्रामुञ्चतंद्रापिमिवच्यवानात्।
प्रातिरतंजहितस्यायुर्दस्रादित्पतिमकृणुतंकनीनाम्॥ १०॥ ९॥

जुजुरुषः। नासत्या। उत। वव्रिम्। प्र। अमुञ्चतम्। द्रापिम्ऽइव। च्यवानात्। प्र। अतिरतम्। जहितस्य। आयुः। दस्रा। आत्। इत्। पतिम्। अकृणुतम्। कनीनाम्॥ १०॥ ९॥

अत्रेदमाख्यानम्—वलीपलितादिभिर्च्यवनोजीर्णाङ्गः पुत्रादिभिःपरित्यक्तश्च्यवनाख्यऋषिःअश्विनौतुष्टाव स्तुवावश्विनौतस्मैऋषयेजरामपनमय्यपुनर्यौवनंअकुरुतामिति तदेतदाह—

हेनासत्यावश्विनौ जुजुरुषोजीर्णाच्च्यवनाच्च्यवनाख्यादृषेःसकाशात् वव्रिंकृत्स्नंशरीरंआवृत्याव-स्थितांजरांप्रामुञ्चतं प्रकर्षेणअमोचयतम् तत्रदृष्टान्तः—द्रापिमिव द्रापिरितिकवचस्याख्या यथाक-श्चित्कवचं कृत्स्नशरीरव्यापकं धृत्वापश्चाच्छरीरात्पृथक्करोतितद्वत् उतअपिचहेदस्राएतत्संज्ञौदर्श-नीयौवाश्विनौ जहितस्यपुत्रादिभिःपरित्यक्तस्यऋषेःआयुर्जीवनंप्रातिरतम् प्रावर्धयतम् प्रपूर्वस्ति-रतिर्वर्धनार्थः आदित्अनन्तरमेवयुवानंसन्तंकनीनांकन्यानांपतिंभर्तारंअकृणुतंअकुरुतम् ॥ जुजुरुषः जृष्वयोहानौ लिटःक्वसुः बहुलंछन्दसीत्युत्वम् द्विर्भावः पञ्चम्येकवचनेवसोःसंप्रसार-णमितिसंप्रसारणम् शासिवसिघसीनांचेतिषत्वम् । वव्रिं वृञ्वरणे आदृगमहनइतिकिप्रत्ययः । जहितस्य ओहाक्त्यागे कर्मणिनिष्ठा तस्यछन्दस्युभयथेतिसार्वधातुकत्वाद्यक् तस्यबहुलंछ-न्दसीतिश्लुः जहातेश्चेतीत्वम् । कनीनाम् रयेर्मतौबहुलमितिबहुलवचनात्कन्याशब्दस्यात्रसं-प्रसारणम् ॥ १० ॥

१०. अश्विद्वय, जैसे शरीर का आवरण (कवच आदि) खोल फेंका जाता है, वैसे ही तुमने जीर्ण च्यवन ऋषि की शरीरव्यापिनी जरा खोल फेंकी थी। दस्रद्वय, तुमने पुत्रादि-द्वारा परित्यक्त ऋषि के जीवन को बढ़ाया था; अनन्तर उन्हें कन्याओं का पति बना दिया था।

॥ इतिप्रथमस्याष्टमेनवमोवर्गः ॥ ९ ॥

एकादशीमृचमाह—

तद्वांनराशंस्यंराध्यंचाभिष्टिमन्नासत्यावरूथम् ।
यद्विद्वांसानिधिमिवापगूळ्हमुद्दर्शतादूपथुर्वन्दनाय ॥ ११ ॥

तत् । वाम् । नरा । शंस्यम् । राध्यम् । च । अभिष्टिऽमत् ।
नासत्या । वरूथम् । यत् । विद्वांसा । निधिम्ऽइव । अपऽगूळ्हम् ।
उत् । दर्शतात् । ऊपथुः । वन्दनाय ॥ ११ ॥

अत्रेदमाख्यानम्—वन्दनोनामकश्चिदृषिः सचासुरैःकूपेनिखायउत्तरीतुमशक्नुवन्नश्वि-नावस्तौत् तमश्विनौकूपादुज्जिन्यतुरितितदाह—नराआरोग्यस्यनेतारौहेनासत्यावश्विनौ वांयु-वयोःसंबन्धिअभिष्टिमत्अन्वेषणयुक्तं आभिमुख्येनप्राप्तव्यम् तथावरूथंवरणीयंकामयितव्यंत-त्कर्मशंस्यंअस्माभिःप्रशंसनीयंराध्यंआराधनीयंच किंपुनस्तत्कर्म विद्वांसाजानन्तौयुवांनिधिमि-वनिक्षिप्तंधनमिवअपगूळ्हंअरण्येनिर्जनेदेशे असुरैर्निगूढं वन्दनायवन्दनंऋषिंदर्शतात्अध्वगैः पिपासुभिःद्रष्टव्यात्कूपात्उदूपथुः उदहार्ष्टं एवंयदेतत्कूपादुद्धरणंतदित्यर्थः ॥ शंस्यं शंसुस्तुतौ अस्माण्ण्यन्तादचोयदितियत् यतोनावइत्याद्युदात्तत्वम् । अभिष्टिमत् अभिपूर्वादिषगतावित्यस्मा-द्भावेक्तिन् मन्त्रेवृषेतिक्तिनउदात्तत्वम् कृदुत्तरपदप्रकृतिस्वरत्वेनसएवशिष्यते शकन्ध्वादित्वात्पर-

रूपत्वम् तादौचेतितुगतिस्वरस्यसर्वविधीनांछन्दसिविकल्पितत्वादप्रवृत्तिः ततोमतुप् अन्तोदात्तादुत्तरस्यतस्यहस्वनुड्भ्यामित्युदात्तत्वम्। वरूथम् जॄवृञ्भ्यामूथन्। विद्वांसा सुपांसुलुगितिविभक्तेराकारः। अपगूळ्हम् गुहूसंवरणे कर्मणिनिष्ठा यस्यविभाषेतीट्प्रतिषेधः ढत्वधत्वष्टुत्वढ्लोपदीर्घाः गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम्। दर्शताव भृमृदृशीत्यादिनाअतच्। ऋपथुः तुवपूर्वीजतन्तुसन्ताने लिट्यथुसि यजादित्वात्संप्रसारणम् द्विर्वचनादि। वन्दनाय क्रियाग्रहणंकर्तव्यमितिकर्मणःसंप्रदानत्वाच्चतुर्थी॥ ११ ॥

११. नेता नासत्यद्वय, तुम्हारा वह इष्ट वरणीय कार्य हमारे लिए प्रशंसनीय और आराध्य है—जो तुमने जानकर गुप्त धन की तरह छिपे उन वन्दन ऋषि को पिपासित पथिकों के द्रष्टव्य कूप से निकाला था। द्वादशीमृचमाह—

तद्वां॑नरा॒सन॑ये॒दंस॑उ॒ग्रमा॒विष्कृ॑णोमितन्य॒तुर्न॒वृ॒ष्टिम्।
द॒ध्यङ्ह॒यन्मध्वा॑थर्व॒णोवा॒मश्व॑स्यशी॒र्ष्णाप्रयदी॑मु॒वाच॑॥ १२ ॥

तत्। वा॒म्। न॒रा॒। स॒नये॑। दंसः॑। उ॒ग्रम्। आ॒विः। कृ॒णो॒मि॒।
त॒न्य॒तुः। न। वृ॒ष्टिम्। द॒ध्यङ्। ह॒। यत्। मधु॑। आ॒थ॒र्व॒णः।
वा॒म्। अश्व॑स्य। शी॒र्ष्णा। प्र। यत्। ई॒म्। उ॒वाच॑॥ १२ ॥

अत्रेयमाख्यायिका—इन्द्रोदधीचेप्रवर्ग्यविद्यांमधुविद्यांचोपदिश्ययदिइमामन्यस्मैवक्ष्यसि शिरस्तेछेत्स्यामीत्युवाच ततोश्विनावश्वस्यशिरश्छित्वादधीचःशिरःप्रच्छिद्यान्यत्रनिधायतत्राश्व्यंशिरःप्रत्यधत्ताम् तेनचदध्यङ् ऋचःसामानियजूंषिचप्रवर्ग्यविषयाणिमधुविद्याप्रतिपादकं ब्राह्मणंचाश्विनावध्यापयामास तदिन्द्रोज्ञात्वावज्रेणतच्छिरोच्छिनत् अथाश्विनौतस्यस्वकीयंमानुषंशिरः प्रत्यधत्तामितिशाट्यायनवाजसनेययोःप्रपञ्चेनोक्तम्—तदेतत्प्रतिपाद्यते—नराहेनरौअश्विनौवांयुवयोःसंबन्धिउग्रंउद्गूर्णंअन्यैर्दुःशकंदंसः कर्मनामैतत् युवाभ्यांपुराकृतंयत्कर्मसनयेधनलाभार्थंआविष्कृणोमिप्रकटीकरोमि तत्रदृष्टान्तः—तन्यतुर्न यथामेघस्थःशब्दोवृष्टिंमेघान्तर्वर्तमानमुदकंप्रवर्षणेनसर्वत्रप्रकटयतितद्वत् किंतत्कर्मअथर्वणःपुत्रोदध्यङ् एतत्संज्ञऋषिःअश्वस्यशीर्ष्णायुष्मत्सामर्थ्येनप्रतिहितेशिरसावांयुवाभ्यांईइमांमधु मधुविद्यांयद्यदाखलुप्रोवाचप्रोक्तवान् तदानींअश्वस्यशिरसःसन्धानलक्षणंपुनर्मानुषस्यशिरसःप्रतिसन्धानलक्षणंचयद्भवदीयंकर्मतत् आविष्कृणोमीत्यर्थः॥ सनये षणुदाने खनिकष्यज्यसिवसिध्वनिस्तनिवनिसनिग्रन्थिचरिभ्यश्चेतिइप्रत्ययः। तन्यतुः तनुविस्तारे ऋतन्यञ्जीत्यादिनायतुच् यद्वा स्तनशब्दे बाहुलकाधतुच् छान्दसःसलोपः। वृष्टिं वृष्यतेसिच्यतेअनेनेतिवृष्टिः मन्त्रेवृषेत्यादिनाक्तिन्उदात्तत्वम्। आथर्वणः अप-

त्यार्थेअणिअन्नितिप्रकृतिभावात् टिलोपाभावः। शीर्ष्णां शीर्षंश्छन्दसीतिशिरःशब्दपर्यायःशी-र्षन्शब्दोन्तोदात्तोनिपात्यते अल्लोपेसतिउदात्तनिवृत्तिस्वरेणविभक्तेरुदात्तत्वम् ॥ १२ ॥

१२. नेतृद्वय, जैसे मेघ-गर्जन आसन्नवृष्टि प्रकटित करता है, मैं धन-प्राप्ति के लिए, तुम्हारे उस उग्र कर्म को वैसे ही प्रकटित करता हूँ—जो अथर्वा के पुत्र दधीचि ऋषि ने घोड़े का मस्तक पहनकर तुम्हें यह मधु-विद्या सिखाई थी।

अजोहवीन्नासत्याकरावांमहेयामन्पुरुभुजापुरंधिः।
श्रुतंतच्छासुरिववध्रिमत्याहिरण्यहस्तमश्विनावदत्तम् ॥ १३ ॥

अजोहवीत्। नासत्या। करा। वाम्। महे। यामन्। पुरुऽभुजा। पुरम्ऽधिः। श्रुतम्। तत्। शासुःऽइव। वध्रिऽमत्याः। हिरण्यऽहस्तम्। अश्विनौ। अदत्तम् ॥ १३ ॥

वध्रिमतीनामकस्यचिद्राजर्षेःपुत्रीनपुंसकभर्तृका सापुत्रलाभार्थंअश्विनावाजुहाव तदाह्वा-नंश्रुत्वाअश्विनावागत्यतस्यैहिरण्यहस्ताख्यंपुत्रंददतुः तदेतदाह—पुरुभुजा बहूनांपालकौ प्रभूत-हस्तौवा हेनासत्यावश्विनौ महेमहनीयेपूजनीये यामन्यामनियातिगच्छतीतियामःस्तोत्रंतस्मिन्स-ति कराअभिमतफलस्यकर्तारौवांयुवांपुरन्धिर्बहुधीः वध्रिमतीवध्रिःपुत्रोत्पादनाशक्तःपण्डकःत-द्वतीएतत्संज्ञाराजपुत्रीअजोहवीत् पुनःपुनः स्तुत्यापुत्रलाभार्थंआहूतवती युवांचवध्रिमत्यास्तदा-ह्वानंश्रुतंशृणुतम् तत्रदृष्टान्तः—शासुरिव यथाशासुराचार्यस्यवचनंशिष्योवहितःसन्नैकाग्र्येणशृ-णोतितद्वत्श्रुत्वाचहेअश्विनौतस्यैहिरण्यहस्तंसुवर्णमयपाणिंहितरमणीयपाणिंवाएतत्संज्ञंपुत्रंअदत्तं प्रायच्छतम् ॥ अजोहवीत् ह्वयतेर्यङ्लुगन्ताल्लङ् यङोवेतितिपईडागमः। करा करोतेःपचाद्यच् सु-पांसुलुगितिविभक्तेराकारः। यामन् आतोमनिन्क्वनिप्वनिपश्चेतिमनिन् सुपांसुलुगितिसप्तम्यालु-क्। श्रुतम् लङि बहुलंछन्दसीतिविकरणस्यलुक् बहुलंछन्दस्यमाङ्योगेपीत्यडभावः। शासुः शास्तुः शासुअनुशिष्टौ शंसिशसिशासीत्यादिनासंज्ञायांवुन् इडभावश्छान्दसस्तलोपश्च ॥ १३॥

१३. बहु-लोक-पालक नासत्यद्वय, तुम अभिमत-फल-दाता हो। बुद्धिमती वध्रिमती नाम की ऋषि-पुत्री ने पूजनीय स्तोत्र-द्वारा तुम्हें बार-बार पुकारा था। जैसे शिष्य शिक्षक की कथा सुनता है, तुमने वैसे ही वध्रिमती का आह्वान सुना था। अश्विद्वय, पुत्राभिला-षिणी नपुंसक-पतिका वध्रिमती को तुमने हिरण्यहस्त नाम का पुत्र प्रदान किया था।

आस्नोवृकस्यवर्तिकामभीकेयुवंनरानासत्यामुमुक्तम्।
उतोकविंपुरुभुजायुवंहकृपमाणमकृणुतंविचक्षे ॥ १४ ॥

आस्नः । वृकस्य । वर्तिकाम् । अभीके । युवम् । नरा । नासत्या । अमुमुक्तम् । उतो इति । कविम् । पुरुऽभुजा । युवम् । ह । कृपमाणम् । अकृणुतम् । विऽचक्षे ॥ १४ ॥

वर्तिकाचटकसदृशस्यपक्षिणःस्त्री तां अरण्येवर्तमानेनशुनाग्रस्तांपुराकिलाश्विनौअमोचयतम् तदेतदाह—हेनरा नेतारौनासत्यावश्विनौयुवंयुवांअभीकेअभिगतेवृकवर्तिकयोःसङ्ग्रामेवृकस्यविकर्तकस्यशुनः आस्नः आस्याद्वर्तिकांचटकसदृशींअमुमुक्तंअमोचयतम् यास्कस्त्वाह—पुनःपुनर्वर्ततेमतिदिवसमावर्ततइति। वर्तिकाउषाः तांवृकेणावरकेणसर्वजगत्प्रकाशेनाच्छादयित्रासूर्येणग्रस्ताम् उतोअपिचकविमृषिम् हेपुरुभुजाबहुपालकौ युवंहयुवांएव कृपमाणंसन्तंविचक्षेविविधंद्रष्टुंअकृणुतम् अकुरुतम्॥आस्नःपद्दन्नित्यादिनाआस्यस्यासन्नादेशः अल्लोपोनइत्यकारलोपे उदात्तनिवृत्तिस्वरेणविभक्तेरुदात्तत्वम्। अमुमुक्तम् मुचेरन्तर्भावितण्यर्थात् लङि बहुलंछन्दसीतिविकरणस्यश्लुः। कृपमाणम् कृपिःस्तुतिकर्मा तुदादिषुद्रष्टव्यः विकरणस्वरेप्राप्ते वृषादीनांचेत्याद्युदात्तत्वम्। विचक्षे तुमर्थेसेसेनितिसेन्प्रत्ययः स्कोःसंयोगाद्योरितिसलोपः॥१४॥

१४. नेता नासत्यद्वय, तुमने वृक अथवा सूर्य के मुख से वर्त्तिका नामक पक्षी अथवा उषा को छुड़ाया था। हे बहुलोक-पालक, तुमने स्तोत्र-तत्पर मेधावी को प्रकृत ज्ञान देखने दिया था।

पञ्चदशीमृचमाह—

चरित्रंहिवेरिवाच्छेदिपर्णमाजाखेलस्यपरितक्म्यायाम्।
सद्योजंघामायसींविश्पलायैधनेहितेसर्तवेप्रत्यधत्तम् ॥ १५॥१०॥

चरित्रम् । हि । वेःऽइव । अच्छेदि । पर्णम् । आजा । खेलस्य । परिऽतक्म्यायाम् । सद्यः । जंघाम् । आयसीम् । विश्पलायै । धने । हिते । सर्तवे । प्रति । अधत्तम् ॥ १५ ॥ १० ॥

अगस्त्यपुरोहितः खेलोनामराजा तस्यसंबन्धिनी विश्पलानामस्त्री सङ्ग्रामे शत्रुभिश्छिन्नपादासीत् पुरोहितेनागस्त्येनस्तुतौअश्विनौ रात्रावागत्य अयोमयंपादं समधत्ताम् तदेतदाह—आजाआजौ सङ्ग्रामे अगस्त्यपुरोहितस्य खेलस्य संबन्धिन्याविश्पलाख्यायाश्चरित्रं चरणं वेरिव वेःपक्षिणःपर्णं पतत्रमिव अच्छेदिहि पुराछिन्नमभूत्खलु हेअश्विनौ युवांअगस्त्येनस्तुतौ

सन्तौपरितक्म्यायाम् परितक्म्यारात्रिः परितएनांतकतीतियास्कः[1]। एतामुभयतःसूर्योगच्छतीति तस्यार्थः रात्रावागत्यसद्यस्तदानीमेवहितेशत्रुषुनिहितेधनेजेतव्येविषयभूतेसतिसर्तवेसर्तुंगन्तुंविश्पलायैआयसींअयोमयींजंघांजंघोपलक्षितंपादंमत्यधत्तम् सन्धानमेकीकरणंकृतवन्तावित्यर्थः॥ चरित्रम् अर्तिलूधूसूखनसहचरइत्रइतिकरणेइत्रः। आजा सुपांसुलुगितिविभक्तेर्डादेशः। आयसीम् अयःशब्दाद्विकारार्थेमाणिरजतादिभ्योत्र् टिड्ढाणञितिङीप्॥ १५॥

१५. खेल राजा की स्त्री विश्पला का एक पैर, युद्ध में, पक्षी की पंख की तरह, कट गया था। अश्विद्वय, तुमने रातों रात, विश्पला के जाने के लि तथा, शत्रु-न्यस्त धन-लाभ के लिए, उसे लौहमय जंघा दे दी थी।

॥ इतिप्रथमस्याष्टमेदशमोवर्गः॥ १०॥

षोडशीमृचमाह—

शतंमेषान्वृक्येचक्षदानमृज्राश्वंतंपितान्धंचकार।
तस्माअक्षीनासत्याविचक्षआधत्तंदस्राभिषजावनर्वन्॥ १६॥

शतम्। मेषान्। वृक्ये। चक्षदानम्। ऋज्रऽअश्वम्। तम्। पिता। अन्धम्। चकार। तस्मै। अक्षी इति। नासत्या। विऽचक्षे। आ। अधत्तम्। दस्रा। भिषजौ। अनर्वन्॥ १६॥

वृषागिरःपुत्रोऋज्राश्वोनामराजर्षिः तस्यसमीपेअश्विनोर्वाहनभूतोरासभोवृकीभूत्वावतस्थे सचतस्यआहारार्थंएकोत्तरशतसंख्यान् पौरजनानांस्वभूतान्मेषान् शकलीकृत्यमददौ ऋज्राश्वः शतमेकंचमेषानितिमन्त्रान्तरेदर्शनात्[2]। एवंपौराणामहितेमवृत्तंपिताशापेननेत्रहीनमकरोत् तेनस्तूयमानावश्विनौअस्मद्वाहननिमित्तमस्यान्धताजातेतिजानन्तौतस्मैअक्षिणीप्रायच्छतामिति तदेतदाह—अत्रतच्छब्दश्रुतेर्यच्छब्दाध्याहारः यऋज्राश्वः शतंशतसंख्याकान् मेषान् वृक्यैआत्मनापोषितायैवृकस्त्रियैशकलीकृत्यमादात् तंचक्षदानं क्षदतिरत्तिकर्मा अत्रशकलीकरणार्थः शकलीकृत्यदत्तवन्तंऋज्राश्वंपिताशापेनअन्धंदृष्टिहीनंचकारकृतवान् हेनासत्यासत्यस्वभावौसत्यस्यनेतारौवाभिषजौदेवानांवैद्यभूतौ अश्विनौवैदेवानांभिषजावितिश्रुतेः[3]। दस्रादर्शनीयौ एवतसंज्ञौवा हेअश्विनौ अनर्वन् अनर्वणी द्रष्टव्यंप्रतिपितृशापावगमनरहितेअक्षीचक्षुषीविचक्षेविविधंद्रष्टुंसमर्थेतस्मैऋज्राश्वायआधत्तंव्यधत्तंअकुरुतम्॥ वृक्ये वृकोरण्यश्वातस्यस्त्रीवृकी जातेरस्त्रीविषयादितिङीष् जसादिषुछन्दसिवावचनमितिचतुर्थ्येकवचनस्याडभावेयणादेशेउदात्तस्वरित-

---

1 नि० ११. २५.। 2 ऋ० सं० १.८.१६.। 3 तै० सं० २.३.११.।

योर्यणइतिपरस्यानुदात्तस्यस्वरितत्वम् । चक्षदानम् क्षदेर्लटःकानच् चित्स्वरः । अक्षी ईच-द्विवचनेइतिपरत्वादक्षशब्दस्यईकारान्तादेशः सचोदात्तः तस्मिन्कृतेसकृद्गतौविप्रतिषेधइतिपरि-भाषयापुनर्नुम्नभवति । विचक्षे चक्षेः संपदादिलक्षणोभावेक्विप् । अनर्वन् ऋगतौ अस्मादन्ये-भ्योपिदृश्यन्तइतिदृशिग्रहणस्यविध्यन्तरोपसंग्रहार्थत्वात्भावेवनिप् अर्वंगमनंविषयंप्रत्यनयो-र्नास्तीतिबहुव्रीहौनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् सुपांसुलुगितिद्विवचनस्यलुक् छान्दसोन-लोपाभावः ॥ १६ ॥

१६. जिन ऋजाश्व राजर्षि ने अपनी वृका (वृक की स्त्री) को खाने के लिए सौ भेड़ों को काट डाला था, उनको उनके पिता (वृषागिर) ने क्रुद्ध होकर नेत्र-हीन कर दिया था। ऋजाश्व के दोनों नेत्र किसी भी वस्तु को देखने में असमर्थ हो गये थे। भिषज-दक्ष नासत्यद्वय, तुमने ऋजाश्व की आँखें अच्छी कर दीं।

आवांरथंदुहितासूर्यस्यकार्ष्मेवातिष्ठदर्वताजयन्ती ।
विश्वेदेवाअन्वमन्यन्तहृद्भिःसमुश्रियानासत्यासचेथे ॥ १७ ॥

आ । वाम् । रथम् । दुहिता । सूर्यस्य । कार्ष्मऽइव । अतिष्ठत् । अर्वता । जयन्ती । विश्वे । देवाः । अनु । अमन्यन्त । हृत्ऽभिः । सम् । ऊम् इति । श्रिया । नासत्या । सचेथे इति ॥ १७ ॥

सविवादुहितरंसूर्याख्यांसोमायराज्ञेप्रदातुमैच्छत् तांसूर्यांसर्वेदेवावरयामासुः तेअन्योन्य-मूचुःआदित्यमवधिंकृत्वाआजिंधावाम योस्माकंमध्येउज्जेष्यति तस्येयंभविष्यतीति तत्राश्विना-वुदजयताम् साचसूर्या जितवतोस्तयोरथमारुरोह अत्र प्रजापतिर्वैसोमायराज्ञेदुहितरंप्रायच्छदि-त्यादिकंब्राह्मणमनुसन्धेयम् । इदंचाख्यानंसूर्याविवाहस्यस्तावकेनसत्येनोत्तभिताभूमिरितिसूक्ते-केनस्पष्टयिष्यते हेअश्विनौवांयुवयोः रथंकार्ष्मेव कार्ष्मशब्दःकाष्ठवाची यथाकाष्ठंआजिधावन-स्यअवधितयानिर्दिष्टंलक्ष्यंआशुगामीकश्चित्सर्वेभ्योधावद्भ्यःपूर्वंप्राप्नोति एवमेवसर्वेभ्योदेवेभ्यःपू-र्वंअर्वताशीघ्रमवधिंप्राप्नुवतायुष्मदीयेनाश्वेनकरणभूतेनयुवाभ्यांजयन्तीजीयमानासूर्यस्यसवितुः दुहिताअतिष्ठत् आरूढवती विश्वेसर्वेइतरेदेवाः एतदारोहणंस्थानंहृद्भिःहृदयैः अन्वमन्यन्त अन्वजानन् तदानीं हेनासत्यावश्विनौ श्रियाक्रक्सहस्रलाभरूपयासंपदाकान्त्यावायुवांसंसचेथे सङ्गच्छेथे ॥ जयन्ती व्यत्ययेनकर्मणिशतृप्रत्ययः । हृद्भिः पद्दन्नित्यादिनाहृदयशब्दस्यहृद्भा-वः । सचेथे षचसमवाये स्वरितेत्त्वादात्मनेपदम् ॥ १७ ॥

१७. अश्विद्वय, सारे देवों में तुम्हारे शीघ्रगामी घोड़ों के होने से सूर्य-पुत्री सूर्या तुम्हारे द्वारा विजित हो गई और तुम्हारे रथ पर आरोहण किया। घुड़दौड़ के जितानेवाले काष्ठ-खण्ड के पास तुम्हारे घोड़ों के पहुँचने से सारे देवों ने हृदय के साथ इस कार्य का अनुमोदन किया। नासत्यद्वय, तुमने सम्पत् प्राप्त की।

---

१ ऐ० ब्रा० ४. ७. । २ ऋ० सं० . ८. ३. २०. ।

अष्टादशीमृचमाह—

यदयातंदिवोदासायवर्तिर्भरद्वाजायाश्विनाहयन्ता ।
रेवदुवाहसचनोरथोवांवृषभश्चशिंशुमारश्चयुक्ता ॥ १८ ॥

यत् । अयातम् । दिवःऽदासाय । वर्तिः । भरत्ऽवाजाय । अश्विना ।
हयन्ता । रेवत् । उवाह । सचनः । रथः । वाम् । वृषभः । च ।
शिंशुमारः । च । युक्ता ॥ १८ ॥

हेअश्विना हयन्तास्तुतिभिराहूयमानौयुवांभरद्वाजायसंभ्रियमाणहविर्लक्षणान्नाययजमानायदिवोदासायएतत्संज्ञायराजर्षये अभीष्टंफलंदातुंवर्तिस्तदीयंगृहंयद्यदाआयातंआगच्छतम् तदानींरेवत् धनयुक्तमन्नंवांयुवयोः सचनःसेवनोरथःउवाह तस्मैदिवोदासायप्रापयामास अपिच तस्मिन्रथेवृषभोनड्वान्शिंशुमारोग्राहश्चपरस्परविरुद्धावपिस्वसामर्थ्यप्रकटनाययुक्तावाहनतयासंयुक्तावास्ताम् ॥ दिवोदासाय दिवश्चदासे षष्ठ्याअलुग्वक्तव्यइत्यलुक् दिवोदासादीनां छन्दस्युपसंख्यानमितिपूर्वपदाद्युदात्तत्वम् । भरद्वाजाय भृञ्भरणे अस्माद्व्यत्ययेनकर्मणिशतृप्रत्ययः शपुश्छन्दस्युभयथेत्यार्धधातुकत्वेनलसार्वधातुकानुदात्तत्वाभावात्प्रत्ययाद्युदात्तत्वम् बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । हयन्ता ह्वेञःकर्मणिलटोव्यत्ययेनशतृ बहुलंछन्दसीतिसंप्रसारणम् शपिगुणेछान्दसोयादेशः । रेवत् रयिशब्दात्मतुप् रयेर्मतौबहुलमितिसंप्रसारणम् छन्दसीरइतिमतुपोवत्वम् रयिशब्दाच्चेतिमतुपउदात्तत्वम् । सचनः षचसेवने अनुदात्तेतश्चहलादेरितियुच् । युक्ता सुपांसुलुगितिविभक्तेराकारः ॥ १८ ॥

१८. अश्विद्वय, राजर्षि दिवोदास के, हव्यान्न प्रदान कर तुम्हें, बुलाने पर तुम उनके घर गये थे। उस समय तुम्हारा सेव्य-रथ धन-संयुक्त अन्न ले गया था। वृषभ और ग्राह उस रथ में युक्त हुए थे।

एकोनविंशीमृचमाह—

रयिंसुक्षत्रंस्वपत्यमायुःसुवीर्यंनासत्यावहन्ता ।
आजह्नावींसमनसोपवाजैस्त्रिरह्नोभागंदधतीमयातम् ॥ १९ ॥

रयिम् । सुऽक्षत्रम् । सुऽअपत्यम् । आयुः । सुऽवीर्यम् । नासत्या ।
वहन्ता । आ । जह्नावीम् । सऽमनसा । उप । वाजैः । त्रिः । अह्नः ।
भागम् । दधतीम् । अयातम् ॥ १९ ॥

हेनासत्यासुक्षत्रं शोभनबलं रयिंधनं स्वपत्यंशोभनैःपुत्रादिभिरुपेतम् सुवीर्यंशोभनवीर्योपेतम् आयुः अन्ननामैतत् एवंगुणविशिष्टंअन्नंचवहन्ताधारयन्तौयुवां समनसासमानमनस्कौसन्तौजह्नावीं जह्नोर्महर्षेःसंबन्धिनींप्रजांआयातंआभिमुख्येनागच्छतम्. कीदृशीं वाजैर्हविर्लक्षणैरन्नैरुपेताम् अह्नः अत्राहःशब्देनतत्रानुष्ठेयःसोमयागोलक्ष्यते तस्यप्रातःसवनादिरूपेणत्रिधाविभक्तंभागंअंशंदधतींबिभ्रतीम्. अनुसवनंहविर्भिर्यजमानामित्यर्थः ॥ सुक्षत्रम् बहुव्रीहौनञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्। सुवीर्यम् वीरवीर्यौचेतिबहुव्रीहावुत्तरपदाद्युदात्तत्वम्। जह्नावीं जह्नुशब्दात्तस्येदमित्यण् टिड्ढाणञितिङीप् जाह्नवी ह्रस्वदीर्घयोर्विनिमयःपृषोदरादित्वात् उक्तंच—वर्णागमोवर्णविपर्ययश्चेति अतएवमध्योदात्तत्वम्॥ १९ ॥

१९. नासत्यद्वय, तुम शोभन-बल-सम्पन्न और शोभन अपत्य और वीर्य से युक्त होकर तथा समान प्रीति-युक्त होकर महर्षि जह्नु की सन्तानों के पास आये थे। सन्तानों ने हव्यान्न प्रदान किया था तथा दैनिक सोमाभिषव के प्रातःसवन आदि तीन भाग धारण किये थे।

परिविष्टंजाहुषंविश्वतःसींसुगेभिर्नक्तमूहथूरजोभिः।
विभिन्दुनानासत्यारथेनविपर्वताँअजरयूअयातम् ॥ २० ॥११॥
परिऽविष्टम्। जाहुषम्। विश्वतः। सीम्। सुऽगेभिः। नक्तम्।
ऊहथुः। रजःऽभिः। विऽभिन्दुना। नासत्या। रथेन। वि।
पर्वतान्। अजरयू इति। अयातम् ॥ २० ॥ ११ ॥

जाहुषोनामकश्चिद्राजा विश्वतःसर्वतः परिविष्टंशत्रुभिःपरिवृतंतंराजानं हेनासत्यावश्विनौ अजरयूजरारहितौनित्यतरुणौयुवां विभिन्दुनाविशेषेणसर्वस्यभेदकेनात्मीयेनरथेननक्तंरात्रौ सुगेभिः सुष्ठुगन्तुंशक्यैः रजोभिःरञ्जकैर्मार्गैः ऊहथुः तस्माच्छत्रुसमूहान्निरगमयतम्. सीमित्येतत्पदंपादपूरणम् निर्गतेनतेनसहपर्वतान्शत्रुभिरारोढुमशक्यान् शिलोच्चयान्व्ययातंविशेषेणगच्छतम् ॥ परिविष्टम् विशप्रवेशने कर्मणिनिष्ठा गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम्। सुगेभिः सुदुरोरधिकरणेइतिगमेर्डः। विभिन्दुना भिदिर्विदारणे औणादिकउप्रत्ययोनुमागमश्च। अजरयू नजराअजरा तामात्मनइच्छतः सुपआत्मनःक्यच् नच्छन्दस्यपुत्रस्येतीत्वदीर्घयोर्निषेधः क्याच्छन्दसीत्युप्रत्ययः॥ २० ॥

२०. नासत्यद्वय, तुम अजर हो। जिस समय जाहुष राजा शत्रुओं-द्वारा चारों ओर से घेरे गये थे, उस समय अपने सर्व-भेदकारी रथ-द्वारा रातो-रात उन्हें सुगम्य पथ से बाहर कर ले गये थे; और शत्रुओं-द्वारा दुरारोह पर्वतों पर गये थे।

॥ इतिप्रथमस्याष्टमेएकादशोवर्गः ॥ ११ ॥

एकविंशीमृचमाह—

एकस्या वस्तोरावतं रणाय वशमश्विना सनये सहस्रा ।
निरहतं दुच्छुना इन्द्रवन्ता पृथुश्रवसो वृषणावरातीः ॥ २१ ॥

एकस्याः । वस्तोः । आवतम् । रणाय । वशम् । अश्विना ।
सनये । सहस्रा । निः । अहतम् । दुच्छुनाः । इन्द्रऽवन्ता ।
पृथुऽश्रवसः । वृषणौ । अरातीः ॥ २१ ॥

हे अश्विनौ वशमेतत्संज्ञमृषिं एकस्या वस्तोरेकस्याह्नः रणाय रमणीयाय सहस्रा सहस्र-संख्याय सनये धनलाभाय आवतं अरक्षतं स ऋषिः प्रत्यहं यथा सहस्रसंख्यं धनं लभते तथा रक्षितव-न्तावित्यर्थः अपि च हे वृषणौ कामानां वर्षितारौ अश्विनौ इन्द्रवन्ता इन्द्रेण संयुक्तौ युवां दुच्छुनाः दुष्टसुखान् दुःखस्य कर्तॄन् पृथुश्रवसः विस्तीर्णयशसः अरातीः शत्रून् निरहतं निःशेषेणावधिष्टम् यद्वा कानीनस्य पृथुश्रवसंज्ञकस्य राज्ञः शत्रूनिति योज्यम् ॥ सहस्रा सुपां सुलुगिति चतुर्थ्या-डादेशः । अहतम् लङि थसस्तम् अनुदात्तोपदेशेत्यादिनानुनासिकलोपः । दुच्छुनाः शुनमि-ति सुखनाम दुष्टं सुखं यासां तास्तथोक्ताः परादिश्छन्दसि बहुलमित्युत्तरपदाद्युदात्तत्वम् ॥ २१ ॥

२१. अश्विद्वय, तुमने वश नाम के ऋषि की, एक दिन में हजार शोभन धन पाने के लिए, रक्षा की थी। अभीष्ट-वर्षक अश्विद्वय, तुमने इन्द्र के साथ मिलकर पृथुश्रवा राजा के क्लेशदायक शत्रुओं को मारा था।

द्वाविंशीमृचमाह—

शरस्य चिदार्चत्कस्यावतादा नीचादुच्चा चक्रथुः पातवे वाः ।
शयवे चिन्नासत्या शचीभिर्जसुरये स्तर्यं पिप्यथुर्गाम् ॥ २२ ॥

शरस्य । चित् । आर्चत्ऽकस्य । अवतात् । आ । नीचात् ।
उच्चा । चक्रथुः । पातवे । वारिति वाः । शयवे । चित् । नासत्या ।
शचीभिः । जसुरये । स्तर्यम् । पिप्यथुः । गाम् ॥ २२ ॥

आर्चत्कस्य ऋचत्कपुत्रस्य शरस्य चिदेतत्संज्ञस्यापि स्तोतुः पिपासितस्य पातवे पानार्थं नी-चात् नीचीनात् अवतात् कूपात् उच्चा उच्चैरुपरिष्टात् वाः उदकं हे अश्विनौ युवां आ चक्रथुः आ-भिमुख्येन कृतवन्तौ तथा हे नासत्यावश्विनौ शचीभिः युष्मदीयैः कर्मभिः परिचरणैः जसुरये श्रा-न्ताय शयवे चित् शयुनाम्ने ऋषये स्तर्यं निवृत्तप्रसवां गां अग्निहोत्रार्थस्य पयसो दोग्ध्रीं पिप्यथुः पय-

सायुवांआपूरितवन्तौ ॥ पातवे पापाने तुमर्थेसेसेनितितवेन्प्रत्ययः। जसुरये जसुहिंसायाम् ज-सुसहोरुरिव्। स्तर्यम् स्तीर्यतेआच्छाद्यतेप्रसवेसामर्थ्याभावेनेतिस्तरीः अवितृस्तृतन्त्रिभ्यईरितीकारप्रत्ययः वाछन्दसीत्यमिपूर्वस्यविकल्पितत्वादभावेयणादेशः उदात्तस्वरितयोर्यणइतिपरस्यानुदात्तस्यस्वरितत्वम्। पिप्यथुः प्यायीवृद्धौ लिटिव्यत्ययेनपरस्मैपदम् लिड्यङोश्चेतिपीभावः ॥ २२ ॥

२२. ऋचत्क के पुत्र शर नामक स्तोता के पाने के लिए तुमने कूप के नीचे से जल को ऊपर किया था। नासत्यद्वय, श्रान्तशयु नामक ऋषि के लिए प्रसव-शून्य गौ को, अपने कार्य्य द्वारा, दुग्धवती बनाया था।

अवस्यतेस्तुवतेकृष्णियायऋजूयतेनासत्याशचीभिः ।
पशुंननष्टमिवदर्शनायविष्णाप्वंददथुर्विश्वकाय ॥ २३ ॥

अवस्यते । स्तुवते । कृष्णियाय । ऋजुऽयते । नासत्या ।
शचीभिः । पशुम् । न । नष्टम्ऽइव । दर्शनाय । विष्णाप्वम् ।
ददथुः । विश्वकाय ॥ २३ ॥

अवस्यतेअवनंरक्षणमात्मनइच्छतेस्तुवतेस्तुतिंकुर्वते कृष्णियाय कृष्णोनामकश्चिद् तस्य पुत्रायऋजूयते आर्जवमिच्छते विश्वकायएवत्संज्ञायऋषये हेनासत्यौ युवांशचीभिरात्मीयैःकर्मभिःविष्णाप्वं विष्णाप्वंनामविनष्टंपुत्रंदर्शनायदर्शनार्थंददथुःदत्तवन्तौ तत्रदृष्टान्तः—पशुंननष्टमिव एकउपमार्थीयःपूरकः यथाकश्चिद्विनष्टंपशुंस्वामिनोदृष्टिपथंमापयतितद्वत्॥ अवस्यते अवस्शब्दात्सुपआत्मनःक्यच् शतुरनुमइतिविभक्तेरुदात्तत्वम्। कृष्णियाय कृष्णशब्दादपत्यार्थे छान्दसोघच् ॥ २३ ॥

२३. नासत्यद्वय, कृष्ण-पुत्र और ऋजुता-तत्पर विश्वकाय नामक ऋषि के तुम्हारी रक्षा की लालसा में, स्तुति करने पर अपने कार्यों-द्वारा, तुमने, नष्ट पशु की तरह, उनके विष्णापु नामक विनष्ट पुत्र को दिखा दिया था।

दशरात्रीरशिवेनानवद्यूनवनद्धंश्नथितमप्स्व१न्तः ।
विप्रुतंरेभमुदनिप्रवृक्तमुन्निन्यथुःसोममिवस्रुवेण ॥ २४ ॥

दश । रात्रीः । अशिवेन । नव । द्यून् । अवऽनद्धम् । श्नथितम् ।
अप्ऽसु । अन्तरिति । विऽप्रुतम् । रेभम् । उदनि । प्रऽवृक्तम् ।
उत् । निन्यथुः । सोमम्ऽइव । स्रुवेण ॥ २४ ॥

पुराखलुरेभमृषिंपाशैर्बद्धाअसुराःकूपेकस्यचिद्दिवसस्यसायंकालेप्रचिक्षिपुःसचाश्विनौस्तुवन्दशरात्रीर्नवाहानिचकूपमध्येतथैवावतस्थे दशमेहनिप्रातरश्विनौतंकूपादुदवारयन्तामितितदाह—अप्सुकूपान्तर्वर्तमानासुअन्तर्मध्येअसुरैःपातितं अशिवेनदुःखहेतुनादाम्नाअवनद्धंबद्धम् श्रथितंशत्रुभिर्हिंसितम् दशरात्रीःदशसंख्याकानिशाः नवद्यून्नवसंख्याकान्यहानिचं अत्यन्तसंयोगेद्वितीया एतावन्तंकालंतत्रैवकूपेवस्थितम् अतएवउदन्युदके विप्रुतंविप्लुतम् व्याक्षिप्तसर्वाङ्गं प्रवृक्तम् लुप्तोपममेतत् प्रवृञ्जनेनसंतप्तंघर्ममिवव्यथयासन्तप्यमानम् एवंभूतंरेभं हेअश्विनौ युवांउन्निन्यथुः तस्मात्कूपात्उन्नीतंउत्तीर्णंकृतवन्तौ तत्रदृष्टान्तः—सोममिव यथाअग्निहोत्रहोमार्थंअभिषुतंसोमरसंकूपसदृशेअग्निहोत्रस्थालीमध्येवर्तमानंस्रुवेणाध्वर्युरुन्नयतितद्वत् ॥ अवनद्धम् णहबन्धने कर्मणिनिष्ठा नहोधः झषस्तथोर्धोधइतिनिष्ठातकारस्यधत्वम् गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम् । श्रथितम् श्रथहिंसार्थः निष्ठा विप्रुतम् प्रुङ्गतौ अवनद्धवत्प्रत्ययस्वरौ कपिलकादित्वाल्लत्वविकल्पः। उदनि पद्दन्नित्यादिनाउदकशब्दस्योदन्भावः ॥ २४ ॥

२४. असुरों-द्वारा पाश से बद्ध, कूप में निक्षिप्त और शत्रुओं-द्वारा आहत होकर रेभ नामक ऋषि के दस रात नौ दिन जल में पड़े रहने से व्यथा से सन्तप्त और जल से विप्लुत होने पर तुमने उन्हें उसी प्रकार कुएँ से निकाल लिया था, जिस प्रकार अध्वर्यु स्रुव से सोम निकालता है।

प्रवांदंसांस्यश्विनाववोचमस्यपतिःस्यांसुगवःसुवीरः ।
उतपश्यन्नश्नुवन्दीर्घमायुरस्तमिवेज्जरिमाणंजगम्याम् ॥ २५ ॥ १२

प्र । वाम् । दंसांसि । अश्विनौ । अवोचम् । अस्य । पतिः । स्याम् । सुऽगवः । सुऽवीरः । उत । पश्यन् । अश्नुवन् । दीर्घम् । आयुः । अस्तम्ऽइव । इत् । जरिमाणम् । जगम्याम् ॥ २५ ॥ १२ ॥

एवमनेनसूक्तेनाश्विनोर्महिमानंप्रशस्याधुनामन्त्रद्रष्टास्वाभीष्टंप्रार्थयते हेअश्विनौ वांयुवयोःदंसांसिपुरु कृतानिकर्माणिप्रावोचं इत्थमुक्तवानस्मि सोहंसुगवः शोभनगोयुक्तःसुवीरःशोभनवीरश्चभूत्वाअस्यराष्ट्रस्यपतिरधिपतिःस्यांभवेयं उतअपिच पश्यन्अक्षिभ्यांपश्यन्उपलक्षणमेतत् सर्वैरिन्द्रियैःस्वस्वविषयदर्शनसमर्थैःदीर्घंवर्षशतरूपेणायतंआयुर्जीवितंचाश्नुवन्प्राप्नुवन्नहम् अस्तमिवेत् यथागृहंस्वामीनिष्कण्टकंप्रविशति एवंजरिमाणंजरांजगम्यां कण्टकराहित्येनप्राप्नुयांवृद्धःसंश्चिरकालंनिवसेयमित्यर्थः ॥ स्याम् अस्तेःप्रार्थनायांलिङ् यासुट् श्नसोरल्लोपइत्यकारलोपः । अश्नुवन् अशूव्याप्तौ व्यत्ययेनशतृ। जरिमाणम् जॄष्वयोहानौ अस्मादौणादिकइमनिच्प्रत्ययः। जगम्याम गमेःप्रार्थनायांलिङि बहुलंछन्दसीतिविकरणस्यश्लुः ॥ २५ ॥

२५. अश्विद्वय, तुम्हारे पूर्व-कृत कार्यों का मैंने वर्णन किया। मैं शोभन गौ और वीर से युक्त होकर इस राष्ट्र का अधिपति बनूँ। जैसे गृह-

स्वामी निष्कंटक घर में प्रवेश करता है, मैं भी वैसे ही नेत्रों से स्पष्ट देखकर और दीर्घ आयु भोगकर बुढ़ापा पाऊँ।

मध्वःसोमस्याश्विनामदायप्रत्नोहोताविवासतेवाम्।
बर्हिष्मतीरातिर्विश्रितागीरिषायातंनासत्योपवाजैः ॥ १ ॥

मध्वः। सोमस्य। अश्विना। मदाय। प्रत्नः। होता। आ।
विवासते। वाम्। बर्हिष्मती। रातिः। विऽश्रिता। गीः। इषा।
यातम्। नासत्या। उप। वाजैः ॥ १ ॥

अश्विना हेअश्विनौ मध्वोमधुमाधुर्योपेतेनसोमस्यसोमेनमदाययुवयोर्मदार्थंप्रत्नश्चिरंतनोहोताहोमनिष्पादकोयजमानः वांयुवांआविवासते विवासतिःपरिचरणकर्मा आङ्मर्यादायाम् यथाशास्त्रंपरिचरति अपिचरातिर्दातव्यंहविः बर्हिष्मतीआस्तीर्णेनबर्हिषायुक्तंयुष्मदर्थंबर्हिष्यासादितमित्यर्थः तथागीः स्तुतिलक्षणावाक्च विश्रिताऋत्विक्षुसमवेता तैःस्तुतिरपिक्रियतइत्यर्थः अतोहेनासत्यावश्विनौ इषाअस्मभ्यंदातव्येनान्नेन वाजैर्बलैश्चसहयुवां उपयातंअस्मत्समीपं प्राप्नुतम् ॥ मध्वः सुपांसुपोभवन्तीतितृतीयार्थेषष्ठी जसादिषुछन्दसिवावचनमितिघेर्ङितीतिगुणाभावेयणादेशः। मदाय मदीहर्षे मदोनुपसर्गेइत्यप्। रातिः रादाने कर्मणिक्तिन् मन्त्रेवृषेत्यादिनातस्योदात्तत्वम्। विश्रिता श्रिञ्सेवायाम् कर्मणिनिष्ठा गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम् ॥ १ ॥

१. अश्विद्वय, तुम्हारे चिरन्तन होता तुम्हारे हर्ष के लिए मधुर सोमरस के साथ तुम्हारी अर्चना करता है। कुश के ऊपर हव्य स्थापित किया हुआ है; ऋत्विकों-द्वारा स्तुत और प्रस्तुत हुआ है। नासत्यद्वय, अन्न और बल लेकर पास आओ।

द्वितीयामृचमाह—

योवामश्विनामनसोजवीयान्रथःस्वश्वोविशआजिगाति।
येनगच्छथःसुकृतोदुरोणंतेननरावर्तिरस्मभ्यंयातम् ॥ २ ॥

यः। वाम्। अश्विना। मनसः। जवीयान्। रथः। सुऽअश्वः।
विशः। आऽजिगाति। येन। गच्छथः। सुऽकृतः। दुरोणम्।
तेन। नरा। वर्तिः। अस्मभ्यम्। यातम् ॥ २ ॥

हेअश्विनौ वांयुवयोःस्वभूतः मनसोजवीयान् मनसोप्यतिशयेनवेगवान् स्वश्वः शोभनाश्वः एवंभूतोयोरथः विशः आजाः आजिगाति आभिमुख्येनगच्छति येनरथेनसुकृतः शोभनंयागंकुर्वतोयजमानस्य दुरोणंदेवयजनलक्षणंगृहंगच्छथः हेनरानेतारावश्विनौ तेनरथेनअस्मभ्यंअस्माकंवर्तिः वर्तनाधिकरणंगृहंयातंआगच्छतम् ॥ जवीयान् जवोस्यास्तीति जववान् तदस्यास्तीतिमतुप् ततआतिशायनिकईयसुन् विन्मतोर्लुक् टेरितिटिलोपः । जिगाति गास्तुतौ जौहोत्यादिकः गतिकर्मसुपाठादत्रगच्छत्यर्थः बहुलंछन्दसीत्यभ्यासस्येत्वम् ॥ २ ॥

२. अश्विद्वय, मन की अपेक्षा भी वेगवान् और शोभन-अश्व-युक्त रथ सारे प्रजावर्ग के सामने जाता है और जिस रथ से तुम लोग शुभकर्मा लोगों के घर जाते हो, नेतृद्वय, उसी पर हमारे घर पधारो।

ऋषिंनरावंहसःपाञ्चजन्यमृबीसादत्रिंमुञ्चथोगणेन ।
मिनन्तादस्योरशिवस्यमायाअनुपूर्वंवृषणाचोदयन्ता ॥ ३ ॥
ऋषिम् । नरौ । अंहसः । पाञ्चऽजन्यम् । ऋबीसात् । अत्रिम् ।
मुञ्चथः । गणेन । मिनन्ता । दस्योः । अशिवस्य । मायाः ।
अनुऽपूर्वम् । वृषणा । चोदयन्ता ॥ ३ ॥

हिमेनाग्निमित्यनयोक्तएवार्थःपुनःप्रकारान्तरेणानयाप्रतिपाद्यते अतस्तत्रोक्तंसर्वमत्रापिद्रष्टव्यम् अक्षरार्थस्तु हेनरौनेतारौवृषणौकामानांवर्षितारौअश्विनौपाञ्चजन्यंनिषादपञ्चमाश्चत्वारोवर्णाःपञ्चजनास्तेषुभवंस्वभानुनागृहीतममुंसूर्यंमोचयन्निःसर्वेषांहिताचरणात् तत्रभवइत्युच्यते तादृशमृषिंअंहसःपापरूपादृबीसात् शतद्वारेयन्त्रगृहेअत्रेःपीडार्थंअसुरैःप्रक्षिप्तात् तुषाग्नेःसकाशात् गणेनेन्द्रियवर्गेणपुत्रपौत्रादिगणेनवासहमुञ्चथः अमोचयतम् किंकुर्वन्तौ मिनन्ताशत्रून्हिंसन्तौ दस्योः उपक्षपयितुः अशिवस्यदुःखकारिणोसुरस्यसंबन्धिनीःतस्मिन्नत्रौप्रयुक्तामायाश्चअनुपूर्वंआनुपूर्व्येणचोदयन्तौप्रेरयन्तौनिवारयन्तौ ॥पाञ्चजन्यं बहिर्देवपञ्चजनेभ्यश्चवक्तव्यमितिभवार्थेञ्यः । मिनन्ता मीञ्हिंसायाम् क्र्यादिकः लटःशतृ मीनातेर्निगमइतिह्रस्वत्वम् ॥ ३ ॥

३. नेतृद्वय, अभीष्ट-वर्षकद्वय, तुमने शत्रुओं की हिंसा करके और क्लेशदायिनी दस्यु-माया का आनुपूर्विक निवारण करके पाँच श्रेणियों (चार वर्ण और पञ्चम निषाद) द्वारा पूजित अत्रि ऋषि को शतद्वार-यन्त्र-गृह के पाप-तुषानल से, सन्तानादि के साथ, मुक्त किया था।

अश्वंनगूळ्हमश्विनादुरेवैर्‌ऋषिंनराटषणारेभमप्सु ।
सन्तंरिणीथोविप्रुतंदंसोभिर्नवांजूर्यन्तिपूर्व्याकृतानि ॥ ४ ॥

अश्वम् । न । गूळ्हम् । अश्विना । दुःऽएवैः । ऋषिम् । नरा । वृषणा ।
रेभम् । अप्ऽसु । सम् । तम् । रिणीथः । विऽप्रुतम् । दंसःऽभिः ।
न । वाम् । जूर्यन्ति । पूर्व्या । कृतानि ॥ ४ ॥

नरानेतारौवृषणाकामानांवर्षकौ हेअश्विनौ दुरेवैर्दुष्पापैरसुरैः अप्सुकूपस्थेषूदकेषुगूळ्हंनिगूढंनिखातंरेभंऋषिंकूपादुत्त्रीयविप्रुतंविश्लिष्टावयववन्तंअश्वंनव्याधितमश्वमिव दंसोभिरात्मीयैः भैषज्यरूपैःकर्मभिः संरिणीथः समधत्तम् सर्वैरवयवैरुपेतमकुरुतमित्यर्थः वांयुवयोःसंबन्धीनिपूर्व्याचिरन्तनानिकृतानिकर्माणिनजूर्यन्ति नहिजीर्णानिभवन्ति ॥ दुरेवैः दुरुपसृष्टादेतेः ईषद्दुःसुषुइतिखल् । रिणीथः रीगतिरेषणयोः क्र्यादिकः प्वादीनांह्रस्वः । जूर्यन्ति जृष्वयोहानौ दैवादित्वाच्छ्यन् बहुलंछन्दसीत्युत्वम् हलिचेतिदीर्घः ॥ ४ ॥

४. नेतृद्वय, अभीष्ट-वर्षकद्वय, [दुर्दान्त दानवों-द्वारा जल में निगूढ़ रेभ ऋषि को तुम लोगों ने निकालकर पीड़ित अश्व की तरह, उनका विनष्ट अवयव, अपनी दवाओं से, ठीक किया था। तुम्हारे पहले के काम जीर्ण नहीं हुए।

सुषुप्वांसंननिर्ऋतेरुपस्थेसूर्यंनदस्रातमसिक्षियन्तम् ।
शुभेरुक्मंनदर्शतंनिखातमुदूपथुरश्विनावन्दनाय ॥ ५ ॥ १३ ॥

सुसुप्वांसम् । न । निःऽऋतेः । उपऽस्थे । सूर्यम् । न । दस्रा ।
तमसि । क्षियन्तम् । शुभे । रुक्मम् । न । दर्शतम् ।
निऽखातम् । उत् । ऊपथुः । अश्विना । वन्दनाय ॥ ५ ॥ १२ ॥

निर्ऋतिरितिभूनाम निर्ऋतेःपृथिव्याः उपस्थेउत्संगेसुषुप्वांसंन सुप्तवन्तंपुरुषमिव कूपमध्येशयानंसूर्यंन सूर्यमिव तमसिकूपांतर्गतान्धकारेक्षियन्तंनिवसन्तं सूर्यमिवतेजस्विनमित्यर्थः शुभे शोभनार्थं निर्मितंरुक्मंन रोचमानंसुवर्णमयाभरणमिवदर्शतंदर्शनीयं एवंगुणविशिष्टंकूपेअसुरैर्निखातंवन्दनायवन्दनंऋषिं हेदस्रादर्शनीयावश्विनौयुवांउदूपथुः उद्धृतवन्तौ॥ सुषुप्वांसम् ञिष्वप्शये लिटःक्वसुः वचिस्वपीत्यादिनासंप्रसारणम् द्विर्वचनादि । उपस्थे उपपूर्वात्तिष्ठतेर्घञर्थे कविधानमित्यधिकरणेकप्रत्ययः मरुद्वृधादित्वात्पूर्वपदान्तोदात्तत्वम् । वन्दनाय क्रियाग्रहणंकर्तव्यमितिकर्मणःसंप्रदानत्वाच्चतुर्थी ॥ ५ ॥

५. दस्र अश्विद्वय, पृथिवी के ऊपर सुषुप्त मनुष्य की तरह और अन्धकार में क्षय-प्राप्त सूर्य के शोभन दीप्तिमान् आभूषण की तरह तथा दर्शनीय उस कूप में प्रक्षिप्त बन्दन ऋषि को तुम लोगों ने निकाला था।

षष्ठीमृचमाह—

तद्वांनराशंस्यंपज्रियेणकक्षीवंतानासत्यापरिज्मन् ।
शफादश्वस्यवाजिनोजनायशतंकुंभाँअसिञ्चतंमधूनाम् ॥ ६ ॥

तत् । वाम् । नरा । शंस्यम् । पज्रियेण । कक्षीवंता । नासत्या ।
परिऽज्मन् । शफात् । अश्वस्य । वाजिनः । जनाय । शतम् ।
कुम्भान् । असिञ्चतम् । मधूनाम् ॥ ६ ॥

हेनरानेतारौनासत्यावश्विनौ परिज्मन्परिगमनेअभीष्टस्यप्रापणेनिमित्तभूतेसति पज्रियेणपज्राणांअङ्गिरसांकुलेजातेनकक्षीवतामया वांयुवयोःसंबन्धि तत्कर्मशंस्यंमकर्षेणशंसनीयं तच्छन्दश्रुतेर्यच्छब्दाध्याहारः यज्जनायअपेक्षमाणायपुरुषायवाजिनोवेगवतस्त्वदीयाश्वस्यशफात् निर्गतैर्मधूनांमधुभिःशतंशतसंख्याकान्कुंभान्असिञ्चतंअपूरयतम् सिञ्चतिरत्रपूरणार्थः यदेतन्मधुनापूरणं तच्छंस्यमित्यर्थः ॥ ६ ॥

६. नेता नासत्यद्वय, अङ्गिरोवंशीय कक्षीवान् मैं मनोनुकूल द्रव्य की प्राप्ति की तरह तुम्हारा अनुष्ठान उद्घोषित करूँगा; क्योंकि तुमने शीघ्र-गामी घोड़ों के खुरों से निकाले हुए मधु से संसार में सैकड़ों घड़े पूरे कर दिये थे।

सप्तमीमृचमाह—

युवंनरास्तुवतेकृष्णियायविष्णाप्वंददथुर्विश्वकाय ।
घोषायैचित्पितृषदेदुरोणेपतिंजूर्यन्त्याअश्विनावदत्तम् ॥ ७ ॥

युवम् । नरा । स्तुवते । कृष्णियाय । विष्णाप्वम् । ददथुः ।
विश्वकाय । घोषायै । चित् । पितृऽसदे । दुरोणे । पतिम् ।
जूर्यन्त्यै । अश्विनौ । अदत्तम् ॥ ७ ॥

हेनरानेतारावश्विनौ युवंयुवांस्तुवतेस्तोत्रंकुर्वते कृष्णियाय कृष्णाख्यस्यपुत्रायविश्वकायविष्णाप्वंददथुः विष्णाप्वंनामविनष्टंपुत्रंदत्तवन्तौ घोषानामब्रह्मवादिनीकक्षीवतोदुहिता साकुष्ठिनीसतीकस्मैचिद्वरायादत्तापितृगृहेनिषण्णाजीर्णासीत् साश्विनोरनुग्रहात् नष्टकुष्ठासतीपतिंलेभे तदेतदाह—हेअश्विनौ पितृषदेपित्रासंबद्धेदुरोणेस्वकीयेजनकगृहेकुष्ठरोगेणभर्तारमप्राप्य पितृषदेपितृसमीपेनिषण्णायैजूर्यन्त्यै जरांप्राप्नुवत्यैघोषायैचित्एतत्संज्ञायै ब्रह्मवादिन्यैअपिरोगोपशमनेनपतिंभर्तारंअदत्तम् युवांदत्तवन्तौ ॥ पितृषदे षद्लृविशरणादिषु क्विप्चेतिक्विप् । जूर्यन्त्यै

नृषद्वयोहानौ लटःशत् दिवादित्वाच्छ्यन् बहुलंछन्दसीत्युत्वम् हलिचेतिदीर्घः अदुपदेशाल्ल-सार्वधातुकानुदात्तत्वेश्यनोनित्त्वादाद्युदात्तत्वम् ॥ ७ ॥

७. नेतृद्वय, कृष्ण के पुत्र विश्वकाय के, तुम लोगों की स्तुति करने पर, विनष्ट पुत्र विष्णापु को तुम लोग लाये थे। अश्विद्वय, कोढ़ होने के कारण बुढ़ापे तक पितृ-गृह में अविवाहिता रहने पर घोषा नाम की ब्रह्म-वादिनी स्त्री को, कोढ़ दूर कर, पति प्रदान किया था।

युवंश्यावायरुशतीमदत्तंमहःक्षोणस्याश्विनाकण्वाय ।
प्रवाच्यंतद्वृषणाकृतंवांयन्नार्षदायश्रवोअध्यधत्तम् ॥ ८ ॥
युवम् । श्यावाय । रुशतीम् । अदत्तम् । महः । क्षोणस्य ।
अश्विना । कण्वाय । प्रऽवाच्यम् । तत् । वृषणा । कृतम् ।
वाम् । यत् । नार्सदाय । श्रवः । अधिऽअधत्तम् ॥ ८ ॥

हेअश्विनौ युवंयुवांश्यावायकुष्ठरोगेणश्यामवर्णायऋषयेरुशतींदीप्तत्वचंस्त्रियंअदत्तम् प्रायच्छतम् अपिचक्षोणस्यक्षोणायदृष्टिराहित्येनगन्तुमशक्तःसन्एकस्मिन्नेवावस्थानेनिवस-ति तस्मैनिवसतेकण्वायऋषयेमहस्तेजः तैजसंचक्षुरिन्द्रियंअदत्तमितिशेषः यथाहेवृषणा कामानांवर्षितारौ वांयुवयोस्तत्कृतंकर्मप्रवाच्यंप्रकर्षेणवाचनीयंशंसनीयम् नार्षदायनृष-दपुत्रायबधिरायऋषये श्रवःश्रवणेन्द्रियंयदध्यधत्तंदत्तवन्तौस्थइतियत्तदित्यर्थः अपरआ-ह—ब्राह्मणस्यपरीक्षार्थंअसुराःकण्वंऋषिंगूढेतमसिनिदधुः अत्रैवस्थितःसन्व्युष्टांउषसंविजा-नीहि यदित्वंब्राह्मणोसीति तमश्विनावागत्यऊचतुः व्युष्टायांहर्म्यस्योपरिवीणांवादयन्तावावामा-गमिष्यावः तंशब्दंश्रुत्वाव्युष्टामुषसंब्रूहि तदेतत्प्रतिपाद्यते—हेवृषणाकामानांवर्षितारौअश्विनौयां युवयोस्तत्कृतंकर्मप्रवाच्यंप्रशंसनीयं यन्नार्षदायनृषदपुत्रायकण्वायक्षोणस्य क्षोणः शब्दकारीवी-णाविशेषः महोमहतः क्षोणस्यश्रवः शब्दंअध्यधत्तम् उषसोविज्ञानार्थंअधिकंअकुरुतम् ॥ म-हः महपूजायाम् अस्मादौणादिकोसिप्रत्ययः पक्षान्तरेतुमहच्छब्दात् षष्ठ्येकवचनेछान्दसोऽ-ल्लोपः बृहन्महतोरुपसंख्यानमितिविभक्तेरुदात्तत्वम् यद्वा क्विबन्तात्षष्ठ्येकवचनम् । क्षोणस्य क्षिनिवासगत्योः कृत्यल्युटोबहुलमितिकर्तरिल्युट् पृषोदरादित्वात्क्षोणभावः तदुक्तंयास्केन—क्षोणस्यक्षयणस्य[1] । पक्षान्तरेतु—टुक्षुशब्देइत्यस्मादौणादिकोनप्रत्ययः । नार्षदाय ऋष्यन्धके-त्यण् ॥ ८ ॥

८. अश्विद्वय, तुमने कुष्ठरोग-ग्रस्त श्याव या श्यामवर्ण ऋषि को अच्छा कर दीप्तिमती स्त्री दी थी। आँखें न रहने से कण्व नहीं चल सकते थे; तुमने उन्हें आँखें दी थीं। अभीष्ट-वर्षद्वय, बहरे नृषद-पुत्र को तुमने कान दिये थे; ये कार्य प्रशंसनीय हैं।

---

[1] नि० ६. ६।

नवमीमृचमाह—

पुरूवर्पांस्यश्विनादधानानिपेदवंऊहथुराशुमश्वम् ।
सहस्रसांवाजिनमप्रतीतमहिहनंश्रवस्यं१तरुत्रम् ॥ ९ ॥

पुरु । वर्पांसि । अश्विना । दधाना । नि । पेदवे । ऊहथुः ।
आशुम् । अश्वम् । सहस्रऽसाम् । वाजिनम् । अप्रतिऽइतम् ।
अहिऽहनम् । श्रवस्यम् । तरुत्रम् ॥ ९ ॥

हेअश्विनौ पुरुपुरूणिबहूनिवर्पांसि रूपनामैतत् आत्मीयैःकर्मभिः कृतानिरूपाणिदधाना धारयन्तौयुवांआशुंशीघ्रगामिनंअश्वं पेदवेपेदुनाम्नेस्तुवतेन्यूहथुः नितरांप्रापितवन्तौ दत्तवन्तावित्यर्थः कीदृशमश्वं सहस्रसांसहस्रसंख्याकस्यधनस्यसनितारंदातारंवाजिनंबलवन्तंअतएवअप्रतीतंशत्रुभिरप्रतिगतम् अहिहनंअहीनामागत्यहन्तॄणांशत्रूणांशत्रून्वाहन्तारंश्रवस्यं श्रवःश्रवणीयं स्तोत्रंतत्रभवंस्तुतिविषयमित्यर्थः तरुत्रं तारितारं ॥ वर्पांसि वृञ्वरणे वृञ्शीङ्भ्यांरूपस्वाङ्गयोः पुट्चेत्यसुन्पुडागमश्च। दधाना दधातेर्लटःशानच् अभ्यस्तानामादिरित्याद्युदात्तत्वम्। सहस्रसाम् षणुदाने जनसनखनेतिविट् विड्वनोरनुनासिकस्यादित्यात्वम्। श्रवस्यम् श्रवस्शब्दात् भवेछन्दसीतियत् तित्स्वरितः। तरुत्रम् तॄप्लवनतरणयोः अशित्रादिभ्यइत्रोत्रावित्युत्रप्रत्ययः व्यत्ययेनाद्युदात्तत्वम् यद्वा ग्रसितस्कभितेत्यादौनिपातनात्तृन्नन्तात्तरुतृशब्दादपि संज्ञापूर्वकस्यविधेरनित्यत्वाद्गुणाभावेयण् तित्स्वरेणाद्युदात्तत्वम् ॥ ९ ॥

९. बहु-रूप-धारी अश्विद्वय, तुमने राजर्षि पेदु को शीघ्रगामी अश्व दिया था। वह घोड़ा हजारों तरह के धन देता था। वह बलवान् शत्रुओं-द्वारा अपराजेय, शत्रु-हन्ता, स्तुति-पात्र और विपद् में रक्षक था।

दशमीमृचमाह—

एतानिवांश्रवस्यासुदानूब्रह्मांगूषंसदनंरोदस्योः ।
यद्वांपज्रासोअश्विनाहवन्तेयातमिषाचविदुषेचवाजम्॥१०॥१४॥

एतानि । वाम् । श्रवस्या । सुदानू इति सुऽदानू । ब्रह्म । आंगूषम् ।
सदनम् । रोदस्योः । यत् । वाम् । पज्रासः । अश्विना । हवन्ते ।
यातम् । इषा । च । विदुषे । च । वाजम् ॥ १० ॥ १४ ॥

हेसुदानूशोभनदानावश्विनौ वांयुवयोः संवन्धीनिएतानि समनन्तरोक्तानिवीर्याणिश्रवस्याश्रवणीयानि सर्वैर्ज्ञातव्यानिभवन्ति तदर्थंरोदस्योः द्यावापृथिव्यात्मनावर्तमानयोर्युवयोः उक्तंचयास्केन—तत्कावश्विनौद्यावापृथिव्यावित्येकइति[1]। तथाचतैत्तिरीयकम्—इमेअश्विना-संवत्सरोग्निर्वैश्वानरइति[2]। तयोर्युवयोः सदनंस्तोतृसमीपेनिवेशनंप्रसादनहेतुभूतंवा आङ्गूषंआघोषणीयम् ब्रह्म मन्त्ररूपंस्तोत्रंनिष्पन्नमितिशेषः यद्यदापज्रासः अंगिरसांगोत्रोत्पन्नायजमानाः हेअश्विनौ वांयुवां हवन्तेस्तुतिभिरात्मरक्षार्थंआह्वयन्ति तदानीं इषादातव्येनान्नेनसहायातंआगच्छतंच विदुषेयुष्मद्विषयस्तोत्रंजानतेमह्यंचवाजमन्नंबलंवाप्रयच्छतमितिशेषः ॥ यातम् चवायोगेप्रथमेतिनिघातप्रतिषेधः। विदुषे विदज्ञाने विदेःशतुर्वसुः वसोःसंप्रसारणमितिसंप्रसारणम् शासिवसिघसीनांचेतिषत्वम् ॥ १० ॥

१०. दानवीर अश्विनीकुमारो, तुम्हारी ये वीर-कीर्तियाँ सबको जाननी चाहिए। तुम द्यावा-पृथिवी-रूप वर्त्तमान हो। तुम्हारा आह्लादकर घोषणीय मन्त्र निष्पन्न हुआ है। अश्विद्वय, जिस समय अङ्गिराकुल के यजमान तुम्हें बुलाते हैं, उस समय अन्न लेकर आओ तथा मुझ यजमान को बल दो।

एकादशीमृचमाह—

सूनोर्मानेनाश्विनागृणानावाजंविप्रायभुरणारदन्ता।
अगस्त्येब्रह्मणावावृधानासंविश्पलांनासत्यारिणीतम् ॥ ११ ॥

सूनोः। मानेन। अश्विना। गृणाना। वाजम्। विप्राय। भुरणा। रदन्ता। अगस्त्यै। ब्रह्मणा। वावृधाना। सम्। विश्पलाम्। नासत्या। अरिणीतम् ॥ ११ ॥

हेभुरणाभर्तारौपोषकौनासत्यासत्यस्वभावौ हेअश्विनौ सूनोः कुंभात्प्रसूतस्यअगस्त्यस्यखेलपुरोहितस्यसंवन्धिनामानेनस्तुत्यस्यपरिच्छेदकेनस्तोत्रेणगृणानास्तूयमानौ विप्रायमेधाविनेभरद्वाजाय ऋषयेवाजमन्नंरदन्ताविलिखन्तौनिष्पादयन्तौ युवांविश्पलांसंग्रामेछिन्नजंघांखेलस्यसंवन्धिनींस्त्रियंसमरिणीतम् पुनरस्याजंघयासमयोजयतम् तृतीयेनपादेनप्रथमपादोक्तोर्थोविव्रियते अगस्त्येऋषौब्रह्मणा मन्त्ररूपेणस्तोत्रेणववृधानाप्रवर्धिताविति ॥ गृणाना गृशब्दे व्यत्ययेनकर्मणिकर्तृप्रत्ययः प्वादीनांह्रस्वः। भुरणा भुरणधारणपोषणयोः कण्ड्वादिः पचाद्यच् अतोलोपयलोपौ सुपांसुलुगितिविभक्तेराकारः आमन्त्रितनिघातः विप्रायेत्यस्यरदन्तेत्यनेनासामर्थ्यान्नपराङ्गवद्भावत्वम्। ववृधाना वृधेर्लिटःकानच् संहितायांछान्दसमभ्यासस्यदीर्घत्वम् पु-

---

१ नि० १२. १. २ तै० सं० ५. ६. ४.

जादित्वेहितुत्तुजानइतिवत्पदकालेपिस्यात्। अरिणीतम् रीगतिरेषणयोः क्रैयादिकः प्वादीनांह्रस्वः॥ ११॥

११. पोषक नासत्यद्वय, कुम्भ के पुत्र अगस्त्य ऋषि की स्तुति से स्तुत होकर और मेधावी भरद्वाज ऋषि को अन्नवान कर तथा अगस्त्य-द्वारा मंत्र-वर्द्धित होकर तुमने विश्पला को नीरोग किया था।

कुह॒ यान्ता॑ सुष्टु॒तिं का॒व्यस्य॒ दिवो॑ नपाता वृषणा शयु॒त्रा ।
हिर॑ण्यस्येव क॒लशं॒ निखा॑तमु॒दू॑पथुर्दश॒मे अ॑श्विना॒हन् ॥ १२ ॥

कुह॑। यान्ता॑। सु॒ऽस्तु॒तिम्। का॒व्यस्य॑। दिवः॑। न॒पा॒ता॒।
वृ॒ष॒णा॒। श॒यु॒ऽत्रा। हिर॑ण्यस्यऽइव। क॒लश॑म्। निऽखा॑तम्।
उत्। ऊ॒प॒थुः॒। द॒श॒मे। अ॒श्वि॒ना॒। अह॑न्॥ १२ ॥

पुराखलुउशनसःस्तुतिंगच्छन्तावश्विनौमार्गमध्ये कूपेपतितंरेभंदृष्ट्वा तंकूपादुदतारयतां तदानींअश्विभ्यांगन्तव्यंकाव्यस्यनिवासस्थानमजानन्नृषिः अश्विनौपृच्छति हेदिवोनपाता द्योतमानस्यसूर्यस्यपुत्रौ वृषणाकामाभिवर्षकावश्विनौ कुहकुत्रशयुत्राशयनेनिवासस्थाने वर्तमानस्यकाव्यस्यभार्गवस्यसुष्टुतिंशोभनांस्तुतिंश्रोतुंयान्तागच्छन्तौ यद्वा शयुत्रेत्येतदश्विनोर्विशेषणम् शयुनाम्नस्त्रायकौयुवांहिरण्यस्येवकलशं यथाहिरण्यपूरितंकलशंभूम्यांनिक्षिप्तंसर्वैर्दुर्ज्ञातंकश्चिदभिज्ञउद्धरति एवमसुरैःकूपेनिखातंदशरात्रीर्नवाहानिचतत्रैवनिवसन्तंरेभमवगत्यदशमेहन्अहनिउदूपथुः कूपादुन्नीतवन्तौ किंतन्निवासस्थानमितिप्रश्नोरेभस्यानुक्तावपिदशरात्रीरंशिवेनेतिमन्त्रान्तरेसामर्थ्यात्प्रतीतिः यद्वा काव्यस्यस्तुतिंप्रतिगच्छन्तौयुवांकुहकस्मिन्स्थाने रेभंयुवामुन्निन्यथुरितिप्रश्नः॥ कुह वाहचच्छन्दसीतिसप्तम्यर्थेहप्रत्ययः। दिवोनपाता सुबामन्त्रितेपराङ्गवत्स्वरेइतिपराङ्गवद्भावेनषष्ठ्यन्तस्यामन्त्रितानुप्रवेशादामन्त्रितस्यचेतिपदद्वयसमुदायस्यषाष्ठिकमाद्युदात्तत्वम् पादादित्वादाष्टमिकनिघाताभावः नपादित्यपत्यनाम नपातयतीति नपात् नभ्राण्नपादितिनञःप्रकृतिभावः सुपांसुलुगितिविभक्तेराकारः। शयुत्रा अशित्रादिभ्यइत्रोत्रइतिशीङउत्रः यद्यन्तोदात्ततानस्यात् तर्ह्येवंशयुंत्रायेतेइतिशयुत्रौ त्रैङ्पालनेआदेचइत्यात्वम् आतोनुपसर्गेकः अतएवव्युत्पत्त्यनवधारणादनवग्रहः। निखातम् खनुअवदारणे अस्मात्कर्मणिनिष्ठा यस्यविभाषेतीट्प्रतिषेधः जनसनखनांसन्झलोरित्यात्वम् गतिरनन्तरइतिगतेः प्रकृतिस्वरत्वम्। अहन् सुपांसुलुगितिसप्तम्यालुक् नङिसंबुद्ध्योरितिनलोपप्रतिषेधः॥ १२॥

१२. आकाश-पुत्रद्वय, अभीष्टवर्षक, काव्य (उशना) की स्तुति सुनने के लिए कहाँ उसके घर की ओर जाते हो? हिरण्यपूर्ण कलश की तरह कूप में गिरे रेभ ऋषि को तुमने दसवें दिन उबारा था।

---

१ ऋ० सं० १. ८. १२.।

त्रयोदशीमृचमाह—

युवंच्यवानमश्विनाजरन्तंपुनर्युवानंचक्रथुःशचीभिः ।
युवोरथंदुहितासूर्यस्यसहश्रियानासत्यावृणीत ॥ १३ ॥

युवम् । च्यवानम् । अश्विना । जरन्तम् । पुनः । युवानम् ।
चक्रथुः । शचीभिः । युवोः । रथम् । दुहिता । सूर्यस्य । सह ।
श्रिया । नासत्या । अवृणीत ॥ १३ ॥

हेअश्विनौ युवंयुवांशचीभिः आत्मीयैर्भैषज्यलक्षणैःकर्मभिः जरन्तं जीर्यन्तं च्यवानंस्तुतीनांच्यावयितारंएवत्संज्ञंऋषिं युवानंपुनर्यौवनोपेतंचक्रथुः कृतवन्तौ अपिच हेनासत्यावश्विनौ युवोःयुवयोः रथंसूर्यस्यदुहितासूर्याख्याश्रियासहऋक्सहस्ररूपयासंपदाकान्त्यावासह अवृणीतसमभजत आगत्यारूढवतीत्यर्थः ओवांरथंदुहितेत्यत्रलिखितमाख्यानमत्रापिद्रष्टव्यम् ॥ जरन्तम् जॄष्वयोहानौ व्यत्ययेनशप् । युवोः युष्मच्छब्दात्षष्ठीद्विवचनेव्यत्ययेनयोचीतियत्वाभावेसतिशेषेलोपइतिदकारलोपः अतोगुणेइतिपररूपत्वम् एकादेशउदात्तेनोदात्तः । अवृणीत वृङ् संभक्तौ क्रैयादिकः ॥ १३ ॥

१३. अश्विद्वय, भैषज्यरूप कार्य-द्वारा तुमने वृद्ध च्यवन ऋषि को युवा किया था। नासत्यद्वय, सूर्य-पुत्री सूर्या, कान्ति के साथ, तुम्हारे रथ पर चढ़ी थी।

चतुर्दशीमृचमाह—

युवंतुग्रायपूर्व्येभिरेवैःपुनर्मन्यावभवतंयुवाना ।
युवंभुज्युमर्णसोनिःसमुद्राद्विभिरूहथुर्ऋज्रेभिरश्वैः ॥ १४ ॥

युवम् । तुग्राय । पूर्व्येभिः । एवैः । पुनःऽमन्यौ । अभवतम् ।
युवाना । युवम् । भुज्युम् । अर्णसः । निः । समुद्रात् । विऽभिः ।
ऊहथुः । ऋज्रेभिः । अश्वैः ॥ १४ ॥

---

१ ऋ० सं० १. ८. ११. ।

हेयुवाना दुःखानांयावयितारावश्विनौ युवंयुवांपूर्व्येभिः पुराणमिवत् पूर्वकालीनैश्चिरन्त-नैः एवैः स्तुत्यंप्रतिगन्तृभिःस्तोत्रैस्तुग्रायभुज्योर्जनकस्यसंबन्धिभिः पुनर्मन्यौयथायुवंयुवांभु-ज्योःसमुद्रगमनात्पूर्वंयुवांस्तोतव्यौ तथापुनरपीदानीं स्तोतव्यौअभवतम् यदायुवंसमुद्रमध्ये सेनयासहनिमग्नंभुज्युंतुग्रस्यपुत्रंअर्णसः अर्णस्वतः मौढोदकयुक्तात्समुद्रात्अम्बुराशेःसका-शाद्विभिर्गन्तृभिर्ऋज्रेभिः शीघ्रगतियुक्तैरश्वैश्चनिरूहथुः निर्गमय्यपितृसमीपंप्रापितवन्तौ तदानीं पुनरप्यतिशयेनस्तोतव्यौजातावित्यर्थः तुग्रोहंभुज्युमित्यत्रोक्तमाख्यानमत्राप्यनुसन्धेयम् ॥ ए-वैः इण्गतौ इणूशीङ्भ्यांवन् । पुनर्मन्यौ मनज्ञाने अत्रस्तुत्यर्थः मन्यतेस्तौतीतिमनास्तुतिः पचाद्यच् छन्दसिचेत्यर्हार्थेयः । युवाना युमिश्रणामिश्रणयोः कनिन्युवृषीत्यादिनाकनिन् सु-पांसुलुगितिविभक्तेराकारः । अर्णसः अर्णस्शब्दात्उत्पन्नस्यमत्वर्थीयस्यबहुलंछन्दसीतिबहुल-ग्रहणाल्लोपः सर्वेविधयश्छन्दसिविकल्प्यन्तइतिविभक्त्युदात्तस्यविकल्पनादभावः । ऋज्रेभिः ऋजगतिस्थानार्जनोपार्जनेषु ऋज्रेन्द्रेत्यादिनारन्प्रत्ययान्तोनिपातितः बहुलंछन्दसीतिभिसऐ-सभावः ॥ १४ ॥

१४. दुःख-निवारक-द्वय, तुग्र जैसे पहले स्तोत्र-द्वारा तुम्हारी स्तुति करते थे, अनन्तर फिर भी उसी तरह तुम लोगों की अर्चना करते थे; क्योंकि उनके पुत्र भुज्यु को तुम विक्षिप्त समुद्र से गमनशील नौका और शीघ्रगति अश्वद्वारा ले आये थे।

पञ्चदशीमृचमाह—

अजोहवीदश्विनातौग्र्योवांप्रोळ्हःसमुद्रमव्यथिर्जगन्वान् ।
निष्टमूहथुःसुयुजारथेनमनोजवसावृषणास्वस्ति ॥ १५ ॥ १५ ॥

अजोहवीत् । अश्विना । तौग्र्यः । वाम् । प्रऽऊळ्हः । समुद्रम् । अव्यथिः । जगन्वान् । निः । तम् । ऊहथुः । सुऽयुजा । रथेन । मनःऽजवसा । वृषणा । स्वस्ति ॥ १५ ॥ १५ ॥

हेअश्विनौ वांयुवांतौग्र्यःतुग्रपुत्रःप्रोळ्हःपित्राप्रापितः समुद्रमब्धिंजगन्वान्भुज्युःउदकेनिम-ग्नोपि अव्यथिः व्यथांपीडांअप्राप्तएवसन् अजोहवीत् स्तुतिभिराह्वयत् तमाह्वातारंहेमनोजव-सामनोवद्वेगयुक्तौ वृषणाकामाभिवर्षकौअश्विनौ सुयुजासुष्ठुअश्वैर्युक्तेनरथेन स्वस्तिक्षेमंयथा-भवति तथानिरूहथुः जलान्निर्गमय्ययुवांपितृगृहंप्रापितवन्तौ ॥ जगन्वान् गमेर्लिटःक्वसुः वि-भाषागमहनविदविशामितिविकल्पनादिडभावःम्वोश्चेतिमकारस्यनकारः। निष्टम् युष्मत्तत्तक्षु-

---

१ ऋ० सं० १.८.८.।

ध्वन्तःपादमितिमूर्धन्यः। मनोजवसा मनसोजवइवजवोययोस्तौतथोक्तौ सुपांसुलुगितिविभक्तेराकारः पादादित्वादामन्त्रितनिघाताभावेषाष्ठिकमाद्युदात्तत्वम् ॥१५॥

१५. अश्विद्वय, पिता तुग्र-द्वारा समुद्र में भेजे हुए और जल में डूबते हुए भुज्यु ने, सरलता से समुद्र-पार होकर, तुम्हारा आह्वान किया था। मनोवेग-सम्पन्न अभीष्ट-वर्षिद्वय, तुम लोग उत्कृष्ट-अश्व-युक्त रथ पर भुज्यु को लाये थे।

॥इतिप्रथमस्याष्टमेपञ्चदशोवर्गः॥ १५॥

षोडशीमृचमाह—

अजोहवीदश्विनावर्तिकावामास्नोयत्सीममुंञ्चतंवृकस्य ।
विजयुषाययथुःसान्वद्रेर्जातंविष्वाचोअहतंविषेण ॥ १६ ॥

अजोहवीत्। अश्विना। वर्तिका। वाम्। आस्नः। यत्। सीम्। अमुञ्चतम्। वृकस्य। वि। जयुषा। ययथुः। सानु। अद्रेः। जातम्। विष्वाचः। अहतम्। विषेण ॥ १६ ॥

आस्नोवृकस्येत्यर्धर्चेनयदुक्तंतदत्रपूर्वार्धेनप्रतिपाद्यते वर्तिकाचटकसदृशस्यपक्षिणः स्त्रीवृकेणारण्यशुनाग्रस्तासती हेअश्विनौ वांयुवांतदाअजोहवीत् आहूतवती यत्सीं यदाखलुवृकस्य आस्नः आस्यात् अमुञ्चतंवर्तिकाममोचयतम् अपिच युवांजयुषा जयशीलेनरथेनअद्रेः पर्वतस्यसानुसमुच्छ्रितप्रदेशंवियययथुःशत्रुभिरावेष्टितंजाहुषाख्यंस्तोतारंशत्रुसमूहान्निर्गमय्य तेनसह अन्यैर्गन्तुमशक्यंपर्वताग्रंगतवन्तावित्यर्थः तदुक्तंपरिविष्टंजाहुषमित्यत्र। तथाविष्वाचोविविधगतियुक्तस्यएतत्संज्ञस्यासुरस्यजातमुत्पन्नमपत्यंविषेणक्ष्वेलेनअहतंयुवांहतवन्तौ यद्वा वर्ततेमतिदिवसमावर्ततइतिवर्तिकाउषाः वृकइतिविवृतज्योतिष्कःसूर्यउच्यते तेनग्रस्तासतीसा हेअश्विनौ युवामजोहवीत् आह्वयत् यदाखलुयुवांवृकस्यसूर्यस्यआस्नःआस्यस्थानीयात्मण्डलात्अमुञ्चतंअमोचयतम् सूर्येणैकीभूतमुषसंपृथक्कृत्यउदयात्पूर्वंरात्रेरपरभागेस्थापितवन्तावित्यर्थः । तथाचयास्कः—आदित्योपिवृकउच्यतेयदावृङ्क्तेआह्वयदुषाअश्विनावादित्येनाभिग्रस्तावामश्विनौप्रमुमुचतुरित्याख्यानमिति[3] । अपिच जयुषाजयशीलेनरथेनअद्रेर्मेघस्यसानुसमुच्छ्रितप्रदेशंवृष्टिचिकीर्षयाविशेषेणययथुः युवांगतवन्तौ गत्वाचविष्वाचोविविधगतियुक्तस्य मेघस्यसंबन्धिनाविशेषेणोदकेनजातमुत्पन्नंसर्वंभूतजातमहतमगमयतं वृष्टिंकृतवन्तावित्यर्थः ॥

१ ऋ० सं० १.८.१०.।   २ ऋ० सं० १.८.११.।   ३ नि० ५.२१.।

अजोहवीत् ह्वयतेर्यङ्लुगन्ताल्लङिति पियङोवेतीडागमः अभ्यस्तस्यचेति द्विर्वचनात्पूर्वमेवह्वय-तेःसंप्रसारणम्। आस्नः पद्दन्नित्यादिनाआस्यशब्दस्यासन्नादेशः अल्लोपोनइत्यकारलोपः। जयुषा जिजये औणादिकउषिप्रत्ययः। विष्वाचः विषुनाआभिमुख्येनअञ्चतीतिविग्रहः ऋत्विगित्यादिनाक्विन् अचइत्यकारलोपः चाविति दीर्घः उदात्तनिवृत्तिस्वरेणविभक्तेरुदात्तत्वेप्रा-प्तेचावित्यन्तोदात्तत्वम्। अहतम् हनहिंसागत्योः लङिअदादित्वाच्छपोलुक् अनुदात्तोपदेशे-त्यादिनानुनासिकलोपः॥ १६॥

१६. अश्विद्वय, जिस समय तुम लोगों ने वृक के मुख से वर्तिका नाम की चिड़िया को छुड़ाया था, उस समय उसने तुम्हारा आह्वान किया था। तुम लोग जयशील रथ-द्वारा जाहुष को लेकर पर्वत-प्रवेश चले गये थे। तुमने विष्वाङ् असुर के पुत्र को विषयुक्त तीर-द्वारा हत किया था।

शतंमेषान्वृक्यैमामहानंतमःप्रणीतमशिवेनपित्रा।
आक्षीऋज्राश्वेअश्विनावधत्तंज्योतिरन्धायचक्रथुर्विचक्षे॥१७॥

शतम्। मेषान्। वृक्यै। ममहानम्। तमः। प्रऽनीतम्। अशिवेन। पित्रा। आ। अक्षी इति। ऋज्रऽअश्वे। अश्विनौ। अधत्तम्। ज्योतिः। अन्धाय। चक्रथुः। विऽचक्षे॥ १७॥

शतंमेषान्वृक्येचक्षदानमित्यत्रयदाख्यानमवादिष्म तदत्राप्यनुसन्धेयम्. शतंशतसंख्या-कान्मेषान्वृक्ये वृकीरूपेणावस्थितायाअश्विनोर्वाहनायरासभाय ममहानं पूजितवन्तं आहारा-र्थंसमर्पितवन्तं अशिवेनअसुखकारिणापित्रास्वकीयेन जनकेन तमः दृष्टिराहित्येनप्रणीतं कृतम्. अन्धंमापितं ऋज्राश्वं चक्षुष्मन्तंअश्विनावकुरुतामितिशेषः एतदेवविशदयति हेअश्विनौअक्षी पितृशापान्नष्टेचक्षुषी ऋज्राश्वेएतत्संज्ञकेराजर्षौआधत्तं पुनर्दर्शं नसमर्थेअकुरुतम्—तदेवाह अन्धाय दृष्टिहीनायज्योतिःप्रकाशकंचक्षुः विचक्षे विविधंजगद्द्रष्टुं चक्रथुः युवां कृतवन्तौ॥ ममहानं महपूजायाम् लिटःकानच् संहितायांछान्दसमभ्यासस्यदीर्घत्वम्। प्रणीतम् प्रपूर्वा-न्नयतेःकर्मणिनिष्ठा गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम्। पित्रा उदात्तयणइतिविभक्तेरुदात्त-त्वम्। अक्षी अक्षिशब्दाद्द्विवचने नुमागमश्चप्राप्नोति ईचद्विवचनेइतीकारान्तादेशश्च परत्वादीका-रादेशः तस्मिन्कृतेसकृद्गतपरिभाषयापुनर्नुम्नभवति उदात्तइत्यनुवृत्तेरीकारस्योदात्तत्वम्॥१७॥

१७. जब कि, ऋज्राश्व ने वृकी के लिए सौ भेड़ों का वध किया था, तब उनके क्रुद्ध पिता ने उन्हें अन्धा बना दिया था। इसके अनन्तर तुमने उन्हें नेत्र प्रदान किया था। देखने के लिए तुम लोगों ने अन्ध को चक्षु दिया था।

---

१ ऋ० सं० १.८.११।

अष्टादशीमृचमाह—

शुनमन्धाय भरमह्वयत्सा वृकीरश्विना वृषणा नरेति ।
जारः कनीनइव चक्षदान ऋज्राश्वः शतमेकंच मेषान् ॥ १८ ॥

शुनम् । अन्धाय । भरम् । अह्वयत् । सा । वृकीः । अश्विना । वृषणा । नरा । इति । जारः । कनीनःऽइव । चक्षदानः । ऋज्रऽअश्वः । शतम् । एकम् । च । मेषान् ॥ १८ ॥

शुनमितिसुखनाम भरं पोषणहेतुभूतं चक्षुरिन्द्रियेणनिष्पाद्यं शुनंसुखं अन्धायदृष्टिहीनायतस्मैऋज्राश्वायइच्छन्तीसावृकी हेअश्विनौ अश्वयुक्तौ कृत्स्नंजगद्व्यामुवन्तौवा वृषणा हेवृषणौ कामानांवर्षितारौइति एवंसंबोध्य नरानेतारावश्विनौ अह्वयत् आहूतवती आह्वयन्त्यास्तस्याः कोभिप्रायइतिचेत्तदुच्यते—कनीनइव यथाप्राप्तयौवनःकामुकोजारःपारदारिकः सन्परस्त्रियैसर्वंधनं प्रयच्छति एवमृज्राश्वोमहांशतमेकंचएकोत्तरशतसंख्याकान्मेषान्पौरजनानांस्वभूतानपहृत्यचक्षदानः शकलीकुर्वन्प्रादाव् तेनेदृशींदुर्दशांप्राप्तइति ॥ कनीनः युवशब्दादिष्ठनि युवाल्पयोःकनन्यतरस्यामितियुवशब्दस्यकनादेशः व्यत्ययेनइष्ठनःखादेशः यद्वा कनीदीप्तिकान्तिगतिषु औणादिकईनप्रत्ययः ॥ १८ ॥

१८. उन अन्ध को चक्षु-द्वारा सुख देने की इच्छा से वृकी ने तुम्हें आह्वान किया था—अश्विद्वय, अभीष्ट-वर्षिद्वय, नेतृद्वय, ऋज्राश्व ने, तरुण जार की तरह, अमितव्ययी होकर एक सौ एक भेड़ों को खण्ड-खण्ड किया था।

एकोनविंशीमृचमाह—

महीवांमूतिरश्विना मयोभूरुत स्रामं धिष्ण्या संरिणीथः ।
अथा युवामिदह्वयत्पुरंधिरागच्छतंसीं वृषणाववोभिः ॥ १९ ॥

मही । वाम् । ऊतिः । अश्विना । मयःऽभूः । उत । स्रामम् । धिष्ण्या । सम् । रिणीथः । अथ । युवाम् । इत् । अह्वयत् । पुरम्ऽधिः । आ । अगच्छतम् । सीम् । वृषणौ । अवःऽभिः ॥ १९ ॥

हेअश्विनौ वांयुवयोःमहीमहतीऊतिःपालनं मयोभूःमयसःसुखस्यभावयित्री उतअपि च हेधिष्ण्याधिषणास्तुतिलक्षणावाक्तयास्तोतव्यौ स्रामंव्याधितंपुरुषंविश्लिष्टांगमत्र्यादिकंसंरिणीथःसन्धानावयवंकुरुथः अथअपिच युवामित्युवामेवपुरन्धीर्बहुधीर्घोषाविश्पलावाआह्वयत्

रोगोपशमनार्थंआहूतवती हेवृषणौकामानांवर्षितारौअश्विनौ अवोभिःरक्षणैःसहआगच्छतम् आभिमुख्येनसीमेनांप्राप्तवन्तौ ॥ मही महती छान्दसोवर्णलोपः यद्वा महेरौणादिकइन् कृदिकारादक्तिनइतिङीष् । मयोभूः भववेरन्तर्भावितण्यर्थाक्विप् । रिणीथः रीगतिरेषणयोः क्रैयादिकः प्वादीनांह्रस्वइतिह्रस्वत्वम् ॥ १९ ॥

१९. अश्विद्वय, तुम्हारा रक्षा-कार्य सुख का कारण है; हे स्तुति-पात्र, तुमने रोगियों के अंगों को ठीक किया है; इसलिए प्रभूत-बुद्धि-शालिनी घोषा ने, तुम्हें रोग-निवृत्ति के लिए बुलाया था। अभीष्ट-दातृद्वय, अपने रक्षण-कार्यों के साथ आओ।

अधेनुंदस्रास्तर्यं१ंविषक्तामपिन्वतंशयवेअश्विनागाम् ।
युवंशचीभिर्विमदायजायांन्यूहथुःपुरुमित्रस्ययोषाम्॥२०॥१६॥

अधेनुम् । दस्रा । स्तर्यम् । विऽसंक्ताम् । अपिन्वतम् । शयवे । अश्विना । गाम् । युवम् । शचीभिः । विऽमदाय । जायाम् । नि । ऊहथुः । पुरुऽमित्रस्य । योषाम् ॥ २० ॥ १६ ॥

हेदस्रादर्शनीयावश्विनौ विषक्तां विशेषेणसक्तावयवांकृशावयवामित्यर्थः अतएवस्तर्यंनिवृत्तप्रसवां अतएवाधेनुंअदोग्ध्रीं एवंभूतांगांशयवेएतत्संज्ञायऋषयेअपिन्वतं पयसाअपूरयतं अपिच पुरुमित्रस्य पुरुमित्रोनामकश्चिद्राजातस्ययोषांकुमारीं शचीभिरात्मीयैःकर्मभिर्विमदाय एतत्संज्ञायऋषयेशत्रुभिःसहयोद्धुमशक्याययुवंयुवांजायांन्यूहथुः विमदस्यगृहंप्रापितवन्तौ ॥स्तर्यम् स्तृञ्आच्छादने अवितृस्तृतन्त्रिभ्यईरितिईकारप्रत्ययः वाछन्दसीत्यमिपूर्वस्यविकल्पादभावेयणादेशः उदात्तस्वरितयोर्यणइतिपरस्यानुदात्तस्यस्वरितत्वम् । विषक्ताम् षञ्जसङ्गे कर्मणिनिष्ठा अनिदितामितिनलोपः गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम् । अपिन्वतम् पिविसेचने इदित्वान्नुम् भौवादिकः । पुरुमित्रस्य पुरूणिमित्राणियस्य संज्ञायांमित्राजिनयोरितिबहुव्रीहावुत्तरपदान्तोदात्तत्वम् ॥ २० ॥

२०. दस्रद्वय, शयु ऋषि के लिए तुमने कृशा, प्रसव-शून्या और दुग्ध-रहिता गौ को दुग्ध-पूर्ण किया था। तुमने अपने कर्म-द्वारा पुरुमित्र राजा की कुमारी को विमद ऋषि की स्त्री बनाया था।

एकविंशीमृचमाह—

यवंवृकेणाश्विनावपन्तेषंदुहन्तामनुंषायदस्रा ।
अभिदस्युंबकुरेणाधमन्तोरुज्योतिश्चक्रथुरार्याय ॥ २१ ॥

यवम् । वृकेण । अश्विना । वपन्ता । इषम् । दुहन्ता । मनुषाय ।
दस्रा । अभि । दस्युम् । बकुरेण । धमन्ता । उरु । ज्योतिः । चक्रथुः ।
आर्याय ॥ २१ ॥

आर्यायविदुषेमनुषशब्दोमनुशब्दपर्यायः मनुषायमनवेमनोरर्थं हेदस्रादर्शनीयावश्विनौ वृकेणलाङ्गलेनकर्षकैः कृष्टदेशेयवंयवाद्युपलक्षितंसर्वधान्यजातंवपन्तावापयन्तौ तथाइषंअन्नना-मैतत् तत्कारणभूतंवृष्ट्युदकंचदुहन्तामेघात्क्षारयन्तौ तथा दस्युंउपक्षयकारिणंअसुरपिशाचादिकं बकुरेण बकुरोनामभासमानोवज्रः तेनअभिधमन्ता धमतिर्वधकर्मा अभिघ्नन्तौ एवंत्रिविधंकर्म-कुर्वन्तौयुवां उरुविस्तीर्णंज्योतिःस्वकीयंतेजः माहात्म्यंचक्रथुः कृतवन्तौ दर्शितवन्तावित्यर्थः यद्वा त्रिविधकर्माचरणेनआर्यायविदुषेमनवेविस्तीर्णंसूर्याख्यंज्योतिश्चक्रथुः कृतवन्तौ जीवन्हि-सूर्यंपश्यति तद्धेतुभूतानित्रीणिकर्माणियुवाभ्यांकृतानीतिभावः अत्रनिरुक्तम्—बकुरोभास्करो-भयङ्करोभासमानोद्रवतीतिवावयमिववृकेणाश्विनौनिवपन्तौवृकोलाङ्गलंभवतिविकर्तनात्।[1] इत्या-दिकमनुसन्धेयम् ॥ मनुषाय मनेरौणादिकउषन्प्रत्ययः ॥ २१ ॥

२१. अश्विद्वय, तुमने विद्वान् मनु या आर्य मनुष्य के लिए हल-द्वारा खेत जुतवाकर, यव वपन कराकर, अन्न के लिए वृष्टि-वर्षण करके तथा वज्र-द्वारा दस्यु का वध करके उसके लिए विस्तीर्ण ज्योति प्रकाश की।

द्वाविंशीमृचमाह—

आथर्वणायाश्विनादधीचेऽश्व्यंशिरःप्रत्यैरयतम् ।
सवांमधुप्रवोचदृतायन्त्वाष्ट्रंयद्दस्रावपिकक्ष्यंवाम् ॥ २२ ॥

आथर्वणाय । अश्विना । दधीचे । अश्व्यम् । शिरः । प्रति ।
ऐरयतम् । सः । वाम् । मधु । प्र । वोचत् । ऋतऽयन् । त्वाष्ट्रम् ।
यत् । दस्रौ । अपिऽकक्ष्यम् । वाम् ॥ २२ ॥

तद्वांनरोसनयइत्यत्रोक्तमाख्यानमिहाप्यनुसन्धेयम् हेअश्विनौ आथर्वणायअथर्वणः पुत्रा-यदधीचेदध्यङ्ङ्नाम्नेमहर्षयेअश्व्यंअश्वस्यसंबन्धिशिरः प्रत्यैरयतम् प्रत्यधत्तम् तदीयंमानुषंशि-रःप्रच्छिद्यान्यत्रविधायाश्व्येनशिरसातमृषिंसमयोजयतमित्यर्थः सचवांयुवाभ्यांप्रवर्ग्यविद्यांम-धुविद्यांचवक्ष्यामीतिपुराकृतांप्रतिज्ञांऋतायन्सत्यामात्मानइच्छन्मधुमधुविद्यांत्वाष्ट्रंत्वष्टुरिन्द्रात्ल-ब्धंप्रवोचत्प्रोक्तवान् हेदस्रादर्शनीयौअश्विनौ वांयुवयोःसंबन्धितदपिकक्ष्यंछिन्नस्यआश्वशिरसः

---

[1] नि० ६. २५। [2] ऋ० सं० १.८. १०।

कक्षप्रदेशेनपुनःसन्धानभूतं प्रवर्ग्यविद्याख्यंरहस्यंतदपिवांयुवाभ्यांमावोचदित्यर्थः ॥ दधीचे अ-श्वेतर्क्किविगित्यादिनाक्किन् अनिदितामितिनलोपः चतुर्थ्येकवचनेअचइत्यकारलोपेचावितिदी-र्घत्वम् उदात्तनिवृत्तिस्वरेणविभक्त्युदात्तत्वेप्राप्तेतस्यापवादत्वेनचावितिविभक्तेःपूर्वस्योदात्तत्वं-प्राप्तं तस्याप्ययमपवादः अञ्चेश्छन्दस्यसर्वनामस्थानमितिविभक्त्युदात्तत्वम् ॥ २२ ॥

२२. अश्विद्वय, तुमने अथर्वा ऋषि के पुत्र दधीचि ऋषि के स्कन्ध पर अश्व का मस्तक जोड़ दिया था। दधीचि ने भी सत्य-रक्षा कर त्वष्टा या इन्द्र से प्राप्त मधुविद्या तुम्हें सिखाई थी। दस्रद्वय, वही विद्या तुम लोगों में प्रवर्ग-विद्या-रहस्य हुई थी।

सदाकवीसुमतिमाचकेवांविश्वाधियोअश्विनाप्रावतंमे ।
अस्मेरयिंनासत्याबृहन्तमपत्यसाचंश्रुत्यंरराथाम् ॥ २३ ॥

सदा । कवी इति । सुऽमतिम् । आ । चके । वाम् । विश्वाः ।
धियः । अश्विना । प्र । अवतम् । मे । अस्मे इति । रयिम् ।
नासत्या । बृहन्तम् । अपत्यऽसाचम् । श्रुत्यम् । रराथाम् ॥ २३ ॥

हेकवीक्रान्तदर्शिनौमेधाविनावश्विनौ वांयुवयोःसुमतिंकल्याणीमनुग्रहात्मिकांबुद्धिंस-दासर्वदाआचकेआभिमुख्येनप्रार्थये मेमदीयानि विश्वाधियःसर्वाणिकर्माणियुवांप्रावतंप्रकर्षे-णरक्षतम् अपिचास्मेअस्मभ्यंहेनासत्यावश्विनौ बृहन्तं महान्तं अपत्यसाचंअपत्यैःपुत्रादि-भिःसमवेतं श्रुत्यंप्रशंसनीयंउत्कृष्टं रयिंधनंरराथां प्रयच्छतम् ॥ चके कैगैशब्दे व्यत्ययेनात्मने-पदम् लिटयुत्तमैकवचनेरूपम् । अस्मे सुपांसुलुगितिचतुर्थीबहुवचनस्यशेआदेशः ।अपत्यसाचं अपत्यैःसहसेचवेसंगच्छवइत्यपत्यसाच् छान्दसोण्विः । श्रुत्यम् श्रुतिःस्तुतिः तत्रभवंश्रुत्यम् भवेछन्दसीतियत् यतोनावइत्याद्युदात्तत्वम् । रराथाम् रादाने लोटिव्यत्ययेनात्मनेपदम् बहुलं-छन्दसीतिशपःश्लुः ॥ २३ ॥

२३. मेधावि-द्वय, मैं सदा तुम्हारी कृपा के लिए प्रार्थना करता हूँ। तुम मेरे सारे कार्यों की रक्षा करते हो। नासत्यद्वय, हमें विशाल, सन्तान-समेत और प्रशंसनीय धन दो।

हिरण्यहस्तमश्विनाररांणापुत्रंनरावध्रिमत्याअदत्तम् ।
त्रिधाहश्यावमश्विनाविकस्तमुज्जीवसऐरयतंसुदानू ॥ २४ ॥

हिरण्यऽहस्तम् । अश्विना । रराणा । पुत्रम् । नरा । वध्रिऽमत्याः ।
अदत्तम् । त्रिधा । ह । श्यावम् । अश्विना । विऽकस्तम् । उत् ।
जीवसे । ऐरयतम् । सुदानू इति सुऽदानू ॥ २४ ॥

रराणा रममाणौदातारौवानरानेतारौ हेअश्विनौ हिरण्यहस्तंनामपुत्रंवध्रिमत्याः एतत्संज्ञायै ब्रह्मवादिन्यैअदत्तंप्रायच्छतम् अपिच हेसुदानूशोभनदानावश्विनौ त्रिधात्रेधाविकस्तंविच्छिन्नंश्यावाख्यमृषिंजीवसेजीवितुंउदैरयतम् असुरैस्त्रेधाखण्डितंशरीरंपुनरेकीकृत्यउदगमयतमित्यर्थः ॥ रराणा रमतेःशानचि बहुलंछन्दसीतिशपःश्लुः व्यत्ययेनमकारस्यात्वम् रातेर्वाव्यत्ययेन शानच् पूर्ववत्श्लुः। वध्रिमत्याः चतुर्थ्यर्थेबहुलंछन्दसीतिषष्ठी। जीवसे जीवमाणधारणे तुमर्थेसेसेनितिअसेप्रत्ययः ॥ २४ ॥

२४. दानशील और नेता अश्विद्वय, तुमने वध्रिमती को हिरण्यहस्त नाम का पुत्र दिया था। दानशील अश्विद्वय, तुमने तीन भागों में विभक्त श्याव ऋषि को जीवित किया था।

एतानिवामश्विनावीर्याणिप्रपूर्व्याण्यायवोवोचन्।
ब्रह्मकृण्वन्तोवृषणायुवभ्यांसुवीरासोविदथमावदेम ॥२५॥ १७॥

एतानि। वाम्। अश्विना। वीर्याणि। प्र। पूर्व्याणि। आयवः। अवोचन्। ब्रह्म। कृण्वन्तः। वृषणा। युवऽभ्याम्। सुऽवीरासः। विदथम्। आ। वदेम ॥ २५ ॥१७॥

अश्विनाहेअश्विनौ वांयुवयोःसंबन्धीनिपूर्व्याणिप्रत्नानिएतानिइदानींमयोक्तानि वीर्याणिवीरकर्माणिआयवोमनुष्याः मदीयाःपित्रादयःप्रावोचन्उक्तवन्तः वयंच हेवृषणाकामाभिवर्षकावश्विनौ युवाभ्यां ब्रह्ममन्त्रात्मकंस्तोत्रंकृण्वन्तः कुर्वन्तः सुवीरासः सुवीराः शोभनैःवीरैःपुत्रादिभिरुपेताःसन्तः विदथंयज्ञंआवदेमआभिमुख्येनस्तुतीरुच्चारयाम यद्वा विदथंवेदयन्तमर्थिनंतदपेक्षितप्रदानेनआवदेमआभिमुख्येनप्रियपूर्विकांवाचंउच्चारयाम ॥ कृण्वन्तःकृविहिंसाकरणयोश्च इदित्वान्नुम् लटःशतृ धिन्विकृण्व्योरचेत्युप्रत्ययः अकारान्तादेशश्च अतोलोपेसति स्थानिवद्भावाल्लघूपधगुणाभावः। सुवीरासः शोभनावीरायेषांतेतथोक्ताःआज्जसेरसुक् वीरवीर्यौचेत्युत्तरपदाद्युदात्तत्वम्। विदथम् विदज्ञाने रुविदिभ्यांकिदित्यथप्रत्ययः ॥ २५ ॥

२५. अश्विद्वय, तुम्हारे इन प्राचीन कार्यों को पूर्वज कह गये हैं। अभीष्ट-दातृद्वय, हम भी तुम्हारी स्तुति करके वीर पुत्र आदि से युक्त होकर यज्ञ को सम्पन्न करते हैं।

आवामित्येकादशर्चंतृतीयंसूक्तंकक्षीवतआर्षंत्रैष्टुभमाश्विनम् तथाचानुक्रान्तम्—आवामेकादशेति। पूर्वसूक्ताभ्यांसहप्रातरनुवाकाश्विनशस्त्रयोरुक्तोविनियोगः।

तत्रप्रथमामृचमाह—

आवांरथोअश्विनाश्येनपत्वासुमृळीकःस्ववांयात्वर्वाङ् ।
योमर्त्यस्यमनसोजवीयांस्त्रिवन्धुरोवृषणावातरंहाः ॥ १ ॥

आ । वाम् । रथः । अश्विना । श्येनऽपत्वा । सुऽमृळीकः ।
स्वऽवान् । यातु । अर्वाङ् । यः । मर्त्यस्य । मनसः । जवीयान् ।
त्रिऽवन्धुरः । वृषणा । वातऽरंहाः ॥ १ ॥

हेअश्विनौ वांयुवयोःस्वभूतोरथः अर्वाङ्अस्मदभिमुखंआयातुआगच्छतु कीदृशोरथः श्येनपत्वा श्येनइत्यश्वनाम शंसनीयगमनैरश्वैःपतन्गच्छन् यद्वा श्येनःपक्षी सइवशीघ्रंपतन् सुमृळीकः शोभनसुखयुक्तः स्ववान्धनवान् हेवृषणौकामानांवर्षितारौअश्विनौयःयुष्मदीयोरथःमर्त्यस्यमनुष्यस्यमनसोजवीयान् अतिशयेनवेगवान् तद्यथावेगेनकृत्स्नंजगद्व्याप्नोति ततोप्यतिशयेनक्षणमात्रादेवसर्वंजगत्पर्यटतीत्यर्थः ॥ त्रिवन्धुरः वन्धुरंवेष्टितंसारथेःस्थानं त्रिप्रकारेणवंधुरेणयुक्तः । वातरंहाः वातस्यवायोःरंहोवेगइववेगोयस्यसतथोक्तः अनेनाप्रतिहतगतित्वमुच्यतेसरथइतिपूर्वत्रान्वयः । श्येनपत्वा पत्लृगतौ अन्येभ्योपिदृश्यन्तइतिवनिप् दासीभारादिः यद्वा दृशिग्रहणस्यविध्यन्तरोपसङ्ग्रहार्थत्वाद्भावेवनिप् ततोबहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम् । जवीयान् जवोस्यास्तीतिजववान् अतिशयेनजववानिइतिजवीयान् आतिशायनिकईयसुन् विन्मतोर्लुक् टेरितिटिलोपः ॥ १ ॥

१. अश्विद्वय, श्येन पक्षी की तरह शीघ्रगामी, सुखकर और धन-युक्त तुम्हारा रथ हमारे सम्मुख आवे। अभीष्ट-वर्षक-द्वय, तुम्हारा वह रथ मनुष्य के मन की तरह वेगवान्, त्रिवन्धुर या त्रिबन्धनाधारभूत और वायु-वेगी है।

त्रिवन्धुरेणत्रिवृतारथेनत्रिचक्रेणसुवृतायातमर्वाक् ।
पिन्वतंगाजिन्वतमर्वतोनोवर्धयतमश्विनावीरमस्मे ॥ २ ॥

त्रिऽवन्धुरेण । त्रिऽवृता । रथेन । त्रिऽचक्रेण । सुऽवृता । आ ।
यातम् । अर्वाक् । पिन्वतम् । गाः । जिन्वतम् । अर्वतः । नः ।
वर्धयतम् । अश्विना । वीरम् । अस्मे इति ॥ २ ॥

त्रिवन्धुरेण वन्धुरंसारथिस्थानंत्रिप्रकारवन्धुरोपेतेन त्रिवृतात्रिधावर्तमानेन त्रिचक्रेणचक्रत्रयोपेतेन सुवृताशोभनंगच्छतारथेनअर्वाक्अस्मदभिमुखंआयातंआगच्छतम् आगत्यचा-

स्मदीयागाः पिन्वतंपयसापूरयतम् नोस्माकंअर्वतोश्वान्जिन्वतंप्रीणयतम् अपिच हेअश्विनौ अस्मेअस्माकंवीरंपुत्रादिकंवर्धयतं मवृद्धंकुरुतम्॥ त्रिचक्रेण त्रीणिचक्राणियस्यसतथोक्तः त्रिचक्रादीनांछन्दस्युपसङ्ख्यानमितिउत्तरपदान्तोदात्तत्वम् ॥ २ ॥

२. अपने त्रिवन्धुर, त्रिकोण या तीनों लोकों में वर्त्तमान, त्रिचक्र और शोभन-गति रथ पर हमारे सम्मुख आओ। अश्विद्वय, हमारी गायों को दुग्धवती करो। हमारे घोड़ों को प्रसन्न करो। हमारे वीर पुत्र आदि को वर्द्धित करो।

प्रवद्यामनासुवृतारथेनदस्राविमंशृणुतंश्लोकमद्रेः।
किमङ्गवांप्रत्यवर्तिंगमिष्ठाहुर्विप्रासोअश्विनापुराजाः ॥ ३ ॥

प्रवत्ऽयामना। सुऽवृता। रथेन। दस्रौ। इमम्। शृणुतम्। श्लोकम्। अद्रेः। किम्। अङ्ग। वाम्। प्रति। अवर्तिम्। गमिष्ठा। आहुः। विप्रासः। अश्विना। पुराऽजाः ॥ ३ ॥

हेदस्रौदर्शनीयावश्विनौ प्रवद्यामनाप्रकृष्टगमनेनशीघ्रगामिना सुवृताशोभनवर्तनेनरथेनागत्यअद्रेः आदरंकुर्वतःस्तोतुः इमंश्लोकंस्तुतिलक्षणामिमांवाचंशृणुतम् अङ्गाश्विना हेअश्विनौ पुराजाः पूर्वजाताश्चिरन्तनाः विप्रासोमेधाविनः वांयुवांअवर्तिंस्तोतॄणांदारिद्र्यंमविवतपरिहर्तुंगमिष्ठागन्तृतमावाहुः कथयन्ति किंशब्दः प्रदर्शनफलप्रश्नेवर्तते किंनकथयन्ति कथयन्त्येवसर्वे तथासत्यागन्तव्यमिति ॥ प्रवद्यामना सोपसृष्टेधात्वर्थेवर्तमानात्प्रशब्दादुपसर्गाच्छन्दसिधात्वर्थेइतिवतिः यामापणे आवोमनिन्निनिबहुलवचनाद्भावेमनिन् ततोबहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्। अद्रेः दृङ्आदरे आङ्पूर्वादस्मादौणादिकःक्रिमत्ययः आङोह्रस्वश्च। गमिष्ठा गन्तृशब्दात्तुश्छन्दसीतीष्ठन् तुरिष्ठेमेयःस्वितितृलोपः सुपांसुलुगितिविभक्तेराकारः। आहुः प्रत्ययस्वरः पादादित्वान्निघाताभावः॥ ३ ॥

३. दस्रद्वय, अपने शीघ्रगामी और शोभन-गति रथ-द्वारा आकर सेवा-परायण स्तोता का यह मंत्र सुनो। अश्विद्वय, क्या पहले के विद्वान् यह नहीं बोले थे कि, तुम स्तोताओं की दरिद्रता दूर करने के लिए सर्वदा जाते हो?

आवांश्येनासोअश्विनावहन्तुरथेयुक्तासआशवःपतङ्गाः।
येअप्तुरोदिव्यासोनगृध्राअभिप्रयोनासत्यावहन्ति ॥ ४ ॥

आ। वाम्। श्येनासः। अश्विना। वहन्तु। रथे। युक्तासः। आशवः। पतङ्गाः। ये। अप्ऽतुरः। दिव्यासः। न। गृध्राः। अभि। प्रयः। नासत्या। वहन्ति ॥ ४ ॥

हेअश्विनौ रथेयुक्तासः युक्ताः सारथिनावहनप्रदेशेयोजिताः आशवः व्याप्नुवन्तः पतङ्गाः पतनसमर्थाः श्येनासः शंसनीयगमनाः अश्वाः वांयुवांआवहन्तु अस्मत्समीपमानयन्तु येअश्वाः अप्तुरः आपइवत्वरोपेताः दिव्यासोनगृध्राः अन्तरिक्षेवर्तमानागृध्राख्याःपक्षिणइवशीघ्रंगच्छन्तः हेनासत्यौ युवां मयोहविर्लक्षणमन्नं अभिलक्ष्य वहन्तिप्रापयन्ति तादृशाइतिपूर्वत्रसंबन्धः ॥ अप्तुरः तुरत्वरणे अप्शब्दोपपदादस्मात्क्विप्चेतिक्विप् ॥ ४ ॥

४. अश्विद्वय, रथ में योजित, शीघ्रगन्ता, उछलने में बहादुर और श्येन पक्षी की तरह वेग-विशिष्ट तुम्हारे घोड़े तुम्हें लेकर आवें। नासत्यद्वय, जल की तरह शीघ्रगति अथवा आकाशचारी गृध्र की तरह शीघ्रगति वे घोड़े तुम्हें हव्यान्न के सामने ले आ रहे हैं।

आवांरथंयुवतिस्तिष्ठदत्रजुष्ट्वीनरादुहितासूर्यस्य ।
परिवामश्वावपुषःपतङ्गावयोवहन्त्वरुषाअभीके ॥ ५ ॥ १८ ॥

आ । वाम् । रथम् । युवतिः । तिष्ठत् । अत्र । जुष्ट्वी । नरा । दुहिता । सूर्यस्य । परि । वाम् । अश्वाः । वपुषः । पतङ्गाः । वयः । वहन्तु । अरुषाः । अभीके ॥ ५ ॥ १८ ॥

हेनरानेताराविश्विनौ युवतिस्तरुणीसूर्यस्यदुहिताजुष्ट्वीप्रीतासती वांयुवयोः अत्रइमं रथंआतिष्ठत् आरूढवती तयासहितौवांयुवांअश्वाः अभीकेगृहसमीपेतंरथंपरिवहन्तुपरिप्रापयन्तु कीदृशाअश्वाः वपुषः वपुरितिरूपस्यशरीरस्यवानामधेयम् तद्वन्तः छान्दसोमत्वर्थीयस्यलोपः पतंगाः उत्पतनसमर्थाः वयोगच्छन्तः अरुषाः आरोचमानाः हिंसकरहितावा ॥ अत्र इतराभ्योपिदृश्यन्तइतिदृशिग्रहणाद्भवदादियोगेपिइदम्शब्दात् विभक्त्यर्थेत्रल्प्रत्ययः।जुष्ट्वी जुषीप्रीतिसेवनयोः औणादिकः क्त्वाप्रत्ययः वोतोगुणवचनादितिङीष् ॥ ५ ॥

५. नेतृद्वय, प्रसन्न होकर सूर्य की युवती पुत्री तुम्हारे रथ पर चढ़ी थी। तुम्हारे पुष्टाङ्ग, लम्फ-प्रदान-समर्थ, शीघ्रगामी और दीप्तिमान् घोड़े तुम्हें हमारे घर की ओर ले आवें।

उद्वन्दनमैरतंदंसनाभिरुद्रेभंदस्रावृषणाशचीभिः ।
निष्टौग्र्यंपारयथःसमुद्रात्पुनश्च्यवानंचक्रथुर्युवानम् ॥ ६ ॥

उत् । वन्दनम् । ऐरतम् । दंसनाभिः । उत् । रेभम् । दस्रा । वृषणा । शचीभिः । निः । तौग्र्यम् । पारयथः । समुद्रात् । पुनरिति । च्यवानम् । चक्रथुः । युवानम् ॥ ६ ॥

हेअश्विनौ वन्दनमेतत्संज्ञंऋषिंदंसनाभिरात्मीयैः कर्मभिः कूपादुदैरतम् उदैरयतम् उदगमयतम् हेदस्रादर्शनीयौवृषणाकामानांवर्षितारावश्विनौ शचीभिः कर्मभिःरेभंएतत्संज्ञंऋषिंदशरात्रीर्नवाहानिचकूपेनिवसन्तंतस्मादुदैरयतंउदतारयतम् तथातौग्र्यंतुग्रस्यपुत्रंभुज्युंसमुद्रेनिमग्नंआत्मीयाभिर्नौभिरश्वैश्चसमुद्रान्निष्पारयथः तीरदेशंप्रापितवन्तौ तथाच्यवानं च्यवनंऋषिंजीर्णंपुनर्युवानंयौवनोपेतंचक्रथुः कृतवन्तौ ॥ ऐरतम् ईरगतौकम्पनेच ण्यन्ताल्लङ्छिन्दस्युभयथेतिशपआर्धधातुकत्वाण्णेरनिटीतिणिलोपः ॥ ६ ॥

६. अपने कार्य-द्वारा तुमने वन्दन ऋषि को बचाया था। कामवर्षिद्वय, अपने कार्य-द्वारा तुमने रेभ ऋषि को निकाला था तुमने तुग्रपुत्र भुज्यु को समुद्र से पार कराया था। च्यवन ऋषि को फिर युवक बना दिया था।

युवमत्रयेवनीतायतप्तमूर्जमोमानमश्विनावधत्तम् ।
युवंकण्वायापिरिप्तायचक्षुःप्रत्यधत्तंसुष्टुतिंजुजुषाणा ॥ ७ ॥

युवम् । अत्रये । अवऽनीताय । तप्तम् । ऊर्जम् । ओमानम् । अश्विनौ । अधत्तम् । युवम् । कण्वाय । अपिऽरिप्ताय । चक्षुः । प्रति । अधत्तम् । सुऽस्तुतिम् । जुजुषाणा ॥ ७ ॥

हेअश्विनौ युवंयुवां अवनीतायशतद्वारेपीडायन्त्रगृहेअवस्तान्नीतायात्रये तप्तंपीडार्थंप्रक्षिप्तंतुषाग्निंशीतोदकेनावारयेथाम् अपिचास्मैअत्रयेओमानंसुखकरंऊर्जंरसवदन्नंअधत्तंप्रायच्छतम् तथासुष्टुतिंशोभनांस्तुतिंजुजुषाणासेवमानौ युवांअपिरिप्तायअसुरैर्ब्राह्मण्यपरीक्षार्थं इहासीनःसन्व्युष्टामुषसंजानीहीतिअन्धकारवतिगृहेप्रवेशितायकण्वाय ऋषयेचक्षुः व्युष्टायाउषसःप्रकाशकंवीणाशब्दंप्रत्यधत्तंकृतवन्तौ यद्वा अपिरिप्तायअपिलिप्तायपटलेनपिहितदृष्टयेएवंविधायकण्वायचक्षुरिन्द्रियंप्रत्यधत्तम् प्रत्यस्थापयतम् ॥ ओमानम् अवतेरौणादिकोमनिः ज्वरत्वरेत्यादिनावकारस्योपधायाश्चऊठ् गुणः। अपिरिप्ताय लिपउपदेहे अस्मात्कर्मणिनिष्ठा कपिलकादित्वाल्लत्वविकल्पः गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम् । जुजुषाणा जुषीप्रीतिसेवनयोः छान्दसोलिट् लिटःकानज्वा सुपांसुलुगितिविभक्तेराकारः ॥ ७ ॥

७. अश्विद्वय, तुमने रोके हुए अत्रि की प्रदीप्त अग्नि-शिखा को निवारित किया था और उन्हें रसवान् अन्न प्रदान किया था। स्तुति ग्रहण करके तुमने अन्धकार में प्रविष्ट कण्व ऋषि को चक्षुप्रदान किया था।

युवंधेनुंशयवेनाधितायापिन्वतमश्विनापूर्व्याय ।
अमुञ्चतंवर्तिकामंहसोनिःप्रतिजंघांविश्पलायाअधत्तम् ॥ ८ ॥

युवम् । धेनुम् । शयवे । नाधितायं । अपिन्वतम् । अश्विना । पूर्व्याय । असुञ्चतम् । वर्तिकाम् । अंहसः । निः । प्रति । जंघाम् । विश्पलायाः । अधत्तम् ॥ ८ ॥

अश्विनाहेअश्विनौ युवंयुवां पूर्व्यायपुरातनाय नाधिताययाचमानाय शयवे एतत्संज्ञाय ऋषयेधेनुंनिवृत्तप्रसवामदोग्ध्रीं अपिन्वतंपयसाअसिञ्चतम् सर्वदापयस्विनीमकुरुतमित्यर्थः अपिच वर्तिकांवृकेणग्रस्तांचटकसदृशींशकुनिंअंहसःवृकास्यलक्षणात्पापात्निरमुंचतम् निरमोचयतम् यद्वा पुनःपुनर्वर्ततइतिवर्तिकाउषाः तामादित्येनाभिग्रस्तांयुवाममोचयतम् तथाविश्पलायैसंग्रामेछिन्नजंघायैअगस्त्यपुरोहितस्यखेलस्यसंबन्धिन्यै एतत्संज्ञायैस्त्रियैआयसींजंघांप्रत्यधत्तम् प्रत्यस्थापयतम् समयोजयतमित्यर्थः ॥ ८ ॥

८. अश्विद्वय, प्रार्थना करने पर प्राचीन शयु ऋषि की दुग्ध-रहिता गौ को दुग्धवती किया था। तुमने वृक-रूप पाप से वर्त्तिका को छुड़ाया था। तुमने विश्पला की एक जंघा बना दी थी।

युवंश्वेतंपेदवइन्द्रजूतमहिहनमश्विनादत्तमश्वम् ।
जोहूत्रमर्योअभिभूतिमुग्रंसहस्रसांवृषणंवीड्वङ्गम् ॥ ९ ॥

युवम् । श्वेतम् । पेदवे । इन्द्रऽजूतम् । अहिऽहनम् । अश्विना । अदत्तम् । अश्वम् । जोहूत्रम् । अर्यः । अभिऽभूतिम् । उग्रम् । सहस्रऽसाम् । वृषणम् । वीळुऽअङ्गम् ॥ ९ ॥

अश्विनाहेअश्विनौ पेदवेपेदुनाम्नेराज्ञेयुवंयुवांश्वेतंश्वेतवर्णंकञ्चिदश्वंअदत्तंप्रायच्छतम् कीदृशंइन्द्रजूतं इन्द्रेणयुवाभ्यांगमितंदत्तमित्यर्थः अहिहनंशत्रूणांहन्तारम् जोहूत्रंअतिशयेनसङ्ग्रामेष्वाह्वातारम् अर्यः अरेःशत्रोःअभिभूतिंअभिभावुकंउग्रंउद्गूर्णवीर्यवन्तमित्यर्थः सहस्रसां सहस्रसंख्याकस्यधनस्यसंभक्तारंदातारंवा वृषणंसेक्तारंयुवानमित्यर्थः वीड्वंगम् दृढाङ्गमित्यर्थः ॥ इन्द्रजूतम् जुइतिसौत्रोधातुर्गत्यर्थः अस्मादन्तर्भावितण्यर्थात्कर्मणिनिष्ठा तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरत्वम् । जोहूत्रम् ह्वयतेर्यङ्लुगन्तादौणादिकःत्रप्प्रत्ययः प्रत्ययस्यपित्त्वादनुदात्तत्वेधातुस्वरःशिष्यते । अर्यः अरिशब्दात्षष्ठ्येकवचनेजसादिषुछन्दसिवावचनमिति घेर्ङितीतिगुणस्यविकल्पितत्वादभावेयणादेशः उदात्तयणइतिविभक्तेरुदात्तत्वम् । अभिभूतिम् अभिभूयतेनेनेत्यभिभूतिः करणेक्तिन् तादौचेतिगतेःप्रकृतिस्वरत्वम् । सहस्रसाम् सनोतेःसन्खेवाजनसनखनेतिविट् विड्वनोरनुनासिकस्यादित्यात्वम् ॥ ९ ॥

९. अश्विद्वय, तुमने पेदु राजा को श्वेतवर्ण घोड़ा दिया था। वह अश्व इन्द्र-प्रदत्त, शत्रु-हन्ता और संग्राम में शब्द करनेवाला था। वह अरि-मर्दन, उग्र और सहस्र या अनेक प्रकार के धन देनेवाला था। वह अश्व सेचन-समर्थ और दृढाङ्ग था।

दशमीमृचमाह—

तावांनरास्ववंसेसुजाताहवांमहेअश्विनानाधमानाः।
आनउपवसुंमतारथेनगिरोंजुषाणासुवितायंयातम् ॥ १० ॥

ता। वाम्। नरा। सु। अवंसे। सुऽजाता। हवांमहे। अश्विना।
नाधंमानाः। आ। नः। उपं। वसुंऽमता। रथेन। गिरंः। जुषाणा।
सुवितायं। यातम् ॥ १० ॥

नरानेतारौहेअश्विनौ सुजाताशोभनजन्मानौ तावांतौयुवांनाधमानाःधनंयाचमानाः वयंस्तोतारःअवसेरक्षणार्थंसुहवामहे शोभनमाह्वयामहे गिरःस्तुतीःजुषाणासेवमानौयुवांवसुमताधनयुक्तेनरथेननोस्मानुपायातम् उपागच्छतम् किमर्थं सुवितायसुष्ठुप्राप्तव्यायधनायसुखायवा ॥ सुजाता शोभनंजातंजन्मययोस्तौसुजातौ सुपांसुलुगितिविभक्तेराकारः नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्। नाधमानाः नाधृयाञ्चायाम्। जुषाणा जुषीप्रीतिसेवनयोः ताच्छीलिकश्चानश् तुदादित्वाच्छः पूर्ववद्विभक्तेराकारः। सुविताय सुपूर्वादेतेःकर्मणिनिष्ठा तन्वादित्वादुवङ् सूपमानात्क्तइत्युत्तरपदान्तोदात्तत्वम् ॥ १० ॥

१०. नेतृद्वय, शोभन-जन्मा अश्विद्वय, हम धन-याचना करके रक्षा के लिए तुम्हें बुलाते हैं। हमारी स्तुति ग्रहण करके तुम लोग धनशाली रथ पर, हमें सुख देने के लिए, हमारे सम्मुख आओ।

एकादशीमृचमाह—

आश्येनस्यजवंसानूतनेनास्मेयातंनासत्यासजोषाः।
हवेहिवामश्विनारातहंव्यःशश्वत्तमायाउषसोव्युंष्टौ॥११॥ १९ ॥

आ। श्येनस्यं। जवंसा। नूतंनेन। अस्मे इतिं। यातम्।
नासत्या। सऽजोषाः। हवे। हि। वाम्। अश्विना। रातऽहंव्यः।
शश्वत्ऽतमायाः। उषसंः। विऽउंष्टौ ॥ ११ ॥ १९ ॥

हेनासत्यावश्विनौ सजोषाः सजोषसौसमानप्रीतियुक्तौ श्येनस्यशंसनीयंगच्छतोश्वस्यनूतनेननवतरेणमत्यग्रेणजवसावेगेनसहितौयुवामस्मेअस्मान् आयातंआगच्छतम् अश्विना हेअश्विनौ रातहव्योवांयुवाभ्यांदातव्येनहविषायुक्तःसन् शश्वत्तमायाः कालात्मकत्वयानित्यायाउषसः व्युष्टौविवासनसमयेवांयुवांहवेआह्वयामि हिर्हेतौ हियस्मादेवंतस्मादायातमित्यर्थः॥अस्मे

सुपांसुलुगितिशसःशेआदेशः। सजोषाः तेनैवद्विवचनस्यसुआदेशः । हवे ह्वेञोलडुत्तमैकवचने बहुलंछन्दसीतिसंप्रसारणम् शप्गुणावादेशाः। शश्वत्तमायाः उत्तमशश्वत्तमौसर्वत्रेत्युञ्छादिषपाठादन्तोदात्तत्वम्॥ ११ ॥

११. नासत्यद्वय समान-प्रीति-सम्पन्न होकर तथा श्येन पक्षी अथवा प्रशंसनीय गमनकारी अश्व के नूतन वेग की तरह हमारे निकट आओ। अश्विद्वय, हव्य लेकर हम नित्य उषा के उदय-काल में तुम्हें बुलाते हैं।

आवांरथमितिदशर्चंचतुर्थंसूक्तं दैर्घतमसस्यकक्षीवतआर्षंजागतमाश्विनम् तथाचानुक्रान्तम्—आवांरथंदशजागतमिति। प्रातरनुवाकस्याश्विनेक्रतौजागतेछन्दसीदंसूक्तमाश्विनशस्त्रे च तथाचसूत्रितम्—आवांरथमभूदिदंयोवांपरिज्मेतित्रीणीति।

तत्रप्रथमामृचमाह—

आवांरथंपुरुमायंमनोजुवंजीराश्वंयज्ञियंजीवसेहुवे ।
सहस्रकेतुंवनिनंशतद्वसुंश्रुष्टीवानंवरिवोधामभिप्रयः ॥ १ ॥

आ। वाम्। रथम्। पुरुऽमायम्। मनःऽजुवम्। जीरऽअश्वम्। यज्ञियम्। जीवसे। हुवे। सहस्रऽकेतुम्। वनिनम्। शतत्ऽवसुम्। श्रुष्टीऽवानम्। वरिवःऽधाम्। अभि। प्रयः॥ १ ॥

हेअश्विनौवांयुवयोः संबन्धिनंरथंजीवसेजीवनार्थं प्रयोहविर्लक्षणमन्नंअभिलक्ष्यआहुवे आह्वयामि कीदृशंपुरुमायंबहुविधाश्चर्यंबहुविधकर्माणंवा मनोजुवंमनइवशीघ्रंगच्छन्तं जीराश्वं जवबदश्वोपेतम् यज्ञियंयज्ञेष्वाह्वातुमर्हं सहस्रकेतुंअनेकध्वजं सहस्रस्यधनस्यकेतयितारं ज्ञापयितारंवा वनिनं वनमित्युदकनाम तद्वन्तं शतद्वसुंशतसंख्याकैर्धनैर्युक्तं श्रुष्टीवानम् श्रुष्टीतिक्षिप्रनाम क्षिप्रंसंभजमानम् यद्वा सुखवन्तम् वरिवोधां वरिवइतिधननाम वरिवसोधनस्यदातारम्॥ पुरुमायम् बहुव्रीहौनिचक्रादित्वादन्तोदात्तत्वम् यद्वा तत्पूर्वादर्शआदित्वादच्। जीराश्वम् जुइतिगत्यर्थःसौत्रोधातुः जोरीचेतिरक्ईकारान्तादेशश्च बहुव्रीहौपूर्वपदप्रकृतिस्वरत्वम्। यज्ञियम् यज्ञर्त्विग्भ्यांघखञाविति अर्हार्थेघप्रत्ययः । हुवे ह्वेञोलटिबहुलंछन्दसीतिसंप्रसारणम् लुगिस्मनुवृत्तौबहुलंछन्दसीतिशपोलुक् उवङ्। शतद्वसुं शतवसुं छान्दसस्तकारोपजनः॥ १ ॥

१. अश्विद्वय, जीवन धारण के लिए, अन्न के निमित्त, मैं तुम्हारे रथ का आवाहन करता हूँ। वह रथ बहु-विधगति-विशिष्ट, मन की तरह शीघ्रगामी, वेगवान् अश्व से युक्त, यज्ञ-पात्र, सहस्रकेतु-युक्त, शतधन-युक्त, सुखकर और धनदाता है।

द्वितीयामृचमाह—

ऊर्ध्वा धीतिः प्रत्यस्य प्रयामन्यधायि शस्मन्त्समयन्त आदिशः।
स्वदामि घर्मं प्रति यन्त्यूतय आ वामूर्जानी रथमश्विनारुहत् ॥ २ ॥

ऊर्ध्वा । धीतिः । प्रति । अस्य । प्रऽयामनि । अधायि । शस्मन् ।
सम् । अयन्ते । आ । दिशः । स्वदामि । घर्मम् । प्रति । यन्ति ।
ऊतयः । आ । वाम् । ऊर्जानी । रथम् । अश्विना । अरुहत् ॥ २ ॥

अस्य रथस्य प्रयामनि प्रयाणे प्रगमने सति शस्मन् अश्विनोः शंसने स्तवने धीतिः अस्मदीया बुद्धिः ऊर्ध्वा उन्मुखा प्रत्यधायि प्रत्यस्थायि तदनन्तरं दिशः देष्टव्याः स्तुतयोपि समयन्ते अश्विभ्यां सङ्गच्छन्ते आकारः समुच्चये अहं च स्तोता घर्मं महावीरस्थं यद्वा क्षरणशीलाज्यादिकं हविः स्वदामि स्वादूकरोमि ऊतयः अवितारो रक्षका ऋत्विजश्च प्रतियन्ति घर्मं प्रतिगच्छन्ति संस्कारार्थं अपि च हे अश्विनौ वां युवयोः रथं ऊर्जानी सूर्यस्य दुहिता आरुहत् आरूढवती ॥ प्रयामनि याप्रापणे आतो मनिन्क्वनिब्वनिपश्चेति विहितो मनिन्प्रत्ययः । कृत्यल्युटो बहुलमिति बहुलवचनाद्भावे मनिन् दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वम् । शस्मन् शंसुस्तुतौ अन्येभ्योपि दृश्यन्त इति मनिन् दृशिग्रहणस्य विध्यन्तरोपसंग्रहार्थत्वादुपधानकारलोपः सुपां सुलुगिति सप्तम्या लुक् । अयन्ते अयपयगतौ भौवादिको नुदात्तेत् । ऊतयः क्तिच्क्तौ च संज्ञायामिति अवतेः कर्तरि क्तिच् ज्वरत्वरेत्यादिना वकारोपधयोरूठ् । अरुहत् कृमृदृरुहिभ्यइति च्लेरङादेशः ॥ २ ॥

२. उस रथ के गमन करने पर अश्विद्वय की प्रशंसा में हमारी बुद्धि ऊपर उठ जाती है। हमारी स्तुतियाँ अश्विद्वय को प्राप्त हुई हैं। मैं हव्य को स्वादिष्ठ करता हूँ। सहायक ऋत्विक् लोग आते हैं। अश्विद्वय, सूर्य-पुत्री उर्जानी तुम्हारे रथ पर चढ़ी हैं।

सं यन्मिथः पस्पृधानासो अग्मत शुभे मखा अमिता जायवो रणे।
युवोरह प्रवणे चेकिते रथो यदश्विना वहथः सूरिमा वरम् ॥ ३ ॥

सम् । यत् । मिथः । पस्पृधानासः । अग्मत । शुभे । मखाः ।
अमिताः । जायवः । रणे । युवोः । अह । प्रवणे । चेकिते । रथः ।
यत् । अश्विना । वहथः । सूरिम् । आ । वरम् ॥ ३ ॥

मखाःमखवन्तोयज्ञोपेताः अमिताःअपरिमिताःजायवोजयशीलाःमनुष्याः रणेसंग्रामेशुभे शोभनायधनायतदर्थंमिथःपस्पृधानासःअन्योन्यंस्पर्धमानाःयद्यदासमग्मतसङ्गच्छन्ते तदानींअश्विनाहेअश्विनौ युवोरहयुवयोरेवरथःप्रवणेप्रकर्षेणसंभजनीयेभूतलेचेकितेज्ञायते देवेषुमध्येयुवामेवरक्षणार्थंशीघ्रंरथेनागच्छथइत्यर्थः यद्येनरथेन सूरिंस्तोतारंप्रति वरंश्रेष्ठंधनंआवहथः प्रापयथः सरथइत्यर्थः॥ पस्पृधानासः स्पर्धसंघर्षे छान्दसोलिट् तस्यलिटःकानजादेशः छान्दसंरेफस्य संप्रसारणं अकारलोपः। अग्मत गमेश्छान्दसोलङ् समोगम्यृच्छीत्यादिनात्मनेपदम् बहुलंछन्दसीतिशपोलुक् झस्यादादेशः गमहनेत्युपधालोपः।मखाः मखोयज्ञः अर्शआदित्वादच्।जायवः जिजये कृवापाजीत्यादिनाउण्। चेकिते कितज्ञाने अस्माद्यङन्ताच्छान्दसोवर्तमानेलिट् अतोलोपयलोपौ। यद्व सुपांसुलुगितितृतीयायालुक् ॥ ३ ॥

३. जिस समय यज्ञ-परायण असंख्य जय-शील मनुष्य संग्राम में धन के लिए परस्पर स्पर्द्धा करके एकत्र होते हैं, हे अश्विद्वय, उस समय तुम्हारा रथ पृथ्वी पर आता हुआ मालूम पड़ता है। उसी रथ पर तुम लोग स्तोता के लिए श्रेष्ठ धन लाते हो।

युवंभुज्युंभुरमाणंविभिर्गतंस्वयुक्तिभिर्निवहन्तापितृभ्यआ ।
यासिष्टंवर्तिर्वृषणाविजेन्यं१दिवोदासायमहिचेतिवामवः ॥ ४ ॥

युवम् । भुज्युम् । भुरमाणम् । विऽभिः । गतम् । स्वयुक्तिऽभिः ।
निऽवहन्ता । पितृऽभ्यः । आ । यासिष्टम् । वर्तिः । वृषणा ।
विऽजेन्यम् । दिवःऽदासाय । महि । चेति । वाम् । अवः ॥ ४ ॥

वृषणा कामानांवर्षितारौहेअश्विनौ युवंयुवांभुरमाणंविभिःअश्वैःभ्रियमाणंगतंसमुद्रेनिमग्नंभुज्युंतुग्रपुत्रंस्वयुक्तिभिः स्वयमेव युज्यमानैरश्वैः नौविशेषैश्च निवहन्ता नितरांवहन्तौ पितृभ्यआ आङ्मर्यादायाम् यत्रपितरस्तुग्रादयआसंतेतावत्पर्यन्तमित्यर्थः विजेन्यमितिदूरस्थंदूरेवर्तमानंवर्तिःतुग्रस्यगृहंप्रतियासिष्टंअगच्छतम् अपिच दिवोदासायराज्ञेकृतंवांयुवयोःसंबन्धिअवोरक्षणंशंबरहननरूपंमहिमहद्भवीरंचेतिअस्माभिर्ज्ञायते ॥भुरमाणं डुभृञ्धारणपोषणयोः कर्मणिलिटःशानच्व्यत्ययेनशः बहुलंछन्दसीत्युत्वम्। पितृभ्यआ मर्यादायामाङःकर्मप्रवचनीयसंज्ञा पञ्चम्यपाङ्परिभिरितिपञ्चमी। यासिष्टं यामापणे यमरमनमातांसक्चेतिसगागमः सिचइडागमः। विजेन्यं विजनोदूरदेशः तत्रभवंविजेन्यं भवेछन्दसीतियत् तित्स्वरितइतिस्वरितत्वम् ॥ ४ ॥

४. अभीष्ट वर्षकद्वय, जो भुज्यु अपने घोड़ों के द्वारा लाये जाकर समुद्र में निमज्जित हुए थे, उन्हें तुम लोग स्वयं अपने संयोजित घोड़ों के द्वारा लाकर उनके पिता के पास उनके दूरस्थ घर में पहुँचा गये थे। दिवोदास को भी जो तुम लोगों ने महान् रक्षण प्रदान किया था, वह हम जानते हैं।

पञ्चमीमृचमाह—

युवोरश्विनावपुषेयुवायुजंरथंवाणीयेमतुरस्यशर्ध्यम् ।
आवांपतित्वंसख्यायजग्मुषीयोषावृणीतजेन्यायुवांपती॥५॥२०॥

युवोः । अश्विना । वपुषे । युवाऽयुजंम् । रथंम् । वाणी इति ।
येमतुः । अस्य । शर्ध्यम् । आ । वाम् । पतिऽत्वम् । सख्याय ।
जग्मुषी । योषा । अवृणीत । जेन्या । युवाम् । पती इति॥५॥२०॥

अश्विनाहेअश्विनौ युवोः युवयोर्वाणीवननीयौप्रशस्यौअश्वौयुवायुजंयुवाभ्यांयुज्यमानं रथंआजिधावनसमयेअस्यरथस्ययत्शर्ध्यंमाप्यंआदित्याख्यंअवधिभूतंलक्ष्यंवपुषेशोभनार्थंत-द्येमतुः सर्वेभ्योदेवेभ्यःपूर्वंमापयामासतुः तदनन्तरंचआजग्मुषीआगतवती जेन्याआजिधावने-नजीयमानायोषासूर्या सख्यायसखित्वाययुवांयुवयोः पतित्वंअवृणीत कथमिति ममयुवामेवप-तीभर्तारावितिि॥ युवोः षष्ठीद्विवचनेयोचीतियत्वस्यसर्वविधीनांछन्दसिविकल्पितत्वाद्भावे शेषे-लोपइतिदकारलोपः अतोगुणेइतिपररूपत्वम् । युवायुजम् युवावौद्विवचनेइतिद्व्यर्थाभिधायकस्य युष्मच्छब्दस्यअविभक्तावपिव्यत्ययेनयुवादेशः । शर्ध्यं शृधुमसहने अस्माण्ण्यन्तादचोयदिति यत् यतोनावइत्याद्युदात्तत्वम् । जग्मुषी गमेर्लिटःक्वसुः उगितश्चेतिङीप् वसोःसंप्रसारणमिति संप्रसारणम् गमहनेत्युपधालोपः । जेन्या जिजये औणादिकएन्यप्रत्ययष्टिलोपश्च ॥ ५ ॥

५. अश्विद्वय, तुम्हारे प्रशंसनीय दोनों घोड़े, तुम्हारे संयोजित रथ को, उसकी सीमा—सूर्य—तक सारे देवों के पहले ही ले गये थे। कुमारी सूर्या ने, इस प्रकार विजित होकर, मैत्री-भाव के कारण, "तुम मेरे पति हो"—कहकर तुम्हें पति बना लिया था।

षष्ठीमृचमाह—

युवंरेभंपरिषूतेरुरुष्यथोहिमेनघर्मंपरितप्तमत्रये ।
युवंशयोरवसंपिप्यथुर्गविप्रदीर्घेणवन्दनस्तार्यायुषा ॥ ६ ॥

युवम् । रेभम् । परिऽसूतेः । उरुष्यथः । हिमेन । घर्मम् । परिऽतप्तम् ।
अत्रये । युवम् । शयोः । अवसम् । पिप्यथुः । गवि । प्र । दीर्घेण ।
वन्दनः । तारि । आयुषा ॥ ६ ॥

---

१ नि० ५. २३.।

हेअश्विनौ युवंयुवांरेभंऋषिंपरिषूतेः परितःप्रेरकादुपद्रवात् उपपतनाद्वाउरुष्यथःअरक्षथः उरुष्यतीरक्षाकर्मेतियास्कः। तथा अत्रयेऋषयेपरितप्तंपरितस्तप्तंघर्मंअसुरैःपीडार्थंप्रक्षिप्तंदीप्यमानंतुषाग्निंहिमेनशीतोदकेनअवारयेथाम् यद्वा हविषामत्त्रयेभक्षयित्रेअग्नयेपरितप्तंसूर्यकिरणैःसंतप्तंघर्मं अहर्नामैतत् अहः हिमेनवृष्ट्युदकेनहविःसंपादकव्रीह्याद्युत्पत्त्यर्थंअवारयेथाम् अपिच शयोः एतत्संज्ञस्यऋषेः गविनिवृत्तप्रसवायांधेनौअवसंरक्षकंपयः युवंयुवांपिप्यथुः प्रवर्धितवन्तौ तथा जीर्णांगोवन्दनऋषिः दीर्घेणायुषाप्रतारियुवाभ्यांप्रवर्धितः प्रपूर्वस्तिरतिर्वर्धनार्थः॥ अवसं अवतेरौणादिकः असच्। पिप्यथुः प्यायीवृद्धौ व्यत्ययेनपरस्मैपदम् लिड्यङोश्चेतिपीभावः॥६॥

६. तुमने रेभ ऋषि को, चारों ओर के उपद्रव से बचाया था। तुमने अत्रि के लिए हिम-द्वारा अग्नि का निवारण किया था। तुमने शत्रु की गौ को दुग्ध दिया था। तुमने बन्दन ऋषि को दीर्घ आयु-द्वारा वर्द्धित किया था।

युवंवन्दनंनिर्ऋतंजरण्ययारथंनदस्राकरणासमिन्वथः।
क्षेत्रादाविप्रंजनथोविपन्ययाप्रवामत्रविधतेदंसनाभुवत् ॥ ७ ॥

युवम्। वन्दनम्। निःऽऋतम्। जरण्ययां। रथम्। न। दस्रा। करणा। सम्। इन्वथः।क्षेत्रात्। आ। विप्रम्। जनथः। विपन्ययां। प्र। वाम्। अत्र। विधते। दंसना। भुवत् ॥७॥

हेदस्राअश्विनौ युवंयुवांजरण्ययाजरयानिर्ऋतंनिःशेषेणप्राप्तंवन्दनंऋषिंकरणाकर्मणांकर्तारौशिल्पकुशलौयुवांसमिन्वथः समधत्तं पुनर्युवानमकुरुतं तत्रदृष्टान्तः—रथंन यथाकश्चिच्छिल्पीजीर्णंरथंपुनरप्यभिनवंकरोतितद्वत् अपिच विपन्ययास्तुत्यागर्भेस्थितेनवामदेवेनस्तुतौसन्तौ क्षेत्रात्आ आकारःसमुच्चये मातुरुदरलक्षणाज्जन्मस्थानात् विप्रंमेधाविनंतमृषिं जनथः जनयथश्च तथा वांयुवयोः दंसनारक्षणात्मकं कर्म अत्रास्मैविधतेपरिचरतेयजमानाय प्रभुवत्प्रभवतु रक्षितंसमर्थंभवतु॥ निर्ऋतं ऋगतौ कर्मणिनिष्ठा गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम्। जरण्यया जरणक्रियार्हाजरण्याअन्त्यावस्था छन्दसिचेतियः। करणा करोतेरन्येभ्योपिदृश्यतइतियुच्। इन्वथः इविव्याप्तौ इदित्वान्नुम् भौवादिकः। जनथः जनीप्रादुर्भावे णिच्युपधावृद्धिः जनीजृष्क्नसुरञ्जइतिमित्त्वान्मितांह्रस्वइतिह्रस्वत्वं छन्दस्युभयथेतिशपआर्धधातुकत्वात् णेरनिटीतिणिलोपः। विपन्यया पनस्तुतौ अघ्न्यादयश्चेतिभावेयत् व्यत्ययेनान्तोदात्तत्वम्। विधते विधविधाने तौदादिकः लटःशतृ शतुरनुमइतिविभक्तेरुदात्तत्वम्। भुवत् भवतेर्लेटचडागमः बहुलंछन्दसीतिशपोलुक् भूसुवोस्तिङीतिगुणप्रतिषेधः॥ ७॥

७. जैसे पुराने रथ को शिल्पी नया कर देता है; हे निपुण दस्र-द्वय, उसी प्रकार तुमने भी वार्द्धक्य-पीड़ित बन्दन को फिर युवा कर

दिया था। गर्भस्थ वामदेव के तुम्हारी स्तुति करने पर तुमने उन मेधावी को गर्भ से जन्म दिया था। तुम्हारा यह रक्षण-कार्य इस परिचर्या-परायण यजमान के लिए परिणत हो।

अग॑च्छतं॒ कृप॑माणं परा॒वति॑ पि॒तुः स्वस्य॒ त्यज॑सा॒ निबा॑धितम्।
स्व॑र्वती॒रि॒त ऊ॒तीर्यु॒वोरह॑ चि॒त्रा अ॒भीके॑ अभवन्न॒भिष्ट॑यः ॥ ८ ॥

अग॑च्छतम्। कृप॑माणम्। परा॒ऽवति॑। पि॒तुः। स्वस्य॑। त्यज॑सा। निऽबा॑धितम्। स्वः॑ऽवतीः। इ॒तः। ऊ॒तीः। यु॒वोः। अह॑। चि॒त्राः। अ॒भीके॑। अ॒भ॒व॒न्। अ॒भिष्ट॑यः ॥ ८ ॥

हेअश्विनौ परावतिदूरदेशेसमुद्रमध्येस्वस्यपितुःतुग्रस्यत्यजसात्यागेननिबाधितंपीडितंभुज्युं कृपमाणंयुवांस्तुवन्तंअगच्छतम् युवांरक्षणार्थंगतवन्तौ यस्मादेवंतस्मात् हेअश्विनौ स्वर्वतीः स्वर्वत्यः शोभनगमनयुक्ताः इतः इतोमुखात् चित्राश्चायनीया युवोरहयुवयोरेवऊतीः ऊतयोरक्षाः अभीकेसमीपे अभिष्टयः सर्वैःप्राणिभिःअभ्येषणीयाअभवन् भवन्ति ॥ कृपमाणं कृपतिःस्तुतिकर्मा अयंचतुदादिर्द्रष्टव्यः । स्वर्वतीः सुपूर्वादर्तेर्भावेविच् ततोमतुप् छन्दसीरइतिमतुपोवत्वम्। अभिष्टयः इषइच्छायाम् भावेक्तिन् शकन्ध्वादित्वात्पररूपत्वम् ॥ ८ ॥

८. भुज्यु के पिता ने उनको छोड़ दिया था। भुज्यु ने दूर देश में पीड़ित होने पर तुम्हारी कृपा के लिए प्रार्थना की। तुम उनके पास गये। फलतः तुम्हारी शोभनीय गति और विचित्र रक्षण-कार्य सब लोग सम्मुख पाने की इच्छा करते हैं।

उ॒त स्या वां॒ मधु॑म॒न्मक्षि॒कार॑पन्म॒दे सोम॑स्यौशि॒जो हु॑वन्यति ।
यु॒वं द॑धी॒चो मन॒ आ वि॑वास॒थोऽथा॒ शिरः॒ प्रति॑ वा॒मश्व्यं॑ वदत् ॥ ९ ॥

उ॒त। स्या। वा॒म्। मधु॑ऽमत्। मक्षि॑का। अर॑प॒त्। मदे॑। सोम॑स्य। औ॒शि॒जः। हु॒व॒न्य॒ति॒। यु॒वम्। द॒धी॒चः। मनः॑। आ। वि॒वा॒स॒थः॑। अथ॑। शिरः॑। प्रति॑। वा॒म्। अश्व्य॑म्। व॒द॒त् ॥ ९ ॥

उतअपिच हेअश्विनौ मधुमन्मधुमन्तौ वांयुवांस्यासामक्षिकासरघामधुकामासती अरपवमस्तौत् तथा औशिजः उशिजःपुत्रः कक्षीवान्सोमस्यपानेनयुवयोर्मदेहर्षेनिमित्तभूतेसति हुवन्यतियुवामाह्वयति युवंयुवांच तस्यैमक्षिकायैमधुदातुंमधुविद्यार्थिनौसन्तौदधीचआथर्वणस्य ऋषेर्मनश्चित्तंशुश्रूषयाआविवासथः पर्यचरतम् अथानन्तरंतस्मिन् प्रीतेसतिअश्व्यंवांयुवाभ्यां प्रविहितंअश्वस्यसंबन्धियच्छिरःतच्युवांमति मधुविद्यांअवदत् सऋषिराश्वेनशिरसाउपदिष्ट-

वानित्यर्थः ॥ मधुमत् सुपांसुलुगितिविभक्तेर्लुक् । अरपत् रपलपव्यक्तायांवाचि । मदे मदीहर्षे मदोनुपसर्गेइतिभावेअप् । हुवन्यति ह्वेञ्स्पर्धायांशब्देच ल्युट्चेतिभावेल्युट् बहुलंछन्दसीतिसं-प्रसारणम् । हुवन्यति हवनमात्मनइच्छति सुपआत्मनःक्यच् अन्यलोपश्छान्दसः वर्णव्याप-त्त्याउत्वम् । अश्व्यं अश्वेभवमश्व्यम् भवेछन्दसीतियत्॥ ९ ॥

९. तुम मधु-युक्त हो। मधु-कामिनी उस मक्षिका ने तुम्हारी स्तुति की है। उशिज्पुत्र मैं कक्षीवान् तुम्हें सोमपान में प्रसन्नता पाने के लिए बुलाता हूँ। तुमने दधीचि ऋषि का मन तृप्त किया था। उनके अश्व-मस्तक ने तुम्हें मधुविद्या प्रदान की थी।

युवंपेदवेपुरुवारमश्विनास्पृधांश्वेतंतरुतारंदुवस्यथः ।
शर्यैरभिद्युंपृतनासुदुष्टरंचर्कृत्यमिन्द्रमिवचर्षणीसहम् ॥१०॥२१॥

युवम् । पेदवे । पुरुऽवारम् । अश्विना । स्पृधाम् । श्वेतम् । तरुतारम् । दुवस्यथः । शर्यैः । अभिऽद्युम् । पृतनासु । दुस्तरम् । चर्कृत्यम् । इन्द्रम्ऽइव । चर्षणिऽसहम् ॥ १० ॥२१ ॥

अश्विनाहेअश्विनौ पेदवेपेदुनाम्नेराज्ञेपुरुवारंबहुभिर्वरणीयंस्पृधांसंग्रामेस्पर्धमानानांशत्रू-णांतरुतारंतारकं श्वेतंशुभ्रवर्णइन्द्रालब्धमश्वंयुवंयुवांदुवस्यथः दत्तवन्तौ पुनरपिकीदृशंशर्यैः शीर्यंतइतिशर्याः योद्धारःतैःपृतनासुसंग्रामेषुदुस्तरंतरीतुमशक्यंअभिद्युंअभिगतदीप्तिं चर्कृत्यंस-र्वेषुकार्येषुपुनःपुनःप्रयोज्यंइन्द्रमिवचर्षणीसहंइन्द्रोयथाशत्रूनभिभवति एवंशत्रुजनानामभिभ-वितारमित्यर्थः॥स्पृधां स्पर्धसङ्घर्षे क्विप्चेतिक्विप् चशब्देनदृशिग्रहणानुकर्षणात्तस्यचविध्यन्त-रोपसंग्रहार्थत्वादकारस्यलोपोरेफस्यचसंप्रसारणम् सावेकाचइतिविभक्तेरुदात्तत्वम्। तरुतारं तॄ-प्लवनतरणयोः अस्मात्तृचिग्रसितस्कभितस्तभितेत्यादौनिपातनाद्रूपसिद्धिः । चर्कृत्यम् करोते-र्यङ्लुगन्ताद्विभाषाकृवृषोरितिक्यप् ततस्तुक्॥ १० ॥

१०. अश्विद्वय, तुमने पेदु राजा को बहुजन-वाञ्छित और शत्रु-पराजयी शुभ्रवर्ण अश्व दिया था। वह अश्व युद्ध-रत, दीप्तिमान् युद्ध में अपराजेय, सारे कार्यों में संयोज्य और इन्द्र की तरह मनुष्य-विजयी है।

काराधदितिद्वादशर्चंपञ्चमंसूक्तम्अत्रानुक्रम्यते—काराधद्वादशान्त्यादुःस्वप्ननाशिनी आ-द्यागायत्री द्वितीयाककुप् तृतीयाचतुर्थ्यौ काविराण्नष्टरूप्यौ पञ्चमीतनुशिरा षष्ठ्युष्णिक् विष्टारबृहती छतिर्विराट्त्रिस्रोगायत्र्यइति।अस्यायमर्थः—अनुवृत्तेरौशिजोदैर्घतमसःकक्षीवानृ-षिः आद्यागायत्रीविद्वांसाविदित्येषाककुप् मध्यमपादस्यद्वादशाक्षरत्वात् मध्यमश्चेत्ककुबिति हितलक्षणम् तृतीया ताविद्वांसेत्येषा काविराट् नवकयोर्मध्येजागतःकाविराडित्युक्तलक्षणोपे-

त्वात् चतुर्थीविपृच्छामीत्येषानष्टरूपी नववैराजत्रयोदशैर्नष्टरूपीत्युक्तलक्षणोपेतत्वात् प्रयाघो-षइत्येषापञ्चमीतनुशिरा एकादशिनोःपरःषट्कस्तनुशिरेत्युक्तलक्षणोपेतत्वात् श्रुतंगायत्रमित्ये-षाषष्ठी यद्यपि पादसंख्ययाउष्णिक्नभवति तथाप्यक्षरसंख्ययोष्णिक् युवंहीतिसप्तमीविष्टारबृह-ती अष्टिनोर्मध्येदशकौविष्टारबृहतीतितल्लक्षणोपेतत्वात् माकस्माइत्यष्टमीकृतिः जागतावष्टकश्च-कृतिरित्युक्तलक्षणसद्भावात् दुहीयन्नितिनवमीविराट् दशम्याद्यास्तिस्रोगायत्र्यः आश्विनंवैइति वैशब्दप्रयोगात्तुह्यादिपरिभाषयाइदमपिसूक्तमाश्विनम् अधःस्वप्नस्येत्यन्त्ययादुःस्वप्ननाशनंप्रति पाद्यते अतोयातेनोच्यतेसादेवतेतिन्यायेनतदेवदेवता सूक्तविनियोगोलैङ्गिकः घर्माभिष्टवेआदि-तोनवर्चोविनियुक्ताः सूत्र्यतेहि—काराधद्धोत्राश्विनावामितिनवाभात्यग्निरिति । काराधद्धोत्रा-श्विनावामितिनवविच्छन्दसइत्यादिकंब्राह्मणमनुसंधेयम् ।

तत्रप्रथमामृचमाह—

कारा॑धद्धोत्रा॑श्विनावां॒कोवां॒जोष॑उ॒भयोः॑ । कु॒थावि॑धा॒त्यप्र॑चेताः ॥१॥

कां । रा॒ध॒त् । होत्रा॑ । अ॒श्वि॒ना॒ । वा॒म् । कः । वा॒म् । जोषे॑ ।
उ॒भयोः॑ । कु॒था । वि॒धा॒ति॒ । अप्र॑ऽचेताः ॥ १ ॥

अश्विनाहेअश्विनौ वांयुवांकाहोत्रा वाङ्नामैतत् कीदृशीस्तुतिलक्षणावाक्राधत्आराध-यति प्रीतौकरोति युवयोर्माहात्म्यानुरूपास्तुतिर्नास्तीत्यर्थः किञ्च वांयुवयोरुभयोर्जोषेजोषणे सेवनेप्रीणनेवासमर्थःकःस्तोताविद्यते युष्मद्गुणाभिज्ञःकश्चिदपिनास्तीत्यर्थः अप्रचेताःयुवयोर्मा-हात्म्यमजानंश्चकथांकेनप्रकारेणविधाति युवांपरिचरति युष्मद्विषयंपरिचरणमपिनकर्तुंशक्यतइ-त्यर्थः ॥ राधत् राधसाधसंसिद्धौ लेटचडागमः । जोषे जुषीप्रीतिसेवनयोः भावेघञ् ञित्वादा-द्युदात्तत्वम् । कथा थाहेतौ चच्छन्दसीतिकिंशब्दात्प्रकारवचनेथाप्रत्ययः किमःकइतिकादेशः । विधाति विधविधाने तौदादिकःलेटचाडागमः।अप्रचेताः प्रकृष्टंचेतोयस्यासौप्रचेताः नञ्समासे-ऽव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥ १ ॥

१. अश्विद्वय, कौन-सी स्तुति तुम्हें प्रसन्न कर सकती है? तुम दोनों को कौन परितुष्ट कर सकता है? एक अज्ञानी जीव तुम्हारी कैसे सेवा कर सकता है?

द्वितीयामृचमाह—

वि॒द्वांसा॒विद्दुरः॑पृच्छे॒दवि॑द्वानि॒त्थाप॑रोअ॒चेताः॑।नूचि॒न्नुमर्ते॒अक्रौ॑ ॥ २ ॥

१ ऐ० ब्रा० १. २१. ।

वि॒द्वांसा॑ । इत् । दुरः॑ । पृ॒च्छे॒त् । अवि॑द्वान् । इ॒त्था । अप॑रः ।
अ॒चे॒ताः । नु । चि॒त् । नु । मर्ते॑ । अक्रौ॑ ॥ २ ॥

इत्थाइत्थमनेनपूर्वोक्तप्रकारेणअविद्वान अज्ञःस्तोताविद्वांसावित् सर्वज्ञावश्विनावेव दुरोद्वाराणिस्तुतिपरिचरणयोरुपायभूतान्मार्गान्पृच्छेत् प्रष्टुमर्हतिअपरःअश्विभ्यामन्यःसर्वोप्यचेताः यस्मात् चेनसाज्ञानेनरहितः तस्मादश्विनावेवपृच्छेदित्यर्थः तौचाक्रौ शत्रुभिरनाक्रान्तौअश्विनौनूचित् क्षिप्रमेवमर्तेमनुष्येस्तोतरिभक्तानुग्राहकतयासनिंधत्तइतिवाक्यशेषः॥ इत्था थाहेतौचच्छन्दसीतिथाप्रत्ययः इदमइश् एतेतौरथोरितिइद्भावः यदि थाहेतौचेत्यत्रइदमशब्दस्यनानुवृत्तिः तदानीं इदमस्थमुः एतदन्तात्परस्याविभक्तेर्व्यत्ययेनसुपांसुलुगितिडादेशः । अक्रौ क्रमुपादविक्षेपे अस्मान्नञ्युपपदेकृत्यल्युटोबहुलमितिबहुलवचनात्कर्मण्यपिजनसनखनक्रमगमोविडितिविट् विड्वनोरनुनासिकस्यादित्यात्वम् नञ्समासेव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥ २ ॥

२. अनभिज्ञ प्राणी इसी प्रकार उन दोनों सर्वज्ञों की परिचर्या के उपायभूत मार्ग की जिज्ञासा करता है। अश्विनीकुमारों के सिवा सभी अज्ञ हैं। शत्रु-द्वारा आक्रमण-रहित अश्विद्वय शीघ्र ही मनुष्य पर अनुग्रह करते हैं।

ता वि॒द्वांसा॑ हवामहे वां॒ ता नो॑ वि॒द्वांसा॒ मन्म॑ वोचेतम॒द्य ।
प्रार्च॒द्दय॑मानो युवा॒कुः ॥ ३ ॥

ता । वि॒द्वांसा॑ । ह॒वा॒म॒हे॒ । वा॒म् । ता । नः॒ । वि॒द्वांसा॑ । मन्म॑ ।
वो॒चे॒त॒म् । अ॒द्य । प्र । आ॒र्च॒त् । दय॑मानः । यु॒वा॒कुः॑ ॥ ३ ॥

हेअश्विनौविद्वांसासर्वज्ञौ तावांतौयुवांहवामहे आह्वयामहे तातौआहूतौविद्वांसाअभिज्ञौ युवांनोस्मभ्यंमन्ममननीयंज्ञातव्यंस्तोत्रंअद्यास्मिन्कालेवोचेतंब्रुवाणौभूयास्तं सचाहंयुवाकुर्युवां कामयमानःस्तुत्यासंयोजयन्वादयमानःयुवाभ्यांहविःप्रयच्छन्प्रार्चत् प्रार्चंप्रकर्षेणस्तौमि ॥ ता सुपांसुलुगितिविभक्तेराकारः । वोचेतम् ब्रूञ्व्यक्तायांवाचि ब्रुवोवचिः लिङ्याशिष्यङ् वचउमित्युमागमः । आर्चत् अर्चपूजायाम् भौवादिकः तिङांतिङोभवन्तीतिमिपस्तिबादेशः । दयमानः दयदानगतिरक्षणहिंसादानेषु शपःपित्वादनुदात्तत्वम् शानचोलसार्वधातुकस्वरेणधातुस्वरः शिष्यते । युवाकुः युवांकामयतइतियुवाकुः मितद्वादिभ्यउपसंख्यानमितिडुप्रत्ययः अविभक्तावपिव्यत्ययेनयुवावौद्विवचनेइतियुवादेशःआत्वंच यद्वा युमिश्रणे औणादिकःकाकुप्रत्ययः॥३॥

३. सर्वज्ञद्वय, हम तुम्हारा आह्वान करते हैं। तुम अभिज्ञ हो, हमें मननीय स्तोत्र बताओ। वही मैं तुम्हारी कामना करके, हव्य-प्रदान करते हुए, स्तुति करता हूँ।

चतुर्थीमृचमाह—

विपृच्छामिपाक्या३नदेवान्वषट्कृतस्याद्भुतस्यदस्रा।
पातंचसह्यसोयुवंचरभ्यसोनः ॥ ४ ॥

वि। पृच्छामि। पाक्या। न। देवान्। वषट्ऽकृतस्य। अद्भुतस्य।
दस्रा। पातम्। च। सह्यसः। युवम्। च। रभ्यसः। नः ॥ ४ ॥

हेअश्विनौ युवांविपृच्छामिविशेषेणप्रष्टुमिच्छामि पाक्यान पक्वव्यप्रज्ञानान् परिपक्वमतीन-न्यान्देवान् नपृच्छामि किन्तु युवामेवसर्वज्ञौपृच्छामीत्यर्थः हेदस्रादर्शनीयौतौ युवंयुवांवषट्कृ-तस्यवषट्कारेणाग्नौहुतस्यअद्भुतस्यआश्चर्यभूतस्यमहतः सह्यसः अतिशयेनबलवतः बलोत्पा-दकस्यसोमस्यस्वांशलक्षणमेकदेशंपातंच नोस्मांश्चरभ्यसः अतिशयेनरभस्विनः प्रौढोद्यमान् कु-रुतम् ॥ पाक्या पचेर्ऋहलोर्ण्यत् चजोःकुघिण्ण्यतोरितिकुत्वम् तित्स्वरः सुपांसुलुगितिविभक्ते-र्डादेशः । वषट्कृतस्य वषट्शब्दस्योर्यादित्वेनगतित्वाद्गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम्। पातं पापाने बहुलंछन्दसीतिशपोलुक् । सह्यसः सहतेअभिभवत्यनेनेतिसहोबलम् असुन् तदस्यास्ती-तिसहस्वी मत्वर्थीयोविनिः ततआतिशायनिकईयसुन् विन्मतोर्लुक् छान्दसईकारलोपः। र-भ्यसः रभराभस्ये राभस्यंकार्योपक्रमः पूर्ववत्प्रक्रियाज्ञेया ॥ ४ ॥

४. मैं तुम्हें ही जिज्ञासा करता हूँ; अपनी पक्व बुद्धि से जिज्ञासा नहीं करता। बलद्वय, "वषट्" शब्द के साथ अग्नि में प्रदत्त, अद्भुत और पुष्टिकर सोम-रस पान करो। हमें प्रौढ़ बल प्रदान करो।

पञ्चमीमृचमाह—

प्रयाघोषेभृगवाणेनशोभेययावाचायजतिपज्रियोवाम्।
प्रैषयुर्नविद्वान् ॥ ५ ॥ २२ ॥

प्र। या। घोषे। भृगवाणे। न। शोभे। यया। वाचा। यजति।
पज्रियः। वाम्। प्र। इषऽयुः। न। विद्वान् ॥ ५ ॥ २२ ॥

हेअश्विनौ प्रभवतिसमर्थाभवतिसावाक् यावाक् युष्मत्स्तुतिरूपा घोषेघोषाख्यायाःपुत्रे सुहस्त्याख्येऋषौ भृगवाणेन भृगौच शोभेशोभते ययाचस्तुतिलक्षणयावाचा पज्रियः पज्राअङ्गि-रसः तेषांकुलोत्पन्नः कक्षीवान् युवांयजतिपूजयतिस्तौति सापिशोभवत्वित्यर्थः इषयुर्न इषमन्नंआ-त्मनःकामयमानश्चविद्वान् स्तुत्यभिज्ञः कक्षीवानृषिः प्रभवतु युष्मदनुग्रहात् संपूर्णकामोभ-

वत्वित्यर्थः ॥ घोषे घोषानामकाचिद्ब्रह्मवादिनीकक्षीवतःपुत्री अत्रोपचारात्तद्वाचकंप्रातिपदिकं पुत्रेवर्तते । भृगवाणे चिरन्तनोभृगुरिवाचरति सर्वप्रातिपदिकेभ्यइतिक्विप् धातुसंज्ञायांव्यत्ययेन लटःशानच् शबादि आगमानुशासनस्यानित्यत्वान्मुगभावः वृषादिः । शोभे शुभदीप्तौ लोपस्त-आत्मनेपदेष्वितितलोपः । इषयुः इषगतौ इष्यतिगच्छतीतिइषमन्नं इगुपधलक्षणःकः यद्वा इष-इच्छायाम् इष्यतेसर्वैःप्राणिभिरितिइषमन्नम् व्यत्ययेनकर्मणिकर्तृप्रत्ययः प्रशब्देनसंहितायां प्रादूहोढोढ्येषैष्येषुवृद्धिर्वक्तव्येतिवृद्धिः ॥ ५ ॥

५. तुम्हारी जो स्तुति घोषापुत्र सुहस्ति और भृगु-द्वारा उच्चारित होकर सुशोभित हुई थी, उसी स्तुति-द्वारा वज्रवंशीयऋषि में कक्षीवाल् तुम्हारी अर्चना करता हूँ। इसलिए स्तुतिज्ञ में अन्न-कामना में सफल यत्न बनूं।

श्रुतंगायत्रंतकवानस्याहंचिद्धिरिरेभाश्विनावाम् ।
आक्षीशुभस्पतीदन् ॥ ६ ॥

श्रुतम् । गायत्रम् । तकवानस्य । अहम् । चित् । हि । रिरेभ ।
अश्विना । वाम् । आ । अक्षी इति । शुभः । पती इति । दन् ॥६॥

हेअश्विनौ गायत्रंगातव्यंगायत्रीयुक्तंगायत्रसाम्ना निष्पाद्यंनिष्पन्नंवास्तोत्रं तकवानस्यस्खलद्गते-रन्धस्यऋज्राश्वस्यसंबन्धिश्रुतं शृणुतम् अहंचित् अहमिववांयुवांसहिरिरेभस्तुतवान् किंकुर्वन् हेशुभस्पतीशोभनस्यकर्मणःपालयितारौ जलस्यवास्वामिनौ अक्षीयुवाभ्यांदत्तेचक्षुषीआदन्आ-ददानः तस्मैइवमह्यमपिअभिमतफलंप्रयच्छतमितिभावः ॥ श्रुतम् श्रुश्रवणे लङि बहुलंछन्द-सीतिविकरणस्यलुक् । तकवानस्य तकगतौ अत्रगतिसामान्यवाचिनातद्विशेषोमन्दगतिर्लक्ष्यते औणादिकउप्रत्ययः । भृगवाणस्येतिवत्प्रक्रियोन्नेया । रिरेभ रेभृशब्दे । अक्षी ईचद्विवचनेइत्य-क्षिशब्दस्यईकारान्तादेशः सचोदात्तः । शुभस्पती सुबामन्त्रितेपराङ्गवत्स्वरेइतिषष्ठ्यन्तस्यपराङ्ग-वद्भावात् पदद्वयसमुदायस्याष्टमिकामन्त्रितानुदात्तत्वम् । दन् आङ्पूर्वाद्ददातेराङोदोनास्यविह-रणेइत्यात्मनेपदम् व्यत्ययेनशतृ जुहोत्यादित्वात्श्लुः द्विर्वचनप्रकरणे छन्दसिचेतिवक्तव्यमितिव-चनात् द्विर्वचनाभावः छन्दस्युभयथेत्युभयथाश्रयणात् शतुःसार्वधातुकत्वेनङित्त्वम् आर्धधा-तुकत्वादातोलोपइटिचेत्याकारलोपः ॥ ६ ॥

६. स्खलद्गति वा गति-रहित ऋषि अर्थात् अन्ध ऋजाश्व की स्तुति सुनो। शोभनीय कर्मों के प्रतिपालक, उसने मेरी तरह स्तुति करके चक्षुद्वय प्राप्त किया था। फलतः मेरा मनोरथ भी पूर्ण करो।

१ ऋ० सं० १. ८. २२.

सप्तमीमृचमाह–

युवंह्यास्तंमहोरन्युवंवायन्निरततंसतम् ।
तानोवसूसुगोपास्यातंपातंनोवृकादघायोः ॥ ७ ॥

युवम् । हि । आस्तम् । महः । रन् । युवम् । वा । यत् ।
निःऽअततंसतम् । ता । नः । वसू इति । सुऽगोपा । स्यातम् । पातम् ।
नः । वृकात् । अघयोः ॥ ७ ॥

हेअश्विनौ महोमहतोधनस्यरन्दातारौदातारौयुवंयुवांकश्चनास्तम्यद्वनिरततंसतंधना-
निनिरगमयतम् रक्षकौविनाशकावपियुवामेवेत्यर्थः हेवसूवासयितारावश्विनौ ता तादृशौयुवं
युवांनोस्माकंसुगोपा सुष्ठुगोपायितारौरक्षितारौस्यातंभवतम् अपिचनोस्मानघायोः अघंपाप-
फलंनोस्माकमिच्छतोवृकाद् स्तेनात्पातंरक्षतम् ॥ महः महतश्छान्दसोऽच्छब्दलोपः । रन्
दन्इतिवत्क्रियोन्नेया व्यत्ययेनैकवचनम् । निरततंसतम् तसिअलङ्कारे अस्माण्ण्यन्ताल्लु-
ङि णिश्रिद्रुस्रुभ्यइतिचङ् द्विर्वचनादिच गुरुसंज्ञयाऌघुसंज्ञायाःबाधितत्वाद् सन्वद्भावाभावः।
सुगोपा सुपांसुलुगितिविभक्तेर्लुक् । अघायोः अघंपरेषामिच्छति छन्दसिपरेच्छायामितिक्यच्
अश्वाघस्यादित्यात्वम् क्याच्छन्दसीत्युप्रत्ययः ॥ ७ ॥

७. तुमने महान् धनदान किया है तथा उसे फिर लुप्त कर डाला है। गृह-दातृद्वय, तुम हमारे रक्षक बनो। पापी वृक वा तस्कर से हमारी रक्षा करो।

अष्टमीमृचमाह–

माकस्मैधातमभ्यमित्रिणेनोमाकुत्रानोगृहेभ्योधेनवोगुः ।
सनाभुजोअशिश्वीः ॥ ८ ॥

मा । कस्मै । धातम् । अभि । अमित्रिणे । नः । मा । अकुत्र ।
नः । गृहेभ्यः । धेनवः । गुः । स्तनऽभुजः । अशिश्वीः ॥ ८॥

हेअश्विनौ अमित्रिणेअमित्रंमित्ररहितंयंतद्वत्कस्मैचिदपिशत्रवेनोस्मान्माभिधातम् आ-
भिमुख्येनमावस्थापयतम् अपिचनोस्माकंगृहेभ्यः प्रकाशाद् स्तनाभुजः स्तनैर्वत्सान्मनुष्यांश्चपा-

1 ऋ० स० १. ८. २३. ।

लयन्त्योधेनवोगावः अशिश्वीः शिशुनावत्सेनविरहिताः अस्मदीयेगृहेअशयानावासत्यः अकुत्रचित् अस्माभिरगम्येप्रदेशेमागुः मागच्छन्तु॥ धातम् धाञोमाङ्क्तिलुङि गातिस्थेतिसिचोलुक्नमाङ्योगेइत्यडभावः। अकुत्र परादिश्छन्दसिबहुलमित्युत्तरपदाद्युदात्तत्वम्। गुः इण्गतौ इणोगालुङीतिगादेशः गातिस्थेतिसिचोलुक् आतइतिझेर्जुस्। स्तनाभुजः भुजपालनाभ्यवहारयोः स्तनैर्भुञ्जन्तिपालयन्तीतिस्तनाभुजः क्विप् अन्येषामपिदृश्यतइतिसांहितिकोदीर्घः। अशिश्वीः सख्यशिश्वीतिभाषायामितिछन्दस्यपिव्यत्ययेननिपातनंद्रष्टव्यम् यद्वा शिशुरस्यास्तीतिशिश्वी छन्दसीवनिपावितिमत्वर्थीयईकारः नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वम् वाछन्दसीतिपूर्वसवर्णदीर्घः अथवा शीङ्स्वप्ने उत्सर्गश्छन्दसीतिकिमत्ययः द्विर्वचनह्रस्वत्वे एरनेकाचइतियण् छान्दसोवकारः पूर्ववत्समासस्वरौ ॥ ८ ॥

८. किसी शत्रु के सामने हमें नहीं अर्पण करना। हमारे घर से दुग्धवती गायें, बछड़ों से अलग होकर, किसी अगम स्थान को न चली जायें।

दुहीयन्मित्रधितयेयुवाकुरायेचनोमिमीतंवाजवत्यै।
इषेचनोमिमीतंधेनुमत्यै ॥ ९ ॥

दुहीयन्। मित्रऽधितये। युवाकु। राये। च। नः। मिमीतम्। वाजऽवत्यै। इषे। च। नः। मिमीतम्। धेनुऽमत्यै ॥ ९ ॥

हेअश्विनौ युवाकुयुवांकामयमानाः स्तुतिभिर्यावयितारः संयोजयितारोवास्तोतारः मित्रधितयेमित्राणांबन्धुजनानांधारणार्थं दुहीयन्युष्मत्सकाशाद्धनानिदुहन्तिप्राप्नुवन्ति अतोनोस्मानपिवाजवत्यैवाजयुक्तायचरायेधनायमिमीतंकुरुतम् तथा धेनुमत्यैधेनुभिर्युक्तायेषेन्नायचनोस्मान् मिमीतंकुरुतम् अस्मभ्यंस्तोतृभ्यः बलयुक्तंधनंगोयुक्तमन्नंचप्रयच्छतमित्यर्थः॥ दुहीयन् दुहप्रपूरणे दुहिर्दोहः इगुपधात्किदितिभावेइप्रत्ययः दुहिमात्मनइच्छतिदुहीयति सुपआत्मनःक्यच् दुहीयतेर्लेट्यडागमः इतश्चलोपइतीकारलोपः यद्वा दुहेर्लिङिझस्यरन्निति व्यत्ययेनरन्नादेशाभावेरूपमेतत् छान्दसोन्त्यलोपः यद्वा रन्नादेशेकृतेछान्दसोरेफस्ययकारः अतएवव्युत्पत्त्यनवधारणान्नावगृह्णन्ति। युवाकु सुपांसुलुगितिजसोलुक्। मिमीतम् माङ्मानेशब्देच जौहोत्यादिकः व्यत्ययेनपरस्मैपदम् भृञामिदित्यभ्यासस्येत्वम् चवायोगेप्रथमेतिनिघातप्रतिषेधः॥ ९॥

९. जो तुम्हें उद्देश्य कर स्तुति करता है, वह मित्रों की रक्षा के लिए धन पाता है। हमें अन्नयुक्त धन प्रदान करो तथा धेनु-युक्त अन्न दो।

दशमीमृचमाह—

अश्विनोरसनंरथमनश्वंवाजिनीवतोः । तेनाहंभूरिचाकन ॥१०॥

अश्विनोः । असनम् । रथम् । अनश्वम् । वाजिनीऽवतोः ।
तेन । अहम् । भूरि । चाकन ॥ १० ॥

वाजिनीवतोः वाजोन्नंबलंवातद्वत्क्रियावतोरश्विनोः अनश्वंअश्वरहितंअश्वराहित्ये-पिसामर्थ्यातिशयेनगच्छन्तं रथंअसनं अहंस्तोतासमभजम् तेनचरथेनभूरिमभूतंश्रेयश्चाकन कामये ॥ असनम्वनषणसंभक्तौ लङ् । चाकन कनोदीप्तिकान्तिगतिषु छान्दसोलिट् णलुत्तमो-वेतिणित्त्वस्यविकल्पनाद्वृद्ध्यभावः तुजादित्वादभ्यासदीर्घत्वम् ॥ १० ॥

१०. मैंने अन्नदाता अश्विद्वय का अश्व-रहित, परन्तु गमन-समर्थ, रथ प्राप्त किया है। उसके द्वारा मैं अनेक प्रकार के लाभ प्राप्त करने की इच्छा करता हूँ। एकादशीमृचमाह—

अयंसमहमातनूह्यातेजनाँअनु । सोमपेयंसुखोरथः ॥ ११ ॥

अयम् । समह । मा । तनु । ऊह्याते । जनान् । अनु । सोमऽपेयम् ।
सुऽखः । रथः ॥ ११ ॥

हेसमह धनेनसहितहेरथ अयंपुरोवर्तीत्वम् मामांतनुविस्तारय पुत्रपौत्रधनादिभिःसमृद्धंकुरु यद्वा अयंअयमानं त्वांमामुवन्तंमामितियोज्यं सचसुखःशोभनावकाशःसुखहेतुर्वारथःजनान् अनुस्तोतृजनेषुसोमपेयं सोमपानंमतिऊह्यातेऊह्यतेअश्विभ्यांनीयते अतोश्विभ्यांयद्दीयतेतत्सर्वं रथएवददातीतिरथंसंबोध्यप्रार्थना ॥ अयं इदोयपुंसि यद्वाअयपयगतौ पचाद्यच् । समह मघमितिधननाम मघेनसहवर्ततइतिसमघः छान्दसोवर्णविकारः यद्वा महपूजायाम् महयतिपूजयतीतिमहोधनम् पचाद्यच् । ऊह्याते वहप्रापणे कर्मणिलेटचाडागमः यजादित्वात्संप्रसारणम् तस्यछान्दसोदीर्घः अदुपदेशाल्लसार्वधातुकानुदात्तत्वेयकएवस्वरःशिष्यते । सोमपेयम् पापाने अचोयदितिभावेयत् ईद्यतीतिईकारादेशः यतोनावइत्याद्युदात्तत्वम् कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ ११ ॥

११. धन-पूर्ण रथ, मैं सामने ही हूँ। मुझे समृद्ध करो। उस सुखकर रथ को अश्विद्वय, स्तोताओं के सोम-पान स्थान पर ले जाते हैं।

द्वादशीमृचमाह—

अधस्वप्नस्यनिर्विदेभुञ्जतश्चरेवतः । उभातावस्रिनश्यतः ॥१२॥२२॥

अर्ध । स्वमस्य । निः । विदे । अर्भुञ्जतः । च । रेवतः । उभा ।
ता । बस्त्रि । नश्यतः ॥ १२ ॥ २३ ॥

अधइदानींप्रभातसमये स्वमस्यस्वमंप्रति निर्विदेनिर्विण्णोस्मि तथाअभुञ्जतः परान् रक्षतः रेवतोधनवतश्च पुरुषस्यएवंभूतंपुरुषंप्रत्यपिनिर्विण्णोस्मि यतःताउभातावुभौ बस्त्रिक्षिप्रंनश्यतोनाशंप्राप्नुवतः स्वमदृष्टःपदार्थः प्रातर्नोपलभ्यते कदर्यस्येवधनंअभुक्तंअदत्तंसदक्षिप्रमेवनश्यति तदुभयविषयोनिर्वेदोमांबाधतइत्यर्थः अत्रस्वममात्रस्यअसत्यप्रतिपादनेनदुःस्वमस्यापिअसद्भावः प्रतिपादितः अतएषादुःस्वमनाशिनीतियुज्यते । स्वमस्य क्रियाग्रहणंकर्तव्यमितिकर्मणःसंप्रदानत्वाच्चतुर्थ्यर्थेषष्ठी । विदे विद्लृलाभे आगमानुशासनस्यानित्यत्वान्नुमभावः । रेवतः रयिशब्दान्मतुप् रयेर्मतौबहुलमितिसंप्रसारणम् छन्दसीरइतिमतुपोवत्वम् रेशब्दाच्चमतुपउदात्तत्वमितितस्योदात्तत्वम् । उभा ता उभयत्रसुपांसुलुगित्याकारः ॥ १२ ॥

१२. मैं प्रातःकाल के स्वप्न से घृणा करता हूँ और जो धनी दूसरे का प्रतिपालन नहीं करता, उसे भी घृणित समझता हूँ। दोनों शीघ्र नाश को प्राप्त होते हैं।

॥ इतिप्रथमस्याष्टमेत्रयोविंशोवर्गः ॥ २३ ॥

॥ इतिदाशतय्याःप्रथमेमण्डलेसप्तदशोनुवाकः ॥ १७ ॥

अष्टादशेनुवाकेषट्सूक्तानि तत्रकदित्थेतिपञ्चदशर्चंप्रथमंसूक्तम् अत्रानुक्रम्यते—कदित्थापञ्चोनावैश्वदेवंवेति । अनुवर्तमानःकक्षीवानृषिः अनादेशपरिभाषयात्रिष्टुप् विश्वेदेवाइन्द्रोवादेवता विनियोगोलैङ्गिकः ।

तत्रप्रथमामृचमाह—

कदित्थानॄँःपात्रंदेवयतांश्रवद्गिरोअङ्गिरसांतुरण्यन् ।
प्रयदानड्विशआहर्म्यस्योरुक्रंसतेअध्वरेयजत्रः ॥ १ ॥

कत् । इत्था । नॄन् । पात्रम् । देवऽयताम् । श्रवत् । गिरः ।
अङ्गिरसाम् । तुरण्यन् । प्र । यत् । आनट् । विशः । आ । हर्म्यस्य ।
उरु । क्रंसते । अध्वरे । यजत्रः ॥ १ ॥

नृँःपात्रंनृन्पातानृणांस्तुतेर्नेतृणांपुरुषाणांरक्षणशीलइन्द्रः तुरण्यन् गोरूपंधनंप्रेरयन् देवयतांदेवंद्योतमानं दानादिगुणयुक्तंवाइन्द्रंआत्मनइच्छतांअङ्गिरसामृषीणांअस्माकं इत्थाइत्थंप्रयुज्यमानागिरःस्तुतीः कद्कदाकस्मिन्कालेश्रवत्श्रृणुयात् यद्यदासइन्द्रः हर्म्यस्यहर्म्योपलक्षितेनगृहेणयुक्तस्ययजमानस्यसंबन्धिनोविशः ऋत्विग्लक्षणान्मनुष्यान् आभिमुख्येनमानट्प्राप्नोति तदानीं अध्वरेअस्मदीयेयज्ञेयजत्रोयष्टव्यःसन्उरुबहुलंक्रंसतेक्रमते स्वयमेवोत्सहतइत्यर्थः॥ कद् कद्‌ा अन्यलोपश्छान्दसः। नृँःपात्रं नृन्पेइतिसंहितायांनकारस्यरुत्वम् अत्रानुनासिकःपूर्वस्यतुवेत्यृकारःसानुनासिकः। पात्रम् पारक्षणे ताच्छीलिकस्तृन् व्यत्ययेनसोरमादेशः संज्ञापूर्वकस्यविधेरनित्यत्वाद्गुणाभावेयण्। देवयतां सुपआत्मनःक्यच् ततोलटःशतृ शतुरनुमइतिविभक्तेरुदात्तत्वम्। श्रवत् श्रुश्रवणे लेटयडागमः बहुलंछन्दसीतिविकरणस्यलुक्। तुरण्यन् तुरणत्वरायाम् कण्ड्वादिः। आनट् अश्नोतेर्लङि व्यत्ययेनपरस्मैपदम् श्नौप्राप्तेव्यत्ययेनश्नम् विकरणः व्रश्चादिषत्वेजश्त्वम् आडागमः। हर्म्यस्य हर्म्यशब्दादर्शआदित्वादच्। क्रंसते क्रमुपादविक्षेपे वृत्तिसर्गतायनेषुक्रमइत्यात्मनेपदम् लेटयडागमः सिब्बहुलंलेटीतिसिप्। यजत्रः अमिनक्षीत्यादिनायजेरत्रन्प्रत्ययः॥ १॥

१. मनुष्यों के पालन-कर्त्ता और गौ-रूप धन के दाता इन्द्र कब देवाभिलाषी अङ्गिरा लोगों की स्तुति सुनेंगे? जिस समय वे गृहपति यजमान के ऋत्विकों को सामने देखते हैं, उस समय वे यज्ञ में यजनीय होकर प्रभूत उत्साह से पूर्ण होते हैं।

स्तंभीद्‌ध्द्यांसधरुणंप्रुषायदृभुर्वाजायद्रविणंनरोगोः।
अनुस्वजांमहिषश्चक्षतव्रांमेनामश्वस्यपरिमातरंगोः ॥ २ ॥

स्तंभीत्। ह। द्याम्। सः। धरुणम्। प्रुषायत्। ऋभुः। वाजाय। द्रविणम्। नरः। गोः। अनु। स्वऽजाम्। महिषः। चक्षत। व्राम्। मेनाम्। अश्वस्य। परि। मातरम्। गोः॥ २॥

सइन्द्रः द्यांद्युलोकंस्तंभीद्ध स्तभ्नातिखलु तथागोः पणिभिरपहृतस्यगोसमूहस्यवजस्योदकस्यकिरणसमूहस्यवा नरोनेतासइन्द्रः ऋभुः सूर्यात्मनाउरुविस्तीर्णंभासमानःसन् द्रविणंसर्वैः प्राणिभिःअभिद्रवणीयं धरुणं उदकनामैतत् सर्वस्यधारकंवृष्ट्युदकंवाजायअन्नार्थं बलार्थंवाप्रुषायत् प्रुष्णातिसिञ्चति प्रवर्षतीत्यर्थः अपिचमहिषः महन्नामैतत् महान्सूर्यरूपीइन्द्रः स्वजांस्वःसकाशादुत्पन्नां व्रांवृणोतितमसासर्वमाच्छादयतीतिव्रारात्रिः यद्वा प्रकाशेनवृणोतीतिव्राउषाः तामनुचक्षत चष्टिःपश्यतिकर्मा अनुपश्चात्सख्यतिप्रकाशते स्वयंमेवप्रकाशोपिस्वगत्यानिष्पादिता-

धारात्वेरुषसश्च पश्चादुदेतीत्यर्थः अपिचेदमपरमाश्चर्यम् यदयमश्वस्यमेनां स्त्रीनामैतव स्त्रियंवडवांगोर्मातरं जननीं परिवैंपरीत्येविपरीतामकरोत् कदाचिदिन्द्रोलीलयाअश्वायांगामुत्पादयामास तदत्रप्रतिपाद्यते मन्त्रान्तरेचेन्द्रवाक्यरूपेएतद्विस्पष्टमवगम्यते॥ धरुणं धारोर्णिलुक्चेत्युनप्रत्ययः। पुषायत् पुषप्लुषस्नेहनसेचनपूरणेषु क्र्यादिकः लेटचडागमः छन्दसिशायजपीत्यहावपिश्नाप्रत्ययस्य शायजादेशः। नरः नृनये बहुलवचनात्कदोरवितिकर्तर्यप्। चक्षत चक्षिङ्व्यक्तायांवाचि छान्दसोलङ् बहुलंछन्दसीतिशपोलुगभावः॥ २॥

२. उन्होंने स्थिर-रूप से आकाश को धारण किया है। वे असुरों द्वारा अपहृत गायों के नेता हैं। वे विस्तीर्ण प्रभा से युक्त होकर सारे प्राणियों के द्वारा सेवनीय हैं और खाद्य के लिए जीवन-धारक वृष्टि-जल प्रेरित करते हैं। महान् सूर्यरूप इन्द्र, अपनी पुत्री उषा के अनन्तर उदित होते हैं। उन्होंने अश्व की स्त्री को गौ की माता किया या अथवा घोड़ी से गाय उत्पन्न की थी।

नक्षद्धवमरुणीःपूर्व्यंराट्तुरोविशामङ्गिरसामनुद्यून्।
तक्षद्वज्रंनियुतंतस्तम्भद्यांचतुष्पदेनर्यायद्विपादे॥ ३ ॥
नक्षत्। हवम्। अरुणीः। पूर्व्यम्। राट्। तुरः। विशाम्। अङ्गिरसाम्। अनु। द्यून्। तक्षत्। वज्रम्। निऽयुतम्। तस्तम्भत्। द्याम्। चतुःऽपदे। नर्याय। द्विऽपादे॥ ३॥

अरुणीःअरुणवर्णाआरोचमानावाउषसःराट्राजयन्प्रकाशयन् सूर्यात्मेन्द्रःपूर्व्यंपूर्वैर्ऋषिभिःप्रयुक्तम् हवम् इदानीं अस्माभिः क्रियमाणंआह्वानंनक्षत्नक्षतुश्रृणोतु कीदृशःअनुद्यून् अनुदिवसं विशांमनुष्याणांअङ्गिरसामृषीणांस्तोतॄणांतुरःधनस्यप्रेरयिता अपिच सइन्द्रः वज्रंस्वकीयंआयुधंनियुतंहन्तव्येनसहनितरांयुक्तंतक्षदकरोत् तथा द्यांद्युलोकंतस्तंभत् अस्तंभयच्च यथाअधोनपततितथाअकरोदित्यर्थः किमर्थं नर्याय नृभ्योहिताय चतुष्पदेगवाश्वादये द्विपादेमनुष्यायच एतदुभयथार्थमित्यर्थः॥ नक्षत् नक्षगतौ लेटचडागमः। पूर्व्यं पूर्वैःकृतमिनियौचेतियप्रत्ययः। राट् राजृदीप्तौ अस्मादन्तर्भावितण्यर्थाक्विप्। तुरः तुरत्वरणे इगुपधलक्षणःकः। तक्षत् तक्षूत्वक्षूतनूकरणे बहुलंछन्दस्यमाङ्योगेपीत्यडभावः। तस्तंभत् स्तभिस्कभिगतिप्रतिबन्धे अस्माण्ण्यन्ताल्लुङिचङिरूपम् चङ्यन्यतरस्यामिति उपोत्तमस्योदात्तत्वम्. पूर्वपदस्यासमानवाक्यस्थत्वान्निघाताभावः।चतुष्पदे चत्वारःपादाअस्य संख्यासुपूर्वस्येतिपादशब्दस्यान्त्यलोपःसमासान्तः चतुर्थ्येकवचनेभसंज्ञायांपादःपदितिपद्भावः। द्विपादे पूर्ववत्प्रक्रिया अयंतुविशेषः अयस्मयादित्वेनपदत्वाद्भसंज्ञायाअभावेपद्भावाभावः द्वित्रिभ्यांपाद्दन्मूर्धसुबहुव्रीहौइत्युत्तरपदान्तोदात्तत्वम्॥ ३॥

३. वे अरुणवर्ण उषा को रंजित करके हमारा उच्चारित पुरातन मंत्र सुनें। वे प्रतिदिन अङ्गिरा गोत्रवालों को अन्न देते हैं। उन्होंने हननशील वज्र बनाया है। वे मनुष्यों, चतुष्पदों और द्विपदों के हित के लिए, दृढ़रूप से, आकाश धारण करते हैं।

अस्यमदेस्वर्यंदाऋतायापीवृतमुस्रियाणामनीकम्।
यद्धप्रसर्गेत्रिककुम्निवर्तदपद्रुहोमानुषस्यदुरोवः ॥ ४ ॥

अस्य। मदे। स्वर्यम्। दाः। ऋताय। अपिऽवृतम्। उस्रियाणाम्।
अनीकम्। यत्। ह। प्रऽसर्गे। त्रिऽककुप्। निऽवर्तत्। अप। द्रुहः।
मानुषस्य। दुरः। वरिति वः ॥ ४ ॥

हेइन्द्र अस्यसोमस्यपानेनमदेहर्षेसतिऋताययज्ञार्थंस्वर्यंस्तुत्यंअपीवृतंपणिभिर्गुहासुनिगूढंउस्रियाणांगवामनीकंसंघं दाः अङ्गिरोभ्योदत्तवानसि उत्तरोर्धर्चःपरोक्षकृतः यद्ध यदाखलु प्रसर्गेयुद्धेत्रिककुप्त्रिषुलोकेषुउच्छ्रितइन्द्रः निवर्तत् नितरांवर्तेत तदानींसइन्द्रोद्रुहोद्रोग्धुः मानुषस्यमनोःसंबन्धिनोसुरस्यपणेःसंवन्धीनिदुरोद्वाराणिगवामनिर्गमनायपिहितानिअपवः अपवृणोति उद्घाटयति ॥ स्वर्यम् स्वृशब्दोपतापयोः ऋहलोर्ण्यत् संज्ञापूर्वकस्यविधेरनित्यत्वाद्वृद्ध्यभावः। अपीवृतम् अपिपूर्वाद्वृणोतेःकर्मणिनिष्ठा निपातस्यचेतिपूर्वपदस्यदीर्घः गतिरनन्तरइतिगतेःप्रकृतिस्वरत्वम्। प्रसर्गे प्रकर्षेणसृज्यन्तेविमुच्यन्तेस्मिन्निषवइतिप्रसर्गः अधिकरणेघञ् कृदुत्तरपदप्रकृतिस्वरत्वम् छान्दसस्थाथादिस्वराभावः। निवर्तत् वृतुवर्तने लेट्यडागमः व्यत्ययेनपरस्मैपदम्। वः वृञ्वरणे छान्दसोलुङिमन्त्रेघसेतिच्लेर्लुक् गुणेहल्ङ्यादिलोपः ॥४॥

४. इस सोमपान से हृष्ट होकर तुमने स्तुति-पात्र और पणिद्वारा छिपाई हुई गौओं को यज्ञार्थ दान किया था। जिस समय त्रिलोक-श्रेष्ठ इन्द्र युद्ध में रत होते हैं, उस समय वे मनुष्यों के क्लेश-दाता पणि असुर का द्वार, गौओं के निकलने के लिए, खोल देते हैं।

तुभ्यंपयोयत्पितरावनीतांराधःसुरेतस्तुरणेभुरण्यू।
शुचियत्तेरेक्णआयजन्तसबर्दुघायाःपयउस्रियायाः॥ ५ ॥२४॥

तुभ्यम्। पयः। यत्। पितरौ। अनीताम्। राधः। सुऽरेतः। तुरणे।
भुरण्यू इति। शुचि। यत्। ते। रेक्णः। आ। अयजन्त।
सबःऽदुघायाः। पयः। उस्रियायाः ॥ ५ ॥ २४ ॥

हेइन्द्र तुरणेक्षिप्रकारिणे तुभ्यंभुरण्यूकृत्स्नंजगत्पोषयन्त्यौपितरौउत्पादयन्त्यौद्यावापृथिव्यौयद्यदापयः सान्नाय्यलक्षणंहविः अनीतांगोष्वनयतां न्यधिषातामित्यर्थः कीदृशंपयः राधः

राधकं समृद्धिकरं सुरेतः शोभनरेतस्कं कृत्स्नजगदुत्पादनशक्तमित्यर्थः हविषःसकाशाद्धि जगदुत्पद्यते अग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठते । आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइति ॥ यद्यदाद्यावापृथिवीभ्यांगोष्वानीतंशुचिशुद्धं सबर्दुघायाः क्षीरस्यदोग्ध्र्याउस्रियायाः गोःपयः रेक्णः धननामैतत् धनवदतिप्रियं यद्वा अतिरिक्तंप्रवृद्धमेवंविधंहविः तेतुभ्यमायजन्त आभिमुख्येनयजमानाःप्रायच्छंन् तदानींदुरोमानुषस्यद्वाराणि अपवृणोतीतिपूर्वयासंबन्धः । अनीताम् णीञ्प्रापणे लुङि बहुलंछन्दसीतिशपोलुक् । सुरेतः सोर्मनसीअलोमोषसीइत्युत्तरपदाद्युदात्तत्वम् । तुरणे तुरणत्वरायाम् कण्ड्वादिः यक् क्विप्चेतिक्विप् अतोलोपयलोपौ । भुरण्यू भुरणधारणपोषणयोः अयमपि कण्ड्वादिः यक् औणादिकउप्रत्ययः ॥ ५ ॥

५. क्षिप्रकारी तुम्हारे लिए जगत् के पालक पिता द्यौ और माता पृथिवी समृद्धिशाली और उत्पादन-शक्ति-युक्त दुग्ध लाये थे। जिस समय उनने दुग्धवती गौओं का विशुद्ध धन-युक्त दुग्ध तुम्हारे सामने रक्खा था, उस समय तुमने पणि का द्वार खोल दिया था।

अध॒प्रज॑ज्ञेत॒रणि॑र्ममत्तु॒प्ररो॑च्य॒स्याउ॒षसो॒नसूरः॑ ।
इन्दु॒र्येभि॒राष्ट॒स्वेदु॑हव्यैः॒स्रुवे॒णसि॒ञ्चञ्ज॒रणा॒भिधाम॑ ॥ ६ ॥

अध॑ । प्र । ज॒ज्ञे । त॒रणिः॑ । म॒मत्तु॒ । प्र । रो॒चि॒ । अ॒स्याः । उ॒षसः॑ । न । सूरः॑ । इन्दुः॑ । येभिः॑ । आष्ट॑ । स्वऽइ॑दुहव्यैः । स्रु॒वेण॑ । सि॒ञ्चन् । ज॒रणा॑ । अ॒भि । धाम॑ ॥ ६ ॥

अधइदानीमयमिन्द्रःस्तुतिभिःप्रीयमाणःसन्प्रजज्ञे प्रकर्षेणप्रादुर्बभूव सतरणिःशत्रूणांतारकःअस्मान्ममत्तुमादयतु सचप्ररोचिप्रकृष्टंरोचते तत्रदृष्टान्तः—अस्याःअस्माभिः प्रहस्यमानायाः उषसःसमीपेवर्तमानःसूरोन सूर्यइव जरणाजरणीयःस्तोतव्यःइन्दुःसोमः धामआहवनीयलक्षणं स्थानमभिलक्ष्यस्रुवेणसिञ्चन् सिच्यमानःसन् स्वेदुहव्यैःस्वभूतसमृद्धहविष्कैर्येभिर्यैरस्माभिः आष्टआशितःआसीत् तानस्मान्मादयत्वित्यर्थः ॥ जज्ञे जनीप्रादुर्भावे लिटि गमहनेत्युपधालोपः । ममत्तु मदीहर्षे बहुलंछन्दसीतिविकरणस्यश्लुः । रोचि रुचदीप्तौ छान्दसोवर्तमानेलुङ् व्यत्ययेन च्लेश्चिणादेशः । आष्ट अशभोजने कर्मणिलुङ्बहुलंछन्दसीतिविकरणस्यलुक् व्रश्चादिषत्वेष्टुत्वम् आडागमः यद्वृत्तान्नित्यमितिनिघातप्रतिषेधः । स्वेदुहव्यैः इदिपरमैश्वर्ये औणादिकउप्रत्ययः अनित्यमागमशासनमितिनुमभावः इदूनिप्रभूतानिचतानिहव्यानिस्वभूतानिचहव्यानियेषाम् यद्वा ञिइन्धीदीप्तौस्वायत्तानिइदूनिइद्धानिहव्यानियेषाम् अथवा स्वभूतमिदंपुरोवर्तिहव्यंहविर्येषांतेतथोक्ताः पृषोदरादित्वादभिमतरूपसिद्धिः । सिञ्चन् षिचिरक्षरणे व्यत्ययेनकर्मणिकर्तृप्रत्ययः शेमुचादीनामितिनुम् । जरणा जरतिःस्तुतिकर्मा अस्मात्कर्मणिल्युट् सुपांसुलुगितिविभक्तेराकारः व्यत्ययेनलित्स्वराभावः ॥ ६ ॥

६. इस समय इन्द्र प्रकट हुए हैं। वे उषा के समीप में विद्यमान सूर्य की तरह दीप्तिमान् हुए हैं। ये शत्रु-विजयी इन्द्र हमें मत्त

या प्रसन्न करें। हम भी हव्य अर्पण करके, स्तुति-भाजन सोम-रस को, पात्र-द्वारा, यज्ञ-स्थान में सिञ्चित करके, उसी सोम-रस का पान करें।

स्विध्मायद्वनधितिरपस्यात्सूरोअध्वरेपरिरोधनागोः।
यद्धप्रभासिकृत्व्याँअनुद्यूननर्विशेपश्विषेतुराय ॥ ७ ॥

सुऽइध्मा। यत्। वनऽधितिः। अपस्यात्। सूरः। अध्वरे। परि।
रोधना। गोः। यत्। ह। प्रऽभासि। कृत्व्यान्। अनु। द्यून्।
अनर्विशे। पशुऽइषे। तुराय ॥ ७ ॥

यद्यदिस्विध्मासुदीप्तास्यावनधितिः वनेछेत्तव्येवृक्षसमूहे निधातव्याशस्त्रीअपस्यात् अपः विशसनात्मकंस्वकीयंकर्मकर्तुमिच्छेत् तदानीं सूरः प्रेरकोध्वर्युः अध्वरेयज्ञेगोः पशोः रोधनारोधनाययूपेनियोजनायपरिभवति समर्थोभवति यद्वा स्विध्मासूर्यकिरणैःसुदीप्तावनधितिः वनमुदकमस्यांधीयतइतिवनधितिर्मेघमाला सायद्यदाअपस्यात् अपःप्रवर्षणलक्षणं कर्मकरोति तदानीं सूरः प्रेरकइन्द्रः अध्वरेयज्ञस्यनिमित्तभूतेअध्वर्तव्येअहिंसितव्येन्तरिक्षे वर्तमानःसन् गोर्वृष्ट्युदकस्यरोधनारोधनान्यावरणानिपरिपरितोनिवारयतीतिशेषः उत्तरोर्धर्चः प्रत्यक्षकृतः हेइन्द्र सूर्यात्मनावर्तमानस्त्वं कृत्व्यान् कृत्वीतिकर्मनाम कर्मसुसाधून् द्यून् दिवसान्अनुलक्ष्य यद्धयदाखलुप्रभासिप्रकर्षेणदीप्यसे तदानींअनर्विशेअनसाशकटेनइन्धनाद्याहरणायअरण्यंप्रविशते यद्वा गन्तव्यंस्थलंप्रतिगन्तुं अशक्तायपुरुषायपश्विषेपशून् प्रेरयते तुराय त्वरमाणायगोधनपालायचसिद्ध्येदभिमतमितिवाक्यशेषः ॥ स्विध्मा शोभनंइध्मंदीप्तंआस्यंदीप्तिर्वायस्याःसायथोक्ता नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम्। अपस्यात् अपस्शब्दात्सुपआत्मनःक्यच् लेटचाडागमः। रोधना रुधिर्आवरणे ल्युट्चेतिभावेल्युट् शेश्छन्दसिबहुलमितिशेर्लोपः। अनर्विशे अनसाविशतिप्राप्नोतीत्यनर्विट् विशतेःक्विप् अहरादीनांपत्यादिषूपसंख्यानमितिसकारस्यरेफादेशः यद्वा अर्तेःकर्मणिविच् अरंगन्तव्यंप्रति विशतिप्राप्नोतीतिअर्विट् नञार्विट्अनर्विट् अव्ययपूर्वपदप्रकृतिस्वरत्वम् अतएवव्युत्पत्त्यनवधारणादनवग्रहः। पश्विषे इषगतौ अस्मादन्तर्भावितण्यर्थात् क्विप्चेतिक्विप् ॥ ७॥

७. जिस समय सूर्य-किरण-द्वारा प्रकाशित मेघमाला जल-वर्षण करने को तैयार होती है, उस समय प्रेरक इन्द्र, यज्ञ के लिए, वृष्टि के आवरण का निवारण करते हैं। इन्द्र, जिस समय तुम सूर्य-रूप से कर्म के दिन में किरण दान करते हो, उस समय गाड़ीवान्, पशु-रक्षक और क्षिप्रगामी अपने-अपने कार्य में सिद्धि प्राप्त करते हैं।

अष्टामहोदिवआदोहरीइहद्युम्नासाहमभियोधानउत्सम्।
हरिंयत्तेमन्दिनंदुक्षन्वृधेगोरभसमद्रिभिर्वाताप्यम् ॥ ८ ॥

अष्टा । महः । दिवः । आदः । हरी इति । इह । द्युम्नऽसहम् ।
अभि । योधानः । उत्सम् । हरिम् । यत् । ते । मन्दिनम् ।
धुक्षन् । वृधे । गोऽरभसम् । अद्रिऽभिः । वाताप्यम् ॥ ८ ॥

हेइन्द्र महोमहतोदिवोमदकरस्य सोमस्याष्टाभोक्तारौ हरीस्वकीयावश्वौ इह अस्मिन्कर्मणिआदः पीतशेषंसोमंपायय तथा द्युम्नासाहं द्युम्नस्यास्मदीयस्यधनस्याभिभवितारम् उत्समुत्स्रावयितारम् शत्रुंयोधानः योधनशीलस्त्वमभिभव यत्यदातेतववृधेवर्धनाय हरिंमनोहरं मन्दिनंमदकरं गोरभसम् अत्रगोशब्दःपयसिवर्तते पयोबलंतद्वद्वेगवन्तंवीर्यवन्तमित्यर्थःवाताप्यंवातेनप्राप्तव्यं वाततुल्येनशीघ्रकारिणात्वयापातव्यमित्यर्थः एवंविधंसोममद्रिभिःग्रावभिः धुक्षन्दुहन्तिऋत्विजोभिषुण्वन्ति तदानीम् अष्टेतिपूर्वत्रसंबन्धः॥ अष्टा अशभोजने तृच् आगमानुशासनस्यानित्यत्वादिडभावः। धुक्षन् पदकालीनोभष्भावश्छान्दसः ॥ ८ ॥

८. जिस समय ऋत्विक् लोग तुम्हारे वर्द्धन के लिए मनोहर, प्रसन्नकर, बलदायक और तुम्हारे उपभोग्य सोम से, प्रस्तर-द्वारा, रस निकालें उस समय हर्ष-दायक सोम-रस के उपभोक्ता अपने हरि नाम के दोनों घोड़ों को, इस-यज्ञ में, सोमपान कराओ। तुम युद्ध-निपुण हो। हमारे धनापहारी शत्रु का दमन करो।

त्वमायसंप्रतिवर्तयोगोर्दिवोअश्मानमुपनीतमृभ्वा ।
कुत्सायत्रपुरुहूतवन्वञ्छुष्णमनन्तैःपरियासिवधैः ॥ ९ ॥

त्वम् । आयसम् । प्रति । वर्तयः । गोः । दिवः । अश्मानम् ।
उपऽनीतम् । ऋभ्वा । कुत्साय । यत्र । पुरुऽहूत । वन्वन् ।
शुष्णम् । अनन्तैः । परिऽयासि । वधैः ॥ ९ ॥

हेइन्द्र त्वंगोः गन्तुः शुष्णस्यासुरस्यवधार्थमायसमयोमयंवज्रंप्रतिवर्तयः आभिमुख्येनन्यसृजःकीदृशंवज्रंदिवोद्युलोकात्ऋभ्वादीप्तेनत्वष्ट्राउपनीतम् आनीतमश्मानंशीघ्रंशत्रोर्व्यापकं यत्रयदा हेपुरुहूतपुरुभिर्बहुभिःस्तोतृभिराहूतेन्द्र कुत्सायएतत्संज्ञायऋषयेशुष्णंशोषकमसुरमनन्तैर्निरवधिकैर्वधैर्हननसाधनैः आयुधैर्वन्वन् हिंसन्परियासि परितोगच्छसि तदानींतद्वधार्थंवज्रंप्रत्यवर्तय इत्यर्थः ॥ अश्मानम् अशूङ्व्याप्तौ अन्येभ्योपिदृश्यन्तइतिमनिन् । ऋभ्वा जसादिषुछन्दसिवावचनमितिनाभावस्यविकल्पितत्वादभावेयणादेशः । वन्वन् वनुयाचने अत्रहिंसार्थः तथाचयास्कः— वनुष्यतिहन्तिकर्मानवगतसंस्कारोभवतीति । वधैः हनश्चवधइतिहन्तेःकरणेअप् तत्सन्नियोगेनवधादेशश्च स्वचावन्तोन्तोदात्तः तस्मात्परस्यलोपेसतिउदात्तनिवृत्तिस्वरेणप्रत्ययस्योदात्तत्वम् ॥ ९ ॥

९. तुमने ऋभु-द्वारा आकाश से लाये गये, शीघ्रगामी और लौहमय वज्र को त्वरित-गति शुष्ण असुर के प्रति फेंका था। बहुलोक-

पूजा-पात्र, उस समय तुम, कुत्स ऋषि के लिए, शुष्ण को अनेकानेक हननशील अस्त्रों-द्वारा मारते हुए घेरते हो।

पुरायत्सूरस्तमसोअपीतेस्तमद्रिवःफलिगंहेतिमस्य।
शुष्णस्यचित्परिहितंयदोजोदिवस्परिसुग्रथितंतदादः॥१०॥२५॥

पुरा। यत्। सूरः। तमसः। अपिऽइतेः। तम्। अद्रिऽवः। फलिऽगम्। हेतिम्। अस्य। शुष्णस्य। चित्। परिऽहितम्। यत्। ओजः। दिवः। परि। सुऽग्रथितम्। तत्। आ। अदरित्यदः॥१०॥२५॥

पुरायत्यदासूरःसूर्यः तमसः तमोरूपस्यशुष्णस्यासुरस्यापीतेः सङ्ग्रामान्मुक्तोभवदिति शेषः तदानीं हेअद्रिवः आद्रिणात्यनेनेत्यद्रिर्वज्रः तद्वन्निन्द्र तंफलिगंमेघनामैतत् मेघरूपेणावृण्वन्तंहेतिंहन्तारंशुष्णंअसुरंअस्यनिरसितवानसि यद्वा अस्यशुष्णस्यासुरस्यहेतिंहननसाधनं आयुधंफलिगंमेघलक्षणंमाभांक्षीरितिशेषः तथाशुष्णस्यचिच्छोषयितुरसुरस्यचयदोजःआच्छादकंबलंदिवस्परिद्योतमानस्यसूर्यस्योपरिपरिहितंआच्छादितंसुग्रथितंसुष्ठुसूर्येसक्तंतदोजः तस्मात्सूर्यादादः आदृणाः विश्लिष्टंकृतवानसीत्यर्थः॥ अद्रिवः छन्दसीरइतिमतुपोवत्वम् मतुवसोरुरितिनकारस्यरुत्वम्। हेतिम् कृत्यल्युटोबहुलमितिबहुलवचनाद्धन्तेःकर्तरिक्तिन् ऊतियूतीत्यादौनिपातनाद्रूपसिद्धिरन्तोदात्तत्वंच। अस्य असुक्षेपणे लटःसिप् तस्यव्यत्ययेनह्यादेशः अतोहेरितिहेर्लुक्। दिवस्परि पञ्चम्याःपरावध्यर्थेइतिविसर्जनीयस्यसत्वम्। अदः दृविदारणे लङिसिपिबहुलंछन्दसीतिविकरणस्यलुक् गुणेहल्ङ्याब्भ्यइतिसिलोपः॥ १०॥

१०. जिस समय सूर्य अन्धकार के साथ संग्राम से मुक्त हुए, उस समय हे वज्रधारिन्, तुमने उनके मेघ-रूप शत्रु का विनाश कर दिया। उस शुष्ण का जो बल सूर्य को आच्छादित किये हुए था और सूर्य के ऊपर ग्रथित हुआ था, उसे तुमने भग्न कर दिया था।

अनुत्वामहीपाजसीअचक्रेद्यावाक्षामामदतामिन्द्रकर्मन्।
त्वंवृत्रमाशयानंसिरासुमहोवज्रेणसिष्वपोवराहुम्॥ ११॥

अनु। त्वा। मही इति। पाजसी इति। अचक्रे इति। द्यावाक्षामा। मदताम्। इन्द्र। कर्मन्। त्वम्। वृत्रम्। आऽशयानम्। सिरासु। महः। वज्रेण। सिस्वपः। वराहुम्॥ ११॥

हेइन्द्र महीमहत्यौमहत्यौपाजसीबलवत्यौअचक्रेअचंक्रमणेसर्वत्रव्याप्यवर्तमानेद्यावाक्षमाद्यावापृथिव्यौकर्मन्वृत्रवधादिलक्षणेकर्मणिप्रवृत्तंत्वात्वांअनुमदतांहृष्टमकुरुताम् अन्वमन्येतांवा तथा-

त्तिरीयकम्—सआभ्यामेवप्रसूतइन्द्रोवृत्रमहन्निति। तदनन्तरंत्वमाशयानमासमन्ताद्व्याप्यवर्तमानं-वराहुंवराहारंवृत्रमसुरंसिरासुसरणशीलासुअप्सुमहोमहतावज्रेणहत्वासिष्वपःअस्वापयः वज्रेणहत्वा-पातितवानित्यर्थः ॥ महीइसुपांसुलुगितिविभक्तेःपूर्वसवर्णदीर्घः। पाजसी पाजःशब्दोबलवाचको-लक्षणयात्रतद्वतिवर्तते इयाडियाजीकाराणामुपसंख्यानमितिविभक्तेरीकारादेशः। द्यावाक्षामा द्यौश्च-क्षामाच दिवोद्यावेतिद्यावादेशः देवताद्वन्द्वेचेत्युभयपदप्रकृतिस्वरत्वम् सुपांसुलुगितिविभक्तेर्लुक्। मदतां मदीहर्षे व्यत्ययेनशप् बहुलंछन्दस्यमाङ्योगेपीत्यडभावः। महः महतः करणेशेषत्वेनवि-वक्षितेषष्ठी अच्छब्दलोपश्छान्दसः। सिष्वपः ञिष्वप्शये अस्मात्ण्यन्ताल्लुङिचङिसंज्ञापूर्वकस्य-विधेरनित्यत्वात्स्वापेश्चङीतिसम्प्रसारणंनक्रियते ॥ ११ ॥

११. इन्द्र, महान् बली और सर्व-व्यापक द्यौ और पृथिवी ने वृत्र-वध-कार्य में तुम्हें उत्साहित किया था। तुमने उस सर्वत्र व्यापक और श्रेष्ठ हार-युक्त वृत्र को महान् वज्र से, प्रवहमान जल में, फेंक दिया था।

त्वमिन्द्रनर्योयाँअवोनॄन्ति(नॄंस्ति)ष्ठावातस्यसुयुजोवहिष्ठान्।
यंतेकाव्यउशनामन्दिनंदाद्वृत्रहणंपार्यंततक्षवज्रम् ॥ १२ ॥

त्वम्। इन्द्र। नर्यः। यान्। अवः। नॄन्। तिष्ठ। वातस्य। सुऽयुजः। वहिष्ठान्। यम्। ते। काव्यः। उशना। मन्दिनम्। दात्। वृत्रऽहनम्। पार्यम्। ततक्ष। वज्रम् ॥ १२ ॥

हेइन्द्र नर्योनृभ्योहितस्त्वंयान्नृन्नेतृन् अश्वान् अवः अवसिरक्षसितान्वातस्यतुल्यान्तद्वत्-शीघ्रंगच्छतः सुयुजः शोभनंरथेनयुज्यमानान्वहिष्ठान् अतिशयेनवोढ्ःनश्वान्तिष्ठ आतिष्ठ आरोहे-त्यर्थः काव्यः कवेःपुत्रउशनामन्दिनंमदकरंयंवज्रंतेतुभ्यंदात्दत्तवान् तंवज्रंवृत्रहणंवृत्रस्यासुरस्य-घातकंपार्यंशत्रूणांपारणेअतिक्रमणेसमर्थंच ततक्षतनूकृतवानसि ॥ अवःअवतेर्लेट्यडागमः इतश्च-लोपइतीकारलोपः। वहिष्ठान् वोढ्ःशब्दात्तुश्छन्दसीतिइष्ठन् तुरिष्ठेमेयःस्वितितृलोपः। पार्यं पारती-रकर्मसमाप्तौ अस्माण्ण्यन्तादचोयदितियत्। ततक्ष तक्षूत्वक्षूतनूकरणे पुरुषव्यत्ययः ॥ १२ ॥

१२. इन्द्र, तुम मानव-बन्धु हो। तुम जिन अश्वों की रक्षा करते हो, उन वायु-तुल्य, शोभन और वाहक अश्वों पर चढ़ो। कवि के पुत्र उशना ने जो हर्षदायक वज्र तुम्हें दिया था, तुमने उसी वृत्र-ध्वंसक और शत्रु-नाशक वज्र को तीक्ष्ण किया है।

त्वंसूरोहरितोरामयोनॄन्भरच्चक्रमेतंशोनायमिन्द्र।
प्रास्यंपारंनवतिंनाव्यानामपिकर्तमवर्तयोयज्यून् ॥ १३ ॥

तै० सं. २. ५. २।

त्वम् । सूर॑ः । ह॒रित॑ः । र॒मय॑ः । नॄन् । भर॑त् । च॒क्रम् । एत॑शः ।
न । अ॒यम् । इ॒न्द्र॒ । प्र॒ऽअस्य॑ । पा॒रम् । न॒व॒तिम् । ना॒व्या॑नाम् ।
अपि॑ । क॒र्तम् । अ॒व॒र्तय॑ः । अय॑ज्यून् ॥ १३ ॥

हेइन्द्र सूरः सूर्यात्मनावर्तमानस्त्वं हरितोहरिद्वर्णान्नृन्नेतॄनश्वान् यद्वा रसहरणशीलान्रश्मीन्रामयःउपरमयः अयंएतशोन एतशइतिसूर्याश्वस्याख्या तथाचश्रूयते—एतशेनसूर्योदेवतांगमयत्विति । नशब्दश्चार्थे एतशश्चरथस्यचक्रं भरत्प्रावहत् अपिच त्वंनाव्यानांनावातार्याणांनदीनां नवतिंनवतिसंख्यां अतीत्यवर्तमानंपारंतीरदेशंसप्तम्यर्थेद्वितीया तीरदेशेअयज्यून्अयजमानान् यज्ञविधिहीनान् असुरादीन्प्रास्य प्रक्षिप्य तत्रकर्तमवर्तयः कर्तव्यमपिकृत्वातानयजमानानवर्तयः प्रापयः ॥ रमयः लङि बहुलंछन्दस्यमाङ्योगेपीत्यडभावः अन्येषामपिदृश्यतइतिसांहितिकोदीर्घः । प्रास्य असुक्षेपणे अस्मादल्यपिरूपम् । नाव्यानाम् नौवयोधर्मेत्यादिनायत् तित्स्वरितमितिस्वरितत्वम् ॥ १३ ॥

१३. सूर्य-रूप इन्द्र, हरि नामक अश्वों को रोको। इन्द्र का एतश नाम का घोड़ा रथ का चक्का खींचता है। तुम नौका-द्वारा नब्बे नदियों के पार पहुँचकर वहाँ यज्ञ-विहीन असुरों या अनार्यों से कर्त्तव्य कर्म कराओ।

त्वंनो॑अ॒स्याइ॑न्द्रदु॒र्हणा॑याः पा॒हिव॑ज्रिवोदु॒रि॒ताद॒भीके॑ ।
प्रनो॒वाजा॑न्र॒थ्यो॒३॑अश्व॑बुध्यानि॒षेय॑न्धि॒श्रव॑से॒सूनृता॑यै ॥ १४ ॥

त्वम् । न॒ः । अ॒स्याः । इ॒न्द्र॒ । दु॒ःऽहना॑याः । पा॒हि । व॒ज्रि॒ऽव॒ः ।
दु॒ःऽइ॒तात् । अ॒भीके॑ । प्र । न॒ः । वाजा॑न् । र॒थ्य॑ः । अश्व॑ऽबुध्यान् ।
इ॒षे । य॒न्धि॒ । श्रव॑से । सू॒नृता॑यै ॥ १४ ॥

हेवज्रिवः वज्रवन्निन्द्र त्वंदुर्हणायाः दुःखेनहन्तव्यायाः अस्याः अवृतेर्दारिद्र्यात् नोस्मान्पाहिरक्ष तथा दुरितात्पापात् अभीकेअभिप्राप्तेसमीपवर्तिनिसङ्ग्रामे अस्मान्रक्ष अपिच नोस्मभ्यं रथ्योरथयुक्तान् अश्वबुध्यान् अश्वानांबोधकान् अश्वायावद्भिर्लक्ष्यन्तेतावदित्यर्थः यद्वा अश्वबुध्नान् छान्दसोवर्णविकारः अश्वमूलान् अश्वप्रमुखानित्यर्थः सर्वंहिधनं अश्वमूलंदासापवर्गं यथोक्तम् दासप्रवर्गंरयिमश्वबुध्यमिति । एवंविधान्वाजान्धनानि प्रयन्धिप्रयच्छ किमर्थंइषेअन्नार्थं श्रवसेकीर्त्यर्थं सूनृतायै सूनृताप्रियसत्यात्मिकावाक्तदर्थंच ॥ दुर्हणायाः ईषद्दुःसुष्विविहन्तेःकर्मणिखल् । पाहि पादादित्वान्निघाताभावः । वज्रिवः वज्रोस्य-

१ तै० सं० १. ६. ४. । २ ऋ० सं० १. ६. २५. ।

छन्दसीरइतिमत्वुपोवत्वम् संबुद्धौमतुवसोरुरितिनकारस्यरुत्वम् । रथ्यः छन्दसीवनिपाविितिरथशब्दान्मत्वर्थीयईकारः । गन्धि यमउपरमे बहुलंछन्दसीतिविकरणस्यलुक् वाछन्दसीतिहेःपित्त्वेनङित्त्वाभावादङितश्चेतिहेर्धिः ॥ १४ ॥

१४. वज्रधर इन्द्र, तुम हमें इस दुर्दान्त दरिद्रता से बचाओ; समीप-वर्त्ती संग्राम में हमें पाप से बचाओ। उन्नत-कीर्त्ति और सत्य के लिए हमें रथ, अश्व, धन आदि दान करो।

मासातेअस्मत्सुमतिर्विदसद्वाजप्रमहःसमिषोवरन्त ।
आनोभजमघवन्गोष्वर्योमंहिष्ठास्तेसधमादःस्याम॥१५।२६॥

मा । सा । ते । अस्मत् । सुऽमतिः । वि । दसत् । वाजऽप्रमहः ।
सम् । इषः । वरन्त । आ । नः । भज । मघऽवन् । गोषु । अर्यः ।
मंहिष्ठाः । ते । सधऽमादः । स्याम ॥ १५ ॥ २६ ॥

हेवाजप्रमहः वाजैर्धनैःप्रमहनीयेन्द्र तेत्वदीयासासुमतिःशोभनानुग्रहरूपाबुद्धिः अस्मत् अस्मासुमाविदसत् माविशुष्यतु तथाइषोन्नान्यस्मान्संवरन्तसंवृतान्कुर्वन्तु हेमघवन्धनवन्निन्द्र अर्योधनपतिस्त्वंनोस्मान् गोपुआभजप्रापय तेतवमंहिष्ठाः अतिशयेनस्तुतिभिः प्रवर्धयितारोवयंसधमादःस्याम पुत्रपौत्रादिभिःसहमाद्यन्तोभवेम ॥ अस्मत् सुपांसुलुगितिसप्तम्यालुक् । दसत् दसुउपक्षयेमाङिलुङिपुषादित्वादङ् । वाजप्रमहः वाजैर्धनैःप्रकृष्टंमहस्तेजोयस्यसतथोक्तः पादादित्वादाष्टमिक निघाताभावः पाष्ठिकमामन्त्रिताद्युदात्तत्वम् । वरन्त वृञ्वरणे व्यत्ययेनशप् । गोषु सावेकाचइतिप्राप्तस्यविभक्त्युदात्तत्वस्य नगोश्वन्साववर्णेतिप्रतिषेधः । अर्यः अर्यःस्वामिवैश्ययोरितिनिपात्यते अर्यःस्वाम्याख्याचेदित्यन्तोदात्तत्वम् । मंहिष्ठाः महिवृद्धौ इदित्त्वान्नुम् अस्माद् णौवितण्यर्थोतृच् तुश्छन्दसीतीष्ठन् तुरिष्ठेमेयःस्विवितितृलोपः । सधमादः मदतृप्तियोगे चौरादिकः सहमादयन्तेतृप्ताभवन्तीतिसधमादः क्विप्चेतिक्विप् जस् सधमादस्थयोश्छन्दसीति सहस्यसधादेशः ॥ १५ ॥

१५. धन के लिए पूजनीय इन्द्र, हमारे पास से अपना अनुग्रह नहीं हटाना। हमें अन्न पुष्टि दे। मघवन्, तुम धनपति हो। हमें गो दो। हम तुम्हारी पूजा में तत्पर हैं। हम पुत्र, पौत्र आदि के साथ धन प्राप्त करें।

॥ इतिप्रथमस्याष्टमेषड्विंशोवर्गः ॥ २६ ॥

॥ इत्यष्टादशोनुवाकः ॥

वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन् । पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

॥ इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरेणसायणाचार्येणविरचितेमाधवीयेवेदार्थप्रकाशेऋक्संहिताभाष्येप्रथमाष्टकेऽष्टमोध्यायः समाप्तः ॥ ८ ॥

॥ इतिप्रथमाष्टकं समाप्तम् ॥ १ ॥

वैदिक-संहिता

- ☆ **ऋग्वेद संहिता।** मूलमात्र (गुटका)
- ☆ **ऋग्वेद संहिता।** मूलमात्र।
- ☆ **ऋग्वेद संहिता।** भाषामात्र। रामगोविन्द त्रिवेदी
- ☆ **ऋग्वेद संहिता।** सायणाचार्य कृत भाष्य एवं हिन्दी व्याख्या सहित। 1-8 भाग सम्पूर्ण
- ☆ **ऋग्वेद संहिता।** (प्रथम अध्याय, सूक्त 1-19) हिन्दी व्याख्या तथा हिन्दी अंग्रेजी अनुवाद। सम्पादक-प्रो. उमाशंकर शर्मा 'ऋषि'
- ☆ **शुक्लयजुर्वेद संहिता।** मूलमात्र (गुटका)
- ☆ **शुक्लयजुर्वेद संहिता।** सम्पा. श्री दौलतराम
- ☆ **शुक्लयजुर्वेद संहिता।** मूलमात्र। (निर्णयसागर [illegible]करण)
- ☆ **शुक्लयजुर्वेद संहिता।** पदपाठ-उव्वट-महीधरभाष्य संवलित तत्त्वबोधिनी हिन्दी व्याख्या सहित। डॉ. रामकृष्ण शास्त्री
- ☆ **सामवेद संहिता।** मूलमात्र (गुटका)
- ☆ **सामवेद संहिता।** सायणभाष्य तथा पं. रामस्वरूप शर्मा 'गौड' कृत हिन्दी भाषानुवाद सहित।
- ☆ **अथर्ववेद संहिता।** मूलमात्र (गुटका)
- ☆ **अथर्ववेद संहिता।** सायणभाष्य तथा पं. रामस्वरूप 'गौड' कृत हिन्दी भाषानुवाद सहित। 1-8 भाग

चौखम्बा विद्याभवन

वाराणसी